ইমং দ্বিপ্রকারং ধর্ম্মং নিঃশ্রেয়সপ্রয়োজনং পরমার্থতত্ত্বঞ্চ বাসুদেবাখ্যং পরব্রহ্মাভিধেয়-ভূতং বিশেষতোঽভিব্যঞ্জয়ন্ বিশিষ্টপ্রয়োজনসম্বন্ধাভিধেয়বদ্গীতাশাস্ত্রং যতস্তদর্থবিজ্ঞানেন সমস্তপুরুষার্থসিদ্ধিরতস্তদ্বিবরণে যত্নঃ ক্রিয়তে ময়া, অত্র চ ধৃতরাষ্ট্রউবাচ ধর্ম্মক্ষেত্রইত্যাদি।

---

ভাবোঽভিপ্রেতঃ দ্বিবিধকরণব্যাপারবিরহিতঃসন্ প্রাগুক্তোঽধিকারী কেবলমেকস্মিন্ন-দ্বিতীয়ে ব্রহ্মণ্যাসনমবস্থানং তত্র লীনস্তস্মিন্নেব সমাপ্তিভাগী স্যাত্তস্যাসংপ্রজ্ঞাতসমাধিনি-ষ্ঠস্য সর্ব্বকর্ম্মত্যাগহেতুকং জ্ঞানং মুক্তিহেতুর্ভবতীত্যর্থঃ। ন কেবলমনুগীতাস্বেবযথোক্তংজ্ঞান-মুক্তম্; কিন্তু প্রকৃতেঽপি শাস্ত্রসমাপ্ত্যবসরে দর্শিতমিত্যাহ ইহাপীতি। নম্বত্র নিবৃত্তিলক্ষণ-ধর্ম্মার্থকং সসন্ন্যাসমাত্মজ্ঞানমেব ন প্রতিপাদ্যতে কুরু কর্ম্মৈব তস্মাত্ত্বং ইত্যাদৌ প্রবৃত্তি-লক্ষণস্যাপি ধর্ম্মস্য বক্ষ্যমাণত্বাদ্ধর্ম্মযোশ্চ প্রকৃতত্বাবিশেষাত্তত্রাহ অভ্যুদয়ার্থোঽপীতি। নম্ব বর্ণিভিবাশ্রমিভিশ্চানুষ্ঠেয়ত্বেনান্যত্র বিহিতস্য ন যুক্তং মোক্ষসাধনত্বাধিকারে বিধানং দেবাদিস্থানপ্রাপ্তিহেতুত্বেন মোক্ষং প্রতিপক্ষত্বাৎ সত্যং তথাপি ফলাভিলাষমন্তরেণে-শ্বরার্পণধিয়া কৃতস্য বুদ্ধিশুদ্ধিহেতুত্বাত্তস্যেহ বচনমিত্যাহ সচ দেবাদীতি। ফলাভিসন্ধি-দ্বারা কৃতঃ সন্নিতি শেষঃ। প্রবৃত্তিলক্ষণধর্ম্মস্যোক্তরীত্যা চিত্তশুদ্ধিহেতুত্বেঽপি মোক্ষহেতু-ত্বেন কুতোমোক্ষাধিকারে নির্দ্দেশঃ স্যাদিত্যাশঙ্ক্যাহ শুদ্ধেতি। প্রতিপদ্যতে প্রাগুক্তো-ধর্ম্মইতি শেষঃ। যত্নুক্তং ফলাভিসন্ধিবর্জ্জিতমীশ্বরার্পণবুদ্ধ্যানুষ্ঠিতং কর্ম্ম বুদ্ধিশুদ্ধয়ে ভব-তীতি তত্র বাক্যশেষমনুকূলয়তি তথাচেতি।

শাস্ত্রস্য প্রয়োজনং সসাধনমুক্তমনূদ্য বিষয়ং দর্শয়তি ইমমিতি। দর্শিতেন ফলেন শাস্ত্রস্য নিষ্ঠাদ্বয়দ্বারা সাধ্যসাধনভাবঃ সম্বন্ধোবিষয়েণ বিষয়বিষয়িত্বমিতি বিবক্ষিত্বাহ বিশেষতইতি। এবমনুবন্ধত্রয়বিশিষ্টং শাস্ত্রং ব্যাখ্যানার্হমিত্যুপসংহরতি বিশিষ্টেতি। সিদ্ধে ব্যাখ্যানযোগ্যত্বে ব্যাখ্যেয়ত্বে ফলিতমাহ যতইতি। এবং গীতাশাস্ত্রস্য সাধ্যসাধন ভূতনিষ্ঠাদ্বয়বিষয়স্য পরাপরাভিধেয়প্রয়োজনবত্তোব্যাখ্যেয়ত্বং প্রতিপাদ্য ব্যাখ্যাতুকামঃ শাস্ত্রং তদেকদেশস্য প্রথমাধ্যায়স্য দ্বিতীয়াধ্যায়ৈকদেশসহিতস্য তাৎপর্য্যমাহ অত্র চেতি। গীতাশাস্ত্রে প্রথমাধ্যায়ে প্রথমশ্লোকে কথাসম্বন্ধপ্রদর্শনপরে স্থিতে সতীতি যাবৎ।

# শ্রীধরস্বামিকৃত টীকা।

## উপক্রমণিকা।

শেষাশেষমুখব্যাখ্যাচাতুর্য্যন্ত্বেকবক্ত্রতঃ। দধানমদ্ভুতং বন্দে পরমানন্দমাধবং॥ ১ ॥ শ্রীমাধবং প্রণম্যোমাধবং বিশ্বেশমাদরাৎ। তদ্ভক্তিযন্ত্রিতঃ কুর্ব্বে গীতাব্যাখ্যাং সুবোধিনীং॥ ২ ॥ ভাষ্যকারমতং সম্যক্ তদ্ব্যাখ্যাতৃর্গিরস্তথা। যথামতি সমালোক্য গীতাব্যাখ্যাং সমারভে॥ ৩॥ গীতা ব্যাখ্যায়তে যস্যাঃ পাঠমাত্রাদযত্নতঃ সেয়ং সুবোধিনী টীকা সদা ধ্যেয়া মনীষিভিঃ॥ ৪॥

ইহ খলু সকললোকহিতাবতারঃ পরমকারুণিকোভগবান্ দেবকীনন্দনস্তত্ত্বাজ্ঞানবিজৃম্ভিতশোকমোহভ্রংশিতবিবেকতয়া নিজধর্ম্মপরিত্যাগপূর্ব্বকপরধর্ম্মাভিসন্ধিনমর্জ্জুনং ধর্ম্মজ্ঞানরহস্যোপদেশপ্লবেন তস্মাচ্ছোকমোহসাগরাদুদ্দধার। তমেব ভগবদুপদিষ্টমর্থং কৃষ্ণদ্বৈপায়নঃ সপ্তভিঃ শ্লোকশতৈরুপনিববন্ধ। তত্র চ প্রায়শঃ শ্রীকৃষ্ণমুখাদ্বিনিঃসৃতানেব শ্লোকানলিখৎ কাংশ্চিৎ তৎসঙ্গতয়ে স্বয়ঞ্চ ব্যরচয়ৎ, যথোক্তং গীতামাহাত্ম্যে গীতা সুগীতা কর্ত্তব্যা কিমন্যৈঃ শাস্ত্রবিস্তরৈঃ। যা স্বয়ং পদ্মনাভস্য মুখপদ্মাদ্বিনিঃসৃতেত্যাদি। অত্র তাবদ্ধর্ম্মক্ষেত্রে ইত্যাদিনা বিষীদন্নিদমব্রবীদিত্যন্তেন গ্রন্থেন শ্রীকৃষ্ণার্জ্জুনসংবাদপ্রস্তাবায় কথা নিরূপ্যতে।

# শ্রীমদ্ভগবদ্গীতা।

## প্রথমোঽধ্যায়ঃ।

ধৃতরাষ্ট্র উবাচ—ধর্ম্মক্ষেত্রে কুরুক্ষেত্রে সমবেতা যুযুৎসবঃ।
মামকাঃ পাণ্ডবাশ্চৈব কিমকুর্ব্বত সঞ্জয় ॥ ১ ॥

সঞ্জয় উবাচ—দৃষ্ট্বা তু পাণ্ডবানীকং ব্যূঢ়ং দুর্য্যোধনস্তদা।
আচার্য্যমুপসঙ্গম্য রাজা বচনমব্রবীৎ ॥ ২ ॥

### গিরিকৃত টীকা।

তত্রৈবমক্ষরযোজনা ধৃতরাষ্ট্রউবাচেতি। ধৃতরাষ্ট্রোহি প্রজ্ঞাচক্ষুর্ব্বাহ্যচক্ষুরভাবাদ্বাহ্যমর্থং প্রত্যক্ষয়িতুমনীশঃ সন্নভ্যাসবর্ত্তিনং সঞ্জয়মাত্মনোহিতোপদেষ্টারং পৃচ্ছতি ধর্ম্মক্ষেত্র-ইতি। ধর্ম্মস্য তদ্বৃদ্ধেশ্চ ক্ষেত্রে সমভিবৃদ্ধিকারণং যদুচ্যতে কুরুক্ষেত্রমিতি তত্র সমবেতাঃ সঙ্গতাঃ যুযুৎসবোযোদ্ধুকামাস্তে চ কেচিন্মদীয়াঃ দুর্য্যোধনপ্রভৃতয়ঃপাণ্ডবাশ্চাপরে যুধিষ্ঠিরাদয়স্তেচ সর্ব্বে যুদ্ধভূমৌ সঙ্গতাঃ ভূত্বা কিং অকুর্ব্বত কৃতবন্তঃ। ১।

কিমস্মদীয়ং প্রবলং বলং প্রতিলভ্য ধীরপুরুষৈর্ভীষ্মাদিভিরধিষ্ঠিতং পরেষাং ভয়মাবিরভূৎ যদ্বা পক্ষদ্বয়হিংসানিমিত্তাধর্ম্মভয়মাসীদ্যেন এতে যুদ্ধাদুপরমেরন্নিতি, এবং পুত্রপরবশস্য পুত্রস্নেহাভিনিবিষ্টস্য ধৃতরাষ্ট্রস্য প্রশ্নে সঞ্জয়স্য প্রতিবচনং দৃষ্ট্বেত্যাদি। পাণ্ডবানাং ভয়প্রসঙ্গোনাস্তীত্যেতত্তুশব্দেন দ্যোত্যতে প্রত্যুত দুর্য্যোধনস্যৈব রাজ্ঞোভয়ং প্রভূতং প্রাদুর্ব্বভূব পাণ্ডবানাং পাণ্ডুসুতানাং যুধিষ্ঠিরাদীনামনীকং সৈন্যং ধৃষ্টদ্যুম্নাদিভিরতিধৃষ্টৈর্ব্ব-

### স্বামিকৃত টীকা।

ধৃতরাষ্ট্র উবাচ। ধর্ম্মক্ষেত্র ইত্যাদি ভোঃ সঞ্জয় ধর্ম্মভূমৌ কুরুক্ষেত্রে ধর্ম্মক্ষেত্র ইতি কুরুক্ষেত্রবিশেষণম্ এষামাদিপূরুষঃ কশ্চিৎ কুরু নামা বভূব তস্য কুরোর্ধর্ম্মস্থানে মামকাঃ মৎপুত্রাঃ পাণ্ডুপুত্রাশ্চ যুযুৎসবোযোদ্ধুমিচ্ছন্তঃ সমবেতা মিলিতাঃ সন্তঃ কিমকুর্ব্বত কিং কৃতবন্তঃ ॥ ১ ॥

সঞ্জয় উবাচ। দৃষ্ট্বেত্যাদি। পাণ্ডবানামনীকং সৈন্যং ব্যূঢ়ং ব্যূহরচনয়াধিষ্ঠিতং দৃষ্ট্বা দ্রোণাচার্য্যসমীপং গত্বা রাজা দুর্য্যোধনোবক্ষ্যমাণং বচনমুবাচ ॥ ২ ॥

পশ্যৈতাং পাণ্ডুপুত্রাণামাচার্য্য মহতীং চমূম্।
ব্যূঢ়াং দ্রুপদপুত্রেণ তব শিষ্যেণ ধীমতা॥ ৩॥
অত্র শূরা মহেম্বাসা ভীমার্জ্জুনসমা যুধি।
যুযুধানো বিরাটশ্চ দ্রুপদশ্চ মহারথঃ॥ ৪॥

## গিরিকৃত টীকা।

হ্যাধিষ্ঠিতং দৃষ্ট্বা প্রত্যক্ষেণ প্রতীত্য ত্রস্তহৃদয়োদুর্য্যোধনোরাজা তদা তস্যাং সংগ্রামোদেয্যাগাবস্থায়ামাচার্য্যং দ্রোণনামানমাত্মনঃ শিক্ষিতাবং বক্ষিতাবঞ্চ শ্লাঘয়ন্নুপসংগম্য তদীয়ং সমীপং বিনয়েন প্রাপ্য ভয়োদ্বিগ্নহৃদয়ত্বেপি তেজস্বিত্বাদেব বচনমর্থসহিতং বাক্যমুক্তবানিত্যর্থঃ॥ ২॥

তদেব বচনমুদাহরতি পশ্যেতি। এতামস্মদভ্যাসে মহাপুরুষানপি ভবৎপ্রমুখানপরিগণয্য ভয়লেশশূন্যামবস্থিতাং চমূমিমাং সেনাং পাণ্ডুপুত্রৈর্যুধিষ্ঠিবাদিভিবানীতাং মহতীমনেকাক্ষৌহিণীসহিতামক্ষোভ্যাং পশ্যেত্যাচার্য্যং দুর্য্যোধনোনিযুক্তনিয়োগদ্বাবা চ তস্মিন্ পরেষামবজ্ঞাং বিজ্ঞাপয়ন্ ক্রোটাতিবেকমুৎপাদয়িতুমুৎসহতে। পরকীযসেনায়াবৈশিষ্ট্যাভিধানদ্বারা পবাপবপক্ষেপি ত্বদীয়মেব বলমিতি সূচয়ন্নাচার্য্যস্য তন্নিবসনং সুকরমিতি মন্বানঃ সন্নাহ ব্যূঢামিতি। বাজ্ঞোদ্রুপদস্য পুত্রস্তব শিষ্যোধৃষ্টদ্যুম্নোলোকে খ্যাতিমুপগতঃ স্বয়ঞ্চ শাস্ত্রাস্ত্রবিদ্যাসম্পন্নোমহামহিমঃ তেন ব্যূহমাপাদ্যাবিষ্টিতামিমাঞ্চমূং কিমিতি ন প্রতিপদ্যসে কিমিতি বা ন মৃশ্যসীত্যর্থঃ॥ ৩॥

অন্যেঽপি প্রতিপক্ষে পবাক্রমভাজোবহবঃ সন্তীত্যনুপেক্ষণীযত্বং পবপক্ষস্য বিবক্ষয়ন্নাহ অত্রেতি। তস্যাং হি প্রতিপক্ষভূতাযাং সেনাযাং শূরাঃ স্বয়মভীরবঃ শস্ত্রাস্ত্রকুশলাঃ ভীমার্জ্জুনাভ্যাং সর্ব্বসম্প্রতিপন্নবীর্য্যাভ্যাং তুল্যাঃ যুদ্ধভূমাবুপলভন্তে। তেষাং যুদ্ধশৌণ্ডীরং বিষদীকর্ত্তুং বিশিনষ্টি মহেষ্বাসাইতি। ইষুবস্যতেঽস্মিন্নিতি ব্যুৎপত্ত্যা ধনুস্তদুচ্যতে তচ্চ মহদন্যৈরপ্রধৃষ্যং তদ্যেষাং তে রাজানস্তথা বিবক্ষন্তে। তানেব পরসেনামধ্যমধ্যাসীনান্ পরপক্ষানুরাগিণোবাজ্ঞোবিজ্ঞাপয়তি যুযুধানইত্যাদিনা সৌভদ্রোদ্রৌপদেয়াশ্চেত্যন্তেন।

## স্বামিকৃত টীকা।

তদেব বচনমাহ পশ্যৈতামিত্যাদি নবভিঃ শ্লোকৈঃ পশ্যেত্যাদি হে আচার্য্য পাণ্ডবানাং মহতীং বিততাং চমূং সেনাং পশ্য তব শিষ্যেণ দ্রুপদপুত্রেণ ধৃষ্টদ্যুম্নেন ব্যূঢাং ব্যূহরচনয়াধিষ্ঠিতাম্॥ ৩॥

অত্রেত্যাদি। অত্রাস্যাংচম্বাং ইষবো বাণা অস্যন্তে ক্ষিপ্যন্তে এভিরিতি ইষ্বাসা ধনূংষি মহান্ত ঈষ্বাসাঃ যেষাং তে মহেষ্বাসাঃ ভীমার্জ্জুনৌ তাবদত্রাতিপ্রসিদ্ধৌ যোদ্ধারৌ তাভ্যাং সমাঃ শূরাঃ সন্তি তানেব নামভির্নির্দ্দিশতি যুযুধান ইতি। যুযুধানঃ সাত্যকিঃ॥ ৪॥

ধৃষ্টকেতুশ্চেকিতানঃ কাশীরাজশ্চ বীর্য্যবান্।
পুরুজিৎ কুন্তিভোজশ্চ শৈব্যশ্চ নরপুঙ্গবঃ ॥ ৫ ॥
যুধামন্যুশ্চ বিক্রান্ত উত্তমৌজাশ্চ বীর্য্যবান্।
সৌভদ্রো দ্রৌপদেয়াশ্চ সর্ব্বএব মহারথাঃ ॥ ৬ ॥
অস্মাকন্তু বিশিষ্টা যে তান্নিবোধ দ্বিজোত্তম।
নায়কা মম সৈন্যস্য সংজ্ঞার্থং তান্ ব্রবীমি তে ॥ ৭ ॥
ভবান্ ভীষ্মশ্চ কর্ণশ্চ কৃপশ্চ সমিতিঞ্জয়ঃ।
অশ্বত্থামা বিকর্ণশ্চ সৌমদত্তির্জয়দ্রথঃ ॥ ৮ ॥

## গিরিকৃত টীকা।

কিঞ্চ ধৃষ্টকেতুবিতি। স্পষ্টং ॥ ৫ ॥

তেষাং সর্ব্বেষামপি মহাবলপরাক্রমভাক্ত্বাদনুপেক্ষত্বং পুনর্ব্বিবক্ষতি সর্ব্বএবেতি ॥ ৬ ॥

যদ্যেবং পরকীয়ং বলমতিপ্রভূতং প্রতীত্যাতিভীতবদভিদধাসি হন্ত সন্ধেরেব পরৈরিষ্যতামলং বিগ্রহাগ্রহেণেত্যাচার্য্যাভিপ্রায়মাশঙ্ক্য ব্রবীতি অস্মাকমিতি। তু শব্দেনান্তরুৎপন্নমপি স্বকীয়ং ভয়ং তিরোদধানোধৃষ্টতামাত্মনোদ্যোতয়তি, যে খল্বস্মৎপক্ষে ব্যবস্থিতাঃ সর্ব্বেভ্যঃ সমুৎকর্ষজুষস্তান্মযোদ্যমানান্নিবোধ নিশ্চয়েন মদ্বচনাদবধারয়েত্যর্থঃ। যদ্যপি ত্বমেব ত্রৈবর্ণিকেষু ত্রৈবিদ্যবৃদ্ধেষু প্রধানত্বাৎ প্রতিপত্তুং প্রভবসি তথাপি মদীয়সৈন্যস্য যে মুখ্যাস্তানহং তে তুভ্যং সংজ্ঞার্থমসংখ্যেষু তেষু মধ্যে কতিচিন্নামভির্গৃহীত্বা পরিশিষ্টানুপলক্ষয়িতুং বিজ্ঞাপনং করোমি নত্বজ্ঞাতং কিঞ্চিত্তব জ্ঞাপয়ামীতি মত্বাহ দ্বিজোত্তমেতি ॥৭॥

তানেব স্বসেনানিবিষ্টান্ পুরুষধৌরেয়ানাত্মীয়ভয়পরিহারার্থং পরিগণয়তি ভবানিত্যাদিনা ॥৮॥

## স্বামিকৃতটীকা।

কিঞ্চ ধৃষ্টকেতুরিতি। চেকিতানো নাম একো রাজা, নরপুঙ্গবঃ নরশ্রেষ্ঠঃ শৈব্যঃ ॥৫॥

যুধামন্যুরিতি। বিক্রান্তো যুধামন্যুর্নামৈকঃ সৌভদ্রোঽভিমন্যুঃ দ্রৌপদেয়াঃ দ্রৌপদ্যাং পঞ্চভ্যো যুধিষ্ঠিরাদিভ্যো জাতাঃ পুত্রাঃ প্রতিবিন্ধ্যাদয়ঃ পঞ্চ। মহারথাদীনাং লক্ষণং। একাদশসহস্রাণি যোধয়েদ্যস্তু ধন্বিনাং। শস্ত্রশাস্ত্রপ্রবীণশ্চ মহারথ ইতিস্মৃতঃ। অমিতান্ যোধয়েদ্যস্তু সংপ্রোক্তোঽতিরথস্তু সঃ। রথী চৈকেন যো যোদ্ধা তন্ন্যূনোঽর্দ্ধরথস্তু সঃ ॥ ৬ ॥

অস্মাকমিতি। নিবোধ বুধ্যস্ব নায়কা নেতারঃ সংজ্ঞার্থং সম্যক্ জ্ঞানার্থমিত্যর্থঃ ॥ ৭ ॥

অন্যে চ বহবঃ শূরা মদর্থে ত্যক্তজীবিতাঃ।
নানাশস্ত্রপ্রহরণাঃ সর্ব্বে যুদ্ধবিশারদাঃ ॥ ৯ ॥
অপর্য্যাপ্তং তদস্মাকং বলং ভীষ্মাভিরক্ষিতম্।
পর্য্যাপ্তং ত্বিদমেতেষাং বলং ভীমাভিরক্ষিতম্ ॥ ১০ ॥

## গিরিকৃত টীকা।

দ্রোণাদিপরিগণনস্য পরিশিষ্টপরিসংখ্যার্থত্বং ব্যাবর্ত্তয়তি অন্যেচেতি। সর্ব্বেঽপি ভবন্তমাবভ্য মদীয়পৃতনায়াং প্রবিষ্টাঃ স্বজীবিতাদপি মহ্যং স্পৃহয়ন্তীত্যাহ মদর্থইতি। যত্তু তেষাং শূরত্বমুক্তং তদিদানীং বিশদয়তি নানেতি। নানাবিধান্যনেকপ্রকারাণি শস্ত্রাণ্যায়ুধানি প্রহরণানি প্রহরণসাধনানি যেষাং তে তথা। বহুবিধায়ুধসম্পত্তাবপি তৎপ্রয়োগে নৈপুণ্যাভাবে তদ্বৈফল্যমিতি চেন্নেত্যাহ সর্ব্বইতি ॥ ৯ ॥

রাজা পুনরপি স্বকীয়ভয়াভাবে হেত্বন্তরমাচার্য্যং প্রত্যাবেদয়তি অপর্য্যাপ্তমিতি। অস্মাকং খল্বিদমেকাদশসংখ্যাকাক্ষৌহিণীপরিগণিতমপরিমিতং বলং ভীষ্মেণ চ প্রথিতমহামহিম্না সূক্ষ্মবুদ্ধিনা সর্ব্বতোরক্ষিতং পর্য্যাপ্তং পরেষাং পরিভবে সমর্থং, এতেষাং পুনস্তদল্পং সপ্তসংখ্যকাক্ষৌহিণীপরিমিতং বলং ভীমেন চ চপলবুদ্ধিনা কুশলতাবিকলেন পরিপালিতমপর্য্যাপ্তমস্মানভিভবিতুমসমর্থমিত্যর্থঃ, অথবা তদিদমস্মাকং বলং ভীষ্মাধিষ্ঠিতমপর্য্যাপ্তমপরিমিতমধৃষ্যমক্ষোভ্যমেতেষাং পাণ্ডবানাং বলং ভীমেনাভিরক্ষিতং পর্য্যাপ্তং পরিমিতং সোঢ়ুং শক্যমিত্যর্থঃ, অথবা তৎ পাণ্ডবানাং বলমপর্য্যাপ্তং নালমস্মাকমস্মভ্যং ভীষ্মাভিরক্ষিতং ভীষ্মাভিরক্ষিতোঽস্মৈ পরবলনিবৃত্ত্যর্থমিতি তদেব তথোচ্যতে, ইদং পুনরস্মদীয়ং বলমেতেষাং পাণ্ডবানাং পর্য্যাপ্তং পরিভবে সমর্থং ভীমাভিরক্ষিতং ভীমো-দুর্ব্বলহৃদয়োযস্মাদস্মৈ পরবলনিবৃত্ত্যর্থমভিরক্ষিতঃ তস্মাদস্মাকং ন কিঞ্চিদপি ভয়কারণমস্তীত্যর্থঃ ॥ ১০ ॥

## স্বামিকৃত টীকা।

তানেবাহ ভবানিতি দ্বাভ্যাং। ভবান্ দ্রোণঃ সমিতিং সংগ্রামং জয়তীতি তথা। সৌমদত্তিঃ সোমদত্তস্য পুত্রো ভূরিশ্রবাঃ ॥ ৮ ॥

মদর্থে মৎপ্রয়োজনার্থং জীবিতং ত্যক্তুমধ্যবসিতা ইত্যর্থঃ। নানা অনেকানি শস্ত্রাণি প্রহরণসাধনানি যেষাং তে যুদ্ধে বিশারদাঃ নিপুণাঃ ॥ ৯ ॥

ততঃ কিমত আহ অপর্য্যাপ্তমিত্যাদি তত্তথাভূতৈর্ব্বীরৈর্যুক্তমপি ভীষ্মেণাভিরক্ষিতমপি অস্মাকং বলং সৈন্যং অপর্য্যাপ্তং তৈঃ সহ যোদ্ধুমসমর্থং ভাতি। ইদন্ত্বেতেষাং পাণ্ডবানাং বলং ভীমাভিরক্ষিতং সৈন্যং পর্য্যাপ্তং সমর্থং ভাতি ॥ ১০ ॥

অয়নেষু চ সর্ব্বেষু যথাভাগমবস্থিতাঃ।
ভীষ্মমেবাভিরক্ষন্তু ভবন্তঃ সর্ব্বএব হি ॥ ১১ ॥
তস্য সঞ্জনয়ন্ হর্ষং কুরুবৃদ্ধঃ পিতামহঃ।
সিংহনাদং বিনদ্যোচ্চৈঃ শঙ্খং দধ্মৌ প্রতাপবান্ ॥ ১২ ॥

## গিরিকৃত টীকা।

স্বকীয়বলস্য ভীষ্মাধিষ্ঠিতত্বেন বলিষ্ঠত্বমুক্ত্বা ভীষ্মশেষত্বেন তদনুগুণত্বং দ্রোণাদীনাং প্রার্থয়তে অয়নেষ্বিতি। কর্ত্তব্যবিশেষদ্যোতী চ শব্দঃ, সমবসমাবস্তসময়ে যোদ্ধানাং যথাপ্রধানং যুদ্ধভূমৌ পূর্ব্বাপরাদিদিগ্বিভাগেনাবস্থিতিস্থানানি নিয়ম্যন্তে তান্যত্রায়নান্যুচ্যন্তে সেনাপতিশ্চ সর্ব্বসৈন্যমধিষ্ঠায় মধ্যে তিষ্ঠতি তেষু সর্ব্বেষু প্রকৃপ্তং প্রবিভাগমপ্রত্যাখ্যায় ভবানশ্বত্থামা কর্ণশ্চেত্যেবমাদযোভবন্তঃ সর্ব্বেবস্থিতাঃ সন্তোভীষ্মমেব সেনাপতিং সর্ব্বতোরক্ষন্তু তস্য হি রক্ষণে সর্ব্বমস্মদীয়ং বলং রক্ষিতং স্যাৎ পরবলনিবৃত্ত্যর্থত্বেন তস্যাস্মাভীরক্ষিতত্বাদিত্যর্থঃ ॥ ১১ ॥

তমেবমাচার্য্যং প্রতি সম্বাদং কুর্ব্বন্তং ভযাবিষ্টং রাজানং দৃষ্ট্বা তদভ্যাসবর্ত্তী পিতামহস্তদ্দুঃখানুরোধার্থং ইত্থং কৃতবানিত্যাহ তস্যেতি। রাজ্ঞো দুর্য্যোধনস্য হর্ষং বুদ্ধিগতমুল্লাসবিশেষং পরপরিভবদ্বারা স্বকীযবিজযদ্বারকং সম্যগুৎপাদযন্ ভয়ং তদীয়মপনিনীষুরুচ্চৈঃ সিংহনাদং কৃত্বা শঙ্খমাপূরিতবান্ কিমিতি দুর্য্যোধনস্য হর্ষমুৎপাদযিতুং পিতামহোযততে কুরুবৃদ্ধত্বাত্তস্য কুরুরাজত্বাৎ পিতামহত্বাচ্চাস্য, দুর্য্যোধনভযাপনযনার্থং প্রবৃত্তিরুচিতা তদুপজীবিতযা তদ্বশত্বাচ্চ তস্য সিংহনাদে শঙ্খশব্দে চ পরেষাং হৃদয়ব্যথাং সম্ভাব্যতে দূরাদেবারিনিবহং প্রতি ভয়জননলক্ষণপ্রতাপত্বাদিত্যর্থঃ ॥ ১২ ॥

## স্বামিকৃত টীকা।

তস্মাদ্ভবদ্ভিরেবং বর্ত্তিতব্যমিত্যাহ অয়নেষ্বিতি। অযনেষু ব্যূহপ্রবেশমার্গেষু যথাভাগং বিভক্তাং স্বাং স্বাং রণভূমিং অপরিত্যাজ্যাবস্থিতাঃ সন্তঃ ভীষ্মমেবাভিরক্ষন্তু তথাসৈন্যৈর্যুদ্ধমানঃ পৃষ্ঠতঃ কৈশ্চিন্ন হন্যেত তথা রক্ষন্তু ভীষ্মবলেনৈবাস্মাকং জীবনমিতিভাবঃ ॥ ১১ ॥

তদেবং বহুমানযুক্তং রাজবাক্যং শ্রুত্বা ভীষ্মঃ কিং কৃতবান্ তদাহ তস্যেত্যাদি। তস্য রাজ্ঞোহর্ষং কুর্ব্বন্ পিতামহো ভীষ্ম উচ্চৈর্মহান্তং সিংহনাদং কৃত্বা শঙ্খং দধ্মৌ বাদিতবান্ ॥ ১২ ॥

ততঃ শঙ্খাশ্চ ভের্য্যশ্চ পণবানকগোমুখাঃ।
সহসৈবাভ্যহন্যন্ত স শব্দস্তুমুলোঽভবৎ॥ ১৩॥
ততঃ শ্বেতৈর্হয়ৈর্যুক্তে মহতি স্যন্দনে স্থিতৌ।
মাধবঃ পাণ্ডবশ্চৈব দিব্যৌ শঙ্খৌ প্রদধ্মতুঃ॥ ১৪॥
পাঞ্চজন্যং হৃষীকেশো দেবদত্তং ধনঞ্জয়ঃ।
পৌণ্ড্রং দধ্মৌ মহাশঙ্খং ভীমকর্ম্মা বৃকোদর॥ ১৫॥
অনন্তবিজয়ং রাজা কুন্তীপুত্রো যুধিষ্ঠিরঃ।
নকুলঃ সহদেবশ্চ সুঘোষমণিপুষ্পকৌ॥ ১৬॥

## গিরিকৃত টীকা।

রাজাভিপ্রায়ং প্রতীত্য ভীষ্মপ্রবৃত্ত্যনন্তরং তৎপক্ষৈস্তৈস্তৈরাজভিঃ শঙ্খাদয়োবাদ্য-বিশেষা ঝটিতি শব্দবন্তঃ সংপাদিতাঃ, সচ শঙ্খাদিপ্রযুক্তশব্দস্তুমুলোবহুলং ভয়ং পরেষাং পরিদ্যোতয়ন্নাসীদিত্যাহ ততইতি॥ ১৩॥

এবং দুর্য্যোধনপক্ষে প্রবৃত্তিমালক্ষ্য পরিসববর্ত্তিনৌ কেশবার্জ্জুনৌ শ্বেতৈর্হয়ৈরতিবলপ-রাক্রমৈর্যুক্তে মহত্যপ্রধৃষ্যে রথে ব্যবস্থিতাবপ্রাকৃতৌ শঙ্খৌ পূরিতবন্তাবিত্যাহ ততঃ শ্বেতৈর্হয়ৈরিতি॥ ১৪॥

শঙ্খয়োর্দ্দিব্যত্বমেবাপাদয়তি পাঞ্চজন্যমিতি। কেশবার্জ্জুনয়োর্যুদ্ধাভিমুখ্যং দৃষ্ট্বা সংহৃষ্টঃ সারম্ভেন সমররসিকোভীমসেনোঽপি যুদ্ধাভিমুখোঽভূদিত্যাহ পৌণ্ড্রমিতি॥ ১৫॥

এতেষাং ঈদৃশীং প্রবৃত্তিং প্রতীত্য পরিপালনাবকাশমাসাদ্য বাজ্ঞোযুধিষ্ঠিরস্যাপি প্রবৃ-ত্তিং দর্শয়তি অনন্তেতি। জ্যায়সাং ভ্রাতৄণামনুসরণমাবশ্যকমিতি মত্বা তয়োর্যবীয়সোভ্রা-ত্রোরপি প্রবৃত্তিমাহ নকুলইতি॥ ১৬॥

## স্বামিকৃত টীকা।

তদেবং সেনাপতের্ভীষ্মস্য যুদ্ধোৎসবমালোক্য সর্ব্বতো যুদ্ধোৎসবঃ প্রবৃত্ত ইত্যাহ তত ইত্যাদিনা পণবা মর্দ্দলা আনকা গোমুখাশ্চ বাদ্যবিশেষাঃ সহসা তৎক্ষণাদেবাভ্যহন্যন্ত বাদিতাঃ, স শব্দঃ শঙ্খাদিশব্দস্তুমুলোমহান্ অভূৎ॥ ১৩॥

ততঃ পাণ্ডবসৈন্যে প্রবৃত্তং যুদ্ধোৎসবমাহ তত ইত্যাদি পঞ্চভিঃ স্যন্দনে রথে স্থিতৌ সন্তৌ কৃষ্ণার্জ্জুনৌ শঙ্খৌ প্রকর্ষেণ দধ্মতুর্ব্বাদয়ামাসতুঃ॥ ১৪॥

তদেব বিভাগেন দর্শয়ন্নাহ পাঞ্চজন্যমিতি। পাঞ্চজন্যাদীনি নামানি শ্রীকৃষ্ণাদিশঙ্খানাং, ভীমং ঘোরং কর্ম্ম যস্য সঃ॥ ১৫॥

অনন্তেতি। নকুলঃ সুঘোষং নাম শঙ্খং দধ্মৌ সহদেবো মণিপুষ্পকং নাম॥ ১৬॥

কাশ্যশ্চ পরমেষ্বাসঃ শিখণ্ডী চ মহারথঃ।
ধৃষ্টদ্যুম্নো বিরাটশ্চ সাত্যকিশ্চাপরাজিতঃ ॥ ১৭ ॥
দ্রুপদো দ্রৌপদেয়াশ্চ সর্ব্বশঃ পৃথিবীপতে।
শৌভদ্রশ্চ মহাবাহুঃ শঙ্খান্দধ্মুঃ পৃথক্ পৃথক্ ॥ ১৮ ॥
স ঘোষো ধার্ত্তরাষ্ট্রাণাং হৃদয়ানি ব্যদারয়ৎ।
নভশ্চ পৃথিবীঞ্চৈব তুমুলোঽভ্যনুনাদয়ন্ ॥ ১৯ ॥
অথ ব্যবস্থিতান্দৃষ্ট্বা ধার্ত্তরাষ্ট্রান্ কপিধ্বজঃ।
প্রবৃত্তে শস্ত্রসম্পাতে ধনুরুদ্যম্য পাণ্ডবঃ।
হৃষীকেশং তদা বাক্যমিদমাহ মহীপতে ॥ ২০ ॥

## গিরিকৃত টীকা।

অন্যেষামপি তৎপক্ষীয়াণাং রাজ্ঞামৈকমত্যং বিজ্ঞাপযন্ ধৃতরাষ্ট্রস্য দুরাশাং সঞ্জয়ো-ব্যুদস্যতি কাশ্যশ্চেত্যাদিনা ॥ ১৭ ॥

দ্রুপদইতি। পরমেষ্বাসাদিবিশেষণলক্ষণচতুষ্টয়ং প্রত্যেকং সম্বধ্যতে ॥ ১৮ ॥

তৈস্তৈস্তবাজভিঃ শঙ্খানাপূরয়দ্ভিরাপাদিতো মহান্ ঘোষস্তুমুলোঽতিভৈরবো নভশ্চা-ন্তরীক্ষং পৃথিবীঞ্চ ভুবনং লোকত্রয়ং সর্ব্বমেব বিশেষেণানুক্রমেণ নাদযন্ নাদযুক্তং কুর্ব্বন্ ধার্ত্তরাষ্ট্রাণাং দুর্য্যোধনাদীনাং হৃদয়ান্তঃকরণানি ব্যদারয়ৎ বিদারিতবান্, যুজ্যতেহি তৎ-প্রেরিতশঙ্খঘোষশ্রবণাত্ত্রৈলোক্যাক্রোশে তমুপশৃণ্বতাং তেষাং হৃদয়েষু দোধূয়মানত্বং তদাহ সঘোষইতি ॥ ১৯ ॥

দুর্য্যোধনাদীনাং ধার্ত্তরাষ্ট্রাণামেবং ভয়প্রাপ্তিং প্রদর্শ্য পার্থাদীনাং পাণ্ডবানাং তদ্বৈপ-রীত্যমিদানীমুদাহরতি অথেত্যাদিনা। ভীতিপ্রত্যুপস্থিতেরনন্তরং পলায়নে প্রাপ্তেঽপি

## স্বামিকৃত টীকা।

কাশ্যশ্চেতি। কাশ্যঃ কাশীরাজঃ কথংভূতঃ পরমঃ শ্রেষ্ঠঃ ইষ্বাসো ধনুর্যস্য সঃ ॥ ১৭ ॥

দ্রুপদ ইতি। হে পৃথিবীপতে ধৃতরাষ্ট্র ॥ ১৮ ॥

সচ শঙ্খানাং নাদস্ত্বদীয়ানাং মহাভয়ং জনয়ামাসেত্যাহ সঘোষ ইত্যাদি। ধার্ত্তরা-ষ্ট্রাণাং ত্বদীয়ানাং হৃদয়াদি বিদারিতবান্ কিং কুর্ব্বন্ নভশ্চ পৃথিবীঞ্চাভ্যনুনাদয়ন্ প্রতিধ্বনিভিরাপূরয়ন্ ॥ ১৯ ॥

এতস্মিন্ সময়ে শ্রীকৃষ্ণমর্জ্জুনো বিজ্ঞাপয়ামাসেত্যাহ অথেত্যাদি চতুর্ভিঃ শ্লোকৈঃ অথেতি। অথানন্তরং মহাশব্দানন্তরং ব্যবস্থিতান্ যুদ্ধোদ্যোগেঽবস্থিতান কপিধ্বজো-ঽর্জ্জুনঃ ॥ ২০ ॥

অর্জ্জুন উবাচ—সেনয়োরুভয়োর্ম্মধ্যে রথং স্থাপয় মেঽচ্যুত ॥ ২১ ॥
যাবদেতান্নিরীক্ষেঽহং যোদ্ধুকামানবস্থিতান্।
কৈর্ম্ময়া সহ যোদ্ধব্যমস্মিন্ রণসমুদ্যমে ॥ ২২ ॥
যোৎস্যমানানবেক্ষেঽহং যএতেঽত্র সমাগতাঃ।
ধার্ত্তরাষ্ট্রস্য দুর্ব্বুদ্ধের্যুদ্ধে প্রিয়চিকীর্ষবঃ ॥ ২৩ ॥

## গিরিকৃত টীকা।

ধৈর্য্যমুৎপাদ্য ব্যবস্থিতান প্রচলিতানেব পবান্ প্রত্যক্ষেণোপলভ্য হনুমন্তং বানববরং ধ্বজলক্ষণত্বেনাদায়াবস্থিতে ঽর্জ্জুনোভগবন্তমাহ ইতি সম্বন্ধঃ। কিমাহেত্যপেক্ষায়ামিদং বক্ষ্যমাণং হেতুমদ্বচনমাহ বাক্যমিতি। কস্যামবস্থায়ামিদমুক্তবানিতি তত্রাহ প্রবৃত্তইতি। শস্ত্রাণামিষুপ্রাসপ্রভৃতীনাং সম্পাতঃ সমুদায়স্তস্মিন্ প্রবৃত্তে প্রয়োগাভিমুখে সতীতি যাবৎ। কিং কৃত্বা ভগবন্তং প্রত্যুক্তবানিতি তদাহ ধনুরিতি। মহীপতিশব্দেন রাজা প্রজ্ঞাচক্ষুঃ সঞ্জয়েন সংবোধ্যতে ॥ ২০ ॥

তদেব গাণ্ডীবধন্বিনোবাক্যমনুক্রামতি সেনযোবিতি। উভয়োবপি সেনয়োঃ সন্নিহিতয়োর্মধ্যে মদীয়ং বথং স্থাপযেত্যর্জ্জুনেন সাবথ্যে সর্ব্বেশ্ববোনিযুজ্যতে, কিং হি ভক্তানামশক্যং যদ্ভগবানপি তন্নিয়োগং অনুতিষ্ঠতি, যুক্তং হি ভগবতোভক্তপাববশ্যং, অচ্যুতেতি সম্বোধনতয়া ভগবতঃ স্বরূপং ন কদাচিদপি প্রচ্যুতিং প্রাপ্নোতীত্যুচ্যতে ॥২১॥

মধ্যে রথং স্থাপয়েত্যুক্তং তদেব রথস্থাপনস্থানং নির্ধারয়তি যাবদিতি। এতান্ প্রতিপক্ষত্বেন প্রতিষ্ঠিতান্ ভীষ্মদ্রোণাদীনস্মাভিঃ সার্দ্ধং যোদ্ধুমপেক্ষাবতোযাবদ্গত্বা নিরীক্ষিতুমহংক্ষমঃ স্যাং তাবতি প্রদেশে রথস্য স্থাপনং কর্ত্তব্যমিত্যর্থঃ। কিঞ্চ প্রবৃত্তে যুদ্ধপ্রারম্ভে বহবোবাজানোঽমুষ্যাং যুদ্ধভূমাবুপলভ্যন্তে তেষাং মধ্যে কৈঃ সহ ময়া যোদ্ধব্যং ন হি ক্বচিদপি মম গতিপ্রতিহতিবস্তীত্যাহ কৈর্ম্ময়েতি ॥ ২২ ॥

প্রতিযোগিনামভাবে কথং তব যুদ্ধোৎসুক্যং ফলবদ্ভবেদিতি তত্রাহ যোৎস্যমানানিতি। যে কেচিদেতে রাজানোনানাদেশেভ্যোঽত্র কুরুক্ষেত্রে সমবেতাস্তানহং যোৎস্যমানান্ পরিগৃহীতপ্রহরণোপায়ানতিতরাং সংগ্রামসমুৎসুকানুপলভে, তেন

## স্বামিকৃত টীকা।

তদেব বাক্যমাহ সেনয়োরিত্যাদি ॥ ২১ ॥

নন্বু ত্বং যোদ্ধা ন তু যুদ্ধপ্রেক্ষকস্তত্রাহ কৈর্ম্ময়েত্যাদি। কৈঃ সহ ময়া যোদ্ধব্যং ॥ ২২ ॥

যোৎস্যমানানিতি। ধার্ত্তরাষ্ট্রস্য দুর্য্যোধনস্য প্রিয়ং কর্ত্তুমিচ্ছন্তো য ইহ সমাগতাস্তানহং দ্রক্ষ্যামি যাবত্তাবদুভয়োঃ সেনয়োর্ম্মধ্যে মে রথং স্থাপয়েত্যন্বয়ঃ ॥ ২৩ ॥

সঞ্জয় উবাচ—এবমুক্তো হৃষীকেশো গুড়াকেশেন ভারত।
সেনয়োরুভয়োর্মধ্যে স্থাপয়িত্বা রথোত্তমম্ ॥ ২৪ ॥
ভীষ্মদ্রোণপ্রমুখতঃ সর্ব্বেষাঞ্চ মহীক্ষিতাম্।
উবাচ পার্থ পশ্যৈতান্ সমবেতান্ কুরূনিতি ॥ ২৫ ॥
তত্রাপশ্যৎ স্থিতান্ পার্থঃ পিতৄনথ পিতামহান্।
আচার্য্যান্মাতুলান্ ভ্রাতৄন্ পুত্রান্ পৌত্রান্ সখীংস্তথা ॥
শ্বশুরান্ সুহৃদশ্চৈব সেনয়োরুভয়োরপি ॥ ২৬ ॥

## গিরিকৃত টীকা।

প্রতিযোগিনাং বাহুল্যমিত্যর্থঃ। তেষামস্মাভিঃ সহ পূর্ব্ববৈরাভাবে কথং প্রতিযোগিত্বং প্রকল্প্যতে তত্রাহ ধার্ত্তরাষ্ট্রস্যেতি। ধৃতরাষ্ট্রপুত্রস্য দুর্য্যোধনস্য দুর্ব্বুদ্ধেঃ স্বরক্ষণোপায়মপ্রতিপদ্যমানস্য যুদ্ধায় সংরম্ভং কুর্ব্বতো যুদ্ধে যুদ্ধভূমৌ স্থিত্বা প্রিয়ং কর্ত্তুমিচ্ছবোরাজানঃ সমাগতাঃ দৃশ্যন্তে, তেন তেষামৌপাধিকমস্মৎপ্রতিযোগিত্বমুপপন্নমিত্যর্থঃ ॥ ২৩ ॥

এবমর্জ্জুনেন প্রেরিতোভগবানহিংসারূপং ধর্ম্মমাশ্রিত্য প্রায়শোযুদ্ধাৎ তং নিবর্ত্তয়িষ্যতীতি ধৃতরাষ্ট্রস্য মনীষাং ভ্রূদয়িষুঃ সঞ্জয়ো রাজানং প্রত্যুক্তবান্ সঞ্জয়ইতি। ভগবতোহি ভূভারাপহারার্থং প্রবৃত্তস্যার্জ্জুনাভিপ্রায়প্রতিপত্তিদ্বারেণ স্বাভিসন্ধিং প্রতিলভমানস্য পরোক্তিমনুস্মৃত্য স্বাভিপ্রায়ানুকূলমনুষ্ঠানমাদর্শয়তি এবমিতি ॥ ২৪ ॥

ভীষ্মদ্রোণাদীনামন্যেষাঞ্চ রাজ্ঞামন্তিকে রথং স্থাপয়িত্বা ভগবান্ কিং কৃতবানিতি তদাহ উবাচেতি। এতানভ্যাসে বর্ত্তমানান্ কুরূন্ কুরুবংশপ্রসূতান্ ভবদ্ভিঃ সার্দ্ধং যুদ্ধার্থং সংগতান্ পশ্য দৃষ্ট্বা চ যৈঃ সহাত্র যুযুৎসা তবোপাবর্ত্ততে তৈঃ সাকং যুদ্ধং কুরু নোখণ্বেতেষাং শস্ত্রাস্ত্রশিক্ষাবতাং মহীক্ষিতামুপেক্ষোপপদ্যতে সারথ্যে তু ন মনঃখেদনীয়মিত্যর্থঃ ॥ ২৫ ॥

এবং স্থিতে মহানধর্ম্মোহিংসেতি বিপরীতবুদ্ধ্যা যুদ্ধাদুপবিরংসা পার্থস্য সংপ্রবৃত্তেতি কথয়তি অত্রেত্যাদিনা। সপ্তম্যা ভগবদভ্যনুজ্ঞানে সমরসমারম্ভায় সংবৃত্তে সতীত্যেত-

## স্বামিকৃত টীকা।

ততঃ কিংবৃত্তমিত্যপেক্ষায়াং সঞ্জয় উবাচ এবমুক্ত ইত্যাদি। গুড়াকা নিদ্রা তস্যা ঈশেন জিতনিদ্রেণার্জ্জুনেন এবমুক্তঃ সন্ হে ভারত হে ধৃতরাষ্ট্র ॥ ২৪ ॥

ভীষ্মেতি। মহীক্ষিতাং রাজ্ঞাং চ প্রমুখতঃ সম্মুখে রথং স্থাপয়িত্বা হে পার্থ এতান্ কুরূন্ পশ্যেতি শ্রীভগবানুবাচ ॥ ২৫ ॥

ততঃ কিংবৃত্তমিত্যাহ তত্রেত্যাদি পিতৄন্ পিতৃব্যানিত্যর্থঃ। পুত্রান্ পৌত্রানিতি

তান্ সমীক্ষ্য স কৌন্তেয়ঃ সর্ব্বান্ বন্ধূনবস্থিতান্।
কৃপয়া পরয়াবিষ্টো বিষীদন্নিদমব্রবীৎ ॥ ২৭ ॥

অর্জ্জুন উবাচ—দৃষ্টেমান্ স্বজনান্ কৃষ্ণ যুযুৎসূন্ সমবস্থিতান্।
সীদন্তি মম গাত্রাণি মুখঞ্চ পরিশুষ্যতি ॥ ২৮ ॥
বেপথুশ্চ শরীরে মে রোমহর্ষশ্চ জায়তে।
গাণ্ডীবং স্রংসতে হস্তাৎ ত্বক্ চৈব পরিদহ্যতে ॥ ২৯ ॥

---

## গিরিকৃত টীকা।

তূচ্যতে সেনয়োরুভয়োরপি স্থিতান্ পার্থোঽপশ্যদিতি সম্বন্ধঃ। অথশব্দস্তথাশব্দপর্য্যায়ঃ শ্বশুরাঃ ভার্য্যাণাং জনয়িতারঃ সুহৃদোমিত্রাণি কৃতবর্ম্মপ্রভৃতয়ঃ॥ ২৬॥

সেনাদ্বয়ে ব্যবস্থিতান্ যথোক্তান্ পিতামহাদীনালোক্য পরমকৃপাপরবশঃ সন্নর্জ্জুনোভগবন্তমুক্তবানিত্যাহ তানিতি। বিষীদন্ তথোক্তানাং পিত্রাদীনাং হিংসাসংরম্ভনিবন্ধনং বিষাদমুপতাপং কুর্ব্বন্নিত্যর্থঃ॥ ২৭॥

তদেবেদংশব্দবাচ্যং বচনমুদাহরতি দৃষ্ট্বেতি। আত্মীয়ং বন্ধুবর্গং যুদ্ধেচ্ছয়া যুদ্ধভূমাবুপস্থিতমুপলভ্য শোকপ্রবৃত্তিং দর্শয়তি সীদন্তীতি। দেবাংশস্যৈবার্জ্জুনস্যানাত্মবিদঃ স্বপরদেহেম্বাত্মীযাভিমানবতস্তৎপ্রিয়স্য যুদ্ধারম্ভে তন্মৃত্যুপ্রসঙ্গদর্শিনঃ শোকোমহানাসীদিত্যর্থঃ॥ ২৮॥

অঙ্গেষু ব্যথা মুখে পরিশোষশ্চেত্যুভয়ং শোকলিঙ্গমুক্তং সংপ্রতি বেপথুপ্রভৃতীনি ভীতিলিঙ্গান্যুপন্যস্যতি বেপথুশ্চেতি। রোমহর্ষোরোম্নাং গাত্রেষু পুলকিতত্বং॥ ২৯॥

## স্বামিকৃত টীকা।

দুর্য্যোধনাদীনাং যে পুত্রাঃ পৌত্রাশ্চ তানিত্যর্থঃ। সখীন্ মিত্রাণি সুহৃদঃ কৃতোপকারাংশ্চাপশ্যৎ॥ ২৬॥

ততঃ কিং কৃতবানিত্যাহ তানিতি। সেনয়োরুভয়োরেবং সমীক্ষ্য কৃপয়া মহত্যাবিষ্টো গৃহীতো বিষণ্ণঃ সন্ ইদমর্জ্জুনোঽব্রবীৎ ইত্যুত্তরস্যার্দ্ধশ্লোকবাক্যার্থঃ, আবিষ্টো-ব্যাপ্তঃ॥ ২৭॥

কিমব্রবীদিত্যপেক্ষায়ামাহ দৃষ্ট্বেমানিত্যাদি যাবদধ্যায়সমাপ্তিঃ। হে কৃষ্ণ যোদ্ধুমিচ্ছতঃ পুরতঃ সম্যগবস্থিতান্ স্বজনান্ বন্ধুজনান্ দৃষ্ট্বা মদীয়ানি গাত্রাণি করচরণাদীনি সীদন্তি বিশীর্য্যন্তে॥ ২৮॥

কিঞ্চ বেপথুশ্চেত্যাদি। বেপথুঃ কম্পঃ রোমহর্ষো রোমাঞ্চঃ স্রংসতে নিপততি। পরিদহ্যতে সর্ব্বতঃ সন্তপ্যতে॥ ২৯॥

ন চ শক্নোম্যবস্থাতুং ভ্রমতীব চ মে মনঃ।
নিমিত্তানি চ পশ্যামি বিপরীতানি কেশব॥ ৩০ ॥
ন চ শ্রেয়োঽনুপশ্যামি হত্বা স্বজনমাহবে।
ন কাঙ্ক্ষে বিজয়ং কৃষ্ণ ন চ রাজ্যং সুখানি চ॥ ৩১ ॥
কিং নোরাজ্যেন গোবিন্দ কিং ভোগৈর্জীবিতেন বা।
যেষামর্থে কাঙ্ক্ষিতং নোরাজ্যং ভোগাঃ সুখানি চ॥ ৩২ ॥
তইমেঽবস্থিতা যুদ্ধে প্রাণাং স্ত্যক্ত্বা ধনানি চ।
আচার্য্যাঃ পিতরঃ পুত্রাস্তথৈব চ পিতামহাঃ॥ ৩৩ ॥
মাতুলাঃ শ্বশুরাঃ পৌত্রাঃ শ্যালাঃ সম্বন্ধিনস্তথা।

## গিরিকৃত টীকা।

কিঞ্চাধৈর্য্যমপি সংবৃত্তমিত্যাহ নচেতি। মোহোঽপি মহান্ ভবতীত্যাহ ভ্রমতীবেতি। বিপরীতনিমিত্তপ্রতীতেবপি মোহোভবতীত্যাহ নিমিত্তানীতি। তানি বিপরীতানি নিমিত্তানি যানি বামনেত্রস্ফুরণাদীনি॥ ৩০ ॥

যুদ্ধে স্বজনহিংসয়া ফলানুপলম্ভাদপি তস্মাদুপরিরংসা জায়তইত্যাহ নচেতি। প্রাপ্তানাং যুযুৎসূনাং হিংসয়া বিজযোরাজ্যং সুখানি চ লব্ধুং শক্যানীতি কুতোযুদ্ধাদুপরতি-বিত্যাশঙ্ক্যাহ ন কাংক্ষইতি॥ ৩১ ॥

কিমিতি রাজ্যাদিকং সর্ব্বাকাংক্ষিতত্বাৎ ন কাংক্ষ্যসে তেন হি পুত্রভ্রাত্রাদীনাং স্বাস্থ্য-মাধাতুং শক্যমিত্যাশঙ্ক্যাহ কিমিতি। রাজাদীনামাক্ষেপে হেতুমাহ যেষামিতি॥ ৩১ ॥

তানেব বিশিনষ্টি আচার্য্যাইতি॥ ৩৩॥

তুমালাইতি। শ্যালা ভার্য্যাণাং ভ্রাতবোধৃষ্টদ্যুম্নপ্রভৃতয়ঃ। বধ্যেষ্বপি স্বরাজ্যপরি-

## স্বামিকৃত টীকা।

অপিচ নচ শক্নোমীত্যাদি। বিপরীতানি নিমিত্তানি অনিষ্টসূচকানি শকুনাদীনি পশ্যামি॥ ৩০ ॥

কিঞ্চ নচেত্যাদি। আহবে যুদ্ধে স্বজনং হত্বা শ্রেয়ঃ ফলং ন পশ্যামি। বিজয়াদিকং ফলং কিং ন পশ্যসীতি চেৎ তত্রাহ ন কাঙ্ক্ষ ইতি॥ ৩১ ॥

এতদেব প্রপঞ্চয়তি কিং নো রাজ্যেনেত্যাদি সার্দ্ধদ্বয়েন॥ ৩২ ॥

তু ইমে ইতি। যদর্থমস্মাকং রাজ্যাদিকমপেক্ষিতং তে এতে প্রাণধনাদিত্যাগমঙ্গীকৃত্য যুদ্ধার্থমবস্থিতাঃ, অতঃ কিমস্মাকং রাজ্যাদিভিঃ কৃত্যমিত্যর্থঃ॥ ৩৩ ॥

নন্বু যদি কৃপয়া ত্বমেতান্ন হংসি তর্হি ত্বামেতে রাজ্যলোভেন হনিষ্যন্ত্যেব অতস্ত্বমে-

এতান্ন হন্তুমিচ্ছামি ঘ্নতোঽপি মধুসূদন ॥ ৩৪ ॥
অপি ত্রৈলোক্যরাজ্যস্য হেতোঃ কিন্নু মহীকৃতে।
নিহত্য ধার্ত্তরাষ্ট্রান্নঃ কা প্রীতিঃ স্যাজ্জনার্দ্দন ॥ ৩৫ ॥
পাপমেবাশ্রয়েদস্মান্ হত্বৈতানাততায়িনঃ।
তস্মান্নার্হা বয়ং হন্তুং ধার্ত্তরাষ্ট্রান্ সবান্ধবান্।
স্বজনং হি কথং হত্বা সুখিনঃ স্যাম মাধব ॥ ৩৬ ॥

## গিরিকৃত টীকা।

পম্বিধাততায়িষু কৃপাবুদ্ধ্যা স্বধর্ম্মাৎ যুদ্ধাৎ পূর্ব্বোক্তমোহাদিবশাৎ প্রচ্যুতিং প্রদর্শযতি এতানিতি। জিঘাংসন্তং জিঘাংসীযাদিতি ন্যায়াদেতেষাং হিংসা ন দোষায়েত্যাশঙ্ক্যাহ ঘ্নতোপীতি ॥ ৩৪ ॥

পৃথিবীপ্রাপ্ত্যর্থং হি হননমেতেষামিষ্যতে ন চ তৎপ্রাপ্তিঃ সমীহিতেতি কৈমুতিক-ন্যায়েন দর্শয়তি অপীতি। ন হি মহদপি ত্রৈলোক্যলক্ষণং রাজ্যং লব্ধুং স্বজনহিংসায়ৈ মনোমদীয়ং স্পৃহয়তি পৃথিবীপ্রাপ্ত্যর্থং পুনর্ব্বন্ধুবধং ন শ্রদ্দধামীতি কিং বক্তব্যমিত্যর্থঃ দুর্য্যোধনাদীনাং শত্রূণাং নিগ্রহেপ্রীতিপ্রাপ্তিসম্ভবাদ্যুদ্ধং কর্ত্তব্যমিত্যাশঙ্ক্যাহ নিহত্যেতি ॥৩৫

যদি পুনরমী দুর্য্যোধনাদয়োন নিগৃহ্যেরন্ ভবন্তস্তর্হি তৈর্নিগৃহীতা দুঃখিতাঃ স্যুরিত্যা-শঙ্ক্যাহ পাপমেবেতি। যদীমে দুর্য্যোধনাদযোনির্দ্দোষানেবাস্মান্ যুদ্ধভূমৌ হন্যুস্তদৈতা-নগ্নিদোগরদশ্চেত্যাদিলক্ষণোপেতানাততায়িনোনির্দ্দোষস্বজনহিংসাপ্রযুক্তং পাপং পূর্ব্ব-মেব পাপিনঃ সমাশ্রয়েদিত্যর্থঃ। অথবা যদ্যপ্যেতে ভবন্ত্যাততায়িনস্তথাপ্যেতানতিশো-চ্যান্ দুর্য্যোধনাদীন্ হিংসিত্বা তৎকৃতং পাপমস্মানেবাশ্রযেদতোনাস্মাভিরেতে হন্তব্যা-ইত্যর্থঃ। অথবা গুরুভ্রাতৃসুহৃৎপ্রভৃতীনেতান্ হত্বা বয়মাততায়িনঃ স্যামঃ ততশ্চৈতান্ হত্বা তৎকৃতং পাপমাততায়িনোঽস্মানেব সমাশ্রয়েদিতি যুদ্ধাদুপরমণমস্মাকং শ্রেয়স্কর-মিত্যর্থঃ। ফলাভাবাদনর্থসম্ভবাচ্চ পরহিংসা ন কর্ত্তব্যা ইত্যুপসংহরতি তস্মাদিতি।

## স্বামিকৃত টীকা।

বৈতান্ হত্বা রাজ্যং ভুঙ্ক্ষ্বেতি তত্রাহ এতানিত্যাদি সার্দ্ধেন ঘ্নতোঽপি অস্মান্ মারয়-তোঽপি এতান্ ॥ ৩৪ ॥

অপীতি। ত্রৈলোক্যরাজ্যস্যাপি হেতোঃ তৎপ্রাপ্ত্যর্থমপি হন্তুং নেচ্ছামি কিং পুনর্মহীমাত্রপ্রাপ্তয়ে ইত্যর্থঃ ॥ ৩৫ ॥

নমুচ অগ্নিদোগরদশ্চৈব শস্ত্রপাণির্ধনাপহঃ। ক্ষেত্রদারাপহারী চ ষড়েতে আত-তায়িনঃ। ইতি স্মরণাদগ্নিদাহাদিভিঃ ষড়্ভির্হেতুভিরেতে তাবদাততায়িনঃ। আত-

যদ্যপ্যেতে ন পশ্যন্তি লোভোপহতচেতসঃ।
কুলক্ষয়কৃতং দোষং মিত্রদ্রোহে চ পাতকম্ ॥ ৩৭ ॥
কথং ন জ্ঞেয়মস্মাভিঃ পাপাদস্মান্নিবর্ত্তিতুং
কুলক্ষয়কৃতং দোষং প্রপশ্যদ্ভির্জনার্দ্দন ॥ ৩৮ ॥
কুলক্ষয়ে প্রণশ্যন্তি কুলধর্ম্মাঃ সনাতনাঃ।
ধর্ম্মে নষ্টে কুলং কৃৎস্নমধর্ম্মোঽভিভবত্যুত ॥ ৩৯ ॥

## গিরিকৃত টীকা।

কিঞ্চ রাজ্যসুখমুদ্দিশ্য যুদ্ধমুপক্রম্যতে ন চ স্বজনপরিক্ষয়ে সুখমুপপদ্যতে তেন ন কর্ত্তব্যং যুদ্ধমিত্যাহ স্বজনং হীতি ॥ ৩৬ ॥

কথং তর্হি পরেষাং কুলক্ষয়ে স্বজনহিংসায়াঞ্চ প্রবৃত্তিস্তত্রাহ যদ্যপীতি। লোভোপ-হতবুদ্ধিত্বাত্তেষাং কুলক্ষয়াদিপ্রযুক্তদোষপ্রতীত্যভাবাৎ প্রবৃত্তিবিস্রম্ভঃ সম্ভবতীত্যর্থঃ ॥ ৩৭ ॥

পরেষামিবাস্মাকমপি প্রবৃত্তিবিস্রম্ভঃ সম্ভবেদিতি চেন্নেত্যাহ কথমিতি। কুলক্ষয়েতি কুলক্ষয়ে মিত্রদ্রোহে চ দোষং প্রপশ্যদ্ভিরস্মাভিস্তদ্দোষশব্দিতং পাপং কথং ন জ্ঞাতব্যং তদ-জ্ঞানে তৎপরিহারাসম্ভবাদতোঽস্মাৎ পাপান্নিবৃত্ত্যর্থং তজ্জ্ঞানমপেক্ষিতমিতি পাপপরিহা-রার্থিনামস্মাকং ন যুক্তা যুদ্ধে প্রবৃত্তিরিত্যর্থঃ ॥ ৩৮ ॥

কোঽসৌ কুলক্ষয়ে দোষোযদ্দর্শনাদস্মাকংযুদ্ধাদুপরতিরপেক্ষ্যতে তত্রাহ কুলেতি। কুলস্যাহি ক্ষয়ে কুলসম্বন্ধিনশ্চিরন্তনাধর্ম্মাস্তত্তদগ্নিহোত্রাদিক্রিয়াসাধ্যা নাশমুপযান্তি কর্ত্তুর

## স্বামিকৃত টীকা।

তায়িনাঞ্চ বধোযুক্তএব। আততায়িনমায়ান্তং হন্যাদেবাবিচারয়ন্। নাততায়িবধে দোষো হন্তুর্ভবতি কশ্চনেতি বচনাৎ তত্রাহ পাপমেবেত্যাদি সার্দ্ধেন। আততায়িনমায়া-ন্তমিত্যাদিকমর্থশাস্ত্রং তচ্চ ধর্ম্মশাস্ত্রাত্তু দুর্ব্বলং যথোক্তং যাজ্ঞবল্ক্যেন-স্মৃত্যোর্ব্বিরোধে ন্যায়স্তু বলবান্ ব্যবহারতঃ। অর্থশাস্ত্রাত্তু বলবদ্ধর্ম্মশাস্ত্রমিতি স্থিতিঃ ইতি তস্মাদাততা-য়িনামপ্যেতেষামাচার্য্যাদীনাং বধেঽস্মাকং পাপমেব ভবেৎ। অন্যায্যত্বাৎ অধর্ম্মত্বাচ্চে-ত্যদ্বধস্য অমুত্র চেহবা ন সুখং স্যাদিত্যাহ স্বজনং হীতি ॥ ৩৬ ॥

নন্বেতেষামপি বন্ধুবধদোষে সমানে যথৈবৈতে বন্ধুবধমঙ্গীকৃত্যাপি যুদ্ধে প্রবর্ত্তন্তে তথৈব ভবানপি প্রবর্ত্ততাং কিমনেন বিষাদেনেত্যাহ যদ্যপীতি দ্বাভ্যাং। রাজ্যলোভেনো-পহতং ভ্রষ্টবিবেকং চেতো যেষাং তে এতে দুর্য্যোধনাদয়ো যদ্যপি দোষং ন পশ্যন্তি ॥ ৩৭ ॥

কথমিতি। তথাপ্যস্মাভির্দ্দোষং প্রপশ্যদ্ভিরস্মাৎ পাপাৎ নিবর্ত্তিতুং কথং ন জ্ঞেয়ং নিবৃত্তাবেব বুদ্ধিঃ কর্ত্তব্যেত্যর্থঃ ॥ ৩৮ ॥

অধর্ম্মাভিভবাৎ কৃষ্ণ প্রদুষ্যন্তি কুলস্ত্রিয়ঃ।
স্ত্রীষু দুষ্টাসু বার্ষ্ণেয় জায়তে বর্ণসঙ্করঃ॥ ৪০ ॥
সঙ্করোনরকায়ৈব কুলঘ্নানাং কুলস্য চ।
পতন্তি পিতরোহ্যেষাং লুপ্তপিণ্ডোদকক্রিয়াঃ॥ ৪১ ॥
দোষৈরেতৈঃ কুলঘ্নানাং বর্ণসঙ্করকারকৈঃ।
উৎসাদ্যন্তে জাতিধর্ম্মাঃ কুলধর্ম্মাশ্চ শাশ্বতাঃ॥ ৪২
উৎসন্নকুলধর্ম্মাণাং মনুষ্যাণাং জনার্দ্দন।

## গিরিকৃত টীকা।

ভাবাদিত্যর্থঃ। ধর্ম্মনাশেপি কিং স্যাদিতি চেৎ তত্রাহ ধর্ম্মইতি। কুলপ্রযুক্তে ধর্ম্মে কুলনাশাদেব নষ্টে কুলক্ষয়কবস্য কুলপবিশিষ্টমখিলমপি তদীয়োঽধর্ম্মোঽভিভবত্যধর্ম্মভূযিষ্ঠং তস্য কুলং ভবতীত্যর্থঃ॥ ৩৯ ॥

কুলক্ষয়কৃতেঽবশিষ্টকুলস্যাধর্ম্মপ্রবণত্বে কোদোষঃ স্যাদিতি তত্রাহ অধর্ম্মেতি। পাপপ্রচুরে কুলে প্রসূতানাং স্ত্রীণাং প্রদুষ্টত্বে কিং প্রদুষ্যতি তত্রাহ স্ত্রীষ্বিতি॥ ৪০ ॥

বর্ণসঙ্করস্য দোষপর্য্যাবসাযিতামাদর্শয়তি সঙ্করইতি। কুলক্ষয়কবাণাং দোষান্তরং সঞ্চিনোতি পতন্তীতি। কুলক্ষয়কৃতাং পিতরোনিরযগামিনঃ সন্তবন্তীত্যত্র হেতুমাহ লুপ্তেতি। পুত্রাদীনাং কর্ত্তৃণামভাবাৎ লুপ্তা পিণ্ডস্যোদকস্য চ ক্রিয়া যেষাং তে তথা, ততশ্চ প্রেতত্বপরাবৃত্তিকাবণাভাবান্নবকপতনমেবাবশ্যকমাপতেদিত্যর্থঃ॥ ৪১ ॥

কুলক্ষয়কৃতামেতৈরুদাহৃতৈর্দ্দোষৈঃ বর্ণসঙ্করহেতুভির্জাতিপ্রযুক্তা বংশপ্রযুক্তাশ্চ ধর্ম্মাঃ সর্ব্বে সমুৎসাদ্যন্তে তেন কুলক্ষয়কারণাদ্যুদ্ধাদুপরতিবেব শ্রেয়সীত্যাহ দোষৈরিতি॥ ৪২ ॥

কিঞ্চ জাতিধর্ম্মেষু কুলধর্ম্মেষু চ উৎসন্নেষু তত্তদ্ধর্ম্মবর্জিতানাং মনুষ্যাণামনধিকৃতানাং

## স্বামিকৃত টীকা।

তমেব দোষং দর্শয়তি কুলক্ষয় ইত্যাদি। সনাতনাঃ পবম্পরাপ্রাপ্তাঃ উত অপি অবশিষ্টং কৃৎস্নমপি কুলং অধর্ম্মোঽভিভবতি প্রাপ্নোতীত্যর্থঃ॥ ৩৯ ॥

ততশ্চ অধর্ম্মাভিভবাদিত্যাদি॥ ৪০ ॥

এবং সতি সঙ্কর ইত্যাদি এষাং কুলঘ্নানাং পিতরঃ পতন্তি হি যস্মাৎ লুপ্তাঃ পিণ্ডোদকক্রিয়াঃ যেষাং তে তথা॥ ৪১ ॥

উক্তদোষমুপসংহরতি দোষৈরিত্যাদিদ্বাভ্যাং। উৎসাদ্যন্তে লুপ্যন্তে জাতিধর্ম্মাবর্ণধর্ম্মাঃ কুলধর্ম্মাশ্চেতি চকারাদাশ্রমধর্ম্মাদয়োঽপি গৃহ্যন্তে॥ ৪২ ॥

উৎসন্নেতি। উৎসন্নাঃ কুলধর্ম্মাঃ যেষামিতি উৎসন্নজাতিধর্ম্মাদীনামপ্যুপলক্ষণং।

নরকে নিয়তং বাসোভবতীত্যনুশুশ্রুম ॥ ৪৩ ॥
অহোবত মহৎ পাপং কর্ত্তুং ব্যবসিতা বয়ং।
যদ্রাজ্যসুখলোভেন হন্তুং স্বজনমুদ্যতাঃ ॥ ৪৪ ॥
যদিমামপ্রতীকারমশস্ত্রং শস্ত্রপাণয়ঃ।
ধার্ত্তরাষ্ট্রা রণে হন্যুস্তন্মে ক্ষেমতরং ভবেৎ ॥ ৪৫ ॥
সঞ্জয় উবাচ—এবমুক্ত্বার্জ্জুনঃ সংখ্যে রথোপস্থউপাবিশৎ।
বিসৃজ্য সশরং চাপং শোকসংবিগ্নমানসঃ ॥ ৪৬ ॥

## গিরিকৃত টীকা।

নবকপতনধ্রৌব্যাদনর্থকরমিদমেব হেয়মিত্যাহ উৎসন্নেতি। যথোক্তানাং মনুষ্যাণাং নরকপতনস্যাবশ্যকত্বে প্রমাণমাহ ইত্যনুশুশ্রুমেতি ॥ ৪৩ ॥

রাজ্যপ্রাপ্তিপ্রযুক্তসুখোপভোগলব্ধতয়া স্বজনহিংসায়াং প্রবৃত্তিরস্মাকং গুণদোষবিভাগবিজ্ঞানবতামতিকষ্টেতি পরিভ্রষ্টহৃদয়ঃ সন্নাহ অহোবতেতি ॥ ৪৪ ॥

যদ্যেবং যুদ্ধে বিমুখঃ সন্ পবপবিভবপ্রতীকাবরহিতোবর্ত্তেথাস্তর্হি ত্বাং শস্ত্রপরিগ্রহ রহিতং শক্রং শস্ত্রপাণয়োধার্ত্তরাষ্ট্রা নিঘ্নীযুরিত্যাশঙ্ক্যাহ যদীতি। প্রাণত্রাণাদপি প্রকৃষ্টো ধর্ম্মঃ প্রাণভৃতামহিংসেতি ভাবঃ ॥ ৪৫ ॥

যথোক্তমর্জ্জুনস্য বৃত্তান্তং সঞ্জয়োধৃতরাষ্ট্রং রাজানং প্রতি প্রবেদিতবান্ তমেব প্রবেদনপ্রকারং দর্শযতি এবমিতি। প্রদর্শিতেন প্রকারেণ ভগবন্তং প্রতি বিজ্ঞাপনং কৃত্বা শোক

## স্বামিকৃত টীকা।

অনুশুশ্রুম শ্রুতবন্তোবয়ংপ্রায়শ্চিত্তমকুর্ব্বাণাঃ পাপেষ্বভিরতানরাঃ। অপশ্চাত্তাপিনঃ পাপা নিরয়ান্ যান্তি দারুণান্ ইত্যাদি বচনেভ্যঃ ॥ ৪৩ ॥

বন্ধুবধাধ্যবসায়েন সন্তপ্যমান আহ অহোবতেত্যাদি। স্বজনং হন্তুমুদ্যতাইতি যৎ এতন্মহৎ পাপং কর্ত্তুমধ্যবসায়ং কৃতবন্তোবয়ং অহোবত বৃহৎকষ্ট মিত্যর্থঃ ॥ ৪৪ ॥

এবং সন্তপ্তঃ সন্ মৃত্যুমেবাশংসমান আহ যদিমামিত্যাদি। অকৃতপ্রতীকারং দৃষ্ট্বা তূষ্ণীমুপবিষ্টং মাং যদি হনিষ্যন্তি তর্হি তদ্ধননং মম ক্ষেমতরং অত্যন্তহিতং ভবেৎ পাপান্নিষ্পত্তেঃ ॥ ৪৫ ॥

ততঃ কিং বৃত্তমিত্যপেক্ষায়াং সঞ্জয়উবাচ। এবমুক্ত্বেত্যাদি সংখ্যে সংগ্রামে রথো-

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু

ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে

শ্রীকৃষ্ণার্জ্জুনসংবাদে

অর্জ্জুন বিষাদোনাম

প্রথমোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

মোহাভ্যাং পরিভূতমানসঃ সন্নর্জ্জুনঃ সংখ্যে যুদ্ধমধ্যে শরেণ সহিতং গাণ্ডীবং ত্যক্ত্বা ন যোৎস্যেঽহমিতি ব্রুবন্মধ্যে রথস্য সন্ন্যাসমেব শ্রেয়স্করং মত্বোপবিষ্টবানিত্যর্থঃ॥ ৪৬॥

ইতি প্রথমোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

পস্থে রথস্যোপবি উপাবিশৎ উপবিবেশ। শোকেন সংবিগ্নং প্রকম্পিতং মানসং চিত্তং যস্য স তথা॥ ৪৬॥

ইতি প্রথমোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## দ্বিতীয়োঽধ্যায়ঃ।

সঞ্জয় উবাচ।—তন্তথা কৃপয়াবিষ্টমশ্রুপূর্ণাকুলেক্ষণম্।
বিষীদন্তমিদং বাক্যমুবাচ মধুসূদনঃ॥ ১॥
শ্রীভগবানুবাচ।—কুতস্ত্বা কশ্মলমিদং বিষমে সমুপস্থিতম্।

### গিরিকৃত টীকা।

অহিংসা পরমোধর্ম্মোভিক্ষাশনঞ্চেত্যেবংলক্ষণয়া বুদ্ধ্যা যুদ্ধবৈমুখ্যমর্জ্জুনস্য শ্রুত্বা স্বপুত্রাণাং রাজ্যৈশ্বর্য্যমপ্রচলিতমবধার্য্য স্বস্থহৃদয়ং ধৃতরাষ্ট্রং দৃষ্ট্বা তস্য দুরাশামপনেষ্যামীতি মনীষয়া সঞ্জয়স্তং প্রত্যুক্তবানিত্যাহ সঞ্জয়ইতি। পরমেশ্বরেণ স্মার্য্যমাণোঽপি কৃত্যাকৃত্যে সহসা নার্জ্জুনঃ সম্মার বিপর্য্যয়প্রযুক্তস্য শোকস্য দৃঢ়তরমোহহেতুত্বাত্তথাপি তং ভগবান্নোপেক্ষিতবানিত্যাহ তং তথেতি। তং প্রকৃতং পার্থং তথা স্বজনমরণপ্রসঙ্গদর্শনেন কৃপয়া করুণয়াবিষ্টমধিষ্ঠিতমশ্রুভিঃ পূর্ণে সমাকুলে চেক্ষণে যস্য তম্ অশ্রুব্যাপ্তুতরলাক্ষং বিষীদন্তং শোচন্তমিদং বক্ষ্যমাণং বাক্যং সোপপত্তিকং বচনং মধুনামানমসুরং সূদিতবানিতি মধুসূদনোভগবানুক্তবান্ন তু যথোক্তমর্জ্জুনমুপেক্ষিতবানিত্যর্থঃ॥ ১॥

কিন্তদ্বাক্যমিত্যপেক্ষায়ামাহ শ্রীভগবানিতি। কুতোহেতোস্ত্বা ত্বাং সর্ব্বক্ষত্রিয়প্রবরং কশ্মলং মলিনং শিষ্টগর্হিতং যুদ্ধাৎ পরাঙ্মুখত্বং বিষমে সভয়স্থানে সমুপস্থিতং প্রাপ্তমনার্য্যৈঃ

### স্বামিকৃত টীকা।

দ্বিতীয়ে শোকসন্তপ্তমর্জ্জুনং ব্রহ্মবিদ্যয়া। প্রতিবোধ্য হরিশ্চক্রে স্থিতপ্রজ্ঞস্য লক্ষণং॥ ততঃ কিং বৃত্তমিত্যপেক্ষায়াং সঞ্জয়উবাচ তং তথেতি। অশ্রুভিঃ পূর্ণে আকুলে ঈক্ষণে যস্য তং তথা উক্তপ্রকারেণ বিষীদন্তমর্জ্জুনং প্রতি মধুসূদন ইদং বাক্যমুবাচ॥ ১॥

তদেব বাক্যমাহ কুতইতি কুতোহেতোস্ত্বা ত্বাং বিষমে সঙ্কটে ইদং কশ্মলমুপস্থিতময়ং মোহঃ প্রাপ্তো যত আর্য্যৈরসেবিতমস্বর্গ্যমধর্ম্ম্যমযশস্করঞ্চ॥ ২॥

অনার্য্যজুষ্টমস্বর্গ্যমকীর্ত্তিকরমর্জ্জুন ॥ ২ ॥
মা ক্লৈব্যং গচ্ছ কৌন্তেয়* নৈতৎ ত্বয্যুপপদ্যতে।
ক্ষুদ্রং হৃদয়দৌর্ব্বল্যং ত্যক্ত্বোত্তিষ্ঠ পরন্তপ ॥ ৩ ॥
অর্জ্জুন উবাচ ॥—কথং ভীষ্মমহং সংখ্যে দ্রোণঞ্চ মধুসূদন।
ইষুভিঃ প্রতিযোৎস্যামি পূজার্হাবরিসূদন ॥ ৪ ॥

## গিরিকৃত টীকা।

শাস্ত্রার্থমবিজ্ঞৈ র্জুষ্টং সেবিতমস্বর্গ্যং স্বর্গানর্হং প্রত্যবায়কারণমিহ চাকীর্ত্তিকরমযশস্করমর্জ্জুন-নাম্না প্রখ্যাতস্য তব নৈতৎ যুক্তমিত্যর্থঃ ॥ ২ ॥

পুনরপিভগবানর্জ্জুনং প্রত্যাহ ক্লৈব্যমিতি। ক্লৈব্যং ক্লীবভাবমধৈর্য্যং মা স্ম গমঃ মাগাঃ হে পার্থ পৃথাতনয় ন হি ত্বয়ি মহেশ্বরেণাপি কৃতাহবে প্রখ্যাতপৌরুষে মহামহিম-ন্যেতদুপপদ্যতে ক্ষুদ্রং ক্ষুদ্রত্বকারণং হৃদয়দৌর্ব্বল্যং মনসোদুর্ব্বলত্বমধৈর্য্যং ত্যক্ত্বোত্তিষ্ঠ যুদ্ধায়োপক্রমং কুরু হে পরন্তপ পরং শত্রুং তাপয়তীতি তথা সম্বোধ্যতে ॥ ৩ ॥

এবং ভগবতা প্রতিবোধ্যমানোপি শোকাভিভূতচেতস্ত্বাদপ্রতিবুধ্যমানঃ সন্নর্জ্জুনঃ স্বাভিপ্রায়মেব প্রকৃতং ভগবন্তং প্রত্যুক্তবান্ কথমিত্যাদিনা। ভীষ্মং পিতামহং দ্রোণঞ্চা-চার্য্যং সংখ্যে রণে হে মধুসূদন ইষুভিঃ যত্র বাচাপি যোৎস্যামীতি বক্তুমনুচিতং তত্র কথং বাণৈর্যোৎস্য ইতি ভাবঃ, সাযকৈস্তৌ কথং প্রতিযোৎস্যামি প্রতিযোৎস্যে, তৌ হি পূজার্হৌ কুসুমাদিভিরর্চ্চনযোগ্যৌ, হে অরিসূদন সর্ব্বানেবারীন্ যত্নেন সূদিতবানিতি ভগবানেবং সম্বোধ্যতে ॥ ৪ ॥

## স্বামিকৃত টীকা।

মা ক্লৈব্যমিতি। অস্মাৎ হে পার্থ ক্লৈব্যং কাতর্য্যং মা গচ্ছ ন প্রাপ্নুহি, যতস্ত্ব-য্যেতন্নোপপদ্যতে যোগ্যং ন ভবতি, ক্ষুদ্রং তুচ্ছং হৃদয়দৌর্ব্বল্যং কাতর্য্যং ত্যক্ত্বা যুদ্ধায়ো-ত্তিষ্ঠ, হে পরন্তপ শত্রুতাপন ॥ ৩ ॥

নাহং কাতরত্বেন যুদ্ধাদুপরতোঽস্মি কিন্তু যুদ্ধস্যান্যায্যত্বাদধর্ম্মত্বাচ্চেত্যাহ অর্জ্জুন উবাচ কথমিতি। ভীষ্মদ্রোণৌ পূজার্হৌ পূজায়ামর্হৌ যোগ্যৌ তৌ প্রতি কথমহং যোৎস্যামি তত্রাপীষুভির্যত্র বাচাপি যোৎস্যামীতি বক্তুমনুচিতং তত্র বাণৈঃ কথং যোৎস্যামীত্যর্থঃ, হে অরিসূদন শত্রুবিমর্দ্দন ॥ ৪ ॥

---

* ক্লৈব্যং মা স্ম গমঃ পার্থ ইতিগিরিধৃতপাঠঃ।

গুরূন্ হত্বা হি মহানুভাবান্ শ্রেয়োভোক্তুং ভৈক্ষ্যমপীহ লোকে
হত্বার্থকামাংস্তু গুরূনিহৈব ভুঞ্জীয় ভোগান্ রুধিরপ্রদিগ্ধান্ ॥ ৫ ॥
ন চৈতদ্বিদ্মঃ কতরন্নোগরীয়োযদ্বা জয়েম যদি বা নোজয়েয়ুঃ।
যানেব হত্বা ন জিজীবিষামস্তেবস্থিতাঃ প্রমুখে ধার্ত্তরাষ্ট্রাঃ ॥ ৬ ॥

## গিরিকৃত টীকা।

রাজ্ঞাং ধর্ম্মোপি যুদ্ধে গুর্ব্বাদিবধে বৃত্তিমাত্রফলত্বং গৃহীত্বা পাপমারোপ্য ব্রূতে গুরূনিতি। গুরূন্ ভীষ্মদ্রোণাদীন্ ভ্রাত্রাদীংশ্চাত্র প্রাপ্তান্ অহিংসিত্বা মহানুভাবান্ মহামাহাত্ম্যান্ শ্রুতাধ্যয়নসম্পন্নান্ শ্রেয়ঃ প্রশস্ততরং যুক্তং ভোক্তুমভ্যবহর্ত্তুং ভৈক্ষ্যং ভিক্ষাণাং সমূহং ভিক্ষাশনং নৃপাদীন্নাং নিষিদ্ধমপি ইহ লোকে ব্যবহারভূমৌ ন হি গুর্ব্বাদিহিংসয়া রাজ্যভোগোঽপেক্ষ্যতে কিঞ্চহত্বা গুর্ব্বাদীনর্থকামানেব ভুঞ্জীয় ন মোক্ষমনুভবেয়মিহৈব ভোগোন স্বর্গে। অর্থকামানেব বিশিনষ্টি ভোগানিতি। ভুঞ্জতইতি ভোগাস্তান্ রুধিরপ্রদিগ্ধান লোহিতলিপ্তানিবাত্যন্তগর্হিতানতোভোগান গুরুবধাদিসাধ্যান্ পরিত্যজ্য ভিক্ষাশনমেব যুক্তমিত্যর্থঃ ॥ ৫ ॥

ক্ষত্রিয়াণাং স্বধর্ম্মত্বাদ্যুদ্ধমেব শ্রেয়স্করমিত্যাশঙ্ক্যাহ ন চৈতদিতি। এতদপি ন জানীমোভৈক্ষ্যযুদ্ধয়োঃ কতরঃ নোঽস্মাকং গবীযঃ শ্রেষ্ঠং কিং ভৈক্ষ্যং হিংসাশূন্যত্বাদুত যুদ্ধং স্ববৃত্তিত্বাদিতি সন্দিগ্ধা চ জয়স্থিতিঃ কিং সাম্যমেবোভয়েষাং যদ্বা বয়ং জয়েমাতিশয়েমহি যদি বা নোঽস্মান্ ধার্ত্তরাষ্ট্রা দুর্য্যোধনাদযোজয়েয়ুঃ জাতোপি জয়ো ন ফলবান্ যতো

## স্বামিকৃত টীকা।

তর্হি তানহত্বা তব দেহযাত্রাপি ন স্যাদিতি চেত্তত্রাহ গুরূনিতি। গুরূন্ দ্রোণাচার্য্যাদীন্ হত্বা পরলোকবিরুদ্ধগুরুবধমকৃত্বেহ লোকে ভিক্ষান্নমপি ভোক্তুং শ্রেয় উচিতং। বিপক্ষে তু ন কেবলং পরত্র দুঃখং কিন্ত্বিহৈব চ নরকদুঃখমনুভবেয়মিত্যাহ হত্বেতি। গুরূন্ হত্বৈহৈব রুধিরেণ প্রদিগ্ধান্ প্রকর্ষেণ লিপ্তানর্থকামাত্মকান্ ভোগানহং ভুঞ্জীয়াশ্নীয়াং। যদ্বা অর্থকামানিতি গুরূণাং বিশেষণং, অর্থতৃষ্ণাকুলত্বাদেতে তাবদ্যুদ্ধান্ন নিবর্ত্তেরংস্তস্মাদেতদ্বধঃ প্রসজ্যেতৈবেত্যর্থঃ, তথা চ যুধিষ্ঠিরং প্রতি ভীষ্মেণোক্তং, অর্থস্য পুরুষোদাসোদাসস্ত্বর্থোন কস্যচিৎ। ইতি সত্যং মহারাজ বদ্ধোঽস্ম্যর্থেণ কৌরবৈরিতি ॥৫॥

কিঞ্চ যদ্যধর্ম্মানঙ্গীকরিষ্যামস্তথাপি কিমস্মাকং জয়ঃপরাজয়োবা গরীয়ান্ ভবেদিতি ন জ্ঞায়ত ইত্যাহ ন চৈতদিতি। দ্বয়োর্ম্মধ্যে নোঽস্মাকং কতরৎ কিন্নাম গরীয়োঽধিকতরং ভবিষ্যতীতি ন বিদ্মঃ। তদেব দ্বয়ং দর্শয়তি যদ্বেতি। যদ্বা এতান্ বয়ং জয়েম

কার্পণ্যদোষোপহতস্বভাবঃ পৃচ্ছামি ত্বাং ধর্ম্মসংমূঢ়চেতাঃ।
যচ্ছ্রেয়ঃ স্যান্নিশ্চিতং ব্রূহি তন্মে শিষ্যস্তেঽহং শাধি মাং ত্বাং প্রপন্নম্॥৭॥
ন হি প্রপশ্যামি মমাপনুদ্যাদ্যচ্ছোকমুচ্ছোষণমিন্দ্রিয়াণাম্।
অবাপ্য ভূমাবসপত্নমৃদ্ধং রাজ্যং সুরাণামপি চাধিপত্যম্॥ ৮॥

## গিরিকৃত টীকা।

যান্ বন্ধূন্ হত্বা ন জিজীবিষামোজীবিতুং নেচ্ছামস্তে এবাস্থিতাঃ প্রমুখে সংমুখে ধার্ত্তরাষ্ট্রাঃ ধৃতরাষ্ট্রস্যাপত্যানি তস্মাদ্ভৈক্ষ্যাদ্যুদ্ধস্য শ্রেষ্ঠত্বং ন সিদ্ধমিত্যর্থঃ॥ ৬॥

সমধিগতসংসারদোষজাতস্যাতিতরাং নির্ব্বিণ্নস্য মুমুক্ষোরুপসন্নস্যাত্মোপদেশসংগ্রহণেঽধিকারং সূচয়তি কার্পণ্যেতি। যোঽল্পাংস্বল্পামপি স্বক্ষতিং ন ক্ষমতে সকৃপণস্তদ্বিধত্বাদখিলোঽনাত্মবিদপ্রাপ্তপরমপুরুষার্থতয়া কৃপণোভবতি যোবাএতদক্ষরং গার্গ্যবিদিত্বাস্মাল্লোকাৎ প্রৈতি সকৃপণইতি শ্রুতেঃ তস্য ভাবঃ কার্পণ্যং দৈন্যং তেন দোষেণাপহতোদূষিতঃ স্বভাবশ্চিত্তমস্যেতি বিগ্রহঃ, সোঽহং পৃচ্ছাম্যনুযুঞ্জে ত্বা ত্বাং ধর্ম্মসংমূঢ়চেতাঃ ধর্ম্মোধারয়তীতি পরং ব্রহ্ম তস্মিন সংমূঢমবিবেকতাং গতং চেতোযস্য মমেতি তথাহমুক্তঃ কিং পৃচ্ছসি, যন্নিশ্চিতমৈকান্তিকমনাপেক্ষিকং শ্রেয়ঃ স্যান্ন রোগনিবৃত্তিবদনৈকান্তিকমনাত্যন্তিকং স্বর্গবদাপেক্ষিকং বা তন্নিঃশ্রেয়সং মে মহ্যং প্রব্রূহি নাপুত্রায়াশিষ্যায়েতি নিষেধাৎ ন প্রবক্তব্যমিতি মাবমংস্থাঃ যতঃ শিষ্যস্তেঽহং ভবামি শাধ্যনুশাধি মাং নিঃশ্রেয়সং ত্বামহং প্রপন্নোঽস্মি॥ ৭॥

কুতোনিঃশ্রেয়সমেবেচ্ছসি তত্রাহ নহীতি। যস্মান্ন প্রপশ্যামি কিং ন প্রপশ্যসি মমাপনুদ্যাদপনয়েদ্যচ্ছোকমুচ্ছোষণং প্রতপনমিন্দ্রিয়ানাং তন্ন পশ্যামি। নমু শত্রূন্নিহত্য রাজ্যে

## স্বামিকৃত টীকা।

জেষ্যামঃ যদি বা নোঽস্মানেতে জয়েয়ুর্জেষ্যন্তীতি। কিঞ্চাস্মাকংজয়োঽপি ফলতঃ পরাজয় এবেত্যাহ যানিতি। যানেব হত্বা জীবিতুং নেচ্ছামস্তএবৈতে সংমুখেঽবস্থিতাঃ॥ ৬॥

কার্পণ্যেত্যাদি। তস্মাদেতান্ হত্বা কথং জীবিষ্যামইতি কার্পণ্যং, দোষ কুলক্ষয়কৃতঃ, তাভ্যামুপহতোঽভিভূতঃ স্বভাবঃ শৌর্য্যলক্ষণোযস্য সোঽহং ত্বাং পৃচ্ছামি, তথা ধর্ম্মে সংমূঢ়ং চেতোযস্য সঃ, যুদ্ধং ত্যক্ত্বা ভিক্ষাটনমপি ক্ষত্রিয়স্য ধর্ম্মোঽধর্ম্মোবেতি সন্দিগ্ধচিত্তঃ সন্নিত্যর্থঃ অতোমে যন্নিশ্চিতং শ্রেয়ঃ স্যাত্তদ্ব্রূহি, কিঞ্চ তেঽহং শিষ্যঃ শাসনার্হোঽতস্ত্বাং প্রপন্নং শরণং গতং মাং শাধি শিক্ষয়॥ ৭॥

ত্বমেব বিচার্য্য যদযুক্তং তৎ কুর্ব্বিতি চেত্তত্রাহ নহি প্রপশ্যামীতি। ইন্দ্রিয়াণামুচ্ছোষণমতিশোষকরং মদীয়ং শোকং যৎ কর্ম্ম অপনুদ্যাদপনয়েত্তদহং ন পশ্যামীতি যদ্যপি

সঞ্জয় উবাচ।—এবমুক্ত্বা হৃষীকেশং গুড়াকেশঃ পরন্তপঃ।
ন যোৎস্যইতি গোবিন্দমুক্ত্বা তূষ্ণীং বভূব হ॥ ৯॥
তমুবাচ হৃষীকেশঃ প্রহসন্নিব ভারত।
সেনয়োরুভয়োর্মধ্যে বিষীদন্তমিদং বচঃ॥ ১০॥
শ্রীভগবানুবাচ।

## শাঙ্করভাষ্যম্।

দৃষ্ট্বা তু পাণ্ডবানীকমিত্যারভ্য ন যোৎস্যইতি গোবিন্দমুক্ত্বা তূষ্ণীং বভূব হেত্যেন্ত-দন্তঃ প্রাণিনাং শোকমোহাদিসংসারদুঃখবীজভূতদোষোদ্ভবকারণহেতুপ্রদর্শনার্থত্বেন

## গিরিকৃত টীকা।

প্রাপ্তে শোকনিবৃত্তিস্তে ভবিষ্যতি নেত্যাহ অবাপ্যেতি। অবিদ্যমানঃ সপত্নঃ শত্রুর্যস্য তদ্যুক্তং রাজ্যং রাজ্ঞঃ কর্ম্ম প্রজারক্ষণপ্রশাসনাদি তদিদমস্যাং ভূমাববাপ্যাপি শোকাপন-য়কারণং ন পশ্যামীত্যর্থঃ। তর্হি দেবেন্দ্রত্বাদিপ্রাপ্তৌ শোকাপনয়স্তে ভবিষ্যতি নেত্যাহ সুরাণামপীতি। তেষামাধিপত্যং অধিপতিত্বং স্বাম্যমিন্দ্রত্বং ব্রহ্মত্বং বা তদবাপ্যাপি মম শোকোনাপগচ্ছেদিত্যর্থঃ॥ ৮॥

এবমর্জ্জুনেন স্বাভিপ্রায়ং ভগবন্তং প্রতি প্রকাশিতং সঞ্জয়োবাজানমাবেদিতবানিত্যাহ সঞ্জয়ইতি। এবং প্রাগুক্তপ্রকারেণ ভগবন্তং প্রত্যুক্ত্বা পরন্তপোঽর্জ্জুনোন যোৎস্যে ন সংপ্রহরিষ্যে অত্যন্তাসহ্যশোকপ্রসঙ্গাদিতি গোবিন্দমুক্ত্বা তূষ্ণীমব্রুবন্ বভূব কিলেত্যর্থঃ॥৯॥

তমর্জ্জুনং সেনয়োর্ব্বাহিন্যোরুভয়োর্ম্মধ্যে বিষীদন্তং বিষাদং কুর্ব্বন্তমতিদুঃখিতং শোক-মোহাভ্যাং অভিভূতং স্বধর্ম্মাৎ প্রচ্যুতপ্রায়ং প্রতীত্য প্রহসন্নিবোপহাসং কুর্ব্বন্নিব তদাশ্বা-সার্থং হে ভারত ভরতান্বয় ইত্যেবং সংবোধ্য ভগবানিদং প্রশ্নোত্তরং নিঃশ্রেয়সাধিগম-সাধনং বচনমুচিবানিত্যাহ তমুবাচেতি॥ ১০॥

## স্বামিকৃত টীকা।

ভূমৌ নিষ্কণ্টকং সমৃদ্ধং রাজ্যং প্রাপ্স্যামি তথা সুরেন্দ্রত্বমপি যদি প্রাপ্স্যামি এবমভীষ্টং তত্তৎসর্ব্বমবাপ্যাপি শোকাপনোদনোপায়ং ন প্রপশ্যামীত্যন্বয়ঃ॥ ৮॥
এবমুক্ত্বার্জ্জুনঃ কিং কৃতবানিত্যপেক্ষায়াং সঞ্জয়উবাচ এবমিতি॥ ৯॥
ততঃ কিং বৃত্তমিত্যতআহ তমুবাচেতি। প্রহসন্নিবেতি প্রসন্নমুখঃ সন্নিত্যর্থঃ॥ ১০॥
দেহাত্মনোরবিবেকাৎ অস্যৈবং শোকোভবতীতি তদ্বিবেকপ্রদর্শনার্থং শ্রীভগবানুবাচ।

## শাঙ্করভাষ্যম্ ।

ব্যাখ্যেয়োগ্রন্থস্তথা হ্যর্জ্জুনেন রাজ্যগুরুপুত্রমিত্রসুহৃৎস্বজনসম্বন্ধিবান্ধবেষ্বহমেষাং মমৈতে ইত্যেবং ভ্রান্তিপ্রত্যয়নিমিত্তস্নেহবিচ্ছেদাদিনিমিত্তাবাত্মনঃ শোকমোহৌ প্রদর্শিতৌ কথং ভীষ্মমহং সংখ্যে ইত্যাদিনা। শোকমোহাভ্যাং হ্যভিভূতবিবেকবিজ্ঞানঃ স্বতএব ক্ষাত্রধর্ম্মে যুদ্ধে প্রবৃত্তোঽপি তস্মাদ্যুদ্ধাদুপররাম পরধর্ম্মঞ্চ ভিক্ষাজীবনাদিকং কর্ত্তুং প্রববৃতে তথা চ সর্ব্বপ্রাণিনাং শোকমোহাদিদোষাবিষ্টচেতসাং স্বভাবতএব স্বধর্ম্মপরিত্যাগঃপ্রতি-

## গিরিকৃত টীকা ।

তদেব বচনমুদাহরতি শ্রীভগবানিতি ।

অতীতসন্দর্ভস্যেথমক্ষরোথমর্থং বিবক্ষিত্বা তস্মিন্নেব বাক্যবিভাগমবগময়তি দৃষ্ট্বা ত্বিতি। ধর্ম্মক্ষেত্রে কুরুক্ষেত্রে ইত্যাদিরাদ্যশ্লোকস্তাবদেকং বাক্যং শাস্ত্রস্য কথাসম্বন্ধপরত্বেন পর্য্যবসানাৎ, দৃষ্ট্বেত্যারভ্য যাবৎ তুষ্ণীং বভূব হেতি তাবচ্চৈকং বাক্যং, ইতআরভ্য ইদং বচইত্যেতদন্তোগ্রন্থোভবত্যপরং বাক্যমিতি বিভাগঃ। নন্বাদ্যশ্লোকস্য যুক্তমেকবাক্যত্বং প্রকৃতশাস্ত্রস্য মহাভাবতেঽবতারদ্যোতিতত্বাদন্তিমস্যাপি সম্ভবত্যেকবাক্যত্বমর্জ্জুনাশ্বাসার্থতয়া প্রবৃত্তত্বাত্তন্মধ্যমস্য তু কথমেকবাক্যত্বমিত্যাশঙ্ক্যার্থৈকত্বাদিত্যাহ প্রাণিনামিতি। শোকোমানসন্তাপোমোহোবিবেকাভাবঃ আদিশব্দস্তদবান্তরভেদার্থঃ, সএব সংসারস্য দুঃখাত্মনোবীজভূতোদোষস্তস্যোদ্ভবে কারণমহঙ্কাবোমমকাবস্তদ্ধেতুবিদ্যা চ তৎপ্রদর্শনার্থত্বেনেতি যোজনা। সংগৃহীতমর্থং বিবৃণোতি তথাহীতি। রাজ্যং রাজ্ঞঃ কর্ম্ম পরিপালনাদি পূজার্হাগুববোদ্রোণাদয়ঃ পুত্রাঃ স্বেনোৎপাদিতাঃ সৌভদ্রাদয়ঃ সম্বন্ধান্তবমন্তরেণ স্নেহগোচরাগুরুপুত্রপ্রভৃতয়োমিত্রশব্দেনোচ্যন্তে উপকারনিবপেক্ষতয়াস্বয়মুপকারিণোহৃদয়ানুরাগভাজোভগবৎপ্রমুখাঃ সুহৃদঃ স্বজনা জ্ঞাতয়োদুর্য্যোধনাদয়ঃ সম্বন্ধিনঃ শ্বশুরশ্যালপ্রভৃতয়োদ্রুপদধৃষ্টদ্যুম্নাদয়ঃ পবম্পরয়া পিতৃপিতামহাদিম্বনুরাগভাজোরাজানোবান্ধবাস্তেষু যথোক্তং প্রত্যয়ং নিমিত্তীকৃত্য যঃ স্নেহোযশ্চ তৈঃ সহ বিচ্ছেদোযচ্চৈতেষামুপঘাতে পাতকং যা চ লোকগর্হা সর্ব্বং তন্নিমিত্তং যয়োরাত্মনঃ শোকমোহয়োস্তাবেতৌ সংসারবীজভূতৌ কথমিত্যাদিনা দর্শিতাবিত্যর্থঃ কথং পুনবনযোঃ সংসারবীজয়োবর্জ্জুনে সম্ভাবনা উপপদ্যতে ন হি প্রথিতমহামহিম্নোবিবেকবিজ্ঞানবতঃ স্বধর্ম্মে প্রবৃত্তস্য শোকমোহাবনর্থহেতু সম্ভাবিতাবিত্যাশঙ্ক্য বিবেকতিরস্কারেণ তয়োর্ব্বিহিতাকরণপ্রতিষিদ্ধাচরণকারণত্বাদনর্থাধারকয়োরস্তি তস্মিন্ সম্ভাবনেত্যাহ শোকমোহাভ্যামিতি। ভিক্ষয়া জীবনং প্রাণধারণমাদিশব্দাদশেষকর্ম্মসন্ন্যাসলক্ষণং পারিব্রাজ্যমাত্মাভিধ্যানমিত্যাদি গৃহ্যতে কিঞ্চার্জ্জুনে দৃশ্যমানৌ শোকমোহৌ সংসারবীজং শোকমোহত্বাদস্মদাদিনিষ্ঠশোকমোহ-

## শাঙ্করভাষ্যম্।

বিদ্বসেবা চ স্যাৎ স্বধর্ম্মে প্রবৃত্তানামপি তেষাং বাবঙ্মনঃকায়াদীনাং প্রবৃত্তিঃ ফলাভিসন্ধিপূর্ব্বিকৈব সাহঙ্কারা চ ভবতি। তত্রৈবং সতি ধর্ম্মাধর্ম্মোপচয়াদিষ্টানিষ্টজন্মসুখদুঃখাদিপ্রাপ্তিলক্ষণঃ সংসারোঽনুপরতোভবতীতি অতঃ সংসারবীজভূতৌ শোকমোহৌ তয়োশ্চ সর্ব্বকর্ম্মসন্ন্যাসপূর্ব্বকাদাত্মজ্ঞানাৎ নান্যতোনিবৃত্তিরিতি তদুপদিদিক্ষুঃসর্ব্বলোকানুগ্রহার্থং অর্জ্জুনং নিমিত্তীকৃত্যাহ ভগবান্ বাসুদেবঃ অশোচ্যানিত্যাদি।

তত্র কেচিদাহুঃ, সর্ব্বকর্ম্মসন্ন্যাসপূর্ব্বকাদাত্মজ্ঞাননিষ্ঠামাত্রাদেব কেবলাৎ কৈবল্যং ন প্রাপ্যতএব কিং তর্হ্যগ্নিহোত্রাদিশ্রৌতস্মার্ত্তকর্ম্মসহিতাৎ জ্ঞানাৎ কৈবল্যপ্রাপ্তিরিতি সর্ব্বাসু গীতাসু নিশ্চিতোঽর্থ ইতি। জ্ঞাপকঞ্চাহুরস্যার্থস্য অথ চেত্ত্বমিমং ধর্ম্ম্যং সংগ্রামং ন

## গিরিকৃত টীকা।

বদিত্যুপলব্ধৌ শোকমোহৌ প্রত্যেকং পক্ষীকৃত্যানুমাতব্যমিত্যাহ তথা চেতি। শোকমোহাদীত্যাদিশব্দেন মিথ্যাভিমানস্নেহগর্হাদয়োগৃহ্যন্তে স্বভাবতশ্চিত্তদোষসামর্থ্যাদিত্যর্থঃ। অস্মদাদীনামপি স্বধর্ম্মে প্রবৃত্তানাং বিহিতাকরণত্বাদ্যভাবান্ন শোকাদেঃ সংসারবীজতেতি দৃষ্টান্তস্য সাধ্যবিকলতেতি চেত্তত্রাহ স্বধর্ম্ম ইতি। কামাদীনামিত্যাদিশব্দাদবিশিষ্টানীন্দ্রিয়াণ্যাদীয়ন্তে ফলাভিসন্ধিস্তদ্বিষয়েঽভিলাষঃ কর্তৃত্বভোক্তৃত্বাভিমানোঽহঙ্কারঃ। প্রাগুক্তপ্রকারেণ রাগাদিব্যাপারে সতি কিং সিধ্যতি তত্রাহ তত্রেতি। শুভকর্ম্মানুষ্ঠানেন ধর্ম্মোপচয়াদিষ্টং দেবাদিজন্ম ততঃ সুখপ্রাপ্তিঃ অশুভকর্ম্মানুষ্ঠানেনাধর্ম্মোপচয়াদনিষ্টং তির্য্যগাদিজন্ম ততোদুঃখপ্রাপ্তিঃ ব্যামিশ্রকর্ম্মানুষ্ঠানাদুভাভ্যাং ধর্ম্মাধর্ম্মাভ্যাং মনুষ্যজন্ম ততঃ সুখদুঃখে ভবতঃ এবমাত্মকঃ সংসাব সন্ততোঽবর্ত্ততইত্যর্থঃ। অর্জ্জুনস্যান্যেষাঞ্চ শোকমোহয়োঃ সংসারবীজত্বমুপপাদিতমুপসংহবতি ইত্যতইতি। তদেবং প্রথমাধ্যায়স্য দ্বিতীয়াধ্যায়ৈকদেশসহিতস্যাত্মজ্ঞানোত্থনিবর্ত্তনীয়শোকমোহাখ্যসংসারবীজপ্রদর্শনপরত্বং দর্শয়িত্বা বক্ষ্যমাণসন্দর্ভস্য সহেতুসংসারনিবর্ত্তকসম্যক্‌জ্ঞানোপদেশে তাৎপর্য্যং দর্শয়তি তয়োশ্চেতি। তদ্‌যথোক্ত জ্ঞানমুপদিদিক্ষুরুপদেষ্টুমিচ্ছন্ ভগবানাহেতি সম্বন্ধঃ। সর্ব্বলোকানুগ্রহার্থং যথোক্তং জ্ঞানং ভগবানুপদিদিক্ষতীত্যযুক্তং অর্জ্জুনং প্রত্যেবোপদেশাদিত্যাশঙ্ক্যাহ অর্জ্জুনমিতি। ন হি তস্যামবস্থায়ামর্জ্জুনস্য ভগবতোযথোক্তং জ্ঞানমুপদেষ্টুমিষ্টং কিন্তু স্বধর্ম্মানুষ্ঠানাদ্বুদ্ধিশুদ্ধ্যুত্তরকালমিত্যভিপ্রেত্যোক্তংনিমিত্তীকৃত্যেতি।

সর্ব্বকর্ম্মসন্ন্যাসপূর্ব্বকাদাত্মজ্ঞানাদেব কেবলাৎ কৈবল্যপ্রাপ্তিরিতি গীতাশাস্ত্রার্থঃ স্বাভিপ্রেতোব্যাখ্যাতঃ সংপ্রতি বৃত্তিকৃতামভিপ্রেতং নিরসিতুমনুবদতি তত্রেতি। নির্দ্ধারিতঃ শাস্ত্রার্থঃ সতি সপ্তম্যা পরামৃশ্যতে। তেষামুক্তিমেববিবৃণ্বন্নাদৌ সৈদ্ধান্তিকমভ্যুপগমং প্রত্যাদিশতি সর্ব্বকর্ম্মেতি। বৈদিকেন কর্ম্মণা সমুচ্চয়ং ব্যুদসিতুং মাত্রপদং স্মার্ত্তেন

## শাঙ্করভাষ্যম্।

করিষ্যসি কর্ম্মণ্যেবাধিকারস্তে, কুরু কর্ম্মৈব তস্মাত্ত্বমিত্যাদি। হিংসাদিযুক্তত্বাদ্বৈদিকং কর্ম্ম অধর্ম্মায়েতীয়মপ্যাশঙ্কা ন কার্য্যা, কথং ক্ষত্রং কর্ম্ম যুদ্ধলক্ষণং গুরুভ্রাতৃপুত্রাদিহিংসাদিলক্ষণমত্যন্তগর্হিততরমপি স্বধর্ম্মইতি কৃত্বা নাধর্ম্মায়, তদকরণে চ ততঃ স্বধর্ম্মং কীর্ত্তিঞ্চ হিত্বা পাপমেবাপ্স্যসীতি ব্রুবতা যাবজ্জীবাদিশ্রুতিচোদিতানাং স্বকর্ম্মণাং পশ্বাদিহিংসালক্ষণানাঞ্চ কর্ম্মণাং প্রাগেব নাধর্ম্মত্বমিতি সুনিশ্চিতমুক্তং ভবতীতি।

তদসৎ, জ্ঞানকর্ম্মনিষ্ঠয়োর্ব্বিভাগবচনাৎ বুদ্ধিদ্বয়াশ্রয়য়োরশোচ্যানিত্যাদিনা গ্রন্থেন ভগবতা যাবৎ স্বধর্ম্মমপিচাবেক্ষ্যেত্যেতদন্তেন গ্রন্থেন যৎপরমার্থাত্মতত্ত্বনিরূপণং কৃতং

## গিরিকৃত টীকা।

কর্ম্মণা সমুচ্চয়ং নিরসিতুমবধারণং। অভ্যাসসম্বন্ধং ধ্বনীতে কেবলাদিতি। নৈবেত্যেবকারঃ সম্বধ্যতে। কেন তর্হি প্রকারেণ জ্ঞানং কৈবল্যপ্রাপ্তিকারণমিত্যাশঙ্ক্যাহ কিং তর্হীতি। কিং তত্র প্রমাপকমিত্যাশঙ্ক্য ইদমেব শাস্ত্রমিত্যাহ ইতি সর্ব্বাস্বিতি। যথা প্রয়াজানুযাজাদ্যুপকৃতমেব দর্শপূর্ণমাসাদি স্বর্গসাধনং তথা শ্রৌতস্মার্ত্তকর্ম্মোপকৃতমেব ব্রহ্মজ্ঞানং কৈবল্যং সাধয়তি বিমতং সেতিকর্ত্তব্যতাকমেব স্বফলসাধকং কারণত্বাদ্দর্শপূর্ণমাসাদিবৎ তদেবং জ্ঞানকর্ম্মসমুচ্চয়পরং শাস্ত্রমিত্যর্থঃ ইতি পদমাহুরিত্যনেন পূর্ব্বেণ সম্বধ্যতে। পৌর্ব্বাপর্য্যপর্য্যালোচনায়াং শাস্ত্রস্য সমুচ্চয়পরত্বং ন নির্দ্ধারিতমিত্যাশঙ্ক্যাহ জ্ঞাপকঞ্চেতি। ন কেবলং জ্ঞানং মুক্তিহেতুরপি তু সমুচ্চিতমিত্যস্যার্থস্য স্বধর্ম্মানন্নুষ্ঠানে পাপপ্রাপ্তিবচনসামর্থলক্ষণং লিঙ্গং গমকমিত্যর্থঃ। শাস্ত্রস্য সমুচ্চয়পরত্বে লিঙ্গবদ্বাক্যমপি প্রমাণমিত্যাহ কর্ম্মণ্যেবেতি। তত্রৈব বাক্যান্তরমুদাহরতি কুরু কর্ম্মেতি। নন্নু ন হিংস্যাৎ সর্ব্বাণি ভূতানি ইত্যাদিনা প্রতিষিদ্ধত্বেন হিংসাদেবনর্থহেতুত্বাবগমাত্তদুপেতং বৈদিকং কর্ম্মাধর্ম্মায়েতি নানুষ্ঠাতুংশক্যতে তথা চ তস্য সাপেক্ষ্যজ্ঞানেনসমুচ্চয়োন সিধ্যতীতি সাংখ্যমতমাশঙ্ক্য পরিহরতি হিংসাদীতি। আদিশব্দাদুচ্ছিষ্টভক্ষণং গৃহ্যতে। যথোক্তশঙ্কা ন কর্ত্তব্যেত্যত্রাকাঙ্ক্ষাপূর্ব্বকং হেতুমাহ কথমিত্যাদিনা। স্বশব্দেন ক্ষত্রিয়োবিবক্ষ্যতে। যুদ্ধাকরণে ক্ষত্রিয়স্য প্রত্যবায়শ্রবণাত্তস্য তং প্রতি নিত্যত্বেনাবশ্যকর্ত্তব্যত্বপ্রতীতে গুর্ব্বাদিহিংসাযুক্তমতিক্রূরমপি কর্ম্ম নাধর্ম্মায়েতি হেত্বন্তরমাহ তদকরণে চেতি। আচার্য্যাদিহিংসাযুক্তমতিক্রূরমপি যুদ্ধং নাধর্ম্মায়েতি ব্রুবতা ভগবতা শ্রৌতানাং হিংসাদিযুক্তানামপি কর্ম্মণাং দূরতোনাধর্ম্মত্বমিতি স্পষ্টমুপদিষ্টং ভবতি সামান্যশাস্ত্রস্য ব্যর্থহিংসানিষেধার্থত্বাৎ ক্রতুবিষয়ে চোদিতহিংসায়াস্তদবিষয়ত্বাৎ কুতোবৈদিককর্ম্মানুষ্ঠানানুপপত্তিরিত্যর্থঃ, জ্ঞানকর্ম্মসমুচ্চয়াৎ কৈবল্যসিদ্ধিরিত্যুপসংহর্ত্তুমিতিশব্দঃ।

বস্তাবব্রহ্মজ্ঞানং সেতিকর্ত্তব্যতাকং স্বফলসাধকং করণত্বাদিতি অনুমানং তদ্দর্শয়তি

## শাঙ্করভাষ্যম্।

তৎ সাংখ্যং তদ্বিষয়া বুদ্ধিরাত্মনোজন্মাদিষড়্‌বিক্রিয়াভাবাদকর্ত্তাত্মেতি প্রকরণার্থনিরূপণাৎ যা জায়তে সা সাংখ্যবুদ্ধিঃ সা যেষাং জ্ঞানিনামুচিতা ভবতি তে সাংখ্যাঃ এতস্যাবুদ্ধের্জ্জন্মনঃ প্রাগাত্মনোদেহাদিব্যতিরিক্তস্য কর্ত্তৃত্বভোক্তৃত্বাদ্যপেক্ষাধর্ম্মাধর্ম্মবিবেকপূর্ব্বকোমোক্ষসাধনানুষ্ঠাননিরূপণলক্ষণোযোগঃ, তদ্বিষয়া বুদ্ধির্যোগবুদ্ধিঃ সা যেষাং কর্ম্মিণামুচিতা ভবতি তে যোগিনঃ, তথা চ ভগবতা বিভক্তে দ্বে বুদ্ধী নির্দ্দিষ্টে এষা তেঽভিহিতা সাংখ্যে বুদ্ধির্যোগে ত্বিমাং শৃণ্বিতি। তয়োশ্চ সাংখ্যবুদ্ধ্যাশ্রয়াং জ্ঞানযোগেন নিষ্ঠাং সাংখ্যানাং বিভক্তাং বক্ষ্যতি পুরা দেবাত্মনা ময়া প্রোক্তেতি, তথাচ যোগবুদ্ধ্যাশ্রয়াং কর্ম্মযোগেন নিষ্ঠাং বিভক্তাঞ্চ বক্ষ্যতি কর্ম্মযোগেন যোগিনামিত্যেবংসাংখ্যবুদ্ধিং যোগবুদ্ধিঞ্চাশ্রিত্য দ্বে নিষ্ঠে বিভক্তে ভগবতৈবোক্তে জ্ঞানকর্ম্মণোঃ কর্ত্তৃত্বাকর্ত্তৃত্বৈকত্বানেকত্ববুদ্ধ্যাশ্রয়য়োবেকপুরুষাশ্রয়ত্বাসম্ভবং পশ্যতা যথৈতদ্বিভাগবচনং তথৈব দর্শিতং শাতপথীয়ে ব্রাহ্মণে, এতমেব

## গিরিকৃত টীকা।

তদসদিতি। ন হি শুক্তিকাদিজ্ঞানমজ্ঞাননিবৃত্তৌ স্বফলে সহকারি কিঞ্চিদপেক্ষতে তথা চ ব্যভিচাবাদসাধকং করণত্বমিত্যর্থঃ। যত্তু গীতাশাস্ত্রে সমুচ্চয়স্যৈব প্রতিপাদ্যতেতি প্রতিজ্ঞাতং তদপি বিভাগবচনবিরুদ্ধমিত্যাহ জ্ঞানেতি। সাংখ্যবুদ্ধির্যোগবুদ্ধিশ্চেতি বুদ্ধিদ্বয়ং। তত্র সাংখ্যবুদ্ধ্যাশ্রয়াং জ্ঞাননিষ্ঠাং ব্যাখ্যাতুং সাংখ্যশব্দার্থমাহ আশোচ্যানিত্যাদিনা ইতি। অশোচ্যানিত্যাদিনা স্বধর্ম্মমপি চাবেক্ষ্যেত্যেতদন্তং বাক্যং যাবন্তবিষ্যতি তাবতা গ্রন্থেন যৎ পরমার্থভূতমাত্মতত্ত্বং ভগবতা নিরূপিতং তদ্যথা সম্যক্‌ ব্যাখ্যায়তে প্রকাশ্যতে সা বৈদিকী সম্যক্‌বুদ্ধিঃ সংখ্যা তয়া প্রকাশ্যত্বেন সম্বন্ধি প্রকৃতং তত্ত্বং সাখ্যমিত্যর্থঃ। সাংখ্যশব্দার্থমুক্ত্বা তৎপ্রকাশিকাং বুদ্ধিং তদ্বতশ্চ সংখ্যান্‌ ব্যাকরোতি তদ্বিষয়েতি। তদ্বিষয়া বুদ্ধিঃ সাংখ্যে বুদ্ধিবিতিসম্বন্ধঃ। তামেব প্রকটয়তি আত্মনইতি। ন জায়তে ম্রিয়তে বেত্যাদিপ্রকরণার্থনিরূপণদ্বাবেণাত্মনঃ ষড়্‌ভাবানিতিবিক্রিয়াসম্ভবাৎ কূটস্থোঽসাবিতি যা বুদ্ধিরুৎপদ্যতে সা সাংখ্যবুদ্ধিঃ তৎপরাঃ সন্ন্যাসিনঃ সাংখ্যাইত্যর্থঃ। সম্প্রতি যোগবুদ্ধ্যাশ্রয়াং কর্ম্মনিষ্ঠাং ব্যাখ্যাতুকামোযোগশব্দার্থমাহ এতস্যাইতি। যথোক্তবুদ্ধ্যুৎপত্তৌ বিবোধাদেবানুষ্ঠানাযোগাত্তস্যাস্তন্নিবর্ত্তকত্বাৎ পূর্ব্বমেব তদুৎপত্তেরাত্মনশ্চ দেহাদিব্যতিরিক্তত্বাদ্যপেক্ষয়া ধর্ম্মাধর্ম্মং নিরূপ্য তেনেশ্বরারাধনরূপেণ কর্ম্মণা পুরুষোমোক্ষায় যুজ্যতে যোগ্যঃ সম্পদ্যতে তেন মোক্ষসিদ্ধয়ে পরম্পরয়া সাধনীভূতপ্রাগুক্তধর্ম্মানুষ্ঠানাত্মকোযোগইত্যর্থঃ। অথ যোগবুদ্ধিং বিভজন্‌ যোগিনোবিভজতে তদ্বিষয়েতি। উক্তে বুদ্ধিদ্বয়ে ভগবতোঽভিমতং দর্শয়তি তথাচেতি। সাংখ্যবুদ্ধ্যাশ্রয়া জ্ঞাননিষ্ঠেত্যেতদপি ভগবতোঽভিমতমিত্যাহ তয়োশ্চেতি। জ্ঞানমেব যোগোজ্ঞানযোগ-

## শাঙ্করভাষ্যম্।

প্রব্রাজিনো লোকমিচ্ছন্তো ব্রাহ্মণাঃ প্রব্রজন্তীতি সর্ব্বকর্ম্মসন্ন্যাসং বিধায় তচ্ছেষেণ কিং প্রজয়া করিষ্যামোযেষাং নোঽয়মাত্মায়ং লোকইতি। তত্রৈব চ প্রাগ্দারপরিগ্রহাৎ পুরুষশ্চাত্মা প্রাকৃতোধর্ম্মজিজ্ঞাসোত্তরকালং লোকত্রয়সাধনং পুত্রং দ্বিপ্রকারঞ্চ বিত্তং মানুষ্যং দৈবঞ্চ, তত্র মানুষ্যং বিত্তং কর্ম্মরূপং পিতৃলোকপ্রাপ্তিসাধনং বিদ্যাঞ্চ দৈবং বিত্তং দেবলোকপ্রাপ্তিসাধনং সোঽকাময়তেতি অবিদ্যাকামবতএব সর্ব্বাণি কর্ম্মাণি শ্রৌতাদীনি দর্শিতানি, তেভ্যোব্যুত্থায় প্রব্রজন্তীতি ব্যুত্থানমাত্মানমের লোকমিচ্ছতোঽকামস্য বিহিতং। তদেতদ্বিভাগবচনমনুপপন্নং স্যাৎ যদি শ্রৌতকর্ম্মজ্ঞানয়োঃ সমুচ্চয়োঽভিপ্রেতঃ স্যাদ্ভগবতঃ।

ন চ অর্জ্জুনস্য প্রশ্ন উপপন্নোভবতি জ্যায়সী চেৎ কর্ম্মণস্তে ইত্যাদি, একপুরুষানুষ্ঠেয়ত্বাসম্ভবং বুদ্ধিকর্ম্মণোর্ভগবতা পূর্ব্বমনুক্তং কথমর্জ্জুনোঽশ্রুতং বুদ্ধেশ্চ কর্ম্মণোজ্যায়স্তং

---

## গিরিকৃত টীকা।

স্তেন হি ব্রহ্মণা যুজ্যতে তাদাত্ম্যমাপদ্যতে তেন সন্ন্যাসিনাং নিষ্ঠা নিশ্চয়েন স্থিতিস্তাৎপর্য্যেণ পরিসমাপ্তিস্তাং কর্ম্মনিষ্ঠাতোব্যতিরিক্তাং নিষ্ঠয়োর্মধ্যে নিষ্কৃষ্য ভগবান্ বক্ষ্যতীতি যোজনা। লোকেঽস্মিন্ দ্বিবিধা নিষ্ঠা পুরা প্রোক্তা ময়ানঘ জ্ঞানযোগেন সাংখ্যানামিত্যেতদ্বাক্যমুক্তার্থবিষয়মর্থতোঽনুবদতি পুরেতি। যোগবুদ্ধ্যাশ্রয়া কর্ম্মনিষ্ঠেত্যত্রাপি ভগবদনুমতিমাদর্শয়তি তথাচেতি। কর্ম্মৈব যোগঃ কর্ম্মযোগস্তেন হি বুদ্ধিশুদ্ধিদ্বারা মোক্ষহেতুজ্ঞানায় পুমান্ যুজ্যতে তেন নিষ্ঠাং কর্ম্মিণাং জ্ঞাননিষ্ঠাতোবিলক্ষণাং কর্ম্মযোগেনত্যাদিনা বক্ষ্যতি ভগবানিতি যোজনা। নিষ্ঠাদ্বয়ং বুদ্ধিদ্বয়াশ্রয়ং ভগবতা বিভজ্যোক্তমুপসংহরতি এবমিতি। কয়া পুনরনুপপত্ত্যা ভগবতা নিষ্ঠাদ্বয়ং বিভজ্যোক্তমিত্যাশঙ্ক্যাহ জ্ঞানকর্ম্মণোরিতি। কর্ম্মহি কর্ত্তৃত্বাদ্যনেকত্ববুদ্ধ্যাশ্রয়ং, জ্ঞানং পুনরকর্ত্তৃত্বৈকত্ববুদ্ধ্যাশ্রয়ং তদুভয়মিত্থং বিরুদ্ধসাধনসাধ্যত্বানৈকাবস্থস্যৈব পুরুষস্য সম্ভবত্যতোযুক্তমেব তয়োর্ব্বিভাগবচনমিত্যর্থঃ। ভগবদুক্তবিভাগবচনস্য মূলত্বেন শ্রুতিমুদাহরতি যথেতি। তত্র জ্ঞাননিষ্ঠাবিষয়ং বাক্যং পঠতি এতমেবেতি। প্রকৃতমাত্মানং নিত্যবিজ্ঞপ্তিস্বভাবং বেদিতুমিচ্ছন্তঃ ত্রিবিধেঽপি কর্ম্মফলে বৈতৃষ্ণ্যভাজঃ সর্ব্বাণি কর্ম্মাণি পরিত্যজ্য জ্ঞাননিষ্ঠাঃ ভবন্তীতি পঞ্চমলকারস্বীকারেণ সন্ন্যাসবিধিং বিবক্ষিত্বাৎ তস্যৈব বিধেঃ বিশেষণার্থবাদেন কিং প্রজয়েত্যাদিনা মোক্ষফলং জ্ঞানমুক্তমিত্যর্থঃ। ননু ফলাভাবাৎ প্রজাক্ষেপোনোপপদ্যতে পুত্রেণৈতল্লোকজয়স্য বাক্যান্তরসিদ্ধত্বাদিত্যাশঙ্ক্য বিদুষাং প্রজাসাধ্যমনুষ্যলোকস্যাত্মব্যতিরেকেণাভাবাদাত্মনশ্চাসাধ্যত্বাদাক্ষেপোযুক্তিমানিতি বিবক্ষিত্বাহ যেষামিতি। ইতিজ্ঞানং দর্শিতমিতি শেষঃ। তস্মিন্নেব ব্রাহ্মণে কর্ম্মনিষ্ঠাবাক্যং দর্শয়তি তত্রৈবেতি। প্রাকৃতমাত্মতত্ত্বদর্শিত্বেনাজ্ঞঃ সচ ব্রহ্মচারী সন্ গুরুসমীপে যথাবিধি বেদমধীত্যার্থজ্ঞানার্থং

ভগবত্যধ্যারোপয়েৎ মৃষৈব জ্যায়সী চেৎ কর্ম্মণস্তে মতা বুদ্ধিরিতি, কিঞ্চ যদি বুদ্ধিকর্ম্মণোঃ সর্ব্বেষাং সমুচ্চয় উক্তঃ স্যাৎ অর্জ্জুনস্যাপি স উক্ত এবেতি যচ্ছ্রেয় এতয়োরেকং তন্মে ব্রূহি সুনিশ্চিতমিতি কথমুভয়োরুপদেশে সত্যন্যতরবিষয় এব প্রশ্নঃ স্যাৎ নহি পিত্তপ্রশমনার্থিনোবৈদ্যেন মধুরং শীতলঞ্চ ভোক্তব্যমিত্যুপদিষ্টে তয়োরন্যতরৎ পিত্তপ্রশমনকারণং ব্রূহীতি প্রশ্নঃ সম্ভবতি। অথার্জ্জুনস্য ভগবদুক্তবচনার্থবিবেকানবধারণনিমিত্তঃ প্রশ্নঃ কল্প্যেত, তথাপি ভগবতা প্রশ্নানুরূপং প্রতিবচনং দেয়ং, ময়া বুদ্ধিকর্ম্মণোঃ সমুচ্চয় উক্তঃ কিমর্থমিত্থং ত্বং ভ্রান্তোঽসীতি, ন তু পুনঃ প্রতিবচনমননুরূপং, পৃষ্টাদন্যদেব দ্বে নিষ্ঠে ময়া পুরা প্রোক্তে ইতি বক্তুং যুক্তং। নাপি স্মার্ত্তেনৈব কর্ম্মণা বুদ্ধেঃ সমুচ্চয়েঽভিপ্রেতে বিভাগবচনাদি সর্ব্বমুপপন্নং, কিঞ্চ ক্ষত্রিয়স্য যুদ্ধং স্মার্ত্তং কর্ম্ম স্বধর্ম্মইতি জানতস্তৎ কিং

## গিরিকৃত টীকা।

ধর্ম্মজিজ্ঞাসাং কৃত্বা তদূর্দ্ধকালং লোকত্রয়প্রাপ্তিসাধনং পুত্রাদিত্রয়ং সোকাময়ত জায়া মে স্যাদিত্যাদিনা কামিতবানিতি শ্রুতমিত্যর্থঃ। বিত্তং বিভজতে দ্বিপ্রকারমিতি। তদেব প্রকারদ্বৈরূপ্যমাহ মানুষ্যমিতি। মানুষ্যং বিত্তং ব্যাচষ্টে কর্ম্মরূপমিতি। তস্য ফলপর্য্যবসায়িত্বমাহ পিতৃলোকেতি। দৈবং বিত্তং বিভজ্যতে বিদ্যাঞ্চেতি। তস্যাপি ফলনিষ্ঠত্বমাহ দেবেতি। কর্ম্মনিষ্ঠাবিষয়ত্বেনোদাহৃতশ্রুতেস্তাৎপর্য্যমাহ অবিদ্যেতি। অজ্ঞস্য কামনাবিশিষ্টস্যৈব কর্ম্মাণি সোকাময়তেত্যাদিনা দর্শিতানীত্যর্থঃ। জ্ঞাননিষ্ঠাবিষয়ত্বেন দর্শিতশ্রুতেরপি তাৎপর্য্যং দর্শয়তি তেভ্যইতি। কর্ম্মসু বিরক্তস্যৈব সন্ন্যাসপূর্ব্বিকা জ্ঞাননিষ্ঠাপ্রাগুদাহৃতশ্রুত্যা দর্শিতেত্যর্থঃ। অবস্থাভেদেন জ্ঞানকর্ম্মণোর্ভিন্নাধিকারত্বস্য শ্রুতত্বাৎ তন্মূলেন ভগবতোবিভাগবচনেন শাস্ত্রস্য সমুচ্চয়পরত্বপ্রতিজ্ঞাতমপবারিতমিতি সাধিতং কিঞ্চ সমুচ্চয়জ্ঞানস্য শ্রৌতেন স্মার্ত্তেন বা কর্ম্মণা বিবক্ষতে যদি প্রথমং তত্রাহ তদেতদিতি।

সমুচ্চয়েঽভিপ্রেতে প্রশ্নানুপপত্তিং দোষান্তরমাহ নচেতি। তামেবানুপপত্তিং প্রকটয়তি একপুরুষেতি। যদি সমুচ্চয়ঃ শাস্ত্রার্থোভগবতা বিবক্ষিতস্তদা জ্ঞানকর্ম্মণোরেকেন পুরুষেণানুষ্ঠেয়ত্বমেব তেনোক্তমর্জ্জুনেন চ শ্রুতং তৎ কথং, তদসম্ভবমনুক্তমশ্রুতঞ্চ মিথ্যৈব শ্রোতা ভগবত্যারোপয়েন্ন চ তদারোপাদৃতে কিমিতি মাং কর্ম্মণ্যেবাতিক্রূরে যুদ্ধলক্ষণে নিয়োজয়সি ইতি প্রশ্নোঽবকল্প্যতে তথা চ প্রশ্নালোচনয়া প্রষ্টৃপ্রতিবক্ত্রোঃ শাস্ত্রার্থতয়া সমুচ্চয়োঽভিপ্রেতো ন ভবতীতি প্রতিভাতীত্যর্থঃ। কিঞ্চ সমুচ্চয়পক্ষে কর্ম্মাপেক্ষয়া বুদ্ধের্জ্যায়স্ত্বং ভগবতা পূর্ব্বমনুক্তমর্জ্জুনেনচাশ্রুতং কথমসৌ তস্মিন্নারোপয়িতুমর্হতি ততশ্চানুবাদবচনং শ্রোতুরনুচিতমিত্যাহ বুদ্ধেশ্চেতি। ইতশ্চ সমুচ্চয়ঃ শাস্ত্রার্থোন সম্ভবত্যন্যথা পঞ্চমাদাব

কর্ম্মণি ঘোরে মাং নিয়োজয়সীত্যুপালম্ভোঽনুপপন্নস্তস্মাৎ গীতাশাস্ত্রে ঈষন্মাত্রেণাপি শ্রৌতেন স্মার্ত্তেন বা কর্ম্মণাত্মজ্ঞানস্য সমুচ্চয়ো ন কেনচিদ্দর্শয়িতুং শক্যঃ।

যস্য ত্বজ্ঞানাদ্রাগাদিদোষতোবা কর্ম্মণি প্রবৃত্তস্য যজ্ঞেন দানেন তপসা বা বিশুদ্ধসত্ত্বস্য জ্ঞানমুৎপন্নং পরমার্থতত্ত্ববিষয়মেকমেবেদংসর্ব্বংব্রহ্মাকর্ত্তৃ চেতি তস্য কর্ম্মণি কর্ম্মপ্রয়োজনে চ নিবৃত্তেঽপি লোকসংগ্রহার্থং যত্নপূর্ব্বং যথাপ্রবৃত্তিস্তথৈব কর্ম্মণি প্রবৃত্তস্য যৎ প্রবৃত্তিরূপং দৃশ্যতে ন তৎ কর্ম্ম যেন বুদ্ধেঃ সমুচ্চয়ঃ স্যাৎ যথা ভগবতোবাসুদেবস্য ক্ষত্রধর্ম্মং চেষ্টিতং ন জ্ঞানেন সমুচ্চীয়তে পুরুষার্থসিদ্ধয়ে তদ্বত্তৎফলাভিসন্ধ্যহঙ্কারাভাবস্য তুল্যত্বাৎ বিদুষঃ, তত্ত্ববিন্নাহং করোমীতি মন্যতে ন চ তৎফলমভিসন্ধত্তে, যথা চ স্বর্গাদিকামার্থিনোঽগ্নিহোত্রাদিকর্ম্মলক্ষণধর্ম্মানুষ্ঠানায়াহিতাগ্নেঃ কাম্যএবাগ্নিহোত্রাদৌ প্রবৃত্তস্য সকামিকুতে

## গিরিকৃত টীকা।

র্জ্জুনস্য প্রশ্নানুপপত্তেবিত্যাহ কিঞ্চেতি। নন্থ সর্ব্বান্ প্রত্যুক্তোপি সমুচ্চয়েনার্জ্জুনং প্রত্যুক্তোসাবিতি তদীয় প্রশ্নোপপত্তিরিত্যাশঙ্ক্যাহ যদীতি। এতয়োঃ কর্ম্মতত্ত্যাগযোবিতি যাবৎ। নন্থ কর্ম্মাপেক্ষয়া কর্ম্মত্যাগপূর্ব্বকস্য জ্ঞানস্য প্রাধান্যাত্তস্য শ্রেয়স্ত্বাত্তদ্বিষয়প্রশ্নোপপত্তিবিতি চেন্নেত্যাহ নহীতি। তথৈব সমুচ্চয়ে পুরুষার্থসাধনে ভগবতা দর্শিতে সত্যন্তরগোচরো ন প্রশ্নোভবতীতি শেষঃ, সমুচ্চয়ে ভগবতোক্তেঽপি তদজ্ঞানাদর্জ্জুনস্য প্রশ্নোপপত্তিরিতি শঙ্কতে অথেতি। অজ্ঞাননিমিত্তং প্রশ্নমঙ্গীকৃত্যাপি প্রত্যাচষ্টে তথাপীতি। ভগবতোভ্রান্ত্যভাবেন পূর্ব্বাপরানুসন্ধানসম্ভবাদিত্যর্থঃ। প্রশ্নানুরূপত্বমেব প্রতিবচনস্য প্রকটয়তি ময়েতি। ব্যাবর্ত্ত্যেমমংশমাদর্শযতি নত্বিতি। প্রতিবচনস্য প্রশ্নাননুরূপত্বমেব স্পষ্টয়তি পৃষ্টাদিতি। শ্রৌতেন কর্ম্মণা সমুচ্চয়োজ্ঞানস্যেতি পক্ষং প্রতিক্ষিপ্য পক্ষান্তরং প্রতিক্ষিপতি নাপীতি। শ্রুতিস্মৃত্যোর্জ্ঞানকর্ম্মণোর্ব্বিভাগবচনমাদিশব্দগৃহীতং বুদ্ধের্জ্যায়স্ত্বং পঞ্চমাদৌ প্রশ্নোভগবৎপ্রতিবচনং সর্ব্বমিদং শ্রৌতেনেব স্মার্ত্তেনাপি কর্ম্মণা বুদ্ধেঃ সমুচ্চয়ে বিরুদ্ধঃ স্যাদিত্যর্থঃ। দ্বিতয়পক্ষাসম্ভবে হেত্বন্তরমাহ কিঞ্চেতি। সমুচ্চয়পক্ষে প্রশ্নপ্রতিবচনয়োরসম্ভবান্নেদং গীতাশাস্ত্রং তৎপরমিত্যুপসংহরতি তস্মাদিতি। বিশুদ্ধব্রহ্মাত্মজ্ঞানং স্বফলসিদ্ধৌ ন সহকারিসাপেক্ষমজ্ঞাননিবৃত্তিফলত্বাদ্রজ্জতাদিতত্ত্বজ্ঞানবৎ অথবা বন্ধঃ সহায়ানপেক্ষেণ জ্ঞানেন নিবর্ত্ত্যতে অজ্ঞানাত্মকত্বাৎ রজ্জুসর্পাদিবদিতি ভাবঃ।

নন্থ কুর্য্যাদ্বিদ্বাংস্তথাসক্তশ্চিকীর্ষুর্লোকসংগ্রহমিতি বক্ষ্যমাণত্বাৎ কথং গীতাশাস্ত্রে সমুচ্চয়োনাস্তি তত্রাহ যস্যত্বিতি। চোদনাসূত্রানুসারেণ বিধিতোঽনুষ্ঠেয়স্য কর্ম্মণোধর্ম্মত্বাদ্ব্যাপারমাত্রস্য তথাত্বাভাবাৎ তত্ত্ববিদশ্চ বর্ণাশ্রমাভিমানশূন্যস্যাধিকারপ্রতিপত্ত্যভাবাদ্বাগাদিপ্রবৃত্তীনামবিদ্যালেশতোজায়মানানাং কর্ম্মাভাসত্বাৎ কুর্য্যাদ্বিদ্বানিত্যাদি বাক্যং ন

বিনষ্টেঽপি কামে তদেবাগ্নিহোত্রাদ্যনুতিষ্ঠতোঽপি ন তৎ কাম্যমগ্নিহোত্রাদি ভবতি, তথা চ. দর্শয়তি ভগবান্ কুর্ব্বন্নপি ন করোতি ন লিপ্যতে ইতি। অত্র যচ্চ পূর্ব্বৈঃ পূর্ব্বতরং কৃতং কর্ম্মণৈব হি সংসিদ্ধিমাস্থিতা জনকাদয় ইতি তত্ প্রবিভজ্য বিজ্ঞেয়ং, তৎকথং, যদি তাবৎ পূর্ব্বে জনকাদয়ঃ তত্ত্ববিদোপি প্রবৃত্তকর্ম্মণঃ স্যুস্তে লোকসংগ্রহার্থং গুণাগুণিষু বর্ত্তন্তইতি জ্ঞানেনৈব সংসিদ্ধিমাস্থিতাঃ। কর্ম্মসন্ন্যাসে প্রাপ্তেঽপি কর্ম্মণা সহৈব সংসিদ্ধিমাস্থিতা ন কর্ম্মসন্ন্যাসং কৃতবন্তইত্যেযোঽর্থঃ। অথ ন তে তত্ত্ববিদ ঈশ্বরসমর্পিতেন কর্ম্মণা সাধনভূতেন সংসিদ্ধিং সত্ত্বশুদ্ধিং জ্ঞানোৎপত্তিলক্ষণাং বা সংসিদ্ধিমাস্থিতা জনকা-

## গিরিকৃতটীকা।

সমুচ্চয়প্রাপকমিতিভাবঃ, বাশব্দশ্চার্থে দ্বিতীয়স্তু বিবিদিষাবাক্যস্থসাধনান্তসংগ্রহার্থঃ। সাংসারিকং জ্ঞানং ব্যাবর্ত্তয়তি পরমার্থেতি। তদেবাভিনয়তি একমিতি। প্রবৃত্তিরূপমিতি রূপগ্রহণমাভাসত্বপ্রদর্শনার্থং কর্ম্মাভাসসমুচ্চয়স্তু যাদৃচ্ছিকত্বান্ন মোক্ষং ফলয়তীতি শেষঃ। কিঞ্চ জ্ঞানিনোবাগাদিপ্রবৃত্তির্নজ্ঞানেন তৎফলেন সমুচ্চয়তে ফলাভিসন্ধিবিকলপ্রবৃত্তিত্বাদহঙ্কারবিধুরপ্রবৃত্তিত্বাদ্বা ভগবৎপ্রবৃত্তিবদিত্যাহ যথেতি। হেতুদ্বয়স্যাসিদ্ধিমাশঙ্ক্য পরিহরতি তত্ত্ববিদিতি। কূটস্থং ব্রহ্মৈবাহমিতি মত্বানোবিদ্বান্ প্রবৃত্তিং তৎফলং বা নৈব স্বগতত্বেন পশ্যতি রূপাদিবদ্দৃশ্যর্দ্রষ্টৃধর্ম্মত্বাযোগাৎ কিন্তু কার্য্যকারণসংঘাতত্বেনৈব প্রবৃত্ত্যাদি প্রতিপদ্যতে ততস্তত্ত্ববিদোব্যাখ্যানভিক্ষাটনাদৌ অহঙ্কারস্য তৃপ্ত্যাদিফলাভিসন্ধেশ্চাভাসত্বান্নাসিদ্ধং হেতুদ্বয়মিত্যর্থঃ। নন্বু জ্ঞানোদয়াৎ প্রাগবস্থায়ামিবোত্তরকালেপি প্রতিনিয়তপ্রবৃত্ত্যাদিদর্শনান্ন তত্ত্বদর্শিনিষ্ঠপ্রবৃত্ত্যাদেরাভাসত্বমিতি তত্রাহ যথাচেতি। স্বর্গাদিবেব কাম্যমানত্বাৎ কামস্তদর্থিনঃ স্বর্গাদিকামস্যাগ্নিহোত্রাদেরপেক্ষিতস্বর্গাদিসাধনস্যানুষ্ঠানার্থমগ্নিমাধায় ব্যবস্থিতস্য তস্মিন্নেব কাম্যে কর্ম্মণি প্রবৃত্তস্যার্দ্ধকৃতে কেনাপি হেতুনা কামে বিনষ্টে তদেবাগ্নিহোত্রাদি নির্ব্বর্ত্তয়তো ন তৎ কাম্যং ভবতি নিত্যকাম্যবিভাগস্য স্বাভাবিকত্বাভাবাৎ কামোপবন্ধানুপবন্ধকৃতত্বাৎ তথা বিদুষোপি বিধ্যধিকারাভাবাদ্বাগাদিপ্রবৃত্তীনাং কর্ম্মাভাসত্বেত্যর্থঃ। বিদ্বৎপ্রবৃত্তীনাং কর্ম্মাভাসত্বমিত্যত্র ভগবদনুমতিমুপন্যস্যতি তথাচেতি। নন্বু বিদ্বদ্ব্যাপারেপি কর্ম্মশব্দপ্রয়োগদর্শনাৎ তদ্ব্যাপারস্য কর্ম্মাভাসত্বানুপপত্তেঃ সমুচ্চয়সিদ্ধিরিতি তত্রাহ যচ্চেতি। জ্ঞানকর্ম্মণোঃ সমুচ্চিত্যৈব সংসিদ্ধিহেতুত্বে প্রতিপন্নে কুতোবিভজ্যার্থজ্ঞানমিতি পৃচ্ছতি তৎকথমিতি। তত্র কিং জনকাদয়োপি তত্ত্ববিদঃ প্রবৃত্তকর্ম্মাণঃ স্যুরাহোস্বিদতত্ত্ববিদইতি বিকল্প্য প্রথমং প্রত্যাহ যদীতি। তত্ত্ববিত্ত্বে কথং প্রবৃত্তকর্ম্মত্বং কর্ম্মণামকিঞ্চিৎকরত্বাদিত্যাশঙ্ক্যাহ তে লোকেতি। তেষামুক্তপ্রয়োজনার্থমপি ন প্রবৃত্তির্যুক্তা সর্ব্বত্রাপ্যুদাসীনত্বাদিত্যাশঙ্ক্যাহ গুণা ইতি।

## শাঙ্করভাষ্যম্।

দয়ইতি বাখ্যেয়ং। এতমেবার্থং বক্ষ্যতি ভগবান্ সত্ত্বশুদ্ধয়ে কর্ম্ম কুর্ব্বন্তীতি, স্বকর্ম্মণা তমভ্যর্চ্চ্য সিদ্ধিং বিন্দতি মানবইত্যুক্ত্বা সিদ্ধিপ্রাপ্তস্য চ পুনর্জ্ঞাননিষ্ঠাং বক্ষ্যতি সিদ্ধিং প্রাপ্তো যথা ব্রহ্মেত্যাদিনা, তস্মাদ্গীতাসু কেবলাদেব তত্ত্বজ্ঞানান্মোক্ষপ্রাপ্তিঃ ন কর্ম্মসমুচ্চিতাদিতি নিশ্চিতোঽর্থঃ, যথা চায়মর্থস্তথা প্রকরণশোবিভজ্য তত্র তত্র দর্শয়িষ্যামঃ।

তত্রৈবন্ধর্ম্মসংমূঢ়চেতসোমিথ্যাজ্ঞানবতোমহতি শোকসাগরে নিমগ্নস্যার্জ্জুনস্যান্যত্রাত্মজ্ঞানাদুদ্ধরণমপশ্যন্ ভগবান্ বাসুদেবস্ততঃ ততঃকৃপয়ার্জ্জুনমুদ্দিধারয়িষুরাত্মজ্ঞানায়াবতারয়ন্নাহ।

## গিরিকৃত টীকা।

ইন্দ্রিয়াণাং বিষয়েষু প্রবৃত্তিদ্বারা তত্ত্ববিদাং প্রবৃত্তকর্ম্মত্বেঽপি জ্ঞানেনৈব তেষাং মুক্তিরিত্যাহ জ্ঞানেনেতি। উক্তমেবার্থং সংক্ষিপ্য দর্শয়তি, কর্ম্মেতি। কর্ম্মণেত্যাদৌ বাধিতানুবৃত্ত্যাভাবোগৃহ্যতে। দ্বিতীয়মনুবদতি অথেতি। তত্র বাক্যার্থং কথয়তি ঈশ্বরেতি। বিভজ্য বিজ্ঞেয়ত্বং বাক্যার্থস্যোক্তমুপসংহরতি ইতিব্যাখ্যেয়মিতি। কর্ম্মণাং চিত্তশুদ্ধিদ্বারা জ্ঞানহেতুত্বমিত্যুক্তেঽর্থে বাক্যশেষং প্রমাণয়তি এতমেবেতি। যোগিনঃ কর্ম্মকুর্ব্বন্তীত্যাদি বাক্যমর্থতোঽনুবদতি সত্ত্বেতি। স্বকর্ম্মণা ইত্যাদৌ সাক্ষাদেব মোক্ষহেতুত্বং কর্ম্মণাং বক্ষ্যতীত্যাশঙ্ক্যাহ স্বকর্ম্মণেতি। স্বকর্ম্মানুষ্ঠানাদীশ্বরপ্রসাদদ্বারা জ্ঞাননিষ্ঠাযোগ্যতা লভ্যতে ততোজ্ঞাননিষ্ঠয়া মুক্তিস্তেন ন সাক্ষাৎ কর্ম্মণাং মুক্তিহেতুতেত্যগ্রে স্ফুটীভবিষ্যতীত্যর্থঃ। তত্ত্বজ্ঞানোত্তরকালং কর্ম্মাসম্ভবে ফলিতমুপসংহরতি তস্মাদিতি। ননু যদ্যপি গীতাশাস্ত্রং তত্ত্বজ্ঞানপ্রধানমেকং বাক্যং তথাপি তন্মধ্যে শ্রূয়মাণং কর্ম্মতদঙ্গমঙ্গীকর্ত্তব্যং প্রকরণপ্রামাণ্যাদিতি সমুচ্চয়সিদ্ধিস্তত্রাহ যথাচেতি। অর্থশব্দেনাত্মজ্ঞানমেব কেবলং কৈবল্যহেতুরিতি গৃহ্যতে।

বৃত্তিকৃতামভিপ্রায়ং প্রত্যাখ্যায় স্বাভিপ্রেতঃ শাস্ত্রার্থঃ সমর্থিতঃ সম্প্রত্যশোচ্যানিত্যস্মাৎ প্রাক্তনগ্রন্থসন্দর্ভস্য প্রাগুক্তং তাৎপর্য্যার্থমনুদ্যাশোচ্যানিত্যাদেঃ স্বধর্ম্মমপি চাবেক্ষ্যেত্যেতদন্তস্য সমুদায়স্য তাৎপর্য্যমাহ তত্রেতি। অত্র হি শাস্ত্রে ত্রীণি কাণ্ডান্যষ্টাদশসংখ্যকানামধ্যায়ানাং ষট্কত্রিতয়মুপাদায় ত্রৈবিধ্যাৎ তত্র পূর্ব্বষট্কাত্মকং পূর্ব্বকাণ্ডং ত্বম্পদার্থং বিষয়ীকরোতি, মধ্যমষট্করূপং মধ্যমকাণ্ডং তৎপদার্থং গোচরয়তি, অন্তিমষট্কলক্ষণমন্তিমং কাণ্ডং তত্ত্বং পদার্থয়োরৈক্যং বাক্যার্থমধিকরোতি, তজ্জ্ঞানসাধনানি তত্র তত্র প্রসঙ্গাদুপক্ষিপ্যন্তে তজ্জ্ঞানস্য তদধীনত্বাৎ, তত্ত্বজ্ঞানমেব কেবলং কৈবল্যসাধনমিতি চ সর্ব্বত্র বিগীতং, এবং পূর্ব্বোক্তরীত্যা গীতাশাস্ত্রার্থে পরিনিশ্চিতে সতীতি যাবৎ, ধর্ম্মে সংমূঢ়ং কর্ত্তব্যাকর্ত্তব্যবিবেকবিকলং চেতো যস্য তস্য মিথ্যাজ্ঞানবতোঽহঙ্কারমমকারবতঃ

শ্রীভগবানুবাচ—অশোচ্যানন্বশোচস্ত্বং প্রজ্ঞাবাদাংশ্চ ভাষসে ।
গতাসূনগতাসূংশ্চ নানুশোচন্তি পণ্ডিতাঃ ॥ ১১ ॥

## শাঙ্করভাষ্যম্ ।

অশোচ্যানিত্যাদি । ন শোচ্যা অশোচ্যা ভীষ্মদ্রোণাদয়ঃ সদ্বৃত্তত্বাৎ পরমার্থরূপেণ চ নিত্যত্বাৎ, তানশোচ্যানন্বশোচোঽন্বশোচিতবানসি তে ম্রিয়ন্তে মন্নিমিত্তমহংতৈর্ব্বিনা-ভূতঃ কিং করিষ্যামি রাজ্যসুখাদিনেতি, ত্বং প্রজ্ঞাবতাং বুদ্ধিমতাং বাদাংশ্চ বচনানি চ ভাষসে তদেতন্মৌঢ্যং পাণ্ডিত্যবিরুদ্ধমাত্মনি দর্শয়সুন্মত্তইবেত্যভিপ্রায়ঃ, যস্মাদ্গতাসূন্

## গিরিকৃত টীকা ।

শোকাখ্যসাগরে দুরুত্তরে প্রবিশ্য ক্লিশ্যতো ব্রহ্মাত্মৈক্যলক্ষণবাক্যার্থজ্ঞানমাত্মজ্ঞানং তদতি-রেকেণোদ্ধরণাসিদ্ধেঃ তমতিভক্তমতিস্নিগ্ধং শোকাদুদ্ধর্তুমিচ্ছন্ ভগবান্ যথোক্তজ্ঞানার্থং তং অর্জ্জুনমবতারয়ন্ পদার্থপরিশোধনে প্রবর্ত্তয়ন্নাদৌ ত্বম্পদার্থং শোধয়িতুমশোচ্যানি-ত্যাদিবাক্যমাহেতি যোজনা ।

যস্যাজ্ঞানং তস্য ভ্রমোযস্য ভ্রমস্তস্য পদার্থপরিশোধনপূর্ব্বকং সম্যক্ জ্ঞানং বাক্যাদুদে-তীতি জ্ঞানাধিকারিণামভিপ্রেত্যাহ অশোচ্যানিত্যাদীতি । যত্তু কৈশ্চিদাত্মা বা অরে দ্রষ্টব্যইত্যাদ্যাত্মযাথাত্ম্যদর্শনবিধিবাক্যার্থমনেন শ্লোকেন ব্যাচষ্টে স্বয়ং হরিরিত্যুক্তং তদ-যুক্তং কৃতিযোগ্যত্বৈকার্থসমবেতশ্রেয়ঃসাধনতায়াঃ পরাভিমতনিয়োগস্য যা বিধ্যর্থস্যাত্রা-প্রতীয়মানস্য কল্পনাহেত্বভাবাৎ, ন চ দর্শনে পুরুষতন্ত্রত্বরহিতে বিধেয়যাগাদিবিলক্ষণে বিধিরূপপদ্যতে কৃত্যান্তর্ভূতস্যাহার্থত্বাৎ তব্যো ন বিধিমধিকরোতীত্যভিপ্রেত্য ব্যাচষ্টে ন শোচ্যাইতি । কথং তেষামশোচ্যত্বমিত্যুক্তে ভীষ্মাদিশব্দবাচ্যানাং শোচ্যত্বং তৎপদল-ক্ষ্যাণাং বেতি বিকল্প্যাদ্যং দূষয়তি সদ্বৃত্তত্বাদিতি । যে ভীষ্মাদিশব্দৈরুচ্যন্তে তে শ্রুতি-স্মৃত্যুদীরিতা বিগীতাচারবত্বান্ন শোচ্যতামশ্নুবীরন্নিত্যর্থঃ । দ্বিতীয়ং প্রত্যাহ পরমার্থেতি । অরজতে রজতবুদ্ধিবদশোচ্যেষু শোচ্যবুদ্ধ্যা ভ্রান্তোঽসীত্যাহ তানিতি । অনুশোচনপ্রকার-মভিনয়নভ্রান্তিমেব প্রকটয়তি তে ম্রিয়ন্তইতি । পুত্রভার্য্যাদিপ্রযুক্তং সুখমাদিশব্দেন গৃহ্যতে, ইত্যনুশোচিতবানসীতি সম্বন্ধঃ । বিরুদ্ধার্থাভিধায়িত্বেনাপি ভ্রান্তত্বমর্জ্জুনস্য সাধ-য়তি ত্বং প্রজ্ঞাবতামিতি । উৎসন্নকুলধর্ম্মাণামিত্যাদীনি বচনানি । কিমেতাবতা ফলি-

## স্বামিকৃত টীকা ।

অশোচ্যানিত্যাদি । শোকস্যাবিষয়ীভূতানেব বন্ধূনন্বশোচোঽনুশোচিতবানসি দৃষ্ট্বেমান্ স্বজনান কৃষ্ণেত্যাদিনা, তত্র কুতস্ত্বা কশ্মলমিদং বিষমে সমুপস্থিতমিত্যাদিনা ময়া বোধি-তোঽপি পুনশ্চ প্রজ্ঞাবতাং পণ্ডিতানাং বাদান্ শব্দান্ কথং ভীষ্মমহং সংখ্যইত্যাদীন্

নত্বেবাহং জাতু নাসং ন ত্বং নেমে জনাধিপাঃ।
ন চৈব ন ভবিষ্যামঃ সর্ব্বে বয়মতঃ পরম্ ॥ ১২ ॥

## শাঙ্করভাষ্যম।

গতপ্রাণান্ মৃতান্ অগতাংশ্চ অগতপ্রাণান্ জীবতশ্চ ন অনুশোচন্তি পণ্ডিতাঃ আত্মজ্ঞাঃ, পণ্ডা আত্মবিষয়া বুদ্ধির্যেষাং তে হি পণ্ডিতাঃ পাণ্ডিত্যং নির্ব্বিদ্যেতি শ্রুতেঃ, পরমার্থতস্তু নিত্যানশোচ্যাননুশোচস্যতোমূঢ়োঽসীত্যভিপ্রায়ঃ ॥ ১১ ॥

কুতস্তে অশোচ্যাঃ যতোনিত্যাঃ কথং ন তু এব জাতু কদাচিদহং নাসং কিন্ত্বাসমেব অতীতেষু দেহোৎপত্তিবিনাশেষু ঘটাদিষু বিয়দিব নিত্যমেবাহমাসমিত্যভিপ্রায়ঃ, তথা ন ত্বং নাসীঃ কিন্ত্বাসীরেব, তথা নেমে জনাধিপাঃ নাসন্ কিং ত্বাসন্নেব, তথা ন চৈব

## গিরিকৃত টীকা।

তমিতি তদাহ তদেতদিতি। তস্মৌঢ্যমশোচ্যেষু শোচ্যদৃষ্টিত্বমেতৎ পাণ্ডিত্যং বুদ্ধিমতাং বচনভাষিত্বমিতি যাবৎ। অর্জ্জুনস্য পূর্ব্বোক্তভ্রান্তিভাক্ত্বে নিমিত্তমাত্মাজ্ঞানমিত্যাহ যস্মাদিতি। নহু সূক্ষ্মবুদ্ধিভাক্ত্বমেব পাণ্ডিত্যং ন ত্বাত্মজ্ঞত্বং হেত্বভাবাদিত্যাশঙ্ক্যাহ তে হীতি। পাণ্ডিত্যং পণ্ডিতভাবমাত্মজ্ঞানং নির্ব্বিদ্য নিশ্চয়েন লব্ধ্বা বাল্যেন তিষ্ঠাসেদিতি বৃহদারণ্যকশ্রুতিমুক্তার্থামুদাহরতি পাণ্ডিত্যমিতি। যথোক্তং পাণ্ডিত্যরাহিত্যং কথং মমাবগতমিত্যাশঙ্ক্য কার্য্যদর্শনাদিত্যাহ পরমার্থতস্ত্বিতি। যস্মাদিত্যস্যাপেক্ষিতং দর্শয়তি অতইতি ॥ ১১ ॥

নিত্যত্বমশোচ্যত্বে কারণমিতি সূচিতং বিবেচয়িতুং প্রশ্নপূর্ব্বকং প্রতিজানীতে কুতইত্যাদিনা। নিত্যত্বমসিদ্ধং প্রমাণাভাবাদিতি চোদয়তি কথমিতি। আত্মা ন জায়তে প্রাগভাবশূন্যত্বান্নরবিষাণবদিতি পরিহরতি ন ত্বেবেতি। কিঞ্চাত্মা নিত্যো ভাবত্বে সত্যজাতত্বাদ্ব্যতিরেকে ঘটবদিত্যনুমানান্তরমাহ ন চৈবেতি। যত্তু কৈশ্চিদাত্মযাথাত্ম্যং জিজ্ঞাসিতং ভগবানুপদিশতি নত্বিত্যাদিনা শ্লোকচতুষ্টয়েনেত্যাদিষ্টং তদসদ্বিশেষবচনে হেত্বভাবাৎ সর্ব্বত্রৈবাত্মযাথাত্ম্যপ্রতিপাদনাবিশেষাদিত্যাশয়েন পদচ্ছেদঃ পদার্থোক্তির্ব্বিগ্রহো বাক্যযোজনেতি ত্রিতয়মপি ব্যাখ্যানাঙ্গং প্রতিপাদয়তি নত্বিত্যাদিনা। নত্বাত্মনো

## স্বামিকৃত টীকা।

কেবলং ভাষসে ন তু পণ্ডিতোঽসি যতঃ পণ্ডিতা গতাসূন্ গতপ্রাণান্ বন্ধূনগতাসূংশ্চ জীবতোঽপি বন্ধুহীনা এতে কথং জীবিষ্যন্তীতি নানুশোচন্তি পণ্ডিতাঃ বিবেকিনঃ ॥১১॥

অশোচ্যত্বে হেতুমাহ ন ত্বেবাহমিতি। যথাহং পরমেশ্বরোজাতু কদাচিল্লীলাবিগ্রহস্যাবির্ভাবতিরোভাবতোনাসমিতি তু নৈবাপি ত্বাসমেবানাদিত্বাৎ ন চ ত্বং নাসীমাত্মরূপি

দেহিনোঽস্মিন্ যথা দেহে কৌমারং যৌবনং জরা।
তথা দেহান্তরপ্রাপ্তির্ধীরস্তত্র ন মুহ্যতি ॥ ১৩ ॥

## শাঙ্করভাষ্যম্।

ন ভবিষ্যামঃ কিন্তু ভবিষ্যাম এব সর্ব্বে বয়মতোঽস্মদ্দেহবিনাশাদুত্তরকালেঽপি ত্রিম্বপি কালেষু নিত্যা আত্মস্বরূপেণেত্যর্থঃ, দেহভেদানুবৃত্ত্যা বহুবচনং নাত্মভেদাভিপ্রায়েণ ॥১২॥

তত্র কথমিব নিত্যআত্মেতিদৃষ্টান্তমাহ দেহিনঃ দেহোঽস্যাস্তীতি দেহী তস্য দেহিনো-দেহবতঃ আত্মনঃ অস্মিন্ বর্ত্তমানে দেহে যথা যেন প্রকারেণ কৌমারং কুমারভাবোবাল্যা-বস্থা যৌবনং যূনোভাবোমধ্যমাবস্থা জরা বয়োহানির্জীর্ণাবস্থা ইত্যেতাঃ তিস্রোঽবস্থা-

## গিরিকৃত টীকা।

নোদেহোৎপত্তিবিনাশয়োরুৎপত্তিবিনাশপ্রসিদ্ধেরুক্তমনুমানদ্বয়ং প্রসিদ্ধিবিরুদ্ধতয়া কালা-ত্যয়াপদিষ্টমিষ্টমিতি নেত্যাহ অতীতেম্বিতি। চরাচরব্যপাশ্রয়স্তু স্যাদিতি ন্যায়েনা-ত্মনোজন্মবিনাশপ্রসিদ্ধেরৌপাধিকজন্মবিনাশাবিষয়ত্বান্নিরুপাধিকস্য তস্য জন্মাদিরাহিত্য-মিতি ভাবঃ। যদ্যপি তবেশ্বরস্য জন্মরাহিত্যং তথাপি কথং মমেত্যাশঙ্ক্যাহ তথেতি। তথাপি ভীষ্মাদীনাং কথং জন্মাভাবস্তত্রাহ তথা নেমইতি। দ্বিতীয়মনুমানং প্রপঞ্চয়ন্নু-ত্তরার্দ্ধং ব্যাচষ্টে তথেত্যাদিনা। নন্বু দেহোৎপত্তিবিনাশয়োরাত্মনোজন্মনাশাভাবেঽপি মহা-স্বর্গমহাপ্রলয়য়োস্তস্যাগ্নিবিস্ফুলিঙ্গদৃষ্টান্তশ্রুত্যা জন্মবিনাশাবেষ্টব্যাবিত্যাশঙ্ক্য নাত্মাশ্রুতেরিতি ন্যায়েন পরিহরতি ত্রিম্বপীতি। যাবদ্বিকারন্তু বিভাগোলোকবদিতি ন্যায়েন ভিন্নত্বাদ্বিকারিত্ব-মাত্মনামনুমীয়তে ভিন্নত্বঞ্চ বহুবচনপ্রয়োগপ্রমিতমিত্যাশঙ্ক্যাহ দেহেতি ॥ ১২ ॥

নন্বু পূর্ব্বং দেহং বিহায়াপূর্ব্বং দেহমুপাদানস্য বিক্রিয়াবত্ত্বেনোৎপত্তিবিনাশবত্ত্ববিভ্রমঃ সমুদ্ভবেদিতি শঙ্কতে তত্রেতি। অশোচ্যত্বপ্রতিজ্ঞায়াং নিত্যত্বে হেতুকৃতে সতীতি যাবৎ। অবস্থাভেদে সত্যপি বস্তুতোবিক্রিয়াভাবাদাত্মনোনিত্যত্বমুপপন্নমিত্যুত্তরশ্লোকেন দৃষ্টান্তা-

## স্বামিকৃত টীকা।

ত্বাসীরেব, ইমে চ জনাধিপা নৃপা নাসন্নিতি তু নাপি ত্বাসন্নেব মদংশত্বাৎ, তথাতঃ পরিমিত উপরি ন ভবিষ্যামোন স্থাস্যামইতি চ নৈবাপি তু স্থাস্যামএবেতি জন্মমরণশূন্যত্বাদশো-চ্যাইত্যর্থঃ। ১২।

নম্বীশ্বরস্য তব জন্মমরণশূন্যত্বং সত্যমেব জীবানান্তু জন্মমরণে প্রসিদ্ধে তত্রাহ দেহিন-ইতি। দেহিনোদেহাভিমানিনোজীবস্য যথাস্মিন্ স্থূলদেহে কৌমারাদ্যবস্থাস্তদ্দেহনিব ন্ধনাএব ন স্বতঃ পূর্ব্বাবস্থানাশেঽবস্থান্তরোৎপত্তাবপি সএবাহমিতি প্রত্যভিজ্ঞানাত্তথৈ

মাত্রাস্পর্শাস্তু কৌন্তেয় শীতোষ্ণসুখদুঃখদাঃ।
আগমাপায়িনোঽনিত্যাস্তাং স্তিতিক্ষস্ব ভারত ॥ ১৪ ॥

## শাঙ্করভাষ্যম্।

অন্যোন্যবিলক্ষণাস্তাসাং প্রথমাবস্থা নাশেন নাশো দ্বিতীযাবস্থোপজননোপজনমাত্মনঃ কিংতর্হ্যবিক্রিয়স্যৈব দ্বিতীযাত্তৃতীয়াবস্থাপ্রাপ্তিরাত্মনোদৃষ্টা যথা তদ্বদেব দেহাদন্যোদেহো-দেহান্তরং তস্য প্রাপ্তির্দেহান্তরপ্রাপ্তিরবিক্রিয়স্যৈবাত্মন ইত্যর্থঃ, ধীরোধীমাংস্তত্রৈব সতি ন মুহ্যতি ন মোহমাপদ্যতে ॥ ১৩ ॥

যদ্যপ্যাত্মবিনাশনিমিত্তোমোহোন সম্ভবতি নিত্যআত্মেতি বিজানতস্তথাপিশীতোষ্ণ-সুখদুঃখপ্রাপ্তিনিমিত্তো মোহো লৌকিকো দৃশ্যতে সুখবিযোগনিমিত্তো মোহোদুঃখসং-যোগাদিনিমিত্তশ্চ শোকইত্যেতদর্জ্জুনস্য বচনমাশঙ্ক্যাহ মাত্রাস্পর্শাইতি। মাত্রাভির্মী য়ন্তে শব্দাদয়ইতি শ্রোত্রাদীনীন্দ্রিয়াণি, মাত্রাণাং স্পর্শাঃ শব্দাদিভিঃ সংযোগাস্তে শীতোষ্ণ-

## গিরিকৃত টীকা।

বষ্টম্ভেন প্রতিপাদয়তীত্যাহ দৃষ্টান্তমিতি। ন কেবলমাগমাদেবাত্মনোনিত্যত্বং কিন্ত্ববস্থা-ন্তরবজ্জন্মান্তরে পূর্ব্বসংস্কারানুবৃত্তেশ্চেত্যাহ দেহিন ইতি। দেহবত্বং তস্মিনহং মমাভিমান-ভাবত্বং, তাসামিতি নির্ধারণে ষষ্ঠী, আত্মনঃশ্রুতিস্মৃত্যুপপত্তিভির্নিত্যত্বজ্ঞানং, ধীমানিত্যত্র ধীর্ব্বিবক্ষ্যতে, এবং, সতীতি তত্ত্বতোবিক্রিয়াভাবান্নিত্যত্বে সমধিগতে সতীত্যর্থঃ ॥১৩॥

আত্মনঃশ্রুত্যাদিপ্রমিতে নিত্যত্বে তদুৎপত্তিবিনাশপ্রযুক্তশোকমোহাভাবেঽপি প্রকা-রান্তরেণ শোকমোহৌ স্যাতামিত্যাশঙ্কামনূদ্যোত্তরত্বেন শ্লোকমবতারয়তি যদিত্যাদিনা। শীতোষ্ণযোস্তাভ্যাং সুখদুঃখয়োশ্চপ্রাপ্তিং নিমিত্তীকৃত্য যোমোহাদির্দৃশ্যতে তস্যান্বয়ব্যতি-রেকাভ্যাং দৃশ্যমানত্বমাশ্রিত্য লৌকিকবিশেষণমশোচ্যানিত্যত্র যোবিদ্যাধিকারী সূচিত-স্তস্য তিতিক্ষুঃ সমাহিতোভূত্বেতিশ্রুতেঃ তিতিক্ষুত্বং বিশেষণমিহোপদিশ্যতে। ব্যাখ্যেয়ং পদমুপাদায় করণব্যুৎপত্ত্যা তস্যেন্দ্রিয়বিষয়ত্বং দর্শয়তি মাত্রা ইত্যাদিনা। ষষ্ঠীসমাসংদর্শ-

## স্বামিকৃত টীকা।

নৈতদ্দেহনাশে দেহান্তরপ্রাপ্তিরপি লিঙ্গদেহনিবন্ধনৈব ন তু তাবতাত্মনোনাশোজাত-মাত্রস্য পূর্ব্বসংস্কারেণ স্তন্যপানাদৌ প্রবৃত্তিদর্শনাৎ, অতোধীরো ধীমাংস্তত্র তয়োর্দেহনা-শোৎপত্ত্যোর্ন মুহ্যতি আত্মৈব মৃতোজাতশ্চেতি ন মন্যতইতি ॥ ১৩ ॥

নন্বেতানহং ন শোচামি কিন্তু তদ্বিয়োগাদিদুঃখভাজং মামেবেতি চেত্তত্রাহ মাত্রা-স্পর্শাইতি। মীয়ন্তে জ্ঞায়ন্তে বিষয়া আভিরিতি মাত্রাইন্দ্রিয়বৃত্তয়স্তাসাং স্পর্শা বিষয়ৈঃ সং সম্বন্ধাস্তে শীতোষ্ণাদিপ্রদা ভবন্তি তে ত্বাগমাপায়বত্ত্বাদনিত্যাঅস্থিরাঅতস্তাং স্তিতিক্ষ

যং হি ন ব্যথয়ন্ত্যেতে পুরুষং পুরুষর্ষভ।
সমদুঃখসুখং ধীরং সোঽমৃতত্বায় কল্পতে ॥১৫॥

## শাঙ্করভাষ্যম্।

সুখদুঃখদাঃ শীতমুষ্ণং দুঃখঞ্চ প্রযচ্ছন্তীতি। অথবা স্পৃশ্যন্তে ইতি স্পর্শাবিষয়াঃ শব্দাদয়ঃ মাত্রাশ্চ স্পর্শাশ্চ শীতোষ্ণসুখদুঃখদাঃ শীতং কদাচিৎ সুখং কদাচিদ্দুঃখং তথোষ্ণমপ্যনিয়তস্বরূপং সুখদুঃখে পুনর্নিয়তরূপে যতোন ব্যভিচরতোঽতস্তাভ্যাং পৃথক্ শীতোষ্ণয়োর্গ্রহণং, যস্মাত্তে মাত্রাস্পর্শাদয়ঃ আগমাপায়িনঃ আগমাপায়শীলাঃ তস্মাদনিত্যা উৎপত্তিবিনযরূপত্বাৎ, অতস্তান্ শীতোষ্ণাদীংস্তিতিক্ষস্ব প্রসহস্ব তেষু হর্ষবিষাদং মাকার্ষী-রিত্যর্থঃ ॥ ১৪ ॥

শীতোষ্ণাদীন্ সহতঃ কিং স্যাদিতি শৃণু যং হীতি। যং হি পুরুষং সমে দুঃখসুখে যস্য তং সমদুঃখসুখং সুখদুঃখপ্রাপ্তৌ হর্ষবিষাদরহিতং ধীরং ধীমন্তং ন ব্যথয়ন্তি ন

## গিরিকৃত টীকা।

য়ন্ ভাবব্যুৎপত্ত্যাস্পর্শশব্দার্থমাহ মাত্রাণামিতি। তেষামর্থক্রিয়ামাদর্শযতি তে শীতেতি। সম্প্রতি শব্দদ্বয়স্য কর্ম্মব্যুৎপত্ত্যা শব্দাদিবিষয়পরত্বমুপেত্য সমাসান্তরং দর্শয়ন্ বিষয়াণাং কার্য্যং কথয়তি অথবেতি। ননু শীতোষ্ণপ্রবৃত্তেঃ সুখদুঃখপ্রদত্বস্যাসিদ্ধত্বাৎ কিমিতি শীতোষ্ণয়োঃ সুখদুঃখাভ্যাং পৃথক্গ্রহণমিতি তত্রাহ শীতমিতি। বিবয়েভ্যস্ত পৃথক্কথনং তদন্তর্ভূতয়োরেব তয়োঃ সুখদুঃখহেত্বোরানুকূল্যপ্রাতিকূল্যয়োরুপলক্ষার্থং অধ্যাত্মং হি শীতমুষ্ণং বানুকূল্যং প্রাতিকূল্যং বা সম্পাদ্য বাহ্যাবিষযাঃ সুখাদি জনয়ন্তি। ননুবিষয়েন্দ্রিয়সংযোগস্যাত্মনি সদা সত্বাত্তৎপ্রযুক্তশীতাদেরপি তথাত্বাত্তন্নিমিত্তৌ হর্ষবিষাদৌ তস্মিন্নাপন্নাবিত্যাশঙ্ক্যোত্তরার্দ্ধং ব্যাচষ্টে যস্মাদিত্যাদিনা। অত্র চ কৌন্তেয়ভারতেতি সম্বোধনাভ্যামুভয়কুলশুদ্ধস্যৈব বিদ্যাধিকারিত্বমিতি এতদেব দ্যোত্যতে ॥ ১৪ ॥

অধিকারিবিশেষণং তিতিক্ষুত্বং নোপযুক্তং কেবলস্য তস্য পুমর্থাহেতুত্বাদিতি শঙ্কতে শীতেতি। বিবেকবৈরাগ্যাদিসহিতং তন্মোক্ষহেতুজ্ঞানদ্বারা তদর্থমিতি পরিহরতি শৃণ্বিতি। তিতিক্ষমাণস্য বিবক্ষিতং লাভমুপলম্ভয়তি যংহীতি। হর্ষবিষাদরহিতমিত্যত্র

## স্বামিকৃত টীকা।

স্ব সহস্ব যথা জলাতপাদিসংসর্গাস্তত্তৎকালকৃতাঃ স্বভাবতঃ শীতোষ্ণাদি প্রযচ্ছন্তি এবমিষ্টসংযোগবিয়োগাঅপি সুখদুঃখাদি প্রযচ্ছন্তি তেষাঞ্চাস্থিরত্বাৎ সহনং তব ধীরস্যোচিতং ন তু তন্নিমিত্তহর্ষবিষাদপারবশ্যমিতর্থঃ ॥ ১৪ ॥

তৎপ্রতীকারপ্রযত্নাদপি তৎসহনমেবোচিতং মহাফলত্বাদিত্যাহ যংহীতি। এতে

নাসতোবিদ্যতে ভাবো নাভাবো বিদ্যতে সতঃ।
উভয়োরপি দৃষ্টোঽন্তস্ত্বনয়োস্তত্ত্বদর্শিভিঃ ॥ ১৬ ॥

## শাঙ্করভাষ্যম্।

চালয়ন্তি নিত্যাত্মদর্শনাদেতে যথোক্তাঃ শীতোষ্ণাদয়ঃ, সনিত্যানিত্যস্বরূপদর্শননিষ্ঠো-দ্বন্দ্বসহিষ্ণু রমৃতত্বায় অমৃতভাবায় মোক্ষায়েত্যর্থঃ কল্পতে সমর্থোভবতি ॥ ১৫ ॥

ইতশ্চ শোকমোহাবকৃত্বা শীতোষ্ণাদিসহনং যুক্তং যস্মাৎ নাসতইতি। নাসতো-বিদ্যমানস্য শীতোষ্ণাদেঃ সকারণস্য ন বিদ্যতে নাস্তি ভাবোভবনমস্তিতা, ন হি শীতো-ষ্ণাদি সকারণং প্রমাণৈর্নিরূপ্যমানংবস্তুসম্ভবতিবিকারোহিসঃ বিকারশ্চব্যভিচরতি যথা ঘটাদিসংস্থানং চক্ষুষা নিরূপ্যমাণং মৃদ্ব্যতিরেকেণানুপলব্ধেরসত্তথা সর্ব্বোবিকারঃ কারণ-ব্যতিরেকেণানুপলব্ধেরসজ্জন্মপ্রধ্বংসাভ্যাং প্রাগূর্দ্ধঞ্চানুপলব্ধেঃকার্য্যস্য ঘটাদের্ম্মৃদাদিকার-ণস্য তৎকারণস্য চ তৎকারণব্যতিরেকেণানুপলব্ধেরসত্বং তদসত্ত্বে সর্ব্বাভাবপ্রসঙ্গইতি চেন্ন

## গিরিকৃত টীকা।

শমাদিসাধনসম্পন্নত্বমুচ্যতে ধীমন্তমিতি। নিত্যানিত্যবিবেকভাগিত্বমেতচ্চোভয়ং বৈরা-গ্যাদেরুপলক্ষণং। নিত্যাত্মদর্শনং ত্বমর্থজ্ঞানং সাধনচতুষ্টয়বন্তমধিকারিণমনূদ্য ত্বংপদার্থ-জ্ঞানবতস্তস্য মাক্ষৌপয়িকবাক্যার্থজ্ঞানযোগ্যতামাহ সনিত্যেতি ॥ ১৫ ॥

অধিকারিবিশেষণে তিতিক্ষুত্বে হেত্বন্তরপরপবন্ধেনোত্তরশ্লোকমবতারয়তি ইতশ্চেতি। ইতঃশব্দার্থমেব স্ফুটয়তি যস্মাদিতি। যতঃ শীতাদেঃ ক্লেশাদিহেতোরনাত্মনোনাস্তি বস্তুত্বং বস্তুনশ্চাত্মনোনির্ব্বিকারত্বেনৈকরূপত্বং অতোমুমুক্ষোর্ব্বিশেষণং তিতিক্ষুত্বং যুক্তমি-ত্যাহ নেত্যাদিনা। কার্য্যস্যাসত্বেপি কারণস্য সত্ত্বেনাত্যন্তাসত্ত্বাসিদ্ধিরিত্যাশঙ্ক্য বিশি-নষ্টি সকারণস্যেতি। নাসতইত্যুপাদায় পুনর্নকারানুকর্ষণমন্বয়ার্থং। অসতঃ শূন্যস্যাস্তিত্ব প্রসঙ্গাভাবাৎঅপ্রসক্ত প্রতিষেধপ্রসক্তিরিত্যাশঙ্ক্যাহ ন হীতি। বিমতমতাত্ত্বিকমপ্রা-মাণিকত্বাৎ রজ্জুসর্পবৎ, ন হি ধর্ম্মিগ্রাহকস্য প্রত্যক্ষাদেস্তত্ত্বাবেদকং প্রামাণ্যং কল্পতে বিষ-য়স্য দুর্নিরূপত্বাদতোঽনির্ব্বাচ্যং দ্বৈতমিত্যর্থঃ। কথং পুনরধ্যক্ষ্যাদিবিষয়স্য শীতোষ্ণাদি-দ্বৈতস্য দুর্নিরূপত্বেনানির্ব্বাচ্যত্বং তত্রাহ বিকারোহীতি। ততশ্চ বিমতং মিথ্যা আগমা-

## স্বামিকৃত টীকা।

মাত্রাস্পর্শা যং পুরুষং ন ব্যথয়ন্তি নাভিভবন্তি, সমে দুঃখসুখে যস্য তং স তৈরবিক্ষিপ্যমা-ণোধর্ম্মজ্ঞানদ্বারামৃতত্বায় মোক্ষায় কল্পতে যোগ্যোভবতি ॥ ১৫ ॥

নন্থ তথাপি শীতোষ্ণাদিকমতিদুঃসহং কথং সোঢ়ব্যং অত্যন্তং তৎসহনে চ কদাচিদা-ত্মনোনাশঃ স্যাদিত্যাশঙ্ক্য তত্ত্ববিচারতঃ সর্ব্বং সোঢুং শক্যমিত্যাশয়েনাহ নাসতোবিদ্যত-

## শাঙ্করভাষ্যম্।

সর্ব্বত্র বুদ্ধিদ্বয়োপলব্ধেঃ সদ্বুদ্ধিরসদ্বুদ্ধিরিতি যদ্বিষয়া বুদ্ধির্ন ব্যভিচরতি তৎসৎ যদ্বিষয়া ব্যভিচরিতি তদসৎ ইতি সদসদ্বিভাগে বুদ্ধিতন্ত্রে স্থিতে সর্ব্বত্র দ্বে বুদ্ধী সর্ব্বৈরুপলভ্যেতে সমানাধিকরণে ন নীলোৎপলবৎ সন্ ঘটঃ সন্ পটঃ সন্ হস্তীত্যেবং সর্ব্বত্র তয়োর্বুদ্ধ্যো-র্ঘটাদিবুদ্ধির্ব্ব্যভিচরতি তথা চ দর্শিতং ন তু সদ্বুদ্ধিঃ তস্মাৎ ঘটাদিবুদ্ধিবিষয়োঽসন্ ব্যভিচারাৎ ন তু সদ্বুদ্ধিবিষয়োঽব্যভিচারাৎ, ঘটে বিনষ্টে ঘটবুদ্ধৌ ব্যভিচরন্ত্যাং সদ্বুদ্ধিরপি ব্যভিচরতীতি চেৎ ন পটাদাবপি সদ্বুদ্ধিদর্শনাৎ বিশেষণবিষয়ৈব সা সদ্বুদ্ধিরতোপি ন বিনশ্যতি, অথসদ্বুদ্ধিবৎ ঘটবুদ্ধিরপি ঘটান্তরে দৃশ্যতে ইতিচেন্ন পটাদাবদর্শনাৎ, সদ্বুদ্ধিরপি

## গিরিকৃত টীকা।

পায়িত্বাৎ সম্প্রতিপন্নবদিতি ফলিতমাহ বিকারশ্চেতি। বাচারম্ভনশ্রুতেঃ দ্বৈতমিথ্যাত্বে অস্যগ্রাহকত্বং দর্শয়িতুং চকারঃ। কিঞ্চ কার্য্যং কারণাদ্ভিন্নমভিন্নস্বেতি বিকল্প্যাদ্যং দূষয়তি যথেতি। নিরূপ্যমাণমন্তর্ব্বহিশ্চেতি শেষঃ বিমতং কারণান্ন তত্ত্বতোভিদ্যতে কার্য্যত্বাদ্ঘটবদিত্যর্থঃ। ইতোপি কারণাদ্ভেদেন নাস্তি কার্য্যং আদাবন্তে চ যন্নাস্তি বর্ত্তমানেপি তত্তথেতি ন্যায়াদিত্যাহ জন্মেতি। যদি কার্য্যং কারণাদভিন্নং তদা তস্য ভেদেনাসত্ত্বে পূর্ব্বস্মাদবিশেষঃ তাদাত্ম্যেনাবস্থানন্তু ন যুক্তং তস্যাপি কারণব্যতিরেকেণাভাবাৎ। কার্য্যকারণবিভাগবিধুরে বস্তুনি কার্য্যকারণপরম্পরায়াবিভ্রমত্বাদিত্যভিপ্রেত্যাহ মৃদাদীতি। কার্য্যকারণবিভাগবিহীনং বস্ত্বেব নাস্তীতি মন্বানশ্চোদয়তি তদসত্ত্বইতি। অনুবৃত্তব্যাবৃত্তবুদ্ধিদ্বয়দর্শনাদনুবৃত্তে চ ব্যাবৃত্তানাং কল্পিতত্বাদকল্পিতং সর্ব্বভেদকল্পনাধিষ্ঠানমকার্য্যকারণং বস্তু সিধ্যতীতি পরিহরতি ন সর্ব্বত্রেতি। সম্প্রতি সতোবস্তুত্বে প্রমাণমনুমানমুপন্যস্যতি যদ্বিষয়েতি। যদ্ব্যাবৃত্তেষনুবৃত্তং তত্তমর্থং সৎ যথা সর্পধারাদিষনুগতোরজ্জ্বাদেবিদমংশঃ, বিমতং সত্যমব্যভিচারিত্বাৎ সংপ্রতিপন্নবদিত্যর্থঃ। ব্যাবৃত্তস্য কল্পিতত্বে প্রমাণমাহ যদ্বিষযেত্যাদিনা। যদ্ব্যাবৃত্তং তন্মিথ্যা যথা সর্পধারাদি, বিমতং মিথ্যা ব্যভিচারিত্বাৎসংপ্রতিপন্নবদিত্যর্থঃইত্যনুমানদ্বয়মনুস্যত্য সতোঽকল্পিতত্বং অসতশ্চ কল্পিতত্বং স্থিতমিতিশেষঃ। ননু নেদমনুমানদ্বয়মুপপদ্যতে সমস্তদ্বৈতবৈতথ্যবাদিনোবিভাগাভাবাদনুমানাদিব্যবহারানুপপত্তেস্তত্রাহ সদসদিতি। উক্তে বিভাগে বুদ্ধিদ্বয়াধীনে স্থিতে সত্যনুমানাদিব্যবহারোনির্ব্বহতি প্রাতিভাসিকবিভাগেন বিয়োগাৎ

## স্বামিকৃত টীকা।

ইতি। অসতোঽনাত্মধর্ম্মত্বাদবিদ্যমানস্য শীতোষ্ণাদেরাত্মনি ভাবঃ সত্তা ন বিদ্যতে, তথা সতঃ সৎস্বভাবস্যাত্মনোঽভাবোবিনাশো ন বিদ্যতে, এবমুভয়োঃ সদসতোরন্তোনির্ণয়োদৃষ্টঃ,কৈ স্তত্ত্বদর্শিভির্ব্বস্তুযাথার্থ্যবেদিভিঃ এবঞ্চ বিবেকেন সহস্বেত্যর্থঃ ॥ ১৬ ॥

## শাঙ্করভাষ্যম্।

নষ্টে ঘটে ন দৃশ্যতইতি চেৎ ন বিশেষ্যাভাবাৎ সদ্বুদ্ধিঃ বিশেষণবিষয়া সতী বিশেষ্যাভাবে বিশেষণানুপপত্তৌ কিং বিষয়া স্যান্ন তু পুনঃ সদ্বুদ্ধির্বিষয়াভাবাৎ একাধিকরণত্বং ঘটাদি-বিশেষ্যাভাবেন যুক্তং ইতি চেৎ ন সদিদমুদকমিতি মরীচ্যাদাবন্যতরাভাবেপি সামানা-ধিকরণ্যদর্শনাৎ তস্মাদ্দেহাদের্দ্বন্দ্বস্য চ সকারণস্যাসতোন বিদ্যতে ভাব ইতি, তথা সতশ্চ আত্মনঃ অভাবোঽবিদ্যমানতা ন বিদ্যতে সর্ব্বত্রাব্যভিচারাদিত্যবোচামঃ, এবমাত্মানা-

## গিরিকৃত টীকা।

পরমার্থস্যৈব তদ্ধেতুত্বে কেবলব্যতিরেকাভাবাদিত্যর্থঃ। কুতঃ সদসদ্বিভাগস্যবুদ্ধিদ্বয়া-ধীনত্বং বুদ্ধিবিভাগস্যাপি তবাভাবাত্তত্রাহ সর্ব্বত্রেতি। ব্যবহারভূমিঃ সপ্তম্যর্থঃ। বুদ্ধি-বিভাগস্যাপি কল্পিতস্যৈব বোধ্যবিভাগপ্রতিভাসহেতুত্বেতিভাবঃ। বুদ্ধিদ্বয়মনুরুধ্য সদস-দ্বিভাগে সতঃ সামান্যরূপতয়া বিশেষাকাঙ্ক্ষায়াং সামান্যবিশেষে দ্বে বস্তুনি বস্তুভূতে স্যাতামিতি চেত্তত্রাহ সমানাধিকারণইতি। পদয়োঃ সামানাধিকরণ্যং বুদ্ধ্যোরুপচর্য্যতে, সোয়মিতি সামানাধিকরণ্যবদ্ঘটঃ সন্ ইত্যাদি সামানাধিকরণ্যমেকবস্তুনিষ্ঠং বস্তুভেদে ঘট-পটয়োরিব তদযোগাদিত্যর্থঃ। নীলমুৎপলমিতিবদ্ধর্ম্মধর্ম্মিবিষয়তয়া সামানাধিকরণ্যস্য স্ব-চত্বান্ন বস্ত্বৈক্যবিষয়ত্বমিতি চেন্নেত্যাহ ন নীলেতি। ন হি সামান্যবিশেষয়োর্ভেদেঽভেদে চ তদ্ভাবোভেদাভেদৌ চ বিরুদ্ধাবতোজাতিব্যক্ত্যোঃ সামানাধিকরণ্যং নীলোৎপলয়োবিব ন গৌণং কিন্তু ব্যাবৃত্তমনুবৃত্তে কল্পিতমিত্যেকনিষ্ঠমিত্যর্থঃ। সামান্যবিশেষয়োরুক্তন্যায়ং গুণগুণ্যাদাবতিদিশত্যেবমিতি। তুল্যৌ হি তত্রাপি বিকল্পদোষাবিতি ভাবঃ। সামানাধি করণ্যানুপপত্ত্যা দ্বে বস্তুনী সামান্যবিশেষাবিতি পক্ষং প্রতিক্ষিপ্য বিশেষাবেব বস্তুনীতি পক্ষং প্রতিক্ষিপতি তয়োরিতি। বুদ্ধিব্যভিচারাদ্বোধ্যব্যভিচাবেপি কথং ব্যাবৃত্তানাং বিশেষাণামবস্তুত্বমিত্যাশঙ্ক্যাহ তথাচেতি। বিকারোহি সইত্যাদাবিতিশেষঃ। ন চৈকং বস্তু সামান্যবিশেষাত্মকমেকস্য দ্বৈরূপ্যবিরোধাদিত্যভিপ্রেত্য সামান্যমেকমেব বস্তুতদ্বুদ্ধে-রব্যভিচারাৎ, বোধস্যাপিসতস্তথাত্বাদিত্যাহ নত্বিতি। ব্যভিচরতীতিপূর্ব্বেণ সম্বন্ধঃ। বিশেষাণাং ব্যভিচারিত্বে সতশ্চাব্যভিচারিত্বে ফলিতমুপসংহরতি তস্মাদিতি। অসত্বং কল্পি-তত্বং। তচ্ছব্দার্থমেব স্ফোরয়তি ব্যভিচারাদিতি। সদ্বুদ্ধিবিষয়স্য সতোঽকল্পিতত্বে তচ্ছ-ব্দোপাত্তমেব হেতুমাহ অব্যভিচারাদিতি। সদ্বুদ্ধিব্যভিচারদ্বারা বোধ্যস্যাপি ব্যভিচাবা-ত্তদব্যভিচারিত্বহেতোরসিদ্ধিরিতি শঙ্কতে। ঘটে বিনষ্টইতি। সদ্বুদ্ধের্ঘটমাত্রবুদ্ধিবদঘট-বিষয়ত্বাভাবান্ন ঘটনাশে ব্যভিচারোঽস্তি ইতি পরিহরতি ন পটাদাবিতি। সদ্বুদ্ধেরঘটবিষ-য়ত্বে নিরালম্বত্বাযোগাৎ বিষয়ান্তরং বক্তব্যমিত্যাশঙ্ক্যাহ বিশেষণেতি। সতোঽকল্পিতত্ব হেতোরব্যভিচারিত্বস্যাসিদ্ধিমুদ্ধৃত্য বিশেষ্যাণাং কল্পিতত্বহেতোর্ব্যভিচারিত্বস্যাসিদ্ধিং শঙ্কতে

## শাঙ্করভাষ্যম্ ।

ত্মনোঃ সদসতোরুভয়োরপি দৃষ্টঃ উপলব্ধোঽন্তোনির্ণয়ঃ সৎসদেবাসদসদেবেতি তু অনয়োর্যথোক্তয়োস্তত্ত্বদর্শিভিঃ, তদিতি সর্ব্বনাম সর্ব্বঞ্চ ব্রহ্ম তস্য নাম তদিতি তদ্ভাবস্তত্ত্বং ব্রহ্মণোযাথাত্ম্যং তদ্দ্রষ্টুং শীলং যেষাং তে তত্ত্বদর্শিনস্তৈস্তত্ত্বদর্শিভিস্তত্ত্বমপি তত্ত্বদর্শিনাং

## গিরিকৃত টীকা।

সদিতি। যথা সদ্বুদ্ধির্ঘটে নষ্টে পটাদৌ দৃষ্টত্বাৎ অব্যভিচারিণী অব্যভিচারঃ সতোদর্শিতস্তথা ঘটবুদ্ধিবপি ঘটে নষ্টে ঘটান্তরেদৃষ্টেস্ত্যব্যভিচারাৎঘটেব্যভিচারাসিদ্ধৌবিশেষান্তরেষ্বপি কল্পিতত্বহেতোঃ ব্যভিচারো ন সিধ্যতীত্যর্থঃ। ঘটবুদ্ধের্ঘটান্তরে দৃষ্টত্বেপি পটাদাব দৃষ্টত্বেন ব্যভিচারাৎ পটাদিবিশেষেষ্বপি ষ্যাভিচারিত্বসিদ্ধিরিত্যুত্তরমাহ ন পটাদাবিতি। বিশেষাণামেবং ব্যভিচারিত্বে সতোপি তদুপপত্তেরব্যভিচারিত্বহেতুসিদ্ধিতাদবস্থ্যমিতি শঙ্কতে সদ্বুদ্ধিরিতি। ঘটাদিনাশদেশে তদুপরক্তাকারেণ সত্ত্বাভানেপি নাসত্ত্বং ঘটাদ্যভাবাধিষ্ঠানতয়া ভানাদিত্যাহ ন বিশেষ্যেতি। যথা সর্ব্বগতা জাতিরিত্যত্র খণ্ডমুণ্ডাদিব্যক্ত্যভাবদেশে গোত্বং ব্যঞ্জকাভাবান্ন ব্যজ্যতে ন গোত্বাভাবাৎ তথাসত্ত্বমপি ঘটাদিনাশে ব্যঞ্জকাভাবান্ন ভাতি ন স্বরূপাভাবাদিত্যুক্তমেব প্রপঞ্চয়তি সদিত্যাদিনা। সপ্রতিযোগিকবিশেষণত্বব্যভিচারেপি স্বরূপাব্যভিচারাত্ত্যুক্তং সতঃ সত্যত্বমিতিভাবঃ। দ্বয়োঃ সতোরেব বিশেষণবিশেষ্যত্বদর্শনাৎ ঘটসতোরপি বিশেষণবিশেষ্যত্বে দ্বয়োঃ সত্ত্বধ্রৌব্যাৎ ঘটাদিবিকল্পিতত্বানুমানং সামানাধিকরণ্যধীবাধিতমিতি চোদয়তি একেতি। অনুভবমনুস্বত্যবাধিতবিষয়ত্বমুক্তানুমানস্য নিরস্যতি নেত্যাদিনা। ঘটাদেঃ সতিকল্পিতত্বানুমানস্য দোষরাহিত্যে ফলিতমুপসংহরতি তস্মাদিতি। প্রথমপাদব্যাখ্যানপরিসমাপ্তাবিতিশব্দঃ ননু নেদং ব্যাখ্যানং ভাষ্যকারাভিপ্রেতং সর্ব্বদ্বৈতশূন্যত্ববিবক্ষায়াং শাস্ত্রতদ্ভাষ্যবিরোধাৎ কেনাপি পুনর্দ্দুর্ব্বিদগ্ধেন স্বমনীষিকয়োৎপ্রেক্ষিতমেতদিতিচেৎ মৈবং কিমিদং দ্বৈতপ্রপঞ্চস্যশূন্যত্বং কিন্তুচ্ছত্বং কিং সদ্বিলক্ষণত্বং নাদ্যোঽনভ্যুপগমাৎ দ্বিতীয়ানভ্যুপগমে তু তবৈব শাস্ত্রবিরোধোভাষ্যবিরোধশ্চ সর্ব্বং হি শাস্ত্রং তদ্ভাষ্যং চ দ্বৈতস্য সত্যত্বানধিকরণত্বসাধনে নাদ্বৈতসত্যত্বে পর্য্যবসিতমিতি ত্রৈবিদ্যবৃদ্ধৈস্তত্র তত্র প্রতিষ্ঠাপিতং তথা চ প্রক্ষেপাশঙ্কাসংপ্রদায়পরিচয়াভাবাদিতি দ্রষ্টব্যং। অনাত্মজাতস্য কল্পিতত্বেনাবস্তুত্বপ্রতিপাদনপরতয়া প্রথমপাদং ব্যাখ্যায় দ্বিতীয়পাদমাত্মনঃ সর্ব্বকল্পনাধিষ্ঠানস্যাকল্পিতত্বেন বস্তুত্বপ্রসাধনপরতয়া ব্যাকরোতি তথেতি। নন্বাত্মনঃ সদাত্মনোবিশেষেষু বিনাশিষু তদুপরক্তস্য বিনাশঃ স্যাদিত্যাশঙ্ক্য বিশিষ্টনাশেঽপি স্বরূপানাশস্যোক্তত্বান্নৈবমিত্যাহ সর্ব্বত্রেতি। ননু কদাচিদসদেব পুনঃ সত্ত্বমাপদ্যতে প্রাগসতোঘটস্য জন্মনা সত্ত্বাভ্যুপগমাৎ সচ্চ কদাচিদসত্ত্বং প্রতিপদ্যতে স্থিতিকালে সতোঘটস্য পুনর্নাশেনাসত্ত্বাঙ্গীকারাদেবং সদসতোরব্যবস্থিতত্বা-

অবিনাশি তু তদ্বিদ্ধি যেন সর্ব্বমিদং ততম্।
বিনাশমব্যয়স্যাস্য ন কশ্চিৎ কর্ত্তুমর্হতি ॥১৭॥

## শাঙ্করভাষ্যম্।

দৃষ্টিমাশ্রিত্য শোকং মোহঞ্চ হিত্বা শীতোষ্ণাদীনি নিয়তানিয়তরূপাণি দ্বন্দ্বানি বিকারোঽয়-মসন্নেব মরীচিজলবন্মিথ্যাভাসতেতি মনসি ব্যস্য তিতিক্ষস্বেত্যভিপ্রায়ঃ ॥১৬॥

কিং পুনস্তৎ যৎ সদেব সর্ব্বদাস্তীত্যুচ্যতে অবিনাশীতি। অবিনাশি ন বিনষ্টুং শীলং যস্যেতি তুশব্দঃ সতোবিশেষণার্থঃ তদ্বিদ্ধি বিজানীহি, কিং যেন সর্ব্বমিদং জগ-ত্ততং ব্যাপ্তং সদাখ্যেন ব্রহ্মণা সাকাশমাকাশেনেব ঘটাদয়ঃ বিনাশমদর্শনমভাবমব্যয়স্য ন ব্যেতি উপচয়াপচয়ৌ ন যাতি ইত্যব্যয়ং তস্যাব্যযস্য নৈতৎ সদাখ্যং ব্রহ্ম স্বেন রূপেণ

## গিরিকৃত টীকা।

বিশেষাত্নভয়োরপি হেয়ত্বমুপাদেয়ত্বং বা তুল্যং স্যাদিতি তত্রাহ এবমিতি তুশব্দোদৃষ্টশ-ব্দেন সম্বধ্যমানোদৃষ্টিমবধারয়তি নহি প্রাগসতোঘটস্য সত্ত্বমসত্ত্বে স্থিতে সত্ত্বপ্রাপ্তিবিরোধা-দাসত্ত্বনিবৃত্তিশ্চ সত্ত্বপ্রাপ্ত্যা চেৎ প্রাপ্তমিতরেতরাশ্রয়ত্বমন্তরেণৈব সত্ত্বাপত্তিমসত্ত্বনিবৃত্তাব-সত্ত্বমনবকাশি ভবেৎ এতেন সতোঽসত্ত্বাপত্তিরপি প্রতিজানীতেতি ভাবঃ। কথং তর্হিসতো-ঽসত্ত্বমসতশ্চ সত্ত্বং প্রতিভাতি ইত্যাশঙ্ক্য তত্ত্বদর্শনাভাবাদিত্যাহ তত্ত্বেতি। তস্য ভাব-স্তত্ত্বং ন চ তচ্ছব্দেন পরামর্শযোগ্যং কিঞ্চিদস্তি। প্রকৃতং প্রতিনিয়তমিত্যাশঙ্ক্য ব্যাচষ্টে তদিত্যাদিনা। নন্ন সদসতোবস্তথাত্বং কেচিৎ প্রতিপদ্যন্তে কেচিত্তু তয়োরুক্তনির্ণয়মনু-স্মৃত্য তথাত্বমেবাভিগচ্ছন্তি তত্র কেষাং মতমেষিতব্যমিতি তত্রাহ উভয়োরপীতি ॥ ১৬ ॥

নন্ন সদিতি সামান্যং স্বরূপং বা প্রথমে তস্য বিশেষসাপেক্ষতয়া প্রলয়দশাযামশেষ-বিশেষবিনাশে বিনাশঃ স্যান্ন চাত্মাদয়োবিশেষাস্তদাপি সন্তীতি বাচ্যং আত্মাতিরিক্তানাং বিশেষাণাং কার্য্যত্বাঙ্গীকারাৎ প্রলয়াবস্থায়ামনবস্থানাদাত্মনস্ত সামান্যাত্মনোধর্ম্মিত্বাদুক্ত-দোষাদ্দ্বিতীয়ে তু স্বরূপস্য ব্যাবৃত্তত্বে কল্পিতত্বাদ্বিনাশিত্বমনুবৃত্তত্বেন তস্যৈব সামান্যতয়া প্রাগুক্তদোষানুশক্তিরিতি মন্বানশ্চোদয়তি কিং পুনরিতি। সামান্যবিশেষভাবশূন্যমথ-ণ্ডৈকরসংসদেবেত্যাদিশ্রুতিপ্রমিতং সর্ব্ববিক্রিয়ারহিতং বস্তু প্রকৃতং সদ্বিবক্ষিতমিত্যুত্তর-মাহ উচ্যতইতি। আত্মনঃ সদাত্মনোবিনাশরাহিত্যবিজ্ঞানে সর্ব্বজগদ্ব্যাপকত্বং হেতুমাহ যেনেতি। আত্মনোবিনাশাভাবে যুক্তিমাহ বিনাশমিতি। আত্মনোবিনাশমিচ্ছতা স্বতোবা পরতোবা নাশস্তস্যেষ্যতে নাদ্যইত্যাহ অবিনাশীতি দেহাদিদ্বৈতমসদুচ্যতে

## স্বামিকৃত টীকা।

তত্র সৎস্বভাবমবিনাশি বস্তু সামান্যেনোক্তং বিশেষতোদর্শয়ত্যবিনাশি ত্বিতি। যেন

অন্তবন্ত ইমে দেহা নিত্যস্যোক্তাঃ শরীরিণঃ।
অনাশিনোঽপ্রমেয়স্য তস্মাদ্যুধ্যস্ব ভারত ॥ ১৮ ॥

## শাঙ্করভাষ্যম্।

ব্যেতি ন ব্যভিচরতি নিরবয়বত্বাদ্দেহাদিবৎ নাপ্যাত্মীয়েনাত্মীয়াভাবাৎ যথা দেবদত্তো ধনহান্যা ব্যেতি ন ত্বেবং ব্রহ্ম ব্যেত্যতোঽব্যয়স্যাস্য ব্রহ্মণো বিনাশং ন কশ্চিৎ কর্ত্তুমর্হতি ন কশ্চিৎ আত্মানং বিনাশয়িতুং শক্নোতি ঈশ্বরোপ্যাত্মা হি ব্রহ্ম স্বাত্মনি চ ক্রিয়াবিরোধাৎ ॥ ১৭ ॥

কিং পুনস্তদসৎ যৎ স্বাত্মসত্তাং ব্যভিচরতীত্যুচ্যতে অন্তবন্তইতি অন্তোবিনাশোবিদ্যতে যেষাং তে অন্তবন্তো যথা মৃগতৃষ্ণিকাদৌ সদ্বুদ্ধিরনুবৃত্তা প্রমাণনিরূপণান্তে বিচ্ছি-

## গিরিকৃত টীকা।

ততঃ সতোবিশেষণং স্বতোনাশরাহিত্যং। তস্য দ্যোতকো নিপাতইত্যাহ তুশব্দইতি। আকাঙ্ক্ষাপূর্ব্বকং বিশেষ্যং দর্শয়তি কিমিত্যাদিনা। বিমতমবিনাশি ব্যাপকত্বাদাকাশবৎ ন হি প্রমিতমেবোদাহরণং কিন্তু প্রসিদ্ধমপীতি ভাবঃ। ন দ্বিতীয়ইত্যাহ বিনাশমিতি। ন খল্বস্য বিনাশং কর্ত্তুং কশ্চিদর্হতীতি সম্বন্ধঃ। বিনাশস্য সাবশেষত্বনিরবশেষত্বাভ্যাং দ্বৈরাশ্যমাশ্রিত্য ব্যাকরোতি অদর্শনমিতি। ন কশ্চিদস্যাভাবং কর্ত্তুং শক্নোতীত্যত্র হেতুমাহ অব্যয়স্যেতি। ব্রহ্ম হি স্বরূপেণ ব্যেতি স্বসম্বন্ধিনা ব্যেতি বিকল্প্যাদ্যং দূষয়তি নৈতদিতি। ন হি নিরবয়বস্য স্বাবয়বাপচয়রূপব্যয়ঃ সম্ভবতীত্যত্র বৈধর্ম্ম্যং দৃষ্টান্তমাহ দেহাদিবদিতি। দ্বিতীয়ং নিরস্যতি নাপীতি। তদেব ব্যতিবেকদৃষ্টান্তেন স্পষ্টয়তি যথেতি। দ্বিবিধেপি ব্যয়াযোগে ফলিতমাহ অতইতি। কিঞ্চ ব্রহ্ম পরতোন নশ্যত্যাত্মত্বাদ্ঘটবদিত্যাহ ন কশ্চিদিতি। আত্মত্বহেতোরসিদ্ধিমুদ্ধরতি আত্মাহীতি। তাদাত্ম্যশ্রুতিরত্র হীতি হেতু ক্রিয়তে। অস্তু তর্হি স্বয়মেব ব্রহ্ম স্বাত্মনোনাশকমুদ্বন্ধনাদিদর্শনান্নেত্যাহ স্বাত্মনীতি ॥ ১৭ ॥

সদসতোরনন্তরপ্রকৃতয়োঃস্বরূপাব্যভিচারিত্বেন পরমার্থতয়া সন্নিধারিতমিদানীমসন্নির্দ্ধিধারয়িষয়া পৃচ্ছতি কিং পুনরিতি। অসদেবেতি নিদ্ধারিতত্বাৎ প্রশ্নস্য নিরবকাশত্বমাশঙ্ক্য শূন্যং ব্যাবর্ত্ত্য বিবক্ষিতমসন্নির্দ্ধারয়িতুং তস্য সাবকাশত্বমাহ যৎস্বাত্মেতি। দেহাদেরনাত্মবর্গস্য প্রকৃতাসচ্ছব্দবিষয়তেত্যাহ উচ্যতইতি। তেষাং স্বাতন্ত্র্যং ব্যুদস্যতি নিত্য

## স্বামিকৃত টীকা।

সর্ব্বমিদমাগমাপায়ধর্ম্মাত্মকং দেহাদি ততং সাক্ষিত্বেন ব্যাপ্তং তত্ত্বাত্মস্বরূপমবিনাশি বিনাশশূন্যং বিদ্ধি জানীহি। তত্র হেতুমাহ বিনাশমিতি ॥ ১৭ ॥

## শাঙ্করভাষ্যম্।

দ্যতে স তস্যা অন্তবন্তইমে দেহা স্বপ্নমায়াদিবচ্চান্তবন্তো নিত্যস্য শরীরিণঃ শরীরবতোঽনাশিনোঽপ্রমেয়স্যাত্মনোঽন্তবন্তইত্যুক্তাবিবেকিভিরিত্যর্থঃ, নিত্যস্যানাশিনইতি ন পুনরুক্তং নিত্যস্য দ্বিবিধত্বাল্লোকে নাশস্য চ যথা দেহোভস্মীভূতোঽদর্শনং গতো নষ্টউচ্যতে বিদ্যমানোপি যথা অন্যথাপরিণতোব্যাধ্যাদিযুক্তোজাতোনষ্টউচ্যতে তত্রানাশিনোনিত্যস্যেতি দ্বিবিধেনাপি নাশেনাসম্বন্ধোঽস্যেত্যর্থঃ অন্যথা পৃথিব্যাদিবদপি নিত্যত্বং স্যাদাত্মনস্তন্মাভূদিতি নিত্যস্যানাশিনোনেত্যাহ অপ্রমেয়স্য ন প্রমেয়স্য প্রত্যক্ষাদিপ্রমাণৈরপরিচ্ছেদ্যস্যেত্যর্থঃ। নন্বাগমেনাত্মা পরিচ্ছিদ্যতে প্রত্যক্ষাদিনাচ পূর্ব্বং নাত্মনঃ স্বতঃ সিদ্ধত্বাৎ সিদ্ধে হ্যাত্মনি প্রমাতরি প্রমিৎসোঃ প্রমাণান্বেষণা ভবতি ন হি পূর্ব্বমিত্থ-

## গিরিকৃত টীকা।

স্যেতি। আকাশাদিব্যাবৃত্ত্যর্থং বিশিনষ্টি শরীরিণইতি। পরিণামনিত্যত্বং ব্যবচ্ছিনত্তি অনাশিনইতি। তস্য প্রত্যক্ষাদ্যবিষত্বমাহ অপ্রমেয়স্যেতি। দেহাদেরবস্তুত্বাদাত্মনশ্চৈকরূপত্বাদ্ যুদ্ধে স্বধর্ম্মে প্রবৃত্তস্যাপি তব ন হিংসাদিদোষসম্ভাবনেত্যাহ তস্মাদিতি। ননু দেহাদিষু সদ্বুদ্ধেরনুবৃত্তেস্তস্যাবিচ্ছেদাভাবাৎ কথমন্তবত্বং তেষামিষ্যতে তত্রাহ যথেতি। তথেমে দেহাঃ সদ্বুদ্ধিভাজোপি প্রমাণতোনিরূপণায়ামবসানে বিচ্ছেদাদন্তবন্তো ভবন্তীতি শেষঃ। দেহত্বাদিনা চ জাগ্রদ্দেহাদেরন্তবত্বং সম্প্রতিপন্নবদনুমাতুং শক্যমিত্যাহ স্বপ্নেতি। শরীরাদেরন্তবত্ত্বেপি প্রবাহরূপেণাত্মনস্তৎসম্বন্ধস্যানন্তত্বমাশঙ্ক্যাহ নিত্যস্যেতি। প্রবাহস্য প্রবাহিব্যতিরেকেণানিরূপণান্ন তদাত্মনা দেহাদ্যভাবে সম্বন্ধসিদ্ধিরিত্যভিসন্ধায়োক্তং বিবেকিভিরিতি। পদদ্বয়স্যৈকার্থত্বমাশঙ্ক্য নিরস্যতি নিত্যস্যেত্যাদিনা। নিত্যত্বস্য দ্বৈবিধ্যসিদ্ধ্যর্থং নাশদ্বৈবিধ্যং প্রতিজ্ঞাতং প্রকটয়তি যথেত্যাদিনা। নাশস্য নিরবশেষত্বেন সাবশেষত্বেন চ সিদ্ধে দ্বৈবিধ্যে ফলিতমাহ তত্রেতি। বিশেষণাভ্যাং কূটস্থনিত্যত্বমাত্মনোবিবক্ষিতমিত্যর্থঃ। অন্যতরবিশেষণমাত্রোপাদানে পরিণামিনিত্যত্বমাত্মনঃ শঙ্ক্যেতেত্যনিষ্টাপত্তিমাশঙ্ক্যাহ অন্যথেতি। ঔপনিষদত্ববিশেষণমাশ্রিত্যাপ্রমেয়ত্বমাক্ষিপতি নন্বিতি। ইতশ্চাত্মনোনাপ্রমেয়ত্বমিত্যাহ প্রত্যক্ষাদিনেতি। তেন চাগমপ্রবৃত্ত্যপেক্ষয়া পূর্ব্বাবস্থায়ামাত্মৈব পরিচ্ছিদ্যতে তস্মিন্নেবাজ্ঞানত্বসম্ভবাদজ্ঞাতজ্ঞাপকং প্রমাণমিতিচ প্রমাণলক্ষণাদিত্যর্থঃ। এতদপ্রমেয়মিত্যাদিশ্রুতিমনুস্মৃত্য পরিহরতি নেত্যাদিনা কথং মানমনপেক্ষ্যাত্মনঃ সিদ্ধত্বমিত্যাশঙ্ক্যোক্তং বিবৃণোতি সিদ্ধেহীতি। প্রমিৎসোঃ প্রমেয়মিতি শেষঃ। তদেব ব্যতিরেকমুখেন বিষদয়তি ন হীতি। আত্মনঃ সর্ব্বলোকপ্রসিদ্ধত্বাচ্চ

## স্বামিকৃত টীকা।

আগমাপায়ধর্ম্মকং সন্দর্শয়তি অন্তবন্তইতি। নিত্যস্য সর্ব্বদৈকরূপস্যাতএবানাশিনোঽপ্রমেয়স্যাপরিচ্ছিন্নস্যাত্মনইমে স্থূখদুঃখাদিধর্ম্মকাদেহাউক্তাস্তত্ত্বদর্শিভিঃ, যস্মাদেবাত্ম-

## শাঙ্করভাষ্যম্।

মহমিত্যাত্মানং অপ্রমায় পশ্চাৎ প্রমেয়পরিচ্ছেদায় প্রবর্ত্ততে ন হ্যাত্মা নাম কস্যচিদপ্রসিদ্ধোভবতি শাস্ত্রং ত্বন্ত্যং প্রমাণাং অতদ্ধর্ম্মাধ্যারোপণমাত্রনিবর্ত্তকত্বেন প্রমাণত্বমাত্মনঃ প্রতিপদ্যতে ন ত্বজ্ঞাতার্থজ্ঞাপকত্বেন তথা চ শ্রুতিঃ যৎসাক্ষাদপরোক্ষাদ্ব্রহ্ম য আত্মা সর্ব্বান্তরইতি যস্মাদেবং নিত্যোঽবিক্রিয়শ্চ আত্মা তস্মাৎ যুদ্ধস্ব যুদ্ধাদুপরমং মাকার্ষী রিত্যর্থঃ, ন হ্যত্র যুদ্ধকর্ত্তব্যতা বিধীয়তে যুদ্ধে প্রবৃত্তএব হ্যসৌ শোকমোহপ্রতিবদ্ধস্তূষ্ণীমাস্তেঽতস্তস্য কর্ত্তব্যপ্রতিবন্ধাপনয়নমাত্রং ভগবতা ক্রিয়তে তস্মাদ্‌যুদ্ধস্বেত্যনুবাদমাত্রং ন বিধিঃ॥১৮॥

## গিরিকৃত টীকা।

তস্মিন্ প্রমাণমন্বেষণীয়মিত্যাহ ন হ্যাত্মেতি। প্রত্যক্ষাদেরনাত্মবিষয়ত্বাৎতত্র চাজ্ঞাতজ্ঞাতত্বাযাব্যবহারসম্ভবাত্তৎপ্রামাণ্যস্য চ ব্যবহারিকত্বাদ্বিশিষ্টে তৎপ্রবৃত্তাবপি কেবলে তদপ্রবৃত্তের্যদ্যপি নাত্মনি তৎ প্রামাণ্যং তথাপি তদ্ধিতশ্রুত্যা শাস্ত্রস্য তত্র প্রবৃত্তিরবশ্যম্ভাবিনীত্যাশঙ্ক্যাহ শাস্ত্রন্ত্বিতি। শাস্ত্রেণ প্রত্যগ্‌ভূতে ব্রহ্মণি প্রতিপাদিতে প্রমাত্রাদিবিভাগস্য ব্যাবৃত্তত্বাদুক্তমস্যান্তত্বমপৌরুষেয়তয়া নির্দোষত্বাচ্চাগমস্য প্রামাণ্যমিত্যর্থঃ। তথাপি কথমস্য প্রত্যগাত্মনি প্রামাণ্যং তস্য স্বতঃ সিদ্ধত্বেনাবিষয়ত্বাদজ্ঞাতজ্ঞাপনাযোগাদিত্যাশঙ্ক্য স্বতোভাসমানোপি প্রতীচৌ মনুষ্যোঽহং কর্ত্তাহমিত্যাদিনা মনুষ্যত্বকর্তৃত্বাদীনামতদ্ধর্ম্মাণামধ্যারোপণেনাত্মিনি প্রতীয়মানত্বাৎ তন্মাত্রনিবর্ত্তকত্বেনাত্মনোবিষয়ত্বমনাপাদ্যৈব শাস্ত্রং প্রামাণ্যং প্রতিপদ্যতে সিদ্ধন্তু নিবর্ত্তকত্বাদিতিন্যায়াদিত্যাহ অতদ্ধর্ম্মেতি। ঘটাদাবিব স্ফুরণাতিশযজনকত্বেন কিমিত্যাত্মনি শাস্ত্রপ্রামাণ্যং নেষ্টমিত্যাশঙ্ক্য জড়ত্বাজড়ত্বাভ্যাং বিশেষাদিতি মত্বাহ নত্বিতি। ব্রহ্মাত্মনোরনপেক্ষামন্তরেণ স্বতঃ স্ফুরণে-প্রমাণমাহ তথা চেতি। সাক্ষাদন্যাপেক্ষামন্তরেণাপরোক্ষাদরোক্ষস্ফুরণাত্মকং যদ্ব্রহ্ম ন চ তস্যাত্মনোরর্থান্তরত্বং সর্ব্বাভ্যন্তরত্বেন সর্ব্ববস্তুসারত্বাত্তমাত্মানং ব্যাচক্ষেতি যোজনা। অপ্রমেয়ত্বেনাবিনাশিত্বং প্রতিপাদ্য ফলিতং নিগময়তি যস্মাদিতি। স্বধর্ম্মনিবৃত্তিহেতুনিষেধে তাৎপর্য্যং দর্শয়তি যুদ্ধাদিতি। আত্মনো নিত্যত্বাদিস্বরূপমুপপাদ্য যুদ্ধকর্ত্তব্যত্ববিধানাৎ জ্ঞানকর্ম্মসমুচ্চয়োত্র ভাতীত্যাশঙ্ক্যাহ ন হীতি। যুদ্ধস্বেতি বচনাত্তৎপ্রবর্ত্তকত্ববিধিবত্তীত্যাশঙ্ক্যাহ যুদ্ধইতি। কথং তর্হি, কথং ভীষ্মমহমিত্যাদ্যর্জ্জুনস্য যুদ্ধোপরমপরং বচনমিতি তত্রাহ শোকেতি। যদি স্বতোযুদ্ধে প্রবৃত্তিঃ তর্হি ভগবদ্বচনস্য কাগতিরিত্যাশঙ্ক্যাহ তস্যেতি। ভগবদ্বচনস্য প্রতিবন্ধনিবর্ত্তকত্বে সত্যর্জ্জুনপ্রবৃত্তেঃ স্বাভাবিকত্বে ফলিতমাহ তস্মাদিতি॥ ১৮॥

## স্বামীকৃত টীকা।

নোন বিনাশোন চ সুখদুঃখাদিসম্বন্ধস্তস্মান্মোহজং শোকং ত্যক্ত্বা যুধ্যস্ব স্বধর্ম্মং মা ত্যাক্ষী রিত্যর্থঃ॥ ১৮॥

য এনং বেত্তি হন্তারং যশ্চৈনং মন্যতে হতম্।
উভৌ তৌ ন বিজানীতো নায়ং হন্তি ন হন্যতে ॥ ১৯ ॥
ন জায়তে ম্রিয়তে বা কদাচি-
ন্নায়ং ভূত্বা ভবিতা বা ন ভূয়ঃ।

## শাঙ্করভাষ্যম্।

শোকমোহাদিসংসারকারণনিবৃত্ত্যর্থং গীতাশাস্ত্রং ন প্রবর্ত্তকমিত্যেতৎ পার্থস্য সাক্ষীভূতে ঋচাবানিনায় ভগবান্ যত্তু মন্যসে যুদ্ধে ভীষ্মাদয়োময়া হন্যন্তে অহমেব তেষাং হন্তেত্যেষা বুদ্ধির্মৃষৈব তে কথং য এনমিতি। য এনং প্রকৃতং দেহিনং বেত্তি বিজানাতি হন্তারং হননক্রিয়ায়াঃ কর্ত্তারং যশ্চৈনমন্যোমন্যতে হতং দেহহননেন হতোঽহমিতি হননক্রিয়ায়াঃ কর্ম্মভূতং তাবুভৌ ন বিজানীতো ন জ্ঞাতবন্তৌ অবিবেকনাত্মানমহং প্রত্যয়বিষয়ং হন্তাহং হতোঽস্ম্যহমিতি দেহহননেন আত্মানং যৌ বিজানীতস্তাবাত্মস্বরূপানভিজ্ঞাবিত্যর্থঃ, যস্মান্নায়মাত্মা হন্তি ন হননক্রিয়ায়াঃ কর্ত্তা ভবতি ন চ হন্যতে ন চ কর্ম্ম ভবতীত্যর্থঃ অবিক্রিয়ত্বাৎ॥ ১৯ ॥

## গিরিকৃত টীকা।

অবিনাশি তু তদ্বিদ্ধীত্যত্র পূর্ব্বার্দ্ধেন তৎপদার্থসমর্থনমুত্তরার্দ্ধেন নিবীশ্ববাদস্য পরিণামবাদস্য বা নিরাকরণমাত্মনি জন্মাদি প্রতিভানস্যোপচারিকত্বপ্রদর্শনার্থমন্তবন্তইত্যাদিবচনমিতি কেচিৎ, অস্তু নামায়মপি পন্থাঃ, পূর্ব্বোক্তস্য গীতাশাস্ত্রার্থস্যোৎপ্রেক্ষামাত্রমূলত্বং নিবাকর্ত্তুং মন্ত্রদ্বয়ং ভগবানানীতবানিতি শ্লোকদ্বয়স্য সঙ্গতিং দর্শযতি শোকমোহাদীতি। তত্র প্রথমমন্ত্রস্য সঙ্গতিমাহয়ত্বিতি। প্রত্যক্ষনিবন্ধনত্বাদমুষ্যাবুদ্ধের্ম্মৃষাত্বমযুক্ত মিত্যাক্ষিপতি কথমিতি। প্রত্যক্ষস্যাজ্ঞানপ্রসূতত্বেনাভাসত্বাৎ তৎকৃতা বুদ্ধির্ন প্রমেতি পরিহরতি এনমিতি। হন্তা চেন্মন্যতে হন্তং ইত্যাদ্যামৃচমর্থতোদর্শয়িত্বা ব্যাচষ্টে য এনমিতি। হন্তারং হতঞ্চাত্মানং মন্যমানস্য কথমজ্ঞানমিত্যাশঙ্ক্যাহ হন্তাহমিতি। হন্তৃত্বাদিজ্ঞানমজ্ঞানমিত্যত্র হেতুমাহ যস্মাদিতি। আত্মনো হননং প্রতি কর্ত্তৃত্বকর্ম্মত্বয়োরভাবে হেতুং দর্শয়তি অবিক্রিয়ত্বাদিতি॥ ১৯ ॥

## স্বামিকৃত টীকা।

তদেবং ভীষ্মাদিমৃত্যুনিমিত্তঃ শোকো নিবারিতো যচ্চাত্মনোহন্তৃত্বনিমিত্তং দুঃখমুক্তং এতান্ন হন্তুমিচ্ছামীত্যাদিনা তদপিতদ্বদেব নির্নিমিত্তমিত্যাহ য এনমিতি। এনমাত্মানমাত্মনোহননক্রিয়ায়াং কর্ম্মত্ববৎ কর্ত্তৃত্বমপি নাস্তীত্যর্থঃ। তত্র হেতুর্নায়মিতি॥ ১৯॥

অজো নিত্যঃ শাশ্বতোঽয়ং পুরাণো
ন হন্যতে হন্যমানে শরীরে ॥ ২০ ॥

## শাঙ্করভাষ্যম্।

কথমবিক্রিয়ঃ আত্মেতি দ্বিতীয়ো মন্ত্রঃ ন জায়তে নোৎপদ্যতে জনিলক্ষণাতু বস্তুবিক্রিয়া নাত্মনোবিদ্যতইত্যর্থঃ, তথা ন ম্রিয়তে বা তত্র বাশব্দশ্চার্থে ন ম্রিয়তে চেত্যন্ত্যাবিনাশলক্ষণাবিক্রিয়া প্রতিষিধ্যতে, কদাচিচ্ছব্দঃ সর্ব্ববিক্রিয়াপ্রতিষেধৈঃ সংবধ্যতে ন কদাচিজ্জায়তে ন কদাচিন্ম্রিয়তইত্যেবং, যস্মাদয়মাত্মা ভূত্বা ভবনক্রিয়ামনুভূয় পশ্চাদভবিতা অভাবং গন্তা ন ভূয়ঃ পুনস্তস্মান্নম্রিয়তে যোহি ভূত্বা ন ভবিতা স ম্রিয়তইত্যুচ্যতে লোকে, বাশব্দান্নশব্দাচ্চায়মাত্মা ভূত্বা বা ভবিতা দেহবন্নভূয়ঃ পুনস্তস্মান্ন জায়তে যোহভূত্বা ভবিতা স জায়তইত্যুচ্যতে নৈবমাত্মাঽতো ন জায়তে যস্মাদেবং তস্মাদজো যস্মান্ন ম্রিয়তে তস্মান্নিত্যশ্চ, যদ্যপ্যাদ্যন্তয়োর্ব্বিক্রিয়য়োঃ প্রতিষেধে সর্ব্বা বিক্রিয়াঃ প্রতিসিদ্ধা ভবন্তি তথাপি মধ্যভাবি-

---

## গিরিকৃত টীকা।

তদেব সাধয়িতুং ন জায়তে ম্রিয়তে বা বিপশ্চিদিত্যাদিমন্ত্রান্তরমবতারয়তি কথমিতি। সর্ব্ববিক্রিয়ারাহিত্যপ্রদর্শনেন হেতুং বিষদয়ন্ মন্ত্রমেব পঠতি ন জায়ত ইতি। জন্মমরণবিক্রিয়াদ্বয়প্রতিষেধং সাধয়তি নায়মিতি। অয়মাত্মা ভূত্বা ন ভবিতা ন চা ভূত্বা ভূয়োভবিতেতি যোজনা। ন কেবলং বিক্রিয়াদ্বয়মেবাত্র নিষিধ্যতে কিন্তু সর্ব্বমেব বিক্রিযাজাতমিত্যাহ অজ ইতি বাচ্যমর্থমুক্ত্বা বিবক্ষিতমর্থমাহ জনিলক্ষণেতি। বিকল্পার্থত্বং ব্যাবর্ত্তয়তি বেতি। নিষ্পন্নমর্থং নির্দ্দিশতি নেত্যাদিনা। সম্বন্ধমেবাভিনয়তি ন কদাচিদিতি। অন্ত্যবিক্রিয়াভাবে হেতুত্বেন নায়মিত্যাদি ব্যাচষ্টে যস্মাদিতি। উক্তমেব ব্যনক্তি যোহীতি। আত্মনি তু ভূত্বা পুনরভবনাভাবান্নাস্তি মৃত্যুরিত্যর্থঃ। আত্মনো জন্মাভাবেঽপি হেতুরিহৈব বিবক্ষিতইত্যাহ বাশব্দাদিতি। অভূত্বেতি ছেদঃ দেহবদিতি ব্যতিরেকোদাহরণং। উক্তমেবার্থং সাধয়তি যোহীতি। জন্মাভাবে তৎপূর্ব্বিকাস্তিত্ববিক্রিয়াপি নাত্মনোস্তীত্যাহ যস্মাদিতি। প্রাণ-

## স্বামিকৃত টীকা।

ন হন্যতইত্যেতদেব ষড়্ভাববিকারশূন্যত্বেন দ্রঢ়য়তি নেতি। ন জায়তইতি জন্মপ্রতিষেধঃ, ন ম্রিয়তইতি বিনাশপ্রতিষেধঃ, বাশব্দৌ চার্থে, ন চায়ং ভূত্বা উৎপদ্য ভবিতা ভবতি অস্তিত্বং ভজতে কিন্তু প্রাগেব স্বতঃ সদ্রূপইতি জন্মানন্তরাস্তিত্বলক্ষণদ্বিতীয়বিকারপ্রতিষেধস্তত্র হেতুঃ যস্মাদজঃ যোহি জায়তে স জন্মান্তরমস্তিত্বং ভজতে ন তু যঃ স্বত এবাস্তি স ভূয়োঽপ্যন্যদস্তিত্বং ভজতইত্যর্থঃ, নিত্যঃ সর্ব্বদৈকরূপইতি বৃদ্ধিপ্রতিষেধঃ, শাশ্বতঃ

## শাঙ্করভাষ্যম্।

নীনাং বিক্রিয়াণাং তদর্থৈঃ স্বশব্দৈরেব প্রতিষেধঃ কর্ত্তব্য ইত্যনুক্তানামপি যৌবনাদি সমস্ত-বিক্রিয়াণাং প্রতিষেধো যথা স্যাদিত্যাহ শাশ্বতইত্যাদিনা। শাশ্বতইত্যপক্ষয়লক্ষণা বিক্রিয়া প্রতিষিধ্যতে শশ্বদ্ভবঃশাশ্বতোনাপক্ষীয়তে স্বরূপেণ নিরবয়বত্বান্নির্গুণত্বাচ্চ নাপি গুণক্ষয়ে-ণাপক্ষয়ঃঅপক্ষয়বিপরীতাপি বৃদ্ধিলক্ষণা বিক্রিয়া প্রতিষিধ্যতে পুরাণ ইতি যে হ্যবয়বাগমে-নোপচীয়তে ন বর্দ্ধতেঽভিনবইতি চোচ্যতে অয়ং ত্বাত্মা নিরবয়বত্বাৎ পুরাপি নব এবেতি পুরাণো ন বর্দ্ধতইত্যর্থঃ, তথা ন হন্যতে ন বিপরিণম্যতে হন্যমানে বিপরিণম্যমানেঽপি শরীরে, হন্তিরত্র বিপরিণামার্থে দ্রষ্টব্যোঽপুনরুক্ততায়ৈ ন বিপরিণমতইত্যর্থঃ, অস্মিন্-মন্ত্রে ষড্ভাববিকারা লৌকিকবস্তুবিক্রিয়া আত্মনি প্রতিষিধ্যন্তে সর্ব্বপ্রকারবিক্রিয়ারহিত আত্মেতিবাক্যার্থঃ, যস্মাদেবং তস্মাদুভৌ তৌ ন বিজানীতইতি পূর্ব্বেণ মন্ত্রেণাস্য সম্বন্ধঃ ॥২০॥

## গিরিকৃত টীকা।

বিয়োগাদাত্মনোমৃতেরভাবে সনবশেষনাশাভাববন্নিরশেষনাশাভাবোপি সিধ্যতীত্যাহ যস্মাদিতি। নন্বু জন্মনাশযোর্নিষেধে তদন্তর্গতাং বিক্রিয়ান্তরাণামপি নিষেধসিদ্ধেস্তু নিষেধার্থং ন পৃথক্ যতিতব্যমিতি তত্রাহ যদ্যপীতি। স্বশব্দৈমধ্যবর্ত্তিবিক্রিয়ানিষেধবাচ-কৈরিতি যাবৎ। আর্থিকেপি নিষেধে নিষেধস্য সিদ্ধতয়া শাব্দোনিষেধোন পৃথগর্থবানি-ত্যাশঙ্ক্যাহ অনুক্তানামিতি। নিত্যশব্দেন শাশ্বতশব্দস্য পৌনরুক্ত্যং পরিহরন্ ব্যাকরোতি শাশ্বতইত্যাদিনা। অপক্ষয়োহি স্বরূপেণ বা স্যাদ্গুণাপচয়তোবেতি বিকল্প্য ক্রমেণ দূষ-য়তি নেত্যাদিনা। পুরাণপদস্যাগতার্থত্বং কথয়তি অপক্ষয়েতি। তদেব স্ফুটয়তি যো-হীতি। ন ম্রিয়তে বেত্যনেন চতুর্থপাদস্য পৌনরুক্ত্যমাশঙ্ক্যব্যাচষ্টে যথেত্যাদিনা। নন্বু-হিংসার্থোহন্তিঃ শ্রূয়তে তৎকথং বিপরিণামোনিষিধ্যতে তত্রাহ হন্তিরিতি। হিংসার্থত্ব-সম্ভবে কিমিত্যর্থান্তরং হন্তেরিষ্যতে তত্রাহ অপুনরুক্ততায়ইতি। হিংসার্থত্বে মৃতিনিষে-ধেন পৌনরুক্ত্যং স্যাত্তন্নিষেধার্থং বিপরিণামার্থং বিপরিণামার্থত্বমেষ্টব্যমিত্যর্থঃ। পূর্ব্বা-বস্থাত্যাগেনাবস্থান্তরাপত্তির্বিপরিণামঃ তদর্থশ্চেদত্র হন্তিরিষ্যতে তদানিষ্পন্নমর্থমাহ নেতি। ন জায়তে ইত্যাদিমন্ত্রার্থমুপসংহরতি অস্মিন্নিতি যথাং বিকারাণামাত্মনি প্রতিষেধে ফলিতমাহ সর্ব্বেতি। আত্মনঃ সর্ব্ববিক্রিয়ারাহিত্যেঽপি কিমায়াতমিত্যাশ-ঙ্ক্যাহ নস্মাদিতি ॥ ২০ ॥

## স্বামিকৃত টীকা।

শশ্বদ্ভবইত্যপক্ষয়প্রতিষেধঃ, পুরাণইতিবিপরিণামপ্রতিষেধঃ, পুরাপি নবএব ন তু পরিণা-মতোরূপান্তরং প্রাপ্য নবোভবতীত্যর্থঃ, যদ্বা ভবিত্বেত্যস্যানুষঙ্গং কৃত্বা ভূয়োঽধিকং যথা ভবতি তথা ন ভবিতেতি বৃদ্ধিপ্রতিষেধঃ অজোনিত্যইতি চোভয়ং বৃদ্ধ্যাদ্যভাবে হেতু-

বেদাবিনাশিনং নিত্যং য এনমজমব্যয়ম্।
কথং স পুরুষঃ পার্থ কং ঘাতয়তি হন্তি কম্॥ ২১॥

শাঙ্করভাষ্যম্।

য এনং বেত্তি হন্তারমিত্যনেন মন্ত্রেণ হননক্রিয়ায়াঃ কর্ত্তা কর্ম্ম চ ন ভবতীতি প্রতিজ্ঞায় ন জায়তইত্যনেনাবিক্রিয়ত্বে হেতুমুক্ত্বা প্রতিজ্ঞাতার্থমুপসংহরতি বেদাবিনাশিনমিতি। বেদ বিজানাতি অবিনাশিনমন্ত্যভাববিকাররহিতং নিত্যং বিপরিণামরহিতং যো বেদেতি সম্বন্ধঃ, এনং পূর্ব্বেণ মন্ত্রেণোক্তলক্ষণমজং অব্যয়ং উপচয়াপক্ষয়রহিতং কথং কেন প্রকারেণ সবিদ্বান্ পুরুষোঽধিকৃতো হন্তি হননক্রিয়াং করোতি কথং বা ঘাতয়তি হন্তারং প্রযোজয়তি ন কথঞ্চিৎ কঞ্চিৎ হন্তি ন কথঞ্চিৎ কঞ্চিৎ ঘাতয়তীত্যুভয়ত্রাক্ষেপএবার্থঃ প্রশ্না-

গিরিকৃত টীকা।

পূর্ব্বশ্লোকার্থস্যৈবোত্তরত্রাপি প্রতিভানাৎ পৌনরুক্ত্যমাশঙ্ক্য বৃত্তানুবাদপূর্ব্বকমুত্তরশ্লোকমবতারয়তি যএনমিত্যাদিনা। কর্ত্তৃত্বাদ্যভিমানবিরোধাদদ্বৈতকূটস্থাত্মানিশ্চয়সামর্থ্যাৎ প্রাপ্তং বিদুষঃ সংন্যাসং। বিদ্যাপরিপাকার্থমভ্যনুজানাতি বেদেতি। পদদ্বয়স্য পূর্ব্বমেব পৌনরুক্ত্যমাহ অবিনাশিনমিত্যাদিনা। প্রশ্নোঽপি সম্ভবতি কিমিতি তত্র উল্লেখেন ব্যাখ্যায়তে তত্রাহ উভয়ত্রেতি। উত্তরত্র প্রতিবচনাদর্শনান্নাত্র প্রশ্নঃ সম্ভবতীত্যর্থঃ। বিবক্ষিতং প্রকরণার্থং নিগময়তি হেত্বর্থস্যেতি। অবিক্রিয়ত্বং হেত্বর্থস্তস্য বিদুষঃ সর্ব্বকর্ম্ম নিষেধে সমানত্বাদিতি যাবৎ। যদি বিদুষঃ সর্ব্বকর্ম্মনিষেধোঽভিমতস্তর্হি কিমিতি হন্ত্যর্থএবাক্ষিপ্যতে তত্রাহ হন্তেরিতি। উক্তং হেতুমাক্ষেপ্তুং পৃচ্ছতি বিদুষইতি। অভিপ্রায়মপ্রতিপদ্যমানোহেতুবিশেষং পূর্ব্বোক্তং স্মারয়তি নন্বিতি। উক্তমঙ্গীকৃত্যাক্ষিপতি সত্যমিতি। বিদুষোবিজ্ঞানাত্মনোব্রহ্মণশ্চ বেদ্যস্য বিরুদ্ধধর্ম্মত্বেন দহনতুহিনবদ্ভিন্নত্বাদ্বিদুষঃ সর্ব্বকর্ম্মত্যাগেন অসৌ কারণবিশেষঃ স্যাদিত্যাহ অন্যত্বাদবিক্রিয়ত্বাদিতি চ্ছেদঃ। তথাপি কূটস্থমবিক্রিয়ংব্রহ্ম প্রতিপাদ্যমানস্য কুতোবিক্রিয়া সম্ভবেৎ ব্রহ্মপ্রতিপত্তিবিরোধাদিত্যাশঙ্ক্যাহ নন্বিতি। অয়মাত্মাব্রহ্মেত্যাদিশ্রুত্যা সমাধত্তে ন বিদুষইতি। কিঞ্চ বিদ-

স্বামিকৃত টীকা।

রিতি ন পৌনরুক্ত্যং। তদেবং(জায়তে অস্তি বর্দ্ধতে বিপরিণমতে অপক্ষীয়তে নশ্যতী) ত্যেবং যাস্কাদিভিরুক্তাঃ ষড়ভাববিকারানিরস্তাঃ, যদর্থমেতে বিকারানিরস্তাস্তং প্রস্তুতং বিনাশাভাবমুপসংহরতি ন হন্যতে হন্যমানে শরীরইতি॥ ২০॥

অতএবহন্তৃত্বাভাবোঽপি পূর্ব্বোক্তঃসিদ্ধইত্যাহ বেদাবিনাশিনমিতি। নিত্যং বৃদ্ধিশূন্যং অব্যয়মপক্ষয়শূন্যং অজং অবিনাশিনঞ্চ যো বেদ স পুরুষঃ কং হন্তি কথং বা হন্তি এবন্তৃতস্য

## শাঙ্করভাষ্যম্।

র্থাসম্ভবাৎ হেত্বর্থস্য অবিক্রিয়ত্বস্য চ তুল্যত্বাদ্বিদুষঃ সর্ব্বকর্ম্মপ্রতিষেধএব প্রকরণার্থোঽভিপ্রেতো ভগবতা হন্তেস্ত্বাক্ষেপউদাহরণার্থত্বেন বিদুষঃ কিঞ্চিৎ কর্ম্মাসম্ভবে হেতুবিশেষং পশ্যন্ কর্ম্মাণ্যাক্ষিপতি ভগবান্ কথং স পুরুষইতি। ননূক্তমেব আত্মনোঽবিক্রিয়ত্বং সর্ব্বকর্ম্মাসম্ভবকারণবিশেষঃ, সত্যমুক্তো নতু সকারণবিশেষোঽন্যত্বাদ্বিদুষোঽবিক্রিয়াত্বদাত্মনইতি। নম্ববিক্রিয়ং স্থাণুং বিদিতবতঃ কর্ম্ম ন সম্ভবতীতি চেন্ন বিদুষআত্মত্বান্ন দেহাদিসংঘাতস্য বিদ্বত্তা অতঃপারিশেষ্যাদসংহত আত্মাবিদ্বানবিক্রিয়ইতি তস্য বিদুষঃ কর্ম্মাসম্ভবাদাক্ষেপোযুক্তঃ কথং স পুরুষইতি যথা বুদ্ধ্যাদ্যাহৃতস্য শব্দাদ্যর্থস্যাবিক্রিয়এব সন্ বুদ্ধিবৃত্ত্যবিবেকবিজ্ঞানেনাবিদ্যয়োপলব্ধা আত্মা কল্প্যতে এবমেবাত্মানাত্মবিবেকজ্ঞানেন-

## গিরিকৃত টীকা।

ত্তাবিশিষ্টস্য বা কেবলস্য বা নাদ্যোবিশিষ্টস্য বিদ্বত্তায়াং বিশেষণস্যাপি তদ্ব্রহ্মসম্ভাৎ চ বিশেষণীভূতসংঘাতস্যাচেতনত্বাদ্বিদ্বত্তা যুক্তেত্যাহ ন দেহাদীতি। দ্বিতীয়ে তু জীবব্রহ্মবিভাগাসিদ্ধিরিত্যাহ অতইতি। কিঞ্চপ্রামাণিকবিরুদ্ধধর্ম্মবত্বস্যাসিদ্ধত্বাৎ প্রাতিভাসিকস্য চ বিম্বপ্রতিবিম্বয়োরনৈকান্ত্যাদ্ভেদানুমানাযোগাৎ জীবব্রহ্মণোরভেদসিদ্ধিরিত্যভিপ্রেত্য কলিতমাহ ইতি তস্যেতি। নম্ববিক্রিয়স্য ব্রহ্মরূপতয়া সর্ব্বকর্ম্মাসম্ভবে বিদুষোবিদ্বত্তাপি কথং সম্ভবতি ন হি ব্রহ্মণোঽবিক্রিয়স্য বিদ্যালক্ষণা বিক্রিয়া স্বক্রিয়া ভবিতুমর্হতি তত্রাহ যথেতি অদৃষ্টেন্দ্রিয়াদিসহকৃতমন্তঃকরণং প্রদীপপ্রভাবদ্বিষয়পর্য্যন্তং পরিগতং বুদ্ধিবৃত্তিরুচ্যতে তত্র প্রতিবিম্বিতং চৈতন্যম্ অভিব্যঞ্জকবুদ্ধিগত্যবিবেকাদ্বিষয়জ্ঞানমিতি ব্যবহ্রিয়তে তেনাত্মোপলব্ধা কল্প্যতে, তচ্চাবিদ্যাপ্রযুক্তমিথ্যাসম্বন্ধনিবন্ধনং তথৈবাধ্যাসিকসম্বন্ধেন ব্রহ্মাত্মৈক্যাভিব্যঞ্জকবাক্যোত্থবুদ্ধিবৃত্তিদ্বারা বিদ্বানাত্মা ব্যপদিশ্যতে ন চ মিথ্যাসম্বন্ধেন পারমার্থিকা বিক্রিয়ত্ববিহতিরস্তীত্যর্থঃ। অহং ব্রহ্মেতি বুদ্ধিবৃত্তের্মোক্ষাবস্থায়ামপি ভাবাদাত্মনঃ সবিশেষত্বমাশঙ্ক্য তস্য যাবদুপাধিসত্বমেবেত্যাহ অসত্যেতি। ননু কূটস্থস্যাত্মনোমিথ্যাবিদ্যাবত্বেঽপি তস্য কর্ম্মাধিকারনিবৃত্তৌ কস্য কর্ম্মাণি বিধীয়ন্তে ন হি নিরধিকারাণাংতেষাং বিধিরিত্যাশঙ্ক্যাহ বিদুষইতি। কর্ম্মাণ্যবিদুষোবিহিতানীতি বিশেষমাক্ষিপতি নম্বিতি। কর্ম্মবিধানমবিদুষোবিদুষবিদ্যাবিধানমিতি বিভাগে কা হানিরিত্যাশঙ্ক্যাহ বিদিতেতি। বিদ্যায়াবিধিমত্বং লব্ধত্বং কর্ম্মবিধিঃ অবিদুষো বিদুষোবিদ্যাবিধিরিতি বিভাগাসম্ভবে

## স্বামিকৃত টীকা।

বধে সাধনাভাবাৎ, তথা স্বয়ং প্রয়োজকোভূত্বান্যেন কং ঘাতয়তি কথং বা ঘাতয়তি ন কঞ্চিদপি কথঞ্চিদপীত্যর্থঃ, অনেন মধ্যপি প্রয়োজকত্বদোষদৃষ্টিং মাকার্ষীরিত্যুক্তং ভবতি॥২১॥

## শাঙ্করভাষ্যম্ ।

বুদ্ধিবৃত্ত্যাবিদ্যয়া অসত্যরূপয়ৈব পরমার্থতোঽবিক্রিয়এবাত্মা বিদ্বানুচ্যতে বিদুষঃ কর্ম্মাসম্ভব বচনাদ্যানি কর্ম্মাণি শাস্ত্রেণ বিধীয়ন্তে তান্যবিদুষোবিহিতানীতি ভগবতোনিশ্চয়োঽবগম্যতে। নন্বু বিদ্যাপ্যবিদুষএব বিধীয়তে বিদিতবিদ্যস্য পিষ্টপেষণবদ্বিদ্যাবিধানানর্থক্যাৎ তত্রাবিদুষঃ কর্ম্মাণি বিধীয়ন্তে ন বিদুষইতি বিশেষো নোপপদ্যতে ইতি চেন্নানুষ্ঠেয়স্য ভাবাভাববিশেষোপপত্তেরগ্নিহোত্রাদিবিধ্যর্থজ্ঞানোত্তরকালমগ্নিহোত্রাদিকর্ম্মানেকসাধনোপসংহারপূর্ব্বকমনুষ্ঠেয়ং কর্ত্তাহং মম কর্ত্তব্যমিত্যেবং প্রকারবিজ্ঞানবতোঽবিদুষো যথানুষ্ঠেয়ং ভবতি ন তু তথা ন জায়তইত্যাত্মস্বরূপবিধ্যর্থজ্ঞানোত্তরকালভাবি কিঞ্চিদনুষ্ঠেয়ং ভবতি কিন্তু নাহং কর্ত্তা ন ভোক্তেত্যাদ্যাত্মৈকত্বাকর্ত্তৃত্বাদিবিষয়জ্ঞানাদন্যৎ নোৎপদ্যতইত্যেষবিশেষউপপদ্যতে যঃ পুনঃ কর্ত্তাহমিতি বেত্ত্যাত্মানং তস্য মমেদং কর্ত্তব্যমিতি অবশ্যম্ভাবিনী বুদ্ধিঃ স্যাত্তদপেক্ষয়া সোঽধিক্রিয়তইতি তং প্রতি কর্ম্মাণি সম্ভবন্তি সচাবিদ্বান্ উভৌ

## গিরিকৃত টীকা।

তত্রেতি। ধর্ম্মজ্ঞানানন্তরমনুষ্ঠেয়স্য ভাবাৎ ব্রহ্মজ্ঞানোত্তরকালঞ্চ তদভাবাৎ ব্রহ্মজ্ঞানহীনস্যৈব কর্ম্মবিধিরিতি সমাধত্তে নানুষ্ঠেয়স্যেতি। বিশেষোপপত্তিমেব প্রপঞ্চয়তি অগ্নিহোত্রাদীতি। নন্বু দেহাদিব্যতিরিক্তাত্মজ্ঞানং বিনা পারলৌকিকেষু কর্ম্মসু প্রবৃত্তেরনুপপত্তেস্তথাবিধজ্ঞানবতা কর্ম্মানুষ্ঠেয়মিতি চেত্তত্রাহ কর্ত্তাহমিতি। আত্মনি কর্ত্তাভোক্তেত্যেবং বিজ্ঞানবত্ত্বেঽপি ব্রহ্মজ্ঞানবিহীনত্বেনাবিদুষোঽনুষ্ঠেয়ং কর্ম্মেত্যর্থঃ। দেহাদিব্যতিরিক্তাত্মজ্ঞানবদ্ব্রহ্মজ্ঞানমপি জ্ঞানত্বাবিশেষাৎ কর্ম্মপ্রবৃত্তাবুপকরিষ্যতীত্যাশঙ্ক্যাহ নত্বিতি অনুষ্ঠেয়বিরোধিত্বাদবিক্রিয়াত্মজ্ঞানস্যেতি শেষঃ। নন্বু ব্রহ্মাত্মৈকত্বজ্ঞানাদুত্তরকালমপি কর্ত্তাহমিত্যাদিজ্ঞানোৎপত্তৌ কর্ম্মবিধিঃ সাবকাশঃস্যাদিতি নেত্যাহ নাহমিতি। কারণাভাবাদিতি শেষঃ কর্ত্তৃত্বাদিজ্ঞানমন্যদিত্যুক্তং। অনুষ্ঠানানুষ্ঠানয়োরুক্তবিশেষাদবিদুষোঽনুষ্ঠানং বিদুষোনেত্যুপসংহরতি ইত্যেষইতি। নন্বাত্মবিদো নচেদনুষ্ঠেয়ং কিঞ্চিদস্তি কথং তর্হি বিদ্বান্ যজেতেত্যাদিশাস্ত্রাত্তং প্রতি কর্ম্মাণি বিধীয়ন্তে তত্রাহ যঃ পুনরিতি। আত্মনি কর্ত্তৃত্বাদিজ্ঞানাপেক্ষয়া কর্ম্মস্বধিকৃতত্বজ্ঞানে তথাবিধং পুরুষং প্রতি কর্ম্মাণি বিধীয়ন্তে সচ প্রাচীনবচনাদবিদ্বানেবেতি নিশ্চীয়তে ন খলু কর্ত্তৃত্বাদিজ্ঞানবতস্তদ্বিপরীতকর্ত্তৃত্বাদিজ্ঞান দ্বারা কর্ম্মসু প্রবৃত্তিরিত্যর্থঃ। কর্ম্মাসম্ভবে ব্রহ্মবিদোহেত্বন্তরমাহ বিশেষিতস্যেতি। বেদাবিনাশিনমিত্যাদিনেতি শেষঃ। যদ্যপি বিদুষোনাস্তি কর্ম্ম তথাপি বিবিদিষোঃ স্যাদিত্যাশঙ্ক্যাহ তস্মাদিতি। বিদ্যয়া বিরুদ্ধত্বাদিষ্যমাণমোক্ষপ্রতিপক্ষত্বাচ্চ কর্ম্মণামিত্যর্থঃ। যদ্যপি মুমুক্ষোরাশ্রমকর্ম্মাণ্যপেক্ষিতানি তথাপি বিদ্যাতৎফলাভ্যামবিরুদ্ধান্যেব তান্যভ্যুপগতান্যন্যথা বিবিদিষাসন্ন্যাসবিধিবিরোধাদিত্যভিপ্রেত্যোক্তেঽর্থে ভগবতোঽনুমতিমাহ অতএবেতি। বিদুষোবিবিদিষোশ্চ সন্ন্যাসেঽধিকারো বিদুষস্ত কর্ম্মণীতি বিভাগস্তেষ্বাদি

## শাঙ্করভাষ্যম্।

ভৌ ন বিজানীতইতি বচনাৎ বিশেষিতস্য চ বিদুষঃ কর্ম্মাক্ষেপবচনাৎ কথং স পুরুষইতি তস্মাদ্বিশেষিতস্য অবিক্রিয়াত্মদর্শনোবিদুষোমুমুক্ষোশ্চ সর্ব্বকর্ম্মসন্ন্যাসএবাধিকারোঽতএব ভগবান্নারায়ণঃ সাংখ্যান্ বিদুষোঽবিদুষশ্চ কর্ম্মিণঃ প্রবিভজ্য দ্বে নিষ্ঠে গ্রাহয়তি জ্ঞান-যোগেন সাংখ্যানাং কর্ম্মযোগেন যোগিনামিতি তথা চ পুত্রায়াহ ভগবান্ ব্যাসো-দ্বাবিমাবথ পন্থানাবিত্যাদি তথা চ ক্রিয়াপথশ্চৈব পুরস্তাৎ পশ্চাৎ সন্ন্যাসশ্চেত্যে-তমেব বিভাগং পুনঃ পুনর্দ্দর্শয়িষ্যতি ভগবান্ অতত্ত্ববিদহংকারবিমূঢ়াত্মা কর্ত্তাহ-মিতি মন্যতে তত্ত্ববিত্তু নাহং করোমীতি তথাচ সর্ব্ব কর্ম্মাণি মনসা সন্ন্যাস্যাস্ত ইত্যাদি তত্র কেচিৎ পণ্ডিতম্মন্যা বদন্তি জন্মাদিষড়্ভাববিক্রিয়ারহিতেঽবিক্রিয়োঽ-কর্ত্তৈকোঽহমাত্মেতি ন কস্যচিৎ জ্ঞানমুৎপদ্যতে যস্মিন্ সতি সর্ব্বকর্ম্মসন্ন্যাস উপদিশ্যতে তন্ন ন জায়তইত্যাদিশাস্ত্রোপদেশানর্থক্যপ্রসঙ্গাৎ তথা চ শাস্ত্রোপদেশসামর্থ্যাদ্ধর্ম্মা-

---

## গিরিকৃত টীকা।

ত্যর্থঃ। অধিকারিভেদেন নিষ্ঠাদ্বয়ং ভগবতা বেদব্যাসেনাপি দর্শিতমিত্যাহ তথাচেতি। অধ্যয়নবিধিনা স্বাধ্যায়পাঠে ত্রৈবর্ণিকস্য প্রবৃত্ত্যনন্তরং তত্র ক্রিয়ামার্গোজ্ঞানমার্গশ্চেতি দ্বৌ মার্গাবধিকারিভেদে নাবেদিতাবিত্যর্থঃ। আদিশব্দাদ্ যত্র বেদাঃ প্রতিষ্ঠিতাইত্যাদি গৃহ্যতে। উক্তয়োর্মার্গয়োস্তুল্যতাং পরিহর্ত্তুমুদাহরণান্তরমাহ তথেতি। বুদ্ধিশুদ্ধিদ্বারা কর্ম্মতৎফলয়োর্বৈরাগ্যোদয়াৎ পূর্ব্বং কর্ম্মমার্গোবিহিতোবিরক্তস্য পুনঃ সন্ন্যাসপূর্ব্বকোজ্ঞা-নমার্গোদর্শিতঃ সচেতরস্মাদতিশয়শালীতিশ্রুতমিত্যর্থঃ। উক্তবিভাগেন পুনরপি বাক্যশে-ষাদুক্তুল্যমাদর্শয়তি এতমেবেতি। অহঙ্কারবিমূঢ়াত্মেত্যস্য ব্যাখ্যানং অতত্ত্ববিদিতি। তত্ত্ববিদিতি শ্লোকমবতার্য্য তাৎপর্য্যার্থং সংগৃহ্লাতি নাহমিতি। পূর্ব্বেণ ক্রিয়াপদেনেতিশব্দঃ সম্বধ্যতে। বিরক্তমধিকৃত্যবাক্যান্তরংপঠতি তথাচেতি। আদিশব্দস্তস্যৈব শ্লোকস্য শেষ সংগ্রহার্থঃ। অবিক্রিয়াত্মজ্ঞানাৎ কর্ম্মসন্ন্যাসে দর্শিতে মীমাংসকমতমুত্থাপয়তি তত্রেতি-আত্মনো জ্ঞানক্রিয়াশক্ত্যাধারত্বেনাবিক্রিয়াত্মাভাবাদবিক্রিয়াত্মজ্ঞানং সন্ন্যাসকারণীভূতং ন সম্ভবতীত্যর্থঃ। যথোক্তজ্ঞানাভাবোবিষয়াভাবাদ্বা মানাভাবাদ্বেতি বিকল্প্যাদ্যং দূষয়তি নেত্যাদিনা ন তাবদবিক্রিয়াত্মাভাবো নজায়তে ম্রিয়তে বেত্যাদিশাস্ত্রস্যাপ্তবাক্যতয়া প্রমাণস্যান্তরেণ কারণমানর্থক্যাযোগাদিত্যর্থঃ। দ্বিতীয়ং প্রত্যাহ যথাচেতি। পারলৌ-কিককর্ম্মবিধিসামর্থ্যাদ্বিদ্বৎ বিজ্ঞানমুদাহরতি কর্ত্তুশ্চেতি। কর্ম্মকাণ্ডাদজ্ঞাতে ধর্ম্মাদৌ বিজ্ঞানোৎপত্তিবৎ জ্ঞানকাণ্ডাদজ্ঞাতে ব্রহ্মাত্মনি বিজ্ঞাতোৎপত্তিরবিরুদ্ধাপ্রমাণত্বাবিশেষা-দিত্যর্থঃ। আত্মনা মনঃসংযোগজত্বাদাত্মনশ্চ প্রজ্ঞা মনোগোচরত্বনিরাসন্নাত্মজ্ঞানে বাধমস্তীতি শঙ্কতে করণেতি। শ্রুতিমাশ্রিত্য পরিহরতি ন মনসেতি। তত্ত্বমস্যাদিবা-ক্যার্থমেবানুভূতৈব শাস্ত্রাচার্য্যোপদেশমনুসৃত্য দ্রষ্টব্যং তত্ত্বমিতি শ্রূয়তে যমপেন যথা-

## শাঙ্করভাষ্যম্ ।

ধর্ম্মাস্তিত্ববিজ্ঞানং কর্ত্তুশ্চ দেহান্তরসম্বন্ধিজ্ঞানঞ্চোৎপদ্যতে তথা চ শাস্ত্রাৎ তস্যৈবাত্ম-
নোঽবিক্রিয়ত্বাকর্ত্তৃত্বৈকত্বাদিবিজ্ঞানং কস্মান্নোপপদ্যতে ইতিপ্রষ্টব্যাস্তে করণগোচর-
ত্বাদিতি চেন্ন মনসৈবানুদ্রষ্টব্যমিতি শ্রুতেঃ শাস্ত্রাচার্য্যোপদেশজনিতশমদমাদিসং-
স্কৃতং মন আত্মদর্শনে করণং তথা চ তদধিগমায়ানুমানে আগমে চ সতি জ্ঞানং নোৎপ-
দ্যতে ইতি সাহসমাত্রমেতৎ জ্ঞানঞ্চোৎপদ্যমানং তদ্বিপরীতমজ্ঞানং অবশ্যং বাধত ইত্যভ্যু-
পগন্তব্যং তচ্চাজ্ঞানং দর্শিতং হন্তাহং হতোঽস্মীত্যুভৌ তৌ ন বিজানীত ইত্যত্র চাত্মনো-
হননক্রিয়ায়াঃ কর্ত্তৃত্বং কর্ম্মত্বং হেতুকর্ত্তৃত্বঞ্চাজ্ঞানকৃতং দর্শিতং তচ্চ সর্ব্বক্রিয়াস্বপি সমা-
নং কর্ত্তৃত্বাদেরবিদ্যাকৃতত্বমবিক্রিয়ত্বাদাত্মনঃ বিক্রিয়াবান্ হি কর্ত্তাত্মনঃ কর্ম্মভূতমন্যং প্র-
যোজয়তি কুর্ব্বিতি তদেতদবিশেষেণ বিদুষঃ সর্ব্বক্রিয়াসু কর্ত্তৃত্বং হেতুকর্ত্তৃত্বঞ্চ প্রতিষেধতি

## গিরিকৃত টীকা ।

কাশমপি ব্রহ্মাত্মবস্তু বাক্যোত্থবুদ্ধিবৃত্ত্যভিব্যক্তং সবিকল্পকব্যবহারালম্বনং ভবতীতি মনো
গোচরত্বোপচারাদসিদ্ধং করণাগোচরত্বমিত্যর্থঃ। কথং তর্হি ব্রহ্মাত্মনোমনোবিষয়ত্বনি
ষেধশ্রুতিবিত্যাশঙ্ক্যাসংস্কৃতমনোবৃত্ত্যবিষয়া সেতি মত্বানঃ সন্নাহ শাস্ত্রেতি। সত্যপি শ্রুত্যা-
দৌ তদনুগ্রাহকাভাবান্নাস্মাকমবিক্রিয়াত্মকজ্ঞানমুৎপত্তুমর্হতীত্যাশঙ্ক্যাহ তথেতি। তস্যা-
বিক্রিয়স্যাত্মনোঽধিগত্যর্থং বিমতোবিকারোনাত্মধর্ম্মোবিকারত্বাদুভয়াভিমতবিকারবদি
ত্যনুমানে পূর্ব্বোক্তশ্রুতিস্মৃতিরূপাগমে চ সত্যেব তস্মিন্নোৎপদ্যতে জ্ঞানমিতি বচঃ সাহ-
সমাত্রং সত্যোবমানে মেয়ং ন ভাতীতিবদিত্যর্থঃ। নন্বু যথোক্তং জ্ঞানমুৎপন্নমপি হানা-
য়োপাদানায় বা ন ভবতীতি কুতোঽস্য ফলবত্ত্বং তত্রাহ জ্ঞানঞ্চেতি। অবশ্যমিতি প্রকাশ
প্রবৃত্তেস্তমোনিবৃত্তিব্যতিরেকেণানুপপত্তিবদাত্মা জ্ঞাননিবৃত্তিমন্তরেণাত্মজ্ঞানোৎপত্তেরনুপপ-
ত্তেরিত্যর্থঃ। নন্বজ্ঞানস্য জ্ঞানপ্রাগভাবত্বাত্তন্নিবৃত্তিরেব জ্ঞানং ন তু তন্নিবর্ত্তকমিতি তত্রাহ
তচ্চেতি। কথং পুনর্ভগবতাপি জ্ঞানাভাবাতিরিক্তমজ্ঞানং দর্শিতমিত্যাশঙ্ক্যাহ অত্র
চেতি। বিমতং জ্ঞানাভাবো ন ভবত্যুপাদানত্বাম্মৃদাদিবদিতি ভাবঃ। নন্বু হননক্রিয়া-
য়াশ্চ ন হিংস্যাদিতি নিষিদ্ধত্বাৎ তৎ কর্ত্তৃত্বাদেরজ্ঞানকৃতত্বেঽপি বিহিতক্রিয়াকর্ত্তৃত্বাদের্ন
তথাত্বমিতি নেত্যাহ তচ্চেতি। ন তাবদাত্মনি কর্ত্তৃত্বাদিনিত্যত্বং অমুক্তিপ্রসঙ্গাৎ চানি-
ত্যমপি নিরুপাদানং ভাবকার্য্যস্যোপাদাননিয়মান্ন চানাত্মা তদুপাদানমাত্মনি তৎপ্রতি-
ভাবান্ন চাত্মৈব তদুপাদানং কূটস্থস্য তস্যাবিদ্যাং বিনা তদযোগাদিত্যাহ অবিক্রিয়ত্বা-
দিতি। কর্ত্তৃত্বাভাবেঽপি কারয়িতৃত্বং স্যাদিত্যাশঙ্ক্যাহ বিক্রিয়াবানিতি। আত্মনি কর্ত্তৃত্বাদি
প্রতিভাসস্যানাদ্যনির্ব্বাচ্যমজ্ঞানমুপাদানং তন্নিবৃত্তিশ্চ তত্ত্বজ্ঞানাদিত্যুক্তমিদানীং কর্ত্তৃ-
কারয়িতৃত্বয়োরবিদ্যাকৃতত্বে ভগবতোঽনুমতিং দর্শয়তি তদেতদিতি। বিদুষো যদি কর্ম্মা-
ধিকারাভাবোভগবতোঽভিমতস্তর্হি কুত্র তস্য জীবতোঽধিকারঃ স্যাদিতি পৃচ্ছতি কং পুন-

## শাঙ্করভাষ্যম্।

ভগবান্ বিদুষঃ কর্ম্মাধিকারাভাবপ্রদর্শনার্থং বেদাবিনাশিনং কথং স পুরুষ ইত্যাদিনা ক্ব পুনর্বিদুষোঽধিকার ইত্যেতদুক্তং পূর্ব্বমেব জ্ঞানযোগেন সাংখ্যানামিতি তথা চ সর্ব্বকর্ম্ম-সন্ন্যাসং বক্ষ্যতি সর্ব্বকর্ম্মাণি মনসেত্যাদিনা নম্নু মনসেতি বচনান্ন বাচিকানাং কায়িকানাঞ্চ সন্ন্যাসইতি চেৎ ন সর্ব্বকর্ম্মাণীতি বিশেষিতত্বাৎ মানসানামেব সর্ব্বকর্ম্মণামিতি চেন্ন মনোব্যাপারপূর্ব্বকত্বাদ্বাক্কায়ব্যাপারাণাং মনোব্যাপারাণাং মনোব্যাপারাভাবে কর্ম্মানুপপত্তেঃ শাস্ত্রীয়াণাং বাক্কায়কর্ম্মণাং কারণানি মানসানি মনোব্যাপারাণি বর্জ্জয়িত্বান্যানি সর্ব্বকর্ম্মাণি মনসা সন্ন্যস্তেইতি চেন্ন নৈব কুর্ব্বন্নকারয়ন্ ইতি বিশেষণাৎ সর্ব্বকর্ম্মসন্ন্যাসোঽয়ং ভগবতোক্তো মরিষ্যতো ন জীবত ইতি চেন্ন নবদ্বারে পুরে দেহী আস্তে ইতি বিশেষণানুপপত্তেঃ ন হি সর্ব্বকর্ম্মসন্ন্যাসে ন মৃতস্য তদ্দেহে আসনং সম্ভবত্যকুর্ব্বতোঽকা-

## গিরিকৃত টীকা।

রিতি। জ্ঞাননিষ্ঠায়ামিত্যুক্তং স্মারয়তি উক্তমিতি! তদঙ্গভূতে সর্ব্বকর্ম্মসন্ন্যাসে চ তস্যাধিকারোঽস্তীত্যাহ তথেতি। বক্ষ্যমাণে বাক্যে সর্ব্বকর্ম্মসন্ন্যাসো ন প্রতিভাতি মানসানামেব কর্ম্মণাং বিশেষণবশাৎ ত্যাগাবগমাদিতি শঙ্কতে নম্বিতি। বিশেষণান্তরমাশ্রিত্য দূষয়তি ন সর্ব্বেতি। মনসেতি বিশেষণান্মানসেষ্বেব কর্ম্মসু সর্ব্বশব্দঃ সঙ্কুচিতঃ স্যাদিতি শঙ্কতে মানসানামিতি। সর্ব্বাত্মনা মনোব্যাপারত্যাগে ব্যাপারান্তরাণামনুপপত্তেঃ সর্ব্বকর্ম্মসন্ন্যাসং সিধ্যতীতি পরিহরতি নেত্যাদিনা। মানসেষ্বপি কর্ম্মসু সন্ন্যাসে সঙ্কোচান্ন বাগাদিব্যাপারানুপপত্তিরিতি শঙ্কতে শাস্ত্রীয়ানামিতি। অন্যানীত্যশাস্ত্রীয়বাক্কায়কর্ম্মকারণান্যশাস্ত্রীয়াণি মানসানি তানি চ সর্ব্বাণি কর্ম্মাণীত্যর্থঃ। বাক্যশেষমাদায় দূষয়তি ন নৈবেতি। ন হি বিবেকবুদ্ধ্যা সর্ব্বাণি কর্ম্মাণি অশাস্ত্রীয়াণি সন্ন্যস্য তিষ্ঠতীতি যুক্তং নৈব কুর্ব্বন্নিত্যাদিবিশেষণস্য বিবেকবুদ্ধেশ্চ সর্ব্বত্যাগহেতোস্তুল্যত্বাদিত্যর্থঃ। ভগবদভিমতসর্ব্বকর্ম্মসন্ন্যাসস্য বস্থাবস্থাবিশেষে সঙ্কোচং দর্শয়ন্নাশঙ্কতে মরিষ্যতইতি। সন্ন্যাসোজীবদবস্থায়ামেবাত্র বিবক্ষিত ইত্যত্র লিঙ্গং দর্শয়ন্নুত্তরমাহ ন নবেতি। অনুপপত্তিমেব স্ফোরয়তি নহীতি। অন্বয়বিশেষাব্যাখ্যানেন লিঙ্গাসিদ্ধিং চোদয়তি অকুর্ব্বতইতি। বিবেকবশাদ্বিশেষাণ্যপি কর্ম্মাণি দেহে যথোক্তে নিঃক্ষিপ্যাকুর্ব্বন্নকারয়ংশ্চবিদ্বানবতিষ্ঠতে তথাচ দেহে কর্ম্মাণি সন্ন্যস্যাকুর্ব্বতোঽকারয়তশ্চ সুখমাসনমিতি সম্বন্ধসম্ভবাৎ বিশেষণস্য সতি দেহে কর্ম্মত্যাগবিষয়ত্বাভাবাজ্জীবতঃ সর্ব্বকর্ম্মত্যাগো নাস্তীত্যর্থঃ অথবাকুর্ব্বতইত্যাদি পূর্ব্বত্রৈব সম্বন্ধনীয়ং লিঙ্গাসিদ্ধিং চোদ্যস্তু দেহে সন্ন্যস্যেত্যাদ্যন্যত্রৈবং। আত্মনঃ সর্ব্বত্রাবিক্রিয়ত্বনির্দ্ধারণাদ্দেহসম্বন্ধমন্তরেণ কর্তৃত্বকারয়িতৃত্বাশঙ্কাপ্রাপ্তপ্রতিষেধপ্রসঙ্গপরিহারার্থমপ্রত্যুক্ত এব সম্বন্ধঃ সাধীয়ানিতি সমাধত্তে ন সর্ব্বেতি। স্বতিষু প্রতিষু চেত্যর্থঃ। কিঞ্চ সম্বন্ধস্যাকাঙ্ক্ষাসন্নিধিযোগ্যতাধীনত্বা-

বাসাংসি জীর্ণানি যথা বিহায় নবানি গৃহ্লাতি নরোঽপরাণি।
তথা শরীরাণি বিহায় জীর্ণান্যন্যানি সংযাতি নবানি দেহী ॥২২॥

## শাঙ্করভাষ্যম্।

রয়তশ্চ দেহে সন্ন্যস্যেতি সম্বন্ধো ন দেহে আস্তইতি চেন্ন সর্ব্বত্রাত্মানোঽবিক্রিয়ত্বাবধারণাৎ আসনক্রিয়ায়াশ্চাধিকরণাপেক্ষত্বাত্তদনপেক্ষত্বাচ্চ সন্ন্যাসস্য সংপূর্ব্বস্ত ন্যাসশব্দোঽত্র ত্যাগার্থো ন নিক্ষেপার্থঃ, তস্মাদ্গীতাশাস্ত্রে আত্মজ্ঞানবতঃ সন্ন্যাসএবাধিকারো ন কর্ম্মণীতি তত্র তত্রোপরিষ্টাদাত্মজ্ঞানপ্রকরণে দর্শয়িষ্যামঃ ॥ ২১ ॥

প্রকৃতন্তু বক্ষ্যামঃ তত্রাত্মনোঽবিনাশিত্বং প্রতিজ্ঞাতং তৎকিমিবেত্যুচ্যতে বাসাংসীতি। বাসাংসি বস্ত্রাণি জীর্ণানি দুর্ব্বলতাং গতানি যথা লোকে বিহায় পরিত্যজ্য নবান্যভিনবানি গৃহ্লাত্যুপাদত্তে নরঃ পুরুষোঽপবাণ্যন্যানি তথা তদ্বদেব শরীরাণি বিহায় জীর্ণান্যন্যানি সংযাতি সংগচ্ছতি নবানি দেহাত্মা পুরুষবদবিক্রিয় এবেত্যর্থঃ ॥ ২২ ॥

## গিরিকৃত টীকা।

দাকাঙ্ক্ষাবশাদস্মদভিমতসম্বন্ধসিদ্ধিরিত্যাহ আসনেতি। ভবদিষ্টস্ত সম্বন্ধো ন সিধ্যত্যাকাঙ্ক্ষাভাবাদিত্যাহ তদনপেক্ষত্বাচ্চেতি। সন্ন্যাসশব্দস্য বিক্ষেপার্থত্বাত্তস্য চাধিকরণসাপেক্ষত্বাদস্মদিষ্টসম্বন্ধসিদ্ধিবিত্যাশঙ্ক্যাহ সংপূর্ব্বস্থিতি। অন্যথোপসর্গবৈয়র্থ্যাদিত্যর্থঃ। মনসা বিবেকবিজ্ঞানেন সর্ব্বকর্ম্মাপরিত্যজ্যাস্তে দেহে বিদ্বানিত্যস্যৈব সম্বন্ধস্য সাধুত্বং মত্বোপসংহরতি তস্মাদিতি। সর্ব্বব্যাপারোপরমাত্মনঃ সর্ব্বকর্ম্মসন্ন্যাসস্যাবিক্রিয়াত্মজ্ঞানাবিরোধিত্বাৎ প্রযোজকজ্ঞানবতো বৈধে সন্ন্যাসেঽধিকারঃ সম্যগ্‌জ্ঞানবতস্ত্ববৈধে স্বাভাবিকে ফলাত্মনীতি বিভাগমভ্যুপেত্যোক্তেঽর্থে বাক্যশেষানুগুণ্যং দর্শয়তি ইতি তত্র তত্রেতি ॥ ২১॥

আত্মনোঽবিক্রিয়ত্বেন কর্ম্মাসম্ভবং প্রতিপাদ্যাবিক্রিয়ত্বহেতুসমর্থনার্থমেবোত্তরগ্রন্থমবতারয়তি প্রকৃতং ত্বিতি। কিং তৎপ্রকৃতমিতি শঙ্কমানং প্রত্যাহ তত্রেতি। অবিনাশিত্বমিত্যুপলক্ষণমবিক্রিয়ত্বমিত্যর্থঃ। তদেব দৃষ্টান্তেন স্পষ্টয়িতুমুত্তরশ্লোকমুত্থাপয়তি তদিত্যাদিনা। আত্মনঃ স্বতোবিক্রিয়াভাবেপি পুরাতনদেহত্যাগে নূতনদেহোপাদানে চ বিক্রিয়াবত্ত্বধ্রৌব্যাদবিক্রিয়ত্বমসিদ্ধমিতি চেত্তত্রাহ বাসাংসীতি। শরীরাণি জীর্ণানি বয়োহানিং গতানি ত্বগ্বলীপলিতাদিসঙ্গতানীত্যর্থঃ। বাসসাং পুরাতনানাং পরিত্যাগে নবানাঞ্চোপাদানে ত্যাগোপাদানকর্তৃভূতলৌকিকপুরুষস্যাপি অবিকারিত্বৈনৈকরূপত্ববদাত্মনো দেহত্যাগোপাদানয়োরবিরুদ্ধমবিক্রিয়ত্বমিতি বাক্যার্থমাহ পুরুষবদিতি ॥ ২২ ॥

## স্বামিকৃত টীকা।

নম্বাত্মনোঽবিনাশেঽপি তদীয়শরীরনাশং পর্য্যালোচ্য শোচামীতি চেত্তত্রাহ বাসাংসীতি। কর্ম্মনিবদ্ধনানাং জেহোরাবশ্যকত্বাভিপ্রায়াৎ জীর্ণদেহনাশেন শোকাবকাশইত্যর্থঃ ॥ ২২॥

নৈনং ছিন্দন্তি শস্ত্রাণি নৈনং দহতি পাবকঃ ।
ন চৈনং ক্লেদয়ন্ত্যাপো ন শোষয়তি মারুতঃ ॥ ২৩ ॥
অচ্ছেদ্যোঽয়মদাহ্যোঽয়মক্লেদ্যোঽশোষ্য এব চ ।

---

## শাঙ্করভাষ্যম্ ।

কস্মাদবিক্রিয় এবেত্যাহ নৈনং ছিন্দন্তীতি । এনং প্রকৃতং দেহিনং ন ছিন্দন্তি শস্ত্রাণি নিরবয়বত্বান্নাবয়ববিভাগং কুর্ব্বন্তি শস্ত্রাণ্যস্ত্রাদীনি তথা নৈনং দহতি পাবকোঽগ্নিরপি ন ভস্মীকরোতি তথা ন চৈনং ক্লেদয়ন্ত্যাপো অপাংহি সাবয়বস্য বস্তুনঃ আর্দ্রীভাবকরণেন অবয়ববিশ্লেষাপাদনে সামর্থ্যং তন্ন নিরবয়ব আত্মনি সম্ভবতি তথা স্নেহবৎ দ্রব্যং স্নেহ-শোষণেন নাশয়তি বায়ুরেনং স্বাত্মানং ন শোষয়তি মারুতোঽপি । ২৩ ॥

যত এবং তস্মাৎ অচ্ছেদ্যোঽয়মিতি যস্মাদন্যোন্যনাশহেতূনি ভূতানাং এনং আত্মানাং নাশয়িতুং নোৎসহন্তে তস্মাৎ নিত্যো নিত্যত্বাৎ সর্ব্বগতঃ সর্ব্বগতত্বাৎ স্থাণুরিত্যেতৎস্থিরত্বাদ-চলোঽয়মাত্মাঽতঃ সনাতনশ্চিরন্তনো ন কারণাৎ কুতশ্চিন্নিষ্পন্নোঽভিনবদিত্যর্থঃ ন তেষাং শ্লোকানাং পৌনরুক্ত্যং চোদনীয়ং যতঃ একেনৈব শ্লোকেনাত্মনো নিত্যত্বমবিক্রিয়ত্বঞ্চোক্তং ন জায়তে ম্রিয়তে বা ইত্যাদিনা তত্র যদেবাত্মবিষয়ং কিঞ্চিদুচ্যতে তদেতস্মাৎ

---

## গিরিকৃত টীকা ।

পৃথিব্যাদিভূতচতুষ্টয়প্রযুক্তং বিক্রিয়াভাক্ত্বাদাত্মনোঽসিদ্ধমবিক্রিয়ত্বমিতি শঙ্কতে কস্মাদিতি । যতো ন ভূতান্যাত্মানং গোচরয়িতুমর্হন্ত্যতোযুক্তমাকাশবত্তস্যাবিক্রিয়ত্বমিত্যাহ আহেত্যাদিনা ॥ ২৩ ॥

পৃথিব্যাদি ভূতপ্রযুক্তচ্ছেদনাদ্যর্থক্রিয়াভাবে যোগ্যতাভাবং কারণমাহ যতইতি । পূর্ব্বার্দ্ধমুত্তরার্দ্ধে হেতুত্বেন যোজয়তি যস্মাদিতি । নিত্যত্বাদীনামন্যোন্যং হেতুহেতুমদ্ভাবং সূচয়তি নিত্যত্বাদিত্যাদিনা । ন চ নিত্যত্বং পরমাণুষু ব্যভিচারাদসাধকং সর্ব্বগতত্বস্যেতি বাচ্যং তেষামেবাপ্রামাণিকত্বেন ব্যভিচারানবতারাৎ সর্ব্বগতত্বেঽপি বিক্রিয়াশক্তিমত্বমাত্ম-নোঽস্তীতি যুক্তং বিভুত্বেনাভিমতে নভসি তদনুপলম্ভাচ্চ বিক্রিয়াশক্তিমত্বে স্থৈর্য্যমাস্থাতুং শক্যং, তথাবিধস্য মৃদাদেরস্থিরদর্শনাদিত্যাশয়েনাহ স্থিরত্বাদিতি । যতো নিত্যত্বেঽপি

## স্বামিকৃত টীকা ।

কথং হন্তীত্যনেনোক্তং বধসাধনাভাবং দর্শয়ন্নবিনাশিত্বমাত্মনঃ স্ফুটীকরোতি নৈনমি-তি । আপো ন ক্লেদয়ন্তি মৃদুকরণেন শিথিলং ন কুর্ব্বন্তি ॥ ২৩ ॥

তত্র হেতুমাহ অচ্ছেদ্য ইতি সার্দ্ধেন । নিরবয়বত্বাদচ্ছেদ্যোঽক্লেদ্যশ্চ অমূর্ত্তত্বাদদাহ্যঃ দ্রবত্বাভাবাদশোষ্যইতি ইতশ্চ ছেদাদিযোগ্যো ন ভবতি যতো নিত্যোঽবিনাশী সর্ব্বগতঃ

নিত্যঃ সর্ব্বগতঃ স্থাণুরচলোঽয়ং সনাতনঃ।
অব্যক্তোঽয়মচিন্ত্যোঽয়মবিকার্য্যোঽয়মুচ্যতে ॥২৪॥

## শাঙ্করভাষ্যম্।

শ্লোকার্থান্নাতিরিচ্যতে কিঞ্চিচ্ছব্দতঃ পুনরুক্তংকিঞ্চিদর্থতইতিদুর্ব্বোধত্বাদাত্মবস্তুনঃ পুনঃ পুনঃ প্রসঙ্গমাপাদ্য শব্দান্তরেণ তদেব বস্তু নিরূপয়তি ভগবান্ বাসুদেবঃ কথং নু নাম সংসারিণাং অসংসারিত্বং বুদ্ধিগোচরতামাপন্নংসদব্যক্তং তত্ত্বংসংসারনিবৃত্তয়ে স্যাদিতি। কিঞ্চ অব্যক্তোঽয়মিতি। অব্যক্তঃসর্ব্বকরণাবিষয়ত্বান্নব্যজ্যতে ইতি অব্যক্তোঽয়মাত্মা অতএবাচিন্ত্যোঽয়ং যদ্ধীন্দ্রিয়গোচরং বস্তু তচ্চিন্তাবিষয়ত্বমাপদ্যতে অয়ং ত্বাত্মানিন্দ্রিয়গোচরত্বাদচিন্ত্যোঽতএবাবিকার্য্যো যথা ক্ষীরংদধ্যাদিনা বিকারি ন তথা অয়মাত্মা নিরবয়বত্বাচ্চাবিক্রিয়ো নহি নিরবয়বং কিঞ্চিদ্বিক্রিয়াত্মকংদৃষ্টমবিক্রিয়ত্বাদবিকার্য্যোঽয়মাত্মোচ্যতে ॥২৪॥

## গিরিকৃত টীকা।

কারণান্নাশসম্ভবাদুৎপত্তিরপি সম্ভবিতেতি কুতশ্চিরন্তনত্বমিত্যাশঙ্ক্যাহ ন কারণাদিতি। আত্মনোঽবিক্রিয়ত্বস্য ন জায়তে ম্রিয়তে বেত্যাদিনা সাধিতত্বাত্তস্যৈব পুনরভিধানে পুনরুক্তিরিত্যাশঙ্ক্যাহ ন তেষামিতি। অনাশঙ্কনীয়স্য চোদ্যস্য প্রসঙ্গং দর্শয়তি যতইতি। অতোবেদাবিনাশিনমিত্যাদৌ ন শক্যতে পৌনরুক্ত্যমিতি শেষঃ। কথংতত্র পৌনরুক্ত্যাশঙ্কা সমুন্মিষতি তত্রাহ তত্রেতি। বেদাবিনাশিনমিত্যাদিশ্লোকঃ সপ্তম্যা পরামৃশ্যতে শ্লোকশব্দেন নজায়তে ম্রিয়তে বেত্যাদিরুচ্যতে। নহিহ শ্লোকে জন্মমরণাদ্যভাবোঽভিলপ্যতে বেদেত্যাদৌ পুনরপক্ষয়াদ্যভাববিবক্ষ্যতে তত্র কথমর্থাতিরেকাভাবমাদায় পৌনরুক্ত্যমুদ্ভাব্যতে তত্রাহ কিঞ্চিদিতি। কথং তর্হি পৌনরুক্ত্যং ন চোদনীয়মিতি মন্যসে তত্রাহ দুর্ব্বোধত্বাদিতি। পুনঃপুনর্ব্বিধানভেদেন বস্তু নিরূপয়তো ভগবতোঽভিপ্রায়মাহ কথংন্বিতি। ত্বংপদার্থপরিশোধনস্য প্রকৃতত্বাত্তত্রৈব হেত্বন্তরমাহ কিঞ্চেতি। আত্মনো নিত্যত্বাদিলক্ষণস্য তথৈব প্রথা কিমিতি ন ভবতি তত্রাহ অব্যক্তইতি। মা তর্হি প্রত্যক্ষত্বং ভূদনুমেয়ত্বং তস্য কিং ন স্যাদিত্যাশঙ্ক্যাহ অতএবেতি। তদেব প্রপঞ্চয়তি যদ্ধীতি। অতীন্দ্রিয়ত্বেপি সামান্যতোদৃষ্টবিষয়ত্বং ভবিষ্যতীত্যাশঙ্ক্য কূটস্থেনাত্মনা ব্যাপ্তিলিঙ্গাভাবা-

## স্বামিকৃত টীকা।

স্থাণুঃ স্থিরস্বভাবো রূপান্তরাপত্তিশূন্যঃ অচলঃ পূর্ব্বরূপাপরিত্যাগী সনাতনোঽনাদিঃ অব্যক্তশ্চক্ষুরাদ্যবিষয়ঃ অচিন্ত্যোমনসোঽপ্যবিষয়ঃ অবিকার্য্যঃ কর্ম্মেন্দ্রিয়াণামপ্যগোচরইত্যর্থঃ। উক্তার্থইতি নিত্যত্বাদভিযুক্তোক্তিং প্রমাণয়তি ॥২৪॥

তস্মাদেবং বিদিত্বৈনং নানুশোচিতুমর্হসি ॥ ২৫ ॥

অথ চৈনং নিত্যজাতং নিত্যং বা মন্যসে মৃতম্।

তথাপি ত্বং মহাবাহো নৈবং শোচিতুমর্হসি ॥ ২৬ ॥

## শাঙ্করভাষ্যম্।

তস্মাদেবং যথোক্তপ্রকারেণৈনমাত্মানং বিদিত্বা ত্বং নানুশোচিতুমর্হসি হন্তাহমেষাং ময়ৈতে হন্যন্তে ইতি ॥ ২৫ ॥

আত্মনোঽনিত্যত্বমভ্যুপগম্যেদমুচ্যতে অথ চৈনমিতি। অথ চেত্যভ্যুপগমার্থঃ এনং-প্রকৃতমাত্মানং নিত্যজাতং লোকপ্রসিদ্ধ্যা প্রত্যনেকশরীরোৎপত্তিং জাতোজাত ইতি বা মন্যসে তথা প্রতি তত্তদ্বিনাশং নিত্যংবা মন্যসে মৃতংমৃতোমৃতইতি তথাপি ভাবিন্যপি আ-

## গিরিকৃত টীকা।

নৈবমিত্যাহ অবিকার্য্যইতি। অবিকার্য্যত্বে ব্যতিরেকদৃষ্টান্তমাহ যথেতি। কিঞ্চাত্মা ন বিক্রিয়তে নিরবয়বদ্রব্যত্বাৎ ঘটবদিতি ব্যতিরেকানুমানমাহ নিরবয়বত্বাচ্চেতি। নিরবয়ব-ত্বেপি বিক্রিয়াবত্বে কা ক্ষতিরিত্যাশঙ্ক্যাহ নহীতি। সাবয়বস্যৈব বিক্রিয়াবত্বদর্শনাৎ বিক্রিয়াবত্বে নিরবয়বত্বানুপপত্তিরিত্যর্থঃ। যদ্ধিসাবয়বং সক্রিয়ং ক্ষীরাদি তদ্দধ্যাদিনা বিকারমাপদ্যতে ন চ আত্মনঃ শ্রুতিপ্রমিতনিরবয়বত্বস্য সাবয়বত্বমতোঽবিক্রিয়ত্বন্নায়ং বিকার্য্যোভবিতুমলমিতি ফলিতমাহ অবিক্রিয়ত্বাদিতি ॥ ২৪ ॥

আত্মযথাত্ম্যোপদেশমশোচ্যানম্বশোচত্বমিত্যুপক্রম্যব্যাখানমুপসংহরতি তস্মাদিতি। অব্যক্তত্বাচিন্ত্যত্বাবিকার্য্যত্বনিত্যত্বসর্ব্বগতত্বাদিরূপোযস্মাদাত্মা নির্দ্ধারিতস্তস্মাত্তথৈব জ্ঞাতু-মুচিতস্তজ্জ্ঞানস্য ফলবত্বাদিত্যর্থঃ। প্রতিষেধ্যমনুশোকমেবাভিনয়তি হন্তাহমিতি ॥ ২৫ ॥

আত্মনো নিত্যত্বস্য প্রাগেব সিদ্ধত্বাদুত্তরশ্লোকানুপপত্তিরিত্যাশঙ্ক্যাহ আত্মনইতি। অনিত্যত্বমিতিচ্ছেদঃ শক্যানাং লোকায়তানাং বা মতমিদমাপরামৃশ্যতে। শ্রোতুরর্জ্জুন-স্যপূর্ব্বোক্তমাত্মযাথাত্ম্যং শ্রুত্বাপি তস্মিন্নির্দ্ধারণাসিদ্ধের্ম্নয়োর্মতয়োরন্যতরমতাভ্যুপগমঃ শঙ্কিতস্তদর্থোনিপাতদ্বয়প্রয়োগইত্যাহ অথ চেতি। প্রকৃতস্যাত্মনোনিত্যত্বাদিলক্ষণস্য পুনঃপুনর্জাতত্বাভিমানোমানাভাবাদসম্ভাবীত্যাহ লোকেতি। নিত্যজাতত্বাভিনিবেশে

## স্বামিকৃত টীকা।

উপসংহরতি তস্মাদেবমিতি। তদেবমাত্মনোজন্মবিনাশাভাবান্ন শোকঃ কার্য্য-ইত্যুক্তং ॥ ২৫ ॥

ইদানীং দেহেন সহাত্মনো জন্ম তদ্বিনাশে চ বিনাশমঙ্গীকৃত্যাপি শোকো ন কার্য্য অথচৈনমিতি। অথ যদ্যপ্যেনমাত্মানং নিত্যং সর্ব্বদা তত্তদ্দেহে জাতে জাতং

জাতস্য হি ধ্রুবোমৃত্যুর্ধ্রুবং জন্ম মৃতস্য চ।
তস্মাদপরিহার্য্যেঽর্থে ন ত্বং শোচিতুমর্হসি ॥ ২৭ ॥
অব্যক্তাদীনি ভূতানি ব্যক্তমধ্যানি ভারত।
অব্যক্তনিধনান্যেব তত্র কা পরিদেবনা ॥ ২৮ ॥

## শাঙ্করভাষ্যম্ ।

ত্বমিনি ত্বং মহাবাহো নৈবং শোচিতুমর্হসি জন্মবতো নাশো নাশবতো জন্ম চেত্যেতাব-বশ্যম্ভাবিনাবিতি ॥ ২৬ ॥

তথা চ সতি জাতস্যেতি। জাতস্য হি লব্ধজন্মনো ধ্রুবোঽব্যভিচারী মৃত্যুর্ম্মরণংধ্রুবং জন্ম মৃতস্যচ তস্মাদপবিহার্য্যোঽয়ং জন্মমরণলক্ষণোঽর্থস্তস্মিন্নপরিহার্য্যেঽর্থে ন ত্বং শোচিতু-মর্হসি ॥ ২৭ ॥

কার্য্যকারণসংঘাতাত্মকান্যপি ভূতান্যুদ্দিশ্য শোকো ন যুক্তঃ কর্ত্তুং যতঃ অব্যক্তাদী-নীতি। অব্যক্তাদীন্যব্যক্তমদর্শনমনুপলব্ধিবাদির্যেষাং ভূতানাং পুত্রমিত্রাদিকার্য্যকারণ

---

## গিরিকৃত টীকা।

পৌনঃপুন্যেন মৃতত্বাভিনিবেশো ব্যাহতঃ স্যাদিতাশঙ্ক্যাহ তথেতি। পরকীয়মতমনুভাষিত-মভ্যুপেত্যাহো বত মহৎপাপং কর্ত্তুংব্যবসিতাবয়মিত্যাদেস্তদীয়শোকস্য নিরবকাশত্বমি-ত্যাহ তথাপীতি। এবমর্জ্জুনস্য দৃশ্যমানমনুশোকপ্রকারং দর্শয়িত্বা তস্য কর্ত্তুমযোগ্যত্বে-হেতুমাহ জন্মবতইতি। জন্মবতো নাশো নাশবতশ্চ জন্মেত্যেতাববশ্যংভাবিনৌ মিথো ব্যাপ্তাবিতি যোজনা ॥ ২৬ ॥

তয়োরবশ্যংভাবিত্বে সত্যনুশোকস্যাকর্ত্তব্যত্বে হেত্বন্তরমাহ তথাচেতি॥ ২৭ ॥

আত্মানমুদ্দিশ্যানুশোকস্য কর্ত্তুমযোগ্যত্বেঽপি ভূতসংঘাতাত্মকানি ভূতান্যুদ্দিশ্য তস্য কর্ত্তব্যত্বমাশঙ্ক্যাহ কার্য্যেতি। সমনন্তরশ্লোকস্তত্র হেতুরিত্যাহ যতইতি। চাক্ষুষদর্শন-মাত্রবৃত্তিং ব্যাবর্ত্তয়তি অনুপলব্ধিরিতি। ন হি যথোক্তসংঘাতরূপাণি ভূতানি পূর্ব্বমুৎ-

## স্বামিকৃত টীকা।

মন্যসে তথা তত্তদ্দেহে মৃতে মৃতঞ্চ মন্যসে পুণ্যপাপয়োস্তৎফলভূতয়োশ্চ জন্মমরণয়োরাত্ম-গামিত্বাত্তথাপি ত্বং শোচিতুং নার্হসি ॥ ২৬॥

কুতইত্যতআহ জাতস্য হীতি। হি যস্মাজ্জাতস্য স্বারম্ভককর্ম্মক্ষয়ে মৃত্যুর্ধ্রুবো নিশ্চিতঃ মৃতস্য চ তদ্দেহকৃতেন কর্ম্মণা জন্মাপি ধ্রুবমেব তস্মাদেবমপরিহার্য্যেঽর্থেঽবশ্যম্ভাবিনি জন্মমরণলক্ষণে অর্থে ত্বং বিদ্বান্ শোচিতুং যোগ্যো ন ভবসি ॥ ২৭ ॥

কিঞ্চ দেহাদীনাং স্বভাবং পর্য্যালোচ্য তদুপাধিকে আত্মনোজন্মমরণে শোকো ন কার্য্য-

আশ্চর্য্যবৎ পশ্যতি কশ্চিদেনমাশ্চর্য্যবদ্বদতি তথৈব চান্যঃ।
আশ্চর্য্যবচ্চৈনমন্যঃ শৃণোতি শ্রুত্বাপ্যেনং বেদ ন চৈব কশ্চিৎ ॥২৯॥

## শাঙ্করভাষ্যম্।

সংঘাতাত্মকানাং তানি অব্যক্তাদীনি ভূতানি প্রাগুৎপত্তেঃ, উৎপন্নানি চ প্রাক্ মরণাৎ ব্যক্তমধ্যান্যব্যক্তনিধনান্যেব পুনরব্যক্তমদর্শনং নিধনং মরণং যেষাং তানি অব্যক্তনিধনানি মরণাদূর্দ্ধমব্যক্ততামেব প্রতিপদ্যন্তে ইত্যর্থঃ। তথা চোক্তং অদর্শনাদাপতিতঃ পুনশ্চাদর্শনং গতঃ নাসৌ তব ন তস্য ত্বং বৃথা কা পরিদেবনেতি। তত্র কা পরিদেবনা কোবা প্রলাপঃ অদৃষ্টদৃষ্টপ্রনষ্টভ্রান্তিভূতেষ্বিত্যর্থঃ ॥ ২৮ ॥

দুর্বিজ্ঞেয়োঽয়ং প্রকৃতাত্মা কিং ত্বামেবৈকং উপালভেৎ সাধারণে ভ্রান্তিনিমিত্তে, কথং দুর্বিজ্ঞেয়োয়মাত্মেত্যত আহ আশ্চর্য্যবদিতি। আশ্চর্য্যবদাশ্চর্য্যংঅদৃষ্টপূর্ব্বমদ্ভুতমকস্মাদ্দৃশ্যমানং তেন তুল্যমাশ্চর্য্যবদাশ্চর্য্যমিবৈনমাত্মানং পশ্যতি কশ্চিদাশ্চর্য্যবদেনং বদতি-

## গিরিকৃত টীকা।

পত্তেরুপলভ্যন্তে তেন তানি তথাব্যপদেশভাঞ্জি ভবন্তীত্যর্থঃ। কিং তন্মধ্যং যদেষাং ব্যক্তমিষ্যতে তদাহ উৎপন্নানীতি। উৎপত্তেরূর্দ্ধং মরণাচ্চ পূর্ব্বং ব্যবহারিকং সত্বং মধ্যমেষাং ব্যক্তমিতি তথোচ্যতে জন্মানুসারিত্বং বিলয়স্য যুক্তমিতি মত্বা তাৎপর্য্যার্থমাহ মরণাদিতি। উক্তেঽর্থে পৌরাণিকসম্মতিমাহ তথাচেতি। তত্রেত্যস্যার্থমাহ অদৃষ্টেতি। পূর্ব্বমদৃষ্টানি সন্তি পুনর্দৃষ্টানি তান্যেব পুনর্নষ্টানি তদেবং ভ্রান্তিবিষয়তয়া ঘটিকাযন্ত্রবচ্চক্রীভূতেষু ভূতেষু শোকনিমিত্তস্য প্রলাপস্য নাবকাশোঽস্তীত্যর্থঃ ॥ ২৮ ॥

অর্জ্জুনং প্রত্যুপালম্ভং দর্শয়িত্বা প্রকৃতস্যাত্মনোদুর্বিজ্ঞেয়ত্বাত্তং প্রত্যুপালম্ভো ন সম্ভবতীতি মন্বানঃসন্নাহ দুর্বিজ্ঞেয়ইতি। তথা চাত্মাজ্ঞাননিমিত্তবিপ্রলম্ভস্য সাধারণত্বাদসাধারণোপালম্ভস্য নিরবকাশতেত্যাহ কিং ত্বামেবেতি। অহম্প্রত্যয়বেদ্যত্বাদাত্মনোদুর্বিজ্ঞেয়-

## স্বামিকৃত টীকা।

ইত্যাহ অব্যক্তাদীনীতি। অব্যক্তং প্রধানং তদেবাদি উৎপত্তেঃপূর্ব্বরূপং যেষাং তানি অব্যক্তাদীনি ভূতানি শরীরাণি কারণাত্মনা স্থিতানামেবোৎপত্তেঃ তথা ব্যক্তমভিব্যক্তং মধ্যং জন্মমরণান্তরালং স্থিতিলক্ষণং যেষাং তানি ব্যক্তমধ্যানি অব্যক্তে নিধনং লয়ো যেষাং তানীমান্যেবম্ভূতান্যেব তত্র তেষু কা পরিদেবনা কঃ শোকনিমিত্তোবিলাপঃ, প্রতিবুদ্ধস্য স্বপ্নদৃষ্টবস্তুম্বিব শোকো ন যুজ্যত ইত্যর্থঃ ॥ ২৮ ॥

কুতস্তর্হি বিদ্বাংসোঽপি লোকে শোচন্তি আত্মাজ্ঞানাদেবেত্যাশয়েনাত্মনোদুর্জ্ঞেয়তামাহ আশ্চর্য্যবদিতি। কশ্চিদেনমাত্মানং শাস্ত্রাচার্য্যোপদেশাভ্যাং পশ্যন্নাশ্চর্য্যবৎপশ্যতি

দেহী নিত্যমবধ্যোঽয়ং দেহে সর্ব্বস্য ভারত ।
তস্মাৎ সর্ব্বাণি ভূতানি ন ত্বং শোচিতুমর্হসি ॥ ৩০ ॥

## শাঙ্করভাষ্যম্ ।

তথৈব চান্যঃ আশ্চর্য্যবচ্চৈনমন্যঃ শৃণোতি শ্রুত্বা দৃষ্ট্বোক্ত্বাপ্যাত্মানং বেদ নচৈব কশ্চিদথবা যোঽয়ং আত্মানং পশ্যতি স আশ্চর্য্যতুল্যো যো বদতি যশ্চ শৃণোতি সোঽনেকসহস্রেষু কশ্চিদেব ভবত্যতোহতুর্ব্বোধ আত্মেত্যভিপ্রায়ঃ ॥ ২৯ ॥

অথেদানীং প্রকরণার্থমুপসংহরন্ ব্রূতে দেহীতি। যস্মাদ্দেহী শরীরী নিত্যংসর্ব্বাবস্থাস্ববধ্যোনিরবয়বত্বান্নিত্যত্বাচ্চ তত্রাবধ্যোঽযং দেহে শরীরে সর্ব্বস্য সর্ব্বগতত্বাৎ স্থাবরাদিষু স্থিতোপি সর্ব্বস্য প্রাণিজাতস্য দেহে বধ্যমানেঽপি অয়ং দেহী ন বধ্যো যস্মাৎ তস্মাদ্ভীষ্মাদীনি সর্ব্বাণি ভূতান্যুদ্দিশ্য ন ত্বং শোচিতুমর্হসি ॥ ৩০ ॥

## গিরিকৃত টীকা ।

দুর্ব্বোধত্বমসিদ্ধমিতি শঙ্কতে কথমিতি। বিশিষ্টস্যাত্মনোঽহং প্রত্যয়স্য দৃষ্টত্বেঽপি কেবলস্য তদভাবাদস্তি দুর্ব্বিজ্ঞেয়তেতি শ্লোকমবতারযতি আহেতি। আশ্চর্য্যবদিতি আদ্যেন পাদেনাত্মবিষযদর্শনস্য দুর্লভত্বংদর্শয়তা দ্রষ্টুর্দৌর্লভ্যমুচ্যতে, দ্বিতীয়েন চ তদ্বিষয়বদনস্য দুর্লভত্বোক্তেস্তদুপদেষ্টুস্তথাত্বং কথ্যতে, তৃতীয়েন তদীয়শ্রবণস্য দুর্লভত্বদ্বারা শ্রোতুর্ব্বিরলতা বিবক্ষিতা, শ্রবণদর্শনোক্তীনাং ভাবেঽপি তদ্বিষয়সাক্ষাৎকারস্যাত্যন্তায়াসলভ্যত্বং চতুর্থেনাভিমতমিতিবিভাগঃ। আত্মগোচরদর্শনাদিদুর্লভত্বদ্বারা দুর্ব্বোধত্বমাত্মনঃ সাধয়তি আশ্চর্য্যবদিতি। সংপ্রত্যাত্মনি দ্রষ্টুর্ব্বক্তুঃ শ্রোতুঃসাক্ষাৎকর্ত্তুশ্চ দুর্লভত্বাভিধানেন তদীয়ং দুর্ব্বোধত্বং কথয়তি অথবেতি। ব্যাখ্যানদ্বয়েঽপি ফলিতমাহ অতইতি ॥ ২৯ ॥

শ্লোকান্তরমুত্থাপয়তি অথেতি। আত্মনোতুর্জ্ঞানত্বপ্রদর্শনানন্তরমিতি যাবৎ, বস্তুবৃত্তাপেক্ষয়া শোকমোহযোরকর্ত্তব্যত্বং প্রকরণার্থঃ। দেহে বধ্যমানেঽপি দেহিনোবধ্যত্বাভাবে ফলিতমাহ যস্মাদিতি। হেতুভাগং বিভজতে সর্ব্বস্যেতি। ফলিতপ্রদর্শনপরং শ্লোকার্দ্ধং ব্যাচষ্টে তস্মাদ্ভীষ্মাদীনীতি ॥ ৩০ ॥

## স্বামিকৃত টীকা ।

সর্ব্বগতস্য নিত্যজ্ঞানানন্দস্বভাবস্যাত্মনোঽলৌকিকত্বাদৈন্দ্রজালিকবদ্ঘটমানং পশ্যন্নি বিস্ময়েন পশ্যতি অসম্ভাবনাভিভূতত্বাৎ, তথাশ্চর্য্যবদেবান্যোবদতি, শৃণোতি চান্যঃ, কশ্চিৎ পুনর্ব্বিপরীতভাবনাভিভূতঃ শ্রুত্বাপি ন বেদ, চশব্দাদুক্ত্বাপি দৃষ্ট্বাপি ন সম্যগ্বেদেতি দ্রষ্টব্যং ॥ ২৯ ॥

তদেবমবধ্যত্বমাত্মনঃ সংক্ষেপেণোপদিশন্নশোচ্যত্বমুপসংহরতি দেহীতি। স্পষ্টার্থঃ ॥ ৩০ ॥

স্বধর্ম্মমপি চাবেক্ষ্য ন বিকম্পিতুমর্হসি।
ধর্ম্ম্যাদ্ধি যুদ্ধাচ্ছ্রেয়োঽন্যৎ ক্ষত্রিয়স্য ন বিদ্যতে ॥ ৩১ ॥
যদৃচ্ছয়া চোপপন্নং স্বর্গদ্বারমপাবৃতং।
সুখিনঃ ক্ষত্রিয়াঃ পার্থ লভন্তে যুদ্ধমীদৃশং ॥ ৩২ ॥

## শাঙ্করভাষ্যম্।

ইহ পরমার্থতত্ত্বাপেক্ষায়াং শোকোবা মোহোবা ন সম্ভবতীত্যুক্তং, ন কেবলং পরমার্থতত্ত্বাপেক্ষায়ামেব কিন্তু স্বধর্ম্মমিতি। স্বধর্ম্মমপি স্বোধর্ম্মঃ ক্ষত্রিয়স্য ধর্ম্মঃ যুদ্ধং, তমপ্যবেক্ষ্য ত্বং ন বিকম্পিতুং প্রচলিতুং অর্হসি ক্ষত্রিয়স্য স্বাভাবিকাদ্ধর্ম্মাদাত্মস্বাভাব্যাদিত্যভিপ্রায়ঃ তচ্চ যুদ্ধং পৃথিবীজয়দ্বারেণ ধর্ম্মার্থংপ্রজারক্ষণার্থঞ্চেতি ধর্ম্মাদনপেতং পরং ধর্ম্ম্যং, তস্মাৎ ধর্ম্মাৎ যুদ্ধাৎ শ্রেয়োঽন্যঃ ক্ষত্রিয়স্য ন বিদ্যতে হি যস্মাৎ ॥ ৩১ ॥

কুতশ্চ তদ্যুদ্ধং কর্ত্তব্যং ইত্যুচ্যতে যদৃচ্ছয়েতি। যদৃচ্ছয়া চাপ্রার্থিতমাগতমুপপন্নংস্বর্গদ্বারমপাবৃতমুদ্‌ঘাটিতং যে এতদীদৃশং যুদ্ধং লভন্তে ক্ষত্রিয়াঃ হে পার্থ কিন্ন সুখিনস্তে ॥ ৩২ ॥

## গিরিকৃত টীকা।

শ্লোকান্তরমবতারয়ন্ বৃত্তং কীর্ত্তয়তি ইহেতি। পূর্ব্বশ্লোকঃ সপ্তম্যর্থঃ, যৎপারমার্থিকং তত্ত্বং তদপেক্ষায়ামেব কেবলং শোকমোহয়োরসম্ভবো ন ভবতি কিন্তু স্বধর্ম্মমপি চাবেক্ষ্যেতিসম্বন্ধঃ, স্বকীয়ং ক্ষাত্রধর্ম্মমনুসন্ধায় ততশ্চলনং পরিহর্ত্তব্যমিত্যর্থঃ। যদ্ধি ক্ষত্রিয়স্য ধর্ম্মাদনপেতং শ্রেয়ঃসাধনং তদেব ময়ানুবর্ত্তিতব্যমিত্যাশঙ্ক্যাহ ধর্ম্ম্যাদিতি। জাতিপ্রযুক্তং স্বাভাবিকং স্বধর্ম্মমেব বিশিনষ্টি ক্ষত্রিয়স্যেতি। পুনর্নকারোপাদানমন্বয়ার্থং, প্রচলিতুমযোগ্যত্বে প্রতিযোগিনং দর্শয়তি স্বাভাবিকাদিতি। স্বাভাবিকত্বমশাস্ত্রীয়ত্বমিতিশঙ্কাং বারয়িতুং তাৎপর্য্যমাহ আত্মেতি। আত্মনঃ স্বস্যার্জ্জুনস্য স্বাভাব্যং ক্ষত্রিয়স্বভাবপ্রযুক্তং বর্ণাশ্রমোচিতং কর্ম্ম তস্মাদিত্যর্থঃ। ধর্ম্মার্থং প্রজাপরিপালনার্থঞ্চ প্রযতমানস্য যুদ্ধাদুপরিরংসা শ্রদ্ধাতব্যেত্যাশঙ্ক্যাহ তচ্চেতি। ততোঽপিশ্রেয়স্করং কিঞ্চিদনুষ্ঠাতুং যুদ্ধাদুপরতিরুচিতেত্যাশঙ্ক্যাহ তস্মাদিতি। তস্মাদ্যুদ্ধাৎ প্রচলনমনুচিতমিতি শেষঃ ॥ ৩১ ॥

যুদ্ধস্য গুর্ব্বাদ্যনেকপ্রাণিহিংসাত্মকস্যাহিংসাশাস্ত্রবিরোধান্নাস্তি কর্ত্তব্যতেতি শঙ্কতে

## স্বামিকৃত টীকা।

যচ্চোক্তমর্জ্জুনেন বেপথুশ্চ শরীরে মইত্যাদি তদপ্যযুক্তমিত্যাহ স্বধর্ম্মমপীতি। আত্মনোনাশাভাবাদেবৈতেষাং হননেপি বিকম্পিতুং নার্হসি, কিঞ্চ স্বধর্ম্মমপ্যবেক্ষ্য বিকম্পিতুং নার্হসীতি সম্বন্ধঃ। যচ্চোক্তং ন শ্রেয়োঽনুপশ্যামি হত্বা স্বজনমাহবইতি তত্রাহ ধর্ম্ম্যাদিতি। ধর্ম্মাদনপেতাম্ন্যায়াদ্যুদ্ধাদন্যৎ ॥ ৩১ ॥

অথ চেত্ত্বমিমং ধর্ম্ম্যং সংগ্রামং ন করিষ্যসি।
ততঃ স্বধর্ম্মং কীর্ত্তিঞ্চ হিত্বা পাপমবাপ্স্যসি ॥ ৩৩ ॥
অকীর্ত্তিঞ্চাপি ভূতানি কথয়িষ্যন্তি তেঽব্যয়াং।
সম্ভাবিতস্য চাকীর্ত্তির্ম্মরণাদতিরিচ্যতে ॥ ৩৪ ॥

## শাঙ্করভাষ্যম্ ॥

এবং কর্ত্তব্যতাপ্রাপ্তমপি অথেতি। অথ ত্বমিমং ধর্ম্ম্যং ধর্ম্মাদনপেতং বিহিতং সংগ্রামং যুদ্ধং ন করিষ্যসি চেৎ ততস্তদকরণাৎ স্বধর্ম্মং কীর্ত্তিঞ্চ মহাদেবাদিসমাগমনিমিত্তাং হিত্বা কেবলং পাপমবাপ্স্যসি ॥৩৩॥

ন কেবলং স্বধর্ম্মকীর্ত্তিপরিত্যাগঃ অকীর্ত্তিমিতি। অকীর্ত্তিঞ্চাপি যুদ্ধে ভূতানি কথয়ি-

## গিরিকৃত টীকা।

কুতশ্চেতি। অগ্নীষোমীয়হিংসাবদ্যুদ্ধমপি ক্ষত্রিয়স্য বিহিতত্বাদমুষ্ঠেয়ং সামান্যশাস্ত্রতো-বিশেষশাস্ত্রস্য বলীয়স্ত্বাদিত্যাহ উচ্যতইতি। তথাপি যুদ্ধে প্রবৃত্তানামৈহিকামুষ্মিকস্যাপি সুখাভাবাদুপরতিরেব ততোযুক্তা প্রতিভাতীত্যাশঙ্ক্যাহ যদৃচ্ছয়েতি। চিরেণ চিরতরেণ কালেন চ যাগাদ্যনুষ্ঠায়িনঃ স্বর্গাদিভাজো ভবন্তি যুধ্যমানাস্তু ক্ষত্রিয়াবহির্মুখতাবিহীনাঃ সহসৈব স্বর্গাদিসুখভোক্তারস্তেন তব কর্ত্তব্যমেব যুদ্ধমিতি ব্যাখ্যানেন স্ফুটয়তি যদৃচ্ছয়েত্যাদিনা। ইহামুত্র চ ভাবিসুখবত্তামেব ক্ষত্রিয়াণাং স্বধর্ম্মভূতযুদ্ধসিদ্ধেস্তাদর্থেনোত্থানং শোকমোহৌ হিত্বা কর্ত্তব্যমিত্যর্থঃ ॥ ৩২ ॥

স্বধর্ম্মস্য যুদ্ধস্য শ্রদ্ধয়া করণে স্বর্গাদিমহাফলপ্রাপ্তিং প্রদর্শ্য তদকরণে প্রত্যবায়প্রাপ্তিং প্রদর্শয়ন্নুত্তরশ্লোকগতাথশব্দার্থং কথয়তি এবমিতি। বিহিতত্বং ফলবত্ত্বমিত্যনেন প্রকারেণেত্যর্থঃ, অন্বয়ার্থং পুনশ্চেদিত্যনূদ্যতে, মহাদেবাদীত্যাদিশব্দেন মহেন্দ্রাদয়ো-গৃহ্যন্তে ॥ ৩৩ ॥

যুদ্ধাকরণে ক্ষত্রিয়স্য। প্রত্যবায়মামুষ্মিকমাপাদ্য শিষ্টগর্হালক্ষণং দীর্ঘকালভাবিনমৈহি-

## স্বামিকৃত টীকা।

কিঞ্চ মহতি শ্রেয়সি স্বয়মেবোপস্থিতে সতি কুতো বিকম্পসে ইত্যাহ যদৃচ্ছয়েতি। যদৃচ্ছয়া অপ্রার্থিতমেবোপপন্নং প্রাপ্তমীদৃশং যুদ্ধং সুখিনঃ সুভাগ্যাএব লভন্তে যতোঽনিবারণঃ স্বর্গদ্বারমেবৈতৎ, যদ্বা য এবম্বিধং যুদ্ধং লভন্তে ত এব সুখিনইত্যর্থঃ, এতেন স্বজনং হি কথং হত্বা সুখিনঃ স্যাম মাধবেতি যদুক্তং তন্নিরস্তং ভবতি ॥ ৩২ ॥

বিপক্ষে দোষমাহ অথ চেদিতি ॥ ৩৩ ॥

ভয়াদ্রণাদুপরতং মংস্যন্তে ত্বাং মহারথাঃ।
যেষাঞ্চ ত্বং বহুমতোভূত্বা যাস্যসি লাঘবং ॥৩৫॥
অবাচ্যবাদাংশ্চ বহূন্ বদিষ্যন্তি তবাহিতাঃ।
নিন্দন্তস্তব সামর্থ্যং ততো দুঃখতরং নু কিং ॥৩৬॥

## শাঙ্করভাষ্যম্।

ষ্যন্তি তে তবাব্যয়াং দীর্ঘকালাং ধর্ম্মাত্মা শূরইত্যেবমাদিভিগুণৈঃ সম্ভাবিতস্য চাকীর্ত্তি-র্ম্মরণাদতিরিচ্যতে সম্ভাবিতস্য চাকীর্ত্তের্ব্বরং মরণমিত্যর্থঃ ॥ ৩৪ ॥

কিঞ্চ ভয়াদিতি। ভযাৎ কর্ণাদিভ্যো রণাৎ যুদ্ধাদুপরতং নিবৃত্তং মংস্যন্তে চিন্তয়িষ্যন্তি ন কৃপয়েতি ত্বাং মহারথা দুর্য্যোধনপ্রভৃতয়ঃ, কে মংস্যন্তে ইত্যাহ যেষাঞ্চ ত্বং দুর্য্যোধনাদীনাংবহুমতোবহুভিগুণৈর্যুক্তইত্যেবং বহুমতোভূত্বা পুনস্ত্বং যাস্যসি লাঘবং লঘুভাবং ॥৩৫॥

কিঞ্চ অবাচ্যবাদানিতি। অবাচ্যবাদান্ অবক্তব্যবাদান্ চ বহুননেকপ্রকারান্ বদিষ্যন্তি তবাহিতাঃশত্রবঃ নিন্দন্তঃ কুৎসয়ন্তস্তব ত্বদীয়ং সামর্থ্যং নিভৃতকবচাদিযুদ্ধনিমিত্তং তস্মাত্ততোনিন্দা প্রাপ্তের্দুঃখাৎ দুঃখতরং নু কিং ততঃ কষ্টতরদুঃখং নাস্তীত্যর্থঃ ॥ ৩৬ ॥

## গিরিকৃত টীকা।

কমপি প্রত্যবায়ং প্রতিলম্ভয়তি ন কেবলমিতি। যুদ্ধে স্বমরণসন্দেহাত্তৎপরিহারার্থমকীর্ত্তিরপি সোঢ়ব্যা। স্বাত্মসংরক্ষণস্য শ্রেয়স্করত্বাদিত্যাশঙ্ক্যাহ ধর্ম্মাত্মেতি। মান্যানামকীর্ত্তির্ভবতি মরণাদপি দুঃসহেতি তাৎপর্য্যার্থমাহ সম্ভাবিতস্যেতি ॥ ৩৪ ॥

ইতশ্চ ত্বয়া যুদ্ধং কর্ত্তব্যমিত্যাহ কিঞ্চেতি। প্রাণিষু কৃপয়া নাহং যুদ্ধং করিষ্যামীত্যাশঙ্ক্যাহ ভয়াদিতি। মহারথানেব বিশিনষ্টি যেষাঞ্চেতি। দুর্যোধনাদিভিস্তবোপহাস্যত্যানিরসনার্থং সংগ্রামে প্রবৃত্তিরবশ্যম্ভাবিনীত্যর্থঃ ॥ ৩৫ ॥

ইতশ্চ ত্বং যুদ্ধাদুপরমং মাকার্ষীরিত্যাহ কিঞ্চেতি নমু ভীষ্মদ্রোণাদিবধপ্রযুক্তং কষ্টতরং দুঃখমসহমানোযুদ্ধান্নিবৃত্তঃ স্বসামর্থ্যনিন্দাদি শত্রুকৃতং সোঢ়ুং শক্ষ্যামীত্যাশঙ্ক্যাহ তত ইতি ॥৩৬॥

## স্বামিকৃত টীকা।

কিঞ্চ অকীর্ত্তিমিতি। অব্যয়াং শাশ্বতীং সম্ভাবিতস্য বহুমতস্য অতিরিচ্যতেঽধিকা ভবতি ॥ ৩৪ ॥

কিঞ্চ ভয়াদিতি। যেষাং বহুগুণত্বেন ত্বং পূর্ব্বং সম্মতোঽভূস্তএব ভয়াৎ সংগ্রামান্নিবৃত্তং ত্বাং মংস্যেরন্, ততশ্চ পূর্ব্বং বহুমতোভূত্বা লঘুতাং যাস্যসি ॥৩৫॥

হতোবা প্রাপ্স্যসি স্বর্গং জিত্বা বা ভোক্ষ্যসে মহীং।
তস্মাদুত্তিষ্ঠ কৌন্তেয় যুদ্ধায় কৃতনিশ্চয়ঃ॥ ৩৭॥
সুখদুঃখে সমে কৃত্বা লাভালাভৌ জয়াজয়ৌ।
ততোযুদ্ধায় যুজ্যস্ব নৈবং পাপমবাপ্স্যসি॥ ৩৮॥

## শাঙ্করভাষ্যম্।

যুদ্ধে পুনঃক্রিয়মাণে কর্ণাদিভিঃ কিং হতোবেতি। হতোবা প্রাপ্স্যসি স্বর্গং হতঃ সন্ স্বর্গং প্রাপ্স্যসি জিত্বা কর্ণাদীন্ শূরান্ ভোক্ষ্যসে মহীং উভয়থাপি তব লাভএবেত্যভি-প্রায়ঃ যত এবং তস্মাদুত্তিষ্ঠ কৌন্তেয় যুদ্ধায় কৃতনিশ্চয়ঃ জেষ্যামি শত্রূন্ মরিষ্যামি বেতি নিশ্চয়ং কৃত্বেত্যর্থঃ ॥৩৭॥

তত্র যুদ্ধং স্বধর্ম্মইত্যেবং যুধ্যমানস্য উপদেশমিমং শৃণু সুখদুঃখে ইতি। সুখদুঃখে সমে তুল্যে কৃত্বা রাগদ্বেষাবপ্যকৃত্বেত্যেতৎতথাচ লাভালাভৌজয়াজয়ৌচ সমৌ কৃত্বা ততো-যুদ্ধায় যুজ্যস্ব ঘটস্ব নৈবং যুদ্ধং কুর্ব্বন্ পাপফলমবাপ্স্যসি ইত্যেষ উপদেশঃপ্রাসঙ্গিকঃ ॥৩৮॥

## গিরিকৃত টীকা।

তর্হি যুদ্ধেগুর্ব্বাদিবধবশাদ্ধধ্যস্থা নিন্দা ততোনিবৃত্তৌ শত্রুনিন্দেত্যুভয়তঃ পাশরজ্জুরি-ত্যাশঙ্ক্যাহ যুদ্ধে পুনরিতি। জয়ে পরাজয়ে চ লাভধ্রৌব্যাদ্যুদ্ধার্থমুত্থানমাবশ্যকমিত্যাহ-তস্মাদিতি। ন হি পরিশুদ্ধকুলস্য ক্ষত্রিয়স্য যুদ্ধাযোদ্যুক্তস্য তস্মাদুপরমঃ সাধীয়ানিত্যাহ কৌন্তেযেতি। জযে পরাজয়ে চেত্যেতদুভযথেত্যুচ্যতে। জযাদিনিয়মাভাবেপি লাভনি-য়মে ফলিতমাহ যতইতি। কৃতনিশ্চয়ত্বমেব বিষদযতি জেষ্যামীতি॥ ৩৭ ॥

পাপভীরুতয়া যুদ্ধায নিশ্চয়ং কৃত্বা নোত্থাতুং শক্নোমীত্যাশঙ্ক্যাহ তত্রেতি। যুদ্ধস্য স্বধর্ম্মতয়া কর্ত্তব্যত্বে সতীতি যাবৎ। সুহৃজ্জীবনমরণাদিনিমিত্তযোঃ সুখদুঃখয়োঃ সমতা-করণং কথমিতি তত্রাহ রাগদ্বেষাবিতি। লাভঃ শত্রুকোষাদিপ্রাপ্তিঃ অলাভস্তদ্বিপর্য্যয় স্তায়েন যুদ্ধেনাপবিভূতেন পরস্য পরিভবোজয়স্তদ্বিপর্য্যযস্ত্বজযঃ তয়োঃলাভালাভয়োর্জ-য়াজয়য়োশ্চ সমতাকরণং সমানমেব, রাগদ্বেষাবকৃত্যেতদ্দর্শয়িতুং তথেত্যুক্তং, যথো-

## স্বামিকৃত টীকা।

কিঞ্চাবাচ্যবাদানিতি। অবাচ্যান্ বাদাম্ বচনানর্হান্শব্দাংস্তবাহিতাস্তচ্ছত্রবোবদি-ষ্যন্তি। ৩৬॥

যচ্চোক্তং ন চৈতদ্বিদ্মইতি তত্রাহ হতোবেতি। পক্ষদ্বয়েঽপি তব লাভএবেত্যর্থঃ ॥৩৭।

যদপ্যুক্তং পাপমেবাশ্রয়েদস্মানিতি তত্রাহ সুখদুঃখে ইতি। সুখদুঃখে সমে কৃত্বা তথা তয়োশ্চ কারণভূতৌ লাভালাভাবপি তয়োরপি কারণভূতৌ জয়াজয়াবপি সমৌ কৃত্বা এতে

এষা তেঽভিহিতা সাংখ্যে বুদ্ধির্যোগে ত্বিমাং শৃণু।
বুদ্ধ্যা যুক্তো যয়া পার্থ কর্ম্মবন্ধং প্রহাস্যসি ॥ ৩৯ ॥

## শাঙ্করভাষ্যম্।

শোকমোহাপনয়নায় লৌকিকোন্যায়ঃ স্বধর্ম্মমপি চাবেক্ষ্যেত্যাদ্যৈঃ শ্লোকৈরুক্তো নতু-তাৎপর্য্যেণ পরমার্থদর্শনংত্বিহ প্রকৃতংতচ্চোক্তমুপসংহ্রিয়তেএষা তেঽভিহিতেতি। শাস্ত্র বিষয়বিভাগপ্রদর্শনায় ইহ হি দর্শিতে পুনঃ শাস্ত্রবিষয়বিভাগে উপরিষ্টাৎ জ্ঞানযোগেন সাংখ্যানাং কর্ম্মযোগেন যোগিনামিতি নিষ্ঠাদ্বয়বিষয়ং শাস্ত্রং সুখং প্রবর্ত্তিষ্যতি শ্রোতা-রশ্চ বিষয়বিভাগেন সুখং গ্রহীষ্যন্তীত্যত আহ এষা তে ইতি। এষা তে তুভ্যমভিহি-তোক্তা সাংখ্যে পরমার্থবস্তুবিবেকবিষয়ে বুদ্ধিঃ জ্ঞানং সাক্ষাৎশোকমোহাদিসংসারহেতু-দোষনিবৃত্তিকারণং, যোগে তু তৎপ্রাপ্ত্যুপায়ে নিঃসঙ্গতয়া দ্বন্দ্বপ্রহরণপূর্ব্বকমীশ্বরারাধ-

## গিরিকৃত টীকা।

ক্তোপদেশবশাৎ পরমার্থদর্শনপ্রকরণে যুদ্ধকর্ত্তব্যতোক্তেঃ সমুচ্চয়পরত্বং শাস্ত্রস্য প্রাপ্তমি-ত্যাশঙ্ক্যাহ এবইতি। ক্ষত্রিয়স্য তব শর্ম্মভূতযুদ্ধকর্ত্তব্যতানুবাদপ্রসঙ্গাগতত্বাদস্যোপদে-শস্য নানেন মিষেণ সমুচ্চয়ঃ সিধ্যতীত্যর্থঃ ॥ ৩৮ ॥

নতু স্বধর্ম্মমপি চাবেক্ষ্যেত্যাদিশ্লোকৈর্ণ্যায়াবষ্টম্ভেন শোকমোহাপনয়নস্য তাৎপর্য্যে-ণোক্তত্বাত্তস্মিন্নুপসংহর্ত্তব্যে কিমিতি পরমার্থদর্শনমুপসংহ্রিয়তে তত্রাহ শোকেতি। স্বধ-র্ম্মমপীত্যাদিভিরতীতশ্লোকৈঃ শোকমোহয়োঃ স্বজনমরণগুর্ব্বাদিবধশঙ্কানিমিত্তায়াঃ সম্য-গ্‌জ্ঞানপ্রতিবন্ধকয়োরপনয়ার্থং বর্ণাশ্রমকৃতং ধর্ম্মমনুতিষ্ঠতঃ স্বর্গাদি সিধ্যতি নান্যথেত্যন্ব-য়ব্যতিরেকাত্মকোলোকপ্রসিদ্ধো ন্যায়ো যদ্যপি দর্শিতস্তথাপি নাসৌতাৎপর্য্যেণোক্তইত্যর্থঃ। কিং তর্হি তাৎপর্য্যেণোক্তং তদাহ পরমার্থেতি। নত্বেবাহং জাতু নাসমিত্যাদি সপ্তম্যা পরামৃশ্যতে, উক্তা ন জায়তে ম্রিয়তে বা কদাচিন্নেত্যাদিনোপপাদিতমিত্যর্থঃ। উপসংহারপ্রয়োজনমাহ শাস্ত্রেতি। তস্য বস্তুদ্বারা বিষয়োনিষ্ঠাদ্বয়ং তস্য বিভক্তস্য তে-নৈব বিভাগেন প্রদর্শনার্থং পরমার্থদর্শনোপসংহারইত্যর্থঃ। নতু কিমিত্যত্র শাস্ত্রস্য বিষয়-

## স্বামিকৃত টীকা।

যাং সমত্বে কারণং হর্ষবিষাদরাহিত্যং, যুজ্যস্ব সন্নদ্ধোভব সুখদুঃখাদ্যভিলাষং হিত্বা স্বধ-র্ম্মবুদ্ধ্যা যুধ্যমানঃ পাপং ন প্রাপ্স্যসীত্যর্থঃ ॥ ৩৮ ॥

উপদিষ্টং জ্ঞানযোগমুপসংহরংস্তৎসাধনং কর্ম্মযোগং প্রস্তৌতি এষেতি। সম্যক্ খ্যায়-তে প্রকাশ্যতে বস্তুতত্ত্বমনয়েতি সংখ্যা সম্যগ্‌জ্ঞানং তস্যাং প্রকাশমানমাত্মতত্ত্বং সাংখ্যং তস্মিন্ করণীয়া বুদ্ধিরেষা তবাভিহিতা, এবমভিহিতায়ামপি তব চেদাত্মতত্ত্বমপরোক্ষং ন

নেহাভিক্রমনাশোঽস্তি প্রত্যবায়ো ন বিদ্যতে।
স্বল্পমপ্যস্য ধর্ম্মস্য ত্রায়তে মহতো ভয়াৎ ॥ ৪০ ॥

শাঙ্করভাষ্যম্।

নার্থে কর্ম্মযোগে কর্ম্মানুষ্ঠানে সমাধিযোগে চ ইমামনন্তরমেবোচ্যমানাং বুদ্ধিং শৃণু, তাঞ্চ বুদ্ধিং স্তৌতি প্ররোচনার্থং, বুদ্ধ্যা যয়া যোগবিষয়যা যুক্তো হে পার্থ কর্ম্মবন্ধনং কর্ম্মৈব ধর্ম্মাধর্ম্মাখ্যো বন্ধঃ কর্ম্মবন্ধঃ তং প্রহাস্যসীশ্বরপ্রসাদনিমিত্তজ্ঞানপ্রাপ্তেরিত্যভিপ্রায়ঃ ॥ ৩৯ ॥

কিঞ্চান্যৎ নেহাভীতি। নেহ মোক্ষমার্গে কর্ম্মযোগে অভিক্রমনাশোঽভিক্রমণমভিক্রমঃ প্রারম্ভঃ তস্য নাশো নাস্তি যথা কৃষ্যাদের্যোগবিষয়ে প্রারম্ভস্য নানৈকান্তিকফলত্ব-

গিরিকৃত টীকা।

বিভাগঃ প্রদর্শ্যতে উত্তরত্রৈব তদ্বিভাগপ্রবৃত্তিং প্রতিপত্ত্যোঃ সম্ভবাদিতি তত্রাহ ইহহীতি শাস্ত্রপ্রবৃত্তেঃ শ্রোতৃপ্রতিপত্তেশ্চ সৌকর্য্যার্থমাদৌ বিষয়বিভাগসূচনমিত্যর্থঃ। উপসংহারস্য ফলবত্ত্বমেবমুক্ত্বা তমেবোপসংহারমবতারয়তি অতআহেতি। পরমার্থাত্মতত্ত্ববিষয়াং জ্ঞাননিষ্ঠামুক্তামুপসংহৃত্য বক্ষ্যমাণাং সংগৃহ্লাতি যোগেত্বিতি। তামেব বুদ্ধিং বিশিষ্টফলবত্ত্বেনাভিষ্টৌতি বুদ্ধ্যেতি। তত্রোপসংহারভাগং বিভজতে এবেত্যাদিনা। বুদ্ধিশব্দস্যান্তঃকরণবিষয়ত্বং ব্যাবর্ত্তয়তি জ্ঞানমিতি। তস্য সহকারিনিরপেক্ষস্য বিশিষ্টফলবত্ত্বমাচষ্টে সাক্ষাদিতি। শোকমোহৌ রাগদ্বেষৌ কর্ত্তৃত্বং ভোক্তৃত্বমিত্যাদিরনর্থঃ সংসারস্তস্য হেতুর্দ্দোষঃ স্বাজ্ঞানং তস্য নিবৃত্তৌ নিরপেক্ষং কারণং জ্ঞানমজ্ঞাননিবৃত্তৌ জ্ঞানস্যান্বয়ব্যতিরেকসমধিগতসাধনত্বাদিত্যর্থঃ। যোগেত্বিমামিত্যাদি ব্যাকুর্ব্বন্ যোগশব্দস্য প্রকৃতে চিত্তবৃত্তিনিরোধবিষয়ত্বং ব্যবচ্ছিনত্তি তৎপ্রাপ্তীতি। প্রকৃতমুক্ত্যুপযুক্তং জ্ঞানং তৎ পদেন পরামৃশ্যতে। জ্ঞানোদয়োপায়মেব প্রকটয়তি নিঃসঙ্গতয়েতি। ফলাভিসন্ধি বৈধুর্য্যং নিঃসঙ্গত্বং। বুদ্ধিস্তুতিপ্রয়োজনমাহ প্ররোচনার্থমিতি। অভিষ্টুতা হি বুদ্ধিঃ শ্রদ্ধাভব্যা সত্যনুষ্ঠাতারমধিকরোতি তেন স্তুতিরর্থবতীত্যর্থঃ। কর্ম্মানুষ্ঠানবিষয়বুদ্ধ্যা কর্ম্মবন্ধস্য কুতোনিবৃত্তি র্নহি তত্ত্বজ্ঞানমন্তরেণ সমূলং কর্ম্ম হাতুং শক্যমিত্যাশঙ্ক্যাহ ঈশ্বরইতি ॥ ৩৯ ॥

নন্থ কর্ম্মানুষ্ঠানস্যানৈকান্তিকফলত্বেনাকিঞ্চিৎকরত্বাদনেকার্থকলুষিতত্বেন দোষবত্ত্বাচ্চ যোগবুদ্ধিরপি ন শ্রদ্ধেয়েতি তত্রাহ কিঞ্চেতি। অন্যচ্চ কিঞ্চিদুচ্যতে কর্ম্মানুষ্ঠান-

স্বামিকৃত টীকা।

ভবতি তর্হ্যন্তঃকরণশুদ্ধিদ্বারাত্মতত্ত্বাপরোক্ষার্থং কর্ম্মযোগেত্বিমাং বুদ্ধিং শৃণু যয়া বুদ্ধ্যা যুক্তঃ পরমেশ্বরার্পিতকর্ম্মযোগেন শুদ্ধান্তঃকরণঃ—সংস্তৎপ্রসাদলব্ধাপরোক্ষজ্ঞানেন কর্ম্মাত্মকং বন্ধং প্রকর্ষেণ হাস্যসি ত্যক্ষ্যসি ॥ ৩৯ ॥

নন্থ কৃষ্যাদিবৎ কর্ম্মণাং কদাচিদ্বিঘ্নবাহুল্যেন ফলে ব্যভিচারান্মন্ত্রাদ্যঙ্গবৈগুণ্যেন চ

ব্যবসায়াত্মিকা বুদ্ধিরেকেহ কুরুনন্দন।
বহুশাখাহ্যনন্তাশ্চ বুদ্ধয়োঽব্যবসায়িনাম্ ॥ ৪১ ॥

## শাঙ্করভাষ্যম্।

মিত্যর্থঃ, কিঞ্চ নাপি চিকিৎসাবৎ প্রত্যবায়ো বিদ্যতে কিন্তু ভবতি স্বল্পমপ্যস্য যোগধর্ম্মস্যানুষ্ঠিতং ত্রায়তে রক্ষতি মহতঃ সংসারভয়াৎ জন্মমরণাদিলক্ষণাৎ ॥ ৪০ ॥

যেয়ং সাংখ্যে বুদ্ধিরুক্তা যোগে চ বক্ষ্যমাণলক্ষণা সা ব্যবসায়েতি। ব্যবসায়াত্মিকা নিশ্চয়স্বভাবা একৈব বুদ্ধিরিতরবিপরীতবুদ্ধিশাখাভেদস্য বাধিকা সম্যক্ প্রমাণজনিতত্বা-

## গিরিকৃত টীকা।

স্যাবশ্যকত্বে তৎ কারণমিতি যাবৎ। কর্ম্মণা সহ সমাধেরনুষ্ঠানমশক্যত্বাদনেকান্তরায়সম্ভবাৎ তৎফলস্য চ সাক্ষাৎকারস্য দীর্ঘকালাভ্যাসসাধ্যস্যৈকস্মিন্ জন্মন্যসম্ভবাদর্থাদ্‌যোগীভ্রংশেতানর্থে চ নিপতেদিত্যাশঙ্কাহ নেহেতি। প্রতীকত্বেনোপাত্তস্য নকারস্য পুনরন্বয়ানুগুণত্বেন নাস্তীত্যনুবাদঃ যত্তু কর্ম্মানুষ্ঠানস্যানৈকান্তিকফলত্বেনাকিঞ্চিৎকরত্বমুক্তং তৎ দূষয়তি যথেতি। কৃষিবাণিজ্যাদেবারম্ভস্যানিয়তফলং সম্ভাবনামাত্রোপনীতত্বান্ন তথা কর্ম্মণি বৈদিকে প্রারব্ধস্য ফলমনিয়তং যুজ্যতে শাস্ত্রবিরোধাদিত্যর্থঃ। যত্তূক্তমনেকার্থকলুষিতত্বেন দোষবদনুষ্ঠানমিতি তত্রাহ কিঞ্চেতি। ইতোঽপি কর্ম্মানুষ্ঠানমাবশ্যকমিতি প্রতিজ্ঞায় হেত্বন্তরমেব স্ফুটয়তি নাপাতি। চিকিৎসায়াংহি ক্রিয়মাণায়াং ব্যাধ্যাতিরেকো বা মরণং বা প্রত্যবায়োপি সম্ভাব্যতে কর্ম্মপরিপাকস্য দুর্ব্বিবেকত্বান্ন তথা কর্ম্মানুষ্ঠানে দোষোঽস্তি বিহিতত্বাদিত্যর্থঃ। সম্প্রতি কর্ম্মানুষ্ঠানস্য ফলং পৃচ্ছতি কিংত্বিতি। উত্তরার্দ্ধং ব্যাকুর্ব্বন্বিবক্ষিতং ফলং কথয়তি স্বল্পমপীতি। সম্যগ্‌জ্ঞানোৎপাদনদ্বারেণ রক্ষণং বিবক্ষিতং সর্ব্বপাপপ্রসক্তোপি ধ্যায়ন্নিমিষমচ্যুতং ভূয়স্তপস্বী ভবতি পংক্তিপাবনইতি স্মৃতেরিত্যর্থঃ ॥ ৪০ ॥

নমু বুদ্ধিদ্বয়াতিরিক্তানি বুদ্ধ্যন্তরাণ্যপি কাণাদাদিশাস্ত্রপ্রসিদ্ধানি বিদ্যন্তে তথা চ কথং বুদ্ধিদ্বয়মেব ভগবতোপদিষ্টমিতি তত্রাহ যেয়মিতি। সৈবৈকাপ্রমাণভূতা বুদ্ধিরিত্যাহ ব্যবসায়াত্মিকেতি। বুদ্ধ্যন্তরাণ্যবিবেকমূলান্যপ্রমাণানীত্যাহ বহুশাখাহীতি। ব্যবসা-

## স্বামিকৃত টীকা।

প্রত্যবায়সম্ভবাৎ কুতঃ কর্ম্মযোগেন কর্ম্মবন্ধপ্রহাণং তত্রাহ নেহেতি। ইহ নিষ্কামকর্ম্মযোগেঽভিক্রমস্য প্রারম্ভস্য নাশো নিষ্ফলত্বং নাস্তি প্রত্যবায়শ্চ ন বিদ্যতে ঈশ্বরোদ্দেশেনৈব বিগুণবৈগুণ্যাদ্যসম্ভবাৎ। কিঞ্চাস্য ধর্ম্মস্য ঈশ্বরারাধনার্থকর্ম্মযোগস্য স্বল্পমপি কৃতং মহতো ভয়াৎ সংসারলক্ষণাত্ত্রায়তে রক্ষতি ন তু কাম্যকর্ম্মবৎ কিঞ্চিদঙ্গবৈগুণ্যাদিনা নৈষ্ফল্যমস্যেত্যর্থঃ ॥ ৪০ ॥

কুতইত্যপেক্ষায়ামুভয়োর্বৈষম্যমাহ ব্যবসায়াত্মিকেতি। ইহ ঈশ্বরারাধনলক্ষণে কর্ম্ম-

## শাঙ্করভাষ্যম্।

দিহ শ্রেয়োমার্গে হে কুরুনন্দন যাঃ পুনরিতরা বুদ্ধয়ো যাসাং শাখাভেদপ্রচারবশাদনন্তোঽপরোঽনুপরতঃ সংসারোপি নিত্যপ্রততো বিস্তীর্ণো ভবতি প্রমাণজনিতবিবেকবুদ্ধিনিমিত্তবশাচ্চোপরতাস্বনন্তভেদবুদ্ধিষু সংসারোঽপ্যুপরমতে তা বুদ্ধয়ো বহুশাখাবহ্ব্যঃ শাখা যাসাং তা বহুশাখা বহুভেদাইত্যেতৎপ্রতিশাখাভেদেন হ্যনন্তাশ্চ বুদ্ধয়ঃ কেষামব্যবসায়িনাং প্রমাণজনিতবিবেকবুদ্ধিরহিতানামিত্যর্থঃ ॥৪১॥

## গিরিকৃত টীকা।

য়াত্মিকায়া বুদ্ধে শ্রেয়োমার্গে প্রবৃত্তয়া বিবক্ষিতং ফলমাহ ইতরেতি। প্রকৃতবুদ্ধিদ্বয়াপেক্ষয়া ইতরাবিপরীতাশ্চাপ্রমাণজনিতাঃ স্বকপোলকল্পিতা যাবুদ্ধয়স্তাসাং শাখাভেদঃ সংসারহেতুস্তস্য বাধিকেতি যাবৎ। তত্র হেতুঃ সম্যগিতি। নির্দ্দোষবেদবাক্যসমুত্থত্বাত্ত্বকমুপায়াপেয়ভূতং বুদ্ধিদ্বয়ং সাক্ষাৎ পারম্পর্য্যাভ্যাং সংসারহেতুবাধকমিত্যর্থঃ উত্তরার্দ্ধং ব্যাচষ্টে যাঃ পুনরিতি। প্রকৃতবুদ্ধিদ্বয়াপেক্ষয়ার্থান্তরত্বমিতরত্বং। তাসামনর্থহেতুত্বং দর্শয়তি যাসামিতি। অপ্রামাণিকবুদ্ধীনাং প্রসক্তানুপ্রসক্ত্যা জায়মানানামতীববুদ্ধিপরিণামবিশেষঃ শাখাভেদাস্তেষাং প্রচারঃ প্রবৃত্তিঃ তদ্বশাদিত্যেতৎ, অনন্তত্বং সম্যগ্‌জ্ঞানমন্তরেণ নিবৃত্তিবিরহিতত্বং, অপরত্বং কার্য্যস্যৈব সতোবস্তুভূতকারণবিরহিত্বং। অনুপরতত্বং স্ফোরয়তি নিত্যেতি। কথং তর্হি তন্নিবৃত্ত্যা পুরুষার্থপরিসমাপ্তিস্তত্রাহ প্রহাণেতি। অন্বয়ব্যতিরেকাখ্যোনানুমানেনাগমেন চ পদার্থপরিশোধনপরেন পরিনিষ্পন্না বিবেকাত্মিকা যা বুদ্ধিস্তাংনিমিত্তীকৃত্য সমুৎপন্নসম্যগ্বোধানুবোধাৎ প্রকৃতাবিপরীতবুদ্ধয়ো ব্যাবর্ত্তন্তে তাস্বসংখ্যাতাসু ব্যাবৃত্ত্যাসু সতীষু নিরলম্বনতয়া সংসারোঽপি স্থাতুমশক্নুবন্নুপরতোভবতীত্যর্থঃ। যাঃপুনরিত্যুপক্রান্তা তত্ত্বজ্ঞানাপহ্নোদ্যা সংসারাস্পদীভূতা বিপরীতবুদ্ধিরনুক্রামতি তা বুদ্ধয়ইতি। বুদ্ধীনাং বৃক্ষস্যেব কুতোবহুশাখিত্বং তত্রাহ বহুভেদাইত্যেতদিতি। একৈকাং বুদ্ধিং প্রতি শাখাভেদোঽবান্তরবিশেষস্তেন বুদ্ধীনামসংখ্যত্বংপ্রখ্যাতমিত্যাহ প্রতিশাখেতি। বুদ্ধীনামানন্ত্যপ্রসিদ্ধিপ্রদ্যোতনার্থো হি শব্দঃ। সম্যগ্‌জ্ঞানবতাং যথোক্তবুদ্ধিভেদভাক্ত্বমপ্রসিদ্ধমিত্যাশঙ্ক্য প্রত্যাহ কেষামিত্যাদিনা ॥৪১॥

## স্বামিকৃত টীকা।

যোগে ব্যবসায়াত্মিকা পরমেশ্বরভক্ত্যৈব ধ্রুবং তরিষ্যামীতি নিশ্চয়াত্মিকা একৈব একনিষ্ঠৈব বুদ্ধির্ভবতি, অব্যবসায়িনান্তু ঈশ্বরারাধনবহির্ম্মুখাণাং কামিনাং কামানামানন্ত্যাদনন্তাস্তত্রাপি কর্ম্মফলগুণফলত্বাদিপ্রকারভেদাদ্বহুশাখাশ্চ বুদ্ধয়ো ভবন্তি, ঈশ্বরারাধনার্থংহি নিত্যং নৈমিত্তিকঞ্চ কর্ম্ম কিঞ্চিদঙ্গবৈগুণ্যেঽপি ন নশ্যতি যথা শক্নুয়াত্তথা কুর্য্যাদিতি হি তদ্বিধীয়তে। ন চ বৈগুণ্যমপীশ্বরোদ্দেশেনৈব বৈগুণ্যোপশমাৎ নতু তথা কাম্যং কর্ম্ম অতো মহদ্বৈষম্যমিতিভাবঃ ॥ ৪১ ॥

যামিমাং পুষ্পিতাং বাচং প্রবদন্ত্যবিপশ্চিতঃ।
বেদবাদরতাঃ পার্থ নান্যদস্তীতি বাদিনঃ ॥৪২॥

## শাঙ্করভাষ্যম্।

যেষাং ব্যবসায়াত্মিকা বুদ্ধির্নাস্তি তেষাং যামিমামিতি। যামিমাং বক্ষ্যমাণাং পুষ্পিতা-পুষ্পিতইব বৃক্ষঃ শোভমানাং শ্রূয়মাণরমণীয়াং বাচং বাক্যলক্ষণাং প্রবদন্তি কে অবিপশ্চিতঃ অল্পমেধসোঽবিবেকিনইত্যর্থঃ। বেদবাদবতাইতি, বেদবাদরতাঃ বহ্বর্থবাদফল-সাধনপ্রকাশকেষু বেদবাক্যেষু বতাঃ হে পার্থ নান্যৎ স্বর্গপশ্বাদিফলসাধনেভ্যঃকর্ম্মেভ্যোঽস্তীত্যেবং বাদিনোবদনশীলাঃ ॥ ৪২ ॥

---

## গিরিকৃত টীকা।

যদি সাংখ্যযোগরূপৈকৈব প্রমাণভূতা বুদ্ধিস্তর্হি সৈব সর্ব্বেষাং চিত্তে কিমিতি স্থিরা ন ভবতি তত্রাহ যেষামিতি। তেষামিমাং পুষ্পিতাং বাচং প্রবদন্তি তয়াপহৃতচেতসাং কামিনাং। কামবশান্নিশ্চয়াত্মিকা বুদ্ধির্ন প্রায়ঃ স্থিরা ভবতীত্যাহ যামিতি। ইমামিত্যধ্যয়নবিধ্যুপাত্তত্বেন প্রসিদ্ধত্বং কর্ম্মকাণ্ডরূপায়া বাচো বিবক্ষ্যতে, বক্ষ্যমাণত্বং ক্রিয়াবিশেষবহুলালিত্যাদৌ প্রষ্টব্যং। কিংশুকোহি পুষ্পশালী শোভমানোঽনুভূয়তে ন পুনঃ রূপভোগ্যফলভাগী লক্ষ্যতে তথেয়মপি কর্ম্মকাণ্ডাত্মিকা শ্রূয়মাণদশায়াং রমণীয়া বাগুপলভ্যতে সাধ্যসাধনসম্বন্ধপ্রতিভানান্ন ত্বেষা নিরতিশয়ফলভাগিনী ভবতি কর্ম্মানুষ্ঠানফলস্য নিত্যত্বাদিতি মত্বাহ পুষ্পিতামিতি। বাক্যত্বেন লক্ষ্যতে অর্থবত্ত্বপ্রতিভানাদ্বস্তুতস্তু ন বাক্যমর্থাভাসত্বাদিত্যাহ বাক্যলক্ষণামিতি। প্রবক্তৄণাং বেদবাক্যতাৎপর্য্যপরিজ্ঞানাভাবং সূচয়তি অবিপশ্চিতইতি। বেদবাদা বেদবাক্যানি তানি চ বহূনামর্থবাদানাং ফলানাং সাধনানাঞ্চ বিশেষাণাং প্রকাশকানি তেষু রতিরাসক্তিস্তন্নিষ্ঠত্বং তদ্বত্ত্বমপি তেষাং বিশেষণমিত্যাহ বেদবাদেতি। কর্ম্মকাণ্ডনিষ্ঠত্বং ফলং কথয়তি নান্যদিতি। ঈশ্বরো বা মোক্ষো বা নাস্তীত্যেবং বদন্তো নাস্তিকাঃ সম্যগ্জ্ঞানবন্তো ন ভবন্তীত্যর্থঃ ॥ ৪২ ॥

## স্বামিকৃত টীকা।

নন্বু কামিনোঽপি কষ্টান্ কামান্ বিহায় ব্যবসায়াত্মিকামেব বুদ্ধিং কিমিতি ন কুর্ব্বন্তি তত্রাহ যামিমামিতি। যামিমাং পুষ্পিতাং বিষলতাবদাপাতস্তো রমণীয়াং প্রকৃষ্টাং পরমার্থফলপরামেব বদন্তি বাচং স্বর্গাদিফলশ্রুতিং তেষাং তয়া বাচাপহৃতচেতসাং ব্যবসায়াত্মিকা বুদ্ধির্ন সমাধৌ বিধীয়তইতি তৃতীয়েনান্বয়ঃ। কিমিতি তথা বদন্তি যতোঽবিপশ্চিতো মূঢ়াঃ। তত্র হেতুর্বেদবাদরতাইতি। বেদে যে বাদা অর্থবাদাঃ, অক্ষয্যং হি বৈচাতুর্মাস্যযাজিনঃ সুকৃতং ভবতি, তথা, অপামসোমমমৃতা অভূমেত্যাদ্যাঃ, তেষ্বেব রতাঃ প্রীতাঃ, অতএবাতঃ পরমন্যদীশ্বরতত্ত্বং প্রাপ্যং নাস্তীতি বদনশীলাঃ ॥ ৪২ ॥

কামাত্মানঃ স্বর্গপরা জন্মকর্ম্মফলপ্রদাম্।
ক্রিয়াবিশেষবহুলাং ভোগৈশ্বর্য্যগতিম্প্রতি ॥৪৩॥

## শাঙ্করভাষ্যম্।

তে চ কামাত্মেতি। কামাত্মানঃ কামস্বভাবাঃ কামপরাইত্যর্থঃ। স্বর্গেতি স্বর্গপরাঃ স্বর্গঃ পরঃ পুরুষার্থোযেষাং তে স্বর্গপরাঃ স্বর্গপ্রধানাঃ জন্মকর্ম্মফলপ্রদাং কর্ম্মণঃ ফলং কর্ম্মফলং জন্মৈব কর্ম্মণঃ ফলং জন্মকর্ম্মফলং তৎ প্রদদাতীতি জন্মকর্ম্মফলপ্রদা তাং বাচং প্রবদন্তীত্যনুষজ্যতে, ক্রিয়াবিশেষবহুলাং ক্রিয়াণাং বিশেষাঃ ক্রিয়াবিশেষাঃ তে বহুলাযস্যাংবাচি তাং স্বর্গপশুপুত্রাদ্যর্থাঃ যয়া বাচা বাহুল্যেন প্রকাশ্যন্তে, ভোগৈশ্বর্য্যগতিং প্রতি ভোগশ্চ ঐশ্বর্য্যঞ্চ ভোগৈশ্বর্য্যে তয়োর্গতিঃপ্রাপ্তিঃ ভোগৈশ্বর্য্যগতিঃ তাং প্রতি সাধনভূতাস্তেক্রিয়াবিশেষাঃ তদ্বহুলাং তাং বাচং প্রবদন্তো মূঢ়াঃ সংসারে পরিবর্ত্তন্তইত্যভিপ্রায়ঃ ॥৪৩॥

## গিরিকৃত টীকা।

প্রকৃতান্ প্রবক্তৄনবিবেকিনো ব্যবসায়াত্মিকা বুদ্ধিভাক্ত্বাসম্ভবসিদ্ধ্যর্থং বিধ্যন্তরেণ বিশিনষ্টি তেচেতি। তেষাং সংসারপরিবর্ত্তমানপরিদর্শনার্থং প্রস্তুতাং বাচমেব বিশিনষ্টি জন্মেতি। নমু পুংসাং কামস্বভাবত্বমযুক্তং চেতনস্যেচ্ছাবতস্তদাত্মত্বানুপপত্তেরিতি তত্রাহ কামপরাইতি। তৎপরত্বং তত্তৎফলার্থিত্বেন তত্তদুপায়েষু কর্ম্মস্বেব প্রবৃত্ততয়া কর্ম্মসন্ন্যাসপূর্ব্বকাৎ জ্ঞানাদ্বহির্ম্মুখত্বং। নমু কর্ম্মনিষ্ঠানামপি পরমপুরুষার্থাপেক্ষয়া মোক্ষোপায়ে জ্ঞানে ভবত্যাভিমুখ্যমিতি নেত্যাহ স্বর্গেতি। তৎপরত্বং তস্মিন্নেবাসক্ততয়া তদতিরিক্তপুরুষার্থরাহিত্যনিশ্চয়বত্ত্বং। উচ্চাবচমধ্যমদেহপ্রভেদগ্রহণং জন্মবাচো যথোক্তফলপ্রদত্বমপ্রামাণিকমিত্যাশঙ্ক্যানুষ্ঠানদ্বারা তদুপপত্তিরিত্যাহ ক্রিয়েতি। ক্রিয়াণামনুষ্ঠানানাং যাগদানাদীনাং বিশেষা দেশকালাধিকারিপ্রযুক্তাঃ সপ্তাহানেকাহলক্ষণাস্তে বহবস্যাং বাচি প্রাচুর্য্যেণ প্রতিভান্তীত্যর্থঃ। কথং যথোক্তায়াং বাচি ক্রিয়াবিশেষাণাং বাহুল্যেনাবস্থানমিত্যাশঙ্ক্য প্রকাশ্যত্বেনৈতদ্বিশদয়তি স্বর্গেতি। তথাপি তেষাং মোক্ষোপায়ত্বোপপত্তেস্তন্নিষ্ঠানাং মোক্ষাভিমুখ্যং ভবিষ্যতি নেত্যাহ ভোগেতি। তথোক্তাং বাচমভিবদতাং পর্য্যবসানং দর্শয়তি তদ্বহুলামিতি ॥৪৩॥

## স্বামিকৃত টীকা।

অতএব কামাত্মানইতি। কামাত্মানঃ কামাকুলিতচিত্তা অতঃ স্বর্গএব পরঃ পুরুষার্থো যেষাং তে। জন্ম চ তত্র কর্ম্মাণি চ তৎফলানি চ প্রদদাতীতি তথা তাং, ভোগৈশ্বর্য্যয়োর্গতিং প্রাপ্তিং প্রতি সাধনভূতা যে ক্রিয়াবিশেষাস্তে বহুলা যস্যাং তাং প্রবদন্তীত্যনুষঙ্গঃ ॥৪৩॥

ভোগৈশ্বর্য্যপ্রসক্তানাং তয়াপহৃতচেতসাম্‌।
ব্যবসায়াত্মিকা বুদ্ধিঃসমাধৌ ন বিধীয়তে ॥৪৪॥
ত্রৈগুণ্যবিষয়া বেদা নিস্ত্রৈগুণ্যো ভবার্জ্জুন।
নির্দ্বন্দ্বো নিত্যসত্ত্বস্থো নির্যোগক্ষেম আত্মবান্‌॥ ৪৫ ॥

## শাঙ্করভাষ্যম্‌।

তেষাঞ্চ ভোগেতি। ভোগৈশ্বর্য্যপ্রসক্তানাং ভোগঃ কর্ত্তব্যঐশ্বর্য্যঞ্চেতি ভোগৈশ্বর্য্যয়োরেব প্রবণবতাং তদাত্মভূতানাং তযা ক্রিয়াবিশেষবহুলয়া বাচা অপহৃতচেতসামাচ্ছাদিতবিবেকপ্রজ্ঞানাং ব্যবসায়াত্মিকা সাংখ্যে যোগে বা যা বুদ্ধিঃ সমাধৌ সমাধীয়তেঽস্মিন্‌ পুরুষোপভোগায় সর্ব্বমিতি সমাধিরন্তঃকরণং বুদ্ধিঃ তস্মিন্‌ সমাধৌ ন বিধীয়তে ন স্থিতির্ভবতীত্যর্থঃ ॥৪৪॥

যে এবং বিবেকবুদ্ধিরহিতাঃ তেষাং কামাত্মনাং যৎ ফলং তদাহ ত্রৈগুণ্যেতি। ত্রৈগুণ্যবিষয়াঃ ত্রৈগুণ্যং সংসারো বিষয়ঃ প্রকাশয়িতব্যো যেষাং তে বেদাস্ত্রৈগুণ্যবিষয়াস্ত্বন্তনিস্ত্রৈ-

## গিরিকৃত টীকা।

নমু কর্ম্মকাণ্ডনিষ্ঠানাং কর্ম্মানুষ্ঠায়িনামপি বুদ্ধিশুদ্ধিদ্বারেণান্তঃকরণে সাধ্যসাধনভূতবুদ্ধিদ্বয়সমুদয়সম্ভবাদতো মোক্ষো ভবিষ্যতি নেত্যাহ তেষাঞ্চেতি। তদাত্মভূতানাং তয়োরেব ভোগৈশ্বর্য্যয়োরাত্মকর্ত্তব্যত্বেনারোপিতযোরভিনিবিষ্টে চেতসি তাদাত্ম্যাধ্যাসবতাং বহির্ম্মুখাণামিত্যর্থঃ। তথাপি শাস্ত্রানুসারিণ্যা বিবেকপ্রজ্ঞয়া ব্যবসায়াত্মিকা বুদ্ধি তেষামুদেষ্যতীত্যাশঙ্ক্যাহ তয়েতি। নমু সমাধিঃ সংপ্রজ্ঞাতা সংপ্রজ্ঞাতভেদেন দ্বিধোচ্যতে তত্র বুদ্ধিদ্বয়বিধিরপ্রসক্তঃ সন্‌ কথং নিষিধ্যতে তত্রাহ সমাধীয়তইতি ॥৪৪॥

অবিবেকিনামপি বেদাভ্যাসবতাং বিবেকবুদ্ধিরুদেষ্যতীত্যাশঙ্ক্যাহ যএবমিতি। তর্হি বেদার্থতয়া কামাত্মতা প্রশস্তেত্যাশঙ্ক্যাহ নিস্ত্রৈগুণ্যইতি। ভবেতি পদং নির্দ্বন্দ্বাদিবিশেষণেষ্বপি প্রত্যেকং সম্বধ্যতে ত্রয়াণাং সত্ত্বাদীনাং গুণানাং পুণ্যপাপব্যামিশ্রকর্ম্ম তৎফলসম্বন্ধলক্ষণঃ সমাহারস্ত্রৈগুণ্যমিত্যঙ্গীকৃত্য ব্যাচষ্টে সংসারইতি। বেদশব্দেনাত্র কর্ম্মকাণ্ডমেব

## স্বামিকৃত টীকা।

তত্রৈব ভোগৈশ্বর্য্যেতি। ভোগৈশ্বর্য্যয়োঃ প্রসক্তানামভিনিবিষ্টানাং তয়া পুষ্পিতয়া বাচাপহৃতমাকৃষ্টং চেতো যেষাং সমাধিশ্চিত্তৈকাগ্রং পরমেশ্বরাভিমুখত্বমিতি যাবৎ তস্মিন্‌ নিশ্চয়াত্মিকা বুদ্ধির্ন বিধীয়তে, কর্ম্মকর্ত্তরি প্রয়োগঃ, সা নোৎপদ্যতইত্যর্থঃ ॥৪৪॥

নমু স্বর্গাদিকং পরমং ফলং যদি ন ভবতি তর্হি কিমিতি বেদৈস্তৎসাধনতয়া কর্ম্মাণি বিধীয়ন্তে তত্রাহ ত্রৈগুণ্যবিষয়াইতি। ত্রিগুণাত্মকাঃ সকামা যেঽধিকারিণস্তদ্বিষয়াঃ কর্ম্ম-

যাবানর্থ উদপানে সর্ব্বতঃ-সংপ্লুতোদকে।
তাবান্ সর্ব্বেষু বেদেষু ব্রাহ্মণস্য বিজানতঃ ॥ ৪৬ ॥

## শাঙ্করভাষ্যম্।

গুণ্যো ভবার্জ্জুন নিষ্কামোভবেত্যর্থঃ নির্দ্বন্দ্বঃ সুখদুঃখহেতু সপ্রতিপক্ষৌ পদার্থৌ দ্বন্দ্বশব্দবাচ্যৌ ততো নির্গতো নির্দ্বন্দ্বো ভব ত্বং নিত্যসত্ত্বস্থঃ সদা সত্ত্বগুণাশ্রিতো ভব তথা নির্যোগক্ষেমোঽনুপাত্তস্যোপার্জ্জনং যোগ উপাত্তস্য রক্ষণং ক্ষেমঃ যোগক্ষেমপ্রধানস্য শ্রেয়সি প্রবৃত্তির্দুষ্করা ইত্যতো নির্যোগক্ষেমো ভব আত্মবানপ্রমত্তশ্চ ভব এষ তবোপদেশঃ স্বধর্ম্মমনুতিষ্ঠতঃ ॥ ৪৫ ॥

সর্ব্বেষু বেদোক্তেষু কর্ম্মসু যান্যুক্তান্যনন্তানি ফলানি তানি নাপেক্ষন্তে চেৎ কিমর্থং তানীশ্বরায়েত্যনুষ্ঠীয়ন্ত ইত্যুচ্যতে শৃণু যাবানিতি। যথা লোকে কূপতড়াগাদ্যনেকস্মিন্ উদ-

## গিরিকৃত টীকা।

গৃহ্যতে তদভ্যাসবতাং তদর্থানুষ্ঠাধারা সংসারক্লৌব্যান্ন বিবেকাবসরোঽস্তীত্যর্থঃ। তর্হি সংসারপরিবর্জ্জনার্থং বিবেকসিদ্ধয়ে কিং কর্ত্তব্যমিত্যাশঙ্ক্যাহ ত্বংত্বিতি। কথং নিস্ত্রৈগুণ্যোভবেতি গুণত্রয়স্য রাহিত্যং বিধীয়তে নিত্যসত্ত্বস্থো ভবেতি বাক্যশেষবিরোধাদিত্যাশঙ্ক্যাহ নিষ্কামইতি। সপ্রতিপক্ষত্বং পরস্পরবিরোধিত্বং, পদার্থৌ শীতোষ্ণাদিলক্ষণৌ। নিষ্কামত্বে দ্বন্দ্বান্নির্গতত্বং শীতোষ্ণাদিসহিষ্ণুত্বং হেতুমুক্ত্বা তত্রাপি হেত্বপেক্ষায়াং সদা সদ্গুণাশ্রিতত্বং হেতুমাহ নিত্যেতি। যোগক্ষেমব্যাবৃত্তচেতসোরজস্তমোভ্যামসংস্পৃষ্টে সত্ত্বমাত্রে সমাশ্রিতত্বমশক্যমিত্যাশঙ্ক্যাহ তথেতি যোগক্ষেময়োর্জীবনহেতুতয়া পুরুষার্থসাধনত্বান্নির্যোগক্ষেমো ভবেতি কুতো বিধিরিত্যাশঙ্ক্যাহ যোগেতি। যোগক্ষেমপ্রধানত্বং সর্ব্বস্য স্বারসিকমিতি ততো নির্গমনমশক্যমিত্যাশঙ্ক্যাহ আত্মবানিতি। অপ্রমাদো মনসো বিষয়পারবশ্যশূন্যত্বং। অথ যথোক্তোপদেশস্য মুমুক্ষুবিষয়ত্বাদর্জ্জুনস্য মুমুক্ষুত্বমিহ বিবক্ষিতমিতি নেত্যাহ এষইতি ॥ ৪৫ ॥

ঈশ্বরার্পণধিয়া স্বধর্ম্মানুষ্ঠানেঽপি ফলকামনাভাবাদ্বৈফল্যং যোগমার্গস্যেতি মন্বানঃ শঙ্কতে সর্ব্বেষ্বিতি। কর্ম্মমার্গস্য ফলবত্ত্বং প্রতিজানীতে উচ্যতইতি। কিং তৎফলমি-

## স্বামিকৃত টীকা।

ফলসম্বন্ধপ্রতিপাদকা বেদাঃ, ত্বন্তু নিস্ত্রৈগুণ্যো নিষ্কামো ভব। তত্রোপায়মাহ নির্দ্বন্দ্বঃ সুখদুঃখশীতোষ্ণাদিযুগলানি দ্বন্দ্বানি তদ্রহিতো ভব তানি সহস্বেত্যর্থঃ। কথমিত্যত আহ নিত্যসত্ত্বস্থঃ সন্ ধৈর্য্যমবলম্ব্যেত্যর্থঃ, তথা নির্যোগক্ষেমঃ অপ্রাপ্তস্বীকারোযোগঃ প্রাপ্তপালনং ক্ষেমস্তদ্রহিতঃ আত্মবানপ্রমত্তঃ, ন হি দ্বন্দ্বাকুলস্য যোগক্ষেমব্যাপৃতস্য চ প্রমাদিনস্ত্রৈগুণ্যাতিক্রমঃ সম্ভবতীতি ॥ ৪৫ ॥

## শাঙ্করভাষ্যম্।

পানে পরিচ্ছিন্নোদকে যাবান্ যাবৎ পরিমাণঃ স্নানপানাদিরর্থঃ ফলং প্রয়োজনং স সর্ব্বো-ঽর্থঃ সর্ব্বতঃ সংপ্লুতোদকেঽপি যোঽর্থঃ তাবানেব সংপদ্যতে তত্রান্তর্ভবতীত্যর্থঃ, এবং তাবাংস্তাবৎ পরিমাণএব সংপদ্যতে সর্ব্বেষু বেদেষু বেদোক্তেষু কর্ম্মসু যোঽর্থো যৎ কর্ম্ম-ফলং সোঽর্থো ব্রাহ্মণস্য সন্ন্যাসিনঃ পরমার্থতত্ত্বং বিজানতো যোঽর্থো যৎ বিজ্ঞানফলং সর্ব্বতঃ সংপ্লুতোদকস্থানীয়ং তস্মিংস্তাবানেব সংপদ্যতে তত্রৈবান্তর্ভবতীত্যর্থঃ। যথা কৃতায়বিজি-তায়াধরেয়াঃ সংযন্ত্যেবমেনং সর্ব্বং তদভিসমেতি যৎকিঞ্চিৎ প্রজাঃ সাধু কুর্ব্বন্তি যস্তদ্বেদ

---

## গিরিকৃত টীকা।

ত্যুক্তে তদ্বিষয়শ্লোকমবতারয়তি শৃণ্বিতি। যথোদপানে কূপাদৌ পরিচ্ছিন্নোদকে স্নানা-চমনাদ্যর্থোযাবানুৎপদ্যতে স তাবানপরিচ্ছিন্নে সর্ব্বতঃ সংপ্লুতোদকে সমুদ্রেঽন্তর্ভবতি পরিচ্ছিন্নোদকানামপরিচ্ছিন্নোদকাংশত্বাত্তথা সর্ব্বেষু বেদোক্তেষু কর্ম্মসু যাবানর্থো-বিষয়বিশেষোপরক্তঃ সুখবিশেষো জায়তে স তাবানাত্মবিদঃ স্বরূপভূতে সুখেঽন্ত-র্ভবতি পরিচ্ছিন্নানন্দান্তর্ভাবাভ্যুপগমাদেতস্যৈবানন্দস্যান্যানি ভূতানি মাত্রামুপজীবন্তীতি শ্রুতেঃ তথা চাপরিচ্ছিন্নাত্মানন্দপ্রাপ্তিপর্য্যবসায়িনো যোগমার্গস্য নাস্তি বৈফল্যমিত্যাহ যাবানিতি। উক্তমর্থমক্ষরযোজনয়া প্রকটয়তি যথেতি। উদকং পীয়তেঽস্মিন্নিতি ব্যুৎ-পত্ত্যা কূপাদিপরিচ্ছিন্নোদকবিষয়ত্বমুদপানশব্দস্য দর্শয়তি কূপেতি। কূপাদিগতস্যাভিধে-য়স্য সমুদ্রেঽন্তর্ভাবসম্ভবাৎ কথমিদমিত্থমিত্যাশঙ্ক্যার্থশব্দস্য প্রয়োজনবিষয়ত্বং ব্যুৎপাদয়তি ফলমিতি। যৎফলত্বেন লীয়তে তৎফলমিত্যুচ্যতে তৎকথং তড়াগাদিকৃতং স্নানপানাদি তথেত্যাশঙ্ক্য তস্যান্নীরসো নাশোপপত্তেরিত্যাহ প্রয়োজনমিতি। তড়াগাদিপ্রযুক্ত-প্রয়োজনস্য সমুদ্রনিমিত্তপ্রয়োজনমাত্রত্বমযুক্তমন্যস্যান্যাত্মত্বানুপপত্তেরিত্যাশঙ্ক্যাহ তত্রেতি ঘটাকাশাদেরিব মহাকাশে পরিচ্ছিন্নোদককার্য্যস্যাপরিচ্ছিন্নোদককার্য্যান্তর্ভাবঃ সম্ভবতি তৎপ্রাপ্তাবিতরাপেক্ষাভাবাদিত্যর্থঃ। পূর্ব্বার্দ্ধং দৃষ্টান্তভূতমেবং ব্যাখ্যায় দার্ষ্টান্তিকমুত্ত-রার্দ্ধং ব্যাকরোতি এবমিত্যাদিনা। কর্ম্মসু যোঽর্থইত্যুক্তং ব্যনক্তি যৎকর্ম্মফলমিতি। সোঽর্থো বিজানতো ব্রাহ্মণস্য যোঽর্থস্তাবানেব সংপদ্যতইতি সম্বন্ধঃ। তদেব স্পষ্টয়তি বিজ্ঞানেতি। তস্মিন্নন্তর্ভবতীতি শেষঃ। কথং কর্ম্মফলং জ্ঞানফলেঽন্তর্ভবতীত্যত্র প্রমাণমাহ

## স্বামিকৃত টীকা।

নন্বু বেদোক্তনানাফলত্যাগেন নিষ্কামতয়েশ্বরারাধনবিষয়া ব্যবসায়াত্মিকা বুদ্ধিঃ কুবুদ্ধিরেবেত্যাশঙ্ক্যাহ যাবানিতি। উদকং পীয়তে যস্মিংস্তদুদপানং বাপীকূপতড়াগাদি তস্মিন্ স্বল্পোদকে একত্র কৃৎস্নার্থস্যাসম্ভবাত্তত্র তত্র পরিভ্রমণেন বিভাগশো যাবান্ স্নানপানা-দিরর্থঃ প্রয়োজনং ভবতি তাবান্ সর্ব্বোঽপ্যর্থঃ সর্ব্বতঃ সংপ্লুতোদকে মহাহ্রদে একত্রৈব যথা ভবতি এবং যাবান্ সর্ব্বেষু বেদেষু তত্তৎকর্ম্মফলরূপোঽর্থস্তাবান্ সর্ব্বোঽপি বিজ্ঞান-

কর্ম্মণ্যেবাধিকারস্তে মা ফলেষু কদাচন।
মা কর্ম্ম ফলহেতুর্ভূর্মা তে সঙ্গোস্ত্বকর্ম্মণি ॥ ৪৭ ॥

## শাঙ্করভাষ্যম্

যৎ স বেদেতি শ্রুতেঃ, সর্ব্বং কর্ম্মাখিলমিতি চ বক্ষ্যতি তস্মাৎ প্রাক্ জ্ঞাননিষ্ঠাধিকার-প্রাপ্তেঃ কর্ম্মণ্যধিকৃতেন কূপতড়াগাদ্যর্থস্থানীয়মপি কর্ম্ম কর্ত্তব্যম্ ॥ ৪৬ ॥

তব চ কর্ম্মণীতি। কর্ম্মণ্যেবাধিকারো ন জ্ঞাননিষ্ঠায়াং তেন তব তত্রচ কর্ম্ম কুর্ব্বতো মা ফলেঽধিকারোঽস্তু কর্ম্মফলতৃষ্ণা মা ভূৎ কদাচন কস্যাঞ্চিদপ্যবস্থায়ামিত্যর্থঃ যদা কর্ম্মফলে তৃষ্ণা তে স্যাৎ তদা কর্ম্মফলপ্রাপ্তের্হেতুঃ স্যাঃ এবং মা কর্ম্মফলহেতুর্ভূঃ যদাহি কর্ম্মফল-

## গিরিকৃত টীকা।

সর্ব্বমিতি। যৎকিমপি প্রজাঃ সাধু কর্ম্ম কুর্ব্বন্তি তৎসর্ব্বং ন পুরুষোঽভিসমেতি প্রাপ্নোতি যঃ পুরুষস্তদ্বেদ বিজানাতি যদ্বস্তু সহৈক্যো বেদ তদ্বেদ্যমিতি শ্রুতেরর্থঃ। কর্ম্মফলস্য সগুণ-জ্ঞানফলেঽন্তর্ভাবঃ সংবর্গবিদ্যায়াং শ্রূয়তে কথমেতাবতা নির্গুণজ্ঞানফলে কর্ম্মফলান্ত-র্ভাবঃ সম্ভবতীত্যাশঙ্ক্যাহ সর্ব্বমিতি। তর্হি জ্ঞাননিষ্ঠৈব কর্ত্তব্যা তাবতৈব কর্ম্মফলস্য লব্ধ-তয়া কর্ম্মানুষ্ঠানানপেক্ষণাদিত্যাশঙ্ক্যাহ তস্মাদিতি। যোগমার্গস্য নিষ্ফলত্বাভাবস্তুচ্ছ-ব্দার্থঃ ॥ ৪৬ ॥

তর্হি পরম্পরয়া পুরুষার্থসাধনং যোগমার্গং পরিত্যজ্য সাক্ষাদেব পুরুষার্থকারণমাত্ম-জ্ঞানং তদর্থমুপদেষ্টব্যং তস্মৈ হি স্পৃহয়তি মনো মদীয়মিত্যাশঙ্ক্যাহ তব চেতি। তর্হি তৎ-ফলাভিলাষোঽপি স্যাদিতি নেত্যাহ মা ফলেষ্বিতি। পূর্ব্বোক্তমেবার্থং প্রপঞ্চয়তি মা কর্ম্মেতি। ফলাভিসন্ধ্যসম্ভবে কর্ম্মাকরণমেব শ্রদ্ধধ্যামীত্যাশঙ্ক্যাহ মা তইতি। জ্ঞানান-ধিকারিণোঽপি কর্ম্মত্যাগপ্রসক্তিং নিবারয়তি কর্ম্মণ্যেবেতি। কর্ম্মণ্যেবেত্যেবকারার্থ-মাহ ন জ্ঞানেতি। ন হি তত্রাব্রাহ্মণস্যাপরিপক্ককষায়স্য মুখ্যোঽধিকারঃ সিদ্ধতীত্যর্থঃ।

## স্বামিকৃত টীকা।

তোব্যবসায়াত্মিকাবুদ্ধিযুক্তস্য ব্রাহ্মণস্য ব্রহ্মনিষ্ঠস্য ভবত্যেব' ব্রহ্মানন্দে ক্ষুদ্রানন্দানামন্তর্ভা-বাৎ, এতস্যৈবানন্দস্যান্যানি ভূতানি মাত্রামুপজীবন্তীতিশ্রুতেঃ। তস্মাদিয়মেব বুদ্ধিঃ স্ববুদ্ধি-রিত্যর্থঃ ॥ ৪৬ ॥

তর্হি সর্ব্বাণি কর্ম্মফলানি পরমেশ্বরারাধনাদেব ভবিষ্যন্তীত্যভিসন্ধায় প্রবর্ত্তেত কিং কর্ম্মণেত্যাশঙ্ক্য তদ্বারয়ন্নাহ কর্ম্মণ্যেবেতি। তে তব তত্ত্বজ্ঞানার্থিনঃ কর্ম্মণ্যেবাধিকারস্তৎ-ফলেষু বন্ধহেতুষু অধিকারঃ কামো মাস্তু। নমু কর্ম্মণি কৃতে তৎফলং স্যাদেব ভোজনে কৃতে তৃপ্তিবদিত্যাশঙ্ক্যাহ মেতি। মা কর্ম্মফলহেতুর্ভূঃ কর্ম্মফলং প্রবৃত্তিহেতুর্যস্য স তথাভূতো

যোগস্থঃ কুরু কর্ম্মাণি সঙ্গং ত্যক্ত্বা ধনঞ্জয়।
সিদ্ধ্যসিদ্ধ্যোঃ সমো ভূত্বা সমত্বং যোগ উচ্যতে॥ ৪৮॥

## শাঙ্করভাষ্যম্।

তৃষ্ণাপ্রযুক্তঃ কর্ম্মণি প্রবর্ত্ততে তদা কর্ম্মফলস্যৈব জন্মনো হেতুর্ভবেৎ যদি কর্ম্মফলঃ নেষ্যতে কিংকর্ম্মণা দুঃখরূপেণেতি মা তে তব সঙ্গোঽস্ত্বকর্ম্মণ্যকরণে প্রীতির্মাভূৎ॥ ৪৭॥

যদি কর্ম্মফলপ্রযুক্তেন ন কর্ত্তব্যং কর্ম্ম কথং তর্হি কর্ত্তব্যমিত্যুচ্যতে যোগস্থেতি। যোগস্থঃ সন্ কুরু কর্ম্মাণি কেবলমীশ্বরার্থং তত্রাপীশ্বরো মে তুষ্যত্বিতি সঙ্গং ত্যক্ত্বা ধনঞ্জয় ফলতৃষ্ণাশূন্যেন ক্রিয়মাণে কর্ম্মণি সত্ত্বশুদ্ধিজা জ্ঞানপ্রাপ্তিলক্ষণা সিদ্ধিঃ তদ্বিপর্য্যয়জা অসিদ্ধিস্তয়োঃ সিদ্ধ্যসিদ্ধ্যোরপি সমস্তুল্যো ভূত্বা কুরু কর্ম্মাণি কোঽসৌ যোগো যত্রস্থঃ কর্ম্মাণি কুর্ব্বিত্যুক্তমিদমেব তৎ সিদ্ধ্যসিদ্ধ্যোঃ সমত্বং যোগউচ্যতে॥ ৪৮॥

## গিরিকৃত টীকা।

ফলৈস্তর্হি সম্বন্ধোদুর্ব্বারঃ স্যাদিত্যাহ তত্রেতি। কর্ম্মণ্যেবাধিকারে সতীতি সপ্তম্যর্থঃ। ফলেষ্বধিকারাভাবং স্ফোরয়তি কর্ম্মেতি। কর্ম্মানুষ্ঠানাৎ প্রাগূর্দ্ধং তৎকালে চেত্যেতৎ। কদাচনেতি বিবক্ষিতমিত্যাহ কস্যাঞ্চিদিতি। ফলাভিসন্ধানে দোষমাহ যদেতি। এবং কর্ম্মফলতৃষ্ণাদ্বারেণেত্যর্থঃ। কর্ম্মফলহেতুত্বংবিবৃণোতি যদাহীতি। তর্হি বিফলং ক্লেশাত্মকং কর্ম্ম ন কর্ত্তব্যমিতি শঙ্কামনুভাব্য দূষয়তি যদীত্যাদিনা। অকর্ম্মণি তে সঙ্গো মাভূদিত্যুক্তমেব স্পষ্টয়তি অকরণইতি॥ ৪৭॥

আসক্তিবকরণেন যুক্তা চেত্তর্হি ক্লেশাত্মকং কর্ম্ম কিমুদ্দিশ্য কর্ত্তব্যমিত্যাশঙ্কামনূদ্য শ্লোকান্তরমবতারযতি যদীত্যাদিনা। বক্ষ্যমাণযোগমুদ্দিশ্য তন্নিষ্ঠো ভূত্বা কর্ম্মাণি ক্লেশাত্মকান্যপি বিহিতত্বাদনুষ্ঠেয়ানীত্যাহ যোগস্থঃসন্নিতি। কর্ম্মানুষ্ঠানস্যোদ্দেশ্যং দর্শয়তি কেবলমিতি। ফলান্তরাপেক্ষামন্তরেণেশ্বরার্থং তৎপ্রসাদনার্থমনুষ্ঠানমিত্যর্থঃ। তর্হি ঈশ্বরসন্তোষোঽভিলাষগোচরীভূতো ভবিষ্যতি নেত্যাহ তত্রাপীতি। ঈশ্বরপ্রসাদনার্থে কর্ম্মানুষ্ঠানে স্থিতেঽপীত্যর্থঃ, সঙ্গং ত্যক্ত্বা কুর্ব্বিতি পূর্ব্বেণ সম্বন্ধঃ। আকাঙ্ক্ষিতং পূর-

## স্বামিকৃত টীকা।

মাভূঃ, কাম্যমানস্যৈব স্বর্গাদের্নিযোজ্যবিশেষণত্বেন ফলত্বাদকামিতং ফলং ন স্যাদিতি ভাবঃ, অতএব ফলং বন্ধকং ভবিষ্যতীতি তস্মাৎ ভয়াদকর্ম্মণি কর্ম্মাকরণেঽপি তব সঙ্গো নিষ্ঠাস্তু॥ ৪৭॥

কিং তর্হি যোগস্থইতি। যোগঃ পরমেশ্বরৈকপরতা তত্র স্থিতঃ কর্ম্মাণি কুরু, তথা সঙ্গং কর্তৃত্বাভিনিবেশং ত্যক্ত্বা কেবলমীশ্বরাশ্রয়েণৈব কুরু, তৎফলস্য জ্ঞানস্যাপি সিদ্ধ্য-

দূরেণ হ্যবরং কর্ম্ম বুদ্ধিযোগাদ্ধনঞ্জয় ।
বুদ্ধৌ শরণমন্বিচ্ছ কৃপণাঃ ফলহেতবঃ ॥ ৪৯ ॥

## শাঙ্করভাষ্যম্ ।

যৎ পুনঃ সমত্ববুদ্ধিযুক্তমীশ্বরারাধনার্থং কর্ম্মোক্তং এতস্মাৎ কর্ম্মণঃ দূরেণেতি । দূরেণাতিবিপ্রকর্ষেণ অত্যন্তমেব হ্যবরমধমং নিকৃষ্টং কর্ম্ম ফলার্থিনা ক্রিয়মাণং বুদ্ধিযোগাৎ সমত্ববুদ্ধিযুক্তাৎ কর্ম্মণো জন্মমরণাদিহেতুত্বাৎ হে ধনঞ্জয়, যতএবং ততঃ যোগবিষয়ায়াং বুদ্ধৌ তৎপরিপাকজায়াং বা সাংখ্যবুদ্ধৌ শরণমাশ্রয়মভয়প্রাপ্তিকারণমন্বিচ্ছ প্রার্থয়স্ব পরমার্থজ্ঞানশরণো ভবেত্যর্থঃ, যতোঽবরং কর্ম্ম কুর্ব্বাণাঃ কৃপণাঃ দীনাঃ ফলহেতবঃ ফলতৃষ্ণাপ্রযুক্তাঃ সন্তঃ যোবা এতদক্ষরং গার্গ্যবিদিত্বাস্মাল্লোকাৎ প্রৈতি স কৃপণ ইতি শ্রুতেঃ ॥ ৪৯ ॥

## গিরিকৃত টীকা ।

ন্নিত্বা সিদ্ধিশব্দার্থমাহ ফলেতি । তদ্বিপর্য্যয়জা সত্ত্বাশুদ্ধিজন্যা জ্ঞানাপ্রাপ্তিলক্ষণেতি যাবৎ । কর্ম্মানুতিষ্ঠতো যোগমুদ্দিশ্য শেষতয়া প্রকৃতমাকাঙ্ক্ষাপূর্ব্বকং প্রকটয়তি কোসাবিত্যাদিনা ॥ ৪৮ ॥

কিমিতি যোগস্থেন তত্ত্বজ্ঞানমুদ্দিশ্য কর্ম্ম কর্ত্তব্যং ফলাভিলাষেঽপি তদনুষ্ঠানস্য সুলভত্বাদিত্যাশঙ্ক্য যথোক্তযোগযুক্তং কর্ম্ম স্তুবন্ননন্তরশ্লোকমুত্থাপয়তি যৎ পুনরিতি । অবরংকর্ম্মবুদ্ধিসম্বন্ধবিরুদ্ধমিতিশেষঃ । বুদ্ধিযুক্তস্য বুদ্ধিযোগাধীনং প্রকর্ষং সূচয়তি বুদ্ধীতি । বুদ্ধিসম্বন্ধাসম্বন্ধাভ্যাং কর্ম্মণি প্রকর্ষনিকর্ষয়োর্ভাবে করণীয়ং নিবচ্ছতি বুদ্ধাবিতি । যত্তু ফলেচ্ছয়াপি কর্ম্মানুষ্ঠাং সুকরমিতি তত্রাহ কৃপণেতি । নিকৃষ্টং কর্ম্মৈব বিশিনষ্টি ফলার্থিনেতি । কস্মাৎ প্রতিযোগিনঃ সকাশাদিদং নিকৃষ্টমিত্যাশঙ্ক্য প্রতীকমুপাদায় ব্যাচষ্টে বুদ্ধীত্যাদিনা । ফলাভিলাষেণ ক্রিয়মাণস্য কর্ম্মণো নিকৃষ্টত্বে হেতুমাহ জন্মেতি । সমত্ববুদ্ধিযুক্তাৎ কর্ম্মণঃ তদ্ধীনস্য কর্ম্মণো জন্মাদিহেতুত্বেন নিকৃষ্টত্বে ফলিতমাহ যতইতি । যোগবিষয়া বুদ্ধিঃ সমত্ববুদ্ধিঃ । বুদ্ধিশব্দস্যার্থান্তরমাহ তৎপরিপাকেতি । তচ্ছব্দেন সমত্ববুদ্ধিসমন্বিতং কর্ম্ম গৃহ্যতে তস্য পরিপাকস্তৎফলভূতা বুদ্ধিশুদ্ধিঃ । শরণশব্দস্য পর্য্যায়ং গৃহীত্বা

## স্বামিকৃত টীকা ।

সিদ্ধ্যোঃ সমো ভূত্বা কেবলমীশ্বরার্পণেনৈব কুরু, যত এবম্ভূতং সমত্বমেব যোগউচ্যতে সচ্চিত্তসমাধানরূপত্বাৎ ॥ ৪৮ ॥

কাম্যন্তু-কর্ম্মাতিনিকৃষ্টমিত্যাহ দূরেণেতি । বুদ্ধ্যা ব্যবসায়াত্মিকয়া কৃতঃ কর্ম্মযোগো-বুদ্ধিযোগো বুদ্ধিসাধনভূতো বা তস্মাৎ সকাশাদন্যৎ সাধনভূতং কাম্যং কর্ম্ম দূরেণাবরমত্যন্তমপকৃষ্টং, হি যস্মাদেবং তস্মাদ্বুদ্ধৌ জ্ঞানে শরণমাশ্রয়ং কর্ম্মযোগমন্বিচ্ছ অনুতিষ্ঠ, যস্মা

বুদ্ধিযুক্তো জহাতীহ উভে সুকৃতদুষ্কৃতে।
তস্মাৎ যোগায় যুজ্যস্ব যোগঃ কর্ম্মসু কৌশলম্ ॥ ৫০ ॥

## শাঙ্করভাষ্যম্।

সমত্ববুদ্ধিযুক্তঃ সন্ স্বধর্ম্মমনুতিষ্ঠন্ যৎ ফলং প্রাপ্নোতি তচ্ছৃণু বুদ্ধীতি। বুদ্ধিযুক্তঃ সমত্বকর্ম্মবিষয়য়া বুদ্ধ্যা যুক্তো বুদ্ধিযুক্তঃ স জহাতি পরিত্যজতি ইহাস্মিন্ লোকে উভে সুকৃতদুষ্কৃতে পুণ্যপাপে সত্ত্বশুদ্ধিজ্ঞানপ্রাপ্তিদ্বারেণ যতঃ তস্মাৎ সমত্ববুদ্ধিযোগায় যুজ্যস্ব ঘটস্ব যোগো হি কর্ম্মসু কৌশলং স্বধর্ম্মাখ্যেষু কর্ম্মসু বর্ত্তমানস্য যা সিদ্ধ্যসিদ্ধ্যোঃ সমত্ববুদ্ধিরীশ্বরার্পিতচেতস্তয়া তৎ কৌশলং কুশলভাবস্তদ্ধি কৌশলং যদ্বন্ধনস্বভাবান্যপি কর্ম্মাণি সমত্ববুদ্ধ্যা স্বভাবাৎ নিবর্ত্তন্তে তস্মাৎ সমত্ববুদ্ধিযুক্তো ভব ত্বং ॥ ৫০ ॥

## গিরিকৃত টীকা।

বিবক্ষিতমর্থমাহ অভয়েতি। সপ্তমীমবিবক্ষিত্বা দ্বিতীয়ং পক্ষং গৃহীত্বা বাক্যার্থমাহ পরমার্থেতি। তথাবিধজ্ঞানশরণত্বে হেতুমাহ যতইতি। ফলহেতুত্বং বিবৃণোতি ফলেতি। তেন পরমার্থজ্ঞানশরণতৈব যুক্তেতি শেষঃ। পরমার্থজ্ঞানবহির্ম্মুখানাং কৃপণত্বে শ্রুতিং প্রমাণয়তি যো বাইতি। অস্থুলাদিবিশেষণমেতদিত্যুচ্যতে ॥ ৪৯ ॥

পূর্ব্বোক্তসমত্ববুদ্ধিযুক্তস্য স্বধর্ম্মানুষ্ঠানে প্রবৃত্তস্য কিং স্যাদিত্যাশঙ্ক্যাহ সমত্বেতি। বুদ্ধিযুক্তঃ স্বধর্ম্মাখ্যং কর্ম্মানুতিষ্ঠন্নিতিশেষঃ। বুদ্ধিযোগস্য ফলবত্বে ফলিতমাহ তস্মাদিতি। পূর্ব্বার্দ্ধং ব্যাচষ্টে বুদ্ধীত্যাদিনা। ননু সমত্ববুদ্ধিমাত্রান্ন পুণ্যপাপনিবৃত্তির্যুক্তা পরমার্থদর্শনবতস্তন্নিবৃত্তিপ্রসিদ্ধেরিতি তত্রাহ সত্বেতি। উত্তরার্দ্ধং ব্যাচষ্টে তস্মাদিতি। স্বধর্ম্মমনুতিষ্ঠতো যথোক্তযোগার্থং কিমর্থং মনো যোজনীয়মিত্যাশঙ্ক্যাহ যোগো হীতি। তর্হি যথোক্তযোগসামর্থ্যাদেব দর্শিতফলসিদ্ধেরনাস্থা স্বধর্ম্মানুষ্ঠানে প্রাপ্তেত্যাশঙ্ক্যাহ স্বধর্ম্মাখ্যেষিতি। ঈশ্বরার্পিতচেতস্তয়া কর্ম্মসু বর্ত্তমানস্যানুষ্ঠাননিষ্ঠস্য যা যথোক্তা বুদ্ধিস্তত্তেষু কৌশলমিতি যোজনা। কর্ম্মণাং বন্ধস্বভাবত্বাৎ তদনুষ্ঠানে বন্ধাবন্ধঃ স্যাদিত্যাশঙ্ক্য কৌশলমেব বিষদয়তি তদ্ধীতি। সমত্ববুদ্ধেরেবং ফলত্বে স্থিতে ফলিতমুপসংহরতি তস্মাদিতি ॥৫০॥

## স্বামিকৃত টীকা।

বুদ্ধৌ শরণং ত্রাতারমীশ্বরমাশ্রয়েত্যর্থঃ, ফলহেতবস্তু সকামাঃ নরাঃ কৃপণাঃ দীনাঃ, যোবা এতদক্ষরমবিদিত্বা গার্গ্যস্মাল্লোকাৎ প্রৈতি স কৃপণইতি শ্রুতেঃ ॥ ৪৯ ॥

বুদ্ধিযোগযুক্তস্য শ্রেষ্ঠইত্যাহ বুদ্ধিযুক্তইতি। সুকৃতং স্বর্গাদিপ্রাপকং দুষ্কৃতং নিরয়াদিপ্রাপকং তে উভে ইহৈব জন্মনি পরমেশ্বরপ্রসাদেন ত্যজতি তস্মাত্তদর্থায় কর্ম্মযোগায় যুজ্যস্ব ঘটস্ব যতঃ কর্ম্মসু যৎ কৌশলং বন্ধকানামপি তেষামীশ্বরারাধনেন মোক্ষপরত্বসম্পাদকচাতুর্য্যং স এব যোগঃ ॥ ৫০ ॥

কর্ম্মজং বুদ্ধিযুক্তাহি ফলং ত্যক্ত্বা মনীষিণঃ।
জন্মবন্ধবিনির্ম্মুক্তাঃ পদং গচ্ছন্ত্যনাময়ম্ ॥ ৫১ ॥

## শাঙ্করভাষ্যম্ ॥

যস্মাৎ কর্ম্মজমিতি। কর্ম্মজং ফলং ত্যক্ত্বেতি ব্যবহিতেন সম্বন্ধঃ ইষ্টানিষ্টদেহপ্রাপ্তিঃ কর্ম্মজং ফলং কর্ম্মেভ্যো জাতং বুদ্ধিযুক্তাঃ সমত্ববুদ্ধিযুক্তাঃ সন্তো হি যস্মাৎ ফলং ত্যক্ত্বা পরিত্যজ্য মনীষিণো জ্ঞানিনো ভূত্বা জন্মবন্ধবিনির্মুক্তাঃ জন্মৈব বন্ধো জন্মবন্ধস্তেন বিনির্মুক্তাঃ জীবন্তএব জন্মবন্ধাৎ বিনির্ম্মুক্তাঃ সন্তঃ পদং পরমং বিষ্ণোর্ম্মোক্ষাখ্যং গচ্ছন্ত্যনাময়ং সর্ব্বোপদ্রবরহিতমিত্যর্থঃ। অথ বা বুদ্ধিযোগাদ্ধনঞ্জয়েত্যারভ্য পরমার্থদর্শনলক্ষণৈব সর্ব্বতঃ সংপ্লুতোদকস্থানীয়া কর্ম্মযোগজা সত্ত্বশুদ্ধির্দ্দর্শিতা সাক্ষাৎ সুকৃতদুষ্কৃতপ্রহাণাদিহেতুত্বশ্রবণাৎ ॥ ৫১ ॥

## গিরিকৃত টীকা।

সমত্ববুদ্ধিযুক্তস্য সুকৃতদুষ্কৃততৎফলপরিত্যাগেঽপি কথং মোক্ষঃ স্যাদিত্যাশঙ্ক্যাহ যস্মাদিতি সমত্ববুদ্ধ্যা যস্মাৎ কর্ম্মানুষ্ঠীযমানং দুরিতাদি ত্যজয়তি তস্মাৎ পরম্পরয়াঽসৌ মুক্তিহেতুরিত্যর্থঃ। মনীষিণোঽপি জ্ঞানাতিশযবন্তো বুদ্ধিযুক্তাঃ সন্তঃ স্বধর্ম্মাখ্যং কর্ম্মানুতিষ্ঠন্তস্ততো জাতং ফলং দেহপ্রদং তে হিত্বা জন্মলক্ষণা বন্ধাদ্বিনির্ম্মুক্তা- বৈষ্ণবং পদং সর্ব্বসংসারসংস্পর্শশূন্যং প্রাপ্নুবন্তীতি শ্লোকোক্তমর্থং শ্লোকযোজনয়া দর্শয়তি কর্ম্মজমিত্যাদিনা। ইষ্টো দেহো দেবাদিলক্ষণোঽনিষ্টোদেহস্তির্য্যগাদিলক্ষণস্তৎ- প্রাপ্তিরেব কর্ম্মণো জাতং ফলং তদ্যথোক্তং বুদ্ধিযুক্তা জ্ঞানিনো ভূত্বা তদ্বলাদেব পরিত্যজ্য বন্ধবিনির্ম্মুক্তিপূর্ব্বকং জীবন্মুক্তাঃ সন্তো বিদেহকৈবল্যভাজো ভবন্তীত্যর্থঃ। বুদ্ধিযোগাদিত্যাদৌ বুদ্ধিশব্দস্য সমত্ববুদ্ধিরর্থো ব্যাখ্যাতঃ সম্প্রতি পরম্পরাং পরিহৃত্য সুকৃতদুষ্কৃতপ্রহাণহেতুত্বস্য সমত্ববুদ্ধাবসিদ্ধেঃ বুদ্ধিশব্দস্য যোগ্যমর্থান্তরং কথয়তি অথবেতি। অনবচ্ছিন্নবস্তুগোচরত্বেনানবচ্ছিন্নত্বং তস্যাঃ সূচয়ন্ বুদ্ধ্যন্তরাদ্বিশেষং দর্শয়তি সর্ব্বতইতি। অসাধারণং নিমিত্তং তস্যানির্দ্দিশতি কর্ম্মেতি। যথোক্তবুদ্ধিশব্দার্থত্বে হেতুমাহ সাক্ষাদিতি। জন্মবন্ধবিনির্মোকাদিবাদিশব্দার্থঃ ॥ ৫১ ॥

## স্বামিকৃত টীকা।

কর্ম্মণাং মোক্ষসাধনত্বপ্রকারমাহ কর্ম্মজমিতি। কর্ম্মজং ফলং ত্যক্ত্বা কেবলমীশ্বরারাধনার্থং কর্ম্ম কুর্ব্বাণা মনীষিণো জ্ঞানিনো ভূত্বা জন্মরূপেণ বন্ধেন বিনির্মুক্তাঃ সন্তোঽনাময়ং সর্ব্বোপদ্রবরহিতং বিষ্ণোঃ পদং মোক্ষাখ্যং গচ্ছন্তি ॥ ৫১ ॥

যদা তে মোহকলিলং বুদ্ধির্ব্ব্যতিতরিষ্যতি।
তদা গন্তাসি নির্ব্বেদং শ্রোতব্যস্য শ্রুতস্য চ ॥ ৫২ ॥

## শাঙ্করভাষ্যম্।

যোগানুষ্ঠানজনিতসত্ত্বশুদ্ধিজা বুদ্ধিঃ কদা প্রাপ্যতে ইত্যুচ্যতে যদেতি। যদা যস্মিন্ কালে তে তব মোহকলিলং মোহাত্মকমবিবেকরূপং কালুষ্যং যেনাত্মবিবেকবোধং কলুষীকৃত্য বিষয়ং প্রত্যন্তঃকরণং প্রবর্ত্ততে তত্তে তব বুদ্ধির্ব্ব্যতিতরিষ্যতি ব্যতিক্রমিষ্যতি অতিশুদ্ধভাবমাপৎস্যতইত্যর্থঃ, তদা তস্মিন্ কালে প্রাপ্স্যসি নির্ব্বেদং বৈরাগ্যং শ্রোতব্যস্য শ্রুতস্য চ, তদা শ্রোতব্যং শ্রুতঞ্চ তে নিষ্ফলং প্রতিপদ্যতইত্যভিপ্রায়ঃ ॥ ৫২ ॥

## গিরিকৃত টীকা।

যস্মিন্ কর্ম্মণি ক্রিয়মাণে পরমার্থলক্ষণা বুদ্ধিরুদ্দেশ্যতয়া যুজ্যতে তস্মাৎ কর্ম্মণঃ সকাশাৎ ইতরৎকর্ম্ম তথাবিধোদ্দেশ্যভূতবুদ্ধিসম্বন্ধবিধুরমতিশয়েন নিকৃষ্যতে ততশ্চ পরমার্থবুদ্ধিমুদ্দেশ্যত্বেনাশ্রিত্য কর্ম্মানুষ্ঠাতব্যং পরিচ্ছিন্নফলান্তরমুদ্দিশ্য তদনুষ্ঠানে কার্পণ্যপ্রসঙ্গাৎ, কিঞ্চ পরমার্থবুদ্ধিমুদ্দেশ্যতামাশ্রিত্য কর্ম্মানুতিষ্ঠতঃ করণশুদ্ধিদ্বারা পরমার্থদর্শনসিদ্ধৌ জীবত্যেব দেহে সুকৃতাদি হিত্বা মোক্ষমধিগচ্ছতি তথা চ পরমার্থদর্শনলক্ষণযোগার্থং মনো ধারয়িতব্যং যোগশব্দিতং পরমার্থদর্শনমুদ্দেশ্যতয়া কর্ম্মস্বনুনিষ্ঠতো নৈপুণ্যমিষ্যতে যদি চ পরমার্থদর্শনমুদ্দিশ্য তদ্যুতাঃ সন্তঃ সমাবভেরন্ কর্ম্মাণি তদা তদনুষ্ঠানজনিতবুদ্ধিশুদ্ধ্যা জ্ঞানিনো ভূত্বা কর্ম্মজং ফলং পরিত্যজ্য নির্ম্মুক্তবন্ধনা মুক্তিভাজোভবন্তীত্যেবমস্মিন্ পক্ষে শ্লোকত্রয়াক্ষরাণি ব্যাখ্যাতব্যানি। যথোক্তবুদ্ধিপ্রাপ্তকালং প্রশ্নপূর্ব্বকং প্রকটয়তি যোগেতি। শ্রুতং শ্রোতব্যং দৃষ্টং দ্রষ্টব্যমিত্যাদৌ ফলাভিলাষপ্রতিবন্ধান্নোক্তা বুদ্ধিরুদেষ্যতীত্যাশঙ্ক্যাহ যদেতি। বিবেকপরিপাকাবস্থা কালশব্দেনোচ্যতে। কালুষ্যস্য দোষপর্য্যবসায়িত্বং দর্শয়ন্ বিশিনষ্টি যেনেতি। তদনর্থরূপং কালুষ্যং তবেত্যন্বয়ার্থং পুনর্ব্বচনং। বুদ্ধিশুদ্ধিফলস্য বিবেকস্য প্রাপ্ত্যা বৈরাগ্যপ্রাপ্তিং দর্শয়তি তদেতি। অধ্যাত্মশাস্ত্রাতিরিক্তং শাস্ত্রং শ্রোতব্যাদিশব্দেন গৃহ্যতে। উক্তং বৈরাগ্যমেব স্ফোরয়তি শ্রোতব্যমিতি। যথোক্তবিবেকসিদ্ধৌ সর্ব্বস্মিন্ননাত্মবিষয়ে নৈষ্ফল্যং প্রতিভাতীত্যর্থঃ ॥ ৫২ ॥

## স্বামিকৃত টীকা।

কদাহং তৎপদং প্রাপ্স্যামীত্যপেক্ষায়ামাহ যদেতি দ্বাভ্যাং। মোহো দেহাদিষ্বাত্মবুদ্ধিস্তদেব কলিলং গহনং, কলিলং গহনং বিদুরিত্যভিধানকোষস্মৃতেঃ, ততশ্চায়মর্থঃ, এবং পরমেশ্বরারাধনে ক্রিয়মাণে যদা তৎপ্রসাদেন তব বুদ্ধির্দেহাভিমানলক্ষণং মোহময়ং গহনং দুর্গং বিশেষেণাতিতরিষ্যতি, তদা শ্রোতব্যস্য শ্রুতস্য চার্থস্য নির্ব্বেদং বৈরাগ্যং গন্তাসি প্রাপ্স্যসি তয়োরনুপাদেয়ত্বেন জিজ্ঞাসাং ন করিষ্যসীত্যর্থঃ ॥ ৫২ ॥

শ্রুতিবিপ্রতিপন্না তে যদা স্থাস্যতি নিশ্চলা।
সমাধাবচলা বুদ্ধিস্তদা যোগমবাপ্স্যসি ॥ ৫৩ ॥
অর্জ্জুনউবাচ—স্থিতপ্রজ্ঞস্য কা ভাষা সমাধিস্থস্য কেশব।
স্থিতধীঃ কিং প্রভাষেত কিমাসীত ব্রজেত কিম্ ॥ ৫৪ ॥

## শাঙ্করভাষ্যম্।

মোহকলিলাত্যয়দ্বারেণ লব্ধাত্মবিবেকজপ্রজ্ঞঃ কদা কর্ম্মযোগজং ফলং পরমার্থযোগমবাপ্স্যামীতি চেৎ তচ্ছৃণু শ্রুতিবিপ্রতিপন্নেতি। শ্রুতিবিপ্রতিপন্না অনেকসাধ্যসাধনসম্বন্ধপ্রকাশণশ্রুতিভিঃ শ্রবণৈর্ব্বিপ্রতিপন্না নানাত্বপ্রতিপন্না অধ্যাত্মশাস্ত্রাতিরিক্তশাস্ত্রস্তেত্যর্থঃ, শ্রুতিবিপ্রতিপন্না বিক্ষিপ্তা সতী তে তব বুদ্ধির্যদা যস্মিন্ কালে স্থাস্যতি স্থিরীভূতা ভবিষ্যতি নিশ্চলা বিক্ষেপচলনবর্জ্জিতা সতী সমাধৌ সমাধীয়তে চিত্তমস্মিন্নিতি সমাধিরাত্মা তস্মিন্নাত্মনীত্যেতদচলা তত্রাপি বিকল্পবর্জ্জিতৈতদ্বুদ্ধিরন্তঃকরণং, তদা তস্মিন্ কালে যোগমবাপ্স্যসি বিবেকপ্রজ্ঞাং সমাধিং প্রাপ্স্যসি ॥ ৫৩ ॥

প্রশ্নবীজং প্রতিলভ্যার্জ্জুন উবাচ লব্ধসমাধিপ্রজ্ঞস্য লক্ষণবুভুৎসয়া, স্থিতপ্রজ্ঞস্যেতি। স্থিতপ্রজ্ঞস্য স্থিতা প্রতিষ্ঠিতাহমস্মি পবং ব্রহ্মেতি প্রজ্ঞা যস্য স স্থিতপ্রজ্ঞস্তস্য স্থিতপ্রজ্ঞস্য

## গিরিকৃত টীকা।

বুদ্ধিশুদ্ধিবিবেকবৈরাগ্যসিদ্ধাবপি পূর্ব্বোক্তবুদ্ধিপ্রাপ্তিকালো দর্শিতো ন ভবতীতি শঙ্কতে মোহেতি। প্রাগুক্তবিবেকাদিযুক্তবুদ্ধেরাত্মনি স্থৈর্য্যাবস্থায়াং প্রকৃতবুদ্ধিসিদ্ধিরিত্যাহ তৎশৃণ্বিতি। পৃষ্টং কালবিশেষাখ্যং বস্তু তচ্ছব্দেন গৃহ্যতে, বুদ্ধেঃ শ্রুতিবিপ্রতিপন্নত্বং বিবদয়তি অনেকেতি। নানাশ্রুতিবিপ্রতিপন্নত্বমেবসংক্ষিপতি বিক্ষিপ্তেতি। উক্তং হেতুদ্বয়মনূদ্য বৈরাগ্যপরিপাবস্থা কালশব্দার্থঃ, নৈশ্চল্যং বিক্ষেপরাহিত্যং, অচলত্বং বিকল্পশূন্যত্বং, বিক্ষেপো বিপর্য্যয়ো বিকল্পঃ সংশয়ইতি বিবেকঃ, বিবেকদ্বারা জাতা প্রজ্ঞা প্রাগুক্তা বুদ্ধিঃ সমাধিস্তত্রৈব নিষ্ঠা ॥ ৫৩ ॥

সন্ন্যাসিনো জ্ঞাননিষ্ঠা তৎপ্রাপ্তিবচনং প্রশ্নবীজং পৃচ্ছতোর্জ্জুনস্যাভিপ্রায়মাহ লব্ধেতি

## স্বামিকৃত টীকা।

ততশ্চ শ্রুতীতি। শ্রুতিভির্নানালৌকিকবৈদিকার্থশ্রবণৈর্বিপ্রতিপন্না ইতঃপূর্ব্বং বিক্ষিপ্তা সতী তব বুদ্ধির্যদা সমাধৌ স্থাস্যতি, সমাধীয়তে চিত্তমস্মিন্নিতি সমাধিঃ পরমেশ্বরস্তস্মিন্নিশ্চলা বিষয়ান্তরৈরনাকৃষ্টা অতএবাচলা অভ্যাসপাটবেন তত্রৈব স্থিরা চ সতী তদা যোগং যোগফলং তত্ত্বজ্ঞানমবাপ্স্যসি ॥ ৫৩ ॥

পূর্ব্বশ্লোকোক্তস্যাত্মতত্ত্বজ্ঞস্য লক্ষণং জিজ্ঞাসুরর্জ্জুন উবাচ স্থিতপ্রজ্ঞস্য কা ভাষেতি।

শ্রীভগবানুবাচ—প্রজহাতি যদা কামান্ সর্ব্বান্ পার্থ মনোগতান্।
আত্মন্যেবাত্মনা তুষ্টঃ স্থিতপ্রজ্ঞস্তদোচ্যতে ॥ ৫৫ ॥

## শাঙ্করভাষ্যম্।

কা ভাষা কিম্ ভাষণং বচনং কথমসৌ পরৈর্ভাষ্যতে সমাধিস্থস্য সমাধৌ স্থিতস্য কেশব স্থিতধীঃ স্থিতপ্রজ্ঞশ্চ স্বয়ং বা কিং প্রভাষেত কিমাসীত ব্রজেত কিং কিম্ভাষণং ব্রজনং বা তস্য কিং কথমিত্যর্থঃ ॥৫৪ ॥

স্থিতপ্রজ্ঞস্য লক্ষণমনেন শ্লোকেন পৃচ্ছতি, যো হ্যাদিতএব সন্ন্যস্য কর্ম্মাণি জ্ঞানযোগ-নিষ্ঠায়াং প্রবৃত্তো যশ্চ কর্ম্মযোগেন তয়োঃ স্থিতপ্রজ্ঞস্যেতি, প্রজহাতীত্যারভ্যাধ্যায়পরি-সমাপ্তিপর্য্যন্তং স্থিতপ্রজ্ঞলক্ষণং সাধনঞ্চোপদিশ্যতে সর্ব্বত্রৈব হ্যধ্যাত্মশাস্ত্রে কৃতার্থলক্ষণানি যানি তান্যেব সাধনান্যুপদিশ্যন্তে যত্নসাধ্যত্বাৎ যানি যত্নসাধ্যানি সাধনানি লক্ষণানি

## গিরিকৃত টীকা।

লব্ধা সমাধাধাত্মনি সমাধানেন বা প্রজ্ঞা পরমার্থদর্শনলক্ষণা যেন তস্যেতি যাবৎ। নন্থ তস্য ভাষা তৎকার্য্যানুরোধিনী ভবিষ্যতি কিমিত্যসৌ বিজিজ্ঞাস্যতে তত্রাহ কথমিতি। জ্ঞাননিষ্ঠস্য লক্ষণবিবক্ষয়া প্রশ্নমবতারয়ন্ তন্নিষ্ঠাসাধনবুভুৎসয়া বিশিনষ্টি সমাধিস্থস্যেতি। তস্যৈবার্থক্রিয়াং পৃচ্ছতি স্থিতধীরিতি ॥ ৫৪ ॥

প্রশ্নাক্ষরাণি ব্যাখ্যায় বাক্যার্থমাহ স্থিতপ্রজ্ঞস্যেতি। প্রতিবচনমবতারয়িতুং প্রাতনিকাং করোতি যো হীতি। হিশব্দেন কর্ম্মসন্ন্যাসকারণীভূতবিরাগতাসম্পত্তিঃ সূচ্যতে, আদিতো-ব্রহ্মচর্য্যাবস্থায়ামিতি যাবৎ, জ্ঞানমেব যোগো ব্রহ্মাত্মভাবপ্রাপকত্বাত্তন্নিষ্ঠা পরিসমাপ্তি-স্তস্যামিত্যর্থঃ, কর্ম্মৈব যোগস্তেন কর্ম্মাণ্যসন্ন্যস্য তন্নিষ্ঠায়ামেব প্রবৃত্তইতি শেষঃ। নন্থ তৎ-কথমেকেন বাক্যেনার্থদ্বয়মুপদিশ্যতে দ্বৈধার্থে বাক্যভেদান্ন চ লক্ষণমেব সাধনং কৃতার্থলক্ষ-ণস্য তৎস্বরূপত্বেন ফলত্বে সাধনত্বানুপপত্তেরিতি তত্রাহ সর্ব্বত্রৈবেতি। যদ্যপি প্রকৃতার্থস্য জ্ঞানিনো জ্ঞানফলণং তদ্রূপেণ ফলত্বান্ন সাধনত্বমধিগচ্ছতি তথাপি জিজ্ঞাসোস্তদেব প্রযত্ন-সাধ্যতয়া সাধনং সম্পদ্যতে লক্ষণঞ্চাত্র জ্ঞানসামর্থ্যলব্ধমনূদ্যতে ন বিধীয়তে বিদুষো বিধি-নিষেধাগোচরত্বাত্তেন জিজ্ঞাসোঃ সাধনানুষ্ঠানায় লক্ষণানুবাদাদেকস্মিন্নেব সাধনানুষ্ঠানে

## স্বামিকৃতটীকা।

স্বাভাবিকে সমাধৌ স্থিতস্য অতএব স্থিতা নিশ্চলা প্রজ্ঞা বুদ্ধির্যস্য তস্য ভাষা কা, ভাষ্যতে অনয়েতি ভাষালক্ষণমিতি যাবৎ, স কেন লক্ষণেন স্থিতপ্রজ্ঞউচ্যত ইত্যর্থঃ, তথা স্থিতধীঃ কিং কথং ভাষণমাসনং ব্রজনঞ্চ কুর্য্যাদিত্যর্থঃ ॥ ৫৪ ॥

অত্র চ যানি সাধকস্য জ্ঞানসাধনানি তান্যেব স্বাভাবিকানি সিদ্ধস্য লক্ষণানি অতঃ সিদ্ধস্য লক্ষস্য লক্ষণানি কথয়ন্নেবান্তরঙ্গানি জ্ঞানসাধনান্যাহ যাবদধ্যায়সমাপ্তি, তত্র

দুঃখেষ্বনুদ্বিগ্নমনাঃ সুখেষু বিগতস্পৃহঃ।
বীতরাগভয়ক্রোধঃ স্থিতধীর্ম্মুনিরুচ্যতে ॥ ৫৬ ॥

## শাঙ্করভাষ্যম্।

ভবন্তি তানি শ্রীভগবানুবাচ, প্রজহাতীতি। প্রজহাতি প্রকর্ষেণ জহাতি পরিত্যজতি যদা যস্মিন্ কালে সর্ব্বান্ সমস্তান্ কামান্ ইচ্ছাভেদান্ হে পার্থ মনোগতান্ মনসি প্রবিষ্টান্ হৃদি প্রবিষ্টান্ সর্ব্বকামপরিত্যাগে তুষ্টিকারণাভাবাচ্ছরীরধারণনিমিত্তশেষে চ সত্যুন্মত্তপ্রমত্তস্যেব প্রবৃত্তিঃ প্রাপ্তেত্যতউচ্যতে আত্মনি এব প্রত্যাগাত্মস্বরূপ এবাত্মনা স্বেনৈব বাহ্যলাভনিরপেক্ষস্তুষ্টঃ পরমার্থদর্শনামৃতরসলাভেনান্যস্মাদলং প্রত্যয়বান্ স্থিতপ্রজ্ঞঃ স্থিত প্রতিষ্ঠিতাত্মানাত্মবিবেকজা প্রজ্ঞা যস্য স স্থিতপ্রজ্ঞো বিদ্বাংস্তদোচ্যতে ত্যক্তপুত্রবিত্তলোকৈষণঃ সন্ন্যাসী আত্মারামঃ আত্মক্রীড়ঃ স্থিতপ্রজ্ঞইত্যর্থঃ ॥ ৫৫ ॥

## গিরিকৃত টীকা।

তাৎপর্য্যমিত্যর্থঃ। উক্তেঽর্থে ভগবদ্বাক্যমুত্থাপয়তি যানীতি। লক্ষণানি চ জ্ঞানসামর্থ্যলভ্যান্যযত্নসাধ্যানীতি শেষঃ। স্থিতপ্রজ্ঞস্য কা ভাষেতি প্রথমপ্রশ্নস্যোত্তরমাহ প্রজহাতীতি। কামত্যাগস্য প্রকর্ষো বাসনারাহিত্যং কামাত্মনিষ্ঠত্বং কৈশ্চিদিষ্যতে তদযুক্তং তেষাং মনো নিষ্ঠত্বশ্রুতেরিত্যাশয়বানাহ মনোগতানিতি। আত্মন্যেবাত্মনেত্যাদ্যুত্তরভাগনিরস্যশঙ্কোদ্যমনুবদতি সর্ব্বকামেতি। তর্হি প্রবর্ত্তকাভাবাদ্বিদুষঃ সর্ব্বপ্রবৃত্তেরুপশান্তিরিতি নেত্যাহ শরীরেতি। উন্মাদবানুন্মত্তো বিবেকবিরহিতবুদ্ধিভ্রমভাগী প্রকর্ষেণ মদমনুভবন্ বিদ্যমানমপি বিবেকং নিরসযন্ ভ্রান্তবদ্ব্যবহরন্ প্রমত্তইতিবিভাগঃ। উত্তরার্দ্ধমবতার্য্য ব্যাকরোতি উচ্যতইতি। আত্মন্যেবেত্যেবকারস্যাত্মনেত্যত্রাপি সম্বন্ধং দ্যোতয়তি স্বেনৈবেতি। বাহ্যলাভনিরপেক্ষত্বেন তুষ্টিমেব স্পষ্টয়তি পরমার্থেতি। স্থিতপ্রজ্ঞপদং বিভজতে স্থিতেতি। প্রজ্ঞাপ্রতিবন্ধকসর্ব্বকামবিরামাবস্থা তদেতি নির্দ্দিশ্যতে। উক্তমেব প্রপঞ্চয়তি ত্যক্তেতি। আত্মানং জিজ্ঞাসমানো বৈরাগ্যদ্বারা সর্ব্বৈষণাত্যাগাত্মকং সন্ন্যাসমাসাদ্য শ্রবণাদ্যাবৃত্ত্যা তজ্জ্ঞানং প্রাপ্য তস্মিন্নেবাসক্ত্যা বিষয়বৈমুখ্যেন তৎফলভূতাং পরিতুষ্টিং তত্রৈব প্রতিলভমানঃ স্থিতপ্রজ্ঞব্যপদেশভাগীত্যর্থঃ ॥ ৫৫ ॥

## স্বামিকৃত টীকা।

প্রথমপ্রশ্নস্যোত্তরমাহ প্রজহাতীতি দ্বাভ্যাং। মনসি স্থিতান্ কামান্ যদা প্রকর্ষেণ জহাতি। ত্যাগে হেতুমাহ আত্মনীতি। আত্মন্যেব স্বস্মিন্নেব পরমানন্দস্বরূপ আত্মনা স্বয়মেব তুষ্ট ইত্যাত্মারামঃ সন্ যদা ক্ষুদ্রবিষয়াভিলাষাংস্ত্যজতি তদা তেন লক্ষণেন মুনিঃ স্থিতপ্রজ্ঞউচ্যতে ॥ ৫৫ ॥

যঃ সর্ব্বত্রানভিস্নেহস্তত্তৎ প্রাপ্য শুভাশুভম্।
নাভিনন্দতি ন দ্বেষ্টি তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ৫৭ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ দুঃখেষ্বিতি। দুঃখেষ্বাধ্যাত্মিকাদিষু প্রাপ্তেষু নোদ্বিগ্নং ন প্রক্ষুভিতং দুঃখপ্রাপ্তৌ মনো যস্য সোঽয়মনুদ্বিগ্নমনাঃ তথা সুখেষু প্রাপ্তেষু বিগতা স্পৃহা তৃষ্ণা যস্য নাগ্নিরিবেন্ধনাদ্যাধানে সুখান্যনুবর্দ্ধতে স বিগতস্পৃহঃ বীতরাগভয়ক্রোধঃ রাগশ্চ ভয়ঞ্চ ক্রোধশ্চ রাগভয়ক্রোধাঃ বীতাঃ বিগতাঃ রাগভয়ক্রোধাঃ যস্মাৎ স বীতরাগভয়ক্রোধঃ স্থিতধীঃ স্থিতপ্রজ্ঞো মুনিঃ সন্ন্যাসী তদোচ্যতে ॥ ৫৬ ॥

## গিরিকৃত টীকা।

লক্ষণভেদানুবাদদ্বারা বিবিদিষোরেব কর্ত্তব্যান্তরমুপদিশতি কিঞ্চেতি। জ্বরশিরোরোগাদিকৃতানি দুঃখান্যাধ্যাত্মিকানি আদিশব্দেনাধিভৌতিকানি ব্যাঘ্রসর্পাদিপ্রযুক্তান্যাধিদৈবিকানি চাতিবাতবর্ষাদিনিমিত্তানি দুঃখানি গৃহ্যন্তে, তেষূপলব্ধেষপি নোদ্বিগ্নং মনো যস্য স তথেতি সম্বন্ধঃ। নোদ্বিগ্নমিত্যেতদ্ব্যাচষ্টে ন প্রক্ষুভিতমিতি। দুঃখানামুক্তানাং প্রাপ্তৌ পরিহারাক্ষমস্য তদনুভবপরিভাবিতং দুঃখমুদ্বেগস্তেন সহিতং মনো যস্য ন ভবতি স তথেত্যাহ দুঃখপ্রাপ্তাবিতি। মনো যস্য নোদ্বিগ্নমিতি পূর্ব্বেণ সম্বন্ধঃ সুখান্যপি দুঃখবৎ ত্রিবিধানীতি মত্বা তথেত্যুক্তং; তেষু প্রাপ্তেষু সৎসু তেভ্যো বিগতা স্পৃহা তৃষ্ণা যস্য স বিগতস্পৃহইতি যোজনা। অজ্ঞস্য হি প্রাপ্তানি সুখান্যনুবিবর্দ্ধতে তৃষ্ণাবিদুষস্তু নৈবমিত্যত্র বৈধর্ম্ম্যদৃষ্টান্তমাহ নাগ্নিরিবেতি। যথা হি দাহ্যস্যেন্ধনাদেরভ্যাধানে বহ্নির্বিবর্দ্ধতে যথাজ্ঞস্য সুখান্যুপগতান্যনুবিবর্দ্ধমানাপি তৃষ্ণা বিদুষো ন তান্যনুবিবর্দ্ধতে ন হি বহ্নিরদাহ্যমুপগতমপি দগ্ধুং বিবৃদ্ধিমধিগচ্ছতি তেন জিজ্ঞাসুনা সুখদুঃখযোস্তৃষ্ণোদ্বেগৌ ন কর্ত্তব্যাবিত্যর্থঃ। রাগাদয়স্তু তেন কর্ত্তব্যা ন ভবন্তীত্যাহ বীতেতি। অনুভূতাভিনিবেশে বিষয়েষু রঞ্জনাত্মকতৃষ্ণাভেদো রাগঃ, পরেণাপকৃতস্য গাত্রনেত্রাদিবিকারকারণং ভয়ং, ক্রোধস্তু পরবশীকৃত্যাত্মানং স্বপরাপকারপ্রবৃত্তিহেতুর্ব্বুদ্ধিবৃত্তিবিশেষঃ। নন্বু তে ইতি মুনিরাত্মবিদিত্যঙ্গীকৃত্যাহ সন্ন্যাসীতি। সুখদুঃখাদিবিষয়তৃষ্ণাদেরাগাদেশ্চাভাবাবস্থা তদেত্যুচ্যতে ॥ ৫৬ ॥

## স্বামিকৃত টীকা।

কিঞ্চ দুঃখেষ্বিতি। দুঃখেষু প্রাপ্তেষ্বপি অনুদ্বিগ্নমক্ষুভিতং মনো যস্য সঃ' সুখেষু বিগতা স্পৃহা যস্য সঃ। তত্র হেতুর্বীতাঃ অপগতাঃ রাগভয়ক্রোধাঃ যস্মাৎ, তত্র রাগঃ প্রীতিঃ, স মুনিঃ স্থিতধীরুচ্যতে ॥ ৫৬ ॥

যদা সংহরতে চায়ং কূর্ম্মোঽঙ্গানীব সর্ব্বশঃ।
ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যস্তস্য প্রজ্ঞা প্রতিষ্ঠিতা॥৫৮॥

## শাঙ্করভাষ্যম্।

কিঞ্চ যঃ সর্ব্বত্রেতি। যো মুনিঃ সর্ব্বত্র দেহজীবিতাদিষপ্যনভিস্নেহঃ স্নেহবর্জ্জিতঃ তত্তৎ প্রাপ্য শুভাশুভং তত্তচ্ছুভমশুভং বা লব্ধা নাভিনন্দতি ন দ্বেষ্টি শুভং প্রাপ্য ন তুষ্যতি ন হৃষ্যত্যশুভঞ্চ প্রাপ্য ন দ্বেষ্টি ইত্যর্থঃ, তস্যৈবং হর্ষবিষাদবর্জ্জিতস্য বিবেকজা প্রজ্ঞা প্রতিষ্ঠিতা ভবতি॥ ৫৭॥

কিঞ্চ যদা সংহরত ইতি। যদা সংহরতে সম্যক্ উপসংহরতে চায়ং জ্ঞাননিষ্ঠায়াং প্রবৃত্তো যতিঃ কূর্ম্মোঽঙ্গানীব সর্ব্বশঃ যথা কূর্ম্মো ভয়াৎ স্বান্যঙ্গান্যুপসংহরতি সর্ব্বতঃ এবং জ্ঞাননিষ্ঠ ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যঃ সর্ব্ববিষয়েভ্যঃ উপসংহরতে তস্য প্রজ্ঞা প্রতিষ্ঠিতেত্যুক্তার্থং বাক্যম্॥ ৫৮॥

## গিরিকৃত টীকা।

লক্ষণভেদানুবাদদ্বারা বিবিদিষোরেব কর্ত্তব্যান্তমুপদিশতি কিঞ্চেতি। বিবেকবতো বিদুষো বিবেকজন্যা প্রজ্ঞা কথং প্রতিষ্ঠাং প্রতিপদ্যতামিত্যাশঙ্ক্যাহ যঃ সর্ব্বত্রেতি। ননু দেহজীবনাদৌ স্পৃহা শুভাশুভপ্রাপ্তৌ হর্ষবিষাদৌ বিদুষো বিবিদিষোশ্চাবর্জ্জনীয়ৌ ইতি প্রজ্ঞাস্থৈর্য্যাসিদ্ধিস্তত্রাহ যো মুনিরিতি। তত্তদিতি শোভনত্বেনাশোভনত্বেন বা প্রসিদ্ধত্বং প্রতিনির্দ্দিশ্যতে। তদেব বিভজতে শুভমিতি। বিষয়েষভিষঙ্গাভাবঃ শুভাদিপ্রাপ্তৌ হর্ষাদ্যভাবশ্চ প্রজ্ঞাস্থৈর্য্যে কারণমিত্যাহ তস্যেতি॥ ৫৭॥

জিজ্ঞাসোরেব কর্ত্তব্যান্তরং সূচয়তি কিঞ্চেতি। ইন্দ্রিয়াণাং বিষয়েভ্যো বৈমুখস্য প্রজ্ঞাস্থৈর্য্যকারণত্বাদাদৌ জিজ্ঞাসুনা তদনুষ্ঠেয়মিত্যাহ যদেতি। মুমুক্ষুণা মোক্ষহেতুং প্রাজ্ঞাং প্রার্থয়মানেন সর্ব্বেভ্যো বিষয়েভ্যঃ সর্ব্বাণীন্দ্রিয়াণি বিমুখানি কর্ত্তব্যানীতি শ্লোকব্যাখ্যানেন কথয়তি যদেত্যাদিনা। উপসংহারঃ স্ববশত্বাপাদনং, তস্য চ সম্যক্ত্বমতিদৃঢ়ত্বং। অয়মিতি প্রকৃতস্থিতপ্রজ্ঞগ্রহণং ব্যাবর্ত্তয়তি জ্ঞাননিষ্ঠাযামিতি। ইন্দ্রিয়োপসংহারস্য প্রলয়-

## স্বামিকৃত টীকা।

কথং ভাষেতেত্যস্যোত্তরমাহ য ইতি। যঃ সর্ব্বত্র পুত্রমিত্রাদিষপি অনভিস্নেহঃ স্নেহশূন্যঃ অতএব বাধিতানুবৃত্ত্যা তত্তচ্ছুভমনুকূলং প্রাপ্য নাভিনন্দতি ন প্রশংসতি অশুভং প্রতিকূলং প্রাপ্য ন দ্বেষ্টি ন নিন্দতি, কিন্তু কেবলমুদাসীনএব ভাষতে, তস্য প্রজ্ঞা প্রতিষ্ঠিতেত্যর্থঃ॥ ৫৭॥

কিঞ্চ যদেতি। যদা চায়ং যোগী ইন্দ্রিয়ার্থেভ্যঃ শব্দাদিভ্যঃ সাকাশাদিন্দ্রিয়াণি সংহ-

বিষয়া বিনিবর্ত্তন্তে নিরাহারস্য দেহিনঃ।
রসবর্জ্জং রসোঽপ্যস্য পরং দৃষ্ট্বা নিবর্ত্ততে ॥৫৯॥

## শাঙ্করভাষ্যম্।

তত্র বিষয়াননাহরতঃ আতুরস্যাপি ইন্দ্রিয়াণি নিবর্ত্তন্তে কূর্ম্মোঽঙ্গানীব সংহ্রিয়ন্তে ন তু তদ্বিষয়ো রাগঃ স কথং সংহ্রিয়তইত্যুচ্যতে বিষয়াইতি, যদ্যপি বিষয়োপলক্ষিতানি বিষয়-শব্দবাচ্যানীন্দ্রিয়াণ্যথবা বিষয়াএব নিরাহারস্য অনাহ্রিয়মাণবিষয়স্য দেহিনঃ কষ্টেন তপসি স্থিতস্য মূর্খস্যাপি নিবর্ত্ততন্তে দেহিনো দেহবতঃ রসবর্জ্জং রসো রাগো বিষয়েষু যঃ তং বর্জ্জ-য়িত্বা রসশব্দো রাগে প্রসিদ্ধঃ স্বচ্ছন্দতঃ স্বরসেন প্রবৃত্তো রসিকো রসজ্ঞইত্যাদিদর্শননাৎ সোঽপি রসো রঞ্জনরূপঃ সূক্ষ্মোঽস্য যতঃ পরং পরমার্থতত্ত্বং ব্রহ্ম দৃষ্ট্বোপলভ্যাঽহমেব তদিতি

## গিরিকৃত টীকা।

রূপত্বং ব্যাবর্ত্ত্য সঙ্কোচাত্মকত্বং দৃষ্টান্তেন দর্শয়তি কূর্ম্মইতি। দৃষ্টান্তং ব্যাকরোতি যথেতি। দার্ষ্টান্তিকে যোজয়ন্ জ্ঞাননিষ্ঠাপদস্তত্র প্রবর্ত্তয়তি এবমিতি। ইন্দ্রিয়াণাং বিষয়েভ্যো বৈমুখ্যকরণং প্রজ্ঞাস্থৈর্য্যহেতুরিত্যুক্তমুপসংহরতি তস্যেতি ॥ ৫৮ ॥

ইন্দ্রিয়াণাং বিষয়েভ্যো বৈমুখ্যেঽপি তদ্বিষয়রাগানুবৃত্তৌ কথং প্রজ্ঞালাভঃ স্যাদিতি শঙ্কতে তত্রেতি। ব্যবহারভূমিঃ সপ্তম্যর্থঃ, বিষয়াননাহরতস্তদুপভোগবিমুখস্যেত্যর্থঃ। রাগশ্চেন্নোপসংহ্রিয়তে ন তর্হি প্রজ্ঞালাভঃ সম্ভবতি রাগস্য তৎপরিপন্থিত্বাদিতি মত্বাহ স কথমিতি। রাগনিবৃত্ত্যুপায়মুপদিশন্নুত্তরমাহ উচ্যতইতি। বিষয়োপভোগপরাঙ্মুখস্য কুতো বিষয়পরাবৃত্তিস্তৎপরাবৃত্তিশ্চাপ্রস্তুতেত্যাশঙ্কাহ যদ্যপীতি। নিরাহারস্যেত্যস্য ব্যাখ্যা-নমনাহ্রিয়মাণবিষয়স্যেতি, যো হি বিষয়প্রবণো ন ভবতি তস্যাত্যন্তিকে তপসি ক্লেশা-ত্মকে ব্যবস্থিতস্য বিদ্যাহীনস্যাপীন্দ্রিয়াণি বিষয়েভ্যঃ সকাশাদ্যদ্যপি সংহ্রিয়ন্তে তথাপি রাগোঽবশিষ্যতে স চ তত্ত্বজ্ঞানাদুচ্ছিদ্যতইত্যর্থঃ। রসশব্দস্য মাধুর্য্যাদিষড়্বিধরসবিষয়ত্বং নিষেধতি রসশব্দইতি। বৃদ্ধপ্রয়োগমন্তরেণ কথং প্রসিদ্ধিরিত্যাশঙ্ক্যাহ স্বরসেনেতি।

## স্বামিকৃত টীকা।

রতে প্রত্যাহরতি অনায়াসেন। সংহারে দৃষ্টান্তমাহ কূর্ম্মইতি। অঙ্গানি করচরণাদীনি কূর্ম্মো যথা স্বভাবেনৈবাকর্ষতি তদ্বৎ ॥ ৫৮ ॥

নন্বু নেন্দ্রিয়াণাং বিষয়েষ্বপ্রবৃত্তিঃ স্থিতপ্রজ্ঞস্য লক্ষণং ভবিতুমর্হতি জড়ানামাতুরাণা-মুপবাসপরাণাঞ্চ বিষয়েষ্বপ্রবৃত্তেরবিশেষাত্তত্রাহ বিষয়াইতি। ইন্দ্রিয়ৈর্ব্বিষয়াণামাহরণং গ্রহণমাহারঃ নিরাহারস্য ইন্দ্রিয়ৈর্ব্বিষয়গ্রহণমকুর্ব্বতো দেহিনো দেহাভিমানিনোঽজ্ঞস্য বিষয়াঃ প্রায়শো বিনিবর্ত্তন্তে তদনুভবো নিবর্ত্তইত্যর্থঃ। কিন্তু রসো রাগোঽভিলাষস্তদ্বর্জ্জং

যততো হ্যপি কৌন্তেয় পুরুষস্য বিপশ্চিতঃ ।
ইন্দ্রিয়াণি প্রমাথীনি হরন্তি প্রসভং মনঃ ॥ ৬০ ॥

## শাঙ্করভাষ্যম্ ।

বর্ত্তমানস্য নিবর্ত্ততে নির্বীজং বিষয়বিজ্ঞানং সংপদ্যতে ইত্যর্থঃ নাসতি সম্যগ্দর্শনে রসস্য উচ্ছেদস্তস্মাৎ সম্যগ্দর্শনাত্মিকায়াঃ স্থৈর্য্যং কর্ত্তব্যমিত্যভিপ্রায়ঃ ॥ ৫৯ ॥

সম্যগ্দর্শনলক্ষণং প্রজ্ঞাস্থৈর্য্যং চিকীর্ষতা আদাবিন্দ্রিয়াণি স্ববশে স্থাপয়িতব্যানি যস্মাত্তদনবস্থাপনে দোষমাহ যততইতি । যততঃ প্রযত্নং কুর্ব্বতোঽপি হি যস্মাৎ অপি কৌন্তেয় পুরুষস্য বিপশ্চিতো মেধাবিনোঽপীতি ব্যবহিতেন সম্বন্ধঃ ইন্দ্রিয়াণি প্রমাথীনি প্রমথন-

## গিরিকৃত টীকা ।

স্বেচ্ছায়েতি যাবৎ, রসিকঃ স্বেচ্ছাবশবর্ত্তী রসজ্ঞো বিবক্ষিতাপেক্ষিতজ্ঞাতেত্যর্থঃ । কথং তর্হি তস্য নিবৃত্তিস্তত্রাহ সোঽপীতি । দৃষ্টিমেবোপলব্ধিপর্য্যায়াং স্পষ্টয়তি অহমেবেতি । রাগাপগমে সিদ্ধমর্থমাহ নির্ব্বীজমিতি । নতু সম্যগ্জ্ঞানমন্তরেণ রাগো নাপগচ্ছতি চেত্তদপগমাদৃতে রাগবতঃ সম্যগ্জ্ঞানাদয়াযোগাদিতরেতরাশ্রয়তে নেত্যাহ নাসতীতি । ইন্দ্রিয়াণাং বিষয়পারবশ্যে বিবেকদ্বারা পরিহৃতে স্থূলো রাগো ব্যাবর্ত্ততে, ততশ্চ সম্যগ্জ্ঞানোৎপত্ত্যা সূক্ষ্মস্যাপি রাগস্য সর্ব্বাত্মনা নিবৃত্ত্যুপপত্তের্নেতরেতরাশ্রয়তেত্যর্থঃ । প্রজ্ঞাস্থৈর্য্যস্য সফলত্বে স্থিতে ফলিতমাহ তস্মাদিতি ॥ ৫৯ ॥

শ্লোকান্তরমবতারয়তি সম্যগ্দর্শনেতি । মনসঃ স্ববশত্বাদেব প্রজ্ঞাস্থৈর্য্যসম্ভবে কিমর্থমিন্দ্রিয়াণাং স্ববশত্বাপাদনমিত্যাশঙ্ক্যাহ যস্মাদিতি । নতু বিবেকবতো বিষয়দোষদর্শিনো বিষয়েভ্যঃ স্বয়মেবেন্দ্রিয়াণি ব্যাবর্ত্তন্তে কিং তত্র প্রজ্ঞাস্থৈর্য্যং চিকীর্ষতা কর্ত্তব্যমিতি তত্রাহ যততো হীতি । বিষয়েষু ভূয়ো দোষদর্শনমেব প্রযত্নঃ হিশব্দস্য যস্মাদর্থস্য সমাপ্তৌ সম্বন্ধং বক্ষ্যতি অপিশব্দস্য প্রযত্নং কুর্ব্বতোঽপীতি সম্বন্ধং গৃহীত্বা সম্বন্ধান্তরমাহ পুরুষস্যেতি । প্রমথনশীলত্বং প্রকটয়তি বিষয়েতি । বিক্ষোভস্যাকুলীকরণস্য ফলমাহ

## স্বামিকৃত টীকা ।

অভিলাষশ্চ ন নিবর্ত্ততইত্যর্থঃ, রসোঽপি রাগোঽপি পরং পরমাত্মানং দৃষ্ট্বাস্য স্থিতপ্রজ্ঞস্য স্বতো নিবর্ত্ততে নশ্যতীত্যর্থঃ । যদ্বা নিরাহারস্য উপবাসপরস্য বিষয়াঃ প্রায়শো নিবর্ত্তন্তে ক্ষুধাসন্তপ্তস্য শব্দস্পর্শাদ্যপেক্ষাভাবাৎ কিন্তু রসবর্জ্জং রসাপেক্ষা তু ন নিবর্ত্ততইত্যর্থঃ, শেষং সমানম্ ॥ ৫৯ ॥

ইন্দ্রিয়সংযমং বিনা স্থিতপ্রজ্ঞতা ন সম্ভবতি অতঃ সাধকাবস্থায়াং তত্র মহান্ প্রযত্নঃ কর্ত্তব্যইত্যাহ যততোঽপীতি দ্বাভ্যাং । যততো মোক্ষার্থং প্রযতমানস্য বিপশ্চিতো বিবে-

তানি সর্ব্বাণি সংযম্য যুক্ত আসীত মৎপরঃ।
বশে হি যস্যেন্দ্রিয়াণি তস্য প্রজ্ঞা প্রতিষ্ঠিতা॥ ৬১॥
ধ্যায়তো বিষয়ান্ পুংসঃ সঙ্গস্তেষূপজায়তে।
সঙ্গাৎ সংজায়তে কামঃ কামাৎ ক্রোধোঽভিজায়তে॥৬২॥

## শাঙ্করভাষ্যম্।

শীলানি বিষয়াভিমুখং হি পুরুষং বিক্ষোভয়ন্ত্যাকুলীকুর্ব্বন্ত্যাকুলীকৃত্য চ হরন্তি প্রসভং প্রসহ্য প্রকাশমেব পশ্যতো বিবেকবিজ্ঞানযুক্তং মনো যতস্তস্মাৎ॥ ৬০॥

তানীতি। তানি সর্ব্বাণি সংযম্য সংযমনং বশীকরণং কৃত্বা যুক্তঃ সমাহিতঃ সন্ন্যাসী মৎপরোঽহং বাসুদেবঃ সর্ব্বপ্রত্যাগাত্মা পরো যস্য স মৎপরঃ নান্যোঽহং তস্মাদিত্যাসীতেত্যর্থঃ, এবমাসীনস্য যতের্ব্বশে হি যস্যেন্দ্রিয়াণি বর্ত্তন্তে অভ্যাসবশাৎ তস্য প্রজ্ঞা প্রতিষ্ঠিতা॥ ৬১॥

অথেদানীং পরাভবিষ্যতঃ সর্ব্বানর্থমূলমিদমুচ্যতে ধ্যায়তইতি। ধ্যায়তশ্চিন্তয়তো বিষ-

---

## গিরিকৃত টীকা।

আকুলীকৃত্যেতি। প্রকাশমেবেত্যুক্তং বিষদয়তি পশ্যতইতি। বিপশ্চিতো বিদুষোঽপি প্রকাশমেব প্রকাশশব্দিতবিবেকাখ্যবিজ্ঞানং যুক্তমেব মনোহরন্তীন্দ্রিয়াণীতি সম্বন্ধঃ। হি শব্দার্থমনূদ্য তস্মাদিন্দ্রিয়াণি স্ববশে স্থাপয়িতব্যানীতি পূর্ব্বেণ সম্বন্ধমভিসন্ধায়াহ যতস্তস্মাদিতি॥ ৬০॥

ইন্দ্রিয়াণাং স্ববশত্বসম্পাদনানন্তরং কর্ত্তব্যমর্থমাহ তানীতি। এবমাসীনস্য কিং স্যাদিতি তদাহ বশে হীতি। সমাহিতস্য বিক্ষেপবিকলস্য কথমাসনমিত্যপেক্ষায়ামাহ মৎপরইতি। পরাপরভেদশঙ্কামপাকৃত্যাসনমেব স্ফোরয়তি নান্যোঽহমিতি। উত্তরার্দ্ধং ব্যাকরোতি এবমিতি। হিশব্দার্থং স্ফুটয়তি অভ্যাসেতি। পরস্মাদাত্মনোনাহমন্যোস্মীতি প্রাগুক্তানুসন্ধানস্যাদরেণ নৈরন্তর্য্যদীর্ঘকালানুষ্ঠানসামর্থ্যাদিত্যর্থঃ, অথবা বিষয়েষু দোষদর্শনাভ্যাসসামর্থ্যাদিন্দ্রিয়াণি সংযতানীত্যর্থঃ॥ ৬১॥

## স্বামিকৃত টীকা।

কিমোঽপি মন ইন্দ্রিয়াণি প্রসভং বলাদ্ধরন্তি যতঃ প্রমাথীনি প্রমথনশীলানি ক্ষোভকানীত্যর্থঃ॥ ৬০॥

যস্মাদেবং তস্মাৎ তানীতি। যুক্তো যোগী তানীন্দ্রিয়াণি সংযম্য মৎপরঃ সন্নাসীত যস্য বশে বশবর্ত্তীনীন্দ্রিয়াণি এতেন চ কথমাসীতেতি প্রশ্নস্য বশীকৃতেন্দ্রিয়ঃ সন্নাসীতেত্যুত্তরং ভবতি॥ ৬১॥

ক্রোধাদ্ভবতি সম্মোহঃ সম্মোহাৎ স্মৃতিবিভ্রমঃ।
স্মৃতিভ্রংশাদ্বুদ্ধিনাশো বুদ্ধিনাশাৎ প্রণশ্যতি ॥ ৬৩ ॥

## শাঙ্করভাষ্যম্।

য়ান্ শব্দাদিবিষয়বিশেষান্ আলোচয়তঃ পুংসঃ পুরুষস্য সঙ্গ আসক্তিঃ প্রীতিঃ তেষু বিষয়েষূপজায়তে উৎপদ্যতে সঙ্গাৎ প্রীতেঃ সংজায়তে সমুৎপদ্যতে কামঃ তৃষ্ণা তস্মাৎ কামাৎ কুতশ্চিৎ প্রতিহতাৎ ক্রোধোঽভিজায়তে ॥ ৬২ ॥

ক্রোধাদ্ভবতি সংমোহঃ সংমোহোঽবিবেকঃ কার্য্যাকার্য্যবিষয়বিভ্রমঃ ভবতীতি সংবধ্যতে ক্রুদ্ধোহি সংমূঢ়ঃ সন্ গুরুমপ্যাক্রোশতি সংমোহাৎ স্মৃতিবিভ্রমঃ শাস্ত্রাচার্য্যোপদেশাহিতসংস্কারজনিতায়াঃ স্মৃতেঃ স্যাদ্বিভ্রমো ভ্রংশঃ স্মৃত্যুৎপত্তিনিমিত্তপ্রাপ্তৌ অনুৎপত্তিস্ততঃ স্মৃতিভ্রংশাত্তু বুদ্ধের্নাশঃ কার্য্যাকার্য্যবিষয়বিবেকাযোগ্যতা অন্তঃকরণস্য বুদ্ধের্নাশ-উচ্যতে বুদ্ধিনাশাৎ প্রণশ্যতি তাবদেব হি পুরুষো যাবদন্তঃকরণং তদীয়ং কার্য্যাকার্য্যবিষয়-

## গিরিকৃত টীকা।

সমন্তরশ্লোকদ্বয়তাৎপর্য্যমাহ অথেতি। পুরুষার্থোপায়োপদেশানন্তর্য্যমথশব্দার্থঃ। তন্নিষ্ঠত্ববাহিত্যাবস্থাং দর্শয়তি ইদানীমিতি। পরাভবিষ্যতো মহান্তমনর্থং গমিষ্যতো বিবেকবিজ্ঞানবিহীনস্যেতি যাবৎ, সর্ব্বানর্থমূলং বিষয়াভিধ্যানং তস্য তথাত্বমনুভবসিদ্ধমিতি বক্তুমিদমিত্যুক্তং, বিষয়েষু বিশেষত্বমারোপিতরমণীয়ত্বং প্রীতিবাসক্তিরিতি সাধারণাসক্তিমাত্রং গৃহ্যতে তৃষ্ণেত্যুদ্রিক্তা শক্তিরুক্তা প্রতিবন্ধেন প্রণাশেন বা প্রতিহতিঃ ॥ ৬২ ॥

ক্রোধস্য সংমোহহেতুত্বমনুভবেন দ্রঢ়যতি ক্রুদ্ধোহীতি। আক্রোশত্যধিক্ষিপতি তদযোগ্যত্বমপেরর্থঃ। সংমোহকার্য্যং কথয়তি সংমোহাদিতি। স্মৃতের্নিমিত্তনিবেদনদ্বারা স্বরূপং নিরূপয়তি শাস্ত্রেতি। ক্ষণিকত্বাদেব তস্যাঃ স্বতো নাশসম্ভবান্ন সংমোহাধীনত্বং তস্যেত্যাশঙ্ক্যাহ স্মৃতীতি। স্মৃতিভ্রংশেঽপি কথং বুদ্ধিনাশঃ স্বরূপতঃ সিধ্যতি তত্রাহ কার্য্যেতি। ননু পুরুষস্য নিত্যসিদ্ধস্য বুদ্ধিনাশেঽপি প্রণাশো ন প্রকল্প্যতে তত্রাহ তাবদে-

## স্বামিকৃত টীকা।

বাহ্যেন্দ্রিয়সংযমাভাবে দোষমুক্ত্বা মনঃসংযমাভাবে দোষমাহ ধ্যায়তইতি দ্বাভ্যাং। গুণবুদ্ধ্যা বিষয়ান্ ধ্যায়তঃ পুংসস্তেষু সঙ্গআসক্তির্ভবতি আসক্ত্যা চ তেষ্বধিকঃ কামো ভবতি কামাচ্চ কেনচিৎ প্রতিহতাৎ ক্রোধো ভবতি ॥ ৬২ ॥

কিঞ্চ ক্রোধাদিতি। ক্রোধাৎ সম্মোহঃকার্য্যাকার্য্যবিবেকাভাবঃ, ততঃ শাস্ত্রাচার্য্যোপদিষ্টার্থস্মৃতের্বিভ্রমো বিচলনং ভ্রংশঃ ততো বুদ্ধেশ্চেতনায়াঃ নাশঃ বৃক্ষাদিষ্বিবাভিভবঃ, ততঃ প্রণশ্যতি মৃততুল্যো ভবতি ॥ ৬৩ ॥

রাগদ্বেষবিমুক্তৈস্তু বিষয়ানিন্দ্রিয়ৈশ্চরন্।
আত্মবশ্যৈর্বিধেয়াত্মা প্রসাদমধিগচ্ছতি ॥ ৬৪ ॥

## শাঙ্করভাষ্যম্।

বিবেকয়োগ্যং, তদযোগ্যত্বে নষ্টএব পুরুষো ভবত্যতঃ তস্যান্তঃকরণস্য বুদ্ধের্নাশাৎ প্রণশ্যতি পুরুষার্থাযোগ্যোভবতীত্যর্থঃ ॥ ৬৩ ॥

সর্ব্বানর্থস্য মূলমুক্তং বিষয়াভিধ্যানমথেদানীং মোক্ষকারণমিদমুচ্যতে রাগদ্বেষেতি। রাগদ্বেষবিমুক্তৈঃ রাগশ্চ দ্বেষশ্চ রাগদ্বেষৌ তৎপুরঃসরা হীন্দ্রিয়াণাং প্রবৃত্তিঃ স্বাভাবিকী তত্র যো মুমুক্ষুর্ভবতি স তাভ্যাং বিমুক্তৈঃ শ্রোত্রাদিভিরিন্দ্রিয়ৈর্বিষয়ানবর্জ্জনীয়াংশ্চরন্নুপলভমানঃ আত্মবশ্যৈরাত্মনো বশ্যানি বশীভূতানি তৈরাত্মবশ্যৈর্বিধেয়াত্মেচ্ছাতো বিধেয় আত্মান্তঃকরণং যস্য সোঽয়ং প্রসাদমধিগচ্ছতি প্রসাদঃ প্রসন্নতা স্বাস্থ্যম্ ॥ ৬৪ ॥

## গিরিকৃত টীকা।

বেতি। কার্য্যাকার্য্যবিবেচনযোগ্যান্তঃকরণাভাবে সতোঽপি পুরুষস্য করণাভাবাদপগততত্ত্ববিবেকবিবক্ষয়া নষ্টত্বব্যপদেশঃ। তদেতদাহ পুরুষার্থেতি ॥ ৬৩ ॥

বিষয়াণাং স্মরণমপি চেদনর্থকারণং সুতরাং তর্হি ভোগস্তেন জীবনার্থং ভুঞ্জানো বিষয়াননর্থং কথং ন প্রতিপদ্যতইত্যাশঙ্ক্য বৃত্তানুবাদপূর্ব্বকমুত্তরশ্লোকতাৎপর্য্যমাহ সর্ব্বানর্থস্যেতি। অনর্থমূলকথনানন্তর্য্যমথশব্দার্থঃ। পরিহর্ত্তব্যে নির্ণীতে সতি তৎপরিহারোপায়জিজ্ঞাসাং দর্শয়তি ইদানীমিতি। রাগদ্বেষপূর্ব্বিকা প্রবৃত্তিরিত্যত্রানুভবদর্শনার্থো হিশব্দঃ, শাস্ত্রীয়প্রবৃত্তি ব্যাসেধার্থং স্বাভাবিকীত্যুক্তং তত্রেত্যধিকৃতানধিকৃত্য প্রয়োগাবর্জ্জনীয়ানশনপানাদীন্ দেহস্থিতিহেতূনিতি যাবৎ। ইন্দ্রিয়াণাং বিষয়েষু প্রবৃত্তিশ্চেন্নিয়মানুপপত্তাবর্জ্জনীয়েষ্বপি সা স্যাদিত্যাশঙ্ক্যাহ আত্মেতি। অন্তঃকরণাধীনত্বেঽপীন্দ্রিয়াণাং তদনিয়মাত্তেষামপি নিয়মানুপপত্তিরিত্যাশঙ্ক্যাহ বিধেয়াত্মেতি ॥ ৬৪ ॥

## স্বামিকৃত টীকা।

নম্বিন্দ্রিয়াণাং বিষয়প্রবণস্বভাবানাং নিরোদ্ধুমশক্যত্বাদয়ং দোষো দুষ্পরিহরইতি স্থিতপ্রজ্ঞস্য কথং স্যাদিত্যাশঙ্ক্যাহ রাগদ্বেষইতি দ্বাভ্যাং। রাগদ্বেষরহিতৈর্বিগতদর্পৈরিন্দ্রিয়ৈর্বিষয়াংশ্চরন্নুপভুঞ্জানোঽপি প্রসাদং শান্তি প্রাপ্নোতি। রাগদ্বেষরাহিত্যমেবাহ আত্মেতি। আত্মনো মনসো বশ্যৈরিন্দ্রিয়ৈর্বিধেয়ো বশবর্ত্তী আত্মা মনো যস্যেতি, অনেনৈব কথং ব্রজেতেত্যস্য চতুর্থপ্রশ্নস্য স্বাধীনৈরিন্দ্রিয়ৈর্বিষয়ান্ গচ্ছতীত্যুত্তরমুক্তং ভবতি ॥৬৪॥

প্রসাদে সর্ব্বদুঃখানাং হানিরস্যোপজায়তে।
প্রসন্নচেতসো হ্যাশু বুদ্ধিঃ পর্য্যবতিষ্ঠতে ॥ ৬৫ ॥
নাস্তি বুদ্ধিরযুক্তস্য ন চাযুক্তস্য ভাবনা।
ন চাভাবয়তঃ শান্তিরশান্তস্য কুতঃ সুখম্ ॥ ৬৬ ॥

## শাঙ্করভাষ্যম্।

প্রসাদে সতি কিং স্যাদিত্যুচ্যতে প্রসাদইতি। প্রসাদে সর্ব্বদুঃখানাং আধ্যাত্মিকাদীনাং হানির্বিনাশোঽস্য যতেরুপজায়তে কিঞ্চ প্রসন্নচেতসঃ স্বচ্ছান্তঃকরণস্য হি যস্মাদাশু শীঘ্রং বুদ্ধিঃ পর্য্যবতিষ্ঠতে আকাশমিব পরি সমন্তাৎ অবতিষ্ঠতে আত্মস্বরূপেণৈব নিশ্চলীভবতীত্যর্থঃ, এবং প্রসন্নচেতসোঽবস্থিতবুদ্ধেঃ কৃতকৃত্যতা যতস্তস্মাদ্রাগদ্বেষবিমুক্তৈরিন্দ্রিয়ৈঃ শাস্ত্রাবিরুদ্ধেষ্ববর্জ্জনীয়েষু যুক্তঃ সমাচরেদিতি বাক্যার্থঃ ॥ ৬৫ ॥

সেয়ং প্রসন্নতা স্তূয়তে নাস্তীতি। নাস্তি ন বিদ্যতে ন ভবতীত্যর্থঃ বুদ্ধিরাত্মস্বরূপবিষযা অযুক্তস্যাসমাহিতান্তঃকরণস্য ন চাযুক্তস্যেতি ন অযুক্তস্য ভাবনা আত্মজ্ঞানাভিনিবেশঃ তথা চ নাস্য ভাবয়তঃ আত্মজ্ঞানাভিনিবেশমকুর্ব্বতঃ শান্তিরুপশমো ন বিদ্যতে

## গিরিকৃত টীকা।

তথাপি নানাবিধদুঃখাভিভূতত্বান্ন স্বাস্থ্যমাস্থাতুং শক্যমিত্যাশয়েন পৃচ্ছতি প্রসাদইতি। শ্লোকার্দ্ধেনোত্তরমাহ উচ্যতইতি। সর্ব্বদুঃখহান্যা বুদ্ধিস্বাস্থ্যেঽপি প্রকৃতং প্রজ্ঞাস্থৈর্য্যং কথং সিদ্ধমিত্যাশঙ্ক্যাহ প্রসন্নেতি। বুদ্ধিপ্রসাদস্যৈব ফলান্তরমাহ কিঞ্চেতি। তস্মাৎ বুদ্ধিপ্রসাদার্থং প্রযতিতব্যমিতিশেষঃ শ্লোকদ্বয়স্যাক্ষরোত্থমর্থমুক্ত্বা তাৎপর্য্যার্থমুপসংহরতি এবমিতি। যুক্তঃ সমাহিতো বিষয়পারবশ্যশূন্যঃ সন্নিতি যাবৎ ॥ ৬৫ ॥

কিং পুনঃ সত্ত্বশুদ্ধ্যৈব যথোক্তবুদ্ধিঃ সিধ্যতি নেত্যাহ সেয়মিতি। অসমাহিতস্যাপি বুদ্ধিমাত্রমুৎপদ্যমানং প্রতিভাতীত্যাশঙ্ক্য বিশিনষ্টি আত্মস্বরূপেতি। ন হি বিক্ষিপ্তচিত্তস্যাত্মস্বরূপবিষয়া বুদ্ধিরুদেতুমর্হতীত্যত্র হেতুমাহ ন চেতি। আত্মজ্ঞানে শব্দাদাপাততো জাতে স্মৃতিসন্তানানুকরণং সাক্ষাৎকারার্থমভিনিবেশো ভাবনেতিচোচ্যতে। ন চাসৌ বিক্ষিপ্তবুদ্ধেঃ সিধ্যতীতি হেত্বর্থং বিবক্ষিত্বাহ আত্মজ্ঞানেতি। ভাবনাদ্বারা সাক্ষাৎকারা-

## স্বামিকৃত টীকা।

প্রসাদে সতি কিং স্যাদিত্যত্রাহ প্রসাদইতি। প্রসাদে সতি সর্ব্বদুঃখনাশস্ততশ্চ প্রসন্নচেতসো বুদ্ধিঃ প্রতিষ্ঠিতা ভবতীত্যর্থঃ ॥ ৬৫ ॥

ইন্দ্রিয়নিগ্রহস্য স্থিত প্রজ্ঞতাসাধনত্বং ব্যতিরেকমুখেনোপপাদয়তি নাস্তীতি। অযুক্তস্যাবশীকৃতেন্দ্রিয়স্য নাস্তি বুদ্ধিঃ শাস্ত্রাচার্য্যোপদেশাভ্যামাত্মবিষয়া বুদ্ধিঃ প্রজ্ঞৈব নোৎ-

ইন্দ্রিয়াণাং হি চরতাং যন্মনোঽনুবিধীয়তে।
তদস্য হরতি প্রজ্ঞাং বায়ুর্নাবমিবাম্ভসি ॥ ৬৭ ॥

## শাঙ্করভাষ্যম্।

অশান্তস্য কুতঃ সুখং ইন্দ্রিয়াণাং হি বিষয়সেবাতৃষ্ণাতো নিবৃত্তির্যা তৎসুখং, ন বিষয়বিষয়া তৃষ্ণা, দুঃখমেব হি সা, ন তৃষ্ণায়াং সত্যাং সুখস্য গন্ধমাত্রমপি উৎপদ্যতইত্যর্থঃ ॥ ৬৬ ॥

অযুক্তস্য কস্মাদ্বুদ্ধির্নাস্তীত্যুচ্যতে ইন্দ্রিয়াণামিতি। ইন্দ্রিয়াণাং হি যস্মাৎ চরতাং স্ববিষয়েষু প্রবর্ত্তমানানাং যন্মনোঽনুবিধীয়তে অনুপ্রবর্ত্ততে তদিন্দ্রিয়বিষয়বিকল্পনেন প্রবৃত্তং মনোঽস্য যতের্হরতি প্রজ্ঞামাত্মানাত্মবিবেকজাং নাশয়তি, কথং বায়ুর্নাবমিবাম্ভস্যুদকে জিগমিষতাং মার্গাদুদ্ধৃত্যোন্মার্গে যথা বায়ুর্নাবং প্রবর্ত্তয়ত্যেবমাত্মবিষয়াং প্রজ্ঞাং হৃত্বা মনোবিষয়াং কল্পনাং করোতি ॥ ৬৭ ॥

## গিরিকৃত টীকা।

ভাবেঽপি কা ক্ষতিরিত্যাশঙ্ক্যাহ তথেতি। অসমাহিতস্য ভাবনাভাবাদিতি যাবৎ। আত্মন্যাপ্যততোঽজ্ঞাতে শ্রবণাদ্যাবৃত্তিরূপাং স্মৃতিমনাতন্বানস্যাপরোক্ষবুদ্ধ্যভাবেনানর্থনিবৃত্তিঃ সিদ্ধতীত্যাহ উপশমইতি। অনিবৃত্তানর্থস্য পরমানন্দনাগরাদ্বিভক্তস্য সংসারবারিধৌ নিমগ্নস্য সুখাবির্ভাবো ন সম্ভবতীত্যাহ অশান্তস্যেতি। তস্যাপি বিষয়সেবিনো বৈষয়িকং সুখং সম্ভবতীত্যাশঙ্ক্যাহ ইন্দ্রিয়াণাং হীতি। তৃষ্ণাক্ষয়স্য শাস্ত্রপ্রসিদ্ধমানুভবিকসুখত্বমিতি বক্তুং হি শব্দঃ। বিষয়সেবা তৃষ্ণয়াপি বিষয়োপভোগদ্বারা সুখমুপলব্ধমিত্যাশঙ্ক্যাহ দুঃখমেবেতি। তত্রাপি হি শব্দোঽনুভবাবদ্যোতী। তদেব স্পষ্টয়তি নেত্যাদিনা ॥৬৬॥

আকাঙ্ক্ষাদ্বারা শ্লোকান্তরমুত্থাপয়তি অযুক্তস্যেতি। বিক্ষিপ্তচেতসো ভাবনাভাবে সাক্ষাৎকারলক্ষণা বুদ্ধির্ন ভবতীতি হেত্বন্তরেণ সাধয়তি ইন্দ্রিয়াণামিতি। যৎপদোপাত্তং মনস্তৎপদেনাপি গৃহ্যতে, ইন্দ্রিয়াণাং শ্রোত্রাদীনাং বিষয়াঃ শব্দাদয়স্তেষাং বিকল্পনং মিথো বিভজ্য গ্রহণং তেনেতি যাবৎ। দৃষ্টান্তং ব্যাকরোতি উদকইতি। যস্মাত্তস্মাদযুক্তস্য নোৎপদ্যতে বুদ্ধিরিতি যোজনা ॥ ৬৭ ॥

## স্বামিকৃত টীকা।

পদ্যতে কুতস্তস্যাঃ প্রতিষ্ঠাবার্ত্তা ইত্যত্রাহ নচেতি ন চাযুক্তস্য ভাবনা ধ্যানং, ভাবনয়াহি বুদ্ধেরাত্মনি প্রতিষ্ঠা ভবতি সা চা যুক্তস্য যতো নাস্তি। ন চাভাবয়ত আত্মধ্যানমকুর্ব্বতঃ শান্তিরাত্মনি চিত্তোপরমঃ, অশান্তস্য কুতঃ সুখং মোক্ষানন্দঃ ইত্যর্থঃ ॥ ৬৬ ॥

নাস্তিবুদ্ধিরযুক্তস্যেত্যত্র হেতুমাহ ইন্দ্রিয়াণামিতি। ইন্দ্রিয়াণামবশীকৃতানাং স্বৈরং বিষয়েষু চরতাং মধ্যে যদৈবৈকমিন্দ্রিয়ং মনোঽনুবিধীয়তে অবশীকৃতং সদিন্দ্রিয়েণ সহ গচ্ছতি তদৈবৈকমিন্দ্রিয়মস্য মনসঃ পুরুষস্য বা প্রজ্ঞাং হরতি বিষয়বিক্ষিপ্তাং করোতি কিমু

তস্মাদ্যস্য মহাবাহো নিগৃহীতানি সর্ব্বশঃ।
ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যস্তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ৬৮॥
যা নিশা সর্ব্বভূতানাং তস্যাং জাগর্ত্তি সংযমী।
যস্যাংজাগ্রতি ভূতানি সা নিশা পশ্যতো মুনেঃ ॥ ৬৯॥

---

## শাঙ্করভাষ্যম্।

যততোহীত্যুপন্যস্তস্যার্থস্যানেকধোপপত্তিমুক্ত্বা তঞ্চার্থমুপপাদ্যোপসংহরতি তস্মাদিতি। ইন্দ্রিয়াণাং প্রবৃত্তৌ দোষ উপপাদিতো যস্মাৎ তস্মাৎ যস্য যতেঃ হে মহাবাহো নিগৃহীতানি সর্ব্বশঃসর্ব্বপ্রকারৈর্মানসাদিভেদৈরিন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যঃ শব্দাদিভ্যস্তস্য প্রজ্ঞাপ্রতিষ্ঠিতা ॥৬৮॥ যোঽয়ং লৌকিকো বৈদিকশ্চ ব্যবহারঃ সমুৎপন্নবিবেকজ্ঞানস্য স্থিতপ্রজ্ঞস্যাবিদ্যাকার্য্যত্বাদবিদ্যানিবৃত্তৌ নিবর্ত্ততেঽবিদ্যায়াশ্চ বিদ্যাবিরোধান্নিবৃত্তিরিত্যেতমর্থং স্ফুটীকুর্ব্বন্নাহ যা

---

## গিরিকৃত টীকা।

যততো হীত্যাদিশ্লোকাভ্যামুক্তস্যৈবার্থস্য প্রকৃতশ্লোকাভ্যামপি কথ্যমানত্বাদস্তি পুনরুক্তিরিত্যাশঙ্ক্য পরিহরতি যততো হীত্যাদিনা। ধ্যায়তো বিষয়ানিত্যাদীনামুপপত্তিবচনমুন্নেয়ং। তচ্ছব্দাপেক্ষিতার্থোক্তিদ্বারা শ্লোকমবতারয়তি ইন্দ্রিয়াণামিতি। অসমাহিতেন মনসা যস্মাদনুবিধীয়মানানীন্দ্রিয়াণি প্রসহ্য প্রজ্ঞামপহরন্তি তস্মাদিতি যোজনা ॥ ৬৮ ॥

আত্মবিদঃ স্থিতপ্রজ্ঞস্য সর্ব্বকর্ম্মপরিত্যাগেঽধিকারস্তদ্বিপরীতস্যাজ্ঞস্য কর্ম্মণীত্যেতস্মিন্নর্থে সমনন্তরশ্লোকমবতারযতি যোঽয়মিতি। অবিদ্যানিবৃত্তৌ সর্ব্বকর্ম্মনিবৃত্তিশ্চেত্তন্নিবৃত্তিরেব কথমিত্যাশঙ্ক্যাহ অবিদ্যায়াশ্চেতি। স্ফুটীকুর্ব্বন্ বাহ্যাভ্যন্তকরণানাং পরাক্প্রত্যক্ প্রবৃত্তিবত্তথাবিধে দর্শনে চ মিথো বিরুধ্যতে পরাগ্দর্শনস্যানাদ্যাত্মাবরণাবিদ্যা-

## স্বামিকৃত টীকা।

বক্তব্যং বহূনি প্রজ্ঞাং হরন্তীতি, যথা প্রমত্তস্য কর্ণধারস্য নাবং বায়ুঃ সমুদ্রে সর্ব্বতঃ পরিভ্রাময়তি তদ্বদিতি ॥ ৬৭ ॥

ইন্দ্রিয়সংযমস্য স্থিত-প্রজ্ঞত্বে সাধনত্বং লক্ষণত্বঞ্চোক্তমুপসংহরতি তস্মাদিতি। সাধনত্বোপসংহারে তস্য প্রজ্ঞা প্রতিষ্ঠিতা ভবতীত্যর্থঃ, লক্ষণত্বোপসংহারে তস্য প্রজ্ঞা প্রতিষ্ঠিতা জ্ঞাতব্যেত্যর্থঃ। মহাবাহো ইতি সম্বোধয়ন্ বৈরিনিগ্রহে সমর্থস্য তবাত্রাপি সামর্থ্যং ভবেদিতি সূচয়তি ॥ ৬৮ ॥

নহু ন কশ্চিদপি প্রসুপ্ত ইব দর্শনাদিব্যাপারশূন্যঃ সর্ব্বাত্মনা নিগৃহীতেন্দ্রিয়ো লোকে দৃশ্যতে অতোঽসম্ভাবিতমিদং লক্ষণমিত্যাশঙ্ক্যাহ যা নিশেতি। সর্ব্বেষাং ভূতানাং যা নিশা নিশেব নিশা আত্মনিষ্ঠা অজ্ঞানধ্বান্তাবৃতমতীনাং তস্যাং দর্শনাদিব্যাপারাভাবাৎ।

## শাঙ্করভাষ্যম্।

নিশেতি যা নিশা রাত্রিঃ সর্ব্বপদার্থানামবিবেককরী তমঃস্বভাবত্বাৎ নিশা সর্ব্বেষাং ভূতানাংসর্ব্বভূতানাং, কিংতৎপরমার্থতত্বং স্থিতপ্রজ্ঞস্য বিষয়ো যথা নক্তঞ্চরাণামহরেব সদন্যেষাং নিশা ভবতি তদ্বন্নক্তঞ্চরস্থানীয়ানাং অজ্ঞানিনাং সর্ব্বভূতানাং নিশেব নিশা পরমার্থতত্বাগোচরত্বাদতদ্বুদ্ধীনাং, তস্যাং পরমার্থতত্বলক্ষণায়াং অজ্ঞাননিদ্রায়াং প্রবুদ্ধো জাগর্ত্তি সংযমী সংযমবান্ জিতেন্দ্রিয়ো যোগীত্যর্থঃ, যস্যাং গ্রাহ্যগ্রাহকভেদলক্ষণায়ামবিদ্যানিদ্রায়াং প্রসুপ্তান্যেব ভূতানি জাগ্রতীত্যুচ্যতে যস্যাং নিশায়াং প্রসুপ্তা ইব স্বপ্নদৃশঃ সা নিশা অবিদ্যারূপত্বাৎ পরমার্থতত্বং পশ্যতো মুনেরতঃ কর্ম্মাণ্যবিদ্যাবস্থায়ামেব চোদ্যন্তে ন বিদ্যাবস্থায়াং বিদ্যায়াং হি সত্যামুদিতে সবিতরি শার্ব্বরমিব তমঃ প্রণাশমুপগচ্ছত্যবিদ্যা প্রাগ্বিদ্যোৎপত্তেরবিদ্যা প্রমাণবুদ্ধ্যা গৃহ্যমাণা ক্রিয়াকারকফলভেদরূপা সতী সর্ব্বকর্ম্মহেতুত্বং প্রতিপদ্যতে নাপ্রামাণবুদ্ধ্যা গৃহ্যমাণায়াং কর্ম্মহেতুত্বোপপত্তিঃ প্রমাণভূতেন বেদেন মম চোদিতং কর্ত্ত-

---

## গিরিকৃত টীকা।

কার্য্যত্বাদাত্মদর্শনস্যচ তন্নিবর্ত্তকত্বাত্তশ্চাত্মদর্শনার্থমিন্দ্রিয়াণ্যর্থেভ্যো নিগৃহ্নীয়াদিত্যাহেতি যোজনা। সর্ব্বপ্রাণিনাং নিশাপদার্থাবিবেককরীত্যত্র হেতুমাহ তমঃস্বভাবত্বাদিতি। সর্ব্বপ্রাণিসাধারণীং প্রসিদ্ধাং নিশাং দর্শয়িত্বা তামেব প্রকৃতানুগুণত্বেন প্রশ্নপূর্ব্বকংবিশদয়তি কিং তদিত্যাদিনা। স্থিতপ্রজ্ঞবিষয়স্য পরমার্থতত্বস্য প্রকাশৈকস্বভাবস্য কথমজ্ঞানং প্রতি নিশাত্বমিত্যাশঙ্ক্যাহ যথেতি। তত্রহেতুমাহ অগোচরত্বাদিতি। অতদ্বুদ্ধীনাং পরমার্থতত্বাতিরিক্তে দ্বৈতপ্রপঞ্চে প্রবৃত্তবুদ্ধীনামপ্রতিপন্নত্বাৎ পরমার্থতত্বং নিশেবাবিদুষামিত্যর্থঃ। তস্যামিত্যাদি ব্যাচষ্টে তস্যামিতি। নিশাবদুক্তায়ামবস্থায়ামিতি যাবৎ, যোগীতি জ্ঞানী কথ্যতে। দ্বিতীয়ার্দ্ধং বিভজতে যস্যামিতি। প্রসুপ্তানাং জাগরণং বিরুদ্ধমিত্যাশঙ্ক্যাহ প্রসুপ্তাইবেতি। পরমার্থতত্বমনুভবতো নিবৃত্তাবিদ্যস্য সন্ন্যাসিনো দ্বৈতাবস্থা নিশেত্যত্র হেতুমাহ অবিদ্যারূপত্বাদিতি। পরমার্থাবস্থা নিশেত্যবিদুষাং বিদুষাস্তু দ্বৈতাবস্থা তথেতি স্থিতে ফলিতমাহ অতইতি। অবিদ্যাবস্থায়ামেব ক্রিয়াকারকফলভেদপ্রতিভানাদিত্যর্থঃ। বিদ্যোদয়েঽপি তৎপ্রতিভানাবিশেষাৎ পূর্ব্বমিব কর্ম্মাণি বিধীয়েরন্নিত্যাশঙ্ক্যাহ বিদ্যায়ামিতি। অবিদ্যানিবৃত্তৌ বাধিতানুবৃত্ত্যা বিভাগমানেঽপি নাস্তি কর্ম্মবিধির্ব্বিভাগাভিনিবেশাভাবাদিত্যর্থঃ। অবিদ্যাবস্থায়ামেব কর্ম্মণীত্যুক্তং ব্যক্তীক-

## স্বামিকৃত টীকা।

তস্যামাত্মনিষ্ঠায়াং সংযমী নিগৃহীতেন্দ্রিয়ো জাগর্ত্তি প্রবুধ্যতে'যস্যান্তু বিষয়নিষ্ঠায়াং ভূতানি জাগ্রতি প্রবুধ্যন্তে সা আত্মতত্বং পশ্যতো মুনির্নিশা তস্যাং দর্শনাদিব্যাপারস্তস্য নাস্তীত্যর্থঃ। এতদুক্তং ভবতি যথা দিবান্ধানামুলূকাদীনাং রাত্রাবেব দর্শনং ন তু দিবসে এবং

## শাঙ্করভাষ্যম্।

ব্যং কর্ম্মেতি হি কর্ম্মণি কর্ত্তা প্রবর্ত্ততে নাবিদ্যামাত্রমিদং সর্ব্বং নিশেবেতি যস্ত তু পুনর্নিশেবাবিদ্যামাত্রমিদং সর্ব্বং ভেদজাতমিতি জ্ঞানং তস্যাত্মজ্ঞস্য সর্ব্ব কর্ম্মসন্ন্যাস এবাধিকারো ন প্রবৃত্তৌ তথা চ দর্শয়িষ্যতি তদ্বুদ্ধয়স্তদাত্মানইত্যাদিনা। জ্ঞাননিষ্ঠায়ামেব তস্যাধিকারঃ তত্রাপি প্রবর্ত্তকপ্রমাণাভাবে প্রবৃত্তেরনুপপত্তিরিতি চেৎ ন স্বাত্মবিষয়ত্বাদাত্মবিজ্ঞানস্য ন হ্যাত্মনঃ স্বাত্মনি প্রবর্ত্তকপ্রমাণাপেক্ষতা আত্মত্বাদেব তদন্তত্বাচ্চ সর্ব্বপ্রমাণানাং প্রমাণত্বস্য ন হ্যাত্মস্বরূপাধিগমে সতি পুনঃ প্রমাণপ্রমেয়ব্যবহারঃ সম্ভবতি প্রমাতৃত্বং হ্যাত্মনো নিবর্ত্তয়ত্যন্ত্যঃ প্রমাণং নিবর্ত্তয়দেব চাপ্রমাণীভবতি স্বপ্নকালপ্রমাণমিব প্রবোধে লোকে চ বস্ত্বধিগমে প্রবৃত্তিহেতুত্বাদর্শনাৎ প্রমাণস্য তস্মাৎ নাত্মবিদঃ কর্ম্মণ্যধিকার ইতি সিদ্ধম্॥ ৬৯॥

---

## গিরিকৃত টীকা।

রোতি প্রাগিতি। বিদ্যোদয়াৎ পূর্ব্বং বাধকাভাবাদবাধিতা বিদ্যা ক্রিয়াদিভেদমাপাদ্য প্রমাণরূপয়া বুদ্ধ্যা গ্রাহ্যতাং প্রাপ্য কর্ম্মহেতুর্ভবতি ক্রিয়াদিভেদাভিমানস্য তদ্ধেতুত্বাদিত্যর্থঃ। ন বিদ্যাবস্থায়ামিত্যুক্তং প্রপঞ্চয়তি নাপ্রমাণেতি। উৎপন্নায়াঞ্চ বিদ্যায়াং অবিদ্যায়াঃ নিবৃত্তত্বাৎ ক্রিয়াদিভেদভানমপ্রমাণমিতি বুদ্ধিরুৎপদ্যতে তয়া গৃহ্যমাণা যথোক্তবিভাগভাগিন্যপ্যবিদ্যা ন কর্ম্মহেতুত্বং প্রতিপদ্যতে বাধিতত্বেনাভাসতয়া তদ্ধেতুত্বাযোগাদিত্যর্থঃ। বিদ্যাবিদ্যাবিভাগেনোক্তমেব বিশেষং বিবৃণোতি প্রমাণভূতেনেতি। যথোক্তেন বেদেন কামনাজীবনাদিমতো মম কর্ম্ম বিহিতং তেন ময়া তৎকর্ত্তব্যমিতিমন্বানঃ সন্ কর্ম্মণ্যজ্ঞোঽধিক্রিয়তে তং প্রতিসাধনবিশেষবাদিনো বেদস্য প্রবর্ত্তকত্বাদিত্যর্থঃ। সর্ব্বমেবেদমবিদ্যামাত্রং দ্বৈতং নিশেবেতি মন্বানস্ত ন প্রবর্ত্ততে কর্ম্মণীতি ব্যাবর্ত্ত্যমাহ নাবিদ্যেতি। বিদুষো ন কর্ম্মণ্যধিকারশ্চেত্তস্যাধিকারস্তর্হি কুত্রেত্যাশঙ্ক্যাহ যস্যেতি। তস্য আত্মজ্ঞস্য ফলভূতসন্ন্যাসাধিকারে বাক্যশেষং প্রমাণয়তি তথা চেতি। প্রবর্ত্তকং প্রমাণং বিধিস্তদভাবে কর্ম্মস্বিব বিদুষো জ্ঞাননিষ্ঠায়ামপি প্রবৃত্তেরনুপপত্তেরাশ্রয়ণীয়ো জ্ঞানবতোঽপি বিধিরিতি শঙ্কতে তত্রাপীতি। কিমাত্মজ্ঞানং বিধিমপেক্ষতে কিম্বাত্মা নাদ্যঃ তস্য স্বরূপবিষয়স্য যথা প্রমাণপ্রমেয়মুৎপত্তের্ব্বিধ্যনপেক্ষত্বাদিত্যাহ ন স্বাত্মেতি। ন দ্বিতীয়ইত্যাহ নহীতি। প্রবর্ত্তকপ্রমাণশব্দিতস্য বিধেঃ সাধ্যবিষয়ত্বাদাত্মনশ্চাসাধ্যত্বাদিতি হেতুমাহ আত্মত্বাদেবেতি। আত্মতজ্জ্ঞানয়োর্ব্বিধ্যনপেক্ষত্বেঽপি জ্ঞানিনো মানমেয়ব্যবহারং প্রতিনিয়মার্থং বিধ্যপেক্ষা স্যাদিত্যাশঙ্ক্যাহ তদন্তত্বাচ্চেতি। সর্ব্বেষাং প্রমাণানাং প্রামাণ্যস্যাত্মজ্ঞানোদ-

## স্বামিকৃত টীকা।

ব্রহ্মজ্ঞস্যোন্মীলিতাক্ষস্যাপি ব্রহ্মণ্যেব দৃষ্টির্নতু বিষয়েষু অতো নাসম্ভাবিতমিদং লক্ষণমিতি॥ ৬৯॥

আপূর্য্যমাণমচলপ্রতিষ্ঠং
সমুদ্রমাপঃ প্রবিশন্তি যদ্বৎ।
তদ্বৎ কামা যং প্রবিশন্তি সর্ব্বে
স শান্তিমাপ্নোতি ন কামকামী ॥ ৭০ ॥

## শাঙ্করভাষ্যম্।

বিদুষস্ত্যক্তৈষণস্য স্থিতপ্রজ্ঞস্য যতেরেব মোক্ষপ্রাপ্তির্নত্বসন্ন্যাসিনঃ কামকামিনইত্যেতমর্থং দৃষ্টান্তেন প্রতিপাদয়িষ্যন্নাহ আপূর্য্যেতি। আপূর্য্যমাণমদ্ভিরচলপ্রতিষ্ঠং অচলতয় প্রতিষ্ঠা অবস্থিতির্যস্য তমচলপ্রতিষ্ঠং সমুদ্রমাপঃ সর্ব্বতো গতাঃ প্রবিশন্তি স্বাত্মস্থমবিক্রিয়মেব সন্তং যদ্বৎ তদ্বৎ কামা বিষয়সন্নিধাবপি সর্ব্বতইচ্ছাবিশেষা যং মুনিং সমুদ্রমিবাপোঽবিকুর্ব্বন্তঃ প্রবিশন্তি সর্ব্বে আত্মন্যেব প্রলীয়ন্তে ন স্বাত্মবশং কুর্ব্বন্তি স শান্তিং মোক্ষ-

---

## গিরিকৃত টীকা।

ম্নাবসানত্বাত্তস্মিন্নুৎপন্নে ব্যবহারস্য নিরবকাশত্বান্ন তৎপ্রতিনিয়মায় জ্ঞানিনো বিধিরিত্যর্থঃ। উক্তমেব ব্যক্তীকরোতি ন হীতি! ধর্ম্মাধিগমবদাত্মাধিগমেঽপি কিমিতি যথোক্তো ব্যবহারো ন ভবতীত্যাশঙ্ক্যাহ প্রমাতৃত্বং হীতি। তন্নিবৃত্তৌ কথমদ্বৈতজ্ঞানস্য প্রামাণ্য মিত্যাশঙ্ক্যাহ নিবর্ত্তয়দেবেতি। নিবর্ত্তয়দদ্বৈতজ্ঞানং স্বয়ং নিবৃত্তের্ন প্রমাণমিত্যত্র দৃষ্টান্তমাহ স্বপ্নেতি। আত্মজ্ঞানস্য বিধ্যনপেক্ষত্বে হেত্বন্তরমাহ লোকে চেতি। ব্যবহারভূমৌ হি প্রমাণস্য বস্তুনিশ্চয়ফলপর্য্যন্তত্বে সতি প্রবর্ত্তকবিধিসাপেক্ষত্বানুপলম্ভাদদ্বৈতজ্ঞানমপি প্রমাণত্বান্ন বিধিমপেক্ষতে রজ্জ্বাদিজ্ঞানবদিত্যর্থঃ। আত্মজ্ঞানবতস্তন্নিষ্ঠাবিধিমন্তরেণ জ্ঞানমাহাত্ম্যেনৈব সিদ্ধত্বাত্তস্য কর্ম্মসন্ন্যাসেঽধিকারো ন কর্ম্মণীত্যুপসংহরতি তস্মাদিতি ॥ ৬৯ ॥

নন্বসন্ন্যাসিনাপি বিদ্যাবতা বিদ্যাফলস্য মোক্ষস্য লব্ধুং শক্যত্বাৎ কিমিতি বিদুষঃ সন্ন্যাসো নিয়ম্যতে তত্রাহ বিদুষইতি। আপাতজ্ঞানবতো বিবেকবৈরাগ্যাদিবিশিষ্টস্যৈষণাভ্যঃ সর্ব্বাভ্যোঽভ্যুত্থিতস্য শ্রবণাদিদ্বারা সমুৎপন্নসাক্ষাৎকারবতো মুখ্যস্য সন্ন্যাসিনো মোক্ষো নান্যস্য বিষয়তৃষ্ণাপরিভূতস্য ইতোতদ্দৃষ্টান্তেন প্রতিপাদয়িতুমিচ্ছন্ রাগদ্বেষবিমুক্তৈস্ত ইতিশ্লোকোক্তমেবার্থং পুনরাহেতি যোজনা। অদ্ভিঃ সমুদ্রস্য সমন্তাৎ পূর্য্যমাণত্বে বৃদ্ধিহ্রাসবতী তদীয়া স্থিতিরাপতেদিত্যাশঙ্ক্যাহ অচলেতি। ন হি সমুদ্রস্যোদকাত্মকং

## স্বামিকৃত টীকা।

নন্ বিষয়েষু দৃষ্ট্যভাবে কথমসৌ তান্ ভুঙক্ত ইত্যপেক্ষায়ামাহ আপূর্য্যমাণমিতি। নানানদনদীভিরাপূর্য্যমাণমপ্যচলপ্রতিষ্ঠমনতিক্রান্তমর্য্যাদমেব সমুদ্রং পুনরপ্যন্যা আপো যথা প্রবিশন্তি তথা কামা বিষয়াঃ যং মুনিমন্তর্দৃষ্টিং ভোগৈরবিক্রিয়মাণমেব প্রারব্ধকর্ম্ম-

বিহায় কামান্ যঃ সর্ব্বান্ পুমাংশ্চরতি নিস্পৃহঃ।
নির্ম্মমো নিরহঙ্কারঃ স শান্তিমধিগচ্ছতি ॥ ৭১ ॥

## শাঙ্করভাষ্যম্।

প্রাপ্নোতি নেতরঃ কামকামী কাম্যন্তইতি কামাঃ বিষয়াস্তান্ কাময়িতুং শীলং যস্য স কামকামী নৈব প্রাপ্নোতীত্যর্থঃ॥ ৭০ ॥

যস্মাদেবং তস্মাৎ বিহায়েতি। বিহায় পরিত্যজ্য কামান্ যঃ সন্ন্যাসী সর্ব্বানশেষতঃ কার্ৎস্ন্যেন চরতি জীবনমাত্রচেষ্টাশেষঃ পর্য্যটতীত্যর্থঃ নিস্পৃহঃ শরীরজীবনমাত্রেঽপি নির্গতা স্পৃহা যস্য স নিস্পৃহঃ সন্ নির্ম্মমইতি মমত্ববর্জ্জিতঃ শরীরজীবনমাত্রাক্ষিপ্তপরিগ্রহেঽপি মমেদমিত্যভিনিবেশবর্জ্জিতঃ নিরহঙ্কারো বিদ্যাবত্ত্বাদিনিমিত্তাত্মসম্ভাবনারহিত ইত্যর্থঃ স এবম্ভূতঃ স্থিতপ্রজ্ঞো ব্রহ্মবিচ্ছান্তিং সর্ব্বসংসারদুঃখোপরমলক্ষণাং নির্ব্বাণাখ্যামধিগচ্ছতি প্রাপ্নোতি ব্রহ্মভূতো ভবতীত্যর্থঃ॥ ৭১ ॥

## গিরিকৃত টীকা।

প্রতিনিয়তং রূপং কদাচিদ্বিবর্দ্ধতে হ্রসতে বা তেন তদীয়া স্থিতিরেকরূপৈবেত্যর্থঃ। তত্ত্বজ্ঞাদেয়াশ্চেদাপঃ সমুদ্রান্তর্গচ্ছন্তি তর্হি তস্য বিক্রিয়াবত্ত্বাদপ্রতিষ্ঠা স্যাদিত্যাশঙ্ক্যাহ স্বাত্মস্থমিতি। ইচ্ছাবিশেষাঃ বিষয়াণামসন্নিধৌ বিদুষি নির্ব্বিকারে প্রবিশন্তোঽপি সন্নিধানে তস্মিন্ প্রবিশন্তো বিকারমাপাদয়েয়ুরিত্যাশঙ্ক্যাহ বিষয়েতি। প্রবেশং বিষদয়তি সর্ব্বতইতি। যোঽকাম ইত্যাদি শ্রুতের্ব্বিষয়বিমুখস্য নিষ্কামস্য মোক্ষো ন কামকামুকস্যেত্যাহ স শান্তিমিতি॥ ৭০ ॥

যদি গৃহস্থেনাপি মনসা সমস্তাভিমানং হিত্বা কূটস্থং ব্রহ্মাত্মানং পরিভাবয়তা ব্রহ্মনির্ব্বাণমাপ্যতে প্রাপ্তং তর্হি মৌঢ্যাদিবিড়ম্বনমেবেত্যাশঙ্ক্যাহ যস্মাদিতি। শব্দাদিবিষয়প্রবণস্য তত্তদিচ্ছাভেদভাগিনো ন মুক্তিরিতি ব্যতিরেকস্য সিদ্ধত্বাৎ পূর্ব্বোক্তমন্বয়ং নিগময়িতুমনন্তরং বাক্যমিত্যর্থঃ। অশেষবিষয়ত্যাগে জীবনমপি কথমিত্যাশঙ্ক্যাহ জীবনেতি। সম্ভবদ্রাগদ্বেষাদিকে দেশে নিবাসব্যাবৃত্ত্যর্থং চরতীত্যেতদ্ব্যাচষ্টে পর্য্যটতীতি। বিহায় কামানিত্যনেন পুনরুক্তিং পরিহরতি শরীরেতি। নিস্পৃহত্বমুক্ত্বা নির্ম্মমত্বাৎ পুনর্ব্বদন্ কথং পুনরুক্তিমার্থিকীং ন গচ্ছসীত্যাশঙ্ক্যাহ শরীরজীবনেতি। সত্যহঙ্কারে মমকারস্যাবশ্যকত্বান্নিরহঙ্কারত্বং ব্যাকরোতি বিদ্যাবত্ত্বাদীতি। স শান্তিমাপ্নোতি ইত্যুক্ত

## স্বামিকৃত টীকা।

ভিরাক্ষিপ্তাঃ সন্তঃ প্রবিশন্তি স শান্তিং কৈবল্যং প্রাপ্নোতি ন তু কামকামী ভোগকামনাশীলঃ॥ ৭০ ॥

যস্মাদেবং তস্মাৎ বিহায়েতি। প্রাপ্তান্ কামান্ বিহায় ত্যক্ত্বা উপেক্ষ্য অপ্রাপ্তেষু চ

এষা ব্রাহ্মী স্থিতিঃ পার্থ নৈনাং প্রাপ্য বিমুহ্যতি।
স্থিত্বাস্যামন্তকালেঽপি ব্রহ্মনির্ব্বাণমৃচ্ছতি ॥ ৭২ ॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে
শ্রীকৃষ্ণার্জ্জুনসংবাদে
সাংখ্যযোগোনাম
দ্বিতীয়োঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

সৈষা জ্ঞাননিষ্ঠা স্তূয়তে এষা ব্রাহ্মীতি। এষা যথোক্তা ব্রাহ্মী ব্রহ্মণি ভবেয়ং স্থিতিঃ সর্ব্বকর্ম্ম সন্ন্যস্য ব্রহ্মরূপেণৈবাবস্থানমিত্যেতৎ হে পার্থ নৈনাং স্থিতিং প্রাপ্য লব্ধ্বা বিমুহ্যতি ন মোহং প্রাপ্নোতি স্থিত্বাস্যাং স্থিতৌ ব্রাহ্ম্যাং যথোক্তায়ামন্তকালেঽপি অন্তে বয়-

## গিরিকৃত টীকা।

মুপসংহরতি স এবম্ভূতইতি। সন্ন্যাসিনো মোক্ষমপেক্ষ্যমাণস্য সর্ব্বকামপরিত্যাগাদীনি শ্লোকোক্তানি বিশেষণানি যত্নসাধ্যানি তৎসম্পত্তিফলন্তু কৈবল্যমিত্যর্থঃ ॥ ৭১ ॥

তত্র তত্র সংক্ষেপবিস্তরাভ্যাং প্রদর্শিতাং জ্ঞাননিষ্ঠাং অধিকারিপ্রবৃত্ত্যর্থত্বেন স্তোতুমুত্তরশ্লোকমবতারয়তি সৈষেতি। গৃহস্থঃ সন্ন্যাসীত্যুভাবপি চেন্মুক্তিভাগিনৌ কিং তর্হি কষ্টেন সর্ব্বথৈব সন্ন্যাসেনেত্যাশঙ্ক্য সন্ন্যাসিব্যতিরিক্তানামন্তরায়সম্ভবাদপেক্ষিতঃ সন্ন্যাসো মুমুক্ষোরিত্যাহ এষেতি স্থিতিমেব ব্যাচষ্টে সর্ব্বমিতি। ন বিমুহ্যতীতি পুনর্নঞোঽনুকর্ষণমন্বয়ার্থং সন্ন্যাসিনো বিমোহাভাবেঽপি গৃহস্থো ধনহান্যাদিনিমিত্তং প্রায়েণ বিমুহ্যতি বিক্ষিপ্তঃ সন্ পরমার্থবিবেকরহিতো ভবতীত্যর্থঃ। যথোক্তা ব্রাহ্মী স্থিতিঃ সর্ব্বকর্ম্মসন্ন্যাসপূর্ব্বিকা ব্রহ্মনিষ্ঠা, তস্যাং স্থিত্বা তামিমামায়ুষশ্চতুর্থেঽপি ভাগে কৃত্বেত্যর্থঃ। অপিশব্দসূচিতং কৈমুতিকান্যায়মাহ কিমু বক্তব্যমিতি। তদেবং তত্ত্বং পদার্থৌ তদৈক্যং বাক্যার্থ-

## স্বামিকৃত টীকা।

নিস্পৃহঃ যতো নিরহঙ্কারঃ অতএব তদ্ভোগসাধনেষু নির্ম্মমঃ সন্নন্তদৃষ্টির্ভূত্বা যশ্চরতি প্রারব্ধবশেন ভোগান্ ভুঙ্‌ক্তে যত্রকুত্রাপি গচ্ছতি বা স শান্তিং প্রাপ্নোতি ॥ ৭১ ॥

উক্তাং জ্ঞাননিষ্ঠাং স্তবন্নুপসংহরতি এষেতি। ব্রাহ্মী স্থিতির্ব্রহ্মজ্ঞানে নিষ্ঠা এষা এবম্বিধা এনাং পরমেশ্বরারাধনেন বিশুদ্ধান্তঃকরণঃ পুমান্ প্রাপ্য ন মুহ্যতি পুনঃ সংসারমোহং ন প্রাপ্নোতি। যতোঽন্তকালে মৃত্যুসময়েঽপি অস্যাং ক্ষণমাত্রং স্থিত্বা ব্রহ্মনির্ব্বাণং

## শাঙ্করভাষ্যম্।

স্যপি ব্রহ্মনির্ব্বাণং ব্রহ্মনির্বৃতিং মোক্ষমৃচ্ছতি কিমু বক্তব্যং ব্রহ্মচর্য্যাদেব সন্ন্যস্য যাবজ্জীবং যো ব্রহ্মণ্যেবাবতিষ্ঠতে স ব্রহ্মনির্ব্বাণমৃচ্ছতীতি॥ ৭২॥

ইতি শ্রীভগবদ্গীতাভাষ্যে দ্বিতীয়োঽধ্যায়ঃ।

## গিরিকৃতটীকা।

স্তজ্জ্ঞানাদেকাকিনো মুক্তিস্তদুপায়শ্চেত্যেতেষামেকৈকত্র শ্লোকে প্রাধান্যেন প্রদর্শিতমিতি নিষ্ঠাদ্বয়মুপাযাপেয়ভূতমধ্যায়েন সিদ্ধম্॥ ৭২॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং দ্বিতীয়োঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

ব্রহ্মণি লয়মৃচ্ছতি প্রাপ্নোতি কিং পুনর্ব্বক্তব্যং বাল্যমারভ্য স্থিত্বা প্রাপ্নোতীতি।

শোকপঙ্কনিমগ্নং যঃ সাংখ্যযোগোপদেশতঃ।
উজ্জহারার্জ্জুনং ভক্তং স কৃষ্ণঃ শরণং মম॥ ৭২॥

ইতি শ্রীধরস্বামিকৃতটীকায়াং দ্বিতীয়োঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## তৃতীয়োঽধ্যায়ঃ।

অর্জ্জুন উবাচ—জ্যায়সী চেৎ কর্ম্মণস্তে মতা বুদ্ধির্জনার্দ্দন।
তৎ কিং কর্ম্মণি ঘোরে মাং নিয়োজয়সি কেশব ॥ ১ ॥

### শাঙ্করভাষ্যম্।

শাস্ত্রস্য প্রবৃত্তিনিবৃত্তিবিষয়ভূতে দ্বে বুদ্ধী ভগবতা নির্দ্দিষ্টে সাংখ্যবুদ্ধির্যোগবুদ্ধিশ্চ, তত্র প্রজহাতি যদা কামানিত্যাবভ্যাধ্যায়পরিসমাপ্তেঃ সাংখ্যবুদ্ধ্যাশ্রিতানাং সন্ন্যাসকর্ত্তব্যতামুক্ত্বা তেষাং তন্নিষ্ঠতয়ৈব চ কৃতার্থতোক্তৈষা ব্রাহ্মী স্থিতিরিত্যর্জ্জুনায় চ কর্ম্মণ্যেবাধিকারস্তে মা তে সঙ্গোঽস্ত্বকর্ম্মণীতি কর্ম্মৈব কর্ত্তব্যমুক্তবান্ যোগবুদ্ধিমাশ্রিত্য, ন তত এব শ্রেয়ঃপ্রাপ্তিমুক্তবান্, তদেতদালক্ষ্য পর্য্যাকুলীভূতবুদ্ধিরর্জ্জুন উবাচ, কথং

---

### গিরিকৃত টীকা।

পূর্ব্বোত্তরাধ্যায়য়োঃ সম্বন্ধং পূর্ব্বস্মিন্নধ্যায়ে বৃত্তমর্থং সংক্ষিপ্যানুবদতি শাস্ত্রস্যেতি। গীতাশাস্ত্রপ্রারম্ভাপেক্ষিতং হেতুফলভূতং বুদ্ধিদ্বয়ং ভগবতোপদিষ্টমিত্যর্থঃ। প্রষ্টুরর্জ্জুনস্যাভিপ্রায়ং নির্দ্দেষ্টুং বৃত্তমর্থান্তরং কথয়তি তত্রেতি। অধ্যায়য়োর্বুদ্ধিদ্বয়নির্দ্ধারণং বা সপ্তম্যর্থঃ, পরমার্থিকে তত্ত্বে তজ্জ্ঞানং তন্নিষ্ঠানামশেষকামত্যাগিনাং কামমূলানাং কর্ম্মণামপি প্রতিপত্তিকর্ম্মবত্ত্যাগং কর্ত্তব্যত্বেন ভগবানুক্তবানিত্যর্থঃ। তথাপি মোক্ষসাধনে বিকল্পসমুচ্চয়য়োরন্যতরস্য বিবক্ষিতত্ববুদ্ধ্যা সমনন্তরপ্রশ্নপ্রবৃত্তিরিত্যাশঙ্ক্যাহ উক্তেতি। অর্জ্জুনস্য মনসি ব্যাকুলত্বং প্রশ্নবীজং দর্শয়িতুমুক্তমর্থান্তরমনুভাষতে অর্জ্জুনায় চেতি। সাংখ্যবুদ্ধিমাশ্রিত্য কর্ম্মত্যাগমুক্ত্বা পুনস্তস্যৈব কর্ত্তব্যত্বং কথং মিথো বিরুদ্ধং ব্রবীতীত্যাশঙ্ক্যাহ যোগেতি। যথা সাংখ্যবুদ্ধিমাশ্রিতানাং সন্ন্যাসদ্বারা তন্নিষ্ঠানাং কৃতার্থতোক্তা

### স্বামিকৃত টীকা।

এবং তাবদশোচ্যানন্বশোচস্ত্বমিত্যাদিনা প্রথমং মোক্ষসাধনত্বেন দেহাত্মবিবেকবুদ্ধিরুক্তা তদনন্তরমেষা তেঽভিহিতা সাংখ্যে বুদ্ধির্যোগে ত্বিমাং শৃণু ইত্যাদিনা কর্ম্ম চোক্তং ন

## শাঙ্করভাষ্যম্।

ভক্তায় শ্রেয়োঽর্থিনে যৎ সাক্ষাৎ শ্রেয়ঃপ্রাপ্তিসাধনং সাংখ্যবুদ্ধিনিষ্ঠাং শ্রাবয়িত্বা মাং কর্ম্মণি দৃষ্টানেকানর্থযুক্তে পারম্পর্য্যেণাপ্যনৈকান্তিকশ্রেয়ঃপ্রাপ্তিফলে নিযুঞ্জ্যাদিতি যুক্তঃ পর্য্যাকুলীভাবোঽর্জ্জুনস্য তদনুরূপশ্চ প্রশ্নো জ্যায়সী চেদিত্যাদি প্রশ্নাপকরণবাক্যঞ্চ ভগবতো যুক্তং যথোক্তং বিভাগবিষয়ে শাস্ত্রে। কেচিত্ত্বর্জ্জুনস্য প্রশ্নার্থমন্যথা কল্পয়িত্বা তৎপ্রতিকূলং ভগবতঃ প্রতিবচনং বর্ণয়ন্তি, যথা চাত্মনা সম্বন্ধগ্রন্থে গীতার্থো নিরূপিতঃ তৎপ্রতিকূলঞ্চেহ পুনঃ প্রশ্নপ্রতিবচনয়োরর্থং নিরূপয়ন্তি, কথং তত্র সম্বন্ধগ্রন্থে তাবৎ সর্ব্বেষামাশ্রমিণাং জ্ঞানকর্ম্মণোঃ সমুচ্চয়ো গীতাশাস্ত্রে নিরূপিতোঽর্থ ইত্যুক্তঃ পুনর্বিশেষিতঞ্চ যাবজ্জীবং শ্রুতিচোদিতানি কর্ম্মাণি পরিত্যজ্য কেবলাদেব জ্ঞানান্মোক্ষঃ প্রাপ্যতে ইত্যেতদেকান্তেনৈব প্রতিসিদ্ধমিতীহ ত্বাশ্রমবিকল্পং দর্শয়তা যাবজ্জীবং শ্রুতিচোদিতানামেব কর্ম্মণাং পরিত্যাগ উক্তঃ কথমীদৃশং বিরুদ্ধমর্থমর্জ্জুনায় ব্রূয়াদ্ভগবান্

## গিরিকৃত টীকা।

তথা যোগবুদ্ধিমাশ্রিত্য কর্ম্ম কুর্ব্বতোঽপি কৃতার্থত্বমুক্তমিত্যাশঙ্ক্যাহ ন তত এবেতি। দূরেণ হ্যবরং কর্ম্ম বুদ্ধিযোগাদিতিদর্শনাদিতি শেষঃ। বুদ্ধিব্যাকুলত্বং প্রশ্নবীজং প্রতিলভ্য প্রশ্নং করোতীত্যাহ তদেতদিতি। সাক্ষাদেব শ্রেয়ঃসাধনং জ্ঞানমস্মেভ্যো দর্শিতং তদিত্যুচ্যতে, তদ্বিপরীতং কর্ম্ম স্বস্যানুষ্ঠেয়ত্বেনোক্তমেতদিতি নির্দ্দিশ্যতে ভগবদুক্তেঽর্থে সন্দিহান... নির্ণয়াকাঙ্ক্ষয়া প্রশ্নপ্রবৃত্তেরস্তি পূর্ব্বোত্তরাধ্যায়যোরুত্থাপ্যোত্থাপকলক্ষণা সঙ্গতিরিত্যর্থঃ। অর্জ্জুনস্য প্রশ্ননিমিত্তং পর্য্যাকুলত্বং প্রশ্নপূর্ব্বকং প্রপঞ্চয়তি কথমিত্যাদিনা। যদ্ধি সাক্ষাদেব শ্রেয়ঃসাধনং সাংখ্যশব্দিতং পরমার্থতত্ত্ববিষয়বুদ্ধৌ নিষ্ঠারূপং তদস্মৈ শ্রেয়োঽর্থিনে ভক্তায় শ্রাবয়িত্বা মাং পুনরভক্তমশ্রেয়োঽর্থিনমিব কর্ম্মণি পূর্ব্বোক্তবিপরীতে কথং ভগবান্নিযোক্তুমর্হতি ইত্যর্জ্জুনস্য পর্য্যাকুলীভাবোযুক্তইতি সম্বন্ধঃ। জ্ঞাননিষ্ঠাতো বৈপরীত্যং স্ফোরয়িতুং কর্ম্ম বিশিনষ্টি দৃষ্টেতি। যুদ্ধে হি ক্ষত্রকর্ম্মণি দৃষ্টোঽনেকোঽনর্থো-গুরুভ্রাতৃহিংসাদিস্তেন সম্বন্ধেন বুদ্ধিশুদ্ধিদ্বারাপি বর্ত্তমানে জন্মন্যেব ফলমিত্যনিয়তেমিম ভক্তস্য শ্রেয়োঽর্থিনো নিয়োগো ভগবতা যুক্তো ন ভবতীতি শেষঃ। যথোক্তং নিমিত্তং প্রশ্নস্য যুক্তং তদনুগুণত্বাভগ্নেতি দ্যোতকমাহ তদনুরূপশ্চেতি। জ্ঞাননিষ্ঠানাং কৃতার্থতা কর্ম্মনিষ্ঠানান্তু ন তথেত্যুক্তে বিভাগভাগিশাস্ত্রমিত্যত্র লোকেঽস্মিন্নিত্যাদিবাক্যস্যাপি দ্যোতকত্বং দর্শয়তি প্রশ্নেতি। সাক্ষাদেব শ্রেয়ঃসাধনমস্মেভ্যো

## স্বামিকৃতটীকা।

চ তয়োগুর্ণপ্রধানভাবঃ স্পষ্টং দর্শিতঃ, অত্র বুদ্ধিযুক্তস্য স্থিতপ্রজ্ঞস্য নিস্পৃহত্বনিয়তেন্দ্রিয়ত্ব নিরহঙ্কারত্বাদ্যভিধানাদেষা ব্রাহ্মী স্থিতিঃ পার্থেতি সপ্রশংসমুপসংহারাচ্চ বুদ্ধিকর্ম্মণোর্মধ্যে

## শাঙ্করভাষ্যম্।

শ্রোতা বা কথং বিরুদ্ধমর্থমবধারয়েৎ তত্রৈতৎ স্যাৎ গৃহস্থানামেব শ্রৌতকর্ম্মপরিত্যাগেন কেবলাদেব জ্ঞানান্মোক্ষঃ প্রতিষিধ্যতে নত্বাশ্রমান্তরাণামিত্যেতদপি পূর্ব্বোত্তরবিরুদ্ধমেব, কথং সর্ব্বাশ্রমিণাং জ্ঞানকর্ম্মণোঃ সমুচ্চয়ো গীতাশাস্ত্রে নিশ্চিতোঽর্থইতি প্রতিজ্ঞায়েহ কথং তদ্বিরুদ্ধং কেবলাদেব জ্ঞানান্মোক্ষং ব্রূয়াৎ আশ্রমান্তরাণাং, অথ-মতং শ্রৌতকর্ম্মাপেক্ষয়ৈতদ্বচনং কেবলাদেব জ্ঞানাৎ শ্রৌতকর্ম্মরহিতাৎ গৃহস্থানাং মোক্ষঃ প্রতিষিধ্যতইতি তত্র গৃহস্থানাং বিদ্যমানমপি স্মার্ত্তং কর্ম্মাবিদ্যমানবদুপেক্ষ্য জ্ঞানাদেব কেবলাদিত্যুচ্যতে ইত্যেতদপি বিরুদ্ধং কথং গৃহস্থস্যৈব স্মার্ত্তকর্ম্মণা সমুচ্চিতাৎ জ্ঞানান্মোক্ষঃ প্রতিষিধ্যতে নত্বাশ্রমান্তরাণামিতি কথং বিবেকিভিঃ শক্যমধারয়িতুং, কিঞ্চ যদি মোক্ষসাধনত্বেন স্মার্ত্তানি কর্ম্মাণ্যূর্দ্ধরেতসাং সমুচ্চীয়ন্তে তথা গৃহস্থস্যাপি ইষ্যতাং স্মার্ত্তৈরেব সমুচ্চয়ো ন শ্রৌতৈঃ, অথ শ্রৌতৈঃ স্মার্ত্তৈশ্চ গৃহস্থস্যৈব সমুচ্চয়ো মোক্ষায়োর্দ্ধরেতসাং

## গিরিকৃত টীকা।

ভগবতোক্তং ন তু মহ্যমিতি মত্বা ব্যাকুলীভূতঃ সন্ পৃচ্ছতীতি স্বাভিপ্রায়েণ সম্বন্ধমুক্ত্বা বৃত্তিকারাভিপ্রায়ং দূষয়তি কেচিত্ত্বিতি। জ্ঞানকর্ম্মণোঃ সমুচ্চয়মবধারয়িতুং প্রশ্নাঙ্গীকারে সমুচ্চয়াবধারণেনৈব প্রতিবচনমুচিতং ন তথা ভগবতা প্রতিবচনমুক্তং তথা চ প্রশ্নস্য সমুচ্চয়বিষয়ত্বাবগমাৎ প্রত্যুক্তেশ্চাসমুচ্চয়বিষয়ত্বাত্তয়োর্মিথো বিরোধো বৃত্তিকারমতে স্যাদিত্যর্থঃ। কিঞ্চ কেবলং প্রশ্নপ্রতিবচনয়োরেব পরমতে পরস্পরবিরোধো ন ভবত্যপি তু পরোষাং স্বগ্রন্থেঽপি পূর্ব্বাপরবিরোধোঽস্তীত্যাহ যথা চেতি। আত্মনা বৃত্তিকারৈরিতি যাবৎ, সম্বন্ধগ্রন্থো গীতাশাস্ত্রারম্ভোপোদ্ঘাতঃ, ইহেতি তৃতীয়াধ্যায়ারম্ভং পরামৃশতি। তদেব বিবৃণ্বন্নাকাঙ্ক্ষামাহ কথমিতি। পূর্ব্বাপরবিরোধং স্ফোরয়িতুং সম্বন্ধগ্রন্থোক্তমর্থমনুবদতি তত্রেতি। পরকীয়া বৃত্তিঃ সপ্তম্যা সমুল্লিখ্যতে, সম্বন্ধগ্রন্থে তাবদয়মর্থউক্তইতি সম্বন্ধঃ তমেবার্থং বিবদয়তি সর্ব্বেষামিতি। সর্ব্বকর্ম্মসন্ন্যাসপূর্ব্বকজ্ঞানাদেব কেবলাৎ কৈবল্যমিত্যস্মিন্নর্থে শাস্ত্রস্য পর্য্যবসানান্ন সমুচ্চয়ো বিবক্ষিতস্তত্রেত্যাশঙ্ক্যাহ পুনরিতি। উক্তো-গীতার্থো বৃত্তিকারৈরেব কর্ম্মত্যাগাযোগেন বিশেষিতত্বান্নাবিবক্ষিতো ভবিতুমুৎসহতে তথা চ শ্রৌতানি কর্ম্মাণি ত্যক্ত্বা জ্ঞানাদেব কেবলান্মুক্তির্ভবতীত্যেতন্মতং নিয়মেনৈব যাবজ্জীবশ্রুতিভির্বিপ্রতিষিদ্ধত্বান্নাভ্যুপগন্তমুচিতমিত্যর্থঃ। তথাপি কথং মিথো বিরোধধীরিত্যাশঙ্ক্যাহ ইহ ত্বিহি। প্রথমতো হি সম্বন্ধগ্রন্থে সমুচ্চয়ো গীতার্থঃ প্রতিপাদ্যত্বেন বৃত্তিকৃতা

## স্বামিকৃত টীকা।

বুদ্ধেঃ শ্রেষ্ঠত্বং ভগবতোঽভিপ্রেতং—মত্বানোঽর্জ্জুন উবাচ জ্যায়সী চেদিতি। কর্ম্মণঃ সকাশান্মোক্ষেঽন্তরঙ্গত্বেন বুদ্ধির্জ্যায়সী অধিকতরা শ্রেষ্ঠা চেত্তব সম্মতা তর্হি কিমর্থং

## শাঙ্করভাষ্যম্।

তু স্মার্তকর্ম্মমাত্রসমুচ্চিতাৎ জ্ঞানান্মোক্ষইতি, তত্রৈবং সতি গৃহস্থস্যায়াসবাহুল্যাৎ শ্রৌতং স্মার্তঞ্চ বহুদুঃখরূপং কর্ম্ম শিরস্যারোপিতং স্যাৎ, অথ গৃহস্থস্যৈবায়াসবাহুল্যাৎ তৎকারণান্মোক্ষঃ স্যান্নাশ্রমান্তরাণাং শ্রৌতনিত্যানিত্যকর্ম্মরহিতত্বাদিতি তদপ্যসৎ সর্ব্বোপনিষৎস্বিতিহাসপুরাণযোগশাস্ত্রেষু চ জ্ঞানাঙ্গত্বেন মুমুক্ষোঃ সর্ব্বকর্ম্মসন্ন্যাসবিধানাদাশ্রমবিকল্পসমুচ্চযবিধানাচ্চ শ্রুতিস্মৃত্যোঃ সিদ্ধস্তর্হি সর্ব্বাশ্রমিণাং জ্ঞানকর্ম্মণোঃ সমুচ্চয়ো ন মুমুক্ষোঃ সর্ব্বকর্ম্মসন্ন্যাসবিধানাৎ পুত্রৈষণায়া বিত্তৈষণায়াশ্চ লোকৈষণায়াশ্চ ব্যুত্থায়াথ ভিক্ষাচর্য্যং চরন্তি, তস্মাৎ সন্ন্যাসমেষাং তপসামতিরিক্তমাহুঃ ন্যাস এবাত্যরেচয়দিতি ন কর্ম্মণা ন প্রজয়া ধনেন ত্যাগেনৈকেঽমৃতত্বমানশুরিতি চ ব্রহ্মচর্য্যাদেব প্রব্রজেদিত্যাদ্যাঃ শ্রুতয়ঃ ত্যজ ধর্ম্মমধর্ম্মঞ্চ উভে সত্যানৃতে ত্যজ, যেন ত্যজসি তং ত্যজ, সংসারমেব নিঃসারং দৃষ্ট্বা সারদিদৃক্ষয়া। প্রব্রজন্ত্যকৃতোদ্বাহাঃ পরং বৈরাগ্যমাশ্রিতাইতি বৃহস্পতিঃ, পরমাত্মনি যো

## গিরিকৃত টীকা।

প্রতিজ্ঞাতঃ শ্রৌতকর্ম্মপরিত্যাগশ্চ শ্রুতিবিরোধাদেব ন সম্ভবতীত্যুক্তং তৃতীয়াধ্যায়ারম্ভে পুনঃ সন্ন্যাসিনাং জ্ঞাননিষ্ঠা কর্ম্মিণাং কর্ম্মনিষ্ঠেত্যাশ্রমবিভাগমভিদধতা পূর্ব্বপ্রতিসিদ্ধকর্ম্মত্যাগাভ্যুপগমান্মিথো বিরোধো দর্শিতঃ স্যাদিত্যর্থঃ। ননু যথা ভগবতা প্রতিপাদিতং তথৈব বৃত্তিকৃতা ব্যাখ্যাতমিতি ন তস্যাপরাধোঽস্তীত্যাশঙ্ক্যাহ তৎকথমিতি। ন হি ইহ ভগবান্ বিরুদ্ধমর্থমভিধত্তে সর্ব্বজ্ঞস্য পরমাপ্তস্য বিরুদ্ধার্থ বাদিত্বাযোগাৎ কিন্তু তদভিপ্রায়াপরিজ্ঞানাদেব ব্যাখ্যাতুর্ব্বিরুদ্ধার্থবাদিতেত্যর্থঃ। ভগবতো বিরুদ্ধার্থবাদিত্বাভাবেঽপি শ্রোতুর্ব্বিরুদ্ধার্থপ্রতিপত্তিং প্রতীত্য ব্যাচক্ষাণো বৃত্তিকারো নাপরাধ্যতীত্যাশঙ্ক্যাহ শ্রোতা বেতি। অর্জ্জুনো হি শ্রোতা সোঽপি বুদ্ধিপূর্ব্বকারী ভগবদুক্তমেবাবধারয়ন্ন বিরুদ্ধমর্থমব ধারয়িতুমর্হতি তথা চ পরস্যৈব বিরুদ্ধার্থবাদিতেত্যর্থঃ। বিরোধং পরিহরন্নাশঙ্কতে তত্রেতি। সম্বন্ধগ্রন্থে হি বৃত্তিকারস্যৈতদভিপ্রেতং গৃহস্থানামেব সত্যং পরিপক্কজ্ঞানমন্তরেণ যাবজ্জীবশ্রুতিচোদিতাগ্নিহোত্রাদিত্যাগেন কেবলাদেবাপাতিকাদাত্মজ্ঞানান্মোক্ষমবেক্ষ্যমাণানাং যাবজ্জীবাদিশাস্ত্রৈরসৌ নিষিধ্যতে ন তু স্বরূপেণৈব কর্ম্মত্যাগো জ্ঞানান্মোক্ষো বা নিষেদ্ধুমিষ্যতে তৃতীয়ে পুনরধ্যায়ে কর্ম্মত্যাগিনাং গৃহস্থেভ্যো ব্যতিরিক্তানামেব কেবলাদাত্মজ্ঞানান্মোক্ষো বিবক্ষতে অতো ভিন্নবিষয়ত্বান্নিষেধাভ্যনুজ্ঞানয়োর্ন বিরোধাশঙ্কেত্যর্থঃ। বিধান্তরেণ বিরোধং দর্শয়ন্নুত্তরমাহ এতদপীতি। বিরোধমেবাকাঙ্ক্ষাদ্বার

## স্বামিকৃত টীকা।

তস্মাৎ যুধ্যস্বেতি' তস্মাদুত্তিষ্ঠেতি' চ বারং বারং বদন্ ঘোরে হিংসাত্মকে কর্ম্মণি মাং প্রবর্ত্তয়সি ॥ ১ ॥

## শাঙ্করভাষ্যম্।

রক্তো যো রক্তোঽপরমাত্মনি সর্ব্বৈষণাবিনির্ম্মুক্তঃ স ভৈক্ষ্যং ভোক্তুমর্হতি, কর্ম্মণা বধ্যতে জন্তুর্ব্বিদ্যয়া চ বিমুচ্যতে। তস্মাৎ কর্ম্ম ন কুর্ব্বন্তি যতয়ঃ পারদর্শিনইতি শুকানুশাসনং, ইহাপি চ সর্ব্বকর্ম্মাণি মনসা সন্ন্যস্যেত্যাদি, মোক্ষস্য চাকার্য্যাত্বান্মুমুক্ষোঃ কর্ম্মানর্থক্যং, নিত্যানি প্রত্যবায়পরিহার্থানীতি চেৎ নাস্যসন্ন্যাসিবিষয়ত্বাৎ প্রত্যবায়প্রাপ্তেন হ্যগ্নিকার্য্যাদ্যকরণাৎ সন্ন্যাসিনঃ প্রত্যবায়ঃ কল্পয়িতুং শাক্যো যথা ব্রহ্মচারিণাং অসন্ন্যাসিনামপি ন তাবন্নিত্যানাং কর্ম্মণামভাবাদেব ভাবরূপস্য প্রত্যবায়স্যোৎপত্তিঃ কল্পয়িতুং শক্যা কথমসততঃ সজ্জায়েতেত্যসতঃ সজ্জন্মাসংভবশ্রুতেঃ যদি বিহিতাকরণাদ্যসম্ভবাখ্যমপি প্রত্যবায়ং ব্রূয়াদ্বেদস্তদানর্থকরো বেদোঽপ্রমাণমিত্যুক্তং স্যাৎ বিহিতকরণাকরণয়োঃ দুঃখমাত্র

## গিরিকৃত টীকা।

সাধয়তি কথমিত্যাদিনা। শ্রৌতং কর্ম্ম গৃহস্থানামবশ্যমনুষ্ঠেয়মিত্যনেনাভিপ্রায়েণ তেষাং কেবলাদাত্মজ্ঞানান্মোক্ষো নিষিধ্যতে নতু গৃহস্থানাং জ্ঞানমাত্রায়ত্তং মোক্ষং প্রতিবিদ্ধান্যেষাং কেবলজ্ঞানাধীনো মোক্ষো বিবক্ষতে আশ্রমান্তরাণামপি স্মার্ত্তেন কর্ম্মণা সমুচ্চয়াভ্যুপগমাদিতি চোদয়তি অথেতি। এতৎপদপরামৃষ্টং বচনমেবাভিনয়তি কেবলাদিতি। ননু গৃহস্থানাং শ্রৌতকর্ম্মরাহিত্যেঽপি সতি স্মার্ত্তে কর্ম্মণি কুতোজ্ঞানস্য কেবলত্বং লভ্যতে যেন নিষেধোক্তিরর্থবতী তত্রাহ তত্রেতি। প্রকৃতবচনমেবসপ্তম্যর্থঃ, প্রধানং হি শ্রৌতং কর্ম্ম তদ্রাহিত্যে সতি স্মার্ত্তস্য কর্ম্মণঃ সতোঽপ্যসম্ভাবমভিপ্রেত্য জ্ঞানস্য কেবলত্বমুক্তমিতি যুক্তা নিষেধোক্তিরিত্যর্থঃ গৃহস্থানামেব শ্রৌতকর্ম্মসমুচ্চয়ো নান্যেষাং অন্যেষান্তু স্মার্ত্তেনেতি পক্ষপাতে হেত্বভাবং মন্বানঃ সন্ পরিহরতি এতদপীতি। তমেব হেত্বভাবং প্রশ্ন দ্বারা বিবৃণোতি কথমিত্যাদিনা। গৃহস্থানাং শ্রৌতস্মার্ত্তকর্ম্মসমুচ্চিতং জ্ঞানং মুক্তিহেতুরিত্যভ্যুপগমাৎ কেবলস্মার্ত্তকর্ম্মসমুচ্চিতাত্ততো ন মুক্তিরিতি নিষেধো যুজ্যতে ঊর্দ্ধরেতসান্তু স্মার্ত্তকর্ম্মমাত্রসমুচ্চিতাৎ জ্ঞানান্মুক্তিরিতি বিভাগে নাস্তি হেতুরিত্যর্থঃ। পক্ষপাতে কারণং নাস্তি ইত্যুক্ত্বা পক্ষপাতপরিত্যাগে করণমস্তীত্যাহ কিঞ্চেতি। গৃহস্থানামপি ব্রহ্মজ্ঞানং স্মার্ত্তৈরেব কর্ম্মভিঃ সমুচ্চিতং মোক্ষসাধনং ব্রহ্মজ্ঞানত্বাদূর্দ্ধরেতঃস্থ ব্যবস্থিতব্রহ্মজ্ঞানবদিতি পক্ষপাতত্যাগে হেতুং স্ফুটয়তি যদীত্যাদিনা। যদি গৃহস্থানাং ব্রহ্মজ্ঞানং স্মার্ত্তৈরেব কর্ম্মভিঃ সমুচ্চিতং তদীয়ং জ্ঞানং মোক্ষস্য হেতুরিতি বিবক্ষিতং তদা তান্ প্রতি যাবজ্জীবশ্রুতির্বিরুধ্যেত, যদি স্মার্ত্তৈরপি কর্ম্মভিঃ সমুচ্চিতং তদীয়ং জ্ঞানং মোক্ষসাধনং বিবক্ষিতং তদা সিদ্ধসাধ্যতেতি প্রাগুক্তমভিপ্রেত্য চোদয়তি অথেতি। আশ্রমান্তরাণাং তর্হি কেবলাদেব জ্ঞানান্মুক্তিরিতি প্রাগুক্তবিরোধতাদবস্থ্যমিত্যাশঙ্ক্যাহ ঊর্দ্ধরেতসাংত্বিতি। যথোক্তবিভাগে গার্হস্থ্যং ক্লেশাত্মকং কর্ম্ম বাহুল্যাৎ অনুপাদেয়মাপদ্যেতেতি দূষয়তি তত্রেতি।

## শাঙ্করভাষ্যম্।

ফলত্বাৎ তথা চ কারকং শাস্ত্রং ন জ্ঞাপকমিত্যনুপপন্নার্থং কল্পিতং স্যান্নচৈতদিষ্টং তস্মান্ন সন্ন্যাসিনাং কর্ম্মাণ্যতো জ্ঞানকর্ম্মণোঃ সমুচ্চয়ানুপপত্তিঃ, জ্যায়সী চেৎ কর্ম্মণস্তে মতা বুদ্ধিরিত্যর্জ্জুনস্য প্রশ্নানুপপত্তেশ্চ, যদি হি ভগবতা দ্বিতীয়েঽধ্যায়ে জ্ঞানং কর্ম্ম চ সমুচ্চয়েন ত্বয়া একেনানুষ্ঠেয়মিত্যুক্তং স্যাৎ ততোঽর্জ্জুনস্য প্রশ্নোঽনুপপন্নো জ্যায়সী চেৎ কর্ম্মণস্তে মতা বুদ্ধিরিত্যর্জ্জুনায় চেৎ বুদ্ধিকর্ম্মণী ত্বয়ানুষ্ঠেয়ে ইত্যুক্তে যা চ কর্ম্মণো জ্যায়সী বুদ্ধিঃ সাপ্যুক্তৈবেতি তৎ কিং কর্ম্মণি ঘোরে মাং নিযোজয়সি কেশবেতি উপলম্ভো বা প্রশ্নো বা ন

## গিরিকৃত টীকা।

সাধনভূয়স্ত্বে ফলভূয়স্ত্বমিতি ন্যায়মাশ্রিত্য শঙ্কতে অথেতি। ক্লেশবাহুল্যোপেতং শ্রৌতং স্মার্ত্তঞ্চ বহু কর্ম্ম তস্যানুষ্ঠানাৎ গৃহস্থস্য মোক্ষঃ স্যাদেবেত্যর্থঃ। একবাবনিরস্যং দর্শয়তি নাশ্রমান্তবানামিতি। তেষাং নাস্তি মুক্তিরিত্যত্র যাবজ্জীবাদিশ্রুতিবিহিতাবশ্যানুষ্ঠেয়কর্ম্ম-রাহিত্যং হেতুং সূচয়তি শ্রৌতেতি। শাস্ত্রবিরোধে ন্যায়স্য নিরবকাশত্বমভিপ্রেত্য দূষয়তি তদপীতি। একাশ্রম্যস্মৃত্যা গার্হস্থ্যস্যৈব প্রাধান্যাদনধিকৃতান্ধাদিবিষয়ং কর্ম্মসন্ন্যাসবি-ধানমিত্যাশঙ্ক্যাহ জ্ঞানাঙ্গত্বেনেতি। ন খল্বনধিকৃতানামন্ধাদীনাং সন্ন্যাসঃ শ্রবণাদ্যাবৃত্তি-দ্বারা জ্ঞানাঙ্গং ভবিতুমলং তেষাং শ্রবণাদ্যভ্যাসসামর্থ্যাদতঃ শ্রুত্যাদীনাং বিরোধে নাস্তি গার্হস্থ্যস্য প্রাধান্য মিত্যর্থঃ। তস্য প্রাধান্যাভাবে হেত্বন্তরমাহ আশ্রমেতি ব্রহ্মচর্য্যং সমাপ্য গৃহী ভবেৎ গৃহাদ্বনী ভূত্বা প্রব্রজেৎ যদিবেতরথা ব্রহ্মচর্য্যাদেব প্রব্রজেৎ গৃহাদ্বা বনাদ্বেতি শ্রুতৌ তস্যাশ্রমবিকল্পমেকে ব্রুবতে ইতি যমিচ্ছেত্তমাবসেদিত্যাদিস্মৃতৌ চাশ্র-মাণাং সমুচ্চযেন বিকল্পেন চাশ্রমান্তরমিচ্ছন্তং প্রতিবিধানান্ন গার্হস্থ্যস্য প্রধানত্বমিত্যর্থঃ যদি সর্ব্বেষামাশ্রমাণাং শ্রুতিস্মৃতিমূলত্বং তর্হি তত্তদাশ্রমবিহিতকর্ম্মণাং জ্ঞানেন সমুচ্চয়ঃ সিধ্যতীতি শঙ্কতে সিদ্ধন্তর্হীতি। যদ্যপি জ্ঞানোৎপত্তাবাশ্রমকর্ম্মণাং সাধনত্বং তথাপি জ্ঞানমুৎপন্নং নৈব ফলে সহকারিত্বেন তান্যপেক্ষতে অন্যথা সন্ন্যাসবিধ্যনুপপত্তেরিতি দূষয়তি ন মুমুক্ষোরিতি। সন্ন্যাস বিধানমেবানুক্রামতি ব্যুত্থায়েত্যাদিনা। এষণাভ্যো-বৈমুখ্যেনোত্থানং তৎপরিত্যাগঃ আশ্রমসম্পত্ত্যনন্তরং তত্র বিহিতকর্ম্মকলাপানুষ্ঠানমপি কর্ত্তব্যমিত্যাহ অথেতি। প্রাগুক্তানাং সত্যাদীনামল্পফলত্বান্ন্যাসস্য চ জ্ঞানদ্বারা মোক্ষফলত্বাদিত্যাহ তস্মাদিতি। অতিরিক্তমতিশয়বত্বং মহাফলমিতি যাবৎ। প্রকৃতকর্ম্মেভ্যঃ সকা-শান্ন্যাস এবাতিশয়বানাসীদিত্যুক্তেঽর্থে বাক্যান্তরং পঠতি ন্যাসএবেতি। লোকত্রয়হেতুং সাধনত্রয়ং পরিত্যজ্য সংসারাদ্বিরক্তাঃ সন্ন্যাসপূর্ব্বকাদাত্মজ্ঞানাদেবপ্রাপ্তবন্তো মোক্ষমিত্যাহ ন কর্ম্মণেতি। সতি বৈরাগ্যে নান্ত কিম্পাপেক্ষা সত্যাং সামগ্র্যাং কার্য্যপেক্ষানুপপত্তেরিত্যাহ ব্রহ্মচর্য্যাদেবেতি। ইত্যাদ্যাঃ সর্ব্ব কর্ম্মসংন্যাসবিধায়িনঃ শ্রুতয়ো ভবন্তীতি শেষঃ,

## শাঙ্করভাষ্যম্।

কথঞ্চনোপপদ্যতে ন চার্জ্জুনস্যৈব জ্যায়সী বুদ্ধির্নাচুষ্ঠেয়েতি ভগবতোক্তং পূর্ব্বমিতি কল্পয়িতুং যুক্তং যেন জ্যায়সী চেদিতি বিবেকতঃ প্রশ্নঃ স্যাৎ যদি পুনরেকস্য পুরুষস্য জ্ঞানকর্ম্মণো র্ব্বিরোধাৎ যুগপদনুষ্ঠানং ন সম্ভবতীতি ভিন্নপুরুষানুষ্ঠেয়ত্বং ভগবতা পূর্ব্বমুক্তং স্যাৎ ততোঽয়ং প্রশ্ন উপপন্নো জ্যায়সী চেদিত্যাদিরবিবেকতঃ প্রশ্নকল্পনায়ামপি ভিন্নপুরুষানুষ্ঠেয়ত্বেন ভগবতঃ প্রতিবচনং নোপপদ্যতে ন চাজ্ঞাননিমিত্তং ভগবৎপ্রতিবচনং কল্পনীয়ং অস্মাচ্চ ভিন্নপুরুষানুষ্ঠেয়ত্বেন জ্ঞানকর্ম্মনিষ্ঠয়োর্ভগবতঃ প্রতিবচনদর্শনাৎ জ্ঞানকর্ম্মণোঃ

---

## গিরিকৃত টীকা।

আত্মানমেব লোকমিচ্ছন্তঃ প্রব্রজন্তীত্যাদিবাক্যসংগ্রহার্থমাদিপদং। তত্রৈব স্মৃতিমুদাহরতি ত্যজেতি। ধর্ম্মাধর্ম্ময়োঃ সত্যানৃতয়োশ্চ সংসারারম্ভকত্বান্মুমুক্ষুণা তত্ত্যাগে প্রযতিতব্যমিত্যর্থঃ। ত্যক্তৃত্বাভিমানস্যাপি তত্ত্বতঃ স্বরূপসম্বন্ধাভাবাৎ ত্যাজ্যত্বমবিশিষ্টমিত্যাহ যেনেতি। অনুভবানুসারেণ প্রমাতৃতাপ্রমুখস্য সংসারস্য দুঃখফলত্বমালক্ষ্য মোক্ষহেতুসম্যক্‌জ্ঞানসিদ্ধয়ে ব্রহ্মচর্য্যাদেব পারিব্রাজ্যমনুষ্ঠেয়মিত্যুৎপত্তিবিধিমুপন্যস্যতি সংসারমিতি। তত্ত্বজ্ঞানমুদ্দিশ্য ব্রহ্মচর্য্যাদেব কর্ম্মসন্ন্যাসে সামগ্রীমভিদধানো বিনিয়োগবিধিং সূচয়তি পরমিতি। জ্ঞানকর্ম্মণোরসমুচ্চয়ার্থং ফলবিভাগং কথয়তি কর্ম্মণেতি। উক্তং ফলবিভাগমনূদ্য জ্ঞাননিষ্ঠানাং কর্ম্মসন্ন্যাসস্য কর্ত্তব্যত্বমাহ তস্মাদিতি। বাক্যশেষেঽপি সর্ব্বকর্ম্মসন্ন্যাসো বিবক্ষিতোঽস্তীত্যাহ ইহাপীতি। জ্ঞানার্থিনো মুমুক্ষোঃ সন্ন্যাসবিধ্যনুপপত্তিবাধিতং ন সমুচ্চয়বিধিবচনমিত্যুক্তমিদানীং মোক্ষস্বভাবালোচনয়াপি সমুচ্চয়বচনমনুচিতমিত্যাহ মোক্ষস্য চেতি। অকুর্ব্বন্বিহিতং কর্ম্ম নিন্দিতঞ্চ সমাচরন্। প্রসজ্জংশ্চেন্দ্রিয়ার্থেষু নরঃ পতনমৃচ্ছতীতি স্মৃতেঃ মুমুক্ষূণামপি প্রত্যবায়নিবৃত্তয়ে কর্ত্তব্যং নিত্যকর্ম্মেতি শঙ্কতে নিত্যানীতি। যো যস্মিন্ কর্ম্মণ্যধিকৃতস্তস্য তদকরণাৎ প্রত্যবায়ো ভবতি ন তু কর্ম্মানধিকারিণঃ সন্ন্যাসিনস্তদকরণাৎ প্রত্যবায়ঃ সম্ভবতীতি দূষয়তি নাসন্ন্যাসীতি। তদেব স্পষ্টয়তি ন হীতি। সমিদ্ধো মাধ্যযনাদ্যকরণাৎ প্রত্যবায়ঃ সন্ন্যাসিনো নাস্তীত্যর্থঃ। তত্র ব্যতিরেকোদাহরণমাহ যথেতি অকরণাৎ প্রত্যবায়োৎপত্তিমভ্যুপেত্যোক্তং সম্প্রতি প্রতিষিদ্ধকরণাদেব প্রত্যবায়ো নত্বকরণাদভাবাৎ ভাবোৎপত্তির্লোকবেদবিরুদ্ধত্বাদিত্যাহ ন তাবদিতি। নহু নিত্যকর্ম্মবিধায়ী বেদস্তদকরণাৎ প্রত্যবায়ো ভবতীতি ব্রবীতি তৎকথমকরণাৎ প্রত্যবায়ো ন ভবতীতি শ্রুতিমাশ্রিত্যোচ্যতে শ্রুত্যন্তরবিরোধাদিতিতত্রাহ যদীতি। বিহিতস্যাকরণে সত্যনর্থপ্রাপ্তের্ন নিত্যকর্ম্মবিধায়ী বেদোঽনর্থকরত্বেনাপ্রমাণমিত্যাশঙ্ক্যাহ বিহিতস্যেতি। ন হি বিহিতস্য করণে পিতৃলোকপ্রাপ্তিলক্ষণং ফলং ভবতেব্যতে ধূমাদিনা নয়নপীড়াদিদুঃখং তু প্রত্যক্ষমেবাকরণে চ প্রত্যবায়োৎপত্তিকৃতভয়থাপি পুরুষস্যানর্থকরোবে-

## শাঙ্করভাষ্যম্।

সমুচ্চয়ানুপপত্তিঃ তস্মাৎ কেবলাদেব জ্ঞানান্মোক্ষ ইত্যেষোঽর্থো নিশ্চিতো গীতাসু সর্ব্বোপনিষৎসু চ জ্ঞানকর্ম্মণোরেকং বদ নিশ্চিত্যেতি চৈকবিষয়ৈব প্রার্থনানুপপন্নোভয়োঃ সমুচ্চয়সম্ভবে কুরু কর্ম্মৈব তস্মাত্ত্বমিতি চ জ্ঞাননিষ্ঠাসম্ভবমর্জ্জুনস্যাবধারণেন দর্শয়িষ্যতি জ্যায়সী চেদিতি। জ্যায়সী শ্রেয়সী চেৎ যদি কর্ম্মণঃ সকাশাত্তে তব মতা অভিপ্রেতা বুদ্ধিজ্ঞানং হে জনার্দ্দন যদি বুদ্ধিকর্ম্মণী সমুচ্চিতে ইষ্টে তদৈকং শ্রেয়ঃ সাধনমিতি কর্ম্মণো জ্যায়সী বুদ্ধিরিতি কর্ম্মণোঽতিরিক্তং করণং বুদ্ধেরনুপপন্নং অর্জ্জুনেন কৃতং স্যান্নহিতদেব তস্মাৎ ফল-

## গিরিকৃত টীকা।

দোঽপ্রমাণমেব স্যাদিত্যর্থঃ। নন্বভাবস্যাপি ভাবোৎপাদনসামর্থ্যং বেদঃ সম্পাদয়িষ্যতি তথা চ বিহিতাকরণপ্রত্যবায়পরিহারো বিহিতকরণে ফলিষ্যতীতি নেত্যাহ তথা চেতি। লোকপ্রসিদ্ধপদার্থশক্ত্যাশ্রয়ণেন শাস্ত্রপ্রবৃত্ত্যঙ্গীকারাদপূর্ব্বশক্ত্যাধানাযোগাৎ জ্ঞাপকমেব শাস্ত্রমিত্যর্থঃ। কারকত্বে চ তস্যাপ্রামাণ্যমপ্রত্যহং স্যাদিত্যাহ কারকমিতি। ভবতু শাস্ত্রস্যাপ্রামাণ্যমিত্যাশঙ্ক্যাপৌরুষেয়তয়া অশেষদোষানাগন্ধিতত্বান্নৈবমিত্যাহ ন চেতি। অনির্ব্বাচ্যানুপলম্ভস্য সম্বেদনমভাবজ্ঞানে কারণসমীহিতসাধনজ্ঞানং তু চরণন্যাসাদিপ্রবৃত্তিকারণমিত্যঙ্গীকৃত্যোপসংহরতি তস্মাদিতি। অকরণাৎ প্রত্যবায়োৎপত্ত্যসম্ভবস্তচ্ছব্দার্থঃ। সন্ন্যাসিনাং জ্ঞাননিষ্ঠানাং কর্ম্মসন্ন্যাসিত্বাদেব কর্ম্মাসম্ভবে ফলিতমাহ অতইতি। সমুচ্চয়ানুপপত্তৌ হেত্বন্তরমাহ জ্যায়সীতি। প্রশ্নানুপপত্তিমেব প্রপঞ্চয়তি যদি হীতি। সমুচ্চয়োপদেশে প্রশ্নৈকদেশানুপপত্তেশ্চ ন তদুপপত্তেশ্চ ন তদুপদেশোপপত্তিরিত্যাহ অর্জ্জুনায়েতি। কর্ম্মণ্যেবাধিকারস্তে মা ফলেষু কদাচনেতি অর্জ্জুনং প্রত্যুপদেশাত্তং প্রতি জ্যায়সী বুদ্ধির্নোক্তেতি যুক্তং তৎকিমিত্যাত্ম্যুপালম্ভবচনমিত্যাশঙ্ক্যাহ ন চেতি। যেন কল্পনেন জ্যায়সী চেদিত্যাবভ্য তৎ কিং কর্ম্মণীত্যুপালম্ভাত্মা প্রশ্নঃ স্যাত্তথা ন যুক্তং কল্পয়িতুং এষা তেঽভিহিতা সাংখ্যে বুদ্ধিরিতি বচনবিরোধাদিতি যোজনা। কস্মিন্ পক্ষে তর্হি প্রশ্নস্যোপপত্তিরিত্যাশঙ্ক্যাহ যদীতি। ভগবদুক্তেঽর্থে প্রষ্টুর্বিবেকাভাবাৎ প্রশ্নঃ স্যাদিত্যাশঙ্ক্য পূর্ব্বোক্তমেবাধিকং বিবক্ষয়া স্মারয়তি অবিবেকতইতি। ভগবতোঽপি প্রতিবচনমজ্ঞাননিমিত্তং প্রশ্নাননুরূপত্বাদিত্যাশঙ্ক্যাধিকং দর্শয়তি ন চেতি। ভগবতঃ সর্ব্বজ্ঞত্বপ্রসিদ্ধিবিরোধাদজ্ঞানাধীনপ্রতিবচনাযোগাদিত্যর্থঃ। ইতশ্চ সমুচ্চয়ঃ শাস্ত্রার্থো ন ভবতীত্যাহ অস্মাচ্চেতিকস্তর্হি শাস্ত্রার্থো বিবক্ষিতস্তত্রাহ কেবলাদিতি। জ্ঞানকর্ম্মণোঃ সমুচ্চয়ানুপপত্তৌ কারণান্তরমাহ জ্ঞানেতি। বাক্যশেষবশাদপি সমুচ্চয়স্যাশাস্ত্রার্থতেত্যাহ কুরু কর্ম্মৈবেতি। প্রাথমিকেন সম্বন্ধগ্রন্থেন সমস্তশাস্ত্রার্থসংগ্রাহকেণ তদ্বিবরণাত্মনোঽস্য সন্দর্ভস্য নাস্তি পৌনরুক্ত্যমিতি মত্বা প্রতিপদং ব্যাখ্যাতুং প্রশ্নৈকদেশং সমুত্থাপয়তি জ্যায়সী চেদিতি।

ব্যামিশ্রেণেব বাক্যেন বুদ্ধিং মোহয়সীব মে।
তদেকং বদ নিশ্চিত্য যেন শ্রেয়োঽহমাপ্নুয়াম্ ॥ ২ ॥

## শাঙ্করভাষ্যম্।

তোঽতিবিক্তং স্যাৎ তথা চ কর্ম্মণঃ শ্রেয়স্করী ভগবতোক্তা বুদ্ধিরশ্রেয়স্করঞ্চ কর্ম্ম কুর্ব্বিতি মাং প্রতিপাদয়তি তৎ কিন্ন কারণমিতি ভগবত উপালম্ভমিব কুর্ব্বন্ তৎ কিং কস্মাৎ কর্ম্মণি ঘোরে ক্রূরে হিংসালক্ষণে মাং নিযোজয়সি কেশবেতি চ যদাহ তচ্চ নোপপদ্যতে ॥১॥

অথ স্মার্ত্তেনৈব কর্ম্মণা সমুচ্চয়ঃ সর্ব্বেষাং ভগবতোক্তঃ অর্জ্জুনেন চাবধারিতশ্চেৎ তৎ কিং কর্ম্মণি ঘোরে মাং নিযোজয়সীত্যাদি কথং যুক্তং বচনং, কিঞ্চ ব্যামিশ্রেণেতি ব্যামি-

## গিরিকৃত টীকা।

বেদাশ্চেৎ প্রমাণমিতিবচ্চেদিত্যস্য নিশ্চযার্থত্বং ব্যাবর্ত্তযতি যদিতি। বুদ্ধিশব্দস্যান্তঃকরণ বিষয়ত্বং ব্যবচ্ছিনত্তি জ্ঞানমিতি। পূর্ব্বার্দ্ধস্যাক্ষরযোজনাং কৃত্বা সমুচ্চয়াভাবে তাৎপর্য্যমাহ যদীতি। ইষ্টে ভগবতেতি শেষঃ, এবং জ্ঞানং কর্ম্মাসমুচ্চিতমিতি যাবৎ, জ্ঞানকর্ম্মণোর-ভীষ্টে সমুচ্চয়ে সমুচ্চিতস্য শ্রেয়ঃসাধনস্যৈকত্বাৎ কর্ম্মণঃ সকাশাৎ জ্ঞানস্য পৃথক্করণমযুক্ত মিত্যর্থঃ। একমপি সাধনং ফলতোঽতিবিক্তং কিং ন স্যাদিত্যাশঙ্ক্যাহ ন চ কেবলাৎ কর্ম্মণো জ্ঞানস্য কেবলস্য ফলতোঽতিবিক্তত্বং বিবক্ষিতম্। পৃথক্করণং সমুচ্চয়পক্ষে প্রত্যে-কং শ্রেয়ঃসাধনত্বানভ্যুপগমাদিতি ভাবঃ। পূর্ব্বার্দ্ধস্যেবোত্তরার্দ্ধস্যাপি সমুচ্চয়পক্ষে তুল্যা-নুপপত্তিরিত্যাহ তথেতি। দূরেণ হ্যবরং কর্ম্মেত্যত্র কর্ম্মণঃ সকাশাৎ বুদ্ধিঃ শ্রেয়স্করী ভগবতোক্তা কর্ম্ম চ বুদ্ধেঃ সকাশাদশ্রেয়স্করমুক্তঃ তথাপি তদেব কর্ম্ম কর্ম্মণ্যেবাধিকারস্তে মাফলেষিতি স্নিগ্ধং শিষ্যং ভক্তঞ্চ মাং প্রতি কুর্ব্বিতি ভগবান্ প্রতিপাদয়তি তত্র কারণা-নুপলম্ভাদযুক্তমতিক্রূরে কর্ম্মণি ভগবতো মন্নিযোজনমিতি যদর্জ্জুনো ব্রবীতি তচ্চ সমুচ্চয়-পক্ষেঽনুপপন্নং স্যাদিত্যর্থঃ ॥ ১ ॥

যত্তু বৃত্তিকারৈরুক্তং শ্রৌতেন স্মার্ত্তেন চ কর্ম্মণা সমুচ্চয়ো গৃহস্থানাং শ্রেয়ঃসাধনমি-তরেষাং স্মার্ত্তেনৈবেতি ভগবতোক্তমর্জ্জুনেন চ নির্দ্ধারিতমিতি তদেতদনুবদতি অথেতি। তথাপি তৎ কিমিত্যাদ্যুপালম্ভবচনমনুপপন্নং কর্ম্মমাত্রসমুচ্চয়বাদিনো ভগবতো নিযোজনা-ভাবাদিষ্টি দূষয়তি তৎ কিমিতি। ইতশ্চ প্রশ্নঃ সমুচ্চয়ানুসারী ন ভবতীত্যাহ কিঞ্চেতি।

## স্বামিকৃত টীকা।

নন্থ ধর্ম্ম্যাদ্ধি যুদ্ধাচ্ছ্রেয়োঽন্যৎ ক্ষত্রিয়স্য ন বিদ্যতইত্যাদিনা কর্ম্মণোঽপি শ্রেষ্ঠত্বমুক্তমে-বেত্যাশঙ্ক্যাহ ব্যামিশ্রেণেতি। কচিৎ কর্ম্মপ্রশংসা কচিৎ জ্ঞানপ্রশংসেত্যেবং ব্যামিশ্রং সন্দেহোৎপাদকমিব যদ্বাক্যং তেন মে মতিমুভয়ত্র দোলায়িতাং কুর্ব্বন্ মোহয়সীব পরম-

## শাঙ্করভাষ্যম্।

শ্রেণেব যদ্যপি বিবিক্তাভিধায়ী ভগবান্ তথাপি মম মন্দবুদ্ধের্ব্যামিশ্রমিব ভগবদ্বাক্যংপ্রতিভাতি তেন মম বুদ্ধিং মোহয়সীবেতি মম মন্দবুদ্ধের্ব্যামোহাপনযায় হি প্রবৃত্তস্ত্বন্তু কথং মোহয়স্যতো ব্রবীমি বুদ্ধিং মোহয়সীবেতি মমেতি ত্বং তু ভিন্নকর্ত্তৃকয়োর্জ্ঞানকর্ম্মণোরেকপুরুষানুষ্ঠানাসম্ভবং যদি মন্যসে তত্রৈবং সতি তত্তয়োবেকং বুদ্ধিং কর্ম্ম বা ইদমেবার্জ্জুনস্য যোগ্যং বুদ্ধিশক্ত্যবস্থানুরূপমিতি নিশ্চিত্য বদ ব্রূহি যেন জ্ঞানেন কর্ম্মণা বান্যতরেণ শ্রেয়োহমাপ্নুয়ামিতি যদুক্তং তদপি নোপপদ্যতে যদিহি কর্ম্মনিষ্ঠায়াং গুণভূতমপি জ্ঞানং ভগবতোক্তং স্যাত্তৎ কথং তয়োবেকং বদেতি এক বিষয়ৈবার্জ্জুনস্য শুশ্রূষা স্যান্নহি ভগবতোক্তমন্যতরদেব জ্ঞানকর্ম্মণোর্বক্ষ্যামি নৈব দ্বয়মিতি যেনোভয়প্রাপ্ত্যসম্ভবমাত্মনো মন্যমান একমেব প্রার্থযেৎ ॥ ২ ॥

## গিরিকৃত টীকা।

ভগবতো বিবিক্তার্থবাদিত্বাদযুক্তং ব্যামিশ্রেণেত্যাদিবচনমিত্যাশঙ্ক্যাহ যদ্যপীতি। যদি ভগবদ্বচনং সংকীর্ণমিব তে ভাতি তর্হি তেন ত্বদীয়বুদ্ধিব্যামোহনমেব বিবক্ষিতমিতি কিমিতি মোহয়সীবেত্যুচ্যতে তত্রাহ মমেতি। জ্ঞানকর্ম্মণী মিথোবিরোধাৎ যুগপদেকপুরুষানন্নুষ্ঠেয়তয়া ভিন্নকর্ত্তৃকে কথ্যেতে তথা চ তযোবন্যতবস্মিন্নেব ত্বং নিযুক্তো ন তু তে বুদ্ধিব্যামোহনমভিমতমিতি ভগবতো মতমনুবদতি ত্বমিতি। তদেকমিত্যাদিশ্লোকার্দ্ধেনোত্তরমাহ তত্রেতি। উক্তং ভাগবতমতং সপ্তম্যা পরামৃশ্যতে একমিত্যুক্তপ্রকারোক্তিঃ। একমিত্যুক্তমেব স্ফুটযতি বুদ্ধিমিতি। নিশ্চযপ্রকাবং প্রকটয়তি ইদমিতি। যোগ্যত্বং স্পষ্টযতি বুদ্ধীতি। অস্য হি ক্ষত্রিয়স্য সতোহন্তঃকরণস্য দেহশক্তেঃ সমরসমাবস্তাবস্থায়াশ্চেদমেব জ্ঞানং কর্ম্ম বানুগুণমিতি নির্দ্ধার্য্য ব্রূহি ইত্যর্থঃ। নিশ্চিত্যান্যতরোক্তৌ তেন শ্রোতুঃ শ্রেয়োবাপ্তিফলমাহ যেনেতি। তদেকমিত্যাদিবাক্যস্যাক্ষবোথমর্থমুক্ত্বা সমুচ্চয়স্য শাস্ত্রার্থত্বাভাবে তাৎপর্য্যমাহ যদিহীতি। গুণভূতমপি ইত্যাদিনা প্রধানভূতমপি চেতি বিবক্ষিতং নতূভয়প্রাপ্ত্যসম্ভবমাত্মনো মন্যমানস্যার্জ্জুনস্যান্যতরবিষয়া শুশ্রূষা ভবিষ্যতি নেত্যাহ নহীতি। যথোক্তভগবদ্বচনাভাবে দ্বয়প্রাপ্ত্যসম্ভববুদ্ধ্যা নানন্তরপ্রার্থনা সম্ভবতীত্যাহ যেনেতি। ন হি তথাবিধং ভগদ্বচনং ভবতেষ্টং ভগবতঃ সমুচ্চয়বাদিত্বাঙ্গীকাবাদতস্তদভাবাদুক্তবুদ্ধ্যা ন যুক্তান্যতরপ্রার্থনেত্যর্থঃ ॥ ২ ॥

## স্বামিকৃত টীকা।

কারুণিকস্য তব মোহকত্বং নাস্ত্যেব তথাপি ভ্রান্ত্যা মমৈবং ভাতি ইতীবশব্দেনোক্তং, অতঃ উভয়োর্ম্মধ্যে যদ্ভদ্রং তদেকং নিশ্চিত্য বদেতি। যদ্বা অহং ইদমেব শ্রেয়ঃসাধনমিতি নিশ্চিত্য যেনানুষ্ঠিতেন শ্রেয়োমোক্ষমহমাপ্নুয়াং প্রাপ্স্যামি তদেবৈকং নিশ্চিত্য বদেত্যর্থঃ ॥২॥

শ্রীভগবানুবাচ—লোকেঽস্মিন্ দ্বিবিধা নিষ্ঠা পুরা প্রোক্তা ময়ানঘ।
জ্ঞানযোগেন সাংখ্যানাং কর্ম্মযোগেন যোগিনাম্ ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

প্রশ্নানুরূপমেব প্রতিবচনং শ্রীভগবানুবাচ, লোকেঽস্মিন্নিতি। লোকে অস্মিন্ শাস্ত্রার্থানুষ্ঠানাধিকৃতানাং ত্রৈবর্ণিকাণাং দ্বিবিধা দ্বিপ্রকারা নিষ্ঠা স্থিতিরনুষ্ঠেয়তাৎপর্য্যং পুরা পূর্ব্বং সর্গাদৌ প্রজাঃ সৃষ্ট্বা তাসামভ্যুদয়নিঃশ্রেয়সপ্রাপ্তিসাধনং বেদার্থসম্প্রদায়ং আবিষ্কুর্ব্বতা প্রোক্তা ময়া সর্ব্বজ্ঞেন ঈশ্বরেণ হে অনঘ অপাপ তত্র কা সা দ্বিবিধা নিষ্ঠেত্যাহ জ্ঞানেতি। তত্র জ্ঞানযোগেন জ্ঞানমেব যোগস্তেন সাংখ্যানামাত্মবিষয়বিবেকজ্ঞানবতাং ব্রহ্মচর্য্যাশ্রমাদেব কৃতসন্ন্যাসানাং বেদান্তবিজ্ঞানসুনিশ্চিতার্থানাং পরমহংসপরিব্রাজকানাং ব্রহ্মণ্যেবাবস্থিতানাং নিষ্ঠা প্রোক্তা কর্ম্মযোগেন কর্ম্মৈব যোগঃ কর্ম্মযোগস্তেন কর্ম্মযোগেন

## গিরিকৃত টীকা।

সমুচ্চয়বিরোধিতয়া প্রশ্নং ব্যাখ্যায় তদ্বিরোধিত্বেনৈব প্রতিবচনমুত্থাপয়তি প্রশ্নেতি। যেয়ং ব্যবহারভূমিরুপলভ্যতে তত্র ত্রৈবর্ণিকাঃ জ্ঞানং কর্ম্ম বা শাস্ত্রীয়মনুষ্ঠাতুমধিক্রিয়ন্তে তেষাং দ্বিধা স্থিতির্ম্ময়া প্রোক্তেতি পূর্ব্বার্দ্ধং যোজয়তি লোকেঽস্মিন্নিতি। স্থিতিমেব ব্যাকরোতি অনুষ্ঠেয়েতি। পূর্ব্বং প্রবচনপ্রসঙ্গং প্রদর্শয়ন্ প্রবক্তারং বিশিনষ্টি সর্গাদাবিতি। প্রবচনস্যাযথার্থত্বশঙ্কাং বারয়তি সর্ব্বজ্ঞেনেতি। অর্জ্জুনস্য ভগবদুপদেশশ্রবণে যোগ্যত্বং সূচয়তি অনঘেতি। নির্দ্ধারণার্থে তত্রেতি সপ্তমীজ্ঞানং পরমার্থবস্তুবিষয়ং তদেব যোগশব্দিতং যুজ্যতে অনেন ব্রহ্মণেতি ব্যুৎপত্তেস্তেন নিষ্ঠেত্যনুবর্ত্ততে উক্তজ্ঞানোপায়মুপদিদিক্ষুঃ সাংখ্যশব্দার্থমাহ আত্মেতি। তেষামেব কর্ম্মনিষ্ঠত্বং ব্যাবর্ত্তয়তি ব্রহ্মচর্য্যেতি। তেষাং জপাদিপারবশ্যেন শ্রবণাদিপরাঙ্মুখত্বং পরাকরোতি বেদান্তেতি। উক্তবিশেষণবতাং মুখ্যসন্ন্যাসিত্বেন ফলাবস্থত্বং দর্শয়তি পরমহংসেতি। কর্ম্ম বর্ণাশ্রমবিহিতং ধর্ম্মাখ্যং তদেব যুজ্যতে তেনাভ্যুদয়েনেতি যোগস্তেন নিষ্ঠা কর্ম্মিণাং প্রোক্তেত্যনুষঙ্গং দর্শয়ন্নাহ কর্ম্মৈবে-

## স্বামিকৃত টীকা।

অত্রোত্তরং শ্রীভগবানুবাচ, লোকেঽস্মিন্নিতি। অয়মর্থঃ যদি ময়া পরস্পরনিরপেক্ষং মোক্ষসাধনত্বেন কর্ম্মজ্ঞানযোগরূপং নিষ্ঠাদ্বয়মুক্তং স্যাত্তর্হি দ্বয়োর্ম্মধ্যে যদ্ভদ্রং স্যাত্তদেকং বদেতি ত্বদীয়ঃ প্রশ্নঃ সঙ্গচ্ছতে' ন তু ময়া তথোক্তং' কিন্তু দ্বাভ্যামেকৈব ব্রহ্মনিষ্ঠোক্তা গুণপ্রধানভূতয়োস্তয়োঃ স্বাতন্ত্র্যানুপপত্তেঃ একস্যা এব তু প্রকারভেদমাত্রমধিকারিভেদে-মোক্তমিতি অস্মিন্ শুদ্ধাশুদ্ধান্তঃকরণতয়া দ্বিবিধে লোকেঽধিকারিজনে দ্বে বিধে প্রকারৌ যস্যাঃ সা দ্বিবিধা নিষ্ঠা মোক্ষপরতা পুরা পূর্ব্বাধ্যায়ে ময়া সর্ব্বজ্ঞেন প্রোক্তা স্পষ্টমেবো-

**ন কর্ম্মণামনারম্ভান্নৈষ্কর্ম্ম্যং পুরুষোঽশ্নুতে।**
**ন চ সন্ন্যাসনাদেব সিদ্ধিং সমধিগচ্ছতি ॥ ৪ ॥**

---

## শাঙ্করভাষ্যম্

যোগিনাং কর্ম্মিণাং নিষ্ঠা প্রোক্তেত্যর্থঃ, যদি চৈকেন পুরুষেণৈকস্মৈ পুরুষার্থায় জ্ঞানং কর্ম্ম চ সমুচ্চিত্যানুষ্ঠেয়ং ভগবতেষ্টমুক্তং বক্ষ্যমাণংবা গীতাসু বেদেষু চোক্তং কথমিহার্জ্জুনায়োপসন্নায় প্রিয়ায় বিশিষ্টভিন্নপুরুষকর্ত্তৃকে এব জ্ঞানকর্ম্মনিষ্ঠে ব্রূযাৎ, যদি পুনরর্জ্জুনো জ্ঞানং কর্ম্ম চ দ্বয়ং শ্রুত্বা স্বয়মেবানুষ্ঠাস্যতি অন্যেষাং তু ভিন্নপুরুষানুষ্ঠেয়তাং বক্ষ্যামীতি মতং ভগবতঃ কল্প্যেত তদা রাগদ্বেষবান্ অপ্রমাণভূতো ভগবান্ কল্পিতঃ স্যাত্তচ্চায়ুক্তং, তস্মাৎ কয়াপি যুক্ত্যা ন সমুচ্চয়ো জ্ঞানকর্ম্মণোঃ ॥ ৩ ॥

যদর্জ্জুনেনোক্তং কর্ম্মণো জ্যায়স্ত্বং বুদ্ধেঃ তচ্চ স্থিতমনিরাকরণাত্তস্যাশ্চ জ্ঞাননিষ্ঠায়াঃ

---

## গিরিকৃত টীকা।

ত্যাদিনা। এবং প্রতিবচনবাক্যস্যাক্ষরাণি ব্যাখ্যায় তস্যৈব তাৎপর্য্যার্থং কথয়তি যদি চেতি। ইষ্টস্যাপি দুর্ব্বোধত্বমাশঙ্ক্যাহ উক্তমিতি। জ্ঞানস্যাপি মূলবিকলতয়া বিভ্রমত্বমাশঙ্ক্যাহ বেদেষ্বিতি। তস্যাশিষ্যত্ববুদ্ধ্যান্যথাকথনমিত্যাশঙ্ক্যাহ উপসন্নায়েতি। তথাপি তস্মিন্নৌদাসীন্যাদন্যথোক্তিরিত্যাশঙ্ক্যাহ প্রিয়ায়েতি। ব্রবীতি চ ভিন্নপুরুষকর্ত্তৃকং নিষ্ঠাদ্বয়ং তেন সমুচ্চয়ো ভগবদভীষ্টঃ শাস্ত্রার্থো ন ভবতীতি শেষঃ। নম্বর্জ্জুনস্য প্রেক্ষাপূর্ব্বকারিত্বাজ্জ্ঞানকর্ম্মশ্রবণানন্তরমুভয়নির্দ্দেশানুপপত্ত্যা সমুচ্চয়ানুষ্ঠানং সম্পৎস্যতে তদ্ব্যতিরিক্তানান্তু জ্ঞানকর্ম্মণোর্ভিন্নপুরুষানুষ্ঠেয়ত্বং শ্রুত্বা প্রত্যেকং তদনুষ্ঠানং ভবিষ্যতীতি ভগবতো মতং কল্পতে তস্যার্জ্জুনেঽনুরাগাতিরেকাদিতরেষু চ তদভাবাদিতি তত্রাহ যদি পুনরিতি। অপ্রমাণভূতত্বমনাপ্তত্বং। ন চ ভগবতো রাগাদিমত্ত্বেনানাপ্তত্বং যুক্তং সমং সর্ব্বেষু ভূতেষু তিষ্ঠন্তমিত্যাদিবিরোধাদিত্যাহ তচ্চেতি। নিষ্ঠাদ্বয়স্য ভিন্নপুরুষানুষ্ঠেয়ত্বনির্দ্দেশফলমুপসংহরতি তস্মাদিতি ॥ ৩ ॥

## স্বামিকৃত টীকা।

ক্তা। প্রকারদ্বয়মেব নির্দ্দিশতি সাংখ্যানাং শুদ্ধান্তঃকরণানাং জ্ঞানভূমিকারূঢ়ানাং জ্ঞানপরিপাকার্থং জ্ঞানযোগেন ধ্যানাদিনা নিষ্ঠা ব্রহ্মপরতোক্তা 'তানি সর্ব্বাণি সংযম্য যুক্ত আসীত মৎপরইত্যাদিনা ' সাংখ্যভূমিকামনারূঢ়ানান্তু অন্তঃকরণশুদ্ধিদ্বারা তদারোহার্থং তদুপায়ভূতকর্ম্মযোগাধিকারিণাং যোগিনাং কর্ম্মযোগেন নিষ্ঠোক্তা 'ধর্ম্ম্যাদ্ধি যুদ্ধাচ্ছ্রেয়োঽন্যৎ ক্ষত্রিয়স্য ন বিদ্যতেইত্যাদিনা, অতএব তব চিত্তশুদ্ধ্যশুদ্ধিরূপাবস্থাভেদেন দ্বিবিধাপি নিষ্ঠোক্তা 'এষা তেঽভিহিতা সাংখ্যে বুদ্ধির্যোগে ত্বিমাং শৃণ্বিতি ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

সন্ন্যাসিনামেবানুষ্ঠেয়ত্বং ভিন্নপুরুষানুষ্ঠেয়ত্ববচনাচ্চ ভগবতএবমেবানুমতমিতি গম্যতে মাঞ্চ বন্ধকারণে কর্ম্মণ্যেব নিযোজয়সীতি বিষণ্ণমনসং অর্জ্জুনং কর্ম্মনামনারম্ভে ইত্যেবং মন্বান-মালক্ষ্যাহ ভগবান্ ন কর্ম্মণামনারম্ভাদিতি অথবা জ্ঞানকর্ম্মনিষ্ঠয়োঃ পরস্পরবিরোধাদেকেন পুরুষেণ যুগপদনুষ্ঠাতুমশক্যত্বে সতীতরেতরানপেক্ষয়োরেব পুরুষার্থহেতুত্বে প্রাপ্তে কর্ম্ম-নিষ্ঠাযাঃ জ্ঞাননিষ্ঠাপ্রাপ্তিহেতুত্বেন পুরুষার্থহেতুত্বং ন স্বাতন্ত্র্যেণ জ্ঞাননিষ্ঠা তু কর্ম্মনিষ্ঠোপায়-লব্ধাত্মিকা সতী স্বাতন্ত্র্যেণ পুরুষার্থহেতুরন্যানপেক্ষেত্যেতমর্থং দর্শয়িষ্যন্নাহ ভগবান্ ন কর্ম্মণেতি। ন কর্ম্মণামনারম্ভাদপ্রারম্ভাৎ কর্ম্মণাং ক্রিযাণাং যজ্ঞাদীনামিহ জন্মনি জন্মান্তরে বানুষ্ঠিতানামুপাত্তদুরিতক্ষয়হেতুত্বেন সত্ত্বশুদ্ধিকারণানাং তৎকারণত্বেন চ জ্ঞানোৎপত্তিদ্বারেণ জ্ঞাননিষ্ঠাহেতূনাং জ্ঞানমুৎপদ্যতে পুংসাং ক্ষয়াৎ পাপস্য কর্ম্মণঃ যথাদর্শতলপ্রখ্যে পশ্যত্যাত্মানমাত্মনীত্যাদি স্মরণাদনারম্ভাদননুষ্ঠানাৎ নৈষ্কর্ম্ম্যং নিষ্কর্ম্ম-

## গিরিকৃত টীকা।

কিমিতি ভগবতা বুদ্ধের্জ্জ্যায়স্ত্বং জ্যায়সী চেদিত্যত্রোক্তমুপেক্ষিতমিতি তত্রাহ যদর্জ্জু-নেনেতি। কিঞ্চ জ্ঞাননিষ্ঠায়াং সন্ন্যাসিনামেবাধিকারো ভগবতোঽভিপ্রেতোঽন্যথা তদীয়বিভাগবচনবিরোধাদিতি বিভাগবচনসামর্থ্যসিদ্ধমর্থমাহ তস্যাশ্চেতি। তর্হি বিভা-গবচনানুরোধাদর্জ্জুনস্যাপি সন্ন্যাসপূর্ব্বিকায়াং জ্ঞাননিষ্ঠায়ামেবাধিকারো ভবিষ্যতি নে-ত্যাহ মাঞ্চেতি। বুদ্ধের্জ্জ্যায়স্ত্বমুপেত্যাপীতি চকারার্থং, অর্জ্জুনমালক্ষ্য ভগবানাহেতি সম্বন্ধঃ। অন্তরেণাপি কর্ম্মাণি শ্রবণাদিভির্জ্ঞানাবাপ্তির্ন ভবিষ্যতীতি পরবুদ্ধিমনুরুধ্য বিশিনষ্টি কর্ম্মেতি। বিভাগবচনবশাদসমুচ্চয়শ্চেদুভযোরপি জ্ঞানকর্ম্মণোঃ স্বাতন্ত্র্যেণ পুরুষার্থহেতুত্বমন্যথা কর্ম্মবৎজ্ঞানমপি ন স্বাতন্ত্র্যেণ পুরুষার্থং সাধয়েদিত্যাশঙ্ক্য সম্বন্ধান্ত-রমাহ অথবেতি। তর্হি জ্ঞাননিষ্ঠাপি কর্ম্মনিষ্ঠাবৎ নিষ্ঠাত্বাবিশেষান্ন স্বাতন্ত্র্যেণ পুরুষার্থ-হেতুরিতি সমুচ্চয়সিদ্ধিরিত্যাশঙ্ক্যাহ জ্ঞাননিষ্ঠাত্বিতি। ন হি রজ্জুতত্ত্বজ্ঞানমুৎপন্নং ফলসিদ্ধৌ সহকারিসাপেক্ষ্যমালক্ষ্যতে তথেদমপি চোৎপন্নং মোক্ষায় নান্যদপেক্ষ্যতে তদাহ অন্যেতি। যস্য চৈতৎ কর্ম্মেতি শ্রুতাবিব কর্ম্মশব্দস্য ক্রিয়মাণবস্তুবিষয়ত্বমাশঙ্ক্য ব্যাচষ্টে ক্রিয়াণামিতি। তাশ্চ নিত্যনৈমিত্তিকত্বেন বিভজ্যতে যজ্ঞাদীনামিতি। অস্মি-ন্নেব জন্মন্যনুষ্ঠিতানাং কর্ম্মণাং বুদ্ধিশুদ্ধিদ্বারা জ্ঞানকারণত্বে ব্রহ্মচারিণাং কুতো জ্ঞানোৎপ-ত্তির্জ্জন্মান্তরকৃতানাং কর্ম্মণাং বা তথাত্বে গৃহস্থাদীনামৈহিকানি কর্ম্মাণি ন জ্ঞানহেতবঃ

## স্বামিকৃত টীকা।

অতঃ সম্যক্চিত্তশুদ্ধ্যর্থং জ্ঞানোৎপত্তিপর্য্যন্তং বর্ণাশ্রমোচিতানি কর্ম্মাণি কর্ত্তব্যানি অন্যথা চিত্তশুদ্ধ্যভাবেন জ্ঞানানুৎপত্তেরিত্যাহ ন কর্ম্মণামিতি। কর্ম্মণাং অনারম্ভাৎ

## শাঙ্করভাষ্যম্।

ভাবং কর্মশূন্যতাং জ্ঞানযোগেন নিষ্ঠাং নিষ্ক্রিয়াত্মস্বরূপেণৈবাবস্থামিতি যাবৎ পুরুষো নাশ্নুতে ন প্রাপ্নোতীত্যর্থঃ কর্মণামনারম্ভান্নৈষ্কর্ম্যং নাশ্নুত ইতি বচনাত্তদ্বিপর্য্যয়াৎ তেষামাবম্ভাৎ নৈষ্কর্ম্যমশ্নুতইতি গম্যতে, কস্মাৎ পুনঃ কারণাৎ কর্মণামনারম্ভান্নৈষ্কর্ম্যং নাশ্নুতইত্যুচ্যতে কর্মারম্ভস্যৈব নৈষ্কর্ম্যোপায়ত্বাৎ নহ্যুপায়মন্তরেণোপেয়োৎপত্তিরস্তি কর্মযোগোপায়ত্বঞ্চ নৈষ্কর্ম্যলক্ষণস্য জ্ঞানযোগস্য শ্রুতাবিহ চ প্রতিপাদনাৎ শ্রুতৌ তাবৎ প্রকৃতস্যাত্মলোকস্য বেদ্যস্য বেদনোপায়ত্বেন তমেতং বেদানুবচনেন ব্রাহ্মণা বিবিদিষন্তি যজ্ঞেনেত্যাদিনা কর্মযোগস্য জ্ঞানযোগোপায়ত্বং প্রতিপাদিতমিহাপি চ সন্ন্যাসস্তু মহাবাহো দুঃখমাপ্তুমযোগতঃ যোগিনঃ কর্ম কুর্ব্বন্তি সঙ্গং ত্যক্তাত্মশুদ্ধয়ে যজ্ঞোদানং তপশ্চৈব পাবনানি মনীষিণামিত্যাদি প্রতিপাদয়িষ্যতি, ননু চাভয়ং সর্ব্বভূতেভ্যো দত্বা নৈষ্কর্ম্যমাচরেদিত্যাদৌ কর্ত্তব্যকর্মসন্ন্যাসাদপি নৈষ্কর্মপ্রাপ্তিং দর্শয়তি লোকে চ কর্মণামনাবম্ভান্নৈষ্কর্ম্যমিতি প্রসিদ্ধতরমতশ্চ নৈষ্কর্ম্যার্থিনঃ কিং কর্মাবম্ভেনেতি প্রাপ্তমতঃ

## গিরিকৃত টীকা।

স্থবিত্যাশঙ্ক্যানিয়মং দর্শযতি ইহেতি। নেমানি সত্বশুদ্ধিকাবণানুপাত্তদুবিতপ্রতিবন্ধাদিত্যাশঙ্ক্যাহ উপাত্তেতি। তর্হি তাবতৈব কৃতার্থানাং কুতো জ্ঞাননিষ্ঠাহেতুত্বং তত্রাহ তৎকাবণত্বেনেতি। কর্মণাং চিত্তশুদ্ধিদ্বারা জ্ঞানহেতুত্বে মানমাহ জ্ঞানমিতি। অনাবম্ভশব্দস্যোপক্রমবিপবীতবিষয়ত্বং ব্যাবর্ত্তয়তি অননুষ্ঠানাদিতি। নিষ্কর্মণঃ সন্ন্যাসিনঃ কর্মজ্ঞানং ব্যাচষ্টে নৈষ্কর্ম্যমিনি। কর্মাভাবাবস্থাং ব্যবচ্ছিনত্তি জ্ঞানযোগেনেতি। তস্যাঃ সাধনপক্ষপাতিত্বং ব্যাবর্ত্তয়তি নিষ্ক্রিয়েতি। কর্মানুষ্ঠানোপায়লব্ধা জ্ঞাননিষ্ঠা স্বতন্ত্রা পুমর্থহেতুবিতি প্রকৃতার্থসমর্থব্যতিরেকবচনস্যান্বয়ে পর্য্যবসানং মত্বা ব্যাচষ্টে কর্মণামিতি। তদ্বিপর্য্যয়মেব ব্যাচষ্টে তেষামিতি। উক্তেঽর্থে হেতুং পৃচ্ছতি কস্মাদিতি। জিজ্ঞাসিতং হেতুমাহ উচ্যতইতি। উপায়ত্বেঽপি তদভাবে কুতো ন নৈষ্কর্ম্যসিদ্ধিরিত্যাশঙ্ক্যাহ ন হীতি। জ্ঞানযোগং প্রতি কর্মযোগস্য উপায়ত্বে শ্রুতিস্মৃতী প্রমাণয়তি কর্মযোগেতি। শ্রৌতমুপায়োপেযত্বপ্রতিপাদনং প্রকটযতি শ্রুতাবিতি। যত্তু গীতাশাস্ত্রে কর্মযোগস্য জ্ঞানযোগং প্রত্যুপায়ত্বোপপাদনং তদিদানীমুদাহরতি ইহাপি চেতি। ন কর্মণামিত্যাদিনা পূর্ব্বার্দ্ধং ব্যাখ্যায়োত্তরার্দ্ধং ব্যাখ্যাতুমাশঙ্কয়তি নন্বিতি। আদিশব্দেন শান্তোদান্ত-উপরতস্তিতিক্ষুঃ সন্ন্যাসযোগাদ্ যতয়ঃ শুদ্ধসত্বাইত্যাদি গৃহ্যতে। তত্রৈব লোক প্রসিদ্ধিমনু-

## স্বামিকৃত টীকা।

অননুষ্ঠানান্নৈষ্কর্ম্যং জ্ঞানং নাশ্নুতে ন প্রাপ্নোতি। ননু চৈতমেব প্রব্রাজিনো লোকমিচ্ছন্তঃ প্রব্রজন্তীতি শ্রুত্যা সন্ন্যাসস্য মোক্ষাঙ্গত্বশ্রুতেঃ সন্ন্যাসাদেব মোক্ষো ভবিষ্যতি

ন হি কশ্চিৎ ক্ষণমপি জাতু তিষ্ঠত্যকর্ম্মকৃৎ।
কার্য্যতে হ্যবশঃ কর্ম্ম সর্ব্বঃ প্রকৃতিজৈর্গুণৈঃ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

আহ ন চ সন্ন্যসনাদেবেতি নাপি সন্ন্যসনাদেব কেবলাৎ কর্ম্মপরিত্যাগমাত্রাদেব জ্ঞান-রহিতাৎ সিদ্ধিং নৈষ্কর্ম্ম্যলক্ষণাং জ্ঞানযোগেন নিষ্ঠাং সমধিগচ্ছতি ন প্রাপ্নোতি ॥ ৪ ॥

কস্মাৎ পুনঃ কারণাৎ কর্ম্ম সন্ন্যাসমাত্রাদেব কেবলাৎ জ্ঞানরহিতাৎ সিদ্ধিং নৈষ্কর্ম্ম্য-লক্ষণাং পুরুষো নাধিগচ্ছতীতি হেত্বাকাঙ্ক্ষায়ামাহ ন হীতি। ন হি যস্মাৎ ক্ষণমপি কিঞ্চিৎ কালং জাতু কদাচিদপি কশ্চিত্তিষ্ঠত্যকর্ম্মকৃৎ সন্ কস্মাৎ কার্য্যতে হি যস্মাদবশএব কর্ম্ম সর্ব্বঃ প্রাণী প্রকৃতিজৈঃ প্রকৃতিতো জাতৈঃ সত্ত্বরজস্তমোভির্গুণৈঃ অজ্ঞইতি বাক্য-শেষো যতো বক্ষ্যতি গুণৈর্যো ন বিচাল্যতইতি সাংখ্যানাং পৃথক্করণাদজ্ঞানামেব হি

## গিরিকৃত টীকা।

কুলয়তি লোকে চেতি। প্রসিদ্ধতরং যতো যতো নিবর্ত্ততে ততস্ততোবিমুচ্যতে নিবর্ত্ত-নাদ্ধি সর্ব্বতো ন বেত্তি দুঃখমপীত্যাদিদর্শনাদিতি শেষঃ। লৌকিকবৈদিকপ্রসি-দ্ধিভ্যাং সিদ্ধমর্থমাহ অতশ্চেতি। তত্রোত্তরত্বেনোত্তরার্দ্ধমবতার্য্য ব্যাকরোতি অতআহে-ত্যাদিনা। এবকারার্থমাহ কেবলাদিতি। তদেব স্পষ্টয়তি কর্ম্মেতি। উক্তমেব নঞম-নুকৃষ্য ক্রিয়াপদেন সঙ্গতিং দর্শয়তি ন প্রাপ্নোতীতি ॥ ৪ ॥

উক্তেঽর্থে বুভুৎসিতং হেতুং বক্তুমুত্তরশ্লোকমুত্থাপয়তি কস্মাদিতি। কস্মান্ন কর্ম্মস-ন্ন্যাসাদেব সিদ্ধমধিগচ্ছতীতি পূর্ব্বেণ সম্বন্ধঃ। কদাচিৎ ক্ষণমাত্রমপি ন কশ্চিদকর্ম্মকৃত্তি-ষ্ঠতীত্যত্র হেতুত্বেনোত্তরার্দ্ধং ব্যাচষ্টে কস্মাদিতি। সর্ব্বশব্দাৎ জ্ঞানবানপি গুণৈরবশঃ সন্ কর্ম্ম কার্য্যতে ততশ্চ জ্ঞানবতঃ সন্ন্যাসবচনমনবকাশং স্যাদিত্যাশঙ্ক্যাহ অজ্ঞইতীতি। তমেব বাক্যশেষং বাক্যশেষাবষ্টম্ভেন স্পষ্টয়তি যতইতি। আত্মজ্ঞানবতো গুণৈরবিচাল্যত্বয়া গুণাতীতত্ববচনাদজ্ঞস্যৈব সত্ত্বাদিগুণৈরিচ্ছাভেদেন কার্য্যকরণসংঘাতং প্রবর্ত্তয়িতুমশক্ত-স্যাজিতকার্য্যকরণসংঘাতস্য ক্রিয়াসু প্রবর্ত্তমানত্বমিত্যর্থঃ। জ্ঞানযোগেনেত্যাদিনা উক্তন্যায়াচ্চ বাক্যশেষোপপত্তিরিত্যাহ সাংখ্যানামিতি। জ্ঞানিনো গুণপ্রযুক্তচলনা-

## স্বামিকৃত টীকা।

কিং কর্ম্মভিরিত্যাশঙ্ক্যোক্তং ন চেতি। ন চিত্তশুদ্ধিং বিনা কৃতাৎ সন্ন্যসনাদেব জ্ঞান-শূন্যাৎ সিদ্ধিং মোক্ষং সমধিগচ্ছতি প্রাপ্নোতি ॥৪॥

কর্ম্মণাঞ্চ সন্ন্যাসস্তেষনাসক্তিমাত্রং ন তু স্বরূপেণাশক্যত্বাদিত্যাহ ন হি কশ্চিদিতি। জাতু কস্যাঞ্চিদপ্যবস্থায়াং ক্ষণমাত্রমপি কশ্চিদপি জ্ঞানী অজ্ঞানী বা অকর্ম্মকৃৎ কর্ম্মাণ্য-

কর্ম্মেন্দ্রিয়াণি সংযম্য য আস্তে মনসা স্মরন্।
ইন্দ্রিয়ার্থান্ বিমূঢ়াত্মা মিথ্যাচারঃ স উচ্যতে ॥ ৬ ॥
যস্ত্বিন্দ্রিয়াণি মনসা নিযম্যারভতেঽর্জ্জুন।
কর্ম্মেন্দ্রিয়ৈঃ-কর্ম্মযোগমসক্তঃ স বিশিষ্যতে ॥ ৭ ॥

## শাঙ্করভাষ্যম্।

কর্ম্মযোগো ন জ্ঞানিনাং জ্ঞানিনাস্তু গুণৈরচাল্যমানানাং স্বতশ্চলনাভাবাৎ কর্ম্মযোগো নোপপদ্যতে তথা চ ব্যাখ্যাতং বেদাবিনাশিনমিত্যত্র ॥ ৫ ॥

যস্তনাত্মজ্ঞশ্চোদিতং কর্ম্ম নারভতইতি তদসদেবেত্যাহ কর্ম্মেন্দ্রিয়াণীতি কর্ম্মেন্দ্রিয়াণি হস্তাদীনি সংযম্য সংহৃত্য য আস্তে তিষ্ঠতি মনসা স্মরন্নিন্দ্রিয়ার্থান্ বিষয়ান্ বিমূঢ়াত্মা বিমূঢ়ান্তঃকরণো মিথ্যাচারো মৃশাচারঃ পাপাচারঃ স উচ্যতে ॥ ৬ ॥

যস্ত্বিতি। যস্তু পুনঃ কর্ম্মণ্যধিকৃতোঽজ্ঞো বুদ্ধীন্দ্রিয়াণি মনসা নিযম্যারভতেঽর্জ্জুন কর্ম্মেন্দ্রিয়ৈর্ব্বাক্পাণ্যাদিভিঃ কিমারভতে ইত্যাহ কর্ম্মযোগমসক্তঃ সন ফলাভিসন্ধিবর্জ্জিতঃ স বিশিষ্যতে ইতরস্মান্মিথ্যাচারাৎ ॥ ৭ ॥

## গিরিকৃত টীকা।

ভাবেঽপি স্বাভাবিকচলনবলাৎ কর্ম্মযোগো ভবিষ্যতীত্যাশঙ্ক্যাহ জ্ঞানিনাং ত্বিতি প্রত্যগাত্মনি স্বারসিকচলনাসম্ভবে প্রাগুক্তং ন্যায়ং স্মারয়তি তথা চেতি ॥ ৫ ॥

আত্মজ্ঞবদনাত্মজ্ঞস্যাপি তর্হি কর্ম্মাকুর্ব্বতো ন প্রত্যবায়ঃ শরীরেন্দ্রিয়সংঘাতং নিয়ন্তুমসমর্থস্য মূর্খস্যাপি সন্ন্যাসসম্ভবাদিত্যাশঙ্ক্যাহ যস্ত্বিতি। তস্য চোদিতাকরণং তচ্ছব্দেন পরামৃশ্যতে তদসদিতি মিথ্যাচারত্বাদিতিভাবঃ। মিথ্যাচারতামেব বর্ণয়তি কর্ম্মেন্দ্রিয়াণীতি ॥৬॥

অনাত্মজ্ঞস্য চোদিতমকুর্ব্বতো জাগ্রতো বিষয়ান্তরদর্শনধ্রৌব্যাৎ মিথ্যাচারত্বেন প্রত্যবায়িত্বমুক্ত্বা বিহিতমনুতিষ্ঠতস্তস্যৈব ফলাভিলাষবিকলস্য সদাচারত্বেন বৈশিষ্ট্যমাচষ্টে

## স্বামিকৃত টীকা।

কুর্ব্বাণো ন তিষ্ঠতি। অত্র হেতুঃ প্রকৃতিজৈঃ স্বভাবপ্রভাবৈ রাগদ্বেষাদিভির্গুণৈঃ সর্ব্বোঽপি জনঃকর্ম্ম কার্য্যতে কর্ম্মণি প্রবর্ত্ত্যতে অবশোঽস্বতন্ত্রঃ সন্ ॥ ৫ ॥

অতোঽজ্ঞং কর্ম্মত্যাগিনং নিন্দতি কর্ম্মেন্দ্রিয়াণীতি। বাক্পাণ্যাদীনি কর্ম্মেন্দ্রিয়াণি সংযম্য নিগৃহ্য যো মনসা ভগবদ্ধ্যানচ্ছলেন ইন্দ্রিয়ার্থান্ বিষয়ান্ স্মরন্নাস্তেঽবিশুদ্ধতয়া মনসা আত্মনি স্থৈর্য্যাভাবাৎ স মিথ্যাচারঃ কপটাচারঃ কপটাচারো দাম্ভিক উচ্যতইত্যর্থঃ ॥৬॥

এতদ্বিপরীতঃ কর্ম্মকর্ত্তা তু শ্রেষ্ঠইত্যাহ যস্ত্বিন্দ্রিয়াণীতি। যস্তু জ্ঞানেন্দ্রিয়াণি মনসা

নিযতং কুরু কর্ম্ম ত্বং কর্ম্ম জ্যায়ো হ্যকর্ম্মণঃ।
শরীরযাত্রাপি চ তে ন প্রসিধ্যেদকর্ম্মণঃ॥ ৮॥
যজ্ঞার্থাৎ কর্ম্মণোঽন্যত্র লোকোঽয়ং কর্ম্মবন্ধনঃ।
তদর্থং কর্ম্ম কৌন্তেয় মুক্তসঙ্গঃ সমাচর॥ ৯॥

## শাঙ্করভাষ্যম্।

যতএবমতো নিয়তং নিত্যং শাস্ত্রোপদিষ্টং যো যস্মিন্ কর্ম্মণ্যধিকৃতঃ ফলায় চাশ্রুতং তন্নিয়তং কর্ম্ম তৎ কুরু ত্বং হে অর্জ্জুন যতঃ কর্ম্ম জ্যায়োঽধিকতরং ফলতো হি যস্মাদকর্ম্মণোঽকরণাদনারম্ভাৎ, কথং শরীরযাত্রা শরীরস্থিতিরপি চ তে তব ন প্রসিধ্যেৎ প্রসিদ্ধিং ন গচ্ছেদকর্ম্মণোঽকরণাৎ অতো দৃষ্টঃ কর্ম্মাকর্ম্মণোবর্থবিশেষো লোকে॥ ৮॥

যচ্চ মন্যসে বন্ধার্থত্বাৎ কর্ম্ম ন কর্ত্তব্যমিতি তদপ্যসৎ কথং যজ্ঞার্থাদিতি। যজ্ঞো বৈ বিষ্ণু-

## গিরিকৃত টীকা।

যস্ত্বিন্দ্রিয়াণীতি। বিহিতমনুতিষ্ঠতো মূর্খাৎ কর্ম্ম ত্যজতোবৈশিষ্ট্যমক্ষরযোজনয়া স্পষ্টয়তি যস্তু পুনরিতি॥ ৭॥

কর্ম্মানুষ্ঠায়িনো বৈশিষ্ট্যমুপদিষ্টমনূদ্য তদনুষ্ঠানমধিকৃতেন কর্ত্তব্যমিতি নিগময়তি যত ইতি। উক্তমেব হেতুং ভগবদনুমতিকথনেন স্ফুটয়তি কর্ম্মেতি। ইতশ্চ ত্বয়া কর্ত্তব্যং কর্ম্মেত্যাহ শরীরেতি। তন্নিয়তং তস্যাধিকৃতস্যেতি সম্বন্ধঃ। স্বর্গাদিফলে দর্শপূর্ণমাসাদাবধিকৃতস্য তস্য তদপি নিত্যং স্যাদিত্যাশঙ্ক্য বিশিনষ্টি ফলায়েতি। নিত্যং কর্ম্মেতি নিয়মেন কর্ত্তব্যমিত্যত্র হেতুমাহ যতইতি। হি শব্দোপাত্তমুক্তমেব হেতুমনুবদতি যস্মাদিতি। করণস্যাকরণাজ্জ্যায়স্ত্বং প্রশ্নপূর্ব্বকং প্রকটয়তি কথমিত্যাদিনা। সত্যেব কর্ম্মণি দেহাদিচেষ্টাদ্বারা শরীরং স্থাতুং পারয়তি তদভাবে জীবনমেব দুর্লভং ভবেদিতি ফলিতমাহ অতইতি॥ ৮॥

কর্ম্মণা বধ্যতে জন্তুরিতি স্মৃতের্ব্বন্ধার্থং কর্ম্ম তৎ ন শ্রেয়োঽর্থিনা কর্ত্তব্যমিত্যাশঙ্কামনূদ্য দূষয়তি যচ্চেত্যাদিনা। কর্ম্মাধিকৃতস্য তদকরণময়ুক্তমিতি প্রতিজ্ঞাতং প্রশ্নপূর্ব্বকং বিবৃ-

## স্বামিকৃত টীকা।

নিয়ম্য ঈশ্বরপরাণি কৃত্বা কর্ম্মেন্দ্রিয়ৈঃ কর্ম্মরূপং যোগমুপায়মারভতে অনুতিষ্ঠতি অসক্তঃ ফলাভিলাষরহিতঃ স বিশিষ্যতে বিশিষ্টো ভবতি চিত্তশুদ্ধ্যা জ্ঞানবান্ ভবতীত্যর্থঃ॥ ৭॥

নিয়তমিতি। যস্মাদেবং তস্মান্নিয়তং নিত্যং কর্ম্ম সন্ধ্যোপাসনাদি কুরু হি যস্মাদকর্ম্মণঃ সর্ব্বকর্ম্মণোঽকরণাৎ সকাশাৎ কর্ম্মকরণং জ্যায়োঽধিকতরং। অন্যথা অকর্ম্মণঃ সর্ব্বকর্ম্মশূন্যস্য তব শরীরনির্ব্বাহোঽপি ন ভবেৎ॥ ৮॥

সহযজ্ঞাঃ প্রজাঃ সৃষ্ট্বা পুরোবাচ প্রজাপতিঃ।—
অনেন প্রসবিষ্যধ্বমেষ বোঽস্ত্বিষ্টকামধুক্ ॥ ১০ ॥

## শাঙ্করভাষ্যম্।

রিতি শ্রুতের্যজ্ঞ ঈশ্বরস্তদর্থং যৎ ক্রিয়তে তদ্‌যজ্ঞার্থং কর্ম্ম তস্মাৎ কর্ম্মণোঽন্যত্রানেন কর্ম্মণা লোকোঽয়মধিকৃতঃ কর্ম্মকৃৎ কর্ম্মবন্ধনঃ কর্ম্ম বন্ধনং যস্য সোঽয়ং কর্ম্মবন্ধনো লোকো নতু যজ্ঞার্থাদতস্তদর্থংযজ্ঞার্থং কর্ম্ম কৌন্তেয় মুক্তসঙ্গঃ কর্ম্মফলসঙ্গঃ বর্জ্জিতঃসন্ সমাচর নির্ব্বর্ত্তয়॥৯॥

ইতশ্চাধিকৃতেন কর্ম্ম কর্ত্তব্যং সহেতি। সহযজ্ঞা যজ্ঞসহিতাঃ প্রজাস্ত্রয়ো বর্ণাস্তাঃসৃষ্ট্বোৎ-পাদ্য পুরা পূর্ব্বং সর্গাদাবুবাচোক্তবান্ প্রজাপতিঃ প্রজানাং স্রষ্টা অনেন যজ্ঞেন প্রস-বিষ্যধ্বং প্রসবো বৃদ্ধিরুৎপত্তিস্তাং কুরুধ্বমেষ বো যজ্ঞঃ যুষ্মাকমস্তু ভবতু ইষ্টকামধুক্ ইষ্টান্ অভিপ্রেতান্ কামান্ ফলবিশেষান্ দোগ্ধীতীষ্টকামধুক্ ॥ ১০ ॥

## গিরিকৃতটীকা।

ণোতি কথমিত্যাদিনা। ফলাভিসন্ধিমন্তরেণ যজ্ঞার্থং কর্ম্ম কুর্ব্বাণস্য বন্ধাভাবাৎ তাদ-র্থ্যেন কর্ম্ম কর্ত্তব্যমিত্যাহ তদর্থমিতি। যজ্ঞার্থং কর্ম্মেত্যযুক্তং ন হি কর্ম্মার্থমেব কর্ম্মে ত্যাশঙ্ক্য ব্যাচষ্টে যজ্ঞো বৈ বিষ্ণুরিতি। কথং তর্হি কর্ম্মণা বধ্যতে জন্তুরিতি স্মৃতিস্তত্রাহ তস্মাদিতি। ঈশ্বরার্পণবুদ্ধ্যা কৃতস্য কর্ম্মণো বন্ধার্থত্বাভাবে ফলিতমাহ অতইতি ॥ ৯ ॥

নিত্যস্য কর্ম্মণো নৈমিত্তিকসহিতস্যাধিকৃতেন কর্ত্তব্যত্বে হেত্বন্তরপরত্বেনানন্তরশ্লোকম বতারয়তি ইতশ্চেতি। কথং পুনরনেন যজ্ঞেন বৃদ্ধিরস্মাভিঃ শক্যা কর্ত্তুমিত্যাশঙ্ক্যাহ-এষ ইতি ॥১০॥

## স্বামিকৃত টীকা।

সাংখ্যাস্তু সর্ব্বমপি কর্ম্ম বন্ধকত্বান্নকার্য্যমিত্যাহুস্তন্নিরাকুর্ব্বন্নাহ যজ্ঞার্থাদিতি। যজ্ঞো বৈ বিষ্ণুরিতি শ্রুতেঃ, তদারাধনার্থাৎ কর্ম্মণোঽন্যত্র তদেকং বিনা লোকোঽয়ং কর্ম্মবন্ধনঃ কর্ম্মভির্ব্বধ্যতে নত্বীশ্বরারাধনার্থেন কর্ম্মণা অতস্তদর্থং বিষ্ণুপ্রীত্যর্থং মুক্তসঙ্গো নিষ্কামঃ সন্ কর্ম্ম সম্যগাচর ॥ ৯ ॥

প্রজাপতিবচনাদপি কর্ম্মকর্ত্তৈব শ্রেষ্ঠ ইত্যাহ সহযজ্ঞাইতি চতুর্ভিঃ। যজ্ঞেন সহ বর্ত্ত-ন্তইতি সহযজ্ঞা যজ্ঞাধিকৃতা ব্রাহ্মণাদ্যাঃ প্রজাঃ পুরা সর্গাদৌ সৃষ্ট্বেদমুবাচ ব্রহ্মা অনেন যজ্ঞেন প্রসবিষ্যধ্বং প্রসবো বৃদ্ধিঃ উত্তরোত্তরামতিবৃদ্ধিং লভধ্বমিত্যর্থঃ, তত্র হেতুঃ এষ যজ্ঞো বো যুষ্মাকমিষ্টকামধুক্ ইষ্টান্ কামান্ দোগ্ধীতি তথা অভীষ্টভোগপ্রদোঽস্ত্বিত্যর্থঃ, অত্র চ যজ্ঞগ্রহণমাবশ্যককর্ম্মোপলক্ষণার্থং, কাম্য কর্ম্মপ্রশংসা তু প্রকরণেঽসঙ্গতাপি সামা-ন্যতোঽকর্ম্মণঃ কর্ম্মশ্রেষ্ঠমিত্যেতদর্থমিত্যদোষঃ ॥ ১০ ॥

দেবান্ ভাবয়তানেন তে দেবা ভাবয়ন্তু বঃ।
পরস্পরং ভাবয়ন্তঃ শ্রেয়ঃ পরমবাপ্স্যথ ॥ ১১ ॥
ইষ্টান্ ভোগান্ হি বো দেবা দাস্যন্তে যজ্ঞভাবিতাঃ।
তৈর্দত্তান প্রদায়ৈভ্যো যো ভুঙ্‌ক্তে স্তেন এব সঃ ॥ ১২ ॥

---

## শাঙ্করভাষ্যম্।

কথং দেবানিতি। দেবানিন্দ্রাদীন্ ভাবয়ত বর্দ্ধয়তানেন যজ্ঞেন তে দেবা ভাবয়ন্তু আপ্যায়ন্তু বৃষ্ট্যাদিনা বো যুষ্মানেবং পরস্পরমন্যোন্যং ভাবয়ন্তঃ শ্রেয়ঃ পরমপি মোক্ষলক্ষণং জ্ঞানপ্রাপ্তিঃ ক্রমেণাবাপ্স্যথ স্বর্গং বা পরং শ্রেয়ো বা বাপ্স্যথ ॥ ১১ ॥
কিঞ্চ ইষ্টান্ ভোগানিতি। ইষ্টানভিপ্রেতান্ ভোগান্ হি বো যুষ্মভ্যং দেবা দাস্যন্তে বিতরিষ্যন্তি স্ত্রীপশুপুত্রাদীন্ যজ্ঞভাবিতা যজ্ঞৈর্বর্দ্ধিতাস্তোষিতাইত্যর্থঃ, তৈর্দেবৈর্দত্তান্ ভোগানপ্রদায়াদত্বা আনৃণ্যমকৃত্বেত্যর্থঃ এভ্যো দেবেভ্যো যো ভুঙ্‌ক্তে স্বদেহেন্দ্রিয়াণ্যেব তর্পয়তি স্তেন এব তস্করএব স দেবাদিস্বাপহারী ॥ ১২ ॥

---

## গিরিকৃত টীকা।

কথং পুনবতীষ্টফলবিশেষহেতুত্বং যজ্ঞস্য বিজ্ঞায়তে ন হি দেবতাপ্রসাদাদৃতে স্বর্গাদির ভ্যুদয়ো লভ্যতে নাপি সম্যগ্‌দর্শনমন্তরেণ নিশ্রেয়সং সেদ্ধুং পারয়তীতি শঙ্কতে কথমিতি ততঃ শ্লোকেনোত্তরমাহ দেবানিতি মুমুক্ষুত্ববিভাগেন শ্রেয়সি বিকল্পঃ ॥ ১১ ॥

ইতশ্চাধিকৃতেন কর্ম্ম কর্ত্তব্যমিত্যাহ কিঞ্চেতি। কথমস্মাভির্ভাবিতাঃ সন্তো দেবা ভাবয়িষ্যন্তি অস্মানিতি তদাহ ইষ্টানিতি। যজ্ঞানুষ্ঠানেন পূর্ব্বোক্তরীত্যা স্বর্গাপবর্গয়োর্ভাবেঽপি কথং স্ত্রীপশুপুত্রাদিসিদ্ধিবিত্যাশঙ্ক্য পূর্ব্বার্দ্ধং ব্যাকরোতি ইষ্টানভিপ্রেতানিতি। পশ্বাদিভিশ্চ যজ্ঞানুষ্ঠানদ্বারা ভোগো নিবর্ত্তনীয়োঽন্যথা প্রত্যবায়প্রসঙ্গাদিত্যুত্তরার্দ্ধং ব্যাচষ্টে তৈরিতি। আনৃণ্যমকৃত্বেত্যয়মর্থঃ,দেবানামৃষীণাং পিতৃণাঞ্চ যজ্ঞেন ব্রহ্মচর্য্যেণ প্রজয়া চ সন্তোষমনাপাদ্য স্বকীয়ং কার্য্যকারণসংঘাতমেব পোষ্টুং ভুঞ্জানস্তস্করো ভবতীতি ॥১২॥

## স্বামিকৃত টীকা।

কথমিষ্টকামদোগ্ধা যজ্ঞো ভবেদিত্যত্রাহ দেবানিতি। অনেন যজ্ঞেন যূয়ং দেবান্ ভাবয়ত হবির্ভাগৈঃ সংবর্দ্ধয়ত তে চ দেবা বো যুষ্মান্ সংবর্দ্ধয়ন্তু বৃষ্ট্যাদিনা অন্নোৎপত্তিদ্বারেণ এবমন্যোন্যং সংবর্দ্ধয়ন্তো দেবাশ্চ যূয়ঞ্চ পরস্পরং শ্রেয়োঽভীষ্টমর্থং প্রাপ স্যথ ॥ ১১ ॥
এতদেব স্পষ্টীকুর্ব্বন্ কর্ম্মাকরণে দোষমাহ ইষ্টামিতি। যজ্ঞৈর্ভাবিতা দেবা বৃষ্ট্যাদিদ্বারেণ বো যুষ্মভ্যং ভোগান্ দাস্যন্তে হি অতো দেবৈর্দত্তানন্নাদীন্ এভ্যো দেবেভ্যঃ পঞ্চযজ্ঞাদিভিরদত্বা যো ভুঙক্তে স তু চৌরএব জ্ঞেয়ঃ ॥ ১২ ॥

যজ্ঞশিষ্টাশিনঃ সন্তো মুচ্যন্তে সর্ব্বকিল্বিষৈঃ।
ভুঞ্জতে তে ত্বঘং পাপা যে পচন্ত্যাত্মকারণাৎ ॥ ১৩ ॥

## শাঙ্করভাষ্যম্।

যে পুনঃ দেবযজ্ঞাদীন্নির্ব্বর্ত্ত্য তচ্ছিষ্টমশনমমৃতাখ্যমশিতুং শীলং যেষাং তে যজ্ঞশিষ্টাশিনঃ সন্তো মুচ্যন্তে সর্ব্বকিল্বিষৈঃ সর্ব্বৈঃ পাপৈশ্চুল্ল্যাদিপঞ্চশূনাকৃতৈঃ প্রমাদকৃতহিংসাদিজনিতৈশ্চান্যৈর্যে ত্বাত্মম্ভরযো ভুঞ্জতে তে ত্বঘং পাপং স্বয়মপি পাপাঃ যে পচন্তি পাকং নির্ব্বর্ত্তয়ন্তি আত্মকারণাদাত্মহেতোঃ ॥ ১৩ ॥

## গিরিকৃত টীকা।

দেবাদিভ্যঃ সম্বিভাগমকৃত্বা ভুঞ্জানাং প্রত্যবায়িত্বমুক্ত্বা তদন্যেষাং সর্ব্বদোষবাহিত্যং দর্শযতি যে পুনরিতি। যজ্ঞশিষ্টাশিনো যে পুনস্তে তাদৃশাঃ সন্তঃ সর্ব্বকিল্বিষৈর্মুচ্যন্ত ইতি যোজনা। তৈর্দত্তানিত্যাদিনোক্তং নিগমযতি ভুঞ্জত ইতি। দেবযজ্ঞাদীনিত্যাদিশব্দেন পিতৃযজ্ঞো মনুষ্যযজ্ঞো ভূতযজ্ঞো ব্রহ্মযজ্ঞশ্চেতি চত্বারো যজ্ঞাঃ গৃহ্যন্তে, চুল্লীশব্দেন পিঠরধাবণাদ্যর্থক্রিয়াং কুর্ব্বতো বিন্যাসবিশেষবন্তস্ত্রয়ো গ্রাবাণো বিবক্ষ্যন্তে, আদিশব্দেন কণ্ডনী পেষণী মার্জ্জন্যুদককুম্ভশ্চেত্যেতে হিংসাহেতবো গৃহীতাস্তান্যেতানি পঞ্চপ্রাণিনাং শূন্যস্থানানি হিংসাকারণানি তৎপ্রযুক্তৈঃ সর্ব্বৈরপি বুদ্ধিপূর্ব্বকৈরদুরিতৈর্ম্মুচ্যন্তইতি সম্বন্ধঃ, প্রমাদো বিচারব্যতিরেকেণাবুদ্ধিপূর্ব্বকমুপনতং পাদপাতাদিকার্য্যং তেন প্রাণিনাং হিংসা সম্ভাব্যতে আদিশব্দেনাশুচিসংস্পর্শাদি গৃহীতং, তদুত্থৈশ্চ পাপৈর্মহাযজ্ঞকারিণো মুচ্যন্তে, উক্তং হি, কণ্ডনং পেষণং চুল্লী উদকুম্ভশ্চ মার্জ্জনং। পঞ্চ শূনা গৃহস্থস্য পঞ্চযজ্ঞাৎ প্রণশ্যতীতি। পঞ্চশূনাগৃহস্থস্য চুল্লী পেষণ্যবাস্করঃ কণ্ডনী চৈব কুম্ভশ্চ বধ্যতে যাস্তু বাহয়ন্নিতি চ, অস্যায়মর্থঃ, যা যথোক্তাঃ পঞ্চ সংখ্যকা গৃহস্থস্য শূনাস্তা যো বাহয়ন্নাপাদয়ন্ বর্ত্ততে তেন প্রাণিনো বুদ্ধিপূর্ব্বকঞ্চ বধ্যন্তে তৎপ্রযুক্তং সর্ব্বমপি পাপং মহাযজ্ঞানুষ্ঠানাৎ প্রণশ্যতীতি মহাযজ্ঞানুষ্ঠানস্তুত্যর্থং। তদনুষ্ঠানবিমুখান্ নিন্দতি যেত্বিতি। আত্মম্ভরিত্বমেবস্ফাবযতি যে পচন্তীতি। স্বদেহেন্দ্রিয়পোষণার্থমেব পাকং কুর্ব্বতাং দেবযজ্ঞাদিপরাঙ্মুখানাং পাপভূয়স্ত্বং দর্শয়তি ভুঞ্জত ইতি। পাঠক্রমস্ত্বর্থক্রমাদপবাধনীয়ঃ ॥১৩॥

## স্বামিকৃত টীকা।

ইতশ্চ যজ্ঞস্তএব শ্রেষ্ঠা নেতরইত্যাহ যজ্ঞশিষ্টাশিনইতি। বৈশ্বদেবাদিযজ্ঞাবশিষ্টং যে শ্নন্তি তে পঞ্চশূনাদিকৃতৈঃ সর্ব্বৈঃ কিল্বিষৈর্মুচ্যন্তে, পঞ্চশূনাশ্চ স্মৃতাবুক্তাঃ কণ্ডনী পেষণী চুল্লী উদকুম্ভী চ মার্জ্জনী। পঞ্চ শূনা গৃহস্থস্য তাভিঃ স্বর্গং ন গচ্ছতি। যে ত্বাত্মনো ভোজনার্থমেব পচন্তি ন তু বৈশ্বদেবাদ্যর্থং তে পাপা দুরাচারা অঘমেব ভুঞ্জতে ॥ ১৩ ॥

অন্নাদ্ভবন্তি ভূতানি পর্জ্জন্যাদন্নসম্ভবঃ।
যজ্ঞাদ্ভবতি পর্জ্জন্যো যজ্ঞঃ কর্ম্মসমুদ্ভবঃ॥ ১৪॥
কর্ম্ম ব্রহ্মোদ্ভবং বিদ্ধি ব্রহ্মাক্ষরসমুদ্ভবম্।
তস্মাৎ সর্ব্বগতং ব্রহ্ম নিত্যং যজ্ঞে প্রতিষ্ঠিতম্॥ ১৫॥

## শাঙ্করভাষ্যম্।

ইতশ্চাধিকৃতেন কর্ম্ম কর্ত্তব্যং জগচ্চক্রপ্রবৃত্তিহেতুর্হি কর্ম্ম কথমিত্যুচ্যতে অন্নাদ্ভবন্তীতি। অন্নাদ্ভুক্তাল্লোহিতরেতঃপরিণতাৎ প্রত্যক্ষং ভবন্তি জায়ন্তে ভূতানি পর্জ্জন্যাদ্বৃষ্টেরন্নস্য সম্ভবঃ অন্নসম্ভবঃ যজ্ঞাদ্ভবতি পর্জ্জন্যঃ অগ্নৌ প্রাহিতাহুতিঃ সম্যগাদিত্যমুপতিষ্ঠতে আদিত্যাজ্জায়তে বৃষ্টির্বৃষ্টেরন্নং ততঃ প্রজা ইতি যজ্ঞোঽপূর্ব্বং স চ যজ্ঞঃ কর্ম্মসমুদ্ভবঃ ঋত্বিগ্‌যজমানয়োশ্চ ব্যাপারঃ কর্ম্ম ততঃ সমুদ্ভবো যস্য যজ্ঞস্যাপূর্ব্বস্য স যজ্ঞঃ কর্ম্মসমুদ্ভবঃ॥ ১৪॥

তচ্চ এবম্বিধং কর্ম্ম কুতো জাতমিত্যাহ কর্ম্মেতি। তচ্চ কর্ম্ম ব্রহ্মোদ্ভবং ব্রহ্ম বেদ স উদ্ভবো যস্য তৎ কর্ম্ম ব্রহ্মোদ্ভবং বিদ্ধি বিজানীহি ব্রহ্ম পুনর্ব্বেদাখ্যমক্ষরসমুদ্ভবং অক্ষরং ব্রহ্ম

## গিরিকৃত টীকা।

দেবযজ্ঞাদিকং কর্ম্মাধিকৃতেন কর্ত্তব্যমিত্যত্র হেত্বন্তরমিতঃ শব্দোপাত্তমেব দর্শয়তি জগদিতি নন্ভুক্তমন্নং রেতো লোহিতপরিণতিক্রমেণ প্রজারূপেণ জায়তে তচ্চান্নং বৃষ্টিসম্ভবং প্রত্যক্ষদৃষ্টং তৎ কথং কর্ম্মণো জগচ্চক্রপ্রবর্ত্তকত্বমিতি শঙ্কতে কথমিতি। পারম্পর্য্যেণ কর্ম্মণস্তদ্ধেতুত্বং সাধয়তি উচ্যতইতি। উক্তেঽর্থে স্মৃত্যন্তরং সংবাদয়তি অগ্নাবিতি। তত্র হি দেবতাভিধ্যানপূর্ব্বকং তদুদ্দেশেন প্রাহিতাহুতিরপূর্ব্বতাং গতা রশ্মিদ্বারেণাদিত্যমারুহ্য বৃষ্ট্যাত্মনা পৃথিবীং প্রাপ্য ব্রীহিযবাদ্যন্নভাবমাপাদ্য সংস্কৃতো ভূত্বা শুক্রশোণিতরূপেণ পরিণতা প্রজাভাবং প্রাপ্নোতীত্যর্থঃ। যজ্ঞঃ কর্ম্মসমুদ্ভব ইত্যযুক্তং স্বস্যৈব সোদ্ভবে কারণত্বাযোগাদিত্যাশঙ্ক্যাহ ঋত্বিগিতি। দ্রব্যদেবতযোঃ সংগ্রাহকশ্চকারঃ॥ ১৪॥

যদপূর্ব্বহেতুত্বেন কর্ম্মোক্তং তৎ কিং চৈত্যবন্দনাদি কিম্বাগ্নিহোত্রাদি ইতি সন্দিহানং প্রত্যাহ কর্ম্মেতি। কিমিতি কর্ম্মণো ব্রহ্মোদ্ভবত্বমুচ্যতে সর্ব্বস্য তদুদ্ভবত্বাবিশেষাদিত্যা-

## স্বামিকৃত টীকা।

জগচ্চক্রপ্রবৃত্তিহেতুত্বাদপি কর্ম্ম কর্ত্তব্যমিত্যাহ অন্নাদিতি ত্রিভিঃ। অন্নাচ্ছুক্রশোণিতরূপেণ পরিণতাদ্ভূতান্যুৎপদ্যন্তে অন্নস্যচ সম্ভবঃ পর্জ্জন্যাদ্বৃষ্টেঃ, স চ পর্জ্জন্যো যজ্ঞাদ্ভবতি, সচ যজ্ঞঃ কর্ম্মসমুদ্ভবঃ কর্ম্মণা যজমানাদিব্যাপারেণ সম্যক্ সম্পদ্যতইত্যর্থঃ, অগ্নৌ প্রাহিতাহুতিঃ সম্যগাদিত্যমুপতিষ্ঠতে, আদিত্যাজ্জায়তে বৃষ্টির্বৃষ্টেরন্নং ততঃ প্রজা ইতি শ্রুতেঃ॥১৪॥

তথা কর্ম্মেতি। তচ্চ যজমানাদিব্যাপাররূপং কর্ম্ম ব্রহ্মোদ্ভবং বিদ্ধি ব্রহ্ম বেদস্তস্মাৎ

এবং প্রবর্ত্তিতং চক্রং নানুবর্ত্তয়তীহ যঃ।
অঘায়ুরিন্দ্রিয়ারামো মোঘং পার্থ স জীবতি ॥ ১৬ ॥

## শাঙ্করভাষ্যম্।

পরমাত্মা সমুদ্ভবো যস্য তদক্ষরসমুদ্ভবং ব্রহ্ম বেদইত্যর্থঃ, যস্মাৎ সাক্ষাৎ পরমাত্মাখ্যাদক্ষরাত্তৎপুরুষনিশ্বাসবৎ সমুদ্ভবং ব্রহ্ম তস্মাৎ সর্ব্বার্থপ্রকাশকত্বাৎ সর্ব্বগতমপি সৎ নিত্যং সদা যজ্ঞবিধিপ্রধানত্বাৎ যজ্ঞে প্রতিষ্ঠিতং ॥ ১৫ ॥

এবমিতি। এবমীশ্বরেণ বেদযজ্ঞপূর্ব্বকং জগচ্চক্রং প্রবর্ত্তিতং নানুবর্ত্তয়তীহ লোকে যঃ কর্ম্মণ্যধিকৃতঃ সন্নঘায়ুরঘং পাপমায়ুর্জীবনং যস্য সোঽঘায়ুঃ পাপজীবনইতি যাবৎ

## গিরিকৃতটীকা।

শঙ্ক্যাহ ব্রহ্ম বেদ ইতি। ব্রহ্ম তর্হি বেদাখ্যমনাদিনিধনমিতি তত্রাহ ব্রহ্ম পুনরিতি। অক্ষরাত্মনো বেদস্য পুনরক্ষরেভ্যঃ সকাশাদেব সমুদ্ভবো ন সম্ভবতীত্যাশঙ্ক্যাহ অক্ষরমিতি। ব্রহ্মেত্যক্ষরমেবোক্তং, তৎ কথং তস্মাদেবোদ্ভবতীত্যাশঙ্ক্য ব্রহ্মশব্দার্থমুক্তমেব স্মারয়তি ব্রহ্মবেদইতি। নন্বু ব্রহ্মশব্দিতস্য বেদস্যাপি পৌরুষেয়ত্বাৎ প্রামাণ্যসন্দেহাৎ কথং তদুক্তমগ্নিহোত্রাদিকং কর্ম্ম নির্দ্ধারয়িতুং শক্যতে তত্রাহ যস্মাদিতি। কথং তর্হি তস্য যজ্ঞে প্রতিষ্ঠিতত্বং সর্ব্বগতত্বে বিশেষাযোগাদিত্যাশঙ্ক্যাহ সর্ব্বগতমপীতি ॥ ১৫ ॥

অধিকৃতেনাধ্যয়নাদিদ্বারা জগচ্চক্রমনুবর্ত্তনীয়মন্যথেশ্বরাজ্ঞাতিলঙ্ঘনস্তস্য প্রত্যবায়ঃ স্যাদিত্যাহ এবমিতি। ন কর্ম্মণামনারম্ভাদিত্যাদিনোক্তমুপসংহরতি তস্মাদিতি। জগচ্চক্রস্য প্রাগুক্তপ্রকারেণানুবর্ত্তনে বৃথাজীবননথসাধনং যস্মাত্তস্মাজ্জীবতা নিয়তং কর্ম্ম কর্ত্তব্যমিত্যর্থঃ। যদ্যধি কৃতেন কর্ত্তব্যমেব কর্ম্ম তর্হি কিমিত্যজ্ঞেনেতি বিশিষ্যতে জ্ঞান-

## স্বামিকৃতটীকা।

প্রবৃত্তং জানীহি, তচ্চ বেদাখ্যং ব্রহ্ম অক্ষরাৎ পরব্রহ্মণঃ সমুদ্ভূতং জানীহি, অস্য মহতো ভূতস্য নিশ্বসিতমেতদৃগ্বেদো যজুর্ব্বেদঃ সামবেদঃ ইতি শ্রুতেঃ, যত এবমক্ষরাদেব যজ্ঞপ্রবৃত্তেরত্যন্তমভিপ্রেতো যজ্ঞস্তস্মাৎ সর্ব্বগতমপ্যক্ষরং ব্রহ্ম নিত্যং সর্ব্বদা যজ্ঞে প্রতিষ্ঠিতং যজ্ঞেনোপায় ভূতেন প্রাপ্যত ইতি যজ্ঞে প্রতিষ্ঠিতমুচ্যত ইতি উদ্যমস্থা সদা লক্ষ্মীরিতিবৎ। যদ্বা যস্মাজ্জগচ্চক্রস্য মূলং কর্ম্ম তস্মাৎ সর্ব্বগতং মন্ত্রার্থবাদৈঃ সর্ব্বেষু ভূতার্থাখ্যানাদিষু গতং স্থিতমপি বেদাখ্যং ব্রহ্ম সর্ব্বদা যজ্ঞে তাৎপর্য্যেণ প্রতিষ্ঠিতং অতো যজ্ঞাদি কর্ম্ম কর্ত্তব্যমিত্যর্থঃ ॥ ১৫ ॥

যস্মাদেবং পরমেশ্বরেণৈব ভূতানাং পুরুষার্থসিদ্ধয়ে কর্ম্মাদিচক্রং প্রবর্ত্তিতং তস্মাত্তদকুর্ব্বতো বৃথৈব জীবিতমিত্যাহ এবমিতি। পরমেশ্বরবাক্যভূতাদ্বেদাখ্যব্রহ্মণঃ পুরুষাণাং

যস্ত্বাত্মরতিরেব স্যাদাত্মতৃপ্তশ্চ মানবঃ।
আত্মন্যেব চ সন্তুষ্টস্তস্য কার্য্যং ন বিদ্যতে ॥ ১৭ ॥

## শাঙ্করভাষ্যম্।

ন্দ্রিয়ারাম ইন্দ্রিয়ৈরারমণমাক্রীড়া বিষয়েষু যস্য স ইন্দ্রিয়ারামো মোঘং বৃথা হে পার্থ স জীবতী তস্মাদজ্ঞেনাধিকৃতেন কর্ত্তব্যমেব কর্ম্মেতি প্রকরণার্থঃ, প্রাগাত্মজ্ঞাননিষ্ঠাযোগ্যতা-প্রাপ্তেস্তাদর্থ্যেন কর্ম্মযোগানুষ্ঠানমধিকৃতেনানাত্মজ্ঞেন কর্ত্তব্যমিত্যেতৎ ন কর্ম্মণামনারম্ভা-দিত্যত আরভ্য শরীরযাত্রাপি চ তে ন প্রসিধ্যেদকর্ম্মণ ইত্যেবমন্তেন প্রতিপাদ্য যজ্ঞার্থাৎ কর্ম্মণোঽন্যত্রেত্যাদিনা মোঘং পার্থ স জীবতীত্যেবমন্তেনাপি গ্রন্থেন প্রাসঙ্গিকমধিকৃত-স্যানাত্মবিদঃ কর্ম্মানুষ্ঠানে বহুকারণমুক্তং তদকরণে চ দোষসংকীর্ত্তনং কৃতং ॥ ১৬ ॥

এবং স্থিতে কিমেবং প্রবর্ত্তিতং চক্রং সর্ব্বেণানুবর্ত্তনীয়মাহোস্বিৎ পূর্ব্বোক্তকর্মযোগা-নুষ্ঠানোপায়প্রাপ্যামাত্মবিদো জ্ঞানযোগেনৈব নিষ্ঠামাত্মবিদ্ভিঃ সাংখ্যৈরনুষ্ঠেয়ামপ্রাপ্তে-নৈবেত্যেবমর্থমর্জ্জুনস্য প্রশ্নমাশঙ্ক্য স্বযমেব বা শাস্ত্রার্থস্য বিবেকপ্রতিপত্ত্যর্থমেব চৈত

## গিরিকৃতটীকা।

নিষ্ঠেনাপি তৎ কর্ত্তব্যমেবাধিকৃতত্বাবিশেষাদিত্যাশঙ্ক্য পূর্ব্বোক্তমনুবদতি প্রাগিতি। ন হি জ্ঞানকর্ম্মণোর্ব্বিরোধাৎ জ্ঞাননিষ্ঠেন কর্ম্ম কর্ত্তুং শক্যতে তথা চানাত্মজ্ঞেনৈব চিত্তশুদ্ধ্যাদি-পরম্পরয়া জ্ঞানার্থং কর্ম্মানুষ্ঠেয়মিতি প্রতিপাদিতমিত্যর্থঃ। তর্হি যজ্ঞার্থাদিত্যাদি কিমর্থং ন হি তত্র জ্ঞাননিষ্ঠা প্রতিপাদ্যতে কর্ম্মনিষ্ঠা তু পূর্ব্বমেবোক্তত্বান্নাত্র বক্তব্যেত্যাশঙ্ক্য বৃত্তমর্থান্তরমনুবদতি প্রতিপাদ্যেতি। প্রাসঙ্গিকমজ্ঞস্য কর্ম্ম কর্ত্তব্যতোক্তিপ্রসঙ্গাগতমিতি যাবৎ, বহু কারণমীশ্বরপ্রসাদো দেবতাপ্রীতিশ্চেত্যাদিদোষসংকীর্ত্তনং তৈরদত্তা ন প্রদায়ে-ত্যাদি ॥ ১৬ ॥

বৃত্তমর্থমেবং বিভজ্যানুদ্যানন্তরশ্লোকমাশঙ্ক্যোত্তরত্বেনাবতারয়তি এবমিতি। অর্জ্জু-নস্য প্রশ্নমিত্যেবমর্থমশঙ্ক্যাহ ভগবানিতি সম্বন্ধঃ। নন্বেষা শঙ্কা নাবকাশমাসাদয়ত্যনা-ত্মজ্ঞেন কর্ত্তব্যং কর্ম্মেতি বহুশো বিশেষিতত্বাদিত্যাশঙ্ক্যাহ স্বয়মেবেতি। কিমর্থং শ্রুত্যর্থং

## স্বামিকৃতটীকা।

কর্ম্মণি, প্রবৃত্তিস্ততঃ কর্ম্মনিষ্পত্তিস্ততঃ পর্জন্যস্ততোঽন্নং ততো ভূতানি ভূতানাং পুনস্তথৈব কর্ম্মপ্রবৃত্তিরিত্যেবং প্রবর্ত্তিতং চক্রং যো নানু বর্ত্তয়তি নানুতিষ্ঠতি অঘং পাপরূপমায়ুর্যস্য সঃ, যত ইন্দ্রিয়ৈর্ব্বিষয়েষ্বেবারমতি ন ত্বীশ্বরাধনার্থে কর্ম্মণি অতো মোঘং ব্যর্থঃ স জীবতি ॥১৬॥

তদেবং ন কর্ম্মণামনারম্ভাদিত্যাদিনা অজ্ঞস্যান্তঃকরণশুদ্ধ্যর্থং কর্ম্মযোগমুক্ত্বা জ্ঞানিনঃ কর্ম্মানুপযোগমাহ যস্ত্বিতি দ্বাভ্যাং। আত্মন্যেব রতিঃ প্রীতির্যস্য সঃ, ততশ্চাত্মন্যেব তৃপ্তঃ

## শাঙ্করভাষ্যম্ ।

মাত্মানং বিদিত্বা নিবৃত্তমিথ্যাজ্ঞানাঃ সন্তো ব্রাহ্মণা মিথ্যাজ্ঞানবদ্ভিরবশ্যং কর্ত্তব্যেভ্যঃ পুত্রৈষণাদিভ্যো ব্যুত্থায়াথ ভিক্ষাচর্য্যং শরীরস্থিতিমাত্রপ্রযুক্তং চরন্তি ন তেষামাত্মজ্ঞাননিষ্ঠাব্যতিরেকেণান্যকার্য্যমস্তি ইত্যেবং শ্রুত্যর্থমিহ গীতাশাস্ত্রে প্রতিপাদয়িষিতমাবিষ্কুর্ব্বন্নাহ ভগবান্ যস্ত্বিতি। যস্তু সাংখ্য আত্মজ্ঞাননিষ্ঠ আত্মরতিঃ আত্মনি এব রতির্ন বিষয়েষু যস্য স আত্মরতিরেব স্যাদ্ভবেৎ আত্মতৃপ্তশ্চ আত্মনৈব তৃপ্তো নান্নরসাদিনা স মানবো মনুষ্যঃ সন্ন্যাসী আত্মন্যেব চ সন্তুষ্টঃ সন্তোষো হি বাহ্যার্থলাভেন সর্ব্বস্য ভবতি তমনপেক্ষ্যাত্মন্যেব চ সন্তুষ্টঃ সর্ব্বতো বিগততৃষ্ণ ইত্যেতৎ য ঈদৃশ আত্মবিত্তস্য কার্য্যং করণীয়ং ন বিদ্যতে নাস্তীত্যর্থঃ ॥ ১৭ ॥

---

## গিরিকৃত টীকা ।

স্বয়মেব ভগবানত্র প্রতিপাদয়তি ইত্যাশঙ্ক্যাহ শাস্ত্রার্থস্যেতি। গীতাশাস্ত্রস্য স সন্ন্যাসজ্ঞানমেব মুক্তিসাধনমর্থো নার্থান্তরমিতি বিবেকার্থমিহ শ্রুত্যর্থং সংক্ষিপতি কীর্ত্তয়তীত্যর্থঃ। তমেব শ্রুত্যর্থং সংক্ষিপতি এতমিতি। সিদ্ধশ্চেদাত্মবেদনমনর্থকং তর্হি ব্যুত্থানাদীত্যাশঙ্ক্যাপাতিকজ্ঞানফলমাহ নিবৃত্তেতি। ব্রাহ্মণগ্রহণং তেষামেব ব্যুত্থানে মুখ্যমধিকারিত্বমিতি জ্ঞাপনার্থং। ক্লেশাত্মকত্বাদীষণানাং তাভ্যো ব্যুত্থানং সর্ব্বেষাং স্বাভাবিকত্বাদবিধিৎসিতমিত্যাশঙ্ক্যাহ মিথ্যেতি। ভিক্ষাচর্য্যং চরন্তীতি বচনং ব্যুত্থানবিরুদ্ধমিত্যাশঙ্ক্যাহ শরীরেতি। তর্হি তদ্বদেব তেষামগ্নিহোত্রাদ্যপি কর্ত্তব্যমাপদ্যেতেত্যাশঙ্ক্য ব্যুত্থায়িনামাশ্রমধর্ম্মবদগ্নিহোত্রাদেরনুষ্ঠাপকভাবান্নৈবমিত্যাহ ন তেষামিতি। যথোক্তং শ্রুত্যর্থমস্মিন্ গীতাশাস্ত্রে পৌর্ব্বাপর্য্যেণ পর্য্যালোচ্যমানে প্রতিপাদয়িতুমিষ্টং প্রকটীকুর্ব্বন্ কর্ত্তব্যমেব কর্ম্ম জীবতেতি নিয়মে জ্ঞানযোগেন সাংখ্যানামিতি চোদ্যপরিহারমুপদর্শয়তি ইত্যেবমিতি। আত্মনিষ্ঠস্য বিষয়সঙ্গরাহিত্যং দৃষ্টং তদনাত্মজ্ঞেন জিজ্ঞাসুনা কর্ত্তব্যমিতি মত্বাহ যস্তু সাংখ্যইতি। কিঞ্চ আত্মজ্ঞস্য জ্ঞানেনাত্মনৈব পরিতৃপ্তত্বান্নান্নপানাদিনা সাধ্যা তৃপ্তিরিষ্টা তেন বিদ্যার্থিনা সন্ন্যাসিনাপি নান্নরসাদাবাসক্তির্যুক্তা কর্ত্তুমিত্যাহ আত্মতৃপ্তইতি। কিঞ্চ আত্মবিদঃ সর্ব্বতো বৈতৃষ্ণ্যং দৃষ্টং তদনাত্মবিদা বিদ্যার্থিনা কর্ত্তব্যমিত্যাহ আত্মন্যেবেতি। রতিতৃপ্তিসন্তোষাণাং মোদপ্রমোদানন্দবদবান্তরভেদঃ, অথবা রতির্ব্বিষয়াসক্তিঃ তৃপ্তির্ব্বিষয়বিশেষসম্পর্কজং সুখং সন্তোষোঽভীষ্টবিষয়মাত্রলাভাধীনং সুখসামান্যমিতি ভেদঃ। নম্বাত্মরতেরাত্মতৃপ্তস্যাত্মন্যেব সন্তুষ্টস্যাপি কিঞ্চিৎ কর্ত্তব্যং মুক্তয়ে ভবিষ্যতীতি নেত্যাহ য ঈদৃশ ইতি ॥ ১৭ ॥

## স্বামিকৃত টীকা ।

স্বানন্দানুভবেন নিবৃ্ত্তঃ অতএবাত্মন্যেব সন্তুষ্টো ভোগাপেক্ষারহিতো যস্তস্য কর্ত্তব্যং কর্ম্ম নাস্তীতি ॥ ১৭ ॥

নৈব তস্য কৃতেনার্থো নাকৃতেনেহ কশ্চন।
ন চাস্য সর্ব্বভূতেষু কশ্চিদর্থব্যপাশ্রয়ঃ ॥ ১৮ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ নৈবেতি। নৈব তস্য পরমাত্মরতেঃ কৃতেন কর্ম্মণার্থঃ প্রয়োজনমস্তি। অস্তু তর্হ্যকৃতেন অকরণেন প্রত্যবায়াখ্যোঽনর্থো নাকৃতেনেহ লোকে কশ্চন কশ্চিদপি প্রত্যবায়প্রাপ্তিরূপঃ আত্মহানিলক্ষণো বা নৈবাস্তি। ন চাস্য ভূতেষু ব্রহ্মাদিস্থাবরান্তেষু কশ্চিদর্থব্যপাশ্রয়ঃ প্রয়োজননিমিত্তক্রিয়াসাধ্যো ব্যপাশ্রয়ঃ ব্যপাশ্রয়ণং আলম্বনং, কঞ্চিদ্ভূতবিশেষমাশ্রিত্য ন সাধ্যঃ কশ্চিদর্থোঽস্তি যেন তদর্থা ক্রিয়ানুষ্ঠেয়া স্যাৎ। ন ত্বং এতস্মিন্ সর্ব্বতঃ সংপ্লুতোদকস্থানীয়ে সম্যগ্দর্শনে বর্ত্তসে ॥ ১৮ ॥

## গিরিকৃত টীকা।

ইতশ্চাত্মবিদো ন কিঞ্চিৎ কর্ত্তব্যমিত্যাহ কিঞ্চেতি। অভ্যুদয়নিঃশ্রেয়সয়োরন্যতরৎ প্রয়োজনং কৃতেন সুকৃতেনাত্মবিদো ভবিষ্যতীত্যাশঙ্ক্যাহ নৈবেতি। প্রত্যবায়নিবৃত্তয়ে স্বরূপপ্রচ্যুতিপ্রত্যাখ্যানায় বা কর্ম্ম স্যাদিত্যাশঙ্ক্যাহ নেত্যাদিনা। ব্রহ্মাদিষু স্থাবরান্তেষু ভূতেষু কঞ্চিদ্ভূতবিশেষমাশ্রিত্য কশ্চিদর্থো বিদুষঃ সাধ্যো ভবিষ্যতি তদর্থং তেন কর্ত্তব্যং কর্ম্মেত্যাশঙ্ক্যাহ ন চেতি। তত্রাদ্যং পদমাদত্তে নৈবেতি। তং ব্যাচষ্টে তস্যেতি। আত্মবিদঃ স্বর্গাদ্যভ্যুদয়ানর্থিত্বং নিঃশ্রেয়সস্য চ প্রাপ্তত্বান্ন কৃতং কর্ম্মার্থবদিত্যর্থঃ। আত্মবিদা চেৎ কর্ম্ম ন ক্রিয়তে তর্হি তেনাকৃতেন তস্যানর্থো ভবিষ্যতীতি তৎপ্রত্যাখ্যানার্থং তস্য কর্ত্তব্যং কর্ম্মেতি শঙ্কতে তর্হীতি। দ্বিতীয়পাদেনোত্তরমাহ নেত্যাদিনা। অতো ন তন্নিবৃত্ত্যর্থং কৃতমর্থবদিতিশেষঃ। দ্বিতীয়ং ভাগং বিভজতে ন চাস্যেতি। ব্যপাশ্রয়ণমালম্বনং নেতি সম্বন্ধঃ। পদার্থমুক্ত্বা বাক্যার্থমাহ কঞ্চিদিতি। ভূতবিশেষস্যাশ্রিতস্যাপি

## স্বামিকৃত টীকা।

তত্র হেতুমাহ নৈবেতি। কৃতেন কর্ম্মণা তস্যার্থঃ পুণ্যং নৈবাস্তি ন চাকৃতেন কশ্চন কোঽপি প্রত্যবায়োঽস্তি নিরহঙ্কারত্বেন বিধিনিষেধাতীতত্বাৎ। তথাপি তদ্দেবানাং ন প্রিয়ং যদেতন্মনুষ্যা বিদুরিতি শ্রুতের্ম্মোক্ষে দেবকৃতবিঘ্নসম্ভবাত্তৎপরিহারার্থং কর্ম্মভির্দেবাঃ সেব্যা ইত্যাশঙ্ক্যোক্তং সর্ব্বভূতেষু ব্রহ্মাদিস্থাবরান্তেষু কশ্চিদপ্যর্থব্যপাশ্রয়ঃ আশ্রয় এব ব্যপাশ্রয়ঃ অর্থে মোক্ষে আশ্রয়ণীয়োঽস্য নাস্তীত্যর্থঃ, বিঘ্নাভাবস্য শ্রুত্যৈবোক্তত্বাৎ, তথা চ শ্রুতিঃ। তস্য হ ন দেবাশ্চ নাভূত্যা ঈশতে আত্মা হ্যেষাং সম্ভবতীতি। হ নেত্যব্যয়মপ্যর্থে, দেবা অপি তস্যাত্মতত্ত্বজ্ঞস্য অভূত্যৈ ব্রহ্মভাবপ্রতিবন্ধায় নেশতে ন শক্নুবন্তীতি শ্রুতেরর্থঃ। দেবকৃতাস্তু বিঘ্নাঃ সম্যগ্জ্ঞানোৎপত্তেঃ প্রাগেব যদেতদ্ব্রহ্ম মনুষ্যা বিদুস্তদে-

তস্মাদসক্তঃ সততং কার্য্যং কর্ম্ম সমাচর।
অসক্তো হ্যাচরন্ কর্ম্ম পরমাপ্নোতি পূরুষঃ॥ ১৯॥
কর্ম্মণৈব হি সংসিদ্ধিমাস্থিতা জনকাদয়ঃ।
লোকসংগ্রহমেবাপি সংপশ্যন্ কর্ত্তুমর্হসি॥ ২০॥

## শাঙ্করভাষ্যম্॥

যতএবং তস্মাদিতি। তস্মাদসক্তঃ সংসর্গবর্জ্জিতঃ সততং সর্ব্বদা কার্য্যং কর্ত্তব্যং নিত্যং কর্ম্ম সমাচর নির্ব্বর্ত্তয় অসক্তো হি যস্মাৎ সমাচরন্নীশ্বরার্থং কর্ম্ম কুর্ব্বন্ পরমাপ্নোতি পূরুষঃ মোক্ষমাপ্নোতি পূরুষঃ সত্ত্বশুদ্ধিদ্বারেণেত্যর্থঃ॥ ১৯॥

যস্মাচ্চ কর্ম্মণৈবেতি। কর্ম্মণৈব হি যস্মাৎ পূর্ব্বে ক্ষত্রিয়াঃ বিদ্বাংসঃ সংসিদ্ধিং মোক্ষং গন্তুমাস্থিতাঃ প্রবৃত্তা জনকাদয়ো জনকাশ্বপতিপ্রভৃতযো যদি তে প্রাপ্তসম্যগ্দর্শনাস্ততো লোকসংগ্রহার্থং প্রারব্ধকর্ম্মত্বাৎ কর্ম্মণা সহৈবাসন্ন্যস্যৈব কর্ম্ম সংসিদ্ধিমাস্থিতাইত্যর্থঃ।

## গিরিকৃত টীকা।

ক্রিয়াদ্বারা প্রয়োজনপ্রসবহেতুত্বমিতি মত্বাহ যেনেতি। তর্হি ময়াপি যথোক্তং তত্ত্বমাশ্রিত্য ত্যাজ্যমেব কর্ম্মেত্যর্জ্জুনস্য মতমাশঙ্ক্যাহ ন ত্বমিতি॥ ১৮॥

সম্যগ্জ্ঞাননিষ্ঠত্বাভাবে কর্ম্মানুষ্ঠানমাবশ্যকমিত্যাহ যত ইতি। তস্মাৎ জ্ঞাননিষ্ঠারাহিত্যাদিতি যাবৎ। মোক্ষমেবাপেক্ষমাণস্য কথং কর্ম্মণি ফলান্তরবতি নিয়োগঃ স্যাদিত্যাশঙ্ক্যাহ অসক্তো হীতি॥ ১৯॥

যদ্যপি জিতেন্দ্রিয়োঽপি বিবেকী শ্রবণাদিভিবজস্রং ব্রহ্মণি নিষ্ঠাতুং শক্নোতি তথাপি ক্ষত্রিয়েণ ত্বয়া বিহিতং কর্ম্ম ন ত্যাজ্যমিত্যাহ যস্মাচ্চেতি। তস্মাত্ত্বমপি কর্ম্ম কর্ত্তুমর্হসীতি সম্বন্ধঃ। ইতোঽপি ত্বয়া বিহিতং কর্ম্ম কর্ত্তব্যমিত্যাহ লোকেতি। পূর্ব্বার্দ্ধং বিভজতে কর্ম্মণৈবেতি। কথং জনকাদীনাং কর্ম্মণা সংসিদ্ধিপ্রাপ্তিরুচ্যতে কর্ম্মত্যজাং হি সম্যগ্দ-

## স্বামিকৃত টীকা।

বৈষাং দেবানাং ন প্রিয়মিতিশ্রুত্যা ব্রহ্মজ্ঞানস্যৈবাপ্রিয়ত্বোক্ত্যা তত্রৈব বিঘ্নকর্ত্তৃত্বস্য সূচিতত্বাৎ॥ ১৮॥

যস্মাদেবং ভূতস্য জ্ঞানিনএব কর্ম্মানুপযোগো নান্যস্য তস্মাত্ত্বং কর্ম্ম কুর্ব্বিত্যাহ তস্মাদিতি। অসক্তঃ ফলসঙ্গরহিতঃ সন্ কার্য্যমবশ্যকর্ত্তব্যতয়া বিহিতং নিত্যনৈমিত্তিকং কর্ম্ম সম্যগাচর হি যস্মাদসক্তঃ কর্ম্মাচরন্ পূরুষঃ পরং মোক্ষং চিত্তশুদ্ধিদ্বারা প্রাপ্নোতি॥ ১৯॥

অত্র সদাচারং প্রমাণয়তি কর্ম্মণৈবেতি। কর্ম্মণৈব শুদ্ধসত্ত্বাঃ সন্তঃ সংসিদ্ধিং সম্যগ্জ্ঞানং প্রাপ্তাইত্যর্থঃ, যদ্যপি ত্বং সম্যগ্জ্ঞানিনমেবাত্মানং মন্যসে তথাপি কর্ম্মাচরণং ভদ্রং

যদ্যদাচরতি শ্রেষ্ঠস্তত্তদেবেতরো জনঃ।
স যৎপ্রমাণং কুরুতে লোকস্তদনুবর্ত্ততে ॥ ২১ ॥

## শাঙ্করভাষ্যম্।

অথাপ্রাপ্তসম্যগ্দর্শনা জনকাদয়স্তদা কর্ম্মণা সত্বশুদ্ধিসাধনভূতেন ক্রমেণ সংসিদ্ধিমাস্থিত ইতি ব্যাখ্যেয়ঃ শ্লোকোঽর্থ মন্যতে পূর্ব্বৈরপি জনকাদিভিরপ্যজানদ্ভিরেব কর্ত্তব্যং কৃতং কর্ম্ম তাবতা নাবশ্যমন্যেন কর্ত্তব্যং সম্যগ্দর্শনবতা কৃতার্থেনেতি তথাপি প্রারব্ধকর্ম্মায়ত্তত্বং লোকসংগ্রহমেবাপি লোকস্যোন্মার্গপ্রবৃত্তিনিবারণং লোকসংগ্রহস্তমেবাপি প্রয়োজনং সম্পশ্যন্ কর্ত্তুমর্হসি ॥ ২০ ॥

লোকসংগ্রহঃ কিমর্থ উচ্যতে যদ্যদিতি। যদ্ যৎ কর্ম্ম আচরতি শ্রেষ্ঠঃ প্রধানস্তত্তদেব কর্ম্মাচরতি ইতরো জনস্তদনুগতঃ। কিঞ্চ শ্রেষ্ঠো যৎ প্রমাণং কুরুতে লৌকিকং বৈদিকং বা লোকস্তদনুবর্ত্ততে তদেব প্রমাণীকরোতীত্যর্থঃ ॥ ২১ ॥

## গিরিকৃত টীকা।

র্শনবতাং প্রসিদ্ধা সংসিদ্ধিরিতি তৎ কিং জনকাদয়োঽপি প্রাপ্তসম্যগ্দর্শনাঃ স্যুঃ উত অপ্রাপ্তসম্যগ্দর্শনাভবেযুরিতি বিকল্প্য প্রথমং প্রত্যাহ যদীতি। লোকসংগ্রহার্থং কর্ম্মণা সহৈব সংসিদ্ধিমাস্থিতাইতি সম্বন্ধঃ। কর্ম্মণা সহৈবেত্যেতৎ ব্যাকরোতি অসন্ন্যস্যৈব কর্ম্মেতি। তত্র হেতুমাহ প্রারব্ধেতি। জনকাদীনাং সত্যপি জ্ঞানিত্বে প্রারব্ধকর্ম্মবশাৎ কর্ম্মাপরিত্যজ্যৈব লোকসংগ্রহার্থং প্রবর্ত্তমানানাং জ্ঞানমাহাত্ম্যাদুপপন্না সংসিদ্ধিরিত্যর্থঃ। দ্বিতীয়মনূদ্য পূর্ব্বার্দ্ধেনোত্তরমাহ অথেত্যাদিনা। দ্বিতীয়ার্দ্ধব্যাবর্ত্ত্যামাশঙ্কামুখাপয়তি অথেতি। অজ্ঞেনাকৃতার্থেন কৃতং কর্ম্মেত্যেতাবতা জ্ঞানবতা কৃতকৃত্যেন ন তৎ কর্ত্তব্যমিত্যুক্তমঙ্গীকরোতি তথাপীতি। তর্হি ময়াপি জ্ঞানবতা কৃতার্থেন কর্ম্ম ন কর্ত্তব্যমিত্যাশঙ্ক্যার্জ্জুনস্য কর্ত্তব্যমেব কর্ম্মেত্যুত্তরার্দ্ধব্যাখ্যানেন কথয়তি প্রারব্ধেতি ॥ ২০ ॥

জ্ঞানবতা কৃতার্থেন লোকসংগ্রহার্থমপি ন প্রবর্ত্তিতব্যমিত্যাশঙ্কামুখাপ্য পরিহরতি লোকেত্যাদিনা। শ্রুতাধ্যয়নসম্পন্নত্বেনাভিমতো যদ্যদ্বিহিতং প্রতিষিদ্ধং বা কর্ম্মানুতিষ্ঠতি তত্তদেব প্রাকৃতো জনো ঽনুবর্ত্ততে তেন বিদ্যাবতাপি লোকমর্য্যাদাস্থাপনার্থং বিহিতং

## স্বামিকৃত টীকা।

মেবেত্যাহ লোকসংগ্রহমিত্যাদি। লোকস্য সংগ্রহঃ স্বধর্ম্মে প্রবর্ত্তনং ময়া কর্ম্মণি কৃতে জনঃ সর্ব্বোঽপি করিষ্যতি অন্যথা জ্ঞানিদৃষ্টান্তেনাজ্ঞো নিজধর্ম্মং নিত্যং কর্ম্ম ত্যজন্ পতেদিত্যেবং লোকরক্ষণমপি তাবৎ প্রয়োজনং পশ্যন্ কর্ম্ম কর্ত্তুমেবার্হসি ন ত্যক্তুমিত্যর্থঃ ॥ ২০ ॥

ন মে পার্থাস্তি কর্ত্তব্যং ত্রিষু লোকেষু কিঞ্চন।
নানবাপ্তমবাপ্তব্যং বর্ত্ত এব চ কর্ম্মণি ॥ ২২ ॥
যদি হ্যহং ন বর্ত্তেয়ং জাতু কর্ম্মণ্যতন্দ্রিতঃ।
মম বর্ত্মানুবর্ত্তন্তে মনুষ্যাঃ পার্থ সর্ব্বশঃ ॥ ২৩ ॥

## শাঙ্করভাষ্যম্।

যদ্যত্র লোকসংগ্রহকর্ত্তব্যতায়াং বিপ্রতিপত্তিস্তর্হি মাং কিং ন পশ্যসি নেতি। ন মে মম পার্থ নাস্তি ন বিদ্যতে কর্ত্তব্যং ত্রিষপি লোকেষু কিঞ্চন কিঞ্চিদপি কস্মান্ন অনবাপ্তম-প্রাপ্তমবাপ্তব্যং প্রাপণীয়ং তথাপি বর্ত্তে এব চ কর্ম্মণ্যহম্ ॥ ২১ ॥

যদি হি পুনরহং ন বর্ত্তেয়ং জাতু কদাচিৎ কর্ম্মণ্যতন্দ্রিতোঽনলসঃ সন্ মম শ্রেষ্ঠস্য সতো বর্ত্মমার্গমনুবর্ত্তন্তে মনুষ্যাঃ হে পার্থ সর্ব্বশঃ সর্ব্বপ্রকারৈঃ ॥ ২৩ ॥

## গিরিকৃত টীকা।

কর্ত্তব্যমিত্যর্থঃ। শ্রেষ্ঠানুসারিত্বমিতরেষামাচারে দর্শয়িত্বা প্রতিপত্তাবপি দর্শয়তি কিঞ্চেতি ॥ ২১ ॥

কৃতার্থস্যাপি লোকসংগ্রহার্থং বিহিতং কর্ম্ম কর্ত্তব্যমিত্যুক্ত্বা তত্রৈব ভাগবতমতমুদাহরণত্বেনোপন্যস্যতি যদীত্যাদিনা। অপ্রাপ্তস্য প্রাপ্তয়ে তথাপি কর্ত্তৃত্বসম্ভবাৎ ন কিঞ্চিদপি বিদ্যতে কর্ত্তব্যমিতি কথমুক্তমিত্যাশঙ্ক্যাহ নানবাপ্তমিতি প্রতীকমুপাদায় ব্যাখ্যানদ্বারা বিদ্যাবতোঽপি কর্ম্মপ্রবৃত্তিং সম্ভাবয়তি নেত্যাদিনা। অন্বয়ার্থং পুনর্ব্ব্যক্তো ঽনুবাদঃ। ভগবতো মে নাস্তি কর্ত্তব্যমিত্যেতদাকাঙ্ক্ষাদ্বারা স্ফোরয়তি কস্মাদিত্যাদিনা। প্রয়োজনাভাবে ত্বয়াপি নানুষ্ঠেয়ং কর্ম্মেত্যাশঙ্ক্য লোকসংগ্রহার্থং মমাপি কর্ম্মানুষ্ঠানমিতি মত্বাহ তথাপীতি ॥ ২২ ॥

লোকসংগ্রহোঽপি ন তে কর্ত্তব্যো বিফলত্বাদিত্যাশঙ্ক্যাহ যদি হীতি ॥ ২৩ ॥

## স্বামিকৃত টীকা।

কর্ম্মকরণে লোকসংগ্রহো যথা স্যাত্তদাহ যদ্যদিতি। ইতরঃ প্রকৃতোঽপি জনস্তত্তদেবাচরতি স শ্রেষ্ঠো জনঃ কর্ম্মশাস্ত্রং তন্নিবৃত্তিশাস্ত্রং বা যৎ প্রমাণং মন্যতে তদেব লোকোঽপ্যনুসরতি ॥ ২১ ॥

অত্র চাহমেব দৃষ্টান্ত ইত্যাহ ন মে ইতি ত্রিভিঃ। হে পার্থ মে কর্ত্তব্যং নাস্তি যতস্ত্রিষপি লোকেষনবাপ্তমপ্রাপ্তং'অবাপ্তব্যং প্রাপ্যং নাস্তি'তথাপি কর্ম্মণি বর্ত্ত এব কর্ম্ম করোম্যেবেত্যর্থঃ ॥ ২২ ॥

অকরণে লোকস্য নাশং দর্শয়তি যদি হ্যহমিতি। জাতু কদাচিদতন্দ্রিতোঽনলসঃ সন্।

উৎসীদেয়ুরিমে লোকা ন কুর্য্যাং কর্ম্ম চেদহম্।
সঙ্করস্য চ কর্ত্তা স্যামুপহন্যামিমাঃ প্রজাঃ ॥ ২৪ ॥

## শাঙ্করভাষ্যম্।

তথা চ কো দোষ ইত্যাহ উৎসীদেয়ুর্ব্বিনশ্যেয়ুরিমে সর্ব্বে লোকাঃ লোকস্থিতিনিমিত্তস্য কর্ম্মণোঽভাবাৎ ন কুর্য্যাং কর্ম্ম চেদহং কিঞ্চ সঙ্করস্য চ কর্ত্তা স্যাং তেন কারণেনোপহন্যামিমাঃ প্রজাঃ প্রজানামনুগ্রহায় প্রবৃত্তস্তদুপহতিং উপহননং কুর্য্যামিত্যর্থঃ। মমেশ্বরস্যাননুরূপমাপদ্যেত যদি পুনরহমিব ত্বং কৃতার্থবুদ্ধিরাত্মবিদন্যো বা তস্যাপ্যাত্মনঃ কর্ত্তব্যাভাবেঽপি পরানুগ্রহ এব কর্ত্তব্য ইতি ॥ ২৪ ॥

## গিরিকৃত টীকা।

শ্রেষ্ঠস্য তব মার্গানুবর্ত্তিত্বং মনুষ্যাণামুচিতমেবেত্যাশঙ্ক্য দূষয়তি তথাচেত্যাদিনা। ঈশ্বরস্য কর্ম্মণ্যপ্রবৃত্তৌ তদনুবর্ত্তিনামপি কর্ম্মানুপপত্তিরিতি হেতুমাহ লোকস্থিতীতি। ইতশ্চেশ্বরেণ কর্ম্ম কর্ত্তব্যমিত্যাহ কিঞ্চেতি। যদি কর্ম্ম ন কুর্য্যামিতি শেষঃ। সঙ্করকরণস্য কার্য্যং কথয়তি তেনেতি। প্রজোপহতিরপি প্রাপ্যতে চেৎ কিং তয়া তব স্যাদিতি তত্রাহ প্রজানামিতি। ত্বামনাচরন্তমনুবর্ত্তমানানাং সর্ব্বেষাং কো দোষঃ স্যাদিত্যপেক্ষায়ামীশ্বরস্য কৃতার্থতয়া কর্ম্মানুষ্ঠানাভাবে তদনুবর্ত্তিনামপি তদভাবাদেব স্থিতিহেত্বভাবাৎ পৃথিব্যাদিভূতানাং বিনাশপ্রসঙ্গাদ্বর্ণাশ্রমধর্ম্মব্যবস্থানুপপত্তেশ্চাধিকৃতানাং প্রাণভৃতাং পাপোপহতত্বপ্রসঙ্গাৎ পরানুগ্রহার্থং প্রবৃত্তিরীশ্বরস্যেত্যুক্তং সম্প্রতি লোকসংগ্রহায় কর্ম্ম কুর্ব্বাণস্য কর্ত্তৃত্বাভিমানেন জ্ঞানাভিভবে প্রাপ্তে প্রত্যাহ যদি পুনরিতি। কৃতার্থবুদ্ধিত্বে হেতুমাহ আত্মবিদিতি। যথাবদাত্মানমবগচ্ছন্ কর্ত্তৃত্বাদ্যভিমানাভাবাৎ কৃতার্থো ভবত্যেবেত্যর্থঃ। অর্জ্জুনাদন্যত্রাপি জ্ঞানবতি কৃতার্থবুদ্ধিত্বং কর্ত্তব্যত্বাদ্যভিমানহীনে তুল্যমিত্যাহ অন্যো বেতি। তস্য তর্হি কর্ম্মানুষ্ঠানমফলত্বাদনবকাশমিত্যাশঙ্ক্যাহ তস্যাপীতি। কর্ত্তব্য ইত্যাত্মবিদাপি পরানুগ্রহায় কর্ত্তব্যমেব কর্ম্মেত্যাহেতি শেষঃ ॥ ২৪ ॥

## স্বামিকৃত টীকা।

যদি কর্ম্মণি ন বর্ত্তেয়ং কর্ম্ম নানুতিষ্ঠেয়ং তর্হি মমৈব বর্ত্ম মার্গং মনুষ্যা অনুবর্ত্তন্তেঽনুবর্ত্তেরন্নিত্যর্থঃ ॥ ২৩ ॥

ততঃ কিমত আহ উৎসীদেয়ুরিতি। উৎসীদেয়ুঃ ধর্ম্মলোপেন নশ্যেয়ুঃ ততশ্চ যো বর্ণসঙ্করো ভবেত্তস্যাপ্যহমেব কর্ত্তা স্যাং ভবেয়ং, এবমহমেব প্রজা উপহন্যাং মলিনীকুর্য্যামিতি ॥ ২৪ ॥

সক্তাঃ কর্ম্মণ্যবিদ্বাংসো যথা কুর্ব্বন্তি ভারত।
কুর্য্যাদ্বিদ্বাংস্তথাঽসক্তশ্চিকীর্ষুর্লোকসংগ্রহম্ ॥ ২৫ ॥
ন বুদ্ধিভেদং জনয়েদজ্ঞানাং কর্ম্মসঙ্গিনাম্।
যোজয়েৎ সর্ব্বকর্ম্মাণি বিদ্বান্ যুক্তঃ সমাচরন্ ॥ ২৬ ॥

## শাঙ্করভাষ্যম্।

সক্তাইতি। সক্তাঃ কর্ম্মণি কর্ম্মণঃ ফলং মম ভবিষ্যতীতি কেচিদবিদ্বাংসো যথা কুর্ব্বন্তি ভারত কুর্য্যাদ্বিদ্বানথাত্মবিত্তথা অসক্তঃ সন্ তদ্বৎ কিমর্থং করোতি তচ্ছৃণু চিকীর্ষুর্যথা কর্ত্তুমিচ্ছুঃ লোকসংগ্রহং ॥ ২৫ ॥

এবং লোকসংগ্রহং চিকীর্ষোর্ম্মমাত্মবিদঃ কর্ত্তব্যমস্তন্যস্য বা লোকসংগ্রহমুক্ত্বা তত-স্তস্যাত্মবিদেদমুপদিশ্যতে নেতি। বুদ্ধের্ভেদঃ বুদ্ধিভেদঃ ময়া ইদং কর্ত্তব্যং ভোক্তব্য-ঞ্চাস্য কর্ম্মণঃ ফলমিতি নিশ্চয়রূপায়া বুদ্ধের্ভেদনং চালনং বুদ্ধিভেদস্তব জনয়েন্নোৎপাদয়েদ-জ্ঞানামবিবেকিনাং কর্ম্মসঙ্গিনাং কর্ম্মণ্যাসক্তানাং আসঙ্গবতাং। কিন্তু কুর্য্যাদ্যোজয়েৎ কারয়েৎ সর্ব্বকর্ম্মাণি বিদ্বান্ স্বয়ং তদেবাবিদুষাং কর্ম্ম যুক্তোঽভিযুক্তঃ সমাচরন্ ॥ ২৬ ॥

## গিরিকৃত টীকা।

দৃষ্টান্তদার্ষ্টান্তিকরূপং শ্লোকং ব্যাকরোতি সক্তা ইত্যাদিনা। অসক্তঃ সন্ কর্তৃত্বাভিমা-নং ফলাভিসন্ধিং বাঽকুর্ব্বন্নিতি যাবৎ ॥ ২৫ ॥

বৃত্তমনূদ্যোত্তরশ্লোকমবতারয়তি এবমিতি। কর্ত্তব্যং কর্ম্মেতি শেষঃ। পূর্ব্বার্দ্ধমেবং ব্যাখ্যায় উত্তরার্দ্ধং প্রশ্নপূর্ব্বকং অবতার্য্য ব্যাচষ্টে কিন্তু কুর্য্যাদিতি। সর্ব্বকর্ম্মাণি কার-য়েত্তেষু প্রীতিং কুর্ব্বন্নিতি শেষঃ। কথং কারয়েদিত্যাকাঙ্ক্ষায়ামাহ তদেবেতি ॥ ২৬ ॥

## স্বামিকৃত টীকা।

তস্মাদাত্মবিদাপি লোকসংগ্রহার্থং তৎকৃপয়া কর্ম্ম কার্য্যমেবেত্যুপসংহরতি সক্তাইতি। কর্ম্মণি সক্তাঃ অভিনিবিষ্টাঃ সন্তো যথাঽজ্ঞাঃ কর্ম্মাণি কুর্ব্বন্তি অসক্তঃ সন্ বিদ্বানপি তথৈব কুর্য্যাল্লোকসংগ্রহং কর্ত্তুমিচ্ছুঃ ॥ ২৫ ॥

নন্বকৃপয়া তত্ত্বজ্ঞানমেবোপদেষ্টুং যুক্তং নেত্যাহ ন বুদ্ধিভেদমিতি। অজ্ঞানামতএব কর্ম্মসঙ্গিনাং কর্ম্মাসক্তানমেকত্র্যাত্মোপদেশেন বুদ্ধের্ভেদমন্যথাত্বং ন জনয়েৎ কর্ম্মণঃ সকাশাদ্বুদ্ধিবিচালনং ন কুর্য্যাৎ অপি তু যোজয়েৎ সেবয়েৎ অজ্ঞান্ কর্ম্মাণি কারয়েদি-ত্যর্থঃ, কথং, যুক্তোঽবহিতো ভূত্বা স্বয়মাচরন্ সন্। বুদ্ধিবিচালনে কৃতে সতি কর্ম্মসু শ্রদ্ধা-নিবৃত্তের্জ্ঞানস্য চানুৎপত্তেস্তেষামুভয়ভ্রংশঃ স্যাদিতি ভাবঃ ॥ ২৬ ॥

প্রকৃতেঃ ক্রিয়মাণানি গুণৈঃ কর্ম্মাণি সর্ব্বশঃ।
অহঙ্কারবিমূঢ়াত্মা কর্ত্তাহমিতি মন্যতে ॥ ২৭ ॥
তত্ত্ববিত্তু মহাবাহো গুণকর্ম্মবিভাগয়োঃ।
গুণা গুণেষু বর্ত্তন্ত ইতি মত্বা ন সজ্জতে ॥ ২৮ ॥

## শাঙ্করভাষ্যম্।

অবিদ্বান্ অজ্ঞঃ কথং কর্ম্মসু সজ্জত ইত্যাহ প্রকৃতেরিতি। প্রকৃতেঃ প্রকৃতিঃ প্রাধানং সত্ত্বরজস্তমসাং গুণানাং সাম্যাবস্থা তস্যাঃ প্রকৃতেগুর্ণৈর্ব্বিকারৈঃ কার্য্যকরণরূপৈঃক্রিয়মাণানি কর্ম্মাণি লৌকিকানি শাস্ত্রীয়াণি চ সর্ব্বশঃ সর্ব্বপ্রকারৈরহঙ্কারবিমূঢ়াত্মা কার্য্যকরণসংঘাতাত্মপ্রত্যয়োঽহঙ্কারস্তেন বিবিধং নানাবিধং মূঢ়ঃ আত্মান্তঃকরণং যস্য সোঽয়ং কার্য্যকরণধর্ম্মা কার্য্যকরণাভিমান্যবিদ্যয়া কর্ম্মণ্যাত্মনি মন্যমানস্তত্তৎ কর্ম্মণামহং কর্ত্তেতি মন্যতে ॥ ২৭ ॥

কিং পুনর্মন্যতে বিদ্বান্ তত্ত্ববিদিতি। তত্ত্ববিত্তু মহাবাহো কস্য তত্ত্ববিৎ গুণকর্ম্মবিভাগয়োগু'ণবিভাগস্য কর্ম্মবিভাগস্য চ তত্ত্ববিদিত্যর্থঃ গুণাঃ করণাত্মকাঃ গুণেষু বিষয়াত্মকেষু বর্ত্তন্তে নাত্মেতি মত্বা ন সজ্জতে সক্তিং ন করোতি ২৮

## গিরিকৃত টীকা।

অজ্ঞানাং কর্ম্মসঙ্গিনামিত্যুক্তং তেনোত্তরশ্লোকস্য সঙ্গতিমাহ অবিদ্বানিতি। কর্তৃত্বমাত্মনোঽবাস্তবমিত্যভ্যুপগমাদ্বিদ্বান্ কথং কুর্ব্বন্নেব তস্যাভাবং পশ্যতীত্যাশঙ্ক্যাহ প্রকৃতেরিতি। কর্ম্মস্ববিদুষঃ সক্তিপ্রকারং প্রকটয়ন্ ব্যাকরোতি প্রকৃতেরিত্যাদিনা। প্রধানশব্দেন মায়াশক্তিরুচ্যতে, অবিদ্যয়েত্যুভয়তঃ সম্বধ্যতে ॥ ২৭ ॥

অজ্ঞস্য কর্ম্মসু সক্তিমুক্ত্বা বিদুষস্তদভাবমভিদধাতি কিং পুনরিতি। তত্ত্বং যাথাত্ম্যং বেত্তীতি ব্যুৎপত্ত্যা তত্ত্ববিদিতি তু শব্দেনাজ্ঞানাদ্বিশিষ্টো নির্দ্দিষ্টঃ। প্রশ্নপূর্ব্বকং দ্বিতীয়পাদমবতার্য্য ব্যাচষ্টে কস্যেত্যাদিনা। গুণানামেব গুণেষু বর্ত্তমানত্বমযুক্তং নিগু'ণত্বাত্তেষামি-

## স্বামিকৃত টীকা।

নম্ন বিদুষাপি চেৎ কর্ম্ম কর্ত্তব্যং তর্হি বিদ্বদবিদুষোঃ কো বিশেষ ইত্যাশঙ্ক্যোভয়োর্বিশেষং দর্শয়তি প্রকৃতেরিতি দ্বাভ্যাং। প্রকৃতেগু'ণৈঃ প্রকৃতিকার্য্যৈরিন্দ্রিয়ৈঃ সর্ব্বপ্রকারেণ ক্রিয়মাণানি কর্ম্মাণি তান্যহমেব কর্ত্তা করোমীতি মন্যতে। অত্র হেতুঃ অহমিতি ৮ অহঙ্কারেণেন্দ্রিয়াদিষাত্মাধ্যাসেন বিমূঢ়বুদ্ধিঃ সন্ ॥ ২৭ ॥

বিদ্বাংস্তু তথা ন মন্যত ইত্যাহ তত্ত্ববিদিতি। নাহং গুণাত্মক ইতি গুণেভ্যঃ আত্মনো বিভাগঃ ন মে কর্ম্মাণীতি কর্ম্মভ্যোঽপ্যাত্মনো বিভাগঃ তয়োগু'ণকর্ম্মবিভাগয়োর্যত্তত্ত্বং বেত্তি

প্রকৃতেগু´ণসংমূঢ়াঃ সজ্জন্তে গুণকর্ম্মসু।
তানকৃৎস্নবিদো মন্দান্ কৃৎস্নবিন্ন বিচালয়েৎ॥ ২৯॥
ময়ি সর্ব্বাণি কর্ম্মাণি সন্ন্যস্যাধ্যাত্মচেতসা।
নিরাশী র্নির্ম্মমো ভূত্বা যুধ্যস্ব বিগতজ্বরঃ॥ ৩০॥

## শাঙ্করভাষ্যম্।

যে পুনঃ প্রকৃতেরিতি। প্রকৃতেগু´ণৈঃ সম্যক্ মূঢ়াঃ সংমোহিতাঃ সন্তঃ সজ্জন্তে গুণানাং কর্ম্মসু গুণকর্ম্মসু বয়ং কর্ম্ম কুর্ম্মঃ ফলায়েতি, তান্ কর্ম্মসঙ্গিনোঽকৃৎস্নবিদঃ কর্ম্মফলমাত্রদর্শিনো মন্দান্ মন্দপ্রজ্ঞান্ কৃৎস্নবিদাত্মবিৎ স্বয়ং ন বিচালয়েৎ বুদ্ধিভেদকরণমেব চালনং তন্ন কুর্য্যাদিত্যর্থঃ॥ ২৯॥

কথং পুনঃ কর্ম্মণ্যধিকৃতেনাজ্ঞেন মুমুক্ষুণা কর্ম্ম কর্ত্তব্যমিত্যুচ্যতে ময়ীতি। ময়ি বাসুদেবে পরমেশ্বরে সর্ব্বজ্ঞে সর্ব্বাণি কর্ম্মাণি সন্ন্যস্য নিক্ষিপ্যাধ্যাত্মচেতসা বিবেক-

## গিরিকৃত টীকা।

ত্যাশঙ্ক্য বিভজতে গুণাইতি। কার্য্যকরণানামেব বিষয়েষু প্রবৃত্তিবাত্মনস্তু কূটস্থত্বান্নৈবমিতি জ্ঞাত্বা তত্ত্ববিৎ কর্ম্মসু দৃঢ়তরং কর্ত্তব্যাভিমানং ন করোতীত্যর্থঃ॥ ২৮॥

বিদ্বানবিদ্বানিত্যুভাবপি প্রকৃত্য বিদ্বান্নাবিদুষো বুদ্ধিভেদং কুর্য্যাদিত্যুপসংহরতি যে পুনরিতি। প্রকৃতেরুক্তায়া গুণৈর্দেহাদিভির্ব্বিকারৈঃ সংমূঢ়াস্তানেবাত্মত্বেন মন্যমানা যে গুণানাং তেষামেব দেহাদীনাং কর্ম্মসু ব্যাপারেষু সজ্জন্তে সক্তিং দৃঢ়তরামাত্মীয়বুদ্ধিং কুর্ব্বন্তীত্যাহ প্রকৃতেরিত্যাদিনা। তেষামনাত্মবিদাং স্বয়মাত্মবিদ্ বুদ্ধিভেদং নাপাদয়েদিত্যাহ তানিত্যাদিনা॥ ২৯॥

যদ্যপি কর্ম্মণ্যজ্ঞোঽধিক্রিয়তে তথাপি মোক্ষ্যমাণেন তেন কর্ম্ম ত্যক্তব্যং মোক্ষস্য কর্ম্মাসাধ্যত্বাৎ নতু তেন কর্ম্ম কর্ত্তুং শক্যং কর্ম্মণঃ স্বাপেক্ষিতবিরোধিত্বাদিতি শঙ্কতে কথমিতি। শ্লোকেনোত্তরমাহ উচ্যতইতি। যথোক্তে পরস্মিন্নাত্মনি সর্ব্বকর্ম্মণাং সমর্পণে

## স্বামিকৃত টীকা।

স তু ন সজ্জতে কর্ত্তৃত্বাভিনিবেশং ন করোতি। তত্র হেতুঃ গুণাইতি। গুণা ইন্দ্রিয়াণি গুণেষু বিষয়েষু বর্ত্তন্তে নাহমিতি মত্বা॥ ২৮॥

ন বুদ্ধিভেদমিত্যুপসংহরতি প্রকৃতেরিতি। যে প্রকৃতেগু´ণৈঃ সত্ত্বাদিভিঃ সংমূঢ়াঃ সন্তো গুণেষু ইন্দ্রিয়েষু তৎকর্ম্মসু চ সজ্জন্তে তানকৃৎস্নবিদো মন্দমতীন্ কৃৎস্নবিৎ সর্ব্বজ্ঞো ন বিচালয়েৎ॥ ২৯॥

তদেবং তত্ত্ববিদাপি কর্ম্ম কর্ত্তব্যং ত্বন্তু নাদ্যাপি তত্ত্ববিদতঃ কর্ম্মৈব কুর্ব্বিত্যাহ ময়ীতি।

যে মে মতমিদং নিত্যমনুতিষ্ঠন্তি মানবাঃ।
শ্রদ্ধাবন্তোঽনসূয়ন্তো মুচ্যন্তে তেঽপি কর্ম্মভিঃ॥ ৩১॥
যে ত্বেতদভ্যসূয়ন্তো নানুতিষ্ঠন্তি মে মতম্।
সর্ব্বজ্ঞানবিমূঢ়াংস্তান্ বিদ্ধি নষ্টানচেতসঃ॥ ৩২॥

## শাঙ্করভাষ্যম্।

বুদ্ধ্যাহং কর্ত্তেশ্বরায় ভৃত্যবৎ করোমীত্যনয়া বুদ্ধ্যা কিঞ্চ নিরাশীঃ ত্যক্তাশীঃ নির্ম্মমো মম ভাবশ্চ নির্গতো যস্য তব স ত্বং নির্মমো ভূত্বা যুধ্যস্ব বিগতজ্বরো বিগতসন্তাপো বিগতশোকঃ সন্নিত্যর্থঃ॥ ৩০॥

যদেতন্মম মতং কর্ম্ম কর্ত্তব্যমিতি সপ্রমাণমুক্তং তত্তথা যে মমিতি। যে মদীয়মিদং মতমনুতিষ্ঠন্তি অনুবর্ত্তন্তে মানবা মনুষ্যাঃ শ্রদ্ধাবন্তঃ শ্রদ্দধানাঃ অনসূয়ন্তোঽসূয়াঞ্চ মযি পরমগুরৌ বাসুদেবেঽকুর্ব্বন্তো মুচ্যন্তে তেঽপ্যেবম্ভূতাঃ কর্ম্মভির্ধর্ম্মাধর্ম্মাখ্যৈঃ॥ ৩১॥

যে ত্বিতি। যে তু তদ্বিপরীতা এতৎ মম মতং অভ্যসূয়ন্তো নিন্দন্তো নানুতিষ্ঠন্তি

## গিরিকৃত টীকা।

কারণমাহ অধ্যাত্মেতি। বিবেকবুদ্ধিমেব ব্যাকরোতি অহমিতি। দর্শিতরীত্যা কর্ম্মসু প্রবৃত্তস্য কর্ত্তব্যান্তরমাহ কিঞ্চেতি। ত্যক্তাশীঃ ফলপ্রার্থনাহীনঃ সন্নিত্যর্থঃ, নির্মমো ভূত্বা পুত্রভ্রাত্রাদিম্বিতি শেষঃ। ননু যুদ্ধে নিয়োগো নোপপদ্যতে পুত্রভ্রাত্রাদিহিংসাত্মনস্তস্য সন্তাপহেতোঃ নিয়োগবিষয়ত্বাযোগাদিতি তত্রাহ বিগতেতি॥ ৩০॥

প্রকৃতং ভগবতো মতমুক্তপ্রকারমনুস্থৈত্যেবানুতিষ্ঠতাং ক্রমমুক্তিফলং কথয়তি যদেতদিতি। শাস্ত্রাচার্য্যোপদিষ্টে অদৃষ্টার্থে বিশ্বাসবত্বং শ্রদ্দধানত্বং, গুণেষু দোষাবিষ্করণমসূয়া, অপি যথোক্তায়ানুক্তেরমুখ্যত্বদ্যোতনার্থঃ॥ ৩১॥

ভগবন্মতানমুবর্ত্তিনাং প্রত্যবায়িত্বং প্রত্যায়য়তি যেত্বিতি। তদ্বিপরীতত্বং ভগবন্মতানুবর্ত্তিভ্যো বৈপরীত্যং, তদেব দর্শয়তি এতদিত্যাদিনা। অভ্যসূয়ন্তস্তত্রাসত্তমপি দোষমুদ্ভা-

## স্বামিকৃত টীকা।

সর্ব্বাণি কর্ম্মাণি ময়ি সন্ন্যস্য সমর্প্যাধ্যাত্মচেতসাঽন্তর্যাম্যোঽহং কর্ম্ম করোমীতি দৃষ্ট্যা নিরাশীর্নিষ্কামোঽতএব মৎফলসাধনং মদর্থমিদং কর্ম্মেত্যেবং মমতাশূন্যশ্চ ভূত্বা বিগতজ্বরস্ত্যক্তশোকশ্চ ভূত্বা যুধ্যস্ব॥ ৩০॥

এবং কর্ম্মানুষ্ঠানে গুণমাহ যে মে ইতি। মদ্বাক্যে শ্রদ্ধাবন্তোঽনসূয়ন্তো দুঃখাত্মকে কর্ম্মণি প্রবর্ত্তয়তীতি দোষদৃষ্টিমকুর্ব্বন্তশ্চ যে মদীয়মিদং মতমনুতিষ্ঠন্তি তেঽপি শনৈঃ কর্ম্ম কুর্ব্বাণাঃ সম্যগ্‌জ্ঞানিবৎ কর্ম্মভির্মুচ্যন্তে॥ ৩১॥

সদৃশং চেষ্টতে স্বস্যাঃ প্রকৃতের্জ্ঞানবানপি।
প্রকৃতিং যান্তি ভূতানি নিগ্রহঃ কিং করিষ্যতি ॥ ৩৩ ॥

## শাঙ্করভাষ্যম্

নানুবর্ত্তন্তে মে মতং সর্ব্বেষু জ্ঞানেষু বিবিধং মূঢ়াস্তে সর্ব্বজ্ঞানবিমূঢ়াংস্তান্ বিনষ্টান্ নাশং গতানচেতসোঽবিবেকিনঃ ॥ ৩২ ॥

কস্মাৎ পুনঃ কারণাৎ ত্বদীয়ং মতং নানুতিষ্ঠন্তঃ পরধর্ম্মাননুতিষ্ঠন্তি স্বধর্ম্মঞ্চ নানুবর্ত্তন্তে ত্বৎপ্রতিকূলাঃ কথং ন বিভ্যতি ত্বচ্ছাসনাতিক্রমদোষাৎ তত্রাহ সদৃশমিতি। সদৃশমনুরূপং চেষ্টতে চেষ্টাং করোতি কস্যাঃ স্বস্যাঃ স্বকীয়ায়াঃ প্রকৃতেঃ প্রকৃতির্নাম পূর্ব্বকৃতধর্ম্মাধর্ম্মাদিসংস্কারো বর্ত্তমানজন্মাদাবভিব্যক্তঃ সা প্রকৃতিস্তস্যাঃ সদৃশমেব সর্ব্বো জন্তুর্জ্ঞানবানপি চেষ্টতে কিং পুনর্মূর্খস্তস্মাৎ প্রকৃতিং যান্তি অনুগচ্ছন্তি ভূতানি, নিগ্রহঃ নিষেধরূপঃ কিং করিষ্যতি মম চান্যস্য বা ॥ ৩৩ ॥

## গিরিকৃত টীকা।

বয়ন্তইত্যর্থঃ, সর্ব্বজ্ঞানানি সগুণনির্গুণবিষয়াণি, প্রমাণপ্রমেযপ্রয়োজনবিভাগতো বিবিধত্বং ॥ ৩২ ॥

ভগবন্মতানুবর্ত্তনমন্তরেণ পরধর্ম্মানুষ্ঠানে স্বধর্ম্মাননুষ্ঠানে চ কারণং পৃচ্ছতি কস্মাদিতি ভগবৎপ্রতিকূলত্বমেব তত্র কারণমিত্যাশঙ্ক্যাহ ত্বৎপ্রতিকূলা ইতি। রাজানুশাসনাতিক্রমে দোষদর্শনাৎ ভগবদনুশাসনাতিক্রমেঽপি দোষসম্ভবাৎ তৎপ্রতিকূলত্বং ভয়কারণমিত্যর্থঃ। উত্তরেণ শ্লোকমবতারয়তি সদৃশমিতি। সর্ব্বস্য প্রাণিবর্গস্য প্রকৃতিবশবর্ত্তিত্বে কৈমুতিকন্যায়ং সূচযতি জ্ঞানবানপীতি। সর্ব্বাণ্যপি ভূতান্যনিচ্ছন্ত্যপি প্রকৃতিসদৃশীং চেষ্টাং গচ্ছন্তীতি নিগময়তি প্রকৃতিমিতি। ভূতানাং প্রকৃতেরধীনত্বেঽপি প্রকৃতির্ভগবতা নিগ্রাহ্যেত্যাশঙ্ক্যাহ নিগ্রহ ইতি। কা পুনরিযং প্রকৃতির্যদনুসারিণী ভূতানাং চেষ্টেতি পৃচ্ছতি প্রকৃতির্নামেতি। ভগবদভিপ্রেতাং প্রকৃতিং প্রকটয়তি পূর্ব্বেতি। আদিশব্দেন জ্ঞানেচ্ছাদি সংগৃহ্যতে। যথোক্তঃ সংস্কারঃ স্বসত্তয়া প্রবর্ত্তকশ্চেৎ প্রলয়েঽপি প্রবৃত্তিঃ স্যাদিত্যাশঙ্ক্য বিশিনষ্টি বর্ত্তমানেতি। সর্ব্বো জন্তুরিত্যুক্তং বিবেকিপ্রবৃত্তেরতথাত্বাদিভিশ্চাবিশেষাদিতি ন্যায়মনুস্মরন্নাহ জ্ঞানবানিতি। জ্ঞানবতামজ্ঞানবতাঞ্চ প্রকৃত্যধীনত্বাবিশেষে

## স্বামিকৃত টীকা।

বিপক্ষে দোষমাহ যেত্বেতদিতি। যে তু নানুতিষ্ঠন্তি তানচেতসো বিবেকশূন্যান্ অত এব সর্ব্বস্মিন্ কর্ম্মণি ব্রহ্মবিষয়ে চ যজ্জ্ঞানং তত্র বিমূঢ়ান্নষ্টান বিদ্ধি ॥ ৩২ ॥

নন্বু তর্হি মহাফলত্বাদিন্দ্রিয়াণি নিগৃহ্য নিষ্কামাঃ সন্তঃ সর্ব্বেঽপি স্বধর্ম্মমেব কিং নানুতিষ্ঠন্তি তত্রাহ সদৃশমিতি। প্রকৃতিঃ প্রাচীনকর্ম্মসংস্কারাধীনস্বভাবঃ স্বস্যাঃ স্বকীয়ায়াঃ

ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থে রাগদ্বেষৌ ব্যবস্থিতৌ।
তয়োর্ন বশমাগচ্ছেত্তৌ হ্যস্য পরিপন্থিনৌ ॥ ৩৪ ॥

## শাঙ্করভাষ্যম্।

যদি সর্ব্বো জন্তুরাত্মনঃ প্রকৃতিসদৃশমেব চেষ্টতে ন চ প্রকৃতিশূন্যঃ কশ্চিদস্তি ততঃ পুরুষকারস্য বিষয়ানুপপত্তেঃ শাস্ত্রানর্থক্যপ্রাপ্তাবিদমুচ্যতে ইন্দ্রিয়স্যেতি। ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থে সর্ব্বেন্দ্রিয়াণামর্থে শব্দাদিবিষয়ে ইষ্টে শব্দাদৌ রাগোঽনিষ্টে দ্বেষ ইত্যেবং প্রতীন্দ্রিয়ার্থে রাগদ্বেষাববশ্যম্ভাবিনৌ তত্রায়ং পুরুষকারস্য শাস্ত্রার্থস্য বিষয় উচ্যতে শাস্ত্রার্থে প্রবৃত্তঃ পূর্ব্বমেব রাগদ্বেষয়োর্ব্বশং নাগচ্ছেৎ যাহি পুরুষস্য প্রকৃতিঃ সা রাগদ্বেষপুরঃসরৈব স্বকার্য্যে পুরুষং প্রবর্ত্তয়তি যদা তদা স্বধর্ম্মপরিত্যাগঃ পরধর্ম্মানুষ্ঠানঞ্চ ভবতি যদা পুনঃ রাগদ্বেষৌ তৎপ্রতিপক্ষেণ নিয়ময়তি তদা শাস্ত্রদৃষ্টিরেব পুরুষো ভবতি ন প্রকৃতিবশ-

## গিরিকৃত টীকা।

ফলিতমাহ তস্মাদিতি। প্রকৃতিং যান্তি প্রকৃতিসদৃশীং চেষ্টাং গচ্ছন্ত্যনিচ্ছন্ত্যপি সর্ব্বাণি ভূতানি ইত্যর্থঃ। প্রকৃতের্ভবগতা তত্তুল্যেন বা কেনচিৎ নিগ্রহমাশঙ্ক্যাবতারিতচতুর্থপাদস্যার্থাপেক্ষিতং পূরয়তি মম চেতি ॥ ৩৩ ॥

সর্ব্বস্য ভূতবর্গস্য প্রকৃতিবশবর্ত্তিত্বে লৌকিকবৈদিকপুরুষকারবিষয়াভাবাদ্বিধিনিষেধানর্থক্যমিতি শঙ্কতে যদীতি। নহু যস্য ন প্রকৃতিরস্তি তস্য পুরুষকারসম্ভবাদর্থবত্ত্বং তদ্বিষয়ে বিধিনিষেধয়োর্ভবিষ্যতি নেত্যাহ নচেতি। শঙ্কিতদোষং শ্লোকেন পরিহরতি ইদমিত্যাদিনা। বীপ্সায়াঃ সর্ব্বকরণগোচরত্বং দর্শয়তি সর্ব্বেতি। প্রত্যর্থং রাগদ্বেষয়োরব্যবস্থায়াং প্রাপ্তৌ প্রত্যাদিশতি ইষ্টইতি। প্রতিবিষয়ং বিভাগেন তয়োরস্তরস্যাবশ্যকত্বেঽপি পুরুষকারবিষয়াভাবপ্রযুক্ত্যা প্রাগুক্তং দূষণং কথং সমাধেয়মিত্যাশঙ্ক্যাহ তত্রেতি। যত্তোরিত্যাদ্যবতারিতং ভাগং বিভজতে শাস্ত্রার্থস্যেতি। প্রকৃতিবশত্বাদ্জন্তোর্নৈব নিয়ো-

## স্বামিকৃত টীকা।

প্রকৃতেঃ স্বভাবস্য সদৃশমনুরূপমেব গুণদোষজ্ঞানবানপি চেষ্টতে কিং পুনর্বক্তব্যমজ্ঞশ্চেষ্টত ইতি, যস্মাদ্ভূতানি সর্ব্বেঽপি প্রাণিনঃ প্রকৃতিং যান্তি অনুবর্ত্তন্তে এবঞ্চ সতীন্দ্রিয়নিগ্রহঃ কিং করিষ্যতি প্রকৃতের্ব্বলীয়স্ত্বাদিত্যর্থঃ ॥ ৩৩ ॥

ননেবং প্রকৃত্যধীনৈব চেৎ পুরুষস্য প্রবৃত্তিস্তর্হি বিধিনিষেধশাস্ত্রস্য বৈয়র্থ্যং প্রাপ্তমিত্যাশঙ্ক্যাহ ইন্দ্রিয়স্যেতি। ইন্দ্রিয়স্যেন্দ্রিয়স্যেতি বীপ্সয়া সর্ব্বেষামিন্দ্রিয়াণাং প্রত্যেকমিত্যুক্তং, অর্থে স্বস্ববিষয়ে অনুকূলে রাগঃ প্রতিকূলে দ্বেষ ইত্যেবং রাগদ্বেষৌ ব্যবস্থিতৌ অবশ্যম্ভাবিনৌ, ততশ্চ তদনুরূপা প্রবৃত্তিরিতি ভূতানাং প্রকৃতিঃ, তথাপি তয়োর্ব্বশবর্ত্তী ন

শ্রেয়ান্ স্বধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ।
স্বধর্ম্মে নিধনং শ্রেয়ঃ পরধর্ম্মোভয়াবহঃ॥ ৩৫॥

## শাঙ্করভাষ্যম্।

তস্মাত্তয়ো রাগদ্বেষয়োর্ব্বশং নাগচ্ছেদ্যতস্তৌ হ্যস্য পুরুষস্য পরিপন্থিনৌ শ্রেয়োমার্গস্য বিঘ্নকর্ত্তারৌ তস্করাবিবেত্যর্থঃ॥ ৩৪॥

তত্ররাগদ্বেষপ্রযুক্তো মন্যতে শাস্ত্রার্থমপ্যন্যথা, পরধর্ম্মোঽপি ধর্ম্মত্বাদনুষ্ঠেয় এবেতি তদ-সৎ শ্রেয়ানিতি। শ্রেয়ান্ প্রশস্যতরঃ স্বধর্ম্মঃ স্বকীয়ধর্ম্মো বিগুণোপি বিগতগুণোঽপি অনু-ষ্ঠীয়মানঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ সাদ্গুণ্যেন সম্পাদিতাদপি স্বধর্ম্মে স্থিতস্য নিধনং মরণমপি

## গিরিকৃত টীকা।

ন্যায্যমিত্যাশঙ্ক্যাহ যাহীতি। রাগদ্বেষদ্বারা প্রকৃতিবশবর্ত্তিত্বে স্বধর্ম্মত্যাগাদিদুর্ব্বারমিত্যু-ক্তমিদানীং বিবেকবিজ্ঞানেন রাগাদিনিবারণে শাস্ত্রীয়দৃষ্ট্যা প্রকৃতিপারবশ্যং পরিহর্ত্তুং শক্যমিত্যাহ যদেতি। মিথ্যাজ্ঞাননিবন্ধনৌ হি বাগদ্বেষৌ তৎপ্রতিপক্ষত্বং বিবেকবিজ্ঞা-নস্য মিথ্যাজ্ঞানবিরোধিত্বাদবধেয়ং। রাগদ্বেষয়োর্ম্মূলনিবৃত্ত্যানিবৃত্তৌ প্রতিবন্ধধ্বংসে কার্য্যসিদ্ধিমভিসন্ধায়োক্তং তদেতি। এবকারস্যান্যযোগব্যবচ্ছেদকত্বং দর্শয়তি নেতি। পূর্ব্বোক্তং নিয়োগমুপসংহরতি তস্মাদিতি। তত্র হেতুমাহ যতইতি। হিশব্দোপাত্তো-হেতুর্যতইতি প্রকটিতঃ স চ পূর্ব্বেণ তচ্ছব্দেন সম্বন্ধনীয়ঃ। পুরুষপরিপন্থিত্বমেব তয়োঃ সোদাহরণং স্ফোরয়তি শ্রেয়োমার্গস্যেতি॥ ৩৪॥

রাগদ্বেষয়োঃ শ্রেয়োমার্গপ্রতিপক্ষত্বং প্রকটয়িতুং পরমতোপন্যাসদ্বারা সমনন্তরশ্লোক মবতারয়তি তত্রেত্যাদিনা। ব্যবহারভূমিঃ সপ্তম্যর্থঃ। শাস্ত্রার্থস্যান্যথাপ্রতিপত্তিমেব প্রত্যায়য়তি পরধর্ম্মোঽপীতি। স্বধর্ম্মবদিত্যপেরর্থঃ। অনুমানং দূষয়ন্নুত্তরত্বেন শ্লোকমু-ত্থাপয়তি তদসদিতি। ক্ষত্রধর্ম্মাদ্যুদ্ধাদ্যনুষ্ঠানাৎ পরিব্রাড়্ধর্ম্মস্য ভিক্ষাশনাদিলক্ষণস্য

## স্বামিকৃত টীকা।

ভবেদিতি শাস্ত্রেণ নিয়ম্যতে হি যস্মাদস্য মুমুক্ষোস্তৌ পরিপন্থিনৌ প্রতিপক্ষৌ, অয়ং ভাবঃ, বিষয়স্মরণাদিনা রাগদ্বেষাবুৎপাদ্যানবহিতং পুরুষমনর্থেঽতিগম্ভীরে স্রোতসীব প্রকৃতির্ব-লাৎ প্রবর্ত্তয়তি শাস্ত্রং তু ততঃ প্রাগেব বিষয়েষু রাগদ্বেষপ্রতিবন্ধকে পরমেশ্বরভজনাদৌ তং প্রবর্ত্তয়তি ততশ্চ গম্ভীরস্রোতঃপাতাৎ পূর্ব্বমেব নাবমাশ্রিতইব নানর্থং প্রাপ্নোতি, তদেবং স্বাভাবিকীং পশ্বাদিসদৃশীং প্রবৃত্তিং ত্যক্ত্বা ধর্ম্মেপ্রবর্ত্তিতব্যমিত্যুক্তং॥ ৩৪॥

তর্হি স্বধর্ম্মস্য যুদ্ধাদের্দুঃখরূপস্য যথাবৎ কর্ত্তুমশক্যত্বাৎ পরধর্ম্মস্যচাহিংসাদেঃ সুক-রত্বাদ্ধর্ম্মত্বাবিশেষাচ্চ তত্র প্রবর্ত্তিতুমিচ্ছন্তং প্রত্যাহ শ্রেয়ানিতি। কিঞ্চিদঙ্গহীনোঽপি

অর্জ্জুনউবাচ—অথ কেন প্রযুক্তোঽয়ং পাপঞ্চরতি পূরুষঃ।
অনিচ্ছন্নপি বার্ষ্ণেয় বলাদিব নিযোজিতঃ ॥ ৩৬ ॥

## শাঙ্করভাষ্যম্।

শ্রেয়ঃ পরধর্ম্মে স্থিতস্য জীবিতাৎ কস্মাৎ পরধর্ম্মো ভয়াবহঃ নরকাদিলক্ষণং ভয়মাবহতি যতঃ ॥ ৩৫ ॥

যদ্যপ্যনর্থমূলং ধ্যায়তো বিষয়ান্ পুংসো রাগদ্বেষৌ হ্যস্য পরিপন্থিনাবিতি চোক্তং বিক্ষিপ্তমনবধারিতং চ যত্তুক্তং তৎ সংক্ষিপ্তং নিশ্চিতঞ্চৈনমেবেতি জ্ঞাতুমিচ্ছন্নর্জ্জুন উবাচ জ্ঞাতে হি তস্মিন্ তদুচ্ছেদায যত্নং কুর্য্যামিতি অথেতি। অথ কেন হেতুভূতেন প্রযুক্তঃ সন্ রাজ্ঞেব ভৃত্যোঽয়ং পাপং কর্ম্ম চরত্যাচবতি পূরুষঃ স্বয়মনিচ্ছন্নপি হে বার্ষ্ণেয় বৃষ্ণি-কুলপ্রসূত বলাদিব নিযোজিতো রাজ্ঞেবেত্যুক্তো দৃষ্টান্তঃ ॥ ৩৬ ॥

## গিরিকৃত টীকা।

স্বনুষ্ঠেযতযা মমাপি কর্ত্তব্যত্বং প্রাপ্তমিত্যাশঙ্ক্য ব্যাচষ্টে শ্রেয়ানিতি। উক্তেঽর্থে প্রশ্ন-পূর্ব্বকং হেতুমাহ কস্মাদিত্যাদিনা। স্বধর্ম্মমবধুয় পরধর্ম্মমনুতিষ্ঠতঃ স্বধর্ম্মাতিক্রমকৃতদো-ষস্য দুষ্পরিহরত্বান্ন তত্ত্যাগঃ সাধীয়ানিত্যর্থঃ ॥ ৩৫ ॥

প্রাগেবানর্থমূলস্যোক্তত্বাৎ পুনস্তজ্জিজ্ঞাসয়া প্রশ্নানুপপত্তিরিত্যাশঙ্ক্যাহ যদ্যপীতি। বিক্ষিপ্তং বিবিধেষু প্রদেশেষু ক্ষিপ্তং দর্শিতমিতি যাবৎ, অনবধারিতমনেকত্রোক্তত্বাদনে-কধা বা বিবেককামাদিভির্ব্বিকল্পিতত্বাদিত্যর্থঃ। নম্বনর্থমূলং পরিহর্ত্তব্যং তৎ কিমিতি জ্ঞাতুমিষ্যতে তত্রাহ জ্ঞাতে হীতি। কুর্য্যামিতি তজ্জ্ঞানমর্থবদিতি শেষঃ। বাক্যারম্ভা-র্থত্বমথশব্দস্য গৃহীত্বা প্রশ্নবাক্যং ব্যাকরোতি অথেত্যাদিনা। অনিচ্ছতোঽপি বলাদেব দুশ্চরিতে প্রেরিতত্বে দৃষ্টান্তমাচষ্টে রাজ্ঞেবেতি। বিনিযোজ্যস্বেচ্ছাসাপেক্ষত্বাত্তদভাবে তদসিদ্ধিমাশঙ্ক্য প্রাগুক্তং স্মারয়তি রাজ্ঞেবেত্যুক্ত ইতি ॥ ৩৬ ॥

## স্বামিকৃত টীকা।

স্বধর্ম্মঃ শ্রেয়ান্ প্রশস্যতরঃ স্বনুষ্ঠিতাৎ সকলাঙ্গসম্পূর্ত্ত্যা কৃতাদপি পরধর্ম্মাৎ সকাশাৎ। তত্র হেতুঃ স্বধর্ম্মে যুদ্ধাদৌ প্রবর্ত্তমানস্য নিধনং মরণমপি শ্রেষ্ঠং স্বর্গাদিপ্রাপকত্বাৎ পরধর্ম্মস্তু পরস্য ভয়াবহো নিষিদ্ধত্বেন নরকপ্রাপকত্বাৎ ॥ ৩৫ ॥

তয়োর্ন বশমাগচ্ছেদিত্যুক্তং তদেতদশক্যং মন্বানোঽর্জ্জুনউবাচ অথেতি। বৃষ্ণের্বংশে-ঽবতীর্ণো বার্ষ্ণেয়ঃ হে বার্ষ্ণেয় অনর্থরূপং পাপং কর্ত্তুমনিচ্ছন্নপি কেন প্রযুক্তঃ প্রেরিতো-ঽয়ং পুরুষঃ পাপং চরতি, কামক্রোধৌ বিবেকবলেন নিরুদ্ধতোঽপি পুরুষস্য পুনঃ পাপে প্রবৃত্তিদর্শনাৎ, অন্যোঽপি তয়োর্মূলভূতঃ কশ্চিৎ প্রবর্ত্তকো ভবেদিতি সম্ভাবনয়া প্রশ্নঃ ॥৩৬॥

শ্রীভগবানুবাচ—কামএষ ক্রোধ এষ রজোগুণসমুদ্ভবঃ।
মহাশনো মহাপাপ্মা বিদ্ধ্যেনমিহ বৈরিণম্ ॥ ৩৭ ॥

## শাঙ্করভাষ্যম্।

শৃণু ত্বং তং বৈরিণং সর্ব্বানর্থকরং যং ত্বং পৃচ্ছসি ভগবানুবাচ "ঐশ্বর্য্যস্য সমগ্রস্য ধর্ম্মস্য যশসঃ শ্রিয়ঃ। বৈরাগ্যস্যাথ মোক্ষস্য ষণ্ণাম্ভগইতীঙ্গনা"। ঐশ্বর্য্যাদি ষট্কং যস্মিন্ বাসুদেবে নিত্যমপ্রতিবদ্ধত্বেন সামস্ত্যেন চ বর্ত্ততে, "উৎপত্তিং প্রলয়ঞ্চৈব ভূতানামাগতিং গতিং। বেত্তি বিদ্যামবিদ্যাঞ্চ স বাচ্যো ভগবানিতি"। উৎপত্ত্যাদিবিষয়ঞ্চ বিজ্ঞানং যস্য স বাসুদেবো বাচ্যোভগবানিতি,কামইতি। কাম এষ সর্ব্বলোকং বশং কুর্ব্বন্ শত্রুর্যন্নিমিত্তা সর্ব্বানর্থপ্রাপ্তিঃ প্রাণিনাং স এষ কামঃ প্রতিহতঃ কেনচিৎ ক্রোধত্বেন পরিণমতেঽতঃ ক্রোধোঽপ্যেষএব রজোগুণসমুদ্ভবো রজশ্চ তদ্গুণশ্চ রজোগুণঃ সমুদ্ভবো যস্য স কামো

## গিরিকৃত টীকা।

সম্প্রতিপত্তিবচনং প্রস্তৌতি শৃণ্বিতি। তস্য বৈপরীত্যং স্ফোরয়তি সর্ব্বেতি। অপ্রস্তুতং কিমিতি প্রস্তূয়তে তত্রাহ যং ত্বমিতি। ভগবচ্ছব্দার্থং নির্দ্ধারয়িতুং পৌরাণিকং বচনমুদাহরতি ঐশ্বর্য্যস্যেতি সমগ্রস্যেত্যেতৎ প্রত্যেকং বিশেষণৈঃ সম্বধ্যতে, অথশব্দস্তথা-শব্দপর্য্যায়ঃ সমুচ্চয়ার্থঃ মোক্ষশব্দেন তদুপায়ো জ্ঞানং বিবক্ষ্যতে। উদাহৃতবচসস্তাৎপর্য্যমাহ ঐশ্বর্য্যাদীতি। স বাচ্যো ভগবানিতি সম্বন্ধঃ। তত্রৈব পৌরাণিকং বাক্যান্তরং পঠতি উৎপত্তি-মিতি। ভূতানামিতি প্রত্যেকমুৎপত্ত্যাদিভিঃ সম্বধ্যতে করণার্থৌ চোৎপত্তিপ্রলয়শব্দৌ ক্রিয়ামাত্রস্য পুরুষান্তরগোচরত্বসম্ভবাৎ, আগতির্গতিশ্চেত্যাগামিন্যৌ সম্পদ্বিপদৌ সূচ্যেতে। বাক্যান্তরস্যাপি তাৎপর্য্যমাহ উৎপত্ত্যাদীতি। বেত্তীত্যুক্তঃ সাক্ষাৎকারোবিজ্ঞানমি-ত্যুচ্যতে, সমগ্রৈশ্বর্য্যাদিসম্পত্তিসমুচ্চয়ার্থশ্চকারঃ। উক্তলক্ষণো ভগবান্ কিমুক্তবানিতি তদাহ কামইতি। কামস্য সর্ব্বলোকশত্রুত্বং বিশদযতি যন্নিমিত্তেতি। তথাপি কথং তস্যৈব ক্রোধত্বং তদাহ সএবইতি। কামক্রোধয়োরেব হেয়ত্বদ্যোতনার্থং কারণং কথ-য়তি রজোগুণইতি। কারণদ্বারা কামাদেরেব হেয়ত্বমুক্ত্বা কার্য্যদ্বারাপি তস্য হেয়ত্বং

## স্বামিকৃত টীকা।

অত্রোত্তরং শ্রীভগবানুবাচ কামএবক্রোধএষইত্যাদি। যত্ত্বয়া পৃষ্টো হেতুরেষ কামএব ননু ক্রোধোঽপি পূর্ব্বং ত্বয়োক্ত ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থে ইত্যত্র, সত্যং নাসৌ ততঃ পৃথক্ কিন্তু ক্রোধোঽপ্যেষ কামএব হি কেনচিৎ প্রতিহতঃ ক্রোধাত্মনা পরিণমতে পূর্ব্বং পৃথক্ত্বেনো-ক্তোঽপি ক্রোধঃ কামজএবেত্যভিপ্রায়েণৈকীকৃত্যোচ্যতে, রজোগুণাৎ সমুদ্ভবতীতি তথ অনেন সত্ত্ববৃদ্ধ্যা রজসি ক্ষয়ং নীতে সতি কামো ন জায়ত ইতি সূচিতং, এবং কামমিহ

ধূমেনাব্রিয়তে বহ্নির্যথাহদর্শো মলেন চ।
যথোল্বেনাবৃতো গর্ভস্তথা তেনেদমাবৃতম্ ॥ ৩৮ ॥
আবৃতং জ্ঞানমেতেন জ্ঞানিনো নিত্যবৈরিণা।
কামরূপেণ কৌন্তেয় দুষ্পূরেণানলেন চ ॥ ৩৯ ॥

## শাঙ্করভাষ্যম্।

রজোগুণসমুদ্ভবো রজোগুণস্য বা সমুদ্ভবঃ কামোহদ্ভুতো রজঃ প্রবর্ত্তয়ন্ পুরুষং প্রবর্ত্তয়তি তৃষ্ণয়া হ্যহংকারিতঃ ইতি গুণদুঃখিনাং রজঃকার্য্যে সেবাদৌ প্রবৃত্তানাং প্রলাপঃ শ্রূয়তে। মহাশনো মহদশনমস্যেতি মহাশনোহতএব মহাপাপ্মা কামেন প্রেরিতো জন্তুঃ পাপং করোতি অতো বিদ্ধ্যেনং কামমিহ সংসারে বৈরিণং ॥ ৩৭ ॥

কথং বৈরীতি দৃষ্টান্তৈঃ প্রত্যায়য়তি ধূমেনেতি। ধূমেন সহজেনাব্রিয়তে বহ্নিঃ প্রকাশাত্মকোহপ্রকাশাত্মকেন যথা বাহদর্শো মলেন চ যথোল্বেন গর্ত্তবেষ্টনেন জরায়ুণা আবৃত আচ্ছাদিতো গর্ত্তস্তথা তেনেদমাবৃতং ॥ ৩৮ ॥

কিং পুনস্তদিদংশব্দবাচ্যং যৎ কামেনাবৃতমিত্যুচ্যতে আবৃতমিতি। আবৃতমেতেন

## গিরিকৃত টীকা।

সূচয়তি রজোগুণস্যেতি। কামস্য পুরুষপ্রবর্ত্তকত্বমেব ন রজোগুণজনকত্বমিত্যাশঙ্ক্যাহ কামোহীতি। তত্রৈবানুভবানুসারিণীং লোকপ্রসিদ্ধিং প্রমাণয়তি তৃষ্ণয়া হীতি। তস্য যোগ্যাযোগ্যবিভাগমন্তরেণ বহুবিষয়ত্বং দর্শয়তি মহাশনইতি। বহুবিষয়ত্বপ্রযুক্তং কর্ম্ম নির্দ্দিশতি অত ইতি। সর্ব্ববিষয়ত্বেহপি কুতোহস্য পাপত্বমিত্যাশঙ্ক্যাহ কামেনেতি। কামস্যোক্তবিশেষণবত্বে ফলিতমাহ অত ইতি ॥ ৩৭ ॥

উত্তরশ্লোকমবতারয়তি কথমিতি। অনেকদৃষ্টান্তোপাদানং প্রতিপত্তিসৌকর্য্যার্থং। সহজস্য ধূমস্য প্রকাশাত্মকবহ্নিং প্রতি আবরণত্বসিদ্ধ্যর্থং বিশিনষ্টি অপ্রকাশাত্মকেনেতি ॥ ৩৮ ॥

## স্বামিকৃত টীকা।

মোক্ষমার্গে বৈরিণং বিদ্ধি, অয়ঞ্চ বক্ষ্যমাণক্রমেণ হন্তব্যএব যতো নাসৌ দানেন সন্ধাতুং শক্যইত্যাহ মহাশনো মহদশনং যস্য দুষ্পূরইত্যর্থঃ, ন চ সাম্না সন্ধাতুং শক্যো যতো মহাপাপ্মা অত্যুগ্রঃ ॥ ৩৭ ॥

কামস্য বৈরিত্বং দর্শয়তি ধূমেনেতি। ধূমেন সহজেন যথা বহ্নিরাব্রিয়তে আচ্ছাদ্যতে যথা চাদর্শো মলেন আগন্তুকেন যথা চোল্বেন গর্ভবেষ্টনচর্ম্মণা গর্ভঃ সর্ব্বতো নিরুদ্ধ আবৃতস্তথা প্রকারত্রয়েণাপি তেন কামেনাবৃতমিদং ॥ ৩৮ ॥

ইন্দ্রিয়াণি মনোবুদ্ধিরস্যাধিষ্ঠানমুচ্যতে।
এতৈর্বিমোহয়ত্যেষ জ্ঞানমাবৃত্য দেহিনম্ ॥ ৪০ ॥

## শাঙ্করভাষ্যম্।

জ্ঞানং জ্ঞানিনো নিত্যবৈরিণা জ্ঞানী হি জানাত্যনেন অহমনর্থে প্রযুক্তঃ পূর্ব্বমেবাতো দুঃখী চ ভবতি নিত্যমেব অতোঽসৌ জ্ঞানিনো নিত্যবৈরী ন তু মূর্খস্য স হি কামং তৃষ্ণাকালে মিত্রমিব পশ্যংস্তৎকার্য্যে দুঃখে প্রাপ্তে জানাতি তৃষ্ণয়াঽহং দুঃখিত্বমাপাদিত ইতি ন পূর্ব্বমেবাতো জ্ঞানিনএব নিত্যবৈরী কিংরূপেণ কামরূপেণ কাম ইচ্ছৈব রূপমস্যেতি কাম-রূপস্তেন দুষ্পূরেণ দুঃখেন পূরণমস্যেতি দুষ্পূরোঽতস্তেনানলেন নাস্যালং পর্য্যাপ্তির্ব্বিদ্যত ইত্যনলস্তেন ॥ ৩৯ ॥

কিমধিষ্ঠানঃ পুনঃ কামো জ্ঞানস্যাববণত্বেন বৈবী সর্ব্বস্যেত্যপেক্ষায়ামাহ জ্ঞাতে হি শত্রোরধিষ্ঠানে সুখেন নিবর্হণং কর্ত্তুং শক্যমিতি ইন্দ্রিয়াণীতি। ইন্দ্রিয়াণি মনো বুদ্ধিশ্চাস্য

## গিরিকৃত টীকা।

সামান্যতো নির্দ্দিষ্টং বিশেষতো নির্দ্দেষ্টুং আকাঙ্ক্ষাপূর্ব্বকমনন্তরশ্লোকমবতারয়তি কিং পুনরিতি। কামস্য জ্ঞানং প্রত্যাবরণসিদ্ধ্যর্থং জ্ঞানিনো নিত্যবৈরিণেত্যাদি বিশেষণং। প্রতীকমাদায় ব্যাচষ্টে আবৃতমিত্যাদিনা। জ্ঞানিনাং প্রতি বৈরিত্বেঽপি নিত্যবৈরিত্বং কামস্য কথমিত্যাহ জ্ঞানী ইতি। অনর্থপ্রাপ্তিমন্তরেণ কামস্য প্রসঙ্গাবস্থা পূর্ব্বমেবে-ত্যুচ্যতে, অতঃ শব্দেন কামপ্রসক্তিরেব পরামৃষ্যতে, নিত্যমেবেত্যুৎপত্ত্যবস্থা কার্য্যাবস্থা চ কামস্য কথ্যতে। নহু সর্ব্বস্যাপি কামাত্মতা ন প্রশস্তেতি কামো নিত্যবৈরী ভবতি ততঃ কুতো জ্ঞানিবিশেষণমিত্যাশঙ্ক্যাহ ন ত্বিতি। অজ্ঞস্য নাসৌ নিত্যবৈরীত্যেতদুপপাদয়তি স হীতি। কার্য্যপ্রাপ্তিপ্রাগবস্থা পূর্ব্বমিত্যুক্তা, অজ্ঞং প্রতি বৈরিত্বে সত্যপি কামস্য নিত্যবৈরিত্বভাবে ফলিতমাহ অতইতি। স্বরূপতো নিত্যবৈরিত্বাবিশেষেঽপি জ্ঞানা-জ্ঞানাভ্যামবান্তরভেদসিদ্ধিরিত্যর্থঃ। আকাঙ্ক্ষাদ্বারা প্রকৃতং বৈরিণমেব স্ফোরয়তি কিং রূপেণেত্যাদিনা ॥ ৩৯ ॥

## স্বামিকৃত টীকা।

ইদং শব্দনির্দ্দিষ্টং দর্শয়ন্ বৈরিত্বং স্ফুটয়তি আবৃতমিতি। ইদং বিবেকজ্ঞানং এতে-নাবৃতং, অজ্ঞস্য খলু ভোগসময়ে কামঃ সুখহেতুরেব পরিণামে তু বৈরিত্বং প্রতিপদ্যতে জ্ঞানিনঃ পুনস্তৎকালমপ্যনর্থানুসন্ধানাদ্দুঃখহেতুরেবেতি নিত্যবৈরিণেত্যুক্তং। কিঞ্চ বিষয়ৈঃ পূর্য্যমাণোঽপি যো দুষ্পূরঃ অপূর্য্যমাণস্তু শোকসন্তাপহেতুত্বাদনলতুল্যঃ অনেন সর্ব্বান্ প্রতি বৈরিত্বমুক্তং ॥ ৩৯ ॥

তস্মাত্ত্বমিন্দ্রিয়াণ্যাদৌ নিয়ম্য ভরতর্ষভ।
পাপ্মানং প্রজহি হ্যেনং জ্ঞানবিজ্ঞাননাশনম্ ॥৪১॥

## শাঙ্করভাষ্যম্।

কামস্যাধিষ্ঠানমুচ্যতে এতৈরিন্দ্রিয়াদিভিরাশ্রয়ৈর্বিমোহয়তি বিবিধং মোহয়ত্যেষ কামো জ্ঞানমাবৃত্যাচ্ছাদ্য দেহিনং শরীরিণং ॥ ৪০ ॥

যত এবং তস্মাদিতি। তস্মাত্ত্বমিন্দ্রিয়াণ্যাদৌ পূর্ব্বং নিয়ম্য বশীকৃত্য ভরতর্ষভ পাপ্মানং পাপচারং কামং প্রজহি পবিত্যজ হি যস্মাৎ এনং প্রকৃতং বৈরিণং জ্ঞানবিজ্ঞান-নাশনং জ্ঞানং শাস্ত্রত আচর্য্যতশ্চ আত্মাদীনামববোধঃ বিজ্ঞানং বিশেষতস্তদনুভবস্তয়োর্জ্ঞান-বিজ্ঞানয়োঃ শ্রেয়ঃপ্রাপ্তিহেত্বোর্নাশনং নাশকন্তন্নাশনং প্রজহি আত্মনঃ পরিত্যজে-ত্যর্থঃ ॥ ৪১ ॥

## গিরিকৃত টীকা।

কামস্য নিরাশ্রয়স্য কার্য্যকরত্বাভাবং মত্বা প্রশ্নপূর্ব্বকমাশ্রয়ং দর্শয়তি কিমধিষ্ঠানইতি। কামস্য নিত্যবৈরিত্বেন পরিজিহর্ষিতস্য কিমিত্যধিষ্ঠানং জ্ঞাপ্যতে তত্রাহ জ্ঞাতে হীতি। ইন্দ্রিয়াদীনাং কামাধিষ্ঠানত্বং প্রকটয়তি এতৈরিতি। নন্বেতাভিরিতি বক্তব্যে কথমে-তৈরিত্যুচ্যতে তত্রাহ ইন্দ্রিয়াদিভিরিতি ॥ ৪০ ॥

তেষাং কামাশ্রয়ত্বে সিদ্ধে সাশ্রয়স্য তস্য পরিহর্ত্তব্যত্বমাহ যতইতি। তস্মাদিন্দ্রিয়াদী-নামাশ্রয়ত্বাদিতি যাবৎ, পূর্ব্বং কামনিরোধাৎ প্রাগবস্থায়ামিত্যর্থঃ। তেষু নিয়মিতেষু মনোবুদ্ধ্যোর্নিয়মঃ সিধ্যতি তৎপ্রবৃত্তেরিতরপ্রবৃত্তিব্যতিরেকণাফলত্বাদিতিভাবঃ, পাপ-মূলত্বা কামস্য তচ্ছব্দবাচ্যত্বমুন্নেয়ং। কামস্য পরিত্যজ্যত্বে বৈরিত্বং হেতুঃ, তমেব হেতুং সাধয়তি জ্ঞানেতি। জ্ঞানবিজ্ঞানশব্দয়োরর্থভেদমাবেদয়তি জ্ঞানমিত্যাদিনা ॥ ৪১ ॥

## স্বামিকৃত টীকা।

ইদানীং তস্যাধিষ্ঠানং কথয়ন্ জয়োপায়মাহ ইন্দ্রিয়াণীতি দ্বাভ্যাং। বিষয়দর্শনশ্রবণা-দিভিঃ সংকল্পেনাধ্যবসায়েন চ কামস্যাবির্ভাবাদিন্দ্রিয়াণি চ মনশ্চ বুদ্ধিশ্চাস্যাধিষ্ঠানমুচ্যতে এতৈরিন্দ্রিয়াদিভির্দর্শনাদিব্যাপারবদ্ভিরাশ্রয়ভূতৈর্বিবেকজ্ঞানমাবৃত্য দেহিনং বিমোহ-য়তি ॥ ৪০ ॥

যস্মাদেবং তস্মাদিতি। তস্মাদাদৌ বিমোহাৎ পূর্ব্বমেবেন্দ্রিয়াণি মনোবুদ্ধিঞ্চ নিয়ম্য পাপ্মানং পাপরূপমেনং কামং হি স্ফুটং প্রজহি ঘাতয়, যদ্বা প্রজহি পরিত্যজ, জ্ঞানমাত্ম-বিষয়ং বিজ্ঞানং শাস্ত্রীয়ং তয়োর্নাশনং, যদ্বা জ্ঞানং শাস্ত্রাচার্য্যোপদেশজং বিজ্ঞানং নিদি-ধ্যাসনজং, তমেব ধীরো বিজ্ঞায় প্রজ্ঞাং কুর্ব্বীতেতি শ্রুতেঃ ॥ ৪১ ॥

ইন্দ্রিয়াণি পরাণ্যাহুরিন্দ্রিয়েভ্যঃ পরং মনঃ।
মনসস্তু পরা বুদ্ধির্বুদ্ধের্যঃ পরতস্তু সঃ ॥ ৪২ ॥
এবং বুদ্ধেঃ পরং বুদ্ধ্বা সংস্তভ্যাত্মানমাত্মনা।
জহি শত্রুং মহাবাহো কামরূপং দুরাসদম্ ॥ ৪৩ ॥

## শাঙ্করভাষ্যম্ ॥

ইন্দ্রিয়াণি আদৌ নিয়ম্য কামং শত্রুং জহি ইত্যুক্তং তত্র কিমাশ্রয়ঃ কামং জহ্যাদিত্যুচ্যতে ইন্দ্রিয়াণীতি। ইন্দ্রিয়াণি শ্রোত্রাদীনি পঞ্চ দেহং স্থূলং বাহ্যং পরিচ্ছিন্নং চাপেক্ষ্য সৌক্ষ্ম্যান্তরত্বব্যাপিত্বাদ্যপেক্ষ্য পরাণি প্রকৃষ্টান্যাহুঃ পণ্ডিতাস্তথেন্দ্রিয়েভ্যঃ পরং মনঃ সঙ্কল্পাত্মকং তথা মনসস্তু পরা বুদ্ধির্নিশ্চয়াত্মিকা তথা যঃ সর্ব্বদৃশ্যেভ্যো বুদ্ধ্যন্তেভ্যোঽভ্যন্তরোঽয়ং দেহিনং ইন্দ্রিয়াদিভিরাশ্রয়ৈর্যুক্তঃ কামো জ্ঞানাবরণদ্বারেণ মোহয়তীত্যুক্তং বুদ্ধেঃ পরতস্তু সঃ স বুদ্ধের্দ্রষ্টা পরমাত্মা ॥ ৪২ ॥

ততঃ কিং এবমিতি। এবং বুদ্ধেঃ পরমাত্মানং বুদ্ধ্বা জ্ঞাত্বা সংস্তভ্য সম্যক্ স্তম্ভনং কৃত্বা স্বেনৈবাত্মনা সংস্কৃতেন মনসা সম্যক্ সমাধায়েত্যর্থঃ, জহ্যেনং শত্রুং মহাবাহো

## গিরিকৃত টীকা।

পূর্ব্বোক্তমনূদ্য কামত্যাগস্য দুষ্করত্বং মন্বানোঽপ্যাসেত্যত্রোক্তমেব স্পষ্টীকর্ত্তুং প্রশ্নপূর্ব্বকং শ্লোকান্তরমবতারয়তি ইন্দ্রিয়াণীত্যাদিনা। পঞ্চেতি জ্ঞানেন্দ্রিয়বৎ কর্ম্মেন্দ্রিয়াণ্যপি বাগাদীনি গৃহ্যন্তে। কিমপেক্ষয়া তেষাং পরত্বং তত্রাহ দেহমিতি। তথাপি কেন প্রকারেণ পরত্বং তদাহ সৌক্ষ্ম্যেতি। আদিশব্দেন কারণত্বাদিনা। মনসঃ স্বরূপোক্তিপূর্ব্বকং পরত্বং কথয়তি তথেতি। মনসি দর্শিতং ন্যায়ং বুদ্ধাবতিদিশতি তথা মনসস্ত্বিতি। বুদ্ধের্যইত্যাদি ব্যাচষ্টে তথেত্যাদিনা। আত্মনো যথোক্তবিশেষণস্যাপ্রকৃতত্বমাশঙ্ক্যাহ যৎ দেহিনমিতি ॥ ৪২ ॥

## স্বামিকৃত টীকা।

যত্র চিত্তপ্রণিধানেনেন্দ্রিয়াণি নিয়ন্তুং শক্যন্তে তদাত্মস্বরূপং দেহাদিভ্যো বিবিচ্য দর্শয়তি ইন্দ্রিয়াণীতি। ইন্দ্রিয়াণি দেহাদিভ্যো গ্রাহ্যেভ্যঃ পরাণি শ্রেষ্ঠান্যাহুঃ সূক্ষ্মত্বাৎ প্রকাশকত্বাচ্চ অতএব তদ্ব্যতিরিক্তত্বমপ্যর্থাদুক্তং ভবতি, ইন্দ্রিয়েভ্যশ্চ সংকল্পাত্মকং মনঃ পরং তৎপ্রবর্ত্তকত্বাৎ, মনসস্তু নিশ্চয়াত্মিকা বুদ্ধিঃ পরা নিশ্চয়পূর্ব্বকত্বাৎ সংকল্পস্য, যস্তু বুদ্ধেঃ পরতস্তৎসাক্ষিত্বেনাবস্থিতঃ সর্ব্বান্তরঃ স আত্মা তং বিমোহয়তি দেহিনমিতি দেহিশব্দোক্ত আত্মা স ইতি পরামৃশ্যতে ॥ ৪২ ॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্ম-
বিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-
সম্বাদে কর্ম্মযোগোনাম
তৃতীয়োঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

কামরূপং দুরাসদং দুঃখেনাসদঃ আসাদনং প্রাপ্তির্যস্য তং দুরাসদং দুর্ব্বিজ্ঞেয়ানেক বিশেষমিতি ॥ ৪৩ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে তৃতীয়োঽধ্যায়ঃ।

## গিরিকৃত টীকা।

ইন্দ্রিয়াদিসমাধানপূর্ব্বকমাত্মজ্ঞানাৎ কামজয়োভবতীত্যুপসংহরতি এবমিত্যাদিনা সংস্কৃতং মনো মনঃসমাধানে হেতুরিতি সূচয়তি সংস্তভ্যেতি। প্রকৃতং শত্রুমেব বিশিনষ্টি কামরূপমিতি। তস্য দুরাসদত্বে হেতুমাহ দুর্ব্বিজ্ঞেয়েতি। অনেকো বিশেষস্তাদৃশো মহাশনত্বাদিস্তদনেনোপায়ভূতা কর্ম্মনিষ্ঠা প্রাধান্যেনোক্তা উপেয়া তু জ্ঞাননিষ্ঠা গুণত্বে-নেতি বিবেক্তব্যং ॥ ৪৩ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং তৃতীয়োঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

উপসংহরতি এবমিতি। বুদ্ধেরেব বিষয়েন্দ্রিয়াদিজন্যাঃ কামাদিবিক্রিয়াঃ আত্মা তু নির্ব্বিকারস্তৎসাক্ষীত্যেবং বুদ্ধেঃ পরমাত্মানং বুদ্ধা আত্মনা এবংভূতয়া নিশ্চয়াত্মিকয়া বুদ্ধ্যা আত্মানং মনঃ সংস্তভ্য নিশ্চলং কৃত্বা কামরূপিণং শত্রুং জহি মারয় দুরাসদং দুঃখেনাসাদ-নীয়ং দুর্ব্বিজ্ঞেয়মিত্যর্থঃ।

স্বধর্ম্মেণ যমারাধ্য ভক্ত্যা মুক্তিমিতা বুধাঃ।
তং কৃষ্ণং পরমানন্দং তোষয়েৎ সর্ব্বকর্ম্মভিঃ ॥ ৪৩ ॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং তৃতীয়োঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## চতুর্থোঽধ্যায়ঃ।

শ্রীভগবানুবাচ—ইমং বিবস্বতে যোগং প্রোক্তবানহমব্যয়ম্।
বিবস্বান্ মনবে প্রাহ মনুরিক্ষ্বাকবেঽব্রবীৎ ॥ ১ ॥

---

### শাঙ্করভাষ্যম্।

শ্রীভগবানুবাচ। যোঽয়ং যোগোঽধ্যায়দ্বয়েনোক্তো জ্ঞাননিষ্ঠালক্ষণঃ স সন্ন্যাসঃ স কর্ম্মযোগোপায়ঃ যস্মিন্ বেদার্থঃ পরিসমাপ্তঃ প্রবৃত্তিলক্ষণো নিবৃত্তিলক্ষণশ্চ গীতাসু চ সর্ব্বাস্বয়মেব যোগো বিবক্ষিতো ভগবতা, অতঃ পরিসমাপ্তং বেদার্থং মন্বানস্তং বংশকথনেন স্তৌতি ভগবান্। ইমং অধ্যায়দ্বয়েনোক্তং যোগং বিবস্বতে আদিত্যায় সর্গাদৌ প্রোক্ত-

---

### গিরিকৃত টীকা।

পূর্ব্বাভ্যামধ্যায়াভ্যাং নিষ্ঠাদ্বয়াত্মনোযোগস্য গীতত্বাৎ বেদার্থস্য চ সমাপ্তত্বাৎ বক্তব্যাশেষাভাবাৎ উক্তযোগস্য কৃতিমত্বশঙ্কানিবৃত্তয়ে বংশকথনপূর্ব্বিকাং স্তুতিং ভগবানুক্তবানিত্যাহ শ্রীভগবানিতি। তদেতদ্ভগবদ্বচনং বৃত্তানুবাদদ্বারেণ প্রস্তৌতি যোঽয়মিতি। উক্তমেব যোগং বিভজ্যানুবদতি জ্ঞানেতি। সন্ন্যাসেনেতিকর্ত্তব্যতয়া সহিতস্য জ্ঞানাত্মনো যোগস্য কর্ম্মাখ্যো যোগো হেতুরতস্তোপায়োপেয়ভূতং নিষ্ঠাদ্বয়ং প্রতিষ্ঠাপিতমিত্যর্থঃ। উক্তে যোগদ্বয়ে প্রমাণমুপন্যস্যতি যস্মিন্নিতি। অথবা জ্ঞানযোগস্য কর্ম্মযোগোপায়ত্বমেব স্ফুটয়তি যস্মিন্নিতি। প্রবৃত্ত্যা লক্ষ্যতে জ্ঞায়তে কর্ম্মযোগো নিবৃত্ত্যা চ লক্ষ্যতে জ্ঞানযোগ ইতি বিভাগঃ। যদ্যপি পূর্ব্বস্মিন্নধ্যায়দ্বয়ে যথোক্তনিষ্ঠাদ্বয়ং ব্যাখ্যাতং তথাপি বক্ষ্যমাণাধ্যায়েষু বক্তব্যান্তরমস্তীত্যাশঙ্ক্যাহ গীতাসু চেতি। কথং তর্হি সমনন্তরাধ্যায়স্য প্রবৃত্তিরতআহ অতইতি। বংশকথনং সম্প্রদায়োপদেশশ্চ অকৃত্রিমত্বাশঙ্কানিবৃত্ত্যা যোগ

### স্বামিকৃত টীকা।

আবির্ভাবতিরোভাবাবাবিষ্কর্ত্তুং স্বয়ংহরিঃ। তত্ত্বম্পদবিবেকার্থং কর্ম্মযোগং প্রশংসতি। এবং তাবদধ্যায়দ্বয়েন কর্ম্মযোগোপায়কজ্ঞানযোগো মোক্ষসাধনত্বেনোক্তস্তত্রমেব ব্রহ্মার্পণাদিগুণবিধানেন ত্বম্পদার্থবিবেকাদিনা চ প্রপঞ্চয়িষ্যন্ প্রথমং তাবৎ পরম্পরাপ্রাপ্তত্বেন

এবং পরম্পরাপ্রাপ্তমিমং রাজর্ষয়ো বিদুঃ।
স কালেনেহ মহতা যোগো নষ্টঃ পরন্তপ ॥ ২ ॥

## শাঙ্করভাষ্যম্।

বান্ অহং জগৎপরিপালয়িতৄণাং ক্ষত্রিয়াণাং বলাধানায় তেন যোগবলেন যুক্তাস্তে সমর্থা ভবন্তি ব্রহ্ম পরিরক্ষিতুং ব্রহ্মক্ষত্রে পরিপালিতে জগৎপরিপালয়িতুমলং অব্যয়মব্যয়ফলত্বান্ন হ্যস্য সম্যগ্দর্শননিষ্ঠালক্ষণস্য মোক্ষাখ্যং ফলং ব্যেতি সচ বিবস্বান্ মনবে প্রাহ মনুরিক্ষ্বা-কবে স্বপুত্ত্রায়াদিরাজায়াব্রবীৎ ॥ ১ ॥

এবমিতি। এবং ক্ষত্রিয়পরম্পরাপ্রাপ্তমিমং রাজর্ষয়ো রাজানশ্চ তে ঋষয়শ্চ রাজর্ষয়ো বিদুরিমং যোগং স যোগঃ কালেনেহ মহতা দীর্ঘেণ নষ্টো বিচ্ছিন্নসংপ্রদায়ঃ সম্বৃতো হে

## গিরিকৃত টীকা।

স্তৌ পর্য্যবস্যতি। গুরুশিষ্যপরম্পরোপন্যাসমেবানুক্রামতি ইমমিতি। ইমমিত্যস্য সন্নিহিতং বিষয়ং দর্শয়তি অধ্যায়েতি। যোগং জ্ঞাননিষ্ঠালক্ষণং কর্ম্মযোগোপায়লভ্যমি-ত্যর্থঃ। স্বয়মকৃতার্থানাং প্রয়োজনব্যগ্রাণাং পরার্থপ্রবৃত্ত্যসম্ভবাদ্ভগবতস্তথাবিধপ্রবৃত্তিদর্শ-নাৎ কৃতার্থতা কল্পনীয়েত্যাহ বিবস্বতইতি। অব্যয়বেদমূলত্বাদব্যয়ত্বং যোগস্য গময়ি-তব্যং। কিমিতি ভগবতা কৃতার্থেনাপি যোগপ্রবচনং কৃতমিতি তদাহ জগদিতি। কথং যথোক্তেন যোগেন ক্ষত্রিয়াণাং বলাধানং তদাহ তেনেতি যুক্তাঃ ক্ষত্রিয়াইতি শেষঃ, ব্রহ্ম-শব্দেন ব্রাহ্মণত্বজাতিরুচ্যতে। যদ্যপি যোগপ্রবচনেন ক্ষত্রং রক্ষিতং তেন চ ব্রাহ্মণত্বং তথাপি কথং রক্ষণীয়ং জগদশেষং রক্ষিতমিত্যাশঙ্ক্যাহ ব্রহ্মেতি। তাভ্যাং হি কর্ম্মফল-ভূতং জগদনুষ্ঠানদ্বারা রক্ষিতুং শক্যমিত্যর্থঃ। যোগস্যাব্যয়ত্বে হেত্বন্তরমাহ অব্যয়ফল-ত্বাদিতি। ননু কর্ম্মফলবদুক্তযোগফলস্যাপি সাধ্যত্বেন ক্ষয়িষ্ণুত্বমনুমীয়তে নেত্যাহ ন হীতি। অপুনরাবৃত্তিশ্রুতিপ্রতিহতমনুমানং ন প্রমাণীভবতীতিভাবঃ। ভগবতা বিব-স্বতে প্রোক্তো যোগস্তত্রৈব পর্য্যবস্যতীত্যাশঙ্ক্যাহ সচেতি। স্বপুত্রায়েত্যুভয়ত্র সম্বধ্যতে, আদিরাজায়েতীক্ষ্বাকোঃ সূর্য্যবংশপ্রবর্ত্তকত্বেন বৈশিষ্ট্যমুচ্যতে ॥ ১ ॥

যথোক্তে যোগে পরম্পরাগতে বিশিষ্টজনসম্মতিমুদাহরতি এবমিতি। তস্য কথং সম্প্রতি বক্তব্যত্বং তদাহ স কালেনেতি। পূর্ব্বার্দ্ধং ব্যাকরোতি এবমিত্যাদিনা। ঐশ্বর্য্য-

## স্বামিকৃত টীকা।

স্তবন্ শ্রীভগবানুবাচ। ইমমিতি ত্রিভিঃ। অব্যয়ফলত্বাদব্যয়ং ইমং যোগং পুরাহহং বিব-স্বতে আদিত্যায় কথিতবান্, স চ স্বপুত্রায় মনবে শ্রাদ্ধদেবায় প্রাহ, স চ মনুঃ স্বপুত্রায়েক্ষ্বা-কবেহব্রবীৎ ॥ ১ ॥

সএবায়ং ময়া তেঽদ্য যোগঃ প্রোক্তঃ পুরাতনঃ।
ভক্তোঽসি মে সখা চেতি রহস্যং হ্যেতদুত্তমম্ ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

পরন্তপ আত্মনো বিপক্ষভূতাঃ পরে উচ্যন্তে তান্ শৌর্য্যতেজোগভস্তিভির্ভানুরিব তাপয়তীতি পরন্তপঃ শত্রুতাপনইত্যর্থঃ॥ ২ ॥

দুর্ব্বলান্ অজিতেন্দ্রিয়ান্ প্রাপ্য নষ্টং যোগমিমমুপলভ্য লোকঞ্চাপুরুষসম্বন্ধিনং স এবায়মিতি। স এবায়ং ময়া তে তুভ্যমদ্যেদানীং যোগঃ প্রোক্তঃ পুরাতনঃ ভক্তোঽসি মে সখা চাসীতি রহস্যং হি যস্মাদেতদুত্তমং যোগজ্ঞানমিত্যর্থঃ॥ ৩ ॥

## গিরিকৃত টীকা।

সম্পত্তিমত্ত্বং রাজত্বং তেষামেব সূক্ষ্মার্থনিবীক্ষণক্ষমত্বমৃষিত্বমিহেতি ভগবতোঽর্জ্জুনেন সহ ব্যবহারকালো গৃহ্যতে। পরন্তপেতি সম্বোধনং বিভজতে আত্মনইতি॥ ২ ॥

কিমিতি বর্ত্তমানে কালে প্রকৃতো যোগঃ সম্প্রদায়বহিতোঽভূদিত্যাশঙ্ক্যাধিকার্য্যভাবাদিত্যাহ দুর্ব্বলানিতি। তদেব দৌর্ব্বল্যং প্রকৃতোপযোগিত্বেন ব্যাকরোতি অজিতেন্দ্রিয়ানিতি। যদ্যপি কামক্রোধাদিপ্রধানান্ পুরুষান্ প্রতিলভ্য কামক্রোধাদিভিরভিভূয়মানো যোগোনষ্টো বিচ্ছিন্নসম্প্রদায়ঃ সংজাতস্তথাপি যোগাদৃতে পুরুষার্থো লোকস্য লভ্যতে চেৎ কিমনেন যোগোপদেশেনেত্যাশঙ্ক্য যথোক্তযোগাভাবে পরমপুরুষার্থাপ্রাপ্তের্মৈবমিত্যাহ লোকঞ্চেতি। পূর্ব্বো যোগোবিচ্ছিন্নসম্প্রদায়োঽধুনা স্বস্থযোগোমদর্থমুচ্যতে ভগবতেত্যাশঙ্ক্যাহ সএবেতি। কস্মাদন্যস্মৈ কস্মৈচিৎ পুরাতনো যোগো নোক্তোভগবতেত্যাশঙ্ক্যাহ ভক্তোঽসীতি। উক্তমধিকারিণং প্রতি যোগস্য বক্তব্যত্বে হেতুমাহ রহস্যং হীতি। অনাদিবেদমূলত্বাৎ যোগস্য পুরাতনত্বং। ভক্তি শরণবুদ্ধ্যা প্রীতিস্তয়া যুক্তো নিজরূপমবেক্ষ্য ভক্তো বিবক্ষিতঃ সমানবয়াঃ স্নিগ্ধঃ সহায়ঃ সখেত্যুচ্যতে। এতদিতি কথং যোগোবিশিষ্যতে তত্রাহ জ্ঞানমিতি॥ ৩ ॥

## স্বামিকৃত টীকা।

এবমিতি। এবং রাজানশ্চ তে ঋষয়শ্চেতি অন্যেঽপিরাজর্ষয়ো নিমিপ্রমুখাঃ স্বপিত্রাদিভিরিক্ষ্বাকুপ্রমুখৈঃ প্রোক্তমিমং যোগং বিদুর্জানন্তি স্ম, অদ্যতনানামজ্ঞানে কারণমাহ হেপরন্তপ শত্রুতাপন স যোগঃ কালবশাদিহ লোকে নষ্টো বিচ্ছিন্নঃ॥ ২ ॥

সএবায়মিতি। সএবায়ং যোগো যোগবিচ্ছিন্নে সংপ্রদায়ে সতি পুনশ্চ ময়া তে তুভ্যমুক্তোযতস্ত্বং মম ভক্তোঽসি সখা চ অন্যস্মৈ ময়া নোচ্যতে হি যস্মাদেতদুত্তমং রহস্যং॥৩॥

অর্জ্জুনউবাচ—অপরং ভবতো জন্ম পরং জন্ম বিবস্বতঃ।
কথমেতদ্বিজানীয়াং ত্বমাদৌ প্রোক্তবানিতি ॥৪॥

শ্রীভগবানুবাচ—বহূনি মে ব্যতীতানি জন্মানি তব চার্জ্জুন।
তান্যহং বেদ সর্ব্বাণি ন ত্বং বেত্থ পরন্তপ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

ভগবতা বিপ্রতিষিদ্ধমুক্তমিতি মা ভূৎ কস্যচিৎ বুদ্ধিরিতি পরিহারার্থং চোদ্যমিব কুর্ব্বন্ অর্জ্জুনউবাচ, অপরমিতি। অপরমর্ব্বাক্ বসুদেবগৃহে ভবতো জন্ম পরং পূর্ব্বং সর্গাদৌ জন্মোৎপত্তির্ব্বিবস্বত আদিত্যস্য তৎ কথমেতদ্বিজানীয়ামামবিরুদ্ধার্থতয়া যস্তমেবাদৌ প্রোক্তবানিমং যোগং সএব ত্বমিদানীং মহ্যং প্রোক্তবানসীতি ॥ ৪ ॥

যা বাসুদেবেঽনীশ্বরাঽসর্ব্বজ্ঞাশঙ্কা মূর্খাণাং তাং পরিহরন্ শ্রীভগবানুবাচ যদর্থো হ্যর্জ্জুনস্য প্রশ্নঃ বহূনীতি। বহূনি মে মম ব্যতীতানি অতিক্রান্তানি জন্মানি তব চ হে অর্জ্জুন তান্যহং বেদ জানে সর্ব্বাণি ন ত্বং বেত্থ ন জানীষে পরন্তপ ধর্ম্মাধর্ম্মাদিপ্রতিবদ্ধজ্ঞানশক্তিত্বাদহং পুনর্নিত্যশুদ্ধবুদ্ধমুক্তসত্যস্বভাবত্বাদনাবরণজ্ঞানশক্তিরিতি বেদাহং হে পরন্তপ ॥ ৫ ॥

## গিরিকৃত টীকা।

ভগবতি লোকস্যানীশ্বরত্বশঙ্কাং নিবর্ত্তয়িতুং চোদ্যমুদ্ভাবয়তি ভগবতেতি। পরিহারার্থং ভগবতো মনুষ্যবদাস্থিতস্যানীশ্বরত্বমুপেত্য তদ্বচনে শঙ্কিতবিপ্রতিষেধস্যেতি শেষঃ, ভগবতো নিজরূপমুপেত্য নেদং চোদ্যং কিন্তু লীলাবিগ্রহং গৃহীত্বেতি বক্তুং চোদ্যমিবেত্যুক্তং। এতচ্ছব্দার্থমেব স্ফুটয়তি যস্তমিতি ॥ ৪ ॥

ভগবত্যজ্ঞানাং মনুষ্যত্বশঙ্কাং বারয়িতুং প্রতিবচনমবতারয়তি যা বাসুদেবইতি। অন্যথা প্রশ্নে কথমাশঙ্কান্তরং পরিহর্ত্তুং ভগবদ্বচনমিত্যাশঙ্ক্য প্রতিবচনয়োরেকার্থত্বমাহ যদর্থো হীতি। যস্য শঙ্কিতস্য বিরোধস্য পরিহারার্থং তস্য প্রশস্তমেব পরিহারং বক্তুং ভগবদ্বচনমিত্যর্থঃ। অতীতানেকজন্মবত্ত্বং মমৈব নাসাধারণং কিন্তু সর্ব্বপ্রাণিসাধারণমিত্যাহ তব চেতি। তানি প্রমাণাভাবান্ন প্রতিভান্তীত্যাশঙ্ক্যাহ তানীতি। ঈশ্বরস্যানাবৃতজ্ঞানত্বাদিত্যর্থঃ। কিমিতি তর্হি তানি মম ন প্রতীয়ন্তে তবাবৃতজ্ঞানত্বাদিত্যাহ ন ত্বমিতি পরান্ পরিকল্প্য তৎপরিভবার্থং প্রবৃত্তত্বাত্তব জ্ঞানাবরণং বিজ্ঞেয়মিত্যাহ পরন্ত-

## স্বামিকৃত টীকা।

ভগবতো বিবস্বন্তং প্রতি যোগোপদেশাসম্ভবং পশ্যন্নর্জ্জুনউবাচ অপরমিতি। অপরং অর্ব্বাচীনং তব জন্ম পরং প্রাক্কালীনং বিবস্বতো জন্ম তস্মাত্তবাধুনাতনত্বাচ্চিরন্তনায় বিবস্বতে ত্বমাদৌ যোগং প্রোক্তবানিত্যেতৎ কথমহং জানীয়াং জ্ঞাতুং শক্নুয়াম্ ॥ ৪ ॥

অজোঽপি সন্নব্যয়াত্মা ভূতানামীশ্বরোঽপি সন্
প্রকৃতিং স্বামধিষ্ঠায় সম্ভবাম্যাত্মমায়য়া ॥ ৬ ॥

## শাঙ্করভাষ্যম্ ।

কথং তর্হি তব নিত্যেশ্বরস্য ধর্ম্মাধর্ম্মাভাবেঽপি জন্মেত্যুচ্যতে অজোঽপীতি। অজোঽপি জন্মরহিতোঽপি সংস্তথাব্যয়াত্মা অক্ষীণজ্ঞানশক্তিস্বভাবোঽপি সন্ তথা ভূতানাং ব্রহ্মাদিস্তম্বপর্য্যন্তানাং ঈশ্বর ঈশনশীলোপি সন্ প্রকৃতিং মায়াং মম বৈষ্ণবীং ত্রিগুণাত্মিকাং যস্যা বশে সর্ব্বং জগৎ বর্ত্ততে যযা মোহিতঃ সন্ স্বমাত্মানং বাসুদেবং ন জানাতি তাং প্রকৃতিং স্বামধিষ্ঠায় বশীকৃত্য সম্ভবামি দেহবানিব ভবামি জাতইবাত্মমায়য়া ন পরমার্থতো লোকবৎ ॥ ৬ ॥

---

## গিরিকৃত টীকা।

পেতি। অর্জ্জুনস্য ভগবতা সহাতীতানেকজন্মত্বে তুল্যেঽপি জ্ঞানবৈষম্যে হেতুমাহ ধর্ম্মেতি। আদিশব্দেন রাগলোভাদয়ো গৃহ্যন্তে। ঈশ্বরস্যাতীতানাগতবর্ত্তমানসর্ব্বার্থবিষয়জ্ঞানত্বে হেতুমাহ অহমিতি ॥ ৫ ॥

ঈশ্বরস্য কারণাভাবাৎ জন্মৈবাযুক্তমতীতানেকজন্মবত্ত্বস্তু দূরোৎসারিতমিতি শঙ্কতে কথমিতি বস্তুতো জন্মাভাবেঽপি মায়াবশাজ্জন্মসম্ভবতীত্যুত্তরমাহ উচ্যতে ইতি বস্তুতো জন্মাযোগে কারণং পূর্ব্বার্দ্ধেনানূদ্য প্রাতিভাসিকজন্মসম্ভবে কারণমাহ প্রকৃতিমিতি। প্রকৃতিশব্দস্য স্বরূপবিষয়ত্বং প্রত্যাদেষ্টুমাত্মমায়য়েত্যুক্তং। বস্তুতো জন্মাভাবে কারণানুবাদভাগং বিবৃণোতি অজোঽপীত্যাদিনা। প্রাতিভাসিকজন্মসম্ভবে কারণকথনপরমুত্তরার্দ্ধং বিভজতে প্রকৃতিমিত্যাদিনা। প্রকৃতিশব্দস্য স্বরূপশব্দপর্য্যায়ত্বং বারয়তি মায়ামিতি। তস্যাঃ স্বাতন্ত্র্যং নিরাকৃত্য ভগবদধীনত্বমাহ মমেতি। তস্যাশ্চ অধিকরণদ্বারেণাবচ্ছিন্নত্বং সূচয়তি বৈষ্ণবীমিতি। মায়াশব্দস্যাপি প্রজ্ঞানামসু পাঠাদ্বিজ্ঞানশক্তিবিষয়ত্বমাশঙ্ক্যাহ ত্রিগুণাত্মিকামিতি। তস্যাঃ কার্য্যলিঙ্গকমনুমানং সূচয়তি যস্যাইতি। জগতোমায়াবশবর্ত্তিত্বমেব স্ফুটয়তি যয়েতি। যথা লোকে কশ্চিজ্জাতো দেহ-

## স্বামিকৃত টীকা।

রূপান্তরেণোপদিষ্টবানিত্যভিপ্রায়েণোত্তরং শ্রীভগবানুবাচ বহূনীতি। তান্যহং বেদ বেদ্মি অলুপ্তবিদ্যাশক্তিত্বাৎ, ত্বন্তু ন বেত্থ বেৎসি অবিদ্যাবৃতত্বাৎ ॥ ৫ ॥

নম্বু অনাদেস্তব কুতোজন্ম অবিনাশিনশ্চ কথং পুনঃ পুনর্জ্জন্ম যেন বহূনি মে ব্যতীতানীত্যুচ্যতে ঈশ্বরস্য তব পুণ্যপাপবিহীনস্য কথং বা জীববজ্জন্মেত্যতআহ অজোঽপীতি। সত্যমেবং তথাপি অজোঽপি সন্নহং তথাব্যয়াত্মাপি অনশ্বরস্বভাবোঽপি সন্ তথা

যদা যদা হি ধর্ম্মস্য গ্লানির্ভবতি ভারত।
অভ্যুত্থানমধর্ম্মস্য তদাত্মানং সৃজাম্যহম্ ॥ ৭ ॥
পরিত্রাণায় সাধূনাং বিনাশায় চ দুষ্কৃতাম্।
ধর্ম্মসংস্থাপনার্থায় সম্ভবামি যুগে যুগে ॥ ৮ ॥

## শাঙ্করভাষ্যম্।

তচ্চ জন্ম কদা কিমর্থং বেত্যুচ্যতে যদেতি। যদা যদা হি ধর্ম্মস্য গ্লানির্হানির্ব্বর্ণাশ্রমাদিলক্ষণস্য প্রাণিনামভ্যুদয়নিঃশ্রেয়সসাধনস্য অভাবো ভবতি ভারত অভ্যুত্থানং সমুদ্ভবোঽধর্ম্মস্য তদা তদাত্মানং সৃজাম্যহং মায়য়া ॥ ৭ ॥

কিমর্থং পরিত্রাণায়েতি। পরিত্রাণায় পরিরক্ষণায় সাধূনাং সন্মার্গস্থানাং বিনাশায় চ

## গিরিকৃত টীকা।

বানালক্ষ্যতে এবমহমপি মায়ামাশ্রিত্য তয়া স্ববশয়া সম্ভবামি তেন মায়াময়মীশ্বরস্য জন্মেত্যাহ তাং প্রকৃতিমিত্যাদিনা। সম্ভবামি ইত্যুক্তমেব বিভজতে দেহবানিতি। অস্মদাদেরিব তবাপি পারমার্থিকত্বাভিমানো জন্মাদিবিষয়ে স্যাদিত্যাশঙ্ক্য প্রাগুক্তস্বরূপপরিজ্ঞানবত্ত্বাদীশ্বরস্য নৈবমিত্যাহ ন পরমার্থতইতি। আবৃতজ্ঞানবতো লোকস্য জন্মাদিবিষয়ে পরমার্থত্বাভিমানঃ সম্ভবতীত্যাহ লোকবদিতি ॥ ৬ ॥

যদীশ্বরস্য মায়ানিবন্ধনং জন্মেত্যুক্তং তস্য প্রশ্নপূর্ব্বকং কালং কথয়তি তচ্চেত্যাদিনা। চাতুর্ব্বর্ণ্যে চাতুরাশ্রম্যে চ যথাবদনুষ্ঠীয়মানে নাস্তি ধর্ম্মহানিরিতি মন্বানো বিশিনষ্টি বর্ণেতি। বর্ণৈরাশ্রমৈস্তদাচারৈশ্চ লক্ষ্যতে জ্ঞায়তে যো ধর্ম্মঃ তস্যেতি যাবৎ। ধর্ম্মহানৌ সমস্তপুরুষার্থভঙ্গো ভবতীত্যভিপ্রেত্যাহ প্রাণিনামিতি। ন চ যথোক্তসর্ব্বধর্ম্মস্য হানিং সোঢ়ুং শক্তো ভবানিত্যাহ ভারতেতি। ন কেবলং প্রাণিনাং ধর্ম্মহানিরেব ভগবতো মায়াবিগ্রহস্য পরিগ্রহে হেতুরপি তু তেষামধর্ম্মপ্রবৃত্তিরপীত্যাহ অভ্যুত্থানমিতি। যদা যদেতি পূর্ব্বেণ সম্বন্ধঃ ॥ ৭ ॥

যথোক্তে কালে কৃতকৃত্যস্য ভগবতো মায়াকৃতে জন্মনি প্রশ্নপূর্ব্বকং প্রয়োজনমাহ কিম-

## স্বামিকৃত টীকা।

ঈশ্বরোঽপি কর্ম্মপারতন্ত্র্যরহিতোঽপি সন্ স্বমায়য়া সম্ভবামি সম্যগপ্রচ্যুতজ্ঞানবলবীর্য্যাদিশক্ত্যৈব ভবামি, ননু তথাপি ষোড়শকলাত্মকলিঙ্গদেহশূন্যস্য তব কুতো জন্ম ইত্যতউক্তং স্বাং শুদ্ধসত্ত্বাত্মিকাং প্রকৃতিমধিষ্ঠায় স্বীকৃত্য বিশুদ্ধোর্জ্জিতসত্ত্বমূর্ত্ত্যা স্বেচ্ছয়াবতরামীত্যর্থঃ ॥ ৬ ॥

কদা সম্ভবসীত্যপেক্ষায়ামাহ যদা যদেতি। গ্লানির্হানিঃ, অভ্যুত্থানমাধিক্যং ॥ ৭ ॥

জন্ম কর্ম্মচ মে দিব্যমেবং যো বেত্তি তত্ত্বতঃ।
ত্যক্ত্বা দেহং পুনর্জ্জন্ম নৈতি মামেতি সোঽর্জ্জুন ॥ ৯ ॥
বীতরাগভয়ক্রোধা মন্ময়া মামুপাশ্রিতাঃ।
বহবো জ্ঞানতপসা পূতা মদ্ভাবমাগতাঃ ॥ ১০ ॥

## শাঙ্করভাষ্যম্।

দুষ্কৃতাং পাপকারিণাং কিঞ্চ ধর্ম্মস্য সংস্থাপনার্থায় সম্যক্ স্থাপনং তদর্থং সম্ভবামি যুগে যুগে প্রতিযুগং ॥ ৮ ॥

জন্মেতি। তৎ জন্ম মায়ারূপং কর্ম্ম চ সাধূনাং পরিত্রাণাদি মে মম দিব্যমপ্রাকৃতমৈশ্বরমেবং যথোক্তং যো বেত্তি তত্ত্বতস্তত্ত্বেন যথাবৎ, ত্যক্ত্বা দেহমিমং পুনর্জ্জন্ম পুনরুৎপত্তিং নৈতি ন প্রাপ্নোতি মামেত্যাগচ্ছতি স মুচ্যতে অর্জ্জুন ॥ ৯ ॥

## গিরিকৃত টীকা।

র্থমিত্যাদিনা। যথা সাধূনাং রক্ষণমসাধূনাং নিগ্রহশ্চ ভগবদবতারফলং ফলান্তরমপি তস্যাস্তীত্যাহ কিঞ্চেতি। ধর্ম্মে হি স্থাপিতে জগদেব স্থাপিতং ভবত্যন্যথা ভিন্নমর্য্যাদং জগদসঙ্গতমাপদ্যেতেত্যর্থঃ ॥ ৮ ॥

মায়াময়মীশ্বরস্য জন্ম ন বাস্তবং তস্যৈব চ জগৎপরিপালনং কর্ম্ম নান্যস্যেতি জানতঃ শ্রেয়োঽবাপ্তিং দর্শয়ন্বিপক্ষে প্রত্যবায়ং সূচয়তি তজ্জন্মেত্যাদিনা। যথোক্তং মায়াময়ং কল্পিতমিতি যাবৎ, বেদনস্য যথাবত্ত্বং বেদ্যস্য জন্মাদেরুক্তরূপানতিবর্ত্তিত্বং যদি পুনর্ভগবতো বাস্তবং জন্ম সাধুজনপরিপালনাদি চান্যস্যেব কর্ম্ম ক্রিয়স্যেতি বিবক্ষ্যতে তদা তত্ত্বাপরিজ্ঞানপ্রযুক্তো জন্মাদিঃ সংসারো দুর্ব্বারঃ স্যাদিতি ভাবঃ ॥ ৯ ॥

## স্বামিকৃত টীকা।

কিমর্থমিত্যপেক্ষায়ামাহ পরিত্রাণায়েতি। সাধূনাং স্বধর্ম্মবর্ত্তিনাং রক্ষণায়, দুষ্টং কর্ম্ম কুর্ব্বন্তীতি দুষ্কৃতস্তেষাং বধায় চ, এবং ধর্ম্মসংস্থাপনার্থায় সাধুরক্ষণেন দুষ্টবধেন চ ধর্ম্মং স্থিরীকর্ত্তুং, যুগে যুগে তত্তদবসরে সম্ভবামীত্যর্থঃ, ন চৈবং দুষ্টনিগ্রহং কুর্ব্বতোঽপি নৈর্ঘৃণ্যং শঙ্কনীয়ং যথাহুঃ, লালনে তাড়নে মাতুর্নাকারুণ্যং যথার্ভকে। তদ্বদেব মহেশস্য নিয়ন্তুর্গুণদোষয়োরিতি ॥ ৮ ॥

এবম্বিধানামীশ্বরজন্মকর্ম্মণাং জ্ঞানে ফলমাহ জন্মেতি। স্বেচ্ছয়া কৃতং মম জন্ম কর্ম্ম চ ধর্ম্মপালনরূপং দিব্যমলৌকিকং তত্ত্বতঃ পরানুগ্রহার্থমেবেতি যো বেত্তি স দেহাভিমানং ত্যক্ত্বা পুনর্জন্ম সংসারং নৈতি ন প্রাপ্নোতি কিন্তু মামেব প্রাপ্নোতি ॥ ৯ ॥

যে যথা মাং প্রপদ্যন্তে তাংস্তথৈব ভজাম্যহম্।
মম বর্ত্মানুবর্ত্তন্তে মনুষ্যাঃ পার্থ সর্ব্বশঃ ॥ ১১ ॥

## শাঙ্করভাষ্যম্।

নৈষ মোক্ষমার্গ ইদানীং প্রবৃত্তঃ কিং তর্হি পূর্ব্বমপি বীতরাগেতি। বীতরাগভয়ক্রোধা রাগশ্চ ভয়শ্চ ক্রোধশ্চ রাগভয়ক্রোধাঃ বীতা বিগতা যেভ্যস্তে বীতরাগভয়ক্রোধা মন্ময়া ব্রহ্মবিদ ঈশ্বরাভেদদর্শিনো মামেব চ পরমেশ্বরমুপাশ্রিতাঃ কেবলজ্ঞাননিষ্ঠাইত্যর্থঃ বহবোঽনেকে জ্ঞানতপসা জ্ঞানমেব চ পরমাত্মবিষয়ং তপস্তেন জ্ঞানতপসা পূতাঃ পরাং শুদ্ধিং গতাঃ সন্তো মদ্ভাবমীশ্বরভাবং মোক্ষমাগতাঃ সমনুপ্রাপ্তাঃ ॥ ইতরতপোনিরপেক্ষা জ্ঞাননিষ্ঠা ইত্যস্য লিঙ্গং জ্ঞানতপসেতি বিশেষণং ॥ ১০ ॥

তব তর্হিরাগদ্বেষৌ স্তঃ যেন কেভ্যশ্চিদেবাত্মভাবং প্রযচ্ছসি ন সর্ব্বেভ্যইত্যুচ্যতে যে যথেতি। যে যথা যেন প্রকারেণ যেন প্রয়োজনেন যৎফলার্থিতয়া মাং প্রপদ্যন্তে তাংস্ত-

## গিরিকৃত টীকা।

সম্প্রতি প্রস্তুতমোক্ষমার্গস্য নূতনত্বেনাব্যবস্থিতত্বমাশঙ্ক্য পরিহরতি নৈষ ইতি। মন্ময়ত্বস্য মদ্ভাবগমনেনাপৌনরুক্ত্যং দর্শয়তি ব্রহ্মবিদইতি। আত্মনো ভিন্নত্বেন ভিন্নাভিন্নত্বেন বা ব্রহ্মণো বেদনং ব্যাবর্ত্তয়তি ঈশ্বরেতি। অভেদদর্শনেন সমুচ্চিত্য কর্ম্মানুষ্ঠানং প্রত্যাচষ্টে মামেবেতি। তদুপাশ্রয়ত্বমেব বিশদয়তি কেবলেতি। মামুপাশ্রিতাইতি কেবলজ্ঞাননিষ্ঠত্বমুক্তং জ্ঞানতপসা পূতাইতি কিমর্থং পুনরুচ্যতে তত্রাহ ইতরেতি ॥ ১০ ॥

ঈশ্বরঃ সর্ব্বেভ্যো ভূতেভ্যো মোক্ষং প্রয়চ্ছতি চেৎ প্রাগুক্তবিশেষণবৈয়র্থ্যং যদি তু কেভ্যশ্চিদেব মোক্ষং প্রয়চ্ছেত্তর্হি তস্য রাগাদিমত্ত্বাদনীশ্বরত্বাপত্তিরিতি শঙ্কতে তব তর্হীতি। যে মুমুক্ষবস্তেভ্যো মোক্ষমীশ্বরো জ্ঞানসম্পাদনদ্বারা প্রয়চ্ছতি ফলান্তরার্থিভ্যস্তু তত্তদুপায়া-

## স্বামিকৃত টীকা।

কথং জন্মকর্ম্মজ্ঞানে ত্বৎপ্রাপ্তিঃ স্যাদিত্যত আহ বীতরাগেতি। অহং শুদ্ধসত্ত্বাবতারৈ-র্ধর্ম্মপালনং করোমীতি মদীয়ং পরমকারুণিকত্বং জ্ঞাত্বা বীতা বিগতা রাগভয়ক্রোধা যেভ্যস্তে চিত্তবিক্ষেপাভাবান্মন্ময়া মদেকচিত্তা ভূত্বা মামেবোপাশ্রিতাঃ সন্তো মৎপ্রসাদলব্ধং যদাত্মজ্ঞানঞ্চ তপশ্চ তৎপরিপাকহেতুঃ স্বধর্ম্মঃ। দ্বন্দ্বৈকবদ্ভাবঃ। তেন জ্ঞানতপসা পূতাঃ শুদ্ধানিরস্তাঽজ্ঞানতৎকার্য্যমলা মদ্ভাবং মৎসাযুজ্যং প্রাপ্তা বহবঃ, নত্বধুনৈব প্রবৃত্তোঽয়ং মদ্ভক্তিমার্গইত্যর্থঃ। তদেবং তান্যহং বেদ সর্ব্বাণীত্যাদিনা বিদ্যাবিদ্যোপাধিভ্যাং তত্ত্বংপদার্থাবীশ্বরজীবৌ প্রদর্শ্য ঈশ্বরস্য চাবিদ্যাভাবেন নিত্যশুদ্ধত্বাজ্জীবস্য চেশ্বরপ্রসাদলব্ধজ্ঞানেনাজ্ঞাননিবৃত্তেঃ শুদ্ধস্য সতশ্চিদংশেন তদৈক্যমুক্তমিতি দ্রষ্টব্যং ॥ ১০ ॥

## শাঙ্করভাষ্যম্।

থৈব তৎফলদানেন ভজাম্যহমনুগৃহ্লাম্যহং ইত্যতঃ তেষাং মোক্ষং প্রত্যক্ষং প্রত্যনর্থিত্বাৎ ন হ্যেকস্য মুমুক্ষুত্বং ফলার্থিত্বঞ্চ যুগপৎ সম্ভবতি অতো যে যৎফলার্থিনঃ তান্ তৎফলপ্রদানেন যে যথোক্তকারিণস্তৎফলার্থিনো মুমুক্ষবশ্চ তান্ জ্ঞানপ্রদানেন যে জ্ঞানিনঃ সন্ন্যাসিনো মুমুক্ষবশ্চ তান্ মোক্ষপ্রদানেন তথা আর্ত্তানার্ত্তিহরণেনেত্যেবং যথা যেন প্রকারেণ মাং প্রপদ্যন্তে যে তাংস্তথৈব ভজামীত্যর্থঃ, ন পুনঃ রাগদ্বেষনিমিত্তং মোহনিমিত্তং বা কিঞ্চিদ্ভজামি সর্ব্বথাপি সর্ব্বাবস্থস্য মমেশ্বরস্য বর্ত্ম মার্গমনুবর্ত্তন্তে মনুষ্যাঃ, যৎ ফলার্থিতয়া যস্মিন্ কর্ম্মণ্যধিকৃতাঃ যে প্রযতন্তে তে মনুষ্যা অত্র উচ্যন্তে হে পার্থ সর্ব্বশঃ সর্ব্বপ্রকারৈঃ ॥ ১১ ॥

## গিরিকৃত টীকা।

মুষ্ঠাপনেন তত্তদেব দদাতীতি নাস্য রাগদ্বেষাবিতি পরিহরতি উচ্যতইতি। মুমুক্ষূণামীশ্বরানুসারিত্বেপি ফলান্তরার্থিনাং কুতস্তদনুসারিত্বমিত্যাশঙ্ক্য ফলমত উপপত্তেরিতি ন্যায়েন তৎফলস্যেশ্বরায়ত্তত্বাত্তদনুবর্ত্তিত্বমাবশ্যকমিত্যাহ মমেতি। ভগবদ্বচনভাগিনাং সর্ব্বেষামেব কৈবল্যমেকরূপং কিমিতি নানুগৃহ্যতে তত্রাহ তেষামিতি। অভ্যুদয়নিঃশ্রেয়সার্থিত্বং প্রার্থনাবৈচিত্র্যাদেকস্যৈব কিং ন স্যাদিত্যাশঙ্ক্য পর্য্যায়েণ তদনুপপত্তিং সাধয়তি ন হীতি। মুমুক্ষূণাং ফলার্থিনাঞ্চ বিভাগে স্থিতে সত্যনুগ্রহবিভাগং ফলিতমাহ অতইতি। ফলপ্রদানেনানুগৃহ্নামীতি সম্বন্ধঃ। নিত্যনৈমিত্তকর্ম্মানুষ্ঠায়িনামেব ফলার্থিত্বাভাবে সতি মুমুক্ষুত্বে কথং তেষ্বনুগ্রহঃ স্যাদিতি তত্রাহ যে যথোক্তেতি। জ্ঞানপ্রদানেন ভজামীত্যুত্তরত্র সম্বন্ধঃ। সন্তি কেচিত্ত্যক্তসর্ব্বকর্ম্মাণো জ্ঞানিনো মোক্ষমেবাপেক্ষমাণাস্তেষ্বনুগ্রহপ্রকারং প্রকটয়তি যে জ্ঞানিন ইতি। কেচিদার্ত্তাঃ সন্তো জ্ঞানাদিসাধনান্তররহিতা ভগবন্তমেবার্ত্তিমপহর্ত্তুমনুবর্ত্তন্তে তেষু ভগবতোঽনুগ্রহবিশেষং দর্শযতি তথেতি। পূর্ব্বার্দ্ধব্যাখ্যানমুপসংহরতি ইত্যেবমিতি। ভগবতোঽনুগ্রহে নিমিত্তান্তরং নিবারয়তি ন পুনরিতি। ফলার্থিত্বে মুমুক্ষুত্বে চ জন্তূনাং ভগবদনুসরণমাবশ্যকমিত্যুত্তরার্দ্ধং বিভজতে সর্ব্বথাপীতি। সর্ব্বাবস্থত্বং তেন তেনাত্মনা পরস্যৈবেশ্বরস্যাবস্থানং· মার্গো জ্ঞানকর্ম্মলক্ষণঃ মনুষ্যগ্রহণাদিতরেষামীশ্বরমার্গানুবর্ত্তিত্বমপ্যুদাস্যং স্যাদিত্যাশঙ্ক্যাহ যৎফলেতি। সর্ব্বপ্রকারৈর্মম মার্গমনুবর্ত্তন্তে ইন্দ্রাদিরূপেণাপি মমৈব সেব্যত্বাৎ ॥ ১১ ॥

## স্বামিকৃত টীকা।

নমু তর্হি কিং ত্বয্যপি বৈষম্যমস্তি যস্মাদেবং ত্বদেকশরণানামেবাত্মভাবং দদাসি নান্যেষাং সকামানামিত্যতআহ যে ইতি। যথা যেন প্রকারেণ সকামতয়া নিষ্কামতয়া বা যে মাং ভজন্তি তানহং তথৈব তদপেক্ষিতফলদানেন ভজামি অনুগৃহ্নামি, ন তু সকামা মাং বিহায়েন্দ্রাদীনেব যে ভজন্তে তানহমুপেক্ষইতি মন্তব্যং যতঃ সর্ব্বশঃ সর্ব্বপ্রকারৈরিন্দ্রাদিসেবকা অপি মমৈব বর্ত্ম ভজনমার্গমনুবর্ত্তন্তে ইন্দ্রাদিরূপেণাপি মমৈব সেব্যত্বাৎ ॥ ১১ ॥

কাঙ্ক্ষন্তঃ কর্ম্মণাং সিদ্ধিং যজন্তইহ দেবতাঃ।
ক্ষিপ্রং হি মানুষে লোকে সিদ্ধির্ভবতি কর্ম্মজা॥ ১২ ॥

## শাঙ্করভাষ্যম্।

যদি তবেশ্বরস্য রাগাদিদোষাভাবঃ তদা সর্ব্বপ্রাণিষু অনুজিঘৃক্ষায়াং তুল্যায়াং সর্ব্বফল-প্রদানসমর্থে চ ত্বয়ি সতি বাসুদেবঃ সর্ব্বমিতি জ্ঞানেনৈব মুমুক্ষবঃ সন্তঃ কস্মাত্ত্বামেব সর্ব্বে ন প্রতিপদ্যন্তে ইতি শৃণু তত্র কারণং কাঙ্ক্ষন্তইতি। অভিলষন্তঃ কর্ম্মণাং সিদ্ধিং ফল-নিষ্পত্তিং প্রার্থয়মানা যজন্তে ইহাস্মিন্ লোকে দেবতা ইন্দ্রাগ্ন্যাদ্যাঃ অথ যোঽন্যাং দেবতা-মুপাস্তেঽন্যোঽসাবন্যোঽহমস্মীতি ন স বেদ যথা পশুরেবং স দেবানামিতি শ্রুতেঃ তেষাং হি ভিন্নদেবতাযাজিনাং ফলাকাঙ্ক্ষিণাং ক্ষিপ্রং শীঘ্রং হি যস্মান্মানুষে লোকে, মনুষ্যলোকে হি শাস্ত্রাধিকারঃ ক্ষিপ্রং হি মানুষে লোকে ইতি বিশেষণাদন্যেষ্বপি কর্ম্মফলসিদ্ধিং দর্শয়তি

## গিরিকৃত টীকা

অনুগ্রাহ্যাণাং জ্ঞানকর্ম্মানুরোধেন ভগবতা তেষ্বনুগ্রহবিধানাত্তস্য রাগদ্বেষৌ যদি ন ভবতস্তর্হি তস্য রাগাদ্যভাবাদেব সর্ব্বেষু প্রাণিষ্বনুগ্রহেচ্ছা তুল্যা প্রাপ্তা ন চ তস্যাং সত্যা-মেব ফলস্যাল্পীয়সঃ সম্পাদনে সামর্থ্যং ন তু ভবতো মহতো মোক্ষাখ্যস্য ফলস্য প্রদানেঽশক্তিরিতি যুক্তমপ্রতিহতজ্ঞানেচ্ছাক্রিয়াশক্তিমতস্তব সর্ব্বফলপ্রদানসামর্থ্যাত্তথা চ যথোক্তানুজিঘৃক্ষায়াং সত্যাং ত্বয়ি চ যথোক্তসামর্থ্যবতি সতি সর্ব্বে ফল্গুফলাদভ্যুদয়াৎ বিমুখা মোক্ষমেবাপেক্ষমাণা জ্ঞানেন ত্বামেব কিমিতি ন প্রতিপদ্যেরন্নিতি চোদয়তি যদীতি। মোক্ষাপেক্ষাভাবাত্তদুপায়ভূতজ্ঞানাদপি বৈমুখ্যাদ্ভগবৎপ্রাপ্ত্যভাবে হেতুমভিদধানঃ সমা-ধত্তে শৃণ্বিতি। কর্ম্মফলসিদ্ধিমিচ্ছতা কিমিতি মানুষে লোকে দেবতাপূজনমিষ্যতে তত্রাহ ক্ষিপ্রং হীতি। কর্ম্মফলসম্পত্ত্যর্থিনাং যষ্ট যষ্টব্যবিভাগদর্শিনাং তদ্দর্শনে কারণমাত্মাজ্ঞানং মিত্যত্র বৃহদারণ্যকশ্রুতিমুদাহরতি অথেতি। অবিদ্যাপ্রকরণোপক্রমার্থমথেত্যুক্তং। উপা-য়নং ভেদদর্শনমিত্যনূদ্য কারণমাত্মাজ্ঞানং ন তত্রেতি দর্শয়তি নেতি। যথাস্মদাদীনাং হল বহনাদিনা পশুরুপকরোত্যেবমজ্ঞোদেবাদীনাং যাগাদিভিরুপকরোতীত্যাহ যথেতি। কি-মিতি তে ফলাকাঙ্ক্ষিণো ভিন্নদেবতাযাজিনো জ্ঞানমার্গং নাপেক্ষন্তে তত্রোত্তরার্দ্ধমুত্তরত্বেন যোজয়তি তেষামিত্যাদিনা। যস্মাদযথোক্তানামধিকারিণাং কর্ম্মপ্রযুক্তং ফলং লোকবিশেষে ঝটিতি সিধ্যতি তস্মাত্তেষাং মোক্ষমার্গাদস্তি বৈমুখ্যমিত্যর্থঃ। মানুষলোকবিশেষণং কিম-

## স্বামিকৃত টীকা।

তর্হি মোক্ষার্থমেব কিমিতি সর্ব্বে ত্বাং ন ভজন্তীত্যতআহ কাংক্ষন্তইতি। কর্ম্মণাং সিদ্ধিং কর্ম্মফলং কাংক্ষন্তঃ প্রায়েণেহ মনুষ্যলোকে ইন্দ্রাদিদেবতাএব যজন্তে ন তু সাক্ষা-

চাতুর্ব্বর্ণ্যং ময়া সৃষ্টং গুণকর্ম্মবিভাগশঃ।
তস্য কর্ত্তারমপি মাং বিদ্ধ্যকর্ত্তারমব্যয়ম্ ॥ ১৩॥

শাঙ্করভাষ্যম্

ভগবান্মানুষে লোকে বর্ণাশ্রমাদিকর্ম্মাণীতি বিশেষঃ তেষাঞ্চ বর্ণাশ্রমাদ্যধিকারিণাং কর্ম্মণাং ফলসিদ্ধিঃ ক্ষিপ্রং ভবতি কর্ম্মজা কর্ম্মণো জাতা ॥ ১২ ॥

মানুষএব লোকে বর্ণাশ্রমাদিকর্ম্মাধিকারো নান্যেষু লোকেম্বিতি নিয়মঃ কিংনিমিত্ত ইতি অথবা বর্ণাশ্রমাদিপ্রবিভাগোপেতাঃ মনুষ্যা মম বর্ত্মানুবর্ত্তন্তে সর্ব্বশইত্যুক্তং, কস্মাৎ পুনঃ কারণাৎ নিয়মেন তবৈব বর্ত্মানুবর্ত্তন্তে নান্যস্যেত্যুচ্যতে চাতুর্ব্বর্ণ্যমিতি। চাতুর্ব্বর্ণ্যং চত্বারএব বর্ণাশ্চাতুর্ব্বর্ণ্যং ময়েশ্বরেণ সৃষ্টমুৎপাদিতং ব্রাহ্মণোঽস্য মুখমাসীদিত্যাদিশ্রুতেঃ গুণকর্ম্মবিভাগশঃ গুণবিভাগশঃ কর্ম্মবিভাগশশ্চ গুণাঃ সত্ত্বরজস্তমাংসি তত্র সাত্ত্বিকস্য সত্ত্বপ্রধানস্য ব্রাহ্মণস্য শমোদমস্তপইত্যাদীনি কর্ম্মাণি সত্ত্বোপসর্জ্জনরজঃপ্রধানস্য ক্ষত্রিয়স্য

গিরিকৃত টীকা।

র্থমিত্যাশঙ্ক্যাহ মনুষ্যলোকে হীতি। লোকান্তরেষু তর্হি কর্ম্মফলসিদ্ধির্নাস্তীত্যাশঙ্ক্য ক্ষিপ্রবিশেষণস্য তাৎপর্য্যমাহ ক্ষিপ্রমিতি। ক্বচিৎ কর্ম্মফলসিদ্ধিরবিলম্বেন ভবত্যন্যত্র তু বিলম্বেনেতি বিভাগে কো হেতুরিত্যাশঙ্ক্য সামগ্রীভাবাভাবাভ্যামিত্যাহ মানুষইতি। মনুষ্যলোকে কর্ম্মফলসিদ্ধেঃ শৈঘ্র্যাত্তদভিমুখানাং জ্ঞানমার্গবৈমুখ্যং প্রায়িকমিত্যুপসংহরতি তেষামিতি ॥ ১২ ॥

মনুষ্যলোকে চাতুর্ব্বর্ণ্যং চাতুরাশ্রম্যমিত্যনেন দ্বারেণ কর্ম্মাধিকারনিয়মে কারণংপৃচ্ছতি মানুষএবেতি। আদিশব্দেনাবস্থাবিশেষা বিবক্ষ্যন্তে। প্রকারান্তরেণ বৃত্তানুবাদপূর্ব্বকচোদ্যমুত্থাপয়তি অথবেত্যাদিনা। প্রশ্নদ্বয়ং পরিহরতি উচ্যতইতি। তর্হি তব কর্ত্তৃত্বভোক্তৃত্বসম্ভবাদস্মদাদিতুল্যত্বেনানীশ্বরত্বমিত্যাশঙ্ক্যাহ তস্যেতি। ঈশ্বরস্য বিষমসৃষ্টিং বিদধানস্য সৃষ্টিবৈষম্যনির্ব্বাহকং কথয়তি গুণেতি। গুণবিভাগেন কর্ম্মবিভাগস্তেন। চাতুর্ব্বর্ণ্যস্য সৃষ্টিমেবোপদিষ্টাং স্পষ্টয়তি তত্রেত্যাদিনা। প্রশ্নদ্বয়প্রতিবিধানং প্রকৃতমুপসংহরতি তচ্ছেদমিতি। মনুষ্যলোকে পরং বর্ণাশ্রমাদিপূর্ব্বকে কর্ম্মণ্যধিকারঃ তত্রৈব বর্ণাদে-

স্বামিকৃত টীকা।

ন্নামেব হি যস্মাৎ কর্ম্মজা সিদ্ধিঃ ফলং শীঘ্রং ভবতি ন তু জ্ঞানফলং কৈবল্যং, দুষ্প্রাপ্যত্বাৎ জ্ঞানস্য ॥ ১২ ॥

ননু কেচিৎ সকামতয়া প্রবর্ত্তন্তে কেচিন্নিষ্কামতয়েতি কর্ম্মবৈচিত্র্যং তৎকর্ত্তৃণাঞ্চ ব্রাহ্মণাদীনামুত্তমমধ্যমাদিবৈচিত্র্যং কুর্ব্বতস্তব কথং বৈষম্যং নাস্তীত্যাশঙ্ক্যাহ চাতুর্ব্বর্ণ্যমিতি। চত্বারো বর্ণা এবেতি চাতুর্ব্বর্ণ্যং স্বার্থে ষ্যঞ্ প্রত্যয়ঃ,অয়মর্থঃ সত্ত্বপ্রধানা ব্রাহ্মণাস্তেষাং শমদ-

न मां कर्म्माणि लिम्पन्ति न मे कर्म्मफले स्पृहा।
इति मां योऽभिजानाति कर्म्मभिर्न स बध्यते ॥ ১৪ ॥

শাঙ্করভাষ্যম্।

শৌর্য্যতেজঃপ্রভৃতীনি কর্ম্মাণি তমউপসর্জ্জনরজঃপ্রধানস্য বৈশ্যস্য কৃষ্যাদীনি কর্ম্মাণি রজঃ উপসর্জ্জনতমঃপ্রধানস্য শূদ্রস্য শুশ্রূষৈব কর্ম্মেত্যেবং গুণকর্ম্মবিভাগশঃ চাতুর্ব্বর্ণ্যং ময়া সৃষ্টমিত্যর্থঃ তচ্চেদং চাতুর্ব্বর্ণ্যং নান্যেষু লোকেষু অতো মানুষে লোকে ইতি বিশেষণং, হন্ত তর্হি চাতুর্ব্বর্ণ্যস্য সর্গাদেঃ কর্ম্মণঃ কর্তৃত্বাৎ ফলেষু যুজ্যসে অতো ন ত্বং নিত্যমুক্তো নিত্যে-শ্বরইত্যুচ্যতে, যদ্যপি মায়াসংব্যবহারেণ তস্য কর্ম্মণঃ কর্ত্তারমপি সন্তং তথাপি মাং পরমার্থতো বিদ্ধ্যকর্ত্তারমতএবাব্যয়মসংসারিণঞ্চ মাং বিদ্ধি ॥ ১৩ ॥

যেষাস্তু কর্ম্মণাং কর্ত্তারং মাং মন্যসে পরমার্থতস্তেষামকর্ত্তৈবাহং যতঃ নেতি। ন মাং তানি কর্ম্মাণি লিম্পন্তি দেহাদ্যারম্ভকত্বেনাহঙ্কারাভাবান্ন চ তেষাং কর্ম্মণাং ফলেষু মে স্পৃহা

গিরিকৃত টীকা।

রীশ্বরেণ সৃষ্টত্বান্ন লোকান্তরেষু, তত্র বর্ণাদ্যভাবাদীশ্বরমেব চাতুর্ব্বর্ণ্যাশ্রমাদিবিভাগভাগিনো-ঽধিকারিণোঽনুবর্ত্তন্তে তেনৈব বর্ণাদেস্তদ্ব্যাপারস্য চ সৃষ্টত্বাত্তদনুবর্ত্তনস্য যুক্তত্বাদিত্যর্থঃ। তস্যেত্যাদি দ্বিতীয়ভাগাপোদ্যং চোদ্যমনুদ্রবতি হন্তেতি। যদি চাতুর্ব্বর্ণ্যাদিকর্তৃত্বাদীশ্বরস্য প্রাগুক্তো নিয়মোঽভিমতস্তর্হি তদ্বিষয়সৃষ্ট্যাদেস্তন্নিষ্ঠব্যাপারস্য চ ধর্ম্মাদেনির্বর্ত্তকত্বাত্তৎ-ফলস্য কর্তৃগামিত্বাৎ কর্তৃত্বভোক্তৃত্বয়োস্ত্বযি প্রসঙ্গাৎ নিত্যমুক্তত্বাদি তেন স্যাদিত্যর্থঃ। মায়য়া কর্তৃত্বং পরমার্থতশ্চাকর্তৃত্বমিত্যভ্যুপগমান্নিত্যমুক্তত্বাদি সিধ্যতীত্যুত্তরমাহ উচ্যত ইতি। মায়াপ্রবৃত্তেন সংব্যবহারেণ চাতুর্ব্বর্ণ্যাদেস্তৎকর্ম্মণশ্চ যদ্যপি কর্ত্তাহং তথাপি তথাবিধং মাং পরমার্থতোঽকর্ত্তারং বিদ্ধীতি যোজনা। অকর্তৃত্বাদেবাভোক্তৃত্বসিদ্ধি-রিত্যাহ অতএবেতি ॥ ১৩ ॥

ঈশ্বরস্য কর্তৃত্বভোক্তৃত্বয়োর্ব্বস্ততোঽভাবে কর্ম্মতৎফলে সম্বন্ধবৈধুর্য্যং ফলতীত্যাহ যেষাং ত্বিতি। কর্ম্মতৎফলসংস্পর্শশূন্যমীশ্বরং মাং পশ্যতো দর্শনানুরূপং ফলং দর্শয়তি ন মামিতি।

স্বামিকৃত টীকা।

মাদীনি কর্ম্মাণি, সত্বরজঃপ্রধানাঃ ক্ষত্রিয়াস্তেষাং শৌর্য্যযুদ্ধাদীনি কর্ম্মাণি রজস্তমঃপ্রধানা-বৈশ্যাস্তেষাঞ্চ কৃষিবাণিজ্যাদীনি কর্ম্মাণি, তমঃপ্রধানাঃ শূদ্রাস্তেষাঞ্চ ত্রৈবর্ণিকশুশ্রূষাদীনি কর্ম্মাণীত্যেবং গুণানাং কর্ম্মণাঞ্চ বিভাগশশ্চাতুর্ব্বর্ণ্যং ময়ৈব সৃষ্টমিতি সত্যং তথাপ্যেবং তস্য কর্ত্তারমপি পরমার্থতোঽকর্ত্তারমেব মাং বিদ্ধি, তত্র হেতুরব্যয়ং আসক্তিরাহিত্যেন শ্রমরহিতং ॥ ১৩ ॥

এবং জ্ঞাত্বা কৃতং কর্ম্ম পূর্ব্বৈরপি মুমুক্ষুভিঃ।
কুরু কর্ম্মৈব তস্মাত্ত্বং পূর্ব্বৈঃ পূর্ব্বতরং কৃতম্ ॥ ১৫ ॥

শাঙ্করভাষ্যম্ ॥

তৃষ্ণা যেষান্তু সংসারিণাং অহং কর্ত্তেত্যভিমানঃ কর্ম্মসু স্পৃহা তৎফলেষু চ তান্ কর্ম্মাণি লিম্পন্তীতি যুক্তং তদভাবান্ন মাং কর্ম্মাণি লিম্পন্তীত্যেবং যোঽন্যোঽপি মামাত্মত্বেনাভিজানাতি নাহং কর্ত্তা ন মে কর্ম্মফলে স্পৃহেতি স কর্ম্মভি র্ন বধ্যতে তস্যাপি ন দেহাদ্যারম্ভকাণি কর্ম্মাণি ভবন্তীত্যর্থঃ ॥ ১৪ ॥

নাহং কর্ত্তা ন মে কর্ম্মফলে স্পৃহেতি এবমিতি। এবং জ্ঞাত্বা কৃতং কর্ম্ম পূর্ব্বৈরপ্যতিক্রান্তৈর্ম্মুমুক্ষুভিঃ কুরু তেন কর্ম্মৈব ত্বং ন তুষ্ণীমাসনং নাপি সন্ন্যাসঃ কর্ত্তব্যস্তস্মাত্ত্বং

গিরিকৃত টীকা।

তানি কর্ম্মাণীতি যেষাং কর্ম্মণামহং কর্ত্তা তবাভিমতস্তানীতি যাবৎ। দেহেন্দ্রিয়াদ্যারম্ভকত্বেন তেষাং কর্ম্মণামীশ্বরে সংস্পর্শাভাবে তস্য তৎকারণাবস্থায়ামহঙ্কারাভাবং হেতুং করোতি অহঙ্কারাভাবাদিতি। কর্ম্মফলতৃষ্ণাভাবাচ্চেশ্বরং কর্ম্মাণি ন লিম্পন্তীত্যাহ ন চেতি। উক্তমেব প্রপঞ্চয়তি যেষাং ত্বিতি। তদভাবাৎ কর্ম্মস্বহং কর্ত্তেত্যভিমানস্য তৎফলেষু স্পৃহায়াশ্চাভাবাদিত্যর্থঃ। ঈশ্বরস্য কর্ম্মনির্লেপেঽপি ক্ষেত্রজ্ঞস্য কিমায়াতমিত্যাশঙ্ক্যোত্তরার্দ্ধং ব্যাচষ্টে ইত্যেবমিতি। অভিজ্ঞানপ্রকারমভিনয়তি নাহমিতি। জ্ঞানফলং কথয়তি স কর্ম্মভিরিতি। কর্ম্মাসম্বন্ধং বিদুষি বিশদয়তি তস্যাপীতি ॥ ১৪ ॥

তব কর্ম্মতৎফলসম্বন্ধাভাবে তথা জ্ঞানবতশ্চ তদসম্বন্ধে মমাপি কিং কর্ম্মণেত্যাশঙ্ক্য কর্ম্মণি কর্ত্তৃত্বাভিমানং তৎফলে স্পৃহাঞ্চাকৃত্বা মুমুক্ষুবৎ ত্বয়া কর্ম্ম কর্ত্তব্যমেবেত্যাহ নাহমিত্যাদিনা। এবমিতি নাহং কর্ত্তেত্যেবমাদি পরামৃশ্যতে, তেন পূর্ব্বৈর্মুমুক্ষুভিরনুষ্ঠিতত্বেন হেতুনেত্যর্থঃ। কর্ম্মৈবেত্যেবকারার্থমাহ নেত্যাদিনা ত্বংশব্দস্য ক্রিয়াপদেন সম্বন্ধঃ। তস্মাদিত্যুক্তমেব স্ফুটয়তি পূর্ব্বৈরিতি। যদুক্তং কিং মম কর্ম্মণেতি তত্র ত্বমজ্ঞো বা তত্ত্ববিদ্বা

স্বামিকৃত টীকা।

তদেব দর্শয়ন্নাহ ন মামিতি। কর্ম্মাণি বিশ্বসৃষ্ট্যাদীন্যপি মাং ন লিম্পন্তি আসক্তং ন কুর্ব্বন্তি নিরহঙ্কারত্বাদাপ্তকামত্বেন মম কর্ম্মফলে স্পৃহাভাবাচ্চ, মাং ন লিম্পন্তীতি কিং বক্তব্যং যতঃ কর্ম্মলেপরাহিত্যেন মাং যোঽভিজানাতি সোঽপি কর্ম্মভি র্ন বধ্যতে মম নির্লেপত্বকারণং নিরহঙ্কারত্বনিস্পৃহত্বাদিকং জানতস্তস্যাপ্যহঙ্কারাদিশৈথিল্যাৎ ॥১৪॥

যে যথা মামিত্যাদি চতুর্ভিঃ শ্লোকৈঃ প্রাসঙ্গিকমীশ্বরস্য বৈষম্যং পরিহৃত্য পূর্ব্বোক্তমেব কর্ম্মযোগং প্রপঞ্চয়িতুমনুস্মারয়তি এবমিতি। অহঙ্কারাদিরাহিত্যেন কৃতং কর্ম্ম বন্ধকং ন

কিং কর্ম্ম কিমকর্ম্মেতি কবয়োঽপ্যত্র মোহিতাঃ।
তত্তে কর্ম্ম প্রবক্ষ্যামি যজ্জ্ঞাত্বা মোক্ষ্যসেঽশুভাৎ ॥১৬॥

## শাঙ্করভাষ্যম্।

পূর্ব্বৈরপ্যনুষ্ঠিতত্বাৎ যদ্যনাত্মজ্ঞস্তদাত্মশুদ্ধ্যর্থং তত্ত্ববিচ্চেল্লোকসংগ্রহার্থং পূর্ব্বৈর্জ্জনকাদিভিঃ পূর্ব্বতনং কৃতং নাধুনাতনং কৃতং নির্ব্বর্ত্তিতং ॥ ১৫ ॥

তত্র কর্ম্ম চেৎ কর্ত্তব্যং ত্বদ্বচনাদেব করোম্যহং কিং বিশেষণেন পূর্ব্বৈঃ পূর্ব্বতনং কৃতমিত্যুচ্যতে যস্মান্মহদ্বৈষম্যং কর্ম্মাকর্ম্মণি কথং কিং কর্ম্মেতি। কিং কর্ম্ম কিঞ্চাকর্ম্মেতি কবয়ো মেধাবিনোঽপি অত্রাস্মিন্ কর্ম্মাদিবিষয়ে মোহিতাঃ মোহং গতাঃ অতস্তে তুভ্যমহং কর্ম্মাকর্ম্ম চ প্রবক্ষ্যামি যৎ জ্ঞাত্বা বিদিত্বা কর্ম্মাদি, মোক্ষ্যসে অশুভাৎ সংসারাৎ, ন চৈবং ত্বয়া মন্তব্যং, কর্ম্ম নাম দেহাদিচেষ্টা লোকপ্রসিদ্ধম অকর্ম্ম নাম তদক্রিয়া তূষ্ণীমাসনং কিং তত্র বোদ্ধব্যমিতি ॥ ১৬ ॥

## গিরিকৃত টীকা।

যদ্যজ্ঞস্তদা চিত্তশুদ্ধ্যর্থং কুরু কর্ম্মেত্যাহ যদীতি। দ্বিতীয়ং প্রত্যাহ তত্ত্ববিদিতি। কুরু কর্ম্মেতি সম্বন্ধঃ। পূর্ব্বৈর্মুমুক্ষুভিরাচরিতমিত্যেতাবতো কিমিতি বিবেকবতা ময়া তৎ কর্ত্তব্যমিত্যাশঙ্ক্যাহ জনকাদিভিরিতি। তে তদৈব সংপাদ্য কর্ম্ম কৃতবন্তো ন তদিদানীমপ্রামাণিকত্বাদনুষ্ঠেয়মিত্যাশঙ্ক্যাহ পূর্ব্বতনমিতি ॥ ১৫ ॥

কর্ম্মবিশেষণমাক্ষিপতি তত্রেতি। মনুষ্যলোকঃ সপ্তম্যর্থঃ। কর্ম্মণি মহতো বৈষম্যস্য বিদ্যমানত্বাত্তস্য পূর্ব্বৈরনুষ্ঠিতত্বেন পূর্ব্বতনত্বেন চ বিশেষিতত্বে তস্মিন্ প্রবৃত্তিস্তব সুকরেতি যুক্তং বিশেষণমিতি পরিহরতি উচ্যতইতি। কর্ম্মণি দেহাদিচেষ্টারূপে লোকপ্রসিদ্ধে নাস্তি বৈষম্যমিতি শঙ্কতে কথমিতি। বিজ্ঞানবতামপি কর্ম্মাদিবিষয়ে ব্যামোহোপপত্তেঃ সুতরামেব তব তদ্বিষয়ে ব্যামোহসম্ভবাত্তদপোহার্থমাপ্তবাক্যাপেক্ষণাদস্তি কর্ম্মণি বৈষম্যমিত্যুত্তরমাহ কিং কর্ম্মেতি। তত্তে কর্ম্মেত্যত্রাঽকারানুবন্ধেনাপি পদং ছেত্তব্যং। কর্ম্মাদিপ্রবচনস্য প্রয়োজনমাহ জজ্জ্ঞাত্বেতি। তৎকর্ম্মাকর্ম্ম চেতি সম্বন্ধঃ। অতো মেধাবিনোঽপি যথোক্তে বিষয়ে ব্যামোহস্য সত্ত্বাদিত্যর্থতঃ। কর্ম্মণোঽকর্ম্মণশ্চ প্রসিদ্ধত্বাত্তদ্বিষয়ে ন কিঞ্চিদ্বোদ্ধব্যমিতি চোদ্যমনূদ্য নিরস্যতি ন চেতি ॥ ১৬ ॥

## স্বামিকৃত টীকা।

ভবতীত্যেবং জ্ঞাত্বা পূর্ব্বৈর্জ্জনকাদিভিরপি মুমুক্ষুভিঃ সত্ত্বশুদ্ধ্যর্থং পূর্ব্বতরং যুগান্তরেষ্বপি কৃতং তস্মাত্ত্বমপি প্রথমং কর্ম্মৈব কুরু ॥ ১৫ ॥

তচ্চ তত্ত্ববিদ্ভিঃ সহ বিচার্য্য কর্ত্তব্যং ন লোকপরম্পরামাত্রেণেত্যাহ কিং কর্ম্মেতি। কিং কর্ম্ম কীদৃশং কর্ম্মকরণং কিমকর্ম্ম কীদৃশং কর্ম্মাকরণং ইত্যস্মিন্নর্থে বিবেকিনোঽপি মোহিতাঃ

কর্ম্মণো হ্যপি বোদ্ধব্যং বোদ্ধব্যঞ্চ বিকর্ম্মণঃ।
অকর্ম্মণশ্চ বোদ্ধব্যং গহনা কর্ম্মণো গতিঃ॥ ১৭॥
কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদকর্ম্মণি চ কর্ম্ম যঃ।
স বুদ্ধিমান্ মনুষ্যেষু স যুক্তঃ কৃৎস্নকর্ম্মকৃৎ॥ ১৮॥

## শাঙ্করভাষ্যম্।

কস্মাৎ উচ্যতে কর্ম্মণ ইতি। কর্ম্মণঃ শাস্ত্রবিহিতস্য হি যস্মাৎ অপ্যস্তি বোদ্ধব্যং, বোদ্ধব্যঞ্চাস্ত্যেব বিকর্ম্মণঃ প্রতিষিদ্ধস্য তথা অকর্ম্মণশ্চ তূষ্ণীম্ভাবস্য বোদ্ধব্যমস্তীতি ত্রিম্বপ্যধ্যাহারঃ কর্ত্তব্যো, যস্মাৎ গহনা বিষমা দুর্জ্ঞেয়া কর্ম্মণইত্যুপলক্ষণার্থং কর্ম্মাদীনাং কর্ম্মাকর্ম্মবিকর্ম্মণাং গতির্যাথাত্ম্যং তত্ত্বমিত্যর্থঃ॥ ১৭॥

কিং পুনস্তত্ত্বং কর্ম্মাদের্যদ্বোদ্ধব্যং বক্ষ্যামীতি প্রতিজ্ঞাতমুচ্যতে কর্ম্মণীতি। কর্ম্মণি কর্ম্ম ক্রিয়তইতি ব্যাপারমাত্রং তস্মিন্ কর্ম্মণি অকর্ম্ম কর্ম্মাভাবং যঃ পশ্যেদকর্ম্মণি চ কর্ম্মাভাবে

## গিরিকৃত টীকা।

তত্র হেত্বাকাঙ্ক্ষাপূর্ব্বকমনন্তরং শ্লোকমবতারয়তি কস্মাদিতি। ত্রিষ্বপি কর্ম্মাকর্ম্মবিকর্ম্মসু বোদ্ধব্যমস্তীতি যস্মাদধ্যাহারস্তস্মান্মদীয়ং প্রবচনমর্থবদিতি যোজনা। বোদ্ধব্যসদ্ভাবে হেতুমাহ যস্মাদিতি। ত্রিতয়ং প্রকৃত্যান্যতমস্য গহনত্ববচনমযুক্তমিত্যাশঙ্ক্যান্যতমগহনস্যোপলক্ষণার্থত্বমুপেত্য বিবক্ষিতমর্থমাহ কর্ম্মাদীনামিতি॥ ১৭॥

উত্তরশ্লোকমাকাঙ্ক্ষাপূর্ব্বকমুপাদত্তে কিং পুনরিতি। প্রথমপাদস্যাক্ষরোত্থমর্থং কথয়তি কর্ম্মণীত্যাদিনা। দ্বিতীয়পাদস্যাপি শব্দপ্রকাশিতমর্থং নির্দ্দিশতি অকর্ম্মণি, চেতি কর্ম্মাভাবে যঃ কর্ম্ম পশ্যতীতি সম্বন্ধঃ। প্রবৃত্তেরেব কর্ম্মত্বান্নিবৃত্তেস্তদভাবত্বাত্তত্র কথং কর্ম্মদর্শনমিত্যাশঙ্ক্য দ্বয়োরপি কারকাধীনত্বেনাবিশেষমভিপ্রেত্যাহ কর্ত্তৃতন্ত্রত্বাদিতি।

## স্বামিকৃত টীকা।

অতো যজ্জ্ঞাত্বা যদনুষ্ঠায়াশুভাৎ সংসারান্মোক্ষ্যসে মুক্তো ভবিষ্যসি তৎ কর্ম্মাকর্ম্ম চ তুভ্যমহং প্রবক্ষ্যামি তচ্ছৃণু॥ ১৬॥

নন্বু লোকপ্রসিদ্ধমেব কর্ম্ম দেহাদিব্যাপারাত্মকং অকর্ম্ম চ তদব্যাপারাত্মকং অতঃ কথমুচ্যতে কবয়োঽপ্যত্র মোহং প্রাপ্তাইতি তত্রাহ কর্ম্মণইতি। কর্ম্মণো বিহিতব্যাপারস্যাপি তত্ত্বং বোদ্ধব্যমস্তি ন তু লোকপ্রসিদ্ধমাত্রমেব, অকর্ম্মণোঽবিহিতব্যাপারস্যাপি তত্ত্বং বোদ্ধব্যমস্তি, যতঃ কর্ম্মণো গতির্গহনা, কর্ম্মইত্যুপলক্ষণার্থং কর্ম্মাকর্ম্মবিকর্ম্মণাং তত্ত্বং দুর্ব্বিজ্ঞেয়মিত্যর্থঃ॥ ১৭॥

তদেব কর্ম্মাদীনাং দুর্ব্বিজ্ঞেয়ত্বং দর্শয়ন্নাহ কর্ম্মণীতি। পরমেশ্বরারাধনলক্ষণে কর্ম্মণি

## শাঙ্করভাষ্যম্।

কর্তৃতন্ত্রত্বাৎ প্রবৃত্তিনিবৃত্ত্যোর্বস্ত্বপ্রাপ্যৈব হি সর্ব্ব এব ক্রিয়াকারকাদিব্যবহারোঽবিদ্যাভূমাবেব কর্ম্ম যঃ পশ্যেৎ যঃ পশ্যতি স বুদ্ধিমান্ মনুষ্যেষু স যুক্তো যোগী চ কৃৎস্নকর্ম্মকৃৎ সমস্তকর্ম্মকৃচ্চ স ইতি স্তূয়তে কর্ম্মাকর্ম্মণোরিতরেতরদর্শী, ননু কিমিদং বিরুদ্ধমুচ্যতে, কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যকর্ম্মণি চ কর্ম্মেতি, ন হি কর্ম্মাকর্ম্ম স্যাদকর্ম্ম তত্র বিরুদ্ধং কথং পশ্যেৎ দ্রষ্টা, নম্বকর্ম্মৈব পরমার্থতঃ সৎ কর্ম্মবদবভাসতে মূঢ়দৃষ্টেলোকস্য তথা কর্ম্মৈবাকর্ম্মবৎ তত্র যথাভূতদর্শনার্থমাহ ভগবান্ কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যাদি, অতো ন বিরুদ্ধং বুদ্ধিমত্ত্বাদ্যুপপত্তেশ্চ বোদ্ধব্যমিতি চ যথাভূতং দর্শনমুচ্যতে, ন চ বিপরীতজ্ঞানাদশুভান্মোক্ষণং স্যাৎ যৎ জ্ঞাত্বা মোক্ষ্যসেঽশুভাদিতি চোক্তং তস্মাৎ কর্ম্মাকর্ম্মণী বিপর্য্যয়েণ গৃহীতে প্রাণিভি-

## গিরিকৃত টীকা।

প্রবৃত্তাবিব নিবৃত্তাবপি কর্ম্মদর্শনমবিরুদ্ধমিতি শেষঃ। ননু নিবৃত্তের্ধ্বস্তীনত্বাৎ কারকনিবন্ধনাভাবান্ন তত্র কর্ম্মদর্শনং যুজ্যতে তত্রাহ বস্তিতি। ক্রিয়াকারকফলব্যবহারস্য সর্ব্বস্যাবিদ্যাবস্থায়ামেব প্রবৃত্তত্বাদ্বস্তুসংস্পর্শশূন্যত্বাৎ প্রবৃত্তিবন্নিবৃত্তাবপি যঃ কর্ম্ম পশ্যতি স মনুষ্যেষু বুদ্ধিমানিতি সম্বন্ধঃ। কর্ম্মণ্যকর্ম্ম অকর্ম্মণিচ কর্ম্ম পশ্যতো বুদ্ধিমত্ত্বং যুক্তং সমস্তকর্ম্মকৃত্ত্বঞ্চ কথমিত্যাশঙ্ক্যাহ ইতিস্তূয়ত ইতি। শ্লোকস্য শব্দোত্থেঽর্থে দর্শিতে তাৎপর্য্যার্থাপরিজ্ঞানান্মিথোবিরোধং শঙ্কতে নন্বিতি। কথমিদং বিরুদ্ধমিত্যাশঙ্ক্যাহ কর্ম্মণীতি। বিষয়সপ্তমী বা স্যাদধিকরণসপ্তমী বেতি বিকল্প্যাদ্যেঽন্যাকারং জ্ঞানমন্যাবলম্বনমিতি স্পষ্টো বিরোধঃ স্যাদিত্যাহ ন হীতি। অন্যস্যান্যাত্মতাযোগাৎ কর্ম্মাকর্ম্মণোরভেদাসম্ভবাদকর্ম্মাকারং কর্ম্মাবলম্বনং জ্ঞানমযুক্তমিত্যর্থঃ। দ্বিতীয়ং দূষয়তি তত্রেতি। কর্ম্মণ্যধিকরণে ততো বিরুদ্ধমকর্ম্ম কথমাধেয়ং দ্রষ্টা দ্রষ্টুমীষ্টে ন হি কর্ম্মাকর্ম্মণোর্মিথোবিরুদ্ধয়োরাধারাধেয়ভাবঃ সম্ভবতীত্যর্থঃ। বিষয়সপ্তমীমুপেত্য সিদ্ধান্তম্ব পরিহরতি নীকর্ম্মৈবেতি। লোকস্য মূঢ়দৃষ্টের্বিবেকবর্জ্জিতস্য পরমার্থতো ব্রহ্মাকর্ম্মাক্রিয়মেব সৎ, ভ্রান্ত্যা কর্ম্মসহিতং ক্রিয়াবদিব প্রতিভাতীত্যক্ষরার্থঃ। পরস্পরাধ্যাসমুপেত্যোক্তং তথেতি। যথা খল্বকর্ম্ম ব্রহ্ম কর্ম্মবদুপলভ্যতে তথা কর্ম্ম সক্রিয়মেব দ্বৈতং অক্রিয়ে ব্রহ্মণ্যধিষ্ঠানে সংসৃষ্টং তদ্বদ্ভাতীত্যক্ষরযোজনা। কর্ম্মাকর্ম্মণোরিতরেতরাধ্যাসে সিদ্ধে সম্যগ্দর্শনসিদ্ধ্যর্থং ভগবতো বচনমুচিতমিত্যাহ তত্রেতি। যথা যদিদং রজতমিতি প্রতিপন্নং তদিদানীং শুক্তিশকলং পশ্যেতি ভ্রমসিদ্ধরজতরূপবিষয়ানুবাদেন তদধিষ্ঠানং শুক্তিমাত্রমুপদিশ্যতে তথা ভ্রম-

## স্বামিকৃত টীকা।

কর্ম্মবিষয়ে অকর্ম্ম কর্ম্মেদং ন ভবতীতি যঃ পশ্যেত্তস্য জ্ঞানহেতুত্বেন বন্ধকত্বাভাবাৎ, অকর্ম্মণি চ বিহিতাকরণে কর্ম্ম যঃ পশ্যেৎ প্রত্যবায়োৎপাদকত্বেন বন্ধহেতুত্বাৎ, মনুষ্যেষু কর্ম্ম-

## শাঙ্করভাষ্যম্।

স্তদ্বিপর্য্যয়গ্রহনিবৃত্ত্যর্থং ভগবতো বচনং কর্ম্মণ্যকর্ম্ম য ইত্যাদি ন চাত্র কর্ম্মাধিকরণমকর্ম্মাস্তি কুণ্ডে বদরাণীব নাপ্যকর্ম্মাধিকরণং কর্ম্মাস্তি কর্ম্মাভাবত্বাদকর্ম্মণোঽতো বিপরীতে গৃহীতে এব কর্ম্মাকর্ম্মণী লৌকিকৈঃ, যথা মৃগতৃষ্ণিকায়ামুদকং শুক্তিকায়াং বা রজতং, নহু কর্ম্ম কর্ম্মৈব সর্ব্বেষাং ন ক্বচিৎ ব্যভিচরতি তন্ন নৌস্থস্য নাবি গচ্ছন্ত্যাং তটস্থেষ্বগতিকেষু নগেষু প্রতিকূলগতিদর্শনাৎ দূরেষু চক্ষুষোঽসন্নিকৃষ্টেষু গচ্ছৎসু গত্যভাবদর্শনাদেবমিহাপ্য-কর্ম্মণি অহং করোমীতি কর্ম্মদর্শনং কর্ম্মণি চাকর্ম্মদর্শনং বিপরীতদর্শনং যেন তন্নিরাকর-ণার্থমুচ্যতে কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যাদি, তদেতদুক্তপ্রতিবচনমপ্যসকৃদত্যন্তবিপরীত-

## গিরিকৃত টীকা।

সিদ্ধকর্ম্মাদ্যাত্মকবিষয়ানুবাদেন তদধিষ্ঠানং কর্ম্মাদিরহিতং কূটস্থং ব্রহ্ম ভগবতা ব্যপ-দিশ্যতে তথা চ ভগবদ্বচনমবিরুদ্ধমিত্যাহ অতইতি। ইতশ্চাধ্যারোপিতকর্ম্মাদ্যনুবাদ-পূর্ব্বকং তদধিষ্ঠানস্য কর্ম্মাদিরহিতস্য নির্ব্বিশেষস্য ব্রহ্মণো ভগবতা বোধ্যমানত্বান্ন তত্র বিরোধাশঙ্কাবকাশো ভবতীত্যাহ বুদ্ধিমত্ত্বাদিতি। কূটস্থাৎ ব্রহ্মণোঽন্যস্য সর্ব্বস্য মায়ামাত্রত্বাৎ অন্যজ্ঞানবদ্বুদ্ধিমত্ত্বযুক্তসর্ব্বকর্ম্মকৃত্ত্বানামনুপপত্তেরত্র চ বুদ্ধিমানিত্যা-দিনা বুদ্ধিমত্ত্বাদিনির্দ্দেশাৎ ব্রহ্মজ্ঞানাদেব তদুপপত্তেঃ সর্ব্ববিক্রিয়ারহিতং ব্রহ্ম-জ্ঞানমেব বিবক্ষিতমিত্যর্থঃ। বোধশব্দস্য সম্যগ্জ্ঞানে প্রসিদ্ধত্বাৎ কর্ম্মাকর্ম্মবিকর্ম্মণাং স্বরূপং বোদ্ধব্যমস্তীতি বদতা সম্যগ্জ্ঞানোপদেশস্য বিবক্ষিতত্বাদপি কূটস্থং ব্রহ্মাঽত্রাভি-প্রেতমিত্যাহ বোদ্ধব্যমিতি। ফলবচনপর্য্যালোচনায়ামপি কূটস্থং ব্রহ্মাত্রাভিপ্রেতং প্রতিভাতীত্যাহ ন চেতি। সম্যগ্জ্ঞানাধীনফলমত্র ন শ্রুতমিত্যাশঙ্ক্যাহ যৎ জ্ঞাত্বেতি। অধ্যারোপাপবাদার্থং ভগবদ্বচনমবিরুদ্ধমিত্যুপপাদিতমুপসংহরতি তস্মাদিতি। ভূদ্বি-পর্য্যযেত্যত্র তচ্ছব্দেন প্রাণিনো গৃহ্যন্তে। বিষয়সপ্তমীপরিগ্রহেণ পরিহারমভিধায়া-ধিকরণসপ্তমীপক্ষে দর্শিতং দূষণমঙ্গীকারেণ পরিহরতি ন চেতি। ব্যবহারভূমিরত্রেত্যু-চ্যতে, যোগ্যত্বে সত্যনুপলব্ধেরিত্যর্থঃ। অকর্ম্মাধিকরণং কর্ম্ম ন সম্ভবতীত্যত্র হেত্বন্তর-মাহ কর্ম্মাভাবত্বাদিতি। ন হি তুচ্ছস্যাধিকরণত্বং ক্বচিদ্দৃষ্টমিষ্টম্বেত্যর্থঃ। নিরূপ্যমাণে কর্ম্মাকর্ম্মণোরধিকরণাধিকর্ত্তব্যভাবাসম্ভবে ফলিতমাহ অতইতি। শাস্ত্রপরিচয়বিরহিণাম-ধ্যারোপমুদাহরতি যথেতি। কর্ম্মাকর্ম্মণোরারোপিতত্বমুক্তমনূদ্যমানঃ শঙ্কতে নন্বিতি।

## স্বামিকৃত টীকা।

কুর্ব্বাণেষু স বুদ্ধিমান্ ব্যবসায়াত্মকবুদ্ধিমত্তাচ্ছ্রেষ্ঠঃ, তং প্রস্তৌতি স যুক্তো যোগী তেন কর্ম্মণা জ্ঞানযোগাবাপ্তেঃ, সএব কৃৎস্নকর্ম্মকর্ত্তা চ সর্ব্বতঃসংপ্লুতোদকস্থানীয়ে চ তস্মিন্ কর্ম্মণি সর্ব্বকর্ম্মফলানামন্তর্ভাবাৎ। তদেবমারুরুক্ষোঃ কর্ম্মযোগাধিকারাবস্থায়াং ন কর্ম্মণা-মনারম্ভাদিত্যাদিনোক্তএব কর্ম্মযোগঃ স্পষ্টীকৃতস্তৎপ্রপঞ্চরূপত্বাচ্চাস্য প্রকরণস্য ন

প্রকৃতেঃ ক্রিয়মাণানি গুণৈঃ কর্ম্মাণি সর্ব্বশঃ।
অহঙ্কারবিমূঢ়াত্মা কর্ত্তাহমিতি মন্যতে ॥ ২৭ ॥
তত্ত্ববিত্তু মহাবাহো গুণকর্ম্মবিভাগয়োঃ।
গুণা গুণেষু বর্ত্তন্ত ইতি মত্বা ন সজ্জতে ॥ ২৮ ॥

## শাঙ্করভাষ্যম্।

অবিদ্বান্ অজ্ঞঃ কথং কর্ম্মসু সজ্জত ইত্যাহ প্রকৃতেরিতি। প্রকৃতেঃ প্রকৃতিঃ প্রাধানং সত্ত্বরজস্তমসাং গুণানাং সাম্যাবস্থা তস্যাঃ প্রকৃতেগুর্ণৈর্ব্বিকারৈঃ কার্য্যকরণরূপৈঃ ক্রিয়মাণানি কর্ম্মাণি লৌকিকানি শাস্ত্রীয়াণি চ সর্ব্বশঃ সর্ব্বপ্রকারৈরহঙ্কারবিমূঢ়াত্মা কার্য্যকরণসংঘাতাত্মপ্রত্যয়োঽহঙ্কারস্তেন বিবিধং নানাবিধং মূঢ়ঃ আত্মান্তঃকরণং যস্য সোঽয়ং কার্য্যকরণধর্ম্মা কার্য্যকরণাভিমান্যবিদ্যয়া কর্ম্মণ্যাত্মনি মন্যমানস্তত্তৎ কর্ম্মণামহং কর্ত্তেতি মন্যতে ॥ ২৭ ॥

কিং পুনর্মন্যতে বিদ্বান্ তত্ত্ববিদিতি। তত্ত্ববিত্তু মহাবাহো কস্য তত্ত্ববিৎ গুণকর্ম্মবিভাগয়োর্গুণবিভাগস্য কর্ম্মবিভাগস্য চ তত্ত্ববিদিত্যর্থঃ গুণাঃ করণাত্মকাঃ গুণেষু বিষয়াত্মকেষু বর্ত্তন্তে নাত্মেতি মত্বা ন সজ্জতে সক্তিং ন করোতি ॥ ২৮ ॥

## গিরিকৃত টীকা।

অজ্ঞানাং কর্ম্মসঙ্গিনামিত্যুক্তং তেনোত্তরশ্লোকস্য সঙ্গতিমাহ অবিদ্বানিতি। কর্ত্তৃত্বমাত্মনোঽবাস্তবমিত্যভ্যুপগমাদ্বিদ্বান্ কথং কুর্ব্বন্নেব তস্যাভাবং পশ্যতীত্যাশঙ্ক্যাহ প্রকৃতেরিতি। কর্ম্মস্ববিদুষঃ সক্তিপ্রকারং প্রকটয়ন্ ব্যাকরোতি প্রকৃতেরিত্যাদিনা। প্রধানশব্দেন মায়াশক্তিরুচ্যতে, অবিদ্যয়েত্যুভয়তঃ সম্বধ্যতে ॥ ২৭ ॥

অজ্ঞস্য কর্ম্মসু সক্তিমুক্ত্বা বিদুষস্তদভাবমভিদধাতি কিং পুনরিতি। তত্ত্বং যাথাত্ম্যং বেত্তীতি ব্যুৎপত্ত্যা তত্ত্ববিদিতি তু শব্দেনাজ্ঞানাদ্বিশিষ্টো নির্দ্দিষ্টঃ। প্রশ্নপূর্ব্বকং দ্বিতীয়পাদমবতার্য্য ব্যাচষ্টে কস্যেত্যাদিনা। গুণানামেব গুণেষু বর্ত্তমানত্বমযুক্তং নির্গুণত্বাত্তেষামি-

## স্বামিকৃত টীকা।

নন্বু বিদুষাপি চেৎ কর্ম্ম কর্ত্তব্যং তর্হি বিদ্বদবিদুষোঃ কো বিশেষ ইত্যাশঙ্ক্যোভয়োর্বিশেষং দর্শয়তি প্রকৃতেরিতি দ্বাভ্যাং। প্রকৃতেগুর্ণৈঃ প্রকৃতিকার্য্যৈরিন্দ্রিয়ৈঃ সর্ব্বপ্রকারেণ ক্রিয়মাণানি কর্ম্মাণি তান্যহমেব কর্ত্তা করোমীতি মন্যতে। অত্র হেতুঃ অহমিতি। অহঙ্কারেণেন্দ্রিয়াদিষ্বাত্মাধ্যাসেন বিমূঢ়বুদ্ধিঃ সন্ ॥ ২৭ ॥

বিদ্বাংস্তু তথা ন মন্যত ইত্যাহ তত্ত্ববিদিতি। নাহং গুণাত্মক ইতি গুণেভ্যঃ আত্মনো বিভাগঃ ন মে কর্ম্মাণীতি কর্ম্মভ্যোঽপ্যাত্মনো বিভাগঃ তয়োর্গুণকর্ম্মবিভাগয়োর্যত্তত্ত্বং বেত্তি

প্রকৃতের্গুণসংমূঢ়াঃ সজ্জন্তে গুণকর্ম্মসু।
তানকৃৎস্নবিদো মন্দান্ কৃৎস্নবিন্ন বিচালয়েৎ ॥ ২৯ ॥
ময়ি সর্ব্বাণি কর্ম্মাণি সন্ন্যস্যাধ্যাত্মচেতসা।
নিরাশী র্নির্ম্মমো ভূত্বা যুধ্যস্ব বিগতজ্বরঃ ॥ ৩০ ॥

## শাঙ্করভাষ্যম্।

যে পুনঃ প্রকৃতেরিতি। প্রকৃতেগুণৈঃ সম্যক্ মূঢ়াঃ সংমোহিতাঃ সন্তঃ সজ্জন্তে গুণানাং কর্ম্মসু গুণকর্ম্মসু বয়ং কর্ম্ম কুর্ম্মঃ ফলায়েতি, তান্ কর্ম্মসঙ্গিনোঽকৃৎস্নবিদঃ কর্ম্মফলমাত্রদর্শিনো মন্দান্ মন্দপ্রজ্ঞান্ কৃৎস্নবিদাত্মবিৎ স্বয়ং ন বিচালয়েৎ বুদ্ধিভেদকরণমেব চালনং তন্ন কুর্য্যাদিত্যর্থঃ ॥ ২৯ ॥

কথং পুনঃ কর্ম্মণ্যধিকৃতেনাজ্ঞেন মুমুক্ষুণা কর্ম্ম কর্ত্তব্যমিত্যুচ্যতে ময়ীতি। ময়ি বাসুদেবে পরমেশ্বরে সর্ব্বজ্ঞে সর্ব্বাণি কর্ম্মাণি সন্ন্যস্য নিক্ষিপ্যাধ্যাত্মচেতসা বিবেক-

## গিরিকৃত টীকা।

ত্যাশঙ্ক্য বিভজতে গুণাইতি। কার্য্যকরণানামেব বিষয়েষু প্রবৃত্তিরাত্মনস্তু কূটস্থত্বান্নৈবমিতি জ্ঞাত্বা তত্ত্ববিৎ কর্ম্মসু দৃঢ়তরং কর্ত্তব্যাভিমানং ন করোতীত্যর্থঃ ॥ ২৮ ॥

বিদ্বানবিদ্বানিত্যুভাবপি প্রকৃত্য বিদ্বান্নাবিদুষো বুদ্ধিভেদং কুর্য্যাদিত্যুপসংহরতি যে পুনরিতি। প্রকৃতেরুক্তায়া গুণৈর্দেহাদিভির্ব্বিকারৈঃ সংমূঢ়াস্তানেবাত্মত্বেন মন্যমানা যে গুণানাং তেষামেব দেহাদীনাং কর্ম্মসু ব্যাপারেষু সজ্জন্তে সক্তিং দৃঢ়তরামাত্মীয়বুদ্ধিং কুর্ব্বন্তীত্যাহ প্রকৃতেরিত্যাদিনা। তেষামনাত্মবিদাং স্বয়মাত্মবিদ্ বুদ্ধিভেদং নাপাদয়েদিত্যাহ তানিত্যাদিনা ॥ ২৯ ॥

যদ্যপি কর্ম্মণ্যজ্ঞোঽধিক্রিয়তে তথাপি মোক্ষ্যমাণেন তেন কর্ম্ম ত্যক্তব্যং মোক্ষস্য কর্ম্মাসাধ্যত্বান্নতু তেন কর্ম্ম কর্ত্তুং শক্যং কর্ম্মণঃ স্বাপেক্ষিতবিরোধিত্বাদিতি শঙ্কতে কথমিতি। শ্লোকেনোত্তরমাহ উচ্যতইতি। যথোক্তে পরস্মিন্নাত্মনি সর্ব্বকর্ম্মণাং সমর্পণে

## স্বামিকৃত টীকা।

স তু ন সজ্জতে কর্ত্তৃত্বাভিনিবেশং ন করোতি। তত্র হেতুঃ গুণাইতি। গুণা ইন্দ্রিয়াণি গুণেষু বিষয়েষু বর্ত্তন্তে নাহমিতি মত্বা ॥ ২৮ ॥

ন বুদ্ধিভেদমিত্যুপসংহরতি প্রকৃতেরিতি। যে প্রকৃতেগুণৈঃ সত্বাদিভিঃ সংমূঢ়াঃ সন্তো গুণেষু ইন্দ্রিয়েষু তৎকর্ম্মসু চ সজ্জন্তে তানকৃৎস্নবিদো মন্দমতীন্ কৃৎস্নবিৎ সর্ব্বজ্ঞো ন বিচালয়েৎ ॥ ২৯ ॥

তদেবং তত্ত্ববিদাপি কর্ম্ম কর্ত্তব্যং ত্বত্ত নাদ্যাপি তত্ত্ববিদতঃ কর্ম্মৈব কুর্ব্বিত্যাহ ময়ীতি।

যে মে মতমিদং নিত্যমনুতিষ্ঠন্তি মানবাঃ।
শ্রদ্ধাবন্তোঽনসূয়ন্তো মুচ্যন্তে তেঽপি কর্ম্মভিঃ॥ ৩১॥
যে ত্বেতদভ্যসূয়ন্তো নানুতিষ্ঠন্তি মে মতম্।
সর্ব্বজ্ঞানবিমূঢ়াংস্তান্ বিদ্ধি নষ্টানচেতসঃ॥ ৩২॥

## শাঙ্করভাষ্যম্।

বুদ্ধ্যাঽহং কর্ত্তেশ্বরায় ভৃত্যবৎ করোমীত্যনয়া বুদ্ধ্যা কিঞ্চ নিরাশীঃ ত্যক্তাশীঃ নির্ম্মমো মম ভাবশ্চ নির্গতো যস্য তব স ত্বং নির্মমো ভূত্বা যুধ্যস্ব বিগতজ্বরো বিগতসন্তাপো বিগতশোকঃ সন্নিত্যর্থঃ॥ ৩০॥

যদেতন্মম মতং কর্ম্ম কর্ত্তব্যমিতি সপ্রমাণমুক্তং তত্তথা যে ময়িতি। যে মদীয়মিদং মতমনুতিষ্ঠন্তি অনুবর্ত্তন্তে মানবা মনুষ্যাঃ শ্রদ্ধাবন্তঃ শ্রদ্দধানাঃ অনসূয়ন্তোঽসূয়াঞ্চ ময়ি পরমগুরৌ বাসুদেবেঽকুর্ব্বন্তো মুচ্যন্তে তেঽপ্যেবম্ভূতাঃ কর্ম্মভির্ধর্ম্মাধর্ম্মাখ্যৈঃ॥ ৩১॥

যে ত্বিতি। যে তু তদ্বিপরীতা এতৎ মম মতং অভ্যসূয়ন্তো নিন্দন্তো নানুতিষ্ঠন্তি

## গিরিকৃত টীকা।

কারণমাহ অধ্যাত্মেতি। বিবেকবুদ্ধিমেব ব্যাকরোতি অহমিতি। দর্শিতরীত্যা কর্ম্মসু প্রবৃত্তস্য কর্ত্তব্যান্তরমাহ কিঞ্চেতি। ত্যক্তাশীঃ ফলপ্রার্থনাহীনঃ সন্নিত্যর্থঃ, নির্মমো ভূত্বা পুত্রভ্রাত্রাদিষ্বিতি শেষঃ। ননু যুদ্ধে নিয়োগো নোপপদ্যতে পুত্রভ্রাত্রাদিহিংসাত্মনস্তস্য সন্তাপহেতোঃ নিয়োগবিষয়ত্বাযোগাদিতি তত্রাহ বিগতেতি॥ ৩০॥

প্রকৃতং ভগবতো মতমুক্তপ্রকারমনুস্বত্যৈবানুতিষ্ঠতাং ক্রমমুক্তিফলং কথয়তি যদেত-দিতি। শাস্ত্রাচার্য্যোপদিষ্টে অদৃষ্টার্থে বিশ্বাসবত্বং শ্রদ্দধানত্বং, গুণেষু দোষাবিষ্করণমসূয়া, অপি যথোক্তায়ামুক্তেরমুখ্যত্বদ্যোতনার্থঃ॥ ৩১॥

ভগবন্মতানুবর্ত্তিনাং প্রত্যবায়িত্বং প্রত্যায়য়তি যেত্বিতি। তদ্বিপরীতত্বং ভগবন্মতা-নুবর্ত্তিভ্যো বৈপরীত্যং, তদেব দর্শয়তি এতদিত্যাদিনা। অভ্যসূয়ন্তস্তত্রাসত্ত্বমপি দোষমুদ্ভা-

## স্বামিকৃত টীকা।

সর্ব্বাণি কর্ম্মাণি ময়ি সন্ন্যস্য সমর্প্যাধ্যাত্মচেতসাঽন্তর্যাম্যোঽহং কর্ম্ম করোমীতি দৃষ্ট্যা নিরাশীর্নিষ্কামোঽতএব মৎফলসাধনং মদর্থমিদং কর্ম্মেত্যেবং মমতাশূন্যশ্চ ভূত্বা বিগত-জ্বরস্ত্যক্তশোকশ্চ ভূত্বা যুধ্যস্ব॥ ৩০॥

এবং কর্ম্মানুষ্ঠানে গুণমাহ যে মে ইতি। মদ্বাক্যে শ্রদ্ধাবন্তোঽনসূয়ন্তো দুঃখাত্মকে কর্ম্মণি প্রবর্ত্তয়তীতি দোষদৃষ্টিমকুর্ব্বন্তশ্চ যে মদীয়মিদং মতমনুতিষ্ঠন্তি তেঽপি শনৈঃ কর্ম্ম কুর্ব্বাণাঃ সম্যগ্‌জ্ঞানিবৎ কর্ম্মভির্মুচ্যন্তে॥ ৩১॥

সদৃশং চেষ্টতে স্বস্যাঃ প্রকৃতেজ্জ্ঞানবানপি।
প্রকৃতিং যান্তি ভূতানি নিগ্রহঃ কিং করিষ্যতি ॥ ৩৩ ॥

## শাঙ্করভাষ্যম্

নানুবর্ত্তন্তে মে মতং সর্ব্বেষু জ্ঞানেষু বিবিধং মূঢ়াস্তে সর্ব্বজ্ঞানবিমূঢ়াংস্তান্ বিনষ্টান্ নাশং গতানচেতসোঽবিবেকিনঃ ॥ ৩২ ॥

কস্মাৎ পুনঃ কারণাৎ ত্বদীয়ং মতং নানুতিষ্ঠন্তঃ পরধর্ম্মাননুতিষ্ঠন্তি স্বধর্ম্মঞ্চ নানুবর্ত্তন্তে ত্বৎপ্রতিকূলাঃ কথং ন বিভ্যতি ত্বচ্ছাসনাতিক্রমদোষাৎ তত্রাহ সদৃশমিতি। সদৃশমনুরূপং চেষ্টতে চেষ্টাং করোতি কস্যাঃ স্বস্যাঃ স্বকীয়াযাঃ প্রকৃতেঃ প্রকৃতির্নাম পূর্ব্বকৃতধর্ম্মাধর্ম্মাদিসংস্কারো বর্ত্তমানজন্মাদাবভিব্যক্তঃ সা প্রকৃতিস্তস্যাঃ সদৃশমেব সর্ব্বো জন্তুর্জ্জ্ঞানবানপি চেষ্টতে কিং পুনর্মূর্খস্তস্মাৎ প্রকৃতিং যান্তি অনুগচ্ছন্তি ভূতানি, নিগ্রহঃ নিষেধরূপঃ কিং করিষ্যতি মম চান্যস্য বা ॥ ৩৩ ॥

## গিরিকৃত টীকা।

বয়স্তইত্যর্থঃ, সর্ব্বজ্ঞানানি সগুণনির্গুণবিষয়াণি, প্রমাণপ্রমেয়প্রয়োজনবিভাগতো বিবিধত্বং ॥ ৩২ ॥

ভগবন্মতানুবর্ত্তনমন্তরেণ পরধর্ম্মানুষ্ঠানে স্বধর্ম্মাননুষ্ঠানে চ কারণং পৃচ্ছতি কস্মাদিতি ভগবৎপ্রতিকূলত্বমেব তত্র কারণমিত্যাশঙ্ক্যাহ ত্বৎপ্রতিকূলা ইতি। রাজানুশাসনাতিক্রমে দোষদর্শনাৎ ভগবদনুশাসনাতিক্রমেঽপি দোষসম্ভবাৎ তৎপ্রতিকূলত্বং ভয়কারণমিত্যর্থঃ। উত্তরেণ শ্লোকমবতারয়তি সদৃশমিতি। সর্ব্বস্য প্রাণিবর্গস্য প্রকৃতিবশবর্ত্তিত্বে কৈমুতিকন্যায়ং সূচয়তি জ্ঞানবানপীতি। সর্ব্বাণ্যপি ভূতান্যনিচ্ছন্ত্যপি প্রকৃতিসদৃশীং চেষ্টাং গচ্ছন্তীতি নিগময়তি প্রকৃতিমিতি। ভূতানাং প্রকৃতেরধীনত্বেঽপি প্রকৃতির্ভগবতা নিগ্রাহ্যেত্যাশঙ্ক্যাহ নিগ্রহ ইতি। কা পুনরিয়ং প্রকৃতির্যদনুসারিণী ভূতানাং চেষ্টেতি পৃচ্ছন্তি প্রকৃতির্নামেতি। ভগবদভিপ্রেতাং প্রকৃতিং প্রকটয়তি পূর্ব্বেতি। আদিশব্দেন জ্ঞানেচ্ছাদি সংগৃহ্যতে। যথোক্তঃ সংস্কারঃ স্বসত্ত্বয়া প্রবর্ত্তকশ্চেৎ প্রলয়েঽপি প্রবৃত্তিঃ স্যাদিত্যাশঙ্ক্য বিশিনষ্টি বর্ত্তমানেতি। সর্ব্বো জন্তুরিত্যুক্তং বিবেকিপ্রবৃত্তেরতথাত্বাদিভিশ্চাবিশেষাদিতি ন্যায়মনুস্মরন্নাহ জ্ঞানবানিতি। জ্ঞানবতামজ্ঞানবতাঞ্চ প্রকৃত্যধীনত্বাবিশেষে

## স্বামিকৃত টীকা।

বিপক্ষে দোষমাহ যেত্বেতদিতি। যে তু নানুতিষ্ঠন্তি তানচেতসো বিবেকশূন্যান্ অত এব সর্ব্বস্মিন্ কর্ম্মণি ব্রহ্মবিষয়ে চ যজ্জ্ঞানং তত্র বিমূঢ়ান্নষ্টান বিদ্ধি ॥ ৩২ ॥

ননু তর্হি মহাফলত্বাদিন্দ্রিয়াণি নিগৃহ্য নিষ্কামাঃ সন্তঃ সর্ব্বেঽপি [illegible] কিং নানুতিষ্ঠন্তি তত্রাহ সদৃশমিতি। প্রকৃতিঃ প্রাচীনকর্ম্মসংস্কারাধীনস্বভাবঃ [illegible]

ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থে রাগদ্বেষৌ ব্যবস্থিতৌ।
তয়োর্ন বশমাগচ্ছেত্তৌ হ্যস্য পরিপন্থিনৌ ॥ ৩৪ ॥

## শাঙ্করভাষ্যম্।

যদি সর্ব্বো জন্তুরাত্মনঃ প্রকৃতিসদৃশমেব চেষ্টতে ন চ প্রকৃতিশূন্যঃ কশ্চিদস্তি ততঃ পুরুষকারস্য বিষয়ানুপপত্তেঃ শাস্ত্রানর্থক্যপ্রাপ্তাবিদমুচ্যতে ইন্দ্রিয়স্যেতি। ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থে সর্ব্বেন্দ্রিয়াণামর্থে শব্দাদিবিষয়ে ইষ্টে শব্দাদৌ রাগোঽনিষ্টে দ্বেষ ইত্যেবং প্রত্যীন্দ্রিয়ার্থে রাগদ্বেষাববশ্যম্ভাবিনৌ তত্রায়ং পুরুষকারস্য শাস্ত্রার্থস্য বিষয় উচ্যতে শাস্ত্রার্থে প্রবৃত্তঃ পূর্ব্বমেব রাগদ্বেষয়োর্ব্বশং নাগচ্ছেৎ যাহি পুরুষস্য প্রকৃতিঃ সা রাগদ্বেষপুরঃসরৈব স্বকার্য্যে পুরুষং প্রবর্ত্তয়তি যদা তদা স্বধর্ম্মপরিত্যাগঃ পরধর্ম্মানুষ্ঠানঞ্চ ভবতি যদা পুনঃ রাগদ্বেষৌ তৎপ্রতিপক্ষেণ নিয়ময়তি তদা শাস্ত্রদৃষ্টিরেব পুরুষো ভবতি ন প্রকৃতিবশ-

## গিরিকৃত টীকা।

ফলিতমাহ তস্মাদিতি। প্রকৃতিং যান্তি প্রকৃতিসদৃশীং চেষ্টাং গচ্ছন্ত্যনিচ্ছন্ত্যপি সর্ব্বাণি ভূতানি ইত্যর্থঃ। প্রকৃতের্ভবগতা তত্তুল্যেন বা কেনচিৎ নিগ্রহমাশঙ্ক্যাবতারিতচতুর্থপাদস্যার্থাপেক্ষিতং পূরয়তি মম চেতি ॥ ৩৩ ॥

সর্ব্বস্য ভূতবর্গস্য প্রকৃতিবশবর্ত্তিত্বে লৌকিকবৈদিকপুরুষকারবিষয়াভাবাদ্বিধিনিষেধানর্থক্যমিতি শঙ্কতে যদীতি। নহু যস্য ন প্রকৃতিরস্তি তস্য পুরুষকারসম্ভবাদর্থবত্বং তদ্বিষয়ে বিধিনিষেধয়োর্ভবিষ্যতি নেত্যাহ নচেতি। শঙ্কিতদোষং শ্লোকেন পরিহরতি ইদমিত্যাদিনা। বীপ্সায়াঃ সর্ব্বকরণগোচরত্বং দর্শয়তি সর্ব্বেতি। প্রত্যর্থং রাগদ্বেষয়োরব্যবস্থায়াং প্রাপ্তৌ প্রত্যাদিশতি ইষ্টইতি। প্রতিবিষয়ং বিভাগেন তয়োরন্তরস্থাবশ্যকত্বেঽপি পুরুষকারবিষয়াভাবপ্রযুক্ত্যা প্রাগুক্তং দূষণং কথং সমাধেয়মিত্যাশঙ্ক্যাহ তত্রেতি। যতোরিত্যাদ্যবতারিতং ভাগং বিভজতে শাস্ত্রার্থস্যেতি। প্রকৃতিবশত্বাদ্জন্তোর্নৈব নিয়ো-

## স্বামিকৃত টীকা।

প্রকৃতেঃ স্বভাবস্য সদৃশমনুরূপমেব গুণদোষজ্ঞানবানপি চেষ্টতে কিং পুনর্বক্তব্যমজ্ঞশ্চেষ্টত ইতি, যস্মাত্ ভূতানি সর্ব্বেঽপি প্রাণিনঃ প্রকৃতিং যান্তি অনুবর্ত্তন্তে এবঞ্চ সতীন্দ্রিয়নিগ্রহঃ কিং করিষ্যতি প্রকৃতের্বলীয়স্ত্বাদিত্যর্থঃ ॥ ৩৩ ॥

নন্বেবং প্রকৃত্যধীনৈব চেৎ পুরুষস্য প্রবৃত্তিস্তর্হি বিধিনিষেধশাস্ত্রস্য বৈয়র্থ্যং প্রাপ্তমিত্যাশঙ্ক্যাহ ইন্দ্রিয়স্যেতি। ইন্দ্রিয়স্যেন্দ্রিয়স্যেতি বীপ্সয়া সর্ব্বেষামিন্দ্রিয়াণাং প্রত্যেকমিত্যুক্তং, অর্থে স্বস্ববিষয়ে অনুকূলে রাগঃ প্রতিকূলে দ্বেষ ইত্যেবং রাগদ্বেষৌ ব্যবস্থিতৌ অবশ্যম্ভাবিনৌ, ততশ্চ তদনুরূপা প্রবৃত্তিরিতি ভূতানাং প্রকৃতিঃ, তথাপি তয়োর্বশবর্ত্তী ন

শ্রেয়ান্ স্বধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ।
স্বধর্ম্মে নিধনং শ্রেয়ঃ পরধর্ম্মোভয়াবহঃ ॥ ৩৫ ॥

## শাঙ্করভাষ্যম্।

স্তস্মাত্তয়ো রাগদ্বেষয়োর্ব্বশং নাগচ্ছেদ্যতস্তৌ হ্যস্য পুরুষস্য পরিপন্থিনৌ শ্রেয়োমার্গস্য বিঘ্নকর্ত্তারৌ তস্করাবিবেত্যর্থঃ ॥ ৩৪ ॥

তত্ররাগদ্বেষপ্রযুক্তো মন্যতে শাস্ত্রার্থমপ্যন্যথা, পরধর্ম্মোঽপি ধর্ম্মত্বাদনুষ্ঠেয় এবেতি তদসৎ শ্রেয়ানিতি। শ্রেয়ান্ প্রশস্যতরঃ স্বধর্ম্মঃ স্বকীয়ধর্ম্মো বিগুণোপি বিগতগুণোঽপি অনুষ্ঠীয়মানঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ সাদ্গুণ্যেন সম্পাদিতাদপি স্বধর্ম্মে স্থিতস্য নিধনং মরণমপি

## গিরিকৃত টীকা।

জ্যত্বমিত্যাশঙ্ক্যাহ যাহীতি। রাগদ্বেষদ্বারা প্রকৃতিবশবর্ত্তিত্বে স্বধর্ম্মত্যাগাদিদুর্ব্বারমিত্যুক্তমিদানীং বিবেকবিজ্ঞানেন রাগাদিনিবারণে শাস্ত্রীয়দৃষ্ট্যা প্রকৃতিপারবশ্যং পরিহর্ত্তুং শক্যমিত্যাহ যদেতি। মিথ্যাজ্ঞাননিবন্ধনৌ হি রাগদ্বেষৌ তৎপ্রতিপক্ষত্বং বিবেকবিজ্ঞানস্য মিথ্যাজ্ঞানবিরোধিত্বাদবধেয়ং। রাগদ্বেষয়োর্মূলনিবৃত্ত্যানিবৃত্তৌ প্রতিবন্ধধ্বংসে কার্য্যসিদ্ধিমভিসন্ধায়োক্তং তদেতি। এবকারস্যান্যযোগব্যবচ্ছেদকত্বং দর্শয়তি নেতি। পূর্ব্বোক্তং নিয়োগমুপসংহরতি তস্মাদিতি। তত্র হেতুমাহ যতইতি। হিশব্দোপাত্তোহেতুর্যতইতি প্রকটিতঃ স চ পূর্ব্বেণ তচ্ছব্দেন সম্বন্ধনীয়ঃ। পুরুষপরিপন্থিত্বমেব তয়োঃ সোদাহরণং স্ফোরয়তি শ্রেয়োমার্গস্যেতি ॥ ৩৪ ॥

রাগদ্বেষয়োঃ শ্রেয়োমার্গপ্রতিপক্ষত্বং প্রকটয়িতুং পরমতোপন্যাসদ্বারা সমনন্তরশ্লোকমবতারয়তি তত্রেত্যাদিনা। ব্যবহারভূমিঃ সপ্তম্যর্থঃ। শাস্ত্রার্থস্যান্যথাপ্রতিপত্তিমেব প্রত্যায়য়তি পরধর্ম্মোঽপীতি। স্বধর্ম্মবদিত্যপেরর্থঃ। অনুমানং দূষয়ন্নুত্তরত্বেন শ্লোকমুত্থাপয়তি তদসদিতি। ক্ষত্রধর্ম্মাদ্যুদ্ধাদ্দুরনুষ্ঠানাৎ পরিব্রাড়্ধর্ম্মস্য ভিক্ষাশনাদিলক্ষণস্য

## স্বামিকৃত টীকা।

ভবেদিতি শাস্ত্রেণ নিয়ম্যতে হি যস্মাদস্য মুমুক্ষোস্তৌ পরিপন্থিনৌ প্রতিপক্ষৌ, অয়ং ভাবঃ, বিষয়স্মরণাদিনা রাগদ্বেষাবুৎপাদ্যানবহিতং পুরুষমনর্থেঽতিগম্ভীরে স্রোতসীব প্রকৃতির্বলাৎ প্রবর্ত্তয়তি শাস্ত্রং তু ততঃ প্রাগেব বিষয়েষু রাগদ্বেষপ্রতিবন্ধকে পরমেশ্বরভজনাদৌ তং প্রবর্ত্তয়তি ততশ্চ গম্ভীরস্রোতঃপাতাৎ পূর্ব্বমেব নাবমাশ্রিতইব নানর্থং প্রাপ্নোতি, তদেবং স্বাভাবিকীং পশ্বাদিসদৃশীং প্রবৃত্তিং ত্যক্ত্বা ধর্ম্মে প্রবর্ত্তিতব্যমিত্যুক্তং ॥ ৩৪ ॥

তর্হি স্বধর্ম্মস্য যুদ্ধাদেঃ দুঃখরূপস্য যথাবৎ কর্ত্তুমশক্যত্বাৎ পরধর্ম্মস্যচাহিংসাদেঃ সুকরত্বাৎ ধর্ম্মত্বাবিশেষাচ্চ তত্র প্রবর্ত্তিতুমিচ্ছন্তং প্রত্যাহ শ্রেয়ানিতি। কিঞ্চিদঙ্গহীনোঽপি

অর্জ্জুনউবাচ—অথ কেন প্রযুক্তোঽয়ং পাপঞ্চরতি পূরুষঃ।
অনিচ্ছন্নপি বার্ষ্ণেয় বলাদিব নিযোজিতঃ ॥ ৩৬ ॥

## শাঙ্করভাষ্যম্।

শ্রেয়ঃ পরধর্ম্মে স্থিতস্য জীবিতাৎ কস্মাৎ পরধর্ম্মো ভয়াবহঃ নরকাদিলক্ষণং ভয়মাবহতি যতঃ ॥ ৩৫ ॥

যদ্যপ্যনর্থমূলং ধ্যায়তো বিষয়ান্ পুংসো রাগদ্বেষৌ হ্যস্য পরিপন্থিনাবিতি চোক্তং বিক্ষিপ্তমনবধারিতং চ যদুক্তং তৎ সংক্ষিপ্তং নিশ্চিতঞ্চৈনমেবেতি জ্ঞাতুমিচ্ছন্নর্জ্জুন উবাচ জ্ঞাতে হি তস্মিন্ তদুচ্ছেদায় যত্নং কুর্য্যামিতি অথেতি। অথ কেন হেতুভূতেন প্রযুক্তঃ সন্ রাজ্ঞেব ভৃত্যোঽয়ং পাপং কর্ম্ম চরত্যাচরতি পূরুষঃ স্বয়মনিচ্ছন্নপি হে বার্ষ্ণেয় বৃষ্ণিকুলপ্রসূত বলাদিব নিযোজিতো রাজ্ঞেবেত্যুক্তো দৃষ্টান্তঃ ॥ ৩৬ ॥

## গিরিকৃত টীকা।

স্বনুষ্ঠেয়তয়া মমাপি কর্ত্তব্যত্বং প্রাপ্তমিত্যাশঙ্ক্য ব্যাচষ্টে শ্রেয়ানিতি। উক্তেঽর্থে প্রশ্নপূর্ব্বকং হেতুমাহ কস্মাদিত্যাদিনা। স্বধর্ম্মমবধুয় পরধর্ম্মমনুতিষ্ঠতঃ স্বধর্ম্মাতিক্রমকৃতদোষস্য দুষ্পরিহরত্বান্ন তত্ত্যাগঃ সাধীয়ানিত্যর্থঃ ॥ ৩৫ ॥

প্রাগেবানর্থমূলস্যোক্তত্বাৎ পুনস্তজ্জিজ্ঞাসয়া প্রশ্নানুপপত্তিরিত্যাশঙ্ক্যাহ যদ্যপীতি। বিক্ষিপ্তং বিবিধেষু প্রদেশেষু ক্ষিপ্তং দর্শিতমিতি যাবৎ, অনবধারিতমনেকত্রোক্তত্বাদনেকধা বা বিবেককামাদিভির্ব্বিকল্পিতত্বাদিত্যর্থঃ। নন্বনর্থমূলং পরিহর্ত্তব্যং তৎ কিমিতি জ্ঞাতুমিষ্যতে তত্রাহ জ্ঞাতে হীতি। কুর্য্যামিতি তজ্জ্ঞানমর্থবদিতি শেষঃ। বাক্যারম্ভার্থত্বমথশব্দস্য গৃহীত্বা প্রশ্নবাক্যং ব্যাকরোতি অথেত্যাদিনা। অনিচ্ছতোঽপি বলাদেব দুশ্চরিতে প্রেরিতত্বে দৃষ্টান্তমাচষ্টে রাজ্ঞেবেতি। বিনিযোজ্যত্বস্যেচ্ছাসাপেক্ষত্বাত্তদভাবে তদসিদ্ধিমাশঙ্ক্য প্রাগুক্তং স্মারয়তি রাজ্ঞেবেত্যুক্ত ইতি ॥ ৩৬ ॥

## স্বামিকৃত টীকা।

স্বধর্ম্মঃ শ্রেয়ান্ প্রশস্যতরঃ স্বনুষ্ঠিতাৎ সকলাঙ্গসম্পূর্ত্ত্যা কৃতাদপি পরধর্ম্মাৎ সকাশাৎ। তত্র হেতুঃ স্বধর্ম্মে যুদ্ধাদৌ প্রবর্ত্তমানস্য নিধনং মরণমপি শ্রেষ্ঠং স্বর্গাদিপ্রাপকত্বাৎ পরধর্ম্মস্তু পরস্য ভয়াবহো নিষিদ্ধত্বেন নরকপ্রাপকত্বাৎ ॥ ৩৫ ॥

ন তয়োর্ব্বশমাগচ্ছেদিত্যুক্তং তদেতদশক্যং মন্বানোঽর্জ্জুনউবাচ অথেতি। বৃষ্ণের্বংশেঽবতীর্ণো বার্ষ্ণেয়ঃ হে বার্ষ্ণেয় অনর্থরূপং পাপং কর্ত্তুমনিচ্ছন্নপি কেন প্রযুক্তঃ প্রেরিতোঽয়ং পুরুষঃ পাপং চরতি কামক্রোধৌ বিবেকবলেন নিরুন্ধতোঽপি পুরুষস্য পুনঃ পাপে প্রবৃত্তিদর্শনাৎ, অন্যোঽপি তয়োর্মূলভূতঃ কশ্চিৎ প্রবর্ত্তকো ভবেদিতি মন্বানস্য প্রশ্নঃ ॥৩৬॥

শ্রীভগবানুবাচ—কামএষ ক্রোধ এষ রজোগুণসমুদ্ভবঃ।
মহাশনো মহাপাপ্মা বিদ্ধ্যেনমিহ বৈরিণম্ ॥ ৩৭ ॥

## শাঙ্করভাষ্যম্।

শৃণু ত্বং তং বৈরিণং সর্ব্বানর্থকরং যং ত্বং পৃচ্ছসি ভগবানুবাচ "ঐশ্বর্য্যস্য সমগ্রস্য ধর্ম্মস্য যশসঃ শ্রিয়ঃ। বৈরাগ্যস্যাথ মোক্ষস্য ষণ্ণাম্ভগইতীঙ্গনা"। ঐশ্বর্য্যাদি ষট্কং যস্মিন্ বাসুদেবে নিত্যমপ্রতিবন্ধত্বেন সামস্ত্যেন চ বর্ত্ততে, "উৎপত্তিং প্রলয়ঞ্চৈব ভূতানামাগতিং গতিং। বেত্তি বিদ্যামবিদ্যাঞ্চ স বাচ্যো ভগবানিতি"। উৎপত্ত্যাদিবিষয়ঞ্চ বিজ্ঞানং যস্য স বাসুদেবো বাচ্যোভগবানিতি,কামইতি। কাম এষ সর্ব্বলোকং বশং কুর্ব্বন্ শত্রুর্যন্নিমিত্তা সর্ব্বানর্থপ্রাপ্তিঃ প্রাণিনাং স এষ কামঃ প্রতিহতঃ কেনচিৎ ক্রোধত্বেন পরিণমতেঽতঃ ক্রোধোঽপ্যেষএব রজোগুণসমুদ্ভবো রজশ্চ তদ্গুণশ্চ রজোগুণঃ সমুদ্ভবো যস্য স কামো

## গিরিকৃত টীকা।

সম্প্রতিপত্তিবচনং প্রস্তৌতি শৃণ্বিতি। তস্য বৈপরীত্যং স্ফোরয়তি সর্ব্বেতি। অপ্রস্তুতং কিমিতি প্রস্তূয়তে তত্রাহ যং ত্বমিতি। ভগবচ্ছব্দার্থং নির্দ্ধারয়িতুং পৌরাণিকং বচনমুদাহরতি ঐশ্বর্য্যস্যেতি সমগ্রস্যেত্যেতৎ প্রত্যেকং বিশেষণৈঃ সম্বধ্যতে, অথশব্দস্তথা-শব্দপর্য্যায়ঃ সমুচ্চয়ার্থঃ মোক্ষশব্দেন তদুপায়ো জ্ঞানং বিবক্ষ্যতে। উদাহৃতবচসস্তাৎপর্য্যমাহ ঐশ্বর্য্যাদীতি। স বাচ্যো ভগবানিতি সম্বন্ধঃ। তত্রৈব পৌরাণিকং বাক্যান্তরং পঠতি উৎপত্তি-মিতি। ভূতানামিতি প্রত্যেকমুৎপত্ত্যাদিভিঃ সম্বধ্যতে করণার্থৌ চোৎপত্তিপ্রলয়শব্দৌ ক্রিয়ামাত্রস্য পুরুষান্তরগোচরত্বসম্ভবাৎ, আগতির্গতিশ্চেত্যাগামিন্যৌ সম্পদ্বিপদৌ সূচ্যেতে। বাক্যান্তরস্যাপি তাৎপর্য্যমাহ উৎপত্ত্যাদীতি। বেত্তীত্যুক্তঃ সাক্ষাৎকারোবিজ্ঞানমিত্যুচ্যতে, সমগ্রৈশ্বর্য্যাদিসম্পত্তিসমুচ্চয়ার্থশ্চকারঃ। উক্তলক্ষণো ভগবান্ কিমুক্তবানিতি তদাহ কামইতি। কামস্য সর্ব্বলোকশত্রুত্বং বিশদয়তি যন্নিমিত্তেতি। তথাপি কথং তস্যৈব ক্রোধত্বং তদাহ সএবইতি। কামক্রোধয়োরেব হেয়ত্বদ্যোতনার্থং কারণং কথয়তি রজোগুণইতি। কারণদ্বারা কামাদেরেব হেয়ত্বমুক্ত্বা কার্য্যদ্বারাপি তস্য হেয়ত্বং

## স্বামিকৃত টীকা।

অত্রোত্তরং শ্রীভগবানুবাচ কামএবক্রোধএষইত্যাদি। যত্ত্বয়া পৃষ্টৌ হেতুরেষ কামএব নমু ক্রোধোঽপি পূর্ব্বং ত্বয়োক্ত ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থ ইত্যত্র, সত্যং নাসৌ ততঃ পৃথক্ কিন্তু ক্রোধোঽপ্যেষ কামএব হি কেনচিৎ প্রতিহতঃ ক্রোধাত্মনা পরিণমতে পূর্ব্বং পৃথক্ত্বেনো-ক্তোঽপি ক্রোধঃ কামজএবেত্যভিপ্রায়েণৈকীকৃত্যোচ্যতে, রজোগুণাৎ সমুদ্ভবতীতি তথ অনেন সত্ত্ববৃদ্ধ্যা রজসি ক্ষয়ং নীতে সতি কামো ন জায়ত ইতি সূচিতং, এবং কামমিহ

ধূমেনাব্রিয়তে বহ্নির্যথাহদর্শোমলেন চ।
যথোল্বেনাবৃতো গর্ভস্তথা তেনেদমাবৃতম্ ॥ ৩৮ ॥
আবৃতং জ্ঞানমেতেন জ্ঞানিনো নিত্যবৈরিণা।
কামরূপেণ কৌন্তেয় দুষ্পূরেণানলেন চ ॥ ৩৯ ॥

## শাঙ্করভাষ্যম্।

রজোগুণসমুদ্ভবো রজোগুণস্য বা সমুদ্ভবঃ কামোহদ্ভুতো রজঃ প্রবর্ত্তয়ন্ পুরুষং প্রবর্ত্তয়তি তৃষ্ণয়া হ্যহংকারিতঃ ইতি গুণতুঃখিনাং রজঃকার্য্যে সেবাদৌ প্রবৃত্তানাং প্রলাপঃ শ্রূয়তে। মহাশনো মহদশনমস্যেতি মহাশনোহতএব মহাপাপ্মা কামেন প্রেরিতো জন্তুঃ পাপং করোতি অতো বিদ্ধ্যেনং কামমিহ সংসারে বৈরিণং॥ ৩৭ ॥

কথং বৈরীতি দৃষ্টান্তৈঃ প্রত্যায়য়তি ধূমেনেতি। ধূমেন সহজেনাব্রিয়তে বহ্নিঃ প্রকাশাত্মকোহপ্রকাশাত্মকেন যথা বাহদর্শো মলেন চ যথোল্বেন গর্ত্তবেষ্টনেন জরায়ুণা আবৃত আচ্ছাদিতো গর্ত্তস্তথা তেনেদমাবৃতং ॥ ৩৮ ॥

কিং পুনস্তদিদংশব্দবাচ্যং যৎ কামেনাবৃতমিত্যুচ্যতে আবৃতমিতি। আবৃতমেতেন

## গিরিকৃত টীকা।

সূচয়তি রজোগুণস্যেতি। কামস্য পুরুষপ্রবর্ত্তকত্বমেব ন রজোগুণজনকত্বমিত্যাশঙ্ক্যাহ কামোহীতি। তত্রৈবানুভবানুসারিণীং লোকপ্রসিদ্ধিং প্রমাণয়তি তৃষ্ণয়া হীতি। তস্য যোগ্যাযোগ্যবিভাগমন্তরেণ বহুবিষয়ত্বং দর্শয়তি মহাশনইতি। বহুবিষয়ত্বপ্রযুক্তং কর্ম্ম নির্দ্দিশতি অত ইতি। সর্ব্ববিষয়ত্বেহপি কুতোহস্য পাপত্বমিত্যাশঙ্ক্যাহ কামেনেতি। কামস্যোক্তবিশেষণবত্ত্বে ফলিতমাহ অত ইতি ॥ ৩৭ ॥

উত্তরশ্লোকমবতারয়তি কথমিতি। অনেকদৃষ্টান্তোপাদানং প্রতিপত্তিসৌকর্য্যার্থং। সহজস্য ধূমস্য প্রকাশাত্মকবহ্নিং প্রতি আবরণত্বসিদ্ধ্যর্থং বিশিনষ্টি অপ্রকাশাত্মকেনেতি ॥ ৩৮ ॥

## স্বামিকৃত টীকা।

মোক্ষমার্গে বৈরিণং বিদ্ধি, অয়ঞ্চ বক্ষ্যমাণক্রমেণ হন্তব্যএব যতো নাসৌ দানেন সন্ধাতুং শক্যইত্যাহ মহাশনো মহদশনং যস্য দুষ্পূরইত্যর্থঃ, ন চ সাম্না সন্ধাতুং শক্যো যতো মহাপাপ্মা অত্যুগ্রঃ ॥ ৩৭ ॥

কামস্য বৈরিত্বং দর্শয়তি ধূমেনেতি। ধূমেন সহজেন যথা বহ্নিরাব্রিয়তে আচ্ছাদ্যতে যথা চাদর্শো মলেন আগন্তুকেন যথা চোল্বেন গর্ভবেষ্টনচর্ম্মণা গর্ভঃ সর্ব্বতো নিরুদ্ধ আবৃতস্তথা প্রকারত্রয়েণাপি তেন কামেনাবৃতমিদং ॥ ৩৮ ॥

ইন্দ্রিয়াণি মনোবুদ্ধিরস্যাধিষ্ঠানমুচ্যতে।
এতৈর্বিমোহয়ত্যেষ জ্ঞানমাবৃত্য দেহিনম্ ॥ ৪০ ॥

## শাঙ্করভাষ্যম্।

জ্ঞানং জ্ঞানিনো নিত্যবৈরিণা জ্ঞানী হি জানাত্যনেন অহমনর্থে প্রযুক্তঃ পূর্ব্বমেবাতো দুঃখী চ ভবতি নিত্যমেব অতোঽসৌ জ্ঞানিনো নিত্যবৈরী ন তু মূর্খস্য স হি কামং তৃষ্ণাকালে মিত্রমিব পশ্যংস্তৎকার্য্যে দুঃখে প্রাপ্তে জানাতি তৃষ্ণয়াঽহং দুঃখিত্বমাপাদিত ইতি ন পূর্ব্বমেবাতো জ্ঞানিনএব নিত্যবৈরী কিংরূপেণ কামরূপেণ কাম ইচ্ছৈব রূপমস্যেতি কাম-রূপস্তেন দুষ্পূরেণ দুঃখেন পূরণমস্যেতি দুষ্পূরোঽতস্তেনানলেন নাস্যালং পর্য্যাপ্তির্ব্বিদ্যত ইত্যনলস্তেন ॥ ৩৯ ॥

কিমধিষ্ঠানঃ পুনঃ কামো জ্ঞানস্যাবরণত্বেন বৈরী সর্ব্বস্যেত্যপেক্ষায়ামাহ জ্ঞানে হি শত্রোরধিষ্ঠানে সুখেন নিবর্হণং কর্ত্তুং শক্যমিতি ইন্দ্রিয়াণীতি। ইন্দ্রিয়াণি মনো বুদ্ধিশ্চাস্য

## গিরিকৃত টীকা।

সামান্যতো নির্দ্দিষ্টং বিশেষতো নির্দ্দেষ্টুং আকাঙ্ক্ষাপূর্ব্বকমনন্তরশ্লোকমবতারয়তি কিং পুনরিতি। কামস্য জ্ঞানং প্রত্যাবরণসিদ্ধ্যর্থং জ্ঞানিনো নিত্যবৈরিণেত্যাদি বিশেষণং। প্রতীকমাদায় ব্যাচষ্টে আবৃতমিত্যাদিনা। জ্ঞানিনাং প্রতি বৈরিত্বেঽপি নিত্যবৈরিত্বং কামস্য কথমিত্যাহ জ্ঞানী ইতি। অনর্থপ্রাপ্তিমন্তরেণ কামস্য প্রসক্তাবস্থা পূর্ব্বমেবে-ত্যুচ্যতে, অতঃ শব্দেন কামপ্রসক্তিরেব পরামৃষ্যতে, নিত্যমেবেত্যুৎপত্ত্যবস্থা কার্য্যাবস্থা চ কামস্য কথ্যতে। ননু সর্ব্বস্যাপি কামাত্মতা ন প্রশস্তেতি কামো নিত্যবৈরী ভবতি ততঃ কুতো জ্ঞানিবিশেষণমিত্যাশঙ্ক্যাহ ন ত্বিতি। অজ্ঞস্য নাসৌ নিত্যবৈরীত্যেতদুপপাদয়তি স হীতি। কার্য্যপ্রাপ্তিপ্রাগবস্থা পূর্ব্বমিত্যুক্ত্বা, অজ্ঞং প্রতি বৈরিত্বে সত্যপি কামস্য নিত্যবৈরিত্বভাবে ফলিতমাহ অতইতি। স্বরূপতো নিত্যবৈরিত্বাবিশেষেঽপি জ্ঞানা-জ্ঞানাভ্যামবান্তরভেদসিদ্ধিরিত্যর্থঃ। আকাঙ্ক্ষাদ্বারা প্রকৃতং বৈরিণমেব স্ফোরয়তি কিং রূপেণেত্যাদিনা ॥ ৩৯ ॥

## স্বামিকৃত টীকা।

ইদং শব্দনির্দ্দিষ্টং দর্শয়ন্ বৈরিত্বং স্ফুটয়তি আবৃতমিতি। ইদং বিবেকজ্ঞানং এতে-নাবৃতং, অজ্ঞস্য খলু ভোগসময়ে কামঃ সুখহেতুরেব পরিণামে তু বৈরিত্বং প্রতিপদ্যতে জ্ঞানিনঃ পুনস্তৎকালমপ্যনর্থানুসন্ধানাদ্দুঃখহেতুরেবেতি নিত্যবৈরিণেত্যুক্তং। কিঞ্চ বিষয়ৈঃ পূর্য্যমাণোঽপি যো দুষ্পূরঃ অপূর্য্যমাণস্তু শোকসন্তাপহেতুত্বাদনলতুল্যঃ অনেন সর্ব্বান্ প্রতি বৈরিত্বমুক্তং ॥ ৩৯ ॥

তস্মাত্ত্বমিন্দ্রিয়াণ্যাদৌ নিয়ম্য ভরতর্ষভ।
পাপ্মানং প্রজহি হ্যেনং জ্ঞানবিজ্ঞাননাশনম্ ॥৪১॥

## শাঙ্করভাষ্যম্।

কামস্যাধিষ্ঠানমুচ্যতে এতৈরিন্দ্রিয়াদিভিরাশ্রয়ৈর্বিমোহয়তি বিবিধং মোহয়ত্যেষ কামো জ্ঞানমাবৃত্যাচ্ছাদ্য দেহিনং শরীরিণং ॥ ৪০ ॥

যত এবং তস্মাদিতি। তস্মাত্ত্বমিন্দ্রিয়াণ্যাদৌ পূর্ব্বং নিয়ম্য বশীকৃত্য ভরতর্ষভ পাপ্মানং পাপচারং কামং প্রজহি পরিত্যজ হি যস্মাৎ এনং প্রকৃতং বৈরিণং জ্ঞানবিজ্ঞান-নাশনং জ্ঞানং শাস্ত্রত আচর্য্যতশ্চ আত্মাদীনামবরোধঃ বিজ্ঞানং বিশেষতস্তদনুভবস্তয়োর্জ্ঞান-বিজ্ঞানয়োঃ শ্রেয়ঃপ্রাপ্তিহেত্বোর্নাশনং নাশকস্তন্নাশনং প্রজহি আত্মনঃ পরিত্যজে-ত্যর্থঃ ॥ ৪১ ॥

## গিরিকৃত টীকা।

কামস্য নিরাশ্রয়স্য কার্য্যকরত্বাভাবং মত্বা প্রশ্নপূর্ব্বকমাশ্রযং দর্শয়তি কিমধিষ্ঠানইতি। কামস্য নিত্যবৈরিত্বেন পরিজিহর্ষিতস্য কিমিত্যধিষ্ঠানং জ্ঞাপ্যতে তত্রাহ জ্ঞাতে হীতি। ইন্দ্রিয়াদীনাং কামাধিষ্ঠানত্বং প্রকটয়তি এতৈরিতি। নন্বেতাভিরিতি বক্তব্যে কথমে-তৈরিত্যুচ্যতে তত্রাহ ইন্দ্রিয়াদিভিরিতি ॥ ৪০ ॥

তেষাং কামাশ্রয়ত্বে সিদ্ধে সাশ্রয়স্য তস্য পরিহর্ত্তব্যত্বমাহ যতইতি। তস্মাদিন্দ্রিয়াদী-নামাশ্রয়ত্বাদিতি যাবৎ, পূর্ব্বং কামনিরোধাৎ প্রাগবস্থায়ামিত্যর্থঃ। তেষু নিয়মিতেষু মনোবুদ্ধ্যোর্নিয়মঃ সিধ্যতি তৎপ্রবৃত্তেরিতরপ্রবৃত্তিব্যতিরেকণাফলাত্বাদিতিভাবঃ, পাপ-মূলতয়া কামস্য তচ্ছব্দবাচ্যত্বমুন্নেয়ং। কামস্য পরিত্যজ্যত্বে বৈরিত্বং হেতুঃ, তমেব হেতুং সাধয়তি জ্ঞানেতি। জ্ঞানবিজ্ঞানশব্দয়োরর্থভেদমাবেদয়তি জ্ঞানমিত্যাদিনা ॥ ৪১ ॥

## স্বামিকৃত টীকা।

ইদানীং তস্যাধিষ্ঠানং কথয়ন্ জয়োপায়মাহ ইন্দ্রিয়াণীতি দ্বাভ্যাং। বিষয়দর্শনশ্রবণা-দিভিঃ সংকল্পেনাধ্যবসায়েন চ কামস্যাবির্ভাবাদিন্দ্রিয়াণি চ মনশ্চ বুদ্ধিশ্চাস্যাধিষ্ঠানমুচ্যতে এতৈরিন্দ্রিয়াদিভির্দর্শনাদিব্যাপারবদ্ভিরাশ্রয়ভূতৈর্বিবেকজ্ঞানমাবৃত্য দেহিনং বিমোহ-য়তি ॥ ৪০ ॥

যস্মাদেবং তস্মাদিতি। তস্মাদাদৌ বিমোহাৎ পূর্ব্বমেবেন্দ্রিয়াণি মনোবুদ্ধিঞ্চ নিয়ম্য পাপ্মানং পাপরূপমেনং কামং হি স্ফুটং প্রজহি ঘাতয়, যদ্বা প্রজহি পরিত্যজ, জ্ঞানমাত্ম-বিষয়ং বিজ্ঞানং শাস্ত্রীয়ং তয়োর্নাশনং, যদ্বা জ্ঞানং শাস্ত্রাচার্য্যোপদেশজং বিজ্ঞানং নিদি-ধ্যাসনজং, তমেব ধীরো বিজ্ঞায় প্রজ্ঞাং কুর্ব্বীতেতি শ্রুতেঃ ॥ ৪১ ॥

ইন্দ্রিয়াণি পরাণ্যাহুরিন্দ্রিয়েভ্যঃ পরং মনঃ।
মনসস্তু পরা বুদ্ধির্বুদ্ধের্যঃ পরতস্তু সঃ ॥ ৪২ ॥
এবং বুদ্ধেঃ পরং বুদ্ধ্বা সংস্তভ্যাত্মানমাত্মনা।
জহি শত্রুং মহাবাহো কামরূপং দুরাসদম্ ॥ ৪৩ ॥

## শাঙ্করভাষ্যম্ ॥

ইন্দ্রিয়াণি আদৌ নিয়ম্য কামং শত্রুং জহি ইত্যুক্তং তত্র কিমাশ্রয়ঃ কামং জহ্যাদিত্যুচ্যতে ইন্দ্রিয়াণীতি। ইন্দ্রিয়াণি শ্রোত্রাদীনি পঞ্চ দেহং স্থূলং বাহ্যং পরিচ্ছিন্নং চাপেক্ষ্য সৌক্ষ্ম্যান্তরত্বব্যাপিত্বাদ্যপেক্ষ্য পরাণি প্রকৃষ্টান্যাহুঃ পণ্ডিতাস্তথেন্দ্রিয়েভ্যঃ পরং মনঃ সঙ্কল্পাত্মকং তথা মনসস্তু পরা বুদ্ধির্নিশ্চয়াত্মিকা তথা যঃ সর্ব্বদৃশ্যেভ্যো বুদ্ধ্যন্তেভ্যোঽভ্যন্তরোঽয়ং দেহিনং ইন্দ্রিয়াদিভিরাশ্রয়ৈর্যুক্তঃ কামো জ্ঞানাবরণদ্বারেণ মোহয়তীত্যুক্তং বুদ্ধেঃ পরতস্তু সঃ স বুদ্ধের্দ্রষ্টা পরমাত্মা ॥ ৪২ ॥

ততঃ কিং এবমিতি। এবং বুদ্ধেঃ পরমাত্মানং বুদ্ধ্বা জ্ঞাত্বা সংস্তভ্য সম্যক্ স্তম্ভনং কৃত্বা স্বেনৈবাত্মনা সংস্কৃতেন মনসা সম্যক্ সমাধায়েত্যর্থঃ, জহেনং শত্রুং মহাবাহো

## গিরিকৃত টীকা।

পূর্ব্বোক্তমনূদ্য কামত্যাগস্য দুষ্করত্বং মন্বানোঽপ্যস্যেত্যত্রোক্তমেব স্পষ্টীকর্ত্তুং প্রশ্নপূর্ব্বকং শ্লোকান্তরমবতারয়তি ইন্দ্রিয়াণীত্যাদিনা। পঞ্চেতি জ্ঞানেন্দ্রিয়বৎ কর্ম্মেন্দ্রিয়াণ্যপি বাগাদীনি গৃহ্যন্তে। কিমপেক্ষয়া তেষাং পরত্বং তত্রাহ দেহমিতি। তথাপি কেন প্রকারেণ পরত্বং তদাহ সৌক্ষ্ম্যেতি। আদিশব্দেন কারণত্বাদিনা। মনসঃ স্বরূপোক্তিপূর্ব্বকং পরত্বং কথয়তি তথেতি। মনসি দর্শিতং ন্যায়ং বুদ্ধাবতিদিশতি তথা মনসস্ত্বিতি। বুদ্ধের্যইত্যাদি ব্যাচষ্টে তথেত্যাদিনা। আত্মনো যথোক্তবিশেষণস্যাপ্রকৃতত্বমাশঙ্ক্যাহ যথ দেহিনমিতি ॥ ৪২ ॥

## স্বামিকৃত টীকা।

যত্র চিত্তপ্রণিধানেনেন্দ্রিয়াণি নিয়ন্তুং শক্যন্তে তদাত্মস্বরূপং দেহাদিভ্যো বিবিচ্য দর্শয়তি ইন্দ্রিয়াণীতি। ইন্দ্রিয়াণি দেহাদিভ্যো গ্রাহ্যেভ্যঃ পরাণি শ্রেষ্ঠান্যাহুঃ সূক্ষ্মত্বাৎ প্রকাশকত্বাচ্চ অতএব তদ্ব্যতিরিক্তত্বমপ্যর্থাদুক্তং ভবতি, ইন্দ্রিয়েভ্যশ্চ সংকল্পাত্মকং মনঃ পরং তৎপ্রবর্ত্তকত্বাৎ, মনসস্তু নিশ্চয়াত্মিকা বুদ্ধিঃ পরা নিশ্চয়পূর্ব্বকত্বাৎ সংকল্পস্য, যস্তু বুদ্ধেঃ পরতস্তৎসাক্ষিত্বেনাবস্থিতঃ সর্ব্বান্তরঃ স আত্মা তং বিমোহয়তি দেহিনমিতি দেহিশব্দোক্ত আত্মা স ইতি পরামৃশ্যতে ॥ ৪২ ॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্ম-
বিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-
সম্বাদে কর্ম্মযোগোনাম
তৃতীয়োঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

কামরূপং দুরাসদং দুঃখেনাসদঃ আসাদনং প্রাপ্তির্যস্য তং দুরাসদং দুর্ব্বিজ্ঞেয়ানেক বিশেষমিতি॥ ৪৩

ইতি শ্রীভগবদ্গীতাভাষ্যে তৃতীয়োঽধ্যায়ঃ

## গিরিকৃত টীকা।

ইন্দ্রিয়াদিসমাধানপূর্ব্বকমাত্মজ্ঞানাৎ কামজয়োভবতীত্যুপসংহরতি এবমিত্যাদিনা সংস্কৃতং মনো মনঃসমাধানে হেতুরিতি সূচয়তি সংস্তভ্যেতি। প্রকৃতং শত্রুমেব বিশিনষ্টি কামরূপমিতি। তস্য দুরাসদত্বে হেতুমাহ দুর্ব্বিজ্ঞেয়েতি। অনেকো বিশেষস্তাদৃশো মহাশনত্বাদিস্তদনেনোপায়ভূতা কর্ম্মনিষ্ঠা প্রাধান্যেনোক্তা উপেয়া তু জ্ঞাননিষ্ঠা গুণত্বে-নেতি বিবেক্তব্যং॥ ৪৩॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং তৃতীয়োঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

উপসংহরতি এবমিতি। বুদ্ধেরেব বিষয়েন্দ্রিয়াদিজন্যাঃ কামাদিবিক্রিয়াঃ আত্মা তু নির্ব্বিকারস্তৎসাক্ষীত্যেবং বুদ্ধেঃ পরমাত্মানং বুদ্ধা আত্মনা এবংভূতয়া নিশ্চয়াত্মিকয়া বুদ্ধ্যা আত্মানং মনঃ সংস্তভ্য নিশ্চলং কৃত্বা কামরূপিণং শত্রুং জহি মারয় দুরাসদং দুঃখেনাসাদ-নীয়ং দুর্ব্বিজ্ঞেয়মিত্যর্থঃ।

স্বধর্ম্মেণ যমারাধ্য ভক্ত্যা মুক্তিমিতা বুধাঃ।
তং কৃষ্ণং পরমানন্দং তোষয়েৎ সর্ব্বকর্ম্মভিঃ॥ ৪৩॥
ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং তৃতীয়োঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## চতুর্থোঽধ্যায়ঃ।

শ্রীভগবানুবাচ—ইমং বিবস্বতে যোগং প্রোক্তবানহমব্যয়ম্।
বিবস্বান্ মনবে প্রাহ মনুরিক্ষ্বাকবেঽব্রবীৎ॥ ১॥

### শাঙ্করভাষ্যম্।

শ্রীভগবানুবাচ। যোঽয়ং যোগোঽধ্যায়দ্বয়েনোক্তো জ্ঞাননিষ্ঠালক্ষণঃ স সন্ন্যাসঃ স কর্ম্মযোগোপায়ঃ যস্মিন্ বেদার্থঃ পরিসমাপ্তঃ প্রবৃত্তিলক্ষণো নিবৃত্তিলক্ষণশ্চ গীতাসু চ সর্ব্বাস্বয়মেব যোগো বিবক্ষিতো ভগবতা, অতঃ পরিসমাপ্তং বেদার্থং মত্বানন্তং বংশকথনেন স্তৌতি ভগবান্। ইমং অধ্যায়দ্বয়েনোক্তং যোগং বিবস্বতে আদিত্যায় সর্গাদৌ প্রোক্ত-

### গিরিকৃত টীকা।

পূর্ব্বাভ্যামধ্যায়াভ্যাং নিষ্ঠাদ্বয়াত্মনোযোগস্য গীতত্বাৎ বেদার্থস্য চ সমাপ্তত্বাৎ বক্তব্যা শেষাভাবাৎ উক্তযোগস্য কৃতিমত্বশঙ্কানিবৃত্তয়ে বংশকথনপূর্ব্বিকাং স্তুতিং ভগবানুক্তবানিত্যাহ শ্রীভগবানিতি। তদেতদ্ভগবদ্বচনং বৃত্তানুবাদদ্বারেণ প্রস্তৌতি যোঽয়মিতি। উক্তমেব যোগং বিভজ্যানুবদতি জ্ঞানেতি। সন্ন্যাসেনেতিকর্ত্তব্যতয়া সহিতস্য জ্ঞানাত্মনো যোগস্য কর্ম্মাখ্যো যোগো হেতুরতশ্চোপায়োপেয়ভূতং নিষ্ঠাদ্বয়ং প্রতিষ্ঠাপিতমিত্যর্থঃ। উক্তে যোগদ্বয়ে প্রমাণমুপন্যস্যতি যস্মিন্নিতি। অথবা জ্ঞানযোগস্য কর্ম্মযোগোপায়ত্ব মেব স্ফুটয়তি যস্মিন্নিতি। প্রবৃত্ত্যা লক্ষ্যতে জ্ঞায়তে কর্ম্মযোগো নিবৃত্ত্যা চ লক্ষ্যতে জ্ঞানযোগ ইতি বিভাগঃ। যদ্যপি পূর্ব্বস্মিন্নধ্যায়দ্বয়ে যথোক্তনিষ্ঠাদ্বয়ং ব্যাখ্যাতং তথাপি বক্ষ্যমাণাধ্যায়েষু বক্তব্যান্তরমস্তীত্যাশঙ্ক্যাহ গীতাসু চেতি। কথং তর্হি সমনন্তরাধ্যায়স্য প্রবৃত্তিরতআহ অতইতি। বংশকথনং সম্প্রদায়োপদেশশ্চ অকৃত্রিমত্বাশঙ্কানিবৃত্ত্যা যোগ

### স্বামিকৃত টীকা।

আবির্ভাবতিরোভাবাবাবিষ্কর্ত্তুং স্বয়ংহরিঃ। তত্ত্বম্পদবিবেকার্থং কর্ম্মযোগং প্রশংসতি। এবং তাবদধ্যায়দ্বয়েন কর্ম্মযোগোপায়কজ্ঞানযোগো মোক্ষসাধনত্বেনোক্তস্তমেব ব্রহ্মার্পণাদিগুণবিধানেন তত্ত্বংপদার্থবিবেকাদিনা চ প্রপঞ্চয়িষ্যন্ প্রথমং তাবৎ পরম্পরাপ্রাপ্তত্বেন

এবং পরম্পরাপ্রাপ্তমিমং রাজর্ষয়ো বিদুঃ।
স কালেনেহ মহতা যোগো নষ্টঃ পরন্তপ ॥ ২ ॥

## শাঙ্করভাষ্যম্।

বান্ অহং জগৎপরিপালয়িতৃণাং ক্ষত্রিয়াণাং বলাধানায় তেন যোগবলেন যুক্তাস্তে সমর্থা ভবন্তি ব্রহ্ম পরিরক্ষিতুং ব্রহ্মক্ষত্রে পরিপালিতে জগৎপরিপালয়িতুমলং অব্যয়মব্যয়ফলত্বান্ন হ্যস্য সম্যগ্‌দর্শননিষ্ঠালক্ষণস্য মোক্ষাখ্যং ফলং ব্যেতি সচ বিবস্বান্ মনবে প্রাহ মনুরিক্ষ্বা-কবে স্বপুত্রায়াদিরাজায়াব্রবীৎ ॥ ১ ॥

এবমিতি। এবং ক্ষত্রিয়পরম্পরাপ্রাপ্তমিমং রাজর্ষয়ো রাজানশ্চ তে ঋষয়শ্চ রাজর্ষয়ো বিদুরিমং যোগং স যোগঃ কালেনেহ মহতা দীর্ঘেণ নষ্টো বিচ্ছিন্নসংপ্রদায়ঃ সম্বৃতো হে

## গিরিকৃত টীকা।

স্বতৌ পর্য্যবস্যতি। গুরুশিষ্যপরম্পরোপন্যাসমেবানুক্রামতি ইমমিতি। ইমমিত্যস্য সন্নিহিতং বিষয়ং দর্শয়তি অধ্যায়েতি। যোগং জ্ঞাননিষ্ঠালক্ষণং কর্ম্মযোগোপায়লভ্যমি-ত্যর্থঃ। স্বয়মকৃতার্থানাং প্রয়োজনব্যগ্রাণাং পরার্থপ্রবৃত্ত্যসম্ভবাদ্ভগবতস্তথাবিধপ্রবৃত্তিদর্শ-নাৎ কৃতার্থতা কল্পনীয়েত্যাহ বিবস্বতইতি। অব্যয়বেদমূলত্বাদব্যয়ত্বং যোগস্য গময়ি-তব্যং। কিমিতি ভগবতা কৃতার্থেনাপি যোগপ্রবচনং কৃতমিতি তদাহ জগদিতি। কথং যথোক্তেন যোগেন ক্ষত্রিয়াণাং বলাধানং তদাহ তেনেতি যুক্তাঃ ক্ষত্রিয়াইতি শেষঃ, ব্রহ্ম-শব্দেন ব্রাহ্মণত্বজাতিরুচ্যতে। যদ্যপি যোগপ্রবচনেন ক্ষত্রং রক্ষিতং তেন চ ব্রাহ্মণত্বং তথাপি কথং রক্ষণীয়ং জগদশেষং রক্ষিতমিত্যাশঙ্ক্যাহ ব্রহ্মেতি। তাভ্যাং হি কর্ম্মফল-ভূতং জগদনুষ্ঠানদ্বারা রক্ষিতুং শক্যমিত্যর্থঃ। যোগস্যাব্যয়ত্বে হেত্বন্তরমাহ অব্যয়ফল-ত্বাদিতি। নন্বু কর্ম্মফলবদুক্তযোগফলস্যাপি সাধ্যত্বেন ক্ষয়িষ্ণুত্বমনুমীয়তে নেত্যাহ ন হীতি। অপুনরাবৃত্তিশ্রুতিপ্রতিহতমনুমানং ন প্রমাণীভবতীতিভাবঃ। ভগবতা বিব-স্বতে প্রোক্তো যোগস্তত্রৈব পর্য্যবস্যতীত্যাশঙ্ক্যাহ সচেতি। স্বপুত্রায়েত্যুভয়ত্র সম্বধ্যতে, আদিরাজায়েতীক্ষ্বাকোঃ সূর্য্যবংশপ্রবর্ত্তকত্বেন বৈশিষ্ট্যমুচ্যতে ॥ ১ ॥

যথোক্তে যোগে পরম্পরাগতে বিশিষ্টজনসম্মতিমুদাহরতি এবমিতি। তস্য কথং সম্প্রতি বক্তব্যত্বং তদাহ স কালেনেতি। পূর্ব্বার্দ্ধং ব্যাকরোতি এবমিত্যাদিনা। ঐশ্বর্য্য-

## স্বামিকৃত টীকা।

স্তবন্ শ্রীভগবানুবাচ। ইমমিতি ত্রিভিঃ। অব্যয়ফলত্বাদব্যয়ং ইমং যোগং পুরাহং বিব-স্বতে আদিত্যায় কথিতবান্, স চ স্বপুত্রায় মনবে শ্রাদ্ধদেবায় প্রাহ, স চ মনুঃ স্বপুত্রায়েক্ষ্বা-কবেঽব্রবীৎ ॥ ১ ॥

সএবায়ং ময়া তেঽদ্য যোগঃ প্রোক্তঃ পুরাতনঃ।
ভক্তোঽসি মে সখা চেতি রহস্যং হ্যেতদুত্তমম্॥ ৩॥

## শাঙ্করভাষ্যম্।

পরন্তপ আত্মনো বিপক্ষভূতাঃ পরে উচ্যন্তে তান্ শৌর্য্যতেজোগভস্তিভির্ভানুরিব তাপয়তীতি পরন্তপঃ শক্রতাপনইত্যর্থঃ॥ ২॥

দুর্ব্বলান্ অজিতেন্দ্রিয়ান্ প্রাপ্য নষ্টং যোগমিমমুপলভ্য লোকঞ্চাপুরুষসম্বন্ধিনং স এবায়মিতি। স এবায়ং ময়া তে তুভ্যমদ্যেদানীং যোগঃ প্রোক্তঃ পুরাতনঃ ভক্তোঽসি মে সখা চাসীতি রহস্য হি যস্মাদেতদুত্তমং যোগজ্ঞানমিত্যর্থঃ॥ ৩॥

## গিরিকৃত টীকা।

সম্পত্তিমত্ত্বং রাজত্বং তেষামেব সূক্ষ্মার্থনিরীক্ষণক্ষমত্বমৃষিত্বমিহেতি ভগবতোঽর্জ্জুনেন সহ ব্যবহারকালো গৃহ্যতে। পরন্তপেতি সম্বোধনং বিভজতে আত্মনইতি॥ ২॥

কিমিতি বর্ত্তমানে কালে প্রকৃতো যোগঃ সম্প্রদায়রহিতোঽভূদিত্যাশঙ্ক্যাধিকার্য্যভাবাদিত্যাহ দুর্ব্বলানিতি। তদেব দৌর্ব্বল্যং প্রকৃতোপযোগিত্বেন ব্যাকরোতি অজিতেন্দ্রিয়ানিতি। যদ্যপি কামক্রোধাদিপ্রধানান্ পুরুষান্ প্রতিলভ্য কামক্রোধাদিভিরভিভূয়মানো যোগোনষ্টো বিচ্ছিন্নসম্প্রদায়ঃ সংজাতস্তথাপি যোগাদৃতে পুরুষার্থো লোকস্য লভ্যতে চেৎ কিমনেন যোগোপদেশেনেত্যাশঙ্ক্য যথোক্তযোগাভাবে পরমপুরুষার্থাপ্রাপ্তের্মৈবমিত্যাহ লোকঞ্চেতি। পূর্ব্বো যোগোবিচ্ছিন্নসম্প্রদায়োঽধুনা ত্বস্তযোগোমদর্থমুচ্যতে ভগবতেত্যাশঙ্ক্যাহ সএবেতি। কস্মাদন্যস্মৈ কস্মৈচিৎ পুরাতনো যোগো নোক্তোভগবতেত্যাশঙ্ক্যাহ ভক্তোঽসীতি। উক্তমধিকারিণং প্রতি যোগস্য বক্তব্যত্বে হেতুমাহ রহস্যং হীতি। অনাদিবেদমূলত্বাৎ যোগস্য পুরাতনত্বং। ভক্তি শরণবুদ্ধ্যা প্রীতিস্তয়া যুক্তো নিজরূপমবেক্ষ্য ভক্তো বিবক্ষিতঃ সমানবয়াঃ স্নিগ্ধঃ সহায়ঃ সখেত্যুচ্যতে। এতদিতি কথং যোগোবিশিষ্যতে তত্রাহ জ্ঞানমিতি॥ ৩॥

## স্বামিকৃত টীকা।

এবমিতি। এবং রাজানশ্চ তে ঋষয়শ্চেতি অন্যেঽপিরাজর্ষয়ো নিমিপ্রমুখাঃ স্বপিত্রাদিভিরিক্ষ্বাকুপ্রমুখৈঃ প্রোক্তমিমং যোগং বিদুর্জ্জানন্তি স্ম, অদ্যতনানামজ্ঞানে কারণমাহ হেপরন্তপ শক্রতাপন স যোগঃ কালবশাদিহ লোকে নষ্টো বিচ্ছিন্নঃ॥ ২॥

সএবায়মিতি। সএবায়ং যোগো যোগবিচ্ছিন্নে সংপ্রদায়ে সতি পুনশ্চ ময়া তে তুভ্যমুক্তোযতস্ত্বং মম ভক্তোঽসি সখা চ অন্যস্মৈ ময়া নোচ্যতে হি যস্মাদেতদুত্তমং রহস্যং॥৩॥

অর্জ্জুনউবাচ—অপরং ভবতো জন্ম পরং জন্ম বিবস্বতঃ।
কথমেতদ্বিজানীয়াং ত্বমাদৌ প্রোক্তবানিতি ॥৪॥

শ্রীভবানুবাচ—বহূনি মে ব্যতীতানি জন্মানি তব চার্জ্জুন।
তান্যহং বেদ সর্ব্বাণি ন ত্বং বেত্থ পরন্তপ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

ভগবতা বিপ্রতিষিদ্ধমুক্তমিতি মা ভূৎ কস্যচিৎ বুদ্ধিরিতি পরিহারার্থং চোদ্যমিব কুর্ব্বন্ অর্জ্জুনউবাচ, অপরমিতি। অপরমর্ব্বাক্ বসুদেবগৃহে ভবতো জন্ম পরং পূর্ব্বং সর্গাদৌ জন্মোৎপত্তির্ব্বিবস্বত আদিত্যস্য তৎ কথমেতদ্বিজানীয়ামামবিরুদ্ধার্থতয়া যস্তমেবাদৌ প্রোক্তবানিমং যোগং সএব ত্বমিদানীং মহ্যং প্রোক্তবানসীতি ॥ ৪ ॥

যা বাসুদেবেঽনীশ্বরাঽসর্ব্বজ্ঞাশঙ্কা মূর্খাণাং তাং পরিহরন্ শ্রীভগবানুবাচ যদর্থো হ্যর্জ্জুনস্য প্রশ্নঃ বহূনীতি। বহূনি মে মম ব্যতীতানি অতিক্রান্তানি জন্মানি তব চ হে অর্জ্জুন তান্যহং বেদ জানে সর্ব্বাণি ন ত্বং বেত্থ ন জানীষে পরন্তপ ধর্ম্মাধর্ম্মাদিপ্রতিবদ্ধজ্ঞানশক্তিত্বাদহং পুনর্নিত্যশুদ্ধবুদ্ধমুক্তসত্যস্বভাবত্বাদনাবরণজ্ঞানশক্তিরিতি বেদাহং হে পরন্তপ ॥ ৫ ॥

## গিরিকৃত টীকা।

ভগবতি লোকস্যানীশ্বরত্বশঙ্কাং নিবর্ত্তয়িতুং চোদ্যমুদ্ভাবয়তি ভগবতেতি। পরিহারার্থং ভগবতো মনুষ্যবদাস্থিতস্যানীশ্বরত্বমুপেত্য তদ্বচনে শঙ্কিতবিপ্রতিষেধস্যেতি শেষঃ, ভগবতো নিজরূপমুপেত্য নেদং চোদ্যং কিন্তু লীলাবিগ্রহং গৃহীত্বেতি বক্তুং চোদ্যমিবেত্যুক্তং। এতচ্ছব্দার্থমেব স্ফুটয়তি যস্ত্বমিতি ॥ ৪ ॥

ভগবত্যজ্ঞানাং মনুষ্যত্বশঙ্কাং বারয়িতুং প্রতিবচনমবতারয়তি যা বাসুদেবইতি। অন্যথা প্রশ্নে কথমাশঙ্কান্তরং পরিহর্ত্তুং ভগবদ্বচনমিত্যাশঙ্ক্য প্রতিবচনয়োরেকার্থত্বমাহ যদর্থো হীতি। যস্য শঙ্কিতস্য বিরোধস্য পরিহারার্থং তস্য প্রশস্তমেব পরিহারং বক্তুং ভগবদ্বচনমিত্যর্থঃ। অতীতানেকজন্মবত্বং ময়ৈব নাসাধারণং কিন্তু সর্ব্বপ্রাণিসাধারণমিত্যাহ তব চেতি। তানি প্রমাণাভাবান্ন প্রতিভান্তীত্যাশঙ্ক্যাহ তানীতি। ঈশ্বরস্যানাবৃতজ্ঞানত্বাদিত্যর্থঃ। কিমিতি তর্হি তানি মম ন প্রতীয়ন্তে তবাবৃতজ্ঞানত্বাদিত্যাহ ন ত্বমিতি পরান্ পরিকল্প্য তৎপরিভবার্থং প্রবৃত্তত্বাত্তব জ্ঞানাবরণং বিজ্ঞেয়মিত্যাহ পরন্ত-

## স্বামিকৃত টীকা।

ভগবতো বিবস্বন্তং প্রতি যোগোপদেশাসম্ভবং পশ্যন্নর্জ্জুনউবাচ অপরমিতি। অপরং অর্ব্বাচীনং তব জন্ম পরং প্রাক্কালীনং বিবস্বতো জন্ম তস্মাত্তবাধুনাতনত্বাচ্চিরন্তনায় বিবস্বতে ত্বমাদৌ যোগং প্রোক্তবানিত্যেতৎ কথমহং জানীয়াং জ্ঞাতুং শক্নুয়াম্ ॥ ৪ ॥

অজোঽপি সন্নব্যয়াত্মা ভূতানামীশ্বরোঽপি সন্।
প্রকৃতিং স্বামধিষ্ঠায় সম্ভবাম্যাত্মমায়য়া ॥ ৬ ॥

## শাঙ্করভাষ্যম্।

কথং তর্হি তব নিত্যেশ্বরস্য ধর্ম্মাধর্ম্মাভাবেঽপি জন্মেত্যুচ্যতে অজোঽপীতি। অজোঽপি জন্মরহিতোঽপি সংস্তথাব্যয়াত্মা অক্ষীণজ্ঞানশক্তিস্বভাবোঽপি সন্ তথা ভূতানাং ব্রহ্মাদিস্তম্বপর্য্যন্তানাং ঈশ্বর ঈশনশীলোপি সন্ প্রকৃতিং মায়াং মম বৈষ্ণবীং ত্রিগুণাত্মিকাং যস্যা বশে সর্ব্বং জগৎ বর্ত্ততে যযা মোহিতঃ সন্ স্বমাত্মানং বাসুদেবং ন জানাতি তাং প্রকৃতিং স্বামধিষ্ঠায় বশীকৃত্য সম্ভবামি দেহবানিব ভবামি জাতইবাত্মমায়য়া ন পরমার্থতো লোকবৎ ॥ ৬ ॥

## গিরিকৃত টীকা।

পেতি। অর্জ্জুনস্য ভগবতা সহাতীতানেকজন্মত্বে তুল্যেঽপি জ্ঞানবৈষম্যে হেতুমাহ ধর্ম্মেতি। আদিশব্দেন রাগলোভাদয়ো গৃহ্যন্তে। ঈশ্বরস্যাতীতানাগতবর্ত্তমানসর্ব্বার্থবিষয়জ্ঞানত্বে হেতুমাহ অহমিতি ॥ ৫ ॥

ঈশ্বরস্য কারণাভাবাৎ জন্মৈবাযুক্তমতীতানেকজন্মবত্বন্তু দূরোৎসারিতমিতি শঙ্কতে কথমিতি বস্তুতো জন্মাভাবেঽপি মায়াবশাজ্জন্মসম্ভবতীত্যুত্তরমাহ উচ্যতে ইতি বস্তুতো জন্মাযোগে কারণং পূর্ব্বার্দ্ধেনানূদ্য প্রাতিভাসিকজন্মসম্ভবে কারণমাহ প্রকৃতিমিতি। প্রকৃতিশব্দস্য স্বরূপবিষয়ত্বং প্রত্যাদেষ্টুমাত্মমায়য়েত্যুক্তং। বস্তুতো জন্মাভাবে কারণানুবাদভাগং বিবৃণোতি অজোঽপীত্যাদিনা। প্রাতিভাসিকজন্মসম্ভবে কারণকথনপরমুত্তরার্দ্ধং বিভজতে প্রকৃতিমিত্যাদিনা। প্রকৃতিশব্দস্য স্বরূপশব্দপর্য্যায়ত্বং বারয়তি মায়ামিতি। তস্যাঃ স্বাতন্ত্র্যং নিবাকৃত্য ভগবদধীনত্বমাহ মমেতি। তস্যাশ্চ অধিকরণদ্বারেণাবচ্ছিন্নত্বং সূচয়তি বৈষ্ণবীমিতি। মায়াশব্দস্যাপি প্রজ্ঞানামসু পাঠাদ্বিজ্ঞানশক্তিবিষয়ত্বমাশঙ্ক্যাহ ত্রিগুণাত্মিকামিতি। তস্যাঃ কার্য্যলিঙ্গকমনুমানং সূচয়তি যস্যাইতি। জগতোমায়াবশবর্ত্তিত্বমেব স্ফুটয়তি যয়েতি। যথা লোকে কশ্চিজ্জাতো দেহ-

## স্বামিকৃত টীকা।

রূপান্তরেণোপদিষ্টবানিত্যভিপ্রায়েণোত্তরং শ্রীভগবানুবাচ বহূনীতি। তান্যহং বেদ বেদ্মি অলুপ্তবিদ্যাশক্তিত্বাৎ, ত্বন্তু ন বেত্থ বেৎসি অবিদ্যাবৃতত্বাৎ ॥ ৫ ॥

ননু অনাদেস্তব কুতোজন্ম অবিনাশিনশ্চ কথং পুনঃ পুনর্জ্জন্ম যেন বহূনি মে ব্যতীতানীত্যুচ্যতে ঈশ্বরস্য তব পুণ্যপাপবিহীনস্য কথং বা জীববজ্জন্মেত্যতআহ অজোঽপীতি। সত্যমেবং তথাপি অজোঽপি সন্নহং তথাব্যয়াত্মাপি অনশ্বরস্বভাবোঽপি সন্ তথা

যদা যদা হি ধর্ম্মস্য গ্লানির্ভবতি ভারত।
অভ্যুত্থানমধর্ম্মস্য তদাত্মানং সৃজাম্যহম্ ॥ ৭ ॥
পরিত্রাণায় সাধূনাং বিনাশায় চ দুষ্কৃতাম্।
ধর্ম্মসংস্থাপনার্থায় সম্ভবামি যুগে যুগে ॥ ৮ ॥

## শাঙ্করভাষ্যম্।

তচ্চ জন্ম কদা কিমর্থং বেত্যুচ্যতে যদেতি। যদা যদা হি ধর্ম্মস্য গ্লানির্হানির্বর্ণাশ্রমাদিলক্ষণস্য প্রাণিনামভ্যুদয়নিঃশ্রেয়সসাধনস্য অভাবো ভবতি ভারত অভ্যুত্থানং সমুদ্ভবোঽধর্ম্মস্য তদা তদাত্মানং সৃজাম্যহং মায়য়া ॥ ৭ ॥

কিমর্থং পরিত্রাণায়েতি। পরিত্রাণায় পরিরক্ষণায় সাধূনাং সন্মার্গস্থানাং বিনাশায় চ

## গিরিকৃত টীকা।

বানালক্ষ্যতে এবমহমপি মায়ামাশ্রিত্য তয়া স্ববশয়া সম্ভবামি তেন মায়াময়মীশ্বরস্য জন্মেত্যাহ তাং প্রকৃতিমিত্যাদিনা। সম্ভবামি ইত্যুক্তমেব বিভজতে দেহবানিতি। অস্মদাদেরিব তবাপি পারমার্থিকত্বাভিমানো জন্মাদিবিষয়ে স্যাদিত্যাশঙ্ক্য প্রাগুক্তস্বরূপপরিজ্ঞানবত্ত্বাদীশ্বরস্য মৈবমিত্যাহ ন পরমার্থতইতি। আবৃতজ্ঞানবতো লোকস্য জন্মাদিবিষয়ে পরমার্থত্বাভিমানঃ সম্ভবতীত্যাহ লোকবদিতি ॥ ৬ ॥

যদীশ্বরস্য মায়ানিবন্ধনং জন্মেত্যুক্তং তস্য প্রশ্নপূর্ব্বকং কালং কথয়তি তচ্চেত্যাদিনা। চাতুর্ব্বর্ণ্যে চাতুরাশ্রম্যে চ যথাবদনুষ্ঠীয়মানে নাস্তি ধর্ম্মহানিরিতি মন্বানো বিশিনষ্টি বর্ণেতি। বর্ণৈরাশ্রমৈস্তদাচারৈশ্চ লক্ষ্যতে জ্ঞায়তে যো ধর্ম্মঃ তস্যেতি যাবৎ। ধর্ম্মহানৌ সমস্তপুরুষার্থভঙ্গো ভবতীত্যভিপ্রেত্যাহ প্রাণিনামিতি। ন চ যথোক্তসর্ব্বধর্ম্মস্য হানিং সোঢ়ুং শক্তো ভবানিত্যাহ ভারতেতি। ন কেবলং প্রাণিনাং ধর্ম্মহানিরেব ভগবতো মায়াবিগ্রহস্য পরিগ্রহে হেতুরপি তু তেষামধর্ম্মপ্রবৃত্তিরপীত্যাহ অভ্যুত্থানমিতি। যদা যদেতি পূর্ব্বেণ সম্বন্ধঃ ॥ ৭ ॥

যথোক্তে কালে কৃতকৃত্যস্য ভগবতো মায়াকৃতে জন্মনি প্রশ্নপূর্ব্বকং প্রয়োজনমাহ কিম-

## স্বামিকৃত টীকা।

ঈশ্বরোঽপি কর্ম্মপারতন্ত্র্যরহিতোঽপি সন্ স্বমায়য়া সম্ভবামি সম্যগপ্রচ্যুতজ্ঞানবলবীর্য্যাদিশক্ত্যৈব ভবামি, ননু তথাপি ষোড়শকলাত্মকলিঙ্গদেহশূন্যস্য তব কুতো জন্ম ইত্যতউক্তং স্বাং শুদ্ধসত্ত্বাত্মিকাং প্রকৃতিমধিষ্ঠায় স্বীকৃত্য বিশুদ্ধোর্জ্জিতসত্ত্বমূর্ত্ত্যা স্বেচ্ছয়াবতরামীত্যর্থঃ ॥ ৬ ॥

কদা সম্ভবসীত্যপেক্ষায়ামাহ যদা যদেতি। গ্লানির্হানিঃ, অভ্যুত্থানমাধিক্যং ॥ ৭ ॥

জন্ম কর্ম্মচ মে দিব্যমেবং যো বেত্তি তত্ত্বতঃ।
ত্যক্ত্বা দেহং পুনর্জ্জন্ম নৈতি মামেতি সোঽর্জ্জুন ॥ ৯ ॥
বীতরাগভয়ক্রোধা মন্ময়া মামুপাশ্রিতাঃ।
বহবো জ্ঞানতপসা পূতা মদ্ভাবমাগতাঃ ॥ ১০ ॥

## শাঙ্করভাষ্যম্।

দুষ্কৃতাং পাপকারিণাং কিঞ্চ ধর্ম্মস্য সংস্থাপনার্থায় সম্যক্ স্থাপনং তদর্থং সম্ভবামি যুগে যুগে প্রতিযুগং ॥ ৮ ॥

জন্মেতি। তৎ জন্ম মায়ারূপং কর্ম্ম চ সাধূনাং পরিত্রাণাদি মে মম দিব্যমপ্রাকৃতমৈশ্বরমেবং যথোক্তং যো বেত্তি তত্ত্বতস্তত্ত্বেন যথাবৎ, ত্যক্ত্বা দেহমিমং পুনর্জ্জন্ম পুনরুৎপত্তিং নৈতি ন প্রাপ্নোতি মামেত্যাগচ্ছতি স মুচ্যতে অর্জ্জুন ॥ ৯ ॥

---

## গিরিকৃত টীকা।

র্থমিত্যাদিনা। যথা সাধূনাং রক্ষণমসাধূনাং নিগ্রহশ্চ ভগবদবতারফলং ফলান্তরমপি তস্যাস্তীত্যাহ কিঞ্চেতি। ধর্ম্মে হি স্থাপিতে জগদেব স্থাপিতং ভবত্যন্যথা ভিন্নমর্য্যাদং জগদসঙ্গতমাপদ্যেতেত্যর্থঃ ॥ ৮ ॥

মায়াময়মীশ্বরস্য জন্ম ন বাস্তবং তস্যৈব চ জগৎপরিপালনং কর্ম্ম নান্যস্যেতি জানতঃ শ্রেয়োঽবাপ্তিং দর্শয়ন্বিপক্ষে প্রত্যবায়ং সূচয়তি তজ্জন্মেত্যাদিনা। যথোক্তং মায়াময়ং কল্পিতমিতি যাবৎ, বেদনস্য যথাবত্ত্বং বেদ্যস্য জন্মাদেরুক্তরূপানতিবর্ত্তিত্বং যদি পুনর্ভগবতো বাস্তবং জন্ম সাধুজনপরিপালনাদি চান্যস্যেব কর্ম্ম ক্ষত্রিয়স্যেতি বিবক্ষ্যতে তদা তত্ত্বাপবিজ্ঞানপ্রযুক্তো জন্মাদিঃ সংসারো দুর্ব্বারঃ স্যাদিতি ভাবঃ ॥ ৯ ॥

## স্বামিকৃত টীকা।

কিমর্থমিত্যপেক্ষায়ামাহ পরিত্রাণায়েতি। সাধূনাং স্বধর্ম্মবর্ত্তিনাং রক্ষণায়, দুষ্টং কর্ম্ম কুর্ব্বন্তীতি দুষ্কৃতস্তেষাং বধায় চ, এবং ধর্ম্মসংস্থাপনার্থায় সাধুরক্ষণেন দুষ্টবধেন চ ধর্ম্মং স্থিরীকর্ত্তুং, যুগে যুগে তত্তদবসরে সম্ভবামীত্যর্থঃ, ন চৈবং দুষ্টনিগ্রহং কুর্ব্বতোঽপি নৈর্ঘৃণ্যং শঙ্কনীয়ং যথাহুঃ, লালনে তাড়নে মাতুর্নাকারুণ্যং যথার্ভকে। তদ্বদেব মহেশস্য নিয়ন্তুর্গুণদোষয়োরিতি ॥ ৮ ॥

এবম্বিধানামীশ্বরজন্মকর্ম্মণাং জ্ঞানে ফলমাহ জন্মেতি। স্বেচ্ছয়া কৃতং মম জন্ম কর্ম্ম চ ধর্ম্মপালনরূপং দিব্যমলৌকিকং তত্ত্বতঃ পরানুগ্রহার্থমেবেতি যো বেত্তি স দেহাভিমানং ত্যক্ত্বা পুনর্জন্ম সংসারং নৈতি ন প্রাপ্নোতি কিন্তু মামেব প্রাপ্নোতি ॥ ৯ ॥

যে যথা মাং প্রপদ্যন্তে তাংস্তথৈব ভজাম্যহম্।
মম বর্ত্মানুবর্ত্তন্তে মনুষ্যাঃ পার্থ সর্ব্বশঃ॥ ১১॥

## শাঙ্করভাষ্যম্।

নৈষ মোক্ষমার্গ ইদানীং প্রবৃত্তঃ কিং তর্হি পূর্ব্বমপি বীতরাগেতি। বীতরাগভয়ক্রোধা রাগশ্চ ভয়শ্চ ক্রোধশ্চ রাগভয়ক্রোধাঃ বীতা বিগতা যেভ্যস্তে বীতরাগভয়ক্রোধা মন্ময়া ব্রহ্মবিদ ঈশ্বরাভেদদর্শিনো মামেব চ পরমেশ্বরমুপাশ্রিতাঃ কেবলজ্ঞাননিষ্ঠাইত্যর্থঃ বহবোঽনেকে জ্ঞানতপসা জ্ঞানমেব চ পরমাত্মবিষয়ং তপস্তেন জ্ঞানতপসা পূতাঃ পরাং শুদ্ধিং গতাঃ সন্তো মদ্ভাবমীশ্বরভাবং মোক্ষমাগতাঃ সমনুপ্রাপ্তাঃ॥ ইতরতপোনিরপেক্ষা জ্ঞাননিষ্ঠা ইত্যস্য লিঙ্গং জ্ঞানতপসেতি বিশেষণং॥ ১০॥

তব তর্হিরাগদ্বেষৌ স্তঃ যেন কেভ্যশ্চিদেবাত্মভাবং প্রযচ্ছসি ন সর্ব্বেভ্যইত্যুচ্যতে যে যথেতি। যে যথা যেন প্রকারেণ যেন প্রয়োজনেন মৎফলার্থিতয়া মাং প্রপদ্যন্তে তাংস্ত-

## গিরিকৃত টীকা।

সম্প্রতি প্রস্তুতমোক্ষমার্গস্য নূতনত্বেনাব্যবস্থিতত্বমাশঙ্ক্য পরিহরতি নৈষ ইতি। মন্ময়ত্বস্য মদ্ভাবগমনেনাপৌনরুক্ত্যং দর্শয়তি ব্রহ্মবিদইতি। আত্মনো ভিন্নত্বেন ভিন্নাভিন্নত্বেন বা ব্রহ্মণো বেদনং ব্যাবর্ত্তয়তি ঈশ্বরেতি। অভেদদর্শনেন সমুচ্চিত্য কর্ম্মানুষ্ঠানং প্রত্যাচষ্টে মামেবেতি। তদুপাশ্রয়ত্বমেব বিশদয়তি কেবলেতি। মামুপাশ্রিতাইতি কেবলজ্ঞাননিষ্ঠত্বমুক্তং জ্ঞানতপসা পূতাইতি কিমর্থং পুনরুচ্যতে তত্রাহ ইতরেতি॥ ১০॥

ঈশ্বরঃ সর্ব্বেভ্যো ভূতেভ্যো মোক্ষং প্রয়চ্ছতি চেৎ প্রাগুক্তবিশেষণবৈয়র্থ্যং যদি তু কেভ্যশ্চিদেব মোক্ষং প্রয়চ্ছেত্তর্হি তস্য রাগাদিমত্ত্বাদনীশ্বরত্বাপত্তিরিতি শঙ্কতে তব তর্হীতি। যে মুমুক্ষবস্তেভ্যো মোক্ষমীশ্বরো জ্ঞানসম্পাদনদ্বারা প্রয়চ্ছতি ফলান্তরার্থিভ্যস্তু তত্তদুপায়া-

## স্বামিকৃত টীকা।

কথং জন্মকর্ম্মজ্ঞানে ত্বৎপ্রাপ্তিঃ স্যাদিত্যতআহ বীতরাগেতি। অহং শুদ্ধসত্ত্বাবতারৈ-র্ধর্ম্মপালনং করোমীতি মদীয়ং পরমকারুণিকত্বং জ্ঞাত্বা বীতা বিগতা রাগভয়ক্রোধা যেভ্যস্তে চিত্তবিক্ষেপাভাবান্মন্ময়া মদেকচিত্তা ভূত্বা মামেবোপাশ্রিতাঃ সন্তো মৎপ্রসাদলব্ধং যদাত্মজ্ঞানঞ্চ তপশ্চ তৎপরিপাকহেতুঃ স্বধর্ম্মঃ। দ্বন্দ্বৈকবদ্ভাবঃ। তেন জ্ঞানতপসা পূতাঃ শুদ্ধা-নিরস্তাঽজ্ঞানতৎকার্য্যমলা মদ্ভাবং মৎসাযুজ্যং প্রাপ্তা বহবঃ, নত্বধুনৈব প্রবৃত্তোঽয়ং মদ্ভক্তি-মার্গইত্যর্থঃ। তদেবং তান্যহং বেদ সর্ব্বাণীত্যাদিনা বিদ্যাবিদ্যোপাধিভ্যাং তত্ত্বংপদার্থা-বীশ্বরজীবৌ প্রদর্শ্য ঈশ্বরস্য চাবিদ্যাভাবেন নিত্যশুদ্ধত্বাজ্জীবস্য চেশ্বরপ্রসাদলব্ধজ্ঞানেনা-জ্ঞাননিবৃত্তেঃ শুদ্ধস্য সতশ্চিদংশেন তদৈক্যমুক্তমিতি দ্রষ্টব্যং॥ ১০॥

## শাঙ্করভাষ্যম্।

থৈব তৎফলদানেন ভজাম্যহমনুগৃহ্লাম্যহং ইত্যতঃ তেষাং মোক্ষং প্রত্যক্ষং প্রত্যনথিত্বাৎ ন হ্যেকস্য মুমুক্ষুত্বং ফলার্থিত্বঞ্চ যুগপৎ সম্ভবতি অতো যে যৎফলার্থিনঃ তান্ তৎফলপ্রদানেন যে যথোক্তকারিণস্তৎফলার্থিনো মুমুক্ষবশ্চ তান্ জ্ঞানপ্রদানেন যে জ্ঞানিনঃ সন্ন্যাসিনো মুমুক্ষবশ্চ তান্ মোক্ষপ্রদানেন তথা আর্ত্তানার্ত্তিহরণেনেত্যেবং যথা যেন প্রকারেণ মাং প্রপদ্যন্তে যে তাংস্তথৈব ভজামীত্যর্থঃ, ন পুনঃ রাগদ্বেষনিমিত্তং মোহনিমিত্তং বা কিঞ্চিদ্ভজামি সর্ব্বথাপি সর্ব্বাবস্থস্য মমেশ্বরস্য বর্ত্ম মার্গমনুবর্ত্তন্তে মনুষ্যাঃ, যৎ ফলার্থিতয়া যস্মিন্ কর্ম্মণ্যধিকৃতাঃ যে প্রযতন্তে তে মনুষ্যা অত্র উচ্যন্তে হে পার্থ সর্ব্বশঃ সর্ব্বপ্রকারৈঃ ॥ ১১ ॥

## গিরিকৃত টীকা।

মুষ্ঠাপনেন তত্তদেব দদাতীতি নাস্য রাগদ্বেষাবিতি পরিহরতি উচ্যতইতি। মুমুক্ষূণামীশ্বরানুসারিত্বেপি ফলান্তরার্থিনাং কুতস্তদনুসাবিত্বমিত্যাশঙ্ক্য ফলমত· উপপত্তেরিতি ন্যায়েন তৎফলস্যেশ্বরায়ত্তত্বাত্তদনুবর্ত্তিত্বমাবশ্যকমিত্যাহ মমেতি। ভগবদ্বচনভাগিনাং সর্ব্বেষামেব কৈবল্যমেকরূপং কিমিতি নানুগৃহ্যতে তত্রাহ তেষামিতি। অভ্যুদয়নিঃশ্রেয়সার্থিত্বং প্রার্থনাবৈচিত্র্যাদেকস্যৈব কিং ন স্যাদিত্যাশঙ্ক্য পর্য্যায়েণ তদনুপপত্তিং সাধয়তি ন হীতি। মুমুক্ষূণাং ফলার্থিনাঞ্চ বিভাগে স্থিতে সত্যনুগ্রহবিভাগং ফলিতমাহ অতইতি। ফলপ্রদানেনানুগৃহ্নামীতি সম্বন্ধঃ। নিত্যনৈমিত্তকর্ম্মানুষ্ঠায়িনামেব ফলার্থিত্বাভাবে সতি মুমুক্ষুত্বে কথং তেষনুগ্রহঃ স্যাদিতি তত্রাহ যে যথোক্তেতি। জ্ঞানপ্রদানেন ভজামীত্যুত্তরত্র সম্বন্ধঃ। সন্তি কেচিত্ত্যক্তসর্ব্বকর্ম্মাণো জ্ঞানিনো মোক্ষমেবাপেক্ষমাণাস্তেষ্বনুগ্রহপ্রকারং প্রকটয়তি যে জ্ঞানিন ইতি। কেচিদার্ত্তাঃ সন্তো জ্ঞানাদিসাধনান্তররহিতা ভগবন্তমেবার্ত্তিমপহর্ত্তুমনুবর্ত্তন্তে তেষু ভগবতোঽনুগ্রহবিশেষং দর্শযতি তথেতি। পূর্ব্বার্দ্ধব্যাখ্যানমুপসংহরতি ইত্যেবমিতি। ভগবতোঽনুগ্রহে নিমিত্তান্তরং নিবারয়তি ন পুনরিতি। ফলার্থিত্বে মুমুক্ষুত্বে চ জন্তূনাং ভগবদনুসরণমাবশ্যকমিত্যুত্তরার্দ্ধং বিভজতে সর্ব্বথাপীতি। সর্ব্বাবস্থত্বং তেন তেনাত্মনা পরস্যৈবেশ্বরস্যাবস্থানং· মার্গো জ্ঞানকর্ম্মলক্ষণঃ মনুষ্যগ্রহণাদিতরেষামীশ্বরমার্গানুবর্ত্তিত্বমপ্র্যুদাস্যং স্যাদিত্যাশঙ্ক্যাহ যৎফলেতি। সর্ব্বপ্রকারৈর্মম মার্গমনুবর্ত্তন্তে ইন্দ্রাদিরূপেণাপি মমৈব সেব্যত্বাৎ ॥ ১১ ॥

## স্বামিকৃত টীকা।

নন্বু তর্হি কিং ত্বয্যপি বৈষম্যমস্তি যস্মাদেবং ত্বদেকশরণানামেবাত্মভাবং দদাসি নান্যেষাং সকামানামিত্যতআহ যে ইতি। যথা যেন প্রকারেণ সকামতয়া নিষ্কামতয়া বা যে মাং ভজন্তি তানহং তথৈব তদপেক্ষিতফলদানেন ভজামি অনুগৃহ্নামি, ন তু সকামা মাং বিহায়েন্দ্রাদীনেব যে ভজন্তে তানহমুপেক্ষইতি মন্তব্যং যতঃ সর্ব্বশঃ সর্ব্বপ্রকারৈরিন্দ্রাদিসেবকা অপি মমৈব বর্ত্ম ভজনমার্গমনুবর্ত্তন্তে ইন্দ্রাদিরূপেণাপি মমৈব সেব্যত্বাৎ ॥ ১১ ॥

কাঙ্ক্ষন্তঃ কর্ম্মণাং সিদ্ধিং যজন্তইহ দেবতাঃ।
ক্ষিপ্রং হি মানুষে লোকে সিদ্ধির্ভবতি কর্ম্মজা ॥ ১২ ॥

## শাঙ্করভাষ্যম্ ।

যদি তবেশ্বরস্য রাগাদিদোষাভাবঃ তদা সর্ব্বপ্রাণিষু অনুজিঘৃক্ষায়াং তুল্যায়াং সর্ব্বফলপ্রদানসমর্থে চ ত্বয়ি সতি বাসুদেবঃ সর্ব্বমিতি জ্ঞানেনৈব মুমুক্ষবঃ সন্তঃ কস্মাত্ত্বামেব সর্ব্বে ন প্রতিপদ্যন্তে ইতি শৃণু তত্র কারণং কাঙ্ক্ষন্তইতি। অভিলষন্তঃ কর্ম্মণাং সিদ্ধিং ফলনিষ্পত্তিং প্রার্থয়মানা যজন্তে ইহাস্মিন্ লোকে দেবতা ইন্দ্রাগ্ন্যাদ্যাঃ অথ যোঽন্যাং দেবতামুপাস্তেঽন্যোঽসাবন্যোঽহমস্মীতি ন স বেদ যথা পশুরেবং স দেবানামিতি শ্রুতেঃ তেষাং হি ভিন্নদেবতাযাজিনাং ফলাকাঙ্ক্ষিণাং ক্ষিপ্রং শীঘ্রং হি যস্মান্মানুষে লোকে, মনুষ্যলোকে হি শাস্ত্রাধিকারঃ ক্ষিপ্রং হি মানুষে লোকে ইতি বিশেষণাদন্যেষ্বপি কর্ম্মফলসিদ্ধিং দর্শয়তি

## গিরিকৃত টীকা

অনুগ্রাহ্যাণাং জ্ঞানকর্ম্মানুরোধেন ভগবতা তেষনুগ্রহবিধানাত্তস্য রাগদ্বেষৌ যদি ন ভবতস্তর্হি তস্য রাগাদ্যভাবাদেব সর্ব্বেষু প্রাণিষ্বনুগ্রহেচ্ছা তুল্যা প্রাপ্তা ন চ তস্যাং সত্যামেব ফলস্যান্নীয়সঃ সম্পাদনে সামর্থং ন তু ভবতো মহতো মোক্ষাখ্যস্য ফলস্য প্রদানেঽশক্তিরিতি যুক্তমপ্রতিহতজ্ঞানেচ্ছাক্রিয়াশক্তিমতস্তব সর্ব্বফলপ্রদানসামর্থ্যাত্তথা চ যথোক্তানুজিঘৃক্ষায়াং সত্যাং ত্বয়ি চ যথোক্তসামর্থ্যবতি সতি সর্ব্বে ফল্গুফলাদভ্যুদয়াৎ বিমুখা মোক্ষমেবাপেক্ষমাণা জ্ঞানেন ত্বামেব কিমিতি ন প্রতিপদ্যেরন্নিতি চোদয়তি যদীতি। মোক্ষাপেক্ষাভাবাত্তদুপায়ভূতজ্ঞানাদপি বৈমুখ্যাদ্ভগবৎপ্রাপ্ত্যভাবে হেতুমভিদধানঃ সমাধত্তে শৃণ্বিতি। কর্ম্মফলসিদ্ধিমিচ্ছতা কিমিতি মানুষে লোকে দেবতাপূজনমিষ্যতে তত্রাহ ক্ষিপ্রং হীতি। কর্ম্মফলসম্পত্ত্যর্থিনাং যষ্ট যষ্টব্যবিভাগদর্শিনাং তদ্দর্শনে কারণমাত্মাজ্ঞানং মিত্যত্র বৃহদারণ্যকশ্রুতিমুদাহরতি অথেতি। অবিদ্যাপ্রকরণোপক্রমার্থমথেত্যুক্তং। উপায়নং ভেদদর্শনমিত্যনূদ্য কারণমাত্মাজ্ঞানং ন তত্রেতি দর্শয়তি নেতি। যথাস্মদাদীনাং হল বহনাদিনা পশুরুপকরোত্যেবমজ্ঞোদেবাদীনাং যাগাদিভিরুপকরোতীত্যাহ যথেতি। কিমিতি তে ফলাকাঙ্ক্ষিণো ভিন্নদেবতাযাজিনো জ্ঞানমার্গং নাপেক্ষন্তে তত্রোত্তরার্দ্ধমুত্তরত্বেন যোজয়তি তেষামিত্যাদিনা। যস্মাদ্যথোক্তানামধিকারিণাং কর্ম্মপ্রযুক্তং ফলং লোকবিশেষে ঝটিতি সিধ্যতি তস্মাত্তেষাং মোক্ষমার্গাদস্তি বৈমুখ্যমিত্যর্থঃ। মানুষলোকবিশেষণং কিম-

## স্বামিকৃত টীকা।

তর্হি মোক্ষার্থমেব কিমিতি সর্ব্বে ত্বাং ন ভজন্তীত্যতআহ কাংক্ষন্তইতি। কর্ম্মণাং সিদ্ধিং কর্ম্মফলং কাংক্ষন্তঃ প্রায়েণেহ মনুষ্যলোকে ইন্দ্রাদিদেবতাএব যজন্তে ন তু সাক্ষা-

চাতুর্ব্বর্ণ্যং ময়া সৃষ্টং গুণকর্ম্মবিভাগশঃ।
তস্য কর্ত্তারমপি মাং বিদ্ধ্যকর্ত্তারমব্যয়ম্ ॥ ১৩॥

## শাঙ্করভাষ্যম্

ভগবান্মানুষে লোকে বর্ণাশ্রমাদিকর্ম্মাণীতি বিশেষঃ তেষাঞ্চ বর্ণাশ্রমাদ্যধিকারিণাং কর্ম্মণাং ফলসিদ্ধিঃ ক্ষিপ্রং ভবতি কর্ম্মজা কর্ম্মণো জাতা ॥ ১২ ॥

মানুষএব লোকে বর্ণাশ্রমাদিকর্ম্মাধিকারো নান্যেষু লোকেম্বিতি নিয়মঃ কিংনিমিত্ত ইতি অথবা বর্ণাশ্রমাদিপ্রবিভাগোপেতাঃ মনুষ্যা মম বর্ত্মানুবর্ত্তন্তে সর্ব্বশইত্যুক্তং, কস্মাৎ পুনঃ কারণাৎ নিয়মেন তবৈব বর্ত্মানুবর্ত্তন্তে নান্যস্যেত্যুচ্যতে চাতুর্ব্বর্ণ্যমিতি। চাতুর্ব্বর্ণ্যং চত্বারএব বর্ণাশ্চাতুর্ব্বর্ণ্যং ময়েশ্বরেণ সৃষ্টমুৎপাদিতং ব্রাহ্মণোঽস্য মুখমাসীদিত্যাদিশ্রুতেঃ গুণকর্ম্মবিভাগশঃ গুণবিভাগশঃ কর্ম্মবিভাগশশ্চ গুণাঃ সত্ত্বরজস্তমাংসি তত্র সাত্ত্বিকস্য সত্ত্বপ্রধানস্য ব্রাহ্মণস্য শমোদমস্তপইত্যাদীনি কর্ম্মাণি সত্ত্বোপসর্জ্জনরজঃপ্রধানস্য ক্ষত্রিয়স্য

## গিরিকৃত টীকা।

র্থমিত্যাশঙ্ক্যাহ মনুষ্যলোকে হীতি। লোকান্তরেষু তর্হি কর্ম্মফলসিদ্ধির্নাস্তীত্যাশঙ্ক্য ক্ষিপ্রবিশেষণস্য তাৎপর্য্যমাহ ক্ষিপ্রমিতি। ক্বচিৎ কর্ম্মফলসিদ্ধিরবিলম্বেন ভবত্যন্যত্র তু বিলম্বেনেতি বিভাগে কো হেতুরিত্যাশঙ্ক্য সামগ্রীভাবাভাবাভ্যামিত্যাহ মানুষইতি। মনুষ্যলোকে কর্ম্মফলসিদ্ধেঃ শৈঘ্র্যাত্তদভিমুখানাং জ্ঞানমার্গবৈমুখ্যং প্রায়িকমিত্যুপসংহরতি তেষামিতি ॥ ১২ ॥

মনুষ্যলোকে চাতুর্ব্বর্ণ্যং চাতুরাশ্রম্যমিত্যনেন দ্বারেণ কর্ম্মাধিকারনিয়মে কারণংপৃচ্ছতি মানুষএবেতি। আদিশব্দেনাবস্থাবিশেষা বিবক্ষ্যন্তে। প্রকারান্তরেণ বৃত্তানুবাদপূর্ব্বকচোদ্যমুত্থাপয়তি অথবেত্যাদিনা। প্রশ্নদ্বয়ং পরিহরতি উচ্যতইতি। তর্হি তব কর্ত্তৃত্বভোক্তৃত্বসম্ভবাদস্মদাদিতুল্যত্বেনানীশ্বরত্বমিত্যাশঙ্ক্যাহ তস্যেতি। ঈশ্বরস্য বিষমসৃষ্টিং বিদধানস্য সৃষ্টিবৈষম্যনির্ব্বাহকং কথয়তি গুণেতি। গুণবিভাগেন কর্ম্মবিভাগস্তেন। চাতুর্ব্বর্ণ্যস্য সৃষ্টিমেবোপদিষ্টাং স্পষ্টয়তি তত্রেত্যাদিনা। প্রশ্নদ্বয়প্রতিবিধানং প্রকৃতমুপসংহরতি তচ্ছেদমিতি। মনুষ্যলোকে পরং বর্ণাশ্রমাদিপূর্ব্বকে কর্ম্মণ্যধিকারঃ তত্রৈব বর্ণাদে-

## স্বামিকৃত টীকা।

স্মামেব হি যস্মাৎ কর্ম্মজা সিদ্ধিঃ ফলং শীঘ্রং ভবতি ন তু জ্ঞানফলং কৈবল্যং, দুষ্প্রাপ্যত্বাৎ জ্ঞানস্য ॥ ১২ ॥

ননু কেচিৎ সকামতয়া প্রবর্ত্তন্তে কেচিন্নিষ্কামতয়েতি কর্ম্মবৈচিত্র্যং তৎকর্ত্তৄণাঞ্চ ব্রাহ্মণাদীনামুত্তমমধ্যমাদিবৈচিত্র্যং কুর্ব্বতস্তব কথং বৈষম্যং নাস্তীত্যাশঙ্ক্যাহ চাতুর্ব্বর্ণ্যমিতি। চত্বারো বর্ণা এবেতি চাতুর্ব্বর্ণ্যং স্বার্থে ষ্যঞ্ প্রত্যয়ঃ,অয়মর্থঃ সত্ত্বপ্রধানা ব্রাহ্মণাস্তেষাং শমদ-

## ন মাং কর্ম্মাণি লিম্পন্তি ন মে কর্ম্মফলে স্পৃহা।
## ইতি মাং যোঽভিজানাতি কর্ম্মভির্ন স বধ্যতে ॥ ১৪ ॥

### শাঙ্করভাষ্যম্।

শৌর্য্যতেজঃপ্রভৃতীনি কর্ম্মাণি তমউপসর্জ্জনরজঃপ্রধানস্য বৈশ্যস্য কৃষ্যাদীনি কর্ম্মাণি রজঃ উপসর্জ্জনতমঃপ্রধানস্য শূদ্রস্য শুশ্রূষৈব কর্ম্মেত্যেবং গুণকর্ম্মবিভাগশঃ চাতুর্ব্বর্ণ্যং ময়া সৃষ্টমিত্যর্থঃ তচ্চেদং চাতুর্ব্বর্ণ্যং নান্যেষু লোকেষু অতো মানুষে লোকে ইতি বিশেষণং, হন্ত তর্হি চাতুর্ব্বর্ণ্যস্য সর্গাদেঃ কর্ম্মণঃ কর্ত্তৃত্বাৎ ফলেষু যুজ্যসে অতো ন ত্বং নিত্যমুক্তো নিত্যে-শ্বরইত্যুচ্যতে, যদ্যপি মায়াসংব্যবহারেণ তস্য কর্ম্মণঃ কর্ত্তারমপি সন্তং তথাপি মাং পর-মার্থতো বিদ্ধ্যকর্ত্তারমতএবাব্যয়মসংসারিণঞ্চ মাং বিদ্ধি ॥ ১৩ ॥

যেষান্তু কর্ম্মণাং কর্ত্তারং মাং মন্যসে পরমার্থতস্তেষামকর্ত্তৈবাহং যতঃ নেতি। ন মাং তানি কর্ম্মাণি লিম্পন্তি দেহাদ্যারম্ভকত্বেনাহঙ্কারাভাবান্ন চ তেষাং কর্ম্মণাং ফলেষু মে স্পৃহা

### গিরিকৃত টীকা।

রীশ্বরেণ সৃষ্টত্বান্ন লোকান্তরেষু, তত্র বর্ণাদ্যভাবাদীশ্বরমেব চাতুর্ব্বর্ণ্যাশ্রমাদিবিভাগভাগিনো-ঽধিকারিণোঽনুবর্ত্তন্তে তেনৈব বর্ণাদেস্তদ্ব্যাপারস্য চ সৃষ্টত্বাত্তদনুবর্ত্তনস্য যুক্তত্বাদিত্যর্থঃ। তস্যেত্যাদি দ্বিতীয়ভাগাপোদ্যং চোদ্যমনুদ্রবতি হন্তেতি। যদি চাতুর্ব্বর্ণ্যাদিকর্ত্তৃত্বাদীশ্বরস্য প্রাগুক্তো নিয়মোঽভিমতস্তর্হি তদ্বিষয়সৃষ্ট্যাদেস্তন্নিষ্ঠব্যাপারস্য চ ধর্ম্মাদেনির্বর্ত্তকত্বাত্তৎ-ফলস্য কর্ত্তৃগামিত্বাৎ কর্ত্তৃত্বভোক্তৃত্বয়োস্ত্বয়ি প্রসঙ্গাৎ নিত্যমুক্তত্বাদি তেন স্যাদিত্যর্থঃ। মায়য়া কর্ত্তৃত্বং পরমার্থতশ্চাকর্ত্তৃত্বমিত্যভ্যুপগমান্নিত্যমুক্তত্বাদি সিধ্যতীত্যুত্তরমাহ উচ্যত ইতি। মায়াপ্রবৃত্তেন সংব্যবহারেণ চাতুর্ব্বর্ণ্যাদেস্তৎকর্ম্মণশ্চ যদ্যপি কর্ত্তাহং তথাপি তথাবিধং মাং পরমার্থতোঽকর্ত্তারং বিদ্ধীতি যোজনা। অকর্ত্তৃত্বাদেবাভোক্তৃত্বসিদ্ধি-রিত্যাহ অতএবেতি ॥ ১৩ ॥

ঈশ্বরস্য কর্ত্তৃত্বভোক্তৃত্বয়োর্ব্বস্তুতোঽভাবে কর্ম্মতৎফলে সম্বন্ধবৈধুর্য্যং ফলতীত্যাহ যেষাং ত্বিতি। কর্ম্মতৎফলসংস্পর্শশূন্যমীশ্বরং মাং পশ্যতো দর্শনানুরূপং ফলং দর্শয়তি ন মামিতি।

### স্বামিকৃত টীকা।

মাদীনি কর্ম্মাণি, সত্ত্বরজঃপ্রধানাঃ ক্ষত্রিয়াস্তেষাং শৌর্য্যযুদ্ধাদীনি কর্ম্মাণি রজস্তমঃপ্রধানা-বৈশ্যাস্তেষাঞ্চ কৃষিবাণিজ্যাদীনি কর্ম্মাণি, তমঃপ্রধানাঃ শূদ্রাস্তেষাঞ্চ ত্রৈবর্ণিকশুশ্রূষাদীনি কর্ম্মাণীত্যেবং গুণানাং কর্ম্মণাঞ্চ বিভাগশশ্চাতুর্ব্বর্ণ্যং ময়ৈব সৃষ্টমিতি সত্যং তথাপ্যেবং তস্য কর্ত্তারমপি ফলতোঽকর্ত্তারমেব মাং বিদ্ধি, তত্র হেতুরব্যয়ং আসক্তিরাহিত্যেন শ্রমরহিতং ॥ ১৩ ॥

এবং জ্ঞাত্বা কৃতং কর্ম্ম পূর্ব্বৈরপি মুমুক্ষুভিঃ।
কুরু কর্ম্মৈব তস্মাত্ত্বং পূর্ব্বৈঃ পূর্ব্বতরং কৃতম্ ॥ ১৫ ॥

## শাঙ্করভাষ্যম্ ॥

তৃষ্ণা যেষান্তু সংসারিণাং অহং কর্ত্তেত্যভিমানঃ কর্ম্মসু স্পৃহা তৎফলেষু চ তান্ কর্ম্মাণি লিম্পন্তীতি যুক্তং তদভাবান্ন মাং কর্ম্মাণি লিম্পন্তীত্যেবং যোঽন্যোঽপি মামাত্মত্বেনাভিজানাতি নাহং কর্ত্তা ন মে কর্ম্মফলে স্পৃহেতি স কর্ম্মভি র্ন বধ্যতে তস্যাপি ন দেহাদ্যারম্ভকাণি কর্ম্মাণি ভবন্তীত্যর্থঃ ॥ ১৪ ॥

নাহং কর্ত্তা ন মে কর্ম্মফলে স্পৃহেতি এবমিতি। এবং জ্ঞাত্বা কৃতং কর্ম্ম পূর্ব্বৈরপ্যতিক্রান্তৈর্মুমুক্ষুভিঃ কুরু তেন কর্ম্মৈব ত্বং ন তূষ্ণীমাসনং নাপি সন্ন্যাসঃ কর্ত্তব্যস্তস্মাত্ত্বং

## গিরিকৃত টীকা।

তানি কর্ম্মাণীতি যেষাং কর্ম্মণামহং কর্ত্তা তবাভিমতস্তানীতি যাবৎ। দেহেন্দ্রিয়াদ্যারম্ভকত্বেন তেষাং কর্ম্মণামীশ্বরে সংস্পর্শাভাবে তস্য তৎকারণাবস্থায়ামহঙ্কারাভাবং হেতুং করোতি অহঙ্কারাভাবাদিতি। কর্ম্মফলতৃষ্ণাভাবাচ্চেশ্বরং কর্ম্মাণি ন লিম্পন্তীত্যাহ ন চেতি। উক্তমেব প্রপঞ্চয়তি যেষাং ত্বিতি। তদভাবাৎ কর্ম্মস্বহং কর্ত্তেত্যভিমানস্য তৎফলেষু স্পৃহায়াশ্চাভাবাদিত্যর্থঃ। ঈশ্বরস্য কর্ম্মনির্লেপেঽপি ক্ষেত্রজ্ঞস্য কিমায়াতমিত্যাশঙ্ক্যোত্তরার্দ্ধং ব্যাচষ্টে ইত্যেবমিতি। অভিজ্ঞানপ্রকারমভিনয়তি নাহমিতি। জ্ঞানফলং কথয়তি স কর্ম্মভিরিতি। কর্ম্মাসম্বন্ধং বিদুষি বিশদয়তি তস্যাপীতি ॥ ১৪ ॥

তব কর্ম্মতৎফলসম্বন্ধাভাবে তথা জ্ঞানবতশ্চ তদসম্বন্ধে মমাপি কিং কর্ম্মণেত্যাশঙ্ক্য কর্ম্মণি কর্ত্তৃত্বাভিমানং তৎফলে স্পৃহাঞ্চাকৃত্বা মুমুক্ষুবৎ ত্বয়া কর্ম্ম কর্ত্তব্যমেবেত্যাহ নাহমিত্যাদিনা। এবমিতি নাহং কর্ত্তেত্যেবমাদি পরামৃশ্যতে, তেন পূর্ব্বৈর্মুমুক্ষুভিরনুষ্ঠিতত্বেন হেতুনেত্যর্থঃ। কর্ম্মৈবেত্যেবকারার্থমাহ নেত্যাদিনা ত্বংশব্দস্য ক্রিয়াপদেন সম্বন্ধঃ। তস্মাদিত্যুক্তমেব স্ফুটয়তি পূর্ব্বৈরিতি। যত্তুক্তং কিং মম কর্ম্মণেতি তত্র ত্বমজ্ঞো বা তত্ত্ববিদ্বা

## স্বামিকৃত টীকা।

তদেব দর্শয়ন্নাহ ন মামিতি। কর্ম্মাণি বিশ্বসৃষ্ট্যাদীন্যপি মাং ন লিম্পন্তি আসক্তং ন কুর্ব্বন্তি নিরহঙ্কারত্বাদাপ্তকামত্বেন মম কর্ম্মফলে স্পৃহাভাবাচ্চ, মাং ন লিম্পন্তীতি কিং বক্তব্যং যতঃ কর্ম্মলেপরাহিত্যেন মাং যোঽভিজানাতি সোঽপি কর্ম্মভি র্ন বধ্যতে মম নির্লেপত্বকারণং নিরহঙ্কারত্বনিস্পৃহত্বাদিকং জানতস্তস্যাপ্যহঙ্কারাদিশৈথিল্যাৎ ॥১৪॥

যে যথা মামিত্যাদি চতুর্ভিঃ শ্লোকৈঃ প্রাসঙ্গিকমীশ্বরস্য বৈষম্যং পরিহৃত্য পূর্ব্বোক্তমেব কর্ম্মযোগং প্রপঞ্চয়িতুমনুস্মারয়তি এবমিতি। অহঙ্কারাদিরাহিত্যেন কৃতং কর্ম্ম বন্ধকং ন

কিং কর্ম্ম কিমকর্ম্মেতি কবয়োঽপ্যত্র মোহিতাঃ।
তত্তে কর্ম্ম প্রবক্ষ্যামি যজ্জ্ঞাত্বা মোক্ষ্যসেঽশুভাৎ ॥১৬॥

## শাঙ্করভাষ্যম্।

পূর্ব্বৈরপ্যনুষ্ঠিতত্বাৎ যদ্যনাত্মজ্ঞস্তদাত্মশুদ্ধ্যর্থং তত্ত্ববিচ্চেল্লোকসংগ্রহার্থং পূর্ব্বৈর্জ্জনকাদিভিঃ পূর্ব্বতনং কৃতং নাধুনাতনং কৃতং নির্ব্বর্ত্তিতং ॥ ১৫ ॥

তত্র কর্ম্ম চেৎ কর্ত্তব্যং ত্বদ্বচনাদেব করোম্যহং কিং বিশেষণেন পূর্ব্বৈঃ পূর্ব্বতনং কৃতমিত্যুচ্যতে যস্মান্মহদ্বৈষম্যং কর্ম্মাকর্ম্মণি কথং কিং কর্ম্মেতি। কিং কর্ম্ম কিঞ্চাকর্ম্মেতি কবয়ো মেধাবিনোঽপি অত্রাস্মিন্ কর্ম্মাদিবিষয়ে মোহিতাঃ মোহং গতাঃ অতস্তে তুভ্যমহং কর্ম্মাকর্ম্ম চ প্রবক্ষ্যামি যৎ জ্ঞাত্বা বিদিত্বা কর্ম্মাদি, মোক্ষ্যসে অশুভাৎ সংসারাৎ, ন চৈবং ত্বয়া মন্তব্যং, কর্ম্ম নাম দেহাদিচেষ্টা লোকপ্রসিদ্ধম অকর্ম্ম নাম তদক্রিয়া তূষ্ণীমাসনং কিং তত্র বোদ্ধব্যমিতি ॥ ১৬ ॥

## গিরিকৃত টীকা।

যদ্যজ্ঞস্তদা চিত্তশুদ্ধ্যর্থং কুরু কর্ম্মেত্যাহ যদীতি। দ্বিতীয়ং প্রত্যাহ তত্ত্ববিদিতি। কুরু কর্ম্মেতি সম্বন্ধঃ। পূর্ব্বৈর্মুমুক্ষুভিরাচরিতমিত্যেতাবতো কিমিতি বিবেকবতা ময়া তৎ কর্ত্তব্যমিত্যাশঙ্ক্যাহ জনকাদিভিরিতি। তে তদৈব সংপাদ্য কর্ম্ম কৃতবন্তো ন তদিদানীমপ্রামাণিকত্বাদনুষ্ঠেয়মিত্যাশঙ্ক্যাহ পূর্ব্বতনমিতি ॥ ১৫ ॥

কর্ম্মবিশেষণমাক্ষিপতি তত্রেতি। মনুষ্যলোকঃ সপ্তম্যর্থঃ। কর্ম্মণি মহতো বৈষম্যস্য বিদ্যমানত্বাত্তস্য পূর্ব্বৈরনুষ্ঠিতত্বেন পূর্ব্বতনত্বেন চ বিশেষিতত্বে তস্মিন্ প্রবৃত্তিস্তব সুকরেতি যুক্তং বিশেষণমিতি পরিহরতি উচ্যতইতি। কর্ম্মণি দেহাদিচেষ্টারূপে লোকপ্রসিদ্ধে নাস্তি বৈষম্যমিতি শঙ্কতে কথমিতি। বিজ্ঞানবতামপি কর্ম্মাদিবিষয়ে ব্যামোহোপপত্তেঃ সুতরামেব তব তদ্বিষয়ে ব্যামোহসম্ভবাত্তদপোহার্থমাপ্তবাক্যাপেক্ষণাদস্তি কর্ম্মণি বৈষম্যমিত্যুত্তরমাহ কিং কর্ম্মেতি। তত্তে কর্ম্মেত্যত্রাঽকারানুবন্ধেনাপি পদং ছেত্তব্যং। কর্ম্মাদিপ্রবচনস্য প্রয়োজনমাহ জজ্জ্ঞাত্বেতি। তৎকর্ম্মাকর্ম্ম চেতি সম্বন্ধঃ। অতো মেধাবিনোঽপি যথোক্তে বিষয়ে ব্যামোহস্য সত্ত্বাদিত্যর্থতঃ। কর্ম্মণোঽকর্ম্মণশ্চ প্রসিদ্ধত্বাত্তদ্বিষয়ে ন কিঞ্চিদ্বোদ্ধব্যমিতি চোদ্যমনূদ্য নিরস্যতি ন চেতি ॥ ১৬ ॥

## স্বামিকৃত টীকা।

ভবতীত্যেবং জ্ঞাত্বা পূর্ব্বৈর্জ্জনকাদিভিরপি মুমুক্ষুভিঃ সত্ত্বশুদ্ধ্যর্থং পূর্ব্বতরং যুগান্তরেষ্বপি কৃতং তস্মাত্ত্বমপি প্রথমং কর্ম্মৈব কুরু ॥ ১৫ ॥

তচ্চ তত্ত্ববিদ্ভিঃ সহ বিচার্য্য কর্ত্তব্যং ন লোকপরম্পরামাত্রেণেত্যাহ কিং কর্ম্মেতি। কিং কর্ম্ম কীদৃশং কর্ম্মকরণং কিমকর্ম্ম কীদৃশং কর্ম্মাকরণং ইত্যস্মিন্নর্থে বিবেকিনোঽপি মোহিতাঃ

কর্ম্মণো হৃপি বোদ্ধব্যং বোদ্ধব্যঞ্চ বিকর্ম্মণঃ।
অকর্ম্মণশ্চ বোদ্ধব্যং গহনা কর্ম্মণো গতিঃ ॥ ১৭ ॥
কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদকর্ম্মণি চ কর্ম্ম যঃ।
স বুদ্ধিমান্ মনুষ্যেষু স যুক্তঃ কৃৎস্নকর্ম্মকৃৎ ॥ ১৮ ॥

## শাঙ্করভাষ্যম্।

কস্মাৎ উচ্যতে কর্ম্মণ ইতি। কর্ম্মণঃ শাস্ত্রবিহিতস্য হি যস্মাৎ অপ্যস্তি বোদ্ধব্যং, বোদ্ধব্যঞ্চাস্ত্যেব বিকর্ম্মণঃ প্রতিষিদ্ধস্য তথা অকর্ম্মণশ্চ তূষ্ণীম্ভাবস্য বোদ্ধব্যমস্তীতি ত্রিষ্বপ্যধ্যাহারঃ কর্ত্তব্যো, যস্মাৎ গহনা বিষমা দুর্জ্ঞেয়া কর্ম্মণইত্যুপলক্ষণার্থং কর্ম্মাদীনাং কর্ম্মাকর্ম্মবিকর্ম্মণাং গতির্যাথাত্ম্যং তত্ত্বমিত্যর্থঃ ॥ ১৭ ॥

কিং পুনস্তত্ত্বং কর্ম্মাদের্যদ্বোদ্ধব্যং বক্ষ্যামীতি প্রতিজ্ঞাতমুচ্যতে কর্ম্মণীতি। কর্ম্মণি কর্ম্ম ক্রিয়তইতি ব্যাপারমাত্রং তস্মিন্ কর্ম্মণি অকর্ম্ম কর্ম্মাভাবং যঃ পশ্যেদকর্ম্মণি চ কর্ম্মাভাবে

## গিরিকৃত টীকা।

তত্র হেত্বাকাঙ্ক্ষাপূর্ব্বকমনন্তরং শ্লোকমবতারয়তি কস্মাদিতি। ত্রিষ্বপি কর্ম্মাকর্ম্মবিকর্ম্মসু বোদ্ধব্যমস্তীতি যস্মাদধ্যাহারস্তস্মান্মদীয়ং প্রবচনমর্থবদিতি যোজনা। বোদ্ধব্যসদ্ভাবে হেতুমাহ যস্মাদিতি। ত্রিতয়ং প্রকৃত্যান্যতমস্য গহনত্ববচনমযুক্তমিত্যাশঙ্ক্যান্যতমগহনস্যোপলক্ষণার্থত্বমুপেত্য বিবক্ষিতমর্থমাহ কর্ম্মাদীনামিতি ॥ ১৭ ॥

উত্তরশ্লোকমাকাঙ্ক্ষাপূর্ব্বকমুপাদত্তে কিং পুনরিতি। প্রথমপাদস্যাক্ষরোত্থমর্থং কথয়তি কর্ম্মণীত্যাদিনা। দ্বিতীয়পাদস্যাপি শব্দপ্রকাশিতমর্থং নির্দ্দিশতি অকর্ম্মণি, চেতি কর্ম্মাভাবে যঃ কর্ম্ম পশ্যতীতি সম্বন্ধঃ। প্রবৃত্তেরেব কর্ম্মত্বান্নিবৃত্তেস্তদভাবত্বাত্তত্র কথং কর্ম্মদর্শনমিত্যাশঙ্ক্য দ্বয়োরপি কারকাধীনত্বেনাবিশেষমভিপ্রেত্যাহ কর্ত্তৃতন্ত্রত্বাদিতি।

## স্বামিকৃত টীকা।

অতো যজ্জ্ঞাত্বা যদনুষ্ঠায়াশুভাৎ সংসারান্মোক্ষ্যসে মুক্তো ভবিষ্যসি তৎ কর্ম্মাকর্ম্ম চ তুভ্যমহং প্রবক্ষ্যামি তচ্ছৃণু ॥ ১৬ ॥

নন্থু লোকপ্রসিদ্ধমেব কর্ম্ম দেহাদিব্যাপারাত্মকং অকর্ম্ম চ তদব্যাপারাত্মকং অতঃ কথং চ্যতে কবয়োঽপ্যত্র মোহং প্রাপ্তাইতি তত্রাহ কর্ম্মণইতি। কর্ম্মণো বিহিতব্যাপারস্যাপি তত্ত্বং বোদ্ধব্যমস্তি ন তু লোকপ্রসিদ্ধমাত্রমেব, অকর্ম্মণোঽবিহিতব্যাপারস্যাপি তত্ত্বং বোদ্ধব্যমস্তি, যতঃ কর্ম্মণো গতির্গহনা, কর্ম্মইত্যুপলক্ষণার্থং কর্ম্মাকর্ম্মবিকর্ম্মণাং তত্ত্বং দুর্ব্বিজ্ঞেয়মিত্যর্থঃ ॥ ১৭ ॥

তদেব কর্ম্মাদীনাং দুর্ব্বিজ্ঞেয়ত্বং দর্শয়ন্নাহ কর্ম্মণীতি। পরমেশ্বরারাধনলক্ষণে কর্ম্মণি

## শাঙ্করভাষ্যম্।

কর্তৃতন্ত্রত্বাৎ প্রবৃত্তিনিবৃত্ত্যোর্বস্তুপ্রাপ্যৈব হি সর্ব্বএব ক্রিয়াকারকাদিব্যবহারোঽবিদ্যা-ভূমাবেব কর্ম্ম যঃ পশ্যেৎ যঃ পশ্যতি স বুদ্ধিমান্ মনুষ্যেষু স যুক্তো যোগী চ কৃৎস্নকর্ম্মকৃৎ সমস্তকর্ম্মকৃচ্চ স ইতি স্তূয়তে কর্ম্মাকর্ম্মণোরিতরেতরদর্শী, নন্বু কিমিদং বিরুদ্ধমুচ্যতে কর্ম্মণ্য-কর্ম্ম যঃ পশ্যেদিত্যকর্ম্মণি চ কর্ম্মেতি, ন হি কর্ম্মাকর্ম্ম স্যাদকর্ম্ম তত্র বিরুদ্ধং কথং পশ্যেৎ দ্রষ্টা, নম্বকর্ম্মৈব পরমার্থতঃ সৎ কর্ম্মবদবভাসতে মূঢ়দৃষ্টের্লোকস্য তথা কর্ম্মৈবাকর্ম্মবৎ তত্র যথাভূতদর্শনার্থমাহ ভগবান্ কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যাদি, অতো ন বিরুদ্ধং বুদ্ধিমত্ত্বাদ্য-পপত্তেশ্চ বোদ্ধব্যমিতি চ যথাভূতং দর্শনমুচ্যতে, ন চ বিপরীতজ্ঞানাদশুভান্মোক্ষণং স্যাৎ যৎ জ্ঞাত্বা মোক্ষ্যসেঽশুভাদিতি চোক্তং তস্মাৎ কর্ম্মাকর্ম্মণী বিপর্য্যয়েণ গৃহীতে প্রাণিভি-

## গিরিকৃত টীকা।

প্রবৃত্তাবিব নিবৃত্তাবপি কর্ম্মদর্শনমবিরুদ্ধমিতি শেষঃ। নন্বু নিবৃত্তের্ব্বস্তুহীনত্বাৎ কারক-নিবন্ধনাভাবান্ন তত্র কর্ম্মদর্শনং যুজ্যতে তত্রাহ বস্থিতি। ক্রিয়াকারকফলব্যবহারস্য সর্ব্বস্যাবিদ্যাবস্থায়ামেব প্রবৃত্তত্বাদ্বস্তুসংস্পর্শশূন্যত্বাৎ প্রবৃত্তিবন্নিবৃত্তাবপি যঃ কর্ম্ম পশ্যতি স মনুষ্যেষু বুদ্ধিমানিতি সম্বন্ধঃ। কর্ম্মণ্যকর্ম্ম অকর্ম্মণিচ কর্ম্ম পশ্যতো বুদ্ধিমত্ত্বং যুক্তং সমস্ত-কর্ম্মকৃত্ত্বঞ্চ কথমিত্যাশঙ্ক্যাহ ইতিস্তূয়ত ইতি। শ্লোকস্য শব্দোত্থেঽর্থে দর্শিতে তাৎপর্য্যার্থা-পরিজ্ঞানান্মিথোবিরোধং শঙ্কতে নন্বিতি। কথমিদং বিরুদ্ধমিত্যাশঙ্ক্যাহ কর্ম্মণীতি। বিষয়সপ্তমী বা স্যাদধিকরণসপ্তমী বেতি বিকল্প্যাদ্যেঽন্যাকারং জ্ঞানমন্যাবলম্বনমিতি স্পষ্টো বিরোধঃ স্যাদিত্যাহ ন হীতি। অন্যস্যান্যাত্মতাযোগাৎ কর্ম্মাকর্ম্মণোরভেদাসম্ভবা-দকর্ম্মাকারং কর্ম্মাবলম্বনং জ্ঞানমযুক্তমিত্যর্থঃ। দ্বিতীয়ং দূষয়তি তত্রেতি। কর্ম্মণ্যধি-করণে ততো বিরুদ্ধমকর্ম্ম কথমাধেয়ং দ্রষ্টা দ্রষ্টুমীষ্টে ন হি কর্ম্মাকর্ম্মণোর্মিথোবিরুদ্ধয়োরা-ধারাধেয়ভাবঃ সম্ভবতীত্যর্থঃ। বিষয়সপ্তমীমুপেত্য সিদ্ধান্তম্ব পরিহরতি নীকর্ম্মৈবেতি। লোকস্য মূঢ়দৃষ্টের্ব্বিবেকবর্জ্জিতস্য পরমার্থতো ব্রহ্মাকর্ম্মাক্রিয়মেব সৎ, ভ্রান্ত্যা কর্ম্মসহিতং ক্রিয়াবদিব প্রতিভাতীত্যক্ষরার্থঃ। পরস্পরাধ্যাসমুপেত্যোক্তং তথেতি। যথা খল্বকর্ম্ম ব্রহ্ম কর্ম্মবদুপলভ্যতে তথা কর্ম্ম সক্রিয়মেব দ্বৈতং অক্রিয়ে ব্রহ্মণ্যধিষ্ঠানে সংসৃষ্টং তদ্বদ্ভাতী-ত্যক্ষরযোজনা। কর্ম্মাকর্ম্মণোরিতরেতরাধ্যাসে সিদ্ধে সম্যগ্দর্শনসিদ্ধ্যর্থং ভগবতো বচন-মুচিতমিত্যাহ তত্রেতি। যথা যদিদং রজতমিতি প্রতিপন্নং তদিদানীং শুক্তিশকলং পশ্যেতি ভ্রমসিদ্ধরজতরূপবিবরানুবাদেন তদধিষ্ঠানং শুক্তিমাত্রমুপদিশ্যতে তথা ভ্রম-

## স্বামিকৃত টীকা।

কুর্ম্মবিষয়ে অকর্ম্ম কর্ম্মেদং ন ভবতীতি যঃ পশ্যেত্তস্য জ্ঞানহেতুত্বেন বন্ধকত্বাভাবাৎ, অক-র্ম্মণি চ বিহিতাকরণে কর্ম্ম যঃ পশ্যেৎ প্রত্যবায়োৎপাদকত্বেন বন্ধহেতুত্বাৎ, মনুষ্যেষু কর্ম্ম-

## শাঙ্করভাষ্যম্ ।

স্তদ্বিপর্য্যয়গ্রহনিবৃত্ত্যর্থং ভগবতো বচনং কর্ম্মণ্যকর্ম্ম য ইত্যাদি ন চাত্র কর্ম্মাধিকরণমকর্ম্মাস্তি কুণ্ডে বদরাণীব নাপ্যকর্ম্মাধিকরণং কর্ম্মাস্তি কর্ম্মাভাবত্বাদকর্ম্মণোঽতো বিপরীতে গৃহীতে এব কর্ম্মাকর্ম্মণী লৌকিকৈঃ, যথা মৃগতৃষ্ণিকায়ামুদকং শুক্তিকায়াং বা রজতং, নমু কর্ম্ম কর্ম্মৈব সর্ব্বেষাং ন ক্বচিৎ ব্যভিচরতি তত্র নৌস্থস্য নাবি গচ্ছন্ত্যাং তটস্থেষগতিকেষু নগেষু প্রতিকূলগতিদর্শনাৎ দূরেষু চক্ষুষোঽসন্নিকৃষ্টেষু গচ্ছৎস্থ গত্যভাবদর্শনাদেবমিহাপ্য-কর্ম্মণি অহং করোমীতি কর্ম্মদর্শনং কর্ম্মণি চাকর্ম্মদর্শনং বিপরীতদর্শনং যেন তন্নিবাকর-ণার্থমুচ্যতে কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যাদি, তদেতদুক্তপ্রতিবচনমপ্যসকৃদত্যন্তবিপরীত-

## গিরিকৃত টীকা ।

সিদ্ধকর্ম্মাদ্যাত্মকবিষয়ানুবাদেন তদধিষ্ঠানং কর্ম্মাদিরহিতং কূটস্থং ব্রহ্ম ভগবতা ব্যপ-দিশ্যতে তথা চ ভগবদ্বচনমবিরুদ্ধমিত্যাহ অতইতি। ইতশ্চাধ্যারোপিতকর্ম্মাদ্যনুবাদ-পূর্ব্বকং তদধিষ্ঠানস্য কর্ম্মাদিরহিতস্য নির্ব্বিশেষস্য ব্রহ্মণো ভগবতা বোধ্যমানত্বান্ন তত্র বিরোধাশঙ্কাবকাশো ভবতীত্যাহ বুদ্ধিমত্ত্বাদিতি। কূটস্থাৎ ব্রহ্মণোঽন্যস্য সর্ব্বস্য মায়ামাত্রত্বাৎ অজ্ঞানদ্বুদ্ধিমত্ত্বমুক্তসর্ব্বকর্ম্মকৃত্ত্বানামনুপপত্তেরত্র চ বুদ্ধিমানিত্যা-দিনা বুদ্ধিমত্ত্বাদিনির্দ্দেশাৎ ব্রহ্মজ্ঞানাদেব তদুপপত্তেঃ সর্ব্ববিক্রিয়ারহিতং ব্রহ্ম-জ্ঞানমেব বিবক্ষিতমিত্যর্থঃ। বোধশব্দস্য সম্যগ্জ্ঞানে প্রসিদ্ধত্বাৎ কর্ম্মাকর্ম্মবিকর্ম্মণাং স্বরূপং বোদ্ধব্যমস্তীতি বদতা সম্যগ্জ্ঞানোপদেশস্য বিবক্ষিতত্বাদপি কূটস্থং ব্রহ্মাঽত্রাভি-প্রেতমিত্যাহ বোদ্ধব্যমিতি। ফলবচনপর্য্যালোচনায়ামপি কূটস্থং ব্রহ্মাত্রাভিপ্রেতং প্রতিভাতীত্যাহ ন চেতি। সম্যগ্জ্ঞানাধীনফলমত্র ন শ্রুতমিত্যাশঙ্ক্যাহ যৎ জ্ঞাত্বেতি। অধ্যারোপাপবাদার্থং ভগবদ্বচনমবিরুদ্ধমিত্যুপপাদিতমুপসংহরতি তস্মাদিতি। তদ্বি-পর্য্যয়েত্যত্র তচ্ছব্দেন প্রাণিনো গৃহ্যন্তে। বিষয়সপ্তমীপরিগ্রহেণ পরিহারমভিধায়া-ধিকরণসপ্তমীপক্ষে দর্শিতং দূষণমঙ্গীকারেণ পরিহরতি ন চেতি। ব্যবহারভূমিরত্রেত্যু-চ্যতে, যোগ্যত্বে সত্যনুপলব্ধেরিত্যর্থঃ। অকর্ম্মাধিকরণং কর্ম্ম ন সম্ভবতীত্যত্র হেত্বন্তর-মাহ কর্ম্মাভাবত্বাদিতি। ন হি তুচ্ছস্যাধিকরণত্বং ক্বচিদ্দৃষ্টমিষ্টম্বেত্যর্থঃ। নিরূপ্যমাণে কর্ম্মাকর্ম্মণোরধিকরণাধিকর্ত্তব্যভাবাসম্ভবে ফলিতমাহ অতইতি। শাস্ত্রপরিচয়বিরহিণাম-ধ্যারোপমুদাহরতি যথেতি। কর্ম্মাকর্ম্মণোরারোপিতত্বমুক্তমমৃষ্যমাণঃ শঙ্কতে নম্বিতি।

## স্বামিকৃত টীকা ।

কুর্ব্বাণেষু স বুদ্ধিমান্ ব্যবসায়াত্মকবুদ্ধিমত্ত্বাচ্ছ্রেষ্ঠঃ, তং প্রস্তৌতি স যুক্তো যোগী তেন কর্ম্মণা জ্ঞানযোগাবাপ্তেঃ, সএব কৃৎস্নকর্ম্মকর্ত্তা চ সর্ব্বতঃসংপ্লুতোদকস্থানীয়ে চ তস্মিন্ কর্ম্মণি সর্ব্বকর্ম্মফলানামন্তর্ভাবাৎ। তদেবমারুরুক্ষোঃ কর্ম্মযোগাধিকারাবস্থায়াং ন কর্ম্মণা-মনারম্ভাদিত্যাদিনোক্তএব কর্ম্মযোগঃ স্পষ্টীকৃতস্তৎপ্রপঞ্চরূপত্বাচ্চাস্য প্রকরণস্য ন

## শাঙ্করভাষ্যম্।

দর্শনভাবিতয়া মোমুহ্যমানো লোকঃ শ্রুতমপ্যসকৃত্তত্ত্বং বিস্মৃত্য মিথ্যাপ্রসঙ্গমবতার্য্যাবতার্য্য চোদয়তীতি পুনঃপুনরুত্তরমাহ ভগবান্, দুর্ব্বিজ্ঞেয়ত্বঞ্চালক্ষ্য বস্তুনঃ অব্যক্তোঽয়মচিন্ত্যোঽয়ং ন জায়তে ম্রিয়তে বা ইত্যাদিনাত্মনি কর্ম্মাভাবঃ শ্রুতিস্মৃতিন্যায়প্রসিদ্ধউক্তো বক্ষ্যমাণশ্চ তস্মিন্নাত্মনি কর্ম্মাভাবে অকর্ম্মণি কর্ম্মবিপরীতদর্শনমত্যন্তনিরূঢ়ং যতঃ কিং কর্ম্ম কিমকর্ম্মেতি কবয়োঽপ্যত্র মোহিতাঃ দেহাদ্যাশ্রয়ং কর্ম্মাত্মন্যধ্যারোপ্যাহং কর্ত্তা মমৈতৎ কর্ম্ম, ময়াস্য কর্ম্মণঃ ফলং ভোক্তব্যমিতি চ তথাহং তূষ্ণীং ভবামি যেনাহং নিরায়াসোঽকর্ম্মা সুখী স্যামিতি কার্য্যকরণাশ্রয়ব্যাপারোপরমং কর্ম্মৈব তৎকৃতঞ্চ সুখিত্বমা-

## গিরিকৃত টীকা।

কর্ম্ম কর্ম্মৈবেত্যত্রাকর্ম্ম চাকর্ম্মৈবেতি দ্রষ্টব্যং, বিমতং সত্যমব্যভিচারিত্বাৎ ব্রহ্মবদিত্যর্থঃ। তত্র কর্ম্ম তত্ত্বতো নাব্যভিচারি কর্ম্মত্বান্নৌস্থস্য তটস্থবৃক্ষগমনবদিত্যব্যভিচারিত্বং কর্ম্মণ্যসিদ্ধমিতি পরিহরতি তত্রেতি। অকর্ম্ম চ তত্ত্বতো নাব্যভিচারি কর্ম্মভাবত্বাৎ দূরপ্রদেশে চৈত্রমৈত্রাদিষু গচ্ছৎস্বেব চক্ষুষা সন্নিধানবিধুরেষু দৃশ্যমানগত্যভাবাদিত্যাহ দূর-ইতি। দূরত্বাদেব বিশেষতঃ সন্নিকর্ষবিরহিতেষু তেষু স্বরূপেণ চক্ষুঃসন্নিকৃষ্টেষু চক্ষুষা গত্যভাবদর্শনাদিতি যোজনা। গতিরহিতেষু তরুষু গতিদর্শনবৎ প্রকৃতে ব্রহ্মণ্যবিক্রিয়ে কর্ম্মদর্শনং সক্রিয়ে চ দ্বৈতপ্রপঞ্চে চিতিমৎসু চৈত্রাদিষু গত্যভাবদর্শনবৎ কর্ম্মাভাবস্য বিপরীতদর্শনং যেন হেতুনা সম্ভবতি তেন তস্য বিপরীতদর্শনস্য নিরসনার্থং ভগবদ্বচনমিতি দার্ষ্টান্তিকং নিগময়তি এবমিত্যাদিনা। ননু কর্ম্ম তদভাবয়োরারোপিতত্বাদবিক্রিয়স্য ব্রহ্মণো জ্ঞানমাত্রমভিপ্রেতং চেদব্যক্তোঽয়মচিন্ত্যোঽয়ং ন জায়তে ম্রিয়তেবেত্যাদিনা পৌনরুক্ত্যং প্রাপ্তং তত্রৈব ব্রহ্মাত্মনো নির্ব্বিকারত্বস্যোক্তত্বাদিতি তত্রাহ তদেতদিতি। তদেতদাত্মনি শঙ্কিতং সক্রিয়ত্বমসকৃদুক্তপ্রতিবচনমপি নির্ব্বিকারাত্মবস্তপেক্ষয়াত্যন্তবিপরীতদর্শনং মিথ্যাজ্ঞানং তেন ভাবিত্বং তৎসংস্কারপ্রচয়বত্বং ততোঽতিশয়েন মোহমাপদ্যমানো লোকঃ শ্রুতমপি তত্ত্বং বিস্মৃত্য পুনর্যৎকিঞ্চিৎ প্রসঙ্গমাপাদ্য সক্রিয়ত্বমেবাত্মনশ্চোদয়তীতি পুনঃপুনস্তত্ত্বভূতমুত্তরং ভগবানভিধত্তে বস্তুনশ্চ দুর্ব্বিজ্ঞেয়ত্বাৎ পুনঃ পুনঃ প্রতিপাদনং তত্তন্মন্দিরাকরণার্থমুপযুজ্যতে তথা চ নাস্তি পুনরুক্তিরিত্যর্থঃ। অসকৃদুক্তপ্রতিবচনমেবানুবদতি অব্যক্তোঽয়মিতি। কর্ম্মাভাবউক্তইতি সম্বন্ধঃ। উক্তস্য ন জায়তে ম্রিয়তে বা বিপশ্চিদিত্যাদিশ্রুতৌ প্রকৃতস্মৃতাবসঙ্গত্বাদিন্যায়েন চ প্রসিদ্ধত্বমস্তীত্যাহ শ্রুতীতি। ন

## স্বামিকৃত টীকা।

পৌনরুক্ত্যদোষঃ, অনেনৈব যোগারূঢ়াবস্থায়াং যস্ত্বাত্মরতিরেব স্যাদিত্যাদিনা যঃ কর্ম্মানুপযোগ উক্তস্তস্যাপ্যর্থাৎ প্রপঞ্চঃ কৃতো বেদিতব্যঃ, যদারুরুক্ষোরপি কর্ম্ম বন্ধকং ন ভবতি তদারূঢ়স্য কুতো বন্ধকং স্যাদিত্যত্রাপি শ্লোকো যুজ্যতে, যথা কর্ম্মণি

## শাঙ্করভাষ্যম্।

মন্যধ্যারোপ্য ন করোমি কিন্তু তূষ্ণীং সুখমাসইত্যভিমন্যতে লোকস্তন্ময়েদং লোকস্য বিপ-রীতদর্শনাপনয়নায়াহ ভগবান্ কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যাদি। অত্র চ কর্ম্ম কর্ম্মৈব সৎ কার্য্যকরণাশ্রয়ং কর্ম্মরহিতেঽবিক্রিয়ে আত্মনি সর্ব্বৈরধ্যস্তং যতঃ পণ্ডিতোঽপ্যহং করো-মীতি মন্যতে অত আত্মসমবেততয়া সর্ব্বলোকপ্রসিদ্ধে কর্ম্মণি নদীকূলস্থেষিব বৃক্ষেষু গতিপ্রাতিলোম্যেঽকর্ম্ম কর্ম্মাভাবং যথাভূতং গত্যভাবমিব বৃক্ষেষু যঃ পশ্যেৎ অকর্ম্মণি চ কার্য্যকরণব্যাপারোপরমে কর্ম্মবৎ আত্মন্যধ্যারোপিতে তূষ্ণীমকুর্ব্বন্ সুখমাসে ইত্যহ

## গিরিকৃত টীকা।

কেবলমুক্তঃ কর্ম্মাভাবঃ কিন্তু সর্ব্বকর্ম্মাণি মনসা সন্ন্যাস্যেত্যাদৌ বক্ষ্যমাণশ্চেত্যাহ বক্ষ্য-মাণশ্চেতি। ননু কর্ম্মণাং দেহাদিনির্ব্বর্ত্তকত্বেন ত্রৈবিধ্যাৎ কূটস্থস্বভাবস্যাত্মনোঽসঙ্গত্বাত্ত-দ্ব্যাপাররূপস্য কর্ম্মণোঽপ্রসিদ্ধত্বাৎ ন তস্মিন্নকর্ম্মণি বিপরীতস্য কর্ম্মণো দর্শনং সিধ্যতীত্যা-শঙ্ক্যাহ তস্মিন্নিতি। কর্ম্মৈব বিপরীতং তস্য দর্শনমিতি যাবৎ, অহং কর্ত্তেত্যাত্মসমানাধি-করণস্য ব্যাপারস্যানুভবাৎ কর্ম্মভ্রমস্তাবদাত্মন্যত্যন্তরূঢ়োঽস্তীত্যর্থঃ। আত্মনি কর্ম্মবিভ্রমো-ঽস্তীত্যত্র হেতুমাহ যতইতি। আত্মনো নিষ্ক্রিয়ত্বে কুতস্তস্মিন্ যথোক্তো বিভ্রমঃ সম্ভবেদিত্যা-শঙ্ক্যাহ দেহেতি। ইদানীমাত্মন্যকর্ম্মভ্রমমুদাহরতি তথেত্যাদিনা। যথা শুক্তৌ স্বাভা-বিকমরূপ্যত্বং, রূপ্যত্বমারোপিতং তদভাবোঽপ্যারোপ্যাভাবত্বাদারোপপক্ষপাতী তথাত্ম-নোঽপি স্বাভাবিকমবিক্রিয়ত্বং পুনরধ্যস্তং তদভাবত্বাৎ কর্ম্মাভাবোঽপ্যধ্যস্তএবেতি মন্বানঃ সমুপসংহরতি তত্রেদমিতি। আত্মনি কর্ম্মাদিবিভ্রমে লৌকিকে সিদ্ধে সতি এবং কর্ম্ম-ণীত্যাদিবচনং তৎপরিহারার্থং ভগবানুক্তবানিত্যর্থঃ। সম্প্রত্যুক্তেঽর্থে শ্লোকাক্ষরসমন্বয়ং দর্শয়িতুং কর্ম্মণীত্যাদি ব্যাচিখ্যাসুঃ ভূমিকাং করোতি অত্র চেতি। ব্যবহারভূমৌ কার্য্য করণাধিকরণং কর্ম্ম স্বেনৈব রূপেণ ব্যবস্থিতং সদাত্মন্যবিক্রিয়ে কার্য্যকরণারোপণদ্বারেণ সর্ব্বৈরারোপিতমিত্যত্র হেতুমাহ যতইতি। অবিবেকিনাস্ত কর্ত্তৃত্বাভিমানঃ স্বতরামিতি বক্তুমপিশব্দঃ। আত্মনি কর্ম্মরহিতে কর্ম্মারোপে দৃষ্টান্তমাহ নদীতি। এবমাত্মনি কর্ম্মা-রোপমুপপাদ্য প্রথমপাদং ব্যাচষ্টে অতইতি। আরোপবশাদাত্মনিষ্ঠত্বেন কর্ম্মণি সর্ব্বলোক-প্রসিদ্ধে কর্ম্মাভাবং যঃ পশ্যেৎ সবুদ্ধিমানিতি সম্বন্ধঃ অকর্ম্মদর্শনস্য যথাভূতত্বং সম্যক্ত্বং তত্র দৃষ্টান্তমাহ গত্যভাবমিবেতি। দ্বিতীয়পাদং ব্যাকরোতি অকর্ম্মণি চেতি। অধ্যা-

## স্বামিকৃত টীকা।

দেহেন্দ্রিয়াদিব্যাপারে বর্ত্তমানেঽপ্যাত্মনো দেহাদিব্যতিরেকানুভবেন অকর্ম্ম স্বাভা-বিকং নৈষ্কর্ম্ম্যমেব যঃ পশ্যেৎ তথা অকর্ম্মণি চ জ্ঞানরহিতে দুঃখবুদ্ধ্যা কর্ম্মণাং ত্যাগে কর্ম্ম যঃ পশ্যেত্তস্য প্রযত্নসাধ্যত্বেন মিথ্যাচারত্বাৎ, তদুক্তং কর্ম্মেন্দ্রিয়াণি সংযম্যেত্যাদিনা

## শাঙ্করভাষ্যম্।

হঙ্কারাভিসন্ধিহেতুত্বাত্তস্মিন্ অকর্ম্মণি চ কর্ম্ম যঃ পশ্যেৎ য এবং কর্ম্মাকর্ম্মবিভাগজ্ঞঃ স বুদ্ধিমান্ পণ্ডিতো মনুষ্যেষু স যুক্তো যোগী কৃৎস্নকর্ম্মকৃচ্চ সোঽশুভান্মোক্ষিতঃ কৃতকৃত্যো ভবতীত্যর্থঃ।

অয়ং শ্লোকোঽন্যথা ব্যাখ্যাতঃ কৈশ্চিৎ, কথং নিত্যানাং কিল কর্ম্মণামীশ্বরার্থেঽনুষ্ঠীয়মানানাং তৎফলাভাবাদকর্ম্মাণি তান্যুচ্যন্তে গৌণ্যা বৃত্ত্যা, তেষাঞ্চাকরণমকর্ম্ম তচ্চ প্রত্য-

## গিরিকৃত টীকা।

রোপমভিনয়তি তূষ্ণীমিতি। অকর্ম্মণি কর্ম্মদর্শনে যুক্তিমাহ অহঙ্কারেতি। পূর্ব্বার্দ্ধেনোক্তমনূদ্যোত্তরার্দ্ধং বিভজতে যএবমিতি।

আত্মনি কার্য্যকরণসংঘাতসমাবেশদ্বারেণ তদ্ব্যাপারমাত্রে কর্ম্মণি শুক্তিকায়ামিব রজতআরোপিতে বিষয়ে তদভাবমকর্ম্ম বস্তুতো যো রজতাভাববদনুভবতি অকর্ম্মণি চ সংঘাতব্যাপারোপরমে তদ্দ্বারা স্বাত্মন্যহং তূষ্ণীমাসে সুখমিত্যারোপিতে গোচরে কর্ম্মাহঙ্কারহেতুকং যস্তত্বতো মন্যতে সরূপ্যতদভাববিভাগহীনশুক্তিমাত্রবদাত্মমাত্রং কর্ম্মতদভাববিভাগশূন্যং কূটস্থং পরমার্থতোঽবগচ্ছন্ বুদ্ধিমানিত্যাদিস্তুতিযোগ্যতাং গচ্ছতীত্যেবং স্বাভিপ্রায়েণ শ্লোকং ব্যাখ্যায় অত্র বৃত্তিকারব্যাখ্যানমুত্থাপয়তি অয়মিতি। অন্যথা ব্যাখ্যানমেব প্রশ্নদ্বারা প্রকটয়তি কথমিত্যাদিনা। ঈশ্বরার্থেনানুষ্ঠানে ফলাভাববচনং ব্যাহতমিতি মত্বাহ কিলেতি। নিত্যানামকর্ম্মত্বমপ্রসিদ্ধমিত্যাশঙ্ক্য ফলরাহিত্যগুণযোগাত্তেষ্বকর্ম্মত্বব্যবহারঃ সিধ্যতীত্যাহ গৌণ্যেতি। নিত্যানামকরণং মুখ্যবৃত্ত্যৈবাকর্ম্মশব্দবাচ্যমিত্যাহ তেষাঞ্চেতি। তত্র কর্ম্মশব্দস্য প্রত্যবায়াখ্যফলহেতুত্বগুণযোগাৎ গৌণ্যৈব বৃত্ত্যা প্রবৃত্তিরিত্যাহ তচ্চেতি। পাতনিকামেবং কৃত্বা শ্লোকাক্ষরাণি ব্যাচষ্টে তত্রেত্যাদিনা। অকর্ম্মণি চেত্যাদি ব্যাকরোতি তথেতি। স বুদ্ধিমানিত্যাদি পূর্ব্ববৎ। পরকীয়ং ব্যাখ্যানং বূদস্যতি নৈতদিতি। নিত্যং কর্ম্মাকর্ম্ম নিত্যাকরণং কর্ম্মেতি জ্ঞানাৎ দুরিতনিবৃত্ত্যনুপপত্তের্ভগবদ্বচনং বৃত্তিকারমতে বাধিতং স্যাদিত্যর্থঃ। ধর্ম্মেণ পাপমপনুদতীতি শ্রুতের্নিত্যানুষ্ঠানাৎ দুরিতনিবর্হণপ্রসিদ্ধেস্তদনুষ্ঠানস্য ফলান্তরাভাবাত্তদকর্ম্মেতি জ্ঞানানুষ্ঠানে ক্রিয়মাণে কথমশুভক্ষয়ো নেতি শঙ্কতে কথমিতি। ক্ষেত্রজ্ঞস্যেশ্বরজ্ঞানাদ্বিশুদ্ধিঃ পরমা মতেতি স্মরণাৎ কর্ম্মণাত্যন্তিকাশুভক্ষয়াভাবেপ্যঙ্গীকৃত্য পরিহরতি নিত্যানামিতি। নিত্যানুষ্ঠানাদশুভক্ষয়েঽপি নাস্মিন্ প্রকরণে তদ্বিবক্ষিতং

## স্বামিকৃত টীকা।

যএবস্তূতঃ স তু সর্ব্বেষু মনুষ্যেষু বুদ্ধিমান্ পণ্ডিতঃ, তত্র হেতুর্যতঃ কৃৎস্নানি সর্ব্বাণি যদৃচ্ছয়া প্রাপ্তানি আহারাদীনি কর্ম্মাণি কুর্ব্বন্নপি সংযুক্ত এব অকর্ত্রাত্মজ্ঞানেন সমাধিস্থ-

## শাঙ্করভাষ্যম্।

বায়ফলত্বাৎ কর্ম্মোচ্যতে গৌণ্যৈব বৃত্ত্যা, তত্র নিত্যে কর্ম্মণি অকর্ম্ম যঃ পশ্যেৎ ফলাভাবাদ্ যথা ধেনুরপি গৌরগৌরুচ্যতে ক্ষীরাখ্যং ফলং ন প্রয়চ্ছতীতি তদ্বৎ তথা নিত্যাকরণে ত্বকর্ম্মণি কর্ম্ম যঃ পশ্যেৎ নরকাদি প্রত্যবায়ফলং প্রয়চ্ছতীতি। নৈতৎ যুক্তং ব্যাখ্যানমেবং জ্ঞানাদশুভান্মোক্ষানুপপত্তের্যৎ জ্ঞাত্বা মোক্ষ্যসেঽশুভাদিতি ভগবতোক্তং বচনং বাধ্যেত, কথং নিত্যানামনুষ্ঠানাদশুভাৎ স্যান্নাম মোক্ষণং ন তু তেষাং ফলাভাবজ্ঞানান্ন হি নিত্যানাং ফলাভাবজ্ঞানমশুভমুক্তিফলত্বেন চোদিতং নিত্যকর্ম্মজ্ঞানং বা, ন চ ভগবতৈবেহোক্তং, এতেনাকর্ম্মণি কর্ম্মদর্শনং প্রত্যুক্তং ন হ্যকর্ম্মণি কর্ম্মেতি দর্শনং কর্ত্তব্যতয়েহ চোদ্যতে, নিত্যস্য তু কর্ত্তব্যতামাত্রং ন চারণান্নিত্যস্য প্রত্যবায়ো ভবতীতি বিজ্ঞানাৎ কিঞ্চিৎ ফলং স্যান্নাপি নিত্যাকরণং জ্ঞেয়ত্বেন চোদিতং নাপি কর্ম্মাকর্ম্মেতি মিথ্যাদর্শনাদশুভান্মোক্ষণং

## গিরিকৃত টীকা।

যৎ জ্ঞাত্বা মোক্ষ্যসে ঽশুভাদিতি জ্ঞানাদশুভক্ষয়স্য প্রতিজ্ঞাতত্বান্ন চ তজ্জ্ঞানংফলাভাববিষয়মেষিতব্যমিত্যাহ ন হীতি। অশুভস্য ফলাভাবজ্ঞানকার্য্যত্বাভাবাৎ ন ফলাভাবজ্ঞানাদশুভক্ষয়ঃ সিধ্যতীত্যর্থঃ। কিঞ্চাতীন্দ্রিয়োঽর্থঃ শাস্ত্রান্নিশ্চীয়তে ন চ নিত্যকর্ম্মণাং ফলাভাবজ্ঞানাদশুভনিবৃত্তিরিত্যত্র শাস্ত্রমস্তীত্যাহ ন হীতি। নিত্যাকরণং কর্ম্মেতি জ্ঞানমপি নাশুভনিবৃত্তিফলত্বেন চোদিতমস্তীত্যাহ নিত্যকর্ম্মেতি। ভগবদ্বচনমেবাত্র প্রমাণমিত্যাশঙ্ক্যাহ ন চেতি। সাধারণমেব যৎ জ্ঞাত্বেত্যাদি ভগবতো বচনং ন তু নিত্যানাং ফলাভাবং জ্ঞাত্বেতি বিশেষবিষয়মিত্যর্থঃ। অশুভমোক্ষণাসম্ভবপ্রদর্শনেন কর্ম্মণ্যকর্ম্মদর্শননিরাকরণন্যায়েনাকর্ম্মণি কর্ম্মদর্শনং নিবাকরোতি এতেনেতি। নামাদিষু ফলায় ব্রহ্মদৃষ্টিবদকর্ম্মণ্যপি ফলার্থং কর্ম্মদৃষ্টিবিধানাচ্চাশুভমোক্ষণানুপপত্তিরিত্যাশঙ্ক্যাহ ন হীতি। অত্র হি শ্লোকে নিত্যস্য কর্ত্তব্যতামাত্রং পরমতে বিবক্ষিতমতশ্চাকর্ম্মণি কর্ম্মদর্শনং বিধীয়তে, তৎ ফলায়েতি কল্পনা পরস্য সিদ্ধান্তবিরুদ্ধেত্যাহ নিত্যস্য ত্বিতি। পরমতেঽপি নিত্যস্য কর্ত্তব্যতামাত্রমত্র শ্লোকে ন বিবক্ষিতং কিন্তু নিত্যানুষ্ঠানে প্রবৃত্তিসিদ্ধ্যর্থং নিত্যাকরণাৎ প্রত্যবায়ো ভবতীতি জ্ঞানমপি কর্ত্তব্যত্বেনাত্র বিবক্ষিতমেবেত্যাশঙ্ক্যাহ নচেতি। ন তাবৎ প্রবৃত্তিরস্য বিজ্ঞানস্য ফলং নিয়োগাদেব তদুপপত্তের্নাপি ফলান্তরমনুপলম্ভাদতোঽফলত্বাদকরণাৎ প্রত্যবায়ো ভবতীতি জ্ঞানং নাত্র কর্ত্তব্যত্বেন বিবক্ষিতমিত্যর্থঃ। কিঞ্চাকরণে কর্ম্মদৃষ্টিবিধাবকরণস্যালম্বনত্বেন প্রধানত্বাৎ জ্ঞেয়ত্বং বক্তব্যং তচ্চ তুচ্ছত্বাদনুপপন্নমিত্যাহ

## স্বামিকৃত টীকা।

এবেত্যর্থঃ অনেনৈব জ্ঞানিনঃ স্বভাবাদাপন্নং ফলপ্রতক্ষণাদিকং ন দোষায় অজ্ঞস্য তু রাগতঃ কৃতং দোষায়েতি বিকর্ম্মণোঽপি তত্ত্বং নিরূপিতং দ্রষ্টব্যং॥ ১৮॥

## শাঙ্করভাষ্যম্।

ন চ বুদ্ধিমত্ত্বং যুক্ততা কৃৎস্নকর্ম্মকৃদিত্যাদি চ ফলমুপপদ্যতে স্তুতির্ব্বা মিথ্যাজ্ঞানমেব হি সাক্ষাদশুভরূপং কুতোঽস্মাদশুভান্মোক্ষণং ন হি তমস্তমসো নিবর্ত্তকং ভবতি, নন্থ কর্ম্মণি চাকর্ম্মদর্শনং অকর্ম্মণি বা কর্ম্মদর্শনং ন তৎ মিথ্যাজ্ঞানং কিং তর্হি গৌণং ফলভাবনিমিত্তং ন কর্ম্মাকর্ম্মবিজ্ঞানাদপি গৌণাৎ ফলস্যাশ্রবণান্নাপি শ্রুতহান্যশ্রুতপরিকল্পনয়া কশ্চিদ্বিশেষো লভ্যতে স্বশব্দেনাপি শক্যং বক্তুং নিত্যকর্ম্মণাং ফলং নাস্ত্যকরণাচ্চ তেষাং নরকপাতঃ স্যাদিতি তত্র ব্যাজেন পরব্যামোহরূপেণ কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যাদিনা কিং তত্রৈবং ব্যাচক্ষাণেন ভগবতোক্তং বাক্যং লোকব্যামোহার্থমিতি ব্যক্তং কল্পিতং স্যান্ন চৈতচ্ছদ্মরূপেণ বাক্যেন রক্ষণীয়ং বস্তু নাপিশব্দান্তরেণ পুনঃ পুনরুচ্যমানং বস্তুত্বং সুবোধ্যং স্যাদি-

## গিরিকৃত টীকা।

নাপীতি। অকরণস্যাসতো নামাদিবদাশ্রয়ত্বেন দর্শনাসম্ভবেঽপি সামানাধিকরণ্যেনেদং রজতমিতিবদ্দর্শনং ভবিষ্যতীত্যাশঙ্ক্যাহ নাপি কর্ম্মেতি। আদিশব্দেন সর্ব্বোৎকর্ষাদি গৃহ্যতে, ফলবত্ত্বং স্তুতির্ব্বা সম্যগ্জ্ঞানস্য যুক্তং ন মিথ্যাজ্ঞানস্যানুপপত্তেরিত্যর্থঃ। স্বপ্নে মিথ্যাজ্ঞানমপি ফলবদুপলব্ধমিত্যাশঙ্ক্য মিথ্যাজ্ঞানস্যাশুভাবিবোধিত্বান্ন তস্মাত্তন্নিবৃত্তিরিত্যাহ মিথ্যাজ্ঞানমেবেতি। অশুভাদেবাশুভানিবৃত্তৌ দৃষ্টান্তমাহ ন হীতি। অবিবেকপূর্ব্বকমিদং রজতমিতি সদসতোঃ সামানাধিকরণ্যান্মিথ্যাজ্ঞানং যুক্তং কর্ম্মাকর্ম্মণোস্তু বিবেকেন ভাসতোঃ সামানাধিকরণ্যাধীনং জ্ঞানং সিংহদেবদত্তয়োরিব গৌণং ন মিথ্যাজ্ঞানং ইতি শঙ্কতে নন্বিতি। কর্ম্মাকর্ম্মেতি দর্শনে ফলাভাবো গুণঃ অকর্ম্ম কর্ম্মেতি দর্শনে তু ফলাভাবো গুণস্তন্নিমিত্তমিদং জ্ঞানং গৌণমিত্যাহ ফলেতি। যথোক্তজ্ঞানস্য গৌণত্বেপি প্রামাণিকফলাভাবান্নতগ্দৌণতোচিতেতি দূষয়তি নেত্যাদিনা। কর্ম্মাকর্ম্মেত্যাদি গৌণবিজ্ঞানোপন্যাসব্যাজেন নিত্যকর্ম্মকর্ত্তব্যতয়া বিবক্ষিতত্বাদ্গৌণজ্ঞানস্যাফলত্বমদূষণমিত্যাশঙ্ক্যাহ নাপীতি। জ্ঞানাদশুভমোক্ষণস্য শ্রুতস্য হানিরশ্রুতস্য নিত্যানুষ্ঠানস্য কল্পনেত্যনেন ব্যাপারগৌরবেণ ন কশ্চিদ্বিশেষঃ সিধ্যতীত্যর্থঃ। উক্তমেব প্রপঞ্চয়তি স্বশব্দেনেতি। নরকপাতঃ স্যাদতোবিধেরেবানুষ্ঠেয়ানি তানীতি শেষঃ। যথোক্তবাচকশব্দপ্রয়োগাদেবাপেক্ষিতার্থসিদ্ধিসম্ভবে ভগবতোব্যাজবচনকল্পনমনুচিতমিত্যাহ তত্রেতি। প্রকৃতে শ্লোকে বৃত্তিকৃতাং ব্যাখ্যানেন পরমাপ্তস্যৈব ভগবতোবিপ্রলম্ভকত্বমাপাদিতমিতি তদীয়ং ব্যাখ্যানমুপেক্ষিতব্যমিতি ফলিতমাহ তত্রৈবমিতি। নিত্যকর্ম্মানুষ্ঠানসিদ্ধ্যর্থং ব্যাজরূপমিদং ভগবদ্বচনমুচিতমিত্যাশঙ্ক্য স্বশব্দেনাপীত্যাদি প্রাগুক্তপরিপাট্যাপি তদনুষ্ঠানবোধনসম্ভবান্নৈবমিত্যাহ ন চৈতদিতি। বস্তুশব্দেন নিত্যকর্ম্মানুষ্ঠানং সুবোধত্বসিদ্ধ্যর্থং পৌনঃপুন্যেন ক্রিয়তে তথা নিত্যানামপি কর্ম্মণাং অনুষ্ঠানং কর্ম্মণ্যকর্ম্মেত্যাদি। শব্দান্তরেণোচ্যমানং সুবোধং স্যাদিতি ভগবতঃ শব্দান্তরং যুক্তমিত্যাশঙ্ক্য তস্য নিত্যানু-

## শাঙ্করভাষ্যম্।

ত্যেবং বক্তুং যুক্তং, কর্ম্মণ্যেবাধিকারইত্যত্র হি স্ফুটতর উক্তোঽর্থো। ন পুনর্ব্বক্তব্যো ভবতি সর্ব্বত্র চ প্রশস্তং স্ববোদ্ধব্যঞ্চ কর্ত্তব্যমেব ন নিষ্প্রয়োজনং বোদ্ধব্যমিত্যুচ্যতে ন চ মিথ্যা-জ্ঞানং বোদ্ধব্যং ভবতি তৎপ্রত্যুপস্থাপিতঞ্চাবস্থাভাসং নাপি নিত্যানামকরণাদভাবাৎ প্রত্যবায়োৎপত্তির্নাসতো বিদ্যতে ভাবইতি বচনাৎ কথমসতঃ সজ্জায়েতেতি চ দর্শিতং অসতঃ সজ্জন্মপ্রতিষেধাৎ অসতঃ সদুৎপত্তিং ব্রুবতা অসদেব সদ্ভবেৎ সচ্চাপ্যসদ্ভবে দিত্যুক্তং স্যাৎ, তচ্চাপ্যযুক্তং সর্ব্বপ্রমাণবিরোধান্ন চ নিষ্ফলং বিদধ্যাৎ কর্ম্ম শাস্ত্রং দুঃখ-রূপত্বাৎ দুঃখস্য চ বুদ্ধিপূর্ব্বকতয়া কার্য্যত্বানুপপত্তেঃ তদকরণে চ নরকপাতাভ্যুপগমে অনর্থায়ৈবোভয়থাপি করণে চ শাস্ত্রং নিষ্ফলং কল্পিতং স্যাৎ স্বাভ্যুপগমবিরোধশ্চ নিত্যং নিষ্ফলং কর্ম্মেত্যভ্যুপগম্যতে মোক্ষফলায়েতি ব্রুবতঃ তস্মাদ্যথাশ্রুতএবার্থঃ কর্ম্মণ্যকর্ম্ম ইত্যাদেস্তথা চ ব্যাখ্যাতোঽস্মাভিঃ শ্লোকঃ ॥ ১৮ ॥

## গিরিকৃত টীকা।

ষ্ঠানবাচকত্বাভাবান্নৈবমিত্যাহ নাপীতি। কিঞ্চ পূর্ব্বমেব নিত্যানুষ্ঠানস্য স্পষ্টমুপদিষ্টত্বান্ন-তস্য সুবোধনার্থং শব্দান্তরমপেক্ষিতমিত্যাহ কর্ম্মণ্যেবেতি। কর্ম্মাকর্ম্মাদিবিজ্ঞানব্যাজেন নিত্যকর্ম্মানুষ্ঠানকর্ত্তব্যতায়াং তাৎপর্য্যমিত্যেতন্নিরাকৃত্য, কর্ম্মাকর্ম্মাদিদর্শনং গৌণমিতি পক্ষে দূষণান্তরমাহ সর্ব্বত্র চেতি। লোকে বেদে চ যথা প্রশস্তং দেবতাদিতত্ত্বং যচ্চ কর্ত্তব্যমনুষ্ঠানমগ্নিহোত্রাদি তদেব বোদ্ধব্যমিত্যুচ্যতে, ন নিষ্ফলং কাকদন্তাদি, কর্ম্মণ্য-কর্ম্মদর্শনং অকর্ম্মণি চ কর্ম্মদর্শনং গৌণত্বাদেবাপ্রশস্তমকর্ত্তব্যঞ্চ নাতস্তদ্বোদ্ধব্যমিতি বচ-নমর্হতীত্যর্থঃ। কিঞ্চ কর্ম্মাদের্মায়ামাত্রত্বাদ্গৌণমপি তদ্বিষয়ং জ্ঞানং মিথ্যাজ্ঞানমিতি ন তস্য বোদ্ধব্যত্বসিদ্ধিরিত্যাহ ন চেতি। মিথ্যাজ্ঞানস্য বোদ্ধব্যত্বাভাবেঽপি তদ্বিষয়স্য বোধ্যতা সিধ্যেদিত্যাশঙ্ক্য বস্ত্বাভাসত্বান্নৈবমিত্যাহ তৎপ্রত্যুপস্থাপিতঞ্চেতি। যৎপুনর-করণস্য প্রত্যবায়হেতুত্বং অকরণে গৌণ্যা বৃত্ত্যা কর্ম্মশব্দপ্রয়োগে নিমিত্তমিতি তদ্দূষয়তি নাপীতি। অকরণাৎ প্রত্যবায়োভবতীত্যত্র শ্রুতিস্মৃতিবিরোধমভিধায় যুক্তিবিরোধমভি-দধাতি অসত ইতি। অসতঃ সদ্রূপেণ ভবনমভবনঞ্চ নিঃস্বরূপত্বাদনুপপন্নং নিরস্তসমস্ত-তত্ত্বস্য কিঞ্চিত্ত্বাভ্যুপগমে সর্ব্বপ্রমাণানামপ্রামাণ্যপ্রসঙ্গাদিত্যাহ তচ্চেতি। যত্তু-নিত্যানাং ফলরাহিত্যং তত্রাকর্ম্মশব্দপ্রয়োগে নিমিত্তমিতি তন্নিরস্যতি ন চেতি। ন কেবলং বিধ্যুদ্দেশে স্বফলাভাবান্নিত্যানাং বিধ্যনুপপত্তিরপি তু ধাত্বর্থস্য ক্লেশাত্মকত্বাত্তত্র শ্রুতফলাভাবেনৈব বিধিরবকাশমাসাদয়েদিত্যাহ দুঃখেতি। দুঃখরূপস্যাপি ধাত্বর্থস্য সাধ্যত্বেন কার্য্যত্বাত্তদ্বিষয়ো বিধিঃ স্যাদিতি চেন্নেত্যাহ দুঃখস্য চেতি। স্বর্গাদিফলাভা-বেঽপি নিত্যানামকরণনিমিত্তনিরয়নিরাসার্থং দুঃখরূপাণামপি স্যাদনুষ্ঠেয়ত্বমিত্যাহ তদ-করণে চেতি। ফলান্তরাভাবেঽপি মোক্ষসাধনত্বাৎ মুমুক্ষুণা নিত্যানি কর্ম্মাণি অনুষ্ঠেয়ানি

যস্য সর্ব্বে সমারম্ভাঃ কামসঙ্কল্পবর্জ্জিতাঃ।
জ্ঞানাগ্নিদগ্ধকর্ম্মাণং তমাহুঃ পণ্ডিতং বুধাঃ ॥ ১৯ ॥
ত্যক্ত্বা কর্ম্মফলাসঙ্গং নিত্যতৃপ্তো নিরাশ্রয়ঃ।
কর্ম্মণ্যভিপ্রবৃত্তোঽপি নৈব কিঞ্চিৎ করোতি সঃ ॥২০॥

## শাঙ্করভাষ্যম্।

তদেতৎ কর্ম্মণ্যকর্ম্মাদিদর্শনং স্তূয়তে যস্যেতি। যস্য যথোক্তদর্শিনঃ সর্ব্বে যাবন্তঃ সমারম্ভাঃ সর্ব্বাণি কর্ম্মাণি সমারভ্যন্তে ইতি সমারম্ভাঃ, কামসঙ্কল্পবর্জ্জিতাঃ কামৈস্তৎকারণৈশ্চ সঙ্কল্পৈর্বর্জ্জিতাঃ মুধৈব চেষ্টামাত্রা অনুষ্ঠীয়ন্তে প্রবৃত্তেন চেল্লোকসংগ্রহার্থং নিবৃত্তেন চেৎ জীবনমাত্রার্থং তং জ্ঞানাগ্নিদগ্ধকর্ম্মাণং কর্ম্মাদাবকর্ম্মাদিদর্শনং জ্ঞানং তদেবাগ্নিস্তেন জ্ঞানাগ্নিনা দগ্ধানি শুভাশুভলক্ষণানি কর্ম্মাণি যস্য তমাহুঃ পরমার্থতঃ পণ্ডিতং বুধাঃ ব্রহ্মবিদঃ ॥ ১৯ ॥

## গিরিকৃত টীকা।

ইত্যাশঙ্ক্যাহ স্বাভ্যুপগমেতি। বৃত্তিকারব্যাখ্যানাসম্ভবে ফলিতমুপসংহরতি তস্মাদিতি। কোঽসৌ যথাশ্রুতোঽর্থঃ শ্লোকস্যেত্যাশঙ্ক্যাহ তথা চেতি ॥ ১৮ ॥

কর্ম্মণ্যকর্ম্মদর্শনং পূর্ব্বোক্তং স্তোতুমুত্তরশ্লোকং প্রস্তৌতি তদেতদিতি। যথোক্তদর্শিত্বং পূর্ব্বোক্তদর্শনসম্পন্নত্বং। সমারম্ভশব্দস্য কর্ম্মবিষয়ত্বং ন রূঢ্যা কিন্তু ব্যুৎপত্ত্যেত্যাহ সমারভ্যন্ত ইতীতি। কামসঙ্কল্পবর্জ্জিতত্বে কথং কর্ম্মণামনুষ্ঠানমিত্যাশঙ্ক্যাহ মুধৈবেতি উদ্দেশফলাভাবে তেষামনুষ্ঠানং যাদৃচ্ছিকং স্যাদিত্যাশঙ্ক্য প্রবৃত্তেন নিবৃত্তেন বা তেষামনুষ্ঠানং যাদৃচ্ছিকং স্যাদিতি বিকল্প্য ক্রমেণ নিরস্যতি প্রবৃত্তেনেত্যাদিনা। জ্ঞানাগ্নীত্যাদি বিভজতে কর্ম্মাদাবিতি। যথোক্তজ্ঞানং যোগ্যমেব দহতি নাযোগ্যমিতি বিবক্ষিতত্বাত্তস্মিন্নগ্নিপদং। যথোক্তবিজ্ঞানবিরহিণামপি বৈশেষিকাদীনাং পণ্ডিতত্বপ্রসিদ্ধিমাশঙ্ক্য তেষাং পণ্ডিতাভাসত্বং বিবক্ষিত্বা বিশিনষ্টি পরমার্থত ইতি ॥ ১৯ ॥

## স্বামিকৃত টীকা।

কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যনেন শ্রুত্যর্থার্থাপত্তিভ্যাং যদুক্তমর্থদ্বয়ং তদেব স্পষ্টয়তি যস্যেতি পঞ্চভিঃ। সম্যগারভ্যন্ত ইতি সমারম্ভাঃ কর্ম্মাণি কাম্যত ইতি কামঃ ফলং তৎসঙ্কল্পেন বর্জ্জিতা যস্য ভবন্তি তং পণ্ডিতমাহুঃ, অত্র হেতুর্ব্বতস্তৈঃ সমারম্ভৈঃ শুদ্ধে চিত্তে সতি, ঞ্জাতেন জ্ঞানাগ্নিনা দগ্ধানি অকর্ম্মতাং নীতানি কর্ম্মাণি যস্য তং, আরূঢ়াবস্থায়াং তু কামঃ ফলহেতুবিষয়ঃ তদর্থমিদং কর্ত্তব্যমিতি কর্ত্তব্যবিষয়ঃ সঙ্কল্পস্তাভ্যাং বর্জ্জিতাঃ। শেষং স্পষ্টং ॥ ১৯ ॥

## শাঙ্করভাষ্যম্।

যস্ত্বকর্মাদিদর্শী সোঽকর্মাদিদর্শনাদেব নিষ্কর্মা সন্ন্যাসী জীবনমাত্রার্থচেষ্টঃ সন্ কর্মণি ন প্রবর্ত্ততে যদ্যপি প্রাক্ বিবেকতঃ প্রবৃত্তঃ যস্তু প্রারব্ধকর্মা সন্ উত্তরকালমুৎপন্না-ত্মসম্যগ্দর্শনঃ স্যাৎ স কর্মণি প্রয়োজনমপশ্যন্ সসাধনং কর্ম পরিত্যজত্যেব স কুতশ্চিন্নি-মিত্তাৎ কর্মপরিত্যাগাসম্ভবে সতি কর্মণি তৎফলে চ সঙ্গরহিততয়া স্বপ্রয়োজনাভাবা-ল্লোকসংগ্রহার্থং পূর্ব্ববৎ কর্মণি প্রবৃত্তোঽপি নৈব কিঞ্চিৎ করোতি জ্ঞানাগ্নিদগ্ধকর্মত্বাৎ তদীয়ং কর্মাকর্ম্মৈব সম্পদ্যত ইত্যেতদর্থং দর্শয়িষ্যন্নাহ ত্যক্ত্বেতি। ত্যক্ত্বা কর্মস্বভিমানং ফলাসঙ্গঞ্চ যথোক্তে জ্ঞানে নিত্যতৃপ্তো নিরাকাঙ্ক্ষো বিষয়েষিত্যর্থো নিরাশ্রয় আশ্রয়রহিত আশ্রয়ো নাম যদাশ্রিত্য পুরুষার্থং সিসাধয়িষতি, দৃষ্টাদৃষ্টেষ্টফলসাধনাশ্রয়রহিত ইত্যর্থঃ। তেনৈবস্তুতেন স্বপ্রয়োজনাভাবাৎ সসাধনং কর্ম পরিত্যক্তব্যমেবেতি প্রাপ্তে ততো নির্গ-

## গিরিকৃত টীকা।

বিবেকাৎ পূর্ব্বং কর্মণি প্রবৃত্তোঽপি সতি বিবেকে তত্র ন প্রবৃত্তিরিত্যাশঙ্ক্যা-ঙ্গীকরোতি যদ্বিতি। বিবেকাৎ পূর্ব্বমভিনিবেশেন প্রবৃত্তস্য বিবেকানন্তরমভিনিবেশা-ভাবাৎ প্রবৃত্ত্যসম্ভবেঽপি জীবনমাত্রমুদ্দিশ্য প্রবৃত্ত্যাভাসঃ সম্ভবতীত্যর্থঃ। সত্যপি বিবেকে তত্ত্বৎসাক্ষাৎকারানুদয়াৎ কর্মণি প্রবৃত্তস্য কথং তত্ত্যাগঃ স্যাদিত্যাশঙ্ক্যাহ যস্তু প্রার-ব্ধেতি। ত্যক্ত্বেত্যাদি সমনন্তরশ্লোকমবতারয়িতুং ভূমিকাং কৃত্বা তদবতারণপ্রকারং দর্শয়তি স কুতশ্চিদিতি। লোকসংগ্রহাদিনিমিত্তং কর্মপরিত্যাগাসম্ভবে সতি তস্মিন্ প্রবৃত্তোঽপি নৈব করোতি কিঞ্চিদিতি সম্বন্ধঃ। কর্মণি প্রবৃত্তো ন করোতি কর্মেতি কথমুচ্যতে তত্রাহ স্বপ্রয়োজনাভাবাদিতি। কথং তর্হি কর্মণি প্রবর্ত্ততে তত্রাহ লোকেতি। প্রবৃত্তেরর্থক্রিয়াকারিত্বাভাবং পশ্বাদিভিক্ষাবিশেষাদিতি ন্যায়েন ব্যাবর্ত্তয়তি পূর্ব্ববদিতি। কথং তর্হি বিবেকিনামবিবেকিনাঞ্চ বিশেষঃ স্যাদিত্যাশঙ্ক্য কর্মাদৌ সঙ্গাসঙ্গাভ্যামিত্যাহ কর্মণীতি। উক্তেঽর্থে সমনন্তরশ্লোকমবতারয়তি জ্ঞানাগ্নীতি। এতমর্থং দর্শয়িষ্যন্নিমং শ্লোকমাহেতি যোজনা। যথোক্তং জ্ঞানং কূটস্থাত্মদর্শনং তেন স্বরূপভূতং, সুখং সাক্ষাদ-নুভূয় কর্মণি তৎফলে চ সঙ্গমপাস্য বিষয়েষু নিরপেক্ষশ্চেষ্টতে বিদ্বানিত্যাহ ত্যক্ত্বেত্যা-দিনা। ইষ্টসাধনসমপেক্ষস্য কুতো নিরপেক্ষত্বমিত্যাশঙ্ক্য বিশিনষ্টি নিরাশ্রয়ইতি। যদা-শ্রিত্যেতি যচ্ছব্দেন ফলসাধনমুচ্যতে, আশ্রয়রহিতং ইত্যস্যার্থং স্পষ্টয়তি দৃষ্টেতি। তেন জ্ঞানবৃত্তা পুরুষেণৈবস্তুতেন ত্যক্ত্বা কর্মফলাসঙ্গমিত্যাদিনা বিশেষিতেনেত্যর্থঃ। ততঃ সমাধানাৎ কর্মণঃ সকাশাদিতি যাবৎ। নির্গমাসম্ভবে হেতুমাহ লোকেত্যাদিনা। পূর্ব্ব-

## স্বামিকৃত টীকা।

কিঞ্চ ত্যক্ত্বেতি। কর্মণি তৎফলে চাসক্তিং ত্যক্ত্বা নিত্যেন নিজানন্দেন তৃপ্তঃ অত-

নিরাশীর্যতচিত্তাত্মা ত্যক্তসর্ব্বপরিগ্রহঃ।
শারীরং কেবলং কর্ম্ম কুর্ব্বন্নাপ্নোতি কিল্বিষম্। ২১।

---

### শাঙ্করভাষ্যম্ ।

মাসত্ত্বাৎ লোকসংগ্রহচিকীর্ষয়া শিষ্টবিগর্হণাপরিজিহীর্ষয়া বা পূর্ব্ববৎ কর্ম্মণ্যভিপ্রবৃত্তোঽপি নিষ্ক্রিয়াত্মদর্শনসম্পন্নত্বান্নৈব কিঞ্চিৎ করোতি সঃ ॥ ২০ ॥

যঃ পুনঃ পূর্ব্বোক্তবিপরীতঃ প্রাগেব কর্ম্মারম্ভাদ্ব্রহ্মণি সর্ব্বান্তরে প্রত্যগাত্মনি নিষ্ক্রিয়ে সঞ্জাতাত্মদর্শনঃ স দৃষ্টাদৃষ্টেষ্টবিষয়াশীর্ব্বিবর্জ্জিততয়া দৃষ্টাদৃষ্টার্থে কর্ম্মণি প্রয়োজনমপশ্যন্ সসাধনং কর্ম্ম সংন্যস্য শরীরমাত্রচেষ্টো যতির্জ্ঞাননিষ্ঠো মুচ্যত ইত্যেতমর্থং দর্শয়িতুমাহ নিরিতি। নিরাশীর্নির্গতা আশিষো যস্মাৎ স নিরাশীঃ, যতচিত্তাত্মা চিত্তমন্তঃকরণমাত্মা বাহ্যঃ কার্য্যকরণসঙ্ঘাতস্তাবুভাবপি যতৌ সংযতৌ যেন স যতচিত্তাত্মা ত্যক্তসর্ব্বপরিগ্রহঃ ত্যক্তঃ সর্ব্বঃ পরিগ্রহো যেন স ত্যক্তসর্ব্বপরিগ্রহঃ শারীরং শরীরস্থিতিমাত্রপ্রয়োজনং কেবলং কর্ম্ম তত্রাপ্যভিমানবর্জ্জিতং কর্ম্ম কুর্ব্বন্নাপ্নোতি ন প্রাপ্নোতি কিল্বিষমনিষ্টরূপং পাপং

---

### গিরিকৃত টীকা

যৎ জ্ঞানোদয়াৎ প্রাগবস্থায়ামিবেত্যর্থঃ, অভিপ্রবৃত্তোপি লোকদৃষ্ট্যেতি শেষঃ, নৈব করোতি কিঞ্চিদিতি স্বদৃষ্ট্যেতি দ্রষ্টব্যং ॥ ২০ ॥

সত্যপি বিক্ষেপকে কর্ম্মণি কূটস্থাত্মানুসন্ধানস্য সিদ্ধে কৈবল্যহেতুত্বে বিক্ষেপাভাবে সুতরাং তস্য তদ্ধেতুত্বসিদ্ধিরিত্যভিপ্রেত্যাহ যঃ পুনরিতি। পূর্ব্বোক্তবিপরীতত্বং লোকসংগ্রহাদিনিরপেক্ষত্বং, তদেব বৈপরীত্যং স্ফোরয়তি প্রাগেবেতি সসাধনসর্ব্বকর্ম্মসংন্যাসে শরীরস্থিতিরপি কথমিত্যাশঙ্ক্যাহ শরীরেতি। তর্হি তথাবিধচেষ্টানিবিষ্টচেতস্তয়া সম্যগ্জ্ঞানবহির্মুখস্য কুতো মুক্তিরিত্যাশঙ্ক্য যথোপদিষ্টচেষ্টায়ামনাদরান্মৈবমিত্যাহ জ্ঞাননিষ্ঠ ইতি। ইতি দর্শয়িতুমিমং শ্লোকং প্রাহেতি পূর্ব্ববৎ। আশিষঃ প্রার্থনাভেদার্ত্তৃষ্ণাবিশেষাৎ বিষয়ো নির্গতত্বে হেতুমাহ যতেতি। চিত্তবদাত্মনঃ সংযমনং কথমিত্যাশঙ্ক্যাহ আত্মা বাহ্য ইতি। দ্বয়োঃ সংযমনে সতার্থসিদ্ধমর্থমাহ ত্যক্তেতি। সর্ব্বপরিগ্রহপরিত্যাগে দেহস্থিতিরপি দুঃস্থা স্যাদিত্যাশঙ্ক্যাহ শরীরমিতি মাত্রশব্দেন পৌনরুক্ত্যাদনর্থকং কেবলং পদমিত্যাশঙ্ক্যাহ তত্রাপীতি। শরীরং কেবলমিত্যাদৌ শরীরপদার্থঃ স্ফুটীকর্ত্তুমুভয়থা

### স্বামিকৃত টীকা।

এবং যোগক্ষেমার্থমাশ্রয়ণীয়রহিতঃ এবম্ভূতো যঃ, স স্বাভাবিকে বিহিতে বা কর্ম্মণি অভিতঃ প্রবৃত্তোঽপি কিঞ্চিদপি নৈব করোতি তস্য কর্ম্ম অকর্ম্মতামাপদ্যত ইত্যর্থঃ ॥ ২০ ॥

কিঞ্চ নিরাশীরিতি। নির্গতা আশিষঃ কামনা যস্মাৎ, যতং নিয়তং চিত্তমাত্মা শরীরং চ যস্য, ত্যক্তাঃ সর্ব্বে পরিগ্রহা যেন সঃ, শারীরং শরীরমাত্রনির্ব্বর্ত্ত্যং কর্ত্তৃত্বাভিনিবেশরহিতং

## শাঙ্করভাষ্যম্

ধর্ম্মশ্চ ধর্ম্মোঽপি মুমুক্ষোরনিষ্টরূপত্বাৎ কিল্বিষমেব বন্ধাপাদকত্বাৎ, কিঞ্চ শারীরং কেবলং কর্ম্মেত্যত্র কিং শরীরনির্ব্বর্ত্ত্যং শারীরং কর্ম্মাভিপ্রেতমাহোস্বিচ্ছরীরস্থিতিমাত্রপ্রয়োজনং শারীরং কর্ম্মেতি কিঞ্চাতো যদি শরীরনির্ব্বর্ত্ত্যং শারীরং কর্ম্ম যদি বা শরীরস্থিতিমাত্রপ্রয়োজনং শারীরমিত্যুচ্যতে যদা শরীরনির্ব্বর্ত্ত্যং কর্ম্ম শারীরমভিপ্রেতং স্যাত্তদা দৃষ্টাদৃষ্টপ্রয়োজনং কর্ম্ম প্রতিষিদ্ধমপি শরীরেণ কুর্ব্বন্নাপ্নোতি কিল্বিষমিতি ব্রুবতো বিরুদ্ধাভিধানং প্রসজ্যেত শাস্ত্রীয়ঞ্চ কর্ম্ম দৃষ্টাদৃষ্টপ্রয়োজনং শরীরেণ কুর্ব্বন্নাপ্নোতি কিল্বিষমিত্যপি ব্রুবতোঽপ্রাপ্তপ্রতিষেধপ্রসঙ্গঃ শারীরং কর্ম্ম কুর্ব্বন্নিতি বিশেষণাৎ কেবলশব্দপ্রয়োগাচ্চ বাঙ্মনসনির্ব্বর্ত্ত্যং কর্ম্ম বিধিপ্রতিষেধবিষয়ং ধর্ম্মাধর্ম্মশব্দবাচ্যং কুর্ব্বন্নাপ্নোতি কিল্বিষমিত্যুক্তং স্যাৎ তত্রাপি বাঙ্মনসাভ্যাং বিহিতানুষ্ঠানপক্ষে কিল্বিষপ্রাপ্তিবচনং বিরুদ্ধমাপদ্যেত প্রতিষিদ্ধসেবাপক্ষেঽপি ভূতার্থানুবাদমাত্রমনর্থকং স্যাৎ যদাতু শরীরস্থিতিমাত্রপ্রয়োজনং শারীরং কর্ম্মাভিপ্রেতং ভবেত্তদা দৃষ্টাদৃষ্টপ্রয়োজনং কর্ম্ম বিধিপ্রতিষেধশাস্ত্রগম্য শরীরবাঙ্মনসনির্ব্বর্ত্ত্যং অন্যদকুর্ব্বংস্তৈরেব শরীরাদিভিঃ শরীরস্থিতিমাত্রপ্রয়োজনং কেবলশব্দপ্রয়োগাদহং করোমীত্যভিমানবর্জ্জিতঃ শরীরাদিচেষ্টামাত্রং লোকদৃষ্ট্যা কুর্ব্বন্নাপ্নোতি

## গিরিকৃত টীকা।

সম্ভাবনয়া বিকল্পয়তি শারীরমিতি। শরীরনির্ব্বর্ত্ত্যং শারীরমিত্যস্মিন্ পক্ষে কিং দূষণং শরীরস্থিতিমাত্রং শরীরমিত্যস্মিন্ বা পক্ষে কিং ফলমিতি পূর্ব্ববাদী পৃচ্ছতি কিঞ্চাত ইতি। শরীরনির্ব্বর্ত্ত্যং শারীরমিত্যস্মিন্ পক্ষে সিদ্ধান্তী দূষণমাহ উচ্যতইতি। শরীরেণ যন্নির্ব্বর্ত্ত্যং তৎ কিং প্রতিষিদ্ধং বিহিতম্বা প্রথমে বিরোধঃ স্যাদিত্যাহ যদেতি। প্রতিষিদ্ধাচরণেঽপি নানিষ্টপ্রাপ্তিরিত্যুক্তে প্রতিষেধশাস্ত্রবিরোধঃ স্যাদিত্যর্থঃ। দ্বিতীয়ে বিহিতকরণে সত্যনিষ্টপ্রাপ্ত্যভাবাদপ্রাপ্তপ্রতিষেধঃ, স্যাদিত্যাহ শাস্ত্রীয়ঞ্চেতি। দৃষ্টপ্রয়োজনং শারীর্য্যাদিকং কর্ম্মাদৃষ্টপ্রয়োজনং স্বর্গসাধনং জ্যোতিষ্টোমাদিকং কর্ম্মেতি বিভাগঃ। শরীরনির্ব্বর্ত্ত্যং কর্ম্ম শারীরমভিমতমিতি পক্ষে দূষণান্তরমাহ শারীরমিতি। বাচা মনসা বা কর্ম্মণোঽনুষ্ঠানে সংন্যাসিনো ভবত্যেব কিল্বিষপ্রাপ্তিরিত্যাশঙ্ক্যাহ তত্রাপীতি। বাঙ্মনসাভ্যাং বিহিতানুষ্ঠানে বা প্রতিষিদ্ধকরণে বা কিল্বিষপ্রাপ্তিঃ সংন্যাসিনঃ স্যাদিতি বিকল্প্যাদ্যে অপধ্যানবিধিবিরোধঃ স্যাদিত্যুক্ত্বা দ্বিতীয়ং দূষয়তি প্রতিসিদ্ধেতি। শরীরনির্ব্বর্ত্ত্যং কর্ম্ম শারীরমিতি পক্ষমেবং প্রতিক্ষিপ্য দ্বিতীয়পক্ষে লাভং দর্শয়তি যদাত্বিতি

## স্বামিকৃত টীকা।

কুর্ব্বন্নপি কিল্বিষং বন্ধং ন প্রাপ্নোতি, যোগারূঢ়পক্ষে শরীরনির্ব্বাহমাত্রোপযোগি স্বাভাবিকং ভিক্ষাটনাদি কুর্ব্বন্নপি কিল্বিষং বিহিতাকরণনিমিত্তদোষং ন প্রাপ্নোতি। ২১।

যদৃচ্ছালাভসন্তুষ্টো দ্বন্দ্বাতীতো বিমৎসরঃ ।
সমঃ সিদ্ধাবসিদ্ধৌ চ কৃত্বাপি ন নিবধ্যতে ॥ ২২

## শাঙ্করভাষ্যম্ ।

কিল্বিষমেবন্তু তস্য পাপশব্দবাচ্যকিল্বিষপ্রাপ্ত্যসম্ভবাৎ কিল্বিষং সংসারং নাপ্নোতি জ্ঞানাগ্নিদগ্ধসর্ব্বকর্ম্মত্বাদপ্রতিবন্ধেন মুচ্যতএবেতি পূর্ব্বোক্তসম্যগ্দর্শনফলানুবাদ এবৈষঃ, এবং শারীরং কেবলং কর্ম্মেত্যস্যার্থস্য পরিগ্রহে নিরবদ্যং ভবতি । ২১ ।

ত্যক্তসর্ব্বপরিগ্রহস্য যতেরন্নাদেঃ শরীরস্থিতিহেতোঃ পরিগ্রহস্যাভাবাৎ যাচ্ঞাদিনা শরীরস্থিতৌ কর্ত্তব্যতায়াং প্রাপ্তায়ামযাচিতমসংক্লিপ্তমুপপন্নং যদৃচ্ছয়েত্যাদিনা বচনেনানুজ্ঞাতং যতেঃ শরীরস্থিতিহেতোরন্নাদেঃ প্রাপ্তিদ্বারমাবিষ্কুর্ব্বন্নাহ যদৃচ্ছেতি । যদৃচ্ছালাভসন্তুষ্টোঽপ্রার্থিতোঽযত্নতো লাভো যদৃচ্ছালাভস্তেন সন্তুষ্টঃ সংজাতালংপ্রত্যয়ঃ দ্বন্দ্বাতীতো দ্বন্দ্বৈঃ শীতোষ্ণাদিভিঃ হন্যমানোঽবিষণ্ণচিত্তো দ্বন্দ্বাতীত উচ্যতে বিমৎসরো বিগতমৎসরো নির্ব্বৈরবুদ্ধিঃ সমস্তুল্যো যদৃচ্ছালাভস্যাপি সিদ্ধাবসিদ্ধৌ চ, য এবন্তুতো যতিরন্নাদেঃ শরীরস্থিতিহেতোঃ লাভালাভয়োঃ সমো হর্ষবিষাদবর্জ্জিতঃ কর্ম্মাদৌ অকর্ম্মাদিদর্শী যথা-

## গিরিকৃত টীকা ।

অস্যদেহস্থিতিপ্রয়োজনাৎ কর্ম্মণঃ সকাশাদিতি শেষঃ । তত্রাপি বিদুষঃ স্বদৃষ্ট্যা ন প্রবৃত্তিরিতি সূচয়তি লোকেতি । বিদ্বানুক্তয়া রীত্যা বর্ত্তমানো নাপ্নোতি কিল্বিষমিত্যত্র বিবক্ষিতমর্থমাহ এবন্তুতস্যেতি । বিধিনিষেধগম্যং কর্ম্ম দেহস্থিতিহেতুব্যতিরিক্তমকুর্ব্বতইত্যর্থঃ । শারীরং কেবলং কর্ম্ম কুর্ব্বন্নাপ্নোতি কিল্বিষমিত্যস্যোক্তেন প্রকারেণ পরিগ্রহে শারীরং কেবলমিতি বিশেষণদ্বয়ং নির্দ্দোষং সিধ্যতীতি ফলিতমাহ এবমিতি ॥ ২১ ॥

পূর্ব্বশ্লোকেন সঙ্গতিং দর্শয়ন্নুত্তরশ্লোকমুত্থাপয়তি ত্যক্তেতি । অন্নাদেরিত্যাদিশব্দেন পাদুকাচ্ছাদনাদি গৃহ্যতে, যাচ্ঞাদিনেত্যাদিপদেন সেবাকৃষ্যাদ্যুপাদীয়তে, ফিক্কাটনার্থমুদ্যোগাৎ প্রাক্কালে কেনাপি যোগ্যেন নিবেদিতং ভৈক্ষ্যমযাচিতং অভিশপ্তং পতিতঞ্চ বর্জ্জয়িত্বা সঙ্কল্পমন্তরেণ পঞ্চভ্যঃ সপ্তভ্যো বা গৃহেভ্যঃ সমানীতং ভৈক্ষ্যমসংক্লিপ্তং সিদ্ধমন্নং ভক্তজাতৈঃ স্বসমীপমুপানীতমুপপন্নং যদৃচ্ছয়া স্বকীয় প্রযত্নব্যতিরেকেণেতি যাবৎ, আদিশব্দেন, মাধুকর্য্যমসংক্লিপ্তং প্রাক্ প্রণীতমযাচিতং । তাৎকালিকোপপন্নঞ্চ ভৈক্ষ্যং পঞ্চবিধং স্মৃতমিত্যাদি গৃহ্যতে । আবিষ্কুর্ব্বন্নিদং বাক্যমাহেতি যোজনীয়ং । পরোৎকর্ষামর্ষপূর্ব্বিকা-স্বস্যোৎকর্ষবাঞ্ছা বিগতা যস্মাদিতি ব্যুৎপত্তিমাশ্রিত্য বিবক্ষিতমর্থমাহ নির্ব্বৈরেতি।

## স্বামিকৃত টীকা ।

কিঞ্চ যদৃচ্ছা লাভেতি । অপ্রার্থিতোপস্থিতো লাভো যদৃচ্ছালাভস্তেন সন্তুষ্টঃ, দ্বন্দ্বানি শীতোষ্ণাদীন্যতীতোঽতিক্রান্তস্তৎসহনশীল ইত্যর্থঃ, বিমৎসরো নির্ব্বৈরঃ, যদৃচ্ছালাভ-

গতসঙ্গস্য মুক্তস্য জ্ঞানাবস্থিতচেতসঃ
যজ্ঞায়াচরতঃ কর্ম্ম সমগ্রং প্রবিলীয়তে॥ ২৩॥

## শাঙ্করভাষ্যম্।

ভূতাত্মদর্শননিষ্ঠঃ শরীরস্থিতিমাত্রপ্রয়োজনে ভিক্ষাটনাদিকর্ম্মণি শরীরাদিনির্ব্বর্ত্ত্যে নৈব কিঞ্চিৎ করোম্যহং গুণাগুণেষু বর্ত্তন্তে ইত্যেবং সদা সম্পরিচক্ষাণ আত্মনঃ কর্ত্তৃত্বাভাবং পশ্যন্নৈব কিঞ্চিদ্ভিক্ষাটনাদিকং কর্ম্ম করোতি লোকব্যবহারসামান্যদর্শনেন তু লৌকিকৈরারোপিতকর্ত্তৃত্বে ভিক্ষাটনাদৌ কর্ম্মণি কর্ত্তা ভবতি ভিক্ষাটনাদিচেষ্টাস্বপি অকর্ত্তৃত্বাদ্যনুসন্ধানমেব বিদুষঃ স্বানুভবেন তু শাস্ত্র প্রমাণাদিজনিতেনাকর্ত্তৈব স এবং পরাধ্যারোপিতকর্ত্তৃত্বং শরীরস্থিতিমাত্রপ্রয়োজনং ভিক্ষাটনাদিকং কর্ম্ম কৃত্বাপি ন নিবধ্যতে বন্ধহেতোঃ কর্ম্মণঃ সহেতুকস্য জ্ঞানাগ্নিনা দগ্ধত্বাদিত্যনুবাদএবৈষঃ॥ ২২॥

ত্যক্ত্বা কর্ম্মফলাসঙ্গং ইত্যনেন শ্লোকেন যঃ প্রারব্ধকর্ম্মা সন্ যদা নিষ্ক্রিয়ব্রহ্মাত্মদর্শনসম্পন্নঃ স্যাৎ তদাস্যাত্মনঃ কর্ত্তৃকর্ম্মপ্রয়োজনাভাবদর্শিনঃ কর্ম্মপরিত্যাগে প্রাপ্তে কুত-

## গিরিকৃত টীকা।

সংক্ষেপতো দর্শিতমর্থং বিশদয়তি য এবম্ভূতইতি। তথাপি প্রকৃতস্য যতের্ভিক্ষাটনাদিকর্ত্তৃত্বং প্রতিভাতি তদভাবে ভিক্ষাটনাদ্যভাবেন জীবনাভাবপ্রসঙ্গাদিত্যাশঙ্ক্যাহ লোকেতি। লৌকিকৈরবিবেকিভিঃ সহ ব্যবহারস্য স্নানাচমনভোজনাদিলক্ষণস্য বিদুষ্যপি সামান্যেন দর্শনাৎ তদনুসারেণ লৌকিকৈরধ্যারোপিতকর্ত্তৃত্বভোক্তৃত্বাদ্বিদ্বানপি লোকদৃষ্ট্যা ভিক্ষাটনাদৌ কর্ত্তৃত্বমনুভবতীত্যর্থঃ। কথং তর্হি তস্যাকর্ত্তৃত্বং তত্রাহ স্বানুভবেনেতি। যদৃচ্ছেত্যাদিপাদত্রয়ং ব্যাখ্যায় কৃত্বাপীত্যাদিচতুর্থপাদং ব্যাচষ্টে স এবমিতি। ভিক্ষাটনাদিনা প্রাতিভাসিকেন কর্ম্মণা বিদুষো বন্ধত্বাভাবেঽপি কর্ম্মান্তরেণ নিবদ্ধত্বং ভবিষ্যতীত্যাশঙ্ক্যাহ বন্ধেতি। জ্ঞানাগ্নিদগ্ধত্বাদিত্যেবং শারীরং কেবলমিত্যাদাবুক্তস্যায়মনুবাদ ইতি যোজনা, যথোক্তস্য কর্ম্মণো যুক্ত্যা মহাবিরোধাভ্যুপগমসূচনার্থোঽপিশব্দঃ॥ ২২॥

গতসঙ্গস্যেত্যাদিশ্লোকস্য ব্যবহিতেন সম্বন্ধঃ বক্তুং কীর্ত্তয়তি ত্যক্তেতি। অনেন শ্লোকেন নৈব কিঞ্চিৎ করোতি স ইত্যত্র কর্ম্মাভাবঃ প্রদর্শিত ইতি সম্বন্ধঃ। কস্য কর্ম্মাভাবপ্রদর্শনমিত্যাশঙ্কায়ামাহ যঃ প্রারব্ধেতি। প্রারব্ধকর্ম্মা সন্ যোঽবতিষ্ঠতে তস্য কর্ম্মাভাবঃ

## স্বামিকৃতটীকা।

স্যাপি সিদ্ধাবসিদ্ধৌ চ সমো হর্ষবিষাদরহিতঃ য এবম্ভূতঃ স পূর্ব্বোত্তরভূমিকয়োর্যথাযথবিহিতং স্বাভাবিকং বা কর্ম্ম কৃত্বা বন্ধং ন প্রাপ্নোতি॥ ২২॥

কিঞ্চ গতেতি। গতসঙ্গস্য নিষ্কামস্য রাগাদিভির্ম্মুক্তস্য জ্ঞানেঽবস্থিতং চেতো যস্য-

ব্রহ্মার্পণং ব্রহ্ম হবির্ব্রহ্মাগ্নৌ ব্রহ্মণা হুতম্।
ব্রহ্মৈব তেন গন্তব্যং ব্রহ্মকর্ম্মসমাধিনা ॥ ২৪ ॥

## শাঙ্করভাষ্যম্।

শ্চিন্নিমিত্তাত্তদসম্ভবে সতি পূর্ব্ববত্তস্মিন্ কর্ম্মণ্যভিপ্রবৃত্তোঽপি নৈব কিঞ্চিৎ করোতি স ইতি চ কর্ম্মাভাবঃ প্রদর্শিতঃ যস্যৈবং কর্ম্মাভাবো দর্শিতস্তস্যৈব গতসঙ্গস্যেতি। গতসঙ্গস্য সর্ব্বতো নিবৃত্তাসক্তের্মুক্তস্য নিবৃত্তধর্ম্মাদিবন্ধনস্য জ্ঞানাবস্থিতচেতসো জ্ঞানে এব অবস্থিতং চেতো যস্য সোঽয়ং জ্ঞানাবস্থিতচেতাস্তস্য যজ্ঞায় যজ্ঞনির্ব্বৃত্ত্যর্থমাচরতো নির্ব্বর্ত্তযতঃ কর্ম্ম সমগ্রং সহাগ্রেণ কর্ম্মফলেন বর্ত্ততে ইতি সমগ্রং কর্ম্ম তৎসমগ্রং প্রবিলীয়তে বিনশ্যতীত্যর্থঃ। ২৩।

কস্মাৎ পুনঃ কারণাৎ ক্রিয়মাণং কর্ম্ম স্বকার্য্যারম্ভমকুর্ব্বন্ সমগ্রং প্রবিলীয়ত ইত্যুচ্যতে যতঃ ব্রহ্মেতি। ব্রহ্মার্পণং যেন করণেন প্রকারেণ ব্রহ্মবিদ্ধবিরগ্নাবর্পয়তি তদ্ব্রহ্মৈবেতি পশ্যতি তস্যাত্মব্যতিরেকেণাভাবং পশ্যতি যথা শুক্তিকায়াং রজতাভাবং পশ্যতি তদুচ্যতে ব্রহ্মৈ-

## গিরিকৃত টীকা।

প্রদর্শিতশ্চেদ্বিবোধঃ স্যাদিত্যাশঙ্ক্যাবস্থাবিশেষে তৎপ্রদর্শনান্নৈবমিত্যাহ যদেতি। নন্বু জ্ঞানবতঃক্রিয়াকারকফলাভাবদর্শিনঃ কর্ম্মপরিত্যাগধ্রৌব্যাৎ কর্ম্মাভাববচনমপ্রাপ্তপ্রতিষেধঃ স্যাদিত্যাশঙ্ক্যাহ আত্মন ইতি। লোকসংগ্রহাদিনিমিত্তং প্রাগেবোক্তমবিদ্যাবস্থায়ামিব পূর্ব্ববদিত্যুক্তং। এবং বৃত্তমনূদ্যোত্তরশ্লোকমবতারয়তি যস্যেতি। যথোক্তস্যাপি বিদ্যাবতো মুক্তস্যভগবৎপ্রীত্যর্থং কর্ম্মানুষ্ঠানোপলম্ভাত্ততো বন্ধারম্ভঃ সম্ভাব্যেতেত্যাশঙ্ক্যাহ যজ্ঞায়েতি। ধর্ম্মাধর্ম্মাদীত্যাদিশব্দেন রাগদ্বেষাদিসংগ্রহঃ, তস্য বন্ধনত্বং করণব্যুৎপত্ত্যা প্রতিপত্তব্যং, যজ্ঞনির্ব্বৃত্ত্যর্থং যজ্ঞশব্দিতস্য ভগবতো বিষ্ণোর্নারায়ণস্য প্রীতিসম্পত্ত্যর্থমিতি যাবৎ। জ্ঞানমেব বাঞ্ছতো জ্ঞানস্য প্রতিবন্ধকং কর্ম্ম পরিশঙ্কিতং পরিহরতি কর্ম্মেতি সমগ্রেণেত্যঙ্গীকৃত্য ব্যাচষ্টে সহেত্যাদিনা। ২৩।

নাভুক্তং ক্ষীয়তে কর্ম্মেতি স্মৃতিমাশ্রিত্য শঙ্কতে কস্মাদিতি। সমস্তস্য ক্রিয়াকারকফলাত্মকস্য দ্বৈতস্য ব্রহ্মমাত্রত্বেন বাধিতত্বাৎ ব্রহ্মবিদো ব্রহ্মমাত্রস্য কর্ম্ম প্রবিলীয়তে সর্ব্বমিতি যুক্তমিত্যাহ উচ্যত ইতি। ব্রহ্মবিদো ব্রহ্মৈব সর্ব্বক্রিয়াকারকফলজাতং দ্বৈতমিত্যত্র হেতু-

## স্বামিকৃত টীকা।

যজ্ঞায় পরমেশ্বরারাধনার্থং কর্ম্ম চরতঃ সতঃ সমগ্রং সবাসনং কর্ম্ম প্রবিলীয়তে অকর্ম্মভাবমাপদ্যতে, অরূঢ়যোগপক্ষে যজ্ঞরক্ষণার্থং লোকসংগ্রহার্থং কর্ম্ম কুর্ব্বতইত্যর্থঃ। ২৩।

তদেবং পরমেশ্বরারাধনলক্ষণং কর্ম্ম জ্ঞানহেতুত্বেন বন্ধকত্বাভাবাদকর্ম্মৈব আরূঢ়াবস্থায়াস্তু অকর্ত্রাত্মজ্ঞানবাধিতত্বাৎ স্বাভাবিকমপি কর্ম্ম অকর্ম্মৈবেতি কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদি-

## শাঙ্করভাষ্যম্।

বার্পণম্মিতি যথা যদ্রজতং তচ্ছুক্তিকৈবেতি, ব্রহ্ম অর্পণমিত্যসমস্তে পদে যদর্পণবুদ্ধ্যা গৃহ্যতে লোকে তদস্য ব্রহ্মবিদো ব্রহ্মৈবেত্যর্থঃ, ব্রহ্ম হবিস্তথা যদ্ধবির্ব্বুদ্ধ্যা গৃহ্যমাণং তদ্ব্রহ্মৈবাস্য তথা ব্রহ্মাগ্নাবিতি সমস্তং পদমগ্নিরপি ব্রহ্মৈব যত্র হূয়তে ব্রহ্মণা কর্ত্রা ব্রহ্মৈব কর্ত্তেত্যর্থঃ যত্তেন হুতং হবনক্রিয়াপি তৎ ব্রহ্মৈব যত্তেন গন্তব্যং ফলং তদপি ব্রহ্মৈব, ব্রহ্মকর্ম্মসমাধিনা ব্রহ্মৈব কর্ম্ম ব্রহ্মকর্ম্ম তস্মিন্ সমাধির্যস্য স ব্রহ্মকর্ম্মসমাধিস্তেন ব্রহ্মকর্ম্মসমাধিনা ব্রহ্মৈব গন্তব্যমেবং লোকসংগ্রহং চিকীর্ষুণাপি ক্রিয়মাণং কর্ম্ম পরমার্থতোঽকর্ম্ম ব্রহ্মবুদ্ধ্যুপমৃদিতত্বাত্তদেবং সতি নিবৃত্তকর্ম্মণোঽপি সর্ব্বকর্ম্মসংন্যাসিনঃ সম্যগ্দর্শনস্তুত্যর্থং যজ্ঞত্বসম্পাদনং জ্ঞানস্য সুতরামুপপদ্যতে যদর্পণাদ্যধিযজ্ঞে প্রসিদ্ধং তদস্যাধ্যাত্মব্রহ্মৈব পরমার্থদর্শিন ইতি অন্যথা সর্ব্বস্য ব্রহ্মত্বেঽর্পণাদীনামেব বিশেষতো ব্রহ্মত্বাভিধানমনর্থকং স্যাৎ তস্মাদ্ব্রহ্মৈবেদং সর্ব্বমিত্যভিজানতঃ বিদুষঃ সর্ব্বকর্ম্মাভাবঃ

---

## গিরিকৃত টীকা।

ত্বেনানন্তরশ্লোককমবতারয়তি যতইতি। অর্পণশব্দস্য করণবিষয়ত্বং দর্শয়ন্নর্পণং ব্রহ্মেতি পদদ্বয়পক্ষে সামানাধিকরণ্যং সাধয়তি যেনেতি। যদ্রজতং সা শুক্তিরিতিবৎ বাধায়ামিদং সামানাধিকরণ্যমিত্যাহ তস্যেতি। তত্র দৃষ্টান্তমাহ যথেতি। উক্তেঽর্থে পদদ্বয়মবতারয়তি তদ্বদুচ্যতইতি। উক্তমেবার্থং স্পষ্টয়তি যথা যদিতি। সমাসসংখ্যাং ব্যাবর্ত্তয়তি ব্রহ্মেতি। পদদ্বয়পক্ষে বিবক্ষিতমর্থং কথয়সি যদর্পণেতি। ব্রহ্মহবিরিতি পদদ্বয়মবতার্য্য ব্যাচষ্টে ব্রহ্মেত্যাদিনা। যদর্পণবুদ্ধ্যা গৃহ্যতে তদ্ব্রহ্মবিদো ব্রহ্মৈবেতি যথোক্তং তথেহাপীত্যাহ তথেতি। অস্যেতি ষষ্ঠী ব্রহ্মবিদমধিকরোতি। পূর্ব্ববদসমাসমাশঙ্ক্য ব্যাবর্ত্তয়ন্ পদান্তরমবতার্য্য ব্যাকরোতি তথেতি। প্রাগুক্তসমাসবদিতি ব্যতিরেকঃ। তত্র বিবক্ষিতমর্থমাহ অগ্নিরপীতি। ব্রহ্মণেতি পদস্যাভিমতমর্থমাহ ব্রহ্মণেতি। কর্ত্রা হূয়ত ইতি সম্বন্ধঃ। কর্ত্তা ব্রহ্মণঃ সকাশাদ্ব্যতিরিক্তো নাস্তীত্যেতদভিমতমিত্যাহ ব্রহ্মৈবেতি। হুতমিত্যস্য বিবক্ষিতমর্থমাহ যত্তেনেতি। ব্রহ্মৈব তেনেত্যাদিভাগং বিভজতে ব্রহ্মৈবেত্যাদিনা। ব্রহ্ম কর্ম্মেত্যাদ্যবতার্য্য ব্যাকরোতি ব্রহ্মেতি। কর্ম্মত্বং ব্রহ্মণো জ্ঞেয়ত্বাৎ প্রাপ্যত্বাচ্চ প্রতিপত্তব্যং। এবং ব্রহ্মার্পণমন্ত্রস্য অক্ষরার্থমুক্ত্বা তাৎপর্য্যার্থমাহ এবমিতি। নিবৃত্তকর্ম্মাণং সন্ন্যাসিনং প্রতি কথমস্য মন্ত্রস্য প্রবৃত্তিরিত্যাশঙ্ক্যাহ নিবৃত্তেতি। যথা বাহ্যযজ্ঞানুষ্ঠানাসমর্থস্যাজ্ঞস্য সন্ধ্যাত্মকযজ্ঞো দৃষ্টস্তথা জ্ঞানস্য যজ্ঞত্বসম্পাদনং স্তুত্যর্থং সুতরামুপপদ্যতে তেন স্তুতিলাভাৎ কল্প-

## স্বামিকৃত টীকা।

ত্যনেনোক্তঃ কর্ম্মপ্রবিলয়ঃ প্রপঞ্চিতঃ, ইদানীং কর্ম্মণি তদঙ্গেষু চ ব্রহ্মৈবানুস্যূতং পশ্যতঃ কর্ম্মপ্রবিলয়মাহ ব্রহ্মার্পণমিতি। অর্প্যতেঽনেনেত্যর্পণং জুহ্বাদি তদপি ব্রহ্মৈব, অর্প্য-

## শাঙ্করভাষ্যম্।

কারকবুদ্ধ্যভাবাচ্চ, ন হি কারকবুদ্ধিরহিতং যজ্ঞাখ্যং কর্ম্ম দৃষ্টং সর্ব্বমেবাগ্নিহোত্রাদিকং কর্ম্মশব্দসমর্পিতদেবতাবিশেষসম্প্রদানাদিকারকবুদ্ধিমৎ কর্ত্রভিমানফলাভিসন্ধিমচ্চ দৃষ্টং নোপমৃদিতক্রিয়াকারককর্ম্মফলভেদবুদ্ধিমৎ কর্তৃত্বাভিমানফলাভিসন্ধিরহিতঞ্চ ইদন্তু ব্রহ্মবুদ্ধ্যুপমৃদিতার্পণাদিকারকক্রিয়াফলভেদবুদ্ধিমৎকর্ম্মাতোঽকর্ম্মৈব তৎ তথা চ দর্শিতং কর্ম্মণ্যভিপ্রবৃত্তোঽপি নৈব কিঞ্চিৎ করোতি সঃ, গুণাগুণেষু বর্ত্তন্তে, নৈব কিঞ্চিৎ করোমীতি যুক্তো মন্যেত তত্ত্ববিদিত্যাদিভিস্তথা চ দর্শয়ন্ তত্র তত্র ক্রিয়াকারকফলভেদবুদ্ধ্যুপমর্দ্দং করোতি, দৃষ্টা চ কাম্যাগ্নিহোত্রাদৌ কামোপমর্দ্দেন কাম্যাগ্নিহোত্রাদিহানিস্তথা মতিপূর্ব্বকামতিপূর্ব্বকত্বাদীনাং এবম্বিধেন কারকাত্মনাং কর্ম্মণাং কার্য্যবিশেষস্যারম্ভকত্বং দৃষ্টং তথেহাপি ব্রহ্মবুদ্ধ্যুপমৃদিতার্পণাদিকারকক্রিয়াফলভেদবুদ্ধের্ব্বাহ্যচেষ্টামাত্রেণ কর্ম্মাপি বিদুষোঽকর্ম্ম সম্পদ্যতেঽতউক্তং সমগ্রং প্রবিলীয়তইতি। অত্র কেচিদাহুর্যদ্ব্রহ্ম তদর্পণাদীনি

---

## গিরিকৃত টীকা।

নায়াঃ স্বাধীনত্বাদেবেত্যর্থঃ। জ্ঞানস্য যজ্ঞত্বসম্পাদনমভিনয়তি যদর্পণাদীতি। কেন প্রমাণেনাত্র যজ্ঞত্বসম্পাদনমবগতমিত্যাশঙ্ক্য অর্পণাদীনাং বিশেষতো ব্রহ্মত্বাভিধানানুপপত্তেত্যাহ অন্যথেতি। জ্ঞানস্য যজ্ঞত্বে সম্পাদিতে ফলিতমাহ তস্মাদিতি। আত্মৈবেদং সর্ব্বমিত্যাত্মব্যতিরেকেণ সর্ব্বস্যাবস্তুত্বং প্রতিপদ্যমানস্য কর্ম্মাভাবে হেত্বন্তরমাহ কারকেতি। কারকবুদ্ধেস্তেষ্বভিমানস্যাভাবেঽপি কিমিতি কর্ম্ম ন স্যাদিত্যাশঙ্ক্যাহ ন হীতি। উক্তমেবান্বয়ব্যতিরেকাভ্যাং প্রপঞ্চয়তি সর্ব্বমেবেতি। ইন্দ্রায়েত্যাদিনা শব্দেন সমর্পিতো দেবতাবিশেষঃ সম্প্রদানং কারকমাদিশব্দাদ্ব্রীহ্যাদিকরণকারকং তদ্বিষয়বুদ্ধিমৎ কর্ত্তাস্মীত্যভিমানপূর্ব্বকে মোক্ষঃ ফলমস্যেতি ফলাভিসন্ধিমচ্চ কর্ম্ম দৃষ্টমিতি যোজনা। অন্বয়মুক্ত্বা ব্যতিরেকমাহ নেত্যাদিনা। উপমৃদিতা ক্রিয়াদিভেদবিষয়া বুদ্ধির্যস্য তৎকর্ম্ম তথা কর্তৃত্বাভিমানপূর্ব্বকো মোক্ষঃ ফলমস্যেতি যোঽভিসন্ধিস্তেন রহিতঞ্চ ন কর্ম্ম দৃষ্টমিত্যন্বয়ঃ। তথাপি ব্রহ্মবিদো ভাসমানকর্ম্মাভাবে কিমায়াতমিত্যাশঙ্ক্যাহ ইদমিতি। যদিদং ব্রহ্মবিদো দৃশ্যমানং কর্ম্ম তদহমস্মি ব্রহ্মেতিবুদ্ধ্যা নিবাকৃতকারকাদিভেদবিষয়বুদ্ধিমদতশ্চ কর্ম্মৈব ন ভবতি তত্ত্বজ্ঞানে সতি ব্যাপকং কারকাদিব্যাবর্ত্তমানং ব্যাপ্যং কর্ম্মাপি ব্যাবর্ত্তয়তি তত্ত্ববিদঃ শরীরাদিচেষ্টা কর্ম্মাভাবঃ কর্ম্মব্যাপকরহিতত্বাৎ সুষুপ্তচেষ্টাবদিত্যর্থঃ।

## স্বামিকৃত টীকা।

মাগং হবিরপি ঘৃতাদিকং ব্রহ্মৈব, ব্রহ্মৈবাগ্নিস্তস্মিন্ ব্রহ্মণা কর্ত্রা হুতং, হোমোঽগ্নিশ্চ কর্ত্তা চ ক্রিয়া চ ব্রহ্মৈবেত্যর্থঃ, এবং ব্রহ্মণ্যেব কর্ম্মাত্মকে সমাধিশ্চিত্তৈকাগ্র্যং যস্য তেন ব্রহ্মৈব গন্তব্যং প্রাপ্যং ন তু ফলান্তরমিত্যর্থঃ॥ ২৪॥

## শাঙ্করভাষ্যম্।

ব্রহ্মৈব কিলার্পণাদিনা পঞ্চবিধেন কারকাত্মনা ব্যবস্থিতং সত্তদেব কর্ম্ম করোতি তত্র নার্পণাদিবুদ্ধির্নিবর্ত্ততে কিন্ত্বর্পণাদিষু ব্রহ্মবুদ্ধিরাধীয়তে যথা প্রতিমাদৌ বিষ্ণ্বাদিবুদ্ধির্যথা চ নামাদৌ ব্রহ্মবুদ্ধিরেবং সত্যমেবমপি স্যাদ্‌যদি জ্ঞানযজ্ঞস্তুত্যর্থং প্রকরণং ন স্যাৎ অত্র তু সম্যগ্‌দর্শনং জ্ঞানযজ্ঞশব্দিতমনেকান্ যজ্ঞশব্দিতান্ ক্রিয়াবিশেষানুপন্যস্য শ্রেয়ান্ দ্রব্যময়াদ্‌যজ্ঞাৎ জ্ঞানযজ্ঞ ইতি জ্ঞানং স্তৌতি অত্র চ সমর্থমিদং বচনং ব্রহ্মার্পণমিত্যাদি জ্ঞানস্য যজ্ঞত্বসম্পাদনে অন্যথা সর্ব্বস্য ব্রহ্মত্বেঽর্পণাদীনামেব বিশেষতো ব্রহ্মত্বাভিধানমনর্থকং স্যাৎ। যে ত্বর্পণাদিষু প্রতিমায়াং বিষ্ণুদৃষ্টিবৎ ব্রহ্মদৃষ্টিঃ ক্ষিপ্যতে নামাদিম্বিব চেতি ব্রুবতে ন তেষাং ব্রহ্মবিদ্যোক্তেহ বিবক্ষিতা স্যাদর্পণাদিবিষয়ত্বাৎ জ্ঞানস্য ন চ দৃষ্টিসম্পাদনজ্ঞানেন মোক্ষফলং প্রাপ্যতে ব্রহ্মৈব তেন গন্তব্যমিতি চোচ্যতে বিরুদ্ধঞ্চ সম্যগ্‌দর্শন-

## গিরিকৃত টীকা।

জ্ঞানবতো দৃশ্যমানং কর্ম্মাকর্ম্মৈবেত্যত্র ভগবদনুমতিমাহ তথাচেতি। ব্রহ্মবিদো দৃষ্টং কর্ম্ম নাস্তীত্যুক্তেঽপিতৎকারণানুপমর্দ্দাৎ পুনর্ভবিষ্যতীত্যাশঙ্ক্যাহ তথা চ দর্শয়িষ্যতি। অবিদ্বানিব বিদ্বানপি কর্ম্মণি প্রবর্ত্তমানো দৃশ্যতে তথাপি তস্য কর্ম্মাকর্ম্মৈবেত্যত্র দৃষ্টান্তমাহ দৃষ্টা চেতি। বিদ্বৎকর্ম্মাপি কর্ম্মত্বাবিশেষাদিতরকর্ম্মবৎ ফলারম্ভকমিত্যপি শঙ্কা ন যুক্তেত্যাহ তথেতি। ইদং কর্ম্মৈব কর্ত্তব্যমস্য চ ফলং ভোক্তব্যমিতি মতিস্তৎপূর্ব্বকাণ্যতৎপূর্ব্বকাণি চ কর্ম্মাণি তেষামবান্তরভেদসংগ্রহার্থমাদিপদং। দার্ষ্টান্তিকমাহ তথেতি। সপ্তম্যা বিদ্বৎপ্রকরণং পরামৃষ্টং ষষ্ঠ্যা সমানাধিকরণে। উক্তেঽর্থে পূর্ব্ববাক্যমনুকূলয়তি অত ইতি। ব্রহ্মার্পণমন্ত্রস্য স্বব্যাখ্যানমুক্ত্বা স্বযূথ্যব্যাখ্যানমনুবদতি অত্রেতি। প্রসিদ্ধোদ্দেশেনাপ্রসিদ্ধবিধানস্য ন্যায্যত্বাদপ্রসিদ্ধোদ্দেশেন প্রসিদ্ধবিধানং কথমিত্যাশঙ্ক্যাহ ব্রহ্মৈবেতি। কিলেত্যস্মিন্ ব্যাখ্যানে সিদ্ধান্তিনোঽসংপ্রতিপত্তিং সূচয়তি কর্ত্তৃকর্ম্মকরণসম্প্রদানাধিকরণরূপেণ পঞ্চবিধেন ব্রহ্মৈব ব্যবস্থিতং কর্ম্ম করোতীত্যঙ্গীকারাত্তদপ্রসিদ্ধাভাবাত্তদনুবাদেনার্পণাদিম্বিরুদ্ধস্তদ্দৃষ্টিবিধিরিত্যর্থঃ। দৃষ্টিবিধিপক্ষে সিদ্ধান্তাদ্বিশেষং দর্শয়তি তত্রেতি। অর্পণাদিষু কর্ত্তব্যাং ব্রহ্মবুদ্ধিং দৃষ্টান্তাভ্যাং স্পষ্টয়তি তথেত্যাদিনা। দৃষ্টিবিধানে বিধেয়দৃষ্টের্মানসক্রিয়াত্বেন সম্যগ্‌জ্ঞানত্বাভাবাৎ প্রকরণভঙ্গঃ স্যাদিত্যভিপ্রেত্য পরিহরতি সত্যমেবমিতি। বিধিৎসিতদৃষ্টিস্তুতিপরমেব প্রকরণং ন জ্ঞানস্তুতিপরমিত্যাশঙ্ক্য প্রকরণপর্য্যালোচনয়া জ্ঞানস্তুতিরেবাত্র প্রতিভাতীতি প্রতিপাদয়তি অত্র ত্বিতি। কিঞ্চ ব্রহ্মার্পণমন্ত্রস্যাপি সম্যগ্‌জ্ঞানস্তুতৌ সামর্থ্যং প্রতিভাতীত্যাহ অত্র চেতি। নম্বর্পণাদিষু ব্রহ্মদৃষ্টিং কুর্ব্বতামপি ব্রহ্মবিদ্যৈবাত্র বিবক্ষিতেতি পক্ষভেদাসিদ্ধিরিতি চেত্তত্রাহ যে ত্বিতি। যথা ব্রহ্মদৃষ্ট্যা নামাদিকমুপাস্যং তথার্পণাদিষু ব্রহ্মদৃষ্টিকরণে সত্যর্পণাদিকমেব প্রাধান্যেন জ্ঞেয়মিতি ব্রহ্মবিদ্যা যথোক্তেন বাক্যেন বিবক্ষিতা ন স্যাদিত্যর্থঃ। কিঞ্চ ব্রহ্মৈব তেন গন্তব্য-

দৈবমেবাপরে যজ্ঞং যোগিনঃ পর্য্যুপাসতে।
ব্রহ্মাগ্নাবপরে যজ্ঞং যজ্ঞেনৈবোপজুহ্বতি ॥ ২৫

## শাঙ্করভাষ্যম্।

মন্তরেণ মোক্ষফলং প্রাপ্যত ইতি প্রকৃতবিরোধশ্চ সম্যগ্‌দর্শনঞ্চ প্রকৃতং, কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যত্রান্তে চ সম্যগ্‌দর্শনং তস্যৈবোপসংহারাৎ শ্রেয়ান্ দ্রব্যময়াদ্‌যজ্ঞাৎ জ্ঞানযজ্ঞঃ পরন্তপঃ জ্ঞানং লব্ধ্বা পরং শান্তিমিত্যাদিনা সম্যগ্‌দর্শনস্তুতিমেব কুর্ব্বন্নুপক্ষীণোঽধ্যায়ঃ তত্রাকর্ম্মাদর্পণাদৌ ব্রহ্মদৃষ্টিরপ্রকরণেঽপ্রতিমায়ামিব বিষ্ণুদৃষ্টিরুচ্যত ইত্যনুপপন্নং তস্মা-দ্‌যথাব্যাখ্যাতার্থএবায়ং শ্লোকঃ ॥ ২৪ ॥

তত্র অধুনা সম্যগ্‌দর্শনস্য যজ্ঞত্বং সম্পাদ্য তৎস্তুত্যর্থমন্যেঽপি যজ্ঞা উপক্ষিপ্যন্তে দৈব মেবেত্যাদিনা। দৈবমেব দেবা ইজ্যন্তে যেন যজ্ঞেনাসৌ দৈবো যজ্ঞস্তমেবাপরে যজ্ঞং

## গিরিকৃত টীকা।

মিতি ব্রহ্মপ্রাপ্তিফলাভিধানাদপি দৃষ্টিবিধানমশ্লিষ্টমিত্যাহ ন চেতি। ন চার্পণাদ্যালম্বনা দৃষ্টির্ব্রহ্ম প্রাপয়ত্যপ্রতীকালম্বনান্নয়তীতি ন্যায়বিরোধাদিতিভাবঃ। দৃষ্টিবিধানেঽপি নিয়োগবলাদেব স্বর্গবদদৃষ্টো মোক্ষো ভবিষ্যতীত্যাশঙ্ক্যাহ বিরুদ্ধঞ্চেতি। জ্ঞানদেব কৈবল্য-মুক্ত্বা মার্গান্তরাপবাদিন্যা শ্রুত্যা বিরুদ্ধং মোক্ষস্য অবিদ্যানিবৃত্তিলক্ষণস্য দৃষ্টস্য নৈয়োগি-কত্ববচনমিত্যর্থঃ। দৃষ্টিনিয়োগান্মোক্ষো ভবতি ইত্যেতৎ করণাবিরুদ্ধঞ্চেত্যাহ প্রকৃতেতি। তদেব প্রপঞ্চয়তি সম্যগ্‌দর্শনঞ্চেতি। অন্তে চ সম্যগ্‌র্শনং প্রকৃতমিতি সম্বন্ধঃ। তত্র হেতুঃ তস্যৈবেতি। সম্যগ্‌জ্ঞানেনোপক্রম্য তেনৈবোপসংহারেঽপি মধ্যে কিঞ্চিদন্যদুক্ত-মিতি প্রকরণস্যাতদ্বিষয়ত্বমিত্যাশঙ্ক্যাহ শ্রেয়ানিতি। প্রকরণে সম্যগ্‌জ্ঞানবিষয়ে সত্য-নুপপন্নো দর্শনবিধিরিতি ফলিতমাহ তত্রেতি। ব্রহ্মার্পণমন্ত্রে পরকীয়ব্যাখ্যানাসম্ভবে স্বকী-য়ব্যাখ্যানং ব্যবস্থিতমিত্যুপসংহরতি তস্মাদিতি ॥ ২৪ ॥

জ্ঞানস্য যজ্ঞত্বং সংপাদ্য পূর্ব্বশ্লোকে স্থিতে সত্যধুনা তস্যৈব জ্ঞানস্য স্তুত্যর্থং যজ্ঞান্তরনির্দ্দেশার্থমুত্তরগ্রন্থপ্রবৃত্তিরিত্যাহ তত্রেতি। সর্ব্বস্য শ্রেয়ঃসাধনস্য মুখ্যগৌণ-বৃত্তিভ্যাং যজ্ঞত্বং দর্শয়ন্ আদৌ যজ্ঞদ্বয়মাদর্শয়তি দৈবমেবেতি। প্রতীকমাদায় দৈবযজ্ঞং ব্যাচষ্টে দেবাইতি। সম্যগ্‌জ্ঞানাখ্যং যজ্ঞং বিভজতে ব্রহ্মাগ্নাবিতি। তত্র ব্রহ্মশব্দার্থং শ্রুত্যবষ্টম্ভেন স্পষ্টয়তি সত্যমিতি। যদজমমৃতমবিপরীতমপরিচ্ছিন্নং ব্রহ্ম তচ্চ পরানন্দ-

## স্বামিকৃত টীকা।

তদেবং যজ্ঞত্বেন সম্পাদিতং সর্ব্বত্র ব্রহ্মদর্শনলক্ষণং জ্ঞানং সর্ব্বযজ্ঞোপায়প্রাপ্যত্বাৎ সর্ব্বযজ্ঞেভ্যঃ শ্রেষ্ঠমিত্যেবং স্তোতুমধিকারিভেদেন জ্ঞানোপায়ভূতান্ বহূন্ যজ্ঞনাহ দৈব-

শ্রোত্রাদীনীন্দ্রিয়াণ্যন্যে সংযমাগ্নিষু জুহ্বতি।
শব্দাদীন্ বিষয়ানন্য ইন্দ্রিয়াগ্নিষু জুহ্বতি ॥ ২৬ ॥

## শাঙ্করভাষ্যম্।

যোগিনঃ কর্ম্মিণঃ পর্য্যুপাসতে কুর্ব্বন্তীত্যর্থঃ ব্রহ্মাগ্নৌ সত্যং জ্ঞানমনন্তংব্রহ্ম বিজ্ঞানমানন্দং ব্রহ্ম যৎ সাক্ষাদপরোক্ষাদ্ব্রহ্ম য আত্মা সর্ব্বান্তরইত্যাদিবচনোক্তমশনায়াদিসর্ব্বসংসারধর্ম্ম-বর্জ্জিতং নেতি নেতীতি নিরস্তাশেষবিশেষং ব্রহ্মশব্দেনোচ্যতে ব্রহ্ম চ তদগ্নিশ্চ স হোমাদি-করণত্ববিবক্ষয়া ব্রহ্মাগ্নিস্তস্মিন্ ব্রহ্মাগ্নাবপরেঽন্যে ব্রহ্মবিদো যজ্ঞং যজ্ঞশব্দবাচ্য আত্মা আত্মনামসু যজ্ঞশব্দস্য পাঠাৎ তমাত্মানং যজ্ঞং পরমার্থতঃ পরমেব ব্রহ্ম সন্তং বুদ্ধ্যা-দ্যুপাধিসংযুক্তমব্যস্তসর্ব্বোপাধিধর্ম্মফলাহুতিরূপং যজ্ঞেনৈবাত্মনৈবোক্তলক্ষণেনোপজুহ্বতি প্রতিক্ষিপন্তি সোপাধিকস্যাত্মনো নিরুপাধিকেন পরব্রহ্মস্বরূপেণৈব যদ্দর্শনং স তস্মিন্ হোমস্তং কুর্ব্বন্তি ব্রহ্মাত্মৈকত্বদর্শননিষ্ঠাঃ সংন্যাসিন ইত্যর্থঃ ॥ ২৫ ॥

## গিরিকৃত টীকা।

ত্বেন পরমপুরুষার্থত্বমাহ বিজ্ঞানমিতি। তস্য জ্ঞানাধিকরণত্বেন জ্ঞানত্বমৌপচারিকমি-ত্যাশঙ্ক্যাহ যৎ সাক্ষাদিতি। জীবব্রহ্মবিভাগে কামপরিচ্ছিন্নত্বমিত্যাশঙ্ক্য বিশিনষ্টি য আত্মেতি। পরস্যৈবাত্মত্বং সর্ব্বস্মাদ্দেহাদেরব্যাকৃতান্তরত্বেন সাধয়তি সর্ব্বান্তরইতি। বিধি-মুখং সর্ব্বমেবোপনিষদ্বাক্যং ব্রহ্মবিষয়মাদিশব্দার্থঃ। নিষেধমুখং ব্রহ্মবিষয়মুপনিষদ্বাক্যম-শেষমেবার্থতো নিবধ্নাতি অশনায়েতি। ব্রহ্মণ্যগ্নিশব্দপ্রয়োগে নিমিত্তমাহ স হোমেতি। বুদ্ধ্যারূঢ়তয়া সর্ব্বস্য দাহকত্বাদ্বিলয়স্য বা হেতুত্বাদিতি দ্রষ্টব্যং। যজ্ঞশব্দস্যাত্মনি স্বং পদার্থে প্রয়োগে হেতুমাহ আত্মনামস্বিতি। আধারাধেয়ভাবেন বাস্তবভেদং ব্রহ্মাত্মনো-র্ব্যাবর্ত্তয়তি পরমার্থতইতি। কথং তর্হি হোমো ন হি তস্যৈব তত্র হোমঃ সম্ভবতীত্যা-শঙ্ক্যাহ বুদ্ধ্যাদীতি। উপাধিসংযোগফলং কথয়তি অধ্যস্তেতি। উপাধ্যধ্যাসদ্বারা তদ্ধ-র্ম্মাধ্যাসে প্রাপ্তমর্থং নির্দ্দিশতি আহুতীতি। ইত্থম্ভূতলক্ষণাং তৃতীয়ামেব ব্যাকরোতি উক্তেতি। অশনায়াদিসর্ব্বসংসারধর্ম্মবর্জ্জিতত্বেন নির্ব্বিশেষেণ স্বরূপেণেতি যাবৎ। আত্মনো ব্রহ্মণি হোমমেব প্রকটয়তি সোপাধিকস্যেতি। পর ইত্যস্যার্থং স্ফোরয়তি ব্রহ্মেতি ॥ ২৫ ॥

## স্বামিকৃত টীকা।

মিত্যাদিভিরষ্টভিঃ। দেবা ইন্দ্রবরুণাদয় ইজ্যন্তে যস্মিন, এবকারেণেন্দ্রাদিষু ব্রহ্মবুদ্ধি-রাহিত্যং দর্শিতং, তদেবং যজ্ঞমপরে কর্ম্মযোগিনঃ পর্য্যুপাসতে শ্রদ্ধয়ানুতিষ্ঠন্তি, অপরে তু জ্ঞানযোগিনো ব্রহ্মরূপেঽগ্নৌ যজ্ঞেনৈবোপায়েন ব্রহ্মার্পণমিত্যাদ্যুক্তপ্রকারেণ যজ্ঞমুপ-জুহ্বতি যজ্ঞাদিসর্ব্বকর্ম্মাণি প্রবিলাপয়ন্তীত্যর্থঃ, সোঽয়ং জ্ঞানযজ্ঞঃ ॥ ২৫ ॥

সর্ব্বাণীন্দ্রিয়কর্ম্মাণি প্রাণকর্ম্মাণি চাপরে।
আত্মসংযমযোগাগ্নৌ জুহ্বতি জ্ঞানদীপিতে ॥ ২৭ ॥

## শাঙ্করভাষ্যম্।

সোঽয়ং সম্যগ্‌দর্শনলক্ষণো যজ্ঞো দৈবযজ্ঞাদিষু যজ্ঞেষু প্রক্ষিপ্যতে ব্রহ্মার্পণমিত্যাদি-শ্লোকৈঃ শ্রেয়ান্ দ্রব্যময়াৎ যজ্ঞাৎ জ্ঞানযজ্ঞঃ পরন্তপ ইত্যাদিনা স্তুত্যর্থং শ্রোত্রাদীনী-তি। শ্রোত্রাদীনীন্দ্রিয়াণ্যন্যে যোগিনঃ সংযমাগ্নিষু প্রতীন্দ্রিয়ং সংযমো ভিদ্যত ইতি বহুব-চনং, সংযমা এবাগ্নয়স্তেষু জুহ্বতীন্দ্রিয়সংযমমেব কুর্ব্বন্তীত্যর্থঃ শব্দাদীন্ বিষয়ানন্যে ইন্দ্রি-য়াগ্নিষু জুহ্বতি ইন্দ্রিয়াণ্যেবাগ্নয়স্তেষ্বিন্দ্রিযাগ্নিষু জুহ্বতি শ্রোত্রাদিভিরবিরুদ্ধবিষয়গ্রহণং হোমং মন্যন্তে ॥ ২৬ ॥

কিঞ্চ সর্ব্বাণীতি। সর্ব্বাণীন্দ্রিয়কর্ম্মাণি ইন্দ্রিয়াণাং কর্ম্মাণীন্দ্রিয়কর্ম্মাণি তথা প্রাণ-কর্ম্মাণি প্রাণো বায়ুরাধ্যাত্মিকস্তৎকর্ম্মাণ্যাকুঞ্চনপ্রসারণাদীনি তানি চাপরে আত্মসংযম-

---

## গিরিকৃত টীকা।

উক্তস্য জ্ঞানযজ্ঞস্য দৈবযজ্ঞাদিষু যজ্ঞেষু ব্রহ্মার্পণমিত্যাদিশ্লোকৈরুপক্ষিপ্যমাণত্বং দর্শ-য়তি সোঽয়মিতি। উপক্ষেপপ্রয়োজনমাহ শ্রেয়ানিতি। সম্প্রতি যজ্ঞদ্বয়মুপন্যস্যতি শ্রোত্রাদী-নীতি। বাহ্যানাং করণানাং মনসি সংযমস্যৈকত্বাৎ কথং সংযমাগ্নিষ্বিতি বহুবচন-মিত্যাশঙ্ক্যাহ প্রতীন্দ্রিয়মিতি। সংযমানাং প্রত্যাহারাধিকরণত্বেন ব্যবস্থিতানাং মনো-রূপাণাং হোমাধারত্বাদগ্নিত্বং ব্যপদিশতি সংযমা ইতি। বিষয়েভ্যোঽন্তর্ব্বাহ্যানীন্দ্রিয়াণি প্রত্যাহরন্তীতি সংযমযজ্ঞং সংক্ষিপ্য দর্শয়তি ইন্দ্রিয়েতি। শ্রোত্রাদীন্দ্রিয়াগ্নিষু শব্দাদিবিষয়-হোমস্য তত্তদিন্দ্রিয়ৈস্তত্তদ্বিষয়োপভোগলক্ষণ্য সর্ব্বসাধারণত্বমাশঙ্ক্য প্রতিবিদ্ধান্ বর্জ্জয়িত্বা রাগদ্বেষরহিতো ভূত্বা প্রাপ্তান্ বিষয়ান্ ভুঙ্‌ক্তে তৈস্তৈরিন্দ্রিয়ৈরিতি বিবক্ষিতং হোমং বিশদয়তি শ্রোত্রাদিভিরিতি ॥ ২৬ ॥

যজ্ঞান্তরং কথয়তি কিঞ্চেতি। ইন্দ্রিয়াণাং কর্ম্মাণি শ্রবণবদনাদীনি আত্মনি সংযমো-

## স্বামিকৃত টীকা।

শ্রোত্রাদীনীতি। অন্যে নৈষ্ঠিকা ব্রহ্মচারিণস্তত্তদিন্দ্রিয়সংযমরূপেষগ্নিষু শ্রোত্রাদীনি জুহ্বতি প্রবিলাপয়ন্তি ইন্দ্রিয়াণি নিরুধ্য সংযমপ্রধানাস্তিষ্ঠন্তীত্যর্থঃ, ইন্দ্রিয়াণ্যেবাগ্নয়স্তেষু শব্দাদীনন্যে গৃহস্থা জুহ্বতি বিষয়ভোগসময়েঽপ্যনাসক্তাঃ সন্তোঽগ্নিত্বেন ভাবিতেষু ইন্দ্রি-য়েষু হবিষ্ট্বেন ভাবিতান্ শব্দাদীন্ প্রক্ষিপন্তীত্যর্থঃ ॥ ২৬ ॥

কিঞ্চ সর্ব্বাণীতি। অপরে ধ্যাননিষ্ঠা বুদ্ধীন্দ্রিয়াণাং শ্রোত্রাদীনাং কর্ম্মাণি শ্রবণদর্শনা-দীনি কর্ম্মেন্দ্রিয়াণাং বাক্‌পাণ্যাদীনাং কর্ম্মাণি বচনোপাদানাদীনি প্রাণাদ্যাশ্চ দশানাং

দ্রব্যযজ্ঞাস্তপোযজ্ঞা যোগযজ্ঞাস্তথাপরে।
স্বাধ্যায়জ্ঞানযজ্ঞাশ্চ যতয়ঃ সংশিতব্রতাঃ ॥ ২৮ ॥

## শাঙ্করভাষ্যম্।

যোগাগ্নৌ আত্মনি সংযম আত্মসংযমঃ সএব যোগাগ্নিস্তস্মিন্নাত্মসংযমযোগাগ্নৌ জুহ্বতি প্রক্ষিপন্তি জ্ঞানাগ্নিদীপিতে স্নেহেনেব প্রদীপিতে বিবেকবিজ্ঞানেনোজ্জ্বলভাবমাপাদিতে জুহ্বতি প্রবিলাপয়ন্তি ইত্যর্থঃ ॥ ২৭ ॥

দ্রব্যেতি। দ্রব্যযজ্ঞাস্তীর্থেষু দ্রব্যবিনিয়োগং যজ্ঞবুদ্ধ্যা কুর্ব্বন্তি যে তে দ্রব্যযজ্ঞাস্তপোযজ্ঞাস্তপো যজ্ঞো যেষাং তপস্বিনাং তে তপোযজ্ঞা যোগযজ্ঞাঃ প্রাণায়ামপ্রত্যাহারাদিলক্ষণো যোগো যজ্ঞো যেষাং তে যোগযজ্ঞাস্তথাপরে স্বাধ্যায়জ্ঞানযজ্ঞাশ্চ স্বাধ্যায়ো যথাবিধি ঋগাদ্যভ্যাসো যজ্ঞো যেষাং তে স্বাধ্যায়যজ্ঞাঃ জ্ঞানযজ্ঞাঃ শাস্ত্রার্থপরিজ্ঞানং যজ্ঞো যেষাং তে জ্ঞানযজ্ঞাঃ স্বাধ্যায়যজ্ঞা জ্ঞানযজ্ঞাশ্চ যতয়ো যতনশীলাঃ সংশিতব্রতাঃ সম্যক্ শিতানি তনূকৃতানি তীক্ষ্ণীকৃতানি ব্রতানি যেষাং তে সংশিতব্রতাঃ ॥ ২৮ ॥

---

## গিরিকৃত টীকা।

ধারণাধ্যানসমাধিলক্ষণঃ। সর্ব্বমপি ব্যাপারং নিরুধ্য আত্মনি চিত্তসমাধানং কুর্ব্বন্তীত্যাহ বিবেকেতি ॥ ২৭ ॥

যজ্ঞষট্কমবতারয়তি দ্রব্যেতীতি। তত্র দ্রব্যযজ্ঞান্ পুরুষানুপাদায় বিভজতে তীর্থেম্বিতি। তপস্বিনাং যজ্ঞবুদ্ধ্যা তপোঽনুতিষ্ঠতাং নিয়মবতাং ইত্যর্থঃ, প্রত্যাহারাদীত্যাদিশব্দেন যমনিয়মাসনধ্যানধারণাসমাধয়ো গৃহ্যন্তে, যথাবিধি প্রাঙ্মুখত্বপবিত্রপাণিত্বাদ্যধ্যবিধিমনতিক্রম্যেতি যাবৎ, ব্রতানাং তীক্ষ্ণীকরণমতিদৃঢ়ত্বং ॥ ২৮ ॥

## স্বামিকৃত টীকা।

কর্ম্মণি প্রাণস্য বহির্গমনং, অপানস্যাধোগমনং, ব্যানস্য ব্যায়নাকুঞ্চনপ্রসারণাদীনি, সমানস্যাশিতপীতাদীনাং সমুন্নয়নং, উদানস্যোর্দ্ধনয়নং, উদ্গারে নাগ আখ্যাতঃ কূর্ম্ম উন্মীলনে স্মৃতঃ, কৃকরঃ ক্ষুৎকরো জ্ঞেয়ো দেবদত্তো বিজৃম্ভণে, ন জহাতি মৃতঞ্চাপি সর্ব্বব্যাপী ধনঞ্জয়ঃ, ইত্যেবংরূপাণি জুহ্বতি আত্মনি সংযমো ধ্যানৈকাগ্র্যং সএব যোগঃ সএবাগ্নিস্তস্মিন্ জ্ঞানেন ধ্যেয়বিষয়েন দীপিতে প্রজ্বলিতে ধ্যেয়ং সম্যগ্জ্ঞাত্বা তস্মিন্মনঃ সংযম্য তানি সর্ব্বাণি কর্ম্মাণি উপরময়ন্তীত্যর্থঃ ॥ ২৭ ॥

কিঞ্চ দ্রব্যযজ্ঞাইত্যাদি। দ্রব্যদানমেব যজ্ঞো যেষাং তে দ্রব্যযজ্ঞাঃ, কৃচ্ছ্রচান্দ্রায়ণাদি, তপএব যজ্ঞো যেষাং তে তপোযজ্ঞাঃ, যোগশ্চিত্তবৃত্তিনিরোধলক্ষণসমাধিঃ সএব যজ্ঞো যেষাং তে যোগযজ্ঞাঃ, স্বাধ্যায়েন বেদেন শ্রবণমননাদিনা যত্তদর্থজ্ঞানং তদেব যজ্ঞো যেষাং তে,

অপানে জুহ্বতি প্রাণং প্রাণেঽপানং তথাপরে।
প্রাণাপানগতী রুদ্ধা প্রাণায়ামপরায়ণাঃ।
অপরে নিয়তাহারাঃ প্রাণান্ প্রাণেষু জুহ্বতি ॥ ২৯॥

## শাঙ্করভাষ্যম্।

কিঞ্চ অপানইতি। অপানে অপানবৃত্তৌ জুহ্বতি প্রক্ষিপন্তি প্রাণং প্রাণবৃত্তিং পূরকাখ্যং প্রাণায়ামং কুর্ব্বন্তীত্যর্থঃ, প্রাণেঽপানং তথাপরে জুহ্বতি রেচকাখ্যঞ্চ প্রাণায়ামং কুর্ব্বন্তীত্যেতৎপ্রাণাপানগতী রুদ্ধা মুখনাসিকাভ্যাং বায়োর্নির্গমনং প্রাণস্য গতিস্তদ্বিপর্য্যয়েণাধোগমনমপানস্য তে প্রাণাপানগতী এতে রুদ্ধা নিরুধ্য প্রাণায়ামপরায়ণাঃ প্রাণায়ামস্তৎপরাঃ কুম্ভকাখ্যং প্রাণায়ামং কুর্ব্বন্তীত্যর্থঃ। কিঞ্চ অপর ইতি, অপরে নিয়তাহারা নিয়তঃ পরিমিতঃ আহারো যেষাং তে নিয়তাহারাঃ সন্তঃ প্রাণান্ বায়ুভেদান্ প্রাণভেদেষেব

## গিরিকৃত টীকা

প্রাণায়ামাখ্যং যজ্ঞমুদাহরতি কিঞ্চেতি। প্রাণায়ামপরায়ণাঃ সন্তো রেচকং পূরকঞ্চ কৃত্বা কুম্ভকং কুর্ব্বন্তীত্যাহ প্রাণেতি। প্রাণাপানয়োর্গতী শ্বাসপ্রশ্বাসৌ নিরুধ্য কিং কুর্ব্বন্তীত্যপেক্ষায়ামাহ কিঞ্চেতি। প্রাণাপনগতিনিরোধরূপং কুম্ভকং কৃত্বা পুনঃ পুনর্ব্বায়ুজয়ং কুর্ব্বন্তীত্যর্থঃ, আহারস্য পরিমিতত্বং হিতত্বমধ্যেত্বোপলক্ষণার্থং। প্রাণানাং প্রাণেষু

## স্বামিকৃত টীকা।

যদ্বা বেদপাঠযজ্ঞাস্তদর্থজ্ঞানযজ্ঞাশ্চেতি দ্বিবিধা যতয়ঃ প্রযত্নশীলাঃ সম্যক্ শিতং মিশিতং তীক্ষ্ণীকৃতং ব্রতং যেষাং তে ॥ ২৮॥

কিঞ্চ অপানে ইতি। অপানেঽধোবৃত্তৌ প্রাণমূর্দ্ধবৃত্তিং পূরকেণ জুহ্বতি পূরককালে প্রাণমপানেনৈকীকুর্ব্বন্তি তথা কুম্ভকেন প্রাণাপানয়োরূর্দ্ধাধোগতী রুদ্ধা রেচককালেঽপানং প্রাণে জুহ্বতি এবং পূরককুম্ভকরেচকৈঃ প্রাণায়ামপরায়ণা অপরে ইত্যর্থঃ। কিঞ্চ অপরে ইতি অপরে ত্বাহারসংকোচমভ্যস্যন্তঃ স্বয়মেব জীর্য্যমাণেম্বিন্দ্রিয়েষু তত্তদিন্দ্রিয়বৃত্তিলয়ং হোমং ভাবয়ন্তীত্যর্থঃ, যদ্বা আপনে জুহ্বতি প্রাণং প্রাণেঽপানং তথাপর ইত্যনেন পূরকরেচকয়োরাবর্ত্তমানয়োর্হংসঃ সোঽহমিত্যনুলোমতঃ প্রতিলোমতশ্চাভিব্যজ্যমানেনাজপামন্ত্রেণ তত্ত্বংপদার্থৈক্যং ব্যতীহারেণ ভাবয়ন্তীত্যর্থঃ, তদুক্তং যোগশাস্ত্রে, সকারেণ বহির্যাতি হকারেণ বিশেৎ পুনঃ। প্রাণস্তত্র সএবাহমহং স ইতি চিন্তয়েদিতি। প্রাণাপানগতী রুদ্ধেত্যনেন প্রোক্তেন প্রাণায়ামযজ্ঞা অপরে কথ্যন্তে, তত্রায়মর্থঃ, দ্বৌ ভাগৌ পূরয়েদন্নৈর্জলেনৈকং প্রপূরয়েৎ মারুতস্য প্রচারার্থং চতুর্থমবশেষয়েৎ ইত্যেবমাদিবচনোক্তো নিয়ত আহারো যেষাং তে কুম্ভকেন প্রাণাপানগতী রুদ্ধা প্রাণসংযমপরায়ণাঃ সন্তঃ প্রাণানিন্দ্রিয়াণি

সর্ব্বেঽপ্যেতে যজ্ঞবিদো যজ্ঞক্ষয়িতকল্মষাঃ।
যজ্ঞশিষ্টামৃতভুজো যান্তি ব্রহ্ম সনাতম্ ॥ ৩০ ॥
নায়ং লোকোঽস্ত্যযজ্ঞস্য কুতোঽন্যঃ কুরুসত্তম ॥ ৩১ ॥

## শাঙ্করভাষ্যম্

জুহ্বতি যস্য যস্য বায়োর্জয়ঃ ক্রিয়তে ইতরান্ বায়ুভেদাংস্তস্মিন্ জুহ্বতি তে তত্র প্রবিষ্টাইব ভবন্তি ॥ ২৯ ॥

সর্ব্বইতি। সর্ব্বেঽপ্যেতে যজ্ঞবিদো যজ্ঞক্ষয়িতকল্মষাঃ যজ্ঞৈর্যথোক্তৈঃ ক্ষয়িতো নাশিতঃ কল্মষো যেষাং তে যজ্ঞক্ষয়িতকল্মষাঃ এবং যথোক্তান্ যজ্ঞান্ নির্ব্বর্ত্ত্য যজ্ঞশিষ্টামৃত-ভুজো যজ্ঞানাং শিষ্টং যজ্ঞশিষ্টং যজ্ঞশিষ্টঞ্চ তদমৃতঞ্চ যজ্ঞশিষ্টামৃতং তৎ ভুঞ্জতইতি যজ্ঞশিষ্টামৃতভুজো যথোক্তাম্ যজ্ঞান্ কৃত্বা তচ্ছিষ্টেন কালেন যথা বিধিচোদিতমন্নমমৃতাখ্যং ভুঞ্জতইতি যজ্ঞশিষ্টামৃতভুজো যান্তি গচ্ছন্তি ব্রহ্ম সনাতনং চিরন্তনং মুমুক্ষবশ্চেৎ কালাতি-ক্রমাপেক্ষয়েতি শব্দসামর্থ্যাৎ গম্যতে ॥ ৩০ ॥

## গিরিকৃত টীকা।

হোমমেব বিভজতে যস্যেতি। জিতেষু বায়ুভেদেষজিতানাং তেষাং হোমপ্রকারং প্রকট-য়তি তে তত্রেতি ॥ ২৯ ॥

প্রকৃতান্ যজ্ঞানুপসংহরতি সর্ব্বেঽপীতি। যথোক্তযজ্ঞনির্ব্বর্ত্তনানন্তরং ক্ষীণে কল্মষে কিং স্যাদিত্যাশঙ্ক্যাহ এবমিতি। যথোক্তানাং যজ্ঞানাং মধ্যে কেনচিদপি যজ্ঞেনাবিশেষিতস্য প্রত্যবায়ং দর্শয়তি নায়মিতি পাদান্তরেণ। কথং যথোক্তযজ্ঞানুষ্ঠায়িনামবশিষ্টেন কালেন বিহিতান্নভুজাং ব্রহ্মপ্রাপ্তিরিত্যাশঙ্ক্য মুমুক্ষুত্বে সতি চিত্তশুদ্ধিদ্বারেণেত্যাহ মুমুক্ষবশ্চেদিতি। তৎ কিমিদানীং সাক্ষাদেব মোক্ষো বিবক্ষিতঃ ? তথা চ গতিশ্রুতিবিরোধঃ স্যাদিত্যাশঙ্ক্য গতিনির্দ্দেশসামর্থ্যাৎ ক্রমমুক্তিরত্রাভিপ্রেতেত্যাহ কালাতীতি ॥ ৩০ ॥

## স্বামিকৃত টীকা।

প্রাণেষু জুহ্বতি কুম্ভকেন হি সর্ব্বে প্রাণা একীভবন্তি তত্রৈব লীয়মানেম্বিন্দ্রিয়েষু হোমং ভাবয়ন্তীত্যর্থঃ, তদুক্তং যোগশাস্ত্রে, যথা যথা সদাভ্যাসান্মনসঃ স্থিরতা ভবেৎ, বায়ুবাক্কা-য়দৃষ্টীনাং স্থিরতা চ তথা তথেতি ॥ ২৯ ॥

তদেষামুক্তানাং দ্বাদশানাং যজ্ঞবিদাং ফলমাহ সর্ব্বেঽপ্যেতে ইতি। যজ্ঞান্ বিন্দন্তি লভন্তে ইতি যজ্ঞবিদো যজ্ঞজ্ঞা ইতি বা যজ্ঞৈঃ ক্ষয়িতং নাশিতং কল্মষং যৈ যজ্ঞান্ কৃত্বা-বশিষ্টকালেঽনিষিদ্ধমন্নমমৃতরূপং ভুঞ্জত ইতি তথা, তে সনাতনং নিত্যং ব্রহ্ম জ্ঞানদ্বারেণ প্রাপ্নুবন্তি ॥ ৩০ ॥

এবং বহুবিধা যজ্ঞা বিততা ব্রহ্মণো মুখে।
কর্ম্মজান্ বিদ্ধি তান্ সর্ব্বানেবং জ্ঞাত্বা বিমোক্ষ্যসে ॥ ৩২ ॥

## শাঙ্করভাষ্যম্।

নায়মিতি। নায়ং লোকঃ সর্ব্বপ্রাণিসাধারণোঽপ্যস্তি যথোক্তানাং যজ্ঞানামেকোঽপি যজ্ঞো যস্য নাস্তি সোঽযজ্ঞস্তস্য কুতোঽন্যো বিশিষ্টসাধনসাধ্যঃ কুরুসত্তম ॥ ৩১ ॥

এবমিতি। এবং যথোক্তা বহুবিধা বহুপ্রকারা যজ্ঞা বিততা বিস্তীর্ণা ব্রহ্মণো বেদস্য মুখে দ্বারে বেদদ্বারেণাবগম্যমানাঃ ব্রহ্মণো মুখে বিততা উচ্যন্তে তদ্ যথা বাচি হি প্রাণং জুহুম ইত্যাদয়ঃ কর্ম্মজান্ কায়িকবাচিকমানসকর্ম্মোদ্ভবান্ বিদ্ধি তান্ সর্ব্বাননাত্মজান্ নির্ব্ব্যাপারো হ্যাত্মা অত এবং জ্ঞাত্বা মোক্ষ্যসেঽশুভাৎ ন মদ্ব্যাপারা ইমে নির্ব্ব্যাপারোঽহমুদাসীন ইত্যেবং জ্ঞাত্বাস্মাৎ সম্যগ্দর্শনাৎ মোক্ষ্যসে সংসারবন্ধনাদিত্যর্থঃ ॥ ৩২ ॥

## গিরিকৃত টীকা।

তৃতীয়ং পাদং ব্যাচষ্টে নায়মিতি। বিবক্ষিতং কৈমুতিকন্যায়মাহ কুতইতি। সাধারণ-লোকাভাবে পুনরসাধারণলোকপ্রাপ্তিদূরনিরস্তেত্যর্থঃ। যথোক্তেঽর্থে বুদ্ধিসমাধানং কুরু-কুলপ্রধানস্যার্জ্জুনস্য অনায়াসলভ্যমিতি বক্তুং কুরুসত্তমেত্যুক্তং ॥ ৩১ ॥

উক্তানাং যজ্ঞানাং বেদমূলত্বেনোৎপ্রেক্ষানিবন্ধনত্বং নিবস্যতি এবমিতি। আত্মব্যা-পারসাধ্যত্বমুক্তকর্ম্মণামাশঙ্ক্য দূষয়তি কর্ম্মজানিতি। আত্মনো নির্ব্ব্যাপারত্বজ্ঞানে ফলমাহ এবমিতি। কথং যথোক্তানাং যজ্ঞানাং বেদস্য মুখে বিস্তীর্ণত্বমিত্যাশঙ্ক্যাহ বেদদ্বারে-ণেতি। আত্মনোঽবগম্যমানত্বমেবোদাহরতি তদ্যথেতি। এতদ্ধস্ম বৈ তৎ পূর্ব্বে বিদ্বাংস আহুরিত্যুপক্রম্যাধ্যয়নাদ্যাক্ষিপ্য হেত্বাকাঙ্ক্ষায়ামুক্তং বাচি হীতি। জ্ঞানশক্তিমদ্বিষয়ে ক্রিয়াশক্তিমদুপসংহারোঽত্র বিবক্ষিতঃ, প্রাণে বা বাচং যো হ্যেব প্রভবঃ সএবাপ্যয় ইতি বাক্যমাদিশব্দার্থঃ, জ্ঞানশক্তিমতাং ক্রিয়াশক্তিমতাস্বান্যোন্যোৎপত্তিপ্রলয়ত্বাত্তদ্ভাবনো-ধ্যয়নাসিদ্ধিরিত্যর্থঃ। কর্ম্মণামাত্মাব্যাপারজন্যত্বাভাবে হেতুমাহ নির্ব্ব্যাপারো হীতি। তস্য চ নির্ব্ব্যাপারত্বং ফলভাজজ্ঞাতব্যমিত্যাহ অতইতি। এবং জ্ঞানমেব জ্ঞাপয়ন্ উক্তং ব্যনক্তি নেত্যাদিনা ॥ ৩২ ॥

## স্বামিকৃত টীকা।

তদকরণে দোষমাহ নায়মিতি। অয়মল্পসুখোঽপি মনুষ্যলোকোঽযজ্ঞস্য নাস্তি কুতো-ঽন্যো বহুসুখঃ পরলোকঃ অতো যজ্ঞাঃ সর্ব্বথা কর্ত্তব্যা ইত্যর্থঃ ॥ ৩১ ॥

জ্ঞানযজ্ঞং স্তোতুমুক্তান্ যজ্ঞানুপসংহরতি এবং বহুবিধাইতি। ব্রহ্মণো বেদস্য মুখে বিততা বেদেন সাক্ষাদ্বিহিতা ইত্যর্থঃ, তথাপি তান্ সর্ব্বান্ বাঙ্মনঃকায়কর্ম্মজনিতানাত্মস্বরূ-

শ্রেয়ান্ দ্রব্যময়াদ্যজ্ঞাজ্জ্ঞানযজ্ঞঃ পরন্তপ।
সর্ব্বং কর্ম্মাখিলং পার্থ জ্ঞানে পরিসমাপ্যতে ॥ ৩৩ ॥

## শাঙ্করভাষ্যম্।

ব্রহ্মার্পণমিত্যাদিশ্লোকেন সম্যগ্দর্শনস্য যজ্ঞত্বং সম্পাদিতং যজ্ঞাশ্চ অনেকবিধা উপদিষ্টাস্তৈঃ সিদ্ধপুরুষার্থপ্রয়োজনৈর্জ্ঞানং স্তূয়তে কথং শ্রেয়ানিতি। শ্রেয়ান্ দ্রব্যময়াৎ দ্রব্যসাধনসাধ্যাৎ যজ্ঞাৎ জ্ঞানযজ্ঞঃ হে পরন্তপ দ্রব্যময়ো হি যজ্ঞঃ ফলস্যারম্ভকো ন জ্ঞানযজ্ঞঃ ফলস্যারম্ভকোঽতঃ শ্রেয়ান্ প্রশস্যতরঃ কথং যতঃ সর্ব্বং কর্ম্ম সমস্তমখিলং অপ্রতিবদ্ধং পার্থ জ্ঞানে মোক্ষসাধনে সর্ব্বতঃসংপ্লুতোদকস্থানীয়ে পরিসমাপ্যতেঽন্তর্ভবতীত্যর্থঃ,

## গিরিকৃত টীকা।

কর্ম্মযোগেঽনেকধাভিহিতে সর্ব্বস্য শ্রেয়ঃসাধনস্য কর্ম্মাত্মকত্বপ্রতিপত্ত্যা কেবলং জ্ঞানমনাদ্রিয়মাণমর্জ্জুনমালক্ষ্য বৃত্তানুবাদপূর্ব্বকমুত্তরশ্লোকস্য তাৎপর্য্যমাহ ব্রহ্মেত্যাদিনা। সিদ্ধেতি, সিদ্ধং পুরুষার্থভূতং পুরুষাপেক্ষিতলক্ষণং প্রয়োজনং যেষাং যজ্ঞানাং তৈরনন্তরোপদিষ্টৈরিতি যাবৎ। প্রশ্নপূর্ব্বকং স্তুতিপ্রকারং প্রকটয়তি কথমিত্যাদিনা। জ্ঞানযজ্ঞস্য দ্রব্যযজ্ঞাৎ প্রশস্যতরত্বে হেতুমাহ শ্রেয়ানিতি। দ্রব্যসাধনসাধ্যাদিত্যুপলক্ষণং স্বাধ্যায়াদেরপি। ততোঽপি জ্ঞানযজ্ঞস্য শ্রেয়স্ত্বাবিশেষাৎ দ্রব্যময়াদিযজ্ঞেভ্যো জ্ঞানযজ্ঞস্য প্রশস্যতরত্বং প্রপঞ্চয়তি দ্রব্যময়ো হীতি। ফলস্যাভ্যুদয়স্যেত্যর্থঃ, ন ফলারম্ভকো ন কস্যচিৎ ফলস্যোৎপাদকঃ কিন্তু নিত্যসিদ্ধস্য মোক্ষস্য অভিব্যঞ্জকইত্যর্থঃ। তস্য প্রশস্যতরত্বে হেত্বন্তরমাহ যতইতি। সমস্তং কর্ম্মেত্যগ্নিহোত্রাদিকমুচ্যতে অখিলমবিদ্যমানং খিলং শেষোঽস্যেত্যনল্পং মহত্তরমিতি যাবৎ, সর্ব্বমখিলমিতি পদদ্বয়োপাদানমসঙ্কোচার্থং। সর্ব্বং কর্ম্ম জ্ঞানেঽন্তর্ভবতীত্যত্র ছান্দোগ্যশ্রুতিং প্রমাণয়তি যথেতি। চতুরায়কে হি দ্যূতে কশ্চিদায়ঃ চতুরঙ্কঃ সন্ কৃতশব্দেনোচ্যতে তস্মৈ বিজিতায় কৃতায় তাদর্থ্যেনাধরেয়াস্ত্র্যাদযস্তাস্তাবিনস্ত্রিদ্ব্যেকাঙ্কাস্ত্রেতাদ্বাপরকলিনামানঃ সংযন্ত্যায়াঃ সংগচ্ছন্তি চতুরঙ্কে খল্বায়ে ত্রিদ্ব্যেকাঙ্কায়ানামন্তর্ভাবো ভবতি মহাসংখ্যায়ামবান্তরসংখ্যান্তর্ভাবাবশ্যম্ভাবাদেবমেনং বিদ্যাবন্তঃ পুরুষং সর্ব্বং তদাভিমুখ্যেন সমেতি সঙ্গচ্ছতি কিং তৎ সর্ব্বং যৎকিঞ্চিৎ পুরুষেঽন্তর্ভ-

## স্বামিকৃত টীকা।

পসংস্পর্শরহিতান্ বিদ্ধি জানীহি আত্মনঃ কর্ম্মণোঽগোচরত্বাৎ এবং জ্ঞাত্বা জ্ঞাননিষ্ঠঃ সন্ সংসারাদ্বিমুক্তো ভবিষ্যসি ॥ ৩২ ॥

জ্ঞানযজ্ঞস্ত শ্রেষ্ঠইত্যাহ শ্রেয়ানিতি। দ্রব্যময়াদনাত্মব্যাপারজন্যাদ্দৈবাদিযজ্ঞাজ্জ্ঞানযজ্ঞঃ শ্রেষ্ঠঃ, যদ্যপি জ্ঞানস্যাপি মনোব্যাপারাধীনত্বমস্ত্যেব তথাপ্যাত্মস্বরূপস্য জ্ঞানস্য মনঃপরিণামে অভিব্যক্তিমাত্রং ন তজ্জন্যত্বমিতি দ্রব্যময়াদ্বিশেষঃ, শ্রেষ্ঠত্বে হেতুঃ সর্ব্বং

তদ্বিদ্ধি প্রণিপাতেন পরিপ্রশ্নেন সেবয়া।
উপদেক্ষ্যন্তি তে জ্ঞানং জ্ঞানিনস্তত্ত্বদর্শিনঃ ॥ ৩৪ ॥

## শাঙ্করভাষ্যম্।

যথা কৃতায় বিজিতায়াধরেয়াঃ সংযন্ত্যেবমেনং সর্ব্বং তদভিসমেতি যৎ কিঞ্চিৎ প্রজাঃ সাধু কুর্ব্বন্তি যস্তদ্বেদ যৎ স বেদেতি শ্রুতেঃ ॥ ৩৩ ॥

তদেতদ্বিশিষ্টং জ্ঞানং তর্হি কেন প্রাপ্যত ইত্যুচ্যতে তদ্বিদ্ধীতি। তদ্বিদ্ধি বিজানীহি যেন বিধিনা প্রাপ্যত ইত্যাচার্য্যানভিগম্য প্রণিপাতেন প্রকর্ষেণ নীচৈঃ পতনং প্রণিপাতো দীর্ঘনমস্কারঃ তেন, কথং বন্ধঃ কথং মোক্ষঃ কা বিদ্যা কা চাবিদ্যেতি পরিপ্রশ্নেন, সেবয়া গুরুশুশ্রূষয়ৈবমাদিনা প্রশ্রয়েণাবর্জ্জিতা আচার্য্যা উপদেক্ষ্যন্তি কথয়িষ্যন্তি তে জ্ঞানং যথোক্তবিশেষণং, জ্ঞানিনো জ্ঞানবন্তোঽপি কেচিদ্‌যথাবত্তত্ত্বদর্শনশীলাশ্চ ন ভবন্তি অপরে তু

## গিরিকৃত টীকা।

বতি তদাহ যৎকিঞ্চিদিতি। প্রজাঃ সর্ব্বা যৎ কিমপি সাধুকর্ম্ম কুর্ব্বন্তি তৎসর্ব্বমিত্যর্থঃ। এনমভিসমেতীত্যুক্তং তমেব বিদ্যাবন্তং পুরুষং বিশিনষ্টি যস্তদিতি। কিং তদিত্যুক্তং তদেব বিশদয়তি যৎস ইতি। স রৈক্বো যত্তত্ত্বং বেদ তত্ত্বং যোঽন্যোঽপি জানাতি তমেনং সর্ব্বং সাধু কর্ম্মাভিসমেতীতি যোজনা ॥ ৩৩ ॥

যদ্যেবং প্রশস্ততরমিদং জ্ঞানং তর্হি কেনোপায়েন তৎপ্রাপ্তিরিতি পৃচ্ছতি তদেতদিতি। জ্ঞানপ্রাপ্তৌ প্রত্যাসন্নমুপায়মুপদিশতি উচ্যতইতি। তদ্বিজ্ঞানং গুরুভ্যো বিদ্ধি গুরবশ্চ প্রণিপাতাদিভিরুপায়ৈরাবর্জ্জিতচেতসো বদিষ্যন্তীত্যাহ তদ্বিদ্ধীতি। উপদেষ্টৃত্বমুপদেশকর্তৃত্বং পরোক্ষজ্ঞানমাত্রেণ ন ভবতীত্যাহ উপদেক্ষ্যন্তীতি। তদিতি প্রেক্ষিতং জ্ঞানসাধনং গৃহ্যতে যেন বিধিনেতি বিশেষদর্শনাৎ, যদ্বা যেনাচার্য্যাবর্জ্জনপ্রকারেণ তদুপদেশবশাদপেক্ষিতং জ্ঞানং লভ্যতে তথা তজ্‌জ্ঞানমাচার্য্যেভ্যো লভস্বেত্যর্থঃ। তদেব স্ফুটয়তি আচার্য্যানিতি। এবমাদিনেত্যাদিশব্দেন শমাদয়ো গৃহ্যন্তে, এবমাদিনা বিদ্ধীতি পূর্ব্বেণ সম্বন্ধঃ। উত্তরার্দ্ধং ব্যাচষ্টে প্রশ্রয়েণেতি। প্রশ্রয়ো ভক্তিশ্রদ্ধাপূর্ব্বকো নিরতিশয়োঽবনতিবিশেষঃ, যথোক্তবিশেষণং পূর্ব্বোক্তেন প্রকারেণ প্রশস্ততমমিত্যর্থঃ। বিশেষণস্য

## স্বামিকৃত টীকা।

কর্ম্মাখিলং ফলসহিতং জ্ঞানে পরিসমাপ্যতে অন্তর্ভবতীত্যর্থঃ, সর্ব্বং তদভিসমেতি যৎকিঞ্চিৎ প্রজাঃ সাধু কুর্ব্বন্তীতিশ্রুতে ॥ ৩৩ ॥

এবংভূতাত্মজ্ঞানে সাধনমাহ তদিতি। তজ্‌জ্ঞানং বিদ্ধি জানীহি প্রাপ্নুহীত্যর্থঃ, জ্ঞানিনাং প্রণিপাতেন নমস্কারেণ ততঃ পরিপ্রশ্নেন কুতোঽয়ং মম সংসারঃ কথং বা নিবর্ত্ততে

যজ্‌জ্ঞাত্বা ন পুনর্মোহমেবং যাস্যসি পাণ্ডব।
যেন ভূতান্যশেষাণি দ্রক্ষ্যস্যাত্মন্যথো ময়ি ॥ ৩৫ ॥

## শাঙ্করভাষ্যম্।

ভবন্ত্যতো বিশিনষ্টি তত্ত্বদর্শিনঃ ইতি, যে সম্যগ্দর্শিনস্তৈরুপদিষ্টং জ্ঞানং কার্য্যক্ষমং ভবতি নেতরদিতি ভগবতো মতং ॥ ৩৪ ॥

তথা চ সতীদমপি সমর্থং বচনং যদিতি। যৎ জ্ঞাত্বা যৎ জ্ঞানং তৈরুপদিষ্টমধিগম্য প্রাপ্য পুনর্ভূয়ো মোহমেবং যথেদানীং মোহং গতোঽসি পুনরেবং ন যাস্যসি হে পাণ্ডব, কিঞ্চ যেন জ্ঞানেন ভূতান্যশেষাণি ব্রহ্মাদীনি স্তম্বপর্য্যন্তানি দ্রক্ষ্যসি সাক্ষাদাত্মনি প্রত্যগাত্মনি মৎসংস্থানীমানি ভূতানীতি অথো অপি ময়ি বাসুদেবে পরমেশ্বরে চেমানীতি ক্ষেত্রজ্ঞেশ্বরৈকত্বং সর্ব্বোপনিষৎপ্রসিদ্ধং দ্রক্ষ্যসীত্যর্থঃ ॥ ৩৫ ॥

## গিরিকৃত টীকা।

পৌনরুক্তিপরিহারার্থমর্থভেদং কথয়তি জ্ঞানবন্তোঽপীতি। জ্ঞানিনইত্যুক্ত্বা পুনস্তত্ত্বদর্শিনইতি ব্রুবতো ভগবতোঽভিপ্রায়মাহ যে সম্যগিতি। বহুবচনঞ্চৈতদাচার্য্যবিষয়ং বহুভ্যঃ শ্রোতব্যং বহুধা চেতি সামান্যন্যায়াভ্যনুজ্ঞানার্থং, ন ত্বাত্মজ্ঞানমধিকৃত্য আচার্য্যবহুত্বং বিবক্ষিতং তস্য তত্ত্বসাক্ষাৎকারবদাচার্য্যমাত্রোপদেশাদেবোদয়সম্ভবাৎ ॥৩৪॥

বিশিষ্টৈরাচার্য্যৈরুপদিষ্টে জ্ঞানে কার্য্যক্ষমে প্রাপ্তে সতি সমনন্তরবচনমপি যোগ্যবিষয়মর্থবত্তবতীত্যাহ তথা চেতি। অতস্তস্মিন্ বিশিষ্টে জ্ঞানে ত্বদীয়মোহাপোহহেতৌ নিষ্ঠাবতা ভবতা ভবিতব্যমিতি শেষঃ। তত্র নিষ্ঠাপ্রতিষ্ঠায়ৈ তদেব জ্ঞানং পুনর্ব্বিশিনষ্টি যেনেতি। যজ্‌জ্ঞাত্বেত্যযুক্তং জ্ঞানাযোগাদিত্যাশঙ্ক্য প্রাপ্ত্যর্থত্বমধিপূর্ব্বস্য গমেরঙ্গীকৃত্য ব্যাকরোতি অধিগম্যেতি। ইতশ্চাচার্য্যোপদেশলভ্যে জ্ঞানে ফলবতি প্রতিষ্ঠাবতা ভবিতব্যমিত্যাহ কিঞ্চেতি। জীবে চেশ্বরে চোভয়ত্র ভূতানাং প্রতিষ্ঠিতত্বপ্রতিনির্দ্দেশে ভেদবাদানুমতিঃ স্যাদিত্যাশঙ্ক্যাহ ক্ষেত্রজ্ঞেতি। মূলপ্রমাণাভাবে কথং তদেকত্বদর্শনং স্যাদিত্যাশঙ্ক্যাহ সর্ব্বেতি ॥ ৩৫ ॥

## স্বামিকৃত টীকা।

ইতি পরিপ্রশ্নেন সেবয়া শুশ্রূষয়া চ, জ্ঞানিনঃ শাস্ত্রজ্ঞাস্তত্ত্বদর্শিনোঽপরোক্ষানুভবসম্পন্নাশ্চ তে তুভ্যং জ্ঞানমুপদেশেন সম্পাদয়িষ্যন্তি ॥ ৩৪ ॥

জ্ঞানফলমাহ যজ্‌জ্ঞাত্বেতি সার্দ্ধৈস্ত্রিভিঃ। যজ্‌জ্ঞানং জ্ঞাত্বা প্রাপ্য পুনর্বন্ধুবধাদিনিমিত্তং মোহং ন প্রাপ্স্যসি। তত্র হেতুর্যেন জ্ঞানেন ভূতানি পিতৃপুত্রাদীনি স্বাবিদ্যাবিজৃম্ভিতানি আত্মন্যেবাভেদেন দ্রক্ষ্যসি। অথো অনন্তরং আত্মানং ময়ি পরমাত্মন্যভেদেন দ্রক্ষ্যসীত্যর্থঃ ॥ ৩৫ ॥

অপি চেদসি পাপিভ্যঃ সর্ব্বেভ্যঃ পাপকৃত্তমঃ।
সর্ব্বং জ্ঞানপ্লবেনৈব বৃজিনং সন্তরিষ্যসি ॥ ৩৬ ॥
যথৈধাংসি সমিদ্ধোঽগ্নির্ভস্মসাৎ কুরুতেঽর্জ্জুন।
জ্ঞানাগ্নিঃ সর্ব্বকর্ম্মাণি ভস্মসাৎ কুরুতে তথা ॥ ৩৭ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চৈতস্য জ্ঞানস্য মাহাত্ম্যং অপীতি। অপি চেদসি পাপিভ্যঃ পাপকৃদ্ভ্যঃ সর্ব্বেভ্যঃ সকাশাদতিশয়েন পাপকৃৎ পাপকৃত্তমঃ যদসি ভবসি সর্ব্বং জ্ঞানপ্লবেনৈব জ্ঞানমেব প্লবং জ্ঞানপ্লবং কৃত্বা বৃজিনং বৃজিনার্ণবং পাপং সন্তরিষ্যসি ধর্ম্মোঽপি মুমুক্ষোঃ পাপমুচ্যতে ॥ ৩৬ ॥

জ্ঞানং কথং নাশয়তি পাপমিতি সদৃষ্টান্তমুচ্যতে যথেতি যথা এধাংসি কাষ্ঠানি সমিদ্ধঃ সম্যক্ ইদ্ধো দীপ্তোঽগ্নির্ভস্মসাৎ ভস্মীভাবং কুরুতেঽর্জ্জুন এবং জ্ঞানমেব অগ্নির্জ্ঞা নাগ্নিঃ সর্ব্বকর্ম্মাণি ভস্মসাৎ কুরুতে তথা নির্বীজং করোতীত্যর্থঃ, ন হি সাক্ষাদেব জ্ঞানাগ্নিঃ তানি কর্ম্মাণীন্ধনবদ্ভস্মীকর্ত্তুং শক্নোতি তস্মাৎ সম্যক্ দর্শনং সর্ব্বকর্ম্মণাং নির্বীজত্বে

## গিরিকৃত টীকা।

জ্ঞানস্য প্রকারান্তরেণ প্রশংসাং প্রস্তৌতি কিঞ্চেতি। পাপকারিভ্যঃ সর্ব্বেভ্যঃ সকশাদতিশয়েন পাপকারিত্বমেকস্মিন্নসম্ভাবিতমপি জ্ঞানমাহাত্ম্যপ্রসিদ্ধ্যর্থমঙ্গীকৃত্য ব্রবীতি অপি চেদিতি। ব্রহ্মাত্মৈক্যজ্ঞানস্য সর্ব্বপাপনিবর্ত্তকত্বেন মাহাত্ম্যমিদানীং প্রকটয়তি সর্ব্বমিতি। অধর্ম্মে নিবৃত্তেঽপি ধর্ম্মরূপপ্রতিবন্ধান্ন জ্ঞানবতোঽপি মোক্ষঃ সম্ভবতীত্যাশঙ্ক্যাহ ধর্ম্মোঽপীতি। ইহেত্যধ্যাত্মশাস্ত্রং গৃহ্যতে ॥ ৩৬ ॥

জ্ঞানে সত্যপি ধর্ম্মাধর্ম্ময়োরুপলম্ভাৎ কুতস্তয়োস্ততো নিবৃত্তিরিত্যাশঙ্ক্য জ্ঞানস্য ধর্ম্মাধর্ম্মনিবর্ত্তকত্বং দৃষ্টান্তেন দর্শয়িতুমনন্তরশ্লোকমবতারয়তি জ্ঞানমিতি। যোগ্যাযোগ্যবিভাগেন নিবর্ত্তকত্বানিবর্ত্তকত্ববিভাগমুদাহরতি যথেতি। দৃষ্টান্তানুরূপং দার্ষ্টান্তিকমাচষ্টে জ্ঞানাগ্নিরিতি। যোগ্যবিষয়েঽপি দাহকত্বমগ্নেরপ্রতিবন্ধাপেক্ষয়েতি বিবক্ষিত্বা বিশিনষ্টি সম্যগিতি। দার্ষ্টান্তিকং ব্যাচষ্টে জ্ঞানমেবেতি। নন্বু জ্ঞানং সাক্ষাদেব কর্ম্মদাহকং কিমিতি নোচ্যতে, নির্ব্বীজং করোতি কর্ম্মেতি কিমিতি ব্যাখ্যানমিত্যাশঙ্ক্যাহ ন হীতি।

## স্বামিকৃত টীকা।

কিঞ্চ অপি চেদিতি। সর্ব্বেভ্যোঽপি পাপকারিভ্যো যদ্যপ্যতিশয়েন পাপকারী ত্বমসি তথাপি সর্ব্বং পাপসমুদ্রং জ্ঞানপ্লবেনৈব জ্ঞানপোতেনৈব সম্যগনায়াসেন তরিষ্যসি ॥ ৩৬ ॥

সমুদ্রবৎ স্থিতস্যৈব পাপস্য অতিলঙ্ঘনমাত্রং ন তু পাপস্য নাশইতি ভ্রান্তিং দৃষ্টান্তেন

ন হি জ্ঞানেন সদৃশং পবিত্রমিহ বিদ্যতে।
তৎ স্বয়ং যোগসংসিদ্ধঃ কালেনাত্মনি বিন্দতি ॥ ৩৮ ॥

## শাঙ্করভাষ্যম্।

কারণমিত্যভিপ্রায়সামর্থ্যাৎ যেন কর্ম্মণা শরীরমারব্ধং তৎ প্রবৃত্তফলত্বাদুপভোগেনৈব ক্ষীয়তেঽতো যান্যপ্রবৃত্তফলানি জ্ঞানোৎপত্তেঃ প্রাক্ কৃতানি জ্ঞানসহভাবীনি চাতীতানেকজন্মকৃতানি চ তান্যেব সর্ব্বাণি ভস্মসাৎ কুরুতে ॥ ৩৭ ॥

যতএবমতঃ ন হীতি। ন হি জ্ঞানেন সদৃশং তুল্যং পবিত্রং পাবনং শুদ্ধিকরমিহ বিদ্যতে হি যস্মাৎ, তৎ জ্ঞানং স্বয়মেব যোগসংসিদ্ধো যোগেন কর্ম্মযোগেন সমাধিযোগেন

## গিরিকৃত টীকা।

জ্ঞানস্য স্ব প্রেমায়াবরণাজ্ঞানাপাকরণে সামর্থ্যস্য লোকে দৃষ্টত্বাদবিক্রিয়ব্রহ্মাত্মজ্ঞানমপি তদজ্ঞানং নিবর্ত্তয়ৎ তজ্জন্যকর্তৃত্বভ্রমং কর্ম্মবীজভূতং নিবর্ত্তয়তি তন্নিবৃত্তৌ চ কর্ম্মাণি ন স্থাতুং পারয়ন্তি ন তু সাক্ষাৎ কর্ম্মণাং নিবর্ত্তকং জ্ঞানং অজ্ঞানস্যৈব নিবর্ত্তকমিতি ব্যাপ্তেস্তদধিবৃত্তৌ তু পুনরপি কর্ম্মোদ্ভবসম্ভবাদিত্যর্থঃ। জ্ঞানস্য সাক্ষাৎ কর্ম্মনিবর্ত্তকত্বাভাবে ফলিতমাহ তস্মাদিতি। সম্যগ্জ্ঞানং মূলভূতাজ্ঞাননিবর্ত্তনে কর্ম্মনিবর্ত্তকমিষ্টঞ্চেদারব্ধফলস্যাপি কর্ম্মণো নিবৃত্তিপ্রসঙ্গাৎ জ্ঞানোদয়সমকালমেব শরীরপাতঃ স্যাদিত্যাশঙ্ক্যাহ সামর্থ্যাদিতি। জ্ঞানোদয়সমসময়মেব দেহাপোহে তত্ত্বদর্শিভিরুপদিষ্টং জ্ঞানং ফলবদিতি ভগবদভিপ্রায়স্য বাধিতত্বপ্রসঙ্গাদাচার্য্যলাভান্যথানুপপত্ত্যা প্রবৃত্তফলকর্ম্মসম্পাদকমজ্ঞানলেশং ন নাশয়তি জ্ঞানমিত্যর্থঃ। কথং তর্হি প্রারব্ধফলং কর্ম্ম নশ্যতীত্যাশঙ্ক্যাহ যেনেতি। তর্হি কথং জ্ঞানাগ্নিঃ সর্ব্বকর্ম্মাণি ভস্মসাৎ করোতীত্যুক্তং তত্রাহ অতইতি। জ্ঞানাদারব্ধফলানাং কর্ম্মণাং নিবৃত্ত্যনুপপত্তেরনারব্ধফলানি যানি কর্ম্মাণি পূর্ব্বং জ্ঞানোদয়াদস্মিন্নেব জন্মনি কৃতানি জ্ঞানেন চ সহ বর্ত্তমানানি প্রাচীনেষু চান্যেষু জন্মসু র্জ্জিতানি তানি সর্ব্বাণি জ্ঞানং কারণনিবর্ত্তনেন নিবর্ত্তয়তীত্যর্থঃ ॥ ৩৭ ॥

নম্বন্যেনৈব পরমপরিশুদ্ধিকরেণ কেনচিদশ্বমেধাদিনা পরমপুরুষার্থসিদ্ধেরলমাত্মজ্ঞানেনেত্যাশঙ্ক্যাহ যত ইতি। পূর্ব্বোক্তেন প্রকারেণ জ্ঞানমাহাত্ম্যং যতঃ সিদ্ধমতস্তেন জ্ঞানেন তুল্যং পরিশুদ্ধিকরং পরমপুরুষার্থৌপয়িকমিহ ব্যবহারভূমৌ নাস্তীত্যর্থঃ। তৎ-

## স্বামিকৃত টীকা।

বারয়ন্নাহ যথৈধাংসীতি। যথা এধাংসি কাষ্ঠানি প্রদীপ্তোঽগ্নিঃ ভস্মীভাবং নয়তি তথাত্মজ্ঞানস্বরূপোঽগ্নিঃ প্রারব্ধকর্ম্মফলব্যতিরিক্তানি সর্ব্বাণি কর্ম্মাণি ভস্মীকরোতীত্যর্থঃ ॥ ৩৭ ॥

তত্র হেতুমাহ ন হীতি। পবিত্রং শুদ্ধিকরং ইহ তপোযোগাদিষু মধ্যে জ্ঞানতুল্যং নাস্ত্যেব, তর্হি সর্ব্বেঽপি কিমিতি আত্মজ্ঞানমেব নাভ্যস্যন্তীত্যত আহ তৎস্বয়মিতি সার্দ্ধেন।

শ্রদ্ধাবান্ লভতে জ্ঞানং তৎপরঃ সংযতেন্দ্রিয়ঃ।
জ্ঞানং লব্ধ্বা পরং শান্তিমচিরেণাধিগচ্ছতি ॥ ৩৯ ॥

## শাঙ্করভাষ্যম্।

চ সংসিদ্ধঃ সংস্কৃতো যোগ্যতামাপন্নো মুমুক্ষুঃ কালেন মহতা আত্মনি বিন্দতি লভত-ইত্যর্থঃ ॥ ৩৮ ॥

যেনৈকান্তেন জ্ঞানপ্রাপ্তির্ভবতি স উপায় উপদিশ্যতে শ্রদ্ধাবানিতি। শ্রদ্ধাবান্ শ্রদ্ধালু-র্লভতে জ্ঞানং শ্রদ্ধালুত্বেঽপি ভবতি কশ্চিন্মন্দপ্রস্থানোঽত আহ তৎপরো গুরূপাসনাদাব-ভিযুক্তো জ্ঞানলব্ধ্যুপায়ে শ্রদ্ধাবাংস্তৎপরোঽপ্যজিতেন্দ্রিয়ঃ স্যাদিত্যত আহ সংযতেন্দ্রিয়ঃ সংযতানি বিষয়েভ্যো নিবর্ত্তিতানি যস্যেন্দ্রিয়াণি স সংযতেন্দ্রিয়ো যোগী যএবম্ভূতঃ শ্রদ্ধাবাং-স্তৎপরঃ সংযতেন্দ্রিয়শ্চ সোঽবশ্যং জ্ঞানং লভতে প্রণিপাতাদিস্তু বাহ্যোঽনৈকান্তিকোঽপি ভবতি মায়াবিত্বাদিসম্ভবাৎ ন তু তথা তচ্ছ্রদ্ধাবত্ত্বাদাবিত্যেকান্ততো জ্ঞানলব্ধ্যুপায়ঃ কিং

## গিরিকৃত টীকা।

পুনরাত্মবিষয়ং জ্ঞানং সর্ব্বেষাং কিমিতি ঝটিতি নোৎপদ্যতে তত্রাহ তৎ জ্ঞানং স্বয়মিতি। মহতা কালেন যথোক্তেন সাধনেন যোগ্যতামাপন্নঃ তদধিকৃতঃ স্বয়ং তদাত্মনি জ্ঞানং বিন্দ-তীতি যোজনা, সর্ব্বেষাং ঝটিতি জ্ঞানানুদয়ো যোগ্যতাবৈধুর্য্যাদিতি ভাবঃ ॥ ৩৮ ॥

কর্ম্মযোগেন সমাধিযোগেন চ সম্পন্নস্য জ্ঞানোৎপত্তাবন্তরঙ্গসাধনমুপদিশতি যেনেতি। জ্ঞানলাভে প্রয়োজনমাহ জ্ঞানমিতি। ন কেবলং শ্রদ্ধালুত্বমেব সহায়ং জ্ঞানলাভে হেতুরপিতু তাৎপর্য্যমপীত্যাহ শ্রদ্ধালুত্বেঽপীতি। মন্দপ্রস্থানত্বং তাৎপর্য্যবিধুরত্বং ন চ তস্যোপদিষ্ট-মপি জ্ঞানমুৎপত্তুমীষ্টে তেন তাৎপর্য্যমপি তত্র কারণং ভবতীত্যাহ অত আহেতি। অভি-যুক্তো নিষ্ঠাবান্, উপাসনাদাবিত্যাদিশব্দেন শ্রবণাদি গৃহ্যতে। ন কেবলং শ্রদ্ধা তাৎপর্য্য-ঞ্চেত্যুভয়মেব জ্ঞানকারণং কিন্তু সংযতেন্দ্রিয়ত্বমপি তদভাবে শ্রদ্ধাদেরকিঞ্চিৎকরত্বাদি-ত্যাশয়েনাহ শ্রাদ্ধাবানিতি। উক্তসাধনানাং জ্ঞানেন সহৈকান্তিকত্বমাহ যএবম্ভূত ইতি। তদ্বিদ্ধি প্রণিপাতেনেত্যাদৌ প্রাগেব প্রণিপাতাদের্জ্ঞানহেতোরুক্তত্বাৎ কিমিতীদানীং হেত্বন্তরমুচ্যতে তত্রাহ প্রণিপাতাদিস্ত্বিতি। তদ্ধি বহিরঙ্গমিদং পুনরন্তরঙ্গং, ন চ তত্র

## স্বামিকৃত টীকা।

তদাত্মবিষয়ে জ্ঞানং কালেন মহতা কর্ম্মযোগেন সংসিদ্ধো যোগ্যতাং প্রাপ্তঃ সন্ স্বয়মেবা-নায়াসেন লভতে ন তু কর্ম্মযোগং বিনেত্যর্থঃ ॥ ৩৮ ॥

কিঞ্চ শ্রদ্ধাবানিতি। শ্রদ্ধাবান্ গুরূপদিষ্টে অর্থে আস্তিক্যবুদ্ধিমান্ তৎপরস্তদেকনিষ্ঠঃ সংযতেন্দ্রিয়শ্চ তজ্জ্ঞানং লভতে নান্যঃ, অতঃ শ্রদ্ধাদিসম্পত্ত্যা জ্ঞানলাভাৎ প্রাক্ কর্ম্মযোগ

অজ্ঞশ্চাশ্রদ্দধানশ্চ সংশয়াত্মা বিনশ্যতি।
নায়ং লোকোঽস্তি ন পরো ন সুখং সংশয়াত্মনঃ॥ ৪০ ॥

## শাঙ্করভাষ্যম্।

পুনর্জ্ঞানলাভাৎ স্যাদিত্যুচ্যতে জ্ঞানং লব্ধ্বা পরাং মোক্ষাখ্যাং শান্তিমুপরতিমচিরেণ ক্ষিপ্রমেবাধিগচ্ছতি সম্যগদর্শনাৎ ক্ষিপ্রমেব মোক্ষো ভবতীতি সর্ব্বশাস্ত্রন্যায়প্রসিদ্ধঃ সুনিশ্চিতোঽর্থঃ॥ ৩৯ ॥

অত্র সংশয়ো হি ন কর্ত্তব্যঃ পাপিষ্ঠো হি সংশয়ঃ কথমিত্যুচ্যতে অজ্ঞশ্চেতি। অজ্ঞশ্চানাত্মজ্ঞোঽশ্রদ্দধানশ্চ সংশয়াত্মা চ বিনশ্যতি অজ্ঞাশ্রদ্দধানৌ যদ্যপি বিনশ্যতঃ তথাপি ন যথা সংশয়াত্মা স তু পাপিষ্ঠঃ সর্ব্বেষাং কথং নায়ং সাধারণোঽপি লোকোঽস্তি তথা ন পর-

## গিরিকৃত টীকা।

জ্ঞানেন প্রতিনিয়মো মনস্যন্যথা কৃত্বা বহিরন্যথাপ্রদর্শনাত্মনো মায়াবিত্বস্য সম্ভবাদ্বিপ্রলম্ভকত্বাদেরপি সম্ভাবনোপনীতত্বাদিত্যর্থঃ। মায়াবিত্বাদেঃ শ্রদ্ধাবত্বতাৎপর্য্যাদাবপি সম্ভবাদনৈকান্তিকত্বমবিশিষ্টমিত্যাশঙ্ক্যাহ ন হীতি। ন হি মায়য়া বিপ্রলম্ভেন বা শ্রদ্ধাতাৎপর্য্যসংযমান্ যোগতো নিষ্ঠাতুমর্হতীত্যর্থঃ। উত্তরার্দ্ধং প্রশ্নপূর্ব্বকমবতার্য্য ব্যাকরোতি কিং পুনরিত্যাদিনা। সম্যগ্জ্ঞানাদভ্যাসাদিসাধনানপেক্ষান্মোক্ষো ভবতীত্যত্র প্রমাণমাহ সম্যগ্দর্শনাদিতি। শাস্ত্রশব্দেন তমেব বিদিত্বা, জ্ঞানাদেব তু কৈবল্যমিত্যাদি বিবক্ষিতং ন্যায়স্তু জ্ঞানাদজ্ঞাননিবৃত্তেঃ রজ্জ্বাদৌ প্রসিদ্ধত্বাৎ আত্মজ্ঞানাদপি নিরপেক্ষাদজ্ঞানতৎকার্য্যপ্রক্ষয়লক্ষণো মোক্ষঃ স্যাদিত্যেবংলক্ষণঃ॥ ৩৯ ॥

উত্তরশ্লোকস্য পাতনিকাং করোতি অত্রেতি। যথোক্তসাধনবানুপদেশমপেক্ষ্যাচিরেণ ব্রহ্ম সাক্ষাৎকরোতি সাক্ষাৎকৃতব্রহ্মত্বেঽচিরেণৈব মোক্ষং প্রাপ্নোতীত্যেবোঽর্থঃ সপ্তম্যা পরামৃশ্যতে। সংশয়স্যাকর্ত্তব্যত্বে হেতুমাহ পাপিষ্ঠো হীতি। উক্তং হেতুং প্রশ্নপূর্ব্বকমুত্তরশ্লোকেন সাধয়তি কথমিত্যাদিনা। অজ্ঞাদশ্রদ্দধানাচ্চ সংশয়চিত্তস্য বিশেষমাদর্শয়তি নায়মিতি। দ্বিতীয়ভাগবিভজনার্থং ভূমিকাং করোতি অজ্ঞেতি। অজ্ঞাদীনাং মধ্যে

## স্বামিকৃতটীকা।

এব শুদ্ধ্যর্থমনুষ্ঠেয়ঃ, জ্ঞানলাভানন্তরন্তু ন তস্য কিঞ্চিৎ কর্ত্তব্যমিত্যাহ জ্ঞানং লব্ধ্বা তু মোক্ষমচিরেণ প্রাপ্নোতি॥ ৩৯ ॥

জ্ঞানাধিকারিণমুক্ত্বা তদ্বিপরীতমনধিকারিণমাহ অজ্ঞশ্চেতি। অজ্ঞো গুরূপদিষ্টার্থানভিজ্ঞঃ কথঞ্চিজ্জ্ঞানে জাতেঽপি তত্রাশ্রদ্দধানশ্চ জাতায়ামপি শ্রদ্ধায়াং মমেদং সিধ্যেন্ন বেতি সংশয়াক্রান্তচিত্তশ্চ বিনশ্যতি স্বার্থাদ্ভ্রশ্যতি, এতেষু ত্রিষ্বপি সংশয়াত্মা সর্ব্বথা নশ্যতি

যোগসন্ন্যস্তকর্ম্মাণং জ্ঞানসঞ্ছিন্নসংশয়ম্।
আত্মবন্তং ন কর্ম্মাণি নিবধ্নন্তি ধনঞ্জয় ॥ ৪১ ॥

## শাঙ্করভাষ্যম্।

লোকো ন সুখং তত্রাপি সংশয়োপপত্তেঃ সংশয়াত্মনঃ সংশয়চিত্তস্য, তস্মাৎ সংশয়ো ন কর্ত্তব্যঃ ॥ ৪০ ॥

কস্মাৎ যোগেতি। যোগসংন্যস্তকর্ম্মণাং পরমার্থদর্শনলক্ষণেন যোগেন সংন্যস্তানি কর্ম্মাণি যেন পরমার্থদর্শিনা ধর্ম্মাধর্ম্মাখ্যানি তং যোগসংন্যস্তকর্ম্মাণং কথং যোগসংন্যস্তকর্ম্মেত্যাহ জ্ঞানেনাত্মেশ্বরৈকত্বদর্শনলক্ষণেন সংছিন্নঃ সংশয়ো যস্য স জ্ঞানসংছিন্নসংশয়ঃ যএবং যোগসংন্যস্তকর্ম্মা তমাত্মবন্তমপ্রমত্তং গুণচেষ্টারূপেণ দৃষ্টানি ন কর্ম্মাণি নিবধ্নন্তি অনিষ্টাদিরূপং ফলং নারভন্তে হে ধনঞ্জয় ॥ ৪১ ॥

## গিরিকৃত টীকা।

সংশয়াত্মনো যৎপাপিষ্ঠত্বং তৎ প্রশ্নদ্বারা প্রকটয়তি কথমিতি। লোকদ্বয়স্য তৎপ্রযুক্তসুখস্য চাভাবে হেতুমাহ তত্রাপীতি। সংশয়চিত্তস্য সর্ব্বত্র সংশপ্রবৃত্তের্দুর্নিবারত্বাদিত্যর্থঃ। সংশয়স্যানর্থমূলত্বে স্থিতে ফলিতমাহ তস্মাদিতি ॥ ৪০ ॥

যদ্যপি সংশয়ঃ সর্ব্বানর্থহেতুত্বাৎ কর্ত্তব্যো ন ভবতি তথাপি নিবর্ত্তকাভাবে তদকরণমশক্যমিতি শঙ্কতে কস্মাদিতি। শ্রুতিযুক্তিপ্রযুক্তমৈক্যজ্ঞানং তন্নিবর্ত্তকমিত্যুত্তরমাহ জ্ঞানেনেতি। সংশয়রহিতস্যাপি কর্ম্মাণ্যনর্থনেতৃনি ভবন্তীত্যাশঙ্ক্যাহ যোগেতি। বিষয়পরবশস্য পুংসো যোগাযোগাৎ কুতো যোগসংন্যস্তকর্ম্মত্বমিত্যাশঙ্ক্যাহ আত্মবন্তমিতি। পরমার্থদর্শনতঃ সংশয়োচ্ছিত্তৌ তদুচ্ছেদকজ্ঞানমাহাত্ম্যাদেব কর্ম্মণাঞ্চ নিবৃত্তাবপ্রমত্তস্য প্রাতিভাসিকানি কর্ম্মাণি বন্ধহেতবো ন ভবন্তীত্যাহ ন কর্ম্মাণীতি। কর্ম্মযোগাদেব কর্ম্মসংন্যাসস্যানুপপত্তিমাশঙ্ক্য আদ্যং পাদং বিভজতে পরমার্থেতি। তচ্চ বৈধসংন্যাসপক্ষে ত্বপরোক্ষমিতি বিবেকঃ। যথোক্তজ্ঞানেন সংন্যস্তকর্ম্মত্বমেব সতি সংশয়ে ন সিধ্যতি সংশয়বতস্তদযোগাদিতি শঙ্কতে কথমিতি। দ্বিতীয়ং পাদং ব্যাকুর্ব্বন্ পরিহরতি আহেত্যাদিনা। পাঠক্রমাদর্থক্রমস্য বলীয়স্ত্বাদাদৌ দ্বিতীয়ং পাদং ব্যাখ্যায় পশ্চাদাদ্যং পাদং

## স্বামিকৃত টীকা।

যতস্তস্যায়ং লোকো নাস্তি ধনার্জ্জনবিবাহাদ্যসিদ্ধেঃ, ন চ পরলোকো ধর্ম্মস্যানিষ্পত্তেঃ, নচ সুখং সংশয়েনৈব ভোগস্যাপ্যসম্ভবাৎ ॥ ৪০ ॥

অধ্যায়দ্বয়োক্তাং পূর্ব্বাপরভূমিকাভেদেন কর্ম্মজ্ঞানময়ীং দ্বিবিধাং ব্রহ্মনিষ্ঠামুপসংহরতি যোগেতি দ্বাভ্যাং। যোগেন পরমেশ্বরারাধনরূপেণ তস্মিন্ সংন্যস্তানি সমর্পিতানি কর্ম্মাণি যেন তং পুরুষং কর্ম্মাণি স্বফলৈর্ন নিবধ্নন্তি, ততশ্চ জ্ঞানেনাকর্ত্রাত্মবোধেন

তস্মাদজ্ঞানসম্ভূতং হৃৎস্থং জ্ঞানাসিনাত্মনঃ।
ছিত্ত্বৈনং সংশয়ং যোগমাতিষ্ঠোত্তিষ্ঠ ভারত॥ ৪২॥

ইতি শ্রীমহাভারতে শতসাহস্র্যাং সংহিতায়াং বৈয়াসিক্যাং ভীষ্মপর্ব্বণি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসম্বাদে জ্ঞানকর্ম্ম-ন্যাসযোগো নাম চতুর্থোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

যস্মাৎ কর্ম্মযোগানুষ্ঠানাৎ অশুদ্ধিক্ষয়হেতুকজ্ঞানসংছিন্নসংশয়ো ন নিবধ্যতে কর্ম্মভিজ্ঞা-নাগ্নিদগ্ধকর্ম্মত্বাদেব যস্মাচ্চ জ্ঞানকর্ম্মানুষ্ঠানবিষয়ে সংশয়বান্ বিনশ্যতি তস্মাদিতি। তস্মাৎ পাপিষ্ঠমজ্ঞানসম্ভূতং অজ্ঞানাদবিবেকাজ্জাতং হৃৎস্থং হৃদি বুদ্ধৌ স্থিতং জ্ঞানাসিনা শোকমোহাদিদোষহরং সম্যগ্দর্শনং জ্ঞানং তদেবাসিঃ খড়্গস্তেন জ্ঞানাসিনাত্মনঃ স্বস্য আত্মবিষয়ত্বাৎ সংশয়স্য ন হি পরস্য সংশয়োঽপরেণ ছেত্তব্যতাং প্রাপ্তো যেন স্বস্যেতি বিশিষ্যতেঽত আত্মবিষয়োঽপি স্বস্যৈব ভবতি জ্ঞানাসিনা ছিত্ত্বৈনং সংশয়ং স্ববিনাশহেতু-

---

## গিরিকৃত টীকা।

ব্যাচষ্টীতেত্যাহ এবমিতি। সর্ব্বমিদং প্রমাদবতো বিষয়পরবশস্য ন সিধ্যতীত্যভিসন্ধায় আত্মবন্তং ব্যাকরোতি অপ্রমত্তমিতি। ন কর্ম্মাণীত্যাদিফলোক্তিং ব্যাচষ্টে গুণচেষ্টেতি। অনিষ্টাদীত্যাদিশব্দেন ইষ্টং মিশ্রঞ্চ গৃহ্যতে॥ ৪১॥

তস্মাদিত্যাদিসমনন্তরশ্লোকগতং তৎপদাপেক্ষিতমর্থমাহ যস্মাদিতি। সতাং কর্ম্মণাম-স্মদাদিষু ফলারম্ভকত্বোপালম্ভাৎ বিদুষ্যপি তেষাং তদ্ভাবমনপবাধমিত্যাশঙ্ক্যাহ জ্ঞানাগ্নীতি। নন্বসন্দিহানস্য তৎপ্রতিবন্ধান্ন কর্ম্মযোগানুষ্ঠানং নাপি তদ্ধেতুকজ্ঞানং তত্রাপি সংশয়াব-তারাদিত্যাশঙ্ক্যাহ যস্মাচ্চেতি। শ্লোকাক্ষরাণি ব্যাচষ্টে তস্মাদিত্যাদিনা। পাপিষ্ঠমিতি সংশয়স্য সর্ব্বানর্থমূলত্বেন ত্যাজ্যত্বং সূচ্যতে। বিবেকাগ্রহপ্রসূতত্বাদপি তস্য হেয়ত্বম-বিবেকস্যানর্থকরত্বপ্রসিদ্ধেরিত্যাহ অবিবেকাদিতি। ন চ তস্য চৈতন্যবদাত্মনিষ্ঠত্বা-দত্যাজত্বং শঙ্কিতব্যমিত্যাহ হৃদীতি। শোকমোহাভ্যামভিভূতস্য পুংসো মনসি প্রাদু-

## স্বামিকৃত টীকা।

সংছিন্নঃ সংশয়ো দেহাদ্যভিমানলক্ষণো যস্য তমাত্মবন্তমপ্রমাদিনং কর্ম্মাণি লোকসংগ্রহা-র্থানি স্বাভাবিকানি বা ন নিবধ্নন্তি॥ ৪১॥

তস্মাদজ্ঞানেতি। যস্মাদেবং তস্মাদাত্মনোঽজ্ঞানেন সম্ভূতং হৃদি স্থিতমেনং সংশয়ং শোকাদিনিমিত্তং দেহাত্মবিবেকজ্ঞানখড়্গেন ছিত্ত্বা কর্ম্মযোগমাতিষ্ঠ আশ্রয় তত্র চ প্রথম-

## শাঙ্করভাষ্যম্।

ভূতং, যোগং সম্যগ্দর্শনোপায়ং কর্ম্মানুষ্ঠানমাতিষ্ঠ কুর্ব্বিত্যর্থঃ উত্তিষ্ঠ চেদানীং যুদ্ধায় ভারতেতি ॥ ৪২ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে চতুর্থোঽধ্যায়ঃ।

---

## গিরিকৃত টীকা।

র্ভবতঃ সংশয়স্য প্রবলপ্রতিবন্ধকাভাবেনৈব প্রধ্বংসঃ সিধ্যেদিত্যাশঙ্ক্যাহ জ্ঞানাসিনেতি। স্বাশ্রয়স্য সংশয়স্য স্বাশ্রয়েণৈব জ্ঞানেন সমুচ্ছেদসম্ভবাৎ কিমিতি স্বস্যেতি বিশেষণমিত্যাশঙ্ক্যাহ আত্মবিষয়ত্বাদিতি। স্থাণ্বাদিবিষয়ঃ সংশয়ঃ তদ্বিষয়েন জ্ঞানেন দেবদত্তনিষ্ঠেন তন্নিষ্ঠো ব্যাবর্ত্ত্যতে প্রকৃতে ত্বাত্মবিষয়স্তদাশ্রয়শ্চ সংশয়ঃ তথাবিধেন জ্ঞানেন অপনীয়তে তেন বিশেষণমর্থবদিত্যর্থঃ। তদেব প্রপঞ্চয়তি ন হীতি। আত্মাশ্রয়ত্বস্য প্রকৃতে সংশয়ে সিদ্ধত্বেনাবিবক্ষিতত্বাৎ তদ্বিষয়স্য তদ্বিষয়েণৈব তস্য তেন নিবৃত্তির্ব্বিবক্ষিতেত্যুপসংহরতি অত ইতি। সংশয়সমুচ্ছিত্ত্যনন্তরং কর্ত্তব্যমুপদিশতি ছিত্ত্বৈনমিতি। অগ্নিহোত্রাদিকং কর্ম্ম ভগবদাজ্ঞয়া ক্রমেণ করিষ্যামি যুদ্ধাৎ পুনরুপরিরংসৈবেত্যাশঙ্ক্যাহ উত্তিষ্ঠেতি। ভরতান্বয়ে মহতি ক্ষত্রিয়বংশে প্রসূতস্য সমুপস্থিতসমরবিমুখত্বমনুচিতমিতি মন্বানঃ সন্নাহ ভারতেতি। তদনেন যোগস্য কৃত্রিমত্বং ভগবতোঽনীশ্বরত্বঞ্চ নিরাকৃত্য কর্ম্মাদাবকর্ম্মাদিদর্শনাদাত্মনঃ সম্যগ্জ্ঞানাৎ প্রণিপাতাদের্ব্বহিরঙ্গাদন্তরঙ্গাচ্চ শ্রদ্ধাদেরুক্তত্বতাদশেষানর্থনিবৃত্ত্যা ব্রহ্মভাবমভিদধতা সর্ব্বস্মাদুৎকৃষ্টে তস্মিন্নসংশয়ানস্যাধিকারাদশেষদোষবত্ত্বং সংশয়ং হিত্বোত্তমস্য জ্ঞাননিষ্ঠাপরস্য কর্ম্মনিষ্ঠেতি স্থাপিতং ॥ ৪২ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং চতুর্থোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

প্রস্তুতায় যুদ্ধায়োত্তিষ্ঠ, হে ভারতেতি ক্ষত্রিয়ত্বেন যুদ্ধস্য ধর্ম্মত্বং দর্শিতং। পূর্ব্বাবস্থাবিভেদেন কর্ম্মজ্ঞানময়ী দ্বিধা নিষ্ঠোক্তা যেন তং বন্দে শৌরিং সংশয়সংছিদং ॥ ৪২ ॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং চতুর্থোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## পঞ্চমোঽধ্যায়ঃ।

অর্জ্জুন উবাচ—সন্ন্যাসং কর্ম্মণাং কৃষ্ণ পুনর্যোগঞ্চ শংসসি।
যচ্ছ্রেয় এতয়োরেকং তন্মে ব্রূহি সুনিশ্চিতম্ ॥ ১ ॥

### শাঙ্করভাষ্যম্।

কর্ম্মণ্যকর্ম্ম যঃ পশ্যেদিত্যারভ্য স যুক্তঃ কৃৎস্নকর্ম্মকৃৎ, জ্ঞানাগ্নিদগ্ধকর্ম্মাণং, শারীরং কেবলং কর্ম্ম কুর্ব্বন্, যদৃচ্ছালাভসন্তুষ্টো ব্রহ্মার্পণং ব্রহ্ম হবিঃ, কর্ম্মজান্ বিদ্ধি তান্ সর্ব্বান্, সর্ব্বং কর্ম্মাখিলং পার্থ, জ্ঞানাগ্নিঃ সর্ব্বকর্ম্মাণি, যোগসংন্যস্তকর্ম্মাণমিত্যন্তৈর্ব্বচনৈঃ সর্ব্বকর্ম্মসংন্যাসমবোচদ্ভগবান্, ছিত্ত্বৈনং সংশয়ং যোগমাতিষ্ঠেত্যনেন বচনেন পুনর্যোগঞ্চ কর্ম্মানুষ্ঠানলক্ষণমনুতিষ্ঠেত্যুক্তবান্ তয়োরুভয়োশ্চ কর্ম্মানুষ্ঠানকর্ম্মসংন্যাসয়োঃ স্থিতিগতিবৎ পরস্পরবিরোধাদেকেন সহ কর্ত্তুমশক্যত্বাৎ কালভেদেন চানুষ্ঠানবিধানাভাবাদর্থাদেতয়ো-

---

### গিরিকৃত টীকা।

পূর্ব্বোত্তরাধ্যায়য়োঃ সম্বন্ধমভিদধানো বৃত্তানুবাদপূর্ব্বকমর্জ্জুনপ্রশ্নস্যাভিপ্রায়ং প্রদর্শয়িতুং প্রক্রমতে কর্ম্মণীত্যাদিনা। ইত্যারভ্য কর্ম্মণ্যকর্ম্মদর্শনমুক্ত্বা তৎপ্রশংসা প্রসারিতেত্যাহ স যুক্ত ইতি। জ্ঞানবন্তং সর্ব্বাণি কর্ম্মাণি লোকসংগ্রহার্থং কুর্ব্বন্তং জ্ঞানলক্ষণেনাগ্নিনা দগ্ধসর্ব্বকর্ম্মাণং কর্ম্মপ্রযুক্তফলসম্বন্ধবিধুরং বিবেকবন্তো বদন্তীতি। জ্ঞানবতো জ্ঞানফলভূতং সংন্যাসং বিবক্ষন্ বিবিদিষোঃ সাধনরূপমপি সংন্যাসং ভগবান্ বিবক্ষিতবানিত্যাহ জ্ঞানাগ্নীতি। নিরাশীরিত্যারভ্য শরীরস্থিতিমাত্রকারণং কর্ম্ম শরীরস্থিতাবপি সঙ্গরহিতঃ সন্ সমাচরন্ ধর্ম্মাধর্ম্মফলভাগী ন ভবতীত্যপি পূর্ব্বোত্তরাভ্যামধ্যায়াভ্যাং দ্বিবিধং সংন্যাসং সূচিতবানিত্যাহ শারীরমিতি। যদৃচ্ছেত্যাদাবপি সংন্যাসঃ সূচিতঃ তৎকর্ম্মফলত্যাগোপদেশাদিত্যাহ যদৃচ্ছেতি। জ্ঞানস্য যজ্ঞত্বসম্পাদনপূর্ব্বকং প্রশংসাবচনাদপি কর্ম্মসংন্যাসো দর্শিতো জ্ঞাননিষ্ঠস্যেত্যাহ ব্রহ্মার্পণমিতি। জ্ঞানযজ্ঞস্তুত্যর্থং বিহিতানানাবিধান্ যজ্ঞাননূদ্য তেষাং দেহাদিব্যাপারজন্যত্ববচনেনাত্মনো নির্ব্যাপারত্ববিজ্ঞানফলা-

### স্বামিকৃত টীকা।

নিবার্য্য সংশয়ং জিষ্ণোঃ কর্ম্মসন্ন্যাসযোগয়োঃ। জিতেন্দ্রিয়স্য চ যতেঃ পঞ্চমে মুক্তিমব্রবীৎ। অজ্ঞানসম্ভূতং সংশয়ং জ্ঞানাসিনা ছিত্ত্বা কর্ম্মযোগমাতিষ্ঠেত্যুক্তং তত্র পূর্ব্বাপর-

## শাঙ্করভাষ্যম্।

রন্যতরকর্ত্তব্যতায়াং প্রাপ্তৌ সত্যাং যৎ প্রশস্যতরমেতয়োঃ কর্ম্মানুষ্ঠানসংন্যাসয়োঃ তৎ কর্ত্তব্যং নেতরদিত্যেবং মন্যমানঃ প্রশস্যতরবুভুৎসয়ার্জ্জুন উবাচ সংন্যাসং কর্ম্মণাং কৃষ্ণেত্যাদিনা। নম্ন চাত্মবিদো জ্ঞানযোগেন নিষ্ঠাং প্রতিপাদয়িষ্যন্ পূর্ব্বোদাহৃতৈর্ব্বচনৈর্ভগবান্ সর্ব্বকর্ম্মসংন্যাসমবোচন্ন ত্বনাত্মজ্ঞস্যাতশ্চ কর্ম্মানুষ্ঠানকর্ম্মসংন্যাসয়োর্ভিন্নপুরুষবিষয়ত্বাদন্যতরস্য প্রশস্যতরত্ববুভুৎসয়া প্রশ্নোঽনুপপন্নঃ সত্যমেবং ত্বদভিপ্রায়েণ প্রশ্নোঽনুপপদ্যতে প্রষ্টুঃ স্বাভিপ্রায়েণ পুনঃ প্রশ্নো যুজ্যত এবেতি বদামঃ, কথং পূর্ব্বোদাহৃতৈর্ব্বচনৈর্ভগবতা কর্ম্মসংন্যাসস্য কর্ত্তব্যতয়া বিবক্ষিতত্বাৎ প্রাধান্যমন্তরেণ চ কর্ত্তারং তস্য কর্ত্তব্যত্বাসম্ভবাদনাত্মবিদপি কর্ত্তা পক্ষে প্রাপ্তোঽনূদ্যত ইতি ন পুনরাত্মবিৎকর্ত্তৃকত্বমেব সংন্যাসস্য বিবক্ষিতমিত্যেবং মন্বানস্যার্জ্জুনস্য কর্ম্মানুষ্ঠানকর্ম্মসংন্যাসয়োরবিদ্বৎপুরুষকর্ত্তৃকত্বমপ্যস্তীতি

## গিরিকৃত টীকা।

ভিলাপাদপি যথোক্তমাত্মানং বিবিদিষোঃ সর্ব্বকর্ম্মসংন্যাসেঽধিকারো ধ্বনিত ইত্যাহ কর্ম্মজানিতি। সমস্তস্যৈবাবশেষবর্জ্জিতস্য কর্ম্মণো জ্ঞানে পর্য্যবসানাভিধানাচ্চ জিজ্ঞাসোঃ সর্ব্বকর্ম্মসংন্যাসঃ সূচিত ইত্যাহ সর্ব্বমিতি। তদ্বিদ্ধীত্যাদিনা জ্ঞানপ্রাপ্ত্যুপায়ং প্রণিপাতাদি প্রদর্শ্য প্রাপ্তেন জ্ঞানেনাতিশয়মাহাত্ম্যবতা সর্ব্বকর্ম্মণাং নিবৃত্তেরেবেতি বদতা চ জ্ঞানার্থিনঃ সংন্যাসেঽধিকারো দর্শিতো ভগবতেত্যাহ জ্ঞানাগ্নিরিতি। জ্ঞানেন সমুচ্ছিন্নসংশয়ং তস্মাদেব জ্ঞানাৎ কর্ম্মাণি সংন্যস্য ব্যবস্থিতমপ্রমত্তং বশীকৃতকার্য্যকরণসংঘাতবন্তং প্রাতিভাসিকানি কর্ম্মাণি ন নিবধ্নন্তি ইত্যপি দ্বিবিধঃ সংন্যাসো ভগবতোক্ত ইত্যাহ যোগেতি। কর্ম্মণীত্যারভ্য যোগসংন্যস্তকর্ম্মাণমিত্যন্তৈরুদাহৃতৈর্ব্বচনৈরুক্তং সংন্যাসমুপসংহরতি ইত্যন্তৈরিতি। তর্হি কর্ম্মসংন্যাসস্যৈব জিজ্ঞাসুনা জ্ঞানবতা চাদরণীয়ত্বাৎ কর্ম্মানুষ্ঠানমনাদেয়মাপন্নমিত্যাশঙ্ক্যোক্তমর্থান্তরমনুবদতি ছিত্ত্বৈনমিতি। কর্ম্মতত্ত্যাগয়োরুক্তয়োরেকেনৈব পুরুষেণানুষ্ঠেয়ত্বসম্ভবান্ন বিরোধোঽস্তীত্যাশঙ্ক্য যুগপদ্বা ক্রমেণ বানুষ্ঠানমিতি বিকল্পাদ্যং দূষয়তি উভয়োশ্চেতি। দ্বিতীয়ং প্রত্যাহ কালভেদেনেতি। উক্তয়োর্দ্বয়োরেকেণ পুরুষেণানুষ্ঠেয়ত্বাসম্ভবে কথং কর্ত্তব্যত্বসিদ্ধিরিত্যাশঙ্ক্যাহ অর্থাদিতি। দ্বয়োরুক্তয়োরেকেণ যুগপৎ ক্রমাভ্যাং অনুষ্ঠানানুপপত্তেরিত্যর্থঃ। অন্যতরস্য কর্ত্তব্যত্বে কতরস্যেতি কুতো নির্ণয়ো দ্বয়োঃ সন্নিধানাবিশেষাদিত্যাশঙ্ক্যাহ যৎ প্রশস্যতরমিতি। ভগবতা কর্ম্মণাং সংন্যাসো যোগশ্চোক্তো ন চ তয়োঃ সমুচ্চিত্যানুষ্ঠানং তেনান্যতরস্য শ্রেষ্ঠস্যানুষ্ঠেয়ত্বে তদ্বুভুৎসয়া প্রশ্নোপপত্তিরিত্যুপসংহরতি ইত্যেবমিতি। নায়ং প্রষ্টুর-

## স্বামিকৃত টীকা।

বিরোধং মন্বানোঽর্জ্জুন উবাচ সংন্যাসমিতি। যস্ত্বাত্মরতিরেব স্যাদিত্যাদিনা সর্ব্বং কর্ম্মাখিলং পার্থেত্যাদিনা চ জ্ঞানিনঃ কর্ম্মসংন্যাসং কথয়সি জ্ঞানাসিনা সংশয়ং ছিত্ত্বা যোগমা-

শ্রীভগবানুবাচ—সন্ন্যাসঃ কর্ম্মযোগশ্চ নিঃশ্রেয়সকরাবুভৌ।
তয়োস্তু কর্ম্মসন্ন্যাসাৎ কর্ম্মযোগো বিশিষ্যতে ॥২॥

## শাঙ্করভাষ্যম্।

পূর্ব্বোক্তেন প্রকারেণ তয়োঃ পরস্পরবিরোধাদন্যতরস্য কর্ত্তব্যত্বে প্রাপ্তে প্রশস্ততরঞ্চ কর্ত্তব্যং নেতরদিতি প্রশস্ততরবিবিদিষয়া প্রশ্নো নানুপপন্নঃ,প্রতিবচনবাক্যার্থনিরূপণেনাপি প্রষ্টুরভিপ্রায় এবমেবেতি গম্যতে, কথং সংন্যাসকর্ম্মযোগৌ নিঃশ্রেয়সকরৌ তয়োস্তু কর্ম্মসংন্যাসাৎ কর্ম্মযোগো বিশিষ্যতে ইতি প্রতিবচনমেতন্নিরূপ্যং কিমনেনাত্মবিৎকর্ত্তৃকয়োঃ সংন্যাসকর্ম্মযোগয়োর্নিঃশ্রেয়সকরত্বং প্রয়োজনমুক্ত্বা তয়োরেব কুতশ্চিদ্বিশেষাৎ কর্ম্মসংন্যাসাৎ কর্ম্মযোগস্য বিশিষ্টত্বমুচ্যতে আহোস্বিদনাত্মবিৎকর্ত্তৃকয়োঃ সংন্যাসকর্ম্মযোগয়োঃ তদুভয়মুচ্যত ইতি কিঞ্চাতো যথাত্মবিৎ কর্ত্তৃকযোঃ কর্ম্মসংন্যাসকর্ম্মযোগয়োর্নিঃশ্রেয়সকরত্বং তয়োস্তু কর্ম্মসংন্যাসাৎ কর্ম্মযোগস্য বিশিষ্টত্বমুচ্যতে যদি বানাত্মবিৎকর্ত্তৃকয়োঃ সংন্যাসকর্ম্ম-

## গিরিকৃত টীকা

ভিপ্রায়ঃ কর্ম্মসংন্যাসকর্ম্মযোগয়োর্ভিন্নপুরুষানুষ্ঠেয়ত্বস্যোক্তত্বাদেকস্মিন্ পুরুষে প্রাপ্ত্যভাবাদিতি শঙ্কতে নন্বিতি। চোদ্যমঙ্গীকৃত্য পরিহরতি সত্যমেবমিতি। কীদৃশস্তর্হি প্রষ্টুরভিপ্রায়ো যেন প্রশ্নপ্রবৃত্তিরিতি পৃচ্ছতি কথমিতি। একস্মিন্ পুরুষে কর্ম্মতত্ত্যাগযোরস্তি প্রাপ্তিরিতি প্রষ্টুরভিপ্রায়ং প্রতিনির্দ্দেষ্টুং প্রাগভবতে পূর্ব্বোদাহৃতৈরিতি। যথা স্বর্গকামো যজেতেতি স্বর্গকামোদ্দেশেন যাগো বিধীয়তে নতু তস্যৈবাধিকারো নান্যস্যেত্যপি প্রতিপাদ্যতে বাক্যভেদপ্রসঙ্গাত্তথানাত্মবিৎকর্ত্তা সংন্যাসপক্ষে প্রাপ্তোঽনূদ্যতে ন চাত্মবিৎকর্ত্তৃকত্বমেব সংন্যাসস্য নিয়ম্যতে বৈরাগ্যমাত্রেণাজ্ঞস্যাপি সংন্যাসবিধিদর্শনাৎ তস্মাৎ কর্ম্ম তত্ত্যাগয়োরবিদ্বৎকর্ত্তৃকত্বমস্তীতি মন্বানস্যার্জ্জুনস্য প্রশ্নঃ সম্ভবতীতি ভাবঃ। ভবতু সংন্যাসস্য কর্ত্তব্যত্ববিবক্ষা তথাপি কথং প্রশস্ততরবুভুৎসয়া প্রশ্নপ্রবৃত্তিরিত্যাশঙ্ক্যাহ-প্রাধান্যমিতি। তথাপি কথমেকস্মিন্ পুরুষে তয়োরপ্রাপ্তাবুক্তাভিপ্রায়েণ প্রশ্নবচনং প্রকল্প্যতে তত্রাহ অনাত্মবিদিতি। আত্মবিদো বিদ্যাসামর্থ্যাৎ কর্ম্মত্যাগধ্রৌব্যবদিতরস্যাপি সতি বৈরাগ্যে তত্ত্যাগস্যাবশ্যকত্বাৎ তত্র কর্ত্তাসৌ প্রাপ্তোঽত্রানূদ্যতে তথা চ কর্ম্মতত্ত্যাগয়োরেকস্মিন্ বিদুষি প্রাপ্তের্ব্যক্তত্বাদুক্তাভিপ্রায়েণ প্রশ্নপ্রবৃত্তিরবিরুদ্ধেত্যর্থঃ। সংন্যাস-

## স্বামিকৃত টীকা।

তিষ্ঠেতি পুনর্যোগঞ্চ কথয়সি, নচ কর্ম্মসংন্যাসঃ কর্ম্ম-যোগশ্চৈকস্যৈকদৈব সম্ভবতো বিরুদ্ধস্বরূপত্বাৎ তস্মাদেতয়োর্মধ্যে একস্মিন্নহুষ্ঠাতব্যে সতি মম যচ্ছ্রেয়ঃ সুনিশ্চিতং তদেকং ব্রূহি ॥ ১ ॥

অত্রোত্তরং শ্রীভগবানুবাচ সংন্যাসইতি। অয়ম্ভাবঃ, ন হি বেদান্তবেদ্যাত্মতত্ত্বজ্ঞং প্রতি

## শাঙ্করভাষ্যম্ ।

যোগয়োস্তদুভয়মুচ্যতইতি। অত্রোচ্যতে, আত্মবিৎকর্ত্তৃকয়োঃ সংন্যাসকর্ম্মযোগয়োরসম্ভবাত্তয়োর্নিঃশ্রেয়সকরত্ববচনং তদীয়াচ্চ কর্ম্মসংন্যাসাৎ কর্ম্মযোগস্য বিশিষ্টত্বাভিধানমিত্যেতদুভয়মনুপপন্নং যদ্যনাত্মবিদঃ কর্ম্মসংন্যাসঃ তৎপ্রতিকূলশ্চ কর্ম্মানুষ্ঠানলক্ষণঃ কর্ম্মযোগঃ সম্ভবেতাং তদা তয়োর্নিঃশ্রেয়সকরত্বোক্তিঃ কর্ম্মযোগস্য চ কর্ম্মসংন্যাসাদ্বিশিষ্টত্বাভিধানমিত্যেতদুভয়মুপপদ্যেত আত্মবিদস্তু সংন্যাসকর্ম্মযোগয়োরসম্ভবাত্তয়োর্নিঃশ্রেয়সকরত্বাভিধানং কর্ম্মসংন্যাসাচ্চ কর্ম্মযোগো বিশিষ্যত ইতি চানুপপন্নমত্রাহ কিমাত্মবিদঃ সংন্যাসকর্ম্মযোগয়োরপ্যসম্ভব আহোস্বিদন্যতরস্যাসম্ভবঃ যদা চান্যতরস্যাসম্ভবস্তদা কিং কর্ম্মসংন্যাসস্যোত কর্ম্মযোগস্যেত্যসম্ভবে কারণঞ্চ বক্তব্যমিতি, অত্রোচ্যতে আত্মবিদো নিবৃত্তমিথ্যাজ্ঞানত্বাদ্বিপর্য্যয়জ্ঞানমূলস্য কর্ম্মযোগস্যাসম্ভবঃ স্যাজ্জন্মাদিসর্ব্ববিক্রিয়ারহিতত্বেন নিষ্ক্রিয়মাত্মানমাত্মত্বেন যো বেত্তি তস্যাত্মবিদঃ সম্যগ্দর্শনেনাপাস্তমিথ্যাজ্ঞানস্য নিষ্ক্রিয়াত্মস্বরূপাবস্থানলক্ষণং সর্ব্বকর্ম্মসংন্যাসমুক্ত্বা তদ্বিপরীতস্য মিথ্যাজ্ঞানমূলককর্ত্তৃত্বাভিমানপুরঃসরস্য সক্রিয়াত্মস্বরূপাবস্থানরূপস্য কর্ম্মযোগস্যেহ শাস্ত্রে তত্র তত্রাত্মস্বরূপনিরূপণপ্রদেশেষু সম্যগ্জ্ঞানমিথ্যাজ্ঞানতৎকার্য্যবিরোধাদভাবঃ প্রতিপাদ্যতে যস্মাত্তস্মাদাত্মবিদো নিবৃত্তমিথ্যাজ্ঞানস্য বিপর্য্যয়জ্ঞানমূলঃ কর্ম্মযোগো ন সম্ভবতীতি যুক্তমুক্তং স্যাৎ। কেষু কেষু পুনরাত্মস্বরূপনিরূপণপ্রদেশেষ্বাত্মবিদঃ কর্ম্মাভাবঃ প্রতিপাদ্যত ইত্যত্রোচ্যতে অবিনাশি তু তদিতি প্রকৃত্য য এনম্বেত্তি হন্তারং, বেদাবিনাশিনং নিত্যমিত্যাদৌ তত্র তত্রাত্মবিদঃ কর্ম্মাভাব উচ্যতে নন্বু চ কর্ম্মযোগোঽপ্যাত্মস্বরূপনিরূপণপ্রদেশেষু তত্র তত্র

## গিরিকৃত টীকা।

স্যাত্মবিৎকর্ত্তৃকত্বমেবাত্র বিবক্ষিতং কিং ন স্যাদিত্যাশঙ্ক্য কর্ত্রন্তরপর্য্যুদাসঃ সংন্যাসবিধিশ্চেত্যর্থভেদে বাক্যভেদপ্রসঙ্গান্নৈবমিত্যাহ ন পুনরিতি। ইতিশব্দো বাক্যভেদপ্রসঙ্গহেতুদ্যোতনার্থঃ। ততঃ কিমিত্যাশঙ্ক্য ফলিতমাহ এবমিতি। কর্ম্মানুষ্ঠানকর্ম্মসংন্যাসয়োরবিদ্বৎকর্ত্তৃকত্বমপ্যাস্তীত্যেবং মন্বানস্যার্জ্জুনস্য প্রশস্যতরবিবিদিষয়া প্রশ্নো নানুপপন্ন ইতি সম্বন্ধঃ। তয়োঃ সমুচ্চিত্যানুষ্ঠানসম্ভবে কথং প্রশস্যতরবিবিদিষেত্যাশঙ্ক্যাহ পূর্ব্বোক্তেনেতি। উভয়োশ্চেত্যাদাবুক্তপ্রকারেণ কর্ম্মতত্ত্যাগয়োর্মিথোবিরোধান্ন সমুচ্চিত্যানুষ্ঠানং সাবকাশমিত্যর্থঃ। ভবতু তর্হি যস্য কস্যচিদন্যতরস্যানুষ্ঠেয়ত্বমিতি কুতো যথোক্তাভিপ্রায়েণ প্রশ্নপ্রবৃত্তিরিত্যাশঙ্ক্যাহ অন্যতরস্যেতি। উভয়প্রাপ্তৌ সমুচ্চয়ানুপপত্ত্যান্যতরপরিগ্রহে বিশেষস্যাবেদ্যত্বাদুক্তাভিপ্রায়েণ প্রশ্নোপপত্তিরিত্যর্থঃ। ইতশ্চাবিদ্বৎকর্ত্তৃকয়োঃ সংন্যাস-

## স্বামিকৃত টীকা।

কর্ম্মযোগমহং ব্রবীমি যতঃ পূর্ব্বোক্তেন সংন্যাসেন বিরোধঃ স্যাৎ অপি তু দেহাত্মাভিমানিনং ত্বাং বন্ধুবধাদিনিমিত্তশোকমোহাদিকৃতমেনং সংশয়ং দেহাত্মবিবেকজ্ঞানাসিনা ছিত্ত্বা

## শাঙ্করভাষ্যম্

প্রতিপাদ্যত এব তদ্ যথা তস্মাদ্ যুধ্যস্ব ভারত, স্বধর্ম্মমপি চাবেক্ষ্য, কর্ম্মণ্যেবাধিকারস্তে ইত্যাদাবতশ্চ কথমাত্মবিদঃ কর্ম্মযোগস্যাসম্ভবঃ স্যাদিতি, অত্রোচ্যতে সম্যগ্‌জ্ঞানমিথ্যা-জ্ঞানতৎকার্য্যবিরোধাৎ জ্ঞানযোগেন সাংখ্যানামিত্যনেন সাংখ্যানামাত্মতত্ত্ববিদামনাত্ম-বিৎকর্ত্তৃককর্ম্মযোগনিষ্ঠাতো নিষ্ক্রিয়াত্মস্বরূপাবস্থানলক্ষণায়া জ্ঞানযোগনিষ্ঠায়াঃ পৃথক্-করণাৎ কৃতকৃত্যত্বেনাত্মবিদঃ প্রয়োজনান্তরাভাবাৎ তস্য কার্য্যং ন বিদ্যত ইতি কর্ত্ত-ব্যান্তরাভাববচনাচ্চ ন কর্ম্মণামনারম্ভাৎ, সংন্যাসস্তু মহাবাহো দুঃখমাপ্তুমযোগতঃ ইত্যাদিবচনাচ্চাত্মজ্ঞানাঙ্গত্বেন কর্ম্মযোগস্য বিধানাৎ যোগারূঢ়স্য তস্যৈব শমঃ কারণ-মুচ্যত ইত্যনেন চোৎপন্নসম্যগ্‌দর্শনস্য কর্ম্মযোগাভাববচনাৎ শারীরং কেবলং কর্ম্ম কুর্ব্ব-ন্নাপ্নোতি কিল্বিষমিতি চ শরীরস্থিতিকারণাতিরিক্তস্য কর্ম্মণো বারণাৎ নৈব কিঞ্চিৎ করোমীতি যুক্তো মন্যেত তত্ত্ববিদিত্যনেন চ শরীরস্থিতিমাত্রপ্রযুক্তেষ্বপি দর্শনশ্রবণাদি-কর্ম্মস্বাত্মযাথাত্ম্যবিদঃ করোমীতি প্রত্যয়স্য সমাহিতচেতস্তয়া সদা কর্ত্তব্যত্বোপদেশাদাত্ম-তত্ত্ববিদঃ সম্যগদর্শনেন বিরুদ্ধো মিথ্যাজ্ঞানহেতুকঃ কর্ম্মযোগঃ ন সম্ভাবয়িতুং শক্যতে যস্মাত্তস্মাদনাত্মবিৎকর্ত্তৃকযোরেব সংন্যাসকর্ম্মযোগয়োর্নিঃশ্রেয়সকরত্ববচনং তদীয়াচ্চ

## গিরিকৃত টীকা।

কর্ম্মযোগয়োঃ কতরঃ শ্রেয়ানিতি প্রষ্টুরভিপ্রায়ো ভাতীত্যাহ প্রচতিবচনেনেতি। কিং তৎ-প্রতিবচনং কথম্বা তন্নিরূপণমিতি পৃচ্ছতি কথমিতি। তত্র প্রতিবচনং দর্শয়তি সংন্যাসেতি। তন্নিরূপণং কথয়তি এতদিতি। তদুভয়ং নিঃশ্রেয়সকরত্বং কর্ম্মযোগস্য শ্রেষ্ঠত্বঞ্চেত্যর্থঃ। গুণদোষবিভাগবিবেকার্থং পৃচ্ছতি কিঞ্চেতি। অতোঽস্মিন্নাদ্যে পক্ষে কিং দূষণং অস্মিন্ বা দ্বিতীয়ে পক্ষে কিং ফলমিতি প্রশ্নার্থঃ। তত্র সিদ্ধান্তী প্রথমপক্ষে দোষমাদর্শয়তি অত্রেত্যাদিনা। তদেবানুপপন্নত্বং ব্যতিরেকদ্বারা বিবৃণোতি যদীত্যাদিনা। নিঃশ্রেয়-সকরত্বোক্তিরিত্যত্র পারম্পর্য্যেণেতি দ্রষ্টব্যং, বিশিষ্টত্বাভিধানমিতি প্রতিযোগিনোঽসহায়-ত্বাদস্য চ শুদ্ধিদ্বারা জ্ঞানার্থত্বাদিত্যর্থঃ। আত্মজ্ঞস্য কর্ম্মসংন্যাসকর্ম্মযোগয়োরসম্ভবে দর্শিতে চোদয়তি অত্রাহেতি। চোদয়িতা নির্দ্ধারণার্থং বিমৃশতি কিমিত্যাদিনা। অন্ত-তরাসম্ভবেঽপি সন্দেহাৎ প্রশ্নোঽবতরতীত্যাহ যদা চেতি। যস্য কস্যচিদন্যতরস্যাসম্ভবো

## স্বামিকৃত টীকা।

পরমাত্মজ্ঞানোপায়ভূতং কর্ম্মযোগমাতিষ্ঠেতি ব্রবীমি, কর্ম্মযোগেন শুদ্ধচিত্তস্যাত্মতত্ত্বজ্ঞানে জাতে সতি তৎপরিপাকার্থং জ্ঞাননিষ্ঠাঙ্গত্বেন সংন্যাসঃ পূর্ব্বমুক্তঃ, এবঞ্চ সত্যঙ্গপ্রধানয়ো-র্ব্বিকল্পাযোগাৎ সংন্যাসঃ কর্ম্মযোগশ্চেত্যেতাবুভাবপি ভূমিকাভেদেন সমুচ্চিতাবেব নিঃশ্রে-য়সং সাধয়তঃ, তথাপি তয়োর্ম্মধ্যে কর্ম্মসংন্যাসাৎ সকাশাৎ কর্ম্মযোগো বিশিষ্টো ভবতীতি ২।

## শাঙ্করভাষ্যম্।

কর্ম্মসংন্যাসাৎ পূর্ব্বোক্তাত্মবিৎকর্তৃকসর্ব্বকর্ম্মসংন্যাসবিলক্ষণাৎ সত্যে কর্তৃত্ববিজ্ঞানে কর্ম্মৈকদেশবিষয়ত্বাৎ যমনিয়মাদিসহিতত্বেন চ দুরনুষ্ঠেয়ত্বাৎ সুকরত্বেন চ কর্ম্মযোগস্য বিশিষ্টত্বাভিধানমিত্যেবং প্রতিবচনবাক্যার্থনিরূপণেনাপি পূর্ব্বোক্তঃ প্রষ্টুরভিপ্রায়ো নিশ্চীয়তে ইতি স্থিতং জ্যায়সী চেৎ কর্ম্মণস্তে ইত্যত্র জ্ঞানকর্ম্মণোঃ সহাসম্ভবে যচ্ছ্রেয় এতয়োস্তন্মে ব্রূহি ইত্যেবং পৃষ্টোঽর্জ্জুনেন ভগবান্ জ্ঞানযোগেন সাংখ্যানাং নিষ্ঠা পুনঃ কর্ম্মযোগেন যোগিনাং নিষ্ঠা প্রোক্তেত নির্ণয়ঞ্চকার ন চ সংন্যসনাদেব কেবলাৎ সিদ্ধিং সমধিগচ্ছতীতি বচনাৎ জ্ঞানসহিতস্য তস্য সিদ্ধিসাধনত্বমিষ্টং কর্ম্মযোগস্য চ বিধানাৎ জ্ঞানরহিতস্য সংন্যাসঃ শ্রেয়ান্ কিম্বা কর্ম্মযোগঃ শ্রেয়ানিত্যেতয়োর্ব্বিশেষবুভুৎসয়া অর্জ্জুন উবাচ, সংন্যাসং

## গিরিকৃত টীকা।

ভবিষ্যতীত্যাশঙ্ক্য কারণমন্তরেণাসম্ভবো ভবন্নতিপ্রসঙ্গঃ স্যাদিতি মন্বানঃ সন্নাহ অসম্ভব ইতি আত্মবিদঃ সকারণং সর্ম্মযোগাসম্ভবং সিদ্ধান্তী দর্শয়তি অত্রেতি। সংগ্রহবাক্যং বিবৃণ্বন্নাত্মবিত্ত্বং বিবৃণোতি জন্মাদীতি। তস্য যদুক্তং নিবৃত্তমিথ্যাজ্ঞানত্বং তদিদানীং ব্যনক্তি সমগিতি। বিপর্য্যয়জ্ঞানমূলস্যেত্যাদিনোক্তং প্রপঞ্চয়তি নিষ্ক্রিয়েতি। যথোক্তসংন্যাসমুক্ত্বা ততো বিপরীতস্য কর্ম্মযোগস্যাভাবঃ প্রতিপাদ্যত ইতি সম্বন্ধঃ। বৈপরীত্যং স্ফোরয়ন্ কর্ম্মযোগমেব বিশিনষ্টি মিথ্যাঽজ্ঞানেতি। মিথ্যা চ তদজ্ঞানঞ্চেত্যনাদ্যনির্ব্বাচ্যমজ্ঞানং তন্মূলোঽহং কর্ত্তেত্যাত্মনি কর্তৃত্বাভিমানস্তজ্জন্যস্তস্যেতি যাবৎ। যথোক্তং সংন্যাসমুক্ত্বা যথোক্তকর্ম্মযোগস্যাসম্ভবপ্রতিপাদনে হেতুমাহ সম্যগ্জ্ঞানেতি। কুত্র তদভাবপ্রতিপাদনং তদাহ ইহেতি। উক্তং হেতুং কৃত্বাত্মজ্ঞস্য কর্ম্মযোগাসম্ভবে ফলিতমাহ যস্মাদিতি। ইহ শাস্ত্রে। তত্র তত্রেত্যাদাবুক্তমেব ব্যক্তীকর্তুং পৃচ্ছতি কেষু কেম্বিতি। তানেব প্রদেশান্ দর্শয়তি অত্রেতি। আত্মস্বরূপনিরূপণপ্রদেশেষু সংন্যাসপ্রতিপাদনাদাত্মবিদঃ সংন্যাসো-বিবক্ষিতশ্চেত্তর্হি কর্ম্মযোগোঽপি তস্য কস্মান্ন ভবতি প্রকরণাবিশেষাদিতি শঙ্কতে নন্বিতি। আত্মবিদ্যাপ্রকরণে কর্ম্মযোগপ্রতিপাদনমুদাহরতি তদ্যথেতি। প্রকরণাদাত্মবিদোঽপি কর্ম্মযোগস্য সম্ভবে ফলিতমাহ অতশ্চেতি। আত্মজ্ঞানোপায়ত্বেনাপি প্রকরণপাঠসিদ্ধৌ জ্ঞানাদূর্দ্ধং ন্যায়বিরুদ্ধং কর্ম্ম কল্পয়িতুমশক্যমিতি পরিহরতি অত্রোচ্যত ইতি সম্যগ্জ্ঞানমিথ্যাজ্ঞানয়োস্তৎকার্য্যয়োশ্চ ভ্রমনিবৃত্তিভ্রমসদ্ভাবয়োর্মিথোবিরোধাৎ কর্তৃত্বাদিভ্রমমূলং কর্ম্ম সম্যগ্জ্ঞানাদূর্দ্ধং ন সম্ভবতীত্যর্থঃ। আত্মজ্ঞস্য কর্ম্মযোগাসম্ভবে হেত্বন্তরমাহ জ্ঞানযোগেনেতি। ইতশ্চাত্মবিদো জ্ঞানাদূর্দ্ধং কর্ম্মযোগো ন যুক্তিমানিত্যাহ কৃতকৃত্যত্বে-

## স্বামিকৃত টীকা।

কুত ইত্যপেক্ষায়াং সংন্যাসিত্বেন কর্ম্মযোগিনং স্তুবংস্তস্য শ্রেষ্ঠত্বং দর্শয়তি জ্ঞেয় ইতি। রাগদ্বেষাদিরাহিত্যেন পরমেশ্বরার্থং কর্ম্মাণি যোঽনুতিষ্ঠতি স নিত্যং কর্ম্মানুষ্ঠানকালেঽপি

জ্ঞেয়ঃ স নিত্যং সন্ন্যাসী যো ন দ্বেষ্টি ন কাঙ্ক্ষতি।
নির্দ্বন্দ্বো হি মহাবাহো সুখং বন্ধাৎ প্রমুচ্যতে॥ ৩॥

## শাঙ্করভাষ্যম্।

পরিত্যাগং কর্ম্মণাং শাস্ত্রীয়াণাং অনুষ্ঠানবিশেষাণাং শংসসি প্রশংসসি কথয়সীত্যেতৎ পুনর্যোগঞ্চ তেষামনুষ্ঠানমবশ্যং কর্ত্তব্যং শংসস্যতো মে কতরৎ শ্রেয় ইতি সংশয়ঃ কিং কর্ম্মানুষ্ঠানং শ্রেয়ঃ কিম্বা তদ্ধ্যানমিতি প্রশস্যতরঞ্চানুষ্ঠেয়মতশ্চ যচ্ছ্রেয়ঃ প্রশস্যতরমেতয়োঃ কর্ম্মসংন্যাসকর্ম্মানুষ্ঠানয়োর্যদনুষ্ঠানাৎ শ্রেয়োঽবাপ্তির্ম্ম স্যাদিতি মন্যসে তদেকমন্যতরৎ সহৈকপুরুষানুষ্ঠেয়ত্বাসম্ভবান্মে ব্রূহি সুনিশ্চিতমভিপ্রেতং তবেতি। ১।

স্বাভিপ্রায়মাচক্ষাণো নির্ণয়ায় শ্রীভগবানুবাচ সংন্যাসইতি। সংন্যাসঃ কর্ম্মণাং পরিত্যাগঃ কর্ম্মযোগশ্চ তেষামনুষ্ঠানং তাবুভাবপি নিঃশ্রেয়সকরৌ নিঃশ্রেয়সং মোক্ষং কুর্ব্বাতে জ্ঞানোৎপত্তিহেতুত্বেন উভৌ যদ্যপি নিঃশ্রেয়সকরৌ তথাপি তয়োস্তু নিঃশ্রেয়সহেত্বোঃ কর্ম্মসংন্যাসাৎ কেবলাৎ কর্ম্মযোগো বিশিষ্যতে ইতি কর্ম্মযোগং স্তৌমি। ২।

কস্মাদিত্যাহ। জ্ঞেয়ো জ্ঞাতব্যঃ স কর্ম্মযোগী নিত্যসংন্যাসীতি যো ন দ্বেষ্টি কিঞ্চিন্ন

## গিরিকৃত টীকা।

নেতি। জ্ঞানবতো নাস্তি কর্ম্মেত্যত্র কারণান্তরমাহ তস্যেতি। তর্হি জ্ঞানবতা কর্ম্মযোগস্য হেয়ত্ববজ্জিজ্ঞাসুনাপি তস্য ত্যাজ্যত্বং জ্ঞানপ্রাপ্ত্যা তস্যাপি পুরুষার্থসিদ্ধেরিত্যাশঙ্ক্য জিজ্ঞাসোরস্তি কর্ম্মযোগাপেক্ষা ইত্যাহ ন কর্ম্মণামিতি। স্বরূপোপকার্য্যঙ্গমন্তরেণাঙ্গিস্বরূপানিষ্পত্তের্জ্ঞানার্থিনা কর্ম্মযোগস্য শুদ্ধ্যাদিদ্বারা জ্ঞানহেতোরাদেয়ত্বমিত্যর্থঃ। তর্হি জ্ঞানবতামপিজ্ঞানফলোপকারিত্বেন কর্ম্মযোগো মৃগ্যতামিত্যাশঙ্ক্যাহ যোগারূঢ়স্যেতি। উৎপন্নসম্যগ্ জ্ঞানস্য কর্ম্মাভাবে শরীরস্থিতিহেতোরপি কর্ম্মণোঽসম্ভবান্ন তস্য শরীরস্থিতিস্তদস্থিতৌ চ কুতো জীবন্মুক্তিস্তদভাবে চ কস্যোপদেষ্টৃত্বং উপ-

## স্বামিকৃত টীকা।

সন্ন্যাসীত্যেব জ্ঞেয়ঃ। তত্র হেতুঃ নির্দ্বন্দ্বো রাগদ্বেষাদিদ্বন্দ্বশূন্যো হি শুদ্ধচিত্তো জ্ঞানদ্বারা সুখমনায়াসেনৈব সংসারাৎ প্রমুচ্যতে। ৩।

যস্মাদেবমঙ্গপ্রধানত্বেনোভয়োরবস্থাভেদেন ক্রমসমুচ্চয়োঽতো বিকল্পমঙ্গীকৃত্যোভয়োঃ কঃ শ্রেষ্ঠ ইতি প্রশ্নোঽজ্ঞানামেবোচিতঃ ন বিবেকিনামিত্যাহ সাংখ্যযোগাবিতি। সাংখ্যশব্দেন জ্ঞাননিষ্ঠাবাচিনা তদঙ্গসংন্যাসং লক্ষয়তি, সংন্যাসকর্ম্মযোগাবেকফলৌ সন্তৌ পৃথক্ স্বতন্ত্রাবিতি বালা অজ্ঞাএব প্রবদন্তি ন তু পণ্ডিতাঃ। তত্র হেতুঃ অনয়োরেকমপি সম্যগাস্থিত আশ্রিতবানুভয়োঃ ফলমাপ্নোতি। তথা হি কর্ম্মযোগং সম্যগনুতিষ্ঠন্ শুদ্ধচিত্তঃ সন্ জ্ঞানদ্বারা যদুভয়োঃ ফলং কৈবল্যং তদ্বিন্দতীতি সংন্যাসং সম্যগাস্থিতোঽপি

সাংখ্যযোগৌ পৃথগ্বালাঃ প্রবদন্তি ন পণ্ডিতাঃ।
একমপ্যাস্থিতঃ সম্যগুভয়োর্বিন্দতে ফলম্ ॥ ৪ ॥

## শাঙ্করভাষ্যম্।

কাঙ্ক্ষতি দুঃখসুখে তৎসাধনে চৈবম্বিধো যঃ কর্ম্মণি বর্ত্তমানোঽপি স নিত্যসন্ন্যাসীতি জ্ঞাতব্য ইত্যর্থঃ, নির্দ্বন্দ্বো দ্বন্দ্ববর্জ্জিতো হি যস্মান্মহাবাহো সুখং বন্ধাদনায়াসেন প্রমুচ্যতে। ৩।

নন্থ সংন্যাসকর্ম্মযোগয়োর্ভিন্নপুরুষানুষ্ঠেয়য়োর্ব্বিরুদ্ধয়োঃ ফলেঽপি বিরোধো যুক্তো ন তূভয়োর্নিঃশ্রেয়সকরত্বমেবেতি প্রাপ্ত ইদমুচ্যতে সাংখ্যযোগাবিতি। সাংখ্যযোগৌ পৃথক্ বিরুদ্ধভিন্নফলৌ বালাঃ প্রবদন্তি ন পণ্ডিতাঃ পণ্ডিতাশ্চ জ্ঞানিন একং ফলমবিরুদ্ধমিচ্ছন্তি কথমেকমপি সাংখ্যযোগয়োঃ সম্যগাস্থিতঃ সম্যগনুষ্ঠিতবানিত্যর্থঃ উভয়োর্ব্বিন্দতে ফলমুভয়োস্তদেব হি নিঃশ্রেয়সং ফলমতো ন ফলে বিরোধোঽস্তি নন্থ সংন্যাসকর্ম্মযোগশব্দেন প্রস্তুত্য সাংখ্যযোগয়োঃ ফলৈকত্বং কথমিহাপ্রকৃতং ব্রবীতি নৈষ দোষঃ যদ্যপ্যর্জ্জুনেন

## গিরিকৃত টীকা।

দেশাভাবে চ কুতো জ্ঞানোদয়ঃ স্যাদিত্যাশঙ্ক্যাহ শারীরমিতি। বিদুষোঽপি শরীরস্থিতিরাস্থিতা চেত্তন্মাত্রপ্রযুক্তেষু দর্শনশ্রবণাদিষু কর্ত্তৃত্বাভিমানোঽপি তস্য স্যাদিত্যাশঙ্ক্যাহ। নৈবেতি। তত্ত্বাবদিত্যনেন চ সমাহিতচেতস্তয়া করোমীতি প্রত্যয়স্য সদৈব কর্ত্তব্যত্বোপদেশাদিতি সম্বন্ধঃ। যত্তু বিদুষঃ শরীরস্থিতিনিমিত্তকর্ম্মাভ্যনুজ্ঞানে তস্মিন্ কর্ত্তৃত্বাভিমানোঽপি স্যাদিতি তত্রাহ শরীরেতি। আত্মযাথাত্ম্যবিদঃ তেষপি নাহং করোমীতি প্রত্যয়স্য নৈব কিঞ্চিৎ করোমীত্যাদাবকর্ত্তৃত্বোপদেশান্ন কর্ত্তৃত্বাভিমানসম্ভাবনেত্যর্থঃ। যথোক্তোপদেশানুসন্ধানাভাবে বিদুষোঽপি করোমীতি স্বাভাবিকপ্রত্যয়দ্বারা কর্ম্মযোগঃ স্যাদিত্যাশঙ্ক্যাহ আত্মতত্ত্বেতি। যদ্যপি বিদ্বান্ যথোক্তমুপদেশং কদাচিন্নানুসন্ধত্তে তথাপি তত্ত্ববিদাবিরোধান্মিথ্যাজ্ঞানং তন্নিমিত্তং কর্ম্ম বা তস্য সম্ভাবয়িতুমশক্যমিত্যর্থঃ। আত্মবিৎকর্ত্তৃকয়োঃ সন্যাসকর্ম্মযোগয়োরযোগাত্তয়োর্নিঃশ্রেয়সফলবত্ত্বমন্যতরস্য বিশিষ্টত্বমিত্যেতদযুক্তমিতি সিদ্ধত্বাদ্দ্বিতীয়ং পক্ষমঙ্গীকরোতি যস্মাদিত্যাদিনা। তদীয়াচ্চ কর্ম্মসংন্যাসাৎ কর্ম্মযোগস্য বিশিষ্টত্বাভিধানমিতি সম্বন্ধঃ। নন্থ কর্ম্মযোগেন শুদ্ধবুদ্ধেঃ সংন্যাসোজায়মানস্তস্মাদুৎকৃষ্যতে কথং তস্মাৎ কর্ম্মযোগস্যোৎকৃষ্টত্ববাচো যুক্তির্যুক্তেতি তত্রাহ পূর্ব্বোক্তেতি। বৈলক্ষণ্যমেব স্পষ্টয়তি সত্যোবেতি। স্বাশ্রমবিহিতশ্রবণাদৌ কর্ত্তৃত্ববিজ্ঞানে সত্যেব পূর্ব্বাশ্রমোপাত্তকর্ম্মৈকদেশবিষয়সংন্যাসাৎ কর্ম্মযোগস্য শ্রেয়স্ত্ববচনং নৈতাদৃশং ব্রাহ্মণ-

## স্বামিকৃত টীকা।

পূর্ব্বমনুষ্ঠিতস্য কর্ম্মযোগস্যাপি পরম্পরয়া যৎ ফলং কৈবল্যং তদ্বিন্দতীতি ন পৃথক্ ফলত্বমনয়োরিত্যর্থঃ ॥৪॥

যৎ সাংখ্যৈঃ প্রাপ্যতে স্থানং তদ্‌যোগৈরপি গম্যতে ॥
একং সাঙ্খ্যঞ্চ যোগঞ্চ যঃ পশ্যতি স পশ্যতি ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

সংন্যাসং কর্ম্মযোগঞ্চ কেবলমভিপ্রেত্য প্রশ্নঃ কৃতো ভগবাংস্তু তদপরিত্যাগেনৈব স্বাভিপ্রেতঞ্চ বিশেষং সংযোজ্য শব্দান্তরবাচ্যতয়া প্রতিবচনং দদৌ সাংখ্যযোগাবিতি তাবেব সংন্যাসকর্ম্মযোগৌ জ্ঞানতদুপায়সমবুদ্ধিত্বাদিসংযুক্তৌ সাংখ্যযোগশব্দবাচ্যাবিতি ভগবতো মতমতো নাপ্রকৃতপ্রক্রিয়েতি। ৪।

একস্যাপি সম্যগনুষ্ঠানাৎ কথমুভয়োঃ ফলং বিন্দত ইত্যুচ্যতে যদিতি। যৎ সাংখ্যৈর্জ্ঞাননিষ্ঠৈঃ সংন্যাসিভিঃ প্রাপ্যতে স্থানং মোক্ষাখ্যং তদ্‌যোগৈরপি জ্ঞানপ্রাপ্ত্যুপায়ত্বেনেশ্বরে সমর্প্য কর্ম্মাণি আত্মনঃ ফলমনভিসন্ধায়ানুতিষ্ঠন্তি যে তে যোগিনঃ তৈরপি পরমার্থজ্ঞানসংন্যাসপ্রাপ্তিদ্বারেণ গম্যত ইত্যতিপ্রেযোঽতএকং সাংখ্যঞ্চ যোগঞ্চ যঃ পশ্যতি স পশ্যতি ফলৈকত্বাৎ সম্যক্ পশ্যতীত্যর্থঃ। ৫।

## গিরিকৃত টীকা।

স্যাদ্ভি বিত্তুমিত্যাদিস্মৃতিবিরুদ্ধমিত্যাশঙ্ক্যাহ যমনিষমাদিতি। আনৃশংস্যং ক্ষমা সত্যমহিংসা দমতার্জ্জবং। প্রীতিঃ প্রসাদো মাধুর্য্যমক্রোধশ্চ যমা দশ। দানমিজ্যা তপো ধ্যানং স্বাধ্যায়োপস্থনিগ্রহৌ। ব্রতোপবাসৌ মৌনঞ্চ স্নানঞ্চ নিয়মা দশ ইত্যুক্তৈর্যমনিয়মৈরন্যৈশ্চাশ্রমধর্ম্মৈর্ব্বিশিষ্টত্বেনানুষ্ঠাতুমশক্যত্বাদুক্তসন্ন্যাসাৎ কর্ম্মযোগস্য বিশিষ্টত্বোক্তির্যুক্তেত্যর্থঃ। ন হি কশ্চিদিতিন্যায়েন কর্ম্মযোগস্যোত্তবাপেক্ষয়া সুকরত্বাচ্চ তস্য বিশিষ্টত্ববচনং শ্লিষ্টমিত্যাহ সুকরত্বেন চেতি। প্রতিবচনবাক্যার্থালোচনাৎ সিদ্ধামর্থমুপসংহরতি ইত্যেবমিতি। সংন্যাসকর্ম্মযোগয়োর্মিথোবিরুদ্ধযোঃ সমুচ্চিত্যানুষ্ঠাতুমশক্যয়োরন্যতরস্য কর্ত্তব্যত্বে প্রশস্যতরস্য তদ্ভাবাতদ্ভাবস্য চানির্দ্ধারিতত্বাত্তন্নির্দ্ধারয়িষয়া প্রশ্নঃ স্যাদিতি প্রশ্নবাক্যার্থপর্য্যালোচনয়া প্রষ্টুরভিপ্রায়ো যঃ পূর্ব্বমুপদিষ্টস্তথা প্রতিবচনার্থনিরূপণেনাপি তস্য নিশ্চিতত্বাৎ প্রশ্নোপপত্তিঃ সিদ্ধেত্যর্থঃ। ননু তৃতীয়ে যথোক্তপ্রশ্নস্য ভগবতা নির্ণীতত্বান্নাত্র প্রশ্নপ্রতিবচনয়োঃ সাবকাশত্বমিত্যাশঙ্ক্য বিস্তরেণোক্তমেব সম্বন্ধং পুনঃ সংক্ষেপতো দর্শয়তি জ্যায়সী চেদিতি। সাংখ্যযোগয়োর্ভিন্নপুরুষানুষ্ঠেয়ত্বেন নির্ণীতত্বান্ন

## স্বামিকৃত টীকা।

এতদেব স্ফুটয়তি যৎ সাংখ্যৈরিতি। সাংখ্যৈর্জ্ঞাননিষ্ঠৈঃ সংন্যাসিভির্যৎস্থানং মোক্ষাখ্যং প্রকর্ষেণ সাক্ষাদবাপ্যতে, যোগৈরিতি অর্শআদিত্বান্মত্বর্থীয়োঽৎপ্রত্যয়ো দ্রষ্টব্যস্তেন কর্ম্মযোগিভিরপি তদেব জ্ঞানদ্বারেণ গম্যতেঽবাপ্যত ইত্যর্থঃ, অতঃ সাংখ্যঞ্চ যোগঞ্চৈককফলত্বেনৈকং যঃ পশ্যতি সএব সম্যক্ পশ্যতি ॥ ৫ ॥

সংন্যাসস্তু মহাবাহো দুঃখমাপ্তুমযোগতঃ।
যোগযুক্তো মুনির্ব্রহ্ম ন চিরেণাধিগচ্ছতি ॥ ৬ ॥

শাঙ্করভাষ্যম্।

এবং তর্হি যোগাৎ সংন্যাসএব বিশিষ্যতে, কথং তর্হি এবমুক্তং তয়োস্তু কর্ম্মসংন্যাসাৎ কর্ম্মযোগো বিশিষ্যতে ইতি শৃণু তত্র কারণন্ত্বয়া পৃষ্টং কেবলং কর্ম্মসংন্যাসং কর্ম্মযোগঞ্চাভিপ্রেত্য তয়োরন্যতরঃ কঃ শ্রেয়ানিতি, তদনুরূপং প্রতিবচনং ময়োক্তং কর্ম্মসংন্যাসাৎ কর্ম্মযোগো বিশিষ্যত ইতি জ্ঞানমনপেক্ষ্য, জ্ঞানাপেক্ষস্তু সংন্যাসঃ সাংখ্যমিতি ময়াভিপ্রেতঃ পরমার্থযোগস্তু সএব, যস্তু কর্ম্মযোগো বৈদিকঃ স চ তাদর্থ্যাদ্‌যোগঃ সংন্যাস ইতি চোপচর্য্যতে কথং তাদর্থ্যমিত্যুচ্যতে সংন্যাস ইতি। সংন্যাসস্তু পারমার্থিকো হে মহাবাহো দুঃখমাপ্তুং প্রাপ্তুমযোগতঃ যোগেন বিনা যোগযুক্তো বৈদিকেন কর্ম্মযোগেন ঈশ্বরসমর্পিতরূপেণ ফলনিরপেক্ষেণ তেন যুক্তো মুনির্মননাদীশ্বররূপস্য মুনির্ব্রহ্ম পরমাত্মজ্ঞাননিষ্ঠালক্ষণত্বাৎ প্রকৃতঃ সংন্যাসো ব্রহ্মোচ্যতে ন্যাস ইতি ব্রহ্ম, ব্রহ্ম হি পর ইতি শ্রুতেঃ ব্রহ্ম পরমার্থসংন্যাসং পরমাত্মজ্ঞাননিষ্ঠালক্ষণং ন চিরেণ ক্ষিপ্রমেবাধিগচ্ছতি প্রাপ্নোত্যতো ময়োক্তং কর্ম্মযোগো বিশিষ্যত ইতি। ৬।

গিরিকৃত টীকা।

পুনঃ প্রশ্নযোগ্যত্বমিত্যর্থঃ। ইতোঽপি ন তয়োঃ প্রশ্নবিষয়ত্বমিত্যাহ ন চেতি। এবকারবিশেষেণ জ্ঞানসহিতসংন্যাসস্য সিদ্ধিসাধনত্বং ভগবতোঽভিমতং ছিত্ত্বৈনং সংশয়ং যোগমাতিষ্ঠেতি চ কর্ম্মযোগস্য বিধানাত্তস্যাপি সিদ্ধিসাধনত্বমিষ্টং ততশ্চ নির্ণীতত্বান্ন প্রশ্নস্তদ্বিষয়ঃ সিধ্যতীত্যর্থঃ। কেনাভিপ্রায়েণ তর্হি প্রশ্নঃ স্যাদিত্যাশঙ্ক্য জ্ঞানরহিতসংন্যাসাৎ কর্ম্মযোগস্য প্রশস্যতরত্ববুভুৎসয়েত্যাহ জ্ঞানরহিতইতি। প্রষ্টুরভিপ্রায়মেবং প্রদর্শ্য প্রশ্নোপপত্তিমুক্ত্বা প্রশ্নমুত্থাপয়তি সংন্যাসমিতি। তর্হি দ্বয়ং দ্বয়ানুষ্ঠেয়মিত্যাশঙ্ক্য তদশক্তেরুক্তত্বাৎ প্রশস্যতরস্যানুষ্ঠানার্থং তদিদমিতি নিশ্চিত্য বক্তব্যমিত্যাহ যচ্ছ্রেয় ইতি। কাম্যানাং প্রতিষিদ্ধানাঞ্চ কর্ম্মণাং পরিত্যাগো ময়োচ্যতে ন সর্ব্বেষামিত্যাশঙ্ক্য কর্ম্মণ্য-

স্বামিকৃত টীকা।

যদি কর্ম্মযোগিনোঽপ্যন্ততঃ সংন্যাসেনৈব জ্ঞাননিষ্ঠা তর্হি আদিতএব সংন্যাসঃ কর্ত্তুং যুক্ত ইতি মন্বানং প্রত্যাহ সংন্যাসস্থিতি। অযোগতঃ কর্ম্মযোগং বিনা সংন্যাসঃ দুঃখং দুঃখহেতুরশক্য ইত্যর্থঃ চিত্তশুদ্ধ্যভাবেন জ্ঞাননিষ্ঠায়া অসম্ভবাৎ; যোগযুক্তস্তু শুদ্ধচিত্ততয়া সংন্যাসী ভূত্বা অচিরেণ ব্রহ্মাধিগচ্ছতি অপরোক্ষং জানাতি। অতশ্চিত্তশুদ্ধেঃ প্রাক্ কর্ম্মযোগ এব সন্ন্যাসাদ্বিশিষ্যত ইতি পূর্ব্বোক্তং সিদ্ধং, তদুক্তং বার্ত্তিককৃদ্ভিঃ, প্রমাদিনো বহিশ্চিত্তাঃ পিশুনাঃ কলহোৎসুকাঃ। সংন্যাসিনোঽপি দৃশ্যন্তে দৈবসংদূষিতাশয়া ইতি ॥ ৬ ॥

## গিরিকৃত টীকা।

কর্ম্মেত্যাদৌ বিশেষদর্শনাদেবমিত্যাহ শাস্ত্রীয়াণামিতি। অস্তু তর্হি শাস্ত্রীয়াশাস্ত্রীয়য়োরশেষযোরপি কর্ম্মণোস্ত্যাগো নেত্যাহ পুনরিতি। কর্ম্মত্যাগস্তদ্‌যোগশ্চেত্যুভয়মাদর্শিতব্যমিত্যাশঙ্ক্য বিবোধাদেবমিত্যভিপ্রেত্যাহ অতইতি। দ্বয়োরেকেণানুষ্ঠানাযোগস্যোক্তত্বাৎ কর্ত্তব্যত্বোক্তেশ্চ সংশয়ো জায়তে তমেব সংশয়ং বিশদয়তি কিং কর্ম্মেতি। প্রশস্ততেরবুভুৎসা কিমর্থেত্যাশঙ্ক্যাহ প্রশস্ততরঞ্চেতি। তস্যৈবানুষ্ঠেয়ত্বে প্রশ্নসাবকাশত্বমাহ অতশ্চেতি। তদেব প্রশস্ততরং বিশিনষ্টি যদনুষ্ঠানাদিতি। তদেকমন্যতরমস্মৈ ব্রূহীতি সম্বন্ধঃ। উভয়োরুক্তত্বে সতি কিমিত্যেকং বক্তব্যমিতি নিযুজ্যতে তত্রাহ সহেতি। কর্ম্মতত্ত্যাগয়োর্মিথোবিরোধাদিত্যর্থঃ॥ ১॥

প্রশ্নমেবমুত্থাপ্য প্রতিবচনমুত্থাপয়তি স্বাভিপ্রায়মিতি। নির্ণয়ায় তদ্দ্বারেণ পরস্য সংশয়নিবৃত্ত্যর্থমিত্যর্থঃ। এবং প্রশ্নে প্রবৃত্তে কর্ম্মযোগস্য সৌকর্য্যমভিপ্রেত্য প্রশস্ততরত্বমভিধিৎসুর্ভগবান্ প্রতিবচনং কিমুক্তবানিত্যাশঙ্ক্যাহ সংন্যাসইতি। উভয়োরপি তুল্যত্বশঙ্কাং বারয়তি তয়োস্ত্বিতি। কথং তর্হি জ্ঞানস্যৈব মোক্ষোপায়ত্বং বিবক্ষ্যতে তত্রাহ জ্ঞানোৎপত্তীতি। তর্হি দ্বয়োরপি প্রশস্তত্বমপ্রশস্তত্বং বা তুল্যমিত্যাশঙ্ক্যাহ উভাবিতি। জ্ঞানসহায়স্য কর্ম্মসংন্যাসস্য কর্ম্মযোগাপেক্ষয়া বিশিষ্টত্ববিবক্ষয়া বিশিনষ্টি কেবলাদিতি॥ ২॥

কর্ম্ম হি বন্ধকারণং প্রসিদ্ধং তৎ কথং নিঃশ্রেয়সকরং স্যাদিতি শঙ্কতে কস্মাদিতি। অকর্ত্রাত্মবিজ্ঞানাৎ প্রাগপি সর্ব্বদাসৌ সংন্যাসী জ্ঞেয়ো যো রাগদ্বেষৌ কচিদপি ন করোতীত্যাহ ইত্যাহেতি। যথানুষ্ঠীয়মানানি কর্ম্মাণি সংন্যাসিনং ন নিবধ্নন্তি কৃতানি বৈরাগ্যেন্দ্রিয়সংযমাদীনি ফলাভিসন্ধিরহিতানি তথৈবানভিসংহিতফলানি নিত্যনৈমিত্তিকানি যোগিনমপি ন নিবধ্নন্তি, নিবর্ত্তয়ন্তি চ সঞ্চিতং দুরিতমিত্যভিপ্রেত্যাহ নির্দ্বন্দ্বো হীতি। কর্ম্মযোগিনো নিত্যসংন্যাসিত্বাজ্ঞানমন্যথাজ্ঞানত্বান্মিথ্যাজ্ঞানমিত্যাশঙ্ক্যাহ এবম্বিধ ইতি কর্ম্মিণোঽপি রাগদ্বেষাভাবেন সংন্যাসিত্বং জ্ঞাতুমুচিতমিত্যর্থঃ। রাগদ্বেষরহিতস্যানায়াসেন বন্ধপ্রধ্বংসসিদ্ধেশ্চ যুক্তং তস্য সংন্যাসিত্বমিত্যাহ নির্দ্বন্দ্বইতি॥ ৩॥

যদুক্তং সংন্যাসকর্ম্মযোগয়োঃ নিঃশ্রেয়সকরত্বং তদাক্ষিপতি নন্বু স ন্যাসেতি। তত্রোত্তরত্বেনোত্তরশ্লোকমবতারয়তি ইতি প্রাপ্তইতি। বিবেকিনস্তর্হি কথং বদন্তীত্যাকাংক্ষায়ামাহ একমিতি। সংখ্যামাত্মসমসমীক্ষামর্হতীতি সাংখ্যং সংন্যাসো, যোগস্তু কর্ম্মযোগস্তাবুভাবপি পৃথগিত্যস্যার্থমাহ বিরুদ্ধেতি। শাস্ত্রার্থবিবেকশূন্যত্বং বাল্যত্বং। উত্তরার্দ্ধমবতারয়িতুং ভূমিকাং করোতি পণ্ডিতাস্ত্বিতি। জ্ঞানিনো যোগিনশ্চেতি শেষঃ। দ্বয়োরবিরুদ্ধফলত্বমেব প্রশ্নপূর্ব্বকং প্রকটয়তি কথমিত্যাদিনা। একং সাধনমনুতিষ্ঠতো দ্বয়োরপি ফলং ভবতীতি বিরুদ্ধমিত্যাশঙ্ক্যাহ উভয়োরিতি। সাংখ্যযোগয়োঃ সংন্যাসকর্ম্মানুষ্ঠানয়োস্তজ্জ্ঞানদ্বারা নিঃশ্রেয়সফলত্বান বিরুদ্ধফলত্বশঙ্কা ইত্যর্থঃ। সাংখ্যযোগয়ো-

যোগযুক্তো বিশুদ্ধাত্মা বিজিতাত্মা জিতেন্দ্রিয়ঃ।
সর্ব্বভূতাত্মভূতাত্মা কুর্ব্বন্নপি ন লিপ্যতে ॥ ৭ ॥

## শাঙ্করভাষ্যম্।

যদা পুনরয়ং সম্যগ্দর্শনপ্রাপ্ত্যুপায়ত্বেন যোগেতি। যোগেন যুক্তো বিশুদ্ধাত্মা বিশুদ্ধচিত্তো বিজিতাত্মা বিজিতদেহো জিতেন্দ্রিয়শ্চ সর্ব্বভূতাত্মা সর্ব্বেষাং ব্রহ্মাদীনাং স্তম্বপর্য্যন্তানাং ভূতানামাত্মভূত আত্মা প্রত্যক্‌চেতনো যস্ত স সর্ব্বভূতাত্মভূতাত্মা সম্যগ্দর্শীত্যর্থঃ, স তত্রৈব বর্ত্তমানো লোকসংগ্রহায় কর্ম্ম কুর্ব্বন্নপি ন লিপ্যতে যোগযুক্তো ন কর্ম্মভির্ব্বধ্যত ইত্যর্থঃ ॥ ৭ ॥

## গিরিকৃত টীকা।

রেকফলত্ববচনং প্রকরণাননুগুণমিতি শঙ্কতে নম্বিতি। অপ্রকৃতত্বমসিদ্ধমিতি পরিহরতি নৈষ দোষইতি। সংন্যাসং কর্ম্মণামিত্যাদিনা সংন্যাসং কর্ম্মযোগঞ্চাঙ্গীকৃত্য প্রশ্নে সংন্যাসঃ কর্ম্মযোগশ্চেত্যাদিনা তথৈব প্রতিবচনে চ কথং সাংখ্যযোগয়োরেকফলত্বমপ্রকৃতং ন ভবতীত্যুচ্যতে তত্রাহ যদ্যপীতি। প্রতিবচনমপি তদনুরূপমেব ভগবতা নিরূপিতমিতি বিশেষানুপপত্তিরিত্যাশঙ্ক্যাহ ভগবাংস্থিতি। তদপরিত্যাগেনেত্যত্র তৎপদেন প্রষ্ট্রা প্রতিনির্দ্দিষ্টৌ কর্ম্মসংন্যাসকর্ম্মযোগাবুচ্যেতে, সাংখ্যযোগাবিতি শব্দান্তরবাচ্যতয়া তয়োরেব সংন্যাসকর্ম্মযোগয়োরত্যাগেন স্বাভিপ্রেতঞ্চ বিশেষং সংযোজ্য ভগবান্ প্রতিবচনং সংদদাবিতি যোজনা। যদুক্তং স্বাভিপ্রেতঞ্চ বিশেষং সংযোজ্যেতি তদেব ব্যক্তীকরোতি তাবেবেতি। সমবুদ্ধিত্বাদীত্যাদিশব্দেন জ্ঞানোপায়ভূতঃ শমাদিরানীয়তে। প্রকৃতয়োরেব সংন্যাসকর্ম্মযোগয়োরুপাদানে কারণমাহ অতইতি। সাংখ্যযোগাবিত্যাদিশ্লোকব্যাখ্যানসমাপ্তিরিতিশব্দার্থঃ ॥ ৪ ॥

প্রশ্নপূর্ব্বকং শ্লোকান্তরমবতারয়তি একস্যাপীতি। কেচিদেব তয়োরেকফলত্বং পশ্যন্তীত্যাশঙ্ক্য তেষামেব সম্যগ্দর্শিত্বং নেতরেষামিত্যাহ একমিতি। তিষ্ঠত্যস্মিন্ন চ্যবন্তে পুনরিতি ব্যুৎপত্তিমাশ্রিত্যাহ মোক্ষাখ্যমিতি। যোগশব্দার্থমাহ জ্ঞানপ্রাপ্তীতি। যে হি জিজ্ঞাসবঃ সর্ব্বাণি কর্ম্মাণি ভগবৎপ্রীত্যর্থত্বেন তেষাং ফলাভিলাষমকৃত্বা জ্ঞানপ্রাপ্তৌ বুদ্ধিশুদ্ধিদ্বারেণোপায়ত্বেনানুতিষ্ঠন্তি তেঽত্র যোগা বিবক্ষ্যন্তে। অচপ্রত্যয়স্য মত্বর্থত্বং গৃহীত্বোক্তং

## স্বামিকৃত টীকা।

কর্ম্মযোগাদিক্রমেণ ব্রহ্মাধিগমে সত্যপি তদুপরিতনৈন কর্ম্মণা বন্ধঃ স্যাদেবেত্যাশঙ্ক্যাহ যোগযুক্ত ইতি। যোগেন যুক্তঃ অতএব বিশুদ্ধ আত্মা চিত্তং যস্য অতএব বিজিত আত্মা শরীরং যেন অতএব বিজিতানীন্দ্রিয়াণি যেন ততশ্চ সর্ব্বেষাং ভূতানামাত্মভূত আত্মা যস্য স লোকসংগ্রহার্থং স্বাভাবিকং কর্ম্ম কুর্ব্বন্নপি ন লিপ্যতে ॥ ৭ ॥

নৈব কিঞ্চিৎ করোমীতি যুক্তো মন্যেত তত্ত্ববিৎ।
পশ্যন্ শৃণ্বন্ স্পৃশন্ জিঘ্রন্নশ্নন্ গচ্ছন্ স্বপন্ শ্বসন্ ॥৮॥

## শাঙ্করভাষ্যম্।

ন চাসৌ পরমার্থতঃ করোতীত্যেতন্নৈব কিঞ্চিৎ করোমীতি। যুক্তঃ সমাহিতঃ সন্ মন্যেত চিন্তয়েত তত্ত্ববিদাত্মনো যাথাত্ম্যং তত্ত্বং বেত্তীতি তত্ত্ববিৎ পরমার্থদর্শী-ত্যর্থঃ। কদা কথম্বা তত্ত্বমবধারয়ন্ মন্যেতেত্যুচ্যতে পশ্যন্নিতি। মন্যেতেতি পূর্ব্বেণ সম্বন্ধঃ ॥ ৮ ॥

## গিরিকৃত টীকা।

যোগিনইতি। সর্ব্বোঽপি দ্বৈতপ্রপঞ্চো ন বস্তুভূতোঽয়ং মায়াবিলাসত্বাদাত্মা ত্ববিক্রিয়োঽদ্বি-তীয়ো বস্তুসন্নিতি প্রয়োজকজ্ঞানং পরমার্থজ্ঞানং তৎপূর্ব্বকসংন্যাসদ্বারেণ কর্ম্মিভিরপি তদেব স্থানং প্রাপ্যমিত্যেকফলত্বং সংন্যাসকর্ম্মযোগয়োরবিরুদ্ধমিত্যাহ তৈরপীতি। ফলৈকত্বে ফলিতমাহ অতইতি ॥ ৫ ॥

যদি যথোক্তজ্ঞানপূর্ব্বকসংন্যাসদ্বারা কর্ম্মিণামপি শ্রেয়োঽবাপ্তিরিষ্টা তর্হি সংন্যাসস্যৈব শ্রেয়স্ত্বং প্রাপ্তমিতি চোদয়তি এবং তর্হীতি। সংন্যাসস্য শ্রেষ্ঠত্বে কর্ম্মযোগস্য প্রশস্ততরবচন-মনুচিতমিত্যাহ কথং তর্হীতি। পূর্ব্বোক্তমেবাভিপ্রায়ং স্মারয়ন্ পরিহরতি শৃণ্বিতি। কর্ম্মযোগস্য বিশিষ্টত্ববচনং তত্রেতি পরামৃষ্টং। তদেব কারণং কথয়তি ত্বয়েত্যাদিনা। কেবলং বিজ্ঞানরহিতমিতি যাবৎ, তয়োরন্যতরঃ কঃ শ্রেয়ানিতি ইতিশব্দোঽধ্যাহর্ত্তব্যঃ। ত্বদীয়ং প্রশ্নমনুসৃত্য তদনুগুণং প্রতিবচনং জ্ঞানমনপেক্ষ্য তদ্রহিতাৎ কেবলাদেব সংন্যাসাৎ যোগস্য বিশিষ্টত্বমিতি যথোক্তমিত্যাহ তদনুরূপমিতি। জ্ঞানাপেক্ষঃ সংন্যাসস্তর্হি কীদৃ-গিত্যাশঙ্ক্যাহ জ্ঞানেতি। তর্হি কর্ম্মযোগে কথং যোগশব্দ সংন্যাসশব্দো বা প্রযুজ্যতে তত্রাহ বক্ষ্যতি। তাদর্থ্যাৎ পরমার্থজ্ঞানশেষত্বাদিতি যাবৎ। তদেব তাদর্থ্যং প্রশ্নপূর্ব্বকং প্রসাধয়ন্তি কথমিত্যাদিনা। কর্ম্মানুষ্ঠানাভাবে বুদ্ধিশুদ্ধ্যভাবাৎ পরমার্থসংন্যাসস্য সম্যগ্-জ্ঞানাত্মনো ন প্রাপ্তিরিতি ব্যতিরেকমুক্তান্বয়মুপন্যস্যতি যোগেতি। পারমার্থিকঃ সম্যগ্‌জ্ঞানাত্মকঃ। সামগ্র্যভাবে কার্য্যপ্রাপ্তিরযুক্তেতি মত্বাহ দুঃখমিতি। যোগযুক্তত্বং ব্যাচষ্টে বৈদিকেনেতি। ঈশ্বরস্বরূপস্য সবিশেষত্বেতিশেষঃ। ব্রহ্মেতি ব্যাখ্যেয়ং পদমু-পাদায় ব্যাচষ্টে প্রকৃতইতি। তত্র ব্রহ্মশব্দপ্রয়োগে হেতুমাহ পরমাত্মেতি। লক্ষণশব্দো

## স্বামিকৃত টীকা।

কর্ম্ম কুর্ব্বন্নপি ন লিপ্যত ইত্যেতদ্বিরুদ্ধমিত্যাশঙ্ক্য কর্তৃত্বাভিমানাভাবাদেত্যাহ নৈবেতি দ্বাভ্যাং। কর্ম্মযোগেন যুক্তঃ ক্রমেণ তত্ত্ববিদ্ভূত্বা দর্শনশ্রবণাদীনি কুর্ব্বন্নপীন্দ্রিয়াণীন্দ্রিয়া-

প্রলপন্ বিসৃজন্ গৃহ্ণন্নুন্মিষন্নিমিষন্নপি।
ইন্দ্রিয়াণীন্দ্রিয়ার্থেষু বর্ত্তন্ত ইতি ধারয়ন্ ॥ ৯ ॥

## শাঙ্করভাষ্যম্।

যস্যৈবং, তত্ত্ববিদঃ সর্ব্বকার্য্যকরণচেষ্টাসু কর্ম্মসু অকর্ম্মৈব পশ্যতঃ সম্যগ্দর্শিনস্তস্য সর্ব্ব-কর্ম্মসংন্যাস এবাধিকারঃ কর্ম্মণোঽভাবদর্শনাৎ হি মৃগতৃষ্ণিকায়ামুদকবুদ্ধ্যা পানায় প্রবৃত্ত উদকাভাবজ্ঞানেঽপি তত্রৈব পানপ্রয়োজনায় প্রবর্ত্ততে ॥ ৯ ॥

যস্তু পুনরতত্ত্ববিৎ প্রবৃত্তশ্চ কর্ম্মযোগে ব্রহ্মণীতি। ব্রহ্মণীশ্বরে আধায় নিক্ষিপ্য তদর্থং

## গিরিকৃত টীকা।

গমকবিষয়ঃ। সংন্যাসে ব্রহ্মশব্দপ্রযোগে তৈত্তিরীয়কশ্রুতিং প্রমাণয়তি ন্যাসইতি। কথং সংন্যাসে হিরণ্যগর্ভবাচী ব্রহ্মশব্দঃ প্রযুজ্যতে দ্বয়োরপি পরত্বাবিশেষাদিত্যাহ ব্রহ্ম হীতি। ব্রহ্মশব্দস্য সংন্যাসবিষয়ত্বে ফলিতং বাক্যার্থমাহ ব্রহ্মেত্যাদিনা। নদ্যাঃ স্রোতাংসীব নিম্নপ্রবণানি কর্ম্মভিরতিতরাং পরিপক্বকষায়স্য করণানি সর্ব্বতো ব্যাপৃতানি নিরস্তাশেষ-কূটস্থপ্রত্যগাত্মান্বেষণপ্রবণানি ভবন্তীতি। কর্ম্মযোগস্য পরমার্থসংন্যাসপ্রাপ্ত্যুপায়ত্বে ফলিতমাহ অতইতি ॥ ৬ ॥

নন্বু পারিব্রাজ্যং পরিগৃহ্য শ্রবণাদিসাধনমসকৃদনুতিষ্ঠতো লব্ধসম্যগ্বোধস্যাপি যথা-পূর্ব্বং কর্ম্মাণ্যুপলভ্যন্তে তানি চ বন্ধহেতুনি ভবিষ্যন্তীত্যাশঙ্ক্য শ্লোকান্তরমবতারয়তি যদা পুনরিতি। সম্যগ্দর্শনপ্রাপ্ত্যুপায়ত্বেন যদা পুনরয়ং পুরুষো যোগযুক্তত্বাদিবিশেষণঃ সম্যগ-দর্শীসম্পদ্যতে তদা প্রাতিভাসিকীং প্রবৃত্তিমনুসৃত্য কুর্ব্বন্নপি ন লিপ্যতইতি যোজনা, যোগেন নিত্যনৈমিত্তিককর্ম্মানুষ্ঠানেনেতি যাবৎ। আদৌ নিত্যাদ্যনুষ্ঠানবতো রজস্তমো-মলাভ্যামকলুষিতং সত্বং শুধ্যতীত্যাহ বিশুদ্ধেতি। বুদ্ধিশুদ্ধৌ কার্য্যকারণসংঘাতস্যাপি স্বাধীনত্বং ভবতীত্যাহ বিজিতেতি। তস্য যথোক্তবিশেষণবতো জায়তে সম্যগ্দর্শিত্বমিত্যাহ সর্ব্বভূতেতি। সম্যগ্দর্শিনস্তর্হি কর্ম্মানুষ্ঠানং কুত্রত্যং তদনুষ্ঠানে বা কুতো বন্ধবিশ্লেষসিদ্ধি-রিত্যাশঙ্ক্যাহ স তত্রেতি। সম্যগ্দর্শনং সপ্তম্যর্থঃ ॥ ৭ ॥

## স্বামিকৃত টীকা।

র্থেষু বর্ত্তন্ত ইতি ধারয়ন্ বুদ্ধ্যা কিঞ্চিদপ্যহং ন করোমীতি মন্যতে, তত্র দর্শনশ্রবণ-স্পর্শনাবঘ্রাণাশানি চক্ষুরাদিজ্ঞানেন্দ্রিয়ব্যাপারাঃ, গতিঃ পাদয়োঃ, স্বাপো বুদ্ধেঃ, শ্বাসঃ প্রাণস্য, প্রলপনং বাগিন্দ্রিয়স্য, বিসর্গঃ পায়ূপস্থয়োঃ, গ্রহণং হস্তয়োঃ, উন্মেষনিমেষণে কূর্ম্মাখ্যপ্রাণস্যেতি বিবেকঃ, এতানি সর্ব্বাণি কুর্ব্বন্নপি অনভিমানাৎ ব্রহ্মবিৎ ন লিপ্যতে তথাচ পারমর্ষং সূত্রং, তদধিগমে উত্তরপূর্ব্বার্দ্ধয়োরাশ্লেষবিনাশৌ তদ্ব্যপদেশাদিতি ॥ ৮।৯ ॥

ব্রহ্মণ্যাধায় কর্ম্মাণি সঙ্গং ত্যক্ত্বা করোতি যঃ।
লিপ্যতে ন স পাপেন পদ্মপত্রমিবাম্ভসা॥ ১০॥

## শাঙ্করভাষ্যম্।

করোমীতি ভৃত্য ইব স্বাম্যর্থং সর্ব্বাণি কর্ম্মাণি মোক্ষেঽপি ফলে সঙ্গং ত্যক্ত্বা করোতিঃ যঃ লিপ্যতে ন স পাপেন সংবধ্যতে পদ্মপত্রমিবাম্ভসোদকেন॥ ১০॥

কেবলং সত্ত্বশুদ্ধিমাত্রফলমেব তস্যৈব কর্ম্মণঃ স্যাৎ যস্মাৎ কায়েনেতি। কায়েন দেহেন মনসা বুদ্ধ্যা চ কেবলৈরিন্দ্রিয়ৈর্ম্মমত্ববর্জ্জিতৈরপি ঈশ্বরায়ৈব কর্ম্ম করোমীতি ন ফলায়েতি মমত্ববুদ্ধিশূন্যৈরিন্দ্রিয়ৈরপি, কেবলশব্দঃ কায়াদিভিরপি প্রত্যেকং সম্বধ্যতে সর্ব্ব-

---

## গিরিকৃত টীকা

কর্ম্মাণ্যঙ্গীকৃত্য তৈরস্য বিদুষো বন্ধো নাস্তীত্যুক্তমিদানীং বস্তুতস্তস্য কর্ম্মাণ্যেব ন সন্তীত্যাহ ন চেতি। লোকদৃষ্ট্যা বিদুষোঽপি কর্ম্মাণি সন্তীত্যাশঙ্ক্য স্বদৃষ্ট্যা তদভাবমভিপ্রেত্যাহ নৈবেতি। সার্দ্ধং সমনন্তরশ্লোকমাকাঙ্ক্ষাপূর্ব্বকমুত্থাপয়তি কদেত্যাদিনা। চক্ষুরাদি জ্ঞানেন্দ্রিয়ৈর্ব্বাগাদিকর্ম্মেন্দ্রিয়ৈঃ প্রাণাদিবায়ুভেদৈরন্তঃকরণচতুষ্টয়েন চ তত্তচ্চেষ্টানির্ব্বর্ত্তনাবস্থায়াং তত্তদর্থেষু সর্ব্বা প্রবৃত্তিরিন্দ্রিয়াণামেবেত্যনুসন্দধানো নৈব কিঞ্চিৎ করোমীতি বিদ্বান্ প্রতিপদ্যতে ইত্যর্থঃ।

যথোক্তস্য বিদুষো বিধ্যভাবেঽপি বিদ্যাসামর্থ্যাৎ প্রতিপত্তিকর্ম্মভূতং কর্ম্মসংন্যাসং ফলাত্মকমভিলপতি যস্যেতি। অজ্ঞস্যেতি। অজ্ঞস্যেব বিদুষোঽপি কর্ম্মসু প্রবৃত্তিসম্ভবাৎ কুতঃ সংন্যাসেঽধিকারঃ স্যাদিত্যাশঙ্ক্যাহ নেতীতি॥ ৮॥ ৯॥

তর্হি বিদ্যাবানিবাবিদ্যাবানপি কর্ম্মণি ন প্রবর্ত্তেত পাপোপহতিসম্ভবাদিত্যাশঙ্ক্যাহ যস্ত্বিতি। যথা ভৃত্যঃ স্বাম্যর্থং কর্ম্মাণি করোতি ন স্বফলমপেক্ষতে তথৈব যো বিদ্বান্ মোক্ষেঽপি সঙ্গং ত্যক্ত্বা ভগবদর্থমেব সর্ব্বাণি কর্ম্মাণি করোতি ন স কর্ম্মণা বধ্যতে ন হি পদ্মপত্রমম্ভসা সম্বধ্যতে তদ্বদিত্যর্থঃ॥ ১০॥

## স্বামিকৃত টীকা।

তর্হি যস্য করোমীত্যভিমানোঽস্তি তস্য কর্ম্মলেপো দুর্ব্বারঃ, তথা অবিশুদ্ধচিত্তত্বাৎ সন্ন্যাসোঽপি নাস্তীতি মহৎ সঙ্কটমাপন্নমিত্যাশঙ্ক্যাহ ব্রহ্মণীতি। ব্রহ্মণ্যাধায় পরমেশ্বরে সমর্প্য তৎফলে চ সঙ্গং ত্যক্ত্বা যঃ কর্ম্মাণি করোতি অসৌ পাপেন বন্ধহেতুতয়া পাপিষ্ঠেন পুণ্যপাপাত্মকেন কর্ম্মণা ন লিপ্যতে যথা পদ্মপত্রমম্ভসি স্থিতমপি তেনাম্ভসা ন লিপ্যতে তদ্বৎ॥ ১০॥

কায়েন মনসা বুদ্ধ্যা কেবলৈরিন্দ্রিয়ৈরপি।
যোগিনঃ কর্ম্ম কুর্ব্বন্তি সঙ্গং ত্যক্ত্বাত্মশুদ্ধয়ে ॥ ১১ ॥
যুক্তঃ কর্ম্মফলং ত্যক্ত্বা শান্তিমাপ্নোতি নৈষ্ঠিকীম্।
অযুক্তঃ কামকারেণ ফলে সক্তো নিবধ্যতে ॥ ১২ ॥

## শাঙ্করভাষ্যম্।

ব্যাপারেষু মমতাবর্জ্জনায় যোগিনঃ কর্ম্মিণঃ কর্ম্ম কুর্ব্বন্তি সঙ্গং ত্যক্ত্বা ফলবিষয়মাত্মশুদ্ধয়ে সত্ত্বশুদ্ধয় ইত্যর্থঃ ॥ ১১ ॥

তস্মাত্তত্রৈব তবাধিকার ইতি কুরু কর্ম্মৈব, যস্মাচ্চ যুক্ত ঈশ্বরায় কর্ম্মাণি করোমি ন মম ফলায়েতি এবং সমাহিতঃ সন্ কর্ম্মফলং ত্যক্ত্বা পরিত্যজ্য শান্তিং মোক্ষাখ্যামাপ্নোতি নৈষ্ঠিকীং নিষ্ঠায়াম্ভবাং সত্ত্বশুদ্ধিজ্ঞানপ্রাপ্তিসর্ব্বকর্ম্মসংন্যাসজ্ঞাননিষ্ঠাক্রমেণেতি বাক্যশেষঃ। যস্তু পুনরযুক্তোঽসমাহিতঃ কামকারেণ করণং কারঃ কামস্য কারঃ কামকারস্তেন কামকা-

## গিরিকৃত টীকা।

অবিদুষস্তর্হি কৃতেন কর্ম্মণা কিং স্যাদিত্যাশঙ্ক্যাহ কেবলমিতি। অজ্ঞস্যেশ্বরার্পণবুদ্ধ্যানুষ্ঠিতং কর্ম্ম বুদ্ধিশুদ্ধিফলমিত্যত্রৈব হেতুমাহ যস্মাদিতি। কেবলশব্দস্য প্রত্যেকং সম্বন্ধে প্রয়োজনমাহ সর্ব্বব্যাপারেষ্বিতি ॥ ১১ ॥

কর্ম্মণশ্চিত্তশুদ্ধিফলত্বে তাদর্থ্যেন কর্ম্মানুষ্ঠানমেব তব কর্ত্তব্যমিতি যস্মাদিত্যস্যাপেক্ষিতং বদন্ ফলিতমাহ তস্মাদিতি। ইতশ্চ সঙ্গং ত্যক্ত্বা কর্ম্মানুষ্ঠানং ত্বয়া কর্ত্তব্যমিত্যাহ যস্মাচ্চেতি। যুক্তঃ সন্ ফলং ত্যক্ত্বা কর্ম্ম কুর্ব্বন্ মোক্ষাখ্যাং শান্তিং যস্মাচ্চ ত্বয়া সঙ্গং ত্যক্ত্বা কর্ম্ম কর্ত্তব্যমিতি যোজনা। বিপক্ষে দোষমাহ অযুক্তইতি। যুক্তত্বং ব্যাকরোতি ঈশ্বরায়েতি। ফলং পরিত্যজ্য কর্ম্ম কুর্ব্বন্নিতি শেষঃ। নৈষ্ঠিকীং শান্তিমিত্যেতদেব বিশদয়তি সত্ত্বেতি। দ্বিতীয়মর্দ্ধং বিভজতে যস্ত্বিতি। অসমাধানে দোষাদর্জ্জুনস্য নিয়োগং দর্শয়তি অতস্ত্বমিতি ॥ ১২ ॥

## স্বামিকৃত টীকা।

বন্ধকস্বাভাবমুক্ত্বা মোক্ষহেতুত্বং সদাচারেণ দর্শয়তি কায়েনেতি। কায়েন স্নানাদি, মনসা ধ্যানাদি, বুদ্ধ্যা তত্ত্বনিশ্চয়াদি, কেবলৈঃ কর্ম্মাভিনিবেশরহিতৈরিন্দ্রিয়ৈঃ শ্রবণকীর্ত্তনাদিলক্ষণং কর্ম্ম ফলসঙ্গং ত্যক্ত্বা চিত্তশুদ্ধয়ে কর্ম্মযোগিনঃ কুর্ব্বন্তি ॥ ১১ ॥

নন্বেবং তেনৈব কর্ম্মণা কশ্চিন্মুচ্যতে কশ্চিদ্বধ্যত ইতি ব্যবস্থা অত আহ যুক্ত ইতি। যুক্তঃ পরমেশ্বরৈকনিষ্ঠঃ কর্ম্মণাং ফলং ত্যক্ত্বা কর্ম্মাণি কুর্ব্বন্নাত্যন্তিকীং শান্তিং মোক্ষং প্রাপ্নোতি, অযুক্তস্তু বহির্মুখঃ কামকারেণ কামতঃপ্রবৃত্ত্যা ফলে আসক্তো নিতরাং বন্ধং প্রাপ্নোতি ॥১২॥

সর্ব্বকর্ম্মাণি মনসা সংন্যস্যাস্তে সুখং বশী।
নবদ্বারে পুরে দেহী নৈব কুর্ব্বন্ন কারয়ন্ ॥ ১৩ ॥

## শাঙ্করভাষ্যম্।

রেণ কামপ্রেরিততয়েত্যর্থঃ মম লাভায়েদং করোমি কর্ম্মেত্যেবং ফলে সক্তো নিবধ্যতে অতস্ত্বং যুক্তো ভব ইত্যর্থঃ ॥ ১২ ॥

যস্তু পরমার্থদর্শী স সর্ব্বেতি। সর্ব্বাণি কর্ম্মাণি সর্ব্বকর্ম্মাণি সংন্যস্য পরিত্যজ্য নিত্যং নৈমিত্তিকং কাম্যং প্রতিষিদ্ধঞ্চ তানি সর্ব্বাণি কর্ম্মাণি মনসা বিবেকবুদ্ধ্যা কর্ম্মাদৌ

## গিরিকৃত টীকা।

তর্হি ফলে সক্তিং ত্যক্ত্বা সর্ব্বৈরপি কর্ম্ম কর্ত্তব্যমিতি কর্ম্মসংন্যাসস্য নিরবকাশত্বমিত্যাশঙ্ক্যাবিদুষঃ সকাশাদ্বিদুষো বিশেষং দর্শয়তি যস্ত্বিতি। সর্ব্বকর্ম্মপরিত্যাগে প্রাপ্তং মরণং ব্যাবর্ত্তয়তি আস্তইতি। বৃত্তিং লভমানোঽপি শরীরতাপেনাধ্যাত্মিকাদিনা সন্তপ্যমানস্তিষ্ঠতীতি চেন্নেত্যাহ সুখমিতি। কার্য্যকরণসংঘাতপারবশ্যং পর্য্যুদস্যতি বশীতি। আসনস্থাপেক্ষিতমধিকরণং নির্দ্দিশতি নবেতি। দেহসম্বন্ধাভিমানাভাসবত্ত্বমাহ দেহীতি। মনসা সর্ব্বকর্ম্মসংন্যাসেঽপি লোকসংগ্রহার্থং বহিঃ সর্ব্বং কর্ম্ম কর্ত্তব্যমিতি প্রাপ্তং প্রত্যাহ নৈবেতি। তান্যেব সর্ব্বাণি কর্ম্মাণি পরিত্যজ্যানি বিশিনষ্টি নিত্যমিতি। তেষাং পরিত্যাগে হেতুমাহ তানীতি। যদুক্তং সুখমাস্তইতি তদুপপাদয়তি ত্যক্তেতি। জিতেন্দ্রিয়ত্বং কায়বশীকারস্যাপ্যুপলক্ষণং, দ্বে শ্রোত্রে দ্বে চক্ষুষী দ্বে নাসিকে বাগেকেতি সপ্তশীর্ষণ্যানি শিরোগতানি শব্দাদ্যুপলব্ধিদ্বারাণি তথাপি কথং নবদ্বারত্বমধোগতাভ্যাং পায়ূপস্থাভ্যাং সহেত্যাহ অর্ব্বাগিতি। শরীরস্য পুরসাম্যং স্বামিনা পৌরৈশ্চাধিষ্ঠিতত্বেন দর্শয়তি আত্মেত্যাদিনা। যদ্যপি দেহে জীবনত্বাদ্দেহসম্বন্ধাভিমানাভাসবানবতিষ্ঠতে তথাপি প্রবাসীব পরগেহে তৎপূজাপরিভবাদিভিরপ্রহৃষ্যন্নবিষীদন্ ব্যামোহাদিরহিতস্তিষ্ঠতীতি মত্বাহ তস্মিন্নিতি। বিশেষণমাক্ষিপতি কিমিতি। তদনুপপত্তিমেব দর্শয়তি সর্ব্বো হীতি। সর্ব্ব সাধারণে দেহাবস্থানে সংন্যস্য দেহে তিষ্ঠতি বিদ্বানিতি বিশেষণমকিঞ্চিৎকরমিতি ফলিতমাহ তত্রেতি। বিশেষণফলং দর্শয়ন্নুত্তরমাহ উচ্যতইতি। কিং অবিবেকিনং প্রতি বিশেষণানর্থক্যং চোদ্যতে কিম্বা বিবেকিনং প্রতীতি বিকল্প্যাদ্যমঙ্গীকরোতি যদ্যপি। অজ্ঞত্বং দেহিত্বে হেতুঃ। তদেব দেহিত্বং স্ফুটয়তি দেহেতি। সংঘাতাত্মদর্শিনোঽপি,

## স্বামিকৃত টীকা।

এবং তাবৎ চিত্তশুদ্ধিশূন্যস্য সংন্যাসাৎ কর্ম্মযোগো বিশিষ্যত ইত্যুক্তং ইদানীং শুদ্ধচিত্তস্য সংন্যাসঃ শ্রেষ্ঠ ইত্যাহ সর্ব্বকর্ম্মাণীতি। বশী জিতচিত্তঃ সর্ব্বকর্ম্মাণি বিবে-

## শাঙ্করভাষ্যম্।

অকর্ম্মসন্দর্শনেন সংত্যজ্যেত্যর্থঃ, আস্তে তিষ্ঠতি সুখং ত্যক্তবাঙ্‌মনঃকায়চেষ্টো যতিঃ নিরায়াসঃ প্রসন্নচিত্তঃ আত্মনোঽন্যত্র নিবৃত্তবাহ্যসর্ব্বপ্রয়োজনইতি সুখমাস্তইত্যুচ্যতে বশী জিতেন্দ্রিয়ইত্যর্থঃ। ক্কাস্তইত্যাহ নবদ্বারে পুরে সপ্তশীর্ষণ্যান্যাত্মন উপলব্ধিদ্বারাণ্যর্ব্বাগ্ দ্বে মূত্রপুরীষবিসর্গার্থে তৈর্দ্বারৈর্নবদ্বারং পুরমুচ্যতে, শরীরং পুরমিব পুরমাত্মৈকস্বামিকং তদর্থপ্রয়োজনৈশ্চ মনোবুদ্ধিবিষয়ৈরনেকফলবিজ্ঞানস্যোৎপাদকৈঃ পৌরৈরিবাধিষ্ঠিতঃ তস্মিন্নবদ্বারে পুরে দেহী সর্ব্বং কর্ম্ম সংন্যস্যাস্তে ইতি কিং বিশেষণেন সর্ব্বো হি দেহী সংন্যস্য সংন্যাসীব দেহ এবাস্তে তত্রানর্থকং বিশেষণমুচ্যতে, যস্ত্বজ্ঞো দেহী দেহেন্দ্রিয়সংঘাতমাত্রাত্মদর্শী স সর্ব্বোঽপি গেহে ভূমাবাসনে বাসে ইতি মন্যতে ন হি দেহমাত্রাত্মদর্শিনো দেহএব দেহ আসইতি প্রত্যয়ঃ সম্ভবতি দেহাদিসংঘাতব্যতিরিক্তাত্মদর্শিনস্তু দেহ আসইতি প্রত্যয় উপপদ্যতে পরকর্ম্মণাঞ্চ পরস্মিন্নাত্মন্যবিদ্যয়াধ্যারোপিতানাং বিদ্যয়া বিবেকজ্ঞানেন মনসা সংন্যাস উপপদ্যতে উৎপন্নবিবেকবিজ্ঞানস্য সর্ব্বকর্ম্মসংন্যাসিনোঽপি গেহইব দেহএব নবদ্বারে পুরে আসনং প্রারব্ধফলকর্ম্মসংস্কারশেষানুবৃত্ত্যা দেহএব বিশেষবিজ্ঞা-

---

## গিরিকৃত টীকা।

দেহে স্থিতিপ্রতিভাসঃ স্যাদিতি চেন্নেত্যাহ ন হীতি। দ্বিতীয়ং দূষয়তি দেহাদীতি। গৃহাদিষু দেহস্যাবস্থানেনাত্মাবস্থানভ্রমব্যাবৃত্ত্যর্থং দেহে বিদ্বানাস্তইতি,বিশেষণমুপপদ্যতে, বিবেকবতো দেহেঽবস্থানপ্রতিভাসসম্ভবাদিত্যর্থঃ। নন্বু বিবেকিনো দেহাবস্থান প্রতিভানেঽপি বাঙ্মনোদেহব্যাপারাত্মনাং কর্ম্মণাং তস্মিন্ প্রসঙ্গাভাবাৎ তত্ত্যাগেন কৃতস্তস্য দেহেঽবস্থানমুচ্যতে তত্রাহ পরকর্ম্মণাঞ্চেতি। নন্বু বিবেকিনো দিগাদ্যনবচ্ছিন্নবাহ্যাভ্যন্তরাবিক্রিয়ব্রহ্মাত্মতাং মন্যমানস্য কুতোদেহেঽবস্থানমাস্থাতুং শক্যতে তত্রাহ উৎপন্নেতি। তত্র হেতুমাহ প্রারব্ধেতি। যদ্ধি প্রারব্ধফলং ধর্ম্মাধর্ম্মাত্মকং কর্ম্ম তস্যোপভুক্তস্য শেষাদনুপভুক্তাদ্দেহাদিসংস্কারোঽনুবর্ত্ততে তদনুবৃত্ত্যা চ তত্রৈব দেহে বিশেষবিজ্ঞানমবস্থানবিষয়মুপপদ্যতে অতো বিবেকবতঃ সংন্যাসিনো দেহেঽবস্থানব্যপদেশঃ সম্ভবতীত্যর্থঃ। অবিদ্বৎপ্রত্যয়াপেক্ষয়া বিশেষণাসম্ভবেঽপি বিদ্বৎপ্রত্যয়াপেক্ষয়া বিশেষণমর্থবদিত্যুপসংহরতি দেহএবেতি। দেহে

## স্বামিকৃত টীকা

পকাণি মনসা বিবেকযুক্তেন সংন্যস্য সুখং যথা ভবত্যেবং জ্ঞাননিষ্ঠঃ সন্নাস্তে, ক্কাস্ত ইত্যত আহ নবদ্বারে, নেত্রে নাসিকে কর্ণৌ মুখঞ্চেতি সপ্ত শিরোগতানি অধোগতে দ্বে পায়ূপস্থরূপে ইত্যেবং নবদ্বারাণি যস্মিন্ পুরে পুরবদহঙ্কারশূন্যে দেহে দেহী অবতিষ্ঠতে অহঙ্কারাভাবাদেব স্বয়ং তেন দেহেন নৈব কুর্ব্বন্ মমকারাভাবাৎ ন কারয়ন্নিতি অশুদ্ধচিত্তাস্যাত্মজ্ঞিজ্ঞাসা, অশুদ্ধচিত্তো হি সংন্যস্য পুনঃ করোতি চ ন ত্বয়ং তথা অতঃ সুখমাস্ত ইত্যর্থঃ॥ ১৩॥

न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः।
न कर्म्मफलसंयोगं स्वभावस्तु प्रवर्त्तते ॥ १४ ॥

শাঙ্করভাষ্যম্।

নোৎপত্তেদে'হ এবাস্তইত্যস্যৈব বিশেষণফলং বিদ্বদবিদ্বৎপ্রত্যয়ভেদাপেক্ষত্বাদ্ যদ্যপি কার্য্যকরণকর্ম্মাণ্যবিদ্যয়াত্মন্যধ্যারোপিতানি সন্ন্যস্যাস্তে ইত্যুক্তং তথাপ্যাত্মসমবায়ি তু কর্ত্তৃত্বং কারয়িতৃত্বঞ্চ স্যাদিত্যাশঙ্ক্যাহ নৈব কুর্ব্বন্ স্বয়ং ন চ কার্য্যকরণানি কারয়ন্‌ক্রিয়াসু প্রবর্ত্তয়ন্ কিং যৎ তৎ কর্ত্তৃত্বং কারয়িতৃত্বঞ্চ দেহিনঃ স্বাত্মসমবায়ি সৎ সন্ন্যাসান্ন সম্ভবতি যথা গচ্ছতো গতিঃ গমনব্যাপারপরিত্যাগে ন স্যাত্তদ্বৎ কিং বা স্বতএবাত্মনো নাস্তী-ত্যত্রোচ্যতে নাস্ত্যাত্মনঃ স্বতঃ কর্ত্তৃত্বং কারয়িতৃত্বঞ্চোক্তং হ্যবিকার্য্যোঽয়মুচ্যতে, শরীরস্থোঽপি কৌন্তেয় ন করোতি ন লিপ্যত ইতি ধ্যায়তীব লেলায়তীবেতি শ্রুতেঃ ॥ ১৩ ॥

কিঞ্চ ন কর্ত্তৃত্বমিতি। ন কর্ত্তৃত্বং স্বতঃ কুর্ব্বিতি নাপি কর্ম্মাণি রথঘটপ্রাসাদাদীনি ঈপ্সিততমানি লোকস্য সৃজত্যুৎপাদয়তি প্রভুরাত্মা নাপি রথাদিকৃতবতস্তৎফলেন সংযোগং

গিরিকৃত টীকা।

স্বাবস্থানবিষয়ো বিদ্বৎপ্রত্যয়স্তদবিষয়শ্চাবিদ্বৎপ্রত্যয়স্তয়োরেবং ভেদে বিদ্বৎপ্রত্যয়াপেক্ষয়া বিশেষণমর্থবদিত্যুপসংহরন্নেব হেতুং বিশদয়তি বিদ্বদিতি। আরোপিতকর্ত্তৃত্বাদ্য-ভাবেঽপি স্বগতকর্ত্তৃত্বাদি দুর্ব্বারমিত্যাশঙ্কামনুদ্য দূষয়তি যদ্যপীত্যাদিনা। ক্রিয়াসু প্রবর্ত্তয়ন্নাস্ত ইতি পূর্ব্বেণ সম্বন্ধঃ পূর্ব্বস্যাপি শতুরেবমেব সম্বন্ধঃ। কর্ত্তৃত্বং কারয়ি-তৃত্বঞ্চাত্মনো নেত্যত্র বিচারয়তি কিমতি। যৎ কর্ত্তৃত্বং কারয়িতৃত্বঞ্চ তৎ কিং দেহিনঃ স্বাত্মসমবায়ি সদেব সন্ন্যাসান্ন ভবতীত্যুচ্যতে যথা গচ্ছতো দেবদত্তস্য স্বগতৈব গতিঃ তৎ-স্থিত্যা ত্যাগান্ন ভবতি অথবা স্বারস্যেন কর্ত্তৃত্বং কারয়িতৃত্বঞ্চাত্মনো নাস্তীতি বক্তব্যমাদ্যে সক্রিয়ত্বং দ্বিতীয়ে কূটস্থত্বমিত্যর্থঃ। দ্বিতীয়ং পক্ষমাশ্রিত্যোত্তরমাহ তত্রেতি। উক্তেঽর্থে বাক্যোপক্রমমনুকূলয়তি উক্তং হীতি তত্রৈব বাক্যশেষমপি সম্বাদয়তি শরীরস্থোঽপীতি স্মৃত্যুক্তেঽর্থে শ্রুতিমপি দর্শয়তি ধ্যায়তীবেতি। উপাধিগতৈব সর্ব্বা বিক্রিয়া নাত্মনি স্বতোঽস্তীত্যর্থঃ ॥ ১৩ ॥

আত্মনো যদুক্তং কারয়িতৃত্বং নাস্তীতি তৎ প্রপঞ্চয়তি নেত্যাদিনা। যদ্যপি লোকস্য কর্ত্তৃত্বং ন সৃজতীতি নাস্তীতি কারয়িতৃত্বং তথাপি রথশকটাদীনি কুর্ব্বন্ ভবতি কর্ত্তে-

স্বামিকৃত টীকা।

নম্বেষ সাধু কর্ম্ম কারয়তি তং যমেভ্যো লোকেভ্য উন্নিনীষতে, এষ এবাসাধু কর্ম্ম কারয়তি তং যমেভ্যো লোকেভ্যোঽধোনিনীষত ইত্যাদি শ্রুতেঃ পরমেশ্বরণৈব শুভাশুভ-ফলেষু কর্ম্মসু কর্ত্তৃত্বেন প্রযুজ্যমানোঽস্বতন্ত্রঃ পুরুষঃ কথং তানি কর্ম্মাণি ত্যজেৎ ঈশ্বরে-

নাদত্তে কস্যচিৎ পাপং ন চৈব সুকৃতং বিভুঃ।
অজ্ঞানেনাবৃতং জ্ঞানং তেন মুহ্যন্তি জন্তবঃ ॥১৫॥

## শাঙ্করভাষ্যম্।

ন কর্ম্মফলসংযোগং যদি কিঞ্চিদপি গতো ন করোতি ন কারয়তি চ দেহী কস্তর্হি কুর্ব্বন্ কারয়ংশ্চ প্রবর্ত্তত ইত্যুচ্যতে স্বভাবস্তু স্বো ভাবঃ স্বভাবোঽবিদ্যালক্ষণা প্রকৃতিঃ মায়া প্রবর্ত্ততে দৈবী হীত্যাদীতি বক্ষ্যমাণা ॥ ১৪ ॥

পরমার্থতস্তু নেতি। নাদত্তে ন চ গৃহ্লাতি ভক্তস্যাপি কস্যচিৎ পাপং ন চৈবাদত্তে সুকৃতং বিভুঃ ভক্তৈঃ প্রযুক্তং বিভুঃ কিমর্থং তর্হি ভক্তৈঃ পূজাদিলক্ষণং যাগদানহোমাদিকঞ্চ সুকৃতং প্রযুজ্যত ইত্যাহ অজ্ঞানেনাবৃতং জ্ঞানং বিবেকবিজ্ঞানং তেন মুহ্যন্তি করোমি কারয়ামি ভোক্ষ্যে ভোজয়ামীত্যেবং মোহং গচ্ছন্ত্যবিবেকিনঃ সংসারিণো জন্তবঃ ॥১৫॥

## গিরিকৃত টীকা।

ত্যাশঙ্ক্যাহ ন কর্ম্মাণীতি। তথাপি ভোজয়িতৃত্বেন বিক্রিয়াবত্ত্বং দুষ্পবিহারমিত্যাশঙ্ক্যাহ ন কর্ম্মেতি। কস্য তর্হি প্রবর্ত্তকত্বং তদাহ স্বাভাবস্ত্বিতি। কুর্ব্বিতি কর্ত্তৃত্বং লোকস্য ন সৃজত্যাত্মেতি সম্বন্ধঃ। রথাদীনাং কর্ম্মত্বং সাধয়তি ঈপ্সিতেতি। আত্মনো দেহাদিস্বামিত্বেন প্রভুত্বং রথাদিকৃতবতো লোকস্য রথাদিফলেন সম্বন্ধমপি ন সৃজত্যাত্মেত্যাত্মনো ভোজয়িতৃত্বং প্রত্যাচষ্টে নাপীতি। চতুর্থপাদং শঙ্কোত্তরত্বেনাবতারয়তি যদীত্যাদিনা। স্বভাববাদস্তর্হীত্যাশঙ্ক্য ব্যাকরোতি অবিদ্যালক্ষণেতি। প্রকৃতের্বিদ্যাভাবত্বং ব্যুদসিতুং মায়েত্যুক্তং সা চ সপ্তমে ব্যাখ্যাতে তেন প্রধানবিলক্ষণেত্যাহ দৈবী হীতি ॥ ১৪ ॥

কর্ত্তৃত্বভোক্তৃত্বৈশ্বর্য্যান্যাত্মনোঽবিদ্যাকৃতানীত্যুক্তমিদানীমীশ্বরে সন্ন্যস্তসমস্তব্যাপারস্য তদেকশরণস্য দুরিতং সুকৃতম্বা তদনুগ্রহার্থং ভগবানাদত্তে মদেকশরণো মৎপ্রীত্যর্থং কর্ম্ম কুর্ব্বাণো দুষ্কৃতাদ্যানুগ্রাহ্যো ময়েতি প্রত্যয়ভাক্ত্বাদিত্যাশঙ্ক্য সোঽপি পরমার্থতো নাস্যাস্ত্যবিক্রি য়ত্বাদিত্যাহ পরমর্থতস্ত্বিতি। কথং তর্হি ভক্তানামনুগ্রাহ্যত্বমীশ্বরস্যানুগৃহীতৃত্বমিতি

## স্বামিকৃত টীকা।

নৈব জ্ঞানমার্গে প্রযুজ্যমানঃ শুভান্যশুভানি চ ত্যক্ষ্যতীতি চেৎ এবং সতি বৈষম্যনৈর্ঘৃণ্যাভ্যামীশ্বরস্যাপি প্রযোজককর্ত্তৃত্বাৎ পুণ্যপাপসম্বন্ধঃ স্যাদিত্যাশঙ্ক্যাহ ন কর্ত্তৃত্বমিতি দ্বাভ্যাং। প্রভুরীশ্বরো জীবলোকস্য কর্ত্তৃত্বাদিকং ন সৃজতি কিন্তু জীবস্য স্বভাবোঽবিদ্যৈব কর্ত্তৃত্বাদিরূপেণ প্রবর্ত্ততে অনাদ্যবিদ্যাকামবশাৎ প্রবৃত্তিস্বভাবমেব লোকমীশ্বরঃ কর্ম্মসু নিযুঙ্‌ক্তে ন তু স্বয়মেব কর্ত্তৃত্বাদিকমুৎপাদয়তীত্যর্থঃ ॥ ১৪ ॥

যস্মাদেবং তস্মাৎ নাদত্তইতি। প্রযোজকোঽপি সন্ প্রভুঃ কস্যচিৎ পাপং সুকৃতঞ্চ নৈবাদত্তে ন ভজতে, তত্র হেতুঃ বিভুঃ পরিপূর্ণঃ আপ্তকাম ইত্যর্থঃ, যদি হি স্বার্থকামনয়া

জ্ঞানেন তু তদজ্ঞানং যেষাং নাশিতমাত্মনঃ।
তেষামাদিত্যবজ্জ্ঞানং প্রকাশয়তি তৎপরম্ ॥১৬॥

## শাঙ্করভাষ্যম্।

জ্ঞানেন ইতি। জ্ঞানেন তু যেন অজ্ঞানেনাবৃত্তা মুহ্যন্তি জন্তবঃ তদজ্ঞানং যেষাং জন্তূনাং বিবেকজ্ঞানেনাত্মবিষয়েণ নাশিতমাত্মনো ভবতি তেষাং জন্তূনামাদিত্যবৎ যথাদিত্যঃ সমস্তং রূপজাতং অবভাসয়তি তদ্বৎ জ্ঞানং জ্ঞেয়ঞ্চ বস্তু সর্ব্বং প্রকাশয়তি তৎ পরমার্থতত্ত্বং ॥ ১৬॥

## গিরিকৃত টীকা।

প্রসিদ্ধিস্তত্রাহ অজ্ঞানেনেতি। পূর্ব্বার্দ্ধগতান্যক্ষরাণি ব্যাখ্যায় আকাঙ্ক্ষাপূর্ব্বকমুত্তরার্দ্ধমবতার্য্য ব্যাচষ্টে কিমর্থমিত্যাদিনা ॥ ১৫ ॥

তর্হি সর্ব্বেষামনাদ্যজ্ঞানাবৃতজ্ঞানত্বাৎ ব্যামোহাভাবাচ্চ কুতঃ সংসারনিবৃত্তিরিতি তত্রাহ জ্ঞানেনেতি। সর্ব্বমিতি পূর্ণত্বমুচ্যতে, জ্ঞেয়স্যৈব বস্তুনস্তৎপরিমিতি বিশেষণং। তদ্ব্যাচষ্টে পরমার্থতত্ত্বমিতি ॥ ১৬ ॥

বিদুষাং বিবিদিষূণাঞ্চান্তরঙ্গাণি বিদ্যাপরিপাকসাধনানি ইত্যুপদিদিক্ষুরুত্তরশ্লোকস্যাপেক্ষিতং পূরয়তি যৎ পরমিতি। তস্মিম্ পরমার্থতত্ত্বে পরস্মিন্ ব্রহ্মণি বাহ্যং বিষয়মপোহ্য গতা প্রবৃত্তা শ্রবণমননিদিধ্যাসনৈরসকৃদনুষ্ঠিতৈর্ব্বুদ্ধিঃ সাক্ষাৎকারলক্ষণা যেষাং তে তথেতি। প্রথমবিশেষণং বিভজতে তস্মিন্নিতি। তর্হি বোদ্ধা জীবো বোদ্ধব্যং ব্রহ্মেতি জীবব্রহ্মভেদাভ্যুপগমো নেত্যাহ তদাত্মান ইতি। কল্পিতং বোদ্ধৃবোদ্ধব্যত্বং বস্তুতস্তু ন ভেদোঽস্তীত্যঙ্গীকৃত্য ব্যাচষ্টেতদেবেতি। নন্বু দেহাদাবাত্মাভিমানমপনীয় ব্রহ্মণ্যেবাহমস্মীত্যবস্থানং তত্তদনুষ্ঠীয়মানকর্ম্মপ্রতিবন্ধান্ন সিধ্যতীত্যাশঙ্ক্য বিশেষণান্তরমাদত্তে তন্নিষ্ঠা ইতি। তত্র নিষ্ঠাশব্দার্থং দর্শয়ন্ বিবক্ষিতমর্থমাহ নিষ্ঠেত্যাদিনা। তথাপি পুরুষার্থা-

## স্বামিকৃত টীকা।

কারয়েত্তর্হি তথা স্যাৎ ন ত্বেতদস্তি আপ্তকামস্যৈবাচিন্ত্যনিজমায়য়া তত্তৎপূর্ব্বকর্ম্মানুসারেণ প্রবর্ত্তকত্বাৎ। নন্বু ভক্তাননুগৃহ্নতোঽভক্তোন্নিগৃহ্নতশ্চ বৈষম্যোপলম্ভাৎ কথমাপ্তকামত্বমিত্যত আহ অজ্ঞানেনেতি। নিগ্রহোঽপি দণ্ডরূপোঽনুগ্রহ এবেত্যেবমজ্ঞানেন সর্ব্বত্র সমঃ পরমেশ্বর ইত্যেবম্ভূতং জ্ঞানমাবৃতং তেন হেতুনা জন্তবো জীবা মুহ্যন্তি ভগবতি বৈষম্যং মন্যন্ত ইত্যর্থঃ ॥১৫॥

জ্ঞানিনস্তু ন মুহ্যন্তীত্যাহ জ্ঞানেনেতি। আত্মনো ভগবতো জ্ঞানেন যেষাং তদ্বৈষম্যোপলম্ভকমজ্ঞানং নাশিতং তজ্জ্ঞানং তেষামজ্ঞানং নাশয়িত্বা তৎপরং পরিপূর্ণমীশ্বরস্বরূপং প্রকাশয়তি যথাদিত্যস্তমো নিরস্য সমস্তং বস্তুজাতং প্রকাশয়তি তদ্বৎ ॥ ১৬ ॥

তদ্বুদ্ধয়স্তদাত্মানস্তন্নিষ্ঠাস্তৎপরায়ণাঃ।
গচ্ছন্ত্যপুনরাবৃত্তিং জ্ঞাননির্ধূতকল্মষাঃ ॥ ১৭ ॥

## শাঙ্করভাষ্যম্।

মৎ পরং জ্ঞানং প্রকাশিতং তদ্বুদ্ধয়ইতি। তস্মিন্ গতা বুদ্ধির্যেষাং তে তদ্বুদ্ধয়ঃ তদাত্মানস্তদেব পরং ব্রহ্ম আত্মা যেষাং তে তদাত্মানঃ তন্নিষ্ঠা ইতি তন্নিষ্ঠা নিষ্ঠাভিনিবেশস্তাৎপর্য্যং সর্ব্বাণি কর্ম্মাণি সন্ন্যস্য ব্রহ্মণ্যেবাবস্থানং যেষাং তে তন্নিষ্ঠাস্তৎপরায়ণাশ্চ তদেব পরময়নং পরাগতির্যেষাং ভবতি তে তৎপরায়ণাঃ কেবলাত্মরতয় ইত্যর্থঃ তে গচ্ছন্ত্যেবম্বিধা অপুনরাবৃত্তিং পুনর্দ্দেহসম্বন্ধং ন গৃহ্লন্তি জ্ঞাননির্ধূতকল্মষাঃ যথোক্তেন জ্ঞানেন নির্ধূতো নিবৃত্তোনাশিতঃ কল্মষঃ পাপাদিসংসারকারণং দোষো যেষাং তে জ্ঞাননির্ধূত-কল্মষাঃ যতয় ইত্যর্থ ॥ ১৭ ॥

---

## গিরিকৃত টীকা।

স্তরাপেক্ষাপ্রতিবন্ধাৎ কথং যথোক্তে ব্রহ্মণ্যেবাবস্থানং সেদ্ধুং পারয়তি তত্রাহ তৎপরায়ণাশ্চেতি। যথোক্তানামধিকারিণাং পরমপুরুষার্থস্যোক্তব্রহ্মানতিরেকান্নান্যত্রাসক্তিরিতি তাৎপর্য্যার্থমাহ কেবলেতি। নন্নু যথোক্তবিষেণবতাং বর্ত্তমানদেহপাতেঽপি দেহান্তরপরিগ্রহব্যগ্রতয়া কুতো যথোক্তে ব্রহ্মণ্যবস্থানমাস্থাতুং শক্যতে তত্রাহ তে গচ্ছন্তীতি। সতি সংসসারকারণে দুরিতাদৌ সংসারপ্রসরস্য দুর্ব্বারত্বান্নাপুনরাবৃত্তিসিদ্ধিরিত্যাশঙ্ক্যাহ জ্ঞানেতি উক্তবিশেষণসম্পত্ত্যা দর্শিতফলশালিত্বমাস্তরেসম্ভাবিতমিতি মন্বানো বিশিনষ্টি যতয় ইতি ॥ ১৭ ॥

যদপুনরাবৃত্তিসাধনং তত্ত্বজ্ঞানং তদেব প্রশ্নদ্বারেণ বিবৃণোতি যেষামিত্যাদিনা। বিদ্যা বেদার্থবিজ্ঞানমিত্যঙ্গীকৃত্য বিনয়ং ব্যাচষ্টে বিনয় ইতি। উপশমো নিরহঙ্কারত্বমনৌদ্ধত্যং। পদার্থমেবমুক্ত্বা বাক্যার্থং দর্শয়তি বিদ্বানিতি। গবীত্যাদ্যবাক্যার্থং কথয়তি বিদ্যেতি। হস্ত্যাদৌ পণ্ডিতাঃ সমদর্শিন ইত্যুত্তরত্র সম্বন্ধঃ। তত্র তত্র প্রাণিপ্রভেদেষু তত্তদ্গুণৈস্তত্তন্নিমিত্তসংস্কারৈশ্চ সংস্পৃষ্টত্বসম্ভবান্ন ব্রহ্মণঃ সমত্বমিত্যাশঙ্ক্যাহ সত্ত্বাদীতি তজ্জৈস্তেশ্চেত্যত্র তচ্ছব্দেন সত্ত্বমেব গৃহ্যতে সাত্ত্বিকসংস্কারৈরিব রাজসসংস্কারৈরপি সর্ব্বথৈবাসংস্পৃষ্টং ব্রহ্মেত্যাহ তথেতি। রাজসৈরিব তামসৈরপি সংস্কারৈর্ব্রহ্মণোঽস্পৃষ্টত্বং কূটস্থত্বমসঙ্গত্বঞ্চো-

## স্বামিকৃত টীকা।

এবংভূতেশ্বরোপাসকানাং ফলমাহ তদিতি। তস্মিন্নেব বুদ্ধির্নিশ্চয়াত্মিকা যেষাং, তস্মিন্নেব আত্মা প্রযত্নো যেষাং, তস্মিন্নেব নিষ্ঠা তাৎপর্য্যং, যেষাং, তদেব পরময়নমাশ্রয়ো যেষাং, তৎপ্রসাদলব্ধেনাত্মজ্ঞানেন নির্ধূতং নিরস্তং কল্মষং যেষাং তেঽপুনরাবৃত্তিং মুক্তিং যান্তি ॥ ১৭ ॥

বিদ্যাবিনয়সম্পন্নে ব্রাহ্মণে গবি হস্তিনি।
শুনি চৈব শ্বপাকে চ পণ্ডিতাঃ সমদর্শিনঃ॥ ১৮॥

## শাঙ্করভাষ্যম্।

যেষাং জ্ঞানেন নাশিতমাত্মনোঽজ্ঞানং তে পণ্ডিতাঃ কথং তত্বং পশুন্তীত্যুচ্যতে বিদ্যেতি। বিদ্যাবিনয়সম্পন্নে বিদ্যা চ বিনয়শ্চ বিদ্যাত্মনো বোধো বিনয়শ্চ উপশমঃ তাভ্যাং বিদ্যাবিনয়াভ্যাং সম্পন্নো বিদ্যাবিনয়সম্পন্নো বিদ্বান্ বিনীতশ্চ যো ব্রাহ্মণস্তস্মিন্ ব্রাহ্মণে গবি হস্তিনি শুনি চৈব শ্বপাকে চ পণ্ডিতাঃ সমদর্শিনো বিদ্যাবিনয়সম্পন্নে উত্তমসংস্কারবতি ব্রাহ্মণে সাত্বিকে, মধ্যমায়াঞ্চ রাজস্যাং গবি সংস্কারহীনায়ামত্যন্তমেব কেবলতামসে হস্ত্যাদৌ চ সত্বাদিগুণৈস্তজ্জৈশ্চ সংস্কারৈস্তথা রাজসৈস্তথা তামসৈশ্চ সংস্কারৈরত্যন্তমেবাস্পৃষ্টং সমমেকমবিক্রিয়ং ব্রহ্ম দ্রষ্টুং শীলং যেষাং তে পণ্ডিতাঃ সমদর্শিনঃ॥ ১৮॥

## গিরিকৃত টীকা।

কেঽর্থে হেতুরিতি মত্বা সমশব্দার্থমাহ সমমিতি। সমদর্শিত্বমেব পাণ্ডিত্যং তত্ত্বাচষ্টে ব্রহ্মেতি॥ ১৮॥

সাত্বিকেষু রাজসেষু তামসেষু চাসমত্বেষু সমত্বদর্শনমনুচিতমিতি শঙ্কতে নম্বিতি। সর্বত্র সমদর্শিনঃ তচ্ছব্দেন পরামৃশ্যন্তে তেষাং দোষবত্বাদভোজ্যান্নত্বমিত্যত্র প্রমাণমাহ সমাসমাভ্যামিতি। সমানামধ্যয়নাদিভিঃ সমানধর্ম্মকাণাং বস্ত্রালঙ্কারাদিপূজয়া বিষমে প্রতিপত্তিবিশেষে ক্রিয়মাণে সত্যসমানাঞ্চাসমানধর্ম্মকাণাং কস্যচিদেকবেদত্বমপরস্য দ্বিবেদত্বমিত্যাদিধর্ম্মবতাং প্রাগুক্তয়া পূজয়া সমেঽপ্রতিপত্তিবিশেষে পূজয়িতা পুরুষবিশেষং জ্ঞাতা প্রতিপত্তিমকুর্ব্বন্ ধনাদ্ধর্ম্মাচ্চ হীয়তে তেন সাত্বিকে রাজসতামসয়োশ্চ সমবুদ্ধিং কুর্ব্বন্ প্রত্যবৈতীত্যর্থঃ। উত্তরত্বেনোত্তরশ্লোকমবতারয়তি ন তে দোষবন্ত ইতি। স্মৃত্যবষ্টম্ভেন সর্ব্বসত্বেষু সমত্বদর্শিনাং দোষবত্ত্বমুক্তং কথং নাস্তীতি প্রতিজ্ঞামাত্রেণ সিধ্যতীতি শঙ্কতে কথমিতি। স্মৃতের্গতিমগ্রে বদিষ্যন্ নির্দ্দোষত্বং সমত্বদর্শিনাং বিশদয়তি ইহৈবেতি। সর্ব্বেষাং চেতনানাং সাম্যে প্রবণমনসাং ব্রহ্মলোকগমনমন্তরেণ অস্মিন্নেব দেহে পরিভূতজন্মনামশেষদোষরাহিত্যে হেতুমাহ নির্দ্দোষং হীতি। বর্ত্তমানো দেহঃ সপ্তম্যা পরিগৃহ্যতে

## স্বামিকৃত টীকা।

কীদৃশাস্তে জ্ঞানিনো যেঽপুনরাবৃত্তিং মুক্তিং গচ্ছন্তীত্যপেক্ষায়ামাহ বিদ্যেতি। বিষমেষপি সমং ব্রহ্মৈব দ্রষ্টুং শীলং যেষাং তে পণ্ডিতা জ্ঞানিন ইত্যর্থঃ। তত্র বিদ্যাবিনয়াভ্যাং যুক্তে ব্রাহ্মণে চ শুনো যঃ পচতি· তস্মিংশ্চেতি কর্ম্মণো বৈষম্যং গবি হস্তিনি শুনি চেতি জাতিতো বৈষম্যং দর্শিতং॥১৮॥

ইহৈব তৈর্জ্জিতঃ সর্গো যেষাং সাম্যে স্থিতং মনঃ।
নির্দ্দোষং হি সমং ব্রহ্ম তস্মাদ্ব্রহ্মণি তে স্থিতাঃ॥ ১৯॥

## শাঙ্করভাষ্যম্।

নন্বভোজ্যান্নাস্তে দোষবন্তঃ সমাসমাভ্যাং বিষমসমে পূজাত ইতি স্মৃতের্ন তে দোষবন্তঃ কথং ইহেতি। ইহৈব জীবদ্ভিরেব তৈঃ সমদর্শিভিঃ পণ্ডিতৈর্জ্জিতো বশীকৃতঃ সর্গো জন্ম যেষাং সাম্যে সর্ব্বভূতেষু ব্রহ্মণি সমভাবে স্থিতং নিশ্চলীভূতং মনোঽন্তঃকরণং নির্দ্দোষং যদ্যপি দোষবৎসু শ্বপাকাদিষু মূঢ়স্তদ্দোষবদিব বিভাসতে তথাপি তদ্দোষৈরসংস্পৃষ্টমিতি নির্দ্দোষং হি দোষবর্জ্জিতং হি যস্মান্নাপি স্বগুণভেদভিন্নং নির্গুণত্বাচ্চৈতন্যস্য বক্ষ্যতি চ ভগবানিচ্ছাদীনাং ক্ষেত্রধর্ম্মত্বমনাদিত্বান্নির্গুণত্বাদিতি চ নাপ্যন্ত্যাদিবিশেষাআত্মনো ভেদকাঃ সন্তি প্রতিশরীরং তেষাং সত্ত্বে প্রমাণানুপপত্তেরতঃ সমং ব্রহ্মৈকঞ্চ তস্মাদ্ব্রহ্মণ্যেব তে স্থিতাঃ তস্মান্ন দোষগন্ধমাত্রমপি তান্ স্পৃশতি দেহাদিসংঘাতাত্মদর্শনা-

## গিরিকৃত টীকা।

তানেব সমদর্শিনো বিশিনষ্টি যেষামিতি। নন্থ ব্রাহ্মণো নির্দ্দোষত্বমসিদ্ধং দোষবৎসু শ্বপাকাদিষু তদ্দোষৈর্দ্দোষবত্ত্বোপলম্ভবাত্তত্রাহ যদ্যপীতি। যস্মাৎ তন্নির্দ্দোষং তস্মাত্তস্মিন্ ব্রহ্মণি স্থিতিনির্দ্দোষৈঃ সর্গো জিতইতি সম্বন্ধঃ। ব্রহ্মণো গুণভূয়স্ত্বাদল্পীয়ান্ দোষোঽপি স্যাদিত্যাশঙ্ক্যাহ নাপীতি। চেতনস্য গুণবিশেষে বিশিষ্টত্বমনিষ্টং নির্গুণত্বশ্রবণাদিত্যযুক্তং বুদ্ধিসুখাদীনাং পরিশেষাদাত্মধর্ম্মত্বস্য কৈশ্চিন্নিশ্চিতত্বাদিত্যাশঙ্ক্যাহ বক্ষ্যতি চেতি। আত্মনো নির্গুণত্বে বাক্যশেষং প্রমাণয়তি অনাদিত্বাদিতি। চকারো বক্ষ্যতীত্যনেন সম্বন্ধার্থঃ। গুণদোষবশাদাত্মনো ভেদাভাবেঽপি ভেদোঽন্ত্যবিশেষেভ্যো ভবিষ্যতীতি প্রসঙ্গাদাশঙ্ক্য দূষয়তি নাপীতি। প্রতিশরীরমাত্মভেদসিদ্ধৌ তদ্ধেতুত্বেন তেষাং সত্ত্বং তেষাঞ্চ সত্ত্বে প্রতিশরীরমাত্মনো ভেদসিদ্ধিরিতি পরস্পরাশ্রয়ত্বমভিপ্রেত্য হেতুমাহ প্রতিশরীরমিতি। আত্মনো ভেদকাভাবে ফলিতমাহ অতইতি। সমত্বমেব ব্যাকরোতি একঞ্চেতি।

## স্বামিকৃত টীকা।

নন্থ বিষয়েষু সমদর্শনং নিষিদ্ধং কুর্ব্বন্তোঽপি কথং তে পণ্ডিতাঃ, যথাহ গৌতমঃ, সমাসমাভ্যাং বিষমসমে পূজাত ইতি, অস্যার্থঃ সমায় পূজায়াং বিষমে প্রকারে কৃতে সতি বিষমায় চ সমে প্রকারে কৃতে সতি স পূজক ইহ লোকাৎ পরলোকাচ্চ হীয়তইতি। তত্রাহ ইহৈবেতি। ইহৈব জীবদ্ভিরেব তৈঃ স্বজ্যত ইতি সর্গঃ সংসারো জিতো নিরস্তঃ, কৈঃ যেষাং মনঃ সাম্যে সমত্বে স্থিতং, তত্র হেতুঃ হি যস্মাদ্ব্রহ্ম সমং নির্দ্দোষঞ্চ তস্মাত্তে সমদর্শিনো ব্রহ্মণ্যেব স্থিতা ব্রহ্মভাবং প্রাপ্তা ইত্যর্থঃ। গৌতমোক্তস্ত দোষো ব্রহ্মভাবপ্রাপ্তেঃ পূর্ব্বমেব পূজাতইতি পূজকাবস্থাশ্রবণাৎ॥১৯॥

ন প্রহৃষ্যেৎ প্রিয়ং প্রাপ্য নোদ্বিজেৎ প্রাপ্য চাপ্রিয়ম্ ।
স্থিরবুদ্ধিরসংমূঢ়ো ব্রহ্মবিদ্ ব্রহ্মণি স্থিতঃ ॥ ২০ ॥

## শাঙ্করভাষ্যম্ ।

ভিমানাভাবাৎ তেষাং, দেহাদিসংঘাতাত্মদর্শনাভিমানবদ্বিষয়ন্তু তৎ সূত্রং সমাসমাভ্যাং বিষমষমে পূজাতইতি পূজাবিষয়ত্ববিশেষণাৎ, দৃশ্যতে হি ব্রহ্মবিৎ ষড়ঙ্গবিৎ চতুর্ব্বেদবিৎ ইতি পূজাদানাদৌ গুণবিশেষসম্বন্ধঃ কারণং ব্রহ্ম তু সর্ব্বগুণদোষসম্বন্ধবর্জ্জিতমিত্যতো ব্রহ্মণি তে স্থিতা ইতি যুক্তং ॥ ১৯ ॥

কর্ম্মিবিষয়ঞ্চ সমাসমাভ্যামিত্যাদি ইদন্তু সর্ব্বকর্ম্ম সন্ন্যাসিবিষয়ং প্রস্তুতং সর্ব্বকর্ম্মাণি মনসেত্যারভ্যাধ্যায়পরিসমাপ্তেঃ যস্মান্নির্দ্দোষং সমং ব্রহ্মাত্মা তস্মাৎ নেতি। ন প্রহৃষ্যেৎ ন হর্ষং কুর্য্যাৎ প্রিয়মিষ্টং প্রাপ্য লব্ধ্বা নোদ্বিজেৎ প্রাপ্যৈব চাপ্রিয়মনিষ্টং লব্ধ্বা, দেহমাত্রাত্মাত্মদর্শিনাং হি প্রিয়াপ্রিয়প্রাপ্তী হর্ষবিষাদৌ কুর্ব্বাতে ন কেবলাত্মদর্শিনঃ তস্য প্রিয়াপ্রিয়প্রাপ্ত্যসম্ভবাৎ কিঞ্চ সর্ব্বভূতেষেকঃ সমো নির্দ্দোষ আত্মেতি স্থিরা নির্ব্বিচিকিৎসা বুদ্ধির্যস্য স স্থিরবুদ্ধিরসংমূঢ়ঃ সংমোহবর্জ্জিতশ্চ স্যাদ্‌যথোক্তব্রহ্মবিৎ ব্রহ্মণি স্থিতোঽকর্ম্মকৃৎ সর্ব্বকর্ম্মসন্ন্যাসীত্যর্থঃ ॥ ২০ ॥

## গিরিকৃত টীকা ।

ব্রহ্মণো নির্ব্বিশেষত্বেনৈকত্বাজ্জীবানাঞ্চ ভেদকাভাবেনৈকত্বস্যোক্তত্বাদেকলক্ষণত্বাদেকত্বং জীবব্রহ্মণোরেষ্টব্যমিত্যাহ তস্মাদিতি। জীবব্রহ্মণোরেকত্বে জীবানাং ব্রহ্মবন্নির্দ্দোষত্বং সিধ্যতীত্যাহ তস্মান্নেতি। তচ্ছদার্থমেব স্ফোরয়তি দেহাদিতি। যদি সর্ব্বসত্ত্বেষু সমত্বদর্শনমদুষ্টমিষ্টং তর্হি কথং গৌতমসূত্রমিত্যাশঙ্ক্যাহ দেহাদিসংঘাতেতি। সূত্রস্য যথোক্তাভিমানবদ্বিষয়ত্বে গমকমাহ পূজেতি। যদি চতুর্ব্বেদানামেব সতাং পূজয়া বৈষম্যং যদি বা চতুর্ব্বেদনাং ষড়ঙ্গবিদ্যাং ব্রহ্মবিদাঞ্চ পূজয়া সাম্যং তদা তেষামুক্তপূজাবিষয়াণাং কেষাঞ্চিন্মনোবিকারসম্ভবে কর্ত্তা প্রত্যবৈতীত্যবিদ্বদ্বিষয়ত্বং সূত্রস্য প্রতিভাতীত্যর্থঃ। তত্রৈব চানুভবমনুকূলত্বেনোদাহরতি দৃশ্যতে হীতি। দেহাদিসংঘাতাভিমানবতাং গুণদোষসম্বন্ধসম্ভবাত্তদ্বিষয়ং সূত্রমিত্যুক্তমিদানীং ব্রহ্মাত্মদর্শনাভিমানবতাং গুণদোষাসম্বন্ধান্ন তদ্বিষয়ং সূত্রমিত্যভিপ্রেত্যাহ ব্রহ্ম ত্বিতি ॥ ১৯ ॥

ইতশ্চ নেদং সূত্রং ব্রহ্মবিদ্বিষয়মিত্যাহ কর্ম্মীতি। তত্রৈব পূজাপরিভবসম্ভবাদিত্যর্থঃ।

## স্বামিকৃত টীকা ।

ব্রহ্মপ্রাপ্তস্য লক্ষণমাহ ন প্রহৃষ্যেদিতি। ব্রহ্মবিদ্ভূত্বা ব্রহ্মণ্যেব যঃ স্থিতঃ স প্রিয়ং প্রাপ্য ন প্রহৃষ্যেৎ ন প্রহৃষ্টো হর্ষবান্ স্যাৎ অপ্রিয়ং প্রাপ্য চ নোদ্বিজেৎ ন বিষীদতীত্যর্থঃ যতঃ স্থিরবুদ্ধিঃ স্থিরা নিশ্চলা বুদ্ধির্যস্য, তৎ কুতঃ যতোঽসংমূঢ়ঃ নিবৃত্তমোহঃ ॥ ২০ ॥

বাহ্যস্পর্শেষ্বসক্তাত্মা বিন্দত্যাত্মনি যৎ সুখম্।
স ব্রহ্মযোগযুক্তাত্মা সুখমক্ষয়মশ্নুতে ॥

## শাঙ্করভাষ্যম্

কিঞ্চ ব্রহ্মণি স্থিতঃ বাহ্যেতি। বাহ্যস্পর্শেষু বাহ্যাশ্চ তে স্পর্শাশ্চ বাহ্যস্পর্শা স্পৃশ্যন্ত ইতি স্পর্শাঃ শব্দাদয়ো বিষয়াস্তেষু বাহ্যস্পর্শেষু আসক্ত আত্মান্তঃকরণং যস্য সোঽয়মসক্তাত্মা বিষয়েষু প্রীতিবর্জ্জিতঃ স বিন্দতি লভতে আত্মনি যৎ সুখং তদ্বিন্দতীত্যেতৎ স ব্রহ্মযোগযুক্তাত্মা ব্রহ্মণি যোগঃ সমাধির্ব্রহ্মযোগস্তেন ব্রহ্মযোগেন যুক্তঃ সমাহিতস্তস্মিন্ ব্যাপৃত আত্মান্তঃকরণং যস্য স ব্রহ্মযোগযুক্তাত্মা সুখমক্ষয়মশ্নুতে প্রাপ্নোতি তস্মাদ্বাহ্যবিষয়প্রীতেঃ ক্ষণিকায়া ইন্দ্রিয়াণি নিবর্ত্তয়েদাত্মন্যক্ষয়সুখার্থীত্যর্থঃ ॥ ২১ ॥

## গিরিকৃত টীকা।

নমু যত্র সমত্বদর্শনং তত্রৈব স্থিদং ন তু কর্ম্মিণ্যকর্ম্মিণি বেতি বিভাগোঽস্তি তত্রাহ ইদং স্থিতি। সমত্বদর্শনস্য সন্ন্যাসিবিষয়ত্বেন প্রস্তুতত্বে হেতুমাহ সর্ব্বকর্ম্মাণীতি। অধ্যায়পরিসমাপ্তেঃ সর্ব্বকর্ম্মাণীত্যারভ্য তত্র তত্র সর্ব্বকর্ম্মসন্ন্যাসাভিধানাত্তদ্বিষয়মিদং সমত্বদর্শনং গম্যতে তত্র চ নিরহঙ্কারে নিববকাংশ স্বত্রমিত্যর্থঃ। নমু ইষ্টানিষ্টপ্রাপ্তিভ্যাং হর্ষবিষাদৌ বিদ্বানপি কুর্ব্বন্নির্দ্দোষে ব্রহ্মণিকথং স্থিতিং লভেতেত্যাশঙ্ক্যাকাঙ্ক্ষিতং পুরয়ন্নুত্তরশ্লোকমুখাপয়তি যস্মাদিতি। আত্মজ্ঞামনিষ্ঠাবতো বিদুষো হর্ষবিষাদনিমিত্তাভাবান্ন তাবুচিতাবিত্যাহ স্থিরবুদ্ধিরিতি। নমু হর্ষবিষাদনিমিত্তত্বং প্রিয়াপ্রিয়য়োঃ সিদ্ধমিতি কথং তৎপ্রাপ্ত্যা হর্ষোদ্বেগৌ ন কর্ত্তব্যাবিতি নিযুজ্যতে তত্রাহ দেহেতি। বিদুষোঽপি প্রিয়াপ্রিয়প্রাপ্তিসামর্থ্যাদেব হর্ষবিষাদৌ দুর্ব্বারাবিত্যাশঙ্ক্যাহ ন কেবলেতি। অদ্বিতীয়দর্শনশীলস্য ব্যতিরিক্তপ্রিয়াপ্রিয়প্রাপ্ত্যযোগান্ন তন্নিমিত্তৌ হর্ষবিষাদাবিত্যর্থঃ। ইতোঽপি বিদুষো ন হর্ষবিষাদাবিত্যাহ কিঞ্চেতি। নির্দ্দোষে ব্রহ্মণি প্রাগুক্তে দৃঢ়প্রতিপত্তিঃ সংমোহেন হর্ষাদিহেতুনা রহিতো যথোক্তে সর্ব্বদোষরহিতে ব্রহ্মণ্যহমস্মীতি বিদ্যাবানশেষদোষশূন্যে তস্মিন্নেব ব্রহ্মণি স্থিতস্তদনুরোধাৎ কর্ম্মাণ্যমুষ্যমাণো নৈব হর্ষবিষাদভাগী ভবিতুমলমিত্যর্থঃ ॥ ২০ ॥

শব্দাদিবিষয়প্রীতিবদ্ধান্ন কস্যচিদপি ব্রহ্মণি স্থিতিঃ সিধ্যেদিত্যাশঙ্ক্যাহ কিঞ্চেতি ন কেবলং পূর্ব্বোক্তরীত্যা ব্রহ্মণি স্থিতো হর্ষবিষাদরহিতঃ কিন্তু বিদ্যান্তরেণাপীত্যর্থঃ। যাবদ্যাবদ্বিষয়েষু রাগরূপমাবরণং নিবর্ত্ততে তাবত্তাবদাত্মস্বরূপসুখমভিব্যক্তং ভবতীত্যাহ

## স্বামিকৃত টীকা।

মোহনিবৃত্ত্যা বুদ্ধিস্থৈর্য্যহেতুমাহ বাহ্যেতি। ইন্দ্রিয়ৈঃ, স্পৃশ্যন্ত ইতি স্পর্শা বিষয়াঃ বাহ্যেন্দ্রিয়বিষয়েষসক্তাত্মা অনাসক্তচিত্তঃ আত্মন্যন্তঃকরণে যদুপশমাত্মকং সুখং তদ্বিন্দতি

যে হি সংস্পর্শজা ভোগা দুঃখযোনয় এব তে।
আদ্যন্তবন্তঃ কৌন্তেয় ন তেষু রমতে বুধঃ ॥ ২২ ॥

## শাঙ্করভাষ্যম্।

ইতশ্চ নিবর্ত্তয়েৎ যে হীতি। যে হি যস্মাৎ সংস্পর্শজা বিষয়েন্দ্রিয়সংস্পর্শেভ্যো জাতা ভোগা ভুক্তয়ো দুঃখযোনয়এব তেঽবিদ্যাকৃতত্বাৎ,দৃশ্যন্তে হ্যাধ্যাত্মিকাদীনি দুঃখানি তন্নিমিত্তান্যেব যথেহ লোকে তথা পরলোকেঽপীতি গম্যতে, এবশব্দান্ন সংসারে সুখস্য গন্ধমাত্রমপ্যস্তীতি বুদ্ধা বিষয়মৃগতৃষ্ণিকায়া ইন্দ্রিয়াণি নিবর্ত্তয়েন্ন কেবলং দুঃখযোনয় আদ্যন্তবন্তশ্চ আদির্বিষয়েন্দ্রিয়সংযোগো ভোগানামন্তশ্চ তদ্বিয়োগ এবাত আদ্যন্তবন্তোঽনিত্যা মধ্যক্ষণভাবিত্বাদিত্যর্থঃ, কৌন্তেয় ন তেষু রমতে বুধো ভোগেষু বিবেকী অবগতপরমার্থতত্বোঽত্যন্তমূঢ়ানামেব হি বিষয়েষু রতির্দৃশ্যতে যথা পশুপ্রভৃতীনাং ॥ ২২ ॥

## গিরিকৃত টীকা।

বাহ্যেতি। ন কেবলমসক্তাত্মা শমবশাদেব সুখং বিন্দতে কিন্তু ব্রহ্মসমাধিনা সমাহিতান্তঃকরণঃ সুখমনন্তং ব্যাপ্নোতীত্যাহ স ব্রহ্মেতি। তত্র পূর্ব্বার্দ্ধং ব্যাচষ্টে বাহ্যাশ্চেতি। সমাধানাধীনসম্যগ্জ্ঞানদ্বারা নিরতিশয়সুখপ্রাপ্তিমুত্তরার্দ্ধব্যাখ্যানেন কথয়তি ব্রহ্মণীত্যাদিনা। শব্দাদিবিষয়বিমুখস্যানন্তসুখাপ্তিসম্ভবাত্তদর্থিনা প্রযত্নেন বিষয়বৈমুখ্যং কর্ত্তব্যমিতি শিষ্যশিক্ষার্থমাহ তস্মাদিতি ॥ ২১ ॥

তত্রৈব হেত্বন্তরপরত্বেনোত্তরশ্লোকমুদাহরতি ইতশ্চেতি। বিষয়েভ্যঃ সকাশাদিন্দ্রিয়াণীতি শেষঃ। বৈরাগ্যার্থমেব বৈষয়িকাণি সুখানি দূষয়তি যে হীতি। নন্বু বিষয়েন্দ্রিয়সংপ্রয়োগসংভূতেষু ভোগেষু জন্তূনামভিরুচিদর্শনাৎ কুতস্তেষাং দুঃখযোনিত্বমিত্যাশঙ্ক্যাবিবেকিনাং তেষাসঙ্গেঽপি ন বিবেকিনামিত্যাহ আদ্যন্তবন্ত ইতি। যস্মাদাধিব্যাধিজরামরণাদিসহিতেভ্যঃ সমাগমনাদিক্লেশরূপভাগিভ্যশ্চ বিষয়েন্দ্রিয়সম্বন্ধেভ্যো ভোগাঃ সুখলবানুভবা জায়ন্তে তস্মাত্তে দুঃখহেতবো ভবন্তীতি যোজনা। অবিদ্যাকার্য্যত্বাদ্দুঃখানাং কুতো ভোগজন্যত্বমিত্যাশঙ্ক্য ভোগানামবিদ্যাপ্রযুক্তত্বাত্তন্নিবন্ধনত্বং দুঃখানাং যুক্তমিত্যভিপ্রেত্যাহ অবিদ্যেতি।

## স্বামিকৃত টীকা।

লভতে, স চোপশমসুখং লব্ধ্বা ব্রহ্মণি যোগেন সমাধিনা যুক্তস্তদৈক্যং প্রাপ্ত আত্মা যস্য সোঽক্ষয়ং সুখমশ্নুতে প্রাপ্নোতি ॥ ২১ ॥

নন্বু প্রিয়বিষয়ভোগানামপি নিবৃত্তেঃ কথং মোক্ষঃ পুরুষার্থঃ স্যাত্তত্রাহ যে হীতি। সংস্পৃশ্যন্ত ইতি সংস্পর্শা বিষয়াস্তেভ্যো জাতা যে ভোগাঃ সুখানি তে হি বর্ত্তমানকালেঽপি স্পর্দ্ধাসূয়াদিব্যাপ্তত্বাদ্দুঃখস্যৈব যোনয়ঃ কারণভূতাঃ তথাদিমন্তোঽন্তবন্তশ্চ অতো বিবেকী তেষু ন রমতে ॥ ২২ ॥

শক্নোতীহৈব যঃ সোঢ়ুং প্রাক্ শরীরবিমোক্ষণাৎ।
কামক্রোধোদ্ভবং বেগং স যুক্তঃ স সুখী নরঃ ॥ ২৩ ॥

## শাঙ্করভাষ্যম্।

অয়ঞ্চ শ্রেয়োমার্গপ্রতিপক্ষী কষ্টতমো দোষঃ সর্ব্বানর্থপ্রাপ্তিহেতুর্দুর্নিবার্য্যশ্চেতি তৎ-পরিহারে যত্নাধিক্যং কর্ত্তব্যমিত্যাহ ভগবান্ শক্নোতীতি। শক্নোত্যুৎসহতে ইহৈব জীবন্নেব যঃ সোঢ়ুং প্রসহিতুং প্রাক্ পূর্ব্বং শরীরবিমোক্ষণাৎ আমরণাৎ ইত্যর্থঃ, মরণ-সীমাকরণং জীবতোঽবশ্যম্ভাবী হি কামক্রোধোদ্ভবো বেগঃ অনন্তনিমিত্তবান্ হি স ইতি যাবন্মরণং তাবন্ন বিশ্রম্ভণীয় ইত্যর্থঃ, কাম ইন্দ্রিয়গোচরপ্রাপ্তে ইষ্টে বিষয়ে শ্রূয়মাণে স্মর্য্য-মাণে চানুভূতে সুখহেতৌ যা গৃধিঃ তৃষ্ণা স কামঃ ক্রোধশ্চাত্মনঃ প্রতিকূলেষু দুঃখহেতুষু

## গিরিকৃত টীকা।

ভোগানাং দুঃখযোনিত্বে মানমনুভবমুপন্যস্যতি দৃশ্যন্তে হীতি। ঐহিকানাং ভোগানাং দুঃখনিমিত্তত্বেঽপি নামুষ্মিকাণাং তথাত্বমনুভবাভাবাদিত্যাশঙ্ক্যাবধারণসামর্থ্যসিদ্ধমর্থমাহ যথেতি। পূর্ব্বার্দ্ধস্যাক্ষরার্থমুক্ত্বা তাৎপর্য্যার্থমাহ নেত্যাদিনা। ইতশ্চ বিষয়েভ্যঃ সকা-শাদিন্দ্রিয়াণি নিবর্ত্তয়িতব্যানীত্যাহ ন কেবলমিতি। আদ্যন্তবত্ত্বে মধ্যক্ষণবর্ত্তিত্বেন ক্ষণভঙ্গুরত্বাদ্‌পেক্ষণীয়ত্বং ভোগানাং সিধ্যতি। অস্তি হি তেষাং ক্ষণভঙ্গুরত্বং ক্ষণিকবিষ-য়াকারমনোবৃত্ত্যভিব্যঙ্গ্যত্বাদিতি মন্বানঃ সন্নাহ অতইতি। বুদ্ধিপূর্ব্বকারিণাং বিবেকবতাং ভোগেষূপেক্ষোপলক্ষেশ্চ তেষামাভাসত্বং প্রতিভাতীত্যাহ ন তেষিতি। প্রতীকোপাদান-মাদ্যমিদং পুনর্ব্যাখ্যানমিতি ন পুনরুক্তিঃ। নন্বু কেষাঞ্চিদ্ভোগেষভিরুচিরুপলভ্যতে তত্রাহ অত্যন্তেতি ॥ ২২ ॥

উত্তরশ্লোকস্য তাৎপর্য্যমাহ অয়ঞ্চেতি। শ্রেয়োমার্গপ্রতিপক্ষত্বং কষ্টতমত্বে হেতু-স্তত্রৈব হেত্বন্তরমাহ সর্ব্বেতি। প্রযত্নাধিক্যস্য কর্ত্তব্যত্বে হেতুং সূচয়তি দুর্নিবার্য্যইতি। প্রসিদ্ধং হি কামক্রোধোদ্ভবস্য বেগস্য দুর্নিবারত্বং যেন মাতরমপি চাধিরোহতি পিতরমপি হন্তি তমবশ্যং পরিহর্ত্তব্যং দর্শয়তি শক্নোতীতি। যথোক্তং বেগং বহিরনর্থরূপেণ পরিণামাৎ

## স্বামিকৃত টীকা।

তস্মান্মোক্ষএব পরমঃ পুরুষার্থস্তস্য চ কামক্রোধবেগোঽতিপ্রতিপক্ষোঽতস্তৎসহনসম-র্থএব মোক্ষভাগিত্যাহ শক্নোতীহৈবেতি। কামাৎ ক্রোধাচ্চোদ্ভবতি যো বেগঃ মনোনে-ত্রাদিক্ষোভলক্ষণস্তমিহৈব তদুদ্ভবসময়এব যো নরঃ সোঢ়ুং প্রতিবোদ্ধুং শক্নোতি তদপি ন ক্ষণমাত্রং কিন্তু শরীরবিমোক্ষণাৎ প্রাগ্দেহপাতাদিত্যর্থঃ, য এবংভূতঃ সএব যুক্তঃ সমাহিতঃ সুখী চ ভবতি নান্যঃ। যদ্বা মরণাদূর্দ্ধং বিলপন্তীভির্যুবতিভিরালিঙ্গ্যমানোঽপি পুত্রাদি-ভির্দহ্যমানোঽপি যথা প্রাণশূন্যঃ কামক্রোধবেগং সহতে তথা মরণাৎ প্রাগপি জীবন্নেব যঃ

যোঽন্তঃসুখোঽন্তরারামস্তথান্তর্জ্যোতিরেব যঃ।
স যোগী ব্রহ্মনির্ব্বাণং ব্রহ্মভূতোঽধিগচ্ছতি ॥ ২৪ ॥

## শাঙ্করভাষ্যম্।

দৃশ্যমানেষু শ্রূয়মাণেষু স্মর্য্যমাণেষু বা যো দ্বেষঃ স ক্রোধস্তৌ কামক্রোধৌ উদ্ভবো যস্য বেগস্য স কামক্রোধোদ্ভবো বেগঃ রোমাঞ্চনহৃষ্টনেত্রবদনাদিলিঙ্গোঽন্তঃকরণপ্রক্ষোভরূপঃ কামোদ্ভবো বেগঃ, গাত্রপ্রকম্পপ্রস্বেদসন্দষ্টৌষ্ঠপুটরক্তনেত্রাদিলিঙ্গঃ ক্রোধোদ্ভবো বেগস্তং কামক্রোধোদ্ভবং বেগং য উৎসহতে সোঢ়ুং সহিতুং শক্তঃ স যুক্তো যোগী সুখী চেহ লোকে নরঃ ॥ ২৩ ॥

কথম্ভূতশ্চ ব্রহ্মণি স্থিতো ব্রহ্ম প্রাপ্নোতীত্যাহ ভগবান্ য ইতি। যোঽন্তরাত্মনি সুখং যস্য সোঽন্তঃসুখস্তথান্তরেবাত্মন্যারামঃ ক্রীড়া যস্য সোঽন্তরারামস্তথৈবান্তরাত্মৈব জ্যোতিঃ

## গিরিকৃত টীকা।

প্রাগেব দেহান্তকৃৎপন্নং যঃ সোঢ়ুং ক্ষমতে তং স্তৌতি স যুক্ত ইতি। মরণসীমাকরণস্য তাৎপর্য্যমাহ মরণেতি। প্রসিদ্ধৌ হি শব্দঃ। তত্র হেতুমাহ অনন্তেতি। ব্যাধ্যুপহতানাং বৃদ্ধানাঞ্চ কামাদিবেগো ন ভবতীত্যাশঙ্ক্যাহ ইতি যাবদিতি। কামক্রোধোদ্ভবং বেগং ব্যাখ্যাতুমাদৌ কামং মনোবিকারবিশেষত্বেন ব্যাচষ্টে কামইতি। কথমস্য মনোবিকারবিশেষত্বং তদাহ ইন্দ্রিয়েতি। কামো গৃধিস্তৃষ্ণেতি পর্য্যায়াঃ সন্তঃ শব্দা মনোবিকারবিশেষে পর্য্যবস্যন্তীত্যর্থঃ। ক্রোধশ্চ মনোবিকারবিশেষস্তমাদিত্যাহ ক্রোধশ্চেতি। তমেব ক্রোধং স্পষ্টয়তি আত্মন ইতি। এবং কামক্রোধৌ ব্যাখ্যায় তয়োরুৎকটত্বাবস্থায়িনো বেগস্য তাভ্যামুৎপত্তিমুপন্যস্যতি তাবিতি। যথোক্তবেগাবগমোপায়মুপদিশতি রোমাঞ্চনহৃষ্টনেত্রেত্যাদিনা। উভয়বিধবেগং যো জীবন্নেব সোঢ়ুং শক্নোতি তং পুরুষধৌরেয়ত্বেন স্তৌতি তমিত্যাদিনা ॥ ২৩ ॥

জ্ঞানস্যাত্যন্তরঙ্গমাত্রমাত্মনিষ্ঠত্বং দর্শয়ন্ প্রকৃতং ব্রহ্মবিদমেব বিশিনষ্টি কথম্ভূতশ্চেতি। যথান্তরেব সুখং ন বাহ্যৈর্বিষয়ৈস্তথান্তরেব জ্যোতির্ন শ্রোত্রাদিভিরতোবিষয়ান্তরাবিজ্ঞানব-

## স্বামিকৃত টীকা।

সহতে সএব যুক্ত, চেত্যর্থঃ, তদুক্তং বশিষ্ঠেন, প্রাণে গতে যথা দেহঃ সুখদুঃখে ন বিন্দতি, তথা চেৎ প্রাণযুক্তোঽপি স কৈবল্যাশ্রমে বসেদিতি ॥ ২৩ ॥

ন কেবলং কামক্রোধবেগসম্বরণমাত্রেণ মোক্ষং প্রাপ্নোতি অপি তু যোঽন্তরিতি। অন্তরাত্মন্যেব সুখং যস্য ন তু বিষয়েষু, অন্তরেবারামঃ ক্রীড়া যস্য ন বহিঃ, অন্তরেব জ্যোতির্দৃষ্টির্যস্য ন গীতনৃত্যাদিষু, স এবং ব্রহ্মণি ভূতঃ স্থিতঃ সন্ ব্রহ্মণি নির্ব্বাণং ব্রহ্মমধিগচ্ছতি প্রাপ্নোতি ॥ ২৪ ॥

লভন্তে ব্রহ্মনির্ব্বাণমৃষয়ঃ ক্ষীণকল্মষাঃ।
ছিন্নদ্বৈধা যতাত্মানঃ সর্ব্বভূতহিতে রতাঃ ॥ ২৫ ॥

## শাঙ্করভাষ্যম্।

প্রকাশো যস্য সোঽন্তর্জ্যোতিরেব য ঈদৃশঃ স যোগী ব্রহ্মনির্ব্বাণং ব্রহ্মণি নির্ব্বৃতিং মোক্ষমিহ জীবন্নেব ব্রহ্মভূতঃ সন্নধিগচ্ছতি প্রাপ্নোতি ॥ ২৪ ॥

কিঞ্চ লভন্তইতি। লভন্তে ব্রহ্মনির্ব্বাণং মোক্ষং ঋষয়ঃ সম্যগ্দর্শিনঃ সংন্যাসিনঃ ক্ষীণ-কল্মষাঃ ক্ষীণপাপাদিদোষাঃ ছিন্নদ্বৈধাঃ ছিন্নসংশয়াঃ যতাত্মনঃ সংযতেন্দ্রিয়াঃ সর্ব্বভূতহিতে রতাঃ সর্ব্বেষাং ভূতানাং হিতে আনুকূল্যে রতা অহিংসকা ইত্যর্থঃ ॥ ২৫ ॥

কিঞ্চ কামেতি। কামক্রোধবিমুক্তানাং কামশ্চ ক্রোধশ্চ কামক্রোধৌ তাভ্যাং বিমু-ক্তানাং যতীনাং সংন্যাসিনাং যতচেতসাং সংযতান্তঃকরণানাং অভিত উভয়তো জীবতাং

## গিরিকৃত টীকা

হিতইত্যাহ তথেতি। যথোক্তবিশেষণসমাবিমান্ জীবন্নেব মুক্তিমধিগচ্ছতীত্যাহ স যোগীতি। আত্মন্যন্তরেব স্থখমিতি বাহ্যবিষয়নিরপেক্ষত্বং বিবক্ষিতমন্তরারামত্বঞ্চ ইন্দ্রিয়া-দিবিষয়াপেক্ষামন্তরেণ ক্রীড়াপ্রযুক্তফলভাক্ত্বমভিমতমিন্দ্রিয়াদিজন্যপ্রকাশশূন্যত্বমাত্মজ্যো-তিষ্ট্বমিষ্টং যথোক্তবিশেষণসম্পন্নঃ সমাহিতশ্চ জীবন্নেব ব্রহ্মভাবং প্রাপ্নোতি ব্রহ্মণি পরি-পূর্ণে নির্ব্বৃতিং সর্ব্বার্থনিবৃত্ত্যুপলক্ষিতাং স্থিতিমনতিশয়ানন্দাবির্ভাবলক্ষণাং প্রাপ্নোতীত্যাহ য ঈদৃশইতি ॥ ২৪ ॥

মুক্তিহেতোর্জ্ঞানস্য সাধনান্তরমাহ কিঞ্চেতি। যজ্ঞাদিনিত্যকর্ম্মানুষ্ঠানাৎ পাপাদি-লক্ষণং কল্মষং ক্ষীয়তে ততশ্চ শ্রবণাদ্যাবৃত্তেঃ সম্যক্ দর্শনং জায়তে ততো মুক্তিরপ্রযত্নেন ভবতীত্যাহ লভন্তইতি। জ্ঞানপ্রাপ্ত্যুপায়ান্তরং দর্শয়তি ছিন্নেতি। শ্রবণাদিনা সংশয়-নিরসনং কার্য্যকারণনিয়মনঞ্চ দয়ালুত্বেনাহিংসকত্বমিত্যেতদপি সম্যগ্জ্ঞানপ্রাপ্তৌ কারণ-মিত্যর্থঃ। অক্ষরব্যাখ্যানং স্পষ্টত্বান্ন ব্যাখ্যায়তে ॥ ২৫ ॥

পূর্ব্বং কামক্রোধয়োর্বেগঃ সোঢ়ব্যো দর্শিতঃ সম্প্রতি তাবেব ত্যাজ্যাবিত্যাহ কিঞ্চেতি। নন্থ দর্শিতবিশেষবতাং মৃতানামেব মোক্ষো ন তু জীবতামিতি চেন্নেত্যাহ অভিতইতি। অস্মদাদীনামপি তর্হি প্রভূতকামাদিপ্রভাববিধুরাণাং কিমিতি মোক্ষো ন ভবতীত্যাশঙ্ক্য

## স্বামিকৃত টীকা।

কিঞ্চ লভন্তইতি। ঋষয়ঃ সম্যগ্দর্শিনঃ ক্ষীণং কল্মষং যেষাং ছিন্নং দ্বৈধং সংশয়ো যেষাং যতঃ সংযত আত্মা চিত্তং যেষাং সর্ব্বেষাং ভূতানাং হিতে রতাঃ যে কৃপালবস্তে ব্রহ্মনির্ব্বাণং মোক্ষং লভন্তে ॥ ২৫ ॥

কিঞ্চ কামেত্যাদি। কামক্রোধাভ্যাং বিমুক্তা নাং যতীনাং সংন্যাসিনাং সংযতচিত্তানাং

কামক্রোধবিমুক্তানাং যতীনাং যতচেতসমাম্।
অভিতো ব্রহ্মনির্ব্বাণং বর্ত্ততে বিদিতাত্মনাম্ ॥২৬॥
স্পর্শান্ কৃত্বা বহির্বাহ্যাংশ্চক্ষুশ্চৈবান্তরে ভ্রুবোঃ।
প্রাণাপানৌ সমৌ কৃত্বা নাসাভ্যন্তরচারিণৌ ॥২৭॥

## শাঙ্করভাষ্যম্।

মৃতানাঞ্চ ব্রহ্মনির্ব্বাণং মোক্ষো বর্ত্ততে বিদিতাত্মনাং বিদিতো জ্ঞাত আত্মা যেষাং তে বিদিতাত্মানস্তেষাং বিদিতাত্মনাং সম্যগ্দর্শিনামিত্যর্থঃ॥ ২৬॥

সম্যগ্দর্শননিষ্ঠানাং সংন্যাসিনাং সদ্যোমুক্তিরুক্তা, কর্ম্মযোগশ্চ ঈশ্বরার্পিতসর্ব্বভাবেনেশ্বরে ব্রহ্মণ্যাধায় ক্রিয়মাণঃ সত্ত্বশুদ্ধিজ্ঞানপ্রাপ্তিসর্ব্বকর্ম্মসংন্যাসক্রমেণ মোক্ষায়েতি ভগবান্ পদে পদেঽব্রবীদ্বক্ষ্যতি চ, অথ ইদানীং ধ্যানযোগং সম্যগ্দর্শনস্যান্তরঙ্গং বিস্তরেণ বক্ষ্যামীতি তস্য সূত্রস্থানীয়ান্ শ্লোকানুপদিশতি স্ম ভগবান্ বাসুদেবঃ স্পর্শানিতি। স্পর্শান্ শব্দাদীন্ কৃত্বা বহির্ব্বাহ্যান্ শ্রোত্রাদিদ্বারেণান্তর্বুদ্ধৌ প্রবেশিতাঃ শব্দাদয়ো বিষয়াস্তানচিন্তয়তঃ শব্দাদয়ো বাহ্যা বহিরেব কৃতা ভবন্তি তানেবং বহিঃ কৃত্বা চক্ষুশ্চৈবান্তরে ভ্রুবোঃ কৃত্বেত্যনুষজ্যতে তথা প্রাণাপানৌ নাসাভ্যন্তরচারিণৌ সমৌ কৃত্বা॥ ২৭॥

## গিরিকৃত টীকা।

সম্যগ্জ্ঞানবৈশেষ্যাভাবাদিত্যাহ বিদিতেতি। উক্তেঽর্থে শ্লোকাক্ষরাণামন্বয়মাচষ্টে কামক্রোধেত্যাদিনা ॥২৬॥

বৃত্তমনূদ্যোত্তরশ্লোকত্রয়স্য তাৎপর্য্যার্থমাহ সম্যগ্দর্শনেতি। ঈশ্বরার্পিতসর্ব্বভাবেনেতি পরস্মিন্নীশ্বরে সমর্পিতঃ সর্ব্বেষাং দেহেন্দ্রিয়মনসাং ভাবশ্চেষ্টাবিশেষো ন ক্বচিদপি বহিস্তেষাং ব্যাপারস্তেনেত্যর্থঃ। কর্ম্মযোগস্য তৎফলস্য চাভিধানানন্তরমিত্যথশব্দার্থঃ। অতো বাহ্যানাং বিষয়াণাং কুতো বহিষ্করণমিত্যাশঙ্ক্যাহ তানিতি॥ ২৭॥

বিষয়প্রাবণ্যং পরিত্যজ্য চক্ষুরপি ভ্রুবোর্ম্মধ্যে বিক্ষেপপরিহারার্থং কৃত্বা প্রাণাপানৌ নাসাভ্যন্তরচরণশীলৌ সমৌ ন্যূনাধিকবর্জ্জিতৌ কুম্ভকেন নিরুদ্ধৌ কৃত্বা করণানি সর্ব্বাণ্যেবং সংযম্য প্রাণয়ামপরো ভূত্বা কিং কুর্য্যাদিত্যপেক্ষায়ামাহ যতেন্দ্রিয়েতি। ইন্দ্রিয়সংযমং কৃত্বা মোক্ষমেবাপেক্ষমাণো মননশীলঃ স্যাদিত্যর্থঃ। জ্ঞানাতিশয়নিষ্ঠস্য সর্ব্বদেচ্ছাদিশূন্যস্য

## স্বামিকৃত টীকা

জ্ঞাতাত্মতত্ত্বানামভিত উভয়তো জীবতাং মৃতানাঞ্চ ন দেহান্তএব তেষাং ব্রহ্মণি লয়োঽপি তু জীবতামপি বর্ত্তত ইত্যর্থঃ ॥২৬॥

স যোগী ব্রহ্মনির্ব্বাণমিত্যাদিষু যোগী মোক্ষমবাপ্নোতীত্যুক্তং তমেব যোগং সংক্ষেপেণাহ স্পর্শানিতি দ্বাভ্যাং। বাহ্যাএব স্পর্শারূপরসাদয়ো বিষয়াশ্চিন্তিতাঃ সন্তোঽন্তঃ

যতেন্দ্রিয়মনোবুদ্ধির্মুনির্মোক্ষপরায়ণঃ।
বিগতেচ্ছাভয়ক্রোধো যঃ সদা মুক্তএব সঃ ॥২৮॥

## শাঙ্করভাষ্যম্।

যতেন্দ্রিয়ইতি। যতেন্দ্রিয়মনোবুদ্ধির্যতানি সংযতানি ইন্দ্রিয়াণি মনো বুদ্ধিশ্চ যস্য স যতেন্দ্রিয়মনোবুদ্ধির্মননাৎ মুনিঃ সংন্যাসী মোক্ষপরায়ণঃ এবং দেহসংস্থানো মোক্ষপরায়ণো মোক্ষএব পরময়নং পরা গতির্যস্য সোঽয়ং মোক্ষপরায়ণো মুনির্ভবেৎ, বিগতেচ্ছাভয়ক্রোধ ইচ্ছা চ ভয়ঞ্চ ক্রোধশ্চ ইচ্ছাভয়ক্রোধাস্তে বিগতা যস্মাৎ স বিগতেচ্ছাভয়ক্রোধঃ য এবং বর্ত্ততে সদা সংন্যাসী মুক্তএব স তস্য মোক্ষেঽন্যঃ কর্ত্তব্যো নাস্তি ॥২৮॥

## গিরিকৃত টীকা।

রাণি ব্যাকরোতি যতেত্যাদিনা। দ্বিতীয়ার্দ্ধাক্ষরাণি ব্যাচষ্টে বিগতেত্যাদিনা ॥২৮॥

অধিকারিণো যথোক্তস্য কর্ত্তব্যাভাবে জ্ঞাতব্যমপি নাস্তীত্যাশঙ্ক্য পরিহরতি এবমিত্যাদিনা। প্রসিদ্ধং ভোক্তারং ব্যবচ্ছিনত্তি সর্ব্বলোকেতি ততো হৃস্য বন্ধবিপর্য্যয়াবিতি ন্যায়েন সর্ব্বফলদাতৃত্বং দর্শয়তি সুহৃদমিতি। উক্তেশ্বরজ্ঞানে ফলংকথয়তি জ্ঞাত্বেতি। যজ্ঞেষু তপঃসু চ দ্বিধা ভোক্তৃত্বং ব্যনক্তি কর্তৃরূপেণেতি। হিরণ্যগর্ভাদিব্যবচ্ছেদার্থং বিশিনষ্টি মহান্তমিতি। স্বপরিকরোপকারিণং রাজানং ব্যাবর্ত্তয়তি প্রত্যুপকারেতি। ঈশ্বরস্য তাটস্থ্যং ব্যুদস্যতি সর্ব্বভূতানামিতি। তর্হি তত্র ব্যবস্থিতিকর্ম্মতৎফলসংসর্গিত্বং স্যাদিত্যাশঙ্ক্যাহ সর্ব্বকর্ম্মেতি। ন চ তস্য বুদ্ধিতদ্বৃত্তিসম্বন্ধোঽপি বস্তুতোঽস্তীত্যাহ সর্ব্বপ্রত্যয়েতি। যথোক্তেশ্বরপরিজ্ঞানফলমভিদধাতি মাং নারায়ণমিতি। তদেবং কর্ম্মযোগস্যামুখ্যসংন্যাসাপেক্ষয়া প্রশস্তত্বেঽপি ততো মুখ্যসংন্যাসস্যাধিক্যাত্তদ্বতো বুদ্ধিশুদ্ধ্যাদিযুক্তস্য কামক্রোধোদ্ভবং বেগমিহৈব সোঢুং শক্তস্য

## স্বামিকৃত টীকা।

প্রবিশন্তি তাংস্তচ্চিন্তাত্যাগেন বহিরেব কৃত্বা চক্ষুর্ভ্রুবোরন্তরে ভ্রূমধ্য এব কৃত্বা অত্যন্তং নেত্রয়োর্নিমীলনে নিদ্রয়া মনো লীয়তে উন্মীলনে চ বহিঃ প্রসরতি তদুভয়দোষপরিহারার্থমর্দ্ধনিমীলনেন ভ্রূমধ্যে দৃষ্টিং নিধায়েত্যর্থঃ উচ্ছ্বাসনিশ্বাসরূপেণ নাসিকয়োরভ্যন্তরে চরন্তৌ প্রাণাপানাবূর্দ্ধাধোগতিরোধেন সমৌ কৃত্বা কুম্ভকং কৃত্বেত্যর্থঃ। যদ্বা প্রাণোঽয়ং যথা ন বহির্নির্যাতি যথা বাঽপানোঽন্তর্ন প্রবিশতি কিন্তু নাসামধ্য এব দ্বাবপি যথা চরতস্তথা মন্দাভ্যামুচ্ছ্বাসনিশ্বাসাভ্যাং সমৌ কৃত্বেতি ॥২৭॥

যতইতি। অনেনোপায়েন যতাঃ সংযতা ইন্দ্রিয়মনোবুদ্ধয়ো যস্য, মোক্ষএব পরময়নং প্রাপ্যং যস্য অতএব বিগতা ইচ্ছাভয়ক্রোধা যস্য এবংভূতো যো মুনিঃ স সদা জীবন্নপি মুক্ত এবেত্যর্থঃ ॥২৮॥

ভোক্তারং যজ্ঞতপসাং সর্ব্বলোকমহেশ্বরম্।
সুহৃদং সর্ব্বভূতানাং জ্ঞাত্বা মাং শান্তিমৃচ্ছতি ॥২৯॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্ম-
বিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুন-
সম্বাদে সন্ন্যাসযোগোনাম
পঞ্চমোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

এবং সমাহিতচিত্তেন কিং বিজ্ঞেয়মিতি। চোদ্যতে ভোক্তারমিতি। ভোক্তারং যজ্ঞানাং তপসাঞ্চ কর্ত্তৃরূপেণ দেবতারূপেণ চ যস্তং সর্ব্বলোকমহেশ্বরং সর্ব্বেষাং লোকানাং মহান্তং ঈশ্বরং সর্ব্বলোকমহেশ্বরং সুহৃদং সর্ব্বভূতানাং সর্ব্বপ্রাণিনাং প্রত্যুপকারনিরপেক্ষতয়োপ-কারিণং সর্ব্বভূতানাং হৃদয়েশয়ং সর্ব্বকর্ম্মফলাধ্যক্ষং সর্ব্বপ্রত্যয়সাক্ষিণং মাং নারায়ণং জ্ঞাত্বা শান্তিং সর্ব্বসংসারোপরতিমৃচ্ছতি প্রাপ্নোতি ॥ ২৯ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে পঞ্চমোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

শমদমাদিমতো যোগাধিকৃতস্য ত্বংপদার্থাভিজ্ঞস্য পরমাত্মানং প্রত্যক্ত্বেন জানতো মুক্তি-রিতি সিদ্ধং ॥২৯॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং পঞ্চমোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

নন্বেবমিন্দ্রিয়াদিসংযমমাত্রেণ কথং মুক্তিঃ স্যান্ন তাবন্মাত্রেণ কিন্তু জ্ঞানদ্বারেণেত্যাহ ভোক্তারমিতি। যজ্ঞানাং তপসাঞ্চৈব মম ভক্তৈঃ সমর্পিতানাং যদৃচ্ছয়া ভোক্তারং পাল-কমিতি বা সর্ব্বেষাং লোকানাং মহান্তমীশ্বরং সর্ব্বভূতানাং সুহৃদং নিরপেক্ষোপকারিণমন্ত-র্যামিনং মাং জ্ঞাত্বা মৎপ্রসাদেন শান্তিং মোক্ষমৃচ্ছতি প্রাপ্নোতি।

বিকল্পশঙ্কাপোহেন যেনৈবং যোগসাংখ্যয়োঃ।
সমুচ্চয়ঃ ক্রমেণোক্তঃ সর্ব্বজ্ঞং নৌমি তং গুরুং ॥২৯॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং পঞ্চমোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## ষষ্ঠোঽধ্যায়ঃ

শ্রীভগবানুবাচ—অনাশ্রিতঃ কর্ম্মফলং কার্য্যং কর্ম্ম করোতি যঃ।
স সন্ন্যাসী চ যোগী চ ন নিরগ্নির্ন চাক্রিয়ঃ ॥১॥

### শাঙ্করভাষ্যম্।

অতীতানন্তরাধ্যায়ান্তে ধ্যানযোগস্য সম্যগ্দর্শনং প্রত্যন্তরঙ্গস্য সূত্রভূতাঃ শ্লোকাঃ স্পর্শান কৃত্বা বহির্বিত্যাদয় উপদিষ্টাস্তেষাং বৃত্তিস্থানীয়োঽয়ং ষষ্ঠোঽধ্যায় আরভ্যতে, তত্র ধ্যানযোগস্য বহিরঙ্গং কর্ম্মেতি যাবদ্ধ্যানযোগারোহণাসমর্থস্তাবদ্গৃহস্থেনাধিকৃতেন কর্ত্তব্যং কর্ম্মেতি অতস্তৎ স্তৌতি অনাশ্রিত ইতি। নমু কিমর্থং ধ্যানযোগারোহণসীমাকরণং যাবতানুষ্ঠেযমেব বিহিতং কর্ম্ম যাবজ্জীবং, ন, আরুরুক্ষোর্মুনের্যোগং কর্ম্ম করণমুচ্যত ইতি বিশেষাদারূঢ়স্য চ শমেনৈব সম্বন্ধকারণাৎ, আরুরুক্ষোরারূঢ়স্য চ শমঃ কর্ম্ম চোভয়ং কর্ত্তব্যত্বেনাভিপ্রেতশ্চেৎ স্যাত্তদারুরুক্ষোরারূঢ়স্যেতি শমকর্ম্মবিষয়ভেদেন বিশেষণং বিভাগকরণঞ্চানর্থকং স্যাৎ, তত্রাশ্রমিণাং কশ্চিৎ যোগমারুরুক্ষুর্ভবত্যারূঢ়শ্চ কশ্চিদন্যেঽনারুরুক্ষবো ন চারূঢ়াস্তানপেক্ষ্যারুরুক্ষোরারূঢ়স্য চেতি বিশেষণং বিভাগকরণঞ্চোপপদ্যত এবেতি চেন্ন তস্যৈবেতি বচনাৎ যোগারূঢ়স্যেতি পুনর্যোগগ্রহণাচ্চ য আসীৎ পূর্ব্বং

---

### গিরিকৃত টীকা।

ধ্যানযোগপ্রস্তাবানান্তরং তদ্যোগ্যতাহেতুকর্ম্মণঃ স্তুতিং ভগবানুক্তবানিত্যাহ শ্রীভগবানিতি। পূর্ব্বোত্তরাধ্যায়য়োঃ সঙ্গতিমভিদধানো বৃত্তমনূদ্যাধ্যায়ান্তরমবতারয়তি অতীতেতি। সম্যগ্দর্শনপ্রকরণে ধ্যানযোগস্য প্রসঙ্গাভাবং বুদস্যতি সম্যগিতি। সংগ্রহবিবরণয়োরতীতানন্তরাধ্যায়য়োর্যুক্তং হেতুহেতুমত্ত্বমিতি ভাবঃ। অধ্যায়সম্বন্ধমভিধায়ানাশ্রিতঃ কর্ম্ম ফলমিত্যাদিশ্লোকদ্বয়স্য তাৎপর্য্যমাহ তত্রেতি। কর্ম্মযোগস্য সন্ন্যাসহেতোর্মর্য্যাদাং দর্শয়িতুং সাঙ্খ্য যোগং বিচারয়িতুমধ্যায়ে প্রবৃত্তে সতীতি সপ্তম্যর্থঃ। সংন্যাসিনা কর্ত্তব্যং কর্ম্মেত্যেবং প্রতিভাসং ব্যুদস্যতি গৃহস্থেনেতি। কর্ত্তব্যত্বং স্তুতিযোগ্যত্বমতঃশব্দার্থঃ। সমুচ্চয়বাদী সীমাকরণমাক্ষিপতি নম্বিতি। যাবজ্জীবশ্রুতিবশাৎ ধ্যানারোহণসামর্থ্যে সত্যপি কর্ম্মানুষ্ঠানস্য দুর্ব্বারত্বাদিতি হেতুমাহ যাবতেতি। কার্য্যাবিয়োগাদিপ্রতিবন্ধাদ্যাবজ্জীবশ্রুতিচোদিতকর্ম্মানুষ্ঠানবৎ বৈরাগ্যপ্রতিবন্ধাদ্বাপি তদনুষ্ঠানসম্ভবাদ্ভগবতো বিশেষবচনাচ্চ ন যাবজ্জীবং কর্ম্মানুষ্ঠানপ্রসক্তিরিতি পরিহরতি নারুরুক্ষোরিতি। উক্তমেবার্থং ব্যতিরেক-

## শাঙ্করভাষ্যম্।

যোগমারুরুক্ষুস্তস্যৈবারূঢ়স্য শমএব কর্ত্তব্যং কারণং যোগফলং প্রত্যুচ্যত ইত্যতো ন যাবজ্জীবং কর্ত্তব্যত্বপ্রাপ্তিঃ কস্যচিদপি কর্ম্মণঃ যোগবিভ্রষ্টবচনাচ্চ,গৃহস্থস্য চেৎ কর্ম্মিণো যোগো বিহিতঃ ষষ্ঠেঽধ্যায়ে স যোগবিভ্রষ্টোঽপি কর্ম্মগতিং কর্ম্মফলং প্রাপ্নোতীতি তস্য নাশাশঙ্কানুপপন্না স্যাদবশ্যং হি কৃতং কর্ম্ম কাম্যং নিত্যং বা মোক্ষস্য নিত্যত্বাদনারভ্যত্বেঽপি স্বং ফলমারভতএব নিত্যস্য চ কর্ম্মণো বেদপ্রমাণাববুদ্ধত্বাৎ ফলেন ভবিতব্যমিত্যবোচামান্যথা বেদস্যানর্থক্যপ্রসঙ্গাদিতি, ন চ কর্ম্মণি সত্যুভয়বিভ্রষ্টবচনমর্থবৎ কর্ম্মণো বিভ্রংশকারণানুপপত্তেঃ, কর্ম্ম কৃতমীশ্বরে সংন্যস্যেত্যতঃ কর্ত্তরি কর্ম্ম ফলং নারভত ইতি চেন্নেশ্বরে সংন্যাসস্যাধিকতরফলহেতুত্বোপপত্তের্মোক্ষায়ৈবেতি চেৎ স্বকর্ম্মণাং কৃতানামীশ্বরে

## গিরিকৃত টীকা।

দ্বারেণ বিবৃণোতি আরুরুক্ষোরিত্যাদিনা। আরোঢুমিচ্ছতীত্যারুরুক্ষুবত্রারোহণেচ্ছা বিশেষণমারোহণং কৃতবানিত্যত্র পুনরিচ্ছাবিষয়ভূতমারোহণং বিশেষণমেবং শমকর্ম্মবিষয়য়োর্ভেদেন বিশেষণং মর্য্যাদাকরণানঙ্গীকরণে বিরুদ্ধমাপদ্যেত, তয়োরেবং বিভাগকরণঞ্চ ভাগবতসীমানঙ্গীকারে ন যুজ্যেতেত্যর্থঃ। বিশেষণবিভাগকরণয়োরন্যথোপপত্তিমাশঙ্কতে তত্রেতি। ব্যবহারভূমিঃ সপ্তম্যর্থঃ, ষষ্ঠী নির্দ্ধারণে। ভবত্বধিকারিণাং ত্রৈবিধ্যং তথাপি প্রকৃতে বিশেষণাদৌ কিমায়াতমিত্যাশঙ্ক্য তৃতীয়াপেক্ষয়া তদুপপত্তিরিত্যাহ তানপেক্ষ্যেতি। আরুরুক্ষোরারূঢ়স্য চ ভেদে প্রকৃতপরামর্শানুপপত্তিরিতি দূষয়তি। ন তস্যেতি। যদ্যনারুরুক্ষুং পুরুষমপেক্ষ্যারুরুক্ষোরিতি বিশেষণং তস্য চ কর্ম্মারোহণকারণমনারূঢ়ঞ্চ পুরুষমপেক্ষ্যারূঢ়স্যেতি বিশেষণং তস্য চ শমঃ সংন্যাসো যোগফলপ্রাপ্তৌ কারণমিতি বিশেষণবিভাগকরণয়োরুপপত্তিস্তদারুরুক্ষোরারূঢ়স্য চ ভিন্নত্বাৎ প্রকৃতপরামর্শিনঃ তচ্ছব্দস্যানুপপত্তের্ন যুক্তমিত্থং বিশেষণাদ্যুপপাদনমিত্যর্থঃ। কিঞ্চ যোগমারুরুক্ষোস্তদারোহণে কারণং কর্ম্মেত্যুক্ত্বা পুনর্যোগারূঢ়স্যেতি যোগশব্দপ্রয়োগাৎ যো যোগং পূর্ব্বমারুরুক্ষুরাসীত্তস্যৈবাপেক্ষিতং যোগমারূঢ়স্য তৎফলপ্রাপ্তৌ কর্ম্মসংন্যাসঃ শমশব্দবাচ্যো হেতুত্বেন কর্ত্তব্যইতি বচনাদারুরুক্ষোবারূঢ়স্য চাভিন্নত্বপ্রত্যভিজ্ঞানান্ন তয়োর্ভিন্নত্বং শঙ্কিতুং শক্যমিত্যাহ পুনরিতি। যত্তু যাবজ্জীবশ্রুতিবিরোধাৎ যোগারোহণসীমাকরণং কর্ম্মণোঽনুচিতমিতি তত্রাহ উচ্যতইতি। পূর্ব্বোক্তরীত্যা কর্ম্মতত্ত্যাগয়োর্ব্বিভাগোপপত্তৌ শ্রুতেরন্যবিষয়ত্বাৎ যোগমারূঢ়স্য মুমুক্ষোর্জ্জিজ্ঞাসমানস্য নিত্যনৈমিত্তিককর্ম্মস্বপি পরিত্যাগসিদ্ধিরিত্যর্থঃ। ইতশ্চ যাবজ্জীবং কর্ম্ম কর্ত্তব্যং ন ভবতীত্যাহ যোগেতি। সংন্যাসিনো যোগভ্রষ্টস্য বিনাশশঙ্কাবচনান্ন যাবজ্জীবং কর্ম্ম কর্ত্তব্যং প্রতিভাতীত্যর্থঃ। নন্বু যোগভ্রষ্টশব্দেন গৃহস্থস্যৈবাভিধানাত্তস্যৈবাস্মিন্নধ্যায়ে যোগবিধানাদ্যোগারোহণযোগ্যত্বে সত্যপি যাবজ্জীবং কর্ম্ম কর্ত্তব্যমিতি মেত্যাহ গৃহস্থস্যেতি। তেনাপি মুমুক্ষুণা কৃতস্য কর্ম্মণো

## শাঙ্করভাষ্যম্।

ন্তাসো মোক্ষায়ৈব ন ফলান্তরায় যোগসহিতঃ যোগাচ্চ বিভ্রষ্ট ইত্যতস্তং প্রতি নাশাশঙ্কা যুক্তৈবেতি চেন্নৈকাকী যতচিত্তাত্মা নিরাশীরপরিগ্রহো ব্রহ্মচারিব্রতে স্থিতইতি কর্ম্মসংন্তা-সবিধানাৎ, ন চাত্র ধ্যানকালে স্ত্রীসহায়ত্বাশঙ্কা যেনৈকাকিত্বং বিধীয়তে ন চ গৃহস্থস্ত নিরাশীরপরিগ্রহ ইত্যাদিবচনমনুকূলং উভয়ভ্রষ্টপ্রশ্নানুপপত্তেশ্চ অনাশ্রিতইত্যনেন কর্ম্মিণ-এব সংন্যাসিত্বং যোগিত্বঞ্চোক্তং প্রতিষিদ্ধঞ্চ নিরগ্নেরক্রিয়স্ত চ সংন্যাসিত্বং যোগিত্ব-ঞ্চেতি চেন্ন ধ্যানযোগং প্রতি বহিরঙ্গস্ত সতঃ কর্ম্মণঃ ফলাকাঙ্ক্ষা সংন্যাসস্তুতিপরত্বান্ন কেবলং নিরগ্নিরবিক্রিয়এব সংন্যাসী যোগী চ কিং তর্হি কর্ম্ম্যপি কর্ম্মফলাসঙ্গং সংন্যস্য কর্ম্মযোগমনুতিষ্ঠন্ সত্বশুদ্ধ্যর্থং সংন্যাসী যোগী চ ভবতীতি স্তূয়তে ন চৈকেন বাক্যেন কর্ম্মফলাসঙ্গসংন্যাসস্তুতিশ্চতুর্থাশ্রমপ্রতিষেধশ্চোপপদ্যতে, ন চ প্রসিদ্ধং নিরগ্নের-ক্রিয়স্ত পরমার্থসংন্যাসিনঃ শ্রুতিস্মৃতিপুরাণেতিহাসযোগশাস্ত্রেষু বিহিতং সংন্যাসিত্বং যোগিত্বঞ্চ প্রতিষেধতি ভগবান্ স্ববচনবিরোধাচ্চ, সর্ব্বকর্ম্মাণি মনসা সংন্যস্য, নৈব কুর্ব্বন্ন

---

## গিরিকৃত টীকা।

মোক্ষাতিরিক্তফলানারম্ভকত্বাদ্‌যোগভ্রষ্টোঽসৌ ছিন্নাভ্রমিব নশ্যতীতি শঙ্কা সাবকাশেত্যা-শঙ্ক্যাহ অবশ্যং হীতি। অপৌরুষেয়ান্নির্দ্দোষাদ্বেদাৎ ফলদায়িনো কর্ম্মণঃ স্বাভাবিকী শক্তি-রবরা ব্রহ্মভাবস্ত চ স্বতঃ সিদ্ধত্বান্ন কর্ম্মফলত্বমতো মোক্ষাতিরিক্তস্যৈব ফলস্য কর্ম্মারম্ভকত্ব-মিতি কর্ম্মিণি যোগভ্রষ্টেঽপি কর্ম্মগতিং গচ্ছতীতি নিরবকাশা শঙ্কেত্যর্থঃ। ননু মুমুক্ষুণা কাম্যপ্রতিষিদ্ধয়োরকরণাৎ কৃতয়োশ্চ নিত্যনৈমিত্তিকয়োরফলত্বাৎ কথং তদীয়স্য কর্ম্ম-ণো নিয়মেন ফলারম্ভকত্বং তত্রাহ নিত্যস্য চেতি। চকারেণ নৈমিত্তিকং কর্ম্মানুকৃষ্যতে। বেদপ্রমাণকত্বেঽপি নিত্যনৈমিত্তিকয়োরফলত্বে দোষমাহ অন্যথেতি। কর্ম্মণোঽনুষ্ঠিতস্য ফলারম্ভকত্বধ্রৌব্যাৎ গৃহস্থো যোগভ্রষ্টোঽপি কর্ম্মগতিং গচ্ছতীতি ন তস্য নাশাশঙ্কেতি শেষঃ। ইতোঽপি গৃহস্থো যোগভ্রষ্টশব্দবাচ্যো ন ভবতীত্যাহ ন চেতি। জ্ঞানং কর্ম্ম চেত্যু-ভয়ং ততো ভ্রষ্টোঽয়ং নশ্যতীতি বচনং গৃহস্থে কর্ম্মিণি সতি নার্থবত্তবিতুমলং তস্য কর্ম্মনিষ্ঠস্য কর্ম্মণো বিভ্রংশে হেত্বভাবাৎ তৎফলস্যাবশ্যকত্বাদিত্যর্থঃ। কৃতস্য কর্ম্মণো মুমুক্ষুণা ভগবতি সমর্পণাৎ কর্ত্তরি ফলানারম্ভকত্বাদস্তি বিভ্রংশকারণমিতি শঙ্কতে কর্ম্মেতি। রাজারাধন-বুদ্ধ্যা ধনধান্যাদিসমর্পণস্যাধিকফলহেতুত্বোপলম্ভাদীশ্বরে সমর্পণং ন ভ্রংশকারণমিতি দূষ-য়তি নেত্যাদিনা। অধিকফলহেতুত্বেঽপি মোক্ষহেতুত্বমিষ্যতামিতি শঙ্কতে মোক্ষায়েতি। তদেব চোদ্যং বিবৃণোতি স্বকর্ম্মণামিতি। সহকারিসামর্থ্যাত্তস্য ফলান্তরং প্রত্যুপায়ত্বাসি-দ্ধিরিতি হেতুং সূচয়তি যোগেতি। ধ্যানসহিতস্য সংন্যাসস্য মোক্ষৌপয়িকত্বে কুতো-যোগভ্রষ্টমধিকৃত্য নাশাশঙ্কেত্যাশঙ্ক্যাহ যোগাচ্চেতি। সহকার্য্যভাবে দীর্ঘস্যাভাবাৎ ফলা-নুপপত্তের্যুক্তা নাশাশঙ্কেত্যর্থঃ। ধ্যানসহিতমীশ্বরে কর্ম্মসমর্পণং মোক্ষায়েত্যত্র প্রমাণা-

## শাঙ্করভাষ্যম্।

কারয়ন্নাস্তে মৌনী সন্তুষ্টো যেন কেনচিদনিকেতনঃ, স্থিরমতির্ব্বিহায় কামান্ যঃ সর্ব্বান্ পুমাংশ্চরতি নিস্পৃহঃ, সর্ব্বারম্ভপরিত্যাগীতি চ তত্র তত্র ভগবতা স্ববচনানি দর্শিতানি, তৈর্ব্বিরুধ্যেত চতুর্থাশ্রমবিপ্রতিষেধস্তস্মাৎ মুনের্যোগমারুরুক্ষোঃ প্রতিপন্নগার্হস্থ্যস্যাগ্নিহোত্রাদি-কর্ম্ম ফলনিরপেক্ষমনুষ্ঠীয়মানং ধ্যানযোগারোহণসাধনত্বং বুদ্ধিশুদ্ধিদ্বারেণ প্রতিপদ্যতইতি স সন্ন্যাসী চ যোগীচেতি স্তূয়তে অনাশ্রিতইতি। অনাশ্রিতো ন আশ্রিতোঽনাশ্রিতঃ কিং কর্ম্মফলং কর্ম্মণঃ ফলং কর্ম্মফলং যস্তদনাশ্রিতঃ কর্ম্মফলতৃষ্ণারহিতইত্যর্থঃ যো হি কর্ম্মফলে তৃষ্ণাবান্ স কর্ম্মফলমাশ্রিতো ভবতি অয়ন্তু তদ্বিপরীতোঽতোঽনাশ্রিতঃ কর্ম্মফলং এবম্ভূতঃ সন্ কার্য্যং কর্ত্তব্যং নিত্যং কাম্যবিপরীতমগ্নিহোত্রাদিকং করোতি নির্ব্বর্ত্তয়তি যঃ কশ্চিৎ, য ঈদৃশঃ কর্ম্মী স কর্ম্ম্যন্তরভ্যো বিশিষ্যত ইত্যেবমর্থমাহ স সংন্যাসী চ যোগী চেতি, সংন্যাসঃ পরিত্যাগঃ স যস্যাস্তি স সংন্যাসী চ যোগী চ যোগশ্চিত্তসমাধানং স যস্যাস্তি স যোগী চেত্যেবং গুণসম্পন্নোঽয়ং মন্তব্যো ন কেবলং নিরগ্নিরক্রিয়এব সংন্যাসী যোগী চেতি

---

## গিরিকৃত টীকা।

ভাবাৎ গৃহস্থো যোগভ্রষ্টশব্দবাচ্যো ন ভবতীতি দূষয়তি নেতি। গৃহস্থস্য যোগভ্রষ্টশব্দ-বাচ্যত্বাভাবে হেত্বন্তরমাহ একাকীতি। ন খল্বেতানি বিশেষণানি গৃহস্থসমবায়িনি সম্ভবন্তি তেন তস্য ধ্যানযোগবিধ্যভাবাৎ ন তং প্রতি যোগভ্রষ্টশব্দবচনমুচিতমিত্যর্থঃ। একাকিত্ববচনং গৃহস্থস্যাপি ধ্যানকালে স্ত্রীসহায়ত্বাভাবাভিপ্রায়েণ ভবিষ্যতীত্যাশঙ্ক্য অগ্নি-হোত্রাদিবদ্ধ্যানস্য পত্নীসাধ্যত্বাভাবাদপ্রাপ্তপ্রতিষেধপ্রসঙ্গান্নৈবমিত্যাহ ন চাত্রেতি। বিশেষণান্তরপর্য্যালোচনয়াপি নায়মেকাকিশব্দো গৃহস্থপরো ভবিতুমর্হতীত্যাহ ন চেতি॥ কিঞ্চ গৃহস্থস্যৈবৈকাকিত্বাদি বিবক্ষিত্বা ধ্যানযোগবিধৌ তং প্রত্যুভয়ভ্রষ্টপ্রশ্নো নোপপদ্য-তইত্যাহ উভয়েতি। ন হি গৃহস্থং প্রতি উভয়স্মাজ্জ্ঞানাৎ কর্ম্মণশ্চ বিভ্রষ্টত্বমুপেত্য প্রষ্টুং যুজ্যতে তস্য জ্ঞানাদ্ভ্রংশেঽপি কর্ম্মণস্তদভাবাদনুষ্ঠীয়মানকর্ম্মভ্রংশেঽপি প্রাগনুষ্ঠিত-কর্ম্মবশাৎ ফলপ্রতিলম্ভাদতো যথোক্তপ্রশ্নালোচনয়া ন গৃহস্থং প্রতি ধ্যানবিধানোপপত্তি-রিত্যর্থঃ। ননু ভগবতা সংন্যাসস্য প্রতিষিদ্ধত্বাদ্ গৃহস্থস্যৈব যোগবিধানাত্তস্যৈব যোগ-ভ্রষ্টশব্দবাচ্যত্বমিতি শঙ্কতে অনাশ্রিত ইত্যনেনেতি। ভগবদ্বাক্যং ন প্রতিষেধপরমিতি পরিহরতি ন ধ্যানেতি। স্তুতিপরত্বমেব স্ফোরয়তি ন কেবলমিতি। সম্বন্ধ্যর্থমনূত্তিষ্ঠন্নিতি সম্বন্ধঃ, বাক্যস্যোভয়পরত্বমাশঙ্ক্য বাক্যভেদপ্রসঙ্গান্নৈবমিত্যাহ ন চেতি। ইতোঽপি ভগবতঃ সংন্যাসাশ্রমপ্রতিষেধোঽভিপ্রেতো ন ভবতীত্যাহ ন চ প্রসিদ্ধমিতি। তত্র প্রসিদ্ধং সংন্যাসিত্বং যোগিত্বঞ্চেতি সম্বন্ধঃ। প্রসিদ্ধত্বমেব ব্যাকরোতি শ্রুতীতি। ইতোঽপি সংন্যা-সাশ্রমং ভগবান্ প্রতিষেধতীত্যাহ স্ববচনেতি। বিরুদ্ধমেব সাধয়তি সর্ব্বকর্ম্মাণীত্যাদিনা। অনাশ্রিত ইত্যাদিবাক্যস্য যথাশ্রুতার্থত্বানুপপত্তেঃ স্তুতিপরত্বমুপপাদিতমুপসংহরতি তস্মা-

## শাঙ্করভাষ্যম্।

মন্তব্যঃ নির্গতা অগ্নয়ঃ কর্ম্মাঙ্গভূতা যস্মাৎ স নিরগ্নিরক্রিয়শ্চ অনগ্নিসাধনা অপ্যবিদ্যমানাঃ ক্রিয়াস্তপোদানাদিকা যস্যাসাবক্রিয়ঃ, ননু চ নিরগ্নেরক্রিয়স্যৈব শ্রুতিস্মৃতিযোগশাস্ত্রেষু সংন্যাসিত্বং যোগিত্বঞ্চ প্রসিদ্ধং কথমিহ সাগ্নেঃ সক্রিয়স্য সংন্যাসিত্বং যোগিত্বঞ্চাপ্রসিদ্ধমুচ্যতে ইতি, নৈষ দোষঃ, কয়াচিদ্গুণবৃত্ত্যোভয়স্য সম্পিপাদয়িষিতত্বাত্তৎ কথং ? কর্ম্মফলসংকল্পসংন্যাসাৎ সংন্যাসিত্বং যোগাঙ্গত্বেন চ কর্ম্মানুষ্ঠানাৎ কর্ম্মফলসংকল্পস্য বা চিত্তবিক্ষেপহেতোঃ পরিত্যাগাদ্যোগিত্বঞ্চেতি ॥ ১ ॥

গৌণমুভয়ং ন পুনর্মুখ্যসংন্যাসিত্বং যোগিত্বঞ্চাভিমতমিত্যেতমর্থং দর্শয়িতুমাহ যং সংন্যাসমিতি। যং সর্ব্বকর্ম্মতৎফলপরিত্যাগলক্ষণং পরমার্থসংন্যাসং সংন্যাসমিতি প্রাহুঃ শ্রুতিস্মৃতিবিদো যোগং কর্ম্মানুষ্ঠানলক্ষণং তং পরমার্থসংন্যাসং বিদ্ধি জানীহি হে পাণ্ডব।

## গিরিকৃত টীকা।

দিতি। কর্ম্মফলসংন্যাসিত্বমত্র মুনিশব্দার্থঃ। স্তুতিপরং বাক্যমক্ষরযোজনার্থমুদাহরতি অনাশ্রিতইতি। কর্ম্মফলেভিলাষোঽনাস্তীত্যেতাবতা কথং তদনাশ্রিতত্ববাচো যুক্তিরিত্যাশঙ্ক্য ব্যতিরেকমুখেন বিশদয়তি যো হীতি। কার্য্যমিত্যাদি ব্যাকরোতি এবম্ভূতঃ সন্নিতি। কথং কর্ম্মিণঃ সংন্যাসিত্বং যোগিত্বঞ্চ কর্ম্মিত্ববিরোধাদিত্যাশঙ্ক্যাহ স ঈদৃশইতি। স্তুতেরত্র বিবক্ষিতত্বান্নানুপপত্তিশ্চোদনীয়েতি মন্বানঃ সন্নাহ ইত্যেবমিতি। ন নিরগ্নিরিত্যাদেরর্থমাহ ন কেবলমিতি। অগ্নয়ো গার্হপত্যাহবনীয়ান্বাহার্য্যপচনপ্রভৃতয়ঃ। নম্বনগ্নিত্বে সিদ্ধমক্রিয়ত্বমগ্নিসাধ্যত্বাৎক্রিয়াণাং তথা চ ন নিরগ্নিরিত্যেতাবতৈবাপেক্ষিতসিদ্ধের্নচাক্রিয় ইত্যনর্থকমর্থপুনরুক্তেরিতি তত্রাহ অনগ্নীতি। উত্তরশ্লোকস্য তাৎপর্য্যং দর্শয়িতুং ব্যাবর্ত্ত্যামাশঙ্কাং দর্শয়তি ননু চেতি। প্রসিদ্ধং পরিত্যজ্যাপ্রসিদ্ধিরুপাদীয়মানা প্রসিদ্ধিবিরুদ্ধেতি চোদ্যং দূষয়তি নৈষ দোষইতি। উভয়স্য সাগ্নৌ সক্রিয়ে চ সংন্যাসিত্বস্য যোগিত্বস্য চেত্যর্থঃ। গুণবৃত্ত্যোভয়সম্পাদনং প্রশ্নপূর্ব্বকং প্রকটয়তি তৎ কথমিত্যাদিনা ॥ ১ ॥

সম্ভবতি মুখ্যে সংন্যাসিত্বাদৌ কিমিতি গৌণমভয়মভীষ্টমিত্যাশঙ্ক্য মুখ্যস্য কর্ম্মণ্যসম্ভ-

## স্বামিকৃত টীকা।

চিত্তে শুদ্ধেঽপি ন ধ্যানং বিনা সংন্যাসমাত্রতঃ। মুক্তিঃ স্যাদিতি ষষ্ঠেঽস্মিন্ ধ্যানযোগো বিস্তৃণ্যতে। পূর্ব্বাধ্যায়ান্তে সংক্ষেপেণোক্তং যোগং প্রপঞ্চয়িতুং ষষ্ঠাধ্যায়ারম্ভস্তত্র তাবৎ সর্ব্বকর্ম্মাণি মনসা সংন্যস্যেত্যারভ্য সংন্যাসপূর্ব্বিকায়া জ্ঞাননিষ্ঠায়াস্তাৎপর্য্যেণাভিধানাদ্দুঃখরূপাচ্চ কর্ম্মণঃ মনসা সংন্যাসাতিপ্রসঙ্গং প্রাপ্তং বারয়িতুং সংন্যাসাদপি শ্রেষ্ঠত্বেন কর্ম্মযোগং স্তৌতি অনাশ্রিত ইতি দ্বাভ্যাং। কর্ম্মফলমনাশ্রিতোঽনপেক্ষমাণঃ সন্ নব্যং কার্য্যতয়া বিহিতং কর্ম্ম যঃ করোতি সএব সংন্যাসী যোগী চ, ন তু নিরগ্নিরগ্নিসাধ্যেষ্ট্যাখ্যকর্ম্মত্যাগী, ন চাক্রিয়োঽনগ্নিসাধ্যপূর্ত্তাখ্যকর্ম্মত্যাগী চ ॥ ১ ॥

যং সন্ন্যাসমিতি প্রাহুর্যোগং তং বিদ্ধি পাণ্ডব।
ন হ্যসন্ন্যস্তসংকল্পো যোগী ভবতি কশ্চন ॥২॥

## শাঙ্করভাষ্যম্

কর্ম্মযোগস্য প্রবৃত্তিলক্ষণস্য তদ্বিপরীতেন নিবৃত্তিলক্ষণেন পরমার্থসংন্যাসেন কীদৃশং সামান্যমঙ্গীকৃত্য তদ্ভাব উচ্যত ইত্যপেক্ষায়ামিদমুচ্যতে, অস্তি পরমার্থসংন্যাসেন সাদৃশ্যং কর্ত্তৃদ্বারকং কর্ম্মযোগস্য, যো হি পরমার্থসংন্যাসী স ত্যক্তসর্ব্বকর্ম্মসাধনতয়া সর্ব্বকর্ম্মতৎ-ফলবিষয়ং সঙ্কল্পং প্রবৃত্তিহেতুকামকারণং সংন্যস্যতি. অয়মপি কর্ম্মযোগী কর্ম্মকুর্ব্বাণএব ফলবিষয়ং সঙ্কল্পং সংন্যস্যতীত্যেতমর্থং দর্শয়ন্নাহ ন হি যস্মাদসংন্যস্তসঙ্কল্পোঽসংন্যস্তোঽপ-রিত্যক্তঃ ফলবিষয়সংকল্পোঽভিসন্ধির্যেন সোঽসংন্যস্তসংকল্পঃ কশ্চন কশ্চিদপি কর্ম্মী যোগী সমাধানবান্ ভবতি ন সম্ভবতীত্যর্থঃ ফলসংকল্পস্য চিত্তবিক্ষেপহেতুত্বাত্তস্মাদ্যঃ কশ্চন যোগী কর্ম্মী সংন্যস্তফলসংকল্পো ভবেৎ স যোগী সমাধানবান্ ভবতি ন বিক্ষিপ্তচিত্তো ভবতি চিত্তবিক্ষেপহেতোঃ ফলসংকল্পস্য সংন্যস্তত্বাৎ ইত্যভিপ্রায়ঃ যোগাঙ্গত্বেন কর্ম্মানুষ্ঠানাৎ কর্ম্মফলসঙ্কল্পস্য বা চিত্তবিক্ষেপহেতোঃ পরিত্যাগাদযোগিত্বঞ্চেতি সংন্যাসিত্বঞ্চেত্যভি-প্রেতমুচ্যতে, এবং পরমার্থসংন্যাসকর্ম্মযোগয়োঃ কর্ত্তৃদ্বারকং সংন্যাসসামান্যমপেক্ষ্য যং সন্ন্যাসমিতি প্রাহুর্যোগং তং বিদ্ধি পাণ্ডবেতি কর্ম্মযোগস্য স্তুত্যর্থং সংন্যাসত্বমুক্তং ॥ ২ ॥

## গিরিকৃত টীকা।

বাক্যোত্থমেব স্তুতিসিদ্ধ্যর্থং তদিষ্টমিত্যভিপ্রেত্যাহ ন পুনরিতি। চিত্তব্যাকুলত্বহেতুকা মনাত্যাগাচ্চিত্তসমাধানসিদ্ধের্যোগিত্বং কর্ম্মিণোঽপি যুক্তং সংন্যাসিত্বং তু তস্য বিরুদ্ধমিতি শঙ্কমানং প্রত্যুক্তেঽর্থে শ্লোকমবতারয়তি ইত্যেতমিতি। পরমার্থসংন্যাসং প্রাহুরিতি সম্বন্ধঃ ইতীত্থং সংন্যাসস্য প্রামাণিকাভ্যুপগতত্বাদিতীতি শব্দো যোজ্য। যোগং ফলতৃষ্ণাং পরি-ত্যজ্য সমাহিতচেতস্তয়েতি শেষঃ। যদুক্তং সন্ন্যাসিত্বং যোগিত্বঞ্চ গৃহস্থস্য গৌণমিতি তদুত্তরার্দ্ধযোজনয়া প্রকটয়িমুত্তরার্দ্ধমুত্থাপয়তি কর্ম্মযোগস্যেতি। কর্ম্মযোগস্য পরমার্থং সংন্যাসেন কর্ত্তৃদ্বারকং সাম্যমুক্তং ব্যক্তং করোতি যো হীতি। ত্যক্তানি সর্ব্বাণি সাধ-নানি চ যেন স তথোক্তস্তস্য ভাবস্তত্তা তয়া সর্ব্বকর্ম্মবিষয়ং তৎফলবিষয়ঞ্চ সংকল্পং ত্যজ-তীত্যর্থঃ। সংকল্পত্যাগে তৎকার্য্যকামত্যাগঃ তত্ত্যাগে তজ্জন্যপ্রবৃত্তিত্যাগশ্চ সিধ্যতী-

## স্বামিকৃত টীকা।

কুত ইত্যপেক্ষায়াং কর্ম্মযোগস্যৈব সংন্যাসত্বং প্রতিপাদয়ন্নাহ যমিতি। যং সংন্যাসং প্রাহুঃ প্রকর্ষেণ শ্রেষ্ঠত্বেনাহুঃ সংন্যাস এবাত্যরেচয়দিত্যাদিশ্রুতয় ইতি, কেবলাৎ ফলসং-ন্যাসাদ্বেতোর্যোগমেব তং জানীহি, কুতইত্যপেক্ষায়ামিতিপদোক্তো হেতুর্যোগেঽপ্যস্তীত্যাহ ন হীতি, ন সংন্যস্তঃ ফলসংকল্পো যেন স কর্ম্মনিষ্ঠো জ্ঞাননিষ্ঠো বা কশ্চিদপি যোগী ন হি ভবতি অতঃ ফলসঙ্কল্পত্যাগাদেব চিত্তবিক্ষেপাভাবাৎ যোগী চ ভবত্যেব স ইত্যর্থঃ ॥ ২ ॥

আরুরুক্ষোর্ম্মুনের্যোগং কর্ম্ম কারণমুচ্যতে।
যোগারূঢ়স্য তস্যৈব শমঃ কারণমুচ্যতে ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

ধ্যানযোগস্য ফলনিরপেক্ষঃ কর্ম্মযোগো বহিরঙ্গসাধনমিতি তং সংন্যাসত্বেন স্তুত্বাধুনা কর্ম্মযোগস্য ধ্যানযোগসাধনত্বং দর্শয়তি আরুরুক্ষোরিতি। আরুরুক্ষোরারোঢ়ুমিচ্ছত- অনারূঢ়স্য ধ্যানযোগেঽবস্থাতুমশক্তস্যৈবেত্যর্থঃ কস্য তস্যারুরুক্ষোর্ম্মুনেঃ কর্ম্মফলসংন্যা- সিন ইত্যর্থঃ, কিমারুরুক্ষোর্যোগং, কর্ম্ম কারণং সাধনমুচ্যতে, যোগারূঢ়স্য পুনস্তস্যৈব শম- উপশমঃ সর্ব্বকর্ম্মভ্যো নিবৃত্তিঃ কারণং যোগারূঢ়ত্বস্য সাধনমুচ্যত ইত্যর্থঃ, যাবদ্যাবৎ কর্ম্মভ্য উপরমতে তাবত্তাবন্নিরায়াসস্য জিতেন্দ্রিয়স্য চিত্তং সমাধীয়তে তথা সতি স ঝটিতি যোগারূঢ়ো ভবতি, তথা চোক্তং ব্যাসেন, নৈতাদৃশং ব্রাহ্মণস্যাস্তি বিত্তং যথৈকতা সমতা সত্যতা চ। শীলং স্থিতির্দণ্ডনিধানমার্জ্জবং ততস্ততশ্চোপরমঃ ক্রিয়াভ্য ইতি ॥ ৩ ॥

## গিরিকৃত টীকা।

ত্যভিসন্ধায় বিশিনষ্টি প্রবৃত্তীতি। কর্ম্মিণ্যপি যথোক্তসংকল্পসংন্যাসিত্বমস্তীত্যাহ অন্নম- পীতি। তদপরিত্যাগে ব্যাকুলচেতস্তয়া কর্ম্মানুষ্ঠানস্যৈব দুঃশকত্বাদিত্যর্থঃ। উক্তমেব সাম্যং ব্যক্তীকুর্ব্বন্ ব্যতিরেকং দর্শয়তি ইত্যেতমিতি। ফলসংকল্পাপরিত্যাগে কিমিতি সমাধানবত্তাভাবস্তত্রাহ ফলেতি। ব্যতিরেকমুখেনোক্তমর্থমন্বয়মুখেনোপসংহরতি তস্মা- দিতি। হি শব্দার্থস্য যস্মাদিত্যুক্তস্য তস্মাদিত্যনেন সম্বন্ধঃ। কর্ম্মিণং প্রতি যথোক্ত- বিধৌ হেতুহেতুমদ্ভাবমতিপ্রেত্য দ্বিতীয়বিধৌ হেতুমাহ চিত্তবিক্ষেপেতি। পূর্ব্বশ্লোকে পূর্ব্বোত্তরার্দ্ধাভ্যামুক্তমনুবদতি এবমিতি ॥ ২ ॥

পরমার্থসংন্যাসস্য কর্ম্মযোগান্তর্ভাবে কর্ম্মযোগস্যৈব সদা কর্ত্তব্যত্বমাপদ্যেত তেনেতর- স্যাপি কৃতত্বসিদ্ধেরিত্যাশঙ্ক্যোক্তানুবাদপূর্ব্বকমুত্তরশ্লোকতাৎপর্য্যমাহ ধ্যানযোগস্যেতি। ভাবিন্যা বৃত্ত্যা মুনের্যোগমারোঢ়ুমিচ্ছোরিষ্যমাণস্য যোগারোহণস্য কর্ম্ম হেতুশ্চেদপেক্ষিতং যোগমারূঢ়স্যাপি তৎফলপ্রাপ্তৌ তদেব কারণং ভবিষ্যতি তস্য কারণত্বে কৢপ্তশক্তি- ত্বাদিত্যাশঙ্ক্যাহ যোগারূঢ়স্যেত্যেতস্যৈবার্থং স্ফুটয়তি ধ্যানেতি। মুনিত্বং কর্ম্মফলসংন্যা- সিত্বৌপচারিকমিত্যাহ কর্ম্মফলেতি। সাধনং চিত্তশুদ্ধিদ্বারা ধ্যানযোগপ্রাপ্তীচ্ছায়ামিতি

## স্বামিকৃত টীকা।

তর্হি যাবজ্জীবং কর্ম্মযোগএব প্রাপ্ত ইত্যাশঙ্ক্য তস্যাবধিমাহ আরুরুক্ষোরিতি। জ্ঞান- যোগমারোঢ়ুং প্রাপ্তুমিচ্ছোঃ পুংসস্তদারোহে কারণং কর্ম্মোচ্যতে চিত্তশুদ্ধিকরত্বাৎ জ্ঞান- যোগমারূঢ়স্য তু তস্যৈব জ্ঞাননিষ্ঠস্য শমো বিক্ষেপককর্ম্মোপরমো জ্ঞানপরিপাকে কারণ- মুচ্যতে ॥ ৩ ॥

যদা হি নেন্দ্রিয়ার্থেষু ন কর্ম্মস্বনুষজ্জতে।
সর্ব্বসঙ্কল্পসংন্যাসী যোগারূঢ়স্তদোচ্যতে॥ ৪॥

## শাঙ্করভাষ্যম্।

অথেদানীং কদা যোগারূঢ়ো ভবতীত্যুচ্যতে যদেতি। যদা সমাধীয়মানচিত্তো ভবতি যোগী হীন্দ্রিয়ার্থেষু ইন্দ্রিয়াণামর্থাঃ শব্দাদয়স্তেষ্বিন্দ্রিয়ার্থেষু কর্ম্মসু চ নিত্যনৈমিত্তিক-কাম্যপ্রতিষিদ্ধেষু প্রয়োজনাভাববুদ্ধ্যা নানুষজ্জতে অনুষঙ্গং কর্ত্তব্যতাবুদ্ধিং ন করোতীত্যর্থঃ, সর্ব্বসঙ্কল্পসংন্যাসী সর্ব্বান্ সঙ্কল্পানিহামুত্রার্থকামহেতূন্ সংন্যসিতুং শীলং অস্যেতি স সর্ব্বসঙ্কল্পসংন্যাসী যোগারূঢ়ঃ প্রাপ্তযোগ ইত্যেতত্তদা তস্মিন্ কালে যোগারূঢ় উচ্যতে

## গিরিকৃত টীকা।

শেষঃ। তস্যেতি প্রকৃতস্য কর্ম্মিণো গ্রহণং,এবকারো ভিন্নক্রমঃ শমশব্দেন সম্বধ্যতে। কস্যা-ন্যযোগব্যবচ্ছেদেন শমো হেতুরিতি তত্রাহ যোগারূঢ়স্যেতি। সর্ব্বব্যাপারোপরমরূপো-পশমস্য যোগারূঢ়ত্বে কারণত্বং বিবৃণোতি যাবদ্যাবদিতি। সর্ব্বকর্ম্মনিবৃত্তাবায়াসাভাবা-দ্বশীকৃতেন্দ্রিয়গ্রামস্য চিত্তসমাধানে যোগারূঢ়ত্বং সিধ্যতীত্যর্থঃ। সর্ব্বকর্ম্মোপরমস্য পুরুষার্থসাধনত্বে পৌরাণিকীং সম্মতিমাহ তথা চেতি। একতা সর্ব্বেষু ভূতেষু বস্তুনো দ্বৈতাভাবোপলক্ষিতত্বমিতি প্রতিপত্তিঃ, সমতা তেষ্বৌপাধিকবিশেষেঽপি স্বতো নির্ব্বি-শেষত্বধীঃ, সত্যতা তেষামেব হিতবচনং, শীলং স্বভাবসম্পত্তিঃ, স্থিতিঃ স্থৈর্য্যং, দণ্ডনিধান-মহিংসনং আর্জ্জবমবক্রত্বং, ক্রিয়াভ্যঃ সর্ব্বাভ্যঃ সকাশাদুপরতিশ্চেত্যেতদুক্তং সর্ব্বং যথা যাদৃশমেতাদৃশং নাস্তব্রাহ্মণস্য বিত্তং পুমর্থসাধনমস্তি তস্মাদেতদেবাস্য নিরতিশয়ং পুরু-ষার্থসাধনমিত্যর্থঃ॥ ৩॥

যোগপ্রাপ্তৌ কারণকথনানন্তরং তৎপ্রাপ্তিকালং দর্শয়িতুং শ্লোকান্তরমবতারয়তি অথেতি। সমাধানাবস্থা যদেত্যুচ্যতে, অতএবোক্তং সমাধীয়মানচিত্তো যোগীতি, শব্দাদিষু কর্ম্মসু চানুষঙ্গস্য যোগারোহণপ্রতিবন্ধকত্বাত্তদভাবস্য তদুপায়ত্বং প্রসিদ্ধমিতি দ্যোতয়িতুং হীত্যুক্তং। সর্ব্বেষামপি সংকল্পানাং যোগারোহণপ্রতিবন্ধকত্বমভিপ্রেত্য সর্ব্বসংকল্প-সংন্যাসেঽপি সর্ব্বেষাং কামানাং কর্ম্মণাঞ্চ প্রতিবন্ধকত্বসম্ভবে কুতো যোগপ্রাপ্তিরিত্যাশঙ্ক্যাহ সর্ব্বেতি। সর্ব্বসংকল্পপরিত্যাগে যথোক্তবিধ্যনুষ্ঠানমযত্নসিদ্ধমিতি মত্বানঃ সন্নাহ সং-

## স্বামিকৃত টীকা।

কীদৃশোঽয়ং যোগারূঢ়ো যস্য শমঃ কারণমুচ্যত ইত্যত্রাহ যদেতি। ইন্দ্রিয়ার্থেষ্বিন্দ্রিয়-ভোগ্যেষু তৎসাধনেষু চ কর্ম্মসু যদা নানুষজ্জতে আসক্তিং ন করোতি, তত্র হেতুঃ আস-ক্তিমূলভূতান্ সর্ব্বান্ ভোগবিষয়ান্ কর্ম্মবিষয়াংশ্চ সঙ্কল্পান্ সংন্যসিতুং শীলং যস্য স তদা যোগারূঢ় উচ্যতে॥ ৪॥

উদ্ধরেদাত্মনাত্মানং নাত্মানমবসাদয়েৎ।
আত্মৈব হ্যাত্মনো বন্ধুরাত্মৈব রিপুরাত্মনঃ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

সর্ব্বসঙ্কল্পসংন্যাসীতি বচনাৎ সর্ব্বাংশ্চ কামান্ কামাত্মকান্ সর্ব্বাণিচ কর্ম্মাণি সংন্যসেদিত্যর্থঃ সঙ্কল্পমূলা হি সর্ব্বে কামাঃ, সঙ্কল্পমূলঃ কামো বৈ যজ্ঞাঃ সঙ্কল্পসম্ভবাঃ। কাম জানামি তে মূলং সংকল্পাত্বংহি জায়সে। ন ত্বাং সঙ্কল্পয়িষ্যামি তেন মে ন ভবিষ্যসি। ইত্যাদিস্মৃতেঃ সর্ব্বকামপরিত্যাগে চ সর্ব্বকর্ম্মসংন্যাসঃ সিদ্ধো ভবতি স যথাকামো ভবতি তৎক্রতুর্ভবতি যৎক্রতুর্ভবতি তৎ কর্ম্ম কুরুতে ইত্যাদিশ্রুতিভ্যো,যদ্যদ্ধি কুরুতে কর্ম্ম তত্তৎ কামস্য চেষ্টিতমিত্যাদিস্মৃতিভ্যশ্চ ন্যায়াচ্চ ন হি সর্ব্বসঙ্কল্পসংন্যাসে কশ্চিৎ স্পন্দিতুমপি শক্তস্তস্মাৎ সর্ব্বসংকল্পসংন্যাসীতি বচনাৎ সর্ব্বান্ কামান্ সর্ব্বাণি কর্ম্মাণি চ ত্যাজয়তি ভগবান্ ॥ ৪ ॥

যদৈবং যোগারূঢ়স্তদা তেনাত্মনোদ্ধৃতো ভবতি সংসারাদনর্থব্রাতাদতঃ উদ্ধরেদিতি। উদ্ধরেৎ সংসারসাগরে নিমগ্নমাত্মনাত্মানং তত উৎ ঊর্দ্ধং হরেৎ উদ্ধরেৎ যোগারূঢ়তামা-

## গিরিকৃত টীকা।

কল্পেতি। মূলোন্মূলনে চ তৎকার্য্যনিবৃত্তিরযত্নসুলভেতি ভাবঃ। তত্র প্রমাণমাহ সংকল্পমূলইতি। তত্রান্বয়ব্যতিরেকাবভিপ্রেত্যোক্তমুপপাদয়তি কামেতি। সর্ব্বসংকল্পাভাবে কামাভাববৎ কর্ম্মাভাবস্য সিদ্ধত্বেঽপি কর্ম্মণাং কামকার্য্যত্বাত্তন্নিবৃত্তিপ্রযুক্তাতন্নিবৃত্তিমুপন্যসতি সর্ব্বকামেতি। যদুক্তং কর্ম্মণাং কামকার্য্যত্বং তত্র শ্রুতিস্মৃতী প্রমাণয়তি স যথেতি। স পুরুষঃ স্বরূপমজানন্ যৎফলকামো ভবতি তৎসাধনমনুষ্ঠেয়ত্বয়া গৃহ্লাতি তদেব কর্ম্ম বহিরপি করোতীতি কামাধীনং কর্ম্মোক্তমিতি শ্রুত্যর্থঃ। কামজন্যং কর্ম্মেত্যন্বয়ব্যতিরেকসিদ্ধমিতি দ্যোতয়িতুং স্মৃতৌ হি শব্দঃ। ন্যায়মেব দর্শয়তি ন হি সর্ব্বসংকল্পেতি, স্বাপাদাবদর্শনাদিত্যর্থঃ। নিত্যনৈমিত্তিককর্ম্মানুষ্ঠানং দূরনিরস্তমিতি বক্তুমপিশব্দঃ। শ্রুতিস্মৃতিন্যায়সিদ্ধমর্থমুপসংহরতি তস্মাদিতি। ৪।

যোগারূঢ়স্য কিং স্যাদিত্যাশঙ্ক্যাহ যদৈবমিতি। যোগারোহস্য দৃষ্টাদৃষ্টোপায়ৈরবশ্যকর্ত্তব্যতায়ৈ মুক্তিহেতুত্বং তদ্বিপর্য্যয়স্যাধঃপতনহেতুত্বঞ্চ দর্শয়তি অতইতি। অত্র হেতুমাহ আত্মৈব হীতি। উদ্ধরণাপেক্ষামাত্মনঃ সূচয়তি সংসারেতি। সংসারাদূর্দ্ধং হরণং কীদৃগিত্যাশঙ্ক্যাহ যোগারূঢ়তামিতি। যোগপ্রাপ্ত্যাবনাস্থা তু ন কর্ত্তব্যেত্যাহ নাত্মানমিতি।

## স্বামিকৃত টীকা।

অতো বিষয়াসক্তিত্যাগে মোক্ষং তদাসক্তৌ চ বন্ধং পর্য্যালোচ্য রাগাদিস্বভাবং ত্যজেদিত্যাহ উদ্ধরেদিতি। আত্মনা বিবেকযুক্তেনাত্মানং সংসারাদুদ্ধরেৎ ন তু অবসাদয়েদধোনয়েৎ, হি যত আত্মৈব মনঃসংজ্ঞাহ্যাপরত আত্মনঃ স্বস্য বন্ধুরূপকারকঃ রিপুরপকারকঃ ॥ ৫ ॥

**বন্ধুরাত্মাত্মনস্তস্য যেনৈবাত্মাত্মনা জিতঃ।**
**অনাত্মনস্তু শত্রুত্বে বর্ত্তেতাত্মৈব শত্রুবৎ॥ ৬॥**

## শাঙ্করভাষ্যম্।

পাদ্যয়েদিত্যর্থঃ, নাত্মানমবসাদয়েন্নাধোনয়েৎ নাধোগময়েৎ আত্মৈব হি যস্মাদাত্মনো বন্ধুর্নহ্যন্যঃ কশ্চিদ্বন্ধুর্যঃ সংসারমুক্তয়ে ভবতি, বন্ধুরপি তাবন্মোক্ষং প্রতি প্রতিকূলএব স্নেহাদিবন্ধনায়তনত্বাত্তস্মাত্যুক্তমবধারণমাত্মৈব হ্যাত্মনো বন্ধুরিতি আত্মৈব রিপুঃ শত্রুর্যোঽন্যোঽপকারী বাহ্যঃ শত্রুঃ সোঽপ্যাত্মপ্রযুক্তএবেতি যুক্তমেবাবধারণমাত্মৈব রিপুরাত্মন ইতি॥ ৫॥

আত্মৈব আত্মনো বন্ধুরাত্মৈব রিপুরাত্মন ইত্যুক্তং তত্র কিংলক্ষণ আত্মা আত্মনো বন্ধুঃ কিংলক্ষণো বা আত্মাত্মনো রিপুরিত্যুচ্যতে বন্ধুরিতি। বন্ধুরাত্মাত্মনস্তস্য তস্যাত্মনঃ স

## গিরিকৃত টীকা।

যোগপ্রাপ্ত্যুপায়শ্চেন্নানুষ্ঠীয়তে তদা যোগাভাবে সংসারপরিহারাসম্ভবাদাত্মাধোনীতঃ স্যাদিত্যর্থঃ। নন্বাত্মানং সংসারে নিমগ্নং তদা যো বন্ধুস্তস্মাদুদ্ধরিষ্যতি নেত্যাহ আত্মৈব হীতি, কুতোঽবধারণমন্যস্যাপি প্রসিদ্ধস্য বন্ধোঃ সম্ভবাত্তত্রাহ ন হীতি। অন্যো বন্ধুঃ সন্নপি সংসারমুক্তয়ে ন ভবতীত্যেতদুপপাদয়তি বন্ধুরপীতি। স্নেহাদীত্যাদিশব্দাত্তদনুগুণপ্রবৃত্তিবিষয়ত্বং গৃহ্যতে। আত্মাতিরিক্তস্যাপি শত্রোরপকারিণঃ সুপ্রসিদ্ধত্বাদবধারণমনুচিতমিত্যাশঙ্ক্যাহ যোঽন্য ইতি॥ ৫॥

উক্তমনূদ্য প্রশ্নপূর্ব্বকং শ্লোকান্তরমবতারয়তি আত্মৈবেত্যাদিনা। একস্যৈবাত্মনো মিথো বিরুদ্ধং বন্ধুত্বং রিপুত্বঞ্চ লক্ষণভেদমন্তরেণাযুক্তমিতি চোদিতে বশীকৃতসংঘাতস্যাত্মানং প্রতিবন্ধুত্বমিতরস্য শত্রুত্বমিত্যবিরোধং দর্শয়তি বন্ধুরিত্যাদিনা। বশীকৃতসংঘাতস্য বিক্ষেপাভাবাদাত্মনি সমাধানসম্ভবাদুপপন্নমাত্মানং প্রতি বন্ধুত্বমিতি সাধয়তি তস্যেতি। অবশীকৃতসংঘাতস্য পুনর্ব্বিক্ষেপোপপত্তেরাত্মনি সমাধানাযোগাদাত্মানং প্রতি শত্রুভাবে প্রসিদ্ধশত্রুবৎ আত্মৈব শত্রুত্বেন বর্ত্তেতেত্যুত্তরার্দ্ধং ব্যাকরোতি অনাত্মনইতি। দৃষ্টান্তং ব্যাচষ্টে যথেতি। উক্তদৃষ্টান্তবশাদবশীকৃতসংঘাতঃ স্বস্য হিতানাচরণাদাত্মানং প্রতি শত্রুরেবেতি দার্ষ্টান্তিকমাহ তথেতি॥ ৬॥

## স্বামিকৃত টীকা।

কথম্ভূতস্যাত্মৈব বন্ধুঃ কথং ভূতস্য চাত্মৈবরিপুরিত্যপেক্ষায়ামাহ বন্ধুরিতি। যেনাত্মনৈবাত্মা কার্য্যকরণসংঘাতরূপো জিতো বশীকৃতস্তস্য তথাভূতস্যাত্মন আত্মৈব বন্ধুঃ, অনাত্মনোঽজিতাত্মনস্তু আত্মৈবাত্মনঃ শত্রুত্বে শত্রুবদপকারিত্বে বর্ত্তেত॥ ৬॥

জিতাত্মনঃ প্রশান্তস্য পরমাত্মা সমাহিতঃ।
শীতোষ্ণসুখদুঃখেষু তথা মানাবমানয়োঃ ॥ ৭ ॥

## শাঙ্করভাষ্যম্।

আত্মা বন্ধুর্যেনাত্মনাত্মৈব জিতঃ আত্মা কার্য্যকারণসংঘাতো যেন জিতো বশীকৃতো জিতেন্দ্রিয় ইত্যর্থঃ, অনাত্মনস্তু অজিতাত্মনস্তু শত্রুত্বে শত্রুভাবে বর্ত্তেত আত্মৈব শত্রুবদ্-যথানাত্মা শত্রুরাত্মনোঽপকারী তথাত্মাত্মনোঽপকারে বর্ত্তেত ইত্যর্থঃ॥ ৬॥

জিতাত্মনইতি। জিতাত্মনঃ কার্য্যকরণাদিসংঘাত আত্মা জিতো যেন স জিতাত্মা তস্য জিতাত্মনঃ প্রশান্তস্য পরমাত্মা সমাপিতঃ সাক্ষাদাত্মভাবেন বর্ত্তত ইত্যর্থঃ, কিঞ্চ শীতো-ষ্ণসুখদুঃখেষু তথা মানেঽবমানে চ মানাবমানয়োঃ পূজাপরিভবয়োঃ সমঃ স্যাৎ ইত্যধ্যাহারঃ॥ ৭॥

জ্ঞানেতি। জ্ঞানবিজ্ঞানতৃপ্তাত্মা জ্ঞানং শাস্ত্রোক্তপদার্থানাং পরিজ্ঞানং বিজ্ঞানন্তু শাস্ত্র-তো জ্ঞাতানাং তথৈব স্বানুভবকরণং তাভ্যাং জ্ঞানবিজ্ঞানাভ্যাং তৃপ্তঃ সঞ্জাতালংপ্রত্যয় আত্মান্তঃকরণং যস্য স জ্ঞানবিজ্ঞানতৃপ্তাত্মা কূটস্থোঽপ্রকম্পো ভবতি ইত্যর্থঃ, বিজিতেন্দ্রি-

## গিরিকৃত টীকা।

কথং সংযতকার্য্যকরণস্য বন্ধুবাত্মেতি তত্রাহ জিতাত্মন ইতি। জিতকার্য্যকবণসং-ঘাতস্য প্রকর্ষেণোপরতবাহ্যাভ্যন্তরকরণস্য পরমাত্মা বিক্ষেপেণ পুনঃ পুনরনভিভূয়মানো নিরন্তরং চিত্তে প্রথতইত্যর্থঃ। জিতাত্মানং সংন্যস্তসমস্তকর্ম্মাণমধিকারিণং প্রদর্শ্য যোগাঙ্গানি দর্শয়তি শীতেতি। সমঃ স্যাদিত্যধ্যাহারঃ। পূর্ব্বার্দ্ধং ব্যাচষ্টে জিতেত্যা-দিনা। ন কেবলং তস্য পরমাত্মা সাক্ষাদাত্মভাবেন বর্ত্ততে কিন্তু শীতোষ্ণাদিভিবপি নাসৌ চাল্যতে তত্ত্বজ্ঞানাদিত্যুত্তরার্দ্ধং বিভজতে কিঞ্চেতি। তেষু সমঃ স্যাদিতি সম্বন্ধঃ॥৭॥

চিত্তসমাধানমেব বিশিষ্টফলশ্চোদিষ্টং তর্হি কথম্ভূতঃ সমাহিতো ব্যবহ্রিয়তে তত্রাহ জ্ঞানেতি। পরোক্ষাপরোক্ষাভ্যাং জ্ঞানবিজ্ঞানাভ্যাং সংজাতোঽলংপ্রত্যয়োঽক্রিয়ো হর্ষ-বিষাদকামক্রোধাদিরহিতো যোগী যুক্তঃ সমাহিত ইতি ব্যাবহারভাগী ভবতীতি পাদত্রয়-

## স্বামিকৃত টীকা।

জিতাত্মনঃ স্বস্মিন্ বন্ধুত্বং স্পষ্টয়তি জিতাত্মন ইতি। জিত আত্মা যেন তস্য প্রশান্তস্য রাগাদিরহিতস্যৈব পরং কেবলমাত্মা শীতোষ্ণাদিষু সৎস্বপি সমাহিত আত্মনিষ্ঠো ভবতি যদ্বা তস্য হৃদি পরমাত্মা সমাহিতঃ স্থিতো ভবতি। ৭।

যোগারূঢ়স্য লক্ষণং শ্রৈষ্ঠ্যং চোক্তমুপসংহরতি জ্ঞানেতি। জ্ঞানমৌপদেশিকং বিজ্ঞান-মপরোক্ষানুভবস্তাভ্যাং তৃপ্তো নিরাকাঙ্ক্ষ আত্মা চিত্তং যস্য, অতঃ কূটস্থো নির্ব্বিকারঃ,

জ্ঞানবিজ্ঞানতৃপ্তাত্মা কূটস্থো বিজিতেন্দ্রিয়ঃ।
যুক্ত ইত্যুচ্যতে যোগী সমলোষ্টাশ্মকাঞ্চনঃ ॥ ৮ ॥
সুহৃন্মিত্রার্য্যুদাসীনমধ্যস্থদ্বেষ্যবন্ধুষু।
সাধুষ্বপি চ পাপেষু সমবুদ্ধির্বিশিষ্যতে ॥ ৯ ॥

## শাঙ্করভাষ্যম্।

যশ্চ য ঈদৃশোক্তঃ সমাহিত ইতি স উচ্যতে কথ্যতে স যোগী সমলোষ্টাশ্মকাঞ্চনঃ লোষ্টাশ্মকাঞ্চনানি সমানি যস্য স সমলোষ্টাশ্মকাঞ্চনঃ ॥ ৮ ॥

কিঞ্চ সুহৃদিতি। সুহৃদিত্যাদিশ্লোকার্দ্ধমেকপদং, সুহৃদিতি প্রত্যুপকারমনপেক্ষ্যোপকর্ত্তা মিত্রং স্নেহবান্, অরিঃ শত্রুঃ উদাসীনো ন কস্যচিৎ পক্ষং ভজতে, মধ্যস্থো যো বিরুদ্ধয়োরুভয়োর্হিতৈষী, দ্বেষ্য আত্মনোঽপ্রিয়ো,বন্ধুঃ সম্বন্ধীত্যেতেষু সাধুষু শাস্ত্রানুবর্ত্তিষ্বপি চ পাপেষু প্রতিষিদ্ধকারিষু সর্ব্বেষেতেষু সমবুদ্ধিঃ কঃ কিং কর্ম্মেত্যব্যাপৃতবুদ্ধিরিত্যর্থঃ বিশিষ্যতে, বিমুচ্যতইতি বা পাঠান্তরং, যোগারূঢ়ানাং সর্ব্বেষাময়মুত্তম ইত্যর্থঃ ॥ ৯ ॥

## গিরিকৃত টীকা।

ব্যাখ্যানেন দর্শয়তি জ্ঞানমিত্যাদিনা। স চ যোগী পরমহংসপরিব্রাজকঃ সর্ব্বত্রোপেক্ষাবুদ্ধিরনতিশয়বৈরাগ্যভাগীতি কথয়তি স যোগীতি ॥ ৮ ॥

যোগারূঢ়স্য প্রশস্তত্বমভ্যুপেত্য যোগস্যাঙ্গান্তরং দর্শয়তি কিঞ্চেতি। পদচ্ছেদঃ পদার্থোক্তিরিতি ব্যাখ্যানাঙ্গং সম্পাদয়তি সুহৃদিতীতি, অরির্নাম পরোক্ষমপকারকঃ, প্রত্যক্ষমপ্রিয়ো দ্বেষ্য ইতি বিভাগঃ। সমবুদ্ধিরিতি ব্যাচষ্টে কঃ কিমিতি। প্রথমো হি প্রশ্নো জাতিগোত্রাদিবিষয়ঃ দ্বিতীয়ো ব্যাপারবিষয়ঃ। উক্তপ্রকারেণাব্যাপৃতবুদ্ধিত্বে সর্ব্বোৎকর্ষো বা সর্ব্বোপায়বিমোক্ষো বা সিধ্যতীত্যাহ বিশিষ্যতইতি। পাঠদ্বয়েঽপি সিদ্ধমর্থং সংগৃহ্য কথয়তি যোগারূঢ়ানামিতি ॥ ৯ ॥

যথোক্তবিশেষণবতো যোগারূঢ়েস্তমস্বে যোগানুষ্ঠানে প্রবর্ত্তিতব্যমিত্যঙ্গাভিধানানন্তরং প্রধানমভিদধাতি অতএবমিতি। আদরনৈরন্তর্য্যদীর্ঘকালত্বং বিশেষণত্রয়ং যোগস্য সূচয়তি

## স্বামিকৃত টীকা।

অতএব বিজিতানীন্দ্রিয়াণি যেন, অতএব সমানি লোষ্টাদীনি যস্য মৃৎখণ্ডপাষাণসুবর্ণেষু হেয়োপাদেয়বুদ্ধিশূন্যঃ স যুক্তো যোগারূঢ় ইত্যুচ্যতে ॥ ৮ ॥

সুহৃন্মিত্রাদিষু সমবুদ্ধিযুক্তস্তু ততোঽপি শ্রেষ্ঠইত্যাহ সুহৃদিতি। সুহৃৎ স্বভাবেনৈব হিতাশংসী, মিত্রং স্নেহবশেনোপকারকঃ, অরির্ঘাতুকঃ, উদাসীনো বিবদমানয়োরুভয়োরপ্যুপেক্ষকঃ; মধ্যস্থো বিবদমানয়োরুভয়োরপি হিতাশংসী, দ্বেষ্যো দ্বেষবিষয়ঃ, বন্ধুঃ সম্বন্ধী, সাধবঃ সদাচারাঃ, পাপা দুরাচারাঃ, এতেষু সমা রাগদ্বেষ শূন্যা বুদ্ধির্যস্য সতু বিশিষ্টঃ ॥৯॥

যোগী যুঞ্জীত সততমাত্মানং রহসি স্থিতঃ।
একাকী যতচিত্তাত্মা নিরাশীরপরিগ্রহঃ ॥ ১০ ॥

## শাঙ্করভাষ্যম্।

অতএব উত্তমফলপ্রাপ্তয়ে যোগীতি। যোগী ধ্যায়ী যুঞ্জীত সমাদধ্যাৎ সততং সর্ব্বদা-ত্মানমন্তঃকরণং রহস্যেকান্তে যোগী গিরিগুহাদৌ স্থিতঃ সন্নেকাকী অসহায়ো রহসি স্থিত একাকী চেতি বিশেষণাৎ সংন্যাসং কৃত্বেত্যর্থঃ যতচিত্তাত্মা চিত্তমন্তঃকরণমাত্মা দেহশ্চ সংযতৌ যস্য স যতচিত্তাত্মা নিরাশীর্বীততৃষ্ণোঽপরিগ্রহশ্চ পরিগ্রহরহিত ইত্যর্থঃ, সংন্যা-সিত্বেঽপি সতি ত্যক্তসর্ব্বপরিগ্রহঃ সন্ যুঞ্জীতেত্যর্থঃ ॥ ১০ ॥

## গিরিকৃত টীকা।

সততমিতি। তস্যৈব পঞ্চাঙ্গাম্যুপন্যস্যতি রহসীত্যাদিনা। সর্ব্বদেত্যাদরদীর্ঘকালয়োরুপল ক্ষণং প্রত্যাগাত্মানং ব্যাবর্ত্তয়তি অন্তঃকরণমিতি। গিরিগুহাদাবিত্যাদিশব্দেন যোগ-প্রতিবন্ধকদুর্জ্জনাদিবিধুরো দেশো গৃহ্যতে। বিশেষণদ্বয়স্য তাৎপর্য্যমাহ রহসীতি। যোগং যুঞ্জানস্য সন্ন্যাসিনো বিশেষণান্তরাণি দর্শয়তি যতেতি। সতি সংন্যাসিত্বে কিমিত্যপরি-গ্রহগ্রণমর্থপুনরুক্তেরিত্যাশঙ্ক্য কৌপীনাচ্ছাদনাদিষ্বপি শক্তিনিবৃত্ত্যর্থমিত্যাহ সংন্যাসি-ত্বেঽপীতি ॥ ১০ ॥

যোগং যোগাঙ্গানি চোপদিশ্যোত্তরসন্দর্ভস্য তাৎপর্য্যমাহ অথেতি। যোগস্বরূপকতিপয়-তদঙ্গপ্রদর্শনানন্তর্য্যমথশব্দার্থঃ বিহারাদীনামিত্যাদিশব্দেন যথোক্তাসনাদিগতাবান্তরভেদ-গ্রহণং তৎফলাদি চেত্যাদিশব্দেন যোগফলং সম্যগ্জ্ঞানঞ্চ তৎফলং কৈবল্যং ততো ভ্রষ্টস্যা-ত্যন্তিকাবিনষ্টত্বমিত্যাদি গৃহ্যতে। এবং সমুদায়তাৎপর্য্যে দর্শিতে কিমাসীনঃ শয়ানস্তিষ্ঠন্ গচ্ছন্ কুর্ব্বন্ বা যুঞ্জীতেত্যপেক্ষয়ামনন্তরশ্লোকতাৎপর্য্যমাহ তত্রেতি। নির্দ্ধারণে সপ্তমী, প্রথমং যোগানুষ্ঠানস্য প্রধানমাসীনঃ সম্ভবাদিতি স্যায়াদিতি যাবৎ। বিবিক্তত্বং দেশো বিভ-জতে স্বভাবতইতি। আসনস্যাস্থৈর্য্যে তত্রোপবিশ্য যোগমনুতিষ্ঠতঃ সমাধানাযোগাৎ যোগা-সিদ্ধিরিত্যভিসন্ধায় বিশিনষ্টি অচলমিতি। আত্মনইতি পরকীয়াসনব্যুদাসার্থং, পতন-ভয়পরিহারার্থং নাত্যুচ্চমিত্যুক্তং, নাপ্যতিনীচমিতি ভূতলপাষাণাদিসংশ্লেষে বাতক্ষোভাগ্নি-মান্দ্যাদিসম্ভাবিতদেশনিরাসার্থং, চেলং বস্ত্রমজিনং চর্ম্ম পশূনাং তচ্চ মৃগস্য, কুশা দর্ভাস্তে

## স্বামিকৃত টীকা।

এবং যোগারূঢ়স্য লক্ষণমুক্তেদানীং তস্য সাঙ্গং যোগং বিধত্তে যোগীত্যাদিনা স যোগী পরমো মত ইত্যন্তেন গ্রন্থেন। যোগী যোগারূঢ় আত্মানং মনো যুঞ্জীত সমাহিতং কুর্য্যাৎ, সততং নিরন্তরং রহসি একান্তে স্থিতঃ সন, একাকী সঙ্গশূন্যঃ, যতং সংযতং চিত্তমাত্মা দেহশ্চ যস্য, নিরাশীর্নিরাকাঙ্ক্ষঃ, অপরিগ্রহঃপরিগ্রহশূন্যশ্চ ॥ ১০ ॥

শুচৌ দেশে প্রতিষ্ঠাপ্য স্থিরমাসনমাত্মনঃ।
নাত্যুচ্ছ্রিতং নাতিনীচং চেলাজিনকুশোত্তরম্ ॥ ১১ ॥
তত্রৈকাগ্রং মনঃ কৃত্বা যতচিত্তেন্দ্রিয়ক্রিয়ঃ।
উপবিশ্যাসনে যুঞ্জ্যাদ্‌যোগমাত্মবিশুদ্ধয়ে ॥ ১২ ॥

## শাঙ্করভাষ্যম্।

অথেদানীং যোগং যুঞ্জত আসনাহারবিহারাদীনাং যোগসাধনত্বেন নিয়মো বক্তব্যঃ, প্রাপ্তযোগস্য লক্ষণং তৎফলাদি চেত্যত আরভ্যতে, তত্রাসনমেব তাবৎ প্রথমমুচ্যতে শুচাবিতি। শুচৌ শুদ্ধে বিবিক্তে স্বভাবতঃ সংস্কারতো বা দেশে স্থানে প্রতিষ্ঠাপ্য স্থিরমচলনমাত্মনঃ আসনং নাত্যুচ্ছ্রিতং নাতীবোচ্ছ্রিতং নাপ্যতিনীচং তচ্চ চেলাজিনকুশোত্তরং চেলমজিনং কুশাশ্চ উত্তরে যস্মিন্নাসনে তদাসনং চেলাজিনকুশোত্তরং পাঠক্রমাৎ, বিপরীতোঽত্র অনুক্রমশ্চেলাদীনাং ॥ ১১ ॥

প্রতিষ্ঠাপ্য কিং তত্রেতি। তত্র তস্মিন্নাসনে উপবিশ্য যোগং যুঞ্জ্যাৎ কথং সর্ব্ববিষয়েভ্য উপসংহৃত্যৈকাগ্রং মনঃ কৃত্বা যতচিত্তেন্দ্রিয়ক্রিয়ঃ চিত্তঞ্চ ইন্দ্রিয়াণি চ চিত্তেন্দ্রিয়াণি তেষাং ক্রিয়া সংযতা যস্য স কিমর্থং যোগং যুঞ্জ্যাদিত্যাহাত্মবিশুদ্ধয়ে অন্তঃকরণস্য শুদ্ধ্যর্থমিত্যেতৎ ॥ ১২ ॥

## গিরিকৃত টীকা।

চোত্তরে যস্মিন্নুপরিষ্টাদারভ্য তত্তথোক্তং। প্রথমং চেলং ততোঽজিনং ততশ্চ কুশা ইতি প্রতিপন্নক্রমমাপাতিকং ক্রমমতিক্রম্যাদৌ কুশাস্ততোঽজিনং ততশ্চেলমিতি ক্রমং বিবক্ষিত্বাহ বিপরীতোঽত্রেতি॥ ১১ ॥

যথোক্তমাসনং সম্পাদ্য কিং কর্ত্তব্যমিতি প্রশ্নপূর্ব্বকং কর্ত্তব্যং তন্নির্দ্দিশতি প্রতিষ্ঠাপ্যেতি। যোগং যুঞ্জানস্যেতি কর্ত্তব্যতাকলাপং পৃচ্ছতি কথমিতি। সর্ব্বেভ্যো বিষয়েভ্যঃ সকাশাৎ প্রত্যাহৃত্য মনসো সদেকস্মিন্নেব ধ্যেয়ে বিষয়ে সমাধানং, যচ্চিত্তস্যেন্দ্রিয়াণাঞ্চ বাহ্যক্রিয়াণাং সংযমনং তদুভয়ং কৃত্বা যোগমনুতিষ্ঠেদিত্যাহ সর্ব্বেতি। আসনে যথোক্তে স্থিত্বা যথোক্তয়া রীত্যা যোগানুষ্ঠানস্য প্রশ্নপূর্ব্বকং ফলমাহ স কিমর্থমিত্যাদিনা॥ ১২ ॥

## স্বামিকৃত টীকা।

আসননিয়মং দর্শয়ন্নাহ শুচাবিতি দ্বাভ্যাং। শুদ্ধে স্থানে আত্মনঃ স্বস্যাসনং স্থাপয়িত্বা, কীদৃশং স্থিরমচঞ্চলং নাত্যুচ্ছ্রিতং ন চাতিনীচং, চেলং, বস্ত্রং অজিনং ব্যাঘ্রাদিচর্ম্ম চেলাজিনে কুশেভ্য উত্তরে যস্য কুশানামুপরি চর্ম্ম তদুপরি বস্ত্রমাস্তীর্য্যেত্যর্থঃ ॥ ১১ ॥

তত্র তস্মিন্নাসনে উপবিশ্য একাগ্রং বিক্ষেপরহিতং মনঃ কৃত্বা যোগং যুঞ্জ্যাদভ্যসেৎ, যতা সংযতা চিত্তস্যেন্দ্রিয়াণাঞ্চ ক্রিয়া যস্য, আত্মনো মনসো বিশুদ্ধয় উপশান্তয়ে ॥ ১২ ॥

সমং কায়শিরোগ্রীবং ধারয়ন্নচলং স্থিরঃ।
সংপ্রেক্ষ্য নাসিকাগ্রং স্বং দিশশ্চানবলোকয়ন্ ॥ ১৩ ॥

## শাঙ্করভাষ্যম্।

বাহ্যসাধনমাসনমুক্তং অধুনা শরীরস্য ধারণং কথমিত্যুচ্যতে সমমিতি। সমং কায়শিরোগ্রীবং কায়শ্চ শিরশ্চ গ্রীবা চ কায়শিরোগ্রীবং তৎ সমং ধারয়ন্ অচলঞ্চ সমং ধারয়তশ্চলনং ন সম্ভবত্যতো বিশিনষ্টি অচলমিতি,স্থিরঃ স্থিরো ভূত্বেত্যর্থঃ স্বং নাসিকাগ্রং সংপ্রেক্ষ্য সম্যক্ প্রেক্ষণং দর্শনং কৃত্বেবেতীবশব্দো লুপ্তো দ্রষ্টব্যো ন হি স্বনাসিকাগ্রসংপ্রেক্ষণমিহ বিধিৎসিতং কিং তর্হি চক্ষুষো দৃষ্টিসন্নিপাতঃ সচান্তঃকরণসমাধানাপেক্ষো বিবক্ষিতঃ স্বনাসিকাগ্রসংপ্রেক্ষণমেব চেদ্বিবক্ষিতং মনস্তত্রৈব সমাধীয়েত নাত্মনি, আত্মনি হি মনসঃ সমাধানং বক্ষ্যত্যাত্মসংস্থং মনঃ কৃত্বেতি তস্মাদিবশব্দলোপেনাক্ষ্ণোর্দৃষ্টিসন্নিপাতএব সংপ্রেক্ষ্যেত্যুচ্যতে দিশশ্চানবলোকয়ন্ দিশাঞ্চাবলোকনমকুর্ব্বন্নিত্যেবমন্তরা কুর্ব্বন্নিত্যেতৎ ॥ ১৩ ॥

## গিরিকৃত টীকা।

উক্তমনূদ্যানন্তরশ্লোকস্যাপুনরুক্তমর্থমাহ বাহ্যেতি। সমত্বমৃজুত্বং, কায়ঃ শরীরমধ্যং। অচলমিতি বিশেষণমবতার্য্য তস্য তাৎপর্য্যমাহ সমমিতি। কার্য্যকরণয়োর্ব্বিষয়পারবশ্যশূন্যত্বমচলত্বং স্থৈর্য্যং। কিমিতীবশব্দলোপোঽত্র কল্প্যতে স্বনাসিকাগ্রসংপ্রেক্ষণমেব যোগাঙ্গত্বেনাত্র বিধিৎসিতং কিং ন স্যাদিত্যাশঙ্ক্যাহ ন হীতি তর্হি কিমত্র বিবক্ষিতমিতি প্রশ্নপূর্ব্বকমাহ কিং তর্হীতি। দৃষ্টিসন্নিপাতো দৃষ্টেশ্চক্ষুষো রূপাদিবিষয়প্রবৃত্তিরাহিত্যং। কথমসাবনায়াসেন সিধ্যতি তত্রাহ সচেতি। সমাধানস্য প্রাধান্যেনাত্র বিবক্ষিতত্বদ্দৃষ্টের্ব্বহির্ব্বিষয়ত্বেন তত্তৎপ্রসঙ্গাত্তস্যা বিষয়েভ্যো ব্যাবৃত্ত্যান্তরে চ সন্নিপাতো বিবক্ষিতো ভবতীত্যর্থঃ তথাপি কথং স্বনাসিকাগ্রসংপ্রেক্ষণমত্র শ্রুতমবিবক্ষিতমিত্যাশঙ্ক্যাহ স্বনাসিকেতি। তত্রৈব মনঃসমাধানে কা হানিরিত্যাশঙ্ক্য বাক্যশেষবিরোধান্নৈবমিত্যাহ আত্মনি হীতি। কিং তর্হি সংপ্রেক্ষ্যেত্যাদৌ বিবক্ষিতমিত্যাশঙ্ক্যাহ তস্মাদিতি। দক্ষিণোত্তরচক্ষুষোর্যা দৃষ্টিস্তস্যা বাহ্যাদ্বিষয়াদ্বৈমুখ্যেনান্তরেব সন্নিপতনমত্র স্বকীয়ং নাসিকাগ্রং নাসিকান্তং সংপ্রেক্ষ্যেতি বিবক্ষিতমিত্যর্থঃ। তত্রৈবান্তরমপি বিশেষণমনুকুলমিত্যাহ দিশশ্চেতি। অনবলোকয়ন্নাসীদিত্যুত্তরত্র সম্বন্ধঃ, অন্তরা দিশাবলোকনমপি যোগপ্রতিবন্ধকমিতি তৎপ্রতিষেধঃ ॥ ১৩ ॥

## স্বামিকৃত টীকা।

চিত্তৈকাগ্র্যোপযোগিনীং দেহাদিধারণাং দর্শয়ন্নাহ সমমিতি দ্বাভ্যাং। কায়ইতি দেহস্য মধ্যভাগো বিবক্ষিতঃ কায়শ্চ শিরশ্চ গ্রীবা চ কায়শিরোগ্রীবং, মূলাধারাদারভ্য মূর্দ্ধাগ্রপর্য্যন্তং সমমবক্রং নিশ্চলং ধারয়ন্ স্থিরো দৃঢ়প্রযত্নো ভূত্বেত্যর্থঃ, স্বীয়ং নাসিকাগ্রং সংপ্রেক্ষ্য চার্দ্ধনিমীলিতনেত্র ইত্যর্থঃ, ইতস্ততো দিশশ্চানবলোকয়ন্নাসীতেত্যুত্তরেণান্বয়ঃ ॥ ১৩ ॥

প্রশান্তাত্মা বিগতভীর্ব্রহ্মচারিব্রতে স্থিতঃ।
মনঃ সংযম্য মচ্চিত্তো যুক্ত আসীত মৎপরঃ ॥১৪॥

## শাঙ্করভাষ্যম্।

কিঞ্চ প্রশান্তেতি। প্রশান্তাত্মা প্রকর্ষেণ শান্ত আত্মান্তঃকরণং যস্য সোঽয়ং প্রশান্তাত্মা বিগতভীর্বিগতভয়ঃ ব্রহ্মচারিব্রতে স্থিতঃ ব্রহ্মচারিণো ব্রতং ব্রহ্মচারিব্রতং ব্রহ্মচর্য্যং গুরু-শুশ্রূষাভিক্ষাভুক্ত্যাদি তস্মিন্ স্থিতস্তদনুষ্ঠাতা ভবেদিত্যর্থঃ, কিঞ্চ মনঃ সংযম্য মনসো বৃত্তীরুপসংহৃত্যেতৎ মচ্চিত্তো ময়ি পরমেশ্বরে চিত্তং যস্য সোঽয়ং মচ্চিত্তো যুক্তঃ সমাহিতঃ সন্ন্যাসী চোপবিশেৎ মৎপরোঽহং পরো যস্য সোঽয়ং মৎপরো ভবতি কশ্চিৎ রাগী স্ত্রীচিত্তো ন তু স্ত্রিয়মেব পরত্বেন গৃহ্লাতি কিং তর্হি রাজানং মহাদেবং বা, অয়ন্তু মচ্চিত্তো মৎপরশ্চ ॥ ১৪ ॥

অথেদানীং যোগফলমুচ্যতে যুঞ্জন্নিতি। যুঞ্জন্ সমাধানং কুর্ব্বন্নেবং যথোক্তেন বিধানেন সদা যোগী নিয়তমানসঃ নিয়তং সংযতং মানসং মনো যস্য সোঽয়ং নিয়তমানসঃ স শান্তি-

## গিরিকৃত টীকা।

যোগং যুঞ্জানস্য বিশেষণান্তরাণি দর্শয়তি কিঞ্চেতি। অন্তঃকরণস্য প্রশান্তিঃ রাগদ্বেষাদিদোষরাহিত্যং, তস্যাশ্চ প্রকর্ষো রাগাদিহেতোরপি নিবৃত্তিঃ বিগতভয়ত্বং সর্ব্বকর্ম্মপরিত্যাগে শাস্ত্রীয়নিশ্চয়বশান্নিঃসন্দিগ্ধবুদ্ধিত্বং, ভিক্ষাভুক্ত্যাদীত্যাদিশব্দেন ত্রিসবনস্নানশৌচাচমনাদি গৃহ্যতে। বিশেষণান্তরমাহ কিঞ্চেতি। উপসংহৃত্য যোগনিষ্ঠো ভবেদিতি শেষঃ। মনোবৃত্ত্যুপসংহারে ধ্যানমপি ন সিধ্যেত্তস্য তদ্বৃত্ত্যাবৃত্তিরূপত্বাদিত্যাশঙ্ক্যাহ মচ্চিত্তইতি। বিষয়ান্তরবিষয়মনোবৃত্ত্যুপসংহারেণাত্মন্যেব তন্নিয়মনান্ন ধ্যানানুপপত্তিরিত্যর্থঃ। মচ্চিত্তত্বেনৈব মৎপরত্বসিদ্ধত্বাৎ মৎপরইতি পৃথক্ বিশেষণমনর্থকমিত্যাশঙ্ক্যাহ ভবতীতি। অন্তঃকরণশুদ্ধির্যোগস্যাবান্তরফলং ॥ ১৪ ॥

সংপ্রতি পরমফলকথনপরত্বেনানন্তরশ্লোকমাদত্তে অথেতি। যোগস্বরূপং তদঙ্গমাসনমপি তৎকর্ত্তৃবিশেষণমিত্যস্যার্থস্য প্রকথনানন্তরমিত্যথশব্দার্থঃ, আত্মানং যুঞ্জন্নিতি সম্বন্ধঃ, আত্মশব্দো মনোবিষয়ঃ, যথোক্তো বিধিরাসনাদিঃ, উক্তবিশেষণত্রয়দ্যোতনার্থং সদেত্যুক্তং, যোগী ধ্যায়ী সংন্যাসীত্যর্থঃ। মনঃসংযমস্য যোগং প্রত্যসাধারণত্বং দর্শয়তি নিয়তেতি।

## স্বামিকৃত টীকা।

প্রশান্তেতি। প্রশান্ত আত্মা চিত্তং যস্য বিগতা ভীর্ভয়ং যস্য ব্রহ্মচারিব্রতে ব্রহ্মচর্য্যে স্থিতঃ সন্ মনঃ সংযম্য প্রত্যাহৃত্য ময্যেব চিত্তং যস্য, অহমেব পরঃ পুরুষার্থো যস্য স মৎপরঃ এবং যুক্তো ভূত্বা তিষ্ঠেৎ ॥ ১৪ ॥

যুঞ্জন্নেবং সদাত্মানং যোগী নিয়তমানসঃ।
শান্তিং নির্ব্বাণপরমাং মৎসংস্থামধিগচ্ছতি ॥ ১৫ ॥
নাত্যশ্নতস্তু যোগোঽস্তি ন চৈকান্তমনশ্নতঃ।
ন চাতিস্বপ্নশীলস্য জাগ্রতো নৈব চার্জ্জুন ॥ ১৬ ॥

## শাঙ্করভাষ্যম্।

মুপরতিং নির্ব্বাণপরমাং নির্ব্বাণং মোক্ষস্তৎপরমা নিষ্ঠা যস্যাঃ শান্তেঃ সা নির্ব্বাণপরমা তাং নির্ব্বাণপরমাং মৎসংস্থাং মদধীনতামধিগচ্ছতি ॥ ১৫ ॥

ইদানীং যোগিন আহারাদিনিয়ম উচ্যতে নাত্যশ্নতইতি। ন অত্যশ্নত আত্মসংমিত-মন্নপরিমাণমতীত্যাশ্নতঃ অত্যশ্নতো ন যোগোঽস্তি ন চ একান্তমনশ্নতো যোগোঽস্তি, যদুহ বা আত্মসংমিতমন্নং তদবতি তন্ন হিনস্তি, যদ্ভূয়ো হিনস্তি তদ্ যৎ কনীয়ো ন তদবতীতি শ্রুতেঃ, তস্মাৎ যোগী নাত্মসংমিতাদন্নাদধিকং ন্যূনং বাশ্নীয়াদথ বা যোগিনো যোগশাস্ত্রে পরিপঠিতাদন্নপরিমাণাদতিমাত্রমশ্নতো যোগো নাস্তি উক্তং হি অর্দ্ধমন্নস্য সব্যঞ্জনস্য তৃতীয়-মুদকস্য তু বায়োঃ সঞ্চরণার্থন্তু চতুর্থমবশেষয়েদিত্যাদিপরিমাণং তথা ন চাতিস্বপ্নশীলস্য যোগো ভবতি নৈব চাতিমাত্রং জাগ্রতো যোগো ভবতি চার্জুন ॥ ১৬ ॥

## গিরিকৃত টীকা।

শান্তিশব্দিতোপরতেঃ সর্ব্বসংসারনিবৃত্তিপর্য্যবসায়িত্বং মত্বা বিশিনষ্টি নির্ব্বাণেতি। যথোক্তায়া মুক্তেব্র্রহ্মস্বরূপাবস্থানাদনর্থান্তরত্বমাহ মৎসংস্থামিতি। মদধীনাং মদাত্মিকামিত্যর্থঃ ॥ ১৫ ॥

আহারাদীত্যাদিশব্দেন বিহারজাগরিতাদি চোচ্যতে, আত্মসংমিতমন্নপরিমাণমষ্টগ্রা-সাদি, আহারনিয়মে শতপথশ্রুতিং প্রমাণয়তি যদিতি। তদন্নং ভুজ্যমানং যদুহবাইতি-প্রসিদ্ধ্যা শ্রুত্যানুদিতমবত্যনুষ্ঠানযোগ্যতামাপাদ্যানুষ্ঠানদ্বারেণ ভোক্তারং রক্ষতি ন পুনস্ত দন্নমস্যানর্থায় ভবতীত্যর্থঃ, যৎপুনরাত্মসংমিতাৎ ভূয়োঽধিকতরং শাস্ত্রমতিক্রম্য ভুজ্যতে তদাত্মানং হিনস্তি ভোক্তুরনর্থায় ভবতি যচ্চান্নং কনীয়োঽল্পতরং শাস্ত্রনিশ্চয়াভাবাদদ্যতে

## স্বামিকৃত টীকা।

যোগাভ্যাসফলমাহ যুঞ্জন্নেবমিতি। এবমুক্তপ্রকারেণ সদা আত্মানং মনো যুঞ্জন্ সমা-হিতং কুর্ব্বন্ নিয়তঃ নিরুদ্ধং মানসং চিত্তং যস্য স শান্তিং সংসারোপরমং প্রাপ্নোতি কথং-ভূতাং নির্ব্বাণং পরমং প্রাপ্যং যস্যাং তাং মৎসংস্থাং মদ্রূপেণাবস্থিতিং ॥ ১৫ ॥

যোগাভ্যাসনিষ্ঠস্যাহারাদিনিয়মমাহ নাত্যশ্নত ইতি দ্বাভ্যাং। অত্যন্তমধিকং ভুঞ্জানস্য একান্তমত্যন্তমভুঞ্জানস্যাপি যোগঃ সমাধির্ন ভবতি, তথাতিনিদ্রাশীলস্যাতিজাগ্রতশ্চ যোগো নৈবাস্তি ॥ ১৬ ॥

যুক্তাহারবিহারস্য যুক্তচেষ্টস্য কর্ম্মসু।
যুক্তস্বপ্নাববোধস্য যোগো ভবতি দুঃখহা॥ ১৭॥

## শাঙ্করভাষ্যম্।

কথং পুনর্যোগো ভবতীত্যুচ্যতে যুক্তেতি। যুক্তাহারবিহারস্য যুক্তচেষ্টস্য আহ্রিয়ত ইত্যাহারোঽন্নং বিহরণং বিহারঃ পাদক্রমস্তৌ যুক্তৌ নিয়তপরিমাণৌ যস্য স যুক্তাহার-বিহারস্তস্য যুক্তচেষ্টস্য তথান্যা চ যুক্তা নিয়তা চেষ্টা যস্য কর্ম্মসু তথা যুক্তস্বপ্নাববোধস্য যুক্তৌ স্বপ্নশ্চাববোধশ্চ তৌ নিয়তকালৌ যস্য তস্য যুক্তাহারাবিহারস্য কর্ম্মসু যুক্তস্বপ্নাব-বোধস্য যোগিনো যোগো ভবতি দুঃখহা দুঃখানি সর্ব্বাণি হন্তীতি দুঃখহা সর্ব্বসংসারদুঃখক্ষয়-কৃদ্যোগো ভবতি ইত্যর্থঃ॥ ১৭॥

## গিরিকৃত টীকা।

তদন্নমনুষ্ঠানযোগ্যতাদিদ্বারা ন রক্ষিতুং ক্ষমতে তস্মাদত্যধিকমত্যল্পং চান্নং যোগমারুরুক্ষতা ত্যাজ্যমিত্যর্থঃ। অতিসিদ্ধমর্থং নিগময়তি তস্মাদিতি। নেত্যাদের্ব্যাখ্যানান্তরমাহ অথবেতি। কিং তদন্নপরিমাণং যোগশাস্ত্রোক্তং যদধিকং ন্যূনম্বাভ্যবহরতো যোগানুপ-পত্তিরিত্যাশঙ্ক্যাহ উক্তং হীতি। পূরয়েদশনেনার্দ্ধং তৃতীয়মুদকেন তু। বায়োঃ সঞ্চরণার্থায় চতুর্থমবশেষয়েদিতি বাক্যমাদিশব্দার্থঃ। নাত্যন্তমশ্নতোঽনশ্নতশ্চ যোগো ন সম্ভবতি তথা অত্যন্তংস্বপতো জাগ্রতশ্চ ন যোগঃ সম্ভবতীত্যাহ তথেতি॥ ১৬॥

আহারনিদ্রাদিনিয়মবিরহিণো যোগব্যতিরেকমুক্ত্বা তন্নিয়মমবতো যোগান্বয়ং ব্যাচষ্টে কথং পুনরিত্যাদিনা। অন্নস্য নিয়তত্বমর্দ্ধমশনস্যেত্যাদি, বিহারস্য নিয়তত্বং যোজনান্ন পরং গচ্ছেদিত্যাদি, কর্ম্মসু চেষ্টায়া নিয়তত্বং বাঙ্নিয়মাদি, রাত্রৌ প্রথমতো দশঘটিকাপরিমিতে কালে জাগরণং মধ্যতঃ স্বপনং পুনরপি দশঘটিকাপরিমিতে জাগরণমিতি স্বপ্নাববোধয়ো নিয়তকালত্বমেবং প্রযতমানস্য যোগিনো যোগো ভবতি। যোগস্য ফলমাহ দুঃখহেতি। সর্ব্বানীত্যাধ্যাত্মিকাদিভেদভিন্নানীত্যর্থঃ। যথোক্তযোগমন্তরেণাপি স্বপ্নাদৌ দুঃখনি-বৃত্তিরস্তীতি বিশিনষ্টি সর্ব্বেতি। বিশুদ্ধবিজ্ঞানদ্বারেতি শেষ॥ ১৭॥

সফলস্য সাঙ্গস্য যোগস্যোক্ত্যনন্তরং যদা হীত্যাদাবুক্তকালানুবাদেন যুক্তং লক্ষয়িতুম-নন্তরশ্লোকপ্রবৃত্তিং দর্শয়তি অথাধুনেতি। বিশেষণসংযতত্বমেব সংক্ষিপতি একাগ্রতামি-তি। আত্মন্যেবেত্যেবকারার্থং কথয়তি হিত্বেতি। কেবলত্বমদ্বিতীয়ত্বং তস্যাত্মস্থিতিং বিবৃ-

## স্বামিকৃত টীকা।

তর্হি কথম্ভূতস্য যোগো ভবতীত্যত আহ যুক্তাহারেতি। যুক্তো নিয়ত আহারো বিহারশ্চ গতির্যস্য, কর্ম্মসু কার্য্যেষু যুক্তা নিয়তা চেষ্টা যস্য, যুক্তৌ নিয়তৌ স্বপ্নাববোধৌ নিদ্রাজাগরৌ যস্য তস্য দুঃখনিবর্ত্তকো যোগো ভবতি সিধ্যতি॥ ১৭॥

যদা বিনিয়তং চিত্তমাত্মন্যেবাবতিষ্ঠতে।
নিস্পৃহঃ সর্ব্বকামেভ্যো যুক্ত ইত্যুচ্যতে তদা ॥ ১৮ ॥
যদা দীপো নিবাতস্থো নেঙ্গতে সোপমা স্মৃতা।
যোগিনো যতচিত্তস্য যুঞ্জতো যোগমাত্মনঃ ॥ ১৯ ॥

## শাঙ্করভাষ্যম্।

অথাধুনা কদা যুক্তো ভবতীত্যুচ্যতে যদেতি। যদা বিনিয়তং চিত্তং বিশেষেণ নিয়তং সংযতমেকাগ্রতামাপন্নং চিত্তং হিত্বা বাহ্যং চিত্তমাত্মন্যেব কেবলেঽবতিষ্ঠতে স্বাত্মনি স্থিতিং লভত ইত্যর্থঃ, নিস্পৃহঃ সর্ব্বকামেভ্যো নির্গতা দৃষ্টাদৃষ্টবিষয়েভ্যঃ স্পৃহা তৃষ্ণা যস্য যোগিনঃ স যুক্তঃ সমাহিত ইত্যুচ্যতে তদা তস্মিন্ কালে ॥ ১৮ ॥

যোগিনঃ সমাহিতং যচ্চিত্তং তস্যোপমোচ্যতে যথেতি। যথা দীপঃ প্রদীপো নিবাতস্থো নিবাতে বাতবর্জ্জিতে স্থানে স্থিতো নেঙ্গতে নৈজতি ন চলতি সা উপমা উপমীযতেঽনয়েত্যুপমা যোগজ্ঞৈশ্চিত্তপ্রচাবদর্শিভিঃ স্মৃতা চিন্তিতা যোগিনো যতচিত্তস্য সংযতান্তঃকরণস্য যুঞ্জতো যোগমনুতিষ্ঠত আত্মনঃ সমাধিমনুতিষ্ঠত ইত্যর্থঃ ॥ ১৯ ॥

## গিরিকৃত টীকা।

ণোতি স্বাত্মনীতি। চিত্তস্য হি কল্পিতস্যাত্মৈব তত্ত্বং তৎ পুনরন্যতঃ সর্ব্বতো নিবারিতমধিষ্ঠানে নিমগ্নং তিষ্ঠতীতিভাবঃ। তস্যামবস্থায়াং সর্ব্বেভ্যো বিষয়েভ্যো ব্যাবৃত্ততৃষ্ণো যুক্তো ব্যবহ্রিয়ত ইত্যাহ নিস্পৃহ ইতি ॥ ১৮ ॥

উপমা যোগিনশ্চিত্তস্থৈর্য্যস্যোদাহরণমিত্যর্থঃ উপমাশব্দস্য প্রদীপবিষয়ত্বসিদ্ধার্থং করণ ব্যুৎপত্তিং দর্শয়তি উপমীয়তইতি। যোগিনো যথোক্তবিশেষণবতশ্চিত্তস্থৈর্য্যস্যেতি শেষঃ॥১৯॥

দ্বিবিধঃ সমাধিঃ সংপ্রজ্ঞাতোঽসংপ্রজ্ঞাতশ্চ, ধ্যেয়ৈকাকারসত্ত্ববৃত্তির্ভেদেন কথঞ্চিৎ জ্ঞাযমানা সংপ্রজ্ঞাতঃ সমাধিঃ, কথমপি পৃথগজ্ঞায়মানা সৈব সত্ত্ববৃত্তিরসংপ্রজ্ঞাতঃ সমাধিস্তত্র সামান্যেন সমাধিলক্ষণমভিধায়াসংপ্রজ্ঞাতস্য সমাধেরধুনা লক্ষণং বিবক্ষন্নাহ এব-

## স্বামিকৃত টীকা।

কদা নিষ্পন্নযোগঃ পুরুষো ভবতীত্যপেক্ষায়ামাহ যদেতি। বিনিয়তং বিশেষেণ নিরুদ্ধং সচ্চিত্তমাত্মন্যেব যদা নিশ্চলং তিষ্ঠতি তদা প্রাপ্তযোগ ইত্যুচ্যতে ॥ ১৮ ॥

আত্মৈকাকারতয়াবস্থিতস্য চিত্তস্যোপমানমাহ যথেতি। বাতশূন্যে দেশে স্থিতো দীপো যথা নেঙ্গতে ন চলতি সা উপমা দৃষ্টান্তঃ, কস্য আত্মবিষয়ং যোগং যুঞ্জতোঽভ্যস্যতো যোগিনো যতং নিয়তং চিত্তং যস্য, নিষ্কম্পতয়া প্রকাশকতয়া চাচঞ্চলং তচ্চিত্তং তদ্বত্তিষ্ঠতীত্যর্থঃ। ১৯ ॥

যত্রোপরমতে চিত্তং নিরুদ্ধং যোগসেবয়া।
যত্র চৈবাত্মনাত্মানং পশ্যন্নাত্মনি তুষ্যতি ॥ ২০ ॥
সুখমাত্যন্তিকং যত্তদ্বুদ্ধিগ্রাহ্যমতীন্দ্রিয়ম্।
বেত্তি যত্র ন চৈবায়ং স্থিতশ্চলতি তত্ত্বতঃ ॥ ২১ ॥

## শাঙ্করভাষ্যম্।

এবং যোগাভ্যাসবলাদেকাগ্রীভূতং নিবাতপ্রদীপকল্পং সৎ যত্রেতি। যত্র যস্মিন্ কালে উপরমতে চিত্তং উপরতিং গচ্ছতি নিরুদ্ধং সর্ব্বতো নিবারিতপ্রচারং যোগসেবয়া যোগানুষ্ঠানেন যত্র চৈব যস্মিংশ্চ কালে আত্মনা সমাধিপরিশুদ্ধেনান্তঃকরণেন আত্মানং পরং চৈতন্যং সর্ব্বতোজ্যোতিঃস্বরূপং পশ্যন্নুপলভমানঃ স্বে এবাত্মনি তুষ্যতি তুষ্টিং ভজতে ॥২০॥

কিঞ্চ সুখমিতি। সুখমাত্যন্তিকমত্যন্তমেব ভবতীত্যাত্যন্তিকং অনন্তমিত্যর্থঃ, যত্তদ্বুদ্ধিগ্রাহ্যং বুদ্ধ্যৈবেন্দ্রিয়নিরপেক্ষয়া গৃহ্যত ইতি বুদ্ধিগ্রাহ্যমতীন্দ্রিয়মিন্দ্রিয়গোচরাতীত-

## গিরিকৃত টীকা।

মিতি। কালে সমাধ্যুপলক্ষিতে, এবকারস্তুষ্যতীত্যনেন সম্বধ্যতে। চকারস্য সম্বন্ধমাহ যস্মিংশ্চেতি। কালস্তু পূর্ব্ববৎ। কর্ম্মকারকত্বেন নির্দ্দিষ্টমাত্মানং তৎপদার্থত্বেন ব্যাচষ্টে পরমিতি। আত্মনীত্যস্য ত্বংপদার্থবিষয়ত্বমাহ স্ব এবেতি। পরমাত্মানং প্রত্যগাত্মত্বেন তদ্ভাবেনাপরোক্ষীকুর্ব্বন্নতুষ্টিহেত্বভাবাত্তুষ্যত্যেবেত্যর্থঃ, তস্মিন্ কালে যোগসিদ্ধির্ভবতীতি শেষঃ ॥ ২০ ॥

যোগসিদ্ধিকালং প্রকারান্তরেণ প্রকটয়তি কিঞ্চেতি। বুদ্ধিশব্দঃ স্বানুভববিষয়ঃ, ইন্দ্রিয়-

## স্বামিকৃত টীকা।

যং সংন্যাসমিতি প্রাহুর্যোগং তং বিদ্ধি পাণ্ডবেত্যাদৌ কর্ম্মৈব যোগশব্দেনোক্তং নাত্যশ্নতস্তু যোগোঽস্তীত্যাদৌ তু সমাধির্যোগশব্দেনোক্তস্তত্র মুখ্যো যোগঃ ক ইত্যপেক্ষায়াং সমাধিমেব স্বরূপতঃ ফলতশ্চ লক্ষয়ন্ স এব মুখ্যো যোগইত্যাহ যত্রেতি সার্দ্ধৈস্ত্রিভিঃ। যত্র যস্মিন্নবস্থাবিশেষে যোগাভ্যাসেন নিরুদ্ধং চিত্তমুপরতং ভবতীতি যোগস্য স্বরূপলক্ষণমুক্তং, তথা চ পাতঞ্জলসূত্রং যোগশ্চিত্তবৃত্তিনিরোধ ইতি, ইষ্টপ্রাপ্তিলক্ষণেন ফলেন তমেব লক্ষয়তি যত্র চ যস্মিন্নবস্থাবিশেষে আত্মনা শুদ্ধেন মনসা আত্মানমেব পশ্যতি ন তু দেহাদি, পশ্যংশ্চাত্মন্যেব তুষ্যতি ন তু বিষয়েষু, যত্রেত্যাদীনাং যচ্ছব্দানাং তং যোগসংজ্ঞিতং বিদ্যাদিতি চতুর্থেনান্বয়ঃ ॥ ২০ ॥

আত্মন্যেব তোষে হেতুমাহ সুখমিতি। যত্র যস্মিন্নবস্থাবিশেষে যত্তৎ কিমপি নিরতিশয়মাত্যন্তিকং নিত্যং সুখং বেত্তি, নম্বু তদা বিষয়েন্দ্রিয়সম্বন্ধাভাবাৎ কুতঃ সুখং স্যাত্তত্রাহ

যং লব্ধ্বা চাপরং লাভং মন্যতে নাধিকং ততঃ।
যস্মিন্ স্থিতো ন দুঃখেন গুরুণাপি বিচাল্যতে ॥ ২২ ॥

## শাঙ্করভাষ্যম্।

মবিষয়জনিতমিত্যর্থঃ বেত্তি তদীদৃশং সুখমনুভবতি যত্র যস্মিন্ কালে ন চ এব অয়ং বিদ্বানাত্মস্বরূপে স্থিতস্তস্মান্নৈব চলতি তত্ত্বতঃ তত্ত্বস্বরূপান্ন প্রচ্যবত ইত্যর্থঃ ॥ ২১ ॥

কিঞ্চ যংলব্ধেতি। যং লব্ধ্বা যমাত্মলাভং লব্ধ্বা প্রাপ্য চ অপরমন্যল্লাভান্তরং ততোঽধিকমস্তীতি ন মন্যতে ন চিন্তয়তি, কিঞ্চ যস্মিন্নাত্মতত্ত্বে স্থিতো দুঃখেন শস্ত্রনিপাতাদিলক্ষণেন গুরুণা মহতাপি ন বিচাল্যতে ॥ ২২ ॥

## গিরিকৃত টীকা।

নিরপেক্ষস্বানুভবগম্যত্বোক্তেরতীন্দ্রিয়মিতি পুনরুক্তমিত্যাশঙ্ক্যাহ অবিষয়েতি। পদচ্ছেদঃ ন চেত্যাদি, অপেক্ষিতপূবণং আত্মাস্বরূপইতি, তস্মাত্তত্ত্ব ইতি সম্বন্ধঃ, নৈবেত্যেবকারসম্বন্ধোক্তিঃ, চকাবঃ সপ্তম্যা সম্বন্ধনীয়ঃ, যত্রেতি পূর্ব্ববৎ সম্বন্ধঃ ॥ ২১ ॥

প্রকারান্তরেণ প্রকৃতং যোগং বিশিনষ্টি কিঞ্চেতি। আত্মলাভান্ন পরং বিদ্যতে ইতি স্মৃত্যা ব্যাচষ্টে যমাত্মলাভমিতি। লাভান্তরং পুরুষার্থভূতং, ততস্তস্মাদাত্মলাভাদিতি যাবৎ, তং বিদ্যাদিত্যুত্তরত্র সম্বন্ধঃ। যস্মিন্ ইত্যাদ্যবতারয়তি কিঞ্চেতি। অপবিপক্বযোগো যথা দর্শিতেন দুঃখেন প্রচ্যাব্যতে ন চৈবং বিচাল্যতে যস্মিন্ স্থিতো যোগী তং যোগং বিদ্যাদিতি পূর্ব্ববৎ ॥ ২২ ॥

তং বিদ্যাদিত্যাদ্যপেক্ষিতং পূবয়ন্নবতারয়তি যত্রেতি। তমিত্যাত্মাবস্থাবিশেষং পরামৃশতি, দুঃখসংযোগস্য বিয়োগো বিয়োগসংজ্ঞিতো যুজ্যতে স কথং যোগসংজ্ঞিতঃ স্যাদিত্যাশঙ্ক্যাহ বিপরীতেতি। ইয়ং হি যোগাবস্থা সমুৎখাতনিখিলদুঃখভেদেতি দুঃখসংযোগাভাবো যোগসংজ্ঞামর্হতীত্যর্থঃ। উপসংহৃতযোগফলে কিমিতি পুনর্যোগস্য কর্ত্তব্যত্বমুচ্যতে তত্রাহ যোগফলমিতি। প্রকারান্তরেণ যোগস্য কর্ত্তব্যত্বোপদেশারম্ভোঽত্রান্বারম্ভঃ যোগং যুঞ্জানস্তৎক্ষণাদুক্তাং সংসিদ্ধিমলভমানঃ সংশয়ানো নিবর্ত্তেতেতি তন্নিবৃত্ত্যর্থং পুনঃ

## স্বামিকৃত টীকা।

অতীন্দ্রিয়ং বিষয়েন্দ্রিয়সম্বন্ধাতীতং কেবলং বুদ্ধ্যৈবাত্মাকারয়া গ্রাহ্যং, অতএব চ যত্র স্থিতঃ সংস্তত্ত্বতআত্মস্বরূপান্নৈব চলতি ॥ ২১ ॥

অচলত্বমেবোপপাদয়তি যমিতি। যতো যমাত্মস্বরূপং লব্ধ্বা ততোঽধিকং লাভং ন মন্যতে তস্যৈব নিরতিশয়সুখত্বাৎ, যস্মিংশ্চ স্থিতো মহতাপি শীতোষ্ণাদিদুঃখেন ন বিচাল্যতে নাভিভূয়তে, এতেনানিষ্টনিবৃত্তিফলেনাপি যোগস্য লক্ষণমুক্তং দ্রষ্টব্যং ॥ ২২॥

তং বিদ্যাদ্দুঃখসংযোগবিয়োগং যোগসংজ্ঞিতম্।
স নিশ্চয়েন যোক্তব্যো যোগোঽনির্ব্বিণ্ণচেতসা ॥২৩॥
সঙ্কল্পপ্রভবান্ কামাংস্ত্যক্ত্বা সর্ব্বানশেষতঃ।
মনসৈবেন্দ্রিয়গ্রামং বিনিয়ম্য সমন্ততঃ ॥ ২৪ ॥

## শাঙ্করভাষ্যম্।

যত্রোপরমতে ইত্যাদারভ্য যাবদ্ভির্বিশেষণৈর্বিশিষ্ট আত্মাবস্থাবিশেষো যোগ উক্তঃ তমিতি। তংবিদ্যাৎ বিজানীয়াৎ দুঃখসংযোগবিয়োগং দুঃখৈঃ সংযোগো দুঃখসংযোগস্তেন বিয়োগো দুঃখসংযোগবিয়োগস্তং দুঃখসংযোগবিয়োগং যোগ ইত্যেবসংজ্ঞিতং বিপরীতলক্ষণেন বিদ্যাৎ বিজানীয়াদিত্যর্থঃ। যোগফলমুপসংহৃত্য পুনরন্বয়ারম্ভেণ যোগস্য কর্ত্তব্যতোচ্যতে নিশ্চয়ানির্ব্বেদয়োর্যোগস্য সাধনত্ববিধানার্থং, স যথোক্তফলো যোগো নিশ্চয়েনাধ্যবসায়েন যোক্তব্যোঽনির্ব্বিণ্ণচেতসা ন নির্ব্বিণ্ণং অনির্ব্বিণ্ণং তচ্চেতস্তেন নির্ব্বেদরহিতেন চেতসা চিত্তেনেত্যর্থঃ ॥ ২৩ ॥

কিঞ্চ সংকল্পেতি। সংকল্পপ্রভবান্ সংকল্পঃ প্রভবো যেষাং কামানাং তে সঙ্কল্প-

## গিরিকৃত টীকা।

কর্ত্তব্যোপদেশাঽর্থবানিতি মত্বাহ নিশ্চয়েতি। তয়োঃ সাধনত্ববিধানমেবাক্ষরযোজনয়া সাধয়তি স যথেতি। ইহ জন্মনি জন্মান্তরে বা সেৎস্যতীত্যধ্যবসায়েন যোক্তব্যঃ কর্ত্তব্যঃ॥২৩॥

ইতশ্চ যোগস্য কর্ত্তব্যত্বমিতি প্রতিজানীতে কিঞ্চেতি। কেন ক্রমেণ কর্ত্তব্যত্বমিত্যপেক্ষায়ামাহ সঙ্কল্পেতি। সঙ্কল্পঃ শোভনাধ্যাসঃ। সর্ব্বানিত্যুক্ত্বা পুনরশেষত ইতি পুনরুক্তিরিত্যাশঙ্ক্যাহ নির্লেপেনেতি। যথা শেষো ন ভবতি তথা সর্ব্বেষাং কামানাং শোভ-

## স্বামিকৃত টীকা।

তমিতি। যএবংভূতোঽবস্থাবিশেষস্তং দুঃখসংযোগবিয়োগং যোগসংজ্ঞিতং বিদ্যাৎ দুঃখশব্দেন দুঃখমিশ্রিতং বৈষয়িকং সুখমপি গৃহ্যতে দুঃখস্য সংযোগেন সংস্পর্শমাত্রেণাপি বিয়োগো যস্মিংস্তমবস্থাবিশেষং যোগসংজ্ঞিতং যোগশব্দবাচ্যং জানীয়াৎ, পরমাত্মনি ক্ষেত্রজ্ঞস্য যোজনং যোগঃ, যদ্বা দুঃখাস্য সংযোগেন বিয়োগএব শূরে কাতরশব্দবদ্বিরুদ্ধলক্ষণয়া যোগ উচ্যতে, কর্ম্মণি তু যোগশব্দস্তদুপায়ত্বাদৌপচারিক ইতিভাবঃ, যস্মাদেবং মহাফলো যোগস্তস্মাৎ সএব যত্নতোঽভ্যসনীয় ইত্যাহ স ইতি সার্দ্ধেন। স যোগো নিশ্চয়েন শাস্ত্রাচার্য্যোপদেশজনিতেন যোক্তব্যোঽভ্যসনীয়ঃ, যদ্যপি শীঘ্রং ন সিধ্যতি তথাপ্যনির্ব্বিণ্ণেন নির্ব্বেদরহিতেন চেতসা যোক্তব্যঃ, দুঃখবুদ্ধ্যা প্রযত্নশৈথিল্যং নির্ব্বেদঃ॥ ২৩ ॥

কিঞ্চ সঙ্কল্পেতি। সঙ্কল্পাৎ প্রভবো যেষাং তান্ যোগপ্রতিকূলান্ সর্ব্বান্ কামানশেষতঃ

শনৈঃ শনৈরুপরমেদ্বুদ্ধ্যা ধৃতিগৃহীতয়া।
আত্মসংস্থং মনঃ কৃত্বা ন কিঞ্চিদপি চিন্তয়েৎ ॥২৫॥

## শাঙ্করভাষ্যম্।

প্রভবাঃ কামাস্তান্ কামাংস্ত্যক্ত্বা পরিত্যজ্য সর্ব্বানশেষতো নির্লেপেন কিঞ্চ মনসৈব বিবেকযুক্তেন ইন্দ্রিয়গ্রামমিন্দ্রিয়সমুদায়ং বিনিয়ম্য নিয়মনং কৃত্বা সমন্ততঃ সমন্তাৎ ॥ ২৪ ॥

শনৈরিতি। শনৈঃ শনৈর্ন সহসা উপরমেৎ উপরতিং কুর্য্যাৎ, কয়া বুদ্ধ্যা, কিংবিশিষ্টয়া ধৃতিগৃহীতয়া ধৃত্যা ধৈর্য্যেণ গৃহীতয়া ধৈর্য্যেণ যুক্তয়েত্যর্থঃ, আত্মনি সংস্থিতং আত্মৈব সর্ব্বং ন ততোঽন্যৎ কিঞ্চিদস্তীত্যেবমাত্মসংস্থং মনঃ কৃত্বা ন কিঞ্চিদপি চিন্তয়েৎ, এষ যোগস্য পরমো বিধিঃ তত্রৈবমাত্মসংস্থং মনঃ কর্ত্তুং প্রবৃত্তো যোগী ॥ ২৫ ॥

## গিরিকৃত টীকা।

নাধ্যাসাধীনানাং ত্যাগস্য যোগানুষ্ঠানশেষত্ববদ্বিবেকযুক্তেন মনসা করণসমুদায়স্য সর্ব্বতো নিয়মনমপি তত্র শেষত্বেন কর্ত্তব্যমিত্যাহ কিঞ্চেতি ॥ ২৪ ॥

কামত্যাগদ্বারেণেন্দ্রিয়াণি প্রত্যাহৃত্য কিং কুর্য্যাদিতি শঙ্কিতারংপ্রত্যাহ শনৈঃ শনৈরিতি। সহসা বিষয়েভ্যঃ সকাশাদুপরমে মনসো ন স্বাস্থ্যং সম্ভবতীত্যভিপ্রেত্যাহ ন সহসেতি। তত্র সাধনং ধৈর্য্যযুক্তো বুদ্ধিরিত্যাহ কয়া ইত্যাদিনা। ভূম্যাদীরব্যাকৃতপর্য্যন্তাঃ প্রকৃতীরষ্ট পূর্ব্বত্র পূর্ব্বত্র ধারণং কৃত্বোত্তরক্রমেণ প্রবিলাপয়েদিতি ভাবঃ। অব্যক্তমাত্মনি প্রবিলাপ্য আত্মমাত্রনিষ্ঠং মনো বিধায় চিন্তয়িতব্যাভাবাদিতিস্বস্থো ভবেদিত্যাহ-আত্মেতি। তত্র সংস্থিতিমেব মনসো বিবৃণোতি আত্মৈবেতি। যোগবিধিমুপক্রম্য কিমিদমুক্তমিত্যাশঙ্ক্যাহ এষ ইতি। যন্মনসো নৈশ্চল্যমিতি শেষঃ। নমু মনসঃ শব্দাদিনিমিত্তানুরোধেন রাগদ্বেষবশাদত্যন্তচঞ্চলস্যাস্থিরস্য তত্র তত্র স্বভাবেন প্রবৃত্তস্য কুতো নৈশ্চল্যং নৈশ্চিন্ত্যঞ্চেতি তত্রাহ তত্রেতি। যোগপ্রারম্ভঃ সপ্তম্যর্থঃ, এবঞ্চেন মনসৈবেত্যাদিঃ উক্তপ্রকারো গৃহ্যতে ॥ ২৫ ॥

## স্বামীকৃত টীকা।

সবাসনাংস্ত্যক্ত্বা মনসৈব বিষয়দোষদর্শিনা সর্ব্বতঃ প্রসরন্তমিন্দ্রিয়সমূহং বিশেষণ নিয়ম্য যোগো যোক্তব্য ইতি পূর্ব্বেণান্বয়ঃ ॥ ২৪ ॥

যদি তু প্রাক্তনকর্ম্মসংস্কারেণ মনো বিচলেত্তর্হি ধারণয়া স্থিরীকুর্য্যাদিত্যাহ শনৈরিতি। ধৃতির্ধারণা তথা গৃহীতয়া বশীকৃতয়া বুদ্ধ্যা আত্মসংস্থমাত্মন্যেব সম্যক্ স্থিতং নিশ্চলং মনঃ কৃত্বা উপরমেৎ, তত্তু শনৈরভ্যাসক্রমেণ ন তু সহসা, উপরমস্বরূপমাহ ন কিঞ্চিদপি চিন্তয়েৎ নিশ্চলে মনসি স্বয়মেব প্রকাশমানপরমানন্দনির্বৃতো ভূত্বা আত্মধ্যানাদপি ন নিবর্ত্তেত ইত্যর্থঃ ॥ ২৫ ॥

যতো যতো নিশ্চলতি মনশ্চঞ্চলমস্থিরম্ ।
ততস্ততো নিয়ম্যৈতদাত্মন্যেব বশং নয়েৎ ॥ ২৬ ॥
প্রশান্তমনসং হ্যেনং যোগিনঃ সুখমুত্তমম্ ।
উপৈতি শান্তরজসং ব্রহ্মভূতমকল্মষম্ ॥ ২৭ ॥

## শাঙ্করভাষ্যম্ ।

যতইতি। যতো যতো যস্মাদ্যস্মান্নিমিত্তাচ্ছব্দাদের্নিশ্চলতি নির্গচ্ছতি স্বভাবদোষান্মনশ্চঞ্চলমত্যর্থং চলমতএবাস্থিরং ততস্ততস্তস্মাচ্ছব্দাদের্নিমিত্তান্নিয়ম্য তত্তন্নিমিত্তং যাথাত্ম্যনিরূপণেনাভাসীকৃত্য বৈরাগ্যভাবনয়া চৈতন্মন আত্মন্যেব বশং নয়েৎ আত্মবশ্যতামাপাদয়েৎ ॥ ২৬ ॥

এবং যোগাভ্যাসবলাদ্যোগিন আত্মন্যেব প্রশাম্যতি মনঃ প্রশান্তেতি। প্রশান্তমনসং প্রকর্ষেণ শান্তং মনো যস্য স প্রশান্তমনাস্তং প্রশান্তমনসং হ্যেনং যোগিনং সুখমুত্তমং নিরতিশয়মুপৈত্যুপগচ্ছতি শান্তরজসং প্রক্ষীণমোহাদিক্লেশরজসমিত্যর্থঃ, ব্রহ্মভূতং জীবন্মুক্তং ব্রহ্মৈব সর্ব্বং ইত্যেবং নিশ্চয়বন্তং ব্রহ্মভূতমকল্মষং ধর্ম্মাধর্ম্মাদিবর্জ্জিতং ॥ ২৭ ॥

## গিরিকৃত টীকা ।

স্বাভাবিকো দোষো মিথ্যাজ্ঞানাধীনো রাগাদিঃ, শব্দাদের্মনসো নিয়মনং কথমিত্যাশঙ্ক্যাহ তত্তন্নিমিত্তমিতি। যাথাত্ম্যনিরূপণং ক্ষয়িষ্ণুত্বদুঃখসংমিশ্রত্বাদ্যালোচনং তেন তত্র তত্র বৈরাগ্যভাবনয়া তত্তদাভাসীকৃত্য ততস্ততো নিয়ম্যৈতন্মন ইতি সম্বন্ধঃ ॥ ২৬ ॥

মনসো বশীকরণেনোপশমে কিং স্যাদিত্যাহ এবমিতি। যোগাভ্যাসো বিষয়বৈবেকদ্বারা মনোনিগ্রহাদ্যাবৃত্তিঃ, প্রশান্তমাত্মন্যেব প্রলীনমিতি যাবৎ, মনস্তদ্বৃত্ত্যোরভাবে স্বরূপভূতসুখাবির্ভাবস্য স্বাপাদৌ প্রসিদ্ধং দ্যোতয়িতুং হিশব্দঃ। মোহাদিক্লেশপ্রতিবন্ধাদ্যোগিনি যথোক্তসুখাপ্রাপ্তিমাশঙ্ক্য মনোবিলয়মুপেত্য পরিহরতি প্রশান্তেতি। তস্যা-

## স্বামিকৃত টীকা ।

এবমপি রজোগুণবশাদ্যদি মনঃ প্রচলেত্তর্হি পুনঃ প্রত্যাহারেণ বশীকুর্য্যাদিত্যাহ যতো যত ইতি। স্বভাবতশ্চঞ্চলং ধার্য্যমাণমপ্যস্থিরং মনো যং যং বিষয়ং প্রতি নির্গচ্ছতি ততস্ততঃ প্রত্যাহৃত্য আত্মন্যেব স্থিরং কুর্য্যাৎ ॥ ২৬ ॥

এবং প্রত্যাহারাদিভি পুনঃ পুনর্মনোবশীকুর্ব্বন্তং রজোগুণক্ষয়ে সতি যোগসুখং প্রাপ্নোতীত্যাহ প্রশান্তেতি। এবমুক্তপ্রকারেণ শান্তং রজো যস্য তং অতএব প্রশান্তং মনো যস্য তমেনং নিষ্কল্মষং ব্রহ্মত্বং প্রাপ্তং যোগিনমুত্তমং সুখং সমাধিসুখং স্বয়মেবোপৈতি প্রাপ্নোতি ॥ ২৭ ॥

যুঞ্জন্নেবং সদাত্মানং যোগী বিগতকল্মষঃ।
সুখেন ব্রহ্মসংস্পর্শমত্যন্তং সুখমশ্নুতে ॥ ২৮ ॥
সর্ব্বভূতস্থমাত্মানং সর্ব্বভূতানি চাত্মনি।
ঈক্ষতে যোগযুক্তাত্মা সর্ব্বত্র সমদর্শনঃ ॥ ২৯ ॥

## শাঙ্করভাষ্যম্।

যুঞ্জন্নিতি। যুঞ্জন্নেবং যথোক্তেন ক্রমেণ যোগী যোগান্তরায়বর্জ্জিতঃ সদা সর্ব্বদাত্মানং যুঞ্জন্ বিগতকল্মষো বিগতপাপঃ সুখেনানায়াসেন ব্রহ্মসংস্পর্শং ব্রহ্মণা পরেণ সংস্পর্শো যস্য তদ্ব্রহ্মসংস্পর্শং সুখমত্যন্তমুৎকৃষ্টং সুখং নিরতিশয়ং সুখমশ্নুতে প্রাপ্নোতি ॥ ২৮ ॥

ইদানীং যোগস্য যৎ ফলং ব্রহ্মৈকত্বদর্শনং সর্ব্বসংসারবিচ্ছেদকারণং তৎ প্রদর্শ্যতে

## গিরিকৃত টীকা।

স্মদাদিবিলক্ষণত্বমাহ ব্রহ্মভূতমিতি। অস্মদাদেরপি স্বতো ব্রহ্মভূতত্বেন তুল্যং জীবন্মুক্তত্বমিত্যাশঙ্ক্যাহ ব্রহ্মৈবেতি। ধর্ম্মাধর্ম্মপ্রতিবন্ধাদযুক্তা যথোক্তসুখপ্রাপ্তিরিত্যাশঙ্ক্যোক্তং অকল্মষমিতি ॥ ২৭ ॥

উত্তমং সুখং যোগিনো ভবতীত্যুক্তং তদেব স্ফুটয়তি যুঞ্জন্নিতি। ক্রমো যথোক্তো মনসেন্দ্রিয়গ্রামমিত্যাদি, যোগান্তরায়ো রাগদ্বেষাদি, সদাত্মানং যুঞ্জন্নিতি সম্বন্ধঃ ॥ ২৮ ॥

পাপপদমুপলক্ষণং পুণ্যস্যাপি সংস্পর্শস্তাদাত্ম্যমৈকরসং উৎকর্ষো বিষয়াসংস্পর্শঃ, যোগমনুতিষ্ঠতো ব্রহ্মভূতস্য সর্ব্বানর্থনিবৃত্তিনিরতিশয়সুখপ্রাপ্তিলক্ষণো দ্বিবিধো মোক্ষো হেতুনা কেন স্যাদিতি শঙ্কমানং প্রত্যাহ ইদানীমিতি। স্বমাত্মানমীক্ষত ইতি সম্বন্ধঃ। সর্ব্বভূতান্যপি তদ্বিশেষণত্বেন পশ্যতি চেন্ন শুদ্ধবস্তুজ্ঞানমিতি নাবিদ্যানিবৃত্তিরিত্যাশঙ্ক্যাহ সর্ব্বভূতানীতি। উক্তে দর্শনে চিত্তসমাধানমুপায়ং দর্শয়তি যোগেতি। বিষমেষূপাধিষু তদনুরোধাদ্বিষমমেব দর্শনং উপদর্শিতদর্শনপ্রতিবন্ধকং প্রত্যুদস্যতি সর্ব্বত্রেতি ॥ ২৯ ॥

## স্বামিকৃত টীকা।

ততশ্চ কৃতার্থো ভবতীত্যাহ যুঞ্জন্নিতি। এবমনেন প্রকারেণ সর্ব্বদা আত্মানং মনো যুঞ্জন্ বশীকুর্ব্বন্ বিশেষেণ সর্ব্বাত্মনা বিগতং কল্মষং যস্য স যোগী সুখেনানায়াসেন ব্রহ্মণঃ সংস্পর্শোঽবিদ্যানিবর্ত্তকঃ সাক্ষাৎকারস্তদেবাত্যন্তং সর্ব্বোত্তমং সুখমশ্নুতে জীবন্মুক্তো ভবতীত্যর্থঃ ॥ ২৮ ॥

ব্রহ্মসাক্ষাৎকারমেব দর্শয়তি সর্ব্বভূতস্থমিতি। যোগেনাভ্যস্যমানেন যুক্তাত্মা সমাহিতচিত্তঃ সর্ব্বত্র সমং ব্রহ্মৈব পশ্যতীতি, তথা স্বমাত্মানমবিদ্যাকৃতদেহাদিপরিচ্ছেদশূন্যং সর্ব্বভূতেষু ব্রহ্মাদিস্থাবরান্তেষবস্থিতং পশ্যতি তানি চ আত্মন্যভেদেন পশ্যতি ॥ ২৯ ॥

যো মাং পশ্যতি সর্ব্বত্র সর্ব্বঞ্চ ময়ি পশ্যতি।
তস্যাহং ন প্রণশ্যামি স চ মে ন প্রণশ্যতি ॥ ৩০ ॥

## শাঙ্করভাষ্যম্।

সর্ব্বেতি। সর্ব্বভূতস্থং সর্ব্বেষু ভূতেষু স্থিতং স্বমাত্মানং সর্ব্বভূতানি চাত্মনি ব্রহ্মাদীনি স্তম্বপর্য্যন্তানি চ সর্ব্বভূতান্যাত্মন্যেকতাং গতানি ঈক্ষতে পশ্যতি যোগযুক্তাত্মা সমাহিতান্তঃ-করণঃ সর্ব্বত্র সমদর্শনঃ সর্ব্বেষু ব্রহ্মাদিস্থাবরান্তেষু বিষমেষু সর্ব্বভূতেষু সমং নির্ব্বিশেষং বিক্রিয়ারহিতং ব্রহ্মাত্মৈকত্ববিষয়ং দর্শনং জ্ঞানং যস্য স সর্ব্বত্র সমদর্শনঃ ॥ ২৯ ॥

এতস্যাত্মৈকত্বদর্শনস্য ফলমুচ্যতে যো মামিতি। যো মাং পশ্যতি বাসুদেবং সর্ব্বস্যাত্মানং সর্ব্বত্র সর্ব্বেষু ভূতেষু পশ্যতি সর্ব্বঞ্চ ব্রহ্মাদিভূতজাতং ময়ি সর্ব্বাত্মনি পশ্যতি তস্যৈবমাত্মৈ-কত্বদর্শিনঃ অহমীশ্বরো ন প্রণশ্যামি ন পরোক্ষতাং গমিষ্যামি স চ মে ন প্রণশ্যতি স চ বিদ্বান্ মে মম বাসুদেবস্য ন প্রণশ্যতি ন পরোক্ষো ভবতি তস্য চ মম চৈকাত্মকত্বাৎ, স্বাত্মা হি নামাত্মনঃ প্রিয়এব ভবতি ॥ ৩০ ॥

---

## গিরিকৃত টীকা।

উক্তস্যৈকত্বজ্ঞানস্য ফলবিকল্পত্বশঙ্কাং শিথিলয়তি এতস্যেতি। তত্রৈকত্বদর্শনমনুব-দতি যো মামিতি। তৎফলমিদানীমুপন্যস্যতি তস্যেতি। জ্ঞানানুবাদভাগং বিভজতে যো মামিতি। তৎফলোক্তিভাগং ব্যাচষ্টে তস্যৈবমিতি। অনেকত্বদর্শিনোঽপীশ্বরো নিত্য-ত্বান্ন প্রণশ্যতীত্যাশঙ্ক্যাহ নেতি। অহং পরমানন্দো ন তং প্রতি পরোক্ষো ভবামীত্যর্থঃ। স চেত্যাদি ব্যাচষ্টে বিদ্বানিতি। বিদ্বানিবাবিদ্বানপীশ্বরস্য ন নশ্যতীত্যাশঙ্ক্যোক্তং নেত্যাদিনা। অবিদুষশ্চ স্বরূপেণ সতোঽপি ব্যবহিতত্বাদবিদ্যয়া নষ্টপ্রায়তেত্যর্থঃ। ঈশ্ব-রস্য বিদুষশ্চ পরস্পরমপরোক্ষত্বে হেতুমাহ তস্য চেতি। আত্মৈকত্বেঽপি কথং মিথোঽ-পরোক্ষত্বং তত্রাহ স্বাত্মেতি ॥ ৩০ ॥

বিদ্বদীশ্বরয়োরেকত্বানুবাদেন বিদ্যাফলং বিবৃণোতি যস্মাচ্চেতি। তস্মাদেকত্বদর্শনার্থং প্রযতিতব্যমিতি শেষঃ। পূর্ব্বার্দ্ধেনানূদ্যোত্তরার্দ্ধেন ফলবিধিরিতি মত্বাহ ইত্যেতদিতি। রাগাদিরহিতস্য যমনিয়মাদিসংস্কারবতঃ স্বৈরপ্রবৃত্ত্যসম্ভবেঽপি তামঙ্গীকৃত্য জ্ঞানং স্তৌতি

## স্বামিকৃত টীকা।

এবং ভূতাত্মজ্ঞানে চ সর্ব্বভূতাত্মতয়া মদুপাসনং মুখ্যং কারণমিত্যাহ যো মামিতি। মাং পরমেশ্বরং সর্ব্বত্র ভূতমাত্রে যঃ পশ্যতি সর্ব্বং চ প্রাণিমাত্রং ময়ি যঃ পশ্যতি তস্যাহং ন প্রণশ্যামি অদৃশ্যো ন ভবামি স চ মমাদৃশ্যো ন ভবতি প্রত্যক্ষো ভূত্বা কৃপাদৃষ্ট্যা তং বিলোক্যানুগৃহ্নামীত্যর্থঃ ॥ ৩০ ॥

সর্ব্বভূতস্থিতং যো মাং ভজত্যেকত্বমাস্থিতঃ।
সর্ব্বথা বর্ত্তমানোঽপি স যোগী ময়ি বর্ত্ততে॥ ৩১ ॥
আত্মৌপম্যেন সর্ব্বত্র সমং পশ্যতি যোঽর্জ্জুন।
সুখং বা যদি বা দুঃখং স যোগী পরমো মতঃ॥ ৩২ ॥

## শাঙ্করভাষ্যম্।

যস্মাচ্চাহমেব স সর্ব্বাত্মৈকত্বদর্শী ইত্যেতৎ পূর্ব্বশ্লোকার্থং সম্যগ্দর্শনমনূদ্য তৎফলং মোক্ষোঽভিধীয়তে সর্ব্বেতি। সর্ব্বথা সর্ব্বপ্রকারৈর্ব্বর্ত্তমানোঽপি সম্যগ্দর্শী যোগী ময়ি বৈষ্ণবে পরমে পদে বর্ত্ততে নিত্যমুক্ত এব স ন মোক্ষং প্রতি কেনচিৎ প্রতিবধ্যত-ইত্যর্থঃ॥ ৩১ ॥

কিঞ্চান্যৎ আত্মেতি। আত্মৌপম্যেন আত্মা স্বয়মেব উপমীয়তেইতি উপমা তস্যাঃ উপমায়াঃ ভাব ঔপম্যং তেন আত্মৌপম্যেন সর্ব্বত্র সর্ব্বভূতেষু সমং তুল্যং পশ্যতি যোঽর্জ্জুন স চ কিং সমং পশ্যতীত্যুচ্যতে যথা মম সুখমিষ্টং তথা সর্ব্বপ্রাণিনাং সুখমনুকূলং বাশব্দ-শ্চার্থে যদি বা যচ্চ দুঃখং মম প্রতিকূলমনিষ্টং যথা তথা সর্ব্বপ্রাণিনাং দুঃখমনিষ্টং প্রতি-কূলমিত্যেবমাত্মৌপম্যেন সুখদুঃখে অনুকূলপ্রতিকূলে তুল্যতয়া সর্ব্বভূতেষু সমং পশ্যতি ন কস্যচিৎ প্রতিকূলমাচরত্যহিংসক ইত্যর্থঃ, যএবমহিংসকঃ সম্যগ্দর্শননিষ্ঠঃ স যোগী পরম উৎকৃষ্টো মতোঽভিপ্রেতঃ সর্ব্বযোগিনাং মধ্যে॥ ৩২ ॥

## গিরিকৃত টীকা।

সর্ব্বথেতি। প্রতিভানতোঽপি যথেষ্টচেষ্টাঙ্গীকারে কুতো জ্ঞানবতো নিত্যমুক্তত্বং প্রাতী-তিকদুরাচারপ্রতিবন্ধাদিত্যাশঙ্ক্যাহ ন মোক্ষমিতি॥ ৩১ ॥

স্বৈরাচরণস্যাপ্রতিবন্ধকত্বকথনাৎ পরপীড়নস্য যোগিনঃ সম্যগ্দর্শনং প্রত্যক্প্রতিবন্ধ-কত্বপ্রসক্তাবুক্তং কিঞ্চেতি। অন্যদপি কিঞ্চিদুচ্যতে, পরমযোগিনো নির্দ্দেশদ্বারা যোগ-

## স্বামিকৃত টীকা।

তান চৈবংভূতো বিধিকিঙ্করঃ স্যাদিত্যাহ সর্ব্বভূতস্থিতমিতি। সর্ব্বভূতেষু স্থিতং মাম-ভেদমাস্থিত আশ্রিতো যো ভজতি স যোগী জ্ঞানী সন্ সর্ব্বথা কর্ম্মপরিত্যাগেনাপি বর্ত্তমানো ময্যেব বর্ত্ততে মুচ্যতে তু ব্রশ্নতীত্যর্থঃ॥ ৩১ ॥

এবঞ্চ মাং ভজতাং যোগিনাং মধ্যে সর্ব্বভূতানুকম্পী শ্রেষ্ঠ ইত্যাহ আত্মৌপম্যেনেতি। আত্মৌপম্যেন স্বসাদৃশ্যেন যথা মম সুখং প্রিয়ং দুঃখঞ্চাপ্রিয়ং তথান্যেষামপীতি সর্ব্বত্র সমং পশ্যন্ সুখমেব সর্ব্বেষাং যো বাঞ্ছতি ন তু কস্যাপি দুঃখং স যোগী শ্রেষ্ঠো মমাভিমত-ইত্যর্থঃ॥ ৩২ ॥

অর্জ্জুনউবাচ—যোঽয়ং যোগস্ত্বয়া প্রোক্তঃ সাম্যেন মধুসূদন ।
এতস্যাহং ন পশ্যামি চঞ্চলত্বাৎ স্থিতিং স্থিরাম্ ॥ ৩৩ ॥
চঞ্চলং হি মনঃ কৃষ্ণ প্রমাথি বলবদ্দৃঢ়ম্ ।
তস্যাহং নিগ্রহং মন্যে বায়োরিব সুদুষ্করম্ ॥ ৩৪ ॥

## শাঙ্করভাষ্যম্ ।

এতস্য যথোক্তস্য সম্যগদর্শনলক্ষণস্য যোগস্য দুঃসম্পাদ্যতামালক্ষ্য শুশ্রূষুঃ ধ্রুবং তৎপ্রাপ্ত্যুপায়মর্জ্জুনউবাচ যোঽয়মিতি। যোঽয়ং যোগস্ত্বয়া প্রোক্তঃ সাম্যেন সমত্বেন হে মধুসূদন এতস্য যোগস্যাহং ন পশ্যামি নোপলভে চঞ্চলত্বান্মনসঃ কিং স্থিরামচলাং স্থিতিং প্রসিদ্ধমেতৎ ॥ ৩৩ ॥

চঞ্চলমিতি। চঞ্চলং হি মনঃ কৃষ্ণ ইতি কৃষতের্বিলেখনার্থস্য রূপং ভক্তজনপাপাদিদোষাকর্ষণাৎ কৃষ্ণ, হি যস্মান্মনঃ চঞ্চলং ন কেবলমত্যর্থং চঞ্চলং প্রমাথি চ প্রমথনশীলং প্রমথ্নাতি শরীরমিন্দ্রিয়াণি চ বিক্ষিপতি পরবশীকরোতি কিঞ্চ বলবৎ প্রবলং ন কেন-

## গিরিকৃত টীকা ।

মাহাত্ম্যমিত্যর্থঃ। উপমৈবৌপম্যমাত্মা চ তদৌপম্যঞ্চ তেন সর্ব্বভূতেষু যঃ সমং পশ্যতীত্যুক্তং তদেব সমদর্শনং প্রশ্নপূর্ব্বকং বিবৃণোতি কিমিত্যাদিনা। বিকল্পার্থত্বং বারয়তি বাশব্দইতি। উপদর্শিতসমদর্শনফলমভিলপতি ন কস্যচিদিতি। কিমপেক্ষয়া তস্য পরমত্বং তত্রাহ সর্ব্বেতি ॥ ৩২ ॥

মনশ্চঞ্চলমস্থিরমিত্যুপশ্রুত্য নির্ব্বিশেষে চিত্তস্থৈর্য্যং দুঃশকমিতি মন্বানস্তদুপায়বুভুৎসয়া পৃচ্ছতীতি প্রশ্নমুত্থাপয়তি এতস্যেতি। তৎপ্রাপ্ত্যুপায়ং শুশ্রূষুরিতি মন্বানঃ মনশ্চঞ্চলত্বেঽপি তন্নিগ্রহদ্বারা যোগস্থৈর্য্যং সম্পাদ্যতামিত্যাশঙ্ক্যাহ এতস্যেতি। প্রসিদ্ধমিতি সম্বন্ধঃ ॥ ৩৩ ॥

মনসশ্চঞ্চলত্বেঽপি কৃষ্ণপদপরিনিষ্পত্তিপ্রকারং সূচয়তি কৃষ্ণইতীতি। কথং কর্ষকত্বমাপ্তকামস্য ভগবতঃ সম্ভবতীত্যাশঙ্ক্যাহ ভক্তেতি। ঐহিকামুষ্মিকসর্ব্বসম্পদামাকর্ষণশীল-

## স্বামিকৃত টীকা ।

উক্তলক্ষণস্য যোগস্যাসম্ভবং মন্বানোঽর্জ্জুনউবাচ যোঽয়মিতি। সাম্যেন মনসো লয়বিক্ষেপশূন্যতয়া কেবলাত্মাকারাবস্থানেন যোঽয়ং যোগস্ত্বয়া প্রোক্তএতস্য যোগস্য স্থিরাং দীর্ঘকালাং স্থিতিং ন পশ্যামি মনসশ্চঞ্চলত্বাৎ ॥ ৩৩ ॥

এতৎ স্ফুটয়তি চঞ্চলমিতি। চঞ্চলং স্বভাবেনৈব চপলং, কিঞ্চ প্রমাথি প্রমথনশীলং, দেহেন্দ্রিয়ক্ষোভকরমিত্যর্থঃ, কিঞ্চ বলবদ্বিচারেণাপি জেতুমশক্যং কিঞ্চ দৃঢ়ং বিষয়বাসনা-

শ্রীভগবানুবাচ—অসংশয়ং মহাবাহো মনো দুর্নিগ্রহং চলম্।
অভ্যাসেন তু কৌন্তেয় বৈরাগ্যেণ চ গৃহ্যতে ॥ ৩৫ ॥

## শাঙ্করভাষ্যম্।

চিন্নিয়ন্তং শক্যং দুর্নিবারত্বাৎ কিঞ্চ,দৃঢ়ং তন্তুনাগবদচ্ছেদ্যং তস্যৈবম্ভূতস্য মনসোঽহং নিগ্রহং রোধং মন্যে বায়োরিব যথা বায়োর্দুষ্করো নিগ্রহস্ততোঽপি মনসো দুষ্করং মন্য ইত্যভিপ্রায়ঃ ॥ ৩৪ ॥

শ্রীভগবানুবাচ এবমেতদ্যথা ব্রবীষি অসংশয়ং নাস্তি সংশয়ো মনো দুর্নিগ্রহং চঞ্চলমিত্যত্র হে মহাবাহো কিন্তু অভ্যাসেন তু অভ্যাসো নাম চিত্তভূমৌ কস্যাঞ্চিৎ সমান প্রত্যয়াবৃত্তিশ্চিত্তস্য, বৈরাগ্যেণ চ গৃহ্যতে বৈরাগ্যং নাম দৃষ্টাদৃষ্টেষু ভোগেষু দোষদর্শনাভ্যাসাৎ বৈতৃষ্ণ্যং বিষযেষু তেন চ বৈরাগ্যেণ গৃহ্যতে বিক্ষেপরূপঃ প্রচারশ্চিত্তস্যৈবং তন্মনোগৃহ্যতে নিরুধ্যত ইত্যর্থঃ ॥ ৩৫ ॥

## গিরিকৃত টীকা।

স্যাচ্চেতি দ্রষ্টব্যং। প্রমথ্নাতি ক্ষোভযতি, তদেব ক্ষোভকত্বং প্রকটয়তি বিক্ষিপতীতি দুর্নিবারত্বমভিপ্রেত্যাদ্বিষয়াদাক্রষ্টুমশক্যত্বং। বিশেষণান্তরমাহ কিঞ্চেতি। অচ্ছেদ্যত্বং বিশেষণান্তরমাহ কিঞ্চ দৃঢ়মিতি। তন্তুনাগো বরুণপাশশব্দিতো জলচারী পদার্থোঽত্যন্তদৃঢ়তয়া ছেত্তুমশক্যত্বেন প্রসিদ্ধো বিবক্ষিতঃ। বায়োরিত্যুক্তং ব্যনক্তি যথেতি ॥ ৩৪ ॥

প্রশ্নমঙ্গীকৃত্য প্রতিবচনমুত্থাপয়তি শ্রীভগবানিতি। কুত্র সংশয়রাহিত্যং তত্রাহ মন ইতি। কথং তর্হি মনোনিরোধো ভবতি তত্রাহ কিন্ত্বিতি। অভ্যাসস্বরূপং সামান্যেন নিদর্শয়তি অভ্যাসো নামেতি। কস্যাঞ্চিচ্চিত্তভূমাবিত্যবিশেষিতো ধ্যেয়ো বিষয়ো নির্দিশ্যতে, সমানপ্রত্যয়াবৃত্তির্বিজাতীয়প্রত্যয়ান্তরিতেতি শেষঃ, চিত্তস্যেতি ষষ্ঠী প্রত্যয়স্য তদ্বিকারত্বদ্যোতনার্থং। বৈরাগ্যস্বরূপং নিরূপয়তি বৈরাগ্যমিতি। তেষু বৈতৃষ্ণ্যং বৈরাগ্যং নামেতি সম্বন্ধঃ। তত্র হেতুং সূচয়তি দোষেতি। বিষয়েষু বিতৃষ্ণা বিষয়েষু দোষদর্শনমভ্যস্যতে তেন বৈতৃষ্ণ্যং জায়তে তেন নিগৃহ্যমাণং নির্দিশতি বিক্ষেপেতি।

## স্বামিকৃতটিকা।

সুবদ্ধতয়া দুর্ভেদ্যং অতো যথাকাশে দোধূয়মানস্য বায়োঃ কুম্ভাদিষু নিরোধনমশক্যং তথাহং তস্য মনসো নিগ্রহং নিরোধং সুদুষ্করং সর্ব্বথা কর্ত্তুমশক্যং মন্যে ॥ ৩৪ ॥

তদুক্তং চঞ্চলাদিকমঙ্গীকৃত্যৈব মনোনিগ্রহোপায়ং শ্রীভগবানুবাচ অসংশয়মিতি। চঞ্চলত্বাদিনা মনো নিরোদ্ধুমশক্যমিতি যদ্বদসি এতন্নিঃসংশয়মেব তথাপি তু অভ্যাসেন পরমাত্মাকারয়া বৃত্ত্যা বিষয়বৈতৃষ্ণ্যেণ চ গৃহ্যতে, অভ্যাসেন লয়প্রতিবন্ধাদ্বৈরাগ্যেণ চ বিক্ষেপপ্রতিবন্ধাদুপরতবৃত্তিকং সৎ পরমাত্মাকারেণ পরিণতং তিষ্ঠতীত্যর্থঃ, তদুক্তং যোগ-

অসংযতাত্মনা যোগো দুষ্প্রাপ ইতি মে মতিঃ।
বশ্যাত্মনা তু যততা শক্যোঽবাপ্তুমুপায়তঃ ॥ ৩৬ ॥

## শাঙ্করভাষ্যম্।

যঃ পুনরসংযতাত্মা তেন অসংযতেতি। অসংযতাত্মনা অভ্যাসবৈরাগ্যাভ্যাং অসংযত আত্মা অন্তঃকরণং যস্য সোঽয়মসংযতাত্মা তেনাসংযতাত্মনা যোগো দুষ্প্রাপো দুষ্প্রাপ্য ইতি মে মতিঃ যস্য পুনর্বশ্যাত্মা অভ্যাসবৈরাগ্যাভ্যাং বশ্যত্বমাপাদিত আত্মা মনো যস্য সোঽয়ং বশ্যাত্মা তেন বশ্যাত্মনা তু যততা ভূয়োঽপি প্রযত্নং কুর্ব্বতা শক্যোঽবাপ্তুং যোগ উপায়তো-যথোক্তাদুপায়াৎ ॥ ৩৬ ॥

## গিরিকৃত টীকা।

তস্মিন্ গৃহীতে নিরুদ্ধে মনোনিরোধেঽস্য কিং স্যাদিত্যপেক্ষায়ামাহ এবমিতি। অভ্যা-সহেতুকবৈরাগ্যদ্বারা চিত্তপ্রচারনিরোধে নিরুদ্ধবৃত্তিকং মনোবিষয়বিমুখমন্তর্নিষ্ঠং ভবতী-ত্যর্থঃ ॥ ৩৫ ॥

সংযতাত্মনো যোগপ্রাপ্তিঃ সুলভেত্যুক্ত্বা ব্যতিরেকং দর্শয়তি যঃ পুনরিতি। ব্যতিরে-কোপন্যাসপরং পূর্ব্বার্দ্ধমনূদ্য ব্যাকরোতি অসংযতেতি। পূর্ব্বোক্তান্বয়ব্যাখ্যানপরমুত্ত-রার্দ্ধং ব্যাচষ্টে যস্যিত্যাদিনা। অন্তঃকরণস্য স্ববশত্বে সিদ্ধেঽপি বৈরাগ্যাদাবাস্থাবতা ভবি-তব্যমিত্যাহ যততেতি। উপায়ো বৈরাগ্যাদিপূর্ব্বকো মনোনিরোধঃ ॥ ৩৬ ॥

প্রশ্নান্তরমুত্থাপয়তি তত্রেত্যাদিনা। মনোনিরোধস্য দুঃখসাধ্যত্বমাশঙ্ক্য পরিহৃতে সতি প্রষ্টা পুনরবকাশং প্রতিলভ্যোবাচেতি সম্বন্ধঃ। লোকদ্বয়প্রাপককর্ম্মসম্ভবে কুতো যোগিনো নাশাশঙ্কেত্যাশঙ্ক্যাহ যোগাভ্যাসেতি। তথাপি যোগানুষ্ঠানপরিপাকপরিপ্রা-প্তিসম্যগ্দর্শনসামর্থ্যান্মোক্ষোপপত্তৌ কুতস্তস্য নাশাশঙ্কেতি চেন্নৈবমনেকান্তরায়বত্ত্বা-দ্যোগস্যেহ জন্মনি প্রায়েণ সংসিদ্ধেরসিদ্ধিরিত্যভিসন্ধায়াহ যোগসিদ্ধীতি। অভ্যুদয়-নিঃশ্রেয়সবহির্ভাবো নাশো যোগমার্গে তৎফলস্য সম্যগ্দর্শনস্যাদর্শনাদিতি শেষঃ। তর্হি ততো বহির্মুখত্বমেবাত্যন্তিকং সম্বৃত্তমিত্যাশঙ্ক্যাহ শ্রদ্ধয়েতি। তর্হি যোগমার্গমাশ্রয়তে নেত্যাহ যোগাদিতি। মরণকালে ব্যাকুলেন্দ্রিয়স্য জ্ঞানসাধনানুষ্ঠানাবকাশাভাবাদ্ যুক্ত

## স্বামিকৃত টীকা।

শান্তে, মনসো বৃত্তিশূন্যস্য ব্রহ্মাকারতয়া স্থিতিঃ। যাসংপ্রজ্ঞাতনামাসৌ সমাধিরভিধী-য়ত ইতি ॥ ৩৫ ॥

এতাবাংস্থির নিশ্চয় ইত্যাহ অসংযতেতি। উক্তপ্রকারেণাভ্যাসবৈরাগ্যাভ্যামসংযত আত্মা চিত্তং যস্য তেন যোগো দুষ্প্রাপ্যঃ প্রাপ্তুমশক্যঃ অভ্যাসবৈরাগ্যাভ্যাং বশ্যো বশবর্ত্তী আত্মা চিত্তং যস্য তেন পুরুষেণ পুনশ্চানেনৈবোপায়েন প্রযত্নং কুর্ব্বতা যোগঃ প্রাপ্তুং শক্যঃ ॥৩৬॥

অর্জ্জুনউবাচ—অযতিঃ শ্রদ্ধয়োপতো যোগাচ্চলিতমানসঃ।
অপ্রাপ্য যোগসংসিদ্ধিং কাং গতিং কৃষ্ণ গচ্ছতি ॥ ৩৭ ॥
কচ্চিন্নোভয়বিভ্রষ্টশ্ছিন্নাভ্রমিব নশ্যতি।
অপ্রতিষ্ঠো মহাবাহো বিমূঢ়ো ব্রহ্মণঃ পথি ॥ ৩৮ ॥

## শাঙ্করভাষ্যম্।

তত্র যোগাভ্যাসাঙ্গীকরণেন পরলোকেহলোকপ্রাপ্তিনিমিত্তানি কর্ম্মাণি সন্ন্যস্তানি যোগসিদ্ধিফলঞ্চ মোক্ষসাধনং সম্যগ্দর্শনং ন প্রাপ্তমিতি যোগী যোগমার্গান্মরণকালে চলিতচিত্ত ইতি তস্য নাশমাশঙ্ক্যার্জ্জুনউবাচ অযতিরিতি। অযতিরপ্রযত্নবান্ যোগমার্গে শ্রদ্ধয়াস্তিক্যবুদ্ধ্যা যোগতো যোগাদন্তকালেঽপি চলিতং মানসং মনো যস্য স চলিতমানসো ভ্রষ্টস্মৃতিঃ সোঽপ্রাপ্য যোগসংসিদ্ধিং যোগফলং সম্যগ্দর্শনং, কাং গতিং হে কৃষ্ণ গচ্ছতি ॥ ৩৭ ॥

কচ্চিদিতি। কচ্চিৎ কিং নোভয়বিভ্রষ্টঃ কর্ম্মমার্গাৎ যোগমার্গাচ্চ বিভ্রষ্টঃ সন্ ছিন্না ভ্রমিব নশ্যতি কিং বা ন নশ্যতি অপ্রতিষ্ঠো নিরাশ্রয়ো হে মহাবাহো বিমূঢ়ঃ সন্ ব্রহ্মপ্রাপ্তি-মার্গে ॥ ৩৮ ॥

## গিরিকৃত টীকা।

তত্তশ্চলিতমানসত্বমিত্যাশঙ্ক্যাহ ভ্রষ্টেতি। গম্যত ইতি গতিঃ পুরুষার্থঃ, সামান্যপ্রশ্নমন্ত-র্ভাব্য বিশেষপ্রশ্নো দ্রষ্টব্যঃ ॥ ৩৭ ॥

প্রশ্নমেব বিবৃণোতি কচ্চিদিতি। প্রশস্তপ্রশ্নার্থত্বং কচ্চিদিত্যস্যাঙ্গীকৃত্য ব্যাচষ্টে কিমিতি। উভয়বিভ্রষ্টত্বং স্পষ্টয়তি কর্ম্মেত্যাদিনা। বায়ুনা ছিন্নং বিশকলিতমভ্রং যথা

## স্বামিকৃত টীকা।

অভ্যাসবৈরাগ্যাভাবেন কথঞ্চিদপ্রাপ্তসম্যগ্‌জ্ঞানঃ কিং ফলং প্রাপ্নোতীত্যর্জ্জুনউবাচ অযতিরিতি। প্রথমং শ্রদ্ধয়োপেতএব যোগে প্রবৃত্তঃ নতু মিথ্যাচারতয়া ততঃ পরন্তু যতিঃ সম্যক্ ন যততে শিথিলাভ্যাসইত্যর্থঃ তথা যোগাচ্চলিতং মানসং বিষয়প্রবণং চিত্তং যস্য মন্দবৈরাগ্যশৈথিল্যাদ্‌যোগস্য সংসিদ্ধিং ফলং জ্ঞানমপ্রাপ্য কাং গতিং প্রাপ্নোতি ॥ ৩৭ ॥

প্রশ্নাভিপ্রায়ং বিবৃণোতি কচ্চিদিতি। কর্ম্মণামীশ্বরেঽর্পিতত্বাদনস্থানাচ্চাভাবাৎ কর্ম্মফলং স্বর্গাদিকং ন প্রাপ্নোতি যোগনিষ্পত্তেশ্চ মোক্ষং ন প্রাপ্নোতি এবমুভয়স্মাদ্ভ্রষ্টঃ অপ্রতিষ্ঠো নিরাশ্রয়ঃ অতএব ব্রহ্মপ্রাপ্ত্যুপায়ে পথি মার্গে বিমূঢ়ঃ সন্ কচ্চিৎ কিং ন নশ্যতি কিম্বা নশ্যতীত্যর্থঃ, নাশে দৃষ্টান্তঃ যথা ছিন্নমভ্রং পূর্ব্বস্মাদভ্রাদ্বিশ্লিষ্টমভ্রান্তরমপ্রাপ্তং মধ্যএব বিলীয়তে তদ্বদিত্যর্থঃ ॥ ৩৮ ॥

এতন্মে সংশয়ং কৃষ্ণ ছেত্তু মর্হস্যশেষতঃ।
ত্বদন্যঃ সংশয়স্যাস্য ছেত্তা ন হ্যুপপদ্যতে ॥ ৩৯ ॥

শ্রীভগবানুবাচ—পার্থ নৈবেহ নামুত্র বিনাশস্তস্য বিদ্যতে।
ন হি কল্যাণকৃৎ কশ্চিদ্দুর্গতিং তাত গচ্ছতি ॥ ৪০ ॥

---

## শাঙ্করভাষ্যম্।

এতদিতি। এতন্মে মম সংশয়ং কৃষ্ণ ছেত্তুমপনেতুমর্হসি অশেষতঃ ত্বদন্য ত্বত্তোঽন্যঃ ঋষির্দেবো বা ছেত্তা নাশয়িতা সংশয়স্যাস্য ন হি যস্মাদুপপদ্যতে ন সম্ভবতি অতস্ত্বমেব ছেত্তুমর্হসীত্যর্থঃ ॥ ৩৯ ॥

পার্থেতি। হে পার্থ নৈব ইহ লোকে নামুত্র পরস্মিন্ বা লোকে বিনাশস্তস্য বিদ্যতে নাস্তি নাশো নাম পূর্ব্বস্মাদ্ধীনজন্মপ্রাপ্তিঃ স তস্য যোগভ্রষ্টস্য নাস্তি, ন হি যস্মাৎ কারণাৎ কল্যাণকৃৎ কশ্চিদ্দুর্গতিং কুৎসিতাং গতিং হে তাত তনোত্যাত্মানং পুত্ররূপেণেতি পিতা তাতউচ্যতে পিতৈব পুত্রইতি পুত্রোঽপি তাতউচ্যতে শিষ্যোঽপি পুত্রতুল্যউচ্যতে, যতো ন গচ্ছতি ॥ ৪০ ॥

## গিরিকৃত টীকা।

নশ্যতি তদ্বদিত্যাহ ছিন্নেতি। নাশাশঙ্কানিমিত্তমাহ নিরাশ্রয়ইতি। কর্ম্মমার্গরূপাবষ্টম্ভা-ভাবেঽপি জ্ঞানমার্গাবষ্টম্ভস্তস্য ভবিষ্যতীত্যাশঙ্ক্যাহ বিমূঢ়ঃ সন্নিতি। ন হি কর্ম্মিণং প্রতীয়-মাশঙ্কা যুক্তাভিলাষং তস্যেশ্বরে সমর্প্যার্ব্বাক্ কর্ম্মানুতিষ্ঠতো নিরূপচারেণ তদ্ভ্রংশবচনাসম্ভ-বাৎ সর্ব্বকর্ম্মসন্ন্যাসিনস্তু বিহিতানাং ত্যাগাৎ জ্ঞাতোপায়াচ্চ বিচ্যুতেরনর্থপ্রাপ্তিশঙ্কাযু-ক্তেতি ভাবঃ ॥ ৩৮ ॥

যথোপদর্শিতসংশয়াপাকরণার্থমর্জ্জুনো ভগবন্তং প্রেরয়ন্নাহ এতদিতি। মত্তোঽন্যঃ কশ্চিদৃষির্ব্বা দেবোবা ত্বদীয়ং সংশয়ং ছেৎস্যতীত্যাশঙ্ক্যাহ ত্বদন্যইতি। অন্যস্য সংশয়চ্ছে-ত্তুরভাবে ফলিতমাহ অতইতি ॥ ৩৯ ॥

যোগিনো নাশাশঙ্কাং পরিহরন্নুত্তরমাহ ভগবানিতি। যদুক্তমুভয়ভ্রষ্টো যোগী নশ্যতীতি তত্রাহ পার্থেতি। তত্র হেতুমাহ ন হীতি। যোগিনোমার্গদ্বয়াদ্বিভ্রষ্টস্যেহিকোনাশঃ

## স্বামিকৃত টীকা।

ত্বয়ৈব সর্ব্বজ্ঞেনায়ং মম সন্দেহো নিরসনীয়ঃ ত্বত্তোঽন্যস্তু এতৎসন্দেহনিবর্ত্তকো নাস্তী-ত্যাহ এতদিতি। এতৎ ছেত্তা নিবর্ত্তকঃ স্পষ্টমন্যৎ ॥ ৩৯ ॥

অত্রোত্তরং শ্রীভগবানুবাচ পার্থেতি সার্দ্ধৈশ্চতুর্ভিঃ। ইহ লোকে নাশ উভয়ভ্রংশাৎ পাতিত্যং অমুত্র পরলোকে নাশো নরকপ্রাপ্তিস্তদুভয়ং তস্য নাস্ত্যেব যতঃ কল্যাণকৃৎ

প্রাপ্য পুণ্যকৃতাং লোকানুষিত্বা শাশ্বতীঃ সমাঃ।
শুচীনাং শ্রীমতাং গেহে যোগভ্রষ্টোঽভিজায়তে ॥ ৪১ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চাস্য ভবতি প্রাপ্যেতি। যোগমার্গেষু প্রবৃত্তঃ সন্ন্যাসী সামর্থ্যাৎ প্রাপ্য গত্বা পুণ্যকৃতামশ্বমেধাদিযাজিনাং লোকাংস্তত্র চ উষিত্বা বাসমনুভূয় শাশ্বতীর্নিত্যাঃ সমাঃ সম্বৎসরান্ তদ্ভোগক্ষয়ে শুচীনাং যথোক্তকারিণাং শ্রীমতাং বিভূতিমতাং গেহে গৃহে যোগভ্রষ্টোঽভিজায়তে ॥ ৪১ ॥

## গিরিকৃত টীকা।

শিষ্টাগর্হালক্ষণো ন ভবতীতি শ্রদ্ধাদেঃ সম্ভাবাত্তথাপি কথমামুষ্মিকনাশশূন্যত্বমিত্যাশঙ্ক্য তদ্রূপনিরূপণপূর্ব্বকং তদভাবং প্রতিজানীতে নাশো নামেতি। তত্র হেতুভাগং বিভজতে ন হীত্যাদিনা। উভয়ভ্রষ্টস্যাপি শ্রদ্ধেন্দ্রিয়সংযমাদেঃ স্বামিকৃতশ্রবণাদেশ্চভাবাদুপপন্নং শুভকৃত্বং। তাতেতি কথং পুত্রস্থানীয়ঃ শিষ্যঃ সম্বোধ্যতে পিতুরের তাতশব্দত্বাদিত্যাশঙ্ক্যাহ তনোতি। তেন পুত্রস্থানীয়স্য শিষ্যস্য তাতেতি সম্বোধনমবিরুদ্ধমিত্যর্থঃ ন গচ্ছতি কুৎসিতাং গতিং কল্যাণকরত্বাদিতি নাশাভাবঃ ॥ ৪০ ॥

যোগভ্রষ্টস্য লোকদ্বয়েঽপি নাশাভাবে কিং ভবতীতি পৃচ্ছতি কিংত্বিতি। শ্লোকেনোত্তরমাহ প্রাপ্যেতি। কথং সন্ন্যাসীতি বিশেষ্যতে তত্রাহ সামর্থ্যাদিতি। কর্ম্মণি ব্যাপৃতস্য কর্ম্মিণো যোগমার্গপ্রবৃত্ত্যানুপপত্তিস্তৎপ্রবৃত্তাবপি ফলাভিলাষবিকলস্যেশ্বরে সমর্পিতসর্ব্বকর্ম্মণস্তদ্ভ্রংশাশঙ্কানবকাশাদিত্যর্থঃ, সমানাং নিত্যত্বং মানুষসমাবিলক্ষণত্বং, বৈরাগ্যাভাববিবক্ষয়া বিভূতিমতাং গৃহে জন্মেতি বিশিষ্যতে ॥ ৪১ ॥

শ্রদ্ধাবৈরাগ্যাদিকল্যাণাধিক্যে পক্ষান্তরমাহ অথ বেতি। যোগিনামিতি কর্ম্মিণাং গ্রহণং মাভূদিতি বিশিনষ্টি ধীমতামিতি। ব্রহ্মবিদ্যাবতাং শুচীনাং দরিদ্রানাং কুলে জন্ম দুর্লভং প্রমাদকারণাভাবাদিত্যাহ এতদ্ধিতি। কিমপেক্ষ্যাস্য জন্মনো দুঃখলভ্যাদপি দুঃখলভ্যতরত্বং তদাহ পূর্ব্বমিতি। যদ্যপি বিভূতিমতাং শুচীনাং গৃহে জন্ম দুঃখলভ্যং তথাপি

## স্বামিকৃত টীকা।

শুভকারী কশ্চিদপি দুর্গতিং ন গচ্ছতি অয়ঞ্চ শুভকারী শ্রদ্ধয়া যোগে প্রবৃত্তত্বাৎ, তাতেতি লোকরীত্যা উপলালয়ন্ সম্বোধয়তি ॥ ৪০ ॥

তর্হি কিমসৌ প্রাপ্নোতীত্যপেক্ষায়ামাহ প্রাপ্যেতি। পুণ্যকারিণামশ্বমেধাদিযাজিনাং লোকান্ প্রাপ্য তত্র শাশ্বতীঃ সমা বহূন্ সংবৎসরানুষিত্বা বাসসুখমনুভূয় শুচীনাং সদাচারাণাং শ্রীমতাং ধনিনাং গেহে স যোগভ্রষ্টো জন্ম প্রাপ্নোতি ॥৪১॥

অথ বা যোগিনামেব কুলে ভবতি ধীমতাম্।
এতদ্ধি দুর্ল্লভতরং লোকে জন্ম যদীদৃশম্ ॥ ৪২ ॥
তত্র তং বুদ্ধিসংযোগং লভতে পৌর্ব্বদেহিকম্।
যততে চ ততো ভূয়ঃ সংসিদ্ধৌ কুরুনন্দন ॥ ৪৩ ॥

## শাঙ্করভাষ্যম্।

অথেতি। অথ বা শ্রীমতাং কুলাদন্যস্মিন্ যোগিনামেব দরিদ্রাণাং কুলে ভবতি জায়তে ধীমতাং বুদ্ধিমতাং এতদ্ধি জন্ম যদ্দরিদ্রাণাং যোগিনাং কুলে দুর্ল্লভতরং দুঃখেন লভ্যতরং পূর্ব্বমপেক্ষ্য লোকে জন্ম যদীদৃশং যথোক্তবিশেষণে কুলে যস্মাৎ ॥ ৪২ ॥

তত্রেতি। তত্র যোগিনাং কুলে তং বুদ্ধিসংযোগং বুদ্ধ্যা সংযোগং বুদ্ধিসংযোগং লভতে পৌর্ব্বদেহিকং পূর্ব্বস্মিন্ দেহে ভবং পৌর্ব্বদেহিকং যততে চ যত্নং করোতি ততস্তস্মাৎপূর্ব্বকৃতাৎ সংস্কারাদ্ভূয়ো বহুতরং সংসিদ্ধিনিমিত্তং হে কুরুনন্দন ॥ ৪৩ ॥

## গিরিকৃত টীকা।

তদপেক্ষয়া ইদং জন্ম দুঃখলভ্যতরং যদীদৃশং দরিদ্রাণাং বিদ্যাবতামিতি বিশেষণোপেতে কুলে লোকে জন্মলক্ষণমিত্যর্থঃ। যদুত্তমতরং জন্মোক্তং তস্যোত্তমত্বে হেত্বন্তরমাহ যস্মাদিতি ॥ ৪২ ॥

বুদ্ধ্যেত্যাত্মবিষয়েতি শেষঃ, পূর্ব্বস্মিন্ দেহে ভবং তত্রানুষ্ঠিতসাধনবিশেষযুক্তমিত্যর্থঃ। তর্হি যথোক্তজন্মনি সাধনানুষ্ঠানমন্তরেণৈব বুদ্ধিসম্বন্ধঃ স্যাদিত্যাশঙ্ক্যাহ যততে চেতি। প্রযত্নঃ শ্রবণাদ্যনুষ্ঠানবিষয়ঃ ॥ ৪৩ ॥

যদি পূর্ব্বসংস্কারোঽন্যেচ্ছামুপনয়ন্ প্রবর্ত্তয়তি তথা চাপ্রবৃত্তিরনিচ্ছয়া স্যাদিত্যাশঙ্ক্যাহ পূর্ব্বেতি। স হি যোগভ্রষ্টঃ সমনন্তরজন্মকৃতসংস্কারবশাদুত্তরস্মিন্ জন্মনি অনিচ্ছন্নপি যোগং প্রত্যেবাকৃষ্টো ভবতীত্যর্থঃ। তত্র কৈমুতিকন্যায়ং সূচয়তি জিজ্ঞাসুরিতি। পূর্ব্বার্দ্ধং বিভজতে পূর্ব্বেতি। তস্মাদনিচ্ছয়া তস্য প্রবৃত্তিবিতি শেষঃ। যোগভ্রষ্টস্যাধর্ম্মাদিপ্রতিবন্ধেঽপি

## স্বামিকৃত টীকা।

অল্পকালাভ্যস্তযোগভ্রংশে গতিবিশেষমুক্ত্বা চিরাভ্যস্তযোগভ্রংশে পক্ষান্তরমাহ অথ বেতি। যোগনিষ্ঠানাং ধীমতাং জ্ঞানিনামেব কুলে জায়তে নতু পূর্ব্বোক্তানামনারূঢ়যোগানাং কুলে, এতজ্জন্ম ভবতি ঈদৃশং জন্মেতি, এতদ্ধি লোকে দুর্ল্লভতরং মোক্ষহেতুত্বাৎ ॥৪২॥

ততঃ কিমত আহ তত্রেতি সার্দ্ধেন। স তত্র দ্বিপ্রকারেঽপি জন্মনি পূর্ব্বদেহভবং পৌর্ব্বদৈহিকং তমেব ব্রহ্মবিষয়য়া বুদ্ধ্যা সংযোগং লভতে, ততশ্চ ভূয়োঽধিকং সংসিদ্ধৌ মোক্ষে প্রযত্নং করোতি ॥ ৪৩ ॥

পূর্ব্বাভ্যাসেন তেনৈব হ্রিয়তে হ্যবশোঽপি সঃ।
জিজ্ঞাসুরপি যোগস্য শব্দব্রহ্মাতিবর্ত্ততে ॥ ৪৪ ॥

## শাঙ্করভাষ্যম্।

কথংভূতং পূর্ব্বদেহবুদ্ধিসংযোগং ইতি তদুচ্যতে পূর্ব্বেতি। যঃ পূর্ব্বজন্মনি কৃতোঽভ্যাসঃ সঃ পূ স পূর্ব্বাভ্যাসস্তেনৈব বলবতা হ্রিয়তে সংসিদ্ধৌ হি যস্মাদবশোঽপি স যোগভ্রষ্টঃ, ন কৃতং-চেৎ যোগাভ্যাসজাৎ সংস্কারাৎ বলবত্তরমধর্ম্মাদিলক্ষণং কর্ম্ম তদা যোগাভ্যাসজনিতেন সংস্কারেণাহ্রিয়তে হধর্ম্মশ্চেদ্বলবত্তরঃ কৃতস্তেন যোগজোঽপি সংস্কারোঽভিভূয়তএব তৎক্ষয়ে তু যোগজঃ সংস্কারঃ স্বয়মেব কার্য্যমারভতে ন দীর্ঘকালস্থস্যাপি বিনাশস্তস্যাস্তীত্যতো জিজ্ঞাসুরপি যোগস্য স্বরূপং জ্ঞাতুমিচ্ছন্ যোগমার্গে প্রবৃত্তঃ সংন্যাসী যোগভ্রষ্টঃ সামর্থ্যাৎ সোঽপি শব্দব্রহ্ম বেদোক্তকর্ম্মানুষ্ঠানফলমতিবর্ত্ততে কর্ম্মানুষ্ঠানলক্ষণমতিক্রামতি অপাকরিষ্যতি কিমুত বুদ্ধ্যা যো যোগং তন্নিষ্ঠোঽভ্যাসং কুর্য্যাৎ ॥ ৪৪ ॥

## গিরিকৃত টীকা।

তর্হি পূর্ব্বাভ্যাসবশাদ্বুদ্ধিসম্বন্ধঃ স্যাদিত্যাশঙ্ক্যাহ নেত্যাদিনা। যদি যোগভ্রষ্টেন যোগাভ্যাসজনিতসংস্কারপ্রাবল্যাৎ প্রবলতরধর্ম্মপ্রভেদরূপং কর্ম্ম ন কৃতং স্যাত্তদা তেন সংস্কারেণ বশীকৃতং সন্নিচ্ছাদিরহিতোঽপি বুদ্ধিসম্বন্ধভাগ্‌ভবতীত্যর্থঃ। বিপক্ষে যোগসংস্কারস্যাভিভূতত্বান্ন কার্য্যারম্ভকত্বমিত্যাহ অধর্ম্মশ্চেদিতি। যোগজসংস্কারস্যাধর্ম্মাভিভূতস্য কার্য্যমকুর্ব্বৈবাভিভাবকপ্রাবল্যে প্রণাশঃ স্যাদিত্যাশঙ্ক্যাহ তৎ ক্ষয়েত্বিতি। কালব্যবধানান্নিবৃত্তিং শঙ্কিত্বোক্তং নেতি। তৃণজলৌকাদৃষ্টান্তশ্রুত্যা সংস্কারস্য দীর্ঘতায়াঃ সমধিগতত্বাদিতি ভাবং কৈমুতিকন্যায়োক্তিপরমুত্তরার্দ্ধং বিভজতি জিজ্ঞাসুরপীত্যাদিনা। অত্রাপি সংন্যাসীতি বিশেষণং পূর্ব্ববদবধেয়মিত্যাহ সামর্থ্যাদিতি। ন হি কর্ম্মী কর্ম্মমার্গে প্রবৃত্তস্ততো ভ্রষ্টঃ শঙ্কিতুং শক্যতে অতঃ সংন্যাসী পূর্ব্বোক্তৈর্বিশেষণৈঃ বিশিষ্টযোগীষ্টঃ সোঽপি বৈদিকং কর্ম্ম তৎফলঞ্চাতিবর্ত্ততে কিমুত যোগং বুদ্ধ্যা তন্নিষ্ঠঃ সদাভ্যাসং কুর্ব্বন্ কর্ম্ম তৎফলঞ্চাতি-

## স্বামিকৃত টীকা।

তত্র হেতুঃ পূর্ব্বেতি। তেনৈবপূর্ব্বদেহকৃতাভ্যাসেনাবশোঽপি কুতশ্চিদন্তরায়াদনিচ্ছন্নপি স হ্রিয়তে বিষয়েভ্যঃ পরাবৃত্য ব্রহ্মনিষ্ঠঃ ক্রিয়তে। তদেবং পূর্ব্বাভ্যাসবশেন প্রযত্নং কুর্ব্বন্ শনৈর্মুচ্যত ইতীমমর্থং কৈমুত্যন্যায়েন স্পষ্টয়তি জিজ্ঞাসুরিতি সার্দ্ধেন। যোগস্য বশ্যাদ্যোগভ্রষ্টোঽপি শব্দব্রহ্ম বেদমতিবর্ত্ততে বেদোক্তকর্ম্মফলান্যতিক্রামতি তেভ্যোঽধিকং ফলং প্রাপ্য মুচ্যত ইত্যর্থঃ ॥ ৪৪ ॥

প্রযত্নাদ্যতমানস্তু যোগী সংশুদ্ধকিল্বিষঃ।
অনেকজন্মসংসিদ্ধস্ততো যাতি পরাং গতিম্ ॥ ৪৫ ॥
তপস্বিভ্যোঽধিকো যোগী জ্ঞানিভ্যোঽপি মতোঽধিকঃ।
কর্ম্মিভ্যশ্চাধিকো যোগী তস্মাদ্যোগী ভবার্জ্জুন ॥ ৪৬ ॥

## শাঙ্করভাষ্যম্।

কুতশ্চ যোগিত্বং শ্রেয়ইতি প্রযত্নাদিতি। প্রযত্নাৎ প্রযতমানাদধিকতরং যতমান ইত্যর্থঃ তত্র যোগী বিদ্বান্ সংশুদ্ধকিল্বিষো বিশুদ্ধকিল্বিষঃ সংশুদ্ধপাপোঽনেকেষু জন্মসু কিঞ্চিৎ কিঞ্চিৎ সংস্কারজাতমুপচিত্য তেনোপচিতেনানেকজন্মকৃতেন সংসিদ্ধোঽনেকজন্মসংসিদ্ধঃ ততো লব্ধসম্যগ্দর্শনঃ সন্ যাতি পরাং প্রকৃষ্টাং গতিং ॥ ৪৫ ॥

যস্মাদেবং তস্মাৎ তপস্বিভ্যইতি। তপস্বিভ্যোঽধিকো যোগী জ্ঞানিভ্যশ্চ জ্ঞানমত্র শাস্ত্রার্থপাণ্ডিত্যং তদ্বদ্ভ্যোঽপি মতো জ্ঞাতোঽধিকঃ শ্রেষ্ঠঃ ইতি কর্ম্মিভ্যোঽগ্নিহোত্রাদি কর্ম্ম তদ্বদ্ভ্যোঽধিকো যোগী বিশিষ্টঃ তস্মাদ্যোগী ভবার্জ্জুন ॥ ৩৬ ॥

## গিরিকৃত টীকা।

বর্ত্ততে কিমিতি বক্তব্যমিতি যোজনা, যোগনিষ্ঠস্য তৎফলাতিবর্ত্তনং ততোঽধিকফলাবাপ্তির্বিবক্ষ্যতে ॥ ৪৪ ॥

যোগনিষ্ঠস্য শ্রেষ্ঠত্বে হেত্বন্তরং বক্তুং উত্তরশ্লোকমবতারয়তি কুতশ্চেতি। মৃদুপ্রযত্নোঽপি ক্রমেণ মোক্ষ্যতে চেদধিকপ্রযত্নস্য ক্লেশহেতোরকিঞ্চিৎকরত্বমিত্যাশঙ্ক্য হেত্বন্তরমেব প্রকটয়তি প্রযত্নাদিতি। তত্র যোগবিষয়ে প্রযত্নাতিরেকে সতীত্যর্থঃ, ততঃ সঞ্চিতসংস্কারসমুদায়াদিতি যাবৎ, সমুৎপন্নসন্নসম্যগ্দর্শনবশাৎ প্রকৃষ্টা গতিঃ সংন্যাসিনা লভ্যতে তেন শীঘ্রং মুক্তিমিচ্ছন্দধিকপ্রযত্নো ভবেদল্পপ্রযত্নস্তু চিরেণৈব মুক্তিভাগিত্যর্থঃ ॥ ৪৫ ॥

সম্যগ্জ্ঞানদ্বারা মোক্ষহেতুত্বং যোগস্যোক্তমনূদ্য যোগিনঃ সর্ব্বাধিকিত্বমাহ যস্মাদিতি। যোগস্য সর্ব্বস্মাদুৎকর্ষাদবশ্যকর্ত্তব্যত্বায় যোগিনঃ সর্ব্বাধিক্যং সাধয়তি তপস্বিভ্যইতি। যোগিনো জ্ঞানিনশ্চ পর্য্যায়ত্বাৎ কথং তস্য জ্ঞানিভ্যোঽধিকত্বমিত্যাশঙ্ক্যাহ জ্ঞানমিতি। যোগিনঃ সর্ব্বাধিকত্বে ফলিতমাহ তস্মাদিতি ॥ ৪৬ ॥

## স্বামিকৃত টীকা।

যদৈবং মন্দপ্রযত্নোঽপি যোগী পরাং গতিং যাতি তদা যস্তু যোগী প্রযত্নাদুত্তরোত্তরমধিকং যোগে যতমানো যত্নং কুর্ব্বন্ যোগেনৈব সংশুদ্ধকিল্বিষো বিধূতপাপঃ সোঽনেকেষু জন্মসূপচিতেন যোগেন সংসিদ্ধঃ সম্যগজ্ঞানী ভূত্বা ততঃ শ্রেষ্ঠাং গতিং যাতীতি কিম্বক্তব্যমিত্যর্থঃ ॥ ৪৫ ॥

যস্মাদেবং তস্মাত্তপস্বিভ্যইতি। কৃচ্ছ্রচান্দ্রায়ণাদিতপোনিষ্ঠেভ্যোঽপি, জ্ঞানিভ্যঃ শাস্ত্র-

যোগিনামপি সর্ব্বেষাং মদ্গতেনান্তরাত্মনা।
শ্রদ্ধাবান্ ভজতে যো মাং স মে যুক্ততমো মতঃ ॥ ৪৭ ॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে
শ্রীকৃষ্ণার্জ্জুনসংবাদে
ধ্যানযোগো নাম
ষষ্ঠোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

যোগিনামিতি। যোগিনামপি সর্ব্বেষাং রুদ্রাদিধ্যানপরাণাং মধ্যে মদ্গতেন ময়ি বাসুদেবে সমাহিতেনান্তরাত্মনান্তঃকরণেন শ্রদ্ধাবান্ শ্রদ্দধানঃ সন্ ভজতে সেবতে যো মাং স মে মম যুক্ততমোঽতিশয়েন যুক্তো মতোঽভিপ্রেত ইতি ॥ ৪৭ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে ষষ্ঠোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

নন্বাদিত্যো বিরাড়াত্মা সূত্রং কারণমক্ষরমিত্যেতেষামুপাসকা ভূয়াংসো যোগিনো গম্যন্তে তেষাং কতমঃ শ্রেয়ানিষ্যতে তত্রাহ যোগিনামিতি। যো ভগবন্তং সগুণং নির্গুণং বা যথোক্তেন চেতসা শ্রদ্দধানঃ সন্নবরতমনুসন্ধত্তে স যুক্তানাং মধ্যেঽতিশয়েন যুক্তঃ শ্রেয়ানীশ্বরস্যাভিপ্রেতঃ ন হি তদীয়োঽভিপ্রায়োঽন্যথা ভবিতুমর্হতীত্যর্থঃ, তদনেনাধ্যায়েন কর্ম্মযোগস্য সংন্যাসহেতোর্মর্য্যাদং দর্শয়তা সাঙ্গং যোগং বিবৃণ্বতা মনোনিগ্রহোপায়োপদেশেন যোগভ্রষ্টস্যাত্যান্তিকনাশশঙ্কাঞ্চ শিথিলয়তা ত্বম্পদার্থাভিজ্ঞস্য জ্ঞাননিষ্ঠত্বোক্ত্যা বাক্যার্থজ্ঞানান্মুক্তিরিতি সাধিতং ॥ ৪৭ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং ষষ্ঠোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

বিজ্ঞানবদ্ভ্যোঽপি, কর্ম্মিভ্যইষ্টাপূর্ত্তাদিকর্ম্মকারিভ্যোঽপি যোগী শ্রেষ্ঠো মমাভিমতঃ তস্মাত্ত্বং যোগী ভব ॥ ৪৬ ॥

যোগিনামপি যমনিয়মাদিপরাণাং মধ্যে মদ্ভক্তঃ শ্রেষ্ঠ ইত্যাহ যোগিনামপীতি। মদ্গতেন ময্যাসক্তেনান্তরাত্মনা মনসা যো মাং পরমেশ্বরং শ্রদ্ধাযুক্তঃ সন্ ভজতে স যোগযুক্তেভ্যঃ শ্রেষ্ঠো মম সম্মতঃ অতো মদ্ভক্তো ভবেতি ভাবঃ।

আত্মযোগমবোচদ্যো ভক্তিযোগশিরোমণিং।
তং বন্দে পরমানন্দং মাধবং ভক্তসেবধিং ॥ ৪৭ ॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং ষষ্ঠোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## সপ্তমোঽধ্যায়ঃ।

শ্রীভগবানুবাচ—ময্যাসক্তমনাঃ পার্থ যোগং যুঞ্জন্মদাশ্রয়ঃ।
অসংশয়ং সমগ্রং মাং যথা জ্ঞাস্যসি তচ্ছৃণু ॥ ১ ॥

### শাঙ্করভাষ্যম্।

যোগিনামপি সর্ব্বেষাং মদ্গতেনান্তরাত্মনা, শ্রদ্ধাবান্ ভজতে যো মাং স মে যুক্ততমো মত ইতি প্রশ্নবীজমুপন্যস্য স্বয়মেব ঈদৃশং মদীয়ং তত্ত্বমেবং মদ্গতান্তরাত্মা স্যাদিত্যেতদ্বিবক্ষুর্ভগবানুবাচ ময়ীতি। ময়ি বক্ষ্যমাণবিশেষণে পরমেশ্বরে আসক্তং মনো যস্য স ময্যাসক্তমনাঃ হে পার্থ যোগং যুঞ্জন্ মনঃসমাধানং কুর্ব্বন্ মদাশ্রয়োঽহমেব পরমেশ্বর আশ্রয়ো যস্য স মদাশ্রয়ো যো হি কশ্চিৎ পুরুষার্থেন কেনচিদর্থী ভবতি স তৎসাধনং কর্ম্মাগ্নিহোত্রাদি তপো দানং বা কিঞ্চিদাশ্রয়ং প্রতিপদ্যতে অয়ন্তু যোগী মামেবাশ্রয়ং প্রতিপদ্যতে হিত্বান্যৎ সাধনান্তরং ময্যেবাসক্তমনাঃ ভবতি, যস্ত্বমেবম্ভূতঃ সন্ অসংশয়ং সমগ্রং সমস্তং বিভূতিবলশক্ত্যৈশ্বর্য্যাদিগুণসংপন্নং মাং যথা যেন প্রকারেণ জ্ঞাস্যসি সংশয়মন্তরেণৈবমেব ভগবানিতি তচ্ছৃণূচ্যমানং ময়া ॥ ১ ॥

### গিরিকৃত টীকা।

কর্ম্মসংন্যাসাত্মকসাধনপ্রধানং ত্বংপদার্থপ্রধানঞ্চ প্রথমষট্‌কং ব্যাখ্যায় মধ্যমষট্‌কমুপাস্যনিষ্ঠং তৎপদার্থনিষ্ঠং বা ব্যাখ্যাতুমারভমাণঃ সমনন্তরাধ্যায়মবতারয়তি যোগিনামিতি। অতীতাধ্যায়ান্তে মদ্গতেনান্তরাত্মনা যো ভজতে মামিতি প্রশ্নবীজং প্রদর্শ্য কীদৃশং ভগবতত্তত্ত্বং কথঞ্চ মদ্গতান্তরাত্মা স্যাদিত্যর্জ্জুনস্য প্রশ্নদ্বয়ে জাতে স্বয়মেব ভগবান্ অপৃষ্টমেব তদ্বক্তুং ইচ্ছন্নুক্তবানিত্যর্থঃ, পরমেশ্বরস্য বক্ষ্যমাণবিশেষণং সকলজগদায়তনত্বাদিনাবিধ-

### স্বামিকৃত টীকা।

বিজ্ঞেয়মাত্মনস্তত্ত্বং সযোগং সমুদাহৃতং। ভজনীয়মথেদানীমৈশ্বরং রূপমীর্য্যতে।
পূর্ব্বাধ্যায়ান্তে মদ্গতেনান্তরাত্মনা যো মাং ভজতে সমে যুক্ততমো মত
শব্দং যস্ত ভক্তিঃ কর্ত্তব্যেত্যপেক্ষায়াং স্বস্বরূপং নিরূপয়িষ্যন্ শ্রীভগবানুবাচ
ময়ি পরমেশ্বরে আসক্তমতিনিবিষ্টং মনো যস্য সঃ মদাশ্রয়োঽহমেবাশ্রয়ো যস্য
সঃ যোগং যুঞ্জন্নভ্যসন্নসংশয়ং যথা ভবত্যেবং মাং সমগ্রং
যথা জ্ঞাস্যসি তদিদং ময়া বক্ষ্যমাণং শৃণু ॥ ১ ॥

জ্ঞানং তেঽহং সবিজ্ঞানমিদং বক্ষ্যাম্যশেষতঃ।
যজ্জ্ঞাত্বা নেহ ভূয়োঽন্যজ্জ্ঞাতব্যমবশিষ্যতে

### শাঙ্করভাষ্যম্।

তচ্চ মদ্বিষয়ং জ্ঞানমিতি। জ্ঞানং তে তুভ্যমহং সবিজ্ঞানং বিজ্ঞানসহিতং স্বানুভবসংযুক্তমিদং বক্ষ্যামি কথয়িষ্যাম্যশেষতঃ কাৎর্স্নেন, তজ্জ্ঞানং বিবক্ষিতং স্তৌতি শ্রোতুরভিমুখীকরণায়, যৎ জ্ঞাত্বা জ্ঞানং জ্ঞাত্বা নেহ ভূয়ঃ পুনঃ জ্ঞাতব্যং পুরুষার্থসাধনমবশিষ্যতে নাবশেষো ভবতীতি, তত্ত্বজ্ঞো যঃ স সর্ব্বজ্ঞো ভবতীত্যর্থঃ॥ ২ ॥

### গিরিকৃত টীকা।

বিভূতিভাগিত্বং, তত্রাসক্তির্ম্মনসো বিষয়ান্তরপরিহারেণ তন্নিষ্ঠত্বং। মনসো ভগবত্যেবাসক্তৌ হেতুমাহ যোগমিতি। বিষয়ান্তরপরিহারে হি গোচরমালোচ্যমানো ভগবত্যেব প্রতিষ্ঠিতো ভবতীত্যর্থঃ। তথাপি স্বাশ্রয়ে পুরুষো মনঃ স্থাপয়তি নান্যত্রেত্যাশঙ্ক্যাহ মদাশ্রয়ইতি। যোগিনো যদীশ্বরাশ্রয়ত্বেন তস্মিন্নেবাসক্তমনস্ত্বমুপন্যস্তং তদুপপাদয়তি যো হীতি। ঈশ্বরাখ্যাশ্রয়স্য প্রতিপত্তিমেব প্রকটয়তি হিত্বেতি। অস্তু যোগিনস্ত্বদাশ্রয়প্রতিপত্ত্যা মনসস্ত্বয্যেবাসক্তিস্তথাপি মম কিমায়াতমিত্যাশঙ্ক্য দ্বিতীয়ার্দ্ধং ব্যাচষ্টে যস্ত্বমেবমিতি। এবম্ভূতো যথোক্তধ্যাননিষ্ঠপুরুষবদেবমপ্যাসক্তমনা যস্ত্বং স ত্বং তথাবিধঃ সন্নসংশয়মবিদ্যমানঃ সংশয়ো যত্র জ্ঞানে তদ্ যথাস্যাত্তথা মাং সমগ্রং জ্ঞাস্যসীতি সম্বন্ধঃ। সমগ্রমিত্যস্যার্থমাহ সমস্তেতি। বিভূতির্নানাবিধৈশ্বর্য্যোপায়সম্পত্তিঃ বলং শরীরগতং সামর্থ্যং, শক্তির্মনোগতং প্রাগল্‌ভ্যং, ঐশ্বর্য্যমীশিতব্যবিষয়মীশনসামর্থ্যং, আদিশব্দেন জ্ঞানেচ্ছাদয়ো গৃহ্যন্তে অসংশয়মিতি পদস্য ক্রিয়াবিশেষণত্বং বিশদয়ন্ ক্রিয়াপদেন সম্বন্ধং কথয়তি সংশয়মিতি। বিনা সংশয়ং ভগবত্তত্ত্বপরিজ্ঞানমেব স্ফোরয়তি এবমেবেতি। ভগবত্তত্ত্বে জ্ঞাতব্যে কথং মম জ্ঞানমুপদেক্ষ্যতি ন হি ত্বামৃতে তদুপদেষ্টা কশ্চিদস্তীত্যাশঙ্ক্যাহ তচ্ছৃণ্বিতি॥ ১॥

জ্ঞাস্যসীত্যুক্ত্যা পরোক্ষজ্ঞানশঙ্কায়াং তন্নিবৃত্ত্যর্থং তদুক্তিপ্রকারমেব বিবৃণোতি তচ্চেতি। ইদমপরোক্ষং জ্ঞানং চৈতন্যং। তস্য সবিজ্ঞানস্য প্রতিলম্ভে কিং স্যাদিত্যাশঙ্ক্যাহ যজ্‌জ্ঞাত্বেতি। ইদমাচৈতনস্য পরোক্ষত্বং ব্যাবর্ত্ত্যতে তদেব সবিজ্ঞানমিতি বিশেষণেন স্ফুটয়তি, অশেষতঃ অনবশেষেণ। তদ্বেদনফলোপন্যাসেন শ্রোতারং তচ্ছ্রবণপ্রবণং

### স্বামিকৃত টীকা।

বক্ষ্যমাণং স্তৌতি জ্ঞানমিতি। জ্ঞানং শাস্ত্রীয়ং বিজ্ঞানমনুভবস্তৎসহিতমিদং মদ্বিষয়মশেষতঃ সাকল্যেন বক্ষ্যামি যজ্জ্ঞাত্বা ইহ শ্রেয়োমার্গে বর্ত্তমানস্য পুনরন্যজ্জ্ঞাতব্যমবশিষ্টং ন ভবতি তেনৈব কৃতার্থো ভবতীত্যর্থঃ॥ ২॥

মনুষ্যাণাং সহস্রেষু কশ্চিদ্‌যততি সিদ্ধয়ে।
যততামপি সিদ্ধানাং কশ্চিন্মাং বেত্তি তত্ত্বতঃ ॥ ৩॥

## শাঙ্করভাষ্যম্।

অতো বিশিষ্টফলত্বাৎ দুর্লভতরং জ্ঞানং কথমিত্যুচ্যতে মনুষ্যাণামিতি। মনুষ্যাণাং মধ্যে সহস্রেষনেকেষু কশ্চিদ্‌যততি সিদ্ধয়ে সিদ্ধ্যর্থং যততি প্রযত্নং করোতি তেষাং যততামপি সিদ্ধানাং, সিদ্ধাএব হি তে যে মোক্ষায় মোক্ষমার্গে যতন্তে, তেষাং কশ্চিদেব মাং বেত্তি তত্ত্বতো যথাবৎ ॥ ৩॥

## গিরিকৃত টীকা।

করোতি তজ্জ্ঞানমিতি। একবিজ্ঞানেন সর্ব্ববিজ্ঞানশ্রুতিমাশ্রিত্যোত্তরার্দ্ধতাৎপর্য্যমাহ যজ্‌জ্ঞাত্বেতি ॥ ২॥

ভগবত্তত্ত্বজ্ঞানস্য বিশিষ্টফলত্বমুক্ত্বা ফলিতমাহ অতইতি। জ্ঞানস্য দুর্লভত্বং প্রশ্নপূর্ব্বকং প্রকটয়তি কথমিত্যাদিনা। সহস্রশব্দস্য বহুবাচকত্বমুপেত্য ব্যাকরোতি অনেকেম্বিতি। সিদ্ধয়ে সত্ত্বশুদ্ধিদ্বারা জ্ঞানোৎপত্ত্যর্থমিত্যর্থঃ। সিদ্ধ্যর্থং যতমানানাং কথং সিদ্ধত্বমিত্যাশঙ্ক্যাহ সিদ্ধাএবেতি। সর্ব্বেষামেব তেষাং জ্ঞানোদয়াত্তস্য সুলভত্বমিত্যাশঙ্ক্যাহ তেষামিতি ॥ ৩॥

জ্ঞানার্থং প্রযত্নস্য, তদ্দ্বারা জ্ঞানলাভস্য, তদুভয়দ্বারেণ মুক্তেশ্চ দুর্লভত্বাভিধানস্য শ্রোতৃপ্ররোচনং ফলমিতি মত্বাহ শ্রোতারমিতি। আত্মনঃ সর্ব্বাত্মকত্বেন পরিপূর্ণত্বমবতারয়ন্নাদাবপরাং প্রকৃতিমুপন্যস্যতি আহেতি। ভূমিশব্দস্য ব্যবহারযোগ্যস্থূলপৃথিবীবিষয়ত্বং ব্যাবর্ত্তয়তি ভূমিরিতীতি। তত্র হেতুমাহ ভিন্নেতি। প্রকৃতিসমভিব্যাহারাৎ গন্ধতন্মাত্রং স্থূলপৃথিবীপ্রকৃতিরুত্তরবিকারো ভূমিরিত্যুচ্যতে ন বিশেষ ইত্যর্থঃ। ভূমিশব্দবদবাদিশব্দানামপি সূক্ষ্মভূতবিষয়ত্বমাহ তথেতি। তেষামপি প্রকৃতিসমানাধিকৃতত্বাবিশেষাত্তন্মাত্রাণাং পূর্ব্বপূর্ব্বপ্রকৃতীনামুত্তরোত্তরবিকারাণাং ন বিশেষত্বসিদ্ধিরিত্যর্থঃ। মনঃশব্দস্য সংকল্পবিকল্পাত্মককরণবিষয়ত্বমাশঙ্ক্যাহ মন ইতীতি। ন খল্বহঙ্কারাভাবে সংকল্পবিকল্পয়োরসম্ভবা-

## স্বামিকৃত টীকা।

মদ্ভক্তিং বিনা তু মজ্‌জ্ঞানং দুর্লভমিত্যাহ মনুষ্যাণামিতি। অসংখ্যাতানাং জীবানাং মধ্যে মনুষ্যাণাস্ত সহস্রেষু মধ্যে কশ্চিদেব পুণ্যবশাৎ সিদ্ধয়ে আত্মজ্ঞানায় প্রযততে, প্রযত্নং কুর্ব্বতামপি সহস্রেষু প্রাক্তনপুণ্যবশাদাত্মানং বেত্তি, তাদৃশানাকাত্মজ্ঞানাং সহস্রেষু কশ্চিদেব মাং পরমাত্মানং মৎপ্রসাদেন তত্ত্বতো বেত্তি, তদেবমতিদুর্লভমপ্যাত্মতত্ত্বং বক্ষ্যামীত্যর্থঃ ॥ ৩॥

ভূমিরাপোঽনলো বায়ুঃ খং মনো বুদ্ধিরেব চ।
অহঙ্কার ইতীয়ং মে ভিন্না প্রকৃতিরষ্টধা ॥ ৪ ॥

## শাঙ্করভাষ্যম্।

অতঃ শ্রোতারং প্ররোচনেনাভিমুখীকৃত্যাহ ভূমিরিতি। ভূমিরিতি পৃথিবীতন্মাত্রমুচ্যতে ন স্থূলা,ভিন্না প্রকৃতিরষ্টধেতি বচনাৎ, তথাবাদয়োঽপি তন্মাত্রাণ্যেবোচ্যন্তে আপোঽনলো-বায়ুঃ খং, মনো মন ইতি মনসঃ কারণমহঙ্কারো গৃহ্যতে, বুদ্ধিরিত্যহঙ্কারকারণং মহত্তত্ত্বং, অহঙ্কার ইত্যবিদ্যাসংযুক্তমব্যক্তং, যথা বিষসংযুক্তমন্নং বিষমুচ্যতে এবমহঙ্কারবাসনাবন্-মূলকারণমহঙ্কার ইত্যুচ্যতে প্রবর্ত্তকত্বাদহঙ্কারস্যাহঙ্কারএব হি সর্বস্য প্রবৃত্তিবীজং দৃষ্টং লোকে, ইতীয়ং যথোক্তা প্রকৃতির্মে মমৈশ্বরী মায়া শক্তিরষ্টধা ভিন্না ভেদমাগতা ॥ ৪ ॥

## গিরিকৃত টীকা।

তদাত্মকং মনঃ সম্ভবতীত্যর্থঃ। নিশ্চয়লক্ষণা বুদ্ধিরিত্যুপগমাদ্বুদ্ধিশব্দস্য নিশ্চয়াত্মককরণ-বিষয়ত্বমাশঙ্ক্যাহ বুদ্ধিরিতীতি। ন হি হিরণ্যগর্ভসমষ্টিবুদ্ধিরূপমন্তরেণ ব্যষ্টিবুদ্ধিঃ সিধ্য-তীত্যর্থঃ, অহঙ্কারস্যাভিমানবিশেষাত্মকত্বেনান্তঃকরণপ্রভেদত্বং ব্যাবর্ত্তয়তি অহঙ্কারইতি। অবিদ্যাসংযুক্তমিত্যবিদ্যাত্মকমিত্যর্থঃ। কথং মূলকারণস্যাহঙ্কারশব্দত্বমিত্যাশঙ্ক্যোক্তমর্থং দৃষ্টান্তেন স্পষ্টয়তি যথেত্যাদিনা। মূলকারণস্যাহঙ্কারশব্দত্বে হেতুমাহ প্রবর্ত্তকত্বাদিতি। তস্য প্রবর্ত্তকত্বং প্রপঞ্চয়তি অহঙ্কার এবেতি। সত্যেবাহঙ্কারে মমকারো ভবতি তয়োশ্চ ভাবে সর্বা প্রবৃত্তিরিতি প্রসিদ্ধমিত্যর্থঃ। উক্তাং প্রকৃতিমুপসংহরতি ইতীয়মিতি। ইয়-মিত্যপরোক্ষা সাক্ষিদৃশ্যেতি যাবৎ, ঐশ্বরী তদাশ্রয়া তদৈশ্বর্য্যোপাধিভূতা। প্রক্রিয়তে মহদাদ্যাকারেণেতি প্রকৃতিঃ, ত্রিগুণং জগদুপাদানং প্রধানমিতি যতং বৃদ্যস্যাতি মায়েতি।

## স্বামিকৃত টীকা।

এবং শ্রোতারমভিমুখীকৃত্যেদানীং প্রকৃতিদ্বারা সৃষ্ট্যাদিকর্তৃত্বেনেশ্বরতত্ত্বং প্রতিজ্ঞাতং নিরূপয়িষ্যন্ পরভেদেন প্রকৃতিদ্বয়মাহ ভূমিরিতি দ্বাভ্যাং। ভূম্যাদীনি পঞ্চ ভূতসূক্ষ্মাণি, মনঃশব্দেন তৎকারণভূতোঽহঙ্কারঃ, বুদ্ধিশব্দেন তৎকারণমহত্তত্ত্বং অহঙ্কারশব্দেন তৎকা-রণমবিদ্যা ইত্যেবমষ্টধা ভিন্না, যদ্বা ভূম্যাদিশব্দৈঃ পঞ্চ মহাভূতানি সূক্ষ্মৈঃ সহৈকীকৃত্য গৃহ্যন্তে, অহঙ্কারশব্দেনৈবাহঙ্কারস্তেনৈব তৎকার্য্যাণীন্দ্রিয়াণ্যপি গৃহ্যন্তে, বুদ্ধিরিতি মহত্তত্ত্বং, মনঃশব্দেন তু মনসৈবোন্নেয়মব্যক্তস্বরূপং প্রধানমিত্যনেন প্রকারেণ, মে প্রকৃতির্মায়াখ্যা শক্তিরষ্টধা ভিন্না বিকারং প্রাপ্তা, চতুর্বিংশতিভেদভিন্নাপ্যষ্টস্বেবান্তর্ভাববিবক্ষয়াষ্টধাভিন্নে-ত্যুক্তং, তথা চ ক্ষেত্রাধ্যায়ে ইমামেব প্রকৃতিং চতুর্বিংশতিভেদভিন্নাং প্রপঞ্চয়িষ্যতি, মহাভূতান্যহঙ্কারো বুদ্ধিরব্যক্তমেব চ। ইন্দ্রিয়াণি দশৈকঞ্চ পঞ্চ চেন্দ্রিয়গোচরা ইতি ॥ ৪ ॥

অপরেয়মিতস্ত্বন্যাং প্রকৃতিং বিদ্ধি মে পরাম্।
জীবভূতাং মহাবাহো যয়েদং ধার্য্যতে জগৎ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

অপরেতি। অপরা ন পরা নিকৃষ্টা অশুদ্ধানর্থকরী সংসারবন্ধনাত্মিকেয়মিতোঽন্যাং যথোক্তায়া অন্যাং বিশুদ্ধাং প্রকৃতিং মমাত্মভূতাং বিদ্ধি মে পরাং প্রকৃষ্টাং জীবভূতাং ক্ষেত্রজ্ঞলক্ষণাং প্রাণধারণনিমিত্তভূতাং হে মহাবাহো যয়া প্রকৃত্যা ইদং ধার্য্যতে জগদন্তঃ-প্রবিষ্টয়া ॥ ৫ ॥

এতদিতি। এতদ্যোনীন্যেতে পরাপরে ক্ষেত্রক্ষেত্রজ্ঞলক্ষণে প্রকৃতী যোনী যেষাং ভূতানাং তান্যেতদ্যোনীনি ভূতানি সর্ব্বাণীত্যেবমুপধারয় জানীহি, যস্মান্মম প্রকৃতির্যোনিঃ

---

## গিরিকৃত টীকা।

তস্যাস্তৎকার্য্যাকারেণ পরিণামযোগ্যত্বং দ্যোতয়তি শক্তিরিতি। অষ্টধেতি অষ্টভিঃ প্রকারৈরিতি যাবৎ ॥ ৪ ॥

অচেতনবর্গমেকীকর্ত্তুং প্রকৃতেরষ্টধা পরিণামমভিধায় বিকারাবচ্ছিন্নং কার্য্যকল্পং চেতনবর্গমেকীকর্ত্তুং পুরুষস্য চৈতন্যস্য বিদ্যাশক্ত্যবচ্ছিন্নস্যাপি প্রকৃতিত্বং কথয়িতুমুক্তাং প্রকৃতিমনূদ্য দর্শয়তি অপরেতি। নিকৃষ্টত্বং স্পষ্টয়তি অনর্থকরীতি। অনর্থকরত্বমেব স্ফোরয়তি সংসারেতি, কথঞ্চিদপ্যনন্যত্বব্যাবৃত্ত্যর্থস্তশব্দঃ, অন্যামত্যন্তবিলক্ষণামিতি যাবৎ, অন্যত্বমেব স্পষ্টয়তি বিশুদ্ধামিতি। প্রকৃতিশব্দস্যাত্র প্রযুক্তস্যার্থান্তরমাহ মমেতি। প্রকৃষ্টত্বমেব ভোক্তৃত্বেন স্পষ্টয়তি জীবভূতামিতি। প্রকৃত্যন্তরাদস্যাঃ প্রকৃতেরবান্তরবিশেষমাহ যয়েতি। নহি জীবরহিতং জগদ্ধারয়িতুং শক্যমিত্যাশয়েনাহ অন্তরিতি ॥ ৫ ॥

উক্তপ্রকৃতিদ্বয়ে কার্য্যলিঙ্গকমনুমানং প্রমাণয়তি এতদ্যোনীতি। প্রকৃতিদ্বয়স্য জগৎ-কারণত্বে কথমীশ্বরস্য জগৎকরাণত্বং তদুপগতমিত্যাশঙ্ক্যাহ অহমিতি। এতদ্যোনীত্যুক্তে

## স্বামিকৃত টীকা।

অপরামিমাং প্রকৃতিমুপসংহরন্ পরাং প্রকৃতিমাহ অপরেয়মিতি। অষ্টধা যা প্রকৃতিরুক্তা ইয়মপরা নিকৃষ্টা জড়ত্বাৎ পরার্থত্বাচ্চ, ইতঃ সকাশাৎ পরাং প্রকৃষ্টামন্যাং জীবভূতাং জীবস্বরূপাং মে প্রকৃতিং জানীহি, পরত্বে হেতুঃ যয়া চেতনয়া ক্ষেত্রজ্ঞস্বরূপয়া স্বকর্ম্মদ্বারেণেদং জগদ্ধার্য্যতে ॥ ৫ ॥

অনয়োঃ প্রকৃতিত্বং দর্শয়ন্ স্বস্য তদ্বারা সৃষ্ট্যাদিকারণত্বমাহ এতদিতি। এতে ক্ষেত্র-ক্ষেত্রজ্ঞস্বরূপে প্রকৃতী যোনী কারণভূতে যেষাং তানি এতদ্যোনীনি স্থাবরজঙ্গমাত্মকানি সর্ব্বাণি ভূতানীতি উপধারয় বুধ্যস্ব, তত্র অপরা প্রকৃতির্দেহরূপেণ পরিণমতে চেতনা তু

এতদ্যোনীনি ভূতানি সর্ব্বাণীত্যুপধারয়।
অহং কৃৎস্নস্য জগতঃ প্রভবঃ প্রলয়স্তথা ॥ ৬ ॥
মত্তঃ পরতরং নান্যৎ কিঞ্চিদস্তি ধনঞ্জয়।
ময়ি সর্ব্বমিদং প্রোতং সূত্রে মণিগণা ইব ॥ ৭ ॥

---

## শাঙ্করভাষ্যম্।

কারণং সর্ব্বভূতানাং অতোঽহং কৃৎস্নস্য সমস্তস্য জগতঃ প্রভবঃ উৎপত্তিঃ প্রলয়ো বিনাশস্তথা প্রকৃতিদ্বয়দ্বারেণাহং সর্ব্বজ্ঞ ঈশ্বরো জগতঃ কারণমিত্যর্থঃ ॥ ৬ ॥

যস্মাদেতস্মাৎ মত্তঃ ইতি। মত্তঃ পরমেশ্বরাৎ পরতরং অন্যৎ কারণান্তরং কিঞ্চিন্নাস্তি ন বিদ্যতে অহমেব জগৎকারণমিত্যর্থঃ হে ধনঞ্জয় যস্মাদেবং তস্মান্ময়ি পরমেশ্বরে সর্ব্বাণি ভূতানি সর্ব্বমিদং জগৎ প্রোতমনুস্যূতমনুগতমনুবিদ্ধং গ্রথিতমিত্যর্থঃ দীর্ঘতন্তুষু পটবৎ সূত্রে চ মণিগণা ইব ॥ ৭ ॥

---

## গিরিকৃত টীকা।

সমনন্তরপ্রকৃতজীবভূতপ্রকৃত্যাবেতচ্ছব্দস্যাবধানাৎ প্রবৃত্তিমাশঙ্ক্য ব্যাকরোতি এতদিতি। সর্ব্বাণি চেতনাচেতনানি জনিমন্তীত্যর্থঃ। সর্ব্বভূতকারণত্বেন প্রকৃতিদ্বয়মঙ্গীকৃতঞ্চেৎ কথমহমিত্যাদ্যুক্তমিত্যাশঙ্ক্যাহ যস্মাদিতি। মম প্রকৃতী পরমেশ্বরস্যোপাধিতয়া স্থিতে ইত্যর্থঃ। তর্হি প্রকৃতিদ্বয়ং কারণমীশ্বরশ্চেতি জগতোঽনেকবিধকারণাঙ্গীকরণং স্যাদিত্যাশঙ্ক্যাহ প্রকৃতীতি। অপরপ্রকৃতিরচেতনত্বাৎ পরপ্রকৃতেশ্চেতনত্বেঽপি কিঞ্চিজ্জত্বাৎ ঈশ্বরস্যৈব সর্ব্বজ্ঞস্য সর্ব্বকারণত্বং যুক্তমিত্যাহ সর্ব্বজ্ঞেতি ॥ ৬ ॥

প্রধানাৎ পরতোঽক্ষরাৎ পুরুষবৎ পরমাত্মনোঽপি পরাদন্যং পরং স্যাদিত্যাশঙ্ক্য প্রকৃতিদ্বয়দ্বারা সর্ব্বকারণত্বমীশ্বরস্যোক্তমুপজীব্য পরিহরতি যস্মাদিতি। নান্যদস্তি পরমিত্যত্র হেতুমাহ ময়ীতি। পরতরশব্দার্থমাহ অন্যদিতি। স্বাতন্ত্র্যব্যাবৃত্ত্যর্থমন্তরশব্দঃ, নিষেধফলং কথয়তি অহমেবেতি। সর্ব্বজগৎকারণত্বেন সিদ্ধমর্থং দ্বিতীয়ার্দ্ধব্যাখ্যানেন

## স্বামিকৃত টীকা।

মদংশভূতা ভোক্তৃত্বেন দেহেষু প্রবিষ্টা স্বকর্ম্মণা তানি ধারয়তি, তে চ মদীয়ে প্রকৃতী [illegible] অতোঽহমেব কৃৎস্নস্য সপ্রাকৃতিকস্য জগতঃ প্রভবঃ প্রকর্ষেণ ভবত্যস্মাদিতি [illegible]মিত্যর্থঃ, তথা প্রলীয়তেঽনেনেতি প্রলয়ঃ সংহর্ত্তাপ্যহমেবেত্যর্থঃ ॥৬॥ [illegible] ইতি। মত্তঃ সকাশাৎ পরতরং শ্রেষ্ঠং জগতঃ সৃষ্টিসংহারয়োঃ স্বতন্ত্রং [illegible] নাস্তি, স্থিতিহেতুরপ্যহমেবেত্যাহ ময়ীতি, ময়ি সর্ব্বমিদং জগৎ প্রোতং গ্রথিতমিত্যর্থঃ [illegible] ॥ ৭ ॥

রসোঽহমপ্সু কৌন্তেয় প্রভাস্মি শশিসূর্য্যয়োঃ।
প্রণবঃ সর্ব্ববেদেষু শব্দঃ খে পৌরুষং নৃষু ॥ ৮ ॥

## শাঙ্করভাষ্যম্।

কেন কেন ধর্ম্মেণ বিশিষ্টে ত্বয়ি সর্ব্বমিদং প্রোতমিত্যুচ্যতে রসইতি। রসোঽহমপাং যঃ সারঃ রসস্তস্মিন্ রসভূতে ময্যাপঃ প্রোতা ইত্যর্থঃ এবং সর্ব্বত্র, যথাহমপ্সু রস এবং প্রভাস্মি শশিসূর্য্যয়োঃ, প্রণবঃ ওঙ্কারঃ সর্ব্ববেদেষু তস্মিন্ প্রণবভূতে ময়ি সর্ব্বে বেদাঃ প্রোতাঃ, তথা খে আকাশে শব্দঃ সারভূতঃ তস্মিন্ ময়ি খং প্রোতং, তথা পৌরুষস্য ভাবঃ পৌরুষং যতঃ পুংবুদ্ধিঃ নৃষু তস্মিন্ ময়ি পুরুষাঃ প্রোতাঃ ॥ ৮ ॥

## গিরিকৃত টীকা।

বিশদয়তি যস্মাদিতি। অতো, দীর্ঘেষু তির্য্যক্ষু চ পটঘটিতেষু তন্তুষু পটস্যানুগতিরবগম্যতে তদ্বন্ময্যেবানুগতং জগদিত্যাহ দীর্ঘেতি। যথাচ মণয়ঃ সূত্রেঽনুস্যূতাস্তেনৈব ধ্রিয়ন্তে তদভাবে বিপ্রকীর্য্যন্তে তথা ময্যেবাত্মভূতে সর্ব্বং ব্যাপ্তং ততো নিষ্কৃষ্টং বিনষ্টমেব স্যাদিতি শ্লোকোক্তং দৃষ্টান্তমাহ সূত্রে ইতি ॥ ৭ ॥

অবাদীনাং রসাদিষু প্রোতত্বপ্রতীতেস্ত্বয্যেব সর্ব্বং প্রোতমিত্যযুক্তমিতি মত্বা পৃচ্ছতি কেনেতি। তত্রোত্তরমুত্তরগ্রন্থেন দর্শয়তি উচ্যতইতি। সারো মধুরো হেতুরিতি যাবৎ। রসোঽহমিতি কথং তত্রাহ তস্মিন্নিতি। অপ্সু যো রসঃ সারস্তস্মিন্ময়ি মধুররসে কারণভূতে প্রোতা আপ ইতিবদুত্তরত্র সর্ব্বত্র ব্যাখ্যানং কর্ত্তব্যমিত্যাহ এবমিতি। উক্তমর্থং দৃষ্টান্তং কৃত্বা প্রভাস্মীত্যাদি ব্যাচষ্টে যথেতি। চন্দ্রাদিত্যয়োর্যা প্রভা তদ্ভূতে ময়ি তৌ প্রোতা-বিত্যর্থঃ। তত্র ব্যাক্যার্থং কথয়তি তস্মিন্নিতি। প্রণবভূতে তস্মিন্ বেদানাং প্রোতত্ব-বদাকাশে যঃ সারভূতঃ শব্দস্তদ্রূপে পরমেশ্বরে প্রোতমাকাশমিত্যাহ তথেতি। পৌরুষং নৃষ্বিতিভাগং পূর্ব্ববদ্বিভজতে তথেত্যাদিনা। পুরুষত্বমেব বিশদয়তি যত ইতি। পুংত্বসামান্যাত্মকে পরস্মিন্নীশ্বরে প্রোতাস্তদ্বিশেষাস্তদুপাদানত্বেন তৎস্বভাবত্বাদিত্যর্থঃ ॥ ৮ ॥

## স্বামীকৃত টীকা।

জগৎস্থিতিহেতুত্বমেব প্রপঞ্চয়তি রসোঽহমিতি পঞ্চভিঃ। অপ্সু রসোঽহং রসতন্মাত্র-স্বরূপয়া বিভূত্যা আশ্রয়ত্বেনাপ্সু স্থিতোঽহমিত্যর্থঃ, তথা শশিসূর্য্যয়োঃ প্রভাস্মি [illegible] সূর্য্যে চ প্রকাশরূপয়া বিভূত্যা তদাশ্রয়ত্বেন স্থিতোঽহমিত্যর্থঃ [illegible] সর্ব্বেষু বেদেষু বৈখরীরূপেষু [illegible] এবমাকাশে শব্দঃ [illegible] স্মি, নৃষু পুরুষেষু পৌরুষ [illegible]

পুণ্যো গন্ধঃ পৃথিব্যাঞ্চ তেজশ্চাস্মি বিভাবসৌ।
জীবনং সর্ব্বভূতেষু তপশ্চাস্মি তপস্বিষু॥ ৯॥

শাঙ্করভাষ্যম্।

পুণ্য ইতি। পুণ্যঃ সুরভিগন্ধঃ পৃথিব্যাঞ্চাহং তস্মিন্ ময়ি গন্ধভূতে পৃথিবী প্রোতা পুণ্যত্বং গন্ধস্য স্বভাব এব পৃথিব্যাং দর্শিতমবাদিষু রসাদেঃ পুণ্যত্বোপলক্ষণার্থমপুণ্যত্বস্তু গন্ধাদীনামবিদ্যাধর্ম্মাদ্যপেক্ষং সংসারিণাং ভূতবিশেষসংসর্গনিমিত্তং ভবতি, তেজো দীপ্তি শ্চাস্মি বিভাবসাবগ্নৌ তথা জীবনং সর্ব্বভূতেষু যেন জীবন্তি সর্ব্বাণি ভূতানি তজ্জীবনং, তপশ্চাস্মি তপস্বিষু তস্মিন্ তপসি ময়ি তপস্বিনঃ প্রোতাঃ॥ ৯॥

গিরিকৃত টীকা।

ময়ি সর্ব্বমিদং প্রোতমিত্যস্যৈব পরিপূরণার্থে প্রকারান্তরমাহ পুণ্যইতি। পৃথিব্যাং পুণ্যশব্দিতো যঃ সুরভিগন্ধঃ সোঽহমস্মীত্যত্র বাক্যার্থং কথয়তি তস্মিন্নিতি। কথং পৃথিব্যাং গন্ধস্য পুণ্যত্বং তত্রাহ পুণ্যত্বমিতি। যত্তু পৃথিব্যাং গন্ধস্য স্বাভাবিকঃ পুণ্যত্বং দর্শিতং তদবাদিষু রসাদেঃ স্বাভাবিকপুণ্যত্বস্যোপলক্ষণার্থমিত্যাহ পৃথিব্যামিতি। প্রথমোৎপন্নাঃ পঞ্চাপি গুণাঃ পুণ্যাএব সিদ্ধাদিভিরেব ভোগ্যত্বাদিতিভাবঃ, কথং তর্হিগন্ধাদীনামপুণ্যত্ব-প্রতিভানং তথাহ অপুণ্যত্বস্ত্বিতি। তদেব স্ফুটয়তি সংসারিণামিতি। গন্ধাদয়ঃ স্বকার্য্যৈ-র্ভূতৈঃ সহ পরিণমমানাঃ প্রাণিণাং পাপাদিবশাদপুণ্যাঃ সংপদ্যন্তইত্যর্থঃ। পঞ্চাগ্নৌ তেজঃ তদ্ভূতে ময়ি প্রোতোঽগ্নিরিত্যাহ তেজইতি। জীবনভূতে চ ময়ি সর্ব্বাণি ভূতানি প্রোতানীত্যাহ তথেতি। জীবনশব্দার্থমাহ যেনেতি অন্নরসেনামৃতাখ্যেনেত্যর্থঃ। তপ-শ্চাস্মীত্যাদেস্তাৎপর্য্যমাহ তস্মিন্নিতি। চিত্তৈকাগ্র্যমনাশকাদির্ব্বা তপস্তদাত্মনীশ্বরে প্রোতাস্তপস্বিনো, বিশেষণাভাবে বিশিষ্টস্য বস্তুনোঽভাবাদিত্যর্থঃ॥ ৯॥

নন্ন সর্ব্বাণি ভূতানি স্বকারণে প্রোতানি কথং তেষাং ত্বয়ি প্রোতত্বং তত্রাহ বীজ-মিতি। বীজান্তরাদ্যপেক্ষামনবস্থাং বারয়তি সনাতনমিতি। চৈতন্যস্যাভিব্যঞ্জকং তত্ত্বনি-শ্চয়সামর্থ্যং বুদ্ধিস্তদ্বতাং যা বুদ্ধিস্তদ্ভূতে ময়ি সর্ব্বে বুদ্ধিমন্তঃ প্রোতা ভবন্তীত্যাহ কিঞ্চেতি।

স্বামিকৃত টীকা।

কিঞ্চ পুণ্য ইতি। পুণ্যোঽবিকৃতো গন্ধো গন্ধতন্মাত্রং পৃথিব্যাশ্রয়ভূতোঽহমিত্যর্থঃ,যদ্বা বিভূতিত্বেনাপ্রাক্রমস্য বিবক্ষিতত্বাৎ সুরভিগন্ধস্তোমোৎকৃষ্টতয়া বিভূতিত্বাৎ পুণ্যো গন্ধ বিভাবসৌ অগ্নৌ যত্তেজোঽহং সহা দীপ্তিস্তদহং, সর্ব্বভূতেষু জীবনং প্রাণধারণ-তপস্বিষু বানপ্রস্থাদিষু দ্বন্দ্বসহনরূপং তপোঽস্মি॥ ৯॥

বীজং... চরাচরাণাং ভূতানাং বীজং ... কার্য্যোৎপাদনসামর্থ্যং সনাতনং নিত্যং উত্তরোত্তরসর্ব্বকার্য্যেষু ... তদেব বীজং মামভূতং বিদ্ধি নতু প্রকৃতি-

বীজং মাং সর্ব্বভূতানাং বিদ্ধি পার্থ সনাতনম্।
বুদ্ধির্বুদ্ধিমতামস্মি তেজস্তেজস্বিনামহম্॥ ১০॥
বলং বলবতাং চাহং কামরাগবিবর্জ্জিতম্।
ধর্ম্মাবিরুদ্ধো ভূতেষু কামোঽস্মি ভরতর্ষভ॥ ১১॥

## শাঙ্করভাষ্যম্।

বীজমিতি। বীজং প্ররোহকারণং মাং বিদ্ধি সর্ব্বভূতানাং হে পার্থ সনাতনং চিরন্তনং, কিঞ্চ বুদ্ধির্বিবেকশক্তিরন্তঃকরণস্য বুদ্ধিমতাং বিবেকশক্তিমতামস্মি, তেজঃ প্রাগল্ভ্যং তদ্বতাং তেজস্বিনামহং॥ ১০॥

বলমিতি। বলং সামর্থ্যমোজো বলবতামহং তচ্চ বলং কামরাগবিবর্জ্জিতং কামশ্চ রাগশ্চ কামরাগৌ কামস্তৃষ্ণা অসন্নিকৃষ্টেষু বিষয়েষু, রাগো রঞ্জনা প্রাপ্তেষু বিষয়েষু, তাভ্যাং কামরাগাভ্যাং বিবর্জিতং দেহাদিধারণমাত্রার্থং বলং সত্ত্বমহমস্মি ন তু যৎ সংসারিণাং তৃষ্ণারাগকারণং, কিঞ্চ ধর্ম্মাবিরুদ্ধো ধর্ম্মেণ শাস্ত্রার্থেন অবিরুদ্ধো যঃ প্রাণিষু ভূতেষু কামো যথা দেহধারণমাত্রাদ্যর্থেঽশপানাদিবিষয়ঃ কামোঽস্মি হে ভরতবর্ষভ॥ ১১॥

## গিরিকৃত টীকা।

প্রাগল্ভ্যবতাং যৎ প্রাগল্ভ্যং তদ্ভূতে ময়ি তদ্বন্তঃ প্রোতা ইত্যাহ তেজ ইতি, তদ্ধি প্রাগল্ভ্যং যৎপরাভিভবসামর্থ্যং পরৈশ্চাপ্রধৃষ্যত্বং॥ ১০॥

যচ্চ বলবতাং বলং তদ্ভূতে ময়ি তেষাং প্রোতত্বমিত্যাহ বলমিতি। কামক্রোধাদিপূর্ব্বকস্যাপি বলস্যানুমতিং বারয়তি তচ্চেতি। কামরাগয়োরেকার্থত্বমাশঙ্ক্যার্থভেদমাবেদয়তি কামস্তৃষ্ণেত্যাদিনা। বিশেষণসামর্থ্যসিদ্ধং ব্যাবর্ত্ত্যং দর্শয়তি নত্বিতি। শাস্ত্রার্থাবিরুদ্ধকামভূতে ময়ি তথাবিধকামবতাং ভূতানাং প্রোতত্বং বিবক্ষিত্বাহ কিঞ্চেতি। ধর্ম্মাবিরুদ্ধং কামমুদাহরতি যথেতি॥ ১১॥

## স্বামিকৃত টীকা।

ব্যক্তিরিব নশ্যৎ, তথা বুদ্ধিমতাং বুদ্ধিঃ প্রজ্ঞাহমস্মি, তেজস্বিনাং প্রগল্ভানাং তেজঃ প্রাগল্ভ্যমহং॥ ১০॥

কিঞ্চ বলমিতি। কামোঽপ্রাপ্তেষু বস্তুষ্বভিলাষো রাজসঃ, রাগঃ পুনরভিমতবিষয়েঽর্থে প্রাপ্তেঽপি পুনরধিকেঽর্থে চিত্তরঞ্জনাত্মকস্তৃষ্ণাপর্য্যায়স্তাভ্যাং বিবর্জ্জিতং বলবতাং বলমহং সাত্ত্বিকং স্বধর্ম্মানুষ্ঠানসামর্থ্যমহমিত্যর্থঃ, ধর্ম্মেণাবিরুদ্ধঃ স্বদারেষু পুত্রোৎপাদনমাত্রোপযোগী কামোঽহমস্মি॥ ১১॥

যে চৈব সাত্ত্বিকা ভাবা রাজসাস্তামসাশ্চ যে।
মত্ত এবেতি তান্ বিদ্ধি ন ত্বহং তেষু তে ময়ি ॥ ১২ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ যে চৈবেতি। যে চৈব সাত্ত্বিকাঃ সত্ত্বনির্বৃত্তাঃ ভাবাঃ পদার্থাঃ রাজসাঃ রজোনির্বৃত্তাস্তামসাস্তমোনির্বৃত্তাশ্চ যে কেচিৎ প্রাণিনাং স্বকর্ম্মবশাৎ জায়ন্তে ভাবাঃ তান্ মত্ত এব জায়মানানিত্যেবং বিদ্ধি সর্ব্বান্ সমস্তানেব যদ্যপি তে মত্তো জায়ন্তে তথাপি ন ত্বহং তেষু তদধীনস্তদ্বশো যথা সংসারিণস্তে পুনর্ময়ি মদ্বশা মদধীনাঃ ॥১২॥

এবম্ভূতমপি পরমেশ্বরং নিত্যশুদ্ধবুদ্ধমুক্তস্বভাবং সর্ব্বভূতাত্মানং নির্গুণং সংসারদোষবীজপ্ররোহকারণং মাং নাভিজানাতি জগদিত্যনুক্রোশং দর্শয়তি ভগবান্, তচ্চ কিং নিমিত্তং জগতোঽজ্ঞানমুচ্যতে, ত্রিভির্গুণময়ৈর্ভাবৈর্গুণবিকারৈঃ রাগদ্বেষমোহাদিপ্রকারৈর্ভাবৈঃ পদার্থৈরেভির্যথোক্তৈঃ সর্ব্বমিদং প্রাণিজাতং জগৎ মোহিতমবিবেকতামাপা-

## গিরিকৃত টীকা।

চিদানন্দয়োরভিব্যঞ্জকানাং ভাবানাং ঈশ্বরাত্মত্বাভিধানাদন্যেষামতদাত্মত্বপ্রাপ্তাবুক্তং কিঞ্চেতি। প্রাণিনাং ত্রৈবিধ্যে হেতুং দর্শয়ন্ বাক্যার্থমাহ যে কেচিদিতি। তর্হি পিতুরিব পুত্রাধীনত্বং ত্বত্তো জায়মানানাং অধীনত্বং তবাপি স্যাদিতি বিক্রিয়াবত্ত্বদূষ্যত্বপ্রসক্তিরিত্যাশঙ্ক্যাহ যদ্যপীতি। মম পরমার্থত্বাত্তেষাং কল্পিতত্বান্ন তদগুণদোষৌ ময়ি স্যাতামিত্যর্থঃ। তেষামপি তদ্বদেব স্বতন্ত্রতাসত্ত্বাৎ কিমিতি কল্পিতত্বমিত্যাশঙ্ক্যাহ তে পুনরিতি। ত্রিবিধানাং ভাবানাং ন স্বাতন্ত্র্যমীশ্বরকার্য্যত্বেন তদধীনত্বাত্তথা চ কল্পিতত্বাধিষ্ঠানসত্তাপ্রতীতিভ্যামেব তত্বত্তন্মাত্রত্বসিদ্ধিরিত্যর্থঃ ॥ ১২ ॥

সতীশ্বরস্য স্বাতন্ত্র্যে নিত্যশুদ্ধত্বাদৌ চ কুতো জগতস্তদাত্মকস্য সংসারিত্বমিত্যাশঙ্ক্য তদজ্ঞানাদিত্যাহ এবম্ভূতমপীতি। যদ্যপ্রপঞ্চেঽবিক্রিয়শ্চ ত্বং কস্মাত্বামাত্মভূতং স্বয়ংপ্রকাশং

## স্বামিকৃত টীকা।

কিঞ্চ যে চৈবেতি। যে চান্যেঽপি সাত্ত্বিকা ভাবাঃ শমদমাদয়ঃ, রাজসাশ্চ হর্ষদর্পাদয়ঃ তামসাশ্চ যে শোকমোহাদয়ঃ, প্রাণিনাং স্বকর্ম্মবশাজ্জায়ন্তে তান্ সর্ব্বান্ মত্ত এব জাতান্ বিদ্ধি মদী[illegible]গুণকার্য্যত্বাৎ, এবমপি তেষ্বহং ন বর্ত্তে জীববত্তদধীনোঽহং ন ভবামীত্যর্থঃ [illegible] মদধীনাঃ সন্তো ময়ি বর্ত্তন্ত ইত্যর্থঃ ॥১২॥

[illegible] জনঃ কিমিতি ন জানাতীত্যত আহ [illegible] ত্রিভিরিতি। [illegible] ভাবৈরেভিঃ পূর্ব্বোক্তৈর্গুণময়ৈঃ কামলোভাদিভিঃ প্রকারৈঃ [illegible]

ত্রিভির্গুণময়ৈর্ভাবৈরেভিঃ সর্ব্বমিদং জগৎ।
মোহিতং নাভিজানাতি মামেভ্যঃ পরমব্যয়ম্ ॥ ১৩ ॥
দৈবী হ্যেষা গুণময়ী মম মায়া দুরত্যয়া।
মামেব যে প্রপদ্যন্তে মায়ামেতাং তরন্তি তে ॥ ১৪ ॥

## শাঙ্করভাষ্যম্।

দিতং সৎ নাভিজানাতি মামেভ্যো যথোক্তেভ্যো গুণেভ্যঃ পরং ব্যতিরিক্তং বিলক্ষণঞ্চা-ব্যয়ং ব্যয়রহিতং জন্মাদিসর্ব্বভাববিকারবর্জিতমিত্যর্থঃ ॥ ১৩ ॥

কথং পুনর্দ্দৈবীমেতাং ত্রিগুণাত্মিকাং বৈষ্ণবীং মায়ামতিক্রামন্তীত্যুচ্যতে দৈবীতি। দৈবী দেবস্য মমেশ্বরস্য বিষ্ণোঃ স্বভাবভূতা হি যস্মাৎ এষা যথোক্তা গুণময়ী মম মায়া দুর-ত্যয়া দুঃখেনাত্যয়ঃ অতিক্রমণং যস্যাঃ সা দুরত্যয়া, তত্রৈবং সতি সর্ব্বধর্ম্মান্ পরিত্যজ্য মা-মেব মায়াবিনং স্বাত্মভূতং সর্ব্বাত্মনা যে প্রপদ্যন্তে তে মায়ামেতাং সর্ব্বভূতচিত্তমোহিনীং তরন্ত্যতিক্রামন্তি সংসারবন্ধনাৎ মুচ্যন্ত ইত্যর্থঃ ॥ ১৪ ॥

## গিরিকৃত টীকা।

সর্ব্বো জনস্তথা ন জানাতীতি মত্বা শঙ্কতে তচ্চেতি। শ্লোকেনোত্তরমাহ উচ্যত ইতি। এভ্যঃ পরমিত্যপ্রপঞ্চকত্বমুচ্যতে, অব্যয়মিতি সর্ব্ববিক্রিয়ারাহিত্যং ॥ ১৩ ॥

যথোক্তানাদিসিদ্ধমায়াপারবশ্যপরিবর্জনাযোগাজ্জগতো ন কদাচিদপি তত্ত্ববোধসমুদয়-সম্ভাবনেত্যাশঙ্কতে কথং পুনরিতি। ভগবদেকশরণতয়া তত্ত্বজ্ঞানদ্বারেন মায়াতিক্রমঃ-সম্ভবতীতি পরিহরতি উচ্যত ইতি। কথং দুরত্যয়ত্বেন তদত্যয়ঃ স্যাদিতি তত্রাহ মামে-বেতি। প্রধানস্যেব স্বাতন্ত্র্যং মায়ায়া ব্যুদস্যতি দেবস্যেতি। স্বাতন্ত্র্যে মায়াযাস্থপপত্তিং হি শব্দদ্যোতিতাং হেতুং করোতি যস্মাদিতি। অনুভবসিদ্ধা সা নাকস্মাদপলাপমর্হতীত্যাহ এষেতি। জগতস্তত্ত্বপ্রতিবন্ধকীভূতা গুণাঃ সত্ত্বাদয়ঃ। মমেতি প্রাগুক্তমেব মায়ায়াঃ সম্বন্ধমনূদ্য বিধিৎসিতং দুরত্যয়ত্বং বিভজতে দুঃখেনেতি। মামেবেত্যাদি ব্যাচষ্টে তত্রেতি।

## স্বামিকৃত টীকা।

জগৎ অতো মাং নাভিজানাতি কথংভূতং এভ্যো ভাবেভ্যঃ পরং এভিরস্পৃষ্টং এতেষাং নিয়ন্তারং, অতএবাব্যয়ং নির্ব্বিকারমিত্যর্থঃ ॥ ১৩ ॥

কেন তর্হি ত্বাং জানন্তীত্যত আহ দৈবীতি। দৈবী অলৌকিকী অত্যদ্ভুতেত্যর্থঃ গুণময়ী সত্ত্বাদিগুণবিকারাত্মিকা মম পরমেশ্বরস্য শক্তির্মায়া দুরত্যয়া দুস্তরা হি প্রসিদ্ধমেতৎ তথাপি মামেবৈকমব্যভিচারিণা ভক্ত্যা যে প্রপদ্যন্তে ভজন্তি মায়ামেতাং সুদুস্তরামপি তে তরন্তি ততো মাং জানন্তীতি ভাবঃ ॥

**ন মাং দুষ্কৃতিনো মূঢ়াঃ প্রপদ্যন্তে নরাধমাঃ।**
**মায়য়াপহৃতজ্ঞানা আসুরং ভাবমাশ্রিতাঃ ॥ ১৫ ॥**

## শাঙ্করভাষ্যম্।

যদি ত্বাং প্রপন্নাঃ মায়ামেতাং তরন্তি কস্মাত্ত্বামেব সর্ব্বে ন প্রপদ্যন্তে ইত্যুচ্যতে ন মামিতি। ন মাং পরমেশ্বরং দুষ্কৃতিনঃ পাপকারিণো মূঢ়াঃ প্রপদ্যন্তে নরাধমাঃ নরাণাং মধ্যে অধমা নিকৃষ্টাস্তে চ মায়য়াপহৃতজ্ঞানা আসুরং ভাবং হিংসানৃতাদিলক্ষণমাশ্রিতাঃ॥১৫॥

যে পুনর্নরোত্তমাঃ পুণ্যকর্ম্মাণঃ চতুর্ব্বিধাইতি। চতুর্ব্বিধাশ্চতুঃপ্রকারা ভজন্তে সেবন্তে মাং জনাঃ সুকৃতিনঃ পুণ্যকর্ম্মাণো হে অর্জ্জুন আর্ত্তঃ আর্ত্তিপরিগৃহীতঃ তস্করব্যাঘ্ররোগাদিনা

## গিরিকৃত টীকা।

তস্মিন্ মায়ারূপে যথোক্তরীত্যা দুরত্যয়ে সতীতি যাবৎ, মামেবেত্যেবকারেণ মায়ায়া বেদ্যকোটিনিবেশাভাবো বিবক্ষ্যতে, সর্ব্বাত্মনা কর্ম্মানুষ্ঠানাদিব্যগ্রতামন্তরেণেত্যর্থঃ। মায়াতিক্রমে মোহাতিক্রমো ভবতীতি মত্বা বিশিনষ্টি সর্ব্বেতি। মায়াতৎপ্রযুক্তমোহয়োরতিক্রমেঽপি কথং পুরুষস্য পুরুষার্থসিদ্ধিরিত্যাশঙ্ক্যাহ সংসারেতি ॥ ১৪ ॥

ভগবন্নিষ্ঠায়া মায়াতিক্রমহেতুত্বে তদেকনিষ্ঠত্বমেব সর্ব্বেষামুচিতমিতি পৃচ্ছতি যদীতি। পাপকারিত্বেনাবিবেকভূয়স্তয়া হিংসানৃতাদিভূয়স্ত্বাত্ভূয়সাং জন্তূনাং ন ভগবন্নিষ্ঠত্বসিদ্ধিরিত্যাহ উচ্যতইতি। মৌঢ্যং পাপকারিত্বে হেতুরতএব নিকৃষ্টাঃ, সংমুষিতমিব তিরস্কৃতং জ্ঞানং স্বস্বরূপচৈতন্যমেষামিতি তে তথা ॥ ১৫ ॥

কেষাং তর্হি তন্নিষ্ঠতা সুকরেতি তত্রাহ যে পুনরিতি। তে ভজন্তে ভগবন্তমিতি শেষঃ। যে ত্বাং ভজন্তে তে কিং সর্ব্বে মায়াং তরন্তি নৈবং প্রার্থনাবৈচিত্র্যাদিত্যাহ চতুর্ব্বিধা ইতি

## স্বামিকৃত টীকা।

কিমিতি তর্হি সর্ব্বে ত্বামেব ন ভজন্তীত্যত আহ ন মামিতি। নরেষু যেঽধমাস্তে মাং ন প্রপদ্যন্তে ন ভজন্তি, অধমত্বে হেতুঃ মূঢ়া বিবেকশূন্যাঃ তৎকুতঃ দুষ্কৃতিনঃ পাপশীলাঃ অতো মায়য়াপহৃতং নিরস্তং শাস্ত্রাচার্য্যোপদেশাভ্যাং জাতমপি জ্ঞানং যেষাং তে তথা অতএব দম্ভো দর্পোঽভিমানশ্চ ক্রোধঃ পারুষ্যমেব চেত্যাদিনা বক্ষ্যমাণমাসুরং ভাবং স্বভাবং প্রাপ্তাঃ সন্তো ন মাং ভজন্তি ॥ ১৫ ॥

সুকৃতিনস্তু মাং ভজন্ত্যেব তে চ সুকৃততারতম্যেন চতুর্বিধাইত্যাহ চতুর্বিধা ইতি। পূর্ব্বজন্মনি যে কৃতপুণ্যাস্তে মাং ভজন্তি তে চতুর্বিধাঃ আর্ত্তো রোগাদ্যভিভূতঃ স যদি পূর্ব্বং কৃতপুণ্যস্তর্হি মাং ভজতি অন্যথা ক্ষুদ্রদেবতাভজনেন সংসরতি এবমুত্তরত্রাপি দ্রষ্টব্যং,

চতুর্ব্বিধা ভজন্তে মাং জনাঃ সুকৃতিনোঽর্জ্জুন ।
আর্ত্তো জিজ্ঞাসুরর্থার্থী জ্ঞানী চ ভরতর্ষভ ॥ ১৬ ॥
তেষাং জ্ঞানী নিত্যযুক্ত একভক্তির্বিশিষ্যতে ।
প্রিয়ো হি জ্ঞানিনোঽত্যর্থমহং স চ মম প্রিয়ঃ ॥ ১৭ ॥

## শাঙ্করভাষ্যম্ ।

অভিভূতঃ অভিভবং আপন্নো জিজ্ঞাসুর্ভগবত্তত্ত্বং জ্ঞাতুমিচ্ছতি যোঽর্থার্থী ধনকামো জ্ঞানী বিষ্ণোস্তত্ত্ববিচ্চ হে ভরতর্ষভ ॥ ১৬ ॥

তেষামিতি । তেষাং চতুর্ণাং মধ্যে জ্ঞানী তত্ত্ববিত্ত্বান্নিত্যযুক্তো ভবত্যেকভক্তিশ্চান্যস্য ভজনীয়স্যাদর্শনাদতঃ স একভক্তির্বিশিষ্যতে বিশেষমাধিক্যমাপদ্যতে অতিরিচ্যত ইত্যর্থঃ । প্রিয়ো হি যস্মাদহমাত্মা জ্ঞানিনোঽতস্তস্যাহমত্যর্থং প্রিয়ঃ প্রসিদ্ধং হি লোকে আত্মা-প্রিয়ো ভবতি ইতি তস্মাৎ জ্ঞানিন আত্মত্বাদ্বাসুদেবঃ প্রিয়ো ভবতীত্যর্থঃ স চ জ্ঞানী মম বাসুদেবস্যাত্মৈবেতি মমাত্যর্থং প্রিয়ঃ ॥ ১৭ ॥

## গিরিকৃত টীকা ।

আপন্নস্তন্নিবৃত্তিমিচ্ছন্নিতি শেষঃ, তত্ত্ববিদিতি শব্দজ্ঞানবানাত্মতত্ত্বসাক্ষাৎকারমাত্রার্থী মুমুক্ষুরিত্যর্থঃ ॥ ১৬ ॥

চতুর্ব্বিধানাং তেষাং সুকৃতিনাং ভগবদভিমুখানাং তুল্যত্বমাশঙ্ক্যাহ তেষামিতি । তস্য বিশিষ্যমাণত্বে হেতুমাহ প্রিয়ো হীতি । নিত্যযুক্তত্বং ভগবত্যাত্মনি সদা সমাহিতচেতস্ত্বং অসারে সংসারে ভগবানেব সারঃ সোঽহমস্মীত্যেকস্মিন্নদ্বিতীয়ে স্বস্মাদত্যন্তমভিন্নে ভগবতি ভক্তিঃ স্নেহবিশেষোঽস্যেত্যেকভক্তিঃ, তস্যাধিক্যে হেতুং বিবৃণোতি প্রিয়ো হীত্যাদিনা । ভগবতো জ্ঞানিনশ্চ পরস্পরং প্রেমাস্পদত্বে প্রসিদ্ধিং প্রমাণয়তি প্রসিদ্ধং হীতি । আত্মনো জ্ঞানিনং প্রতি প্রিয়ত্বেঽপি ভগবতো বাসুদেবস্য কথং তং প্রতি প্রিয়ত্বমিত্যাশঙ্ক্যাহ তস্মাদিতি । অহং জ্ঞানিনো নিরুপাধিকপ্রেমাস্পদং পরমপুরুষার্থত্বেনাত্মত্বেন চ গৃহীত-ত্বাদিত্যর্থঃ । জ্ঞানিনোঽপি ভগবন্তং প্রতি প্রিয়ত্বং প্রকটয়তি সচেতি ॥ ১৭ ॥

## স্বামিকৃত টীকা ।

জিজ্ঞাসুরাত্মজ্ঞানেচ্ছুঃ, অর্থার্থী অত্র পরত্র চ ভোগসাধনভূতার্থপ্রেপ্সুঃ, জ্ঞানী চাত্মবিৎ ॥ ১৬ ॥

তেষাং মধ্যে জ্ঞানী শ্রেষ্ঠ ইত্যাহ তেষামিতি । তেষাং মধ্যে জ্ঞানী বিশিষ্টঃ তত্র হেতবঃ নিত্যযুক্তঃ সদা মন্নিষ্ঠঃ, একস্মিন্ ময্যেব ভক্তির্যস্য সঃ, জ্ঞানিনো দেহাদ্যভিমানাভাবেন চিত্তবিক্ষেপাভাবান্নিত্যযুক্তত্বমেকান্তভক্তিত্বঞ্চ সম্ভবতি নান্যস্য, অতএব তস্যাহমত্যন্তং প্রিয়ঃ স চ মম, তস্মাদেতৈর্নিত্যযুক্তত্বাদিভিশ্চতুর্ভির্হেতুভিঃ স উত্তমঃ ইত্যর্থঃ ॥ ১৭ ॥

উদারাঃ সর্ব্ব এবৈতে জ্ঞানী ত্বাত্মৈব মে মতম্।
আস্থিতঃ স হি যুক্তাত্মা মামেবানুত্তমাং গতিম্ ॥ ১৮ ॥

## শাঙ্করভাষ্যম্।

তর্হি আর্ত্তাদয়স্ত্রয়ো বাসুদেবস্যাপ্রিয়াঃ, ন, কিং তর্হি উদারা ইতি। উদারা উৎকৃষ্টাঃ সর্ব্ব এবৈতে ত্রয়োঽপি মম প্রিয়া এবেত্যর্থঃ ন হি কশ্চিন্মদ্ভক্তো মম বাসুদেবস্যাপ্রিয়ো ভবতীতি, জ্ঞানীত্বত্যর্থং প্রিয়ো ভবতীতি বিশেষঃ. তৎ কস্মাদিত্যাহ জ্ঞানী ত্বাত্মৈব নান্যো মত মিতি মে মম মতং নিশ্চয়ঃ, আস্থিত আরোঢ়ুং প্রবৃত্তঃ স চ জ্ঞানী হি যস্মাদহমেব ভগবান্ বাসুদেবো নান্যোঽস্মীত্যেবং যুক্তাত্মা সমাহিতচিত্তঃ সন্ মামেব পরং ব্রহ্ম গন্তব্যমনুত্তমাং গতিং গন্তুং প্রবৃত্ত ইত্যর্থঃ ॥ ১৮ ॥

## গিরিকৃত টীকা।

জ্ঞানী চেদত্যর্থমীশ্বরস্য প্রিয়ো ভবতি তর্হি বিশেষণসামর্থ্যাদিতরেষামপ্রিয়ত্বং প্রাপ্তমিতি শঙ্কতে তর্হীতি। তেষাং ভগবন্তং প্রতি প্রিয়ত্বমত্র বিবক্ষিতমিত্যাহ নেতি। অত্যর্থমিতি বিশেষণস্য তর্হি কিং প্রয়োজনমিতি পৃচ্ছতি কিং তর্হীতি। সর্ব্বেষাং ভগবদভিমুখত্বাদুৎকর্ষেঽপি জ্ঞানিনি তদতিরেকমঙ্গীকৃত্য বিশেষণমিত্যাহ উদারা ইতি। কিং তত্র প্রমাণমিত্যাশঙ্ক্য ঈশ্বরজ্ঞানমিত্যাহ মে মতমিতি। জ্ঞানীত্বাত্মৈবেত্যত্র হেতুমাহ আস্থিত ইতি। সর্ব্বশব্দস্য জ্ঞানিব্যতিরিক্তবিষয়ত্বমাহ ত্রয়োঽপীতি। জ্ঞানিব্যতিরিক্তানাং ভগবদভিমুখত্বেঽপি জ্ঞানাভাবাপবাধান্ন ভগবৎপ্রীতিবিষয়তেত্যাশঙ্ক্যাহ ন হীতি। কস্তর্হি জ্ঞানবতি সতি বিশেষস্তত্রাহ জ্ঞানীত্বিতি। তমেব বিশেষং প্রশ্নপূর্ব্বকং প্রকটয়তি কস্মাদিত্যাদিনা। সর্ব্বামাত্মানং পশ্যতোঽপি অপক্ষপাতিনঃ তস্য তব কথং যথোক্তো নিশ্চয়ঃস্যাদিত্যাশঙ্ক্যাস্থিত ইত্যেতদ্ব্যাকরোতি আরোঢ়ুমিতি। আরোহে হেতুং সূচয়তি স চ জ্ঞানীতি। আরোঢ়ুং প্রবৃত্তমেব স্ফুটয়তি মামেবেতি ॥ ১৮ ॥

উত্তরশ্লোকস্য গতার্থত্বং পরিহরতি জ্ঞানীতি। জ্ঞানার্থসংস্কারো বাসনা তত্তজ্জন্মনি পুণ্যকর্ম্মানুষ্ঠানজনিতা বুদ্ধিশুদ্ধিস্তদাশ্রয়াণাং তত্ত্বতামনন্তানাং জন্মনামিতি যাবৎ। জ্ঞানতত্ত্বং প্রাক্তনেষপি জন্মসু সম্ভাবিতমিত্যাশঙ্ক্যাহ প্রাপ্তেতি। জ্ঞানবতো ভগবৎপ্রতিপত্তিং প্রশ্নদ্বারা বিবৃণোতি কথমিতি। যথোক্তজ্ঞানস্য তত্ত্বতশ্চ দুর্লভত্বং সূচয়তি যএবমিতি।

## স্বামিকৃত টীকা।

তর্হি ইতরে ত্রয়স্তদ্ভক্তাঃ কিং সংসরন্তি ন হি ন হীত্যাহ উদারা ইতি। সর্ব্বেঽপ্যেতে উদারা মহান্তঃ মোক্ষভাজ এবেত্যর্থঃ জ্ঞানী তু পুনরাত্মৈবেতি মে মতং নিশ্চয়ঃ, হি যস্মাৎ স জ্ঞানী যুক্তাত্মা মদেকচিত্তঃ সন্ ন বিদ্যতে উত্তমা যস্যাস্তামনুত্তমাং সর্ব্বোত্তমাং গতিং মামেবাস্থিত আশ্রিতবান্ মদ্ব্যতিরিক্তমন্যৎ ফলং ন মন্যত ইত্যর্থঃ ॥ ১৮ ॥

বহূনাং জন্মনামন্তে জ্ঞানবান্ মাং প্রপদ্যতে।
বাসুদেবঃ সর্ব্বমিতি স মহাত্মা সুদুর্লভঃ॥ ১৯॥
কামৈস্তৈস্তৈর্হৃতজ্ঞানাঃ প্রপদ্যন্তেঽন্যদেবতাঃ।
তং তং নিয়মমাস্থায় প্রকৃত্যা নিয়তাঃ স্বয়া॥ ২০॥

## শাঙ্করভাষ্যম্।

জ্ঞানী পুনরপি স্তূয়তে বহূনামিতি। বহূনাং জন্মনাং জ্ঞানার্থসংস্কারার্জনাশ্রয়াণাং অন্তে সমাপ্তৌ জ্ঞানবান্ প্রাপ্তপরিপাকজ্ঞানো মাং বসুদেবং প্রত্যগাত্মানং প্রত্যক্ষতঃ প্রতিপদ্যতে কথং বাসুদেবঃ সর্ব্বমিতি। য এবং সর্ব্বাত্মানং মাং প্রতিপদ্যতে স মহাত্মা ন তৎসমোঽন্যোঽস্ত্যধিকো বাঽতঃ সুদুর্লভো মনুষ্যাণাং সহস্রেষ্বিত্যুক্তং॥ ১৯॥

আত্মৈব সর্ব্বো বাসুদেব ইত্যেবমপ্রতিপত্তৌ কারণমুচ্যতে কামৈরিতি। কামৈস্তৈস্তৈঃ পুত্রপশুস্বর্গাদিবিষয়ৈর্হৃতজ্ঞানা অপহৃতবিবেকবিজ্ঞানাঃ প্রপদ্যন্তে অন্যদেবতাঃ প্রাপ্নুবন্তি বাসুদেবাদাত্মনোঽন্যা দেবতাস্তং তং নিয়মং দেবতারাধনে প্রসিদ্ধো যো যো নিয়মস্তং তমাস্থায়াশ্রিত্য প্রকৃত্যা স্বভাবেন জন্মান্তরার্জিতসংস্কারবিশেষেণ নিয়তা নিয়মিতাঃ স্বয়া আত্মীয়য়া॥ ২০॥

## গিরিকৃত টীকা।

মহৎ সর্ব্বোৎকৃষ্টমাত্মশব্দিতং চিত্তমস্যেতি। মহাত্মত্বে ফলিতং হেতুমাহ অত ইতি। তত্র বাক্যোপক্রমানুকূল্যং কথয়তি মনুষ্যাণামিতি॥ ১৯॥

কিমিতি তর্হি সর্ব্বেষাং প্রত্যগ্ভূতে ভগবতি যথোক্তজ্ঞানং নোদেতীত্যাশঙ্ক্য ন মামিত্যত্রোক্তং হৃদি নিধায় জ্ঞানানুদয়ে হেত্বন্তরমাহ আত্মৈবেতি। কামৈর্নানাবিধৈরপহৃত-

## স্বামিকৃত টীকা।

এবংভূতো মদ্ভক্তোঽতিদুর্লভ ইত্যাহ বহূনামিতি। বহূনাং জন্মনাং কিঞ্চিৎ কিঞ্চিৎ পুণ্যোপচয়েন অন্তে চরমে জন্মনি জ্ঞানবান্ সন্ সর্ব্বমিদং চরাচরং বাসুদেব ইতি সর্ব্বাত্মদৃষ্ট্যা মাং প্রপদ্যতে ভজতি অতঃ স মহাত্মা অপরিচ্ছিন্নদৃষ্টিঃ সুদুর্লভঃ॥ ১৯॥

তদেবং কামিনোঽপি সন্তঃ কামপ্রাপ্তয়ে পরমেশ্বরমেব যে ভজন্তি তে কামান্ প্রাপ্য শনৈর্মুচ্যন্ত ইত্যুক্তং যে ত্বত্যন্তং রাজসাস্তামসাশ্চ কামাভিভূতাঃ ক্ষুদ্রদেবতাঃ সেবন্তে তে সংসরন্তীত্যাহ কামৈরিতি চতুর্ভিঃ। যে তু তৈস্তৈঃ পুত্রকীর্ত্তিশত্রুজয়াদিবিষয়ৈঃ কামৈরপহৃতবিবেকাঃ সন্তোঽন্যাঃ ক্ষুদ্রা ভূতপ্রেতযক্ষাদিদেবতা ভজন্তি, কিং কৃত্বা তত্তদ্দেবতারাধনে যো যো নিয়ম উপবাসাদিলক্ষণস্তং তং নিয়মং স্বীকৃত্য তত্রাপি চ স্বীয়য়া প্রকৃত্যা পূর্ব্বাভ্যাসবাসনয়া নিয়তা বশীকৃতাঃ সন্তো দেবতাবিশেষং ভজন্তি॥ ২০॥

যো যো যাং যাং তনুং ভক্তঃ শ্রদ্ধয়ার্চ্চিতুমিচ্ছতি।
তস্য তস্যাচলাং শ্রদ্ধাং তামেব বিদধাম্যহং ॥ ২১ ॥
স তয়া শ্রদ্ধয়া যুক্তস্তস্যারাধনমীহতে।
লভতে চ ততঃ কামান্ ময়ৈব বিহিতান্ হি তান্ ॥ ২২ ॥

## শাঙ্করভাষ্যম্।

তেষাঞ্চ কামিনাং যো য ইতি। যো যঃ কামী যাং যাং দেবতাতনুং শ্রদ্ধয়া সংযুক্তো ভক্তশ্চ সন্নর্চ্চিতুং পূজয়িতুমিচ্ছতি তস্য তস্য কামিনোঽচলাং স্থিরাং শ্রদ্ধাং তামেব বিদধামি স্থিরীকরোমি যয়ৈবং পূর্ব্বং প্রবৃত্তঃ স্বভাবতো যো যো যাং দেবতাতনুং শ্রদ্ধয়ার্চ্চিতুমিচ্ছতীতি ॥ ২১ ॥

স তয়েতি। স তয়া মদ্বিহিতয়া শ্রদ্ধয়া যুক্তঃ সন্ তস্যা দেবতায়াঃ তস্বা আরাধনমীহতে চেষ্টতে,লভতে চ ততঃ তস্যা আরাধিতাযাদেবতাতন্বাঃ কামানীপ্সিতান্ ময়ৈব পরমেশ্বরেণ সর্ব্বজ্ঞেন কর্ম্মফলবিভাগজ্ঞতয়া বিহিতান্নির্ম্মিতাংস্তান্ হি যস্মাত্তে ভগবতা বিহিতাঃ কামাস্তস্মাত্তানবশ্যং লভন্তে ইত্যর্থঃ, হিতানিতি পদাচ্ছেদে হিতত্বং কামানামুপচরিতং কল্প্যং ন হি কামা হিতাঃ কস্যচিৎ ॥ ২২ ॥

## গিরিকৃত টীকা।

বিবেকবিজ্ঞানস্য দেবতান্তরনিষ্ঠত্বমেব প্রত্যগ্‌ভূতপরদেবতাপ্রতিপত্ত্যভাবে কারণমিত্যাহ কামৈরিতি। দেবতান্তরনিষ্ঠত্বে হেতুমাহ তং তমিতি। প্রসিদ্ধো নিয়মো জপোপবাসপ্রদক্ষিণনমস্কারাদিঃ। নিয়মবিশেষাশ্রয়ণে কারণমাহ প্রকৃত্যেতি ॥ ২০ ॥

তত্তদ্দেবতাপ্রসাদাৎ কামিনামপি সর্ব্বেশ্বরে সর্ব্বাত্মকে বাসুদেবে ক্রমেণ ভক্তির্ভবিষ্যতীত্যাশঙ্ক্যাহ তেষাঞ্চেতি। স্বভাবতো জন্মান্তরীয়সংস্কারবশাদিত্যর্থঃ। ভগবদ্বিহিতয়া স্থিরয়া শ্রদ্ধয়া সংস্কারাধীনয়া দেবতাবিশেষমারাধয়তোঽপি ভগবদনুগ্রহাদেব ফলপ্রাপ্তিরিত্যাহ যো যো যামিতি। ঈহতে নির্ব্বর্ত্তয়তীত্যর্থঃ ॥ ২১ ॥

আরাধিতদেবতাপ্রসাদাৎ ফলপ্রাপ্তৌ কিমীশ্বরেণেত্যাশঙ্ক্য তস্য সর্ব্বজ্ঞস্য সর্ব্বকর্ম্মফলবিভাগাভিজ্ঞস্য তত্তদ্দেবতাধিষ্ঠাতৃত্বাত্তস্যৈব ফলদাতৃত্বমিত্যাহ সর্ব্বজ্ঞেনেতি। একো-

## স্বামিকৃত টীকা।

তেষাং মধ্যে যো য ইতি। যো যো ভক্তো যাং যাং তনুং দেবতারূপাং মদীয়ামেব মূর্ত্তিং শ্রদ্ধয়া অর্চ্চিতুং ইচ্ছতি প্রবর্ত্ততে তস্য তস্য ভক্তস্য তত্তন্মূর্ত্তিবিষয়াং তামেব শ্রদ্ধামচলাং দৃঢ়ামহমন্তর্যামী বিদধামি করোমি ॥ ২১ ॥

ততশ্চ স তয়েতি। স ভক্তস্তয়া দৃঢ়য়া শ্রদ্ধয়া তস্যাস্তনোরারাধনমীহতে করোতি

অন্তবত্তু ফলং তেষাং তদ্ভবত্যল্পমেধসাম্।
দেবান্ দেবযজো যান্তি মদ্ভক্তা যান্তি মামপি ॥ ২৩ ॥

## শাঙ্করভাষ্যম্।

যস্মাদন্তবৎসাধনব্যাপারা অবিবেকিনঃ কামিনশ্চ তে অতঃ অন্তবদিতি। অন্তবদ্বিনাশি তু ফলং তেষাং তদ্ভবত্যল্পমেধসাল্পপ্রজ্ঞানাং, দেবান্ দেবযজো যান্তি দেবান্ যজন্তি ইতি দেবযজঃ তে দেবান্ যান্তি মদ্ভক্তা যান্তি মামপি, এবং সমানেঽপ্যায়াসে মামেব ন প্রতিপদ্যন্তে অনন্তফলায়াহো খলু কষ্টং বর্ত্তত ইত্যনুক্রোশং দর্শয়তি ভগবান্ ॥ ২৩ ॥

## গিরিকৃত টীকা।

বহূনাং যো বিদধাতি কামানিত্যাদিশ্রুতিমাশ্রিত্য হিতানিতি পদদ্বয়ং ব্যাচষ্টে যস্মাদিতি হিতানিত্যেকং পদমিতি পক্ষং প্রত্যাহ হিতানিতি। মুখ্যত্বসম্ভবে কিমিত্যৌপচারিকত্ব মিত্যাশঙ্ক্যাহ ন হীতি ॥ ২২ ॥

প্রেক্ষাপূর্ব্বকারিণি কামানাং হিতত্বাভাবে হেতুমাহ যস্মাদিতি। কিঞ্চ যে কামিনস্তে ন বিবেকিনস্তত‌শ্চাবিবেকপূর্ব্বকত্বাৎ কামানাং কুতো হিতত্বাশঙ্কেত্যাহ অবিবেকিন-ইতি। কামানামনন্তফলত্বেন হিতত্বমাশঙ্ক্যাহ অত ইতি। তেষামবিবেকপূর্ব্বকত্বমতঃ-শব্দার্থঃ, তুশব্দোঽবধারণার্থঃ। কামফলস্য বিনাশিত্বে কিমিতি কামনিষ্ঠত্বং জন্তূনামিত্যাশঙ্ক্য প্রজ্ঞামান্দ্যাদিত্যাহ অল্পেতি। কিং তর্হি সাধনমনন্তফলায়েত্যাশঙ্ক্য ভগবদ্ভক্তিরিত্যাহ মদ্ভক্তা ইতি। অক্ষরার্থমুক্ত্বা শ্লোকস্য তাৎপর্য্যার্থমাহ এবমিতি। দেবতাপ্রাপ্তৌ ভগবৎ-প্রাপ্তৌ চেতি শেষঃ, মামেবেত্যাদৌ দেবতাবিশেষং প্রতিপদ্যন্তে অন্তবৎ ফলায়েতি বক্তব্যং। উক্তবৈপরীত্যে কারণমবিবেকাতিরিক্তং নাস্তি ইত্যভিপ্রেত্যাহ অহো খল্বিতি ॥২৩॥

ভগবদ্ভজনস্যোত্তমফলত্বেঽপি প্রাণিনাং প্রায়েণ তন্নিষ্ঠত্বাভাবে প্রশ্নপূর্ব্বকং নিমিত্তং নিবেদয়তি কিং নিমিত্তমিত্যাদিনা। অপ্রকাশং শরীরগ্রহণাৎ পূর্ব্বমিতি শেষঃ, ইদানীং

## স্বামিকৃত টীকা।

ততশ্চ কামাঃ যে সঙ্কল্পিতাস্তাংস্ততো দেবতাবিশেষাল্লভতে, কিন্তু ময়ৈব তত্তদ্দেবতান্তর্যা-মিনা বিহিতান্ নির্ম্মিতান্ হি স্ফুটমেতৎ তত্তদ্দেবতানামপি মদধীনত্বান্মন্মূর্ত্তিত্বাচ্চে-ত্যর্থঃ ॥ ২২ ॥

তদেবং যদ্যপি সর্ব্বা অপি দেবতা মমৈব তনবোঽতস্তদারাধনমপি বস্তুতো মদারাধনমেব তত্তৎফলদাতাপি চাহমেব তথাপি সাক্ষান্মদ্ভক্তানাঞ্চ তেষাঞ্চ ফলবৈষম্যং ভবতীত্যাহ অন্তবদিতি। অল্পমেধসাং পরিচ্ছিন্নদৃষ্টিনাং ময়া দত্তমপি তৎফলমন্তবৎ বিনাশি ভবতি, তদেবাহ, দেবান্ যজন্তীতি দেবযজস্তে দেবানন্তবতো যান্তি মদ্ভক্তাস্তু মামনাদ্যনন্তং পরমানন্দং প্রাপ্নুবন্তি ॥ ২৩ ॥

অব্যক্তং ব্যক্তিমাপন্নং মন্যন্তে মামবুদ্ধয়ঃ॥
পরং ভাবমজানন্তো মমাব্যয়মনুত্তমম্॥ ২৪॥
নাহং প্রকাশঃ সর্ব্বস্য যোগমায়াসমাবৃতঃ।
মূঢ়োঽয়ং নাভিজানাতি লোকো মামজমব্যয়ম্॥ ২৫॥

## শাঙ্করভাষ্যম্।

কিং নিমিত্তং মামেব ন প্রপদন্তে ইত্যুচ্যতে অব্যক্তমিতি। অব্যক্তমপ্রকাশং ব্যক্তিমাপন্নং প্রকাশং গতং ইদানীং মন্যন্তে মাং নিত্যপ্রসিদ্ধমীশ্বরমপি সন্তমবুদ্ধয়োঽবিবেকিনঃ পরং ভাবং পরমাত্মস্বরূপমজানন্তোঽবিবেকিনো মামব্যয়ং ব্যয়রহিতমনুত্তমং নিরতিশয়ং মদীয়ং ভাবমজানন্তো মন্যন্ত ইত্যর্থঃ॥ ২৪॥

তদজ্ঞানং কিং নিমিত্তং ইত্যুচ্যতে নাহমিতি। নাহং প্রকাশঃ সর্ব্বস্য লোকস্য কেষাঞ্চিদেব মদ্ভক্তানাং প্রকাশোঽহমিত্যভিপ্রায়ঃ, যোগমায়াসমাবৃতঃ যোগো গুণানাং যুক্তির্ঘটনং

## গিরিকৃত টীকা।

লীলাবিগ্রহপরিগ্রহাবস্থায়ামিত্যর্থঃ। প্রকাশস্য তর্হি কাদাচিৎকত্বং ভগবতি প্রাপ্তং নেত্যাহ নিত্যেতি। কথং তর্হি ভগবন্তমাগন্তুকপ্রকাশং মন্যন্তে তত্রাবুদ্ধয় ইত্যুত্তরঃ, তদ্বিবৃণোতি পরমিতি। পরমনুত্তমমিতি বিশেষণদ্বয়ং সোপাধিকনিরুপাধিকভাবার্থং॥ ২৪॥

অবিবেকরূপমজ্ঞানং ভগবন্নিষ্ঠাপ্রতিবন্ধকমুক্তং তস্মিন্নপি নিমিত্তং প্রশ্নপূর্ব্বকমনাদ জ্ঞানমুপন্যস্যতি তদজ্ঞানমিত্যাদিনা। ত্রিভিগু'ণময়ৈরিত্যনৌপাধিকরূপস্যাপ্রতিপত্তৌ কারণমুক্তমত্র তু সোপাধিকস্যাপীতি বিশেষং গৃহীত্বা ব্যাচষ্টে নাহমিতি। তর্হি ভগবদ্ভক্তিরনুপযুক্তেত্যাশঙ্ক্যাহ কেষাঞ্চিদিতি। সর্ব্বস্য লোকস্য ন প্রকাশোঽহমিত্যত্র হেতুমাহ

## স্বামিকৃত টীকা।

ননু চ সমানে প্রয়াসে মহতি চ ফলবিশেষে সতি সর্ব্বেঽপি কিমিতি দেবতান্তরং হিত্বা ত্বামেব ন ভজন্তি তত্রাহ অব্যক্তমিতি। অব্যক্তং প্রপঞ্চাতীতং মাং ব্যক্তিং মনুষ্যমৎস্যকূর্ম্মাদিভাবং প্রাপ্তমবুদ্ধয়ো মন্যন্তে, তত্র হেতুঃ মম পরং ভাবং স্বরূপমজানন্তঃ, কথংভূতং অব্যয়ং নিত্যং ন বিদ্যতে উত্তমো ভাবো যস্মাৎ তং মদ্ভাবং, অতো জগদ্রক্ষণার্থং লীলয়াবিষ্কৃতনানাবিশুদ্ধোর্জিতসত্ত্বমূর্ত্তিং মাং পরমেশ্বরং কর্ম্মনির্ম্মিতভৌতিকদেহং দেবতান্তরসমং পশ্যন্তো মন্দমতয়ো মাং নাতীবাদ্রিয়ন্তে প্রত্যুত ক্ষিপ্রফলদং দেবতান্তরমেব ভজন্তে, তে চোক্তপ্রকারেণান্তবৎ ফলং প্রাপ্নুবন্তীত্যর্থঃ॥ ২৪॥

তেষাং স্বাজ্ঞানে হেতুমাহ নাহমিতি। সর্ব্বস্য লোকস্য নাহং প্রকাশঃ প্রকটো ন ভবামি কিন্তু মদ্ভক্তানামেব যতো যোগমায়য়া সমাবৃতঃ যোগো যুক্তির্মদীয়ঃ কোঽপ্যচিন্ত্যঃ

বেদাহং সমতীতানি বর্ত্তমানানি চার্জ্জুন।
ভবিষ্যাণি চ ভূতানি মান্তু বেদ ন কশ্চন॥ ২৬॥

## শাঙ্করভাষ্যম্।

সৈব মায়া যোগমায়া তয়া যোগমায়য়া সমাবৃতঃ সংচ্ছন্ন ইত্যর্থঃ অতএব মূঢ়ো লোকো-ঽয়ং নাভিজানাতি মামজমব্যয়ং॥ ২৫॥

যয়া যোগমায়য়া সমাবৃতং মাং লোকো নাভিজানতি নাসৌ যোগমায়া মদীয়া সতী মমেশ্বরস্য মায়াবিনো জ্ঞানং প্রতিবধ্নাতি যথান্যস্যাপি মায়াবিনো মায়াজ্ঞানং তদ্বৎ যতএব-মতঃ বেদাহমিতি। অহন্তু বেদ জানে সমীতানি সমতিক্রান্তানি ভূতানি তথা বর্ত্ত-মানানি চার্জ্জুন ভবিষ্যাণি চ ভূতানি বেদাহং মান্তু বেদ ন কশ্চন মদ্ভক্তং মচ্ছরণমেকং মুক্ত্বা মত্তত্ত্ববেদনাভাবাদেব ন মাং ভজতে॥ ২৬॥

## গিরিকৃত টীকা।

যোগেতি। অনাদ্যনির্ব্বাচ্যাজ্ঞানাচ্ছন্নত্বাদেব মদ্বিষয়ে লোকস্য মৌঢ্যং ততশ্চ মদীয়স্বরূপ-বিবেকাভাবান্মন্নিষ্ঠত্বরাহিত্যমিত্যাহ অতএবেতি॥ ২৫॥

মায়য়া ভগবানাবৃতশ্চেত্তস্যাপি লোকস্যেব জ্ঞানপ্রতিবন্ধঃ স্যাদিত্যাশঙ্ক্যাহ যয়েতি। ন হীয়ং মায়া মায়াবিনো বিজ্ঞানং প্রতিবধ্নাতি মায়াত্বাৎ লৌকিকমায়াবৎ অথবা নেশ্বরো মায়াপ্রতিবদ্ধজ্ঞানো মায়াবিত্বাৎ লৌকিকমায়াবিবদিত্যর্থঃ। ভগবতো মায়াপ্রতিবদ্ধজ্ঞান-ত্বাভাবেন সর্ব্বজ্ঞত্বমপ্রতিবদ্ধং সিদ্ধমিত্যাহ যত ইতি। লোকস্য মায়াপ্রতিবদ্ধবিজ্ঞানত্বাদেব ভগবদাভিমুখ্যশূন্যত্বমিত্যাহ মাং ত্বিতি। কালত্রয়পরিচ্ছিন্নসমস্তবস্তুপবিজ্ঞানে প্রতিবন্ধো নেশ্বরস্যাস্তীতি দ্যোতনার্থস্তুশব্দঃ, মাং ত্বিতি লোকস্য ভগবত্তত্ত্বজ্ঞানে প্রতিবন্ধং দ্যোত-য়তি। তর্হি ত্বদ্ভক্তিবিফলেত্যাশঙ্ক্যাহ মদ্ভক্তমিতি। তর্হি সর্ব্বোঽপি ত্বদ্ভক্তিদ্বারা ত্বাং জানাতু নেত্যাহ মত্তত্ত্বেতি। বিবেকবতো মদ্ভজনং ন তু বিবেকশূন্যসর্ব্বস্যাপীত্যর্থঃ॥ ২৬॥

## স্বামিকৃত টীকা।

প্রজ্ঞাবিলাসঃ সএব মায়া অঘটমানঘটনাপটীয়স্ত্বাৎ তয়া সংছন্নঃ, অতএব মৎস্বরূপজ্ঞানে মূঢ়ঃ সন্নয়ং লোকোঽজমব্যয়ঞ্চ মাং ন জানাতীতি॥ ২৫॥

সর্ব্বোত্তমং মৎস্বরূপমজানন্ত ইত্যুক্তং তদেব স্বস্য সর্ব্বোত্তমত্বমনাবৃতজ্ঞানশক্তিত্বেন দর্শয়ন্নন্যেষামজ্ঞানমেবাহ বেদাহমিতি। সমতীতানি বিনষ্টানি বর্ত্তমানানি চ ভাবীনি চ ত্রিকালবর্ত্তীনি ভূতানি স্থাবরজঙ্গমানি সর্ব্বাণ্যহং বেদ জানামি মায়াশ্রয়ত্বান্মম তস্যাঃ স্বাশ্রয়ব্যামোহকত্বাভাবাৎ, মান্তু কোঽপি ন বেত্তি মন্মায়ামোহিতত্বাৎ, প্রসিদ্ধং হি লোকে মায়ায়াঃ স্বাশ্রয়াধীনত্বমন্যমোহকত্বঞ্চেতি॥ ২৬॥

ইচ্ছাদ্বেষসমুত্থেন দ্বন্দ্বমোহেন ভারত।
সর্ব্বভূতানি সম্মোহং সর্গে যান্তি পরন্তপ ॥ ২৭ ॥

## শাঙ্করভাষ্যম্।

কেন পুনস্ত্বত্তত্ত্ববেদনপ্রতিবন্ধেন প্রতিবদ্ধানি সন্তি জায়মানানি সর্ব্বভূতানি ত্বাং ন বিদন্তি ইত্যপেক্ষায়ামিদমাহ ইচ্ছেতি। ইচ্ছাদ্বেষসমুত্থেন ইচ্ছা চ দ্বেষশ্চ ইচ্ছাদ্বেষৌ তাভ্যাং সমুত্তিষ্ঠতীতি ইচ্ছাদ্বেষসমুত্থস্তেন ইচ্ছাদ্বেষসমুত্থেন কেনেতি বিশেষাপেক্ষায়ামিদমাহ দ্বন্দ্বমোহেনেতি দ্বন্দ্বনিমিত্তো মোহোদ্বন্দ্বমোহস্তাবেব ইচ্ছাদ্বেষৌ শীতোষ্ণবৎ পরস্পরবিরুদ্ধৌ সুখদুঃখতদ্ধেতুর্বিষয়ৌ যথাকালং সর্ব্বভূতৈঃ সংবধ্যমানৌ দ্বন্দ্বশব্দেনাভিধীয়েতে তত্র যদা ইচ্ছাদ্বেষৌ সুখদুঃখতদ্ধেতুসংপ্রাপ্ত্যা লব্ধাত্মকৌ ভবতস্তদা তৌ সর্ব্বভূতানাং প্রজ্ঞায়াঃ স্ববশাপাদনদ্বারেণ পরমার্থাত্মতত্ত্ববিষয়জ্ঞানোৎপত্তিপ্রতিবন্ধকারণং মোহং জনয়তঃ ন হীচ্ছাদ্বেষদোষবশীকৃতচিত্তস্য যথাভূতার্থবিষয়জ্ঞানমুৎপদ্যতে বহিরপি, কিমু বক্তব্যং তাভ্যামাবিষ্টবুদ্ধেঃ সংমূঢ়স্য প্রত্যগাত্মনি বহুপ্রতিবন্ধে জ্ঞানং নোৎপদ্যত ইত্যতস্তেনেচ্ছাদ্বেষসমুত্থেন দ্বন্দ্বমোহেন ভারত ভরতান্বয় সর্ব্বভূতানি সংমোহিতানি সন্তি সম্মোহং সংমূঢ়তাং সর্গে জন্মনি উৎপত্তিকাল ইত্যেতৎ যান্তি গচ্ছন্তি হে পরন্তপ মোহবশান্যেব সর্ব্বভূতানি জায়মানানি জায়ন্ত ইত্যভিপ্রায়ঃ॥ ২৭ ॥

## গিরিকৃত টীকা।

ভগবত্তত্ত্ববিজ্ঞানপ্রতিবন্ধকং মূলাজ্ঞানাতিরিক্তং প্রশ্নদ্বারেণোদাহরতি কেনেত্যাদিনা। পুনঃশব্দাৎ প্রতিবন্ধকান্তরবিবক্ষা গম্যতে, অপরোক্ষমবান্তরপ্রতিবন্ধকমিদমাগৃহ্যতে, বিশেষমাকাঙ্ক্ষাপূর্ব্বকং নিক্ষিপতি কেনেতি। বিশেষাপেক্ষায়ামিতি দ্বন্দ্বশব্দেন গৃহীতয়োরপি ইচ্ছাদ্বেষয়োর্গ্রহণং। দ্বন্দ্বশব্দার্থোপলক্ষণার্থমিত্যভিপ্রেত্যাহ তাবেবেতি। তয়োরপর্য্যায়েমেকত্রানুপপত্তিং গৃহীত্বা বিশিনষ্টি যথাকালমিতি। ন চ তয়োরনধিকরণং কিঞ্চিদপি ভূতং সংসারমণ্ডলে সম্ভবতীত্যাহ সর্ব্বভূতৈরিতি। তথাপি কথং তয়োর্মোহহেতুত্বমিত্যাশঙ্ক্যাহ তত্রেতি। তয়োরাশ্রয়ঃ সপ্তম্যর্থঃ। উক্তমেবার্থং কৈমুতিকন্যায়েন প্রপঞ্চ-

## স্বামিকৃত টীকা।

তদেবং মায়াবিষয়ত্বেন জীবানাং পরমেশ্বরজ্ঞানমুক্তং তস্যৈবাজ্ঞানস্য দৃঢ়ত্বে কারণমাহ ইচ্ছেতি। সৃজ্যত ইতি সর্গঃ সর্গে স্থূলদেহোৎপত্তৌ সত্যাং তদনুকূলে ইচ্ছা তৎপ্রতিকূলে চ দ্বেষস্তাভ্যাং সমুত্থঃ সমুদ্ভূতো যঃ শীতোষ্ণসুখদুঃখাদিদ্বন্দ্বনিমিত্তো মোহো বিবেকভ্রংশস্তেন সর্ব্বাণি ভূতানি সম্মোহং যান্তি অহমেব সুখী দুঃখী চেতি গাঢ়তরমভিনিবেশং প্রাপ্নুবন্তি অতস্তানি মজ্জ্ঞানাভাবান্মাং ন ভজন্তীতি ভাবঃ॥ ২৭ ॥

যেষামন্তগতং পাপং জনানাং পুণ্যকর্ম্মণাম্।
তে দ্বন্দ্বমোহনির্মুক্তা ভজন্তে মাং দৃঢ়ব্রতাঃ ॥ ২৮ ॥

## শাঙ্করভাষ্যম্।

যত এবমতস্তেন দ্বন্দ্বমোহেন প্রতিবদ্ধপ্রজ্ঞানানি সর্ব্বভূতানি সংমোহিতানি মামাত্মভূতং ন জানন্তি অতএবাত্মভাবেন মাম্ন ভজন্তে, কে পুনরনেন দ্বন্দ্বমোহেন নির্ম্মুক্তাঃ সন্তঃ ত্বাং বিদিত্বা যথাশাস্ত্রমাত্মভাবেন ভজন্ত ইত্যপেক্ষিতমর্থং দর্শয়িতুমুচ্যতে যেষামিতি। যেষান্তু পুনরন্তগতং সমাপ্তপ্রায়ং ক্ষীণং পাপং জনানাং পুণ্যকর্ম্মণাং পুণ্যং কর্ম্ম যেষাং সত্ত্বশুদ্ধিকারণং বিদ্যতে তে পুণ্যকর্ম্মণস্তেষাং পুণ্যকর্ম্মণাং তে দ্বন্দ্বমোহনির্ম্মুক্তা যথোক্তেন দ্বন্দ্বমোহেন নির্ম্মুক্তা ভজন্তে মাং পরমাত্মানং দৃঢ়ব্রতা এবমেব পরমার্থতত্ত্বং নান্যথেত্যেবং সর্ব্বপরিত্যাগব্রতেন নিশ্চিতবিজ্ঞানা দৃঢ়ব্রতা উচ্যন্তে ॥ ২৮ ॥

## গিরিকৃত টীকা।

ন্বতি ন হীতি। পূর্ব্বভাগানুবাদপূর্ব্বকমুত্তরভাগেন ফলিতমাহ অত ইতি। প্রত্যগাত্মন্যহঙ্কারাদিপ্রতিবন্ধপ্রভাবতো জ্ঞানোৎপত্তেরসম্ভবোঽতঃশব্দার্থঃ, কুলপ্রযুক্তমহিম্না স্বরূপশক্ত্যা চ যুক্তস্ত্বৈব যথোক্তপ্রতিবন্ধপ্রতিবিধানসামর্থ্যমিতি দ্যোতনার্থং ভারত পরন্তপেতি সম্বোধনদ্বয়ং। তত্ত্বজ্ঞানপ্রতিবন্ধে প্রকৃতমবান্তরকারণমুপসংহরতি মোহেতি ॥ ২৭ ॥

জায়মানভূতানাং মোহপরতন্ত্রত্বে ফলিতমাহ যত ইতি। ভগবত্তত্ত্ববেদনাভাবে তন্নিষ্ঠত্ববৈধুর্য্যং ফলতীত্যাহ অতএবেতি। যদি সর্ব্বাণি ভূতানি জন্ম প্রতিপদ্যমানানি সংমূঢ়ানি সন্তি ভগবত্তত্ত্বপরিজ্ঞানশূন্যানি ভগবদ্ভজনপরাঙ্মুখানি তর্হি শাস্ত্রানুরোধেন ভগবদ্ভজনমুচ্যমানমধিকার্য্যভাবাদনর্থকমাপদ্যেতেতি শঙ্কতে কে পুনরিতি। অনেকেষু জন্মসু, সুকৃতবশাদপাকৃতদুরিতানাং দ্বন্দ্বপ্রযুক্তমোহবিরহিণাং ব্রহ্মচর্য্যাদিনিয়মবতাং ভগবদ্ভজনাধিকারিত্বান্ন শাস্ত্রবিরোধোঽস্তীতি পরিহরতি উচ্যত ইতি। তুশব্দদ্যোত্যমর্থমাহ পুনরিতি। মুক্তেরর্ব্বাক্‌সিদ্ধ্যর্থং সমাপ্তপ্রায়মিত্যুক্তং। প্রকৃতোপযোগং পুণ্যস্য কর্ম্মণো দর্শয়িতুং বিশিনষ্টি সত্ত্বেতি। উভয়বিধশুদ্ধের্দ্বন্দ্বনিমিত্তমোহনিবৃত্তিফলমাহ তে দ্বন্দ্বেতি। মোহনিবৃত্তের্ভগবন্নিষ্ঠাপর্য্যন্তত্বমাহ ভজন্ত ইতি। তেষাং নানাপরিগ্রহবতাং ভগবদ্ভজনপ্রতিহতিমাশঙ্ক্যাহ দৃঢ়েতি ॥ ২৮ ॥

## স্বামিকৃত টীকা।

কুতস্তর্হি কেচন ত্বাং ভজন্তো দৃশ্যন্তে তত্রাহ যেষামিতি। যেষান্তু পুণ্যাচরণশীলানাং সর্ব্বপ্রতিবন্ধকং পাপমন্তগতং নষ্টং তে দ্বন্দ্বনিমিত্তেন মোহেন বিনির্মুক্তাঃ দৃঢ়ব্রতাঃ একান্তিনঃ সন্তো মাং ভজন্তি ॥ ২৮ ॥

জরামরণমোক্ষায় মামাশ্রিত্য যতন্তি যে।
তে ব্রহ্ম তদ্বিদুঃ কৃৎস্নমধ্যাত্মং কর্ম্ম চাখিলম্ ॥ ২৯ ॥

## শাঙ্করভাষ্যম্।

তে কিমর্থং ভজন্ত ইত্যুচ্যতে জরেতি। জরামরণমোক্ষায় জরামরণয়োর্ম্মোক্ষার্থং মাং পরমেশ্বরং আশ্রিত্য মৎসমাহিতচিত্তাঃ সন্তো যতন্তি প্রযতন্তে যে তে যদ্ব্রহ্ম পরং তদ্বিদুঃ-কৃৎস্নং সমস্তমধ্যাত্মং প্রত্যগাত্মবিষয়ং বস্তু তদ্বিদুঃ কর্ম্ম চাখিলং সমস্তং বিদুঃ ॥ ২৯ ॥

সাধীতি। সাধিভূতাধিদৈবং অধিভূতং চাধিদৈবঞ্চ অধিভূতাধিদৈবং তেন সহ অধি-ভূতাধিদৈবেন বর্ত্ততে ইতি সাধিভূতাধিদৈবং মাং যে বিদুঃ সাধিযজ্ঞঞ্চ সহ অধিযজ্ঞেন

## গিরিকৃত টীকা।

যথোক্তানামধিকারিণাং ভগবদ্ভজনফলং প্রশ্নদ্বারা দর্শয়তি তে কিমর্থমিতি। জরাম-রণাদিলক্ষণো যো বন্ধস্তদ্বিশ্লেষার্থং ভগবদ্ভজনমিত্যর্থঃ। সম্প্রতি সগুণস্য সপ্রপঞ্চস্য মধ্য-মানুগ্রহার্থং ধ্যেয়ত্বমাহ মামাশ্রিত্যেতি। জরাদিসংসারনিবৃত্ত্যর্থং নির্গুণং নিষ্প্রপঞ্চং মামুত্তমাধিকারিণো জানন্তীত্যুক্তং মামেব যে প্রপদ্যন্ত ইত্যাদাবিত্যাহ জরেতি। মধ্য-মাধিকারিণং প্রত্যাহ মামিতি। পরমেশ্বরাশ্রয়ণং নাম বিষয়বিমুখত্বেন ভগবদেকনিষ্ঠত্ব-মিত্যাহ মৎসমাহিতেতি। প্রযতনং ভগবন্নিষ্ঠাসিদ্ধ্যর্থং বহিরঙ্গাণাং যজ্ঞাদীনামন্তরঙ্গা-ণাঞ্চ শ্রবণাদীনামনুষ্ঠানং। প্রাগুক্তং জগদুপাদানং পরং ব্রহ্ম কথং ব্রহ্ম বিদুরিত্যপেক্ষায়াং সমস্তাধ্যাত্মবস্তুত্বেন সকলকর্ম্মত্বেন চ তদ্বিদুরিত্যাহ কৃৎস্নমিতি ॥ ২৯ ॥

ন কেবলং ভগবন্নিষ্ঠানাং সর্ব্বাধ্যাত্মকর্ম্মাত্মকব্রহ্মবিত্ত্বমেব কিন্ত্বধিভূতাদিসহিতং তদ্বে-দিত্বমপি সিধ্যতীত্যাহ সাধিভূতেতি। অধ্যাত্মং কর্ম্মাধিভূতমধিদৈবমধিযজ্ঞঞ্চেতি পঞ্চকং কর্ম্ম তদ্ব্রহ্ম যে বিদুস্তেষাং যথোক্তজ্ঞানবতাং সমাহিতচেতসামাপদবস্থায়ামপি ভগবত্তত্ত্ব-জ্ঞানমপ্রতিহতং তিষ্ঠতীত্যাহ প্রয়াণেতি। অপি চেতি নিপাতাভ্যাং তস্যামবস্থায়াং করণ-গ্রামস্য ব্যগ্রতয়া জ্ঞানাসম্ভবেঽপি ময়ি সমাহিতচিত্তানামুক্তজ্ঞানবতাং ভগবত্তত্ত্বজ্ঞানমযত্ন-

## স্বামিকৃত টীকা।

এবঞ্চ মাং ভজন্তস্তে সর্ব্বং বিজ্ঞেয়ং বিজ্ঞায় কৃতার্থা ভবন্তীত্যাহ জরেতি। জরামরণ-য়োর্নিরসনার্থং মামাশ্রিত্য যে প্রযতন্তে তে তৎ পরং ব্রহ্ম বিদুঃ, কৃৎস্নমধ্যাত্মঞ্চ বিদুঃ যেন তৎপ্রাপ্তব্যং তং দেহাদিব্যতিরিক্তং শুদ্ধমাত্মানঞ্চ জানন্তীত্যর্থঃ, তৎসাধনভূতমখিলং সর-হস্যং কর্ম্ম চ জানন্তি ইত্যর্থঃ ॥ ২৯ ॥

নচৈবং ভূতানাং যোগভ্রংশশঙ্কাপীত্যাহ সাধিভূতেতি। অধিভূতাদিশব্দানামর্থং শ্রীভ-গবানেবোত্তরাধ্যায়ে ব্যাখ্যাস্যতি, অধিভূতেনাধিদৈবেন চ সহ অধিযজ্ঞেন চ সহ মাং যে জানন্তি তে যুক্তচেতসো ময্যাসক্তমনসঃ প্রয়াণকালেঽপি মরণসময়েঽপি মাং বিদুর্জ্জানন্তি ন

সাধিভূতাধিদৈবং মাং সাধিযজ্ঞঞ্চ যে বিদুঃ।
প্রয়াণকালেঽপি চ মাং তে বিদুর্যুক্তচেতসঃ॥ ৩০॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে
শ্রীকৃষ্ণার্জ্জুনসংবাদে
বিজ্ঞানযোগো নাম
সপ্তমোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

সাধিযজ্ঞং যে বিদুঃ প্রযাণকালে মরণকালেঽপি চ তে মাং বিদুঃ যুক্তচেতসঃ সমাহিতচিত্তা ইতি॥ ৩০॥

ইতি শ্রীভগবদ্গীতাভাষ্যে সপ্তমোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

লভ্যমিতি দ্যোত্যতে। তদনেন সপ্তমেনোক্তমমধিকারিণং প্রতি জ্ঞেয়ং নিরূপয়তা তদর্থমেব সর্ব্বাত্মকত্বাদিকমুপদিশতা প্রকৃতিদ্বয়দ্বারেণ সর্ব্বকারণত্বাদিতি চ বদতা তৎপদবাচ্যং তল্লক্ষ্যঞ্চোপলক্ষিতং॥ ৩০॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং সপ্তমোঽধ্যায়ঃ।

## স্বামিকৃত টীকা

তু তদাপি ব্যাকুলীভূয় মাং বিস্মরন্তি অতো মদ্ভক্তানাং ন যোগভ্রংশশঙ্কেতিভাবঃ।

কৃষ্ণভক্ত্যৈব যত্নেন ব্রহ্মজ্ঞানমবাপ্যতে।
ইতি বিজ্ঞানযোগাখ্যে সপ্তমে সম্প্রকাশিতম্। ৩০।

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং সপ্তমোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## অষ্টমোঽধ্যায়ঃ।

অর্জ্জুন উবাচ—কিন্তদ্‌ব্রহ্ম কিমধ্যাত্মং কিং কর্ম্ম পুরুষোত্তম।
অধিভূতঞ্চ কিং প্রোক্তমধিদৈবং কিমুচ্যতে ॥১॥

### শাঙ্করভাষ্যম্।

তে ব্রহ্ম তদ্বিদুঃ কৃৎস্নমিত্যাদিনা ভগবতার্জ্জুনস্য প্রশ্নবীজানি উপদিষ্টানি অতস্তৎ-প্রশ্নার্থং অর্জ্জুন উবাচ। কিং তদিতি। ১।

### গিরিকৃত টীকা।

সপ্তমাধ্যায়ান্তে যেষামন্তগতং পাপমিত্যাদিনা যেষাং ব্রহ্মাদীনামনুসন্ধানমুক্তং যচ্চ প্রয়াণকালে ভগবতঃ স্মরণং দর্শিতং তদিদং জিজ্ঞাসমানঃ সন্ পৃচ্ছতীতি প্রশ্নসমুদায়মবতারয়তি তে ব্রহ্মেতি। প্রশ্নবীজানি তদ্বিষয়ভূতানি ব্রহ্মাণি বস্তূনীতি যাবৎ। বুভুৎসিন-বিষয়প্রতিলম্ভানন্তরং তেষাং প্রশ্নদ্বারা নির্ণয়ার্থমাহ অত ইতি। যদুক্তং তে ব্রহ্ম তদ্বিদু-রিতি তৎ কিং সোপাধিকং নিরুপাধিকম্বা ব্রহ্মশব্দস্যোভয়ত্রাপি সম্ভবাদিতি মত্বাহ কিং তদিতি। যচ্চোক্তং কৃৎস্নমধ্যাত্মমিতি তত্রাত্মানং দেহমধিকৃত্য তস্মিন্নধিষ্ঠানে তিষ্ঠতী-ত্যাত্মশব্দেন শ্রোত্রাদিকরণগ্রামো বা প্রত্যগ্‌ভূতং ব্রহ্মৈব বা বিবক্ষিতমিত্যাহ কিমধ্যাত্ম-মিতি। বিজ্ঞানং যজ্ঞং তনুতে কর্ম্মাণি তনুতেঽপি চেতিশ্রুতৌ কর্ম্মণো দ্বৈবিধ্যনির্দ্ধারণাৎ কর্ম্মচাখিলমিত্যত্র কীদৃক্ কর্ম্ম গৃহীতমিতি পৃচ্ছতি কিমিতি। ক্ষরাক্ষরাভ্যাং কার্য্যকার-ণাভ্যাং অতীতস্য ভগবতো ন কিঞ্চিদবেদ্যমস্তীতি সূচয়তি পুরুষোত্তমেতি। সাধিভূতা-ধিদৈবমিত্যত্রাধিভূতশব্দেন পৃথিব্যাদিষু ভূতেষু বর্ত্তমানং কিঞ্চিদেব গৃহ্যতে কিম্বা সমস্ত-মেব কার্য্যমিতি নির্দ্ধিধারয়িষয়া পৃচ্ছতি অধিভূতমিতি। অধিদৈবমিতি চ দৈবতবিষয়-মনুধ্যানং বা দৈবতেষ্বাদিত্যমণ্ডলাদিষু বর্ত্তমানং চৈতন্যং বা বিবক্ষিতমিতি প্রশ্নান্তরং প্রস্তৌতি অধিদৈবমিতি ॥ ১ ॥

### স্বামিকৃত টীকা।

ব্রহ্মকর্ম্মাধিভূতাদি বিদুঃ কৃষ্ণৈকচেতসঃ। ইত্যুক্তং ব্রহ্মকর্ম্মাদি স্পষ্টমষ্টম উচ্যতে। পূর্ব্বাধ্যায়ান্তে ভগবতোপক্ষিপ্তানাং ব্রহ্মাধ্যাত্মাদিসপ্তপদার্থানাং তত্ত্বং জিজ্ঞাসুরর্জ্জুন উবাচ কিং তদ্‌ব্রহ্মেতি দ্বাভ্যাং। স্পষ্টোঽর্থঃ ॥ ১ ॥

অধিযজ্ঞঃ কথং কোঽত্র দেহেঽস্মিন্ মধুসূদন।
প্রয়াণকালে চ কথং জ্ঞেয়োঽসি নিযতাত্মভিঃ ॥ ২ ॥

## শাঙ্করভাষ্যম্।

অধিযজ্ঞ ইতি ॥ ২ ॥

## গিরিকৃত টীকা।

সাধিযজ্ঞঞ্চেত্যত্রাধিযজ্ঞশব্দেন যজ্ঞমধিকৃতো বিজ্ঞানাত্মা বা পরদেবতা বেতি প্রশ্নান্তরং প্রতিকবোতি অধিযজ্ঞইতি। স চ কথং কেন প্রকাবেণ ব্রহ্মত্বেন চিন্তনীয়ঃ কিং তাদাত্ম্যেন কিম্বাত্যন্তাভেদেনেত্যাহ কথমিতি। সর্ব্বথাপি স কিমস্মিন্ দেহে বর্ত্ততে ততো বহির্ব্বা, দেহে চেৎ স কোঽত্র বুদ্ধ্যাদিস্তদ্ব্যতিবিক্তো বেতি জিজ্ঞাসয়া ব্রূতে কোঽত্রেতি। অধিযজ্ঞঃ কথং কোঽত্রেঽতি ন প্রশ্নভেদঃ কথমিতি কিন্তু প্রকারভেদবিক্ষয়া দ্রষ্টব্যং। যত্তু সমাহিতচিত্তানামুৎক্রমণকালেঽপি ভগবদনুসন্ধানং সিধ্যতীতি তদযুক্তমুৎক্রমণদশায়াং করণগ্রামবৈয়গ্র্যাচ্চিত্তসমাধানানুপপত্তিবিত্যভিপ্রেত্যাহ প্রয়াণেতি ॥২॥

ব্যাখ্যাতপ্রশ্নসপ্তকস্য প্রতিবচনং ভাগবতমবতারযতি এষামিতি। ক্রমেণ কৃতানাং ক্রমেণৈব প্রতিবচনে প্রষ্টুরভীষ্টং প্রতিপত্তিসৌকর্য্যঞ্চ সিধ্যতীতি বুধ্যমানো বিশিনষ্টি যথাক্রমমিতি। তত্র প্রশ্নত্রয়ং নির্ণেতুং ভগবদ্বচনমুদাহরতি অক্ষরমিতি। কিং তদ্ব্রহ্মেতি প্রশ্নস্য প্রতিবচনমক্ষরং ব্রহ্ম পরমমিতি। তত্রাক্ষরশব্দস্য নিরুপাধিকে পরস্মিন্নাত্মন্যবিনাশিত্বব্যাপ্তিমত্ত্বসম্বন্ধাৎ প্রবৃত্তিং ব্যুৎপাদযতি অক্ষরমিত্যাদিনা। কথং পুনরক্ষরশব্দস্য যথোক্তে পরমাত্মনি বৃদ্ধপ্রয়োগমন্তরেণ ব্যুৎপত্ত্যা প্রবৃত্তিরাশ্রীয়তে ব্যুৎপত্তেরর্থান্তরেঽপি সম্ভবাদিত্যাশঙ্ক্য দ্যাবাপৃথিব্যাদিবিষয়নিরঙ্কুশপ্রশাসনস্য পরস্মাদন্যস্মিন্নসম্ভবাত্তথাবিধপ্রশাসনকর্তৃত্বেন শ্রুতমক্ষরং ব্রহ্মৈবেত্যাহ এতস্যেতি। রূঢ়ির্যোগমপহরতীতি ন্যায়াদোঙ্কারে বর্ণসমুদায়াত্মন্যক্ষরশব্দস্য রূঢ্যা প্রবৃত্তিরাশ্রয়িতুমুচিতেত্যাশঙ্ক্যাহ ওঁকারস্যেতি। প্রতিবচনোপক্রমে প্রক্রান্তমোঙ্কারাখ্যমক্ষরমেবোত্তরত্র বিশেষিতং ভবিষ্যতীত্যাশঙ্ক্য পরমবিশেষণবিবোধাৎ ন তস্য প্রক্রমঃ সম্ভবতীত্যাহ পরমমিতি চেতি। কিমধ্যাত্মমিতি প্রশ্নস্যোত্তরং স্বভাবোঽধ্যাত্মমিত্যাদি তদ্ব্যাচষ্টে তস্যৈবেতি। স্বকীয়ো ভাবঃ স্বভাবঃ শ্রোত্রাদিকরণগ্রামঃ স চাত্মনি দেহেঽহংপ্রত্যয়বেদ্যে বর্ত্তত ইতি অমুং প্রতিভাসং ব্যাবর্ত্ত্য

## স্বামিকৃত টীকা।

কিঞ্চ অধিযজ্ঞ ইতি। অত্র দেহে যো যজ্ঞো বর্ত্ততে তস্মিন্ কোঽধিযজ্ঞোঽধিষ্ঠাতা প্রযোজকঃ ফলদাতা চ ক ইত্যর্থঃ, স্বরূপং পৃষ্ট্বাধিষ্ঠানপ্রকারং পৃচ্ছতি কথং কেন প্রকারেণ অসাবস্মিন্ দেহে স্থিতঃ যজ্ঞমধিতিষ্ঠতীত্যর্থঃ, যজ্ঞগ্রহণং সর্ব্বকর্ম্মণামুপলক্ষণার্থং, কালে চ নিয়তচিত্তৈঃ কথং কেনোপায়েন জ্ঞেয়োঽসি ॥ ২ ॥

॥ভগবানুবাচ—অক্ষরং পরমং ব্রহ্ম স্বভাবোঽধ্যাত্মমুচ্যতে।
ভূতভাবোদ্ভবকরো বিসর্গঃ কর্ম্মসংজ্ঞিতঃ ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

এষাং প্রশ্নানাং যথাক্রমং নির্ণয়ায় অক্ষরমিতি। অক্ষরং ন ক্ষরতীতি পরমাত্মা এতস্য বা অক্ষরস্য প্রশাসনে গার্গীতি শ্রুতেঃ ওঁকারস্য চোমিত্যেকাক্ষরং ব্রহ্মেতি পরেণ বিশেষণাত্তদ্‌গ্রহণং পরমমিতি চ নিরতিশয়ে ব্রহ্মণ্যক্ষরে উপপন্নতরং বিশেষণং, তস্যৈব পরমস্য ব্রহ্মণঃ প্রতিদেহং প্রত্যগাত্মভাবঃ স্বভাব ইতি স্বো ভাবঃ স্বভাবোঽধ্যাত্মং উচ্যতে আত্মানং দেহমধিকৃত্য প্রত্যগাত্মতয়া প্রবৃত্তং পরমার্থব্রহ্মাবসানং বস্তু স্বভাবোঽধ্যাত্মমুচ্যতে অধ্যাত্মশব্দেনাভিধীয়তে, ভূতভাবোদ্ভবকরঃ ভূতানাং ভাবো ভূতভাবস্তস্যোদ্ভবো ভূতভাবোদ্ভবস্তং করোতীতি ভূতভাবোদ্ভবকরো ভূতবস্তূৎপত্তিকর ইত্যর্থঃ বিসর্গো বিসর্জ্জনং দেবতোদ্দেশে চরুপুরোডাশাদেঃ স্বস্য দ্রব্যস্য বিতরণং পরিত্যাগঃ স এষ বিসর্গলক্ষণো যজ্ঞঃ কর্ম্মসংজ্ঞিতঃ কর্ম্মশব্দিত ইত্যর্থঃ ইত্যেতস্মাদ্বীজভূতাৎ বৃষ্ট্যাদিক্রমেণ স্থাবরজঙ্গমানি ভূতানি উদ্ভবন্তি ॥৩॥

## গিরিকৃত টীকা।

স্বভাবপদং গৃহ্লাতি স্বো ভাব ইতি। এবং বিগ্রহপরিগ্রহে স্বভাবোঽধ্যাত্মমুচ্যতে ইত্যস্যায়মর্থো নিষ্পন্নো ভবতীত্যনুবাদপূর্ব্বকং কথয়তি স্বভাব ইতি। তস্যৈব পরস্যেত্যাদিনোক্তং ন বিস্মর্ত্তব্যমিতি বিশিনষ্টি পরমার্থেতি। পরমমেব হি ব্রহ্ম দেহাদৌ প্রবিশ্য প্রত্যগাত্মভাবমনুভবতি তৎ সৃষ্ট্বা তদেবানুপ্রাবিশদিতিশ্রুতেরিত্যর্থঃ। কিং কর্ম্মেতি প্রশ্নস্যোত্তরমুপাদত্তে ভূতেতি। ভূতান্যেব ভাবাস্তেষামুদ্ভবঃ সমুৎপত্তিস্তাং করোতীতি ব্যুৎপত্তিং সিদ্ধবৎকৃত্য বিধান্তরেণ ব্যুৎপাদয়তি ভূতানামিতি। ভাবঃ সম্ভাবো বস্তুভাবোঽতএব ভূতবস্তূৎপত্তিকরঃ ইতি বক্ষ্যতি, বৈদিকং কর্ম্মাত্রোক্তবিশেষণং কর্ম্মশব্দিতমিতি। বিসর্গশব্দার্থং দর্শয়ন্ বিশদয়তি বিসর্গ ইত্যাদিনা। কথং পুনর্যথোক্তস্য সর্ব্বেষু ভূতেষু সৃষ্টিস্থিতিপ্রলয়হেতুত্বেন তদুদ্ভবকরত্বমিত্যাশঙ্ক্যাগ্নৌ প্রাস্তাহুতিরিত্যাদিস্মৃতিমনুস্মৃত্যাহ এতস্মাদ্বীতি ॥৩॥

## স্বামিকৃত টীকা।

প্রশ্নক্রমেণৈবোত্তরং শ্রীভগবানুবাচ অক্ষরমিতি ত্রিভিঃ। ন ক্ষরতি ন চলতীত্যক্ষরং। নন্বু জীবোঽপ্যক্ষরস্তত্রাহ পরমং যদক্ষরং জগতাং মূলকারণং তদ্ব্রহ্ম, এতদ্বৈ তদক্ষরং গার্গিব্রাহ্মণা অভিবদন্তীতিশ্রুতেঃ, তস্যৈব ব্রহ্মণ এবাংশতয়া জীবরূপেণ ভবনং স্বভাবঃ স এবাত্মানং দেহমধিকৃত্য ভোক্তৃত্বেন বর্ত্তমানোঽধ্যাত্মশব্দেনোচ্যত ইত্যর্থঃ, ভূতানাং জরায়ুজাদীনাং ভাবঃ সত্তা উৎপত্তিঃ উদ্ভবশ্চ আদিত্যাজ্জায়তে বৃষ্টিরিতি ক্রমেণ বৃষ্টিকৃৎকৃষ্টত্বেন ভবনমুদ্ভবঃ তৌ ভূতভাবোদ্ভবৌ করোতি যো বিসর্গো দেবতোদ্দেশেন দ্রব্যত্যাগরূপো যজ্ঞঃ সর্ব্বকর্ম্মণামুপলক্ষণমেতৎ স চ কর্ম্মশব্দবাচ্যঃ ॥ ৩ ॥

. অধিভূতং ক্ষরো ভাবঃ পুরুষশ্চাধিদৈবতম্।
অধিযজ্ঞোঽহমেবাত্র দেহে দেহভৃতাম্বর ॥ ৪ ॥

## শাঙ্করভাষ্যম্।

অধিভূতমিতি। অধিভূতং প্রাণিজাতমধিকৃত্য ভবতীতি কোঽসৌ ক্ষরঃ ক্ষরতীতি ক্ষরো বিনাশী ভাবো যৎ কিঞ্চিজ্জনিমদ্বস্থিত্যর্থঃ, পুরুষঃ পূর্ণমনেন সর্ব্বমিতি পুরি শয়নাদ্বা পুরুষঃ আদিত্যান্তর্গতো হিরণ্যগর্ভঃ সর্ব্বপ্রাণিকরণানামনুগ্রাহকঃ সোঽধিদৈবতং, অধিযজ্ঞঃ সর্ব্বযজ্ঞাভিমানিনী দেবতা বিষ্ণ্বাখ্যা যজ্ঞো বৈ বিষ্ণুরিতি শ্রুতেঃ স হি বিষ্ণুরহমেবাত্রাস্মিন্ দেহে যো যজ্ঞস্তস্যাহমধিযজ্ঞঃ যজ্ঞো হি দেহনির্ব্বর্ত্ত্যত্বেন দেহসমবায়ীতি দেহাধিকরণো ভবতি দেহভৃতাম্বর ॥ ৪ ॥

## গিরিকৃত টীকা।

সংপ্রতি প্রশ্নত্রয়স্যোত্তরমাহ অধিভূতমিতি। অধিভূতঞ্চ কিং প্রোক্তমিত্যস্য প্রতিবচনমধিভূতং ক্ষরো ভাব ইতি। তত্রাধিভূতপদমনূদ্য বাচ্যমর্থং কথয়তি অধিভূতমিত্যাদিনা। তস্য নির্দ্দেশমন্তরেণ বিজ্ঞাতুমশক্যত্বাৎ প্রশ্নদ্বারা তন্নির্দ্দিশতি কোঽসাবিতি। কার্য্যমাত্রমত্র সংগৃহীতমিতি বক্তুমুক্তমেব ব্যনক্তি যৎ কিঞ্চিদিতি। অধিদৈবং কিমিতি প্রশ্নে পুরুষশ্চেত্যাদিপ্রতিবচনং তত্র পুরুষশব্দমনূদ্য মুখ্যমর্থং তস্যোপন্যস্যতি পুরুষ ইতি। তস্যৈব সম্ভাবিতমর্থান্তরমাহ পুরি শয়নাদ্বেতি। বৈরাজং দেহমাসাদ্য আদিত্যমণ্ডলাদিষু দৈবত্যেষু যোঽন্তরবস্থিতো লিঙ্গাত্মা ব্যষ্টিকরণানুগ্রাহকোঽত্র পুরুষশব্দার্থ স চাধিদৈবতমিতি স্ফুটয়তি আদিত্যেতি। অধিযজ্ঞঃ কথমিত্যাদি প্রশ্নং পরিহরন্নধিযজ্ঞশব্দার্থমাহ অধিযজ্ঞইতি। কথমুক্তায়াং দেবতায়ামধিযজ্ঞশব্দঃ স্যাদিত্যাশঙ্ক্য শ্রুতিমনুসরন্নাহ যজ্ঞো বৈ ইতি।

## স্বামিকৃত টীকা।

কিঞ্চ অধিভূতমিতি। ক্ষরো বিনশ্বরো ভাবঃ দেহাদিপদার্থঃ ভূতং প্রাণিমাত্রমধিকৃত্য ভবতীত্যধিভূতমুচ্যতে, পুরুষো বৈরাজঃ সূর্য্যমণ্ডলবর্ত্তী স্বাংশভূতসর্ব্বদেবতানামধিপতিরধিদৈবতমুচ্যতে, অধিদৈবতমধিষ্ঠাত্রী দেবতা, স বৈ শরীরী প্রথমঃ স বৈ পুরুষ উচ্যতে, আদিকর্ত্তা স ভূতানাং ব্রহ্মাগ্রে সমবর্ত্তত ইতি শ্রুতেঃ। অত্রাস্মিন্ দেহে স্থিতোঽহমেবাধিযজ্ঞো যজ্ঞস্যাধিষ্ঠাত্রী দেবতা যজ্ঞাদিকর্ম্মপ্রবর্ত্তকস্তৎফলদাতা চ, কথমিত্যস্যাপ্যুত্তরমনেনৈবোক্তং দ্রষ্টব্যং, অন্তর্যামিনোঽসত্তাদিভিগুণৈর্জীববৈলক্ষণ্যেন দেহান্তর্ব্বর্ত্তিত্বস্য প্রসিদ্ধত্বাৎ, তথাচ শ্রুতির্দ্বা সুপর্ণা সযুজা সখায়া সমানং বৃক্ষং পরিষস্বজাতে। তয়োরন্যঃ পিপ্পলং স্বাদ্বত্ত্যনশ্নন্নন্যোঽভিচাকশীতীতি। দেহভৃতাং মধ্যে শ্রেষ্ঠ ইতি সম্বোধয়ন্ ত্বমপ্যেবং ভূতমন্তর্যামিনং পরাধীনস্বপ্রবৃত্তিনিবৃত্ত্যন্বয়ব্যতিরেকাভ্যাং বোদ্ধুমর্হসীতি সূচয়তি ॥ ৪ ॥

অন্তকালে চ মামেব স্মরন্ মুক্ত্বা কলেবরম্।
যঃ প্রয়াতি স মদ্ভাবং যাতি নাস্ত্যত্র সংশয়ঃ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

অন্তকালইতি। অন্তকালে চ মরণকালে মামেব পরমেশ্বরং বিষ্ণুং স্মরন্ মুক্ত্বা পরিত্যজ্য কলেবরং শরীরং যঃ প্রয়াতি গচ্ছতি স মদ্ভাবং বৈষ্ণবং তত্ত্বং যাতি নাস্তি ন বিদ্যতে অত্রাস্মিন্নর্থে সংশয়ো যাতি বা ন বেতি ॥ ৫ ॥

## গিরিকৃত টীকা।

পরৈব দেবতাধিযজ্ঞশব্দেনোচ্যতে সা চ ব্রহ্মণঃ সকাশাদত্যন্তাভেদেন প্রতিপত্তব্যেত্যাহ সহি বিষ্ণুরিতি। শাস্ত্রীয়ব্যবহারভূমিরত্রেত্যুক্তা। দেহসামানাধিকরণ্যাদ্বাত্রেত্যস্য ব্যাখ্যানং অস্মিন্নিতি। কিমধিযজ্ঞো বহিরন্তর্বা দেহাদিতি সন্দেহো মাভূদিত্যাহ দেহইতি। ননু যজ্ঞস্য দেহাধিকরণত্বাভাবাৎ কথং তথাবিধযজ্ঞাভিমানিদেবতাত্বং ভগবতো বিবক্ষ্যতে তত্রাহ যজ্ঞো হীতি। এতেন তস্য বুদ্ধ্যাদিব্যতিরিক্তত্বমুক্তমবধেয়ং ন হি পরা দেবতা দর্শিতরীত্যাধিযজ্ঞশব্দিতা বুদ্ধ্যাদিষন্তর্ভাবমনুভাবয়িতুমলং। দেহান্ বিভ্রতীতি দেহভৃতঃ সর্ব্বে প্রাণিনস্তেষামেব বরঃ শ্রেষ্ঠঃ, যুক্তং হি ভগবতা সাক্ষাদেব প্রতিক্ষণং সম্বাদং বিদধানস্যার্জুনস্য সর্ব্বেভ্যঃ শ্রৈষ্ঠ্যং ॥ ৪ ॥

যত্ত্ব প্রয়াণকালে চেত্যাদি চোদিতং তত্রাহ অন্তকালে চেতি। মামেবেত্যেবকারেণ অধ্যাত্মাদিবিশিষ্টত্বেন স্মরণং ব্যাবর্ত্ত্যতে বিশিষ্টস্মরণে হি চিত্তবিক্ষেপান্ন প্রধানস্মরণমপি স্যান্ন চ মরণকালে কার্য্যকরণপারবশ্যাদ্ভগবদনুস্মরণাসিদ্ধিঃ সর্ব্বদৈব নৈরন্তর্য্যেণ আদরধিয়া ভগবতি সমর্পিতচেতসঃ তৎকালেঽপি কার্য্যকরণজাতমগণয়তো ভগবদনুসন্ধানসিদ্ধেঃ, শরীরে তস্মিন্নহংমমাভিমানাভাবাদিতিযাবৎ, প্রযাতীত্যত্র প্রকৃতশরীরমপাদানং। ব্রহ্ম বেদ ব্রহ্মৈব ভবতীত্যাদিশ্রুতিমাশ্রিত্যাহ নাস্তীতি। ব্যাসেধ্যং সংশয়মেবাভিনয়তে যাতি বেতি ॥ ৫ ॥

অন্তকালে ভগবন্তমনুধ্যায়তো ভগবৎপ্রাপ্তিনিয়মবদন্যমপি তৎকালে দেবাদিবিশেষং ধ্যায়তো দেহং ত্যজতস্তৎপ্রাপ্তিরবশ্যংভাবিনীতি দর্শয়তি নেত্যাদিনা। কথং পুনরন্ত-

## স্বামিকৃত টীকা।

প্রয়াণকালে চ কথং জ্ঞেয়োঽসীত্যনেন পৃষ্টমন্তকালে জ্ঞানোপায়ং তৎফলঞ্চ দর্শয়তি অন্তকাল ইতি। মামেবোক্তলক্ষণমন্তর্যামিরূপং পরমেশ্বরং স্মরন্ দেহং ত্যক্ত্বা যঃপ্রকর্ষেণ অর্চ্চিরাদিমার্গেণ উত্তরায়ণপথা যাতি স মদ্ভাবং মদ্রূপতাং যাতি অত্র সংশয়ো নাস্তি, স্মরণং জ্ঞানোপায়ো মদ্ভাবাপত্তিশ্চ ফলমিত্যর্থঃ ॥ ৫ ॥

যং যং বাপি স্মরন্ ভাবং ত্যজত্যন্তে কলেবরম্।
তং তমেবৈতি কৌন্তেয় সদা তদ্‌ভাবভাবিতঃ ॥ ৬ ॥
তস্মাৎ সর্ব্বেষু কালেষু মামনুস্মর যুধ্য চ।
ময্যর্পিতমনোবুদ্ধির্মামেবৈষ্যস্যসংশয়ঃ ॥ ৭ ॥

## শাঙ্করভাষ্যম্।

ন মদ্বিষয় এবায়ং নিয়মঃ কিং তর্হি যং যমিতি। যং যং বাপি যং ভাবং দেবতাবিশেষং স্মরংশ্চিন্তয়ন্ ত্যজতি পরিত্যজতি অন্তে প্রাণবিয়োগকালে কলেবরং তং তমেব স্মৃতং ভাবমেবৈতি নান্যং কৌন্তেয় সদা সর্ব্বদা তদ্ভাবভাবিতস্তস্মিন্ ভাবস্তদ্ভাবং স ভাবিতঃ স্মর্য্যমাণতয়াভ্যস্তো যেন স তদ্ভাবভাবিতঃ সন্ ॥ ৬ ॥

যস্মাদেবমন্ত্যা ভাবনা দেহান্তরপ্রাপ্তৌ কারণং তস্মাদিতি। তস্মাৎ সর্ব্বেষু কালেষু মামনুস্মর যথাশাস্ত্রং যুধ্যচ যুধ্যস্ব স্বধর্ম্মং কুরু ময়ি বাসুদেবেঽর্পিতে মনোবুদ্ধী যস্য তব স ত্বং ময্যর্পিতমনোবুদ্ধিঃ সন্ মামেব যথাস্মৃতমেষ্যসি আগমিষ্যসি অসংশয়ো ন সংশয়োঽত্র বিদ্যতে ॥ ৭ ॥

## গিরিকৃত টীকা।

কালে পরবশস্য নিয়তবিষয়স্মৃতির্ভবিতুমুৎসহতে তত্রাহ সদেতি। দেবাদিবিশেষস্তস্মিন্নিতি সপ্তম্যর্থঃ, ভাবো ভাবনা বাসনা স ভাবো ভাবিতঃ সম্পাদিতো যেন পুংসা স তথাবিধঃ সন্ যং যং ভাবং স্মরতি তন্তমেব দেহত্যাগাদূর্দ্ধং গচ্ছতীতি সম্বন্ধঃ ॥ ৬ ॥

সততং ভাবনা প্রতিনিয়তফলপ্রাপ্তিনিমিত্তান্ত্যপ্রত্যয়হেতুরিত্যঙ্গীকৃত্যানন্তরশ্লোকমবতারয়তি যস্মাদিতি। বিশেষণত্রয়বতো ভগবদনুস্মরণস্য ভগবৎপ্রাপ্তিহেতুত্বং ভাতি তস্মাদিত্যুচ্যতে সর্ব্বেষু কালেষ্বাদরনৈরন্তর্য্যাভ্যাং সহেতি যাবৎ, ভগবদনুস্মরণে বিশেষণত্রয়সাহিত্যং যথাশাস্ত্রমিতি দ্যোত্যতে। ভগবদনুসন্ধানং কর্ত্তব্যমুক্ত্বা তেন সহ স্বধর্ম্মমপি কুরু যুদ্ধমিত্যুপদিশতা ভগবতা সমুচ্চয়ো জ্ঞানকর্ম্মণোরঙ্গীকৃতো ভাতীত্যাশঙ্ক্যাহ ময্যীতি।

## স্বামিকৃত টীকা।

ন কেবলং মাং স্মরন্ মদ্ভাবং প্রাপ্নোতীতি নিয়মঃ কিং তর্হি যং যমিতি। যং যং ভাবং দেবতান্তরম্বা অন্যমপি বা অন্তকালে স্মরন্ দেহং ত্যজতি তং তমেব স্মর্য্যমাণং ভাবং প্রাপ্নোতি অন্তকালে ভাববিশেষস্মরণে হেতুঃ সদা তদ্ভাবভাবিত ইতি সর্ব্বদা তস্য ভাবো ভাবনানুচিন্তনং তেন ভাবিতো বাসিতচিত্তঃ ॥ ৬ ॥

তস্মাদিতি। যস্মাৎ পূর্ব্ববাসনৈবান্তকালে স্মৃতিহেতুর্ন তু তদা বিবশস্য স্মরণোদ্যমঃ সম্ভবতি তস্মাৎ সর্ব্বদা মামনুস্মর অনুচিন্তয়, তৎ স্মরণং হি চিত্তশুদ্ধিং বিনা ন ভবতি

. অভ্যাসযোগযুক্তেন চেতসা নান্যগামিনা।
পরমং পুরুষং দিব্যং যাতি পার্থানুচিন্তয়ন্ ॥ ৮ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ অভ্যাসেতি। অভ্যাসযোগযুক্তেন ময়ি চিত্তসমর্পণবিষয়ভূতে একস্মিন্ তুল্য-প্রত্যয়াবৃত্তিলক্ষণো বিলক্ষণপ্রত্যয়ান্তরিতোঽভ্যাসঃ স চাসৌ যোগস্তেন যুক্তং তত্রৈব ব্যাপৃতং প্রবৃত্তং যোগিনশ্চেতস্তেন চেতসা নান্যগামিনা নান্যত্র বিষয়ান্তরে গন্তুং শীল-মস্যেতি নান্যগামি তেন নান্যগামিনা পরমং নিরতিশয়ং পুরুষং দিব্যং দিবি সূর্য্যমণ্ডলে ভবং দিব্যং যাতি গচ্ছতি হে পার্থ অনুচিন্তয়ন্ শাস্ত্রাচার্য্যোপদেশমনুধ্যায়ন্নিত্যেতৎ ॥ ৮ ॥

## গিরিকৃত টীকা।

মনোবুদ্ধিগোচরং ক্রিয়াকারকফলজাতং সকলমপি ব্রহ্মৈবেতি ভাবয়ন্ যুধ্যস্বেতি ব্রুবতা ক্রিয়াদিকলাপস্য ব্রহ্মাতিরিক্তস্যাভাবাভিলাপান্নাত্র সমুচ্চয়ো বিবক্ষিত ইত্যর্থঃ। উক্তরীত্যা স্বধর্ম্মমনুবর্ত্তমানস্য প্রয়োজনমাহ মামেবেতি। উক্তসাধনবশাৎ ফলপ্রাপ্তৌ প্রতিবন্ধা-ভাবং সূচয়তি অসংশয় ইতি ॥ ৭ ॥

ইতশ্চ পূর্ব্বশ্লোকোক্তার্থানুষ্ঠায়ী ভগবন্তমন্তকালে প্রাপ্নোতীত্যাহ কিঞ্চেতি। অভ্যাসং বিভজতে ময়ীতি। ন হি চিত্তসমর্পণস্য বিষয়ভূতং ভগবতোঽর্থান্তরং বস্তু সদস্তীতি মন্বানো বিশিনষ্টি চিত্তেতি। অন্তরালকালেঽপি বিজাতীয়প্রত্যয়েষু বিচ্ছিদ্য বিচ্ছিদ্য জায়মানে-ষপি সজাতীয়প্রত্যয়াবৃত্তিরযোগিনোঽপি স্যাদিত্যাশঙ্ক্যাহ বিলক্ষণেতি। অভ্যাসাখ্যেন যোগেন যুক্তত্বং চেতসো বিবৃণোতি তত্রৈবেতি। তৃতীয়য়া পরামৃষ্টোঽভ্যাসযোগঃ সপ্ত-ম্যাপি পরামৃশ্যতে। ননু প্রাকৃতানাং চেতস্তথেত্যাশঙ্ক্য বিশিনষ্টি যোগিন ইতি। তচ্চে-চ্চেতো বিষয়ান্তরং পরামৃশেন্ন তর্হি পরমপুরুষার্থপ্রাপ্তিহেতুঃ স্যাদিত্যাশঙ্ক্যাহ নান্যগামি-নেতি। প্রামাদিকং বিষয়ান্তরপারবশ্যমভ্যনুজ্ঞাতুং তাচ্ছীল্যপ্রত্যয়াস্তেন তাৎপর্য্যাদপরা-

## স্বামিকৃত টীকা।

অতো যুধ্যস্ব চিত্তশুদ্ধ্যর্থং যুদ্ধাদিকং স্বধর্ম্মমনুতিষ্ঠেত্যর্থঃ, এবং মযার্পিতং মনঃ সংকল্পাত্মকং বুদ্ধিশ্চ ব্যবসায়াত্মিকা যেন ত্বয়া স ত্বমনায়াসেন মামেব প্রাপ্স্যসি অসংশয়ঃ সংশ-য়োঽত্র নাস্তি ॥ ৭ ॥

সন্ততস্মরণস্য চাভ্যাসোঽন্তরঙ্গসাধনমিতি দর্শয়ন্নাহ অভ্যাসযোগেতি। অভ্যাসঃ সজা-তীয়প্রত্যয়প্রবাহঃ সএব যোগ উপায়স্তেন যুক্তেনৈকাগ্র্যেণ অতএব নান্যং বিষয়ং গন্তুং শীলং যস্য তেন চেতসা দিব্যং দ্যোতনাত্মকং পরমেশ্বরমনুচিন্তয়ন্ হে পার্থ তমেব যাতীতি ॥ ৮ ॥

কবিং পুরাণমনুশাসিতারমণোরণীয়াংসমনুস্মরেদ্ যঃ।
সর্ব্বস্য ধাতারমচিন্ত্যরূপমাদিত্যবর্ণং তমসঃ পরস্তাৎ॥ ৯॥

## শাঙ্করভাষ্যম্।

কিংবিশিষ্টঞ্চ পুরুষং যাতীত্যুচ্যতে কবিমিতি। কবিং ক্রান্তদর্শিনং সর্ব্বজ্ঞং, পুরাণং চিরন্তনমনুশাসিতারং সর্ব্বস্য জগতঃ প্রশাসিতারং অণোঃ সূক্ষ্মাদপ্যণীয়াংসং সূক্ষ্মতরমনুস্মরেদনুচিন্তয়েৎ যঃ কশ্চিৎ সর্ব্বস্য কর্ম্মফলজাতস্য ধাতারং বিচিত্রতয়া প্রাণিভ্যো বিভক্তারং বিভজ্য দাতারমচিন্ত্যরূপং নাস্য রূপং নিয়তবিদ্যমানমপি কেনচিৎ চিন্তয়িতুং শক্যতে ইত্যচিন্ত্যরূপস্তং আদিত্যবর্ণমাদিত্যস্যেব নিত্যচৈতন্যপ্রকাশো বর্ণো যস্য তমাদিত্যবর্ণং তমসঃ পরস্তাদজ্ঞানলক্ষণান্মোহান্ধকারাৎ পরং তমনুচিন্তয়ন্ যাতীতি পূর্ব্বেণৈব সম্বন্ধঃ॥ ৯॥

## গিরিকৃত টীকা।

মুষ্টানর্থান্তরেণ পরমপুরুষনিষ্ঠেনেত্যর্থঃ। তদেব পুরুষস্য নিরতিশয়ত্বং যদপরামৃষ্টাখিলানর্থত্বমনতিশয়ানন্দত্বং তচ্চ প্রাগেব ব্যাখ্যাতং নেহ ব্যাখ্যানমপেক্ষতে। যশ্চাসাবাদিত্যে ইত্যাদি শ্রুতিমস্ত্যাহ দিব্যমিতি। তত্র বিশেষতোঽভিব্যক্তিরেব ভবনং, পূর্ব্বোক্তেন চেতসা যথোক্তং পুরুষমনুচিন্তয়ন্ যাতি তমেবেতি সম্বন্ধঃ। অনুচিন্তয়ন্নিত্যত্রানুশব্দার্থং ব্যাচষ্টে শাস্ত্রেতি। চিন্তয়ন্নিতি ব্যাকরোতি ধ্যায়ন্নিতি॥ ৮॥

কিংবিশিষ্টং পুরুষমনুচিন্তয়ন্নিতি সম্বন্ধঃ, চকারাৎ কয়া বা নাড্যোৎক্রামন্নিত্যনুকৃষ্যতে, তত্র ধ্যানদ্বারাপ্রাপ্যস্য পুরুষস্য বিশেষণানি দর্শয়তি উচ্যত ইতি,ক্রান্তদর্শিত্বমতীতাদেরশেষস্য বস্তুনো দর্শনশালিত্বং। তেন নিষ্পন্নমর্থমাহ সর্ব্বজ্ঞমিতি। চিরন্তনমাদিমতঃ সর্ব্বস্য কারণত্বাদনাদিমিত্যর্থঃ, সূক্ষ্মমাকাশাদি ততঃ সূক্ষ্মতরং তদুপাদানত্বাদিত্যর্থঃ যো যথোক্তমনুচিন্তয়েৎ স তমেবানুচিন্তয়ন্ যাতীতি পূর্ব্বেণৈব সম্বন্ধ ইতি যোজনা। ননু বিশিষ্টজাত্যাদিমতো যথোক্তমনুচিন্তনং ফলবদ্ভবতি ন ত্বস্মদাদীনামিত্যাশঙ্ক্যাহ যঃ কশ্চি-

## স্বামীকৃত টীকা।

পুনরপ্যনুচিন্তনীয়ং পুরুষং বিশিনষ্টি কবিমিতি দ্বাভ্যাং। কবিং সর্ব্বজ্ঞং সর্ব্ববিদ্যানির্ম্মাতারং, পুরাণমনাদিসিদ্ধং, অনুশাসিতারং নিয়ন্তারং, অণোঃ সূক্ষ্মাদপ্যণীয়াংসমতিসূক্ষ্মং আকাশকালদিগ্ভ্যোঽপ্যতিসূক্ষ্মতরং, সর্ব্বস্য ধাতারং পোষকং, অপরিমিতমহিমত্বাদচিন্ত্যরূপং মলীমসয়োর্মনোবুদ্ধ্যোরগোচরং, আদিত্যবৎ স্বরূপপ্রকাশাত্মকো বর্ণঃ স্বরূপং যস্য তং তমসঃ প্রকৃতেঃ পরস্তাদ্বর্ত্তমানং, বেদাহমেতং পুরুষং মহান্তমাদিত্যবর্ণং তমসঃ পরস্তাদিতিশ্রুতেঃ॥ ৯॥

প্রয়াণকালে মনসাঽচলেন ভক্ত্যা যুক্তো যোগবলেন চৈব।
ভ্রুবোর্মধ্যে প্রাণমাবেশ্য সম্যক্ স তং পরং পুরুষমুপৈতি দিব্যম্ ॥১০॥

## শাঙ্করভাষ্যম্।

কিঞ্চ প্রয়াণকালইতি। প্রয়াণকালে মরণকালে মনসাঽচলেন প্রচলনবর্জ্জিতেন ভক্ত্যা যুক্তো ভজনং ভক্তিঃ তয়া যুক্তো যোগবলেন চৈব যোগস্য বলং যোগবলং তেন সমাধিজ-সংস্কারপ্রচয়জনিতং স্বচিত্তস্থৈর্য্যলক্ষণং যোগবলং তেন চ যুক্ত ইত্যর্থঃ, পূর্ব্বং হৃদয়পুণ্ডরীকে বশীকৃত্য চিত্তং তত ঊর্দ্ধগামিন্যা নাড্যা ভূমিজয়ক্রমেণ ভ্রুবোর্মধ্যে প্রাণমাবেশ্য স্থাপয়িত্বা সম্যগপ্রমত্তঃ সন্ স এবং বুদ্ধিমান্ যোগী কবিং পুরাণমিত্যাদিলক্ষণং তং পরং পুরুষমুপৈতি প্রপদ্যতে দিব্যং দ্যোতনাত্মকং ॥ ১০ ॥

## গিরিকৃত টীকা।

দিতি। ফলমত উপপত্তেরিতি ন্যায়েনাহ সর্ব্বস্যেতি। এতদপ্রমেয়ং ধ্রুবমিতি শ্রুতিমাশ্রিত্যাহ অচিন্ত্যরূপমিতি। ন হি পরস্য কিঞ্চিদপি রূপাদিবস্তুনোঽস্তি অরূপবদেব হীতি ন্যায়াৎ কল্পিতমপি নাস্মদাদিভিঃ শক্যতে চিন্তয়িতুমিত্যাহ নাস্যেতি। মূলকারণাদজ্ঞানাত্তৎকার্য্যাচ্চ পুরস্তাদুপরিষ্টাদ্ব্যবস্থিতং পরমার্থতো জ্ঞানতৎকার্য্যাস্পৃষ্টমিত্যাহ তমস ইতি ॥ ৯ ॥

ইতশ্চ ভগবদনুস্মরণং সফলত্বাদনুষ্ঠেয়মিত্যাহ কিঞ্চেতি। কদা তদনুস্মরণে প্রযত্নাতিরেকোঽভ্যর্থ্যতে তত্রাহ প্রয়াণকাল ইতি। কথং তদনুস্মরণমিত্যুপকরণকলাপমপেক্ষ্যমাণং প্রত্যাহ মনসেতি। যোঽনুস্মরেৎ স কিমুপৈতি তত্রাহ স তমিতি। মরণকালে ক্লেশবাহুল্যেঽপি প্রাচীনাভ্যাসপ্রসাদাসাদিতবুদ্ধিবৈভবো ভগবন্তমনুস্মরন্ যথাস্মৃতমেব দেহাভিমানবিগমানন্তরমুপাগচ্ছতীত্যর্থঃ। ভগবদনুস্মরণস্য সাধনং মনসৈবানুদ্রষ্টব্যমিতি শ্রুত্যুপদিষ্টমাচষ্টে মনসেতি। তস্য চঞ্চলত্বান্ন স্থৈর্য্যমীশ্বরে সিধ্যতি তৎকথং তেন তদনুস্মরণমিত্যাশঙ্ক্যাহ অচলেনেতি। ঈশ্বরানুস্মরণে প্রযত্নেন প্রবর্ত্তিতং বিষয়বিমুখং, তস্মিন্নেবানুস্মরণযোগ্যে পৌনঃপুন্যেন প্রবৃত্ত্যা নিশ্চলীকৃতং ততশ্চলনবিকলং, তেনেতি ব্যাচষ্টে প্রচলনেতি। সংপ্রত্যনুস্মরণাধিকারিণং বিশিনষ্টি ভক্ত্যেতি। পরমেশ্বরে পরেণ প্রেম্ণা সহিতো বিষয়ান্তরবিমুখোঽনুস্মর্ত্তব্য ইত্যর্থঃ। যোগবলমেব স্ফোরয়তি সমাধিজেতি। যোগঃ সমাধিঃ চিত্তস্য

## স্বামিকৃত টীকা।

সপ্রপঞ্চপ্রকৃতিং ভিত্ত্বা যস্তিষ্ঠতি এবংভূতং পুরুষং অন্তকালে ভক্তিযুক্তো নিশ্চলেন বিক্ষেপরহিতেন মনসা যোঽনুস্মরেৎ, মনোনৈশ্চল্যে হেতুঃ যোগবলেন সম্যক্ সুষুম্নামার্গেণ ভ্রুবোর্মধ্যে প্রাণমাবেশ্য ইতি, স তং পরং পুরুষং পরমাত্মস্বরূপং দিব্যং দ্যোতনাত্মকং প্রাপ্নোতি। ১০ ॥

যদক্ষরং বেদবিদো বদন্তি বিশন্তি যদ্ যতয়ো বীতরাগাঃ।
যদিচ্ছন্তো ব্রহ্মচর্য্যং চরন্তি তত্তে পদং সংগ্রহেণ প্রবক্ষ্যে ॥১১॥

## শাঙ্করভাষ্যম্।

যোগমার্গানুগমনেনৈব ব্রহ্মবিদ্যামন্তরেণাপি ব্রহ্মাপ্যত ইত্যেবং প্রাপ্ত ইদমুচ্যতে, পুনরপি বক্ষ্যমাণেনোপায়েন প্রতিপিৎসিতস্ত ব্রহ্মণো বেদবিদনাদিবিশেষণবিশেষ্য-স্যাভিধানং করোতি গভবান্ যদক্ষরমিতি। যদক্ষবং ন ক্ষরতীতি অক্ষরং অবিনাশি বেদবিদো বেদার্থজ্ঞা বদন্তি তদ্বা এতদক্ষরং গার্গি ব্রাহ্মণা অভিবদন্তীতি শ্রুতেঃ, সর্ব্ববিশেষ-

## গিরিকৃত টীকা।

বিষয়ান্তববৃত্তিধিরোধেন পবস্মিন্নেব স্থাপনং তস্য বলং সংস্কারপ্রচয়ো ধ্যেযৈকাগ্র্যকরণং তেনতত্রৈব স্থৈর্য্যমিত্যর্থঃ। চকারসূচিতমন্বয়মন্বাচষ্টে তেন চেতি। যত্তু কয়া নাড্যোৎ-ক্রামন্ যাতীতি তত্রাহ পূর্ব্বমিতি। চিত্তং হি স্বভাবতো বিষয়েষু ব্যাপৃতং তেভ্যো বিমুখী কৃত্য হৃদয়ে পুণ্ডরীকাকাবে পবমাত্মস্থানে যত্নতঃ স্থাপনীয়ং, অথ যদিদমস্মিন্ ব্রহ্মপুরে ইত্যাদিশ্রুতেস্তত্র চিত্তং বশীকৃত্য আদাবনন্তরং কর্ত্তব্যমুপদিশতি ভত ইতি। ইড়াপিঙ্গলে দক্ষিণোত্তরে নাড্যৌ হৃদয়ান্নিঃসৃতে নিরুধ্য তস্মাদেব হৃদযাগ্রাদূর্দ্ধগমনশীলয়া সুষুম্নয়া নাড্যা হার্দং প্রাণমানীয় কণ্ঠাবলম্বিতং স্তনসদৃশং মাংসখণ্ডং প্রাপয্য তেনাধ্বনা ভ্রুবো-র্মধ্যে তমাবেশ্য অপ্রমাদবান্ ব্রহ্মরন্ধ্রাদ্বিনিষ্ক্রাম্য কবিং পুরাণমিত্যাদি বিশেষণং পবম-পুরুষমুপগচ্ছতীত্যর্থঃ। ভূমিজয়ক্রমেণেত্যত্র ভূম্যাদীনাং পঞ্চানাং ভূতানাং জয়ো বশী-করণং তস্য তস্য ভূতস্য স্বাধীনচেষ্টাবৈশিষ্ট্যং তদ্দ্বারেণেত্যেতদুচ্যতে। স তমিত্যাদি ব্যাচষ্টে সএবমিতি॥ ১০॥

যেন কেনচিন্মন্ত্রাদিনা ধ্যানকালে ভগবদনুস্মরণে প্রাপ্তে সত্যভিধানত্বেন নিয়ন্তুং স্মর্ত্তব্য-ত্বেন প্রকৃতপরমপুরুষস্য ত্রৈবিদ্যবৃদ্ধ্যা প্রামাণিকত্বমাহ পুনরপীতি। উপায়ো বক্ষ্য-মাণ ওঙ্কারঃ। অবিষয়ে প্রতীচি ব্রহ্মণি বেদার্থবিদামপি কথং বচনমিত্যাশঙ্ক্যাবিষয়ত্বমি ত্যেতাবতৈবেতি মত্বা শ্রুতিমুদাহরতি তদ্বেতি। তথাপি তস্মিন্নবিষয়ে সর্ব্ববিশেষশূন্যে বচন

## স্বামিকৃত টীকা।

কেবলাভ্যাসযোগাদপি প্রণবাভ্যাসমন্তরঙ্গং বিধিৎসুঃ প্রতিজানীতে যদক্ষরমিতি। যদক্ষরং বেদার্থজ্ঞা বদন্তি, এতস্য বা অক্ষরস্য প্রশাসনে গার্গি সূর্য্যাচন্দ্রমসৌ বিধৃতৌ তিষ্ঠত ইতিশ্রুতেঃ, বীতো রাগো যেভ্যস্তে বীতরাগা যতয়ঃ প্রযত্নবন্তো বদ্বিশন্তি, যচ্চ জ্ঞাতু মিচ্ছন্তো গুরুকুলে ব্রহ্মচর্য্যং চরন্তি তত্তে তুভ্যং পদং পদ্যতে গম্যতইতি পদং প্রাপ্যং সংগ্রহেণ সংক্ষেপেণ প্রবক্ষ্যে তৎপ্রাপ্ত্যুপায়ং কথয়িষ্যামীত্যর্থঃ॥ ১১॥

## শাঙ্করভাষ্যম্।

নিবর্ত্তকত্বেনাভিবদন্ত্যস্থূলমনণ্বিত্যাদি, কিঞ্চ বিশন্তি সম্যগ্দর্শনপ্রাপ্তৌ সত্যাং যদ্‌যতয়ো যতনশীলাঃ সংন্যাসিনো বীতরাগাঃ বিগতো রাগো যেভ্যস্তে বীতরাগাঃ যচ্চাক্ষরমিচ্ছন্তো জ্ঞাতুমিতি বাক্যশেষঃ, ব্রহ্মচর্য্যং গুরৌ চরন্তীতি, তত্তে পদং যদক্ষরাখ্যং ব্রহ্মাখ্যং পদং পদনীয়ং তে তুভ্যং সংগ্রহেণ সংগ্রহঃ সংক্ষেপঃ তেন সংক্ষেপেণ প্রবক্ষ্যে কথয়িষ্যামি, স যোহ তদ্ভগবন্ মনুষ্যেষু প্রাণায়ামোঙ্কারমভিধ্যায়ীত কতমম্বা বসতে ন লোকং জয়তীতি তস্মৈ সহোবাচ এতদ্বৈ সত্যকামপরঞ্চাপরঞ্চ ব্রহ্ম যদোঙ্কার ইত্যুপক্রম্য যঃ পুনরেতং ত্রিমাত্রেণোমিত্যেতেনৈবাক্ষরেণ পরং পুরুষমভিধ্যায়ীত প্রণবো ধনুঃ শরো হ্যাত্মা ব্রহ্ম তল্লক্ষ্যমুচ্যতে অপ্রমত্তেন বোদ্ধব্যং শরবত্তন্ময়ো ভবেদিত্যাদিনা বচনেন অন্যত্র ধর্ম্মাদন্যত্রাধর্ম্মাদিতি চোপক্রম্য সর্ব্বে বেদা যৎপদমামনন্তি তপাংসি সর্ব্বাণি চ যদ্বদন্তি যদিচ্ছন্তো-ব্রহ্মচর্য্যং চরন্তি তত্তে পদং সংগ্রহেণ ব্রবীম্যোমিত্যেতাদিভিশ্চ বচনৈঃ পরস্য ব্রহ্মণো বাচকরূপেণ প্রতিমাবৎ প্রতীকরূপেণ চপরব্রহ্মপ্রতিপত্তিসাধনত্বেন মন্দমধ্যমবুদ্ধীনাং বিবক্ষিতস্যোঙ্কারস্যোপাসনং কালান্তরে মুক্তিফলমুক্তং যত্তদেবেহাপি অধিকৃতং কবিং পুরাণমনুশাসিতারং যদক্ষরং বেদবিদো বদন্তীতি চোপন্যস্তস্য চ পরস্য ব্রহ্মণঃ পূর্ব্বোক্তরূপেণ প্রতিপত্ত্যুপায়ভূতস্যোঙ্কারস্য কালান্তরমুক্তিফলমুপাসনং যোগধারণাসহিতং বক্তব্যং ॥ ১১ ॥

## গিরিকৃত টীকা।

মন্তুচিতমিত্যাশঙ্ক্যাহ সর্ব্বেতি। ন কেবলা বিদ্বদনুভবসিদ্ধং যথোক্তং ব্রহ্ম কিন্তু মুক্তোপসৃপ্যতয়া মুক্তানামপি প্রসিদ্ধমিত্যাহ কিঞ্চেতি। কেষাং পুনঃ সংন্যাসিত্বং তদাহ বীতরাগা ইতি। জ্ঞানার্থং ব্রহ্মচর্য্যবিধানদপি ব্রহ্ম জ্ঞেয়ত্বেন প্রসিদ্ধমিত্যাহ যচ্ছেতি। কথং তর্হি যথোক্তং ব্রহ্ম মম জ্ঞাতুং শক্যমিত্যাকুলিতচেতসমর্জ্জুনং প্রত্যাহ তত্তে পদমিতি। বক্ষ্যমাণেনোপায়েত্যুক্তং ব্যক্তীকুর্ব্বন্নোঙ্কারদ্বারা ব্রহ্মোপাসনং শ্রুত্যুক্তমনুক্রামতি স যো হেতি। সত্যকামেনাভিধ্যানফলং জিজ্ঞাসুনা ভগবন্নিতি পিপ্‌পলাদঃ সম্বোধ্যাভিমুখীক্রিয়তে নিপাতৌ তু প্রসিদ্ধমর্থমবদ্যোতয়ন্তাবভিধ্যানস্য ফলত্বেন্ কর্ত্তব্যত্বমাবেদয়তঃ, মনুষ্যেষু মধ্যে স যোঽধিকৃতো মনুষ্যস্তৎপ্রসিদ্ধমভিধ্যানং যথা সিধ্যতি তথা সর্ব্ববেদসারভূতমোঙ্কারমাভিমুখ্যেন ধ্যায়ীত তচ্চাভিধ্যানমাপ্রয়ণাদিতি ন্যায়েন মরণান্তমনুষ্ঠেয়ং, স চৈবমনুতিষ্ঠন্ প্রকৃতেনাভিধ্যানেন লোকানাং বহুত্বাৎ কতমং লোকং জয়তীতি প্রশ্নং পৃষ্টবতে সত্যকামায় পিপ্‌পলাদনামা কিলাচার্য্যঃ প্রতিবচনং প্রোবাচ তত্র প্রথমং অভিধেয়মোঙ্কারং পরব্রহ্মত্বেন মহীকরোতি এতদ্বাইতি। ত্রিমাত্রেণাকারোকারমকারাত্মকেনেতি যাবৎ যোঽভিধ্যায়ীত তমেব যথাভিধ্যাতং পুরুষমধিগচ্ছতীত্যাদি বচনেনোপাসনমোঙ্কারস্যোক্তমিত্যর্থঃ। প্রশ্নশ্রুতিবৎ কঠবল্লী চ তত্রৈবার্থে

সর্ব্বদ্বারাণি সংযম্য মনো হৃদি নিরুধ্য চ।
মূর্দ্ধ্ন্যাধায়াত্মনঃ প্রাণমাস্থিতো যোগধারণাম্ ॥ ১২ ॥

## শাঙ্করভাষ্যম্।

প্রসক্তানুপ্রসক্তঞ্চ যৎকিঞ্চিদিত্যেবমর্থ উত্তরো গ্রন্থ আরভ্যতে সর্ব্বেতি। সর্ব্বদ্বারাণি সর্ব্বাণি চ তানি দ্বারাণি চ সর্ব্বদ্বারাণি উপলব্ধৌ তানি সর্ব্বাণি সংযমনং কৃত্বা মনো হৃদি হৃদয়পুণ্ডরীকে নিরোধং কৃত্বা নিষ্প্রচারতামাপাদ্য তত্র বশীকৃতেন মনসা হৃদয়াদূর্দ্ধগামিন্যা নাড্যা উর্দ্ধমারুহ্য মূর্দ্ধন্যাধায়াত্মনঃ প্রাণমাস্থিতঃ প্রবৃত্তো যোগধারণাং ধারয়িতুং ॥ ১২ ॥

---

## গিরিকৃত টীকা।

প্রবৃত্তেত্যাহ অন্তত্রেতি। অব্যবধানেনোপনিষদাং ব্যবধানেন চ কর্ম্মশ্রুতীনাং পরস্মিন্নাত্মনি পর্য্যবসানং দর্শয়তি সর্ব্ব ইতি। তপসামপি সর্ব্বেষাং চিত্তশুদ্ধিদ্বারা তত্রৈব পর্য্যবসানমিত্যাহ তপাংসীতি। তস্যৈব চ জ্ঞানার্থমষ্টাঙ্গং ব্রহ্মচর্য্যং তত্র তত্র বিহিতমিত্যাহ যদিচ্ছন্ত ইতি। তস্য পদনীয়স্য ব্রহ্মণঃ সংক্ষেপেণ কথমোঙ্কারদ্বারকমিতি কথয়তি ওমিত্যেতদিতি। ওমিত্যেতদিতি উদাহৃতবচনানাং তাৎপর্য্যং দর্শযতি পরস্যেতি। তস্য বাচকরূপেণ বা তস্যৈব প্রতীকরূপেণ বা বিবক্ষিতস্যোঙ্কারস্যোপাসনং যথোক্তৈর্ব্বচনৈরুক্তমিতি সম্বন্ধঃ। নহু পরস্মিন্ ব্রহ্মণি তত্ত্বমস্যাদি বাক্যাদেব প্রতিপত্তিরধিকারিণো ভবিষ্যতি কিমিত্যুপাসনমোঙ্কারো পন্যস্যতে তত্রাহ পরেতি। যদ্যপি বিশিষ্টস্যাধিকারিণো বিনৈবোপাসনমুপনিষদ্ভ্যো ব্রহ্মণি প্রতিপত্তিরুৎপদ্যতে তথাপি মন্দানাং মধ্যমানাঞ্চ তদ্ধি হেতুত্বেনোঙ্কারো বিবক্ষিতঃ তচ্চোপাসনং ব্রহ্মদৃষ্ট্যা শ্রুতিভিরুপদিষ্টমিত্যর্থঃ। তস্য ক্রমমুক্তিফলত্বাদনুষ্ঠেয়ত্বং সূচয়তি কালান্তরেতি। ভবত্বেবং শ্রুতীনাং প্রবৃত্তিস্তাবতা প্রকৃতে কিমায়াতমিত্যাশঙ্ক্যাহ উক্তং যদিতি। তদেবেহাপি বক্তব্যমিত্যুত্তরেণ সম্বন্ধঃ। উপাসনমেবোপাস্যোপন্যাসদ্বারা স্ফোরয়তি কবিমিত্যাদিনা। পূর্ব্বোক্তরূপেণেত্যভিধানত্বেন প্রতীকত্বেন চেত্যর্থঃ। শ্রৌতস্যোপাসনস্যানুদ্যলানস্য সোপস্করত্বং সংগিরতে যোগেতি ॥ ১১ ॥

তর্হি কথমনন্যচেতাঃ সততমিত্যাদি বক্ষ্যতে তত্রাহ প্রসক্তেতি। ওঙ্কারোপাসনং প্রসক্তং তদনন্তরং তৎফলমনুপ্রসক্তং তদ্দ্বারা চাপুনরাবৃত্ত্যাদি বক্তব্যকোটিনিবিষ্টমিত্যর্থঃ।

## স্বামিকৃত টীকা।

প্রতিজ্ঞাতমুপায়ং সাঙ্গমাহ সর্ব্বেতি দ্বাভ্যাং। সর্ব্বাণীন্দ্রিয়দ্বারাণি সংযম্য প্রত্যাহৃত্য চক্ষুরাদিভির্ব্বাহ্যবিষয়গ্রহণমকুর্ব্বন্নিত্যর্থঃ, মনশ্চ হৃদি নিরুধ্য বাহ্যবিষয়স্মরণমপ্যকুর্ব্বন্নিত্যর্থঃ, মূর্দ্ধ্নি ভ্রুবোর্ম্মধ্যে প্রাণমাধায় যোগস্য ধারণাং স্থৈর্য্যমাস্থিত আশ্রিতবান্ সন্ ॥১২॥

ওমিত্যেকাক্ষরং ব্রহ্ম ব্যাহরন্ মামনুস্মরন্।
য প্রয়াতি ত্যজন্ দেহং স যাতি পরমাং গতিম্ ॥ ১৩ ॥

## শাঙ্করভাষ্যম্।

তত্রৈব চ ধারয়ন্ ওমিতি। ওমিত্যেকাক্ষরং ব্রহ্ম ব্রহ্মণোঽভিধানভূতমোঙ্কারং ব্যাহরন্নুচ্চরংস্তদর্থভূতং মামীশ্বরমনুস্মরন্ননুচিন্তয়ন্ যঃ প্রয়াতি ম্রিয়তে স ত্যজন্ পবিত্যজন্ দেহং শরীরং ত্যজন্ দেহমিতি প্রয়াণবিশেষণার্থং দেহত্যাগেন প্রয়াণমাত্মনো ন স্বরূপনাশেনেত্যর্থঃ, স এবং ত্যজন্ প্রয়াতি গচ্ছতি পরমাং প্রকৃষ্টাং গতিং ॥ ১৩ ॥

কিঞ্চ অনন্যেতি। অনন্যচেতা নান্যবিষয়ে চেতো যস্য সোঽয়মনন্যচেতা যোগী সততং সর্ব্বদা যো মাং পরমেশ্বরং স্মরতি নিত্যশঃ সততমিতি নৈরন্তর্য্যমুচ্যতে নিত্যশ ইতি দীর্ঘ

## গিরিকৃত টীকা।

উক্তেঽর্থে সগনন্তরগ্রন্থমুত্থাপযতি ইত্যেবমর্থইতি। শ্রোত্রাদীনাং কুত্র দ্বারবত্বং তত্রাহ উপলব্ধাবিতি। তেষাং সংযমনং বিষয়েষু প্রবৃত্তানাং দোষদর্শনদ্বারা তেভ্যো বৈমুখ্যাপাদনং। কোঽয়ং মনসো হৃদয়ে নিরোধস্তত্রাহ নিঃপ্রচারমিতি। মনসো বিষয়াকারবৃত্তিং নিরুধ্য হৃদি বশীকৃতস্য কার্য্যং দর্শয়তি তত্রেতি ঊর্দ্ধমিত্যত্রাপি হৃদয়াদিতি সম্বধ্যতে সর্ব্বাণ্যুপলব্ধিদ্বারাণি শ্রোত্রাদীনি সংনিরুধ্য বায়ুমপি সর্ব্বেভ্যো নিগৃহ্য হৃদয়মানীয় ততো নির্গতয়া সুষুম্নাকণ্ঠভ্রূমধ্যললাটক্রমেণ প্রাণং মূর্দ্ধন্যাধায় যোগধারণামারূঢ়ো ব্রহ্ম ব্যাহরন্ মাঞ্চ তদর্থমনুস্মরন্ পরমাং গতিং যাতীতি সম্বন্ধঃ ॥ ১২ ॥

যথোক্তযোগধারণার্থং প্রবৃত্তো মূর্দ্ধনি প্রাণমাধায় ধারয়ন্ হি কিং কুর্য্যাদিত্যাশঙ্ক্যানন্তরশ্লোকমবতারয়তি তত্রৈবেতি। একঞ্চ তদক্ষরং চেতি একাক্ষরমোমিত্যেবং রূপং তৎকথং ব্রহ্মেতি বিশিষ্যতে তত্রাহ ব্রহ্মণইতি। যঃ প্রযাতীতি মরণমুক্ত্বা ত্যজন্ দেহমিতি ব্রুবতা পুনরুক্তিরাশ্রিতা স্যাদিত্যাশঙ্ক্য বিশেষণার্থং বিবৃণোতি দেহেতি। এবমোঙ্কারমুচ্চারয়ন্নর্থং চাভিধ্যায়ন্ ধ্যাননিষ্ঠঃ স পুমানিত্যর্থঃ, পরমামিতি গতিবিশেষণং ক্রমমুক্তিবিবক্ষয়া দ্রষ্টব্যং ॥ ১৩ ॥

নন্থ বায়ুনিরোধাং উদীরিতযা রীত্যা স্বেচ্ছাপ্রযুক্তোৎক্রমণাসম্ভবাদ্দুর্ল্লভা পরমা গতিরাপদ্যেতিতি তত্রাহ কিঞ্চেতি। ইতশ্চ ভগবদনুস্মরণে প্রযতিতব্যমিত্যর্থঃ। সততং

## স্বামিকৃত টীকা।

ওমিতি। ওমিত্যেকং যদেব ব্রহ্মবাচকত্বাৎ ব্রহ্মপ্রতিমাদিবদ্ব্রহ্মপ্রতীকত্বাদ্বা ব্রহ্ম তদ্ব্যাহরন্নুচ্চারয়ন্ তদ্বাচ্যঞ্চ মামনুস্মরন্নেবং দেহং ত্যজন্ যঃ প্রকর্ষেণ যাতি অর্চ্চিরাদিমার্গেণ স পরমাং শ্রেষ্ঠাং মদগতিং প্রাপ্নোতি ॥ ১৩ ॥

অনন্যচেতাঃ সততং যো মাং স্মরতি নিত্যশঃ।
তস্যাহং সুলভঃ পার্থ নিত্যযুক্তস্য যোগিনঃ ॥ ১৪ ॥
মামুপেত্য পুনর্জন্ম দুঃখালয়মশাশ্বতম্।
নাপ্নুবন্তি মহাত্মানঃ সংসিদ্ধিং পরমাঙ্গতাঃ ॥ ১৫ ॥

## শাঙ্করভাষ্যম্।

কালস্তমুচ্যতে ন ষন্মাসং সম্বৎসরং বা কিং তর্হি যাবজ্জীবনং নৈরন্তর্য্যেণ যো মাং স্মরতীত্যর্থঃ তস্য যোগিনোঽহং সুলভঃ সুখেন লভ্যঃ পার্থ নিযুক্তস্য সদা সমাহিতস্য যোগিনঃ যতএবমতোঽনন্যচেতাঃ সন্ ময়ি সমাহিতো ভবেৎ ॥ ১৪ ॥

তব সৌলভ্যেন কিং স্যাদিত্যুচ্যতে শৃণু তন্মম সৌলভ্যেন যদ্ভবতি মামুপেত্যেতি। মামুপেত্য মামীশ্বরমুপেত্য মৎভাবমাপদ্য পুনর্জন্ম পুনরুৎপত্তিং ন প্রাপ্নুবন্তি কিং বিশিষ্টং পুনর্জন্ম ন প্রাপ্নুবন্তি তদ্বিশেষণমাহ দুঃখালয়ং দুঃখানামাধ্যাত্মিকাদীনামালয়মাশ্রয়ং আলীয়ন্তে যস্মিন্ দুঃখানি তং দুঃখালয়ং জন্ম ন কেবলং দুঃখালয়মশাশ্বতমনবস্থিতস্বরূপঞ্চ নাপ্নুবন্তীদৃশং পুনর্জন্ম মহাত্মানো যতয়ঃ সংসিদ্ধিং মোক্ষাখ্যাং পরমাং প্রকৃষ্টাং গতাঃ প্রাপ্তাঃ ॥ ১৫ ॥

## গিরিকৃত টীকা।

নিত্যশ ইতি বিশেষণয়োরপুনরুক্তত্বমাহ সততমিত্যাদিনা। উক্তমেবাপৌনরুক্তিং ব্যক্তী করোতি নেত্যাদিনা। জিতাসুরিচ্ছয়া দেহং ত্যজতি তদিতরস্ত কর্ম্মক্ষয়েণৈবেতি বিশেষং বিবক্ষন্নাহ যত ইতি ॥ ১৪ ॥

অনন্যচেতসং প্রতীশ্বরস্য সৌলভ্যমেবমিত্যুচ্যতে কিং ত্বাং প্রাপ্তাস্তয্যেবাবতিষ্ঠন্তে কিম্বা পুনরাবর্ত্তন্তে চন্দ্রলোকাদিবেতি সন্দেহাৎ পৃচ্ছতি তবেতি। তত্রোত্তরশ্লোকেন নিশ্চয়ং দর্শয়তি উচ্যতইতি। ঈশ্বরোপগমনং ন সামীপ্যমাত্রমিতি ব্যাচষ্টে মদ্ভাবমিতি।

## স্বামিকৃত টীকা।

এবঞ্চান্তকালে ধারণয়া মৎপ্রাপ্তির্নিত্যাভ্যাসবশত এব ভবতি নান্যস্যেতি পূর্ব্বোক্তমেবানুস্মারয়তি অনন্যেতি। নাস্ত্যন্যস্মিন্ চেতো যস্য তথাভূতঃ সন্ যো মাং সততং নিরন্তরং নিত্যশঃ প্রতিদিনং স্মরতি তস্য নিত্যযুক্তস্য সমাহিতস্যাহং সুখেন লভ্যোঽস্মি নান্যস্যেতি ॥ ১৪ ॥

যদ্যেবং ত্বং সুলভোঽসি ততঃ কিমতআহ মামিতি। উক্তলক্ষণা মহাত্মানো মদ্ভক্তা মাং প্রাপ্য পুনর্দুঃখাশ্রয়মনিত্যঞ্চ জন্ম ন প্রাপ্নুবন্তি যতস্তে পরমাং সিদ্ধিং মোক্ষমেব প্রাপ্তাঃ পুনর্জন্মনো দুঃখানাঞ্চালয়ং স্থানং মামুপেত্য ন প্রাপ্নুবন্তীতি বা ॥ ১৫ ॥

আ ব্রহ্মভুবনাল্লোকাঃ পুনরাবর্ত্তিনোঽর্জ্জুন।
মামুপেত্য তু কৌন্তেয় পুনর্জন্ম ন বিদ্যতে॥ ১৬॥

## শাঙ্করভাষ্যম্।

যে পুনর্মাং ন প্রাপ্নুবন্তি তে পুনবাবর্ত্তন্তে কে পুনস্তেঽন্যৎপ্রাপ্তাঃ পুনবাবর্ত্তন্ত ইত্যুচ্যতে আ ব্রহ্মেতি। আ ব্রহ্মভুবনাদ্ভবন্তি যস্মিন্ ভূতানীতি ভুবনং ব্রহ্মভুবনং ব্রহ্মলোক ইত্যর্থঃ আ ব্রহ্মভুবনাৎ সহ ব্রহ্মভুবনেন লোকাঃ সর্ব্বে পুনবাবর্ত্তিনঃ পুনবাবর্ত্তনস্বভাবাঃ হে অর্জ্জুন মামেকমুপেত্য তু কৌন্তেয় পুনর্জন্ম পুনরুৎপত্তির্ন বিদ্যতে॥ ১৬॥

## গিরিকৃত টীকা।

পুনর্জন্মনোঽনিষ্টত্বং প্রশ্নদ্বারা স্পষ্টয়তি কিমিত্যাদিনা। মহাত্মত্বং প্রকৃষ্টসত্ত্ববৈশিষ্ট্যং, যত্তয়স্তস্মিন্নেবেশ্বরে সমুৎপন্নসম্যগ্দর্শিনো ভূত্বেতি শেষঃ॥ ১৫॥

ভগবন্তমুপগতানামপুনবাবৃত্তৌ ততো বিমুখানামনুপজাতসম্যগ্ধিযাং পুনবাবৃত্তিবর্থসিদ্ধেত্যাহ যে পুনবিতি। অপাম সোমমমৃতা অভূমেতি শ্রুতেঃ স্বর্গাদিগতানামপি সমানৈবানাবৃত্তিবিতি আশঙ্কতে কে পুনবিতি। অর্থবাদশ্রুতৌ কর্ম্মিণামমৃতত্বস্যাপেক্ষিকত্বং বিবক্ষিত্বা পবিহবতি উচ্যত ইতি। এতেন ভূবাদিলোকচতুষ্টয়ং প্রবিষ্টানাং পুনবাবৃত্তাবপি জনাদিলোকত্রয়ং প্রাপ্তানামপুনবাবৃত্তিবিতি বিভাগোক্তিবপ্রামাণিকত্বাদেব হেয়েত্যবধেয়ং। তর্হি তদ্বদেবেশ্বরং প্রাপ্তানামপি পুনবাবৃত্তিঃ শঙ্কতে নেত্যাহ মামিতি। যাবৎ সম্পাতশ্রুতিবদীশ্বরং প্রাপ্তানাং নিবৃত্তাবিদ্যানাং পুনবাবৃত্তিবপ্রমাণিকীত্যর্থঃ॥ ১৬॥

## স্বামিকৃত টীকা।

তদেবং সর্ব্বেষপি লোকেষু পুনবাবৃত্তিং দর্শযন্ নির্দ্ধাবয়তি আ ব্রহ্মভুবনাদিতি। ব্রহ্মণো ভুবনং বাসস্থানং ব্রহ্মলোকস্তমভিব্যাপ্য সর্ব্বে লোকাঃ পুনরাবর্ত্তনশীলাঃ, ব্রহ্মলোকস্যাপি বিনাশিত্বাৎ' তৎপ্রাপ্তানামনুৎপন্নজ্ঞানানামবশ্যংভাবি পুনর্জন্ম য এবং ক্রমমুক্তিফলাভিরুপাসনাভির্ব্রহ্মলোকং প্রাপ্তাস্তেষামেব তত্রোৎপন্নজ্ঞানানাং ব্রহ্মণা সহ মোক্ষো নান্যেষাং তথা চ, ব্রহ্মণা সহ তে সর্ব্বে সম্প্রাপ্তে প্রতিসঞ্চরে। পরস্যান্তে কৃতাত্মানঃ প্রবিশন্তি পরং পদং। পরস্যান্তে ব্রহ্মণঃ পবমাযুষোঽন্তে কৃতাত্মানো ব্রহ্মভাবাপাদিতমনোবৃত্তয়ঃ; কর্ম্ম দ্বারেণ যেষাং ব্রহ্মলোকপ্রাপ্তিস্তেষাং ন মোক্ষ ইতি পবিনিশ্চিতিঃ, মামুপেত্য বর্ত্তমানানান্ত পুনর্জন্ম নাস্ত্যেবেতি॥ ১৬॥

নমু চ'তপস্বিনো দানশীলা বীতরাগাস্তিতিক্ষবঃ। ত্রৈলোক্যস্যোপবিস্থানং লভন্তে শোকবর্জ্জিতং,৮ ইত্যাদিপুবাণবাক্যৈস্ত্রিলোক্যাঃ সকাশান্মহর্লোকাদীনামুৎকৃষ্টত্বং গম্যতে বিনাশিত্বে চ সর্ব্বেষামবৈশিষ্ট্যে কথমসৌ বিশেষঃ স্যাদিত্যাশঙ্ক্য, বহুকালাবস্থাযিত্বনিমিত্তোঽসৌ বিশেষ ইত্যাশয়েন স্বমানেন শতবর্ষাযুষো ব্রহ্মণোঽহন্যহনি ত্রিলোক্যা উৎপত্তি-

সহস্রযুগপর্য্যন্তমহর্যদ্ ব্রহ্মণো বিদুঃ।
রাত্রিং যুগসহস্রান্তাং তেঽহোরাত্রবিদো জনাঃ॥ ১৭॥

## শাঙ্করভাষ্যম্।

ব্রহ্মলোকসহিতা লোকাঃ কস্মাৎ পুনরাবর্ত্তিনঃ কালপরিচ্ছিন্নত্বাৎ, কথং সহস্রেতি। সহস্রযুগপর্য্যন্তং সহস্রাণি যুগানি পর্য্যন্তং পর্য্যবসানং যস্যাহ্নস্তদহঃ সহস্রযুগপর্যন্তং ব্রহ্মণঃ প্রজাপতেঃ বিরাজো বিদুঃ রাত্রিমপি যুগসহস্রামহঃপরিমাণামেব, কে বিদুরিত্যাহ তেঽহোরাত্রবিদঃ কালসংখ্যাবিদো জনা ইত্যর্থঃ॥ ১৭॥

যত এবং কালপরিচ্ছিন্নাস্তেঽতঃ পুনরাবর্ত্তিনো লোকাঃ, প্রজাপতেরহনি যদ্ভবতি রাত্রৌ চ তদুচ্যতে অব্যক্তেতি। অব্যক্তাদব্যক্তং প্রজাপতেঃ স্বাপাবস্থা তস্মাদব্যক্তাৎ ব্যক্তয়ো

## গিরিকৃত টীকা।

যস্য স্বাভাবিকী বংশপ্রযুক্তা চ শুদ্ধিস্তস্যৈবোক্তেঽর্থে বুদ্ধিরুদেতীতি মত্বা সম্বুদ্ধিদ্বয়ং। ব্রহ্মলোকসহিতানাং পুনরাবৃত্তৌ হেতুং প্রশ্নদ্বারা দর্শয়তি ব্রহ্মেতি। উক্তমেব হেতুমাকাঙ্ক্ষাপূর্ব্বকমুত্তরশ্লোকেন সাধয়তি কথমিত্যাদিনা। যথোক্তাহোরাত্রাবয়বমাসর্ত্ত্বয়নসম্বৎসরাবয়বশতসংখ্যায়ুরবচ্ছিন্নত্বাৎ প্রজাপতেস্তদন্তর্ব্বর্ত্তিনামপি লোকানাং যথাযোগ্যকালপরিচ্ছিন্নত্বেন পুনরাবৃত্তিরিত্যভিপ্রেত্য ব্যাচষ্টে সহস্রেত্যাদিনা॥ ১৭॥

অক্ষরার্থমুক্ত্বা তাৎপর্য্যার্থমাহ যত ইতি। যৎ প্রজাপতেরহস্তদ্যুগসহস্রপরিমিতং যা তস্য রাত্রিঃ সাপি তথেতি কালবিদামভিপ্রায়মনূস্যত্য ব্রাহ্ম্যস্যাহোরাত্রস্য কালপরিমাণং

## স্বামিকৃত টীকা।

নিশি নিশি চ প্রলয়ো ভবতীতি দর্শয়িষ্যন্ ব্রহ্মণোঽহোরাত্রযোঃ প্রমাণমাহ সহস্রেতি। সহস্রং যুগানি পর্য্যন্তোঽবসানং যস্য তদ্ব্রহ্মণো যদহস্তদ্যে বিদুঃ যুগসহস্রমন্তো যস্যাস্তাং রাত্রিঞ্চ যোগবলেন যে বিদুস্তএব সর্ব্বজ্ঞা জনা অহোরাত্রবিদঃ যেষান্তু কেবল চন্দ্রাদিত্যগত্যৈব জ্ঞানং তে তথাহোরাত্রবিদো ন ভবন্তি অল্পদর্শিত্বাৎ,যুগশব্দেনাত্র চতুর্যুগমভিপ্রেতং চতুর্যুগসহস্রন্তু ব্রহ্মণো দিনমুচ্যত ইতিবিষ্ণুপুরাণোক্তেঃ, ব্রহ্মণ ইতি চ মহর্লোকাদিবাসিনামুপলক্ষণার্থং। তত্রায়ং কালগণনাপ্রকারঃ, মনুষ্যাণাং যদ্বর্ষং তদ্দেবানামহোরাত্রং তাদৃশৈরহোরাত্রৈঃ পক্ষমাসাদিকল্পনয়া দ্বাদশভির্ব্বর্ষসহস্রৈশ্চতুর্যুগং ভবতি, চতুর্যুগসহস্রন্তু ব্রহ্মণো দিনং তাবৎপ্রমাণৈব রাত্রিস্তাদৃশৈশ্চাহোরাত্রৈঃ পক্ষমাসাদিক্রমেণ বর্ষশতং ব্রহ্মণঃ পরমায়ুরিতি॥ ১৭॥

ততঃ কিমত্যাহ অব্যক্তাদিত্যাদি। কার্য্যস্তব্যক্তরূপং কারণাত্মকং তস্মাদব্যক্তাৎ কারণরূপাৎ ব্যজ্যন্ত ইতি ব্যক্তয়শ্চরাচরাণি ভূতানি প্রাদুর্ভবন্তি, কদা, অহরাগমে ব্রহ্মণো

অব্যক্তাদ্ ব্যক্তয়ঃ সর্ব্বাঃ প্রভবন্ত্যহরাগমে।
রাত্র্যাগমে প্রলীয়ন্তে তত্রৈবাব্যক্তসংজ্ঞকে ॥ ১৮ ॥
ভূতগ্রামঃ স এবায়ং ভূত্বা ভূত্বা প্রলীয়তে।
রাত্র্যাগমেঽবশঃ পার্থ প্রভবত্যহরাগমে ॥ ১৯ ॥

## শাঙ্করভাষ্যম্।

ব্যক্ত্যন্ত ইতি ব্যক্তয়ঃ স্থাবরজঙ্গমলক্ষণাঃ সর্ব্বাঃ প্রজাঃ প্রভবন্ত্যভিব্যজ্যন্তে অহ্ন আগমোঽহরাগমস্তস্মিন্নহরাগমে কালে ব্রহ্মণঃ প্রবোধকালে তথা রাত্র্যাগমে ব্রহ্মণঃ স্বাপকালে প্রলীয়ন্তে সর্ব্বা ব্যক্তয়স্তত্রৈব পূর্ব্বোক্তেঽব্যক্তসংজ্ঞকে ॥ ১৮ ॥

অকৃতাভ্যাগমকৃতবিপ্রণাশদোষপরিহারার্থং বন্ধমোক্ষশাস্ত্রপ্রবৃত্তিসাফল্যপ্রদর্শনার্থং অবিদ্যাদিক্লেশমূলকর্ম্মাশয়বশাচ্চাবশো ভূতগ্রামো ভূত্বা প্রলীয়ত ইত্যতঃ সংসারে বৈরাগ্য প্রদর্শনার্থঞ্চেদমাহ ভূতগ্রাম ইতি। ভূতগ্রামো ভূতসমুদয়ঃ স্থাবরজঙ্গমলক্ষণো যঃ পূর্ব্বস্মিন্ কল্পে আসীৎ সএবায়ং নান্যো ভূত্বা ভূত্বা পুনঃ পুনঃ অহরাগমে প্রলীয়তে পুনঃ রাত্র্যাগমেঽহঃক্ষয়েঽবশোঽস্বতন্ত্র এব পার্থ প্রভবতি জায়তে সএব অহরাগমে॥ ১৯ ॥

## গিরিকৃত টীকা।

দর্শয়িত্বা তত্রৈব বিভজ্য কার্য্যং কথয়তি প্রজাপভেরিতি। অব্যক্তমব্যাকৃতমিতিশঙ্কাং বারয়তি অব্যক্তমিত্যাদিনা। জাতিপ্রতিযোগভূতা ব্যক্তীর্ব্যাবর্ত্তয়তি স্থাবরেতি। অসদুৎপত্তিপ্রসক্তিং প্রত্যাদিশতি অভিব্যজ্যন্তইতি। পূর্ব্বোক্তমব্যক্তসংজ্ঞকং স্বাপাবস্থং ব্রহ্ম প্রজাপতিশব্দিতং তস্মিন্নিতি যাবৎ ॥ ১৮ ॥

নন্থ প্রবোধকালে ব্রহ্মণো যো ভূতগ্রামো ভূত্বা তস্যৈব স্বাপকালে বিলীয়তে তস্মাদন্যো ভূয়োভূয়ো ব্রহ্মণোঽহরাগমে ভূত্বা পুনারাত্র্যাগমে পরবশো বিনশ্যতি তদেবং প্রত্যবান্তরকল্পং ভূতগ্রামবিভাগো ভবেদিত্যাশঙ্ক্যানন্তরশ্লোকতাৎপর্য্যমাহ অকৃতেতি। প্রতিকল্পং প্রাণিনিকায়স্য ভিন্নত্বে সতি অকৃতাভ্যাগমাদিদোষপ্রসঙ্গাত্তৎপরিহারার্থং ভূতগ্রামস্য প্রতি-

## স্বামিকৃত টীকা।

দিবসস্যোপক্রমে, তথা রাত্রেরাগমে ব্রহ্মশয়নে তস্মিন্নেবাব্যক্তসংজ্ঞকে কারণরূপে প্রলয়ং যান্তি। যদ্বা তেঽহোরাত্রবিদ ইত্যেতন্ন বিধীয়তে কিন্তু তে প্রসিদ্ধা অহোরাত্রবিদো জনা ব্রহ্মণো যদহর্ব্বিদুস্তস্যাহ আগমেঽব্যক্তাদ্ব্যক্তয়ঃ প্রভবন্তি যাঞ্চ রাত্রিং বিদুস্তস্যা রাত্রেরাগমে প্রলীয়ন্তইতি দ্বয়োরন্বয়ঃ ॥ ১৮ ॥

তত্র চ কৃতনাশাকৃতাভ্যাগমশঙ্কাং বারয়ন্ বৈরাগ্যার্থং সৃষ্টিপ্রবাহস্যাবিচ্ছেদং দর্শয়তি ভূতগ্রামইতি। ভূতানাং চরাচরপ্রাণিনাং গ্রামঃ সমূহো যঃ প্রাগাসীৎ স এবায়মহরা-

পরস্তস্মাত্তু ভাবোঽন্যোঽব্যক্তোঽব্যক্তাৎ সনাতনঃ।
যঃ স সর্ব্বেষু ভূতেষু নশ্যৎসু ন বিনশ্যতি ॥ ২০ ॥

## শাঙ্করভাষ্যম্।

যদুপন্যস্তমক্ষরং তস্য প্রাপ্ত্যুপায়ো নির্দ্দিষ্ট ওমিত্যেকাক্ষরং ব্রহ্মেত্যাদিনাথেদানীমক্ষরস্যৈব স্বরূপনিদিদিক্ষয়েদমুচ্যতে পর ইতি, অনেন যোগমার্গেণেদং গন্তব্যমিতি। পরস্তস্মাদিতি পরো ব্যতিরিক্তো ভিন্নঃ কুতস্তস্মাৎ পূর্ব্বোক্তাদব্যক্তাৎ তু শব্দোঽব্যক্তাক্ষরস্য বিবক্ষিতস্য বক্তাদ্বৈলক্ষণ্যবিশেষণার্থঃ, ভাবোঽক্ষরাখ্যঃ পরং ব্রহ্ম, ব্যতিরিক্তত্বে সত্যপি সালক্ষণ্যপ্রসঙ্গোঽস্তীতি তদ্বিনিবৃত্ত্যর্থমাহ অন্য ইতি অন্যো বিলক্ষণঃ সচাব্যক্তোঽনিন্দ্রিয়গোচরঃ, পরস্তস্মাদিত্যুক্তং কস্মাৎ পুনঃ পরঃ পূর্ব্বোক্তাদ্ভূতগ্রামবীজভূতাদবিদ্যালক্ষণাদব্যক্তাদন্যো বিলক্ষণো ভাব ইত্যভিপ্রায়ঃ, সনাতনশ্চিরন্তনো যঃ স ভাব সর্ব্বেষু ভূতেষু ব্রহ্মাদিষু নশ্যৎসু ন বিনশ্যতি ॥ ২০ ॥

## গিরিকৃত টীকা।

কল্পমৈক্যমাস্থেয়মিত্যর্থঃ যদি স্থাবরজঙ্গমলক্ষণপ্রাণিনিকায়স্য প্রতিকল্পমন্যথাত্বং তদেকস্য বন্ধমোক্ষান্বয়িনোঽভাবাৎ কাণ্ডদ্বয়াত্মনো বন্ধমোক্ষার্থস্য শাস্ত্রস্য প্রবৃত্তিরফলা প্রসজ্যেত অতস্তৎসাফল্যার্থমপি প্রতিকল্পং প্রাণিবর্গস্য নবীনত্বানুপপত্তিরিত্যাহ বন্ধেতি। কথং পুনর্ভূতসমুদায়োঽস্বতন্ত্রঃ সন্নবশো ভূত্বা ভূত্বা প্রবিলীয়তে তত্রাহ অবিদ্যাদীতি। আদিশব্দেনাস্মিতারাগদ্বেষাভিনিবেশা গৃহ্যন্তে, যথোক্তং ক্লেশপঞ্চকং মূলং প্রতিলভ্য কল্পং প্রতিলভ্য ধর্ম্মাধর্ম্মাত্মককর্ম্মরাশিরুদ্ভবতি তদ্বশাদেবাস্বতন্ত্রো ভূতসমুদায়ো জন্মবিনাশাবনুভবতীত্যর্থঃ। প্রাণিনিকায়স্য জন্মনাশাভ্যাসোক্তেরর্থসিদ্ধমর্থমাহ ইত্যতইতি। সংসারে বিপরিবর্ত্তমানানাং প্রাণিনামস্বাতন্ত্র্যাদবশানামেব জন্মমরণপ্রবন্ধসম্বন্ধাৎ অলমনেন সংসারেণেতি বৈতৃষ্ণ্যং তস্মিন্ প্রদর্শনীয়ং তদর্থঞ্চেদমুক্তানামহোরাত্রমাবৃত্তিবচনমিত্যর্থঃ, সমনন্তরবাক্যমিদমাপরামৃশ্যতে। রাত্র্যাগমে লয়মনুভবতোঽহরাগমে চ প্রভবং প্রতিপদ্যমানস্য প্রাণিবর্গস্য তুল্যং পারবশ্যমিত্যাশয়বানাহ অহ্ন ইতি ॥ ১৯ ॥

অক্ষরং ব্রহ্ম পরমমিত্যুপক্রম্য তদনুপযুক্তং কিমিদমন্তরুক্তমিত্যাশঙ্ক্য বৃত্তমনূদ্যানন্তরপ্রশ্নসঙ্গতিমাহ যদুপন্যস্তমিতি। অক্ষরস্বরূপে নির্দিদিক্ষিতে তস্মিন্ পূর্ব্বোক্তযোগমার্গস্য

## স্বামিকৃত টীকা।

গমে ভূত্বা ভূত্বা রাত্রেরাগমে প্রলীয়তে প্রলীয় প্রলীয় পুনরপ্যহরাগমেঽবশঃ কর্ম্মাদিপরতন্ত্রঃ সন্ প্রভবতি নান্য ইত্যর্থ ॥ ১৯ ॥

লোকানামনিত্যত্বং প্রপঞ্চ্য পরমেশ্বরস্বরূপস্য নিত্যত্বং প্রপঞ্চয়তি পর ইতি দ্বাভ্যাং। তস্মাচ্চরাচরকারণভূতাদব্যক্তাৎ পরস্তস্যাপি কারণভূতো যোঽন্যস্তদ্বিলক্ষণোঽব্যক্তশ্চক্ষুরা-

অব্যক্তোঽক্ষর ইত্যুক্তস্তমাহুঃ পরমাং গতিম্।
যং প্রাপ্য ন নিবর্ত্তন্তে তদ্ধাম পরমং মম ॥ ২১ ॥

## শাঙ্করভাষ্যম্।

অব্যক্তইতি। যোসাববব্যক্তোঽক্ষবইত্যুক্তস্তমেবাক্ষবসংজ্ঞকমব্যক্তং ভাবং আহুঃ পবমাং প্রকৃষ্টাং গতিং যং ভাবং প্রাপ্য গত্বা ন নির্বর্ত্তন্তে সংসারায় তদ্ধাসস্থানং পরমং প্রকৃষ্টং মম বিষ্ণোঃ পরমং পদমিত্যর্থঃ ॥ ২১ ॥

## গিরিকৃত টীকা।

কথমুপযোগঃ স্যাদিত্যাশঙ্ক্য তৎপ্রাপ্ত্যুপায়ত্বেনেত্যাহ অনেনেতি। গন্তব্যমিতি যোগমার্গোক্তিরপযুক্তেতি শেষঃ পূর্ব্বোক্তাদব্যক্তাদিতি সম্বন্ধঃ। পরশব্দস্য ব্যতিবিক্তবিষযত্বে তুশব্দেন বৈলক্ষণ্যমুক্ত্বা পুনবন্যশব্দপ্রয়োগাৎ পৌনরুক্তমিত্যাশঙ্ক্যাহ ব্যতিবিক্তত্ব ইতি। তুনা দ্যোতিতং বৈলক্ষণ্যমন্যশব্দেন প্রকটিতং, যতো ভিন্নেষপি ভাবভেদেষু সালক্ষণ্যমালক্ষ্যতে ততশ্চাব্যক্তাদ্ভিন্নত্বেঽপি ব্রহ্মণস্তেন সাদৃশ্যমাশঙ্কতে তন্নিবৃত্ত্যর্থমন্যপদমিত্যর্থঃ, যদ্বা পদশব্দস্য প্রকৃষ্টবাচিনো ভাববিশেষণার্থত্বে পুনরুক্তিশঙ্কৈব নাস্তীতি দ্রষ্টব্যং, অনাদিভাবস্যাক্ষরস্যাবিনাশিত্বমর্থসিদ্ধং সমর্থযতে যঃ স ভাবইতি। সর্ব্বং হি বিনশ্যদ্বিকারজাতং পুরুষান্তং বিনশ্যতি স তু বিনাশহেত্বভাবান্ন বিনষ্টুমর্হতীত্যর্থঃ ॥ ২০ ॥

যথোক্তেঽব্যক্তে ভাবে শ্রুতিসম্মতিমাহ অব্যক্তইতি। তস্য পরমগতিত্বং সাধয়তি যং প্রাপ্যেতি। যোঽসাবব্যক্তো ভাবোঽত্র দর্শিতঃ স যেনাক্ষরং পুরুষং বেদ সত্যমিত্যাদিশ্রুতাবক্ষর ইত্যুক্তঃ তমেবাক্ষবং ভাবং পরমাং গতিং পুরুষান্ন পরং কিঞ্চিৎ সা কাষ্ঠা পরা গতিবিত্যাদ্যাঃ শ্রুতয়ো বদন্তীত্যাহ যোঽসাবিতি। পরমপুরুষস্য পরমগতিত্বমুক্তং ব্যনক্তি যং ভাবমিতি। তদ্বিষ্ণোঃ পরমং পদমিতি শ্রুতিমত্র সম্বাদয়তি তদ্ধামেতি ॥ ২১ ॥

নন্বু বক্তাদতিরিক্তস্য তদ্বিলক্ষণস্য পরমপুরুষস্য প্রাপ্তৌ কশ্চিদসাধাবণো হেতুরেষিতব্যো যস্মিন্ প্রেক্ষাপূর্ব্বকারী তৎপ্রেক্ষয়া প্রবৃত্তো নিবৃ ণোতি তত্রাহ তল্লক্ষেরিতি। পরস্য

## স্বামিকৃত টীকা।

দ্যগোচরো ভাবঃ সনাতনোঽনাদিঃ স তু সর্ব্বেষু কার্য্যকারণলক্ষণেষু ভূতেষু নশ্যৎস্বপি ন বিনশ্যতি ॥ ২০ ॥

অবিনাশে প্রমাণং দর্শয়ন্নাহ অব্যক্ত ইতি। যো ভাবোঽব্যক্তোঽতীন্দ্রিয়ঃ অক্ষরঃ প্রবেশনাশশূন্য ইতি তথা অক্ষরাৎ সম্ভবন্তীহ বিশ্বমিত্যাদিশ্রুতিষক্ষর ইত্যুক্ত, তং পরমাং গতিং গম্যং পুরুষার্থমাহুঃ পুরুষান্ন পরং কিঞ্চিৎ সা কাষ্ঠা সা পরা গতিরিত্যাদিশ্রুতয়ঃ পরমগতিত্বমেবাহ যং প্রাপ্য ন পুনর্নিবর্ত্তন্ত ইতি। তচ্চ মমৈব ধাম স্বরূপং, মমেত্যুপচারে ষষ্ঠী রাহোঃ শির ইতিবৎ, অতোঽহমেব পরমা গতিরিত্যর্থঃ ॥ ২১ ॥

পুরুষঃ স পরঃ পার্থ ভক্ত্যা লভ্যস্ত্বনন্যয়া।
যস্যান্তঃস্থানি ভূতানি যেন সর্ব্বমিদং ততম্ ॥ ২২ ॥

## শাঙ্করভাষ্যম্

তল্লব্ধেরুপায় উচ্যতে পুরুষইতি। পুরুষঃ পুরি শয়নাৎ পূর্ণত্বাদ্বা স পরঃ পার্থ পরো নির-তিশয়ো যস্মাৎ পুরুষান্ন পরং কিঞ্চিৎ স ভক্ত্যা লভ্যস্তু জ্ঞানলক্ষণয়ানন্যযা আত্মবিষয়য়া যস্য পুরুষস্যান্তঃস্থানি মধ্যস্থানি কার্য্যভূতানি কার্য্যং হি কারণস্যান্তর্ব্বর্ত্তি ভবতি যেন পুরুষেণ সর্ব্বমিদং জগত্ততং ব্যাপ্তং আকাশেনেব ঘটাদি ॥ ২২ ॥

প্রকৃতানাং যোগিনাং প্রণবাবেশিতব্রহ্মবুদ্ধীনাং কালান্তরমুক্তিভাজাং তদ্ব্রহ্মপ্রতি-পত্তয়ে উত্তরো মার্গো বক্তব্য ইতি যত্র কাল ইত্যাদিবিবক্ষিতার্থসমর্পণার্থমুচ্যতে আবৃত্তি-মার্গোপন্যাস ইতরমার্গস্তুত্যর্থঃ যত্রেতি। যত্রকালে প্রযাতা ইতি ব্যবহিতেন সম্বন্ধঃ যত্র যস্মিন্ কালে ত্বনাবৃত্তিমপুনর্জন্ম আবৃত্তিং তদ্বিপরীতাঞ্চৈব যোগিন ইতি কর্ম্মিণশ্চোচ্যন্তে কর্ম্মিণস্তু গুণতঃ কর্ম্মযোগেন যোগিনামিতি বিশেষণাৎ তত্র বিভজ্যন্তে যোগিনঃ, যত্র

## গিরিকৃত টীকা।

পুরুষস্য সর্ব্বকারণত্বং সর্ব্বব্যাপকত্বঞ্চ বিশেষণদ্বয়মুদাহরতি যস্যেতি। নিরতিশয়ত্বং বিশ-দয়তি যস্মাদিতি। তুশব্দোঽবধারণার্থঃ, ভক্তির্ভজনং। সেবাপ্রদক্ষিণপ্রণামাদিলক্ষণাত্তাং ব্যাবর্ত্তয়তি জ্ঞানেতি। উক্তায়া ভক্তের্বিষয়তো বৈশিষ্ট্যমাহ অনন্যযেতি। কোঽসৌ পুরু-ষো যদ্বিষয়া ভক্তিস্তৎপ্রাপ্তৌ পর্য্যাপ্তেত্যাশঙ্ক্যোত্তরার্দ্ধং ব্যাচষ্টে যস্যেতি। কথম্ভূতানাং তদন্তস্থত্বং তত্রাহ কার্য্যং হীতি। স পর্য্যগাদিতি শ্রুতিমাশ্রিত্যাহ যেনেতি ॥ ২২ ॥

ননু জ্ঞানায়ত্তা পরমপুরুষপ্রাপ্তিরুক্তা ন চ জ্ঞানং মার্গমপেক্ষ্য ফলায় কল্পতে বিদুষো গত্যু-ৎক্রান্তিনিষেধশ্রুতেঃ তথাচ মার্গোক্তিরযুক্তেত্যাশঙ্ক্য সগুণশরণানাং তদুপদেশোঽর্থবানি-ত্যভিপ্রেত্যাহ প্রকৃতানামিতি। বক্তব্যইতি যত্রকাল ইত্যাদ্যুচ্যতে ইতি সম্বন্ধঃ। স চেদ্ব-ক্তব্যস্তর্হি কিমিত্যধ্যাত্মাদিভাবেন সবিশেষং ব্রহ্ম ধ্যায়তাং ফলাপ্তয়ে মূর্দ্ধন্যনাড়ীসম্বন্ধে দেবযানে পথি উপাস্যত্বায় বক্তব্যে কালো নির্দিশ্যতে তত্রাহ বিবক্ষিতেতি। সোঽর্থো

## স্বামিকৃত টীকা।

তৎপ্রাপ্তৌ চ ভক্তিরন্তরঙ্গোপায ইত্যুক্তমেবেত্যাহ পুরুষ ইতি। স চাহং পরঃ পুরুষোঽ-নন্যয়া ন বিদ্যতেঽন্যঃ শরণত্বেন যস্যাস্তয়া একান্তভক্ত্যৈব লভ্যো নান্যথা, পরত্বমেবাহ যস্য কারণভূতস্যান্তর্মধ্যে ভূতানি স্থিতানি যেন চ কারণভূতেনেদং সর্ব্বং জগত্ততং ব্যাপ্তং ॥ ২২ ॥

তদেবং পরমেশ্বরোপাসকাস্তৎপদং প্রাপ্য ন নিবর্ত্তন্তে অন্যে ত্বাবর্ত্তন্ত ইত্যুক্তং তত্র কেন মার্গেণ গতা নাবর্ত্তন্তে কেন বাবর্ত্তন্ত ইত্যপেক্ষায়ামাহ যত্রেতি। যত্র যস্মিন্ কালে

যত্র কালে ত্বনাবৃত্তিমাবৃত্তিঞ্চৈব যোগিনঃ।
প্রয়াতা যান্তি তং কালং বক্ষ্যামি ভরতর্ষভ ॥ ২৩ ॥

## শাঙ্করভাষ্যম্।

কালে প্রয়াতা মৃতা যোগিনোঽনাবৃত্তিং যান্তি কালে চ প্রয়াতা মৃতা আবৃত্তিং যান্তি তং কালং বক্ষ্যামি ভরতর্ষভ ॥ ২৩ ॥

তং কালমাহ অগ্নির্জ্যোতিরিতি। অগ্নিঃ কালাভিমানিনী দেবতা তথা জ্যোতির্দে-বতৈব কালাভিমানিনী অথবা অগ্নিজ্যোতিষী যথাশ্রুতে এব দেবতে ভূয়সাস্তু নির্দ্দেশো-

## গিরিকৃত টীকা।

মার্গস্তত্ত্বক্তিশেষত্বেন কালোক্তিরিত্যর্থঃ। পিতৃযানমার্গোপন্যাসস্তর্হি কিমিতি ক্রিয়তে তত্রাহ আবৃত্তিমিতি। মার্গান্তরস্যাবৃত্তিফলত্বাদস্য চানাবৃত্তিফলত্বাত্তদপেক্ষয়া মহীয়ান্ ত্বমিতি স্তুতির্বিবক্ষিতেতি ভাবঃ যোগিনইতি ধ্যায়িনাং কর্ম্মিণাঞ্চ তন্ত্রেণাভিধানমিত্যাহ যোগিনইতি। কথং কর্ম্মিষু যোগিশব্দো বর্ত্ততামিত্যাশঙ্ক্যানুষ্ঠানগুণযোগাদিত্যাহ কর্ম্মিণ-স্বিতি। গুণতো যোগিন ইতি সম্বন্ধঃ। তত্রৈব বাক্যোপক্রমস্যানুকূল্যমাহ কর্ম্মযোগেনেতি। অবশিষ্টান্যক্ষরাণি ব্যাচক্ষাণো বাক্যার্থমাহ যত্রেতি। যোগিনো ধ্যায়িনোঽত্র বিবক্ষিতাঃ যে আবৃত্তাবধিকৃতা যোগিনঃ কর্ম্মিণইতি বিভাগঃ কালপ্রাধান্যেন মার্গদ্বযোপন্যাসমুপক্রম্য তমেব প্রধানীকৃত্য দেবযানং পন্থানমবতারয়তি তং কালমিতি ॥ ২৩ ॥
যথোপক্রমং ব্যাখ্যায় যথাশ্রুতং ব্যাখ্যাতি অথবেতি। কথং তর্হি দেবতানামভিনেত্রীণাং গ্রহণে কালপ্রাধান্যেন নির্দ্দেশঃ ক্রিয়তে তত্রাহ ভূয়সাস্ত্বিতি। মার্গদ্বয়েঽপিকালাদ্যভিমা-

## স্বামিকৃত টীকা।

প্রয়াতা যোগিনোঽনাবৃত্তিং যান্তি যস্মিংশ্চ কালে প্রয়াতা আবৃত্তিং যান্তি তং কালং বক্ষ্যামী-ত্যন্বয়ঃ, অত্র চ'রশ্ম্যনুসারী' 'অতশ্চায়নেঽপি দক্ষিণ'ইতি সূত্রিতন্যায়েোত্তরায়ণাদিকালবিশে-ষমরণস্য ত্ববিবক্ষিতত্বাৎ কালশব্দেন কালাভিমানিনীভিরাতিবাহিকীভির্দেবতাভিঃ প্রাপ্যো মার্গ উপলক্ষ্যতে, অতোঽয়মর্থঃ যস্মিন্ কালাভিমানিদেবতোপলক্ষিতে মার্গে প্রয়াতা যোগিন উপাসকাঃ কর্ম্মিণশ্চ যথাক্রমমনাবৃত্তিমাবৃত্তিঞ্চ যান্তি তং কালাভিমানিদেবতো-পলক্ষিতং মার্গং কথয়িষ্যামীতি, অগ্নিজ্যোতিষোঃ কালাভিমানিত্বাভাবেঽপি ভূয়সামহরা-দিশব্দোক্তানাং কালাভিমানিনাং সাহচর্য্যাদাম্রবনমিত্যাদিবৎ কালশব্দেনোপলক্ষণমবি-রুদ্ধং ॥ ২৩ ॥

তত্রানাবৃত্তিমার্গমাহ অগ্নিরিতি। অগ্নিজ্যোতিঃশব্দাভ্যাং তেঽর্চ্চিষমভিসম্ভবন্তীতি-শ্রুত্যুক্তার্চ্চিরভিমানিনী দেবতোপলক্ষ্যতে, অহরিতি দিবসাভিমানিনী, শুক্লইতি শুক্লপক্ষা-ভিমানিনী, উত্তরায়ণরূপাঃ ষণ্মাসা ইত্যুত্তরায়ণাভিমানিনী, এতচ্চান্যাসামপি শ্রুত্যুক্তানাং

অগ্নির্জ্যোতিরহঃ শুক্লঃ ষণ্মাসা উত্তরায়ণম্।
তত্র প্রয়াতা গচ্ছন্তি ব্রহ্ম ব্রহ্মবিদো জনাঃ॥ ২৪॥

## শাঙ্করভাষ্যম্।

যত্রকালে তং কালমিতি আত্রবনবৎ, তথাহর্দেবতাহরভিমানিনী শুক্লঃ শুক্লপক্ষদেবতা তথা ষণ্মাসা উত্তরায়ণং তত্রাপি দেবতৈব মার্গভূতেতি স্থিতোঽন্যত্র ন্যায়স্তত্র তস্মিন্ মার্গে প্রয়াতা মৃতা গচ্ছন্তি ব্রহ্ম ব্রহ্মবিদো ব্রহ্মোপাসকাঃ ব্রহ্মোপাসনপরা জনাঃ ক্রমেণেতি বাক্যশেষো ন হি সদ্যোমুক্তিভাজাং সম্যগ্দর্শননিষ্ঠানাং গতিরাগতির্বা কচিদস্তি ন তস্য প্রাণা উৎক্রামন্তীতি শ্রুতেঃ ব্রহ্মসংলীনপ্রাণাএব তে ব্রহ্মময়া ব্রহ্মভূতাএব তে॥ ২৪॥

## গিরিকৃত টীকা।

নিম্নো দেবতাঃ কালশব্দেনেনোচ্যন্তে কালাভিমানিনীনাং ভূয়স্ত্বাৎ কালশব্দেন সর্ব্বাসাং দেবতানামুপলক্ষণত্বং বিবক্ষিত্বা কালকথনমিত্যর্থঃ যথাত্রাণাং ভূয়স্ত্বাদ্বিদ্যমানেষ্বপি ক্রমান্তরেষু আত্রৈরেব বনং নির্দ্দিশ্যতে তদ্বদিত্যুদাহরণমাহ আম্রেতি। নন্থ মার্গচিহ্নানাং ভোগভূমীনাং বা তত্তচ্ছব্দৈরুপাদানসম্ভবে কিমিতি দেবতাগ্রহণমিত্যাশঙ্ক্যাতিবাহিকা-স্তল্লিঙ্গাদিতি ন্যায়েনোত্তরমাহ ইতি স্থিতইতি। তেষাং অগ্ন্যাদীনাং সমীপমিতি সামীপ্যে তত্রেতি সপ্তমী, ব্রহ্মকার্য্যোপাধিকং পরং বা ব্রহ্ম পরম্পরয়া মুক্ত্যালম্বনমতএব ক্রমেণেত্যুক্তং, নির্গুণমপ্রপঞ্চং ব্রহ্মাস্মীতি বিদ্যাবতো ব্যবচ্ছিনত্তি ব্রহ্মোপাসনেতি নন্থ ব্রহ্মশব্দস্য মুখ্যার্থত্বার্থং পবব্রহ্মবিদামেবেয়ং গতিরুচ্যতে ন বাদর্য্যধিকরণবিরোধাদিত্যাহ ন হীতি॥ ২৪॥

## স্বামিকৃত টীকা।

সম্বৎসবদেবলোকাদিদেবতানামুপলক্ষণার্থং, এবংভূতো যো মার্গস্তত্র প্রয়াতা গতা ভগবদু-পাসকজনা ব্রহ্ম প্রাপ্নুবন্তি যতস্তেব্রহ্মবিদঃ'তথাচ শ্রুতিঃ তেঽর্চিষমভিসম্ভবন্তি অর্চি-ষোঽহরহ্ন আপূর্য্যমাণপক্ষমাপূর্য্যমাণপক্ষাদ্ যান্ ষণ্মাসানুদঙাদিত্য এতি মাসেভ্যো দেব-লোকমিতি॥ ২৪॥

আবৃত্তিমার্গমাহ ধূমইতি। ধূমাভিমানিনী দেবতা রাত্র্যাদিশব্দৈশ্চ পূর্ব্ববদেব রাত্রি-কৃষ্ণপক্ষদক্ষিণায়নরূপষণ্মাসাভিমানিন্যস্তিস্রো দেবতা উপলক্ষ্যন্তে, এতাভিরুপলক্ষিতো যোমার্গস্তত্র প্রয়াতঃ কর্ম্মযোগী চান্দ্রমাসং জ্যোতিস্তদুপলক্ষিতং স্বর্গলোকং প্রাপ্য তত্রেষ্টা-পূর্ত্তকর্ম্মফলং ভুক্ত্বা পুনরাবর্ত্ততে, তত্রাপি শ্রুতিঃ তে ধূমমভিসম্ভবন্তি ধূমাদ্রাত্রিং রাত্রের-পক্ষীয়মাণপক্ষমপক্ষীয়মাণপক্ষাদ্যান্ ষণ্মাসান্ দক্ষিণাদিত্যএতি মাসেভ্যঃ পিতৃলোকং পিতৃ-লোকাৎ চন্দ্রং তে চন্দ্রং প্রাপ্যান্নং ভবন্তীত্যাদি, তদেবং নিবৃত্তিকর্ম্মসহিতোপাসনয়া ক্রম-

ধূমো রাত্রিস্তথা কৃষ্ণঃ ষণ্মাসা দক্ষিণায়নম্।
তত্র চান্দ্রমসং জ্যোতির্যোগী প্রাপ্য নিবর্ত্ততে ॥ ২৫ ॥
শুক্লকৃষ্ণে গতী হ্যেতে জগতঃ শাশ্বতে মতে।
একয়া যাত্যনাবৃত্তিমন্যয়াবর্ত্ততে পুনঃ ॥ ২৬ ॥

## শাঙ্করভাষ্যম্।

ধূমইতি। ধূমো রাত্রিঃ ধূমাভিমানিনী রাত্র্যভিমানিনী চ দেবতা তথা কৃষ্ণঃ কৃষ্ণপক্ষদেবতা ষণ্মাসা দক্ষিণায়নমিতি চ পূর্ব্ববদ্দেবতৈব তত্র চন্দ্রমসি ভবং চান্দ্রমসং জ্যোতিস্তৎফলং ইষ্টাদিকারী যোগী কর্ম্মী প্রাপ্য ভুক্ত্বা তৎক্ষয়াদিহ নিবর্ত্ততে পুনঃ ॥ ২৫ ॥

শুক্লেতি। শুক্লকৃষ্ণে শুক্লা চ কৃষ্ণা চ শুক্লকৃষ্ণে জ্ঞানপ্রকাশকত্বাৎ শুক্লা তদভাবাৎ কৃষ্ণা এতে শুক্লকৃষ্ণে হি গতী জগত ইত্যধিকৃতানাং জ্ঞানকর্ম্মণো ন জগতঃ সর্ব্বস্যৈবৈতে গতী সম্ভবতঃ শাশ্বতে নিত্যে সংসারস্য নিত্যত্বান্নিত্যে মতেঽভিপ্রেতে তত্রৈকয়া শুক্লয়া যাত্যনাবৃত্তিমাবৃত্তিমন্যয়েতরয়াবর্ত্ততে পুনঃ ভূয়ঃ ॥ ২৬ ॥

## গিরিকৃত টীকা।

প্রকৃতং দেবযানং পন্থানং স্তোতুং পিতৃযানমুপন্যস্যতি ধূমইতি। অত্রাপিমার্গচিহ্নানি ভোগভূমীশ্চ ব্যবচ্ছিদ্য আতিবাহিকদেবতাবিষয়ত্বং ধূমাদিপদানাং বিভজতে ধূমেত্যাদিনা। তত্রেতি সপ্তমী পূর্ব্ববদেব সামীপ্যার্থা, ইষ্টাদীত্যাদিশব্দেন পূর্ত্তদত্তে গৃহ্যেতে। কৃতাত্যয়েঽনুশয়বানিতি ন্যায়ং সূচয়তি তৎক্ষয়াদিতি। আরোহাবরোহয়োরভ্যাসবাচিনা পুনঃশব্দেন সংসারস্যানাদিত্বং সূচ্যতে ॥ ২৫ ॥

রাত্র্যাদৌ মৃতানাং ব্রহ্মবিদামব্রহ্মপ্রাপ্তিশঙ্কানিবৃত্ত্যর্থমভিমানিনীদেবতাগ্রহণায় মার্গয়োর্নিত্যত্বমাহ শুক্লেতি। জ্ঞানপ্রকাশকত্বাদ্বিদ্যাপ্রাপ্যত্বাদর্চিরাদিপ্রকাশোপলক্ষিতত্বাচ্চ শুক্লা দেবযানাখ্যা গতিস্তদভাবাজ্জ্ঞানপ্রকাশকত্বাভাবাৎ ধূমাদ্যপ্রকাশোপলক্ষিতত্বা-

## স্বামিকৃত টীকা।

মুক্তিঃ, কাম্যকর্ম্মভিশ্চ স্বর্গভোগানন্তরমাবৃত্তিঃ, নিষিদ্ধকর্ম্মভিস্তু নরকভোগানন্তরমাবৃত্তিঃ, ক্ষুদ্রকর্ম্মণান্তু জন্তূনাং অত্রৈব পুনঃ পুনর্জন্মেতি দ্রষ্টব্যং ॥ ২৫ ॥

উক্তমার্গাবুপসংহরতি শুক্লেতি। শুক্লাঽর্চ্চিরাদিগতিঃ প্রকাশময়ত্বাৎ কৃষ্ণা ধূমাদিগতিস্তমোময়ত্বাৎ এতে গতী মার্গৌ জ্ঞানকর্ম্মাধিকারিণো জগতঃ শাশ্বতে অনাদী সংমতে সংসারস্যানাদিত্বাৎ, তয়োরেকয়া শুক্লয়ানাবৃত্তিং মোক্ষং যাতি অন্যয়া কৃষ্ণয়া তু পুনরাবর্ত্ততে ॥ ২৬ ॥

নৈতে সৃতী পার্থ জানন্ যোগী মুহ্যতি কশ্চন।
তস্মাৎ সর্ব্বেষু কালেষু যোগযুক্তো ভবার্জ্জুন ॥ ২৭ ॥

## শাঙ্করভাষ্যম্।

নৈতইতি। নৈতে যথোক্তে সৃতী মার্গৌ পার্থ জানন্ সংসারায়ৈকান্যা মোক্ষায় চেতি যোগী ন মুহ্যতি ন কশ্চন কশ্চিদপি তস্মাৎ সর্ব্বেষু কালেষু যোগযুক্তঃ সমাহিতো ভবার্জ্জুন ॥ ২৭ ॥

## গিরিকৃত টীকা।

দবিদ্যাপ্রাপ্যত্বাচ্চ কৃষ্ণা পিতৃযানলক্ষণা গতিঃ তয়োর্গত্যোঃ শ্রুতিস্মৃতিপ্রসিদ্ধার্থো হিশব্দঃ। জগচ্ছব্দস্য জ্ঞানকর্ম্মাধিকৃতবিষয়ত্বেন সঙ্কোচে হেতুমাহ ন জগতইতি। অন্যথা জ্ঞানকর্ম্মোপদেশানর্থক্যাদিত্যর্থঃ। তয়োর্নিত্যত্বে হেতুমাহ সংসারস্যেতি। মার্গয়োর্যাবৎসংসারভাবিত্বে ফলিতমাহ তত্রেতি। ক্রমমুক্তিরনাবৃত্তিঃ ভূয়ো ভোক্তব্যকর্ম্মক্ষয়ে শেষকর্ম্মবশাদিত্যর্থঃ। ২৬॥

গতেরুপাস্যত্বায় তদ্বিজ্ঞানং স্তৌতি নৈতইতি। যোগস্য মোহাপোহকত্বে ফলিতমাহ তস্মাদিতি। জ্ঞানপ্রকারমনুবদতি সংসারায়েতি। মোক্ষায় ক্রমমুক্ত্যর্থং, যোগী ধ্যাননিষ্ঠো গতিমপি ধ্যায়ন্নেব মুহ্যতি কেবলং কর্ম্ম দক্ষিণমার্গাপ্রাপকং কর্ত্তব্যত্বেন ন প্রত্যেতীত্যর্থঃ, যোগস্যাপুনরাবৃত্তিফলত্বে নিত্যকর্ত্তব্যত্বং সিদ্ধমিত্যুপসংহরতি তস্মাদিতি ॥ ২৭ ॥

শ্রদ্ধাবৃদ্ধ্যর্থং যোগং স্তৌতি শৃণ্বিতি। পবিত্রপাণিত্বপ্রাঙ্মুখত্বাদিসাহিত্যমধ্যয়নস্য সম্যক্ত্বমঙ্গোপাঙ্গোপেতত্বমনুষ্ঠানস্য সাদ্গুণ্যং, তপসাং শাস্ত্রোক্তানাং সুতপ্তত্বং মনোবুদ্ধ্যাদ্যৈকাগ্র্যপূর্ব্বকং, দানস্য চ সম্যক্ত্বং দেশকালপাত্রানুগুণত্বমিদং বিদিত্বেত্যত্রেদং শব্দার্থমবস্ফুটয়তি সপ্তেতি, যদ্যপি কিং তদ্ব্রহ্মেত্যাদাবধিযজ্ঞঃ কথং কোঽত্রেত্যত্র প্রশ্নদ্বয়ং প্রতিভাসানুসারেণ কৈশ্চিদুক্তং তথাপি প্রতিবচনালোচনায়াং দ্বিত্বপ্রতীত্যভাবাৎ প্রকারভেদবিবক্ষয়া চ শব্দদ্বয়স্য প্রতিনিয়তত্বান্ন সপ্তেতি বিরুধ্যতে, ন চেদং বেদনমায়ুষ্মিকং

## স্বামিকৃত টীকা।

মার্গজ্ঞানফলং দর্শয়ন্ ভক্তিযোগমুপসংহরতি নৈতে ইতি। এতে সৃতী মার্গৌ মোক্ষসংসারপ্রাপকৌ জানন্ কশ্চিদপি যোগী ন মুহ্যতি সুখবুদ্ধ্যা স্বর্গাদিফলং ন কাময়তে কিন্তু পরমেশ্বরনিষ্ঠএব ভবতীত্যর্থঃ, স্পষ্টমন্যৎ ॥ ২৭ ॥

অধ্যায়ার্থমষ্টপ্রশ্নার্থনির্ণয়ং সফলমুপসংহরতি বেদেষ্বিতি। বেদেষু অধ্যয়নাদিভিঃ যজ্ঞেষু অনুষ্ঠানাদিভিঃ তপঃসু কায়শোষণাদিভিঃ দানেষু সৎপাত্রেঽর্পণাদিভিঃ যৎপুণ্যফলমুপদিষ্টং শাস্ত্রেষু তৎসর্ব্বমত্যেতি ততোঽপি শ্রেষ্ঠং যোগৈশ্বর্য্যং প্রাপ্নোতি, কিং কৃত্বা, ইদমষ্টপ্রশ্না-

বেদেষু যজ্ঞেষু তপঃসু চৈব দানেষু যৎ পুণ্যফলং প্রদিষ্টম্।
অত্যেতি তৎ সর্ব্বমিদং বিদিত্বা যোগী পরং স্থানমুপৈতি চাদ্যম্ ॥ ২৮ ॥

শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াম্
যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে
তারকব্রহ্মযোগো নাম
অষ্টমোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

পৃণু যোগস্য মাহাত্ম্যং বেদেম্বিতি। বেদেষু সম্যগধীতেষু যজ্ঞেষু চ সাদ্গুণ্যেনানুষ্ঠিতেষু তপঃসু চ সুতপ্তেষু দানেষু চ সম্যগ্দত্তেষু যত্তেষু পুণ্যফলং প্রদিষ্টং শাস্ত্রেণাত্যেত্য-তীত্য গচ্ছতি তৎসর্ব্বং ফলজাতমিদং বিদিত্বা সপ্তপ্রশ্ননির্ণয়দ্বারেণোক্তং সম্যগবধা-র্য্যানুষ্ঠায় ইহ যোগী পরং উৎকৃষ্টমৈশ্বরং স্থানমুপৈতি প্রতিপদ্যতে আদ্যমাদৌ ভবং কারণং ব্রহ্মেত্যর্থঃ ॥ ২৮ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে অষ্টমোঽধ্যায়ঃ।

---

## গিরিকৃত টীকা।

কিন্ত্বনুষ্ঠানপর্য্যন্তমিত্যাহ সম্যগিতি। প্রকৃতো ধ্যাননিষ্ঠো যোগীত্যুচ্যতে ঐশ্বরং বিষ্ণোঃ পরমং পদং তদেব তিষ্ঠত্যস্মিন্নশেষমিতি স্থানং যোগানুষ্ঠানাদশেষফলাতিশায়ি মোক্ষলক্ষণং ক্রমেণ লব্ধুং শক্যমিতিভাবঃ। তদনেন সপ্তপ্রশ্নপ্রতিবচনেন যোগমার্গং প্রবর্ত্তয়তা ধ্যেয়-ত্বেন তৎপদার্থো ব্যাখ্যাতঃ ॥ ২৮ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং অষ্টমোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

র্থনির্ণয়েনোক্তং তত্ত্বং বিদিত্বা ততশ্চ যোগী জ্ঞানী ভূত্বা পরমুৎকৃষ্টং আদ্যং জগন্মূলভূতং স্থানং বিষ্ণোঃ পদং প্রাপ্নোতি ॥ ২৮ ॥

অষ্টমেঽষ্টবিশিষ্টৈষ্টৈসংপৃষ্টার্থবিনির্ণয়ৈঃ।
অক্লিষ্টমিষ্টধামাপ্তিঃ স্পষ্টিতোৎকৃষ্টবর্ত্মনা ॥
ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং অষ্টমোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## নবমোঽধ্যায়ঃ।

শ্রীভগবানুবাচ—ইদন্তু তে গুহ্যতমং প্রবক্ষ্যাম্যনসূয়বে।
জ্ঞানং বিজ্ঞানসহিতং যজ্জ্ঞাত্বা মোক্ষ্যসেঽশুভাৎ ॥১॥

### শাঙ্করভাষ্যম্।

অষ্টমে নাড়ীদ্বারেণ ধারণাযোগঃ সগুণ উক্তস্তস্য চ ফলমগ্ন্যর্চ্চিরাদিক্রমেণ কালান্তরে ব্রহ্মপ্রাপ্তিলক্ষণমেবানাবৃত্তিরূপং নির্দ্দিষ্টং তত্রানেনৈব প্রকারেণ মোক্ষপ্রাপ্তিফলমধিগম্যতে নান্যথেতি তদাশঙ্কাব্যাবিবৃৎসয়া ভগবানুবাচ ইদমিতি। ইদং ব্রহ্মজ্ঞানং বক্ষ্যমাণমুক্তঞ্চ পূর্ব্বেষধ্যায়েষু তদ্‌বুদ্ধৌ সন্নিধীকৃত্যেদমিত্যাহ। তুশব্দো বিশেষনির্দ্ধারণার্থঃ ইদমেব তু সম্যক্ জ্ঞানং সাক্ষান্মোক্ষপ্রাপ্তিসাধনং বাসুদেবঃ সর্ব্বমিত্যাত্মৈবেদং সর্ব্বমেকমেবাদ্বিতীয়মিত্যাদিশ্রুতিস্মৃতিভ্যো নান্যদথ যেঽন্যথাতোবিদুরন্যরাজানস্তেঽক্ষয্যলোকা ভবন্তীত্যাদিশ্রুতিভ্যশ্চ তে তুভ্যং গুহ্যতমং গোপ্যতমং প্রবক্ষ্যামি কথয়িষ্যাম্যনসূয়বেঽসূয়ারহিতায় কিং তজ্‌জ্ঞানং, কিংবিশিষ্টং বিজ্ঞানসহিতমনুভবযুক্তং জ্ঞানং জ্ঞাত্বা প্রাপ্য মোক্ষসেঽশুভাৎ সংসারবন্ধনাৎ। ১।

### গিরিকৃত টীকা।

অতীতানাগামিনোঽধ্যায়য়োস্তাগতার্থত্বং বক্তুং বৃত্তং অনুদ্রবতি অষ্টম ইতি। নাড়ী সুষুম্নাখ্যা ধারণাখ্যেনাঙ্গেন যুক্তো যোগঃ ধারণাযোগঃ সগুণঃ সর্ব্বদ্বারসংযমনাদিগুণস্তেন সহিত ইত্যর্থঃ। তৎফলোক্ত্যর্থমনন্তরাধ্যায়ারম্ভমাশঙ্ক্য তস্য চেতি। অগ্নিরর্চ্চিরিত্যাদিনোপলক্ষিতেন ক্রমবতা দেবযানেন পথেতি যাবৎ। জ্ঞানানন্তরমেব যথোক্তফললাভাৎ অলমনেন মার্গেণেত্যাশঙ্ক্যাহ কালান্তর ইতি। অর্চ্চিরাদিমার্গেণ ব্রহ্মপ্রাপ্তৌ মুক্তেঃ মার্গায়ত্তত্বাৎ ন তস্যেত্যাদিশ্রুতিবিরোধঃ স্যাদিত্যাশয়েন শঙ্কতে তত্রেতি। বৃত্তোঽর্থঃ সপ্তম্যর্থঃ।

### স্বামিকৃত টীকা।

পরেশঃ প্রাপ্যতে শুদ্ধভক্ত্যেতি স্থিতমষ্টমে। নবমে তু তদৈশ্বর্য্যমত্যাশ্চর্য্যং প্রপঞ্চ্যতে। এবং তাবৎ সপ্তমাষ্টময়োঃ স্বীয়পরমেশ্বরতত্ত্বং ভক্ত্যৈব সুলভং নান্যথেত্যুক্তমিদানীমচিন্ত্যং স্বকীয়মৈশ্বর্য্যং ভক্তেশ্চাসাধারণং প্রভাবং প্রপঞ্চয়িষ্যন্ শ্রীভগবানুবাচ ইদমিতি। বিশে

রাজবিদ্যা রাজগুহ্যং পবিত্রমিদমুত্তমম্।
প্রত্যক্ষাবগমং ধর্ম্ম্যং সুসুখং কর্ত্তুমব্যয়ম্ ॥ ২ ॥

## শাঙ্করভাষ্যম্।

তচ্চ স্তৌতি রাজবিদ্যেতি। রাজবিদ্যা বিদ্যানাং রাজা দীপ্ত্যতিশয়ত্বাৎ দীপ্যতে হীয় মতিশয়েন ব্রহ্মবিদ্যা সর্ব্ববিদ্যানাং, রাজগুহ্যং তথা গুহ্যানাং রাজা, পবিত্রং পাবনমিদমুত্তমং সর্ব্বেষাং পাবনানাং শুদ্ধিকরণানামিদং ব্রহ্মবিজ্ঞানমুৎকৃষ্টতমমনেকজন্মসহস্র-

## গিরিকৃত টীকা।

উক্তাশঙ্কানিবৃত্ত্যর্থমনন্তরাধ্যায়মুত্থাপয়তি তদাশঙ্কেতি। সংপ্রযুক্তত্বেনাপরোক্ষত্বাভাবেঽপি-পূর্ব্বোত্তরগ্রন্থালোচনয়া বুদ্ধিসন্নিধানাদিদংশব্দেন ব্রহ্মজ্ঞানং গৃহীতং ইত্যাহ তদ্বুদ্ধাবিতি, প্রকৃতাজ্ঞানাৎ জ্ঞানস্য বৈশিষ্ট্যাবদ্যোতী তুশব্দ ইত্যাহ তুশব্দ ইতি, নিপাতার্থমেব স্ফুটয়তি ইদমেবেতি, তস্মিন্নর্থে সম্বাদকত্বেন শ্রুতিস্মৃতিং দর্শয়তি বাসুদেব ইতি। অদ্বৈতজ্ঞানবৎ দ্বৈতজ্ঞানমপি কেষাঞ্চিন্মোক্ষহেতুরিত্যাশঙ্ক্যাহ নান্যদিতি। দ্বৈতজ্ঞানং মোক্ষায় ন ক্ষমমিত্যত্র শ্রুতিমুদাহরতি অথেতি, অবিদ্যাপ্রকরণোপক্রমার্থোঽথশব্দঃ, অতো দ্বৈতাদন্যথাঽভিন্নত্বেনেত্যর্থঃ, বিদুস্তত্ত্বমিতি শেষঃ, দ্বৈতস্য দুর্নিরূপত্বেন কল্পিতত্বাৎ তজ্জ্ঞানং রজ্জুসর্পাদিজ্ঞানতুল্যত্বান্ন ক্ষেমপ্রাপ্তিহেতুরিতি চকারার্থঃ অসূয়া গুণেষু দোষাবিষ্করণং তদ্রহিতায় জ্ঞানাধিকৃতায় ইত্যর্থঃ। জ্ঞানং ব্রহ্মচৈতন্যং তদ্বিষয়ত্বা প্রমাণজ্ঞানং তস্য তেনৈব বিশেষিতামনুপপত্তিমাশঙ্ক্য ব্যাকরোতি অনুভবেতি, বিজ্ঞানমনুভবঃ সাক্ষাৎকারত্বেন সহিতমিত্যর্থঃ। উক্তজ্ঞানং প্রাপ্তস্য কিং স্যাদিত্যাশঙ্ক্যাহ যজ্‌ জ্ঞানমিতি ॥ ১ ॥

তদাভিমুখ্যসিদ্ধয়ে তজ্‌জ্ঞানং স্তৌতি তচ্চেতি। ব্রহ্মবিদ্যা বিদ্যানাং রাজা শ্রেষ্ঠা ইত্যত্র হেতুমাহ দীপ্তেতি। কুতো ব্রহ্মবিদ্যায়াঃ বিদ্যান্তরেভ্যো দীপ্ত্যতিশয়ত্বং তদাহ দীপ্যতে হীতি। দৃশ্যতে হি বিদ্বদন্তরেভ্যো লোকে পূজাতিরেকো ব্রহ্মবিদামিতি ভাবঃ উৎ-

## স্বামিকৃত টীকা।

যেণ জ্ঞায়তে অনেনেতি বিজ্ঞানমুপাসনং তৎসহিতং জ্ঞানমীশ্বরবিষয়মিদং তু তেঽনসূয়বে পুনঃ পুনঃ মমাহাত্ম্যমেবোপদিশতীত্যেবং পরমকারুণিকে ময়ি দোষদৃষ্টিরহিতায় তুভ্যং বক্ষ্যামি, তুশব্দো বৈশিষ্ট্যে। তদেবাহ গুহ্যতমমিত্যাদিনা। গুহ্যং ধর্ম্মজ্ঞানং ততো দেহাদিব্যতিরিক্তাত্মজ্ঞানং গুহ্যতরং ততোঽপি পরমাত্মজ্ঞানমতিরহস্যত্বাদ্‌গুহ্যতমং যজ্‌জ্ঞাত্বাঽশুভাৎ সংসারবন্ধান্মোক্ষ্যসে সদ্যএব মুক্তো ভবিষ্যসি। ১।

কিঞ্চ রাজবিদ্যেতি। ইদং জ্ঞানং রাজবিদ্যা বিদ্যানাং রাজা রাজগুহ্যং গুহ্যানাঞ্চ রাজা বিদ্যাসু গোপ্যেষু চাতিরহস্যং শ্রেষ্ঠমিত্যর্থঃ রাজদন্তাদিত্বাদুপসর্জনস্যাপি পরত্বং, রাজ্ঞাং বিদ্যা রাজ্ঞাং গুহ্যমিতিবা, উত্তমং পবিত্রমিদমত্যন্তপাবনং, জ্ঞানিনাং প্রত্যক্ষাবগমং

অশ্রদ্দধানাঃ পুরুষা ধর্ম্মস্যাস্য পরন্তপ।
অপ্রাপ্য মাং নিবর্ত্তন্তে মৃত্যুসংসারবর্ত্মনি ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

সঞ্চিতমপি ধর্ম্মাধর্ম্মাদি সমূলং কর্ম্ম ক্ষণমাত্রাদ্ভস্মীকরোতি যতোঽতঃ কিং তস্য পাবনত্বং বক্তব্যং, কিঞ্চ প্রত্যক্ষাবগমং প্রত্যক্ষেণ সুখাদেরিবাবগমো যস্য তৎ প্রত্যক্ষাবগমং অনেকগুণবতোঽপি ধর্ম্মবিরুদ্ধত্বং দৃষ্টং শ্যেনযাগইব ন তথা আত্মজ্ঞানং ধর্ম্মবিরোধি কিন্তু ধর্ম্ম্যং ধর্ম্মাদনপেতং এবমপি স্যাৎ দুঃসংপাদ্যমিত্যত আহ সুসুখং কর্ত্তুং যথা রত্নবিবেকবিজ্ঞানং তত্রাল্লাযাসানাং অন্যেষাং কর্ম্মণাং সুখসম্পাদ্যানামল্পফলত্বং দৃষ্টং দুষ্করাণাঞ্চ মহাফলত্বং দৃষ্টমিতীদন্তু সুখসংপাদ্যত্বাৎ ফলক্ষয়াদ্ব্যেতীতিপ্রাপ্তৌ তত্রাহাব্যয়ং নাস্য ফলতঃ কর্ম্মবদ্ ব্যয়োঽস্তীতি অব্যয়ং অতঃ শ্রদ্ধেয়মাত্মজ্ঞানং ॥ ২ ॥

যে পুনঃ অশ্রদ্দধানাইতি। অশ্রদ্দধানাঃ শ্রদ্ধাবিরহিতাঃ আত্মজ্ঞানস্য ধর্ম্মস্যাস্য স্বরূপে তৎফলে চ নাস্তিকাঃ পাপকারিণোঽসুরাণামুপনিষদং দেহমাত্রাত্মদর্শনমেব প্রতিপন্না অসন্তঃ পুরুষাঃ পরন্তপ অপ্রাপ্য মাং পরমেশ্বরং মৎপ্রাপ্তৌ নৈবাশঙ্কেতি মৎপ্রা-

## গিরিকৃত টীকা।

কৃষ্টতমং শুদ্ধিকারণং ব্রহ্মজ্ঞানমিত্যেতদুপপাদয়তি অনেকেতি। তত্র শ্রুতিস্মৃতী প্রমাণয়িতব্যে ন শাস্ত্রৈকগম্যমিদং জ্ঞানং কিন্তু প্রত্যক্ষপ্রমেয়মিত্যাহ কিঞ্চেতি। প্রত্যক্ষমবগম্যমানমস্মিন্নিতি তথা, যদ্বাবগম্যতইতি অবগমং ফলং প্রত্যক্ষোঽবগমোঽস্যেতি দৃষ্টফলত্বমাশঙ্ক্যাহ এবমপীতি, রত্নবিষয়ং বিবেকজ্ঞানং সংপ্রয়োগাদুপদেশাপেক্ষাদনায়াসেন দৃষ্টং তথেদং ব্রহ্মজ্ঞানমিত্যাহ যথেতি। অব্যয়মিতি বিশেষণমাশঙ্কাপূর্ব্বকং বিবৃণোতি তত্রেত্যাদিনা। ব্যবহারভূমিঃ সপ্তম্যর্থঃ। জ্ঞানস্যাক্ষয়ফলত্বে ফলিতমাহ অতইতি ॥ ২ ॥

আত্মজ্ঞানাখ্যে ধর্ম্মে শ্রদ্ধাবতাং তন্নিষ্ঠানাং পরমপদপ্রাপ্তিমুক্ত্বা ততো বিমুখানাং সংসারপ্রাপ্তিমাহ যে পুনরিতি। আত্মজ্ঞানতৎফলয়োর্নাস্তিকানেব বিশিনষ্টি পাপেতি। উক্তানামাত্মন্তরীণাং ভগবৎপ্রাপ্তিসম্ভাবনাভাবাদপ্রাপ্য মামিত্যপ্রসক্তপ্রতিষেধঃ স্যাদিত্যাশঙ্ক্যাহ মৎপ্রাপ্তাবিতি ॥ ৩ ॥

## স্বামিকৃত টীকা।

প্রত্যক্ষঃ স্পষ্টোঽববোধো যস্য তৎ প্রত্যক্ষাবগমং দৃষ্টফলং ইত্যর্থঃ, ধর্ম্ম্যং ধর্ম্মাদনপেতং বেদোক্তসর্ব্বধর্ম্মফলত্বাৎ, কর্ত্তুঞ্চ সুসুখং সুখেন কর্ত্তুং শক্যমিত্যর্থঃ, অব্যয়ঞ্চাক্ষয়ফলত্বাৎ ॥ ২ ॥

ময়া ততমিদং সর্ব্বং জগদব্যক্তমূর্ত্তিনা।
মৎস্থানি সর্ব্বভূতানি ন চাহং তেষ্ববস্থিতঃ ॥ ৪ ॥

## শাঙ্করভাষ্যম্।

প্তিমার্গসাধনভেদভক্তিমাত্রমপ্রাপ্যেত্যর্থঃ, নিবর্ত্তন্তে নিশ্চয়েন আবর্ত্তন্তে ক্ব মৃত্যুসংসারবর্ত্ম'নি মৃত্যুযুক্তঃ সংসারো মৃত্যুসংসারস্তস্য বর্ত্ম' নরকতির্য্যগাদিপ্রাপ্তিমার্গস্তস্মিন্নেব বর্ত্তন্ত ইত্যর্থঃ ॥ ৩ ॥

ইতি জ্ঞানং স্তুত্বাজু'নমভিমুখীকৃত্যাহ ময়েতি। ময়া মম যঃ পরো ভাবস্তেন ততং ব্যাপ্তং সর্ব্বমিদং জগদব্যক্তমূর্ত্তিনা ন ব্যক্তা মূর্ত্তিঃ স্বরূপং যস্য মম সোঽহমব্যক্তমূর্ত্তিস্তেন ময়াব্যক্তমূর্ত্তিনা করণাগোচরস্বরূপেণেত্যর্থঃ তস্মিন্ময্যব্যক্তমূর্ত্তৌ স্থিতানি মৎস্থানি সর্ব্বভূতানি ব্রহ্মাদীনি স্তম্বপর্য্যন্তানি নহি নিরাত্মকং কিঞ্চিদ্ভূতং ব্যবহারায়াবকল্পতেঽতো মৎস্থানি ময়াত্মনাত্মবত্ত্বেন স্থিতানি অতো ময়ি স্থিতানীত্যুচ্যন্তে তেষাং ভূতানামহমেব আত্মা ইত্যতস্তেষু স্থিতইতি মূঢ়বুদ্ধীনামবভাসতেঽতো ব্রবীমি ন চাহং তেষু ভূতেষ্ববস্থিতো মূর্ত্তবৎ সংশ্লেষাভাবেনাকাশস্যাপ্যন্তরতমো হ্যহং ॥ ৪ ॥

## গিরিকৃত টীকা।

স্তুতিনিন্দাভ্যাং জ্ঞাননিষ্ঠাং মহীকৃত্য জ্ঞানং ব্যাখ্যাতুমারভতে স্তুত্বেতি। সোপাধিকস্য ব্যাপ্ত্যসম্ভবমভিপ্রেত্য বিশিনষ্টি ময়েতি, অনবচ্ছিন্নস্য ভগবদ্রূপস্য নিরুপাধিকত্বমেব সাধয়তি করণেতি। ব্যাপ্যব্যাপকত্বেন জগতো ভগবতশ্চ পরিচ্ছেদমাশঙ্ক্যাহ তস্মিন্নিতি। তথাপি ভগবতো ভূতানঞ্চাধারাধেয়ত্বেন ভেদঃ স্যাদিত্যাশঙ্ক্যাহ ন হীতি। নিরাত্মকস্য ব্যবহারানর্হত্বে ফলিতমাহ অতইতি। ঈশ্বরস্য ভূতাত্মত্বে তেষু স্থিতিঃ স্যাদিত্যাশঙ্ক্যাহ তেষামিতি। তস্য তেষু স্থিত্যভাবং ব্যবস্থাপয়তি মূর্ত্তবদিতি ॥ ৪ ॥

## স্বামিকৃত টীকা

নম্বেবমপ্যতিসুকরত্বেন কে নাম সংসারিণঃ স্যুস্তত্রাহ অশ্রদ্দধানাইতি। অস্য ভক্তিসহিতজ্ঞানলক্ষণস্য ধর্ম্মস্যেতি কর্ম্মণি ষষ্ঠী ইমং ধর্ম্মমশ্রদ্দধানা আস্তিক্যেনাস্বীকুর্ব্বন্ত উপায়ান্তরৈর্ম'ৎপ্রাপ্তয়ে কৃতপ্রযত্না অপি মামপ্রাপ্য মৃত্যুযুক্তে সংসারবর্ত্ম'নি নিবর্ত্তন্তে মৃত্যুব্যাপ্তে সংসারমার্গে পরিভ্রমন্তীত্যর্থঃ ॥ ৩ ॥

তদেবং বক্তব্যতয়া প্রস্তুতস্য জ্ঞানস্য স্তুত্বা শ্রোতারমভিমুখীকৃত্য তদেব জ্ঞানং কথয়তি ময়েতি দ্বাভ্যাং। অব্যক্তা অতীন্দ্রিয়া মূর্ত্তিঃ স্বরূপং যস্য তাদৃশেন ময়া কারণভূতেন সর্ব্বমিদং জগত্ততং ব্যাপ্তং তৎ সৃষ্ট্বা তদেবানুপ্রাবিশদিত্যাদিশ্রুতেঃ, অতএব কারণভূতে ময়ি তিষ্ঠন্তীতি মৎস্থানি সর্ব্বাণি ভূতানি চরাচরাণি, এবমপি ঘটাদিষু স্বকার্য্যেষু মৃত্তিকেব তেষু ভূতেষু নাহমবস্থিত আকাশবদসঙ্গত্বাৎ ॥ ৪ ॥

**ন চ মৎস্থানি ভূতানি পশ্য মে যোগমৈশ্বরম্।**
**ভূতভৃন্ন চ ভূতস্থো মমাত্মা ভূতভাবনঃ॥ ৫॥**

## শাঙ্করভাষ্যম্।

ন হ্যসংসর্গি বস্তু ক্বচিদাধেয়ভাবেনাবস্থিতং ভবত্যতএবাসংসর্গিত্বান্মম ন চেতি। ন চ মৎস্থানি ভূতানি ব্রহ্মাদীনি, পশ্য মে যোগং যুক্তিঃ ঘটনং মে মমৈশ্বরং যোগমাত্মনঃ ঈশ্বরস্যেদমৈশ্বরং মাহাত্ম্যমিত্যর্থঃ তথা চাত্মনো যা শ্রুতিসংসর্গিত্বাদসঙ্গতাং দর্শয়ত্যসঙ্গো ন হি সজ্জত ইদঞ্চাশ্চর্য্যমন্যৎ পশ্য ভূতভৃদসঙ্গোঽপি সন্ ভূতানি বিভর্ত্তি ন চ ভূতস্থো যথোক্তেন ন্যায়েন দর্শিতত্বাৎ ভূতস্থত্বানুপপত্তেঃ, কথং পুনরুচ্যতে অসৌ মমাত্মেতি বিভজ্য দেহাদিসংঘাতং তস্মিন্নহঙ্কারমধ্যারোপ্য লোকবুদ্ধিমনুস্মরন্ ব্যপদিশতি মমাত্মেতি, ন পুনরাত্মন আত্মা অন্য ইতি লোকবদজানংস্তথা ভূতভাবনো ভূতানি ভাবয়তি উৎপাদয়তি বর্দ্ধয়তি বা ভূতভাবনঃ॥ ৫॥

## গিরিকৃত টীকা।

সংশ্লেষাভাবেঽপি কিমিতি নাধেয়ত্বমত আহ ন হীতি। পরমেশ্বরস্য ভূতেষু স্থিত্যভাবেঽপি ভূতানাং তত্র স্থিতিরাস্থিতেতি কুতোঽসঙ্গত্বং তত্রাহ অতএবেতি ন চেতি। তত্র চকারোঽবধারণার্থঃ। ভূতানামীশ্বরেণৈব স্থিতিবিত্যত্র হেতুমাহ পশ্যেতি। আত্মনোঽসঙ্গত্বস্বরূপমিত্যত্র প্রমাণমাহ তথা চেতি। অসঙ্গশ্চেদীশ্বরস্তর্হি কথং মৎস্থানি ভূতানীত্যুক্তং কথঞ্চ তথোক্তাংশ্চ মৎস্থানীতি তদ্বিরুদ্ধমুদীরিতমিত্যাশঙ্ক্যাহ ইদঞ্চেতি। তর্হি ভূতসম্বন্ধঃ স্যাদিতি নেত্যাহ ন চেতি। যথোক্তেন ন্যায়েন অসঙ্গত্বেনেতি যাবৎ, অসঙ্গতয়া বস্তুতো ভূতাসম্বন্ধেঽপি কল্পনয়া তদবিরোধান্ন মিথোবিরোধোঽস্তীতি ভাবঃ। আত্মনঃ সকাশাদাত্মনোঽন্যত্বাযোগাৎ কুতঃ সম্বন্ধোক্তিরিত্যাশঙ্ক্যাহ অসাবিতি। যথা লোকো বস্তুতত্ত্বমজানন্ ভেদমারোপ্য মমায়মিতি সম্বন্ধমনুভবতি ন তথেহ সম্বন্ধব্যপদেশঃ আত্মনি স্বতো

## স্বামিকৃত টীকা।

কিঞ্চ ন চেতি। ন চ ময়ি স্থিতানি ভূতানি অসঙ্গত্বাদেব মম, নমু তর্হি ব্যাপকত্বমাশ্রয়ত্বঞ্চ পূর্ব্বোক্তং বিরুদ্ধমিত্যাশঙ্ক্যাহ পশ্যেতি। মে ঐশ্বরমসাধারণং যোগং যুক্তিং অঘটনঘটনাচাতুর্য্যমিদং পশ্য মদীয়যোগমায়াবৈভবস্যাবিতর্ক্যত্বান্ন কিঞ্চিৎ বিরুদ্ধমিত্যর্থঃ। অন্যদপ্যাশ্চর্য্যং পশ্যেত্যাহ ভূতেতি। ভূতানি বিভর্ত্তি ধারয়তীতি ভূতভৃৎ ভূতানি ভাবয়তি পালয়তীতি ভূতভাবনঃ এবংভূতোঽপি মমাত্মা পরং স্বরূপং ভূতস্থো ন ভবতীতি। অয়ং ভাবঃ, যথা দেহং বিভ্রৎ পালয়ংশ্চ জীবোঽহঙ্কারেণ তৎসংশ্লিষ্টস্তিষ্ঠতি এবমহং ভূতানি ধারয়ন্ পালয়ন্নপি তেষু ন তিষ্ঠামি নিরহঙ্কারত্বাদিতি॥ ৫॥

যথাকাশস্থিতো নিত্যং বায়ুঃ সর্ব্বত্রগো মহান্।
তথা সর্ব্বাণি ভূতানি মৎস্থানীত্যুপধারয় ॥ ৬ ॥
সর্ব্বভূতানি কৌন্তেয় প্রকৃতিং যান্তি মামিকাম্।
কল্পক্ষয়ে পুনস্তানি কল্পাদৌ বিসৃজাম্যহম্ ॥ ৭ ॥

## শাঙ্করভাষ্যম্।

যথোক্তেন শ্লোকদ্বয়েন উক্তমর্থং দৃষ্টান্তেনোপপাদয়ন্নাহ যথেতি। যথা লোকে আকাশস্থিতঃ আকাশে স্থিতো নিত্যং সদা বায়ুঃ সর্ব্বত্র গচ্ছতীতি সর্ব্বত্রগঃ মহান্ পরিমাণতস্তথাকাশবৎ সর্ব্বগতে ময্যসংশ্লেষেণৈব স্থিতানি মৎস্থানীত্যেবমুপধারয় জানীহি ॥ ৬ ॥

এবং বায়ুরাকাশ ইব ময়ি স্থিতানি সর্ব্বভূতানি সর্ব্বাণি ভূতানি স্থিতিকালে তানি সর্ব্বভূতানি কৌন্তেয় প্রকৃতিং ত্রিগুণাত্মিকামপরাং নিকৃষ্টাং যান্তি মামিকাং মদীয়াং কল্পক্ষয়ে

## গিরিকৃত টীকা।

ভেদাভাবাদতো ভেদে সত্যেব লোকে সম্বন্ধবুদ্ধিদর্শনমনুসরন্ ভগবানাত্মনো দেহাদিসংঘাতং বিভজ্যাহঙ্কারং তস্মিন্নারোপ্য অসৌ মমাত্মেতি ভেদং ব্যপদিশতি তথাচ সংঘাতস্য মমেতি ব্যপদেশাত্ততো নিকৃষ্টস্য স্বরূপস্যাত্মশব্দেন নির্দ্দেশান্ন ভূতস্থোঽসাবিত্যর্থঃ। পূর্ব্বোক্তাসঙ্গত্বাঙ্গীকারেণৈবাত্মা ভূতানি ভাবয়তীত্যাহ তথেতি ॥ ৫ ॥

সৃষ্টিস্থিতিসংহারাণামসঙ্গাত্মাধারত্বং ময়া ততমিদমিত্যাদিশ্লোকদ্বয়েনোক্তোঽর্থস্তদ্দৃষ্টান্তেনোপপাদয়ন্নাদৌ দৃষ্টান্তমাহেতি যোজনা, সদেত্যুৎপত্তিস্থিতিসংহারকালো গৃহ্যতে। আকাশাদের্মহতোঽস্যাধারত্বং কথমিত্যাশঙ্ক্যাহ মহানিতি। যথা সর্ব্বগামিত্বাৎ পরিমাণতো মহান্ বায়ুরাকাশে সদা তিষ্ঠতি তথা আকাশাদীনি মহান্ত্যপি সর্ব্বাণি ভূতান্যাকাশকল্পে পূর্ণে প্রতীচ্যসঙ্গে পরস্মিন্নাত্মনি সংশ্লেষমন্তরেণ স্থিতানীত্যর্থঃ ॥ ৬ ॥

আকাশে বায়্বাদিস্থিতিবদাকাশাদীনি ভূতানি স্থিতিকালে পরমেশ্বরে স্থিতানি চেত্তর্হি প্রলয়কালে ততোঽন্যত্র তিষ্ঠেয়ুরিত্যাশঙ্ক্যাহ এবমিতি। প্রকৃতিশব্দস্য স্বভাববচনং ব্যাব-

## স্বামিকৃত টীকা।

অসংশ্লিষ্টয়োরপি আধারাধেয়ভাবং দৃষ্টান্তেনাহ যথেতি। অবকাশং বিনাবস্থানানুপপত্তের্নিত্যমাকাশস্থিতো বায়ুঃ সর্ব্বত্রগোঽপি মহানপি নাকাশেন সংশ্লিষ্যতে নিরবয়বত্বেন সংশ্লেষাযোগাৎ তথা সর্ব্বাণি ভূতানি ময়ি স্থিতানি জানীহি ॥ ৬ ॥

তদেবমসঙ্গস্যৈব যোগমায়য়া স্থিতিহেতুত্বমুক্তং তত্রৈব সৃষ্টিপ্রলয়হেতুত্বঞ্চাহ সর্ব্বেতি। কল্পক্ষয়ে প্রলয়কালে সর্ব্বাণি ভূতানি মদীয়াং প্রকৃতিং যান্তি ত্রিগুণাত্মিকায়াং মায়ায়াং লীয়ন্তে পুনঃ কল্পাদৌ সৃষ্টিকালে তানি বিসৃজামি বিশেষেণ সৃজামি ॥ ৭ ॥

প্রকৃতিং স্বামবষ্টভ্য বিসৃজামি পুনঃ পুনঃ।
ভূতগ্রামমিমং কৃৎস্নমবশং প্রকৃতের্বশাৎ ॥ ৮ ॥

## শাঙ্করভাষ্যম্।

ব্রাহ্মে প্রলয়কালে পুনর্ভূয়স্তানি ভূতান্যুৎপত্তিকালে কল্পাদৌ বিসৃজাম্যুৎপাদয়াম্যহং পূর্ব্ববৎ ॥ ৭ ॥

এবমবিদ্যালক্ষণাং প্রকৃতিমিতি। প্রকৃতিং স্বীয়ামবষ্টভ্য বশীকৃত্য বিসৃজামি পুনঃ পুনঃ প্রকৃতিতো জাতং ভূতগ্রামং ভূতসমুদায়ং ইমং বর্ত্তমানং কৃৎস্নং সমগ্রমবশমস্বতন্ত্রমবিদ্যাদিদোষৈঃ পরবশীকৃতং প্রকৃতের্বশাৎ স্বভাববশাৎ ॥ ৮ ॥

তর্হি তস্যৈব পরমেশ্বরস্য ভূতগ্রামং বিদধতঃ তন্নিমিত্তাভ্যাং ধর্ম্মাধর্ম্মাভ্যাং সম্বন্ধঃ স্যাদিতীদমাহ ভগবান্ ন চ মামিতি। ন চমামীশং তানি ভূতগ্রামস্য বিষমবিসর্গনিমিত্তানি কর্ম্মাণি নিবধ্নন্তি ধনঞ্জয় তত্র কর্ম্মণামসম্বন্ধত্বে কারণমাহ উদাসীনবদাসীনং যথোদাসীন উপেক্ষকঃ কশ্চিৎ তদ্বদাসীনমাত্মনোঽবিক্রিয়ত্বমসংসক্তং ফলসঙ্গরহিতমভিমানবর্জি-

## গিরিকৃত টীকা।

র্ত্তয়তি ত্রিগুণাত্মিকামিতি। সা চাপরেয়মিতি প্রাগেব সূচিতেত্যাহ অপরামিতি। তস্যাশ্চেশ্বরাধীনত্বেনাস্বাতন্ত্র্যমাহ মদীয়ামিতি। প্রলযকালে ভূতানি যথোক্তাং প্রকৃতিং যান্তি চেদুৎপত্তিকালেঽপি ততস্তেষামুৎপত্তেরীশ্বরাধীনত্বং ভূতসৃষ্টের্ন স্যাদিত্যাশঙ্ক্যাহ পুনরিতি ॥ ৭ ॥

তর্হিকীদৃশী প্রকৃতিঃ সা চ কথং সৃষ্টাবুপযুক্তেত্যাশঙ্ক্যাহ এবমিতি। সংসারস্যানাদিত্বদ্যোতনার্থং পুনঃ পুনরিত্যুক্তং। ভূতসমুদায়স্যাবিদ্যাস্মিতাদিদোষপরবশত্বে হেতুমাহ স্বভাববশাদিতি ॥ ৮ ॥

যদি প্রাকৃতং ভূতগ্রামং স্বভাবাদবিদ্যাতন্ত্রং বিষমং বিদধাসি তর্হি তব বিষমসৃষ্টিপ্রযুক্তং ধর্ম্মাদিমত্ত্বমিত্যনীশ্বরত্বাপত্তিরিতি শঙ্কতে তর্হীতি। তত্রেতি সপ্তম্যা পরমেশ্বরো নিরুচ্যতে। ঈশ্বরস্য ফলসঙ্গাভাবাৎ কর্ত্তৃত্বাভিমানাভাবাচ্চ কর্ম্মাসম্বন্ধবদীশ্বরাদন্যস্যাপি তদ্-

## স্বামিকৃত টীকা।

নম্বসঙ্গো নির্ব্বিকারশ্চ ত্বং কথং সৃজসীত্যপেক্ষায়ামাহ প্রকৃতিমিত্যাদি। স্বাং স্বাধীনাং প্রকৃতিমবষ্টভ্য অধিষ্ঠানপ্রলয়ে লীনং সন্তং চতুর্ব্বিধমিমং সর্ব্বং ভূতগ্রামং কর্ম্মাদিপরবশং পুনঃ পুনর্বিবিধং সৃজামি বিশেষেণ সৃজামীতি বা, কথং, প্রকৃতের্ব্বশাৎ প্রাচীনকর্ম্মনিমিত্ততত্তৎস্বভাববশাৎ ॥ ৮ ॥

নম্বেবং নানাবিধানি কর্ম্মাণি কুর্ব্বতস্তব জীববদ্বন্ধঃ কথং ন স্যাদিত্যত আহ ন চ মামিতি। তানি বিশ্বসৃষ্ট্যাদীনি কর্ম্মাণি মাং ন নিবধ্নন্তি, কর্ম্মাসক্তির্হি বন্ধহেতুঃ সা চাপ্তকাম-

ন চ মাং তানি কর্ম্মাণি নিবধ্নন্তি ধনঞ্জয়।
উদাসীনবদাসীনমসক্তং তেষু কর্ম্মসু ॥ ৯ ॥

## শাঙ্করভাষ্যম্।

তমহঙ্করোমীতি তেষু কর্ম্মস্বতোঽন্যস্যাপি কর্তৃত্বাভিমানাভাবঃ ফলসঙ্গাভাবশ্চাবন্ধকারণমন্যথা কর্ম্মভির্বধ্যতে মূঢ়ঃ কোষকারবদিত্যভিপ্রায়ঃ ॥ ৯ ॥

তত্র ভূতগ্রামমিমং বিসৃজন্তমপ্যুদাসীনবদাসীনমিতি চ বিরুদ্ধমুচ্যতে তৎপরিহারার্থমাহ ময়েতি। ময়া সর্ব্বতো দৃশিমাত্রস্বরূপেণাবিক্রিয়াত্মনাধ্যক্ষেণ মম মায়া ত্রিগুণাত্মিকাবিদ্যালক্ষণা প্রকৃতিঃ সূয়তে উৎপাদয়তি সচরাচরং জগৎ তথা চ মন্ত্রবর্ণঃ, একো দেবঃ সর্ব্বভূতেষু গূঢ়ঃ সর্ব্বব্যাপী সর্ব্বভূতান্তরাত্মা। কর্ম্মাধ্যক্ষঃ সর্ব্বভূতাধিবাসঃ সাক্ষী চেতা কেবলো নির্গুণশ্চেতি। সাক্ষিমাত্রেণ হেতুনা নিমিত্তেনানেনাধ্যক্ষত্বেন কৌন্তেয় জগৎ সচরাচরং ব্যক্তাব্যক্তাত্মকং বিপরিবর্ত্ততে সর্ব্বাবস্থাসু দৃশিকর্ম্মত্বাপত্তিনিমিত্তা হি জগতঃ সর্ব্বা প্রবৃত্তিরহমিদং ভোক্ষ্যে পশ্যামীদং শৃণোমীদং সুখমনুভবামি দুঃখমনুভবামি তদর্থ-

## গিরিকৃত টীকা।

ভয়াভাবো ধর্ম্মাদ্যসম্বন্ধে কারণমিত্যাহ অতোঽন্যস্যেতি। যদি কর্ম্মসু কর্ত্তৃত্বাভিমানো বা কস্যচিৎ কর্ম্মফলসংযোগো বা স্যাত্তত্রাহ অন্যথেতি ॥ ৯ ॥

ঈশ্বরে স্রষ্টৃত্বমৌদাসীন্যঞ্চ বিরুদ্ধমিতি শঙ্কতে তত্রেতি। পূর্ব্বগ্রন্থঃ সপ্তম্যর্থঃ। বিরোধপরিহারার্থমুত্তরশ্লোকমবতারয়তি তদিতি। তৃতীযাদ্বয়ং সমানাধিকরণমিত্যভ্যুপেত্য ব্যাচষ্টে ময়েত্যাদিনা। প্রকৃতিশব্দার্থমাহ মমেতি। তস্যা অপি জ্ঞানত্বং ব্যাবর্ত্তয়তি ত্রিগুণেতি। পরাভিপ্রেতং প্রধানং ব্যুদস্যতি অবিদ্যেতি। সাক্ষিত্বে প্রমাণমাহ তথা চেতি। মূর্ত্তিত্রয়াত্মনো ভেদং বারয়তি একইতি। অখণ্ডজাড্যং প্রত্যাহ দেবইতি। আদিত্যবত্তাটস্থ্যং প্রত্যাদিশতি সর্ব্বভূতেষ্বিতি। কিমিতি তর্হি সর্ব্বৈর্নোপলভ্যতে তত্রাহ গূঢ়ইতি। বুদ্ধ্যাদিবৎ পরিচ্ছিন্নত্বং ব্যবচ্ছিনত্তি সর্ব্বব্যাপতি। তর্হি নভোবদনাত্মত্বং নেত্যাহ সর্ব্বভূতেতি। তর্হি তত্র কর্ম্মতৎফলসম্বন্ধিত্বং স্যাত্তত্রাহ কর্ম্মেতি। সর্ব্বাধিষ্ঠানত্বমাহ সর্ব্বেতি। সর্ব্বেষু ভূতেষু সত্তাস্ফূর্ত্তিদত্বেন সংনিধির্ব্বাত্রোচ্যতে ন কেবলং কর্ম্মণামেবায়মধ্যক্ষোঽপি তু তদ্বতামপীত্যাহ সাক্ষীতি। দর্শনকর্ত্তৃত্বশঙ্কাং শাতয়তি চেতেতি। অদ্বিতীয়ত্বং কেবলত্বং। ধর্ম্মাধর্ম্মাদিরাহিত্যমাহ নির্গুণইতি। কিং বহুনা সর্ব্ববিশেষশূন্য ইতি চকারার্থঃ। উদাসীনস্যাপীশ্বরস্য সাক্ষিত্বমাত্রং নিমিত্তীকৃত্য জগদেতৎ পৌনঃপু-

## স্বামিকৃত টীকা।

ষাত্মম নাস্তি অত উদাসীনবদ্বর্ত্তমানস্য মে বন্ধং নোপপাদয়ন্তি, উদাসীনত্বে কর্ত্তৃত্বে চোদাসীনত্বানুপপত্তেরুদাসীনবৎস্থিতমিত্যুক্তং ॥ ৯ ॥

ময়াধ্যক্ষেণ প্রকৃতিঃ সূয়তে সচরাচরম্ ।
হেতুনানেন কৌন্তেয় জগদ্বিপরিবর্ত্ততে ॥ ১০ ॥

## শাঙ্করভাষ্যম্ ।

মিদং করিষ্যাম্যেতদর্থমিদং করিষ্য ইদং জ্ঞাস্যামীত্যাদ্যবগতিনিষ্ঠা অবগতিরবসানে, যোঽস্যাধ্যক্ষঃ পরমে ব্যোমন্নিত্যাদয়শ্চ মন্ত্রা এতমর্থং দর্শয়ন্তি, ততশ্চৈকস্য দেবস্য সর্ব্বাধ্যক্ষভূতচৈতন্যমাত্রস্য পরমার্থতঃ সর্ব্বভোগানভিসম্বন্ধিনোঽন্যস্য চেতনান্তরস্যাভাবে ভোক্তৃবস্ত্বস্যাভাবাৎ কিং নিমিত্তেয়ং সৃষ্টিরিত্যত্র প্রশ্নপ্রতিবচনেঽনুপপন্নে কোঽদ্ধা বেদ ক ইহ প্রাবোচত কুত আয়াতঃ কুত ইয়ং বিসৃষ্টিরিত্যাদিমন্ত্রবর্ণেভ্যো দর্শিতঞ্চ ভগবতাজ্ঞানেনাবৃতংজ্ঞানং তেন মুহ্যন্তি জন্তব ইতি ॥ ১০ ॥

## গিরিকৃত টীকা।

ন্যেন সর্গসংহারাবনুভবতীত্যাহ হেতুনেতি। কার্য্যবৎ কারণস্যাপি সাক্ষ্যধীনা প্রবৃত্তিরিতি বক্তুং ব্যক্তাব্যক্তাত্মকমিত্যুক্তং, সর্ব্বাবস্থাস্বিত্যনেন সৃষ্টিস্থিতিসংহারাবস্থা গৃহ্যন্তে। তথাপি জগতঃ স্বর্গাদিভ্যো ভিন্না প্রবৃত্তিঃ স্বাভাবিকী নেশ্বরায়ত্তেত্যাশঙ্কাহ দৃশীতি। ন হি দৃশা ব্যাপ্যত্বং বিনা জড়বর্গস্য কাপি প্রবৃত্তিরিতি হিশব্দার্থঃ। তামেব প্রবৃত্তিমুদাহরতি অহমিত্যাদিনা। ভোগ্যস্য বিষয়োপলম্ভাভাবাসম্ভবান্নানাবিধাং বিষয়োপলব্ধিং দর্শয়তি পশ্যামীতি। ভোগফলমিদানীং কথয়তি সুখমিতি। বিহিতপ্রতিষিদ্ধাচরণনিমিত্তং সুখং দুঃখঞ্চেত্যাহ তদর্থমিতি। ন চ বিমর্ষপূর্ব্বকং বিজ্ঞানং বিনানুষ্ঠানমিত্যাহ ইদমিতি। ইত্যাদ্যা প্রবৃত্তিবিতি সম্বন্ধঃ। সা চ প্রবৃত্তিঃ সর্ব্বা দৃক্কর্ম্মত্বমুররীকৃত্যেব বিবৃণোতি ইত্যুক্তং নিগময়তি অবগতীতি। তত্রৈব চ প্রবৃত্তেরবসানমিত্যাহ অবগতিরবসানইতি। পরস্যাধ্যক্ষত্বমাত্রেণ জগচ্চেষ্টেত্যত্র প্রমাণমাহ যোঽস্যেতি। অস্য জগতো যোঽধ্যক্ষো নির্ব্বিকারঃ স পরমে প্রকৃষ্টে হার্দে ব্যোম্নি স্থিতো নির্ব্বিকারঃ স পরমে প্রকৃষ্টে হার্দে ব্যোম্নি স্থিতো দুর্ব্বিজ্ঞেয়ইত্যর্থঃ। ঈশ্বরস্য সাক্ষিত্বমাত্রেণ স্রষ্টৃত্বে স্থিতে ফলিতমাহ ততশ্চেতি। কিংনিমিত্তা পরস্যেয়ং সৃষ্টির্নতাবদ্ভোগার্থা পরস্য পরমার্থতো ভোগাসম্বন্ধিত্বাত্তস্য সর্ব্বসাক্ষীভূতচৈতন্যমাত্রত্বান্নচান্যো ভোক্তা চেতনান্তরাভাবাদীশ্বরস্যৈকত্বাৎ চেতনস্যাভোক্তৃত্বান্ন চ সৃষ্টিরপবর্গার্থা তদ্বিরোধিত্বাদেবং প্রশ্নো বা তদনুরূপং প্রতিবচনং বা যুক্তং পরস্য

## স্বামিকৃত টীকা।

তদেবোপপাদয়তি ময়েতি। ময়া অধ্যক্ষেণ অধিষ্ঠাত্রা নিমিত্তভূতেন প্রকৃতিঃ সচরাচরং বিশ্বং সূয়তে জনয়তি, অনেন মদধিষ্ঠানেন হেতুনা ইদং জগদ্বিপরিবর্ত্ততে পুনঃ পুনর্জায়তে, সন্নিধিমাত্রেণাধিষ্ঠাতৃত্বাৎ কর্ত্তৃত্বমুদাসীনত্বঞ্চাবিরুদ্ধমিতি ভাবঃ ॥ ১০ ॥

অবজানন্তি মাং মূঢ়া মানুষীন্তনুমাশ্রিতম্।
পরং ভাবমজানন্তো মম ভূতমহেশ্বরম্ ॥ ১১ ॥

## শাঙ্করভাষ্যম্।

এবং মাং নিত্যশুদ্ধমুক্তস্বভাবং সর্ব্বজন্তূনামাত্মানমপ সন্তং অবজানন্ত্যবজ্ঞাং পরিভবং কুর্ব্বন্তি মাং মূঢ়া অবিবেকিনো মানুষীং মনুষ্যসম্বন্ধিনীং তনুং দেহমাশ্রিতং মনুষ্যদেহেন ব্যবহরন্তমিত্যেতৎ পরং প্রকৃষ্টং ভাবং পরমাত্মতত্ত্বমাকাশকল্পমাকাশাদপ্যন্তরতমমজানন্তো মম ভূতমহেশ্বরং সর্ব্বভূতানাং মহান্তমীশ্বরং স্বমাত্মানং ততশ্চ তস্য মমাবজ্ঞানভাবনেন হতাঃ বরাকাস্তে ॥ ১১ ॥

## গিরিকৃত টীকা।

মায়ানিবন্ধনে সর্গে তস্যানবকাশত্বাদিত্যর্থঃ। পরস্যাত্মনো দুর্ব্বিজ্ঞেয়ত্বে শ্রুতিমুদাহরতি কোঽদ্ধেতি। তস্মিন্ প্রবক্তাপি সংসারমণ্ডলে নাস্তীত্যাহ ক ইহেতি। জগতঃ সৃষ্টিকর্তৃত্বেন পরস্য জ্ঞেয়ত্বমাশঙ্ক্য কূটস্থাত্ততো ন সৃষ্টির্জাতেত্যাহ কুতইতি। ন হীয়ং বিবিধা সৃষ্টিরস্মাদপি কস্মাচ্চিদুপপদ্যতে অন্যস্য বস্তুনোঽভাবাদিত্যাহ কুতইতি। কথং তর্হি সৃষ্টিরিত্যাশঙ্ক্যাজ্ঞানাধীনেত্যাহ দর্শিতঞ্চেতি ॥ ১০ ॥

সর্ব্বাধ্যক্ষং সর্ব্বভূতাধিবাসো নিত্যমুক্তশ্চেত্বং তর্হি কিমিতি ত্বামেবাত্মত্বেন ভেদেন বা সর্ব্বৈন ভজন্তে তত্রাহ এবমিতি। বিপর্য্যস্তবুদ্ধিত্বং ভগবদবজ্ঞায়াং কারণমিত্যাহ মূঢ়া ইতি। ভগবতো মনুষ্যদেহসম্বন্ধাত্তস্মিন্ বিপর্য্যাসঃ সম্ভবতীত্যাহ মানুষীমিতি। অস্মদাদিবদ্দেহতাদাত্ম্যাভিমানং ভগবতো ব্যাবর্ত্তয়তি মনুষ্যেতি। ভগবন্তমবজানতামবিবেকে মূলাজ্ঞানং হেতুমাহ পরমিতি। ঈশ্বরাবজ্ঞানাৎ কিং ভবতীত্যপেক্ষায়াং তদবজ্ঞানপ্রতিবদ্ধবুদ্ধয়ঃ শোচ্যা ভবন্তীত্যাহ ততশ্চেতি। ভগবদবজ্ঞানাদেব হেতোরবজানন্তস্তে জন্তবো বরাকাঃ শোচ্যাঃ সর্ব্বপুরুষার্থবাহ্যাঃ স্যুরিতি সম্বন্ধঃ তত্র হেতুং সূচয়তি তস্যেতি। প্রকৃতস্য ভগবতোঽবজ্ঞানমনাদরণং নিন্দনম্বা তস্য ভাবনং পৌনঃপুন্যং তেন হতাস্তজ্জনিতদুরিতপ্রভাবাৎ প্রতিবদ্ধবুদ্ধয় ইত্যর্থঃ ॥ ১১ ॥

ভগবন্তমবজানতাং প্রশ্নপূর্ব্বকং শোচ্যত্বং বিশদয়তি কথমিতি। ভগবন্নিন্দাপরাণাং ন কাচিদপি প্রার্থনার্থবতীত্যাহ বৃথেতি। নমু ভগবন্তং নিন্দন্তোঽপি নিত্যং নৈমিত্তিকম্বা কর্ম্মানুতিষ্ঠন্তি তদনুষ্ঠানাচ্চ তেষাং প্রার্থনাঃ সার্থা ভবিষ্যন্তীতি নেত্যাহ তথেতি। পরিভব-

## স্বামিকৃত টীকা।

নন্বেবম্ভূতং পরমেশ্বরং ত্বাং কিমিতি কেচিন্নাদ্রিয়ন্তে তত্রাহ অবজানন্তীতি দ্বাভ্যাং। সর্ব্বভূতমহেশ্বররূপং মদীয়ং পরং ভাবং তত্ত্বমজানন্তো মূঢ়া মূর্খা মামবজানন্তি মামবমন্যন্তে, অবজ্ঞানে হেতুঃ শুদ্ধসত্ত্বময়ীমপি তনুং ভবেচ্ছাবশান্মনুষ্যাকারামাশ্রিতবন্তমিতি ॥ ১১ ॥

মোঘাশা মোঘকর্ম্মাণো মোঘজ্ঞানা বিচেতসঃ।
রাক্ষসীমাসুরীঞ্চৈব প্রকৃতিং মোহনীং শ্রিতাঃ॥ ১২॥

## শাঙ্করভাষ্যম্।

কথং মোঘাশেতি। মোঘাশা বৃথা আশা আশিষো যেষাং তে মোঘাশাস্তথা মোঘকর্ম্মাণো যানি চাগ্নিহোত্রাদীনি তৈরনুষ্ঠীয়মানানি কর্ম্মাণি তানি চ তেষাং ভগবৎপরিভবাৎ স্বাত্মভূতস্যাবজ্ঞানান্মোঘান্যেব নিষ্ফলানি কর্ম্মাণি ভবন্তীতি মোঘকর্ম্মাণস্তথা মোঘজ্ঞানাঃ মোঘং নিষ্ফলং জ্ঞানং যেষাং তে মোঘজ্ঞানাঃ জ্ঞানমপি তেষাং নিষ্ফলমেব স্যাৎ বিচেতসো বিগতবিবেকাশ্চ তে ভবন্তীত্যভিপ্রায়ঃ, কিঞ্চ তে ভবন্তি রাক্ষসীং রক্ষসাং প্রকৃতিং স্বভাবং আসুরীমসুরাণাঞ্চ প্রকৃতিং মোহনীং মোহকরীং দেহাত্মবাদিনীং শ্রিতা আশ্রিতাঃ ছিন্ধি ভিন্ধি পিব খাদ পরস্বমপহরেত্যেবংবদনশীলাঃ ক্রূরকর্ম্ম কুর্ব্বাণা ভবন্তীত্যর্থঃ, অসুর্য্যা নাম তে লোকা ইতি শ্রুতেঃ॥ ১২॥

যে পুনঃ শ্রদ্দধানাঃ ভগবদ্ভক্তিলক্ষণে মোক্ষমার্গে প্রবৃত্তাঃ মহাত্মানইতি। মহানক্ষুদ্রচিত্তা মামীশ্বরং পার্থ দৈবীং দেবানাং প্রকৃতিং শমদমদয়াশ্রদ্ধাদিলক্ষণামাশ্রিতাঃ

## গিরিকৃত টীকা।

স্তিরস্করণং, অবজ্ঞানমনাদরণং। তেষামপি শাস্ত্রার্থাবজ্ঞানবতাং তদ্ভাবা প্রার্থনার্থবত্ত্বমিত্যাশঙ্ক্যাহ তথা মোঘেতি। তথাপি যৌক্তিকবিবেকবশাত্তৎপ্রার্থনাসাফল্যমিত্যাশঙ্ক্যাহ বিচেতসইতি ন কেবলমুক্তবিশেষণবত্ত্বমেব তেষাং কিন্তু বর্ত্তমানদেহপাতাদনন্তরং তত্তদতিক্রূরযোনিপ্রাপ্তিশ্চ নিশ্চিতেত্যাহ কিঞ্চেতি। মোহকরীমিতি প্রকৃতিদ্বয়েঽপি তুল্যং বিশেষণং, ছিন্ধি ভিন্ধি পিব খাদেতি প্রাণিহিংসারূপো রক্ষসাং স্বভাবোঽসুরাণাং স্বভাবস্তু ন দেহিনো জুহুধি পরস্বমেবাপহরেত্যাদিরূপঃ, মোহো মিথ্যাজ্ঞানং। উক্তমেব স্ফুটয়তি ছিন্ধীতি॥ ১২॥

কে পুনর্ভগবন্তং ভজন্তে তানাহ যে পুনরিতি। মহান্ প্রকৃষ্টো যজ্ঞাদিভিঃ শোধিত

## স্বামিকৃত টীকা।

কিঞ্চ মোঘাশাইতি। মত্তোঽন্যদ্দেবতান্তরং ক্ষিপ্রং ফলং দাস্যতীত্যেবংভূতা মোঘা নিষ্ফলৈবাশা যেষাং তে, অতএব মদ্বিমুখত্বান্মোঘানি নিষ্ফলানি কর্ম্মাণি যেষাং তে, মোঘমেব নানাকুতর্কাশ্রিতং শাস্ত্রজ্ঞানং যেষাং তে অতএব বিচেতসো বিক্ষিপ্তচিত্তাঃ, সর্ব্বত্র হেতুঃ রাক্ষসীং তামসীং হিংসাদিপ্রচুরাং আসুরীঞ্চ রাজসীং কামদর্পাদিবহুলাং মোহনীং বুদ্ধিভ্রংশকরীং প্রকৃতিং স্বভাবং শ্রিতা আশ্রিতাঃ সন্তো মামবজানন্তীতি পূর্ব্বেণৈবান্বয়ঃ॥১২॥

কে তর্হি ত্বামারাধয়ন্তীত্যত আহ মহাত্মানইতি মহাত্মানঃ কামাদ্যনভিভূতচিত্তাঃ, অতএব অভয়ং সত্ত্বসংশুদ্ধিরিত্যাদিনা বক্ষ্যমাণাং দৈবীং প্রকৃতিং স্বভাবমাশ্রিতা

মহাত্মানস্তু মাং পার্থ দৈবীং প্রকৃতিমাশ্রিতাঃ।
ভজন্ত্যনন্যমনসো জ্ঞাত্বা ভূতাদিমব্যয়ম্ ॥ ১৩ ॥
সততং কীর্ত্তয়ন্তো মাং যতন্তশ্চ দৃঢ়ব্রতাঃ।
নমস্যন্তশ্চ মাং ভক্ত্যা নিত্যযুক্তা উপাসতে ॥ ১৪ ॥

---

## শাঙ্করভাষ্যম্

সন্তো ভজন্তি সেবন্তেঽনন্যমনসোঽনন্যচিত্তা জ্ঞাত্বা মাং ভূতাদিং ভূতানাং আশ্রয়মাদিকারণং বিয়দাদীনাং চাদিকারণমাশ্রয়মব্যয়ং ॥ ১৩ ॥

কথং সততমিতি। সততং সর্ব্বদা ভগবন্তং ব্রহ্মস্বরূপং মাং কীর্ত্তয়ন্তো যজন্তশ্চেন্দ্রিয়োপসংহারশমদমদয়াঽহিংসাদিলক্ষণৈঃ ধর্ম্মৈঃ প্রযতন্তশ্চ দৃঢ়ব্রতা দৃঢ়ং স্থিরমচাঞ্চল্যং ব্রতং যেষাং তে দৃঢ়ব্রতা নমস্যন্তশ্চ মাং হৃদয়েশয়মাত্মানং ভক্ত্যা নিত্যযুক্তাঃ সন্ত উপাসতে সেবন্তে ॥ ১৪ ॥

---

## গিরিকৃত টীকা।

আত্মা সত্ত্বং যেষামিতি ব্যুৎপত্তিমাশ্রিত্যাহ অক্ষুদ্রেতি। তুশব্দোঽবধারণে। প্রকৃতিং বিশিনষ্টি শমেতি। অনন্যস্মিন্ প্রত্যগ্ ভূতে ময়ি পরস্মিন্নেব মনো যেষামিতি ব্যুৎপত্ত্যা ব্যাকরোতি অনন্যচিত্তা ইতি। অজ্ঞাতে সেবানুপপত্তেঃ শাস্ত্রোপপত্তিভ্যামাদৌ জ্ঞাত্বা ততঃ সেবন্তে ইত্যাহ জ্ঞাত্বেতি। অব্যয়মবিনাশিনং ॥ ১৩ ॥

ভজনপ্রকারং পৃচ্ছতি কথমিতি। তৎপ্রকারমাহ সততমিতি। সর্ব্বদেতি শরণাবস্থা গৃহ্যন্তে, কীর্ত্তনং বেদান্তশ্রবণং প্রণবজপঞ্চ, ব্রতং ব্রহ্মচর্য্যাদি নমস্যন্তো মাং প্রতি চেতসা প্রহ্বীভবন্তো, ভক্ত্যা পরেণ প্রেম্ণা নিত্যযুক্তাঃ সন্তঃ সদা সংযুক্তাঃ ॥ ১৪ ॥

উপাসনপ্রকারভেদপ্রতিপিৎসয়া পৃচ্ছতি তে কেনেতি। তৎপ্রকারভেদোদীরণার্থং শ্লোকমবতারয়তি উচ্যত ইতি। ইজ্যতে পূজ্যতে পরমেশ্বরোঽনেনেতি প্রকৃতে জ্ঞানে যজ্ঞশব্দঃ, ঈশ্বরঞ্চেতি চকারোঽবধারণে। দেবতান্তরধ্যানত্যাগমপিশব্দসূচিতং দর্শয়তি

## স্বামিকৃত টীকা।

অতএব মদ্ব্যতিরেকেণ নাস্ত্যন্যস্মিন্ মনো যেষাং তে তু ভূতাদিং জগৎকারণং অব্যয়ং নিত্যঞ্চ মাং জ্ঞাত্বা ভজন্তি ॥ ১৩ ॥

তেষাং ভজনপ্রকারমাহ সততমিতি দ্বাভ্যাং। সততং সর্ব্বদা স্তোত্রমন্ত্রাদিভিঃ কীর্ত্তয়ন্তঃ কেচিন্মামুপাসতে সেবন্তে, দৃঢ়ানি ব্রতানি নিয়মা যেষাং তাদৃশাঃ সন্তো যতন্তশ্চ ঐশ্বর্য্যজ্ঞানাদিষু প্রযত্নং কুর্ব্বন্তঃ কেচিদ্ভক্ত্যা নমস্যন্তশ্চ প্রণমন্তঃ অন্যে নিত্যযুক্তা অনবরতং অবহিতাঃ সেবন্তে, ভক্ত্যেতি নিত্যযুক্তা ইতি চ কীর্ত্তনাদিষ্বপি দ্রষ্টব্যং ॥ ১৪ ॥

জ্ঞানযজ্ঞেন চাপ্যন্যে যজন্তো মামুপাসতে।
একত্বেন পৃথক্ত্বেন বহুধা বিশ্বতোমুখম্। ১৫ ॥
অহং ক্রতুরহং যজ্ঞঃ স্বধাহমহমৌষধম্।
মন্ত্রোঽহমহমেবাজ্যমহমগ্নিরহং হুতম্ ॥ ১৬ ॥

## শাঙ্করভাষ্যম্।

তে কেন কেন প্রকারেণোপাসত ইত্যুচ্যতে জ্ঞানেতি। জ্ঞানযজ্ঞেন জ্ঞানমেব ভগবদ্বিষয়ং যজ্ঞস্তেন জ্ঞানযজ্ঞেন যজন্তঃ পূজয়ন্তো মামীশ্বরং চান্যেঽন্যামুপাসনাং পরিত্যজ্য উপাসতে তচ্চ জ্ঞানমেকত্বেন একমেব পরং ব্রহ্মেতি পরমার্থদর্শনেন যজন্ত উপাসতে কেচিচ্চ পৃথক্ত্বেন আদিত্যচন্দ্রাদিভেদেন সএব ভগবান্ বিষ্ণুরাদিত্যাদিরূপেণাবস্থিত ইত্যুপাসতে কেচিদ্বহুধাবস্থিতঃ স এব ভগবান্ সর্ব্বতোমুখো বিশ্বরূপ ইতি বিশ্বরূপং সর্ব্বতোমুখং বহুধা বহুপ্রকারেণোপাসতে॥ ১৫ ॥

যদি বহুভিঃ প্রকারৈরুপাসতে কথং ত্বামেবোপাসত ইত্যত আহ অহমিতি। অহং ক্রতুঃ শ্রৌতঃ কর্ম্মভেদোঽহমেবাহং যজ্ঞঃ স্মার্ত্তঃ কিঞ্চ স্বধান্নমহং পিতৃভ্যো যদ্দীয়তে তৎস্বধা তথা

## গিরিকৃত টীকা।

অন্যামিতি। অন্যে চ ব্রহ্মনিষ্ঠামিতি যাবৎ। জ্ঞানযজ্ঞমেব বিভজতে তচ্চেতি। উত্তমাধিকারিণামুপাসনমুক্ত্বা মধ্যমানামধিকারিণামুপাসনপ্রকারমাহ কেচিচ্চেতি। তেষামেব অহং যজ্ঞঃ স্মার্ত্তঃ কিঞ্চ স্বধাহং পিতৃভ্যো যদ্দীয়তে তৎ স্বধা তথাহমৌষধং সর্ব্বপ্রাণিভির্যদদ্যতে॥ প্রকারান্তরেণোপাসনমুদীরয়তি কেচিদিতি। বহুপ্রকারেণাগ্ন্যাদিত্যাদিরূপেণেতি যাবৎ॥ ১৫ ॥

ভগবদেকবিষয়মুপাসনং তর্হি ন সিধ্যতীতি শঙ্কতে যদীতি প্রকারভেদমাদায় ধ্যায়ন্তোঽপি ভগবন্তমেব ধ্যায়ন্তি তস্য সর্ব্বাত্মকত্বাদিত্যাহ অত আহেতি। ক্রতুযজ্ঞশব্দয়োরনয়োরপৌনরুক্ত্যং দর্শয়ন্ ব্যাচাষ্টে শ্রৌত ইতি। ক্রিয়াকারকফলজ্ঞানং ভগবদতিরিক্তং নাস্তীতি সমুদয়ার্থঃ॥ ১৬ ॥

## স্বামিকৃত টীকা।

কিঞ্চ জ্ঞানেতি। বাসুদেবঃ সর্ব্বমিত্যেবং সর্ব্বাত্মদর্শনং জ্ঞানং তদেব যজ্ঞস্তেন জ্ঞানযজ্ঞেন মাং যজন্তঃ পূজয়ন্তোঽপ্যুপাসতে তত্রাপি কেচিদেকত্বেনাভেদভাবনয়া কেচিৎ পৃথগ্ভাবনয়া দাসোঽহমিতি কেচিত্তু বিশ্বতোমুখং সর্ব্বাত্মকং মাং বহুধা ব্রহ্মরুদ্রাদিরূপেণোপাসতে॥ ১৫ ॥

সর্ব্বাত্মতাং প্রপঞ্চয়তি অহং ক্রতুরিতি চতুর্ভিঃ। ক্রতুঃ শ্রৌতোঽগ্নিষ্টোমাদিঃ, যজ্ঞঃ

পিতাহমস্য জগতো মাতা ধাতা পিতামাহঃ।
বেদ্যং পবিত্রমোঙ্কার ঋক্ সাম যজুরেব চ॥ ১৭॥
গতির্ভর্ত্তা প্রভুঃ সাক্ষী নিবাসঃ শরণং সুহৃৎ।
প্রভবঃ প্রলয়ঃ স্থানং নিধানং বীজমব্যয়ম্॥ ১৮॥

---

## শাঙ্করভাষ্যম্।

অহমৌষধঃ সর্ব্বপ্রাণিভির্যদদ্যতে তদৌষধশব্দবাচ্যব্রীহিযবাদিসাধনমথবা স্বধেতি সর্ব্বপ্রাণিসাধারণমন্নমৌষধমিতি ব্যাধ্যুপশমার্থভেষজং মন্ত্রোঽহং যৎ পিতৃভ্যো দেবতাভ্যশ্চ হবির্দীয়তে তদহমেবাজ্যং হবিশ্চাহমগ্নির্যস্মিন্ হূয়তে সোঽপ্যগ্নিরহমেবাহং হুতং হবনকর্ম্ম চ॥ ১৬॥

কিঞ্চ পিতেতি। পিতা জনয়িতাহমস্য জগতো মাতা জনয়িত্রী ধাতা কর্ম্মফলস্য প্রাণিভ্যো বিধাতা পিতামহঃ পিতুঃ পিতা বেদ্যং বেদিতব্যং পবিত্রং পাবনং ওঙ্কারশ্চ ঋক্ সাম যজুরেব চ॥ ১৭॥

কিঞ্চ গতিবিতি। গতিঃ কর্ম্মফলং ভর্ত্তা পোষ্টা প্রভুঃ স্বামী সাক্ষী প্রাণিনাং কৃতাকৃতস্য নিবাসো যস্মিন্ প্রাণিনো নিবসন্তি শরণমার্ত্তানাং প্রপন্নানামার্ত্তিহরঃ সুহৃৎ প্রত্যুপকারানপেক্ষ

## গিরিকৃত টীকা।

ইতশ্চ ভগবতঃ সর্ব্বাত্মকত্বমনুমন্তব্যমিত্যাহ কিঞ্চেতি। পবিত্রং পূয়তেঽনেনেতি ব্যুৎপত্ত্যা পরিশুদ্ধিকারণং পুণ্যং কর্ম্মেত্যাহ পাবনমিতি। বেদিতব্যে ব্রহ্মণি বেদনসাধনমোঙ্কারস্তত্র প্রমাণমৃগাদি চ, চকাবাদথর্ব্বাঙ্গিরসো গৃহ্যন্তে॥ ১৭॥

ভগবতঃ সর্ব্বাত্মকত্বে হেত্বন্তরমাহ কিঞ্চেতি। গম্যত ইতি প্রকৃতিবিলয়পর্য্যন্তং কর্ম্মফলং গতিরিত্যাহ কর্ম্মেতি। পোষ্টা কর্ম্মফলস্যৈব প্রদাতা। কার্য্যকারণপ্রপঞ্চস্যাধিষ্ঠানমিত্যাহ নিবাস ইতি। শীর্য্যতে দুঃখমস্মিন্নিতি ব্যুৎপত্তিমাশ্রিত্যাহ শরণমিতি। প্রভবত্যস্মাজ্জগিদিতি বুৎপত্তিমাদায়োক্তং উৎপত্তিরিতি। কারণস্য কথমব্যয়ত্বমিত্যাশঙ্ক্যাহ

## স্বামিকৃত টীকা।

স্মার্ত্তঃ পঞ্চযজ্ঞাদিঃ, স্বধা পিত্র্যর্থং শ্রাদ্ধাদিঃ, ঔষধং ওষধিপ্রভবমন্নং ভেষজম্বা, মন্ত্রো যাজ্যপুরোধোবাক্যাদিঃ, আজ্যং হোমাদিসাধনং, অগ্নিরাহবনীয়াদিঃ, হুতং হোমঃ, এতৎ সর্ব্বমহমেব॥ ১৬॥

কিঞ্চ পিতাহমস্যেতি। ধাতা কর্ম্মফলবিধাতা, বেদ্যং জ্ঞেয়ং বস্তু, পবিত্রং শোধকং প্রায়শ্চিত্তাত্মকং বা, ওঙ্কারঃ প্রণবঃ, ঋগাদয়ো বেদাশ্চাহমেব স্পষ্টমন্যৎ॥ ১৭॥

কিঞ্চ গতিরিতি। গম্যতে ইতি গতিঃ ফলং, ভর্ত্তা পোষণকর্ত্তা প্রভুর্নিয়ন্তা সাক্ষী শুভাশুভদ্রষ্টা, নিবাসো ভোগস্থানং, শরণং রক্ষকঃ, সুহৃৎ কর্ত্তা, প্রকর্ষেণ ভবত্যনেনেতি

তপাম্যহমহং বর্ষং নিগৃহ্ণাম্যুৎসৃজামি চ।
অমৃতঞ্চৈব মৃত্যুশ্চ সদসচ্চাহমর্জ্জুন ॥১৯॥

## শাঙ্করভাষ্যম্।

উপকারী প্রভব উৎপত্তির্জ্জগতঃ, প্রলয়ঃ, প্রলীয়তে যস্মিন্ ইতি প্রলয়ঃ তথা স্থানং তিষ্ঠত্যস্মিন্নিতি নিধানং নিক্ষেপঃ কালান্তরোপভোগ্যং প্রাণিনাং বীজং প্ররোহকারণং প্ররোহধর্ম্মিণামব্যয়ং যাবৎ সংসারভাবিত্বাদব্যয়ং নহ্যবীজং কিঞ্চিৎ প্ররোহতি নিত্যঞ্চ প্ররোহদর্শনাদ্বীজসন্ততির্ন ব্যেতীত্যেব গম্যতে ॥ ১৮ ॥

কিঞ্চ তপামীতি। তপাম্যহমাদিত্যো ভূত্বা কৈশ্চিৎ রশ্মিভিস্তপামি অহং বর্ষং কৈশ্চিদ্রশ্মিভিরুৎসৃজামি উৎসৃজ্য পুনর্নিগৃহ্ণামি কৈশ্চিদ্রশ্মিভিরষ্টভির্ম্মাসৈঃ পুনরুৎসৃজামি প্রাবৃষি অমৃতঞ্চৈব দেবানাং মৃত্যুশ্চ মর্ত্ত্যানাং সৎ যস্য যৎ সম্বন্ধিতয়া বিদ্যমানং তদ্বিপরীতং অসচ্চৈবাহং অর্জ্জুন ন পুনরত্যন্তমেবাসদ্ভগবান্ স্বয়ং কার্য্যকারণে বা সদসতী যে পূর্ব্বোক্তৈঃ নিবৃত্তিপ্রকারৈরেকত্বপৃথক্ত্বাদিজ্ঞানৈর্যজ্ঞৈর্মাং পূজয়ন্ত উপাসতে জ্ঞানবিদস্তে যথাবিজ্ঞানং মামেব প্রাপ্নুবন্তি ॥ ১৯ ॥

---

## গিরিকৃত টীকা।

যাবদিতি। কারণমন্তরেণাপি কার্য্যং কদাচিদুদেষ্যতি কিং কারণেনেত্যাশঙ্ক্যাহ ন হীতি মাভূত্তর্হি সংসারদশায়ামেব কার্য্যোৎপত্তিরিত্যাশঙ্ক্যাহ নিত্যঞ্চেতি। কারণব্যক্তের্নাশমঙ্গীকৃত্য তদন্তমব্যক্তিশূন্যত্বং পূর্ব্বকালস্য নাস্তীতি সিদ্ধবৎকৃত্য বিশিনষ্টি বীজেতি ॥ ১৮ ॥

ইতশ্চ সর্ব্বাত্মত্বে ভগবতো ন বিবদিতব্যমিত্যাহ কিঞ্চেতি। আদিত্যাজ্জায়তে বৃষ্টিরিতি স্মৃতিমবষ্টভ্য ব্যাচষ্টে কৈশ্চিদিতি। বর্ষোৎসর্গনিগ্রহাবেকস্মৈকস্মিন্ কালে বিরুদ্ধৌ ইত্যাশঙ্ক্যাহ অষ্টভিরিতি। ঋতুভেদেন বর্ষস্য নিগ্রহোৎসর্গাবেককর্ত্তৃকাববিরুদ্ধাবিত্যর্থঃ। যস্য কারণস্য সম্বন্ধিত্বেন যৎ কার্য্যমভিব্যজ্যতে তদিহ সদিত্যুচ্যতে কারণসম্বন্ধেনানভিব্যক্তং কারণমেব অনভিব্যক্তনামরূপমসদিতি ব্যবহ্রিয়তে তদেতদাহ সদতি। শূন্যবাদং ব্যুদস্যতি ন পুনরিতি। ভগবতোঽত্যন্তাসত্বে কার্য্যকারণকল্পনা নিরধিষ্ঠানা ন তিষ্ঠেদিত্যর্থঃ।

## স্বামিকৃত টীকা।

প্রভবঃ স্রষ্টা, প্রলীয়তেঽনেনেতি প্রলয়ঃ সংহর্ত্তা, তিষ্ঠত্যস্মিন্নিতি স্থানমাধারঃ, নিধীয়তেঽস্মিন্নিতি নিধানং লয়স্থানং, বীজং কারণং তথাপ্যব্যয়মবিনাশি ন তু ব্রীহ্যাদিবীজবদ্বিনশ্বরমিত্যর্থঃ ॥ ১৮ ॥

কিঞ্চ তপাম্যহমিতি। আদিত্যাত্মনা স্থিত্বা নিদাঘকালে তপামি জগতস্তাপং করোমি, বৃষ্টিসময়ে চ বর্ষণমুৎসৃজামি বিমুঞ্চামি, কদাচিত্তু বর্ষং নিগৃহ্ণামি আকর্ষামি, অমৃতং

ত্রৈবিদ্যা মাং সোমপাঃপূতপাপা যজ্ঞৈরিষ্ট্বা স্বর্গতিং প্রার্থয়ন্তে।
তে পুণ্যমাসাদ্য সুরেন্দ্রলোকমশ্নন্তি দিব্যান্ দিবি দেবভোগান্ ॥২০॥

## শাঙ্করভাষ্যম্ ।

যে পুনরজ্ঞাঃ কামকামাঃ ত্রৈবিদ্যেতি। ত্রৈবিদ্যা ঋগযজুঃসামবিদঃ যাজ্ঞিকাঃ যে তে মাং বস্বাদিদেবরূপিণং ইষ্ট্বা সংপূজ্য যজ্ঞশেষং সোমপাঃ সোমং পিবন্তীতি সোমপাস্তেনৈব সোমপানেন তে পূতপাপাঃ শুদ্ধকিল্বিষা যজ্ঞৈরগ্নিষ্টোমাদিভিবিষ্ট্বা পূজয়িত্বা স্বর্গতিং স্বর্গগমনং স্বরেব গতিঃ স্বর্গতিস্তাং প্রার্থয়ন্তে যাচন্তে তে চ পুণ্যং পুণ্যফলমাসাদ্য সংপ্রাপ্য সুরেন্দ্রলোকং শতক্রতোঃ স্থানং অশ্নন্তি ভুঞ্জতে দিব্যান্ দিবি ভবান্ অপ্রাকৃতান্ দেবভোগান্ দেবানাং ভোগাস্তান্ ॥ ২০ ॥

## গিরিকৃত টীকা ।

তর্হি যথাশ্রুতং কার্য্যস্য সত্বং কারণস্য চাসত্ব মাস্থেয়মিত্যাশঙ্ক্য বাশব্দেন নিষেধতি কার্য্যেতি নহি কার্য্যস্যাত্যন্তিকং সত্বঃ বাচারম্ভণশ্রুতের্নাপীতরস্যাত্যন্তিকং অসত্বং কুতস্ত খল্বিত্যাদিশ্রুতেরিত্যর্থঃ। উক্তৈর্জ্ঞানযজ্ঞৈর্ভগবদভিধ্যানাভিনিবিষ্টবুদ্ধীনাং কিং ফলমিত্যাশঙ্ক্য সদ্যো বা ক্রমেণ বা মুক্তিবিত্যাহ যে ইতি ॥ ১৯ ॥

ভগবদ্ভক্তানামপি নিষ্কামাণামেব মুক্তিরিতি দর্শযিতুং সকামানাং পুংসাং সংসারমবতারয়তি যে পুনবিতি। তিস্রো বিদ্যা অধীয়ন্তে বিদন্তীতি বা তে ত্রৈবিদ্যা বেদবিদস্তদাহ ঋগিতি। বস্বাদীত্যাদিশব্দেন সবনদ্বয়েশানাদিত্যা রুদ্রাশ্চ গৃহ্যন্তে শুদ্ধকিল্বিষা নিরস্তপাপা ইতি যাবৎ ॥ ২০ ॥

## স্বামিকৃত টীকা ।

জীবনং মৃত্যুশ্চ নাশঃ সৎ স্থূলং দৃশ্যং অসচ্চ সূক্ষ্মমদৃশ্যং এতৎ সর্ব্বমহমেবেতি এবং মত্বা মামেব বহুধোপাসতে ইতি পূর্ব্বেণৈবান্বয়ঃ ॥ ১৯ ॥

তদেবমবজানন্তি মাং মূঢ়া ইত্যাদিশ্লোকদ্বয়েন ক্ষিপ্রফলাশয়া দেবতান্তরং যজন্তো মাং নাদ্রিয়ন্তইত্যভক্তা দর্শিতাঃ মহাত্মানস্তু মাং পার্থেত্যাদিনা চ ভক্তা উক্তাস্তত্রৈকত্বেন পৃথক্ত্বেন বা যে পরমেশ্বরং ন ভজন্তি তেষাং জন্মমৃত্যুপ্রবাহো দুর্বার ইত্যাহ ত্রৈবিদ্যা ইতিদ্বাভ্যাং। ঋগযজুঃসামলক্ষণাস্তিস্রো বিদ্যা যেষাং তে ত্রিবিদ্যাএব ত্রৈবিদ্যাঃ স্বার্থেহন্. তিস্রো বিদ্যা অধীয়ন্তে জানন্তীতি বা ত্রৈবিদ্যা বেদত্রয়োক্তকর্ম্মপরা ইত্যর্থঃ, বেদত্রয়বিহিতৈর্যজ্ঞৈর্মামিষ্ট্বা মমৈব রূপং দেবতান্তরমিত্যজানন্তোঽপি বস্তুত ইন্দ্রাদিরূপেণ মামেবেষ্ট্বা সংপূজ্য যজ্ঞশেষং সোমং পিবন্তীতি সোমপাস্তেনৈব পূতপাপাঃ শোধিতকল্মষাঃ সন্তঃ স্বর্গতিং স্বর্গং প্রতি গতিং যে প্রার্থয়ন্তে তে পুণ্যফলরূপং সুরেন্দ্রলোকং স্বর্গমাসাদ্য প্রাপ্য দিবি স্বর্গে দিব্যানুত্তমান্ দেবানাং ভোগানশ্নন্তি ভুঞ্জতে ॥২০॥

তে তং ভুক্ত্বা স্বর্গলোকং বিশালং ক্ষীণে পুণ্যে মর্ত্ত্যলোকং বিশন্তি।
এবং ত্রয়ীধর্ম্মমনুপ্রপন্না গতাগতং কামকামা লভন্তে ॥ ২১ ॥

## শাঙ্করভাষ্যম্।

তে তমিতি। তে তং ভুক্ত্বা স্বর্গলোকং বিশালং বিস্তীর্ণং ক্ষীণে পুণ্যে মর্ত্ত্যলোকমিমং বিশন্ত্যাবিশন্তি এবং হি যথোক্তেন প্রকারেণ ত্রয়ীধর্ম্মং কেবলং বৈদিকং কর্ম্মানুপ্রপন্নাস্তে গতাগতং গতঞ্চাগতঞ্চ গতাগতং গমনাগমনং কামকামাঃ কামং কাময়ন্ত ইতি কামকামা-লভন্তে গতাগতমেব ন তু স্বাতন্ত্র্যং কচিল্লভন্ত ইত্যর্থঃ ॥ ২১ ॥

## গিরিকৃত টীকা।

তর্হি স্বর্গপ্রাপ্তেবপি ভগবৎপ্রাপ্তিতুল্যতা ইত্যাশঙ্ক্যাহ তে তমিতি। পুণ্যে স্বর্গপ্রাপ্তি-হেতাবিতি যাবৎ, প্রসিদ্ধোঽর্থো হিশব্দঃ, ত্রয়াণাং হোত্রাদীনাং বেদত্রয়বিহিতানাং ধর্ম্মাণাং সমাহারস্ত্রিধর্ম্মং তদেব ত্রৈধর্ম্মং তদনুপ্রপন্নাস্তদনুগতা ইতি যাবৎ। কামকামানাং গমনা-গমনদ্বারা কামতৎফলাপ্তিশ্চেদিষ্টমেব চেষ্টিতমিত্যাশঙ্ক্যাহ গতেতি॥ ২১ ॥

ফলমনভিসন্ধায় ত্বামেবারাধায়তাং সম্যগ্দর্শননিষ্ঠানামত্যন্তনিষ্কামানাং কথং যোগক্ষমৌ স্যাতামিত্যাশঙ্ক্যাহ যে পুনরিতি। তেষাং যোগক্ষেমং বহামীত্যুত্তরত্র সম্বন্ধঃ। যেভ্যোঽ-ন্যো ন বিদ্যত ইতি ব্যুৎপত্তিমাশ্রিত্যাহ অপৃথগিতি। কার্য্যস্যেব কারণে কর্ম্মতাদাত্ম্যং ব্যাবর্ত্তয়তি পরমিতি। অহমেব বাসুদেবঃ সর্ব্বাত্মা ন মত্তোঽন্যৎ কিঞ্চিদস্তীতি জ্ঞাত্বা তমেব প্রত্যঞ্চং সদা ধ্যায়ন্ত ইত্যাহ চিন্তয়ন্ত ইতি। প্রাকৃতান্ ব্যাবর্ত্ত্য মুখ্যানধিকারিণো নির্দ্দি-শতি সংন্যাসিন ইতি। পর্য্যুপাসতে পরিতঃ সর্ব্বতোঽনবচ্ছিন্নতয়া পশ্যন্তীত্যর্থঃ। নিত্যা-ভিযুক্তানাং নিত্যমনবরতমাদরেণ ধ্যানে ব্যাপৃতানামিত্যাহ সততেতি। যোগশ্চ ক্ষেমশ্চ যোগক্ষেমং তত্রাপুনপুরুক্তমর্থমাহ যোগইতি। কিমর্থং পরমার্থদর্শিনাং যোগক্ষেমং বহামী-ত্যাশঙ্ক্যাহ জ্ঞানী ত্বিতি। অতস্তেষাং যোগক্ষেমং বহামি ইতি সম্বন্ধঃ। সম্যগ্দর্শননিষ্ঠা নামেব যোগক্ষেমং বহতি ভগবানিতি বিশেষণমমৃষ্যমাণঃ শঙ্কতে নন্বিতি। অন্যেষামপি ভক্তানাং ভগবান্ যোগক্ষেমং বহতীত্যেতদঙ্গীকরোতি সত্যমিতি। তর্হি ভক্তেষু জ্ঞানি সু চ বিশেষো নাস্তীতি পৃচ্ছতি কিং ত্বিতি। তত্র বিশেষং প্রতিজ্ঞায় বিবৃণোতি অয়মিত্যা-

## স্বামিকৃত টীকা।

ততশ্চ তে তমিতি। তে স্বর্গকামাস্তং প্রার্থিতং বিপুলং স্বর্গলোকং তৎসুখং ভুক্ত্বা ভোগপ্রাপকে পুণ্যে ক্ষীণে সতি মর্ত্ত্যলোকং বিশন্তি, পুনরপ্যেবমেব বেদত্রয়বিহিতং ধর্ম্ম-মনুগতাঃ কামকামা ভোগান্ কাময়মানা গতাগতং যাতায়াতং লভন্তে ॥ ২১ ॥

মদ্ভক্তাস্তু মৎপ্রসাদেন কৃতার্থা ভবন্তীত্যাহ অনন্যা ইতি। অনন্যা নাস্তি মদ্ব্যতিরেকেণা-ন্যৎ কাম্যং যেষাং তে তথাভূতা যে জনা মাং চিন্তয়ন্তঃ সেবন্তে তেষান্তু নিত্যাভিযুক্তানাং

অনন্যাশ্চিন্তয়ন্তো মাং যে জনাঃ পর্য্যুপাসতে।
তেষাং নিত্যাভিযুক্তানাং যোগক্ষেমং বহাম্যহম্ ॥ ২২ ॥
যেঽপ্যন্যদেবতাভক্তা যজন্তে শ্রদ্ধায়ান্বিতাঃ।
তেঽপি মামেব কৌন্তেয় যজন্ত্যবিধিপূর্ব্বকম্ ॥ ২৩ ॥

## শাঙ্করভাষ্যম্।

যে পুনঃ নিষ্কামাঃ সম্যগ্দর্শিনঃ অনন্যা ইতি। অনন্যা অপৃথগ্ভূতাঃ পরং দেবং নারায়ণং আত্মত্বেন গতাঃ সন্তশ্চিন্তয়ন্তো মাং যে জনাঃ সংন্যাসিনঃ পর্য্যুপাসতে তেষাং পরমার্থদর্শিনাং নিত্যাভিযুক্তানাং সততাভিযোগিনাং যোগক্ষেমং যোগোঽপ্রাপ্তস্য প্রাপনং ক্ষেমস্তদ্রক্ষণং তদুভয়ং বহামি প্রাপয়াম্যহং জ্ঞানী ত্বাত্মৈব মে মতং স চ মম প্রিয়ো যস্মাত্তস্মাত্তে মমাত্মভূতাঃ প্রিয়াশ্চেতি, নন্বন্যেষামপি ভক্তানাং যোগক্ষেমং বহত্যেব ভগবান্ সত্যমেবং বহত্যেব কিন্ত্বয়ং বিশেষোঽন্যে যে ভক্তাস্তে স্বাত্মার্থং স্বয়মপি যোগক্ষেমমীহন্তে অনন্যদর্শিনস্তু নাত্মার্থং যোগক্ষেমমীহন্তে ন হি তে জীবিতে মরণে বাত্মনো গৃদ্ধিং কুর্ব্বন্তি কেবলমেব ভগবচ্ছরণাস্তে অতো ভগবানেব তেষাং যোগক্ষেমং বহতীতি ॥২২ ॥

নন্বন্যা অপি দেবতাস্ত্বমেব চেত্তদ্ভক্তাশ্চ ত্বামেব ভজন্তে সত্যমেবং যেঽপীতি। যে অন্যদেবতাভক্তা অন্যাসু দেবতাসু ভক্তা অন্যদেবতাভক্তাঃ সন্তো যজন্তে পূজয়ন্তি শ্রদ্ধয়ান্বি-

## গিরিকৃত টীকা।

দিনা। যোগক্ষেমমুদ্দিশ্য স্বয়মীহন্তে চেষ্টাং কুর্ব্বন্তীতি যাবৎ। আত্মবিদাং স্বার্থযোগক্ষেমমুদ্দিশ্য চেষ্টাভাবং স্পষ্টয়তি ন হীতি। গৃদ্ধিবপেক্ষা কামানামিত্যেতৎ। জ্ঞানিনাং তর্হি সর্ব্বত্রনাস্থেত্যাশঙ্ক্যাহ কেবলমিতি। তেষাং তদেকশরণত্বে ফলিতমাহ অত ইতি। ইতি শব্দো বিশেষশব্দেন সম্বধ্যতে ॥ ২২ ॥

তত্তদ্দেবতাত্মনা পরস্যৈবাত্মনঃ স্থিত্যভ্যুপগমাদ্দেবতান্তরপরাণামপি ভগবচ্ছরণত্বাবিশেষাত্তদেকনিষ্ঠত্বমকিঞ্চিৎকরমিতি মন্বানঃ শঙ্কতে নন্বিতি। উক্তমঙ্গীকৃত্য পরিহরতি সত্য-

## স্বামিকৃত টীকা।

সর্ব্বথা মদেকনিষ্ঠানাং যোগং ধনাদিলাভং ক্ষেমঞ্চ তৎপালনং, মোক্ষং বা, তৈরপ্রার্থিতমপি অহমেব বহামি প্রাপয়ামি ॥ ২২ ॥

নতু চ ত্বদ্ব্যতিরেকেণ বস্তুতো দেবতান্তরস্যাভাবাদিন্দ্রাদিসেবিনোঽপি ত্বদ্ভক্তা এবেতি কথং তে গতাগতং লভেরংস্তত্রাহ যেঽপীতি। শ্রদ্ধয়োপেতাঃ সন্তো যে জনা অন্যদেবতা ইন্দ্রাদিরূপা যজন্তে তেঽপি মামেব যজন্তীতি সত্যং কিন্তু অবিধিপূর্ব্বকং মোক্ষপ্রাপকং বিধিং বিনা যজন্তি অতস্তে পুনরাবর্ত্তন্তে ॥ ২৩ ॥

অহং হি সর্ব্বযজ্ঞনাং ভোক্তা চ প্রভুরেব চ।
ন তু মামভিজানন্তি তত্ত্বেনাতশ্চ্যবন্তি তে ॥ ২৪ ॥

## শাঙ্করভাষ্যম্

ক্যবুদ্ধ্যা অন্বিতা অনুগতাস্তেঽপি মামেব যজন্ত্যবিধিপূর্ব্বকমবিধিরজ্ঞানং তৎপূর্ব্বকং অজ্ঞানপূর্ব্বকং যজন্তে ইত্যর্থঃ ॥ ২৩ ॥

কস্মাত্তেঽবিধিপূর্ব্বকং যজন্তে ইত্যুচ্যতে যস্মাৎ অহমিতি। অহং হি সর্ব্বযজ্ঞানাং শ্রৌতানাং স্মার্ত্তানাঞ্চ সর্ব্বেষাং যজ্ঞানাং দেবাত্মত্বেন ভোক্তা চ প্রভুরেব চ মৎস্বামিকো যজ্ঞোঽধিযজ্ঞোঽহমেবাত্রেতি চোক্তং তথা ন তু মামভিজানন্তি তত্ত্বেন যথাবদতশ্চাবিধিপূর্ব্বকমিষ্ট্বা যাগফলাৎ চ্যবন্তি তে ॥ ২৪ ॥

## গিরিকৃত টীকা।

মিত্যাদিনা দেবতান্তরযাজিনাং ভগবদ্যাজিভ্যো বিশেষমাহ অবিধীতি। তদ্ব্যাকরোতি অবিধিরিতি ॥ ২৩ ॥

ননু বস্বাদিত্যেন্দ্রাদিজ্ঞানপূর্ব্বকমেব তদ্ভক্তাস্তদ্যাজিনো ভবন্তীতি কথমবিধিপূর্ব্বকং তেষাং যজনমিতি শঙ্কতে কস্মাদিতি। দেবতান্তরযাজিনাং যজনমবিধিপূর্ব্বকমিত্যত্র হেত্বর্থত্বেন শ্লোকদ্বয়মুত্থাপয়তি উচ্যতইতি। সর্ব্বেষাং দ্বিবিধানাং যজ্ঞানাং বস্বাদিদেবতাত্বেনাহমেব ভোক্তা স্বেনান্তর্যামিরূপেণ প্রভুশ্চাহমেবেতি প্রসিদ্ধমেতদিতি হিশব্দঃ। প্রভুরেব চেত্যুক্তং বিবৃণোতি মৎস্বামিকো হীতি। তত্র পূর্ব্বাধ্যায়গতবাক্যং প্রমাণয়তি অধিযজ্ঞোঽহমিতি। তথাপি দেবতান্তরযাজিনাং যজনমবিধিপূর্ব্বকমিতি কুতঃ সিদ্ধং তত্রাহ তথা ইতি। ময্যেব যজ্ঞেষু ভোক্তৃত্বে প্রভুত্বে চ সতীতি যাবৎ। তয়োর্ভোক্তৃপ্রভ্বোর্ভাবস্তত্ত্বং তেন ভোক্তৃত্বেন প্রভুত্বেন চ মাং যথাবদ্যতো ন জানন্তি অতো ভোক্তৃত্বাদিনা মমাজ্ঞানান্ময়ি অনর্পিতকর্ম্মাণশ্চাবর্ত্তন্তে কর্ম্মফলাদিত্যাহ অতশ্চেতি ॥ ২৪ ॥

যদ্যন্যদেবতাভক্তা ভগবত্তত্ত্বাজ্ঞানাৎ কর্ম্মফলাচ্চ্যবন্তে তর্হি তেষাং দেবতাযজনমকিঞ্চিৎকরমিত্যাশঙ্ক্যাহ যেঽপীতি। দেবান্তরযাজিনামনাবৃত্তিফলাভাবেঽপি তত্তদ্দেবতাযাগানুরূপফলপ্রাপ্তিধ্রৌব্যান্ন তদকিঞ্চিৎকরমিত্যর্থঃ। দেবান্তরযাজিনামাবশ্যকং তৎ ফলমাশঙ্ক্য-

## স্বামিকৃত টীকা।

এতদেব বিবৃণোতি অহমিতি। সর্ব্বেষাং যজ্ঞানাং তত্তদ্দেবতারূপেণাহমেব ভোক্তা প্রভুশ্চ স্বামী ফলদাতাপ্যহমেবেত্যর্থঃ, এবম্ভূতং মাং তে তত্ত্বেন যথাবন্নাভিজানন্তি অতশ্চ্যবন্তি প্রচ্যবন্তে পুনরাবর্ত্তন্তে, যে তু সর্ব্বদেবতাসু মামেবান্তর্যামিনং পশ্যন্তো যজন্তি তে তু নাবর্ত্তন্তে ॥ ২৪ ॥

যান্তি দেবব্রতা দেবান্ পিতৄন্ যান্তি পিতৃব্রতাঃ।
ভূতানি যান্তি ভূতেজ্যা যান্তি মদ্‌যাজিনোঽপি মাম্ ॥ ২৫ ॥
পত্রং পুষ্পং ফলং তোয়ং যো মে ভক্ত্যা প্রয়চ্ছতি।
তদহং ভক্ত্যুপহৃতমশ্নামি প্রয়তাত্মনঃ ॥ ২৬ ॥

## শাঙ্করভাষ্যম্।

যেঽপ্যন্যদেবতা ভক্তিমন্তেনাবিধিপূর্ব্বকং যজন্তে তেষামপি যাগফলমবশ্যম্ভাবিকং কথং যান্তীতি। যান্তি গচ্ছন্তি দেবব্রতা দেবেষু ব্রতং নিয়মো ভক্তিশ্চ যেষাং তে দেবব্রতা দেবান্ যান্তি পিতৄনগ্নিষ্বাত্তাদীন্ যান্তি পিতৃব্রতাঃ শ্রাদ্ধাদিক্রিয়াপরাঃ পিতৃভক্তাঃ, ভূতানি বিনায়কমাতৃগণচতুর্ভগিন্যাদানি যান্তি ভূতেজ্যা ভূতানাং পূজকাঃ যান্তি মদ্‌যাজিনো মদ্‌যজনশীলা বৈষ্ণবা মামেব যান্তি সমানেঽপ্যায়াসে মামেব ন ভজন্তেঽজ্ঞানাত্তেন তেঽল্পফলভাজো ভবন্তীত্যর্থঃ ॥ ২৫ ॥

ন কেবলং মদ্ভক্তানামনাবৃত্তিলক্ষণমনন্তফলমুক্তং সুখারাধনশ্চাহং কথং পত্রমিতি। পত্রং পুষ্পং ফলং তোয়মুদকং যো মে মহ্যং ভক্ত্যা প্রয়চ্ছতি তদহং পত্রাদি ভক্ত্যোপহৃতং ভক্তিপূর্ব্বকং প্রাপিতং ভক্ত্যুপহৃতমশ্নামি গৃহ্লামি প্রয়তাত্মনঃ শুদ্ধবুদ্ধেঃ ॥ ২৬ ॥

## গিরিকৃত টীকা।

পূর্ব্বকমুদাহরতি কথমিত্যাদিনা। নিয়মো বল্যুপহারপ্রদক্ষিণপ্রহ্বীভাবাদিরিত্যর্থঃ। দেবতান্তরারাধনস্যান্তবৎফলমুক্ত্বা ভগবদারাধনস্যানন্তফলত্বমাহ যান্তীতি। ভগবদারাধনস্যানন্তফলত্বে দেবতান্তরারাধনং ত্যক্ত্বা ভগবদারাধনমেব যুক্তমায়াসসাম্যাৎ ফলাতিরেকাচ্চেত্যাশঙ্ক্যাহ সমানেঽপীতি। অজ্ঞানাধীনত্বেন দেবতান্তরারাধনবতাং ফলতো ন্যূনতাং দর্শয়তি তেনেতি ॥ ২৫ ॥

অনন্তফলত্বাদ্ভগবদারাধনমেব কর্ত্তব্যমিত্যুক্তং সুকরত্বাচ্চ তথেত্যাহ ন কেবলমিতি। ভগবদারাধনস্য সুকরত্বমেব প্রশ্নপূর্ব্বকং প্রপঞ্চয়তি কথমিত্যাদিনা। যদ্ধি পুষ্পাদিকং

## স্বামিকৃত টীকা।

তদেবোপপাদয়তি যান্তীতি। দেবেষ্বিন্দ্রাদিষু ব্রতং নিয়মো যেষাং তে দেবব্রতা দেবান্‌যান্তি অতঃ পুনরাবর্ত্তন্তে পিতৃষু ব্রতং যেষাং শ্রদ্ধাদিক্রিয়াপরাণাং তে পিতৄন্ যান্তি, ভূতেষু বিনায়কমাতৃগণাদিষু ইজ্যা পূজা যেষাং তে ভূতেজ্যা ভূতানি যান্তি, মাং যষ্টুং শীলং যেষাং তে মদ্যাজিনস্তে তু মামক্ষয়ং পরমানন্দস্বরূপং যান্তি ॥ ২৫ ॥

তদেবং স্বভক্তানামক্ষয়ফলমুক্ত্বা অনায়াসত্বঞ্চ স্বভক্তের্দর্শয়তি পত্রমিতি। পত্রপুষ্পাদিমাত্রমপি মহ্যং ভক্ত্যা যঃ প্রয়চ্ছতি তস্য প্রয়তাত্মনঃ শুদ্ধচিত্তস্য নিষ্কামভক্তস্য তৎ পত্রপুষ্পা-

যৎ করোষি যদশ্নাসি যজ্জুহোষি দদাসি যৎ ।
যত্তপস্যসি কৌন্তেয় তৎ কুরুষ্ব মদর্পণম্ ॥ ২৭ ॥
শুভাঽশুভফলৈরেবং মোক্ষ্যসে কর্ম্মবন্ধনৈঃ ।
সন্ন্যাসযোগযুক্তাত্মা বিমুক্তো মামুপৈষ্যসি ॥ ২৮ ॥

## শাঙ্করভাষ্যম্ ।

যতএবমতঃ যৎ করোষীতি । যৎ করোষি যদাচরসি শাস্ত্রীয়ং কর্ম্ম স্বতঃ প্রাপ্তং যদশ্নাসি যৎ খাদসি যদ্ জুহোষি হবনং নির্ব্বর্ত্তয়সি শ্রৌতং স্মার্ত্তং বা যদ্দদাসি প্রয়চ্ছসি ব্রাহ্মণাদিভ্যো হিরণ্ময়পাত্রবস্ত্রাদি যত্তপস্যসি কৌন্তেয় তৎ কুরুষ্ব মদর্পণং মৎসমর্পণং ॥ ২৭ ॥

এবং কুর্ব্বতস্তব যদ্ভবতি তচ্ছৃণু শুভাশুভফলৈরিতি । শুভাশুভফলৈরেবং শুভাশুভে

## গিরিকৃত টীকা ।

ভক্তিপূর্ব্বকং মদর্থমর্পিতং তেনায়ং শুদ্ধচেতাঃ তপস্বী মামারাধয়তীত্যহমবধারয়ামীত্যাহ পত্রমিত্যাদিনা ॥ ২৬ ॥

তদারাধনস্য সুকরত্বে তদেবাবশ্যকমিত্যাহ যত ইতি । স্বতঃ শাস্ত্রাদৃতে প্রাপ্তং গমনাদীতি যাবৎ । যদশ্নাসি যং কিঞ্চিদ্ভোগং ভুংক্ষে । হবনস্য স্বতন্ত্রত্বং বারয়তি শ্রৌতমিতি । মৎসমর্পণং তৎ সর্ব্বং মহ্যং সমর্পয়েত্যর্থঃ ॥ ২৭ ॥

কিমতো ভবতি তদাহ এবমিতি । ভগবদর্পণবুদ্ধ্যা সর্ব্বকর্ম্ম কুর্ব্বতো জীবন্মুক্তস্য প্রারব্ধকর্ম্মাবসানে বিদেহকৈবল্যমাবশ্যকমিত্যাহ শুভেত্যাদিনা । ভগবদর্পণকারণান্মুক্তিঃ সংন্যাসযোগাচ্চেতি সাধনদ্বয়শঙ্কাং শাতয়তি সোঽয়মিতি ॥ ২৮ ॥

## স্বামিকৃত টীকা ।

দিকং ভক্ত্যা তেনোপহৃতং সমর্পিতমহমশ্নামি প্রাপ্নোমি প্রীত্যা গৃহ্লামি, ন হি মহাবিভূতিপতেঃ পরমেশ্বরস্য মম ক্ষুদ্রদেবতানামিব বহুবিত্তসাধ্যযাগাদিভিঃ পরিতোষঃ স্যাৎ কিন্তু ভক্তিমাত্রেণ অতো ভক্তেন সমর্পিতং যৎকিঞ্চিৎ পত্রাদিমাত্রমপি তদনুগ্রহার্থমেবাশ্নামীতিভাবঃ ॥ ২৬ ॥

ন চ ফলপুষ্পাদিকমপি যজ্ঞার্থং পশুসোমাদিদ্রব্যবন্মদর্থমেবোদ্যমৈরাপাদ্য সমর্পণীয়ং কিন্তর্হি যৎ করোষীতি । স্বভাবতঃ শাস্ত্রতো বা যৎকিঞ্চিৎ কর্ম্ম করোষি তথা যদশ্নাসি যজ্জুহোষি যদ্দদাসি যচ্চ তপস্যসি তপঃ করোষি তৎ সর্ব্বং ময্যর্পিতং যথা ভবতি এবং কুরুষ্ব ॥ ২৭ ॥

এবঞ্চ যৎ ফলং প্রাপ্স্যসি তচ্ছৃণু ইত্যাহ শুভাশুভেতি । এবং কুর্ব্বন্ কর্ম্মবন্ধনৈঃ কর্ম্মনিমিত্তৈরিষ্টানিষ্টৈশ্চ ফলৈর্মুক্তো ভবিষ্যসি কর্ম্মণাং ময়ি সমর্পিতত্বেনতব তৎফলসম্বন্ধা-

সমোঽহং সর্ব্বভূতেষু ন মে দ্বেষ্যোঽস্তি ন প্রিয়ঃ।
যে ভজন্তি তু মাং ভক্ত্যা ময়ি তে তেষু চাপ্যহম্ ॥ ২৯ ॥

## শাঙ্করভাষ্যম্।

ইষ্টানিষ্টফলে যেষাং তানি শুভাশুভফলানি কর্ম্মাণি তৈঃ শুভাশুভফলৈঃ কর্ম্মবন্ধনৈরেবং মৎসমর্পণং কুর্ব্বন্ মোক্ষ্যসে সোঽয়ং সংন্যাসযোগো নাম সংন্যাসশ্চাসৌ মৎসমর্পণতয়া কর্ম্মকর্ত্তৃত্বাদ্যোগশ্চাসাবিতি তেন সংন্যাসযোগেন যুক্ত আত্মান্তঃকরণং যস্য তব স ত্বং সংন্যাসযোগযুক্তাত্মা সন্ বিমুক্তঃ কর্ম্মবন্ধনৈর্জীবন্নেব পতিতে চাস্মিন্ শরীরে মামুপৈষ্যস্যাগমিষ্যসি ॥ ২৮ ॥

রাগদ্বেষবান্ তর্হি ভগবান্ যতো ভক্তাননুগৃহ্লাতি নেতরানিতি তন্ন সমোঽহমিতি। সমঃ তুল্যোঽহং সর্ব্বভূতেষু ন মে দ্বেষ্যোঽস্তি ন প্রিয়ঃ অগ্নিবদহং দূরস্থানাং যথাগ্নিঃ শীতং নাপনয়তি সমীপমুপসর্পতামপনয়তি তথাহং ভক্তাননুগৃহ্লামি নেতরান্ যে ভজন্তি তু মামীশ্বরং ভক্ত্যা ময়ি তে স্বভাবতএব ন মম রাগনিমিত্তং ময়ি বর্ত্তন্তে তেষু চাপ্যহং স্বভাবতএব বর্ত্তে নেতরেষু নৈতাবতা তেষু দ্বেষো মম ॥ ২৯ ॥

## গিরিকৃত টীকা।

ভগবতো রাগদ্বেষবত্ত্বেনানীশ্বরত্বমাশঙ্ক্য পরিহরতি রাগেত্যাদিনা। তর্হি ভগবদ্ভজনমকিঞ্চিৎকরমিত্যাশঙ্ক্যাহ অগ্নিবদিতি। তৎ প্রপঞ্চয়তি যথেতি। ভক্তানভক্তাংশ্চানুগৃহ্লতোঽননুগৃহ্লতশ্চ ভগবতো ন কথং রাগাদিমত্ত্বমিত্যাশঙ্ক্যাহ যে ভজন্তীতি। যে হি বর্ণাশ্রমাদিধর্ম্মৈর্মাং ভজন্তি তে তেনৈব ভজনেনাচিন্ত্যমাহাত্ম্যেন পবিশুদ্ধবুদ্ধয়ো ময়ি মৎসমীপে বর্ত্তন্তে মদভিব্যক্তিযোগ্যচিত্তা ভবন্তি, তুশব্দোঽস্য বিশেষস্য দ্যোতনার্থং, তেষু চ সমীপে সমক্ষং তেষামহমপি স্বভাবতো বর্ত্তমানস্তদনুগ্রহপরো ভবামি যথা ব্যাপকমপি সাবিত্র্যং তেজঃ স্বচ্ছে দর্পণাদৌ প্রতিফলতি তথা পরমেশ্বরোঽবর্জনীয়তয়া ভক্তিনিরস্তসমস্তকলুষসত্ত্বেষু পুরুষেষু সন্নিধত্তে দৈবীং প্রকৃতিমাশ্রিতা মাং ভজন্তীত্যুক্তত্বাদিত্যর্থঃ ॥ ২৯ ॥

## স্বামিকৃত টীকা।

নুপপত্তেঃ, তৈশ্চ বিমুক্তঃ সন্ সন্ন্যাসযোগযুক্তাত্মা সন্ন্যাসঃ কর্ম্মণাং মদর্পণং সএব যোগস্তেন যুক্ত আত্মা চিত্তং যস্য তথাভূতস্ত্বং মাং প্রাপ্স্যসীত্যর্থঃ ॥ ২৮ ॥

যদি তু ভক্তেভ্যএব মোক্ষং দদাসি নাভক্তেভ্যস্তর্হি তবাপি কিং রাগদ্বেষাদিকৃতং বৈষম্যমস্তি নেত্যাহ সমোঽহমিতি। সর্ব্বেষু ভূতেম্বহং সমঃ অতো মম প্রিয়শ্চ দ্বেষ্যশ্চ নাস্ত্যেব, এবং সত্যপি যে মাং ভজন্তি তে ভক্ত্যা ময়ি বর্ত্তন্তে অহমপি তেম্বনুগ্রাহকতয়া বর্ত্তে, অয়ং ভাবঃ যথাগ্নেঃ স্বসেবকেম্বেব তমঃশীতাদিদুঃখমপাকুর্ব্বতোঽপি ন বৈষম্যং, যথা বা কল্পবৃক্ষস্য, তথৈব ভক্তপক্ষপাতিনোঽপি মম বৈষম্যং নাস্ত্যেব কিন্তু মদ্ভক্তেরেবায়ং মহিমেতি। ২৯।

অপি চেৎ সুদুরাচারো ভজতে মামনন্যভাক্।
সাধুরেব স মন্তব্যঃ সম্যগ্ব্যবসিতো হি সঃ ॥ ৩০ ॥
ক্ষিপ্রং ভবতি ধর্ম্মাত্মা শশ্বচ্ছান্তিং নিগচ্ছতি।
কৌন্তেয় প্রতিজানীহি ন মে ভক্তঃ প্রণশ্যতি ॥ ৩১ ॥

## শাঙ্করভাষ্যম্।

শৃণু মদ্ভক্তের্মাহাত্ম্যং অপি চেদিতি। অপি চেৎ যদ্যপি সুদুরাচারঃ সুদুরাচারোঽতীবকুৎসিতাচারোঽপি ভজতে মাং অনন্যভাক্ নান্যভক্তিঃ সন্ সাধুরেব সম্যগ্বৃত্তএব স মন্তব্যঃ জ্ঞাতব্যঃ সম্যগ্ যথাবদ্ব্যবসিতো হি যস্মাৎ সাধুনিশ্চয়ঃ সঃ ॥ ৩০ ॥

উৎসৃজ্য চ বাহ্যাং দুরাচারতামন্তঃ সম্যগ্ব্যবসায়সামর্থ্যাৎ ক্ষিপ্রমিতি। ক্ষিপ্রং শীঘ্রং ভবতি ধর্ম্মাত্মা ধর্ম্মচিত্তএব শশ্বৎ নিত্যং শান্তিঞ্চোপশমং নিগচ্ছতি প্রাপ্নোতি শৃণু পরমার্থং কৌন্তেয় প্রতিজানীহি নিশ্চিতাং প্রতিজ্ঞাং কুরু ন মে মম ভক্তঃ ময়ি সমর্পিতান্তরাত্মা মদ্ভক্তো ন প্রণশ্যতীতি ॥ ৩১ ॥

## গিরিকৃত টীকা।

প্রকৃতাং ভগবদ্ভক্তিং স্তবন্ পাপীয়সামপি তত্রাধিকারোঽস্তীতি সূচয়তি শৃণ্বিতি। সম্যগ্বৃত্তএব ভগবদ্ভক্তো জ্ঞাতব্য ইত্যত্র হেতুমাহ সম্যগিতি ॥ ৩০ ॥

হেত্বর্থমেব প্রপঞ্চয়তি উৎসৃজ্যেতি। ভগবন্তং ভজমানস্য কথং দুরাচারতা পরিত্যজ্যা ভবতীত্যাশঙ্ক্যাহ ক্ষিপ্রমিতি। সতি দুরাচারে কথং ধর্ম্মচিত্তত্বং তদাহ শশ্বদিতি। উপশমো দুরাচারাদুপরমঃ। কিমিতি তদ্ভক্তস্য দুরাচারাদুপরতিরুচ্যতে দুরাচারোপহতচেতস্তয়া কিমিত্যসৌ ন নঙ্ক্ষ্যতীত্যাশঙ্ক্যাহ শৃণ্বিতি ॥ ৩১ ॥

## স্বামিকৃত টীকা।

অপি চ মদ্ভক্তেরেবায়মবিতর্ক্যঃ প্রভাব ইতি দর্শয়ন্নাহ অপি চেদিতি। অত্যন্তদুরাচারোঽপি যদাপ্যপৃথক্ত্বেন পৃথগ্দেবতাপি বাসুদেবএবেতি বুদ্ধ্যা দেবতান্তরভক্তিমকুর্ব্বন্মামেব পরমেশ্বরং ভজতে তর্হি সাধুঃ শ্রেষ্ঠএব স মন্তব্য যতোঽসৌ সম্যগ্ব্যবসিতঃ শোভনমধ্যবসায়ং কৃতবান্ ॥ ৩০ ॥

ননু কথং সমীচীনাধ্যবসায়মাত্রেণ সাধুর্মন্তব্যস্তত্রাহ ক্ষিপ্রমিতি। সুদুরাচারোঽপি মাং ভজন্ শীঘ্রং ধর্ম্মচিত্তো ভবতি ততশ্চ শশ্বচ্ছান্তিং চিত্তোপপ্লবোপরমরূপাং পরমেশ্বরনিষ্ঠাং নিতরাং গচ্ছতি প্রাপ্নোতি, কুতর্ককর্কশবাদিনো নৈতন্মন্যেরন্নিতি শঙ্কাকুলমর্জ্জুনং প্রোৎসাহয়তি হে কৌন্তেয় পটহাদিমহাঘোষপূর্ব্বকং বিবদমানানাং সভাং গত্বা বাহুমুৎক্ষিপ্য নিঃশঙ্কং প্রতিজানীহি প্রতিজ্ঞাং কুরু, কথং, মে পরমেশ্বরস্য ভক্তঃ সুদুরাচারোঽপি ন

মাং হি পার্থ ব্যপাশ্রিত্য যেঽপি স্যুঃ পাপযোনয়ঃ।
স্ত্রিয়ো বৈশ্যাস্তথা শূদ্রাস্তেঽপি যান্তি পরাং গতিম্ ॥ ৩২ ॥
কিং পুনর্ব্রাহ্মণাঃ পুণ্যা ভক্তা রাজর্ষয়স্তথা।
অনিত্যমসুখং লোকমিমং প্রাপ্য ভজস্ব মাম্ ॥ ৩৩ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ মাং হীতি। মাং হি যস্মাৎ পার্থ ব্যপাশ্রিত্য মামাশ্রিত্যাশ্রয়ত্বেন গৃহীত্বা যেঽপি স্যুর্ভবেয়ুঃ পাপযোনয়ঃ পাপানি যোনিঃ যেষাং তে পাপজন্মানঃ কে ত ইত্যাহ স্ত্রিয়ো বৈশ্যাস্তথা শূদ্রাস্তেঽপি যান্তি গচ্ছন্তি পরাং গতিং প্রকৃষ্টাং গতিং ॥ ৩২ ॥

কিং পুনরিতি। কিং পুনর্ব্রাহ্মণাঃ পুণ্যাঃ পুণ্যযোনয়ঃ ভক্তা রাজর্ষয়স্তথা রাজানশ্চ তে ঋষয়শ্চেতি রাজর্ষয়ঃ যতএবমতোঽনিত্যং ক্ষণভঙ্গুরমসুখং চ সুখবর্জিতং মনুষ্যলোকং প্রাপ্য পুরুষার্থসাধনং দুর্লভং মনুষ্যত্বং লব্ধা ভজস্ব সেবস্ব মাং ॥ ৩৩ ॥

## গিরিকৃত টীকা।

ইতশ্চ ভগবদ্ভক্তির্বিধাতব্যেত্যাহ কিঞ্চেতি। ন মে ভক্তঃ প্রণশ্যতীত্যত্র হেতুমাচক্ষাণো ভক্ত্যধিকারে জাতিনিয়মো নাস্তীত্যাহ মাং হীতি ॥ ৩২ ॥

যদি পাপযোনিঃ পাপাচারশ্চ ত্বদ্ভক্ত্যা পরাং গতিং গচ্ছতি তর্হি কিমুত্তমজাতিনিমিত্তেন সংন্যাসাদিনা কিম্বা সদ্বৃত্তেনেত্যাশঙ্ক্যাহ কিং পুনরিতি। উত্তমজাতিমতাং ব্রাহ্মণাদীনামতিশয়েন পরা গতির্যতো লভ্যতে অতো ভগবদ্ভজনং তৈঃ একান্তেন বিধাতব্যমিত্যাহ যত ইতি। মনুষ্যদেহাতিরিক্তেষু পশ্বাদিদেহেষু ভগবদ্ভজনযোগ্যতাভাবাৎ প্রাপ্তে মনুষ্যত্বে তদ্ভজনে প্রযতিতব্যং ইত্যাহ দুর্লভমিতি ॥ ৩৩ ॥

## স্বামিকৃত টীকা।

প্রণশ্যতি অপি তু কৃতার্থএব ভবতীতি, ততশ্চ তে তৎপ্রৌঢ়িবিজৃম্ভাৎ বিধ্বংসিতকুতর্কাঃ সন্তো নিঃসংশয়ং ত্বামেব গুরুত্বেনাশ্রয়েরন্ ॥ ৩১ ॥

স্বাচারভ্রষ্টং মদ্ভক্তিঃ পবিত্রীকরোতীতি কিমত্র চিত্রং যতো মদ্ভক্তির্দুষ্কুলানপ্যনধিকারিণোঽপি সংসারান্মোচয়তীত্যাহ মাং হীতি। যেঽপি পাপযোনয়ঃ স্যুর্নিকৃষ্টজন্মানোঽন্ত্যজাদয়ো ভবেয়ুঃ, যেঽপি বৈশ্যাঃ কেবলং কৃষ্যাদিনিরতাঃ অতঃ স্ত্রিয়ঃ শূদ্রাশ্চাপ্যধ্যয়নাদিরহিতাস্তেঽপি মাং ব্যপাশ্রিত্য সংসেব্য পরাং গতিং যান্তি হি নিশ্চিতং। ৩২।

যদৈবং তদা সৎকুলাঃ সদাচারাশ্চ মদ্ভক্তাঃ পরাং গতিং যান্তীতি কিং বক্তব্যমিত্যাহ কিং পুনরিতি। পুণ্যাঃ সুকৃতিনো ব্রাহ্মণাঃ, তথা রাজানশ্চ তে ঋষয়শ্চেতি এবংভূতাশ্চ পরাং গতিং যান্তীতি কিং বক্তব্যমিত্যর্থঃ। অতত্ত্বং ইমং রাজর্ষিরূপং দেহং প্রাপ্য লব্ধা

মন্মনা ভব মদ্ভক্তো মদ্যাজী মাং নমস্কুরু।
মামেবৈষ্যসি যুক্ত্বৈবমাত্মানং মৎপরায়ণঃ॥ ৩৪ ॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং
যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে
রাজগুহ্যযোগো নাম
নবমোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

কথং মন্মনা ইতি। ময়ি মনো যস্য তব স ত্বং মন্মনা ভব তথা মদ্ভক্তো ভব মদ্যাজী মদ্যজনশীলো ভব মামেব চ নমস্কুরু মামেশ্বরমেষ্যসি আগমিষ্যসি যুক্ত্বা সমাধায় চিত্ত-মেবমাত্মানং মামেববমহং হি সর্ব্বেষাং ভূতানাং আত্মা পরা চ গতিঃ পরময়নং তং মামেবম্ভূতং এষ্যসীত্যতীতেন পদেন সম্বন্ধঃ মৎপবায়ণঃ সন্নিত্যর্থঃ॥ ৩৪ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে নবমোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

ভগবদ্ভক্তেবিশ্বস্তাবং পৃচ্ছতি কথমিতি। ঈশ্ববভজনে ইতিকর্ত্তব্যতাং দর্শযতি মন্মনা ইতি। এবং ভগবন্তং ভজমানস্য মম কিং স্যাদিত্যাশঙ্ক্যাহ মামেবেতি। সমাধায় ভগব-ত্যেবেতি শেষঃ। এবমাত্মানমিত্যেতদ্বিবৃণোতি অহং হীতি। অহমেব পরময়নং তবেতি মৎপরাষণস্তথাভূতঃ সন্ মামেবাত্মানমেষ্যসীতি সম্বন্ধঃ। তদেবং মধ্যমানাং ধ্যেযং নিরূপ্য নবমেনাধমানামারাধ্যাভিধানমুখেন নিজেন পারমার্থিকেন রূপেণ প্রত্যুক্তেন জ্ঞানং পবমে-শ্বরস্য পবমারাধনমিত্যভিদধতা সোপাধিকং তৎপদবাচ্যং নিরুপাধিকঞ্চ তৎপদলক্ষ্যং ব্যাখ্যাতং॥ ৩৪ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং নবমোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

মাং ভজস্ব, কিঞ্চ অনিত্যমধ্রুবং অসুখং সুখরহিতঞ্চেমং মর্ত্ত্যলোকং প্রাপ্য অনিত্যত্বাদ্বি-লম্বমকুর্ব্বন্ অসুখত্বাচ্চ সুখার্থমুদ্যমং হিত্বা মামেব ভজস্বেত্যর্থঃ॥ ৩৩ ॥

ভজনপ্রকারং দর্শযন্নুপসংহরতি মন্মনা ইতি। ময্যেব মনো যস্য সমন্মনাস্ত্বং ভব, তথা মমৈব ভক্তঃ সেবকো ভব, মদ্যাজী মৎপূজনশীলো ভব, মামেব চ নমস্কুরু, এবমেভিঃ প্রকারৈর্মৎপরায়ণঃ সন্নাত্মানং মনো ময়ি যুক্ত্বা সমাধায় মামেব পরমানন্দরূপমেষ্যসি প্রাপ্স্যসি।

নিজমৈশ্বর্য্যমাশ্চর্য্যং ভক্তেশ্চাদ্ভুতবৈভবম্।
নবমে রাজগুহ্যাখ্যে কৃপয়াবোচদচ্যুতঃ॥ ৩৪ ॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং অষ্টমোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## দশমোঽধ্যায়ঃ।

শ্রীভগবানুবাচ—ভূয়এব মহাবাহো শৃণু মে পরমং বচঃ।
যত্তেঽহং প্রীয়মাণায় বক্ষ্যামি হিতকাম্যয়া ॥ ১ ॥

### শাঙ্করভাষ্যম্।

সপ্তমেঽধ্যায়ে ভগবতস্তত্ত্বং বিভূতয়শ্চ প্রকাশিতা নবমে চ, অথেদানীং যেষু যেষু ভাবেষু চিন্ত্যো ভগবাংস্তে ভাবা বক্তব্যাঃ তত্ত্বঞ্চ ভগবতো বক্তব্যং উক্তমপি দুর্ব্বিজ্ঞেয়ত্বাদিত্যতো ভগবানুবাচ ভূয় ইতি। ভূয়এব ভূয়ঃ পুনঃ হে মহাবাহো শৃণু মে মদীয়ং পরমং প্রকৃষ্টং নিরতিশয়বস্তুনঃ প্রকাশকং বচো বাক্যং যৎ পরমং তে তুভ্যং প্রীয়মাণায় মদ্বচনাৎ প্রীয়সে ত্বমতীবামৃতমিব পিবংস্ততো বক্ষ্যামি হিতকাম্যয়া হিতেচ্ছয়া ॥ ১ ॥

### গিরিকৃত টীকা।

অধ্যায়দ্বয়ে সিদ্ধমর্থং সংক্ষেপতোঽনুভাষতে সপ্তম ইতি। তত্ত্বং সোপাধিকং নিরুপাধিকঞ্চ বিভূতয়ঃ সবিশেষনির্ব্বিশেষরূপপ্রতিপত্ত্যুপযোগিন্যঃ। উত্তরাধ্যায়স্যাধ্যায়দ্বয়েন সম্বন্ধং বদন্নধ্যায়ান্তরমবতারয়তি অথেতি। বক্তব্যাঃ সবিশেষধ্যানে নির্ব্বিশেষপ্রতিপত্তৌ শেষত্বেনেতি শেষঃ। ননু সবিশেষং নির্ব্বিশেষঞ্চ ভগবতো রূপং প্রাগেব তত্র তত্রোক্তং তৎ কিমিতি পুনরুচ্যতে তত্রাহ উক্তমপীতি। তদ্যদি তত্র তত্র তত্ত্বমুক্তং তথাপি পুনর্বক্তব্যং দুর্ব্বিজ্ঞেয়ত্বাদিতি যতো মন্যতেঽত ইতি যোজনা, প্রকৃষ্টত্বং বচসঃ স্পষ্টয়তি নিরতিশয়েতি। তদেব বচো বিশিনষ্টি যৎপরমমিতি। সকৃদুক্তেরর্থসিদ্ধেরসকৃদুক্তিরনর্থিকেত্যাশঙ্ক্যাহ প্রীয়মাণায়েতি। ততো বক্ষ্যামি ইতি তুভ্যং পূর্ব্বেণ সম্বন্ধঃ ॥ ১ ॥

### স্বামিকৃত টীকা।

উক্তাঃ সংক্ষেপতঃ পূর্ব্বং সপ্তমাদৌ বিভূতয়ঃ। দশমে তা বিতন্যন্তে সর্ব্বত্রেশ্বরদৃষ্টয়ে ॥ এবং তাবৎ সপ্তমাদিভিস্ত্রিভিরধ্যায়ৈর্ভজনীয়ং পরমেশ্বরতত্ত্বং নিরূপিতং তদ্বিভূতয়শ্চ সপ্তমে রসোঽহমপ্সু কৌন্তেয়েত্যাদিনা সংক্ষেপতো দর্শিতাঃ অষ্টমে চ অধিযজ্ঞোঽহমেবাত্রেত্যাদিনা নবমে চাহং ক্রতুরহং যজ্ঞ ইত্যাদিনা, ইদানীং তাএব বিভূতীঃ প্রপঞ্চয়িষ্যন্ স্বভক্তেশ্চাবশ্যকরণীয়ত্বং বর্ণয়িষ্যন্ শ্রীভগবানুবাচ ভূয়এবেতি। মহান্তৌ যুদ্ধাদিস্বধর্ম্মানুষ্ঠানে মহৎপরিচর্য্যায়াং বা কুশলৌ বাহূ যস্য তথা হে মহাবহো ভূয়এব পুনরপি মে বচঃ

ন মে বিদুঃ সুরগণাঃ প্রভবং ন মহর্ষয়ঃ ।
অহমাদির্হি দেবানাং মহর্ষীণাঞ্চ সর্ব্বশঃ ॥ ২ ॥
যো মামজমনাদিঞ্চ বেত্তি লোকমহেশ্বরম্ ।
অসংমূঢ়ঃ স মর্ত্ত্যেষু সর্ব্বপাপৈঃ প্রমুচ্যতে ॥ ৩ ॥

## শাঙ্করভাষ্যম্ ।

কিমর্থমহং বক্ষ্যামীত্যত আহ ন মইতি। ন মে বিদুর্ন জানন্তি সুরগণাঃ কিং তেন ন বিদুঃ মম প্রভবং প্রভাবং প্রভুশক্ত্যতিশয়ং অথ বা প্রভবনং উৎপত্তিং বা নাপি মহর্ষয়ো ভৃগ্বাদয়ো বিদুঃ কস্মাত্তে ন বিদুরিত্যুচ্যতে অহমাদিঃ কারণং হি যস্মাদ্দেবানাং মহর্ষীণাং চ সর্ব্বশঃ সর্ব্বপ্রকারৈঃ ॥ ২ ॥

কিঞ্চ যো মামিতি। যো মামজমনাদিঞ্চ যস্মাদহমাদির্হি দেবানাং মহর্ষীণাঞ্চ ন মমান্যঃ আদির্ব্বিদ্যতেঽহমজোঽনাদিশ্চ অনাদিত্বমজত্বে হেতুস্তং মামজমনাদিঞ্চ যো বেত্তি বিজনাতি লোকমহেশ্বরং লোকানাং মহান্তমীশ্বরমসংমূঢ়ঃ সংমোহবর্জিতঃ স মর্ত্ত্যেষু মনুষ্যেষু সর্ব্বপাপৈঃ সর্ব্বৈঃ পাপৈঃ মতিপূর্ব্বামতিপূর্ব্বকৃতৈঃ প্রমুচ্যতে প্রমোক্ষ্যতে ॥ ৩ ॥

## গিরিকৃত টীকা ।

হিতকাম্যয়া দুর্ব্বিজ্ঞেয়ং তত্ত্বজ্ঞানং কশ্চিদন্যোঽপি পরমং বচো মহ্যং বক্ষ্যতি তেন চ মম তত্ত্বজ্ঞানং ভবিষ্যত্যতো ভগবদ্বচনমকিঞ্চিৎকরমিতি শঙ্কিত্বা পরিহরতি কিমর্থমিত্যাদিনা। ইন্দ্রাদয়ো ভৃগ্বাদয়শ্চ ভগবৎপ্রভাবং ন বিন্দন্তীত্যত্র প্রশ্নপূর্ব্বকং হেতুমাহ কস্মাদিতি। নিমিত্তত্বেনোপাদানত্বেন চ যতো দেবাদীনাং ভগবানেব হেতুরতস্তদ্বিকারাস্তে ন তস্য প্রভাবং বিদুরিত্যর্থঃ ॥ ২ ॥

ইতশ্চ কশ্চিদেব ভগবৎপ্রভাবং বেত্তীত্যাহ কিঞ্চেতি। কোঽসৌ প্রভাবো ভগবতো যৎ

## স্বামিকৃত টীকা ।

শৃণু, কথংভূতং পরমং পরমাত্মনিষ্ঠং, মদ্বচনামৃতেনৈব প্রীতিং প্রাপ্নুবতে তুভ্যং হিতকাম্যয়া হিতেচ্ছয়া যদহং বক্ষ্যামি তৎ ॥ ১ ॥

উক্তস্যাপি পুনর্ব্বচনে দুর্জ্ঞেয়ত্বং হেতুমাহ ন মে বিদুরিতি। মে মম প্রকৃষ্টং ভবং জন্মরহিতস্যাপি নানাবিভূতিভিরাবির্ভাবং সুরগণাঽপি মহর্ষয়োঽপি ভৃগ্বাদয়ো ন জানন্তি তত্র হেতুঃ অহং হি দেবানাং মহর্ষীণাঞ্চাদিঃ কারণং সর্ব্বশঃ সর্ব্বৈঃ প্রকারৈরুৎপাদকত্বেন বুদ্ধ্যাদিপ্রবর্ত্তকত্বেন চ অতো মদনুগ্রহং বিনা মাং কেঽপি ন জানন্তীত্যর্থঃ ॥ ২ ॥

এবংভূতাত্মজ্ঞানে ফলমাহ যো মামিতি। সর্ব্বকারণত্বাদেব ন বিদ্যতে আদিঃ কারণং

বুদ্ধির্জ্ঞানমসংমোহঃ ক্ষমা সত্যং দমঃ শমঃ।
সুখং দুঃখং ভবোহভাবো ভয়ঞ্চাভয়মেবচ ॥ ৪ ॥

## শাঙ্করভাষ্যম্।

ইতশ্চাহং মহেশ্বরো লোকানাং বুদ্ধিবিতি। বুদ্ধিরন্তঃকরণস্য সূক্ষ্মাদ্যর্থানামবোধনসামর্থ্যং তদ্বন্তং বুদ্ধিমানিতি হি বদন্তি জ্ঞানমাত্মাদিপদার্থানামববোধঃ অসংমোহঃ প্রত্যুপপন্নেষু বোদ্ধব্যেষু দ্রব্যেষু বিবেকপূর্ব্বিকা প্রবৃত্তিঃ ক্ষমা আক্রুষ্টস্য তাড়িতস্য বা অবিকৃতচিত্ততা- সত্যং যথাদৃষ্টস্য যথাশ্রুতস্য চাত্মানুভবস্য পরবুদ্ধিসংক্রান্তয়ে তথৈবোচ্চর্য্যমাণা বাক্‌সত্যমু- চ্যতে দমো বাহ্যেন্দ্রিয়োপশমঃ শমোহন্তঃকরণস্যোপশমঃ সুখং আহ্লাদো দুখং সন্তাপো ভব উদ্ভবঃ অভাবস্তদ্বিপর্য্যয়ঃ ভয়ঞ্চ ত্রাসোহভয়মেব চ তদ্বিপরীতং ॥ ৪ ॥

অহিংসেতি। অহিংসা অপীড়া প্রাণিনাং সমতা সমচিত্ততা তুষ্টিঃ সন্তোষঃ পর্য্যা- প্তবুদ্ধির্লাভেষু তপ ইন্দ্রিয়সংযমপূর্ব্বকং শরীরপীড়নং দানং যথাশক্তিসংবিভাগঃ যশো-

## গিরিকৃত টীকা।

বহবো ন বিদুরিত্যপেক্ষায়াং পারমার্থিকং প্রভাবং তদধীনফলঞ্চ কথয়তি যো মামিতি। পদদ্বয়াপৌনরুক্ত্যমাহ অনাদিত্বমিতি ॥ ৩ ॥

ভগবতো লোকমহেশ্বরত্বে হেত্বন্তরমাহ ইতশ্চেতি। মুমুক্ষুভিরারাধ্যত্বসিদ্ধয়ে বন্ধমো- ক্ষসাধনং পুরস্কৃত্যাশেষজগৎপ্রকৃত্যধিষ্ঠাতৃত্বলক্ষণং সোপাধিকং ভগবৎপ্রভাবমভিধত্তে বুদ্ধিরিতি। সূক্ষ্মাদীত্যাদিশব্দেন সূক্ষ্মতরঃ সূক্ষ্মতমশ্চার্থো গৃহ্যতে উক্তং সামর্থ্যং বুদ্ধিরিত্য- স্মিন্নর্থে প্রসিদ্ধিং প্রমাণয়তি তদ্বন্তমিতি। আত্মাদীতি তদববোধবন্তং হি জ্ঞানিনং বদন্তি। অন্তঃকরণস্যোপশমো বিষয়েভ্যো ব্যাবৃত্তিরিতি শেষঃ ॥ ৪ ॥

যথাশক্তীতি। পাত্রে শ্রদ্ধয়া স্বশক্তিমনতিক্রম্যার্থানাং দেশকালানুগুণ্যেন প্রতিপাদন-

## স্বামিকৃত টীকা।

যস্য তমনাদিং অতএবাজং জন্মশূন্যং লোকানাং মহেশ্বরঞ্চ মাং যো বেত্তি স মনুষ্যেষু সম্মো- হরহিতঃ সন্ সর্ব্বপাপৈঃ প্রমুচ্যতে ॥ ৩ ॥

লোকমহেশ্বরতাং স্ফুটয়তি বুদ্ধিরিতি ত্রিভিঃ। বুদ্ধিঃ সারাসারবিবেকনৈপুণ্যং, জ্ঞানমাত্মবিষয়ং, অসম্মোহো ব্যাকুলত্বাভাবঃ, ক্ষমা সহিষ্ণুত্বং, সত্যং যথার্থভাষণং, দমো বাহ্যেন্দ্রিয়সংযমঃ, শমোহন্তঃকরণসংযমঃ, সুখমনুকূলসংবেদনীয়ং দুঃখঞ্চ তদ্বিপরীতং, ভব উদ্ভবঃ, অভাবস্তদ্বিপরীতঃ, ভয়ং ত্রাসঃ, অভয়ং তদ্বিপরীতং। অস্য শ্লোকস্য মত্তএব ভবন্তী- ত্যুত্তরেণান্বয়ঃ ॥ ৪ ॥

কিঞ্চ অহিংসেতি। অহিংসা পরপীড়ানিবৃত্তিঃ, সমতা রাগদ্বেষাদিরাহিত্যং, তুষ্টি- র্দৈবলব্ধেন সন্তোষঃ তপঃ শারীরাদি বক্ষ্যমাণং, দানং স্বার্জ্জিতস্য ধনাদেঃ পাত্রেঽর্পণং,

অহিংসা সমতা তুষ্টিস্তপো দানং যশোঽযশঃ ।
ভবন্তি ভাবা ভূতানাং মত্ত এব পৃথগ্বিধাঃ ॥ ৫ ॥
মহর্ষয়ঃ সপ্ত পূর্ব্বে চত্বারো মনবস্তথা ।
মদ্ভাবা মানসা জাতা যেষাং লোক ইমাঃ প্রজাঃ ॥ ৬ ॥

## শাঙ্করভাষ্যম্ ।

ধর্ম্মনিমিত্তা কীর্ত্তিঃ অযশস্ত্বধর্ম্মনিমিত্তাঽকীর্ত্তিঃ ভবন্তি ভাবা যথোক্তা বুদ্ধ্যাদয়ো ভূতানাং প্রাণিনাং মত্ত এবেশ্বরাৎ পৃথগ্বিধা নানাবিধাঃ স্বকর্ম্মানুরূপেণ ॥ ৫ ॥

কিঞ্চ মহর্ষয ইতি । মহর্ষয়ঃ সপ্ত ভৃগ্বাদয়ঃ পূর্ব্বেঽতীতকালসম্বন্ধিনশ্চত্বারো মনবস্তথা সাবর্ণা ইতি প্রসিদ্ধাঃ তে চ মদ্ভাবা মদ্গতভাবনা বৈষ্ণবেন বা সামর্থ্যেনোপেতা মানসা মনসৈবোৎপাদিতা ময়া জাতা উৎপন্না যেষাং মনূনাং মহর্ষীণাঞ্চ সৃষ্টির্লোক ইমাঃ স্থাবর-জঙ্গমলক্ষণাঃ প্রজাঃ ॥ ৬ ॥

## গিরিকৃত টীকা ।

মিত্যর্থঃ । উক্তানাং বুদ্ধ্যাদীনাং সাশ্রয়াণামীশ্বরাদুৎপত্তিং প্রতিজানীতে ভবন্তীতি । নানাবিধত্বে হেতুমাহ স্বকর্ম্মেতি ॥ ৫ ॥

কথঞ্চিদপি তেষামাত্মাতিরেকেণাভাবাৎ মত্তএবেত্যুক্তং ন কেবলং ভগবতঃ সর্ব্বপ্রকৃতিত্বমেব কিন্তু সর্ব্বজ্ঞত্বসর্ব্বেশ্বরত্বরূপমধিষ্ঠাতৃত্বমপীত্যাহ কিঞ্চেতি । আদ্যা ভৃগ্বাদয়ো বশিষ্ঠান্তাঃ সর্ব্বজ্ঞা বিদ্যাসংপ্রদায়প্রবর্ত্তকাস্তথেতি মনূনামপি পূর্ব্বত্বেনাদ্যত্বমনুকৃষ্যতে । কে তে মনবস্তত্রাহ সাবর্ণা ইতি । প্রসিদ্ধাঃ পুরাণেষু প্রজানাং পালকাঃ স্বযমীশ্বরাশ্চেতি শেষঃ । মহর্ষীণাং মনূনাঞ্চ তুল্যং বিশেষণং তে চেতি । ময়ি সর্ব্বজ্ঞে সর্ব্বেশ্বরে গতা ভাবনা যেষাং তে তথা । ভাবনাফলমাহ বৈষ্ণবেনেতি । বৈষ্ণব্যা শক্ত্যাধিষ্ঠিতত্বেন জ্ঞানৈ-

## স্বামিকৃত টীকা ।

যশঃ সৎকীর্ত্তিঃ, অযশো দুষ্কীর্ত্তিঃ, এতে বুদ্ধিজ্ঞানাদয়স্তদ্বিপরীতাশ্চাবুদ্ধ্যাদয়ো নানাবিধা ভাবাঃ প্রাণিনাং মত্তঃ সকাশাদেব ভবন্তি ॥ ৫ ॥

কিঞ্চ মহর্ষয় ইতি । সপ্ত মহর্ষয়ো ভৃগ্বাদয়ঃ সপ্ত ব্রাহ্মণা ইত্যেতে পুরাণে নিশ্চয়ং গতা ইত্যাদি পুরাণপ্রসিদ্ধাস্তেভ্যোঽপি পূর্ব্বেঽন্তে চত্বারো মহর্ষয়ঃ সনকাদয়স্তথা মনবঃ স্বায়ম্ভুবাদয়ো মদ্ভাবা মদীয়ো ভাবঃ প্রভাবো যেষু তে হিরণ্যগর্ভাত্মনো মমৈব মনসঃ সঙ্কল্পমাত্রাজ্জাতাঃ । প্রভাবমেবাহ যেষামিতি । যেষাং ভৃগ্বাদীনাং সনকাদীনাঞ্চ ইমা ব্রাহ্মণাদ্যা লোকে বর্দ্ধমানা যথাযথং পুত্রপৌত্রাদিরূপাঃ শিষ্যপ্রশিষ্যাদিরূপাশ্চ প্রজাঃ প্রজা স্তে ॥ ৬ ॥

এতাং বিভূতিং যোগঞ্চ মম যো বেত্তি তত্ত্বতঃ।
সোঽবিকল্পেন যোগেন যুজ্যতে নাত্র সংশয়ঃ ॥ ৭ ॥

## শাঙ্করভাষ্যম্।

এতামিতি। এতাং যথোক্তাং বিভূতিং বিস্তারং যোগঞ্চ যুক্তিং চাত্মনো ঘটনমথবা যোগৈশ্বর্য্যসামর্থ্যং সর্ব্বজ্ঞত্বঞ্চ যোগজং যোগ উচ্যতে মম মদীয়ং যোগং যো বেত্তি তত্ত্বতস্তত্ত্বেন যথাবদিত্যেতৎ সঃ অবিকল্পেনাপ্রচলিতেন যোগেন সম্যগ্দর্শনস্থৈর্য্যলক্ষণেন যুজ্যতে সংবধ্যতে নাত্র সংশয়ঃ নাস্মিন্নর্থে সংশয়োঽস্তি ॥ ৭ ॥

কীদৃশেনাবিকল্পেন যোগেন যুজ্যত ইত্যুচ্যতে অহমিতি। অহং পরং ব্রহ্ম বাসুদেবাখ্যং সর্ব্বস্য জগতঃ প্রভব উৎপত্তির্ম্মত্তএব স্থিতিনাশক্রিয়াফলোপভোগলক্ষণং বিক্রিযারূপং

## গিরিকৃত টীকা।

শ্বর্য্যবন্ত ইত্যর্থঃ। তেষাং জন্মনো বৈশিষ্ট্যমাচষ্টে মানসা ইতি। মদাদীনেব বিশিনষ্টি যেষামিতি বিদ্যয়া জন্মনা চ সন্ততিভূতা মন্বাদীনামস্মিন্ লোকে সর্ব্বাঃ প্রজা ইত্যর্থঃ ॥ ৬ ॥

সোপাধিকং প্রভাবং ভগবতো দর্শয়িত্বা তজ্জ্ঞানফলমাহ এতামিতি। বুদ্ধ্যাদ্যুপাদানত্বেন বিবিধা ভূতির্ভবনং বৈভবং সর্ব্বাত্মকত্বং তদাহ বিস্তারমিতি। ঈশ্বরস্য তত্তদর্থসংপাদ্যনসামর্থ্যং যোগস্তদাহ আত্মন ইতি। যোগস্তৎফলমৈশ্বর্য্যং সর্ব্বজ্ঞত্বং সর্ব্বেশ্বরত্বঞ্চ। মদীয়ং শক্তিজ্ঞানলেশমাশ্রিত্য মন্বাদয়ো ভৃগ্বাদয়শ্চেশতে জানতে চ তদাহ অথবেতি। যথা তৌ বিভূতিযোগৌ তথা নিরঙ্কুশত্বেনেতি বেদনস্য নিরঙ্কুশত্বং দর্শযতি যথাবদিতি। সোপাধিকং জ্ঞানং নিরুপাধিকজ্ঞানে দ্বারমিত্যাহ সোঽবিকল্পেনেতি। উক্তেঽর্থে প্রতিবন্ধাভাবমাহ নাস্মিন্নিতি ॥ ৭ ॥

কথং তাবকবিভূত্যৈশ্বর্য্যজ্ঞানমুক্তযোগস্য হেতুরিতি মত্বা পৃচ্ছতি কীদৃশেনেতি। উক্তজ্ঞানমাহাত্ম্যাৎ প্রতিষ্ঠিতা ভগবন্নিষ্ঠা সিধ্যতীত্যাহ উচ্যত ইতি। প্রভবত্যস্মাদিতি প্রভবঃ সর্ব্বপ্রকৃতিঃ সর্ব্বাত্মেত্যাহ উৎপত্তিরিতি। সর্ব্বজ্ঞাৎ সর্ব্বেশ্বরাম্মত্তো নিমিত্তাৎ সর্গস্থিতিনাশাদি ভবতি ময়ান্তর্যামিনা প্রের্য্যমাণং সর্ব্বং যথাস্বাং মর্য্যাদামনতিক্রম্য চেষ্টতে তদাহ মত্ত ইতি। ইত্থং মম সর্ব্বাত্মকং সর্ব্বপ্রকৃতিত্বং সর্ব্বেশ্বরত্বং সর্ব্বজ্ঞত্বঞ্চ মহিমানং জ্ঞাত্বা

## স্বামিকৃত টীকা।

যথোক্তবিভূত্যাদিতত্ত্বজ্ঞানস্য ফলমাহ এতামিতি। এতাং ভৃগ্বাদিলক্ষণাং মম বিভূতিং যোগঞ্চৈশ্বর্য্যলক্ষণাং তত্ত্বতো যো বেত্তি সঃ অবিকল্পেন নিঃসংশয়েন যোগেন সম্যগ্দর্শনেন যুক্তো ভবতি নাত্যত্র সংশয়ঃ ॥ ৭ ॥

যথা চ বিভূতিযোগয়োর্জ্ঞানে সম্যগজ্ঞানাবাপ্তিস্তদ্দর্শয়তি অহমিত্যাদিচতুর্ভিঃ। অহং সর্ব্বস্য জগতঃ প্রভবো ভৃগ্বাদিমন্বাদিরূপবিভূতিদ্বারেণোৎপত্তিহেতুঃ, মত্তএব চ সর্ব্বস্য

অহং সর্ব্বস্য প্রভবো মত্তঃ সর্ব্বং প্রবর্ত্ততে।
ইতি মত্বা ভজন্তে মাং বুধা ভাবসমন্বিতাঃ ॥ ৮ ॥
মচ্চিত্তা মদ্গতপ্রাণা বোধয়ন্তঃ পরস্পরম্।
কথয়ন্তশ্চ মাং নিত্যং তুষ্যন্তি চ রমন্তি চ ॥ ৯ ॥

## শাঙ্করভাষ্যম্।

সর্ব্বং জগৎ প্রবর্ত্ততে ইত্যেবং মত্বা ভজন্তে সেবন্তে মাং বুধা অবগতপরমার্থতত্ত্বার্থাঃ ভাবসমন্বিতাঃ ভাবো ভাবনা পরমার্থতত্ত্বাভিনিবেশস্তেন সমন্বিতাঃ সংযুক্তা ইত্যর্থঃ ॥ ৮ ॥

কিঞ্চ মচ্চিত্তা ইতি। মচ্চিত্তা ময়ি চিত্তং যেষাং তে মচ্চিত্তা মদ্গতপ্রাণাঃ ময়ি গতাঃ প্রাপ্তাশ্চক্ষুরাদয়ঃ প্রাণা যেষাং তে মদ্গতপ্রাণা মদ্ব্যুপসংহৃতকারণা ইত্যর্থঃ অথবা মদ্গত-প্রাণা মদ্গতজীবনা ইত্যেতদ্বোধয়ন্তোঽবগময়ন্তঃ পরস্পরমন্যোন্যং কথয়ন্তো জ্ঞানবলবীর্য্যা-দিধর্ম্মৈর্ব্বিশিষ্টং মাং তুষ্যন্তি চ পরিতোষমুপযান্তি রমন্তি চ রতিঞ্চ প্রাপ্নুবন্তি প্রিয়সংগ-ত্যেব ॥ ৯ ॥

## গিরিকৃত টীকা।

ময্যেব নিষ্ঠাবন্তো ভবন্তীত্যাহ ইত্যেবমিতি। সংসারাসারতাজ্ঞানবতাং ভগবদ্ভজনেঽধিকারং দ্যোতয়তি অবগতেতি। পরমার্থতত্ত্বে পূর্ব্বোক্তরীত্যা জ্ঞাতে প্রেমাদরাবভিনিবেশাখ্যৌ ভবতস্তেন সংযুক্তত্বঞ্চ ভগবদ্ভজনে ভবতি হেতুরিত্যাহ ভাবেতি ॥ ৮ ॥

ন কেবলমুক্তমেব ভগবদ্ভজনে সাধনান্তরঞ্চাস্তীত্যাহ কিঞ্চেতি। ঈশ্বরাৎ প্রতীচঃ প্রাগুক্তাদন্যত্র চিত্তপ্রচারারাহিত্যং ভগবদ্ভজনোপায়মাহ ময়ীতি। চক্ষুরাদীনাং ভগবত্য-প্রাপ্তিস্তদগোচরত্বাত্তস্যেত্যাশঙ্ক্যাহ মদ্ব্যুপসংহৃতেতি। ভগবদ্ব্যতিরেকেণ জীবনেঽপি নাদ-রস্তদপি ময্যেবার্পিতং ভক্তানামিত্যাহ অথবেতি। আচার্য্যেভ্যঃ শ্রুত্বা বাদকথয়া পরস্পরং ভগবন্তং সব্রহ্মচারিণো বোধয়ন্তি তদপি ভগবদ্ভজনসাধনমিত্যাহ বোধয়ন্তইতি। আগমো পপত্তিভ্যাং ভগবন্তমেব বিশিষ্টধর্ম্মাণং শিষ্যেভ্যো গুরবো ব্যপদিশন্তি তদপি ভগবদ্ভজনমে-

## স্বামিকৃত টীকা।

বুদ্ধির্জ্ঞানমসংমোহ ইত্যাদি সর্ব্বঃ প্রবর্ত্ততে ইত্যেবং মত্বা অববুধ্য বুধা বিবেকিনো ভাব-সমন্বিতাঃ প্রীতিযুক্তা মাং ভজন্তে॥ ৮ ॥

প্রীতিপূর্ব্বকং ভজনমাহ মচ্চিত্তা ইতি। ময্যেব চিত্তং যেষাং তে মচ্চিত্তাঃ, মামেব গতাঃ প্রাপ্তাঃ প্রাণা ইন্দ্রিয়াণি যেষাং তে মদ্গতপ্রাণাঃ মদ্ব্যর্পিতজীবনা ইতি বা, এবংভূতা-স্তে বুধা অন্যোন্যং মাং ন্যায়োপেতৈঃ শ্রুত্যাদিপ্রমাণৈর্ব্বোধয়ন্তো বুদ্ধা চ মাং কথয়ন্তঃ সংকীর্ত্তয়ন্তঃ সন্তঃ নিত্যং তুষ্যন্তি অনুমোদনেন তুষ্টিং যান্তি রমন্তি চ নির্বৃতিং যান্তি। ৯।

তেষাং সততযুক্তানাং ভজতাং প্রীতিপূর্ব্বকম্।
দদামি বুদ্ধিযোগং তং যেন মামুপযান্তি তে ॥ ১০ ॥

## শাঙ্করভাষ্যম্।

যে যথোক্তৈঃ প্রকারৈর্ভজন্তে মাং ভক্তাঃ সন্তঃ প্রীতিপূর্ব্বকং তেষামিতি। তেষাং সততযুক্তানাং নিত্যাভিযুক্তানাং ভজতাং সেবমানাং কিমর্থিত্বাদিনা কারণেন নেত্যাহ প্রীতিপূর্ব্বকং প্রীতিঃ স্নেহস্তৎপূর্ব্বকং মাং ভজতামিত্যর্থঃ দদামি প্রযচ্ছামি বুদ্ধিযোগং বুদ্ধিঃ সম্যগ্দর্শনং মত্তত্ত্ববিষয়ং তেন যোগো বুদ্ধিযোগস্তং বুদ্ধিযোগং যেন বুদ্ধিযোগেন সম্যগ্দর্শনলক্ষণেন মাং পরমেশ্বরমাত্মভূতং আত্মত্বেনোপযান্তি প্রতিপদ্যন্তে ॥ ১০ ॥

## গিরিকৃত টীকা।

বেত্যাহ কথয়ন্ত ইতি। ভক্তানাং তুষ্টিরতী স্বরসতঃ স্যাতামিত্যাহ তুষ্যন্তীতি। মনোরথপূর্ত্ত্যা রতিপ্রাপ্তৌ কামুকসংমতমুদাহরণমাহ প্রিয়েতি ॥ ৯ ॥

যদুক্তং সোঽবিকল্পেনেত্যাদি তদর্থং ভূমিকাং কৃত্বা তদিদানীমুদাহরতি যে যথোক্তেতি। নিত্যাভিযুক্তানামনবরতং ভগবত্যেকাগ্র্যসংপন্নানামিত্যর্থঃ। পুত্রাদিলোকত্রয়হেত্বর্থিত্বেন বা গর্ভদাসত্বেন বা প্রত্যহং জীবনোপায়সিদ্ধয়ে বা ভজনমিতি শঙ্কিত্বা দূষয়তি কিমিত্যাদিনা। প্রাগুক্তাং জ্ঞানাখ্যাং ভক্তিং স্নেহেন কুর্ব্বতামিত্যর্থঃ। তেভ্যোঽহং তত্ত্বজ্ঞানং প্রযচ্ছামীত্যাহ দদামীতি। উক্তবুদ্ধিসম্বন্ধস্য ফলমাহ যেনেতি ॥ ১০ ॥

ধ্যানজন্যপ্রকর্ষকাষ্ঠাগতান্তঃকরণপরিণামে নিরস্তাশেষবিশেষভগবদ্রূপপ্রাপ্তিহেতৌ বুদ্ধিযোগে প্রশ্নপূর্ব্বকং ভক্তানধিকারিণো দর্শয়তি কেতে ইতি। ভগবৎপ্রাপ্তেবু্দ্ধিসাধ্যত্বে সত্যনিত্যত্বাপত্তেস্তুং ভক্তেভ্যো বুদ্ধিযোগং দদামীত্যযুক্তমিতি শঙ্কতে কিমর্থমিতি। তেষাং বুদ্ধিযোগং কিমর্থং দদামীতি সম্বন্ধঃ। ভগবৎপ্রাপ্তিপ্রতিবন্ধকনাশকো বুদ্ধিযোগস্তেন নাস্তি তৎপ্রাপ্তেরনিত্যত্বমিত্যাশঙ্ক্যাহ কস্যেতি। ভক্তানাং তৎপ্রাপ্তিপ্রতিবন্ধকং বিবিচ্য দর্শয়তি ইত্যাকাঙ্ক্ষায়ামিতি। অবিবেকোঽনাদ্যজ্ঞানং ততো জাতং মিথ্যাজ্ঞানং তদুভয়মেকীকৃত্য তমো বিবক্ষ্যতে, ন চ তন্নাশকত্বং জড়স্য কস্যচিত্তদন্তর্ভূতস্য যুক্তং তেনাহং নাশয়ামীত্যুক্তং। কেবলচৈতন্যস্য জড়বুদ্ধিবৃত্তেরিবাজ্ঞানাদ্যনাশকত্বমাশঙ্ক্য বিশিনষ্টি আত্মেতি। তস্যাশয়স্তন্নিষ্ঠো বৃত্তিবিশেষঃ বাক্যোত্থবুদ্ধিবৃত্ত্যভিব্যক্তশ্চিদাত্মা সহায়সামর্থ্যাদজ্ঞানাদিনিবৃত্তিহেতুরিত্যর্থঃ। বুদ্ধিস্থবোধস্যাজ্ঞানাদিনিবর্ত্তকত্বমুক্ত্বা বোধেত্ববুদ্ধেস্তন্নিবর্ত্তকত্বমিতি পক্ষা

## স্বামিকৃত টীকা।

এবং ভূতানাঞ্চ সম্যগ্‌জ্ঞানমহং দদামীত্যাহ তেষামিতি। এবং সততযুক্তানাং ময্যাসক্তচিত্তানাং প্রীতিপূর্ব্বকং ভজতাং তং বুদ্ধিরূপং যোগমুপায়ং দদামি, তমিতি কং যেনোপায়েন তে মদ্ভক্তা মাং প্রাপ্নুবন্তি ॥ ১০ ।

তেষামেবানুকম্পার্থমহমজ্ঞানজং তমঃ।
নাশয়াম্যাত্মভাবস্থো জ্ঞানদীপেন ভাস্বতা ॥ ১১ ॥

## শাঙ্করভাষ্যম্।

কে তে যে মচ্চিত্তাদিপ্রকারৈঃ মাং ভজন্তে কিমর্থং কস্য বা তৎপ্রাপ্তিপ্রতিবন্ধহেতোঃ নাশকং বুদ্ধিযোগং তেষাং মদ্ভাবনাং দদামীত্যাকাঙ্ক্ষায়ামাহ তেষামিতি। তেষামেব কথং নাম শ্রেয়ঃ স্যাদিত্যনুকম্পার্থং দয়াহেতোরহমজ্ঞানজম্ অবিবেকতোজাতং মিথ্যাপ্রত্যয়-লক্ষণং মোহান্ধকারংতমো নাশয়াম্যাত্মভাবস্থঃ আত্মনো ভাবোঽন্তঃকরণাশয়স্তস্মিন্নেব স্থিতঃ সন্ জ্ঞানদীপেন বিবেকপ্রত্যয়রূপেণ ভক্তিপ্রসাদস্নেহাভিষিক্তেন মদ্ভাবনাভিনিবেশবাতে-রিতেন ব্রহ্মচর্য্যাদিসাধনসংস্কারবৎপ্রজ্ঞাবর্ত্তিনাপি বিরক্তান্তঃকরণাধারেণ বিষয়ব্যাবৃত্ত-চিত্তরাগদ্বেষাকলুষিতনিবাতাপবরকস্থেন নিত্যপ্রবৃত্তৈকাগ্র্যধ্যানজনিতসম্যগ্দর্শনভাস্বতা জ্ঞানদীপেনেত্যর্থঃ ॥ ১১ ॥

## গিরিকৃত টীকা।

স্তবমাহ জ্ঞানেতি। দেহাদ্যব্যক্তান্তানাত্মবর্গাতিরিক্ত বস্তুগোচরত্বমাহ বিবেকেতি। ভগ-বতি সদা বিহিতয়া ভক্ত্যা তস্য প্রসাদোঽনুগ্রহঃ সএব স্নেহস্তেনাসেচনদ্বারা স্বোৎপত্তিমাহ ভক্তীতি। ময্যেব ভাবনায়ামভিনিবেশো বাতস্তেন প্রেরিতোঽয়ং জায়তে ন হি বাতপ্রের-ণমন্তরেণাদৌ দীপস্যোৎপত্তিরিত্যাহ মদ্ভাবনেতি। ব্রহ্মচর্য্যমষ্টাঙ্গমাদিশব্দেন শমাদি-গ্রহণং, তেন হেতুনাহিতসংস্কারবতী যা প্রজ্ঞা তথাবিধবর্ত্তিনিষ্ঠশ্চায়ং ন হি বর্ত্ত্যতিরেকেণ দীপো নির্বর্ত্ত্যতে তদাহ ব্রহ্মচর্য্যেতি। ন চাধারাদৃতে দীপস্যোৎপত্তিরদৃষ্টত্বাদিত্যাহ বির-ক্তেতি। যদ্বিষয়েভ্যো ব্যাবৃত্তং চিত্তং রাগাদ্যকলুষিতং তদেব নিবাতমপাবরকং তত্র স্থিত-ত্বমস্য দর্শয়তি বিষয়েতি। ভাস্বতেতি বিশেষণং বিষদয়তি নিত্যেতি। সদাতনং চিত্তৈ-কাগ্র্যং তৎপূর্ব্বকং ধ্যানং তেন জনিতং সম্যগদর্শনফলং তদেব ভাঃ তদ্বতা তৎপর্য্যন্তেনে-ত্যর্থঃ। তেনাজ্ঞানে সকার্য্যে নিবৃত্তে ভগবদ্ভাবঃ স্বয়মেব প্রকাশোভবতীতি মত্বা ব্যাখ্যা-তমেব পদমনুবদতি জ্ঞানেতি ॥ ১১ ॥

নিরস্তাশেষবিশেষং নিরুপাধিকং সোপাধিকঞ্চ সর্ব্বাত্মত্বাদি ভগবতো রূপং তদ্বিকল্পঞ্চ

## স্বামিকৃত টীকা।

বুদ্ধিযোগং দত্বা চ তস্যানুভবপর্য্যন্তং ত্বমাবিক্তত্যাবিদ্যাকৃতং সংসারং নাশয়ামীত্যাহ তেষামিতি। তেষামনুকম্পার্থমনুগ্রহার্থমেবাজ্ঞানাজ্জাতং তমঃ সংসারাখ্যং নাশয়ামি, কুত্র স্থিতঃ সন্ কেন বা সাধনেন তমো নাশয়সীত্যত আহ আত্মভাবস্থো বুদ্ধিবৃত্তৌ স্থিতঃ সন্ ভাস্বতা বিস্ফুরতা জ্ঞানলক্ষণেন দীপেন নাশয়ামি ॥ ১১ ॥

অর্জ্জুনউবাচ—পরং ব্রহ্ম পরং ধাম পবিত্রং পরমং ভবান্।
পুরুষং শাশ্বতং দিব্যমাদিদেবমজং বিভুম্ ॥ ১২ ॥
আহুস্ত্বামৃষয়ঃ সর্ব্বে দেবর্ষির্নারদস্তথা।
অসিতো দেবলো ব্যাসঃ স্বয়ঞ্চৈব ব্রবীষি মে ॥১৩ ॥

## শাঙ্করভাষ্যম্।

যথোক্তাং ভগবতো বিভূতিং যোগঞ্চ শ্রুত্বা অর্জ্জুন উবাচ পরমিতি। পরং ব্রহ্ম পরমাত্মা পরং ধাম পরং তেজঃ পবিত্রং পাবনং পরমং প্রকৃষ্টং ভবান্ পুরুষং শাশ্বতং নিত্যং দিব্যং দিবি ভবমাদিদেবং সর্ব্বদেবানামাদৌ ভবং দেবমজং বিভুং বিভবনশীলং ॥ ১২ ॥

ঈদৃশং আহুঃ কথয়ন্তি ত্বামৃষয়ো বশিষ্ঠাদয়ঃ সর্ব্বে দেবর্ষির্নারদস্তথা অসিতোদেবলোঽপ্যেবমাহ ব্যাসশ্চ স্বয়ঞ্চৈব ব্রবীষি মে মহ্যং ॥ ১৩ ॥

## গিরিকৃত টীকা।

শ্রুত্বা নিরুপাধিকরূপস্য প্রাকৃতবুদ্ধ্যনবগাহ্যোক্তিপূর্ব্বকং মন্দানুগ্রহার্থং সর্ব্বদা সর্ব্ববুদ্ধিগ্রাহ্যং সোপাধিকং রূপং বিস্তারেণ শ্রোতুমিচ্ছন্ পৃচ্ছতীত্যাহ যথোক্তামিতি। পরং ব্রহ্ম ভবানিতি লক্ষ্যনির্দ্দেশঃ তস্য লক্ষণার্থং পরং ধামেত্যাদি বিশেষণত্রয়ং। ধামশব্দস্য স্থানবাচিত্বং ব্যাবর্ত্তয়ন্ ব্যাচষ্টে তেজইতি। তস্য চৈতন্যস্য পরমত্বং জন্মাদিরাহিত্যেন কৌটস্থ্যং প্রকৃষ্টং পাবনমত্যন্তশুদ্ধত্বমুচ্যতে যদেবংলক্ষণং পরমং ব্রহ্ম তত্ত্বভবানেব নান্য ইত্যর্থঃ। কুতস্ত্বমেবমজ্ঞাসারিত্যাশঙ্ক্যাপ্তবাক্যাদিত্যাহ পুরুষমিতি। দিবি পরমে ব্যোম্নি ভবতীতি দিব্যঃ সর্ব্বপ্রপঞ্চাতীতং দীব্যতি দ্যোতত ইতি দেবঃ স চাদিঃ সর্ব্বমূলত্বাদতএবাজস্তং ত্বাং সর্ব্বগতমাহুরিতি সম্বন্ধঃ ॥ ১২ ॥

উক্তবিশেষণং ত্বামৃষয়ঃ সর্ব্বে যস্মাদাহুস্তস্মাত্তদ্বচনাত্তদ্যথোক্তং ব্রহ্মত্বং যুক্তমিত্যাহ ঈদৃশমিতি। ঋষিগ্রহণেন গৃহীতানামপি নারদাদীনাং বিশিষ্টাৎ পৃথক্ গ্রহণং, অসিতো দেবলস্য পিতা। কিমন্যৈস্ত্বঃ স্বয়মেবাত্মানযুক্তরূপং মহ্যমুক্তবানিত্যাহ স্বয়ঞ্চেতি ॥ ১৩ ॥

## স্বামিকৃত টীকা।

সংক্ষেপেণোক্তাং বিভূতিং বিস্তরেণ জিজ্ঞাসুর্ভগবন্তং স্তুবন্নর্জ্জুন উবাচ পরং ব্রহ্মেতি সপ্তভিঃ। পরং ব্রহ্ম পরং ধাম চ আশ্রয়ঃ পরমং পবিত্রং ভবানেব, কুত ইত্যত আহ যতঃ শাশ্বতং নিত্যং পুরুষং, তথা দিব্যং দ্যোতনাত্মকং স্বয়ংপ্রকাশং, আদিশ্চাসৌ দেবশ্চেতি তং দেবানামাদিভূতমিত্যর্থঃ, তথা অজং অজন্মানং বিভুঞ্চ ব্যাপকং ত্বামেবাহুঃ ॥ ১২ ॥

কে তে ইত্যাহ আহুরিতি। ঋষয়ো ভৃগ্বাদয়ঃ সর্ব্বে, দেবর্ষিশ্চ নারদঃ অসিতশ্চ দেবলশ্চ ব্যাসশ্চ স্বয়ং ত্বমেব সাক্ষান্মে মহ্যং ব্রবীষি ॥ ১৩ ॥

সর্ব্বমেতদৃতং মন্যে যন্মাং বদসি কেশব।
ন হি তে ভগবন্ ব্যক্তিং বিদুর্দেবা ন দানবাঃ॥ ১৪ ॥
স্বয়মেবাত্মনাত্মানং বেত্থ ত্বং পুরুষোত্তম।
ভূতভাবন ভূতেশ দেবদেব জগৎপতে ॥ ১৫ ॥

## শাঙ্করভাষ্যম্।

সর্ব্বমিতি। সর্ব্বমেতদ্‌যথোক্তমৃষিভিস্ত্বয়া চৈতদৃতং সত্যমেব মন্যে যন্মাং প্রতি বদসি ভাষসে হে কেশব ন হি তে তব ভগবন্ ব্যক্তিং প্রভবং বিদুর্ন দেবা ন দানবাঃ॥ ১৪ ॥

যতস্ত্বং দেবাদীনামাদিরতঃ স্বয়মিতি। স্বয়মেবাত্মনাত্মানং বেত্থ জানাসি ত্বং কথম্ভূতং নিরতিশয়জ্ঞানৈশ্বর্য্যবলাদিশক্তিমন্তমীশ্বরং পুরুষোত্তম্ ভূতানি ভাবয়তীতি ভূতভাবনঃ তৎসম্বুদ্ধৌ হে ভূতভাবন ভূতেশ ভূতানামীশ হে দেবদেব জগৎপতে॥ ১৫ ॥

## গিরিকৃত টীকা।

ঋষিভিস্ত্বয়া চোক্তত্বাদুক্তং সর্ব্বং সত্যমেবেতি মম মনীষেত্যাহ সর্ব্বমিতি। কিং তদি-ত্যাশঙ্ক্যাত্মরূপমিত্যাহ যন্মামিতি। দেবাদিভিঃ সর্ব্বৈরুচ্যমানতয়া তদ্রূপে বিশিষ্টবক্তৃ-গ্রহণমনর্থকমিত্যাশঙ্ক্যাহ ন হীতি। প্রভবো নাম প্রভবো নিরুপাধিকস্বভাবঃ যদা দেবা-দীনামপি দুর্ব্বিজ্ঞেয়ং তব রূপং তদা কা কথা মনুষ্যাণামিত্যর্থঃ॥ ১৪ ॥

কশ্চিদেব মহতা কষ্টেনানেকজন্মসংসিদ্ধো জানাতি ত্বদনুগৃহীতস্তদ্রূপমিত্যভিপ্রেত্যাহ যত ইতি। স্বয়মেবোপদেশমন্তরেণেত্যর্থঃ, আত্মনা প্রত্যেকেনাবিষয়তয়েতি যাবৎ। আত্মানং নিরুপাধিকং রূপং। ন চ তব সোপাধিকমপি রূপমন্যস্য গোচরে তিষ্ঠতীত্যাহ নিরতিশয়েতি। পুরুষশ্চাসাবুত্তমশ্চেতি ক্ষরাক্ষরাতীতপূর্ণচৈতন্যরূপত্বং সম্বোধনেন বোধ্যতে। সর্ব্বপ্রকৃতিত্বং সর্ব্বকর্তৃত্বঞ্চ কথয়তি ভূতানীতি। সর্ব্বেশ্বরত্বমাহ ভূতানামিতি

## স্বামিকৃত টীকা।

অতো মমেদানীং ত্বদীয়ৈশ্বর্য্যেঽসম্ভাবনা নিবৃত্তেত্যাহ সর্ব্বমেতদিতি। এতত্ত্ববানেব পরং ব্রহ্মেত্যাদি সর্ব্বমপি ঋতং সত্যং মন্যে, যন্মাং প্রতি ত্বং কথয়সি ন মে বিদুঃ সুরগণা ইত্যাদি তদপি সত্যমেব মন্যে ইত্যাহ ন হীতি হে ভগবংস্তব ব্যক্তিং দেবা ন বিদুঃ অস্মদনু-গ্রহার্থনিয়মভিব্যক্তিরিতি ন জানন্তি দানবাশ্চ অস্মন্নিগ্রহার্থমিতি ন বিদুরেবেতি॥ ১৪ ॥

কিং তর্হি স্বয়মেব ত্বমাত্মানং বেত্থ জানাসি নান্যঃ, তদপ্যাত্মনা স্বেনৈব বেত্থ ন সাধনান্তরেণ, অত্যাদরেণ বহুধা সম্বোধয়তি হে পুরুষোত্তম পুরুষোত্তমত্বে হেতুগর্ভসম্বোধ-নানি হে ভূতভাবন ভূতোৎপাদক ভূতানামীশ নিয়ন্তা দেবানামাদিত্যাদীনাং দেব প্রকা-শক জগৎপতে বিশ্বপালক॥ ১৫ ॥

বক্তুমর্হস্যশেষেণ দিব্যা হ্যাত্মবিভূতয়ঃ।
যাভির্বিভূতিভির্লোকানিমাংস্ত্বং ব্যাপ্য তিষ্ঠসি ॥ ১৬॥
কথং বিদ্যামহং যোগিংস্ত্বাং সদা পরিচিন্তয়ন্।
কেষু কেষু চ ভাবেষু চিন্ত্যোঽসি ভগবন্ময়া ॥ ১৭ ॥

## শাঙ্করভাষ্যম্।

বক্তুমিতি। বক্তুং কথয়িতুমর্হস্যশেষেণ দিব্যা হ্যাত্মবিভূতয়ঃ আত্মনো বিভূতয়ো যাস্তা বক্তুমর্হসি যাভির্বিভূতিভিরাত্মনো মাহাত্ম্যবিস্তরৈরিমান্ লোকাংস্ত্বং ব্যাপ্য তিষ্ঠসি॥ ১৬॥

কথমিতি। কথং বিদ্যাং বিজানীয়াং অহং হে যোগিন্ ত্বাং সদা পরিচিন্তয়ন্ কেষু কেষু চ ভাবেষু বস্তুষু চিন্ত্যোঽসি ধ্যেয়োঽসি ভগবন্ ময়া ॥ ১৭ ॥

## গিরিকৃত টীকা।

উক্তং তে সোপাধিকং রূপং দেবাদীনামারাধ্যতামধিগচ্ছতীত্যাহ দেবেতি। জগতঃ সর্ব্বস্য স্বামিত্বেন পালয়িতৃত্বমাহ জগদিতি ॥ ১৫ ॥

যস্মাদস্মাদৃশামগোচরস্তবাত্মা জিজ্ঞাসিতশ্চ তস্মাত্ত্বয়ৈব তদ্রূপং বক্তব্যমিত্যাহ বক্তুমিতি। দিব্যত্বমপ্রাকৃতত্বং। সংপ্রত্যন্বয়মন্বাচষ্টে আত্মনইতি। বক্তব্যা বিভূতীর্বিশিনষ্টি যাভিরিতি। যদ্দ্বারা লোকান্ পূরয়িত্বা বর্ত্তসে তা বিভূতীরশেষেণ বক্তুমর্হসীত্যর্থঃ ॥ ১৬॥

কিমর্থং বিভূতীঃ শ্রোতুমিচ্ছতীত্যাশঙ্ক্য ধ্যানসৌকর্য্যপ্রকারপ্রশ্নেন ফলং কথয়তি কথমিতি। যোগো নামৈশ্বর্য্যং তদস্যাস্তীতি যোগী তস্য সম্বুদ্ধৌ হে যোগিন্নহং স্থবিষ্ঠমতিস্ত্বাং কেন প্রকারেণ সততমনুসন্দধানো বিশুদ্ধবুদ্ধির্ভূত্বা নিরূপাধিকং ত্বাং বিজানীয়ামিতি প্রশ্নঃ। প্রশ্নান্তরং প্রস্তৌতি কেষু কেম্বিতি। চেতনাচেতনভেদাদুপাধিবহুত্বাচ্চ বহুবচনং ॥ ১৭ ॥

প্রকৃতপ্রশ্নমুপসংহরতি বিস্তরেণেতি। অর্দ্দতের্গতিকর্ম্মণো জনার্দ্দনেতি রূপং তৎ ব্যুৎ-

## স্বামিকৃত টীকা।

যস্মাত্তবাভিব্যক্তিং ত্বমেব বেৎসি ন দেবাদয়স্তস্মাদ্বক্তুমিতি। আত্মনস্তব দিব্যা অদ্ভুতা বিভূতয়স্তাঃ সর্ব্বা বক্তুং ত্বমেবার্হসি যোগ্যোঽসি, যাভিরিতি বিভূতীনাং বিশেষণং স্পষ্টার্থং ॥ ১৬ ॥

কথনপ্রয়োজনং দর্শয়ন্প্রার্থয়তে কথমিতি দ্বাভ্যাং। হে যোগিন্ কথং কৈর্বিভূতিভেদৈঃ সদা পরিচিন্তয়ন্নহং ত্বাং বিদ্যাং জানীয়াং, বিভূতিভেদেন চিন্ত্যোঽসি ত্বং কেষু কেষু পদার্থেষু ময়া চিন্তনীয়োঽসি ॥ ১৭ ॥

বিস্তরেণাত্মনো যোগং বিভূতিঞ্চ জনার্দ্দন।
ভূয়ঃ কথয় তৃপ্তির্হি শৃণ্বতো নাস্তি মেঽমৃতম্ ॥ ১৮ ॥
শ্রীগভবানুউবাচ—হন্ত তে কথয়িষ্যামি দিব্যা হ্যাত্মবিভূতয়ঃ।
প্রাধান্যতঃ কুরুশ্রেষ্ঠ নাস্ত্যন্তো বিস্তরস্য মে ॥ ১৯ ॥

## শাঙ্করভাষ্যম্।

বিস্তরেণেতি। বিস্তরেণাত্মনো যোগং যোগৈশ্বর্য্যং শক্তিবিশেষং বিভূতিঞ্চ বিস্তরং ধ্যেয়পদার্থানাং হে জনার্দ্দন অর্দ্দতের্গতিকর্ম্মণো রূপং অসুরাণাং দেবপ্রতিপক্ষভূতানাং জনানাং নবকাদিগমযিতৃত্বাজ্জনার্দ্দন অভ্যুদয়নিঃশ্রেসপুরুষার্থপ্রযোজনং সর্ব্বৈর্জনৈর্যাচ্যত ইতি বা ভূয়ঃ পূর্ব্বমুক্তমপি কথয় তৃপ্তির্হি পরিতোষো যস্মান্নাস্তি মে মম শৃণ্বতঃ ত্বন্মুখনিঃ-সৃতবাক্যামৃতং ॥ ১৮ ॥

হন্ত ত ইতি। হন্তেদানীং তে তব দিব্যা দিবি ভবা আত্মবিভূতযঃ আত্মনো মম বিভূ-তযো যা স্তাঃ কথযিষ্যামীত্যেৎ প্রাধান্যতো যত্র যত্র প্রধানা যা যা বিভূতিস্তাং তাং

## গিরিকৃত টীকা।

পাদয়তি অসুবাণামিতি। প্রকাবান্তরেণ শব্দার্থং ব্যুৎপাদয়তি অভ্যুদয়েতি। নমু পূর্ব্বমেব সপ্তমে চ বিভূতিবৈশ্বর্য্যঞ্চেশ্বরস্য দর্শিতং তৎ কিমিতি শ্রোতুমিষ্যতে তত্র ভূয় ইতি। অমৃতমমৃতপ্রখ্যমিত্যর্থঃ ॥ ১৮ ॥

প্রষ্টাবং বিশ্রম্ভয়িতুং ভগবানুক্তবানিত্যাহ শ্রীভগবানিতি। হন্তেত্যনুমতিং ব্যাবর্ত্ত্য জিজ্ঞাসাবচ্ছিন্নং কালং দর্শযতি ইদানীমিতি। দিবি ভবত্বমপ্রাকৃতত্বমস্মদগোচরত্বং। বাক্যান্বযং দ্যোতয়তি যাস্তা ইতি। সর্ব্ববিভূতীনাং বক্তব্যত্বপ্রাপ্তাবুক্তং যত্রেতি। কিমি-ত্যনবশেষতো বিভূতয়ো নোচ্যন্তে তত্রাহ অশেষতস্ত্বিতি। তত্র হেতুর্যত ইতি ॥ ১৯ ॥

বিভূতিপ্রদর্শনে প্রস্তুতে সত্যাদাবেব পারমার্থিকং পাবমেশ্বরং রূপং দর্শয়িতুং শ্রোতু-

## স্বামিকৃত টীকা।

তদেবং বহির্ম্মুখেঽপি চিত্তে তত্র তত্র বিভূতিভেদেন ত্বচ্চিন্তৈব যথা ভবেত্তথা বিস্তরেণ কথয়েত্যাহ বিস্তরেণেতি। আত্মনস্তব যোগং সর্ব্বজ্ঞত্বসর্ব্বশক্তিত্বাদিলক্ষণং যোগৈশ্বর্য্যং বিভূতিঞ্চ বিস্তরেণ পুনঃ কথয়, যতস্তব বাক্যমমৃতরূপং শৃণ্বতো মম তৃপ্তিরলংবুদ্ধি-র্নাস্তি ॥ ১৮ ॥

এবং প্রার্থিতঃ সন্ শ্রীভগবানুবাচ হন্তেতি। হন্তেত্যনুকম্পাসম্বোধনে, দিব্যা যা মদ্বি-ভূতয়স্তাঃ প্রাধান্যেন তুভ্যং কথয়িষ্যামি যতোঽবান্তরস্য বিভূতিবিস্তরস্য মদীয়স্যান্তো নাস্তি অতঃ প্রধানভূতাঃ কতিচিদ্বর্ণয়িষ্যামি ॥ ১৯ ॥

অহমাত্মা গুড়াকেশ সর্ব্বভূতাশয়স্থিতঃ।
অহমাদিশ্চ মধ্যঞ্চ ভূতানামন্ত এব চ ॥ ২০ ॥

## শাঙ্করভাষ্যম্।

প্রধানাং প্রাধান্যতঃ কথয়িষ্যাম্যহং কুরুশ্রেষ্ঠ অশেষতস্তু বর্ষশতেনাপি ন শক্যতে বক্তুমতো নাস্ত্যন্তো বিস্তরস্য মে বিভূতীনামিত্যর্থঃ ॥ ১৯ ॥

তত্র প্রথমমেব তাবচ্ছৃণু অহমিতি। অহমাত্মা গুড়াকেশঃ গুড়াকা নিদ্রা তস্যা ঈশো গুড়াকেশো জিতনিদ্র ইত্যর্থঃ ঘনকেশ ইতি বা সর্ব্বেষাং ভূতানাং আশয়েঽন্তর্হৃদি স্থিতোঽহমাত্মা প্রত্যগাত্মা নিত্যং ধ্যেয়স্তদশক্তেন চোত্তরেষু ভাবেষু চিন্ত্যোঽহং চিন্তয়িতুং শক্যঃ যস্মাদহমেবাদির্ভূতানাং কারণং তথা মধ্যঞ্চ স্থিতিরন্তঃ প্রলয়শ্চ এবঞ্চ ধ্যেয়োঽহং ॥ ২০ ॥

## গিরিকৃত টীকা।

রর্জ্জুনস্য মনঃসমাধানার্থং অর্থয়তে তত্রেতি। সোপাধিকমপি কাল্পনিকং পরস্য রূপং পশ্চাদ্বক্ষ্যমাণং শ্রোতুশ্চিত্তসমাধানঞ্চ কর্ত্তব্যমেবেত্যাহ তাবদিতি। আশেরতেঽস্মিন্নবিদ্যাকর্ম্মপূর্ব্বপ্রজ্ঞা ইত্যাশয়ো হৃদয়ং সর্ব্বেষাং ভূতানাং হৃদয়েঽন্তঃ স্থিতো যঃ প্রত্যগাত্মা সোঽহমেবেতি বাক্যার্থমাহ সর্ব্বেষামিতি। যস্তু মন্দো মধ্যমো বা পরমাত্মানমাত্মত্বেন ধ্যাতুং নালং তং প্রত্যাহ তদশক্তেনেতি। বক্ষ্যমাণাদিত্যাদিষু পরস্য ন ধ্যেয়ত্বমন্যদেব কারণং কিঞ্চিত্তত্র ধ্যেযমিত্যাশঙ্ক্যাহ যস্মাদিতি। সর্ব্বকারণত্বেন সর্ব্বজ্ঞত্বেন সর্ব্বেশ্বরত্বেন চ পরস্য ধ্যেয়ত্বমত্রেপ্সিতং নান্যস্য কস্যচিৎ কারণস্যাদিত্যাদিষু ধ্যেয়তেত্যর্থঃ। উক্তধ্যানাশক্তেভ্যো বক্তব্যং বিভূতিযোগমুপদিশতি এবঞ্চেতি। তত্র তত্র প্রধানত্বেন পরস্য ধ্যেয়ত্বং ॥ ২০ ॥

## স্বামিকৃত টীকা।

তত্র প্রথমমৈশ্বরং রূপং কথয়তি অহমিতি। হে গুড়াকেশ সর্ব্বেষাং ভূতানামাশযেষন্তঃকরণেষু সর্ব্বজ্ঞত্বাদিগুণৈর্নিয়ন্তৃত্বেনাবস্থিতঃ পরমাত্মাহং, আদির্জন্ম মধ্যং স্থিতিঃ অন্তঃ সংহারঃ সর্ব্বভূতানাং জন্মাদিহেতুশ্চাহমেবেত্যর্থঃ ॥ ২০ ॥

ইদানীং বিভূতীঃ কথয়তি আদিত্যানামিতি যাবৎসমাপ্তি। আদিত্যানাঞ্চ দ্বাদশাদিত্যানাং মধ্যে বিষ্ণুনামাহং জ্যোতিষাং প্রকাশকানাং মধ্যে অংশুমান্ বিশ্বব্যাপিরশ্মিযুক্তো রবিঃ সূর্য্যোঽহং, মরুতাং বায়ূনাং মধ্যে মরীচির্নামাহমস্মি, যদ্বা সপ্তমরুদ্গণা দেববিশেষাস্তেষাং মধ্যে, নক্ষত্রাণাং মধ্যে চন্দ্রোঽহং, অত্র চাদিত্যানামহং বিষ্ণুরিত্যাদিষু প্রায়শো নির্দ্ধারণে ষষ্ঠী ক্বচিচ্চ ভূতানামস্মি চেতনেত্যাদিষু সম্বন্ধে ষষ্ঠী তচ্চ তত্রৈব দর্শয়ি-

আদিত্যানামহং বিষ্ণুর্জ্যোতিষাং রবিরংশুমান্।
মরীচির্মরুতামস্মি নক্ষত্রাণামহং শশী ॥ ২১ ॥
বেদানাং সামবেদোঽস্মি দেবানামস্মি বাসবঃ।
ইন্দ্রিয়াণাং মনশ্চাস্মি ভূতানামস্মি চেতনা ॥ ২২ ॥
রুদ্রাণাং শঙ্করশ্চাস্মি বিত্তেশো যক্ষরক্ষসাম্।
বসূনাং পাবকশ্চাস্মি মেরুঃ শিখরিণামহম্ ॥ ২৩ ॥

## শাঙ্করভাষ্যম্।

আদিত্যানামিতি। আদিত্যানাং দ্বাদশানাং বিষ্ণুর্নামাদিত্যোঽহং জ্যোতিষাং রবিঃ অংশুমান্ প্রকাশয়িতৄণামংশুমান্ রশ্মিমান্ মরীচির্নাম মরুতাং মরুদ্দেবতাভেদানাং অস্মি নক্ষত্রাণামহং শশী চন্দ্রমাঃ ॥ ২১ ॥

বেদানামিতি। বেদানাং মধ্যে সামবেদোঽস্মি দেবানাং রুদ্রাদিত্যাদানাং বাসব ইন্দ্রোঽস্মি ইন্দ্রিয়ানামেকাদশানাং চক্ষুরাদীনাং সঙ্কল্পবিকল্পাত্মকং মনশ্চাস্মি ভূতানামস্মি চেতনা কার্য্যকারণসংঘাতেঽভিব্যক্তা বুদ্ধের্বৃত্তিশ্চেতনা ॥ ২২ ॥

রুদ্রাণামিতি। রুদ্রাণামেকাদশানাং শঙ্করশ্চাস্মি বিত্তেশঃ কুবেরো যক্ষরক্ষসাং যক্ষাণাং রক্ষসাঞ্চ বসূনামষ্টানাং পাবকশ্চাস্মি অগ্নিঃ মেরুঃ শিখরিণাং শিখরবতামহং। ॥২৩ ॥

পুরোধসামিতি। পুরোধসাং রাজপুরোহিতানাং মুখ্যং প্রধানং মাং বিদ্ধি জানীহি

## গিরিকৃত টীকা।

এবং শব্দার্থমেব দর্শযতি আদিত্যানামিত্যাদিনা ॥ ২১ ॥

মন্ত্রব্রাহ্মণসমুদায়ানামৃগাদীনাং মধ্যে সামবেদোঽস্মীতি ধ্যানান্তরমুদাহরতি বেদানামিতি। সংঘাতে জীবাধিষ্ঠিতে ইতি যাবৎপঞ্চত্বঃ সর্ব্বত্র ব্যাপিনী চৈতন্যাভিব্যঞ্জিকেতি শেষঃ ॥ ২২ ॥ ২৩ ॥

## স্বামিকৃত টীকা।

ব্যামঃ, বিষ্ণুবিত্যাদিম্বতারোঽপি প্রভাবাতিশয়মাত্রবিবক্ষয়া বিভূতিত্বেন নির্দ্দিশ্যতে। অতঃপরঞ্চাধ্যায়স্য স্পষ্টার্থত্বেঽপি ক্বচিৎ কিঞ্চিদ্ব্যাখ্যাস্যামঃ ॥ ২১ ॥

বেদানামিতি। বাসব ইন্দ্রঃ ভূতানাং সম্বন্ধিনী চেতনা জ্ঞানশক্তিরহমস্মি ॥ ২২ ॥

রুদ্রাণামিতি। রক্ষসামপি ক্রূরত্বাদিসাম্যাৎ যক্ষৈঃ সহৈকীকৃত্য নির্দ্দেশঃ, তেষাং মধ্যে বিত্তেশঃ কুবেরোঽস্মি, পাবকোঽগ্নিঃ, শিখরিণাং শিখরবতামুচ্ছ্রিতানাং মধ্যে মেরুঃ ॥ ২৩ ॥

পুরোধসাঞ্চ মুখ্যং মাং বিদ্ধি পার্থ বৃহস্পতিম্।
সেনানীনামহং স্কন্দঃ সরসামস্মি সাগরঃ ॥ ২৪ ॥
মহর্ষীণাং ভৃগুরহং গিরামস্ম্যেকমক্ষরম্।
যজ্ঞানাং জপযজ্ঞোঽস্মি স্থাবরাণাং হিমালয়ঃ ॥ ২৫ ॥
অশ্বত্থঃ সর্ব্ববৃক্ষাণাং দেবর্ষীণাঞ্চ নারদঃ।
গন্ধর্ব্বাণাং চিত্ররথঃ সিদ্ধানাং কপিলো মুনিঃ ॥ ২৬ ॥

## শাঙ্করভাষ্যম্।

হে পার্থ বৃহস্পতিং স হীন্দ্রস্যেতি মুখ্যঃ স্যাৎ পুরোধাঃ সেনানীনাং সেনাপতীনামহং স্কন্দো দেবসেনাপতিঃ সরসাং যানি দেবখাতানি সরাংসি তেষাং সরসাং সাগরোঽস্মি ভবামি ॥ ২৪ ॥

মহর্ষীণামিতি। মহর্ষীণাং ভৃগুরহং গিরাং বাচাং পদলক্ষণানামেকমক্ষরমোঙ্কারোঽস্মি। যজ্ঞানামিতি। যজ্ঞানাং জপযজ্ঞোঽস্মি স্থাবরাণাং স্থিতিমতাং হিমালয়ঃ ॥২৫॥

অশ্বত্থইতি। অশ্বত্থঃ সর্ব্ববৃক্ষাণাং দেবর্ষীণাঞ্চ নারদঃ দেবাএব সন্ত ঋষিত্বং প্রাপ্তাঃ মন্ত্রদর্শিত্বাদ্যে তে দেবর্ষয়ঃ তেষাং নারদোঽস্মি গন্ধর্ব্বাণাং চিত্ররথো নাম গন্ধর্ব্বোঽস্মি সিদ্ধানাং জন্মনৈব ধর্ম্মজ্ঞানবৈরাগ্যৈশ্বর্য্যাতিশয়ং প্রাপ্তানাং কপিলো মুনিঃ ॥ ২৬ ॥

## গিরিকৃত টীকা।

পুরোহিতেষু বৃহস্পতের্মুখ্যত্বে হেতুমাহ স হীতি ॥ ২৪ ॥

একমিত্যোঙ্কারস্য ব্রহ্মপ্রতীকত্বেন তদভিধানত্বেন চ প্রধানত্বমুচ্যতে। জপযজ্ঞস্য যজ্ঞান্তরেভ্যো হিংসাদিরাহিত্যেন প্রাধান্যমুপেত্যাহ যজ্ঞানামিতি। শিখরবতামুচ্ছ্রিতানাং পর্ব্বতানাং মধ্যে মেরুরহমিত্যুক্তেঽপি স্থিতিশীলানাং তেষামেব হিমবান্ পর্ব্বতরাজোঽস্মীত্যর্থভেদং গৃহীত্বাহ স্থিতিমতামিতি ॥ ২৫ ॥

সর্ব্ববৃক্ষাণামিত্যত্র সর্ব্বশব্দেন বনস্পতয়ো গৃহ্যন্তে ॥ ২৬ ॥ ২৭ ॥

## স্বামিকৃত টীকা।

পুরোধসামিতি। পুরোধসাং মধ্যে দেবপুরোহিতত্বান্মুখ্যং বৃহস্পতিং মাং বিদ্ধি, সেনানীনাং সেনাপতীনাং মধ্যে দেবসেনাপতিঃ স্কন্দোঽহমস্মি, সরসাং স্থিরজলাশয়ানাং মধ্যে সমুদ্রোঽস্মি ॥ ২৪ ॥

মহর্ষীণামিতি। গিরাং বাচাং পদাত্মিকানাং মধ্যে একমক্ষরমোঙ্কারাখ্যং পদমস্মি ॥২৫॥

অশ্বত্থইতি। দেবাএব সন্তো যে মন্ত্রদর্শনেন ঋষিত্বং প্রাপ্তাস্তেষাং মধ্যে নারদোঽস্মি সিদ্ধানামুৎপত্তিত এবাধিগতপরমার্থতত্ত্বানাং মধ্যে কপিলাখ্যো মুনিরস্মি ॥২৬॥

উচ্চৈঃশ্রবসমশ্বানাং বিদ্ধি মামমৃতোদ্‌ভবম্।
ঐরাবতং গজেন্দ্রাণাং নরাণাঞ্চ নরাধিপম্ ॥ ২৭ ॥
আয়ুধানামহং বজ্রং ধেনূনামস্মি কামধুক্।
প্রজনশ্চাস্মি কন্দর্প সর্পাণামস্মি বাসুকিঃ ॥ ২৮ ॥
অনন্তশ্চাস্মি নাগানাং বরুণো যাদসামহম্।
পিতৃণামর্য্যমা চাস্মি যমঃ সংযমতামহম্ ॥ ২৯ ॥

## শাঙ্করভাষ্যম্।

উচ্চৈরিতি। উচ্চৈঃশ্রবসমশ্বানাং উচ্চৈঃশ্রবা নামাশ্বস্তং মাং বিদ্ধি জানীহি অমৃতোদ্ভবং অমৃতনিমিত্তমথনোদ্ভবং ঐরাবতমিরাবত্যা অপত্যং গজেন্দ্রাণাং হস্তীশ্বরাণাং তং মাং বিদ্ধি ইত্যনুবর্ত্ততে নরাণাং মনুষ্যাণাঞ্চ নরাধিপং রাজানং মাং বিদ্ধি জানীহি ॥ ২৭ ॥

আয়ুধানামিতি। অয়ুধানামহং বজ্রং দধীচ্যস্থিসম্ভবং মাং বিদ্ধি ধেনূনাং দোগ্ধ্রীণামস্মি কামধুক্ বশিষ্ঠস্য সর্ব্বকামানাং দোগ্ধ্রী সামান্যা বা কামধুক্ প্রজনঃ প্রজনয়িতাস্মি কন্দর্পঃ কামঃ চাস্মি সর্পাণাং সর্পভেদানামস্মি বাসুকিঃ সর্পরাজঃ ॥ ২৮ ॥

অনন্তইতি। অনন্তশ্চাস্মি নাগানাং নাগবিশেষাণাং নাগরাজঃ বরুণো যাদসামহমব্দেবতানাং রাজাহং পিতৃণামর্য্যমা নাম পিতৃরাজশ্চাস্মি যমঃ সংযমতাং সংযমনং কুর্ব্বতামহং ॥ ২৯ ॥

## গিরিকৃত টীকা।

প্রজনয়তীতি ব্যুৎপত্তিমাশ্রিত্যাহ প্রজনয়িতেতি। সর্পা নাগাশ্চ জাতিভেদাদ্ভিদ্যন্তে ॥ ২৮ ॥ ২৯ ॥ ৩০ ॥

## স্বামিকৃত টীকা।

উচ্চৈঃশ্রবসমিতি। অমৃতার্থং ক্ষীরোদধিমথনাদুদ্ভূতং উচ্চৈঃশ্ররসনামাশ্বং মদ্বিভূতিং বিদ্ধি, অমৃতোদ্ভবমিত্যেতদৈরাবতেঽপি সংবধ্যতে, নরাধিপং রাজানং মাং বিদ্ধি ॥ ২৭ ॥

আয়ুধানামিতি। কামান্ দোগ্ধীতি, কামধুক্, প্রজনঃ প্রজোৎপত্তিহেতুঃ কন্দর্পঃ কামোঽস্মি ন কেবলং সম্ভোগমাত্রপ্রধানঃ কামো মদ্বিভূতিরশাস্ত্রীয়ত্বাৎ, সর্পাণাং সবিষাণাং রাজা বাসুকিরস্মি ॥ ২৮ ॥

অনন্তইতি। নাগানাং নির্ব্বিষাণাং রাজা অনন্তঃ শেষোঽস্মি, যাদসাং জলচরাণাং মধ্যে রাজা বরুণোঽস্মি, পিতৃণাং রাজা যমাস্মি, সংযমতাং নিয়মং কুর্ব্বতাং মধ্যে যমোঽস্মি ॥ ২৯ ॥

প্রহ্লাদশ্চাস্মি দৈত্যানাং কালঃ কলয়তামহম্।
মৃগাণাঞ্চ মৃগেন্দ্রোঽহং বৈনতেয়শ্চ পক্ষিণাম্ ॥ ৩০ ॥
পবনঃ পবতামস্মি রামঃ শস্ত্রভৃতামহম্।
ঝষাণাং মকরশ্চাস্মি স্রোতসামস্মি জাহ্নবী ॥ ৩১ ॥
সর্গাণামাদিরন্তশ্চ মধ্যঞ্চৈবাহমর্জ্জুন।
অধ্যাত্মবিদ্যা বিদ্যানাং বাদঃ প্রবদতামহম্ ॥ ৩২ ॥

## শাঙ্করভাষ্যম্।

প্রহ্লাদইতি। প্রহ্লাদো নাম চাস্মি দৈত্যানাং দিতিবংশ্যানাং কালঃ কলয়তাং কলনং গণনং কুর্ব্বতামহং মৃগাণাঞ্চ মৃগেন্দ্রঃ সিংহো ব্যাঘ্রো বাহং বৈনতেয়শ্চ গরুত্মান্ বিনতাসুতঃ পক্ষিণাং পতত্রিণাং ॥ ৩০ ॥

পবনইতি। পবনো বায়ুঃ পবতাং পাবয়িতৃনাং অস্মি,রামঃ শস্ত্রভৃতামহং শস্ত্রাণাং ধারয়িতৃণাং দাশরথী রামোঽহং, ঝষাণাং মৎস্যাদানাং মকরো নাম জাতিবিশেষোঽহং, স্রোতসাং স্রবন্তীনামস্মি জাহ্নবী গঙ্গা ॥ ৩১ ॥

সর্গাণামিতি। সর্গাণাং সৃষ্টীনাং আদিরন্তশ্চ মধ্যঞ্চৈবাহমুৎপত্তিস্থিতিলয়ানাং অহমর্জ্জুন ভূতানাং জীবাধিষ্ঠিতানামেবাদিরন্তশ্চেত্যাদ্যুক্তমুপক্রম ইহ তু সর্ব্বস্যৈব সর্গমাত্র-

## গিরিকৃত টীকা।

অহমাদিশ্চেত্যাদাবুক্তমেব পুনরিহোচ্যতে তথাচ পুনরুক্তিরিত্যাশঙ্ক্যাহ ভূতানামিতি। সর্গশব্দেন সৃজ্যন্ত ইতি সর্ব্বাণি কার্য্যাণি গৃহ্যন্তে। অধ্যাত্মবিদ্যেতি। আত্মন্যন্তঃকরণপরিণতিরবিদ্যানিবর্ত্তিকা গৃহীতা, প্রবদতাং সম্বন্ধী বাদো বীতরাগকথা তত্ত্বনির্ণয়াবসানা। যদ্বা প্রবদতামিতি লক্ষণয়া কথাভেদোপাদানং তদা নির্দ্ধারণে ষষ্ঠীত্যাহ প্রবক্তৃতি ॥ ৩১ ॥ ৩২ ॥

## স্বামিকৃত টীকা।

প্রহ্লাদইতি। কলয়তাং বশীকুর্ব্বতাং গণয়তাং বা মধ্যে কালোঽহমস্মি, মৃগেন্দ্রঃ সিংহঃ, পক্ষিণাং মধ্যে গরুড়োঽস্মি ॥ ৩০ ॥

পবনইতি। পবতাং পাবয়িতৃণাং বেগবতাং বা মধ্যে বায়ুরহমস্মি, রামো দাশরথিঃ, ঝষাণাং মৎস্যানাং মধ্যে মকরনামা মৎস্যজাতিবিশেষোঽহং স্রোতসাং প্রবাহোদকানাং মধ্যে ভাগীরথী ॥ ৩১ ॥

সর্গাণামিতি। সৃজ্যন্ত ইতি সর্গা আকাশাদয়স্তেষামাদিরন্তশ্চ মধ্যঞ্চৈবাহং, অহমাদিশ্চ মধ্যঞ্চেত্যত্র সৃষ্ট্যাদিকর্ত্তৃত্বং পারমৈশ্বর্য্যমুক্তং অত্র তে সৃষ্টিস্থিতিপ্রলয়া মদ্বিভূতিত্বেন ধ্যেয়া

অক্ষরাণামকারোঽস্মি দ্বন্দ্বঃ সামাসিকস্য চ।
অহমেবাক্ষয়ঃ কালো ধাতাহং বিশ্বতোমুখঃ ॥ ৩৩ ॥

## শাঙ্করভাষ্যম্।

স্যেতি বিশেষঃ, অধ্যাত্মবিদ্যা বিদ্যানাং মোক্ষার্থত্বাৎ প্রধানমস্মি, বাদোঽর্থনির্ণয়হেতুত্বাৎ প্রবদতাং প্রধানমতঃ সোঽহমস্মি প্রবক্তৃদ্বারেণ বদনভেদানামেব বাদজল্পবিতণ্ডানামিহ গ্রহণং প্রবদতামিতি ॥ ৩২ ॥

অক্ষরাণামিতি। অক্ষরাণাং বর্ণানামকারো বর্ণোঽস্মি দ্বন্দ্বঃ সমাসোঽস্মি সামাসিকস্য সমাসসমূহস্য কিঞ্চ অহমেবাক্ষয়োঽক্ষীণঃ কালঃ প্রসিদ্ধঃ ক্ষণলবাখ্যঃ অথবা পরমেশ্বরঃ কালস্যাপি কালোঽস্মি ধাতাহং কর্ম্মফলস্য বিধাতা সর্ব্বজগতো বিশ্বতোমুখঃ সর্ব্বতোমুখঃ ॥ ৩৩ ॥

## গিরিকৃতটীকা।

সর্ব্বহরশব্দস্য মুখ্যমর্থান্তরমাহ অথবেতি। ভাবিকল্যাণানামিত্যুক্তমেব স্পষ্টয়তি উৎকর্ষেতি। কীর্ত্তির্ধাম্মিকত্বনিমিত্তা খ্যাতিঃ শ্রীর্লক্ষ্মীঃ কান্তিঃ শোভা বাক্ বাণী সর্ব্বস্য প্রকাশিকা স্মৃতিশ্চিরানুভূতস্মরণশক্তিঃ মেধা গ্রন্থধারণশক্তিঃ ধৃতির্ধৈর্য্যং ক্ষমা মানাপমানয়োরবিকৃতচিত্ততা। স্ত্রীষু কীর্ত্ত্যাদীনামুত্তমত্বমুপপাদয়তি যাসামিতি ॥ ৩৩ ॥ ৩৪ ॥

## স্বামিকৃত টীকা।

ইত্যুচ্যত ইতি বিশেষঃ। অধ্যাত্মবিদ্যা আত্মবিদ্যা, প্রবদতাং বাদিনাং সম্বন্ধিন্যো বাদজল্পবিতণ্ডাখ্যাস্তিস্রঃ কথাঃ প্রসিদ্ধাস্তাসাং মধ্যে বাদোঽহং, যত্র দ্বাভ্যামপি প্রমাণতস্তর্কতশ্চ স্বপক্ষঃ স্থাপ্যতে পরপক্ষশ্ছলজাতিনিগ্রহস্থানৈর্দূষ্যতে স জল্পো নাম যত্র ত্বেকঃ স্বপক্ষং স্থাপয়তি অন্যস্তু ছলজাতিনিগ্রহস্থানৈস্তৎপক্ষং দূষয়তি ন তু স্বপক্ষং স্থাপয়তি সা বিতণ্ডা নাম কথা তত্র জল্পবিতণ্ডে বিজিগীষমাণয়োর্বাদিনোঃ শক্তিপরীক্ষামাত্রফলে বাদস্তু বীতরাগয়োঃ শিষ্যাচার্য্যয়োরন্যয়োর্ব্বা তত্ত্বনিরূপণফলঃ অতোঽসৌ শ্রেষ্ঠত্বান্মদ্বিভূতিরিত্যর্থঃ ॥৩২॥

অক্ষরাণামিতি অক্ষরাণাং বর্ণানাং মধ্যে অকারোঽস্মি তস্য সর্ব্ববাঙ্ময়ত্বেন শ্রেষ্ঠত্বাৎ, তথা চ শ্রুতিঃ, অকারো বৈ সর্ব্বা বাক্ সৈষা স্পর্শোষ্মভির্ব্যজ্যমানা বহ্বী নানারূপা ভবতীতি স্মৃয়ত ইতি শ্রৈষ্ঠ্যং, সামাসিকস্য সমাসসমূহস্য মধ্যে দ্বন্দ্বঃ রামকৃষ্ণাবিত্যাদিসমাসোঽস্মি উভয়পদপ্রধানত্বেন শ্রেষ্ঠত্বাৎ, অক্ষয়ঃ প্রবাহরূপঃ কালোঽহমস্মি কালঃ কলয়তামহমিত্যত্রায়ুর্গণনাত্মকঃ সম্বৎসরশতাদ্যায়ুঃস্বরূপঃ কাল উক্তঃ স চ তস্মিন্নায়ুষি ক্ষীণে সতি ক্ষীয়তে অত্র তু প্রবাহাত্মকোঽক্ষয়ঃ কাল উচ্যত ইতি বিশেষঃ, কর্ম্মফলবিধাতৃণাং মধ্যে বিশ্বতোমুখো ধাতা সর্ব্বকর্ম্মফলবিধাতাহমিত্যর্থঃ ॥৩৩॥

মৃত্যুঃ সর্ব্বহরশ্চাহমুদ্ভবশ্চ ভবিষ্যতাম্।
কীর্ত্তিঃ শ্রীর্বাক্ চ নারীণাং স্মৃতির্মেধা ধৃতিঃ ক্ষমা ॥ ৩৪ ॥
বৃহৎসাম তথা সাম্নাং গায়ত্রী ছন্দসামহম্।
মাসানাং মার্গশীর্ষোঽহমৃতূনাং কুসুমাকরঃ ॥৩৫॥

## শাঙ্করভাষ্যম্।

মৃত্যুরিতি। মৃত্যুর্দ্বিবিধো ধনাদিহরঃ প্রাণহরশ্চ তত্র যঃ প্রাণহরঃ স উচ্যতে সোঽহমিত্যর্থোঽথবা পর ঈশ্বরঃ প্রলয়ে সর্ব্বহরণাৎ সর্ব্বহরঃ সোঽহমুদ্ভব উৎকর্ষোঽভ্যুদয়স্তৎপ্রাপ্তিহেতুশ্চাহং কেষাং ভবিষ্যতাং ভাবিকল্যাণানামুৎকর্ষপ্রাপ্তিযোগ্যানামিত্যর্থঃ, কীর্ত্তিঃ শ্রীর্বাক্‌চ নারীণাং স্মৃতির্মেধা ধৃতিঃ ক্ষমেত্যেতা উত্তমাঃ স্ত্রীণামহমস্মি যাসামাভাসমাত্রসম্বন্ধেনাপি লোকাঃ কৃতার্থমাত্মানং মন্যন্তে ॥ ৩৪ ॥

বৃহৎসামেতি। বৃহৎসাম তথা সাম্নাং মোক্ষপ্রতিপাদকসামবেদবিশেষঃ প্রধানমস্মি, গায়ত্র্যাদিচ্ছন্দোবিশিষ্টানামৃচাং গায়ত্রী ঋগহমিত্যর্থঃ। মাসানাং মার্গশীর্ষোঽহমৃতূনাং কুসুমাকরো বসন্তঃ॥ ৩৫ ॥

দ্যূতমিতি। দ্যূতমক্ষদেব নাদিলক্ষণং ছলয়তাং ছলস্য কর্ত্তৃণামস্মি, তেজস্বিনাং

## গিরিকৃত টীকা।

বেদানাং সামবেদোঽস্মীত্যুক্তং তত্রাবান্তরবিশেষমাহ বৃহদিতি। ছন্দসাং মধ্যে গায়ত্রী নাম যচ্ছন্দস্তদহমিত্যযুক্তং ছন্দসামৃগ্‌ভ্যোঽতিবেকেণ স্বরূপাভাবাদিত্যাশঙ্ক্যাহ গায়ত্র্যাদীতি। দ্বিজাতের্দ্বিতীয়জন্মজনত্বাদিত্যর্থঃ। মার্গশীর্ষো মৃগশীর্ষেণ যুক্তা পৌর্ণমাস্যস্মিন্নিতি মাগশীর্ষো মাসঃ সোঽহং পক্কশস্যাদ্যাত্বাদিত্যাহ মাসানামিতি। বসন্তো রমণীয়ত্বাদিতিশেষঃ ॥ ৩৫ ॥

দ্যূতমুক্তলক্ষণং সর্ব্বস্বাপহারকারণমন্যায়াপদেশেন পরাভিপ্রেতং নিঘ্নতাং স্বাভিপ্রেতং বা সংপাদয়তামিত্যাহ ছলস্যেতি। তেজোঽপ্রতিহতাজ্ঞা উৎকর্ষো জয়ঃ ব্যবসায়ঃ ফলহে-

## স্বামিকৃত টীকা।

মৃত্যুরিতি। সংহারকাণাং মধ্যে সর্ব্বহরো মৃত্যুরহং, ভবিষ্যতাং ভাবিকল্যানাং প্রাণিনামুদ্ভবোঽভ্যুদয়োঽহং, নারীণাং মধ্যে কীর্ত্ত্যাদ্যাঃ সপ্তদেবতারূপাঃ স্ত্রিয়োঽহং যাসামাভাসমাত্রযোগেন প্রাণিনঃ শ্লাঘ্যা ভবন্তীতি তাঃ কীর্ত্ত্যাদ্যাঃ স্ত্রিয়ো মদ্বিভূতয়ঃ ॥ ৩৪ ॥

বৃহদিতি। ত্বাং ইন্দ্র হবামহ ইত্যস্যাং ঋচি গীয়মানং বৃহৎসামাহং তেন চেন্দ্রঃ সর্ব্বেশ্বরত্বেন স্তূয়ত ইতি শ্রৈষ্ঠ্যং, ছন্দোবিশিষ্টানাং মন্ত্রাণাং মধ্যে গায়ত্রীমন্ত্রোঽহং দ্বিজত্বাপাদকত্বেন সোমাহরণেন চ শ্রেষ্ঠত্বাৎ কুসুমাকরো বসন্তঃ ॥ ৩৫ ॥

দ্যূতমিতি। ছলয়তামন্যোন্যবঞ্চনপরাণাং সম্বন্ধি দ্যূতমস্মি তেজস্বিনাং প্রভাববতাং

দ্যূতং ছলয়তামস্মি তেজস্তেজস্বিনামহম্।
জয়োঽস্মি ব্যবসায়োঽস্মি সত্ত্বং সত্ত্ববতামহম্॥ ৩৬॥
বৃষ্ণীনাং বাসুদেবোঽস্মি পাণ্ডবানাং ধনঞ্জয়ঃ।
মুনীনামপ্যহং ব্যাসঃ কবীনামুশনাঃ কবিঃ॥ ৩৭॥
দণ্ডো দময়তামস্মি নীতিরস্মি জিগীষতাম্।
মৌনং চৈবাস্মি গুহ্যানাং জ্ঞানং জ্ঞানবতামহম্॥ ৩৮॥

## শাঙ্করভাষ্যম্।

তেজোঽহং, জয়োঽস্মি জেতৃণাং, ব্যবসায়োঽস্মি ব্যবসায়িনাং, সত্ত্বং সত্ত্ববতাং সাত্ত্বিকানামহং॥ ৩৬॥

বৃষ্ণীনামিতি। বৃষ্ণীনাং যাদবানাং বাসুদেবোঽস্মি অয়মেবাহং ত্বৎসখা, পাণ্ডবানাং ধনঞ্জয়স্ত্বমেব, মুনীনাং মননশীলানাং সর্ব্বপদার্থজ্ঞানিনামপ্যহং ব্যাসঃ, কবীনাং ক্রান্তদর্শিনামুশনাঃ কবিরস্মি॥ ৩৭॥

দণ্ডইতি। দণ্ডো দময়তাং দময়িতৃণামস্মি অদান্তানাং দমনকারণং, নীতিরস্মি জিগীষতাং জেতুমিচ্ছতাং, মৌনঞ্চৈবাস্মি গুহ্যানাং গোপ্যানাং, জ্ঞানং জ্ঞানবতামহং॥৩৮॥

## গিরিকৃত টীকা।

তূদ্যমঃ। ধর্ম্মজ্ঞানবৈরাগ্যাদি সত্ত্বকার্য্যং সত্ত্বং, উশনাঃ শুক্রঃ কবিশব্দোঽত্র যৌগিকো ন রূঢ়ঃ পৌনরুক্ত্যাৎ॥ ৩৬॥ ৩৭॥

অদান্তানুৎপথান্ পথি প্রবর্ত্তয়তাং দণ্ডোঽনুৎপথপ্রবৃত্তৌ নিগ্রহে হেতুরিত্যর্থঃ, নীতির্ন্যায়ো ধর্ম্মস্য জয়ঃ পাপস্য প্রণাশকঃ মৌনং বাচঃ সংযমস্ত্বমুত্তমা বা চতুর্থাশ্রমবৃত্তিঃ শ্রবণাদিদ্বারা পরিপক্বসমাধিজন্যং সম্যগ্ জ্ঞানং॥ ৩৮॥

## স্বামিকৃত টীকা।

তেজঃ প্রভাবোঽস্মি, জেতৃণাং জয়োঽস্মি, ব্যবসায়িনামুদ্যমবতাং ব্যবসায় উদ্যমোঽস্মি, সত্ত্ববতাং সাত্ত্বিকানাং সত্ত্বমহং॥ ৩৬॥

বৃষ্ণীনামিতি। বাসুদেবো যোঽহং ত্বামুপদিশামি, ধনঞ্জয়স্ত্বমেব মদ্বিভূতিঃ, মুনীনাং বেদার্থমননশীলানাং বেদব্যাসোঽস্মি, কবীনাং শাস্ত্রদর্শিনামুশনা নাম কবিঃ শুক্রঃ॥ ৩৭॥

দণ্ডইতি। দময়তাং দমনকর্ত্তৃণাং সম্বন্ধী দণ্ডোঽস্মি যেনাসংযতা অপি সংযতা ভবন্তি স দণ্ডো মদ্বিভূতিঃ, জেতুমিচ্ছতাং সম্বন্ধিনী সামাদ্যুপায়রূপা নীতিরস্মি, গুহ্যানাং গোপ্যানাং গোপনহেতুর্মৌনবচনমস্মি ন হি তূষ্ণীং স্থিতস্যাভিপ্রায়ো জ্ঞায়তে, জ্ঞানবতাং তত্ত্বজ্ঞানিনাং যৎ জ্ঞানং তদমহস্মি॥ ৩৮॥

যচ্চাপি সর্ব্বভূতানাং বীজং তদহমর্জ্জুন।
ন তদস্তি বিনা যৎ স্যান্ময়া ভূতং চরাচরম্ ॥ ৩৯ ॥
নান্তোঽস্তি মম দিব্যানাং বিভূতীনাং পরন্তপ।
এষ তূদ্দেশতঃ প্রোক্তো বিভূতের্ব্বিস্তরো ময়া ॥ ৪০ ॥

## শাঙ্করভাষ্যম্।

যচ্চাপীতি। যচ্চাপি সর্ব্বভূতানাং বীজং প্ররোহকারণং তদহমর্জ্জুন প্রকরণোপসংহারার্থং বিভূতিসংক্ষেপমাহ ন তদস্তি ভূতং চরাচরং চরমচরং বা ময়া বিনা যৎ স্যাদ্ভবেন্ময়াপকৃষ্টং পরিত্যক্তং নিরাত্মকং শূন্যং হি তৎ স্যাদতো মদাত্মকং সর্ব্বমিত্যর্থঃ ॥ ৩৯ ॥

নান্তোঽস্তীতি। নান্তোঽস্তি মম দিব্যানাং বিভূতীনাং বিস্তরাণাং পরন্তপ ন হীশ্বরস্য সর্ব্বাত্মনো দিব্যানাং বিভূতীনাং ইয়ত্তা শক্যা বক্তুং জ্ঞাতুং বা কেনচিৎ এষ তূদ্দেশত একদেশেন প্রোক্তো বিভূতেবিস্তরো ময়া ॥ ৪০ ॥

যদ্যদিতি। যৎ যল্লোকে বিভূতিমদ্বিভূতিযুক্তং সত্বং বস্তুজাতং শ্রীমদূর্জ্জিতমেব বা শ্রীঃ লক্ষ্মীঃ তয়া সহিতং উৎসাহোপেতং বা তত্তদেবাবগচ্ছ ত্বং জানীহি মহেশ্বরস্য তেজোঽং-

## গিরিকৃত টীকা।

জাড্যমাত্রপ্রতিবিম্বিতং চৈতন্যং বীজং কিমিতি স্থাবরং জঙ্গমং বা ত্বদতিরেকেণ ন ভবতি তত্রাহ ময়েতি। তস্যাপি স্বরূপেণ সত্বমাশঙ্ক্যোক্তং শূন্যং হীতি। আত্মনোঽপকর্ষাদিত্যর্থঃ, ময়ৈব সচ্চিদানন্দস্বরূপেণ সর্ব্বস্য সিদ্ধেরিত্যতঃশব্দার্থঃ ॥ ৩৯ ॥

দিব্যানাং বিভূতীনাং পরিমিতত্বশঙ্কাং বারয়তি নেত্যাদিনা। তদেবোপপাদয়তি ন হীতি। কথং তর্হি বিভূতের্বিস্তরো দর্শিতস্তত্রাহ এষ ত্বিতি ॥ ৪০ ॥

অনুক্তা অপি পরস্য বিভূতীঃ সংগ্রহীতুং লক্ষণমাহ যদ্যদিতি। বস্তু প্রাণিজাতং শ্রীমৎ সমৃদ্ধিমদ্বা শোভাবদ্বা কান্তিমদ্বা সপ্রাণং বলবদূর্জ্জিতং তদাহ উৎসাহেতি। সম্ভবত্যস্মা-

## স্বামিকৃত টীকা।

যচ্চাপীতি। যদপি সর্ব্বভূতানাং বীজং প্ররোহকারণং তদহং, তত্র হেতুঃ ময়া বিনা যৎ স্যাৎ ভবেৎ তচ্চরমচরং বা ভূতং নাস্ত্যেবেতি ॥ ৩৯ ॥

প্রকরণার্থমুপসংহরতি নান্তোঽস্তীতি। অনন্তত্বাদ্বিভূতীনাং তাঃ সাকল্যেন বক্তুং ন শক্যন্তে এষ তু বিভূতিবিস্তর উদ্দেশতঃ সংক্ষেপতঃ প্রোক্তঃ ॥ ৪০ ॥

পুনশ্চ সাকাঙ্ক্ষ্যং প্রতি কথঞ্চিৎ সাকল্যেন কথয়তি যৎ যদিতি। বিভূতিমদৈশ্বর্য্যযুক্তং

যদ্‌যদ্বিভূতিমৎ সত্ত্বং শ্রীমদূর্জ্জিতমেব বা।
তত্তদেবাবগচ্ছ ত্বং মম তেজোঽংশসম্ভবম্ ॥ ৪১ ॥
অথবা বহুনৈতেন কিং জ্ঞাতেন তবার্জ্জুন।
বিষ্টভ্যাহমিদং কৃৎস্নমেকাংশেন স্থিতো জগৎ ॥ ৪২

## শাঙ্করভাষ্যম্।

শসম্ভবং তেজসোঽংশঃ একদেশঃ সম্ভবো যস্য তত্তেজোঽংশসম্ভবমিত্যবগচ্ছ ত্বং জানীহি ॥ ৪১ ॥

অথবেতি। অথবা বহুনা এতেনৈবমাদিনা কিং জ্ঞাতেন তবার্জ্জুন স্যাৎ সাবশেষেণ অশেষতস্ত্বমিমমুচ্যমানমর্থং শৃণু বিষ্টভ্য বিশেষতস্তম্ভনং দৃঢ়ং কৃত্বা ইদং কৃৎস্নং জগৎ

## গিরিকৃত টীকা।

দিতি সম্ভবঃ তেজসশ্চৈতন্যস্যেশ্বরশক্তের্বাংশস্তেজোঽংশঃ সম্ভবোঽস্যেতি তেজোঽংশসম্ভবং তদাহ তেজস ইতি ॥ ৪১ ॥

সর্ব্বেষাং সুগমত্বায়াবয়বস্য বিভূতিমুক্ত্বা ভক্তানুগ্রহার্থং সাকল্যেন তামাহ অথবেতি। পক্ষান্তরপরিগ্রহার্থমথবেত্যুক্তং। বহুনা বিস্তীর্ণেনৈতেন গ্রন্থেন সংজ্ঞাতেন সাবশেষেণ তব শক্তস্য ন কিঞ্চিৎ ফলং স্যাদিত্যাহ বহুনেতি। ন হি বিভূতিষূক্তাসু জ্ঞাতাসু সর্ব্বং জ্ঞায়তে কাসাঞ্চিদেব বিভূতীনামুক্তত্বাদিত্যর্থঃ। তর্হি কেনোপদেশেনাস্মাকমরেষ সর্ব্বার্থে জ্ঞাতুং শক্যতে তত্রাহ অশেষতস্ত্বইতি। বেশেষতস্তম্ভনং বিধরণং সর্ব্বভূতস্বরূপেণ সর্ব্বপ্রপঞ্চোপাদানশক্ত্যুপাধিকেনৈকেন পাদেন কৎস্নং জগৎ বিধৃত্য স্থিতোঽস্মীতি সম্বন্ধঃ তত্রৈব শ্রুতিং প্রমাণয়তি তথাচেতি। তদনেন ভগবতো নানাবিধবিভূতীর্ধ্যেয়ত্বেন জ্ঞেয়ত্বেন চোপদিশ্যান্তে সর্ব্বপ্রপঞ্চাত্মং ধ্যেয়ং রূপং দর্শয়িত্বা ত্রিপাদস্যামৃতং দিবীতি প্রপ-

## স্বামিকৃত টীকা।

শ্রীমৎ সম্পত্তিযুক্তং উর্জ্জিতং কেনাপি প্রভাববলাদিনা গুণেনাতিশয়িতং যদ্যৎ সর্ব্বং বস্তুমাত্রং তত্তদেব মম তেজসঃ প্রভাবস্যাংশেন সম্ভূতং জানীহি ॥ ৪১ ॥

অথবা কিমেতেন পরিচ্ছিন্নবিভূতিদর্শনেন সর্ব্বত্র সমদৃষ্টিমেব কুর্ব্বিত্যাহ অথবেতি। বহুনা পৃথগ্জ্ঞাতেন কিং তব কার্য্যং যস্মাদিদং সর্ব্বং জগদেকাংশেনৈকদেশমাত্রেণ বিষ্টভ্য

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং
যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে
বিভূতিযোগো নাম
দশমোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

একাংশেন একাবয়বেনৈকপাদেন সর্ব্বভূতস্বরূপেণেত্যেতত্তথা চ মন্ত্রবর্ণঃ পাদোঽস্য সর্ব্বা ভূতানীতি স্থিতোঽহং ইতি ॥ ৪২ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে দশমোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

কাধিকং নিরুপাধিকং তত্ত্বমুপদিশতা পরিপূর্ণঃ সচ্চিদানন্দৈকতানঃ তৎপদলক্ষ্যোঽর্থে নির্দ্ধারিতঃ ॥ ৪২ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং দশমোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

ধৃত্বা ব্যাপ্যেতি বা অহমেবাবস্থিতঃ ন মদ্ব্যতিরিক্তং কিঞ্চিদস্তি পাদোঽস্য বিশ্বা ভূতানী-তিশ্রুতেঃ।

ইন্দ্রিয়দ্বারতশ্চিত্তে বহির্ধাবতি সত্যপি।
ঈশদৃষ্টিবিধানায় বিভূতীর্দশমেঽব্রবীৎ ॥ ৪২ ॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং অষ্টমোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## একাদশোঽধ্যায়ঃ।

অর্জ্জুন উবাচ—মদনুগ্রহায় পরমং গুহ্যমধ্যাত্মসংজ্ঞিতম্।
যত্ত্বয়োক্তং বচস্তেন মোহোঽয়ং বিগতো মম ॥ ১ ॥

### শাঙ্করভাষ্যম্।

ভগবতো বিভূতয উক্তাস্তত্র চ বিষ্টভ্যাহমিদং কৃৎস্নমেকাংশেন স্থিতো জগদিতি ভগবতাভিহিতং শ্রুত্বা যজ্জগদাত্মকং রূপমাদ্যমৈশ্বরং তৎ সাক্ষাৎকর্ত্তুমিচ্ছন্নর্জুন উবাচ। মদনুগ্রহার্থং পরমং নিরতিশয়ং গুহ্যং গোপ্যং অধ্যাত্মসংজ্ঞিতমাত্মানাত্মবিবেকবিষয়ং যত্ত্বয়োক্তং বচো বাক্যং তেন বচসা মোহোঽযং বিগতো মমাবিবেকবুদ্ধিরপগতেত্যর্থঃ ॥১॥

### গিরিকৃত টীকা।

তেন তেনাত্মনা ভগবদনুসন্ধানার্থমুক্তা বিভূতীরনুবদতি ভগবতইতি। পরস্য সোপাধিকং নিরুপাধিকঞ্চ চিদ্রূপং ধ্যেয়ত্বেন জ্ঞেয়ত্বেন চোক্তমিত্যর্থঃ। সোপাধিকমৈশ্বরং রূপমশেষজগদাত্মকং বিশ্বরূপাখ্যমধিকৃত্যাধ্যায়াস্তরমবতারয়ন্ননন্তরপ্রশ্নোপযোগিত্বেন বৃত্তং কীর্ত্তয়তি তত্রচেতি। যদেতদশেষপ্রপঞ্চাত্মকমখিলস্যৈতস্য কারণং সর্ব্বজ্ঞং সর্ব্বৈশ্বর্য্যবদ্রূপমুক্তং তদিদং শ্রুত্বা তস্য সাক্ষাৎকারং যিযাচযিষুরাদৌ পৃষ্টবানিত্যাহ শ্রুত্বেতি ময়ি করুণাং নিমিত্তীকৃত্যোপকারোঽনুগ্রহস্তদর্থমিতি বচসো বিশেষণং, নিরতিশয়ত্বং পরমপুরুষার্থসাধনত্বং, অশোচ্যানিত্যাদি ত্বংপদার্থপ্রধানবাক্যং, মোহস্যাযমিত্যাত্মসাক্ষিকত্বং দর্শযতি ॥ ১ ॥

### স্বামিকৃত টীকা।

বিভূতের্বৈভবং প্রোচ্য কৃপয়া পরয়া হরিঃ। দিদৃক্ষোরর্জ্জুনস্যাথ বিশ্বরূপমদর্শয়ৎ ॥ পূর্ব্বাধ্যায়ান্তে বিষ্টভ্যাহমিদং কৃৎস্নমেকাংশেন স্থিতো জগদিতি বিশ্বাত্মকং পরমেশ্বররূপমুপক্ষিপ্তং তদ্দিদৃক্ষুঃ পূর্ব্বোক্তমভিনন্দন্নর্জ্জুন উবাচ মদনুগ্রহায়েতি চতুর্ভিঃ। মমানুগ্রহায় শোকনিবৃত্তয়ে পরমং পরমাত্মনিষ্ঠং গুহ্যং গোপ্যমপি অধ্যাত্মসংজ্ঞিতমাত্মানাত্মবিবেকবিষয়ং যত্ত্বয়োক্তং বচঃ অশোচ্যানন্বশোচস্ত্বমিত্যাদিষষ্ঠাধ্যায়পর্য্যন্তং যদ্বাক্যং তেন মমায়ং মোহোঽহং হন্তা এতে হন্যন্তে ইত্যাদিলক্ষণভ্রমো বিগতো বিনষ্ট আত্মনঃ কর্ত্তৃত্বাদ্যভাবোক্তেঃ ॥ ১ ॥

ভবাপ্যয়ৌ হি ভূতানাং শ্রুতৌ বিস্তরশো ময়া।
ত্বত্তঃ কমলপত্রাক্ষ মাহাত্ম্যমপি চাব্যয়ম্ ॥ ২ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ ভবেতি। ভব উৎপত্তিরপ্যয়ঃ প্রলয়ো ভূতানাং তৌ ভবাপ্যয়ৌ শ্রুতৌ বিস্তরশো ময়া ন সংক্ষেপতস্ত্বত্তঃ ত্বৎসকাশাৎ কমলপত্রাক্ষ কমলস্য পত্রং কমলপত্রং তদ্বৎ অক্ষিণী যস্য তব স ত্বং কমলপত্রাক্ষঃ হে কমলপত্রাক্ষ মাহাত্ম্যমপি চাব্যয়মক্ষয়ং শ্রুতমিত্যনুবর্ত্ততে ॥ ২ ॥

এবমিতি। এবমেতন্নান্যথা যথা যেন প্রকারেণাত্থ কথয়সি ত্বমাত্মানং পরমেশ্বরং তথাপি দ্রষ্টুমিচ্ছামি তে তব জ্ঞানৈশ্বর্য্যশক্তিবলবীর্য্যতেজোভিঃ সংপন্নমৈশ্বরং বৈষ্ণবং রূপং পুরুষোত্তম ॥ ৩ ॥

মন্যস ইতি। মন্যসে চিন্তয়সি যদি ময়ার্জ্জুনেন তৎ শক্যং দ্রষ্টুমিতি প্রভো স্বামিন্

## গিরিকৃত টীকা।

অবিবেকবুদ্ধিরজ্ঞানবিপর্য্যাসাত্মিকা সপ্তমাদারভ্য তৎপদার্থনির্ণয়ার্থমপি ভগবদুক্তং বচো ময়া শ্রুতমিত্যাহ কিঞ্চেতি। তৌ ভূতানামুৎপত্তিপ্রলয়ৌ ত্বত্তঃ শ্রুতাবিত্যাভ্যাং সম্বধ্যতে, মহাত্মনস্তব ভাবো মাহাত্ম্যং পারমার্থিকং সোপাধিকং বা সর্ব্বাত্মত্বাদিরূপং শ্রুতমিতি পরিণম্যানুবৃত্তিং দ্যোতয়িতুং অপি চেত্যুক্তং ॥ ২ ॥

ত্বদুক্তেঽর্থেঽবিশ্বাসাভাবাৎ ন তস্মিন্ দিদৃক্ষা কিন্তু কৃতার্থীবুভূষয়া ইত্যাহ এবমেতদিতি। যেন প্রকারেণ সোপাধিকেন নিরুপাধিকেন চেত্যর্থঃ। যদি মমাপ্তত্বং নিশ্চিত্য

## স্বামিকৃত টীকা।

কিঞ্চ ভবেতি। ভূতানাং ভবাপ্যয়ৌ সৃষ্টিপ্রলয়ৌ ত্বত্তঃ সকাশাদেব ভবত ইতি শ্রুতো ময়া অহং কৃৎস্নস্য জগতঃ প্রভবঃ প্রলয়স্তথেত্যাদৌ বিস্তরশঃ পুনঃ পুনঃ, কমলস্য পত্রে ইব-সুপ্রসন্নে বিশালে অক্ষিণী যস্য তব হে কমলপত্রাক্ষ মাহাত্ম্যমপি চাব্যয়ং অক্ষয়ং শ্রুতং বিশ্বসৃষ্ট্যাদিকর্ত্তৃত্বেঽপি সর্ব্বনিয়ন্তৃত্বেঽপি শুভাশুভকর্ম্মকারয়িতৃত্বেঽপি বন্ধনমোক্ষাদিবিচিত্র— ফলদাতৃত্বেঽপি অধিকারাবৈষম্যাসঙ্গৌদাসীন্যাদিলক্ষণমপরিমিতং মহত্ত্বঞ্চ শ্রুতং অব্যক্তং ব্যক্তিমাপন্নং মন্যন্তে মামবুদ্ধয় ইতি, ময়া ততমিদং সর্ব্বমিতি, ন চ মাং তানি কর্ম্মাণীতি, সমোঽহং সর্ব্বভূতেষিত্যাদিনা চ, অতস্ত্বৎপরতন্ত্রাণামপি জীবানামহং কর্ত্তেত্যাদি মদীয়ো মোহো বিগত ইতি ভাবঃ ॥ ২ ॥

কিঞ্চ এবমেতদিতি। ভবাপ্যয়ৌ হি ভূতানামিত্যাদি ময়া শ্রুতং যথা চেদানীমাত্মানং ত্বমাত্থ বিষ্টভ্যাহমিদং কৃৎস্নমেকাংশেন স্থিতো জগদিত্যেবং কথয়সি হে পরমেশ্বর

এবমেতদ্‌যথাত্থ ত্বমাত্মানং পরমেশ্বর।
দ্রষ্টুমিচ্ছামি তে রূপমৈশ্বরং পুরুষোত্তম ॥ ৩॥
মন্যসে যদি তচ্ছক্যং ময়া দ্রষ্টুমিতি প্রভো।
যোগেশ্বর ততো মে ত্বং দর্শয়াত্মানমব্যয়ম্ ॥ ৪ ॥
শ্রীভগবানুউবাচ—পশ্য মে পার্থ রূপাণি শতশোঽথ সহস্রশঃ।
নানাবিধানি দিব্যানি নানাবর্ণাকৃতীনি চ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

যোগেশ্বর যোগিনো যোগাস্তেষামীশ্বরো যোগেশ্বরঃ হে যোগেশ্বর যস্মাদহমতীবার্থী দ্রষ্টুং ততঃ তস্মাত্মে মম মদর্থং দর্শয় ত্বমাত্মানমব্যয়ং ॥ ৪ ॥

এবঞ্চোদিতোঽর্জ্জুনেন ভগবানুউবাচ পশ্য ম ইতি। পশ্য মে মম পার্থ রূপাণি শতশোঽথ সহস্রশঃ অনেকশ ইত্যর্থঃ তানি চ নানাবিধানি অনেকপ্রকারাণি দিবি ভবানি দিব্যান্যপ্রাকৃতানি চ নানাবর্ণাকৃতীনি চ নানা নীলপীতাদিপ্রকারা বর্ণা বিলক্ষণাস্তথা আকৃতয়োঽবয়বসংস্থানবিশেষা যেষাং রূপাণাং তানি নানাবর্ণাকৃতীনি চ ॥ ৫ ॥

## গিরিকৃত টীকা।

মত্বাক্যং তে মানং তর্হি কিমিতি মদুক্তং দিদৃক্ষ্যতে কৃতার্থীবুভুষয়েত্যুক্তং মত্বাহ তথাপীতি। চতুর্ভুজাদিরূপনিবৃত্ত্যর্থমাহ ঐশ্বরমিতি। তদ্ব্যাচষ্টে জ্ঞানেত্যাদিনা ॥ ৩ ॥

দ্রষ্টুমযোগ্যে কুতো দিদৃক্ষেত্যাশঙ্ক্যাহ মন্যস ইতি। প্রভবতি সৃষ্টিস্থিতিসংহারপ্রবেশপ্রশাসনেভ্যঃ ইতি প্রভুঃ। লক্ষণয়া যোগশব্দার্থমাহ যোগিনইতি। ততইত্যাদি ব্যাচষ্টে যস্মাদিতি ॥ ৪ ॥

অর্জ্জুনমতিভক্তং সখায়ং প্রার্থিতপ্রবৃত্তিশ্রবণেনাশ্বাসয়িতুমাহ এবমিতি ॥ ৫ ॥

## স্বামিকৃত টীকা।

এতদেবমেব অত্রাপ্যবিশ্বাসো মম নাস্তি তথাপি হে পুরুষোত্তম তবৈশ্বর্য্যং জ্ঞানৈশ্বর্য্যশক্তিবীর্য্যাদিভিঃ সম্পন্নং ত্বদ্রূপং কৌতূহলাদহং দ্রষ্টুমিচ্ছামি ॥ ৩ ॥

নচাহং দ্রষ্টুমিচ্ছামীত্যেতাবতৈব ত্বয়া তদ্রূপংদর্শয়িতব্যং কিং তর্হি মন্যস ইতি। যোগিন এব যোগাস্তেষামীশ্বর ময়ার্জ্জুনেন তদ্রূপং দ্রষ্টুং শক্যমিতি যদি মন্যসে ততস্তর্হি তদ্রূপং পরমাত্মানমব্যয়ং নিত্যং মম দর্শয় ॥ ৪ ॥

এবং প্রার্থিতঃ সন্নত্যদ্ভুতং রূপং দর্শয়িষ্যন্ সাবধানো ভবেত্যেবমভিমুখীকরোতি শ্রীভগবানুবাচ পশ্যেতি চতুর্ভিঃ। রূপমেকমেবেঽপি নানাবিধত্বাদ্রূপাণীতি বহুবচনং, অপ-

পশ্যাদিত্যান্ বসূন্ রুদ্রানশ্বিনৌ মরুতস্তথা।
বহূন্যদৃষ্টপূর্ব্বাণি পশ্যাশ্চর্য্যাণি ভারত॥ ৬॥
ইহৈকস্থং জগৎ কৃৎস্নং পশ্যাদ্য সচরাচরম্।
মম দেহে গুড়াকেশ যচ্চান্যদ্ দ্রষ্টুমিচ্ছসি॥ ৭॥

---

## শাঙ্করভাষ্যম্।

পশ্যাদিত্যানিতি। পশ্য আদিত্যান্ দ্বাদশ বসূনষ্টৌ রুদ্রানেকাদশাশ্বিনৌ দ্বৌ মরুত সপ্তসপ্তগণান্ এতান্ তথা চ বহূন্যন্যান্যপি অদৃষ্টপূর্ব্বাণি মনুষ্যলোকে ত্বয়া ত্বত্তোঽন্যেন বা কেনচিৎ পশ্যাশ্চর্য্যাণি রূপাণ্যদ্ভুতানি ভারত॥ ৬॥

ন কেবলমেতাবদেব ইহৈকস্থমিতি। ইহৈকস্থং একস্মিন্ স্থিতং জগৎ কৃৎস্নং সমস্তং পশ্যাদ্যেদানীং সচরাচরং সহ চরেণাচরেণ বর্ত্ততে মম দেহে গুড়াকেশ যচ্চান্যজ্জয়পরাজয়াদি যচ্ছঙ্কসে যদ্বা জয়েম যদি বা নো জয়েয়ুরিতি যদবোচঃ তদপি দ্রষ্টুং যদীচ্ছসি॥ ৭॥

## গিরিকৃত টীকা।

দিব্যানি রূপানি পশ্যেত্যুক্তং তান্যেব লেশতোঽনুক্রামতি পশ্যাদিত্যানিতি। তান্ মরুতস্তথা পশ্যেতি সম্বন্ধঃ। নানাবিধানীত্যুক্তং তদেব স্ফুটয়তি বহূনীতি। অদৃষ্টপূর্ব্বাণি পূর্ব্বমদৃষ্টানি। নানাবর্ণাকৃতীনীত্যুক্তং ব্যনক্তি আশ্চর্য্যাণীতি॥ ৬॥

ন কেবলমাদিত্যবস্বাদ্যেব মদ্রূপং ত্বয়া দ্রষ্টুং শক্যং কিন্তু সমস্তং জগদপি মদ্দেহস্থং দ্রষ্টুমর্হসীত্যাহ নেত্যাদিনা। সপ্তমীদ্বয়ং মিথঃ সম্বধ্যতে, সমাসান্তর্গতাপি সপ্তমী তত্রৈবান্বিতা, যদীচ্ছসি তর্হি ইহৈব পশ্যেতি সম্বন্ধঃ॥ ৭॥

## স্বামিকৃত টীকা।

রিমিতানি অনেকপ্রকারাণি দিব্যান্যলৌকিকানি মম রূপাণি পশ্য, বর্ণাঃ শুক্লকৃষ্ণাদয়ঃ আকৃতয়ঃ অবয়ববিশেষাঃ নানা অনেকে বর্ণা আকৃতয়শ্চ যেষাং তানি নানাবর্ণাকৃতীনি॥ ৫॥

তান্যেবাহ পশ্যেতি। আদিত্যাদীন্ মম দেহে পশ্য, মরুত একোনপঞ্চাশদ্দেবতাবিশেষান্, অদৃষ্টপূর্ব্বাণি ত্বয়া চান্যেন বা পূর্ব্বমদৃষ্টানি রূপাণি॥ ৬॥

কিঞ্চ ইহৈকস্থমিতি। তত্র তত্র পরিভ্রমতা বর্ষকোটিভিরপি দ্রষ্টুমশক্যং কৃৎস্নমপি চরাচরসহিতং জগদিহাস্মিন্ মম দেহেঽবয়বরূপেণৈকত্র স্থিতমদ্যাধুনৈব পশ্য, যচ্চান্যজ্জগদাশ্রয়ভূতং কারণস্বরূপং জগতশ্চাবস্থাবিশেষাদিকং জয়পরাজয়াদিকঞ্চ যচ্চ যদপ্যন্যদ্দ্রষ্টুমিচ্ছসি তৎসর্ব্বং পশ্য॥ ৭।

ন তু মাং শক্যসে দ্রষ্টুমনেনৈব স্বচক্ষুষা।
দিব্যং দদামি তে চক্ষুঃ পশ্য মে যোগমৈশ্বরম্ ॥ ৮ ॥
সঞ্জয় উবাচ—এবমুক্ত্বা ততো রাজন্ মহাযোগেশ্বরো হরিঃ।
দর্শয়ামাস পার্থায় পরমং রূপমৈশ্বরম্ ॥ ৯ ॥

---

## শাঙ্করভাষ্যম্।

কিন্তু ন তু মামিতি। ন তু মাং শক্যসে ন স্বকীয়েন চক্ষুষা মাং বিশ্বরূপধরং শক্যসে দ্রষ্টুমনেন প্রাকৃতেন স্বচক্ষুষা স্বকীযেন চক্ষুষা যেন তু শক্যসে দ্রষ্টুং দিব্যেন তদ্দিব্যং দদামি তে তুভ্যং চক্ষুস্তেন পশ্য মে মম যোগমৈশ্বরং ঈশ্বরস্য মমৈশ্বরং যোগং যোগশক্ত্যতিশয়মিত্যর্থঃ ॥ ৮ ॥

এবং তং যথোক্তপ্রকারেণোক্ত্বা ততোঽনন্তরং রাজন্ ধৃতরাষ্ট্র মহাংশ্চাসৌ যোগেশ্বরশ্চ মহাযোগেশ্বরো হরির্নারায়ণঃ দর্শয়ামাস দর্শিতবান্ পার্থায় পৃথাসুতায পরমং রূপং বিশ্বরূপমৈশ্বরং ॥ ৯ ॥

অনেকেতি। অনেকবক্ত্রনয়নং অনেকানি বক্ত্রাণি নয়নানি চ যস্মিন্ রূপে তদনেকবক্ত্রনয়নং অনেকাদ্ভুতদর্শনং অনেকান্যদ্ভুতানি বিস্মাপকানি দর্শনানি যস্মিন্ রূপে তদনে-

## গিরিকৃত টীকা।

মন্যসে যদীত্যুক্তমনুবদতি কিংত্বিতি। সপ্রপঞ্চমনবচ্ছিন্নং মাং স্বচক্ষুষা ন শক্নোষি দ্রষ্টুমিত্যাহ ন ত্বিতি। কথং তর্হি ত্বাং দ্রষ্টুং শক্নুয়ামিত্যাশঙ্ক্যাহ যেনেতি। দিব্যস্য চক্ষুষো বক্ষ্যমাণযোগশক্ত্যতিশয়দর্শনে বিনিয়োগং দর্শয়তি তেনেতি ॥ ৮ ॥

ইমং বৃত্তান্তং ধৃতরাষ্ট্রায় সঞ্জয়ো নিবেদিতবানিত্যাহ সঞ্জয়ইতি। মদীয়ং বিশ্বরূপাখ্যং রূপং ন প্রাকৃতেন চক্ষুষা নিরীক্ষিতুং ক্ষমং কিন্তু দিব্যেন ইত্যাদি যথোক্তপ্রকারঃ, অনন্তরং দিব্যচক্ষুষঃ প্রদানাদিতিশেষঃ, হরত্যবিদ্যাং সকার্য্যাং ইতি হরিঃ। যদীশ্বরস্য মায়োপহিতস্য পরমমুৎকৃষ্টং রূপং তদ্দর্শয়াম্বভূবেত্যাহ পরমমিতি ॥ ৯ ॥

## স্বামিকৃত টীকা।

যদুক্তমর্জ্জুনেন মন্যসে যদি তচ্ছক্যমিতি তত্রাহ নতু মামিতি। অনেনৈব তু স্বীয়েন চর্ম্মচক্ষুষা মাং দ্রষ্টুং ন শক্যসে শক্তো ন ভবিষ্যসি অতো দিব্যমলৌকিকং জ্ঞানাত্মকং চক্ষুস্তুভ্যং দদামি মমৈশ্বরমসাধারণং যোগং যুক্তিমঘটনঘটনাসামর্থ্যং পশ্য ॥ ৮ ॥

এবমুক্ত্বা ভগবানর্জ্জুনায় স্বরূপং দর্শিতবাংস্তচ্ছরূপং দৃষ্ট্বার্জ্জুনঃ শ্রীকৃষ্ণং বিজ্ঞাপিতবানিতীমমর্থং ষড়্ভিঃ শ্লোকৈর্ধৃতরাষ্ট্রং প্রতি সঞ্জয় উবাচ এবমুক্ত্বেতি। হে রাজন্ ধৃতরাষ্ট্র মহাংশ্চাসৌ যোগেশ্বরশ্চ হরিঃ পরমমৈশ্বরং রূপং দর্শিতবান্ ॥ ৯ ॥

অনেকবক্ত্রনয়নমনেকাদ্ভুতদর্শনম্।
অনেকদিব্যাভরণং দিব্যানেকোদ্যতায়ুধম্ ॥ ১০ ॥
দিব্যমাল্যাম্বরধরং দিব্যগন্ধানুলেপনম্।
সর্ব্বাশ্চর্য্যময়ং দেবমনন্তং বিশ্বতোমুখম্ ॥ ১১ ॥

## শাঙ্করভাষ্যম্।

দনেকাদ্ভুতদর্শনং রূপং তথানেকদিব্যাভরণং অনেকানি দিব্যাভরণানি যস্মিংস্তদনেকদিব্যাভরণং তথা দিব্যানেকোদ্যতায়ুধং দিব্যানি অনেকানি উদ্যতানি আয়ুধানি যস্মিংস্তদ্দিব্যানেকোদ্যতায়ুধং দর্শয়ামাসেতি পূর্ব্বেণ সম্বন্ধঃ ॥ ১০ ॥

কিঞ্চ দিব্যেতি। দিব্যমাল্যাম্বরধরং দিব্যানি মাল্যানি পুষ্পাণি অম্বরাণি বস্ত্রাণি চ ধ্রিয়ন্তে যেনেশ্বরেণ তং দিব্যমাল্যাম্বরধরং দিব্যগন্ধানুলেপনং দিব্যগন্ধা অনুলেপনং যস্মিন্ সর্ব্বাশ্চর্য্যময়ং সর্ব্বাশ্চর্য্যপ্রায়ং দেবমনন্তং নাস্যান্তোঽস্তীতি অনন্তস্তং বিশ্বতোমুখং সর্ব্বভূতাত্মত্বাৎ তং দর্শয়ামাসার্জ্জুনো দদর্শেতি বা অধ্যাহ্রিয়তে ॥ ১১ ॥

যা পুনর্ভগবতো বিশ্বরূপস্য ভাস্তস্যা উপমোচ্যতে দিবীতি। দিব্যন্তরীক্ষে তৃতীয়স্যাং বা দিবি সূর্য্যাণাং সহস্রং সূর্য্যসহস্রং তস্য যুগপদুত্থিতস্য যুগপদুত্থিতা ভাঃ সা যদি

## গিরিকৃত টীকা।

তদেব রূপং বিশিনষ্টি অনেকেতি। দিব্যান্যাভরণাদীনি হারকেয়ূরাদীনি ভূষণান্যুদ্যতানি উচ্ছ্রিতানি ॥ ১০ ॥

উক্তরূপবন্তং ভগবন্তং প্রকারান্তরেণ বিশিনষ্টি কিঞ্চেতি। অধ্যাহারোঽপি পদসংঘটনাসম্ভবাৎ ॥ ১১ ॥

নন্বু প্রকৃতস্য ভগবতো রূপস্য দীপ্তিরস্তি ন বা নচেৎ কাষ্ঠাদিসাম্যং যদ্যস্তি কীদৃশী সেত্যাশঙ্ক্যাহ যা পুনরিতি। সা যদি স্যাত্তদ্ভাসঃ সদৃশী সেতি যোজনা, অসম্ভাবিতাভ্যুপগ-

## স্বামিকৃত টীকা।

কথংভূতং তদিত্যত্রাহ অনেকবক্ত্রনয়নমিতি। অনেকানি বক্ত্রাণি নয়নানি চ যস্মিংস্তৎ, অনেকানামদ্ভুতানাং দর্শনং যস্মিংস্তৎ, অনেকানি দিব্যাভরণানি যস্মিংস্তৎ, দিব্যান্যনেকান্যুদ্যতান্যায়ুধানি যস্মিংস্তৎ ॥ ১০ ॥

কিঞ্চ দিব্যেতি। দিব্যানি মাল্যান্যম্বরাণি চ ধারয়তীতি তৎ, তথা দিব্যো গন্ধো যস্য তাদৃশমনুলেপনং যস্য তৎ, সর্ব্বাশ্চর্য্যময়মনেকাশ্চর্য্যপ্রায়ং, দেবং দ্যোতনাত্মকং, অনন্তমপরিচ্ছিন্নং, বিশ্বতঃ সর্ব্বতো মুখানি যস্মিংস্তৎ ॥ ১১ ॥

দিবি সূর্য্যসহস্রস্য ভবেদ্‌যুগপদুত্থিতা।
যদি ভাঃ সদৃশী সা স্যাদ্‌ভাসস্তস্য মহাত্মনঃ ॥ ১২
তত্রৈকস্থং জগৎ কৃৎস্নং প্রবিভক্তমনেকধা।
অপশ্যদ্দেবদেবস্য শরীরে পাণ্ডবস্তদা ॥ ১৩ ॥
ততঃ স বিস্ময়াবিষ্টো হৃষ্টরোমা ধনঞ্জয়ঃ।
প্রণম্য শিরসা দেবং কৃতাঞ্জলিরভাষত ॥ ১৪ ॥

## শাঙ্করভাষ্যম্।

সদৃশী স্যাৎ তস্য মহাত্মনো বিশ্বরূপস্য ভাসো যদি বা ন স্যাৎ ততোঽপি বিশ্বরূপস্যৈব ভাঃ অতিরিচ্যত ইত্যভিপ্রায়ঃ ॥ ১২ ॥

কিঞ্চ তত্রৈকস্থমিতি। তত্র তস্মিন্ বিশ্বরূপে একস্মিন্ স্থিতমেকস্থং জগৎ কৃৎস্নং প্রবিভক্তমনেকধা দেবপিতৃমনুষ্যাদিভেদৈরপশ্যৎ দৃষ্টবান্ দেবদেবস্য হরেঃ শরীরে পাণ্ডবোঽর্জ্জুনস্তদা ॥ ১৩ ॥

তত ইতি। ততস্তং দৃষ্ট্বা স বিস্ময়েনাবিষ্টো বিস্ময়াবিষ্টো হৃষ্টানি রোমাণ্যস্য সোঽয়ং

## গিরিকৃত টীকা।

মার্গো যদিশব্দঃ, স্যাচ্ছব্দো নিশ্চযার্থঃ। সা কথং সদৃশী সম্ভবতি ন তু ভবত্যেবেতি বিবক্ষিত্বাহ যদি বেতি ॥ ১২ ॥

ন কেবলমুক্তমেবার্জুনো দৃষ্টবান্ কিন্তু তত্রৈব বিশ্বরূপে সর্ব্বং জগদেকস্মিন্নবস্থিতমনুভূতবানিত্যাহ কিঞ্চেতি। তদা বিশ্বরূপস্য ভগবদ্রূপস্য দর্শনং দর্শযামীত্যর্থঃ ॥ ১৩ ॥

বিশ্বরূপধরস্য ভগবতস্তস্মিন্নেকীভূতজগতশ্চোক্তবিশেষণস্য দর্শনান্তরং কিমকরোদি-

## স্বামিকৃত টীকা।

বিশ্বরূপদীপ্তের্নিরুপমত্বমাহ দিবি সূর্য্যেতি। দিবি আকাশে সূর্য্যসহস্রস্য যুগপদুত্থিতস্য যদি যুগপদুত্থিতা ভাঃ প্রভা ভবেত্তর্হি সা মহাত্মনো বিশ্বরূপস্য ভাসঃ প্রভায়াঃ কথঞ্চিৎ সদৃশী স্যাৎ অন্যোপমা নাস্ত্যেবেত্যর্থঃ, তথাভূতং রূপং দর্শয়ামাসেতি পূর্ব্বেণৈবান্বয়ঃ ॥ ১২ ॥

ততঃ কিং বৃত্তমিত্যপেক্ষায়ামাহ তত্রেতি। অনেকধা প্রবিভক্তং নানাবিভাগেনাবস্থিতং কৃৎস্নং জগদ্দেবদেবস্য শরীরে তদবয়বত্বেনৈকত্র ব্যবস্থিতং তদা পাণ্ডবোঽর্জ্জুনোঽপশ্যৎ ॥ ১৩ ॥

এবং দৃষ্ট্বা কিং কৃতবানিত্যত্রাহ তত ইতি। ততো দর্শনানন্তরং বিস্ময়েনাবিষ্টো ব্যাপ্তঃ

অর্জ্জুন উবাচ—

পশ্যামি দেবাংস্তব দেব দেহে সর্ব্বাংস্তথা ভূতবিশেষসংঘান্।
ব্রহ্মাণমীশং কমলাসনস্থমৃষীংশ্চ সর্ব্বানুরগাংশ্চ দিব্যান্॥ ১৫

## শাঙ্করভাষ্যম্।

হৃষ্টরোমা চাভবদ্ধনঞ্জয়ঃ প্রণম্য প্রকর্ষেণ নমনং কৃত্বা প্রহ্বীভূতঃ সন্ শিরসা দেবং বিশ্বরূপধরং কৃতাঞ্জলির্নমস্কারার্থং সংপুটীকৃতহস্তঃ সন্নভাষতোক্তবান্॥ ১৪॥

কথং যত্ত্বয়া দর্শিতং বিশ্বরূপং তদহং পশ্যামীতি স্বানুভবমাবিষ্কুর্ব্বন্ অর্জ্জুন উবাচ পশ্যামীতি। পশ্যাম্যুপলভে হে দেব তব দেহে দেবান্ সর্ব্বাংস্তথা ভূতবিশেষসংঘান্ ভূতবিশেষাণাং স্থাবরজঙ্গমানাং নানাসংস্থানবিশেষাণাং সংঘাঃ ভূতবিশেষসংঘাস্তান্ কিঞ্চ ব্রহ্মাণং চতুর্মুখমীশমীশিতারং প্রজানাং কমলাসনস্থং পৃথিবীপদ্মমধ্যে মেরুকর্ণিকাসনস্থমিত্যর্থঃ ঋষীংশ্চ বশিষ্ঠাদীন্ সর্ব্বানুরগাংশ্চ বাসুকিপ্রভৃতীন্ দিব্যান্ দিবি ভবান্॥ ১৫॥

কিঞ্চ অনেকেতি। অনেকবাহূদরবক্ত্রনেত্রং অনেকে বাহব উদরাণি বক্ত্রাণি নেত্রাণি চ যস্য তব স ত্বমনেকবাহূদরবক্ত্রনেত্রস্তমনেকবাহূদরবক্ত্রনেত্রং পশ্যামি ত্বা ত্বাং সর্ব্বতঃ সর্ব্বত্র অনন্তরূপমনন্তানি রূপাণি অস্যেত্যনন্তরূপস্তং অনন্তরূপং নান্তমন্তোঽবসানং

## গিরিকৃত টীকা।

ত্যপেক্ষায়ামাহ তত ইতি। আশ্চর্য্যবুদ্ধির্বিস্ময়ঃ রোম্নাং হৃষ্টত্বং পুলকিতত্বং প্রকর্ষো ভক্তিশ্রদ্ধয়োরতিশয়ঃ॥ ১৪॥

কথং ভগবন্তং প্রত্যর্জ্জুনো ভাষিতবানিতি পৃচ্ছতি কথমিতি। তৎ প্রশ্নমপেক্ষিতং পূরয়ন্নবতারয়তি যত্ত্বয়েতি। ভূতবিশেষসংঘাত্তেষু দেবতানামন্তর্ভাবেঽপি পৃথক্করণমুৎকৃষ্টত্বাদ্ব্রহ্মণঃ সর্ব্বদেবতাত্মত্বেঽপি তেভ্যো ভেদকথনং তদুৎপাদকত্বাদিতি মত্বাহ কিঞ্চেতি। ঋষীণামুরগাণাঞ্চ কিঞ্চিদ্বৈষম্যাৎ পৃথক্ত্বং, দিব্যানিত্যুভয়েষাং বিশেষণং॥ ১৬॥

## স্বামিকৃত টীকা।

সন্ হৃষ্টান্যুৎপুলকিতানি রোমাণি যস্য স ধনঞ্জয়স্তমেব দেবং শিরসা প্রণম্য কৃতাঞ্জলিঃ সংপুটীকৃতহস্তো ভূত্বা অভাষত উক্তবান্॥ ১৪॥

ভাষণমেবাহ পশ্যামীতি সপ্তদশভিঃ। হে দেব তব দেহে দেবনাদিত্যাদীন্ পশ্যামি তথা সর্ব্বান্ ভূতবিশেষাণাং জরায়ুজাণ্ডজাদীনাং সংঘাশ্চ তথা দিব্যানৃষীন্ উরগাংশ্চ তক্ষকাদীন্ তথা তেষাং দেবাদীনামীশং স্বামিনং ব্রহ্মাণঞ্চ কথংভূতং কমলাসনস্থং পৃথিবীপদ্মকর্ণিকায়াং মেরৌ স্থিতমিত্যর্থঃ, যদ্বা মন্নাভিপদ্মাসনস্থমিতি॥ ১৫॥

অনেকবাহূদরবক্ত্রনেত্রং পশ্যামি ত্বা সর্ব্বতোঽনন্তরূপ।
নান্তং ন মধ্যং ন পুনস্তবাদিং পশ্যামি বিশ্বেশ্বর বিশ্বরূপ ॥ ১৬ ॥
কিরীটিনং গদিনং চক্রিণঞ্চ তেজোরাশিং সর্ব্বতোদীপ্তিমন্তম্।
পশ্যামি ত্বাং দুর্নিরীক্ষ্যং সমন্তাদ্দীপ্তানলার্কদ্যুতিমপ্রমেয়ম্ ॥ ১৭ ॥

## শাঙ্করভাষ্যম্।

ন মধ্যং মধ্যং নাম দ্বযোঃ কোট্যোবন্তবং ন পুনস্তবাদিং তব দেবস্য ন অন্তং পশ্যামি ন মধ্যং পশ্যামি ন পুনবাদিং পশ্যামি হে বিশ্বেশ্বব হে বিশ্বরূপ ॥ ১৬ ॥

কিঞ্চ কিবীটিনমিতি। কিবীটিনং কিবীটো নাম শিবোভূষণবিশেষঃ তদ্যস্যাস্তীতি স কিবীটী তং কিবীটিনং তথা গদিনং গদা যস্য বিদ্যতে ইতি গদী তং গদিনং তথা চক্রিণং চক্রমস্যাস্তীতি চক্রী তং চক্রিণং চ তেজোবাশিং তেজঃপুঞ্জং সর্ব্বতোদীপ্তিমন্তং সর্ব্বতোদীপ্তির্যস্যাস্তীতি সর্ব্বতোদীপ্তিমাংস্তং সর্ব্বতোদীপ্তিমন্তং পশ্যামি ত্বাং দুর্নিবীক্ষ্যং দুঃখেন নিরীক্ষ্যো দুর্নিবীক্ষ্যস্তং সমন্ততঃ সর্ব্বত্র দীপ্তানলার্কদ্যুতিং অনলশ্চার্কশ্চানলার্কৌ দীপ্তৌ অনলার্কৌ দীপ্তানলার্কৌ তযোর্দীপ্তানলার্কয়োর্দ্যুতিবিব দ্যুতিস্তেজোঽস্য তব স ত্বং দীপ্তানলার্কদ্যুতিস্তং ত্বাং দীপ্তানলার্কদ্যুতিং অপ্রমেয়ং ন প্রমেয়মপ্রেযমশক্যপবিচ্ছেদমিত্যর্থঃ ॥ ১৭ ॥

---

## গিরিকৃত টীকা।

যত্র ভগবদ্দেহে সর্ব্বমিদং দৃষ্টং তমেব বিশিনষ্টি অনেকেতি। আদিশব্দেন মূলমুচ্যতে। নান্তং ন মধ্যমিত্যত্রাপি পশ্যামীত্যস্য প্রত্যেকং সম্বন্ধং সূচয়তি নান্তং পশ্যামীতি ॥ ১৬ ॥

বিশ্বরূপবন্তং ভগবন্তমেব প্রকাবান্তবেণ প্রপঞ্চয়তি কিঞ্চেতি। পবিচ্ছিন্নত্বং ব্যাবর্ত্তয়তি সর্ব্বত ইতি। দুর্নিবীক্ষ্যং পশ্যামীত্যধিকাবিভেদাদবিরুদ্ধং। পুবতো বা পৃষ্ঠতো বা পার্শ্বতো বা নাস্য দর্শনং কিন্তু সর্ব্বত্রেত্যাহ সমন্তত ইতি। দীপ্তিমন্তং দৃষ্টান্তেন স্পষ্টয়তি দীপ্তেতি ॥ ১৭ ॥

## স্বামিকৃত টীকা।

কিঞ্চ অনেকেতি। অনেকানি বাহ্বাদীনি যস্য তাদৃশং ত্বাং পশ্যামি, অনন্তানি রূপাণি যস্য তং ত্বাং সর্ব্বতঃ পশ্যামি, তব তু অন্তং মধ্যমাদিঞ্চ ন পশ্যামি সর্ব্বগতত্বাৎ ॥ ১৬ ॥

কিঞ্চ কিরীটিনমিতি। মুকুটবন্তং চক্রবন্তং সর্ব্বতোদীপ্তিমন্তং তেজঃপুঞ্জরূপং তথা দুর্নিরীক্ষ্যং দ্রষ্টুমশক্যং তত্র হেতুঃ দীপ্তয়োরনলার্কয়োর্দ্যুতিরিব দ্যুতির্যস্য তং অতএবাপ্রমেয়ং এবংভূত ইতি নিশ্চেতুমশক্যং ত্বাং সমন্ততঃ পশ্যামি ॥ ১৭ ॥

ত্বমক্ষরং পরমং বেদিতব্যং ত্বমস্য বিশ্বস্য পরং নিধানম্।
ত্বমব্যয়ঃ শাশ্বতধর্ম্মগোপ্তা সনাতনস্ত্বং পুরুষো মতো মে ॥ ১৮ ॥
অনাদিমধ্যান্তমনন্তবীর্য্যমনন্তবাহুং শশিসূর্য্যনেত্রম্।
পশ্যামি ত্বাং দীপ্তহুতাশবক্ত্রং স্বতেজসা বিশ্বমিদং তপন্তম্ ॥ ১৯ ॥

## শাঙ্করভাষ্যম্।

ইতএব তে যোগশক্তিদর্শনমনুমিনোমি ত্বমিতি। ত্বমক্ষরং ন ক্ষরতীতি পরমং পরং ব্রহ্ম বেদিতব্যং জ্ঞাতব্যং মুমুক্ষুভিঃ ত্বমস্য বিশ্বস্য সমস্তস্য জগতঃ পরং প্রকৃষ্টং নিধানং নিধীয়তে অস্মিন্নিতি নিধানং পরাশ্রয় ইত্যর্থঃ কিঞ্চ ত্বমব্যয়ো ন চ তব ব্যয়ো বিদ্যত ইতি অব্যয়ঃ শাশ্বতধর্ম্মগোপ্তা শশ্বদ্ভবঃ শাশ্বতো নিত্যো ধর্ম্মস্তস্য গোপ্তা শাশ্বতধর্ম্মগোপ্তা সনাতনশ্চিরন্তনস্ত্বং পুরুষঃ পরমোঽভিপ্রেতো মে মম ॥ ১৮ ॥

কিঞ্চ অনাদি। অনাদিমধ্যান্তমাদিশ্চ মধ্যঞ্চ অন্তশ্চ ন বিদ্যতে যস্য সোঽয়মনাদি-

## গিরিকৃত টীকা।

সপ্রপঞ্চে ভগবদ্রূপে প্রকৃতে প্রকরণবিরুদ্ধত্বমক্ষরমিত্যাদিনিরুপাধিকরচনমিত্যাশঙ্ক্যাহ ইতএবেতি। যোগশক্তিবৈশ্বর্য্যাতিশয, ন ক্ষরতীতি নিষ্প্রপঞ্চত্বমুচ্যতে, পরমপুরুষার্থত্বাৎ পরমার্থত্বাচ্চ জ্ঞাতব্যত্বং। যস্মিন্ দ্যৌঃ পৃথিবীত্যাদৌ প্রপঞ্চাযতনস্যৈব ততো নিকৃষ্টস্য জ্ঞাতব্যত্বশ্রবণাৎ কুতো ব্রহ্মণো জ্ঞাতব্যত্বং তত্রাহ ত্বমস্যেতি। নিঃপ্রপঞ্চস্য ব্রহ্মণো জ্ঞেয়ত্বে হেত্বন্তরমাহ কিঞ্চেতি। অবিনাশিত্বাত্তবৈব জ্ঞাতব্যতাতিবিক্তস্য নাশিত্বেন হেয়ত্বাদিত্যর্থঃ জ্ঞানকর্ম্মাত্মনো ধর্ম্মস্য নিত্যত্বং বেদপ্রমাণকত্বং ধর্ম্মসংস্থাপনার্থায় সম্ভবামীত্যুক্তত্বাদ্গোপ্তা রক্ষিতা ॥ ১৮ ॥

ভগবতো রূপং বিশ্বরূপাখ্যং রূপমেব পুনর্ব্বিবৃণোতি কিঞ্চেতি। হুতমশ্নাতীতি হুতাশো বহ্নিঃ ॥ ১৯ ॥

## স্বামিকৃত টীকা।

যস্মাদেবং তবাতর্ক্যমৈশ্বর্য্যং তস্মাত্বমিতি। ত্বমেব অক্ষরং পরমং পরং ব্রহ্ম, কথংভূতং বেদিতব্যং মুমুক্ষুভির্জ্ঞাতব্যং, ত্বমেবাস্য বিশ্বস্য পরং নিধানং নিধীয়তেঽস্মিন্নিতি নিধানং প্রকৃষ্টাশয়ঃ, অতএব ত্বমব্যয়ো নিত্যঃ, শাশ্বতস্য নিত্যস্য ধর্ম্মস্য গোপ্তা পালকঃ, সনাতনশ্চিরন্তনঃ পুরুষো মতো মে সম্মতোঽসি ॥ ১৮ ॥

কিঞ্চ অনাদীতি। অনাদিমধ্যান্তং উৎপত্তিস্থিতিলয়রহিতং, অনন্তং বীর্য্যং প্রভাবো যস্য তং, অনন্তা বাহবো যস্য তং, শশিসূর্য্যৌ নেত্রে যস্য তাদৃশং পশ্যামি, তথা দীপ্তো হুতাশোঽগ্নির্বক্ত্রে যস্য তং স্বতেজসা ইদং বিশ্বং তপন্তং সন্তাপয়ন্তং পশ্যামি ॥ ১৯ ॥

দ্যাবাপৃথিব্যোরিদমন্তরং হি ব্যাপ্তং ত্বয়ৈকেন দিশশ্চ সর্ব্বাঃ।
দৃষ্ট্বাদ্ভুতং রূপমিদং তবোগ্রং লোকত্রয়ং প্রব্যথিতং মহাত্মন্ ॥ ২০ ॥
অমী হি ত্বাং সুরসংঘা বিশন্তি কেচিদ্ভীতাঃ প্রাঞ্জলয়ো গৃণন্তি।
স্বস্তীত্যুক্ত্বা মহর্ষিসংঘা বীক্ষন্তে ত্বাং স্তুতিভিঃ পুষ্কলাভিঃ ॥ ২১ ॥

## শাঙ্করভাষ্যম্।

মধ্যান্তস্তং ত্বামনাদিমধ্যান্তমনন্তবীর্য্যং ন তব বীর্য্যস্যান্তোঽস্তীত্যনন্তবীর্য্যস্তং ত্বামনন্তবীর্য্যং তথা অনন্তবাহুমনন্তা বাহবো যস্য তব স ত্বমনন্তবাহুস্তং ত্বাং অনন্তবাহুং শশিসূর্য্যনেত্রং শশিসূর্য্যৌ নেত্রে যস্য তব সঃ ত্বং শশিসূর্য্যনেত্রঃ তং ত্বাং শশিসূর্য্যনেত্রং চন্দ্রাদিত্যনয়নং পশ্যামি ত্বাং দীপ্তহুতাশবক্ত্রং দীপ্তশ্চাসৌ হুতাশশ্চ তদ্বৎ বক্ত্রং যস্য তব স ত্বং দীপ্তহুতাশবক্ত্রঃ তং ত্বাং দীপ্তহুতাশবক্ত্রং স্বতেজসা বিশ্বং সমস্তমিদং তপন্তং সন্তাপয়ন্তং ॥ ১৯ ॥

দ্যাবাপৃথিব্যোবিতি। দ্যাবাপৃথিব্যোবিদমন্তরং হি অন্তরীক্ষং ব্যাপ্তং ত্বয়ৈকেন বিশ্বরূপধরেণ দিশশ্চ সর্ব্বা ব্যাপ্তাঃ দৃষ্ট্বা উপলভ্য অদ্ভুতং বিস্মাপকং রূপমিদং তব উগ্রং ক্রূরং লোকত্রযং লোকানাং ত্রয়ং লোকত্রযং প্রব্যথিতং ভীতং প্রচলিতং বা হে মহাত্মন্ অক্ষুদ্রস্বভাব ॥ ২০ ॥

অথাধুনা পুরা যদ্বা জযেম যদি বা নো জয়েয়ুরিতি অর্জ্জুনস্য সংশয় আসীৎ তন্নির্ণয়ায় পাণ্ডবজয়মৈকান্তিকং দর্শয়ামীতি প্রবৃত্তো ভগবান্ তং পশ্যন্নাহ অমী হীতি। কিঞ্চ অমী

## গিরিকৃত টীকা।

প্রকৃতভগবদ্রূপস্য ব্যাপ্তিং ব্যনক্তি দ্যাবাপৃথিব্যোবিতীতি। তস্যৈব ভয়ঙ্করত্বমাচষ্টে দৃষ্ট্বেতি ॥ ২০ ॥

অমী হীত্যাদি সমনন্তরগ্রন্থস্য তাৎপর্য্যমাহ অথেতি। তং ভগবন্তং পাণ্ডবজয়মৈকান্তিকং দর্শয়ন্তং পশ্যন্নর্জুনো ব্রবীতীত্যাহ তং পশ্যন্নিতি। বিশ্বরূপস্যৈব প্রপঞ্চনার্থমনন্তর-

## স্বামিকৃত টীকা।

কিঞ্চ দ্যাবাপৃথিব্যোবিতি। দ্যাবাপৃথিব্যোরিদমন্তরীক্ষং ত্বয়ৈবৈকেন ব্যাপ্তং দিশশ্চ সর্ব্বা ব্যাপ্তাঃ, অদ্ভুতমদৃষ্টপূর্ব্বং ত্বদীয়মিদমুগ্রং ঘোরং রূপং দৃষ্ট্বা লোকত্রয়ং প্রব্যথিতমতিভীতং পশ্যামীতি পূর্ব্বস্যৈবানুষঙ্গঃ ॥ ২০ ॥

কিঞ্চ অমী হীতি। অমী সুরসঙ্ঘা ভীতাঃ সন্তস্ত্বাং বিশন্তি শরণং প্রবিশন্তি, তেষাং মধ্যে কেচিদতিভীতা দূরতএব স্থিত্বা কৃতসম্পুটকরযুগলাঃ সন্তো গৃণন্তি জয় রক্ষ রক্ষেতি প্রার্থয়ন্তে স্পষ্টমন্যৎ ॥ ২১ ॥

রুদ্রাদিত্যা বসবো যে চ সাধ্যা বিশ্বেঽশ্বিনৌ মরুতশ্চোষ্মপাশ্চ।
গন্ধর্ব্বযক্ষা সুরসিদ্ধসংঘা বীক্ষন্তে ত্বাং বিস্মিতাশ্চৈব সর্ব্বে ॥ ২২ ॥

## শাঙ্করভাষ্যম্।

হি যুধ্যমানা যোদ্ধারস্ত্বাং সুরসংঘা যেঽত্র ভূভাবাবতারায়াবতীর্ণা বস্বাদিদেবসংঘা মনুষ্যসংস্থানাস্ত্বাং বিশন্তি প্রবিশন্তো দৃশ্যন্তে তত্র কেচিদ্ভীতাঃ প্রাঞ্জলয়ঃ সন্তো গৃণন্তি স্তুবন্তি ত্বামন্যে পলায়নেঽপ্যশক্তাঃ সন্তো যুদ্ধে প্রত্যুপস্থিতে উৎপাতাদিনিমিত্তান্যুপলক্ষ্য স্বস্ত্যস্তু জগত ইত্যুক্ত্বা মহর্ষিসিদ্ধসংঘাঃ মহর্ষীণাঞ্চ সিদ্ধানাঞ্চ সংঘাঃ স্তুবন্তি ত্বাং স্তুতিভিঃ পুষ্কলাভিঃ সম্পূর্ণাভিঃ॥ ২২ ॥

কিঞ্চান্যৎ রুদ্রেতি। রুদ্রাদিত্যা বসবো যে চ সাধ্যা। রুদ্রাদয়ো গণাঃ বিশ্বেঽশ্বিনৌ বিশ্বে দেবাঃ অশ্বিনৌ চ দেবৌ মরুতশ্চ বায়ব উষ্মপাশ্চ পিতরো গন্ধর্ব্বযক্ষাসুরসিদ্ধসংঘাঃ গন্ধর্ব্বা হাহাহূহুপ্রভৃতয়ো যক্ষাঃ কুবেরপ্রভৃতয়ঃ অসুরা বিরোচনপ্রভৃতয়ঃ সিদ্ধাঃ কপিলাদয়স্তেষাং সংঘাঃ গন্ধর্ব্বযক্ষাসুরসিদ্ধসংঘাস্তে বীক্ষন্তে পশ্যন্তি ত্বা ত্বাং বিস্মিতাঃ বিস্ময়াপন্নাঃ সন্তএব সর্ব্বে॥ ২২ ॥

## গিরিকৃত টীকা।

প্রশ্নজাতমিতি দর্শয়তি কিঞ্চেতি। অসুরসংঘা ইতি পদস্থিত্যা ভূভারভূতা দুর্য্যোধনাদয়স্ত্বাং বিশন্তীত্যপি চ বক্তব্যং। উভয়োরপি সেনয়োরবস্থিতেষু যোদ্ধৃকামেষবান্তরবিশেষমাহ অত্রেতি। সমরভূমৌ সমাগতানাং দ্রষ্টুকামানাং নারদপ্রভৃতীনাং বিশ্ববিনাশমাশঙ্কমানানাং তং পরিজিহীর্ষতাং স্তুতিপদেষু ভগবদ্বিষয়েষু প্রবৃত্তিপ্রকারং দর্শয়তি যুদ্ধ ইতি॥ ২১ ॥

দৃশ্যমানস্য ভগবদ্রূপস্য বিস্ময়করত্বে হেত্বন্তরমাহ কিঞ্চেতি। ত এবোক্তা রুদ্রাদয়ঃ সর্ব্বে বিস্ময়মাপন্নাস্ত্বাং পশ্যন্তীতি সম্বন্ধঃ॥ ২২ ॥

## স্বামিকৃত টীকা।

কিঞ্চ রুদ্রেতি। রুদ্রাশ্চ আদিত্যাশ্চ বসবশ্চ যে চ সাধ্যা নাম দেবাঃ বিশ্বে বিশ্বে দেবাঃ অশ্বিনৌ দেবৌ মরুতো মরুদ্গণাশ্চ উষ্মাণং পিবন্তীত্যুষ্মপাঃ পিতরঃ উষ্মভাগা হি পিতর, ইতিশ্রুতেঃ স্মৃতিশ্চ যাবদুষ্ণং ভবেদন্নং তাবদশ্নন্তি বাগ্যতাঃ। তাবদশ্নন্তি পিতরো যাবন্নোক্তা হবির্গুণাঃ। গন্ধর্ব্বাশ্চ যক্ষাশ্চ অসুরাশ্চ বিরোচনাদয়ঃ সিদ্ধসংজ্ঞাঃ সিদ্ধানাং সংঘাশ্চ সর্ব্বএব বিস্মিতাঃ সন্তস্ত্বাং বীক্ষন্ত ইত্যন্বয়ঃ॥ ২২ ॥

কিঞ্চ রূপমিতি। হে মহারাহো মহদত্যূর্জিতং এতং রূপং দৃষ্ট্বা লোকাঃ সর্ব্বে প্রব্যথিতা অতিভীতাঃ তথাহঞ্চ প্রব্যথিতোঽস্মি,কীদৃশং রূপং দৃষ্ট্বা,বহুনি বক্ত্রাণি নেত্রাণি চ যস্মিংস্তৎ,

রূপং মহত্তে বহুবক্ত্রনেত্রং মহাবাহো বহুবাহূরুপাদম্।
বহূদরং বহুদংষ্ট্রাকরালং দৃষ্ট্বা লোকাঃ প্রব্যথিতাস্তথাহম্॥ ২৩॥
নভস্পৃশং দীপ্তমনেকবর্ণং ব্যাত্তাননং দীপ্তবিশালনেত্রম্।
দৃষ্ট্বা হি ত্বাং প্রব্যথিতান্তরাত্মা ধৃতিং ন বিন্দামি শমঞ্চ বিষ্ণো॥২৪॥

## শাঙ্করভাষ্যম্।

যস্মাৎ রূপমিতি। রূপং মহদতিপ্রমাণং তে তব বহুবক্ত্রনেত্রং বহূনি বক্ত্রাণি মুখানি নেত্রাণি চক্ষূংষি চ যস্মিংস্তদ্রূপং বহুবক্ত্রনেত্রং হে মহাবাহো বহুবাহূরুপাদং বহবো বাহবঃ ঊরবঃ পাদাশ্চ যস্মিন্ রূপে তদ্বহুবাহূরুপাদং কিঞ্চ বহূদরং বহূনি উদরাণি অস্মিন্নিতি তৎ বহূদরং বহুদংষ্ট্রাকরালং বহ্বীভিঃ দংষ্ট্রাভিঃ করালং বিকৃতং তদ্বহুদংষ্ট্রাকরালং দৃষ্ট্বা রূপমীদৃশং লোকাঃ লৌকিকাঃ প্রাণিনঃ প্রব্যথিতাঃ প্রচলিতা ভয়েন তথাহং॥ ২৩॥

তত্রেদং কারণং নভঃস্পৃশমিতি। নভঃস্পৃশং দ্যুস্পর্শমিত্যর্থঃ দীপ্তং প্রজ্বলিতং অনেকবর্ণং অনেকে বর্ণা ভয়ঙ্করা নানা সংস্থানা যস্মিংস্ত্বয়ি তং ত্বমনেকবর্ণং ব্যাত্তাননং ব্যাত্তানি বিবৃতানি আননানি মুখানি যস্মিন্ তং ত্বাং ব্যাত্তাননং দীপ্তবিশালনেত্রং দীপ্তানি প্রজ্বলিতানি বিশালানি বিস্তীর্ণানি নেত্রাণি যস্মিংস্ত্বয়ি তং ত্বাং দীপ্তবিশালনেত্রং দৃষ্ট্বা হি ত্বাং প্রব্যথিতান্তরাত্মা প্রব্যথিতঃ প্রভীতোঽন্তরাত্মা মনো যস্য মম সোঽহং প্রব্যথিতান্তরাত্মা সন্ ধৃতিং ন বিন্দামি ন লভে শমঞ্চোপশমং মনস্তুষ্টিং হে বিষ্ণো॥ ২৪॥

## গিরিকৃত টীকা।

লোকত্রয়ং প্রব্যথিতমিত্যুক্তমুপসংহরতি যস্মাদিতি। ঈদৃশং যস্মাত্তে রূপং তস্মাত্ত্বাং দৃষ্ট্বেতি যোজনা। ভয়েন লৌকিকবদহমপি ব্যথিতো ব্যাথাং পীড়াং দেহেন্দ্রিয়প্রচলনং প্রাপ্তোঽস্মীত্যাহ তথেতি॥ ২৩॥

অর্জ্জুনস্য বিশ্বরূপদর্শনেন ব্যথিতত্বে হেতুমাহ তত্রেতি॥ ২৪॥

## স্বামিকৃত টীকা।

বহবো বাহব উরবঃ পাদাশ্চ যস্মিংস্তৎ, বহূন্যুদরাণি যস্মিংস্তৎ, বহ্বীভির্দংষ্ট্রাভিঃ করালং বিকৃতং রৌদ্রমিত্যর্থঃ॥ ২৩॥

ন কেবলং ভীতোঽহমেতাবদেব অপি তু নভ ইতি। নভঃ স্পৃশতীতি নভস্পৃক্ তং অন্তরীক্ষব্যাপিনমিত্যর্থঃ, দীপ্তং তেজোযুক্তং, অনেকে বর্ণা যস্য তং, ব্যাত্তানি বিবৃতান্যাননানি যস্য তং, দীপ্তানি বিশালানি নেত্রাণি যস্য তং, এবংভূতং হি ত্বাং দৃষ্ট্বা প্রব্যথিতোঽন্তরাত্মা মনো যস্য সোঽহং ধৃতিং ধৈর্য্যমুপশমঞ্চ ন লভে॥ ২৪॥

দংষ্ট্রাকরালানি চ তে মুখানি দৃষ্ট্বৈব কালানলসন্নিভানি।
দিশো ন জানে ন লভে চ শর্ম্ম প্রসীদ দেবেশ জগন্নিবাস ॥ ২৫ ॥
অমী চ ত্বাং ধৃতরাষ্ট্রস্য পুত্রাঃ সর্ব্বে সহৈবাবনিপালসংঘৈঃ।
ভীষ্মো দ্রোণঃ সূতপুত্রস্তথাসৌ সহাস্মদীয়ৈরপি যোধমুখ্যৈঃ ॥২৬॥

---

## শাঙ্করভাষ্যম্।

কস্মাৎ দংষ্ট্রাকরালানীতি। দংষ্ট্রাকরালানি দংষ্ট্রাভিঃ করালানি বিবৃতানি তে তব মুখানি দৃষ্ট্বৈবোপলভ্য কালানলসন্নিভানি প্রলয়কালে লোকানাং দাহকোঽগ্নিঃ কালানলস্তন্নিভানি কালানলসদৃশানি দৃষ্ট্বেত্যেতদ্দিশঃ পূর্ব্বাপরবিবেকেন ন জানে দিঙ্মূঢ়োঽস্ম্যতো ন লভে ন চোপলভে চ শর্ম্ম সুখমতঃ প্রসীদ প্রসন্নো ভব দেবেশ জগন্নিবাস ॥ ২৫ ॥

যেভ্যো মম পরাজয়শঙ্কা প্রাগেব আসীৎ সা চাপগতা যতঃ অমী চেতি। অমীচ ত্বাং ধৃতরাষ্ট্রস্য পুত্রাঃ দুর্য্যোধনপ্রভৃতয়স্ত্বরমাণা বিশন্তীতি ব্যবহিতেন সম্বন্ধঃ সর্ব্বে সহৈব সংহতৈঃ অবনিপালসংঘৈঃ অবনিং পৃথ্বীং পালয়ন্তীত্যবনিপালাস্তেষাং সংঘৈঃ কিঞ্চ ভীষ্মো দ্রোণঃ সূতপুত্রঃ কর্ণস্তথাসৌ সহাস্মদীয়ৈরপি ধৃষ্টদ্যুম্নপ্রভৃতিভির্যোধমুখ্যৈঃ যোধানাং মুখ্যৈঃ প্রধানৈঃ সহ ॥ ২৬ ॥

## গিরিকৃত টীকা।

দৃশ্যমানেঽপি ভগবদ্দেহে পরিতোষাদ্যভাবে করণান্তরং প্রশ্নপূর্ব্বকমাহ কস্মাদিতি। দৃষ্ট্বৈবেত্যেবকারণে প্রাপ্তির্ব্যাবর্ত্ততে ॥ ২৫ ॥

অস্মাকং জয়ং পরেষাং পরাজয়ঞ্চ দিদৃক্ষুস্তং পশ্যামীত্যাহ যেভ্য ইতি। তত্র হেতুত্বেন শ্লোকমবতারয়তি যত ইতি ॥ ২৬ ॥

## স্বামিকৃত টীকা।

কিঞ্চ দংষ্ট্রেতি। হে দেবেশ তব মুখানি দৃষ্ট্বা ভয়াবেশেন দিশো ন জানামি শর্ম্ম চ সুখং ন লভে, ভোজগন্নিবাস প্রসন্নো ভব, কীদৃশানি মুখানি দৃষ্ট্বা, দংষ্ট্রাভিঃ করালানি কালানলঃ প্রলয়াগ্নিস্তৎসদৃশানি ॥ ২৫ ॥

যচ্চান্যদ্দ্রষ্টুমিচ্ছসীত্যনেনাস্মিন্ সংগ্রামে ভাবিজয়পরাজয়াদিকং মম দেহে পশ্যেতি ভগবতোক্তং তদিদানীং পশ্যন্নাহ অমী চেতি পঞ্চভিঃ। অমী ধৃতরাষ্ট্রস্য পুত্রা দুর্য্যোধনাদয়ঃ সর্ব্বেঽবনিপালানাং জয়দ্রথাদীনাং রাজ্ঞাং সংঘৈঃ সমূহৈঃ সহৈব তব বক্ত্রাণি বিশন্তীত্যুত্তরেণান্বয়ঃ, তথা ভীষ্মশ্চ দ্রোণশ্চাসৌ সূতপুত্রশ্চ কর্ণঃ, ন কেবলং ত এব বিশন্তি অপি তু প্রতিযোদ্ধারোঽস্মদীয়া যে যোধমুখ্যাঃ শিখণ্ডিধৃষ্টদ্যুম্নাদয়স্তৈঃ সহ ॥ ২৬ ॥

বক্ত্রাণি তে ত্বরমাণা বিশন্তি দংষ্ট্রাকরালানি ভয়ানকানি।
কেচিদ্বিলগ্না দশনান্তরেষু সংদৃশ্যন্তে চূর্ণিতৈরুত্তমাঙ্গৈঃ॥ ২৭॥
যথা নদীনাং বহবোঽম্বুবেগাঃ সমুদ্রমেবাভিমুখা দ্রবন্তি।
তথা তবামী নরলোকবীরা বিশন্তি বক্ত্রাণ্যভিতো জ্বলন্তি॥ ২৮॥
যথা প্রদীপ্তং জ্বলনং পতঙ্গা বিশন্তি নাশায় সমৃদ্ধবেগাঃ।
তথৈব নাশায় বিশন্তি লোকাস্তবাপি বক্ত্রাণি সমৃদ্ধবেগাঃ॥ ২৯॥

---

## শাঙ্করভাষ্যম্।

কিঞ্চ বক্ত্রাণীতি। বক্ত্রাণি মুখানি তে তব ত্বরমাণাস্ত্বরাযুক্তাঃ সন্তো বিশন্তি কিংবিশিষ্টানি দংষ্ট্রাকরালানি মুখানি, ভয়ানকানি ভয়ঙ্করাণি কিঞ্চ কেচিন্মুখানি প্রবিষ্টানাং মধ্যে বিলগ্না দশনান্তরেষু দন্তান্তরেষু মাংসমিব ভক্ষিতং সংদৃশ্যন্তে উপলভ্যন্তে চূর্ণিতৈশ্চূর্ণীকৃতৈরুত্তমাঙ্গৈঃ শিরোভিঃ॥ ২৭॥

কথং প্রবিশন্তি মুখানীত্যাহ যথা নদীনামিতি। যথা নদীনাং স্রবন্তীনাং বহবোঽনেকেঽম্বূনাং বেগা অম্বুবেগাস্ত্বরাবিশেষাঃ সমুদ্রমেবাভিমুখাঃ প্রতিমুখাঃ দ্রবন্তি প্রবিশন্তি তথা তদ্বত্তব অমী ভীষ্মাদয়ো নরলোকবীরা মনুষ্যলোকপালা বিশন্তি বক্ত্রাণ্যভিতো জ্বলন্তি প্রকাশমানানি॥ ২৮॥

তে কিমর্থং প্রবিশন্তি কথঞ্চেত্যাহ যথেতি। যথা প্রদীপ্তং জ্বলনং অগ্নিং পতঙ্গাঃ

---

## গিরিকৃত টীকা।

ন কেবলং দুর্য্যোধনাদীনামেব পরাজয়ঃ কিন্তু ভীষ্মাদীনামপীত্যাহ কিঞ্চেতি। ভগবদ্রূপস্তোত্রত্বে হেত্বন্তরমাহ কিঞ্চেতি। প্রবিষ্টানাং মধ্যে কেচিদিতি সম্বন্ধঃ॥ ২৭॥

উভয়োরপি সেনয়োরবস্থিতানাং রাজ্ঞাং ভগবন্মুখপ্রবেশনং নিদর্শনেন বিশদয়তি কথমিত্যাদিনা॥ ২৮॥

## স্বামিকৃত টীকা।

বক্ত্রাণীতি। এতে সর্ব্বে ত্বরমাণা ধাবন্তস্তব দংষ্ট্রাভিঃ বিকৃতানি করালানি ভয়ঙ্করাণি বক্ত্রাণি বিশন্তি, তেষাং মধ্যে কেচিচ্চূর্ণিতৈরুত্তমাঙ্গৈঃ শিরোভিরুপলক্ষিতা দন্তসন্ধিষু সংশ্লিষ্টাঃ সংদৃশ্যন্তে॥ ২৭॥

প্রবেশনে দৃষ্টান্তমাহ যথেতি। নদীনামনেকমার্গপ্রবৃত্তানাং বহবোঽম্বূনাং বারীণাং বেগাঃ প্রবাহাঃ সমুদ্রাভিমুখাঃ সন্তো যথা সমুদ্রমেব দ্রবন্তি বিশন্তি তথা অমী যে নরলোকবীরাস্তেঽভিতো জ্বলন্তি সর্ব্বতঃ প্রদীপ্যমানানি তব বক্ত্রাণি প্রবিশন্তি॥ ২৮॥

অবশত্বেন প্রবেশে নদীবেগদৃষ্টান্ত উক্তো বুদ্ধিপূর্ব্বকপ্রবেশে দৃষ্টান্তমাহ যথেতি। প্রদীপ্তং

লেলিহ্যসে গ্রসমানঃ সমন্তাল্লোকান্ সমগ্রান্ বদনৈর্জ্বলদ্ভিঃ।
তেজোভিরাপূর্য্য জগৎ সমগ্রং ভাসস্তবোগ্রাঃ প্রতপন্তি বিষ্ণো ॥ ৩০ ॥
আখ্যাহি মে কো ভবানুগ্ররূপো নমোঽস্তু তে দেববর প্রসীদ।
বিজ্ঞাতুমিচ্ছামি ভবন্তমাদ্যং ন হি প্রজানামি তব প্রবৃত্তিম্ ॥ ৩১ ॥

## শাঙ্করভাষ্যম্।

পক্ষিণো বিশন্তি নাশায় বিনাশায় সমৃদ্ধবেগাঃ সমৃদ্ধঃ উদ্ভূতো বেগো গতির্যেষাং তে সমৃদ্ধবেগাঃ তথৈব নাশায় বিশন্তঃ লোকাঃ প্রাণিনস্তবাপি বক্ত্রাণি সমৃদ্ধবেগাঃ ॥ ২৯ ॥

ত্বং পুনঃ লেলিহ্যস ইতি। লেলিহ্যসে আস্বাদয়সি গ্রসমানোঽন্তঃপ্রবেশয়ন্ সমন্তাৎ সমন্ততো লোকান্ সমগ্রান্ সমস্তান্ বদনৈর্বক্ত্রৈর্জ্বলদ্ভির্দীপ্যমানৈস্তেজোভিরাপূর্য্য সংব্যাপ্য জগৎ সমগ্রং সহাগ্রেণ সমস্তমিত্যেতৎ কিঞ্চ ভাসো দীপ্তয়স্তবোগ্রাঃ ক্রূরাঃ প্রতপন্তি প্রতাপং কুর্ব্বন্তি হে বিষ্ণো ব্যাপনশীল ॥ ৩০ ॥

যতএবমুগ্রস্বভাবোঽতঃ আখ্যাহীতি। আখ্যাহি কথয মে মহ্যং কো ভবানেবমুগ্ররূপঃ অতিক্রূরাকারো নমোঽস্তু তে তুভ্যং হে দেববব দেবানাং প্রধান প্রসীদ প্রসাদং কুরু

## গিরিকৃত টীকা।

প্রবেশপ্রযোজনং তৎপ্রকারবিশেষঞ্চোদাহরণান্তরেণ স্ফোরয়তি তে কিমর্থমিত্যাদিনা ॥ ২৯ ॥

যোদ্ধুকামানাং রাজ্ঞাং ভগবন্মুখপ্রবেশপ্রকারং প্রদর্শ্য তস্যাং দশায়াং ভগবতস্তদ্ভাসাঞ্চ প্রবৃত্তিপ্রকারং প্রত্যায়য়তি ত্বং পুনরিতি। ভগবৎপ্রবৃত্তিমেব প্রত্যায্য তদীয়ভাসাং প্রবৃত্তিং প্রকটয়তি কিঞ্চেতি ॥ ৩০ ॥

ভগবদ্রূপস্যার্জ্জুনেন দৃষ্টপূর্ব্বত্বাত্তস্য তস্মিন্নজিজ্ঞাসেত্যাশঙ্ক্যাহ যত ইতি। উপদেশং শুশ্রূষমাণেনোপদেশকর্ত্তুঃ প্রহ্বীভবনং কর্ত্তব্যমিতি সূচয়তি নমোঽস্থিতি। ক্রৌর্য্যত্যাগং

## স্বামিকৃত টীকা।

জ্বলন্তমগ্নিং পতঙ্গাঃ শলভা বুদ্ধিপূর্ব্বকং সমৃদ্ধো বেগো যেষাং তে যথা নাশায় মরণায়ৈব বিশন্তি তথৈব লোকাএতে জনা অপি ভগন্মুখানি প্রবিশন্তি ॥ ২৯ ॥

ততঃ কিমতঃ আহ লেলিহ্যসে ইতি। গ্রসমানোঽপি সন্ সমগ্রান্ লোকান্ সর্ব্বানেতান্ বীরান্ সর্ব্বতো লেলিহ্যসে অতিশয়েন ভক্ষয়সি, কৈঃ জ্বলদ্ভির্বদনৈঃ, কিঞ্চ হে বিষ্ণো তব ভাসো দীপ্তয়স্তেজোভির্বিস্ফুরণৈঃ সমগ্রং জগদ্ব্যাপ্য তীব্রাঃ সন্ত্যঃ প্রতপন্তি সন্তাপয়ন্তি ॥৩০॥

যত এবং তস্মাৎ আখ্যাহীতি। ভবানুগ্ররূপঃ ক ইত্যাখ্যাহি কথয় তুভ্যং নমোঽস্তু হে দেববর প্রসীদ প্রসন্নো ভব ভবন্তমাদ্যং পুরুষ-বিশেষেণ জ্ঞাতুমিচ্ছামি যতস্তব প্রবৃত্তিং

শ্রীভগবানুবাচ—

কালোঽস্মি লোকক্ষয়কৃৎ প্রবৃদ্ধো লোকান্ সমাহর্ত্তুমিহপ্রবৃত্তঃ।
ঋতেঽপি ত্বাং ন ভবিষ্যন্তি সর্ব্বে যেঽবস্থিতাঃ প্রত্যনীকেষু যোধাঃ॥৩২॥

## শাঙ্করভাষ্যম্ ।

বিজ্ঞাতুং বিশেষেণ জ্ঞাতুমিচ্ছামি ভবন্তমাদ্যমাদৌ ভবমাদ্যং ন হি যস্মাৎ প্রজানামি তব ত্বদীয়াং প্রবৃত্তিং চেষ্টাং ॥ ৩১ ॥

কালোঽস্মীতি। কালোঽস্মি লোকক্ষয়কৃৎ লোকানাং ক্ষয়ং করোতীতি লোকক্ষয়কৃৎ প্রবৃদ্ধো বৃদ্ধিং গতো যদর্থং প্রবৃদ্ধস্তচ্ছৃণু লোকান্ সমাহর্ত্তুং সংহর্ত্তুং ইহ অস্মিন্ কালে প্রবৃত্তঃ ঋতেঽপি বিনাপি ত্বা ত্বাং ন ভবিষ্যন্তি ভীষ্মদ্রোণকর্ণপ্রভৃতয়ঃ সর্ব্বে যেভ্যস্তবাশঙ্কা যেঽবস্থিতা প্রত্যনীকেষনীকমনীকং প্রতি প্রত্যনীকেষু প্রতিপক্ষভূতেষু অনীকেষু যোধা এব যোদ্ধারঃ ॥ ৩২ ॥

যস্মাদেবং তস্মাত্বমিতি। তস্মাত্বমুত্তিষ্ঠ ভীষ্মদ্রোণপ্রভৃতয়োঽতিরথা অজেয়া দেবৈরপ্যর্জ্জুনেন জিতা ইতি যশো লভস্ব কেবলং পুণ্যৈর্হি তৎ প্রাপ্যতে জিত্বা শত্রূন্ দুর্য্যো-

## গিরিকৃত টীকা।

সমর্থযতে প্রসাদমিতি। ত্বমেব মাং জানীষে কিমর্থমিত্থমিদানীমর্থয়সে মদীয়াং চেষ্টাং দৃষ্ট্বা তয়ৈব প্রতিপদ্যস্বেত্যাশঙ্ক্যাহ ন হীতি ॥ ৩১ ॥

যদর্থা চ স্বপ্রবৃত্তিঃ তৎসর্ব্বং ভগবানুক্তবানিত্যাহ ভগবানিতি। কালঃ ক্রিয়াশক্ত্যুপহিতঃ পরমেশ্বরঃ, অস্মিন্নিতি বর্ত্তমানযুদ্ধোপলক্ষিতত্বং কালস্য বিবক্ষিতং। লোকসংহারার্থং ত্বৎপ্রবৃত্তাবপি নাসাবর্থবতী প্রতিপক্ষণাং ভীষ্মাদীনাং মৎপ্রবৃত্তিং বিনাপি সংহর্ত্তুমশক্যত্বাদিত্যাশঙ্ক্যাহ ঋতেঽপীতি ॥ ৩২ ॥

তবৌদাসীন্যেঽপি প্রতিকূলানীকস্থা মৎপ্রাতিকূল্যাদেব ন ভবিষ্যন্তীত্যেবং যস্মান্নিশ্চিতং তস্মাত্বদৌদাসীন্যমকিঞ্চিৎকরমিত্যাহ যস্মাদিতি। উত্তিষ্ঠ যুদ্ধায় উন্মুখীভবেত্যর্থঃ।

## স্বামিকৃত টীকা।

চেষ্টাং কিমর্থমেবং প্রবৃত্তোঽসীতি ন জানামি, এবম্ভূতস্য তব প্রবৃত্তিং বার্ত্তামপি ন জনামীতি বা ॥ ৩১ ॥

এবং প্রার্থিতঃ সন্ শ্রীভগবানুবাচ কাল ইতি ত্রিভিঃ। লোকানাং ক্ষয়কর্ত্তা প্রবৃদ্ধোঽত্যুৎকটঃ কালোঽস্মি লোকান্ প্রাণিনঃ সংহর্ত্তুমিহ লোকে প্রবৃত্তোঽস্মি অত ঋতে ত্বাং হন্তারং বিনা ন ভবিষ্যন্তি জীবিষ্যন্তি কে তে প্রত্যনীকেষু অনীকানি অনীকানি প্রতি ভীষ্মদ্রোণাদীনাং সর্ব্বাসু সেনাসু যে যোদ্ধারোঽবস্থিতাস্তে সর্ব্বেঽপি ॥ ৩২ ॥

তস্মাত্ত্বমুত্তিষ্ঠ যশো লভস্ব জিত্বা শত্রূন্ ভুঙ্ক্ষ্ব রাজ্যং সমৃদ্ধম্।
ময়ৈবৈতে নিহতাঃ পূর্ব্বমেব নিমিত্তমাত্রং ভব সব্যসাচিন্ ॥ ৩৩ ॥
দ্রোণঞ্চ ভীষ্মঞ্চ জয়দ্রথঞ্চ কর্ণং তথান্যানপি যোধবীরান্।
ময়া হতাংস্ত্বং জহি মা ব্যথিষ্ঠা যুধ্যস্ব জেতাসি রণে সপত্নান্ ॥৩৪॥

## শাঙ্করভাষ্যম্।

ধনপ্রভৃতীন্ ভুংক্ষ্ব রাজ্যং সমৃদ্ধং অসপত্নমকণ্টকং ময়া এবৈতে নিহতা নিশ্চয়েন হতাঃ প্রাণৈর্বিয়োজিতাঃ পূর্ব্বমেব নিমিত্তমাত্রং ভব ত্বং হে সব্যসাচিন্ সব্যেন বামেন হস্তেন শরাণাং ক্ষেপাৎ সব্যসাচীত্যুচ্যতেঽর্জ্জুনঃ ॥ ৩৩ ॥

দ্রোণঞ্চেতি। দ্রোণঞ্চ যেষু যেষু যোধেষু অর্জ্জুনস্যাশঙ্কাসীৎ তাংস্তান্ সর্ব্বান্ ব্যপদিশতি ভগবান্ ময়া হতানিতি, তত্র দ্রোণভীষ্ময়োস্তাবৎ প্রসিদ্ধমাশঙ্কাকারণং দ্রোণো ধনুর্ব্বেদাচার্য্যো দিব্যাস্ত্রসংপন্নঃ আত্মনশ্চ বিশেষতো গুরুর্গরিষ্ঠো ভীষ্মঃ স্বচ্ছন্দমৃত্যুর্দি-

## গিরিকৃত টীকা।

যশোলাভমভিনয়তি ভীষ্মেতি। কিং তেনাপুমর্থেনেত্যাশঙ্ক্যাহ পুণ্যৈরিতি। রাজ্যভোগে উপেক্ষিতে কিমনপেক্ষিতেনেত্যাশঙ্ক্যাহ জিত্বেতি। ভীষ্মাদিষতিরথেষু কুতো জয়াশঙ্কা ইত্যাশঙ্ক্যাহ ময়ৈবৈত ইতি। তর্হি মৃতমারণার্থং ন মে প্রবৃত্তিস্তত্রাহ নিমিত্তেতি। সব্যসাচিপদং বিভজতে বামেনেতি ॥ ৩৩ ॥

ময়ৈবেত্যাদিনোক্তং প্রপঞ্চয়তি দ্রোণঞ্চেতি। কিমিতি কিতিচিদেবাত্র দ্রোণাদয়ো গণ্যন্তে তত্রাহ যেষ্বিতি। দ্রোণাদিষু কুতঃ শঙ্কেত্যাশঙ্ক্য দ্বয়োঃ শঙ্কানিমিত্তমাহ তত্রেত্যাদিনা। জয়দ্রথেঽপি শঙ্কানিমিত্তমাহ তথেতি দিব্যাস্ত্রসংপন্ন ইতি সম্বন্ধঃ। তত্র শঙ্কায়াং কারণান্তরমাহ যস্তেতি। কর্ণেঽপি তৎকারণত্বং কথযতি কর্ণোঽপীতি। পূর্ব্ববদেব সম্বন্ধঃ।

## স্বামিকৃত টীকা।

তস্মাদিতি। যস্মাদেবং তস্মাত্ত্বং যুদ্ধায়োত্তিষ্ঠ দেবৈরপি দুর্জ্জয়া ভীষ্মাদয়োঽর্জ্জুনেন নির্জ্জিতা ইত্যেবংভূতাং যশো লভস্ব প্রাপ্নুহি অযত্নতশ্চ শত্রূন্ জিত্বা সমৃদ্ধং রাজ্যং ভুঙ্ক্ষ্ব, এতে চ তব শত্রবস্তদীয়যুদ্ধাৎ পূর্ব্বমেব ময়ৈব কালাত্মনা নিহতপ্রায়াস্তথাপি ত্বং নিমিত্তমাত্রং ভব, হে সব্যসাচিন্ সব্যেন বামেন হস্তেন সাচিতুং শরান্ সন্ধাতুং শীলং যস্তেতি বুৎপত্ত্যা বামেনাপি বাণক্ষেপাৎ সব্যসাচীত্যুচ্যতে ॥ ৩৩ ॥

নন্বেতেষ্বেব কতরস্মো গরীয়ো যদ্বা জয়েম যদি বা নো জয়েযুরিতি যা আশঙ্কা সাপি ন কার্য্যেত্যাহ দ্রোণমিতি যেভ্যস্ত্বং শঙ্কসে তান্ দ্রোণাদীন্ ময়ৈব হতাংস্ত্বং জহি ঘাতয় মা ব্যথিষ্ঠা ভয়ং মা কার্ষীঃ সপত্নান্ শত্রূন্ রণে যুদ্ধে নিশ্চিতং জেতাসি জেষ্যসি ॥ ৩৪ ॥

সঞ্জয়উবাচ—এতচ্ছ্রুত্বা বচনং কেশবস্য কৃতাঞ্জলির্বেপমানঃ কিরীটী।
নমস্কৃত্য ভূয়এবাহ কৃষ্ণং সগদ্গদং ভীতভীতঃ প্রণম্য ॥ ৩৫ ॥

## শাঙ্করভাষ্যম্।

ব্যাঘ্রসংপন্নশ্চ পরশুরামেণ দ্বন্দ্বযুদ্ধমগমন্ন চ পরাজিতঃ তথা জয়দ্রথোঽপি যস্য পিতা তপশ্চরতি মম পুত্রস্য শিরো ভূমৌ পাতয়িষ্যতি যস্তস্যাপি শিরঃ পতিষ্যতীতি কর্ণোঽপি বাসবদত্তয়া শক্ত্যা ত্বমোঘয়া সম্পন্নঃ সূর্য্যপুত্রঃ কানীনো যতোঽতস্তন্নাম্নৈব নির্দ্দেশঃ ময়া হতাংস্ত্বং জহি নিমিত্তমাত্রেণ মা ব্যথিষ্ঠাস্তেভ্যো ভয়ং মা কার্ষীঃ যুদ্ধস্ব জেতাসি দুর্য্যোধনপ্রভৃতীন্ রণে যুদ্ধে সপত্নান্ শত্রূন্ ॥ ৩৪ ॥

এতচ্ছ্রুত্বেতি। এতৎ শ্রুত্বা বচনং কেশবস্য পূর্ব্বোক্তং কৃতাঞ্জলিঃ সন্ বেপমানঃ কম্পমানঃ কিরীটী নমস্কৃত্য ভূয়ঃ পুনরেবাহোক্তবান্ কৃষ্ণং সগদ্গদং সহ গদ্গদয়া বাচা মন্দশব্দেন ভয়াবিষ্টস্য দুঃখাভিঘাতাৎ স্নেহাবিষ্টস্য চ হর্ষোদ্ভবাৎ অশ্রুপূর্ণনেত্রত্বে সতি শ্লেষ্মণা কণ্ঠাবরোধঃ ততশ্চ বাচোঽপাটবং মন্দশব্দত্বং যৎ স গদ্গদস্তেন সহ বর্ত্তত ইতি সগদ্গদং বচনমাহেতি বচনং ক্রিয়াবিশেষণমেতৎ ভীতভীতঃ পুনঃ পুনর্ভয়াবিষ্টচেতাঃ সন্ প্রণম্য প্রহ্বীভূত্বাহেতি ব্যবহিতেন সম্বন্ধঃ অত্রাবসরে সঞ্জয়বচনং সাভিপ্রায়ং কথং দ্রোণাদিষ্বর্জ্জুনেন নিহতেষজেয়েষু চতুর্ষু নিরাশ্রয়ো দুর্য্যোধনো নিহতএবেতি মত্বা ধৃতরাষ্ট্রো জয়ং

## গিরিকৃত টীকা।

হেত্বন্তরমাহ বাসবেতি। সা খল্বমোঘা পুরুষমেকমত্যন্তসমর্থং ঘাতয়িত্বৈব নিবর্ত্ততে। জন্মনাপি তস্য শঙ্কনীয়ত্বমাহ সূর্য্যেতি। কুন্তী হি কন্যাবস্থায়াং মন্ত্রপ্রভাবং জ্ঞাতুমাদিত্যমাজুহাব ততস্তস্যামেবাবস্থায়াময়মুদ্বভূব তদাহ কানীন ইতি। এতদেবাভিপ্রেত্য কর্ণগ্রহণমিত্যাহ যত ইতি। উক্তেষন্যেষু চ ত্বয়া ন শঙ্কিতব্যমিত্যাহ ময়েতি ॥ ৩৪ ॥

পরাজয়াভাবাৎ করিষ্যতি সন্ধিমিতি বুদ্ধ্বা সঞ্জয়ো রাজ্ঞে বৃত্তান্তমুক্তবানিত্যাহ সঞ্জয় ইতি। পূর্ব্বোক্তবচনং কালোঽস্মীত্যাদি বিশ্বরূপদর্শনদশায়ামর্জ্জুনস্য ভগবতা সম্বাদবচনং কিমিতি সঞ্জয়ো রাজ্ঞে ব্যজিজ্ঞাপয়দিত্যাশঙ্ক্য তদুক্তেস্তাৎপর্য্যমাহ অত্রেতি। তমেবাভিপ্রায়ং প্রশ্নদ্বারা বিশদয়তি কথমিত্যাদিনা। তর্হি সঞ্জয়বচনং শ্রুত্বা কিমিতি রাজা সন্ধিং ন কারয়ামাসেতি তত্রাহ তদপীতি ॥ ৩৫ ॥

## স্বামিকৃত টীকা।

ততো যদ্বৃত্তং তদেব ধৃতরাষ্ট্রং প্রতি সঞ্জয় উবাচ এতদিতি। এতৎ পূর্ব্বোক্তশ্লোকত্রয়াত্মকং কেশবস্য বচনং শ্রুত্বা বেপমানঃ কম্পমানঃ কিরীটী অর্জ্জুনঃ কৃতাঞ্জলিঃ সংপুটীকৃতহস্তঃ কৃষ্ণং নমস্কৃত্য পুনরপ্যাহ উক্তবান্, কথমাহ ভয়হর্ষাদ্যাবেশবশাৎ গদ্গদেন কণ্ঠকম্পেন সহ বর্ত্তত ইতি সগদ্গদং যথা স্যাত্তথা, কিঞ্চভীতাদপি ভীতঃ সন্ প্রণম্য অবনতো ভূত্বা আহ ॥ ৩৫ ॥

অর্জ্জুন উবাচ—স্থানে হৃষীকেশ তব প্রকীর্ত্ত্যা জগৎ প্রহৃষ্যত্যনুরজ্যতে চ।
রক্ষাংসি ভীতানি দিশো দ্রবন্তি সর্ব্বে নমস্যন্তি চ সিদ্ধসংঘাঃ ॥ ৩৬ ॥

## শাঙ্করভাষ্যম্।

প্রতি নিরাশঃ সন্ সন্ধিং করিষ্যতীতি ততঃ শান্তিরুভয়েষাং ভবিষ্যতীতি তদপি নাশ্রৌষীৎ ধৃতরাষ্ট্রো ভবিতব্যবশাৎ ॥ ৩৫ ॥

স্থান ইতি। স্থানে যুক্তং কিং তব প্রকীর্ত্ত্যা ত্বন্মাহাত্ম্যকীর্ত্তনেন শ্রুতেন হৃষীকেশ যজ্জগৎ প্রহৃষ্যতি প্রহর্ষমুপৈতি তৎ স্থানে যুক্তমিত্যর্থঃ অথবা বিষয়বিশেষণং স্থান ইতি, যুক্তো হর্ষাদিবিষয়ো ভগবান্ যত ঈশ্বরঃ সর্ব্বাত্মা সর্ব্বভূতসুহৃচ্চেতি তথা অনুরজ্যতে অনুরাগঞ্চোপৈতি তচ্চ বিষয় ইতি ব্যাখ্যেয়ং কিঞ্চ রক্ষাংসি ভীতানি ভয়াবিষ্টানি দিশো দ্রবন্তি গচ্ছন্তি তচ্চ স্থানে বিষয়ে সর্ব্বে নমস্যন্তি নমস্কুর্ব্বন্তি চ সিদ্ধসংঘাঃ সিদ্ধানাং সমুদয়াঃ কপিলাদীনাং তচ্চ স্থানে ॥ ৩৬ ॥

ভগবতো হর্ষাদিবিষয়ত্বে হেতুং দর্শয়তি কস্মাচ্চেতি। কস্মাচ্চ হেতোস্তে তুভ্যং ন নমেরন্ ন নমস্কুর্য্যুঃ হে মহাত্মন্ গরীয়সে গুরুতরায় যতো ব্রহ্মণো হিরণ্যগর্ভস্যাপ্যাদিকর্ত্তা কারণমতস্তস্মৈ আদিকর্ত্রে কথমেব তে ন নমস্কুর্য্যুঃ অতো হর্ষাদীনাং নমস্কারস্য চ স্থানং ত্বমর্হো বিষয় ইত্যর্থঃ হে অনন্ত দেবেশ হে জগন্নিবাস ত্বমক্ষরং তৎপরং যদ্বেদান্তেষু শ্রূয়-

## গিরিকৃত টীকা।

কিং তদর্জ্জুনো ভগবন্তং প্রতি সগদ্গদং বচনমুক্তবানিতি তদাহ অর্জ্জুন ইতি। বিষয়বিশেষণত্বমেব ব্যনক্তি যুক্ত ইতি। ভগবতো হর্ষাদিবিষয়ত্বং যুক্তমিত্যত্র হেতুমাহ যতইতি। তব প্রকীর্ত্ত্যা হর্ষবদনুরাগঞ্চ গচ্ছতি ভগদিত্যাহ তথেতি। তচ্চেত্যনুরাগগমনং। রক্ষঃসু জগদেকদেশভূতেষু প্রতিপক্ষেষু কুতো জগতো ভগবতি হর্ষানুরাগাবিত্যাশঙ্ক্যাহ কিঞ্চেতি। ইতশ্চ জগতো ভগবতি হর্ষাদিযুক্তমিত্যাহ সর্ব্ব ইতি ॥ ৩৬ ॥

উক্তেঽর্থে হেত্বর্থত্বেনোত্তরশ্লোকমবতারয়তি ভগবত ইতি। মহাত্মত্বমক্ষুদ্রচেতস্ত্বং। গুরুতরত্বান্নমস্কারাদিযোগ্যত্বমাহ গুরুতরায়েতি। তত্রৈব হেত্বন্তরমাহ যত ইতি মহাত্মত্বাদিহে-

## স্বামিকৃত টীকা।

স্থানে ইত্যেকাদশভিরর্জ্জুনোক্তিঃ। স্থানে ইত্যব্যয়ং যুক্তমিত্যস্মিন্নর্থে, হে হৃষীকেশ যতএবং ত্বমদ্ভুতপ্রভাবো ভক্তবৎসলশ্চাতস্তব প্রকীর্ত্ত্যা মাহাত্ম্যসংকীর্ত্তনেন ন কেবলমহমেব প্রহৃষ্যামীতি কিন্তু জগৎ সর্ব্বং প্রহৃষ্যতি প্রকর্ষেণ হর্ষং প্রাপ্নোতি এতৎ স্থানে যুক্তমিত্যর্থঃ, তথা জগদনুরজ্যতে চ অনুরাগমুপৈতি ইতি যৎ, তথা রক্ষাংসি ভীতানি সন্তি দিশঃ প্রতি দ্রবন্তি পলায়ন্তে ইতি যৎ, সর্ব্বে যোগতপোমন্ত্রাদিসিদ্ধানাং সঙ্ঘা নমস্যন্তি প্রণমন্তীতি যৎ এতচ্চ স্থানে যুক্তমেব ন চিত্রমিত্যর্থঃ ॥ ৩৬ ॥

**কস্মাচ্চ তে ন নমেরন্মহাত্মন্ গরীয়সে ব্রহ্মণোঽপ্যাদিকর্ত্রে।**
**অনন্ত দেবেশ জগন্নিবাস ত্বমক্ষরং সদসত্তৎপরং যৎ ॥ ৩৭ ॥**
**ত্বমাদিদেবঃ পুরুষঃ পুরাণস্ত্বমস্য বিশ্বস্য পরং নিধানম্।**
**বেত্তাসি বেদ্যঞ্চ পরঞ্চ ধাম ত্বয়া ততং বিশ্বমনন্তরূপ ॥ ৩৮ ॥**

## শাঙ্করভাষ্যম্।

তে কিং তৎ সদসৎ যৎ বিদ্যমানং তৎসৎ অসচ্চ যৎ নাস্তীতি বুদ্ধিস্তে উপাধানানভূতে সদসতী যস্যাক্ষরস্য যদ্দ্বারেণ সদসদিত্যুপচর্য্যতে পরমার্থতস্তু সদসতঃ পরং তৎ যদক্ষরং বেদবিদো বদন্তি তত্ত্বমেব নান্যদিত্যভিপ্রায়ঃ ॥ ৩৭ ॥

পুনরপি স্তৌতি ত্বমিতি। ত্বমাদিদেবো জগতঃ স্রষ্টৃত্বাৎ পুরুষঃ পুরি শয়নাৎ পুরাণশ্চিরন্তনস্ত্বমেবাস্য বিশ্বস্য পরং প্রকৃষ্টং নিধানং নিধীয়তেঽস্মিন্ জগৎ সর্ব্বং মহাপ্রলয়াদাবিতি কিঞ্চ বেত্তাসি বেদিতাসি সর্ব্বস্যৈব বেদ্যজাতস্য যচ্চবেদ্যং বেদানার্হং তচ্চাসি পরঞ্চ ধাম পরমং পদং বৈষ্ণবং ত্বয়া ততং ব্যাপ্তং বিশ্বং সমস্তং হে অনন্তরূপ অন্তো ন বিদ্যতে তব রূপাণাং ॥ ৩৮ ॥

## গিরিকৃত টীকা।

তূনামুক্তানাং ফলমাহ অতইতি। তত্রৈব হেত্বন্তরাণি সূচযতি হে অনন্তেতি। অনবচ্ছিন্নত্বং সর্ব্বদেবনিয়ন্তৃত্বং সর্ব্বজগদাশ্রয়ত্বঞ্চ তব নমস্কারাদিযোগ্যত্বে কারণমিত্যর্থঃ। তত্রৈব হেত্বন্তরমাহ ত্বমিতি। তত্র মানমাহ যদিতি। কথমেকস্যৈব সদসদ্রূপত্বং তত্রাহ তে ইতি। কথং সতোঽসতশ্চাক্ষরং প্রত্যুপাধিত্বং তদাহ যদ্দ্বারেণেতি। তং পবং যদিত্যেতদ্ব্যাচষ্টে পবমার্থতস্ত্বিতি। অনন্তত্বাদিনা ভগবতো নমস্কাবাদিযোগ্যত্বমুক্তং ॥ ৩৭ ॥

সম্প্রতি জগৎস্রষ্টৃত্বাদিনাপি তদ্‌যোগ্যত্বমস্তীতি স্তুতিদ্বাবা দর্শযতি পুনরপীতি। জগতঃ স্রষ্টা পুরুষো হিরণ্যগর্ভ ইতি পক্ষং প্রত্যাহ পুবাণ ইতি। স্রষ্টৃত্বং নিমিত্তমেবেতি তটস্থেশ্বরবাদিনস্তান্ প্রত্যুক্তং ত্বমেবেতি। মহাপ্রলয়াদাবিত্যাদিপদমবান্তরপ্রলয়ার্থং। ঈশ্বর-

## স্বামিকৃত টীকা।

তত্র হেতুমাহ কস্মাদিতি। হে মহাত্মন্ হে অনন্ত হে দেবেশ হে জগন্নিবাস কস্মাদ্ধেতোস্তে তুভ্যং ন নমেরন্ ন নমস্কারং কুর্য্যুঃ, কথংভূতায় ব্রহ্মণোঽপি গরীয়সে গুরুতরায় আদিকর্ত্রে চ ব্রহ্মণোঽপি জনকায়, কিঞ্চ সদ্ব্যক্তং অসদব্যক্তঞ্চ তাভ্যাং পরং মূলকাবণং যদক্ষরং ব্রহ্ম তচ্চ ত্বমেব, এতৈর্নবভির্হেতুভিস্ত্বাং সর্ব্বে নমস্যন্তীতি ন চিত্রমিত্যর্থঃ ॥ ৩৭ ॥

কিঞ্চ ত্বমাদিদেব ইতি। ত্বং আদিদেবো দেবানামাদিঃ যতঃ পুরাণোঽনাদিঃ পুরুষস্ত্বং অতএব ত্বমস্য বিশ্বস্য পরং নিধানং লয়স্থানং, তথা বিশ্বস্য বেত্তা জ্ঞাতা ত্বং যচ্চ বেদ্যং

বায়ুর্যমোঽগ্নির্বরুণঃ শশাঙ্কঃ প্রজাপতিস্ত্বং প্রপিতামহশ্চ।
নমো নমস্তেঽস্তু সহস্রকৃত্বঃ পুনশ্চ ভূয়োঽপি নমো নমস্তে॥ ৩৯॥

## শাঙ্করভাষ্যম্।

কিঞ্চ বায়ুরিতি। বায়ুস্ত্বং যমশ্চাগ্নির্বরুণোঽপাং পতিঃ শশাঙ্কশ্চন্দ্রমাঃ প্রজাপতিস্ত্বং কশ্যপাদিঃ প্রপিতামহশ্চ পিতামহস্যাপি পিতা প্রপিতামহো ব্রহ্মণোঽপি পিতা ইত্যর্থঃ নমো নমস্তে তুভ্যমস্তু সহস্রকৃত্বঃ পুনশ্চ ভূয়োঽপি নমো নমস্তে বহুশো নমস্কারক্রিয়াভ্যাসাবৃত্তিগণনং কৃত্বস্থুচোচ্যতে পুনশ্চ ভূয়োঽপীতি শ্রদ্ধাভক্ত্যতিশয়াদপরিতোষমাত্মনো দর্শয়তি॥ ৩৯॥

## গিরিকৃত টীকা।

স্তোভয়থা কারণত্বং সর্ব্বজ্ঞত্বেন সাধয়তি কিঞ্চেতি। বেদ্যবেদিতৃভাবেন অদ্বৈতানুপপত্তিমাশঙ্ক্যাহ যচ্চেতি। মুক্ত্যাবলম্বনস্য ব্রহ্মণোঽর্থান্তরত্বং অশঙ্কিতোক্তং পরঞ্চেতি। যৎ পরমং পদং তদপি চ ত্বমেবেতি সম্বন্ধঃ। তস্য পূর্ণত্বমাহ ত্বয়েতি। ব্যাপ্যব্যাপকত্বেন ভেদং শঙ্কিত্বা কল্পিতত্বাত্তস্য মৈবমিত্যাহ অনন্তেতি॥ ৩৮॥

তস্য সর্ব্বাত্মত্বে হেত্বন্তরমাহ কিঞ্চেতি। কশ্যপাদিবিত্যাদিশব্দেন বিরাড়্দক্ষাদযো গৃহ্যন্তে। পিতামহো ব্রহ্মা তস্য পিতা সূত্রাত্মান্তর্যামী চেত্যাহ ব্রহ্মণোঽপীতি। সর্ব্বদেবতাত্মত্বমেবেত্যুক্তে ফলিতমাহ নম ইতি। সহস্রকৃত্ব ইতি কৃত্বস্থচো বিবক্ষিতমর্থমাহ বহুশ ইতি। পুনরুক্তিতাৎপর্য্যমাহ পুনশ্চেতি। শ্রদ্ধাভক্ত্যোবতিশযাৎ কৃতেঽপি নমস্কারে পরিতোষাভাবো বুদ্ধেরাত্মনোঽলংপ্রত্যয়রাহিত্যং তদ্দর্শনার্থং পুনরুক্তিরিত্যর্থঃ॥ ৩৯॥

বিদ্যান্তরেণ ভগবন্তং স্তুত্যা নমস্কুর্ব্বন্নভিমুখীকরোতি তথেতি। যস্যাং দিশি সবিতোদেতি সা পূর্ব্বা দিগুচ্যতে তস্যাং ব্যবস্থিতং সর্ব্বং ত্বমেব তস্মৈ তে তুভ্যং নমোঽস্ত্বিত্যাহ নম ইতি। অথশব্দঃ সমুচ্চয়ে। পশ্চাদপি স্থিতং সর্ব্বং ত্বমেব তস্মৈ তে তুভ্যং নমোঽস্ত্বিত্যাহ

## স্বামিকৃত টীকা।

বস্তুজাতং পরঞ্চ ধাম বৈষ্ণবং পদং তদপি ত্বমেবাসি অতএব হে অনন্তরূপ ত্বয়ৈবেদং বিশ্বং ততং ব্যাপ্তং, এতৈশ্চ সপ্তভির্হেতুভিস্ত্বমেব নমস্কার্য্য ইত্যর্থঃ॥ ৩৮॥

ইতশ্চ সর্ব্বৈস্ত্বমেব নমস্কার্য্যঃ সর্ব্বদেবাত্মকত্বাদিতি স্তুবন্ স্বয়মপি নমস্করোতি বায়ুরিতি। বায়্বাদিরূপস্ত্বমিতি সর্ব্বদেবাত্মকত্বোপলক্ষণার্থমুক্তং প্রজাপতিঃ পিতামহস্তস্যাপি জনকত্বাৎ প্রপিতামহস্ত্বং অতস্তে তুভ্যং সহস্রশো নমোঽস্তু পুনঃ সহস্রকৃত্বো নমোঽস্তু ভূয়োঽপি পুনরপি সহস্রকৃত্বো নমো নম ইতি॥ ৩৯॥

ভক্তিশ্রদ্ধাদ্যাদরাতিশয়েন নমস্কারেষু তৃপ্তিমনধিগচ্ছন্ পুনরপি বহুশঃ প্রণমতি নম ইতি। হে সর্ব্ব সর্ব্বাত্মন্ সর্ব্বাসু দিক্ষু তুভ্যং নমোঽস্তু, সর্ব্বাত্মত্বমুপপাদয়ন্নাহ অনন্তং বীর্য্যং সামর্থ্যং

নমঃ পুরস্তাদথ পৃষ্ঠতস্তে নমোঽস্তু তে সর্ব্বতএব সর্ব্ব।
অনন্তবীর্য্যামিতবিক্রমস্ত্বং সর্ব্বং সমাপ্নোষি ততোঽসি সর্ব্বঃ॥ ৪০
সখেতি মত্বা প্রসভং যদুক্তং হে কৃষ্ণ হে যাদব হে সখেতি।
অজানতা মহিমানং তবেদং ময়া প্রমাদাৎ প্রণয়েন বাপি।। ৪১ ॥

## শাঙ্করভাষ্যম্।

তথা নমঃ পুরস্তাদিতি। নমঃ পুরস্তাৎ পূর্ব্বস্যাং দিশি তুভ্যমথ পৃষ্ঠতোঽপি চ নমোঽস্তু তে সর্ব্বতএব সর্ব্বাস্থ দিক্ষু সর্ব্বত্র স্থিতায় হে সর্ব্ব, অনন্তবীর্য্যামিতবিক্রমঃ অনন্তং বীর্য্যমস্য অমিতো বিক্রমোঽস্য বীর্য্যং সামর্থ্যং বিক্রমঃ পরাক্রমঃ বীর্য্যবানপি কশ্চিৎ শস্ত্রাদিবিষয়ে ন পরাক্রমতে মন্দপরাক্রমো বা ত্বং তু অনন্তবীর্য্যোঽমিতবিক্রমশ্চেত্যনন্তবীর্য্যামিতবিক্রমঃ সর্ব্বং সমস্তং জগৎ প্রাপ্নোষি সম্যগেকেনাত্মনা ব্যাপ্নোষি অতস্তস্মাদসি ভবসি সর্ব্বস্ত্বয়া বিনাভূতং ন কিঞ্চিদস্তীত্যর্থঃ॥ ৪০ ॥

যতোঽহং ত্বন্মাহাত্ম্যাপরিজ্ঞানাদপরাধাদ্ধেতোঃ সখেতি সখা সমানবয়া ইতি মত্বা জ্ঞাত্বা বিপরীতবুদ্ধ্যা প্রসভমভিভূয় প্রসহ্য যদুক্তং হে কৃষ্ণ হে যাদব হে সখেতি চ অজানতা

---

## গিরিকৃত টীকা।

অথেতি। কিং বহুনা যাবন্ত্যো দিশস্তত্র সর্ব্বত্র যদ্বর্ত্ততে, তদশেষং ত্বমেব তস্মৈ তুভ্যং প্রহ্বীভাবঃ স্যাদিত্যাহ নমোঽস্ত্বিতি। ফলিতং সর্ব্বাত্মত্বং সূচয়তি হে সর্ব্বেতি। বীর্য্যবিক্রময়োর্ন পৌনরুক্ত্যমিত্যাহ বীর্য্যমিত্যাদিনা। বীর্য্যবতো বিক্রমাব্যভিচারাদর্থপৌনরুক্ত্যমাশঙ্ক্যাহ বীর্য্যবানিতি। ভগবতি লোকতো বিশেষমাহ ত্বং ত্বিতি। উক্তং সর্ব্বাত্মত্বং প্রপঞ্চয়তি সর্ব্বমিতি। সপ্রপঞ্চত্বং বারয়তি ত্বয়েতি।। ৪০ ।।

অজ্ঞাননিমিত্তমপরাধং ক্ষময়তি যত ইতি। ইদংশব্দার্থমাহ বিশ্বরূমিতি। ন হীদমিত্যস্য মহিমানমিত্যস্য ত্বসামানাধিকরণ্যং লিঙ্গব্যত্যয়াদিত্যাহ তবেতি। পাঠান্তরসম্ভাবনায়াং সামানাধিকরণ্যোপপত্তিমাহ তবেত্যাদিনা যদুক্তবানস্মি তদহং ক্ষাময়ে ত্বামিতি সম্বন্ধঃ॥ ৪১ ॥

## স্বামিকৃত টীকা।

যস্য তথা অমিতো বিক্রমঃ পরাক্রমো যস্য সএবংভূত স্ত্বং সর্ব্বং বিশ্বং সম্যগন্তর্বহিশ্চ সমাপ্নোষি ব্যাপ্নোষি স্বর্ণমিব কনককুণ্ডলাদি স্বকার্য্যং ব্যাপ্য বর্ত্তসে ততঃ সর্ব্বস্বরূপোঽসি॥ ৪০॥

ইদানীং ভগবন্তং ক্ষমাপয়তি সখেতি দ্বাভ্যাং। ত্বাং প্রাকৃতঃ সখেত্যেবং মত্বা প্রসভং হঠাৎ তিরস্কারেণ যদুক্তং তৎ ক্ষাময়ে ত্বামিত্যুত্তরে শ্বান্বয়ঃ, কিং তৎ, হে কৃষ্ণ হে যাদব হে

যচ্চাবহাসার্থমসৎকৃতোঽসি বিহারশয্যাসনভোজনেষু।
একোঽথবাপ্যচ্যুত তৎসমক্ষং তৎ ক্ষাময়ে ত্বামহমপ্রমেয়ম্ ॥ ৪২ ॥

## শাঙ্করভাষ্যম্।

অজ্ঞানিনা মূঢ়েন কিমজানতেত্যাহ। মহিমানং মাহাত্ম্যং তদেবমীশ্বরস্য বিশ্বরূপং তবেদং মহিমানমজানতেতি বৈয়ধিকরণ্যেন সম্বন্ধস্তবেমমিতি পাঠো যদ্যস্তি তদা সামানাধিকরণ্যমেব ময়া প্রমাদাৎ বিক্ষিপ্তচিত্ততয়া প্রণয়েন বাপি প্রণয়ো নাম স্নেহস্তন্নিমিত্তো বিশ্রম্ভস্তেনাপি কারণেন যদুক্তবানস্মি ॥ ৪১ ॥

যচ্চেতি। যচ্চ অবহাসার্থং পরিহাসপ্রয়োজনায় অসৎকৃতঃ পরিভূতোঽসি ভবসি ক্ক চ বিহারশয্যাসনভোজনেষু বিহরণং বিহারঃ পাদব্যায়ামঃ শয়নং শয্যা আসনং আস্থায়িকা ভোজনমদনমিত্যেতেষু বিহারশয্যাসনভোজনেষু একঃ পরোক্ষঃ সন্ অসৎকৃতোঽসি পরিভূতোঽসি অথবা হে অচ্যুত তৎসমক্ষং তচ্ছব্দঃ ক্রিয়াবিশেষণার্থং প্রত্যক্ষং বা অসৎকৃতোঽসি তৎসর্ব্বমপরাধজাতং ক্ষাময়ে ক্ষমাং কারয়ে ত্বামহমপ্রমেয়ং প্রমাণাতীতঃ যতস্ত্বং ॥ ৪২ ॥

## গিরিকৃত টীকা।

যদযুক্তমুক্তং তৎক্ষন্তব্যমিত্যেব ন কিন্তু যৎপরীহাসার্থং ক্রীড়াদিষু ত্বয়ি তিরস্করণং কৃতং তদপি সোঢ়ব্যমিত্যাহ যচ্চেতি। বিহরণং ক্রীড়া ব্যায়ামো বা শয়নং তল্পাদিকং আসনং আস্থায়িকা সিংহাসনাদেরুপলক্ষণমেতেষু বিষয়ভূতেষ্বিতি যাবৎ। একশব্দো রহসি স্থিতমেকাকিনং কথয়তীত্যাহ পরোক্ষঃ সন্নিতি। প্রত্যক্ষং পরোক্ষং বা তদসৎকরণং পরিভবনং যথাস্যাত্তথা যন্ময়া ত্বমসৎকৃতোঽসি তৎ সর্ব্বমিতি যোজনামঙ্গীকৃত্যাহ তচ্ছব্দ ইতি। ক্ষমা কারয়িতব্যেত্যত্রাপবিমিতত্বং হেতুমাহ অপ্রমেয়মিতি। বাচনিকং মদীয়মপরাধজাতং ত্বয়া ক্ষন্তব্যমিত্যুক্তং ইদানীং মদীয়োঽপরাধো ন ত্বয়া গ্রহীতব্যো গৃহীতোঽপি সোঢ়ব্য ইত্যাহ যত ইতি ॥ ৪২ ॥

গুণাধিক্যাৎ পূজার্হত্বং ধর্ম্মাত্মজ্ঞানসংপ্রদায়প্রবর্ত্তকত্বেন শিক্ষয়িতৃত্বাৎ গুরুত্বং গুরূণামপি সূত্রাদীনাং গুরুত্বাদ্গরীয়স্ত্বং তদেব প্রশ্নদ্বারা সাধয়তি কস্মাদিতি ॥ ঈশ্বরান্তরং তুল্যং

## স্বামিকৃত টীকা।

সখেতি চ সন্ধিরার্ষঃ। প্রসভোক্তৌ হেতুঃ তব মহিমানমিদঞ্চ বিশ্বরূপমজানতা ময়া প্রমাদাৎ প্রণয়েন স্নেহেন বা যদুক্তমিতি ॥ ৪১ ॥

কিঞ্চ যচ্চেতি। হে অচ্যুত যচ্চ পরিহাসার্থং ক্রীড়াদিষু তিরস্কৃতোঽসি একঃ কেবলঃ সখীন্ বিনা রহসি স্থিত ইত্যর্থঃ অথবা তৎসমক্ষং তেষাং পরিহসতাং সখীনাং সমক্ষং পুরতোঽপি তৎসর্ব্বমপরাধজাতং ত্বামপ্রমেয়ং অচিন্ত্যপ্রভাবং ক্ষাময়ে ক্ষমাং কারয়ামি ॥ ৪২ ॥

পিতাসি লোকস্য চরাচরস্য ত্বমস্য পূজ্যশ্চ গুরুর্গরীয়ান্।
ন ত্বৎসমোঽস্ত্যভ্যধিকঃ কুতোঽন্যো লোকত্রয়েঽপ্যপ্রতিমপ্রভাব ॥৪৩॥
তস্মাৎ প্রণম্য প্রণিধায় কায়ং প্রসাদয়ে ত্বামহমীশমীড্যম্।
পিতেব পুত্রস্য সখেব সখ্যুঃ প্রিয়ঃ প্রিয়ায়ার্হসি দেব সোঢ়ুম্ ॥৪৪॥

## শাঙ্করভাষ্যম্।

পিতাসীতি। পিতাসি জনয়িতাসি লোকস্য প্রাণিজাতস্য চরাচরস্য স্থাবরজঙ্গমস্য ন কেবলং ত্বমস্য জগতঃ পিতা পূজ্যশ্চ পূজার্হো যতো গুরুর্গরীয়ান্ গুরুতরঃ কস্মাদ্ গুরুতরত্বমিত্যাহ ন চ ত্বৎসমস্ত্বত্তুল্যোঽন্যোঽস্তি ন হীশ্বরাদ্বয়ং সম্ভবত্যনেকেশ্বরত্বব্যবহারানুপপত্তেঃ ত্বৎসমএব তাবদন্যো ন সম্ভবতি কুতএবান্যোঽভ্যধিকঃ স্যাৎ কস্মাল্লোকত্রয়েঽপি সর্ব্বস্মিন্নপ্রতিমপ্রভাব প্রতিমীয়তে যয়া সা প্রতিমা ন বিদ্যতে প্রতিমা যস্য তব প্রভাবস্য স ত্বমপ্রতিমপ্রভাবঃ হে অপ্রতিমপ্রভাব নিরতিশয়প্রভাব ইত্যর্থঃ ॥ ৪৩ ॥

যতএবং তস্মাদিতি। তস্মাৎ প্রণম্য নমস্কৃত্য প্রণিধায় প্রকর্ষেণ নীচৈর্দ্ধৃত্বা কায়ং শরীরং প্রসাদয়ে প্রসাদং কারয়ে ত্বামহমীশমীশিতারমীড্যং স্তুত্যং ত্বং পুনঃ পুত্রস্যাপরাধং পিতা যথা ক্ষমতে সর্ব্বং সখা ইব সখ্যুরপরাধং যথা বা প্রিয়ঃ প্রিয়ায়া অপরাধং ক্ষমতে এবমর্হসি হে দেব সোঢ়ুং প্রসহিতুং ক্ষন্তুমিত্যর্থঃ ॥ ৪৪ ॥

## গিরিকৃত টীকা।

ভবিষ্যতীত্যাশঙ্ক্যাহ ন হীতি। ঈশ্বরভেদে প্রত্যেক্যং স্বাতন্ত্র্যাত্তদৈকমত্যে হেত্বভাবান্নানামতিত্বে চৈকস্য সিসৃক্ষায়ামন্যস্য সংজিহীর্ষাসম্ভবাদ্ব্যবহারলোপাদযুক্তমীশ্বরনানাত্বমিত্যর্থঃ। অভ্যধিকাসত্ত্বং কৈমুতিকন্যায়েন দর্শয়তি ত্বৎসম ইতি। তত্র হেতুমবতার্য্য ব্যাকরোতি অপ্রতিমেত্যাদিনা ॥ ৪৩ ॥

নিরতিশয়প্রভাবত্বং হেতুং কৃত্বাপ্রতিমেত্যাদিনা প্রসাদয়ে প্রণামপূর্ব্বকং ত্বামিত্যাহ যত ইতি। প্রসাদানন্তরং ভগবতা কর্ত্তব্যং প্রার্থয়তে ত্বং পুনরিতি। প্রিয় ইব প্রিয়ায়া ইতীবকারোঽনুষজ্যতে প্রিয়ায়ার্হসীতিচ্ছান্দসঃ সন্ধিঃ ক্ষন্তুং মদপরাধজাতমিতি শেষঃ ॥ ৪৪ ॥

## স্বামিকৃত টীকা।

অচিন্ত্যপ্রভাবত্বমেবাহ পিতেতি। ন বিদ্যতে প্রতিমা উপমা যস্য সোঽপ্রতিমস্তথাবিধঃ প্রভাবো যস্য তব হে অপ্রতিমপ্রভাব ত্বমস্য চরাচরস্য লোকস্য পিতা জনকোঽসি অতএব পূজ্যশ্চ গুরুশ্চ গুরোরপি গরীয়াংশ্চ গুরুতরঃ অতো লোকত্রয়েঽপি ত্বৎসমএব তাবদন্যো নাস্তি পরমেশ্বরাদ্দ্বিতীয়স্যাভাবাৎ ত্বত্তোঽধিকঃ পুনঃ কুতঃ স্যাৎ ॥ ৪৩ ॥

যস্মাদেবং তস্মাদিতি। তস্মাত্বামীশং জগৎ ঈড্যং প্রসাদয়ামি, কথং কায়ং প্রণিধায়

অদৃষ্টপূর্ব্বং হৃষিতোঽস্মি দৃষ্ট্বা ভয়েন চ প্রব্যথিতং মনো মে।
তদেব মে দর্শয় দেব রূপং প্রসীদ দেবেশ জগন্নিবাস ॥ ৪৫ ॥
কিরীটিনং গদিনং চক্রহস্তমিচ্ছামি ত্বাং দ্রষ্টুমহং তথৈব।
তেনৈব রূপেণ চতুর্ভুজেন সহস্রবাহো ভব বিশ্বমূর্ত্তে ॥ ৪৬ ॥

## শাঙ্করভাষ্যম্।

অদৃষ্টপূর্ব্বমিতি। অদৃষ্টপূর্ব্বং ন কদাচিদপি দৃষ্টপূর্ব্বমিদং বিশ্বরূপং তব ময়ান্যৈর্ব্বা তদহং দৃষ্ট্বা হৃষিতোঽস্মি ভয়েন চ প্রব্যথিতং মনো মেঽতস্তদেব মে মম দর্শয় হে দেব রূপং যন্মৎসখং প্রসীদ দেবেশ জগন্নিবাস জগতো নিবাসো জগন্নিবাস হে জগন্নিবাস ॥৪৫॥

কিঞ্চ কিরীটিনমিতি। কিরীটিনং কিরীটবন্তং তথা গদিনং গদাবন্তং চক্রহস্তমিচ্ছামি ত্বা প্রার্থয়ে ত্বাং দ্রষ্টুমহং তথৈব পূর্ব্ববদিত্যর্থঃ যতএবং তস্মাৎ তেনৈব রূপেণ বসুদেবপুত্র-রূপেণ চতুর্ভুজেন সহস্রবাহো বার্ত্তমানিকেন বিশ্বরূপেণ ভব বিশ্বমূর্ত্তে উপসংহৃত্য বিশ্ব-রূপং তেনৈব রূপেণ বসুদেবপুত্ররূপেণ ভবেত্যর্থঃ ॥ ৪৬ ॥

## গিরিকৃত টীকা।

হেতূক্তিপূর্ব্বং বিশ্বরূপোপসংহারং প্রার্থয়তে অদৃষ্টেতি। হৃষিতো হৃষ্টস্তুষ্ট ইতি যাবৎ ভয়েন তদ্ধেতুবিকৃতদর্শনেনেত্যর্থঃ ॥ ৪৫ ॥

তদেব দর্শয়েত্যুক্তং কিং তদিত্যপেক্ষায়ামাহ কিরীটিনমিতীতি। চক্রং হস্তে যস্য তমিতি ব্যুৎপত্তিং গৃহীত্বাহ চক্রেতি। মদীয়েচ্ছা ফলপর্য্যন্তা কর্ত্তব্যেত্যাহ যত ইতি। চতুর্ভুজত্বে কথং সহস্রবাহুত্বং তত্রাহ বার্ত্তমানিকেনেতি। সতি বিশ্বরূপে কথং পূর্ব্বরূপভাক্ত্বং তত্রাহ উপসংহৃত্যেতি ॥ ৪৬ ॥

## স্বামিকৃত টীকা।

দণ্ডবন্নিপত্য প্রণম্য প্রকর্ষেণ নত্বা, অতস্ত্বং মমাপরাধং সোঢ়ুং ক্ষন্তুমর্হসি কস্য ক ইব পুত্রস্যাপরাধং কৃপয়া পিতা যথা সহতে, সখ্যুর্মিত্রস্যাপরাধং সখা নিরুপাধিবন্ধুর্যথা সহতে, প্রিয়শ্চ প্রিয়ায় যস্যাপরাধং তৎপ্রিয়ার্থং যথা তদ্বৎ ॥ ৪৪ ॥

এবং ক্ষাময়িত্বা প্রার্থয়তে অদৃষ্টেতি দ্বাভ্যাং হে দেব পূর্ব্বমদৃষ্টং তব রূপং দৃষ্ট্বা হৃষিতো হৃষ্টোঽস্মি তথা ভয়েন চ মে মনঃ প্রব্যথিতং প্রচলিতং তস্মান্মম ব্যথানিবৃত্তয়ে তদেব রূপং দর্শয় হে দেবেশ হে জগন্নিবাস প্রসন্নো ভব ॥ ৪৫ ॥

তদেব রূপং বিশেষয়ন্নাহ কিরীটিনমিতি। কিরীটবন্তং গদাবন্তং চক্রহস্তঞ্চ ত্বাং দ্রষ্টুমি-চ্ছামি যথা পূর্ব্বং দৃষ্টোঽসি তথৈব অতঃ হে সহস্রবাহো হে বিশ্বমূর্ত্তে ইদং বিশ্বরূপং উপসং-হৃত্য তেনৈব কিরীটাদিযুক্তেন চতুর্ভুজেন রূপেণ ভব আবির্ভব, তদনেন শ্রীকৃষ্ণমর্জ্জুনঃ

শ্রীভগবানুবাচ—ময়া প্রসন্নেন তবার্জ্জুনেদং রূপং পরং দর্শিতমাত্মযোগাৎ।
তেজোময়ং বিশ্বমনন্তমাদ্যং যন্মে ত্বদন্যেন ন দৃষ্টপূর্ব্বম্ ॥ ৪৭ ॥
ন বেদযজ্ঞাধ্যয়নৈর্ন দানৈর্ন চ ক্রিয়াভির্ন তপোভিরুগ্রৈঃ।
এবংরূপঃ শক্যোঽহং নৃলোকে দ্রষ্টুং ত্বদন্যেন কুরুপ্রবীর ॥ ৪৮ ॥

## শাঙ্করভাষ্যম্।

অর্জ্জুনং ভীতমুপলভ্য উপসংহৃত্য বিশ্বরূপং প্রিয়বচনেনাশ্বাসয়ন্ শ্রীভগবান্ উবাচ ময়েতি। ময়া প্রসন্নেন প্রসাদো নাম ত্বয্যনুগ্রহবুদ্ধিস্তদ্বতা প্রসন্নেন ময়া তব হে অর্জ্জুন ইদং পরং রূপং বিশ্বরূপং দর্শিতমাত্মযোগাৎ আত্মনঐশ্বর্য্যস্য সামর্থ্যাত্তেজোময়ং তেজঃপ্রায়ং বিশ্বং সমস্তমনন্তং অন্তবর্হিতং আদৌ ভবমাদ্যং যদ্রূপং মে মম ত্বদন্যেন ত্বত্তোঽন্যেন কেনচিন্ন দৃষ্টপূর্ব্বং ॥ ৪৭ ॥

আত্মনো মম রূপদর্শনেন কৃতার্থ এব ত্বং সংবৃত্ত ইতি ততঃ স্তৌতি বেদেতি। ন বেদযজ্ঞাধ্যয়নৈর্ন দানৈশ্চতুর্ণামপি বেদনামধ্যয়নৈর্যজ্ঞাধ্যয়নৈশ্চ যথাবৎ বেদাধ্যায়নৈরেব যজ্ঞা-

## গিরিকৃত টীকা।

অর্জ্জুনেন স্থানে হৃষিকেশেত্যাদিনোক্তস্য ভগবতো বচনমবতারয়তি অর্জ্জুনমিতি। ভগবৎপ্রসাদৈকোপায়লভ্যং তদ্দর্শনমিত্যাশয়েনাহ ময়েতি ॥ ৪৭ ॥

তচ্ছব্দেন প্রকৃতং দর্শনং পরামৃশ্যতে বেদাধ্যয়নাৎ পৃথক্ যজ্ঞাধ্যয়নগ্রহণং পুনরুক্তেরযুক্তমিত্যাশঙ্ক্যাহ ন বেদেতি। ন চ বেদাধ্যয়নগ্রহণাদেব যজ্ঞবিজ্ঞানমপি গৃহীতমধ্য-

## স্বামিকৃত টীকা।

পূর্ব্বমপি কিরীটাদিযুক্তমেব পশ্যতীতি গম্যতে, যত্তু পূর্ব্বমুক্তং বিশ্বরূপদর্শনে কিরীটিনং গদিনং চক্রিণঞ্চ পশ্যামীতি তদ্বহুকিরীটাদ্যভিপ্রায়েণ, যদ্বা এতাবন্তং কালং যং ত্বাং কিরীটিনং গদিনং চক্রিণঞ্চ সুপ্রসন্নমপশ্যং তমেবেদানীং তেজোরাশিং দুর্নিবীক্ষ্যং পশ্যামীত্যেবমত্র বচনস্য ব্যক্তিরিত্যবিরোধঃ ॥ ৪৬।

এবং প্রার্থিতঃ সংভ্রমাশ্বাসয়ন্ শ্রীভগবানুবাচ ময়েতি ত্রিভিঃ। হে অর্জ্জুন কিমিতি ত্বং বিভেষি যতো ময়া প্রসন্নেন কৃপয়া তবেদং পরমুত্তমং রূপং দর্শিতং আত্মনো মম যোগাৎ যোগমায়াসামর্থ্যাৎ, পরত্বমেবাহ তেজোময়ং বিশ্বাত্মকমনন্তমাদ্যঞ্চ যন্মম রূপং ত্বদন্যেন ত্বাদৃশাদ্ভক্তাদন্যেন পূর্ব্বং ন দৃষ্টং। ৪৭।

এতদ্দর্শনমতিদুর্লভং লব্ধ্বা ত্বং কৃতার্থোঽসীত্যাহ ন বেদেতি। বেদাধ্যয়নব্যতিরেকেণ যজ্ঞাধ্যয়নস্যাভাবাৎ যজ্ঞশব্দেন যজ্ঞবিদ্যাঃ কল্পসূত্রাদ্যা লক্ষ্যন্তে বেদানাং যজ্ঞবিদ্যানাঞ্চাধ্যয়নৈরিত্যর্থঃ, ন চ দানৈঃ ন চ ক্রিয়াভিরগ্নিহোত্রাদিভি র্ন চোগ্রৈস্তপোভিশ্চান্দ্রায়ণা-

মা তে ব্যথা মা চ বিমূঢ়ভাবো দৃষ্ট্বা রূপং ঘোরমীদৃঙ্মমেদম্।
ব্যপেতভীঃ প্রীতমনাঃ পুনস্ত্বং তদেব মে রূপমিদং প্রপশ্য ॥ ৪৯ ॥
সঞ্জয় উবাচ—ইত্যর্জ্জুনং বাসুদেবস্তথোক্ত্বা স্বকং রূপং দর্শয়ামাস ভূয়ঃ।
আশ্বাসয়ামাস চ ভীতমেনং ভূত্বা পুনঃ সৌম্যবপুর্মহাত্মা ॥ ৫০ ॥

## শাঙ্করভাষ্যম্।

ধ্যয়নস্য সিদ্ধত্বাৎ পৃথগ্‌গ্রহণং যজ্ঞবিজ্ঞানস্যোপলক্ষণার্থং। তথা ন দানৈস্তুলাপুরুষাদি-ভির্ন চ ক্রিয়াভিরগ্নিহোত্রাদিভিঃ শ্রৌতাদিভির্নাপি তপোভিরুগ্রৈশ্চান্দ্রায়ণাদিভিরু গ্রৈর্ঘোরৈ এবংরূপঃ যথাদর্শিতং বিশ্বরূপং যস্য সোঽহমেবংরূপঃ শক্যো ন শক্যঃ অহংনৃ-লোকে মনুষ্যলোকে দ্রষ্টুং ত্বদন্যেন কুরুপ্রবীর ॥ ৪৮ ॥

মা তে ব্যথেতি। মা তে ব্যথা মাভূত্তে ভয়ং মা চ বিমূঢ়ভাবো বিমূঢ়চিত্ততা দৃষ্ট্বো-পলভ্য রূপং ঘোরমীদৃক্ যথাবদ্দর্শিতং মমেদং ব্যপেতভীর্বিগতভয়ং প্রীতমনাশ্চ সন্ পুন-র্ভূয়স্ত্বং তদেব চতুর্ভুজং রূপং শঙ্খচক্রগদাধরং তবেষ্টং রূপমিদং প্রপশ্য ॥ ৪৯ ॥

ইত্যর্জ্জনমিতি। ইত্যেবমর্জ্জুনং প্রতি বাসুদেবস্তথাভূতং বচনং উক্ত্বা স্বকং বসুদেব-গৃহে জাতং রূপং দর্শয়ামাস দর্শিতবান্ ভূয়ঃ পুনরাশ্বাসযামাস চাশ্বাসিতবান্ ভীতমেনং ভূত্বা পুনঃ সৌম্যবপুঃ প্রসন্নদেহো মহাত্মা ॥ ৫০ ॥

## গিরিকৃত টীকা।

য়নস্যার্থাববোধান্তত্বাদিতি বাচ্যং তস্যাক্ষরগ্রহণান্ততয়া বুদ্ধেঃ সাধিতত্বাদিতি ভাবঃ। শ্লোকপূবণার্থমসংহিতকবণং ত্বত্তোঽন্যেন মদনুগ্রহবিহীনেনেতি শেষঃ ॥ ৪৮ ॥

বিশ্বরূপদর্শনমেবং স্তত্বা যদ্যস্মাদ্দৃশ্যমানাদ্বিভেষি তর্হি তদুপসংহরামীত্যাহ মা তে ব্যথেতি। বহুতিথমনুভূতত্বমভিপ্রেত্য তদেবেত্যুক্তং ইদমিতি ॥ ৪৯ ॥

প্রত্যক্ষযোগ্যত্বং তদিদং বৃত্তং রাজ্ঞে সূতো নিবেদিতবানিত্যাহ সঞ্জয় ইতি। তথাভূতং বচনং ময়া প্রসন্নেনেত্যাদি চতুর্ভুজং রূপং কিং তস্য রূপস্য পরিচিতপূর্ব্বস্য প্রদর্শনেন প্রসন্নদেহত্বেন চার্জ্জুনং প্রত্যাশ্বাসনং ভগবতো যুক্তমিত্যত্র হেতুমাহ মহাত্মেতি ॥ ৫০ ॥

## স্বামিকৃত টীকা।

দিভিরেবং রূপোঽহং ত্বত্তোঽন্যেন মনুষ্যলোকে দ্রষ্টুং শক্যঃ অপি তু ত্বমেব কেবলং মৎ-প্রসাদেন দৃষ্ট্বা কৃতার্থোঽসি ॥ ৪৮ ॥

এবমপি চেত্তবেদং ঘোরং রূপং দৃষ্ট্বা ব্যথা ভবতি তর্হি তদেব রূপং দর্শয়ামীত্যাহ মা তে ইতি। ঈদৃক্ ঈদৃশং ঘোরং মদীয়ং রূপং দৃষ্ট্বা তে ব্যথা মাস্তু বিমূঢ়ভাবো বিমূঢ়ত্বঞ্চ মাস্তু বিগতভয়ঃ প্রীতমনাশ্চ সন্ পুনস্ত্বং তদেবেদং মম রূপং প্রকর্ষেণ পশ্য ॥ ৪৯ ॥

এবমুক্ত্বা প্রাক্তনমেব রূপং দর্শিতবানিতি সঞ্জয় উবাচ ইতীতি। বাসুদেবোঽর্জ্জুনমি-

অর্জ্জুন উবাচ—দৃষ্ট্বেদং মানুষং রূপং তব সৌম্যং জনার্দ্দন।
ইদানীমস্মি সংবৃত্তঃ সচেতাঃ প্রকৃতিং গতঃ॥ ৫১॥
শ্রীভগবানুবাচ—সুদুর্দ্দর্শমিদং রূপং দৃষ্টবানসি যন্মম।
দেবা অপ্যস্য রূপস্য নিত্যং দর্শনকাঙ্ক্ষিণঃ॥ ৫২॥
নাহং বেদৈর্ন তপসা ন দানেন ন চেজ্যয়া।
শক্য এবংবিধো দ্রষ্টুং দৃষ্টবানসি যন্মম॥ ৫৩॥

## শাঙ্করভাষ্যম্।

দৃষ্ট্বেদমিতি। দৃষ্ট্বেদং মানুষং রূপং মৎসখং প্রসন্নং তব সৌম্যং জনার্দ্দনেত্যর্দ্দতে-র্গতিকর্ম্মণোঽসুরাণাং দেবপ্রতিপক্ষজনানাং প্রাণবিয়োগজনরকাদ্যর্থপ্রয়োজনং গময়িতৃত্বাৎ সর্ব্বৈর্জনৈর্যাচ্যত অভ্যুদয়নিঃশ্রেয়সপুরুষার্থায় ইতি বা জনার্দ্দনঃ ইদানীমধুনাস্মি সংবৃত্তঃ সংজাতঃ কিং সচেতাঃ প্রসন্নচিত্তঃ প্রকৃতিং স্বভাবং গতশ্চাস্মি॥ ৫১॥

সুদুর্দ্দর্শমিতি। সুদুর্দ্দর্শং সুষ্ঠু দুঃখেন দর্শনমস্যেতি সুদুর্দ্দর্শমিদং রূপং দৃষ্টবানসি যন্মম দেবাদয়োঽপ্যস্য মম রূপস্য নিত্যং সর্ব্বদা দর্শনকাঙ্ক্ষিণো দর্শনেপ্সবোঽপি ন ত্বমিব দৃষ্টবন্তো ন দ্রক্ষ্যন্তি চেত্যভিপ্রায়ঃ॥ ৫২॥

কস্মাৎ নাহমিতি। নাহং বেদৈঃ ঋগ্‌যজুঃসামাথর্ব্ববেদৈশ্চতুর্ভিরপি ন তপসোগ্রেণ

## গিরিকৃত টীকা।

এবং ভগবদাশ্বাসিতঃ সন্নর্জ্জুনস্তং প্রত্যুক্তবানিত্যাহ অর্জ্জুন ইতি॥ ৫১॥

উপাস্যত্বায় বিশ্বরূপং স্তোতুং ভগবদুক্তিং উত্থাপয়তি ভগবানিতি। ত্বদ্ব্যতিরিক্তানা-মিদং রূপং দ্রষ্টুমশক্যমিত্যেতদ্বিশদয়তি দেবাদয় ইতি॥ ৫২॥

দর্শনোপায়াভাবাৎ দুর্দ্দর্শত্বমিতি শঙ্কতে কস্মাদিতি। বেদাদিষূপায়েষু সৎস্বপি ভগবা-

## স্বামিকৃত টীকা।

ত্যক্ত্বা যথাপূর্ব্বমাসীত্তথৈব কিরীটগদাদিযুক্তং চতুর্ভুজং স্বীয়ং রূপং পুনর্দ্দর্শয়ামাস, এনম র্জ্জুনং ভীতমেবং প্রসন্নবপুর্ভূত্বা পুনরপ্যাশ্বাসিতবান্ মহাত্মা বিশ্বরূপঃ কৃপালুরিতি বা॥৫০॥

ততো নির্ভয়ঃ সন্নর্জ্জুন উবাচ দৃষ্ট্বেদমিতি। সচেতাঃ প্রসন্নচিত্ত ইদানীং সংবৃত্তো জাতোঽস্মি প্রকৃতিং স্বাস্থ্যঞ্চ প্রাপ্তোঽস্মি শেষং স্পষ্টং॥ ৫১॥

স্বকৃতস্যানুগ্রহস্যাতিদুর্লভত্বং দর্শয়ন্ শ্রীভগবানুবাচ সুদুর্দ্দর্শমিতি। যন্মম বিশ্বরূপং দৃষ্টবানসি ইদং সুদুর্দ্দর্শমত্যন্তং দ্রষ্টুমশক্যং অতো দেবা অপ্যস্য নিত্যং সর্ব্বদা দর্শন-মিচ্ছন্তি কেবলং ন পুনরিদং পশ্যন্তি॥ ৫২॥

তত্র হেতুমাহ নাহমিতি। স্পষ্টার্থঃ॥ ৫৩॥

ভক্ত্যা ত্বনন্যয়া শক্যো অহমেবং বিধোঽর্জ্জুন।
জ্ঞাতুং দ্রষ্টুঞ্চ তত্ত্বেন প্রবেষ্টুঞ্চ পরন্তপ ।। ৫৪ ।
মৎকর্ম্মকৃন্মৎপরমো মদ্ভক্তঃ সঙ্গবর্জ্জিতঃ।
নির্ব্বৈরঃ সর্ব্বভূতেষু যঃ স মামেতি পাণ্ডব ।। ৫৫ ।।

## শাঙ্করভাষ্যম্।

চান্দ্রায়ণাদিনা ন দানেন গোভূহিরণ্যাদিনা ন চেজ্যয়া যজ্ঞেন পূজয়া বা শক্যঃ এবং বিধো যথাদর্শিতপ্রকারো দ্রষ্টুমন্তৈরশক্যো দৃষ্টবানসি মাং যথা ত্বং ॥ ৫৩ ॥

কথং পুনঃ শক্য ইত্যুচ্যতে ভক্ত্যেতি। ভক্ত্যা তু কিংবিশিষ্টয়েত্যাহ অনন্যয়া অপৃথগ্ভূতয়া ভগবতোঽন্যত্র পৃথক্ ন কদাচিদপি ভবতি সা ত্বনন্যা ভক্তিঃ সর্ব্বৈরপি করণৈর্বাসুদেবাদন্যন্ন লভ্যতে যয়া সানন্যা ভক্তিস্তয়া শক্যোঽহমেবংবিধো বিশ্বরূপপ্রকারো হে অর্জ্জুন জ্ঞাতুং শাস্ত্রতো ন কেবলং জ্ঞাতুং শাস্ত্রতো দ্রষ্টুঞ্চ সাক্ষাৎ কর্ত্তুং তত্ত্বেন তত্ত্বতঃ প্রবেষ্টুঞ্চ মোক্ষঞ্চ গন্তুং পরন্তপ ॥ ৫৪ ॥

অধুনা সর্ব্বস্য গীতাশাস্ত্রস্য সারভূতোঽর্থো নিঃশ্রেয়সার্থমনুষ্ঠেয়ত্বেন সমুচ্চিত্যোচ্যতে মৎকর্ম্মকৃদিতি। মৎকর্ম্মকৃন্মদর্থং কর্ম্ম মৎকর্ম্ম তৎ করোতীতি মৎকর্ম্মকৃৎ মৎপরমঃ করোতি ভৃত্যঃ স্বামিকর্ম্ম ন ত্বাত্মনঃ পরমা প্রেত্য গন্তব্যা গতিরিতি স্বামিনং প্রতিপদ্যতে

## গিরিকৃত টীকা।

মুক্তরূপো ন শক্যো দ্রষ্টুমিত্যাহ নাহমিতি। তর্হি দর্শনাযোগ্যত্বমিত্যাশঙ্ক্যাহ দৃষ্টবানিতি ॥ ৫৩ ॥

কেনোপায়েন তর্হি দ্রষ্টুং শক্যো ভগবানিতি পৃচ্ছতি কথমিতি। শাস্ত্রীয়জ্ঞানদ্বারা তদ্দর্শনং সফলং সিধ্যতীত্যাহ উচ্যত ইতি। ন ভক্তিমাত্রং তত্র হেতুরিতি তুশব্দার্থং স্ফুটয়তি কিমিত্যাদিনা। অনন্যভক্তিমেব ব্যনক্তি সর্ব্বৈরিতি ॥ ৫৪ ॥

ভক্ত্যাত্বিতি বিশেষণাদন্যেষামহেতুত্বমাশঙ্ক্যাহ অধুনেতি। সমুচ্চিত্য সংক্ষিপ্য পুঞ্জীকৃত্যেতি যাবৎ। মৎকর্ম্মকৃদিত্যুক্তে মৎপরমত্বং আর্থিকং ইতি পুনরুক্তিরিত্যাশঙ্ক্যাহ করোতীতি। ভগবানেব পরমা গতিরিতি নিশ্চয়বতস্তত্রৈব নিষ্ঠা সিধ্যতীত্যাহ তথেতি। ন তত্রৈব সর্ব্বপ্রকারৈর্ভজনং ধনাদিস্নেহাকৃষ্টত্বাদিত্যাশঙ্ক্যাহ সঙ্গেতি। দ্বেষপূর্ব্বকানি-

## স্বামিকৃত টীকা।

তর্হি কেনোপায়েন দ্রষ্টুং শক্যসে তত্রাহ ভক্ত্যা ত্বিতি। অনন্যয়া মদেকনিষ্ঠয়া ভক্ত্যা তু এবংভূতো বিশ্বরূপোঽহং তত্ত্বেন পরমার্থতো জ্ঞাতুং শক্যঃ শাস্ত্রতো দ্রষ্টুং প্রত্যক্ষতঃ প্রবেষ্টুঞ্চ তাদাত্ম্যেন শক্যো নান্যৈরুপায়ৈঃ ॥ ৫৪ ॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে
শ্রীকৃষ্ণার্জ্জুনসংবাদে
বিশ্বরূপদর্শনং নাম
একাদশোঽধ্যায়ঃ

---

## শাঙ্করভাষ্যম্ ।

অয়ন্তু মৎকর্ম্মকৃন্মামেব পরমাং গতিং প্রতিপদ্যতে ইতি মৎপরমোঽহং পরমা গতির্য্যস্য সোঽয়ং মৎপরমঃ তথা মদ্ভক্তঃ মামেব সর্ব্বপ্রকারৈঃ সর্ব্বাত্মনা সর্ব্বোৎসাহেন ভজত ইতি মদ্ভক্তঃ সঙ্গবর্জ্জিতঃ ধনমিত্রপুত্রকলত্রবন্ধুবর্গেষু সঙ্গবর্জ্জিতঃ সঙ্গঃ প্রীতিঃ স্নেহবর্জ্জিতো নির্ব্বৈরো নির্গতবৈরঃ অতঃ সর্ব্বভূতেষু শত্রুভাবরহিতঃ আত্মনোঽত্যন্তাপকারপ্রবৃত্তেষ্বপি য ঈদৃশো মদ্ভক্তঃ স মামেত্যহমেব তস্য পরা গতির্নান্যা কদাচিদ্ভবতীতি ॥ ৫৫ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে একাদশোঽধ্যায়ঃ ।

## গিরিকৃত টীকা ।

ইষ্টাচরণং বৈরং অনপকারিষু তদ্ভাবেঽপি ভবত্যেবাপকারিষ্বিতি শঙ্কিত্বাহ আত্মন ইতি । এতচ্চ সর্ব্বং সংক্ষিপ্যানুষ্ঠানার্থমুক্তমেবমনুতিষ্ঠতো ভগবৎপ্রাপ্তিরবশ্যম্ভাবিনীত্যুপসংহরতি অয়মিতি । তদেবং ভগবতো বিশ্বরূপস্য সর্ব্বজ্ঞস্য সর্ব্বেশ্বরস্য মৎকর্ম্মকৃদিত্যাদিন্যায়েন ক্রমমুক্তিফলমভিধ্যানমভিবদতা তৎপদবাচ্যোঽর্থো ব্যবস্থাপিতঃ ॥ ৫৫ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং একাদশোঽধ্যায়ঃ ।

## স্বামিকৃত টীকা ।

অতঃ সর্ব্বশাস্ত্রার্থসারং পরমরহস্যং শৃণ্বিত্যাহ মৎকর্ম্মকৃদিতি । মদর্থং কর্ম্ম করোতীতি মৎকর্ম্মকৃৎ অহমেব পরমঃ পুরুষার্থো যস্য ময্যেব ভক্ত আশ্রিতঃ পুত্রাদিষু সঙ্গবর্জ্জিতঃ নির্ব্বৈরশ্চ সর্ব্বভূতেষু এবম্ভূতো যঃ স মাং প্রাপ্নোতি নান্যঃ ইতি ।

দেবৈরপি সুদুর্দ্দর্শং তপোযজ্ঞাদিকোটিভিঃ ।
ভক্ত্যায় ভগবানেবং বিশ্বরূপমদর্শয়ৎ ॥ ৫৫ ॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং একাদশোঽধ্যায়ঃ ।

# শ্রীমদ্ভগবদ্গীতা।

## দ্বাদশোঽধ্যায়ঃ।

অর্জ্জুনউবাচ—এবং সততযুক্তা যে ভক্তাস্ত্বাং পর্য্যুপাসতে।
যে চাপ্যক্ষরমব্যক্তং তেষাং কে যোগবিত্তমাঃ ॥ ১ ॥

### শাঙ্করভাষ্যম্।

দ্বিতীয়প্রভৃতিষধ্যাযেযু বিভূত্যন্তেষু পবমাত্মনো ব্রহ্মণোঽক্ষবস্থ বিধ্বস্তসর্ব্ববিশেষণস্যোপাসনমুক্তং সর্ব্বযোগৈশ্বর্য্যসর্ব্বজ্ঞানশক্তিমৎসত্ত্বোপাধেরীশ্বরস্য তব চোপাসনং তত্র তত্রোক্তং বিশ্বরূপাধ্যায়ে তু ঐশ্বরমাদ্যং সমস্তজগদাত্মরূপং বিশ্বরূপং ত্বদীয়ং দর্শিতমুপাসনার্থমেব ত্বযা, তচ্চ দর্শযিত্বোক্তবানসি মৎকর্ম্মকৃদিত্যাদ্যতোঽনয়োরুভয়োঃ পক্ষযোর্ব্বিশিষ্টতববুভুৎসয়া ত্বাং পৃচ্ছামীতি অর্জ্জুন উবাচ এবমিতি। এবং সততযুক্তা নৈরন্তর্য্যেণ

---

### গিরিকৃত টীকা।

অশোচ্যানিত্যাদিষু বিভূত্যধ্যাযাবসানেষু অধ্যাযেষু নিরুপাধিকস্য ব্রহ্মণো জ্ঞেয়ত্বেনানুসন্ধানমুক্তমিতি বৃত্তং কীর্ত্তয়তি দ্বিতীয়েতি। অতিক্রান্তেষু তত্তদধ্যায়েষু সোপাধিকস্য ব্রহ্মণো ধ্যেয়ত্বেন প্রতিপাদনং কৃতমিত্যাহ সর্ব্বেতি। সর্ব্বস্যাপি প্রপঞ্চস্য যোগো ঘটনা জন্মস্থিতিভঙ্গপ্রবেশনিয়মনাখ্যা তত্রৈশ্বর্য্যং সামর্থ্যং তেন সর্ব্বত্র জ্ঞেয়ে প্রতিবন্ধবিধুরয়া জ্ঞানশক্ত্যা বিশিষ্টস্য সত্ত্বাত্মুপহিতস্য ভগবতো ধ্যানং তত্র তত্র প্রসঙ্গমাপদ্য মন্দমধ্যময়োরনুগ্রহার্থমুক্তমিত্যর্থঃ। একদেশে বৃত্তমনুদ্রবতি বিশ্বরূপেতি। অধ্যায়ান্তে ভগবদুপদেশমনুবদতি তচ্চেতি। অতীতানন্তবশ্লোকেনোক্তমর্থম্পরামৃশতি মৎকর্ম্মকৃদিতি। যথাধি-

### স্বামিকৃত টীকা।

নির্গুণোপাসনস্যৈবং সগুণোপাসনস্য চ। শ্রেয়ঃ কতবদিত্যেতন্নির্ণেতুং দ্বাদশোদ্যমঃ।
পূর্ব্বাধ্যায়ান্তে মৎকর্ম্মকৃন্মৎপরমো মদ্ভক্ত ইত্যেবং ভক্তিনিষ্ঠস্য শ্রেষ্ঠত্বমুক্তং কৌন্তেয় প্রতিজানীহীত্যাদিনা চ তত্র তস্যৈব শ্রেষ্ঠত্বং নির্ণীতং তথা তেষাং জ্ঞানী নিত্যযুক্ত একভক্তির্বিশিষ্যত ইত্যাদিনা সর্ব্বং জ্ঞানপ্লবেনৈব বৃজিনং সংভরিষ্যসীত্যাদিনা চ জ্ঞাননিষ্ঠস্য শ্রেষ্ঠত্বমুক্তং ত্রবমুভয়োঃ শ্রৈষ্ঠ্যবিশেষজিজ্ঞাসয়া ভগবন্তমর্জ্জুন উবাচ এবমিতি। এবং সর্ব্বকর্ম্মার্পণাদিনা সততযুক্তাস্তন্নিষ্ঠাঃ সন্তো যে ভক্তাস্ত্বাং বিশ্বরূপং সর্ব্বজ্ঞং সর্ব্বশক্তিং পর্য্যুপাসতে তেষামুভয়েষাং মধ্যে কেঽতিশয়েন যোগবিদোঽতিশ্রেষ্ঠা ইত্যর্থঃ ॥ ১ ॥

শ্রীভগবানুবাচ—ময্যাবেশ্য মনো যে মাং নিত্যযুক্তা উপাসতে।
শ্রদ্ধয়া পরয়োপেতাস্তে মে যুক্ততমা মতাঃ॥ ২॥

## শাঙ্করভাষ্যম্।

ভগবৎকর্ম্মাদৌ যথোক্তেঽর্থে সমাহিতাঃ সন্তঃ প্রবৃত্তা ইত্যর্থঃ যে ভক্তাঃ অনন্যশরণাঃ সন্তস্ত্বাং যথাদর্শিতবিশ্বরূপম্পর্য্যুপাসতে ধ্যায়ন্তি যে চাপ্যক্ষরমিতি যে চান্যেঽপি ত্যক্তসর্ব্বৈষণাঃ সন্ন্যস্তসর্ব্বকর্ম্মাণো যথাবিশেষিতং ব্রহ্মাক্ষরং নিরস্তসর্ব্বোপাধিত্বাদব্যক্তমকরণগোচরং যদ্ধি লোকে করণগোচরস্তদ্ব্যক্তমুচ্যতে অঞ্জের্ধাতোস্তৎকর্ম্মকত্বাদিদং ত্বক্ষরং তদ্বিপরীতং শিষ্টৈশ্চোচ্যমানৈর্ব্বিশেষণৈর্ব্বিশিষ্টং তদ্যে চাপি পর্য্যুপাসতে তেষামুভয়েষাং মধ্যে কে যোগবিত্তমাঃ কে অতিশয়েন যোগবিদ ইত্যর্থঃ॥ ১॥

শ্রীভগবানুবাচ। যে ত্বক্ষরোপাসকাঃ সম্যগদর্শিনো নিবৃত্তৈষণাস্তে তাবত্তিষ্ঠন্তু তান্ প্রতি যদ্বক্তব্যং তদুপরিষ্টাদ্বক্ষ্যামঃ যে ত্বিতরে ময়ীতি। ময়ি বিশ্বরূপে পরমেশ্বরে আবেশ্য

## গিরিকৃত টীকা।

কারং তারতম্যোপেতানি সাধনানি নিয়ন্তমধ্যায়ান্তরমবতারয়ন্নাদৌ প্রশ্নমুখাপয়তি অত ইতি সোপাধিকধ্যানস্য নিরুপাধিকজ্ঞানস্য চোক্তত্বাদিত্যর্থঃ। এবং শব্দার্থমুক্ত্বা তমনূদ্য সততযুক্তা ইতিভাগং বিভজতে এবমিতি। যে ভক্তা ইত্যনূদ্য ব্যাচষ্টে অনন্যেতি। মন্দমধ্যমাধিকারিণঃ সগুণশরণানুক্ত্বা নির্গুণনিষ্ঠানুত্তমাধিকারিণো নির্দ্দিশতি যে চেতি। যথাবিশেষিতমনির্দ্দেশ্যং সর্ব্বত্রগমচিন্ত্যং কূটস্থমিত্যাদিবক্ষ্যমাণবিশেষণবিশিষ্টমিত্যর্থঃ, ন ক্ষরত্যশ্নুতে বেত্যক্ষরং। অব্যক্তমিত্যেতদ্ব্যাচষ্টে নিরস্তেতি। করণাগোচরত্বং ব্যতিরেকদ্বারা স্ফোরয়তি যদ্ধীতি। যথাবিশেষিতমিত্যুক্তং স্পষ্টয়তি শিষ্টৈশ্চেতি। পূর্ব্বার্দ্ধগতক্রিয়াপদস্যানুষঙ্গং সূচয়তি তদিতি। সর্ব্বে তাবদেতে যোগং সমাধিং বিন্দন্তীতি যোগবিদঃ। কে পুনঃ রতিশয়েনৈষাং মধ্যে যোগবিদো যোগিন ইতি পৃচ্ছতি কে অতিশয়েনেতি॥ ১॥

কিমনয়োর্যোগয়োর্মধ্যে সুশক্যো যোগো বা পৃচ্ছ্যতে কিম্বা সাক্ষান্মোক্ষহেতুরিতি বিকল্প্য ক্রমেণোত্তরং ভগবানুক্তবানিত্যাহ শ্রীভগবানিতি। যদি দ্বিতীয়স্তথাবিধযোগস্য বক্ষ্যমাণত্বাৎ প্রষ্টব্যতেত্যাহ যে ত্বক্ষরেতি। যদ্যাদ্যস্তত্রাহ যে ত্বিতি। সর্ব্বযোগেশ্বরাণাং সর্ব্বেষাং যোগমধিতিষ্ঠতাং যোগিনামিত্যর্থঃ। বিমুক্তা ত্যক্তা রাগাদ্যাখ্যা ক্লেশনিমিত্তভূতা তিমির-

## স্বামিকৃত টীকা।

তত্র প্রথমাঃ শ্রেষ্ঠা ইত্যুত্তরং শ্রীভগবানুবাচ ময়ীতি। ময়ি পরমেশ্বরে সর্ব্বজ্ঞত্বাদিগুণবিশিষ্টে মন আবেশ্য একাগ্রং কৃত্বা নিত্যযুক্তা মদর্থকর্ম্মানুষ্ঠানাদিনা মন্নিষ্ঠাঃ সন্তঃ শ্রেষ্ঠয়া শ্রদ্ধয়া যুক্তা যে মামারাধয়ন্তি তে যুক্ততমা মমাভিমতাঃ॥ ২॥

যে ত্বক্ষরমনির্দ্দেশ্যমব্যক্তং পর্য্যুপাসতে।
সর্ব্বত্রগমচিন্ত্যঞ্চ কূটস্থমচলং ধ্রুবম্ ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

সমাধায় মনঃ যে ভক্তাঃ সন্তো মাং সর্ব্বযোগেশ্বরাণামধীশ্বরং সর্ব্বজ্ঞং বিমুক্তরাগাদিক্লেশ-তিমিরদৃষ্টিং নিত্যযুক্তা অতীতানন্তরাধ্যায়ান্তোক্তশ্লোকার্থন্যায়েন সততযুক্তাঃ সন্ত উপাসতে শ্রদ্ধয়া পরয়া প্রকৃষ্টয়া উপেতাঃ মে মম মতাঃ অভিপ্রেতা যুক্ততমা ইতি নৈরন্তর্য্যেণ হি তে মচ্চিত্ততয়াহোরাত্রমতিবাহয়ন্তি অতো যুক্তং তান্ প্রতি যুক্ততমা ইতি বক্তুং ॥ ২ ॥

কিমিতরে যুক্ততমা ন ভবন্তি ন কিন্তু তান্ প্রতি যদ্বক্তব্যন্তৎ শৃণু যে তু অক্ষরমনির্দ্দে-শ্যমব্যক্তত্বাদশব্দগোচরমিতি ন নির্দ্দেষ্টুং শক্যতে অতোঽনির্দ্দেশ্যমব্যক্তং ন কে-নাপি প্রমাণেন ব্যজ্যত ইত্যব্যক্তং পর্য্যুপাসতে পরি সমন্তাদুপাসতে উপাসনং নাম যথা-

## গিরিকৃত টীকা।

শব্দিতানাদ্যজ্ঞানকৃতাদৃষ্টিরবিদ্যা মিথ্যাধীর্যস্য তমিতি বিশিনষ্টি বিমুক্তেতি। নিত্যযুক্তত্বং সাধয়তি অতীতেতি। তত্রোক্তো যোঽর্থো মৎকর্ম্মকৃদিত্যাদি তস্মিন্নিশ্চয়েনায়ো গমনন্তস্য নিয়মেনানুষ্ঠানং তেনেত্যর্থঃ। উপাসতে ময়ি স্মৃতিং সদা কুর্ব্বন্তীত্যর্থঃ। উক্তোপাস-কানাং যুক্ততমত্বং ব্যনক্তি নৈরন্তর্য্যেণেতি। তদেব স্ফুটয়তি অহোরাত্রমিতি। অহ্নি চ রাত্রৌ চাতিমাত্রমতিশয়েন মামেব বিষয়ান্তরবিমুখাশ্চিন্তয়ন্তীত্যর্থঃ ॥ ২ ॥

বক্ষ্যামস্তমুপরিষ্টাদিত্যুক্তং প্রশ্নপূর্ব্বকং প্রকটয়তি কিমিত্যাদিনা। পূর্ব্বেভ্যঃ ফলতো বিশেষার্থস্তুশব্দঃ। অব্যক্তত্বমনির্দ্দেশ্যত্বে হেতুরিত্যাহ অব্যক্তত্বাদিতি। যতোঽব্যক্ত-মতোঽনির্দ্দেশ্যমিতি যোজনা। নিরুপাধিকেঽক্ষরে কথমুপাসনেতি পৃচ্ছতি উপাসনমিতি। শাস্ত্রতোঽক্ষরং জ্ঞাত্বা তমুপেত্যাত্মত্বেনোপগম্যোপাসতে তথৈব তিষ্ঠন্তি পূর্ণশ্চিদেকতানমক্ষ-রমাত্মানমেব সদা ভাবয়ন্তীত্যেতদিহ বিবক্ষিতমিত্যাহ যথেতি। অব্যক্তত্বমেবাচিন্ত্যত্বেঽপি হেতুরিত্যাহ যদ্ধীতি। কূটস্থশব্দস্যোক্তার্থত্বং বৃদ্ধপ্রয়োগতঃ সাধয়তি কূটরূপমিতি। আদিপদমনৃতার্থং। প্রকৃতে কিন্তদনৃতং কূটশব্দিতমিত্যাহ তথাচেতি। উক্তনীত্যা কূট-শব্দস্যানৃতার্থত্বে যদনেকস্য সংসারস্য বীজমিরূপ্যমাণং নানাবিধদোষোপেতং তদ্ধীদং তর্হ্যব্যাকৃতং মায়ান্তু প্রকৃতিং মম মায়েত্যাদৌ মায়াশব্দিততয়া প্রসিদ্ধমবিদ্যাদি তদিহ

## স্বামিকৃত টীকা।

তর্হীতরে কিং ন শ্রেষ্ঠা ইত্যত আহ যে ত্বিতি দ্বাভ্যাং। যে ত্বক্ষরং পর্য্যুপাসতে ধ্যায়-ন্তি তেঽপি মামেব প্রাপ্নুবন্তীতি দ্বয়োরন্বয়ঃ। অক্ষরস্য লক্ষণমনির্দ্দেশ্যমিত্যাদি। অনি-র্দ্দেশ্যশব্দেন নির্দ্দেষ্টুমশক্যং যতোঽব্যক্তং রূপাদিহীনং সর্ব্বত্রগং সর্ব্বব্যাপি অব্যক্তত্বাদে-

সংনিয়ম্যেন্দ্রিয়গ্রামং সর্ব্বত্র সমবুদ্ধয়ঃ।
তে প্রাপ্নুবন্তি মামেব সর্ব্বভূতহিতে রতাঃ॥ ৪॥

## শাঙ্করভাষ্যম্।

শাস্ত্রমুপাস্যার্থস্য বিষয়ীকরণেন সামীপ্যমুপগম্য তৈলধারাবৎ সমানপ্রত্যয়প্রবাহেন দীর্ঘকালং যদাসনন্তদুপাসনমাচক্ষতে অক্ষরস্য বিশেষণমাহ সর্ব্বত্রগং ব্যোমবদ্ব্যাপ্য চিন্ত্যং চাব্যক্তত্বাদচিন্ত্যং যদ্ধি করণগোচরং তন্মনসাপি চিন্ত্যং তদ্বিপরীতত্বাদচিন্ত্যমক্ষরং কূটস্থং দৃশ্যমানগুণমন্তর্দ্দোষং বস্তু কূটরূপং কূটসাক্ষ্যমিত্যাদৌ কূটশব্দঃ প্রসিদ্ধো লোকে তথা চাবিদ্যাদ্যনেকসংসারবীজমন্তর্দ্দোষং মায়াপ্রকৃত্যাদিশব্দবাচ্যতয়া মায়ান্তু প্রকৃতিং বিদ্যান্মায়িনন্তু মহেশ্বরং মম মায়া দুরত্যয়েত্যাদৌ প্রসিদ্ধং যত্তৎ কূটং তস্মিন্ কূটে স্থিতং তদধ্যক্ষতয়া অথবা রাশিরিব স্থিতং কূটস্থমত এবাচলং যস্মাদচলং তস্মাৎ ধ্রুবং নিত্যমিত্যর্থঃ॥ ৩॥

সংনিয়ম্যেতি। সংনিয়ম্য সম্যক্ নিয়ম্য সংহৃত্য ইন্দ্রিয়গ্রামং ইন্দ্রিয়সমুদায়ং সর্ব্বত্র সর্ব্বস্মিন্ কালে সমবুদ্ধয়ঃ সমা তুল্যা বুদ্ধির্যেষামিষ্টানিষ্টপ্রাপ্তৌ তে সমবুদ্ধয়ঃ তে যে এবম্বিধাঃ তে প্রাপ্নুবন্তি মামেব সর্ব্বভূতহিতে রতাঃ ন তেষাং বক্তব্যং কিঞ্চিৎ মাং তে প্রাপ্নুবন্তি ইতি জ্ঞানিত্বাত্মৈব মে মতমিত্যুক্তত্বাৎ ন হি ভগবৎস্বরূপাণাং সতাং যুক্ততমত্বমযুক্ততমত্বং বা বাচ্যং॥ ৪॥

## গিরিকৃত টীকা।

কূটশব্দিতমিত্যর্থঃ। তত্রাবস্থানং কেন রূপেণেত্যাশঙ্ক্যায়ামাহ তদক্ষরতয়েতি। কূটস্থশব্দস্য নিষ্ক্রিয়ত্বমর্থান্তরমাহ অথবেতি। পূর্ব্বমুপজীব্যানন্তরবিশেষণদ্বয়প্রবৃত্তিমাহ অত এবেতি॥ ৩॥

কথমক্ষরমুপাসতে তদুপাসনে বা কিং স্যাদিতি তদাহ সন্নিয়ম্যেতি। তুল্যা হর্ষবিষাদরাগদ্বেষাদিরহিতা সম্যগজ্ঞানেনাজ্ঞানস্যাপনীতত্বাৎ, পরস্পরাপেক্ষয়োরসম্ভবস্বিবক্ষিত্বাহ তে য ইতি। সর্ব্বেভ্যো ভূতেভ্যো হিতে রতাঃ সর্ব্বেভ্যো হিতমেব চিন্তয়ন্তস্তদেবাচরন্তি জ্ঞানবতাং যথাজ্ঞানন্তগবৎপ্রাপ্তেরর্থসিদ্ধত্বাদনুবাদমাত্রমিত্যাহ নহিতি। জ্ঞানিনো ভগবৎপ্রাপ্তিঃ সিদ্ধৈবেত্যত্র প্রমাণমাহ জ্ঞানিত্বিতি। জ্ঞানবতান্তগবৎপ্রাপ্তৌ তএব যুক্ততমা বক্তব্যাঃ। কথং সগুণব্রহ্মোপাসকান্ যুক্ততমানুক্তবানসীত্যাশঙ্ক্যাহ ন হীতি॥ ৪॥

## স্বামিকৃত টীকা।

বাচিন্ত্যং কূটস্থং কূটে মায়াপ্রপঞ্চেঽধিষ্ঠানত্বেনাবস্থিতং অচলং স্পন্দনরহিতং অতএব ধ্রুবং নিত্যং বৃদ্ধ্যাদিরহিতং স্পষ্টমন্যৎ॥ ৩॥ ৪॥

ক্লেশোঽধিকতরস্তেষামব্যক্তাসক্তচেতসাম্।
অব্যক্তা হি গতির্দুঃখং দেহবদ্ভিরবাপ্যতে ॥৫॥
যে তু সর্ব্বাণি কর্ম্মাণি ময়ি সংন্যস্য মৎপরাঃ।
অনন্যেনৈব যোগেন মাং ধ্যায়ন্ত উপাসতে ॥৬॥

## শাঙ্করভাষ্যম্।

কিন্তু ক্লেশোঽধিকতরো যদ্যপি মৎকর্ম্মাদিপরাণাং ক্লেশোঽধিকতরস্ত্বক্ষরাত্মনাং পরমার্থ-দর্শিনাং দেহাভিমানাপরিত্যাগনিমিত্তঃ অব্যক্তাসক্তচেতসামব্যক্তে আসক্তং চিত্তং যেষাং তে অব্যক্তাসক্তচেতসস্তেষাং অব্যক্তাসক্তচেতসাং অব্যক্তা হি যস্মাদ্ গতিরক্ষরাত্মিকা দুঃখং দেহবদ্ভির্দেহাভিমানবদ্ভিরবাপ্যতে অতঃ ক্লেশোঽধিকতরঃ ॥ ৫ ॥

অক্ষরোপাসকানাং যদ্বর্ত্তনং তদুপরিষ্টাদ্বক্ষ্যামঃ যে ত্বিতি। যে তু সর্ব্বাণি কর্ম্মানি ময়ীশ্বরে সংন্যস্য মৎপরা অহং পরো যেষাং তে মৎপরাঃ সন্তঃ অনন্যেনৈব অবিদ্যমানমন্যদালম্বনং বিশ্বরূপং দেবমাত্মানং মুক্ত্বা যস্য সোঽনন্যস্তেনানন্যেনৈব কেবলেন যোগেন সমাধিনা মাং ধ্যায়ন্তশ্চিন্তয়ন্ত উপাসতে ॥ ৬ ॥

## গিরিকৃত টীকা।

সগুণোপাসকেঽপি কথমিত্যাহ কিন্ত্বিতি। অক্ষরোপাসনস্য দুষ্করত্বাদুপাসনান্তরস্য সুকরত্বাদিত্যভিপ্রেত্যাহ ক্লেশা ইতি। অধিকএবেতরেভ্যো দ্বৈতদর্শিভ্যঃ কামিভ্য ইতি শেষঃ। তেষাং ক্লেশস্যাধিকত্বে হেতুং মত্বা বিশিনষ্টি দেহেতি। অব্যক্তমত্যন্তসূক্ষ্মং নির্ব্বিশেষমক্ষরন্তস্মিন্নাসক্তমভিনিবিষ্টঞ্চেতো যেষান্তেষামিতি যাবৎ। অক্ষরোপাসকানাং ক্লেশস্যাধিকতরত্বে ভগবানেব হেতুমাহ অব্যক্তেতি। দুঃখং দুঃখেন কৃচ্ছ্রেণেতি যাবৎ, অতো দেহাভিমানত্যাগাদিত্যর্থঃ ॥ ৫ ॥

তে কথং বর্ত্ততে তত্রাহ অক্ষরেতি। যদ্যক্ষরোপাসকা মামেবাপ্নুবন্তীতি বিশিষ্যন্তে

## স্বামিকৃত টীকা।

নন্বু তেঽপি ত্বামেব প্রাপ্নুবন্তি তর্হীতরেষাং যুক্ততমত্বং কুত ইত্যপেক্ষায়াং ক্লেশাক্লেশকৃতং বিশেষমাহ ক্লেশ ইতি ত্রিভিঃ। অব্যক্তে নির্ব্বিশেষেঽক্ষরে আসক্তং চেতো যেষাং তেষাং ক্লেশোঽধিকতরঃ হি যস্মাদব্যক্তবিষয়া গতির্নিষ্ঠা দেহাভিমানির্ভির্দুঃখং যথা ভবতি এবমবাপ্যতে দেহাভিমানিনাং নিত্যং প্রত্যক্প্রবণত্বস্য দুর্ঘটত্বাদিতি ভাবঃ ॥ ৫ ॥

মদ্ভক্তানান্তু মৎপ্রসাদাদনায়াসেনৈব সিদ্ধির্ভবতীত্যাহ যে ত্বিতি দ্বাভ্যাং। যে ময়ি পরমেশ্বরে সর্ব্বাণি কর্ম্মাণি সংন্যস্য সমর্প্য মৎপরা ভূত্বা মাং ধ্যায়ন্তোঽনন্যেন ন বিদ্যতেঽন্যো ভজনীয়ো যস্মিংস্তেনৈবৈকান্তভক্তিযোগেনোপাসত ইত্যর্থঃ ॥ ৬ ॥

তেষামহং সমুদ্ধর্ত্তা মৃত্যুসংসারসাগরাৎ।
ভবামি ন চিরাৎ পার্থ ময্যাবেশিতচেতসাম্ ॥৭॥
ময্যেব মনআধৎস্ব ময়ি বুদ্ধিং নিবেশয়।
নিবসিষ্যসি ময্যেব অত ঊর্দ্ধং ন সংশয়ঃ ॥৮॥

## শাঙ্করভাষ্যম্।

তেষাং কিং তেষামিতি। তেষাং মদুপাসনৈকপরাণাং অহমীশ্বরঃ সমুদ্ধর্ত্তা কুত ইত্যাহ মৃত্যুসংসারসাগরাৎ মৃত্যুযুক্তং সংসারো মৃত্যুসংসাব সএব সাগববৎ সাগরো দুরুত্তরত্বাৎ তস্মান্মৃত্যুসংসারসাগরাদহং তেষাং সমুদ্ধর্ত্তা ভবামি ন চিরাৎ কিং তর্হি ক্ষিপ্রমেব হে পার্থ ময্যাবেশিত চেতসাং ময়ি বিশ্বরূপে আবেশিতং সমাহিতং চেতো যেষাং তে ময্যা-বেশিতচেতসস্তেষাং ॥ ৭ ॥

যত এবং তস্মাৎ ময্যেবেতি। ময্যেব বিশ্বরূপ ঈশ্বরে মনঃ সঙ্কল্পবিকল্পাত্মকমাধৎস্ব স্থাপয় ময্যেব ব্যবসায়ং কুর্ব্বতীং বুদ্ধিং আধৎস্ব নিবেশয় ততস্তেন কিং স্যাদিতি শৃণু নিবসি-ষ্যসি নিবৎস্যসি নিশ্চয়েন মদাত্মনা ময়ি নিবাসং করিষ্যস্যেব অতঃ শরীরপাতাদূর্দ্ধং ন সংশয়ঃ সংশয়োঽত্র ন কর্ত্তব্যঃ ॥৮॥

## গিরিকৃত টীকা।

তৎ কিং সগুণোপাসকাস্ত্বাং নাপ্নুবন্তি ন তেষামপি ক্রমেণ মৎপ্রাপ্তেরিত্যাহ যে ত্বিতি। তুশব্দঃ শঙ্কানিবৃত্ত্যর্থঃ ॥ ৬ ॥

তেষাম্ভগবদ্ধ্যায়িনাং কিং ফলতীতি শঙ্কামনুভাষ্য ফলমাহ তেষামিত্যাদিনা। সমুদ্ধর্ত্তা সম্যগূর্দ্ধং নেতা জ্ঞানাবষ্টম্ভদানেনেত্যর্থঃ, মৃত্যুরজ্ঞানং মরণাদ্যনর্থহেতুত্বাত্তেন কার্য্যতয়া যুক্তঃ সংসারঃ ॥ ৭ ॥

ভগবদুপাসনা বিশিষ্টফলেত্যেবং যতঃ সিদ্ধমতো ভগবন্নিষ্ঠায়াং প্রযতিতব্যমিত্যাহ যত ইতি। অসংহিতাকবণং শ্লোকপূরণার্থং। মনোবুদ্ধ্যোর্ভগবত্যবস্থাপনে প্রশ্নপূর্ব্বকং ফলমাহ তত ইতি ভগবন্নিষ্ঠস্য তৎপ্রাপ্তৌ প্রতিবন্ধাভাবং সূচয়তি সংশয়োঽত্রেতি ॥ ৮ ॥

## স্বামিকৃত টীকা।

এবং ময্যাবেশিতং চেতো যৈস্তেষাং মৃত্যুযুক্তাৎ সংসারসাগরাদহং সম্যগুদ্ধর্ত্তা অচি-রেণ ভবামি ॥ ৭ ॥

যস্মাদেবং তস্মান্ময্যেবেতি। ময্যেব সংকল্পাত্মকং মন আধৎস্ব স্থিরীকুরু, বুদ্ধি-মপি ব্যবসায়াত্মিকাং ময্যেব নিবেশয়, এবং কুর্ব্বন্মৎপ্রসাদেন লব্ধজ্ঞানঃ সন্নত উর্দ্ধং দেহান্তে ময্যেব নিবসিষ্যসি নিবৎস্যসি মদাত্মনা বাসং করিষ্যসি নাত্র সংশয়ঃ তথা চ শ্রুতিঃ দেহান্তে দেবঃ পরং ব্রহ্ম তারকং ব্যাচষ্টে ইতি ॥ ৮ ॥

অথ চিত্তং সমাধাতুং ন শক্নোষি ময়ি স্থিরম্।
অভ্যাসযোগেন ততো মামিচ্ছাপ্তুং ধনঞ্জয় ॥৯॥
অভ্যাসেঽপ্যসমর্থোঽসি মৎকর্ম্মপরমো ভব।
মদর্থমপি কর্ম্মাণি কুর্ব্বন্ সিদ্ধিমবাপ্স্যসি ॥১০॥

## শাঙ্করভাষ্যম্।

অথেতি অথ এবং যথাবোচাম তথা ময়ি চিত্তং সমাধাতুং স্থাপয়িতুং স্থিরমচলং কর্ত্তুং ন শক্নোষি চেত্ততঃ পশ্চাদভ্যাসযোগেন চিত্তস্যৈকস্মিন্নালম্বনে সর্ব্বতঃ সমাহৃত্য পুনঃ পুনঃ স্থাপনমভ্যাসস্তৎপূর্ব্বকো যোগঃ সমাধনলক্ষণস্তেনাভ্যাসযোগেন মাং বিশ্বরূপমিচ্ছ প্রার্থয়স্ব আপ্তুং প্রাপ্তুং হে ধনঞ্জয় ॥ ৯

অভ্যাসেঽপীতি অভ্যাসেঽপ্যসমর্থোঽসি অশক্তোঽসি তর্হি মৎকর্ম্মপরমো ভব মদর্থং কর্ম্ম মৎকর্ম্ম তৎপবমো ভব মৎকর্ম্মপ্রধান ইত্যর্থঃ অভ্যাসেন বিনা মদর্থমপি কর্ম্মাণি কেবলং কুর্ব্বন্ সিদ্ধিং সত্বশুদ্ধিং যোগজ্ঞানপ্রাপ্তিদ্বারেণাবাপ্স্যসি ॥ ১০ ॥

## গিরিকৃত টীকা।

তৎপ্রদর্শনপূর্ব্বকং ভগবৎপ্রাপ্তাবুপায়ান্তরমাহ অথেত্যাদিনা ॥ ৯ ॥

একমালম্বনং স্থূলং প্রতিমাদিসমাধানং ততোঽভ্যস্তবে বিশ্বরূপে চিত্তৈকাগ্র্যং দ্বৈতাভিনিবেশাদভ্যাসাধীনে যোগেঽপি সামর্থ্যাভাবে পুনরুপায়ান্তরমাহ অভ্যাসেঽপীতি। অভ্যাসযোগেন বিনা ভগবদর্থং কর্ম্মাণি কুর্ব্বাণস্য কিং স্যাদিত্যাশঙ্ক্যাহ আভ্যাসেনেতি। সিদ্ধিঃ ব্রহ্মভাবঃ, অপিবিহ অবধিসূচনার্থঃ ॥ ১০ ॥

## স্বামিকৃত টীকা।

অত্রাশক্তং প্রতি সুগমোপায়মাহ অথেতি। স্থিরং যথা ভবত্যেবং ময়ি চিত্তং ধারয়িতুং যদি শক্তো ন ভবসি তর্হি বিক্ষিপ্তং চিত্তং পুনং পুনঃ প্রত্যাহৃত্য মদনুস্মরণলক্ষণো যোঽভ্যাসযোগস্তেন মাং প্রাপ্তুমিচ্ছ প্রযত্নং কুরু ॥ ৯ ॥

যদি পুনর্নৈবং তত্রাহ অভ্যাস ইতি। যদি পুনরভ্যাসেঽপ্যশক্তোঽসি তর্হি মৎপ্রীত্যর্থানি যানি কর্ম্মাণি একাদশ্যুপবাসব্রতপূজাপরিচর্য্যানামসঙ্কীর্ত্তনাদীনি তদনুষ্ঠানমেব পরমং যস্য তাদৃশো ভব, এবংভূতানি কর্ম্মাণ্যপি মদর্থং কুর্ব্বন্ মোক্ষং প্রাপ্স্যসি ॥ ১০ ॥

অত্যন্তং ভগবদ্ধর্ম্মপরিনিষ্ঠায়ামপ্যশক্তস্য পক্ষান্তরমাহ অথেতি। যদ্যেতদপি কর্ত্তুং ন শক্নোষি তর্হি মদ্যোগং মদেকশরণত্বমাশ্রিতঃ সন্ সর্ব্বেষাং দৃষ্টাদৃষ্টার্থানামাবশ্যকানাঞ্চাগ্নিহোত্রাদিকর্ম্মণাং ফলানি যতচিত্তো ভূত্বা পরিত্যজ। এতদুক্তং ভবতি, ময়া তাবদীশ্বরাজ্ঞয়া যথাশক্তি কর্ম্মাণি কর্ত্তব্যানি ফলং তাবদ্দৃষ্টমদৃষ্টম্বা পরমেশ্বরাধীনমিত্যেবং ময়ি

অথৈতদপ্যশক্তোঽসি কর্ত্তুং মদ্‌যোগমাশ্রিতঃ
সর্ব্বকর্ম্মফলত্যাগং ততঃ কুরু যতাত্মবান্ ॥ ১১ ॥

## শাঙ্করভাষ্যম্ ।

অথৈতদিতি। অথ পুনরেতদপি যদুক্তং মৎকর্ম্মপরমত্বং তৎ কর্ত্তুমশক্তোঽসি মদ্‌যোগমাশ্রিতো ময়ি ক্রিয়মাণানি কর্ম্মাণি সন্ন্যস্য যৎ করণং তেষামনুষ্ঠানং মদ্‌যোগস্তমাশ্রিতঃ সন্ সর্ব্বকর্ম্মফলত্যাগং সর্ব্বেষাং কর্ম্মণাং ফলসংন্যাসং সর্ব্বকর্ম্মফলত্যাগং ততোঽনন্তরং কুরু যতাত্মবান্ সন্নিত্যর্থঃ ॥ ১১ ॥

## গিরিকৃত টীকা ।

ভগবৎকর্ম্মপরত্বমপ্যশক্যমিতি শঙ্কতে অথেতি। বহির্বিষয়াকৃষ্টচেতস্ত্বাদিত্যর্থঃ তর্হি ভগবৎপ্রাপ্ত্যুপায়ত্বেন সংযতচিত্তো ভূত্বা কর্ম্মফলসংন্যাসং কুর্ব্বিত্যাহ মদ্‌যোগমিতি ॥ ১১ ॥

উত্তরশ্লোকতাৎপর্য্যমাহ ইদানীমিতি। জ্ঞানং শব্দযুক্তিভ্যামাত্মনিশ্চয়ঃ, অভ্যাসো জ্ঞানার্থশ্রবণাভ্যাসো নিশ্চয়পূর্ব্বকো ধ্যানাভ্যাসো বা, তস্য বিশিষ্যমাণত্বে সাক্ষাৎকারো হেতুস্ত্যাগস্য বিশিষ্টত্বে হেতুমাহ এবমিতি, প্রাণাতু ভগবানিতি তস্মিন্ কর্ম্মসংন্যাসপূর্ব্বস্ত-মিত্যর্থঃ। পূর্ব্ববিশেষণবতো নিয়তচিত্তস্য পুংসো যথোক্তত্যাগাদিত্যর্থঃ। অনন্তরমেবে-ত্যুক্তং ব্যনক্তি ন ত্বিতি। নতু কর্ম্মফলত্যাগস্য সদ্যঃ শান্তিকরত্বে সম্যগ্‌ধীরেব তথেতি শ্রুতিস্মৃতিপ্রসিদ্ধির্বিরুধ্যেত তত্রাহ অজ্ঞস্যেতি। দীর্ঘেণ কালেনাদরনৈরন্তর্য্যানুষ্ঠিতা-দ্ধ্যানাদ্বস্তুসাক্ষাৎকারদ্বারা সংসারদুঃখোপশান্তেস্তথাবিধাদ্ধ্যানাত্ত্যাগস্য বিশিষ্টত্বোক্তেস্তদী-য়স্তুতিরত্রেষ্টেত্যাহ অতশ্চেতি। তত্র হেতুমাহ সম্পন্নেতি। সম্পনানি প্রাপ্তানি সাধনা-ন্তরোপাসনাদীনি তেষাং মধ্যে পূর্ব্বপূর্ব্বস্যানুষ্ঠানাশক্তাবুত্তরোত্তরস্য অনুষ্ঠেয়ত্বেনোপ-দেশত্যাগে চোপদেশপর্য্যবসানাদিত্যর্থঃ। ত্যাগে বিশিষ্টত্ববচনস্য কেন সাধর্ম্ম্যেণ তং প্রতি স্তুতিত্বমিতি পৃচ্ছতি কেনেতি। উত্তরমাহ যদেতি। অমৃতত্বমুক্তং অথ মর্ত্ত্যোঽমৃতো ভবতীতি শেষাদিতিশেষঃ। কামপ্রহাণস্যামৃতত্বার্থত্বমথাকাময়মান ইত্যাদাবপি সিদ্ধ-মিত্যাহ তদিতি। কামত্যাগস্যামৃতত্বহেতুত্বেঽপি কথং কর্ম্মফলত্যাগস্য তদ্ধেতুত্বমিত্যা-শঙ্ক্যাহ কামাশ্চেতি। কর্ম্মফলত্যাগাদেব শান্তিত্বে জ্ঞাননিষ্ঠোপেক্ষিতেত্যাশঙ্ক্যাহ তত্ত্যাগে চেতি। তথাপি কথমজ্ঞস্য কর্ম্মফলত্যাগস্তুতিরিত্যাশঙ্ক্যাহ ইতি সর্ব্বেতি। বিদ্যাবতস্ত্যা-গবদবিদ্বত্ত্যাগস্যাপি ত্যাগত্বাবিশেষাদ্বিশিষ্টত্বোক্তির্যুক্তেতি স্তুতিমুপসংহরতি ইতি তৎ-

## স্বামিকৃত টীকা ।

ভাবমারোপ্য ফলাসক্তিং পরিত্যজ্য বর্ত্তমানো মৎপ্রসাদেন কৃতার্থো ভবিষ্যসীতি তাৎ-পর্য্যং ॥ ১১ ॥

শ্রেয়ো হি জ্ঞানমভ্যাসাজ্‌জ্ঞানাদ্ধ্যানং বিশিষ্যতে।
ধ্যানাৎ কর্ম্মফলত্যাগস্ত্যাগাচ্ছান্তিরনন্তরম্ ॥ ১২ ॥

## শাঙ্করভাষ্যম্।

ইদানীং সর্ব্বকর্ম্মফলত্যাগং স্তৌতি শ্রেয়ো হি প্রশস্যতরং জ্ঞানং কস্মাদবিবেকপূর্ব্বকা-দভ্যাসাত্তস্মাদপি জ্ঞানাৎ জ্ঞানপূর্ব্বকং ধ্যানং বিশিষ্যতে জ্ঞানবতো ধ্যানাদপি কর্ম্মফল-ত্যাগো বিশিষ্যত ইতি অনুষজ্যতে এবং কর্ম্মফলত্যাগাৎ পূর্ব্বং বিশেষণবতঃ শান্তিরুপশমঃ সহেতুকস্য সংসারস্যানন্তরমেব স্যান্নতু কালান্তরমপেক্ষতে অজ্ঞস্য কর্ম্মণি প্রবৃত্তস্য পূর্ব্বো-পদিষ্টোপায়ানুষ্ঠানাশক্তৌ সর্ব্বকর্ম্মণাং ফলত্যাগঃ শ্রেয়ঃসাধনমুপদিষ্টং ন প্রথমমেবাতশ্চ শ্রেয়ো হি জ্ঞানমভ্যাসাদুত্তরবিশিষ্টত্বোপদেশেন সর্ব্বকর্ম্মফলত্যাগঃ স্তূয়তে সম্পন্ন-সাধনানুষ্ঠানাশক্তাবনুষ্ঠেয়ত্বেন শ্রুতত্বাৎ কেন সাধর্ম্মেণ স্তুতিঃ যদা সর্ব্বে প্রমুচ্যন্ত ইতি সর্ব্বকামপ্রহাণাদমৃতত্বমুক্তং তৎপ্রসিদ্ধং কামাশ্চ সর্ব্বে শ্রৌতস্মার্ত্তসর্ব্বকর্ম্মণাং ফলানি

## গিরিকৃত টীকা।

সমানন্যাদিতি। কিমর্থা স্তুতিরিত্যাশঙ্ক্য ত্যাগে রুচিমুৎপাদ্য প্রবর্ত্তয়িতুমিত্যাহ প্ররো-চনার্থেতি। ত্যাগস্তুতিং দৃষ্টান্তেন স্পষ্টয়তি যথেতি। ফলত্যাগং শ্রেয়োহেতুশ্চেৎ কর্ম্ম-ত্যাগাদপি ফলত্যাগসিদ্ধেরলং কর্ম্মানুষ্ঠানেনেত্যাশঙ্ক্যাহ এবং কর্ম্মেতি। ফলাভিলাষং ত্যক্ত্বা কর্ম্মানুষ্ঠানস্যার্পিতস্যেশ্বরে শ্রেয়োহেতুতয়া বিবক্ষিতত্বান্নানুষ্ঠানানর্থক্যমিত্যর্থঃ। সম্প্রত্যদ্বেষ্টেত্যাদ্যবতারয়িতুং বৃত্তং কীর্ত্তয়তি অত্র চেতি। তয়োশ্চেদাত্যন্তিকোঽভেদো ন তর্হি ঈশ্বরে মনঃসমাধানরূপযোগোঽত্যন্তাভেদে ধ্যাতৃধ্যেয়ত্বাভাবাৎ ন চাত্যন্তাভেদে কর্ম্মানুষ্ঠানং তৎফলত্যাগো বা অপরস্য তদ্যোগাদিত্যর্থঃ। ভগবদ্ভক্তিসামর্থ্যাদপি কর্ম্ম-যোগাদিনাভেদদৃষ্টিমতো ভবতীত্যাহ অথেতি। অক্ষরোপাসকস্য কর্ম্মযোগাযোগবৎ কর্ম্ম যোগিনোঽক্ষরোপাসনানুপপত্তিরপি দর্শিতেত্যাহ অথেতি, অক্ষরোপাসকাঃ সম্যগ্‌ধীনিষ্ঠা যথাজ্ঞানং ভগবন্তমেবাপ্নুবন্তি ন কর্ম্মিণঃ তথা চ কর্ম্মিণো নাক্ষরোপাসনসিদ্ধিরিত্যর্থঃ ইতশ্চাক্ষরোপাসনং কর্ম্মানুষ্ঠানং ন চৈকত্র যুক্তমিত্যাহ অক্ষরেতি। নন্বক্ষরোপাসকবদন্যেষা মপি ঈশ্বরাত্মভাবিশেষাৎ কুতস্তদধীনত্বং তত্রাহ যদীতি। কর্ম্মযোগস্যাক্ষরোপাস্তেশ্চ যুগপদে-

## স্বামিকৃত টীকা।

তমিমং ফলত্যাগং স্তৌতি শ্রেয় ইতি সমগ্‌জ্ঞানসহিতাদভ্যাসাদ্ব্যক্তিসহিতোপদে-শপূর্ব্বকং জ্ঞানং শ্রেষ্ঠং, তস্মাদপি তৎপূর্ব্বকধ্যানং বিশিষ্টং ততস্তু তং পশ্যতে নিষ্কলং ধ্যায়-মান ইতি শ্রুতেঃ তস্মাদপ্যুক্তলক্ষণঃ কর্ম্মফলত্যাগঃ শ্রেষ্ঠঃ, তস্মাদেবংভূতত্যাগাৎ কর্ম্মসু কৃতফলেষু চাসক্তিনিবৃত্ত্যা মৎপ্রসাদেন সমনন্তরমেব সংসারশান্তির্ভবতি ॥ ১২ ॥

অদ্বেষ্টা সর্ব্বভূতানাং মৈত্রঃ করুণএব চ।
নির্ম্মমো নিরহঙ্কারঃ সমদুঃখসুখঃ ক্ষমী ॥ ১৩ ॥

## শাঙ্করভাষ্যম্।

তত্ত্যাগে চ বিদুষো ধ্যাননিষ্ঠস্যানন্তরৈব শান্তিরিতি সর্ব্বকামত্যাগসামান্যমজ্ঞস্য সর্ব্বকর্ম্মফলত্যাগস্যাস্তীতি তৎসামান্যাৎ সর্ব্বকর্ম্মফলত্যাগস্তুতিরিয়ং প্ররোচনার্থং যথাগস্ত্যেন ব্রাহ্মণেন সমুদ্রঃ পীত ইতি ইদানীন্তনাঃ অপি ব্রাহ্মণা ব্রাহ্মণত্বসামান্যাৎ স্তূয়তে এবং কর্ম্মফলত্যাগাৎ কর্ম্মযোগস্য শ্রেয়ঃসাধনত্বমভিহিতং, অত্র চাত্মেশ্বরভেদমাশ্রিত্য বিশ্বরূপ ঈশ্বরে চেতঃসমাধানলক্ষণো যোগ উক্ত ঈশ্বরার্থং কর্ম্মানুষ্ঠানাদি চাথৈতদপ্যশক্তোঽসীত্যজ্ঞানকার্য্যসূচনান্নাভেদদর্শিনোঽক্ষরোপাসকস্য কর্ম্মযোগ উপপদ্যত ইতি দর্শয়তি তথা কর্ম্মযোগিনোঽক্ষরোপাসনানুপপত্তিং দর্শযতি ভগবান্ তে প্রাপ্নুবন্তি মামেবেত্যক্ষরোপাসকানাং কৈবল্যপ্রাপ্তৌ স্বাতন্ত্র্যমুক্ত্বেতরেষাং পারতন্ত্র্যমীশ্বরাধীনতাং দর্শিতবাংস্তেষামহং সমুদ্ধর্ত্তেতি যদি হীশ্বরস্যাত্মভূতাস্তে মতা অভেদদর্শিত্বাদক্ষরস্বরূপাএব তে ইতি সমুদ্ধরণকর্ম্মবচনমস্থান্ প্রত্যপেশলং স্যাদ্যস্মাচ্চার্জ্জুনস্যাত্যন্তমেব হিতৈষী ভগবাংস্তস্য সম্যগ্দর্শনান্বিতং কর্ম্মযোগং ভেদদৃষ্টিমন্তমেবোপদিশতি ন চাত্মানমীশ্বরং প্রমাণতো বুদ্ধ্বা কস্যচিদ্গুণভাবং জিগমিষতি কশ্চিৎ বিরোধাৎ তস্মাদক্ষরোপাসকানাং সম্যগ্দর্শননিষ্ঠানাং সন্ন্যাসিনাং ত্যক্তসর্ব্বৈষণানাং অদ্বেষ্টা সর্ব্বভূতানামিত্যাদি ধর্ম্মপুগং সাক্ষাদমৃতত্বকারণং বক্ষ্যামীতি প্রবর্ত্ততে ॥ ১২ ॥

অদ্বেষ্টেতি অদ্বেষ্টা সর্ব্বভূতানাং ন দ্বেষ্টাত্মনো দুঃখহেতুমপি ন কিঞ্চিদ্দ্বেষ্টি সর্ব্বাণি ভূতান্যাত্মত্বেন হি যস্মাৎ পশ্যতি মিত্রভাবো মৈত্রো মিত্রতয়া বা বর্ত্ততে ইতি মৈত্রঃ করুণ

## গিরিকৃত টীকা।

কত্রাযোগে হেতুত্বমাহ যস্মাচ্চেতি। কুরু কর্ম্মৈবেত্যাদাবিতি শেষঃ। কিঞ্চাক্ষরোপাসকো বাক্যাদীশ্বরমাত্মানঞ্চেতি নাসৌ ক্রিয়ায়াং গুণত্বেন কর্ত্তৃত্বমনুভবতি গুণত্বেশ্বরত্বয়োরেকত্র ব্যাঘাতাদতোঽপি নাক্ষরোপাসনং কর্ম্মানুষ্ঠানঞ্চৈকত্র যুক্তমিত্যাহ ন চেতি। অক্ষরোপাস্তিকর্ম্মযোগয়োরেকত্রাযোগে ফলিতমাহ তস্মাদিতি। অজ্ঞানাং কর্ম্মিণাং বক্ষ্যমাণকর্ম্মজাতস্য সাকল্যেনাযোগাদক্ষরনিষ্ঠানামেবেদমুচ্যতে অবিরুদ্ধাংশস্য তু সর্ব্বার্থত্বমিষ্টমেবেত্যর্থঃ ॥ ১২ ॥

সর্ব্বেষাং ভূতানাং মধ্যে যো দুঃখহেতুঃ তং বিদ্বানপি দ্বেষ্টৈবেত্যাশঙ্ক্যাহ আত্মন ইতি।

## স্বামিকৃত টীকা।

এবংভূতস্য ভক্তস্য ক্ষিপ্রমেব পরমেশ্বরপ্রসাদহেতূন্ ধর্ম্মানাহ অদ্বেষ্টেত্যষ্টভিঃ। সর্ব্বভূতানাং যথাযথমদ্বেষ্টা মৈত্রঃ করুণশ্চ উত্তমেষু দ্বেষশূন্যঃ সমেষু মিত্রতয়া বর্ত্ততে ইতি

সন্তুষ্টঃ সততং যোগী যতাত্মা দৃঢ়নিশ্চয়ঃ।
ময্যর্পিতমনোবুদ্ধির্যো মদ্ভক্তঃ স মে প্রিয়ঃ ॥ ১৪ ॥

## শাঙ্করভাষ্যম্।

এব চ করুণঃ কৃপা দুঃখিতেষু দয়া তদ্বান্ করুণঃ সর্ব্বভূতাভয়প্রদঃ সন্ন্যাসীত্যর্থঃ নির্মমো মমেতিপ্রত্যয়বর্জ্জিতো নিরহঙ্কারো নির্গতাহংপ্রত্যয়ঃ সমদুঃখেতি সমদুঃখসুখঃ সমে দুঃখসুখে দ্বেষরাগয়োরপ্রবর্ত্তকে যস্য সঃ সমদুঃখসুখঃ ক্ষমী ক্ষমাবানাক্রুষ্টোঽভিহতো বাঽবিক্রিয়এবাস্তে ॥ ১৩ ॥

সন্তুষ্ট ইতি। সন্তুষ্টঃ সততং নিত্যং দেহস্থিতিকারণস্য লাভে চ উৎপন্নালংপ্রত্যয়ঃ তথা গুণবল্লাভে বিপর্য্যয়ে চ সন্তুষ্টঃ সততং যোগী সমাহিতচিত্তঃ যতাত্মা সংযতস্বভাবো দৃঢ়নিশ্চয়ো দৃঢ়ঃ স্থিরো নিশ্চয়োঽধ্যবসায়ো যস্যাত্মতত্ত্ববিষয়ে স দৃঢ়নিশ্চয়ো ময্যর্পিতমনো-বুদ্ধিঃ সঙ্কল্পাত্মকং মনোঽধ্যবসায়লক্ষণা বুদ্ধিস্তে ময্যেবার্পিতে স্থাপিতে মনোবুদ্ধী যস্য সন্ন্যাসিনঃ স ময্যর্পিতমনোবুদ্ধির্য ঈদৃশো মদ্ভক্তঃ স মে প্রিয়ঃ ॥ ১৪ ॥

প্রিয়ো হি জ্ঞানিনোঽত্যর্থমহং স চ মম প্রিয় ইতি সপ্তমেঽধ্যায়ে সূচিতং তদিহ প্রপঞ্চ্যতে যস্মাদিতি। যস্মাৎ সন্ন্যাসিনো নোদ্বিজতে নোদ্বেগং গচ্ছতি ন সন্তপ্যতে ন সংক্ষুভ্যতে

---

## গিরিকৃত টীকা।

তত্র হেতুঃ সর্ব্বাণীতি। সর্ব্বভূতানামিত্যুভয়তঃ সম্বধ্যতে মম প্রত্যয়বর্জিতো দেহেঽপীতি শেষঃ ব্রতস্বাধ্যায়কৃতাহঙ্কারঃ। নিষ্ক্রান্তত্বমাহ নির্গতেতি ॥ ১৩ ॥

অক্ষরোপাসকস্যাজ্ঞানতো বিশেষণান্তরাণ্যাহ সন্তুষ্ট ইতি। সততমিতি সর্ব্বত্র সম্বধ্যতে কার্য্যকারণসংঘাতঃ স্বভাবশব্দার্থঃ স্থিরত্বং কুতর্কাদিনানভিভবনীয়ত্বং, মদ্ভক্তো মদ্ভজনপরো জ্ঞানবানিতি যাবৎ ॥ ১৪ ॥

জ্ঞানবতো ভগবৎপ্রিয়ত্বে প্রমাণমাহ প্রিয়ো হীতি। কিমর্থং তর্হি পুনরুচ্যতে তত্রাহ তদিতি। উদ্বেগাদিরাহিত্যমপি জ্ঞানবতো বিশেষণমিত্যাহ যস্মাদিতি। ন কেবল

## স্বামিকৃত টীকা।

মৈত্রঃ হীনেষু কৃপালুরিত্যর্থঃ, নির্মমো নিরহঙ্কারশ্চ কৃপালুত্বাদেবার্ন্তৈঃ সমে দুঃখসুখে যস্য সঃ ক্ষমী ক্ষমাশীলঃ ॥ ১৩ ॥

সন্তুষ্ট ইতি। সততং লাভেঽলাভে চ সন্তুষ্টঃ প্রসন্নচিত্তঃ যোগী অপ্রমত্তঃ যতাত্মা সংযতস্বভাবঃ দৃঢ়ো মদ্বিষয়ে নিশ্চয়ো যস্য ময্যর্পিতে মনোবুদ্ধী যেন এবংভূতো যো মদ্ভক্তঃ স মে প্রিয়ঃ ॥ ১৪ ॥

কিঞ্চ যস্মাদিতি। যস্মাৎ সকাশাৎ লোকো জনো নোদ্বিজতে ভয়শঙ্কয়া ক্ষোভং ন প্রাপ্নোতি যশ্চ লোকান্নোদ্বিজতে যশ্চ স্বাভাবিকৈর্হর্ষাদিভির্মুক্তঃ, তত্র হর্ষঃ স্বস্যেষ্টলাভে

যস্মান্নোদ্বিজতে লোকো লোকান্নোদ্বিজতে চ যঃ।
হর্ষামর্ষভয়োদ্বেগৈর্মুক্তো যঃ স চ মে প্রিয়ঃ ॥ ১৫ ॥
অনপেক্ষঃ শুচির্দক্ষ উদাসীনো গতব্যথঃ।
সর্ব্বারম্ভপরিত্যাগী যো মদ্ভক্তঃ স মে প্রিয়ঃ ॥ ১৬ ॥

## শাঙ্করভাষ্যম্।

লোকো লোকাৎ নোদ্বিজতে চ যঃ হর্ষামর্ষভয়োদ্বেগৈঃ হর্ষশ্চামর্ষশ্চ ভয়ঞ্চোদ্বেগশ্চ তৈঃ হর্ষামর্ষভয়োদ্বেগৈর্মুক্তো হর্ষঃ প্রিয়লাভে অন্তঃকরণস্যোৎকর্ষো রোমাঞ্চনাশ্রুপাতাদিলিঙ্গঃ তথা অমর্ষোঽভিলষিতপ্রতিঘাতে অসহিষ্ণুতা ভয়ন্ত্রাসঃ উদ্বেগ উদ্বিগ্নতা তৈর্মুক্তো য স চ মে প্রিয়ঃ ॥ ১৫ ॥

অনপেক্ষ ইতি। দেহেন্দ্রিয়বিষয়সম্বন্ধাদিষপেক্ষা যস্য নাস্তি স বিষয়েষ্বনপেক্ষে নিঃস্পৃহঃ শুচির্ব্বাহ্যাভ্যন্তরেণ চ শৌচেন সম্পন্নো দক্ষঃ প্রত্যুৎপন্নেষু কার্য্যেষু সদ্যো যথাবৎ প্রতিপত্তুং সমর্থঃ উদাসীন ইতি উদাসীনো ন কস্যচিন্মিত্রাদেঃ পক্ষং ভজতে যঃ স উদাসীনো যতির্গতব্যথো গতভয়ঃ সর্ব্বারম্ভপরিত্যাগী আরভ্যন্ত ইতি আরম্ভা ইহামুত্রফলভোগর্থানি কামহেতূনি কর্ম্মাণি সর্ব্বারম্ভাস্তান্ পরিত্যক্তুং শীলমস্যেতি সর্ব্বারম্ভপরিত্যাগী যো মদ্ভক্তঃ স মে প্রিয়ঃ ॥ ১৬ ॥

## গিরিকৃত টীকা।

মুদ্বেগং প্রত্যপাদানত্বমেব সংন্যাসিনো নানুপপন্নং কিন্তু তৎকর্তৃত্বমপীত্যাহ তথেতি। অসহিষ্ণুতা পরকীয়প্রকর্ষস্যেতি শেষঃ। ত্রাসস্তস্করাদিদর্শনাধীনঃ উদ্বিগ্নত্বমচেতনাচ্চেতনাধীনস্য লোকাদিতি যাবৎ ॥ ১৫ ॥

নিরপেক্ষত্বাদিকমপি জ্ঞানিনো বিশেষণমিত্যাহ অনপেক্ষ ইতি। আদিপদমপেক্ষণীয়সর্ব্বসংগ্রহার্থং, প্রতিপত্তব্যেষু প্রতিপত্তি, কর্ত্তব্যেষু কর্ত্তৃঞ্চেত্যর্থঃ। পরৈস্তাড়িতস্যাপি গতা ব্যথা ভয়মস্যেতি ব্যুৎপত্তিমাশ্রিত্যাহ গতেতি ॥ ১৬ ॥

## স্বামিকৃত টীকা।

উৎসাহঃ অমর্ষঃ পরস্য লাভেঽসহনং ভয়ং ত্রাসং উদ্বেগো ভয়াদিনিমিত্তশ্চিত্তক্ষোভঃ এতৈর্বিমুক্তো যো মদ্ভক্তঃ স মে প্রিয়ঃ ॥ ১৫ ॥

কিঞ্চ অনপেক্ষ ইতি। অনপেক্ষো যদৃচ্ছয়োপস্থিতেঽপ্যর্থে নিস্পৃহঃ শুচির্বাহ্যাভ্যন্তরশৌচসম্পন্নঃ দক্ষোঽনলসঃ উদাসীনঃ পক্ষপাতরহিতঃ গতব্যথ আধিশূন্যঃ সর্ব্বান্ দৃষ্টাদৃষ্টার্থানারম্ভানুদ্যমান্ পরিত্যক্তুং শীলং যস্য সঃ, এবংভূতঃ সন্ যো মদ্ভক্তঃ স মে প্রিয়ঃ ॥ ১৬ ॥

যো ন হৃষ্যতি ন দ্বেষ্টি ন শোচতি ন কাঙ্ক্ষতি।
শুভাশুভপরিত্যাগী ভক্তিমান্ যঃ স মে প্রিয়ঃ ॥ ১৭ ॥
সমঃ শত্রৌ চ মিত্রে চ তথা মানাপমানয়োঃ।
শীতোষ্ণসুখদুঃখেষু সমঃ সঙ্গবিবর্জ্জিতঃ ॥ ১৮ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ যো ন হৃষ্যতীষ্টপ্রাপ্তৌ ন দ্বেষ্ট্যনিষ্টপ্রাপ্তৌ ন শোচতি প্রিয়বিয়োগে ন চাপ্রাপ্তং কাঙ্ক্ষতি শুভাশুভে পুণ্যপাপে কর্ম্মণী পরিত্যক্তুং শীলমস্যেতি শুভাশুভপরিত্যাগী ভক্তিমান্ যঃ স মে প্রিয়ঃ ॥ ১৭ ॥

সম ইতি। সমঃ শত্রৌ মিত্রে চ তথা মানাপমানয়োঃ পূজাপরিভবয়োঃ শীতোষ্ণসুখদুঃখেষু সমঃ সর্ব্বত্র সঙ্গবর্জ্জিতঃ ॥ ১৮ ॥

কিঞ্চতুল্যনিন্দেতি। তুল্যনিন্দাস্তুতিঃ নিন্দা চ স্তুতিশ্চ নিন্দাস্তুতী তুল্যে যস্য স তুল্যনিন্দাস্তুতির্মৌনী মৌনবান্ সংযতবাক্ সন্তুষ্টো যেন কেনচিৎ শরীরস্থিতিমাত্রেণ তথাচোক্তং যেন কেনচিদাচ্ছন্নো যেন কেনচিদাশিতঃ যত্র ক্বচন শায়ী স্যাত্তন্দেবা ব্রাহ্মণং বিদুরিতি

## গিরিকৃত টীকা।

ন চ ক্ষমীত্যনেন পৌনরুক্ত্যং প্রত্যুৎপন্নায়ামপি ব্যথায়ামপকর্ত্তৃষ্বনপকর্ত্তৃত্বং ক্ষমিত্বমিত্যভ্যুপগমাদ্দ্বেষহর্ষাদিরাহিত্যমপি জ্ঞানিনো লক্ষণমিত্যাহ কিঞ্চেতি। সর্ব্বারম্ভপরিত্যাগীত্যনেন বিহিতকাম্যত্যাগস্যোক্তত্বাদ্বিহিতাদন্যত্র মা সংকোচীতি বিশিনষ্টি শুভাশুভইতি। বৈষম্যবুদ্ধ্যভাবাদপি জ্ঞানিনো বিশেষণমিত্যাহ সম ইতি ॥ ১৭ ॥

সম ইতি অদ্বেষ্টেত্যাদিনা দ্বেষাদিবিশেষা ভাগ উক্তঃ সম্প্রতি সর্ব্বত্রৈবাবিকৃতচিত্তত্বমুচ্যতে সর্ব্বত্র চেতনে স্ত্রিয়াদাবচেতনে চ চন্দনাদাবিত্যর্থঃ ॥ ১৮ ॥

বাগ্যতত্বাদিবিশেষণমপি জ্ঞাননিষ্ঠস্যাস্তীত্যাহ কিঞ্চেতি। নিন্দা দোষ সংকীর্ত্তনং স্তুতির্গুণগণনং দেহস্থিতিমাত্রফলেনান্নাদিনা জ্ঞানিনঃ সন্তুষ্টত্বে স্মৃতিং প্রমাণয়তি তথাচেতি নিয়তনিবাসরাহিত্যমপি জ্ঞানবতো বিশেষণমিত্যাহ কিঞ্চেতি। ন কুড্যাং

## স্বামিকৃত টীকা।

কিঞ্চ য ইতি। প্রিয়ং প্রাপ্য যো ন হৃষ্যতি অপ্রিয়ং প্রাপ্য যো ন দ্বেষ্টি ইষ্টার্থনাশে সতি যো ন শোচতি অপ্রাপ্তমর্থং যো ন কাঙ্ক্ষতি শুভাশুভে পুণ্যপাপে পরিত্যক্তুং শীলং যস্য সঃ, এবংভূতো ভূত্বা যো মদ্ভক্তিমান্ স মে প্রিয়ঃ ॥ ১৭ ॥

কিঞ্চ সম ইতি। শত্রৌ মিত্রে চ সমএকরূপঃ মানাপমানয়োরপি তথা সমএব হর্ষবিষাদশূন্য ইত্যর্থঃ, শীতোষ্ণয়োঃ সুখদুঃখয়োশ্চ সমঃ সঙ্গবিবর্জিতঃ ক্বচিদপ্যনাসক্তঃ ॥ ১৮ ॥

তুল্যনিন্দাস্তুতির্মৌনী সন্তুষ্টো যেন কেনচিৎ।
অনিকেতঃ স্থিরমতির্ভক্তিমান্ মে প্রিয়ো নরঃ ॥ ১৯ ॥
যে তু ধর্ম্মামৃতমিদং যথোক্তং পর্য্যুপাসতে।
শ্রদ্দধানা মৎপরমা ভক্তাস্তেঽতীব মে প্রিয়াঃ ॥ ২০ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ অনিকেতো নিকেত আশ্রযো নিবাসো নিয়তো ন বিদ্যতে যস্য সোঽযমনিকেতঃ স্থিরমতির্ভক্তিমান্ মে প্রিয়ঃ ॥ ১৯ ॥

অদ্বেষ্টা সর্ব্বভূতানামিত্যাদিনাক্ষরস্যোপাসকানাং নিবৃত্তসর্ব্বৈষণানাং সন্ন্যাসিনাং পরমার্থজ্ঞাননিষ্ঠানাম্ধর্ম্মজাতং প্রক্রান্তমুপসংহ্রিয়ত ইতি যে ত্বিতি। যে তু সন্ন্যাসিনো ধর্ম্ম্যামৃতম্ধর্ম্মাদনপেতং ধর্ম্ম্যঞ্চ তদমৃতঞ্চ তদমৃতত্বহেতুত্বাদিদং যথোক্তমদ্বেষ্টা ভূতানামিত্যাদিনা পর্য্যুপাসতে অনুতিষ্ঠন্তি শ্রদ্দধানাঃ সন্তো মৎপরমা যথোক্তোঽহমক্ষরাত্মা পরমো নিরতিশয়ো গতির্যেষাস্তে মৎপরমা মদ্ভক্তাশ্চ উত্তমাম্পরমার্থজ্ঞানলক্ষণাং ভক্তিমাশ্রিতাস্তেঽতীব মে প্রিযাঃ প্রিয়ো হি জ্ঞানিনোঽত্যর্থমিতি যৎ সূচিতং তদ্ব্যাখ্যায়েহোপসংহৃতং ভক্তাস্তেঽতীব মে প্রিয়া ইতি যস্মাদ্ধর্ম্ম্যামৃতমিদং যথোক্তমনুতিষ্ঠন্ ভগবতো বিষ্ণোঃ পরমেশ্বরস্যাতীব মে

## গিরিকৃত টীকা।

নোদকে সঙ্গো ন চৈলে ন ত্রিপুষ্করে, নাসনে বসনে নান্নে যস্য বৈ মোক্ষবিত্ত্ব স ইতি স্মৃতিমুক্তেঽর্থে প্রমাণয়তি নেত্যাদিনা। পুনঃ পুনর্ভক্তেগ্রহণমপবর্গমার্গস্য পরমার্থজ্ঞানস্যোপায়ার্থং ॥ ১৯ ॥

অদ্বেষ্টেত্যাদিধর্ম্মজাতং জ্ঞানবতো লক্ষণমুক্তং তদুপপাদিতমনুদ্যোপসংহারশ্লোকমবতারয়তি অদ্বেষ্টেত্যাদিনা। চতুর্থপাদস্য তাৎপর্য্যমাহ প্রিয়ো হীতি। যদ্যপি যথোক্তং ধর্ম্মজাতং জ্ঞানবতো লক্ষণং তথাপি জিজ্ঞাসুনাং জ্ঞানোপায়ত্বেন যত্নাদনুষ্ঠেয়মিতি বাক্যার্থমুপসংহরতি যস্মাদিতি। তদেবং সোপাধিকাভিধ্যানপরিপাকান্নিরুপাধিকমনুসন্ধানস্যাদ্বেষ্টা সর্ব্বভূতা-

## স্বামিকৃত টীকা।

কিঞ্চ তুল্যা নিন্দা স্তুতিশ্চ যস্য সঃ মৌনী সংযতবাক্ যেন কেনচিৎ যথালব্ধেন সন্তুষ্ট অনিকেতো নিয়তবাসশূন্যঃ স্থিরমতিঃ ব্যবস্থিতচিত্তঃ এবংভূতো মদ্ভক্তিমান্ যঃ স নরো মম প্রিয়ঃ ॥ ১৯ ॥

উক্তধর্ম্মজাতং সকলমুপসংহরতি যে ত্বিতি। যথোক্তমুক্তপ্রকারং ধর্ম্মমেবামৃতং অমৃতত্বসাধনত্বাৎ, ধর্ম্ম্যামৃতমিতি কেচিৎ পঠন্তি। যে তদুপাসতে অনুতিষ্ঠন্তি শ্রদ্ধাং কুর্ব্বন্তো

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে
শ্রীকৃষ্ণার্জ্জুনসংবাদে
ভক্তিযোগো নাম
দ্বাদশোঽধ্যায়ঃ।

প্রিয়ো ভবতি তস্মাদিদং ধর্ম্ম্যামৃতং মুমুক্ষুণা যত্নতোঽনুষ্ঠেয়ং বিষ্ণোঃ প্রিয়ং পরন্ধাম জিগমিষুণেতি ব্যাক্যার্থঃ॥ ২০॥

ইতি শ্রীভগবদ্গীতাভাষ্যে দ্বাদশোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

নামিত্যাদিধর্ম্মবিশিষ্টস্য মুখ্যস্যাধিকারিণঃ শ্রবণাদ্যাবর্ত্তয়তস্তত্ত্বসাক্ষাৎকাবসম্ভবাত্ততো মুক্ত্যুপপত্তেস্তদ্ধেতুবাক্যার্থধীবিষযোঽব্যযোগ্যস্তৎপদার্থোঽনুসন্ধেয ইতি সিদ্ধং॥ ২০॥

ইতি শ্রীমদানন্দগিবিকৃতটীকাযাং দ্বাদশোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

মৎপবমাশ্চ সন্তো মদ্ভক্তাস্তেঽতীব মে প্রিয়া ইতি।
দুঃখমব্যক্তবর্ত্মৈতদ্বহুবিঘ্নমতো বুধঃ।
সুখং কৃষ্ণপদাম্ভোজং ভক্তিসৎপথবান্ ভজেৎ॥ ২০॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকাযাং দ্বাদশোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## ত্রয়োদশোঽধ্যায়ঃ।

শ্রীভগবানুবাচ—ইদং শরীরং কৌন্তেয় ক্ষেত্রমিত্যভিধীয়তে।
এতদ্যো বেত্তি তং প্রাহুঃ ক্ষেত্রজ্ঞ ইতি তদ্বিদঃ ॥ ১ ॥

---

### শাঙ্করভাষ্যম্।

সপ্তমেঽধ্যায়ে সূচিতে দ্বে প্রকৃতী ঈশ্বরস্য ত্রিগুণাত্মিকাষ্টধা ভিন্নাঽপরা সংসারহেতুত্বাৎ পরা চান্যা জীবভূতা ক্ষেত্রজ্ঞলক্ষণা ঈশ্বরাত্মিকা যাভ্যাং প্রকৃতিভ্যাং ঈশ্বরো জগদুৎপত্তি-স্থিতিলয়হেতুত্বং প্রতিপদ্যতে তত্র ক্ষেত্রক্ষেত্রজ্ঞলক্ষণপ্রকৃতিদ্বয়নিরূপণদ্বারেণ তদ্বত ঈশ্বরস্য তত্ত্বনির্দ্ধারণার্থং ক্ষেত্রাধ্যায় আরভ্যতে। অতীতানন্তরাধ্যায়ে চ অদ্বেষ্টা সর্ব্বভূতানামি-ত্যাদিনা যাবদধ্যায়পরিসমাপ্তিস্তাবত্তত্ত্বজ্ঞানিনাং সন্ন্যাসিনাং নিষ্ঠা যথা তে বর্ত্তন্তে ইত্যে-

---

### গিরিকৃত টীকা।

প্রথমমধ্যময়োঃ ষট্কয়োস্ত্বংতৎপদার্থাবুক্তৌ অন্তিমস্তু ষট্কো বাক্যার্থনিষ্ঠঃ সম্যগ্ধী-প্রধানোঽধুনারভ্যতে তত্র ক্ষেত্রাধ্যায়মন্তিমষট্কাদ্যমবতিতাবয়িষুর্ব্যবহিতং বৃত্তং কীর্ত্তয়তি সপ্তমইতি। প্রকৃতিদ্বয়স্য স্বাতন্ত্র্যং বারয়তি ঈশ্বরস্যেতি। ভূমিরিত্যাদিনোক্তা সত্ত্বাদি-রূপা প্রকৃতিরপরেত্যত্র হেতুমাহ সংসারেতি। ইতস্ত্বন্যামিত্যাদিনোক্তাং প্রকৃতিমনুক্রামতি পরা চেতি। পরত্বে হেতুং সূচয়তি ঈশ্বরাত্মিকেতি। কিমর্থমীশ্বরস্য প্রকৃতিদ্বয়মিত্যা-

### স্বামিকৃত টীকা।

ভক্তানামহমুদ্ধর্ত্তা সংসারাদিত্যবাদি যৎ। ত্রয়োদশেঽথ তৎসিদ্ধৌ তত্ত্বজ্ঞানমুদীর্য্যতে। তেষামহং সমুদ্ধর্ত্তা মৃত্যুসংসারসাগরাৎ, ভবামি ন চিরাৎ পার্থেতি পূর্ব্বং প্রতিজ্ঞাতং ন চাত্মজ্ঞানং বিনা সংসারোদ্ধরণং সম্ভবতীতি তত্ত্বজ্ঞানোপদেশার্থং প্রকৃতিপুরুষবিবেকা-ধ্যায় আরভ্যতে তত্র যৎ সপ্তমাধ্যায়ে অপরা পরা চেতি প্রকৃতিদ্বয়মুক্তং যয়োরবিবেকা-জ্জীবভাবমাপন্নস্য চিদংশস্যায়ং সংসারঃ যাভ্যাঞ্চ জীবোপাধিভ্যামীশ্বরস্য সৃষ্ট্যাদিষু প্রবৃত্তি-স্তদেব প্রকৃতিদ্বয়ং ক্ষেত্রক্ষেত্রজ্ঞপদবাচ্যং পরস্পরবিভক্তং তত্ত্বতো নিরূপয়িষ্যন্ শ্রীভগবানুবাচ ইদমিতি। ইদং ভোগায়তনং শরীরং ক্ষেত্রমিত্যভিধীয়তে সংসারস্য প্ররোহভূমিত্বাৎ এতদ্যো বেত্তি অহং মমেতি মন্যতে তং ক্ষেত্রজ্ঞং প্রাহুঃ কৃষীবলবত্তৎফলভোক্তৃত্বাৎ তদ্বিদঃ ক্ষেত্রক্ষেত্রজ্ঞয়োর্বিবেকজ্ঞাঃ ॥ ১ ॥

## শাঙ্করভাষ্যম্।

তদুক্তং কেন পুনস্তে তত্ত্বজ্ঞানেন যুক্তাঃ যথোক্তধর্ম্মাচরণাৎ ভগবতঃ প্রিয়াঃ ভবন্তীত্যেবমর্থশ্চায়মধ্যায় আরভ্যতে, প্রকৃতিশ্চ ত্রিগুণাত্মিকা সর্ব্বকার্য্যকরণবিষয়াকারেণ পরিণতা পুরুষস্য ভোগাপবর্গার্থকর্ত্তব্যতয়া দেহেন্দ্রিয়াদ্যাকারেণ সংহন্যতে সোঽয়ং সংঘাত ইদং শরীরং তদেতৎ ভগবানুবাচ ইদমিতি। ইদং ইতি সর্ব্বনাম্নোক্তং বিশিনষ্টি শরীরমিতি। হে কৌন্তেয় ক্ষতত্রাণাৎ, ক্ষয়াৎ ক্ষরণাৎ ক্ষেত্রবদ্বাস্মিন্ কর্ম্মফলনির্বৃত্তেঃ ক্ষেত্রমিতীতিশব্দঃ এবং-শব্দপদার্থকঃ ক্ষেত্রমিত্যেবমভিধীয়তে কথ্যতে এতৎ শরীরং ক্ষেত্রং যো বেত্তি বিজানাতি আপাদতলমস্তকং জ্ঞানেন বিষয়ীকরোতি স্বাভাবিকেন ঔপদেশিকেন বা বেদনেন বিষয়ীকরোতি বিভাগশস্তং বেদিতারং প্রাহুঃ কথয়ন্তি ক্ষেত্রজ্ঞ ইতীতিশব্দঃ এবংশব্দপদার্থকএব পূর্ব্ববৎ ক্ষেত্রজ্ঞ ইত্যেবমাহুঃ কে তদ্বিদস্তৌ ক্ষেত্রক্ষেত্রজ্ঞৌ যে বিদন্তি তদ্বিদঃ॥ ১॥

## গিরিকৃত টীকা।

শঙ্কা কারণত্বার্থমিত্যাহ যাভ্যামিতি। বৃত্তমনূদ্য বর্ত্তিষ্যমাণাধ্যায়ারম্ভপ্রকারমাহ তত্রেতি। ব্যবহিতেন সম্বন্ধমুক্ত্বাঽব্যবহিতেন তং বিবক্ষুরব্যবহিতমনুবদতি অতীতেতি। নিষ্ঠোক্তেতি সম্বন্ধঃ। নিষ্ঠামেব ব্যাচষ্টে যথেতি। বর্ত্তন্তে ধর্ম্মজাতমনুতিষ্ঠন্তি তথা পূর্ব্বোক্তেন প্রকারেণ সর্ব্বমুক্তমিতি যোজনা। অব্যবহিতমেবমনূদ্য তেনোত্তরস্য সম্বন্ধং সঙ্গিরতে কেনেতি তত্ত্বজ্ঞানোক্তেরুক্তার্থেন সমুচ্চয়ার্থশ্চকারঃ। জীবানাং সুখদুঃখাদিভেদভাজাং প্রতিক্ষেত্রভিন্নানাং নাক্ষরেণৈক্যমিত্যাশঙ্ক্য সংসারস্য আত্মধর্ম্মত্বং নিরাকৃত্য সংঘাতনিষ্ঠত্বং বক্তুং সংঘাতোৎপত্তিপ্রকারমাহ প্রকৃতিশ্চেতি। ভোগশ্চাপবর্গশ্চার্থৌ তয়োরেব কর্ত্তব্যতয়েতি যাবৎ। নত্বনন্তরশ্লোকে শরীরনির্দ্দেশাৎ তস্যোৎপত্তির্বক্তব্যা কিমিতি সংঘাতস্যোচ্যতে তত্রাহ সোঽয়মিতি। উক্তেঽর্থে ভগবদ্বচনমবতারয়তি তদেতদিতি। তত্র দ্রষ্টৃত্বেন সংঘাতদৃশ্যাদন্যমাত্মানং নির্দ্দিশতি ইদমিতি। উক্তং প্রত্যক্ষদৃশ্যবিশিষ্টং কিঞ্চিদিতি শেষঃ। শরীরস্যাত্মনোঽন্যত্বং ক্ষেত্রনামনিরুক্ত্যা ব্রূতে ক্ষতেতি। ক্ষযো নাশঃ ক্ষরণমপক্ষয়ঃ। যথা ক্ষেত্রে বীজমুপ্তং ফলতি তদ্বদিত্যাহ ক্ষেত্রবদ্বেতি। ক্ষেত্রপদাদুপরিস্থিতমিতিপদং ক্ষেত্রশব্দবিষয়মন্যথা বৈয়র্থ্যাদিত্যাহ ইতিশব্দ ইতি। ক্ষেত্রমিত্যেবমনেন ক্ষেত্রশব্দেনেত্যর্থঃ। দৃশ্যং দেহমুক্ত্বা ততোঽতিরিক্তং দ্রষ্টারমাহ এতদিতি। স্বাভাবিকং মনুষ্যোঽহমিতি জ্ঞানং ঔপদেশিকং দেহো নাত্মা দৃশ্যত্বাদিত্যাদিবিভাগশঃ স্বতোঽতিরিক্তত্বেনেত্যর্থঃ। ক্ষেত্রমিত্যত্রেতিশব্দবদত্রাপীতিশব্দস্য ক্ষেত্রজ্ঞশব্দবিষয়ত্বমাহ ইতিশব্দ ইতি। ক্ষেত্রজ্ঞ ইত্যেবং ক্ষেত্রজ্ঞশব্দেন তং প্রাহুরিতি সম্বন্ধং প্রবক্ষ্যন্ প্রশ্নপূর্ব্বকমাহ কে ইত্যাদিনা॥ ১॥

দৃশ্যানাং দুঃখাদীনাং ভেদকানাং যাবদ্দেহভাবিনামনাত্মধর্ম্মত্বসিদ্ধয়ে দ্রষ্টারং দেহাদন্যমুক্ত্বা সাংখ্যানামিব তাবন্মাত্রেণ মুক্তিনিবৃত্তয়ে তস্য সর্ব্বদেহেষ্বৈক্যোক্তিপূর্ব্বকং স্বেন পরমার্থেনাক্ষরেণৈক্যং বৃত্তমনূদ্য প্রশ্নদ্বারা দর্শয়তি এবমিত্যাদিনা। যথোক্তলক্ষণং দৃশ্যা-

ক্ষেত্রজ্ঞঞ্চাপি মাং বিদ্ধি সর্ব্বক্ষেত্রেষু ভারত।
ক্ষেত্রক্ষেত্রজ্ঞয়োর্জ্ঞানং যত্তজ্জ্ঞানং মতং মম

## শাঙ্করভাষ্যম্।

এবং ক্ষেত্রক্ষেত্রজ্ঞাবুক্তৌ কিমেতাবন্মাত্রেণ জ্ঞানেন জ্ঞাতব্যাবিতি নেত্যুচ্যতে ক্ষেত্রজ্ঞমিতি। ক্ষেত্রজ্ঞং যথোক্তলক্ষণঞ্চাপি মাং পরমেশ্বরমসংসারিণং বিদ্ধি জানীহি যোঽসৌ সর্ব্বক্ষেত্রেষেকঃ ক্ষেত্রজ্ঞো ব্রহ্মাদিস্তম্বপর্য্যন্তানেকক্ষেত্রোপাধিপ্রবিভক্তস্তং নিরস্তসর্ব্বোপাধিভেদং সদসদাদিশব্দপ্রত্যয়াগোচরং বিদ্ধীত্যভিপ্রায়ঃ হে ভারত যস্মাৎ ক্ষেত্রক্ষেত্রজ্ঞেশ্বরযাথাত্ম্যব্যতিরেকেণ ন জ্ঞানগোচরমন্যদবশিষ্টমস্তি তস্মাৎ ক্ষেত্রক্ষেত্রজ্ঞয়োর্জ্ঞেয়ভূতয়োঃ যৎ জ্ঞানং ক্ষেত্রক্ষেত্রজ্ঞৌ যেন জ্ঞানেন বিষয়ীক্রিয়েতে তৎজ্ঞানং সম্যক্জ্ঞানমিতি মতমভিপ্রেতমিত্যভিপ্রায়ো মমেশ্বরস্য বিষ্ণোঃ।

নন্বু সর্ব্বক্ষেত্রেষেকএব ঈশ্বরো নান্যস্তদ্ব্যতিরিক্তো ভোক্তা বিদ্যতে চেত্তত ঈশ্বরস্য সংসারিত্বং প্রাপ্তং ঈশ্বরব্যতিরেকেণ বা সংসারিণোঽন্যস্যাভাবাৎ সংসারাভাবপ্রসঙ্গস্তচ্চোভয়মনিষ্টং বন্ধমোক্ষতদ্ধেতুশাস্ত্রানর্থক্যপ্রসঙ্গাৎ প্রত্যক্ষাদিপ্রমাণবিরোধাচ্চ প্রত্যক্ষেণ তাবৎ সুখদুঃখতদ্ধেতুলক্ষণঃ সংসার উপলভ্যতে জগদ্বৈচিত্র্যোপলব্ধেশ্চ ধর্ম্মাধর্ম্মনিমিত্তঃ সংসারোঽনুমীয়তে সর্ব্বমেতদনুপপন্নমাত্মেশ্বরৈকত্বে, ন জ্ঞানাজ্ঞানয়োরন্যত্বেনোপপত্তেঃ দূরমেতে বিপরীতে বিষূচীঅবিদ্যা যা চ বিদ্যেতি জ্ঞানাজ্ঞানে তথা চ তয়োর্ব্বিদ্যাবিদ্যাবিষয়য়োঃ ফল-

## গিরিকৃত টীকা।

দেহাদিস্বিষ্টং দ্রষ্টারমিত্যর্থঃ, চাপীতি নিপাতৌ জীবস্যাক্ষরত্বজ্ঞানস্য দেহাদন্যত্বজ্ঞানেন সমুচ্চয়ার্থৌ ভিন্নক্রমৌ ন ক্ষেত্রজ্ঞং সাংখ্যবদ্দৃশ্যাদন্যদেব বিদ্ধি কিন্তু মাঞ্চাপি বিদ্ধীতি সম্বধ্যতে। যঃ সর্ব্বক্ষেত্রেষু একঃ ক্ষেত্রজ্ঞঃ তং মামেব বিদ্ধীতি সম্বন্ধং সূচয়তি সর্ব্বেতি। তত্তৎক্ষেত্রোপাধিকভেদভাজঃ তত্তচ্ছব্দধীগোচরস্য কথং তদ্বিরীতব্রহ্মত্বধীরিত্যাশঙ্ক্যাহ ব্রহ্মাদীতি। উত্তরার্দ্ধং বিভজতে যস্মাদিতি। তদেব বিশিনষ্টি ক্ষেত্রেতি। ন চ ভেদবিষয়ত্বান্ন সম্যগজ্ঞানং তদিতি যুক্তং তস্য বিবেকজ্ঞানস্য বাক্যার্থজ্ঞানদ্বারা মোক্ষোপযিকত্বেন সম্যক্ত্বাসিদ্ধিরিতি ভাবঃ।

জীবেশ্বরয়োরেকত্বমুক্তমাক্ষিপতি নন্বিতি। জীবেশ্বরয়োরেকত্বে জীবস্যেশ্বরে বা তস্য জীবে নান্তর্ভাবো নাদ্যো জীবস্য পরস্মাদন্যস্যাভাবে সংসারস্য নিরালম্বনত্বানুপপত্ত্যা পরস্যৈব তদাশ্রয়ত্বপ্রসঙ্গাদিত্যর্থঃ। অনশ্নন্নন্যো অভিচাকশীতি শ্রুতেন তস্য সংসারিত্বমিত্যাশঙ্ক্য দ্বিতীয়ং দূষয়তি ঈশ্বরেতি। জীবে চেদীশ্বরোঽন্তর্ভবতি তদাপি ততোঽন্যসংসার্য্যভাবাত্তস্য চ সংসারানিষ্টঃ সংসারো জগত্যন্তং গচ্ছেদিত্যর্থঃ। প্রসক্তমন্যেষ্টত্বং নিরাচষ্টে

## শাঙ্করভাষ্যম্।

ভেদোঽপি বিরুদ্ধো নির্দ্দিষ্টঃ শ্রেয়শ্চ প্রেয়শ্চেতি বিদ্যাবিষয়ঃ শ্রেয়ঃ প্রেয়স্ত্ববিদ্যাকার্য্যমিতি তথা চ ব্যাসঃ দ্বাবিমাবথ পন্থানাবিত্যাদি ইমৌ দ্বাবেব পন্থানাবিত্যাদি চেহ চ দ্বে নিষ্ঠে উক্তে অবিদ্যা চ সহ কার্য্যেণ বিদ্যয়া হাতব্যেতি শ্রুতিস্মৃতিন্যায়েভ্যোঽবগম্যতে, শ্রুতয়স্তাবদিহ চেদবেদীদথ সত্যমস্তি ন চেদিহাবেদীন্মহতী বিনষ্টিস্তমেবং বিদ্বানমৃত-ইহ ভবতি নান্যঃ পন্থা বিদ্যতেঽয়নায় আনন্দং ব্রহ্মণো বিদ্বান্ন বিভেতি কুতশ্চন অবিদুষস্তুথ তস্য ভয়ং ভবত্যবিদ্যায়ামন্তরে বর্ত্তমানো ব্রহ্ম বেদ ব্রহ্মৈব ভবতি অন্যোঽসাবন্যোঽহমস্মীতি ন স বেদ যথা পশুরেবং স দেবানামাত্মবিদঃ স ইদং সর্ব্বং ভবতি যদা চর্ম্মবদিত্যাদ্যাঃ সহস্রশঃ। স্মৃতয়শ্চ অজ্ঞানেনাবৃতং জ্ঞানং তেন মুহ্যন্তি জন্তবঃ, ইহৈব তৈর্জিতঃ স্বর্গো যেষাং সাম্যে স্থিতং মনঃ, সমং পশ্যন্ হি সর্ব্বত্র ইত্যাদ্যাঃ। ন্যায়তশ্চ, সর্পান্ কুশাগ্রাণি তথোদপানং, জ্ঞাত্বা মনুষ্যাঃ পরিবর্জ্জয়ন্তি, অজ্ঞানতস্তত্র যান্তীতি কেচিৎ জ্ঞানে ফলং পশ্য যথা বিশিষ্টং। তথা চ দেহাদিষনাত্মস্বাত্মবুদ্ধিরবিদ্বান্ রাগদ্বেষাদিযুক্তো ধর্ম্মাধর্ম্মানুষ্ঠানকৃৎ জায়তে ম্রিয়তে চেত্যবগম্যতে দেহাদিব্যতিরিক্তাত্মদর্শিনো রাগদ্বেষাদিপ্রহাণাপেক্ষয়া ধর্ম্মাধর্ম্মপ্রবৃত্ত্যুপশমান্মুচ্যন্ত ইতি ন কেনচিৎ প্রত্যাখ্যাতুং শক্যং ন্যায়তস্তত্রৈবং সতি ক্ষেত্রজ্ঞস্যেশ্বরস্যৈব সতোঽবিদ্যাকৃতোপাধিভেদতঃ সংসারিত্বমিব ভবতি যথা দেহাদ্যাত্মত্বমাত্মনঃ সর্ব্বজন্তূনাং হি প্রসিদ্ধো দেহাদিষনাত্মভাবো নিশ্চিতোঽবিদ্যাকৃতো যথা স্থাণৌ পুরুষনিশ্চয়ো ন চৈতাবতা পুরুষধর্ম্মঃ স্থাণৌ ভবতি স্থাণুধর্ম্মো বা পুরুষস্য তথা ন

## গিরিকৃত টীকা।

তচ্চেতি। সংসারাভাবে তয়োরন্যঃ পিপ্পলং স্বাদ্বত্তীত্যাদিবন্ধশাস্ত্রস্য তদ্ধেতুকর্ম্মবিষয়কর্ম্মকাণ্ডস্য চানর্থক্যমীশ্বরাশ্রিতে চ সংসারে তদভোক্তৃত্বশ্রুতেঃ জ্ঞানকাণ্ডস্য মোক্ষতদ্ধেতুজ্ঞানার্থস্যানর্থক্যমতো ন প্রসঙ্গয়োরিষ্টতেত্যর্থঃ। সংসারাভাবপ্রসঙ্গস্যানিষ্টত্বে হেত্বন্তরমাহ প্রত্যক্ষাদীতি। তত্র প্রত্যক্ষবিরোধং প্রকটয়তি প্রত্যক্ষেণেতি। আদিশব্দোপাত্তমনুমানবিরোধমাহ জগদিতি। বিমতং বিচিত্রহেতুকং বিচিত্রকার্য্যত্বাৎ প্রসাদাদিবদিত্যর্থঃ। প্রত্যক্ষানুমানাগমবিরোধাদযুক্তমৈক্যমিত্যুপসংহরতি সর্ব্বমিতি। ঐক্যেঽপি সংসারিত্বমবিদ্যাতো বিদ্যাতোঽসংসারিত্বমিতি বিভাগান্নানুপপত্তিরিত্যুত্তরমাহ নেত্যাদিনা। তয়োঃ স্বরূপতো বিলক্ষণত্বে শ্রুতিমাহ দূরমিতি। অবিদ্যা যা চ বিদ্যেতি প্রসিদ্ধে এতে বিদ্যাবিদ্যে দূরং বিপরীতে অত্যন্তবিরুদ্ধে ইত্যর্থঃ, বিষূচী নানাগতী ভিন্নফলে ইত্যর্থঃ। স্বরূপতো বিরোধবৎ ফলতোঽপি সোঽস্তীত্যাহ তথেতি। ফলভেদোক্তিমেব ব্যনক্তি বিদ্যেতি। তয়োর্দ্বিধাবিলক্ষণত্বে বেদব্যাসস্যাপি সম্মতিমাহ তথাচেতি। উক্তেঽর্থে ভগবতোঽপি সম্মতিমুদাহরতি ইহ চেতি। দ্বয়োরপি নিষ্ঠয়োস্তুল্যমুপাদেয়ত্বমিতি শঙ্কাং শাতয়তি অবিদ্যা চেতি। অবিদ্যা সকার্য্যা হাতব্যেত্যত্র শ্রুতিমুদাহরতি শ্রুতয়স্তা-

## শাঙ্করভাষ্যম্।

চৈতন্যং ধর্ম্মো দেহস্য দেহধর্ম্মো বা চৈতন্যস্য এবং সুখদুঃখমোহাত্মকত্বাদিরাত্মনো ন যুক্তো-ঽবিদ্যাকৃতত্বাবিশেষাজ্জরামৃত্যুবন্নাতুল্যত্বাদিতি চেৎ স্থাণুপুরুষো জ্ঞেয়াবেব সন্তৌ জ্ঞাত্রা-ন্যোন্যস্মিন্নধ্যস্তাববিদ্যয়া দেহাত্মনোস্তু জ্ঞেয়জ্ঞাত্রোরেবেতরেতরাধ্যাস ইতি ন সমো দৃষ্টা-ন্তোঽতো দেহধর্ম্মো জ্ঞেয়োঽপি জ্ঞাতুরাত্মনো ভবতীতি চেন্নাচৈতন্যাদিপ্রসঙ্গাদ্যদি হি জ্ঞে-য়স্য দেহাদেঃ ক্ষেত্রস্য ধর্ম্মাঃ সুখদুঃখমোহেচ্ছাদয়োঽপি কেন চ জ্ঞাতুরাত্মনো ভবন্তি অবি-দ্যাধ্যারোপিতা জরামরণাদয়স্তু ন ভবন্তীতি বিশেষহেতুর্ব্বক্তব্যো ন ভবন্তীত্যস্ত্যনুমানমবি-দ্যাধ্যারোপিতত্বজ্জরাদিবদিতি হেয়ত্বাদুপাদেয়ত্বাচ্চেত্যাদি তত্রৈবং সতি কর্ত্তৃত্বভোক্তৃত্ব-লক্ষণঃ সংসারো জ্ঞেয়স্থো জ্ঞাতর্যবিদ্যয়াধ্যারোপিত ইতি ন তেন জ্ঞাতুঃ কিঞ্চিৎ দুষ্যতি যথা বালৈরধ্যারোপিতেনাকাশস্য তলমলবত্ত্বাদিনা এবঞ্চসতি সর্ব্বক্ষেত্রেষপি সতো ভগবতঃ ক্ষেত্রজ্ঞস্যেশ্বরস্য সংসারিত্বং গন্ধমাত্রমপি ন শঙ্ক্যং ন হি ক্বচিদপি লোকেঽবিদ্যাধ্যস্তেন ধর্ম্মেণ কস্যচিদুপকারোঽপকারো বা দৃষ্টো যত্তূক্তং ন সমো দৃষ্টান্ত ইতি তদসৎ কথমবি-দ্যাধ্যাসমাত্রং হি দৃষ্টান্তদার্ষ্টান্তিকযোঃ সাধর্ম্ম্যং বিবক্ষিতং তন্ন ব্যাভিচরতি যত্তু জ্ঞাতর ব্যভিচরতীতি মন্যসে তস্যাপ্যনৈকান্তিকত্বং দর্শিতং জরাদিভিরবিদ্যাবত্ত্বাৎ ক্ষেত্রজ্ঞস্য সংসারিত্বমিতি চেন্ন অবিদ্যায়াস্তামসত্বাত্তামসো হি প্রত্যয় আবরণাত্মকত্বাদবিদ্যাবিপ-রীতগ্রাহকঃ সংশয়োপস্থাপকো বা অগ্রহণাত্মকো বা বিবেকপ্রকাশভাবে তদভাবাত্তামসে

## গিরিকৃত টীকা।

বদিতি। ইহেতি জীবদবস্থোচ্যতে, চেচ্ছব্দো বিদ্যোদয়দৌর্ল্লভ্যদ্যোতী, অবেদীদহং ব্রহ্মেতি বিদিতবানিত্যর্থঃ। অথ বিদ্যানন্তরমেব সত্যমবিতথং পুনরাবৃত্তিবর্জ্জিতং কৈবল্যং স্যাদিত্যাহ অথেতি। অবিদ্যাবিষয়েঽপি শ্রুতিমাহ ন চেদিতি। জন্মমরণাদিরূপা সংসৃতি-র্ব্বিনষ্টিঃ, তস্যা মহত্ত্বং সম্যগ্জ্ঞানং বিনা নিবর্ত্তয়িতুমশক্যত্বং। বিদ্যাবিষয়ে শ্রুত্যন্তরমাহ তমেবমিতি। পরমাত্মানং প্রত্যক্ত্বে ন যঃ সাক্ষাৎ কৃতবান্ স দেহে জীবন্নেব মুক্তো ভবতী-ত্যর্থঃ। বিদ্যাং বিনাপি হেত্বন্তরতো মুক্তিমাশঙ্ক্যাহ নেতি। ভয়হেতুমবিদ্যান্নিরাকুর্ব্বন্ তজ্জন্তয়মপি নিরস্যতি বিদ্বান্ইতি। অত্র বাক্যান্তরমাহ বিদ্বানিতি। অবিদ্যাবিষয়ে বাক্যান্তরমাহ অবিদুষ ইতি। প্রতীচ্যেকরসে স্বল্পমপি ভেদং মন্যমানস্য ভেদদৃষ্ট্যনন্তর-মেব সংসারধ্রৌব্যমিত্যর্থঃ। তত্রৈব শ্রুত্যন্তরমাহ অবিদ্যায়ামিতি। তন্মধ্যে তৎপরবশ-তয়া স্থিতাস্ত তমজানন্তো দেহাদ্যভিমানবন্তো মূঢ়াঃ সংসরন্তীত্যর্থঃ। বিদ্যাবিষয়ে শ্রুত্য-ন্তরমাহ ব্রহ্মেতি। অবিদ্যাবিষয়ে শ্রুত্যন্তরমাহ অন্যোঽসাবিতি। ভেদদৃষ্টিমনূদ্য তন্নিদান-মবিদ্যেত্যাহ নেতি। স চ মনুষ্যাণাং পশুবদ্দেবাদীনাং প্রেষ্যতাং প্রাপ্নোতীত্যাহ যথেতি বিদ্যাবিষয়ে বাক্যান্তরমাহ আত্মবিদিতি। ইদং সর্ব্বং প্রত্যগ্ভূতং পূর্ণং ব্রহ্মেত্যর্থঃ। জ্ঞানাদেবতু কৈবল্যমিত্যত্র শ্রুত্যন্তরমাহ যদেতি। ন খল্বাকাশং চর্ম্মবন্মানবো বেষ্টয়িতু-

## শাঙ্করভাষ্যম্।

চাবরণাত্মকে তিমিরাদিদোষে সতি অগ্রহণাদেস্ত্রিবিদ্যাত্রয়স্যোপলব্ধেঃ অত্রাহৈবং তর্হি জ্ঞাতৃধর্ম্মোঽবিদ্যা ন করণে চক্ষুষি তৈমিরিকত্বাদিদোষাপলব্ধেরেব, মন্যসে জ্ঞাতৃধর্ম্মো বিদ্যা তদেব চাবিদ্যাধর্ম্মবত্ত্বং ক্ষেত্রজ্ঞস্য সংসারিত্বং তত্র যদুক্তমীশ্বর এব ক্ষেত্রজ্ঞো ন সংসারীত্যেতদযুক্তমিতি তন্ন যথা করণে চক্ষুষি বিপরীতগ্রাহকাদিদোষস্য দর্শনান্ন বিপরীতাদিগ্রহণং তন্নিমিত্তং বা তৈমিরিকত্বাদিদোষো গ্রহীতুশ্চক্ষুষঃ সংস্কারেণ তিমিরেঽপনীতে গ্রহীতুরদর্শনান্ন গ্রহীতুর্দ্ধর্ম্মো যথা তথা সর্ব্বত্রৈবাগ্রহণবিপরীতসংশয়প্রত্যয়াস্তন্নিমিত্তাঃ করণস্যৈব কস্যচিৎ ভবিতুমর্হতি ন জ্ঞাতুঃ ক্ষেত্রজ্ঞস্য সংবেদ্যত্বাচ্চ তেষাং প্রদীপপ্রকাশবন্নজ্ঞাতৃধর্ম্মত্বং সংবেদ্যত্বাদেব স্বাত্মব্যতিরিক্তসংবেদ্যত্বং সর্ব্বকরণবিয়োগে চ কৈবল্যে সর্ব্ববাদিভিরবিদ্যাদিদোষবত্ত্বানভ্যুপগমাদাত্মনো যদি ক্ষেত্রজ্ঞস্যাগ্ন্যুষ্ণবৎ স্বো ধর্ম্মস্ততো ন কদাচিদপি তেন বিয়োগঃ স্যাদবিক্রিয়স্য চ ব্যোমবৎ সর্ব্বগতস্যামূর্ত্তস্যাত্মনঃ কেনচিৎ সংযোগবিয়োগানুপপত্তেঃ সিদ্ধং ক্ষেত্রজ্ঞস্য নিত্যমেবেশ্বরত্বমনাদিত্বান্নির্গুণত্বাদিত্যাদীশ্বরবচনাচ্চ। নম্বেবং সতি সংসারসংসারিত্বাভাবে শাস্ত্রানার্থক্যাদিদোষঃ স্যাদিতি ন সর্ব্বৈরভ্যুপগতত্বাৎ সর্ব্বৈর্হ্যাত্মবাদিভিরভ্যুপগতো দোষো নৈকেন পরিহর্ত্তব্যো ভবতি কথমভ্যুপগত ইতি মুক্তাত্মনাং সংসারসংসারিত্বব্যবহারাভাবঃ সর্ব্বৈরেবাত্মবাদিভিরিষ্যতে ন চ

## গিরিকৃত টীকা।

মীষ্টে তথা পবমাত্মানং প্রত্যক্ত্বেনানমুভূয় ন মুচ্যতে ইত্যর্থঃ, আদিশব্দেনানুক্তাবিদ্যাবিদ্যা ফলভেদার্থাঃ শ্রুতয়ো গৃহ্যন্তে। তাসামুদ্বয়ত্বেন প্রামাণ্যং সূচয়তি সহস্রশ ইতি। বিদ্যাবিদ্যাবিষয়ে স্মৃতিমুদাহরতি স্মৃতয়শ্চেতি। তত্রাবিদ্যাবিষয়ং বাক্যমাহ অজ্ঞানেনেতি। বিদ্যাবিষয়ং বাক্যদ্বয়ং দর্শয়তি ইহেত্যাদিনা। বিদ্যাফলমনর্থধ্বস্তিরবিদ্যাফলমনর্থাপ্তিরিত্যেতদন্বয়ব্যতিরেকাখ্যন্যায়াদপি সিধ্যতীত্যাহ ন্যায়তশ্চেতি। তত্রৈব পুরাণসম্মতিমাহ সর্পানিতি। উদপানং কূপং, যথাত্মজ্ঞানে বিশিষ্টং ফলং স্যাত্তথা পশ্যেতি যোজনা। ন্যায়তশ্চেত্যন্বয়ব্যতিরেকাখ্যং ন্যায়মুক্তং বিবৃণোতি তথাচেতি। তত্রাদাবন্বয়মাচষ্টে দেহাদিম্বিতি। অনাদ্যনির্ব্বাচ্যাবিদ্যাবৃতশ্চিদাত্মা দেহাদাবনাত্মন্যাত্মবুদ্ধিমাদধাতি তদ্যুক্তো রাগাদিনা প্রের্য্যতে তৎপ্রযুক্তশ্চ কর্ম্মানুতিষ্ঠতি তৎকর্ত্তা চ যথাকর্ম্ম নূতনং দেহমাদত্তে পুরাতনং ত্যজতীত্যেবমবিদ্যাবত্ত্বে সংসারিত্বং সিদ্ধমিত্যর্থঃ। ব্যতিরেকমিদানীং দর্শয়তি দেহাদীতি। শ্রুতিযুক্তিভ্যাং ভেদে জ্ঞাতে রাগাদিধ্বস্ত্যা কর্ম্মোপরমাদশেষসংসারাসিদ্ধিরিত্যবিদ্যারাহিত্যে বন্ধধ্বস্তিরিত্যর্থঃ। উক্তান্বয়াদেরন্যথাসিদ্ধিং শিথিলয়তি ইতি নেতি। উক্তমন্বয়াদিবাদিনা কেনচিদপি ন্যায়তো ন শক্যং প্রত্যাখ্যাতুং তদন্যথাসিদ্ধিসাধকাভাবাদিত্যর্থঃ। অন্বয়াদেরনন্যথাসিদ্ধত্বে চোদ্যমপি প্রাচীনং প্রতি নীতমিত্যাহ তত্রেতি। জ্ঞানাজ্ঞানয়োরুক্তন্যায়েন স্বরূপভেদে কার্য্যভেদে চ স্বারস্যেন পরাপরয়োরৈক্যেঽপিবুদ্ধ্যাহ্য

## শাঙ্করভাষ্যম্।

তেষাং শাস্ত্রানর্থক্যাদিদোষপ্রাপ্তিরভ্যুপগতা তথা নঃ ক্ষেত্রজ্ঞানামীশ্বরৈকত্বে সতি শাস্ত্রানর্থক্যং ভবতু অবিদ্যাবিষয়ে চার্থবত্ত্বং যথা দ্বৈতিনাং সর্ব্বেষাং বন্ধাবস্থায়ামেব শাস্ত্রাদ্যর্থবত্ত্বং ন মুক্তাবস্থায়ামেবং অদ্বৈতবাদিনামপি। নন্বাত্মনো বন্ধমুক্তাবস্থে পরমার্থত এব বস্তুভূতে দ্বৈতিনাং নঃ সর্ব্বেষামতো হেয়োপাদেয়তৎসাধনসম্ভাবে শাস্ত্রাদ্যর্থবত্ত্বং স্যা-

---

## গিরিকৃত টীকা।

পাধিভেদাদাবিদ্যকমাত্মনঃ সংসারিত্বং আভাসরূপংপ্রাতিভাসিকং সিধ্যতীত্যর্থঃ। আত্মনো ব্রহ্মতা স্বতশ্চেদহমিতিত্বাত্মভাবেন ব্রহ্মতাপি ভায়াদিত্যাশঙ্কাহ যথেতি। দেহাদ্যতিরিক্তস্যাত্মনো বৈদিকপক্ষে স্বতস্ত্বেঽপি তস্মিন্নহমিতি ভাত্যেব তদতিবিক্তত্বং ন ভাতি কিন্ত্ববিদ্যাতো দেহাদ্যাত্মত্বমেব বিপরীতং ভাসতে তথাত্মনো ব্রহ্মত্বে স্বাভাবিকেঽপি তস্মিন্ ব্রহ্মত্বং ন ভাত্যবিদ্যাতোঽব্রহ্মত্বমেব তস্য ভাতীত্যর্থঃ। আত্মনো দেহাদ্যাত্মত্বমাবিদ্যকং ভাতীত্যুক্তং অনুভবেন স্পষ্টয়তি সর্ব্বেতি। অতস্মিংস্তদ্বুদ্ধিরবিদ্যাকৃতেত্যত্র দৃষ্টান্তমাহ যথেতি পুবস্থিতে বস্তুনি বস্তুতঃ স্থাণাববিদ্যয়া পুমানিতি নিশ্চয়ো জায়তে তথা দেহাদাবনাত্মন্যাত্মধীরবিদ্যাতো নিশ্চিতেত্যর্থঃ। দেহাত্মনোবৈক্যজ্ঞানে দেহধর্ম্মস্য জরাদেরাত্মন্যাত্মধর্ম্মস্য চ চৈতন্যস্য দেহেঽপি নিয়মঃ স্যাদিত্যাশঙ্কাহ ন চেতি। স্থাণৌ পুরুষত্বং ভ্রান্ত্যা ভাতীত্যেতাবতা পুরুষধর্ম্মঃ শিবঃপাণ্যাদি ন স্থাণোর্ভবতি তদ্ধর্ম্মো বা ঋজ্বাদি ন পুংসো দৃশ্যতে মিথ্যাধ্যস্ততাদাত্ম্যাদ্বস্তুতো ধর্ম্মাব্যতিকরাদিতি দৃষ্টান্তমুক্ত্বা দার্ষ্টান্তিকমাহ তথেতি। জরাদেরনাত্মধর্ম্মত্বেঽপি সুখাদেরাত্মধর্ম্মত্বমিতি কেচিত্তান্ প্রত্যাহ সুখেতি। কামসংকল্পাদিশ্রুতেরনাত্মধর্ম্মত্বজ্ঞানাদিত্যর্থঃ। কিঞ্চ বিমতো নাত্মধর্ম্মোঽবিদ্যাকৃতত্বাজ্জরাদিবন্ন চ হেত্বসিদ্ধিবতস্মিংস্তদ্বুদ্ধিবিষয়ত্বেন স্থাণৌ পুরুষত্ববদবিদ্যাকৃতত্বস্যোক্তত্বাদিতি মত্বাহ অবিদ্যেতি। স্থাণৌ পুরুষত্ববদাবিদ্যকত্বং দেহাদেরযুক্তং দৃষ্টান্তদার্ষ্টান্তিকয়োর্বৈষম্যাদিতি শঙ্কতে নেতি। তদেব প্রপঞ্চয়তি স্থাণ্বিত্যাদিনা। জ্ঞেয়স্য জ্ঞেয়ান্তরেঽধ্যাসাদত্র চোভয়োর্জ্ঞেয়ত্বব্যাপকব্যাবৃত্ত্যা ব্যাপ্যাধ্যাসস্যাপি ব্যাবৃত্তিরিত্যর্থঃ। দেহাত্মবুদ্ধের্ভ্রমত্বাভাবে ফলিতমাহ অত-

## স্বামিকৃত টীকা।

তদেবং সংসারিণঃ স্বরূপমুক্তমিদানীং তস্যৈব পারমার্থিকমসংসারিস্বরূপমাহ ক্ষেত্রজ্ঞমিতি। তঞ্চ ক্ষেত্রজ্ঞং সংসারিণং জীবং বস্তুতঃ সর্ব্বক্ষেত্রেষ্বনুগতং মামেব বিদ্ধি তত্ত্বমসীতি শ্রুত্যুপলক্ষিতেন চিদংশেন মদ্রূপস্যোক্তত্বাৎ। আদবার্থমেতৎ জ্ঞানং স্তৌতি ক্ষেত্রক্ষেত্রজ্ঞয়োর্যদ্বৈলক্ষণ্যেন জ্ঞানং তদেব মোক্ষহেতুত্বাৎ জ্ঞানং মম মতং অন্যত্তু বৃথাপাণ্ডিত্যং বন্ধহেতুত্বাদিত্যর্থঃ। তদুক্তং, তৎ কর্ম্ম যন্ন বন্ধায় সা বিদ্যা যা চ মুক্তয়ে। আয়াসারাপরং কর্ম্ম বিদ্যান্যা শিল্পনৈপুণমিতি॥ ২॥

## শাঙ্করভাষ্যম্।

দদ্বৈতিনাং পুনর্দ্বৈতস্যাপরমার্থত্বাদবিদ্যাকৃতত্বাৎ বন্ধাবস্থায়াশ্চ আত্মনোঽপরমার্থত্বে নির্ব্বিষয়ত্বাৎ শাস্ত্রাদ্যানর্থক্যমিতি চেন্নাত্মনোঽবস্থাভেদানুপপত্তেঃ যদি তাবদাত্মনো বন্ধমুক্তাবস্থে যুগপৎ স্যাতাং ক্রমেণ বা যুগপত্তাবদ্বিরোধন্ন সম্ভবতঃ স্থিতিগতী ইবৈকস্মিন্ ক্রমভাবিত্বে চ নির্নিমিত্তত্বে নির্ম্মোক্ষপ্রসঙ্গোঽন্যনিমিত্তত্বে চ স্বতোঽভাবাদপরমার্থত্বপ্রসঙ্গস্তথা চ

## গিরিকৃত টীকা।

ইতি। উপাধিধর্ম্মাণাং সুখাদীনাং উপহিতে জীবে বস্তুত্বমযুক্তমতিপ্রসঙ্গাদিতি পরিহরতি নেত্যাদিনা। অতিপ্রসঙ্গমেব প্রকটয়তি যদীতি। সুখাদিনামাত্মধর্ম্মত্বং চেদুপাধিধর্ম্মত্বাদচৈতন্যং জ্বরাদিকঞ্চাত্মনো দুর্ব্বারং স্যাদিত্যর্থঃ। সুখাদিরাত্মধর্ম্মো নেতি পক্ষেঽপি নাস্তি বিশেষহেতুরিত্যাশঙ্ক্যাহ নেতি। তদেবানুমানং স্মারয়তি অবিদ্যেতি। বিমতং নাত্মধর্ম্মঃ আগমাপায়িত্বাৎ সম্মতবদিত্যনুমানান্তরমাহ হেয়ত্বাদিতি। আদিশব্দাদৃশ্যত্বজড়ত্বাদি গৃহ্যতে। সুখাদীনাং জবাদিবদাত্মধর্ম্মত্বাভাবে তস্য বস্তুতোঽসংসারিত্বে ফলিতমাহ তত্রেতি। আরোপিতেনাধিষ্ঠানস্য বস্তুতোঽস্পর্শে দৃষ্টান্তমাহ যথেতি। পরাভিন্নস্যাত্মনঃ সংসারিত্বমধ্যস্তমিতি স্থিতে যৎপরস্য সংসারিত্বাপাদনং তদযুক্তমিত্যাহ এবঞ্চেতি। আত্মনি সংসারস্যারোপিতত্বাত্তদভিন্নে পরস্মিন্নাশঙ্কৈব তস্যাযুক্তেত্যেতদুপপাদয়তি ন হীতি। স্থাণৌ পুরুষনিশ্চয়বদাত্মনো দেহাদ্যাত্মত্বনিশ্চয়স্যাধ্যস্তত্বেত্যযুক্তং দৃষ্টান্তস্য জ্ঞেয়মাত্রবিষয়ত্বাদিতরস্য জ্ঞেয়জ্ঞাতবিষয়ত্বাদিত্যুক্তমনুবদতি যত্বিতি। বৈষম্যং দূষয়তি তদসদিতি। তর্হি কেন সমমিতি পৃচ্ছতি কথমিতি। অভীষ্টসাধর্ম্ম্যং দর্শয়তি অবিদ্যেতি। তস্যোভয়ত্রানুগতিমাহ তন্নেতি। জ্ঞেয়ান্তরে জ্ঞেয়স্যারোপনিয়মাৎ জ্ঞাতরি নারোপঃ স্যাদিত্যাশঙ্ক্যাহ যত্বিতি। নায়ং নিয়মো জ্ঞাতরি জরাদ্যারোপস্যোক্তত্বাদিত্যাহ তস্যাপীতি। জ্ঞেয়স্যৈব জ্ঞেয়ান্তরেঽধ্যাসনিয়মস্যেতি যাবৎ অতো জ্ঞাতরি নারোপব্যভিচারশঙ্কেত্যর্থঃ। আত্মন্যবিদ্যাধ্যাসে তত্রাবিদ্যায়াঃ স্বাভাবিকত্বাত্তদধীনত্বং সংসারিত্বমপি তথা স্যাদিতি শঙ্কতে অবিদ্যাবত্ত্বাদিতি। কাবিদ্যাবিপরীতগ্রহাদির্ব্বা অনাদ্যনির্ব্বাচ্যাজ্ঞানং বা নাদ্যো বিপরীতগ্রহাদেস্তমঃশব্দিতানির্ব্বাচ্যাজ্ঞানকার্য্যত্বাত্তন্নিষ্ঠস্যাত্মধর্ম্মত্বাযোগাদিত্যাহ নেত্যাদিনা। তদেব প্রপঞ্চয়তি তামসো হীতি। আবরণাত্মকত্বং বস্তুনি সম্যক্‌প্রকাশপ্রতিবন্ধকত্বং বিপরীতগ্রহণাদেরবিদ্যাকার্য্যত্বং বিদ্যাপোহ্যত্বেন সাধয়তি বিবেকেতি। ন চ কারণাবিদ্যানাদ্যনির্ব্বাচ্যাত্মধর্ম্মঃ স্যাদিতি যুক্তমনির্ব্বাচ্যত্বাদেব তস্যাত্মধর্ম্মত্বস্য দুর্ব্বচত্বাদিতি ভাবঃ। কিঞ্চ বিপরীতগ্রহাদেরন্বয়ব্যতিরেকাভ্যাং দোষজন্যত্বাবগমাদপি নাত্মধর্ম্মতেত্যাহ তামসে চেতি। তমঃশব্দিতাজ্ঞানোত্থে বস্তুপ্রকাশপ্রতিবন্ধকতিমিরকাদ্যাদিদোষস্তস্মিন্ সত্যজ্ঞানং মিথ্যাধীঃ সংশয়শ্চেতি, ত্রয়স্যোপলম্ভাদসতি তস্মিন্নপ্রতীতেরন্বয়ব্যতিরেকাভ্যাং বিপরীতজ্ঞানাদের্দোষাধীনত্বাধিগমান্ন কেবলাত্মধর্ম্মতেত্যর্থঃ। দোষস্য নিমিত্তত্বাৎ ভাব-

## শাঙ্করভাষ্যম্।

সত্যভ্যুপগমহানিঃ কিঞ্চ বন্ধমুক্তাবস্থয়োঃ পৌর্ব্বাপর্য্যনিরূপণায়াং বন্ধাবস্থা পূর্ব্বং প্রকল্প্যা অনাদিমত্যন্তবতী চ তচ্চ প্রমাণবিরুদ্ধং তথা মোক্ষাবস্থা সাদিমত্যনন্তবতী চ তাবৎ প্রমাণ বিরুদ্ধৈবাভ্যুপগম্যতে ন চাবস্থাবতোঽবস্থান্তরং গচ্ছতো নিত্যত্বমুপপাদয়িতুং শক্যমথানিত্যত্বদোষপরিহারায় বন্ধমুক্তাবস্তাভেদো ন কল্প্যতেঽতো দ্বৈতিনামপিশাস্ত্রানর্থক্যদোষোঽপি

---

## গিরিকৃত টীকা।

কার্য্যস্যোপাদাননিয়মাদনির্ব্বাচ্যাবিদ্যায়াশ্চাসম্মতেরাত্মৈব বিপর্য্যয়াদেরুপাদানমিতি চোদয়ন্তি অত্রাহেতি। বিপরীতগ্রহাদের্দ্দোষোত্থত্বং সপ্তম্যর্থঃ। অগ্রহাদিত্রিতয়মবিপর্য্যয়াদেঃ সত্যোপাদানত্বে সত্যত্বপ্রসঙ্গান্নাত্মা তদুপাদানং কিন্তু দোষস্য চক্ষুরাদিধর্ম্মকত্বগ্রহণাদগ্রহণাদেরপি দোষত্বাৎ করণধর্ম্মত্বং করণবিদ্যোত্থমন্তঃকরণং ন চ তদ্ধেতুরবিদ্যা সিদ্ধেতি বাচ্যমজ্ঞোঽহমিত্যনুভবাৎ স্বাপে চ পরামর্শাত্তদবগমাৎ কার্য্যলিঙ্গকানুমানাদাগমাচ্চ তৎপ্রসিদ্ধেরিতি পরিহরতি নেত্যাদিনা। সংগ্রহীতুশ্চোদ্যপরিহারযোশ্চোদ্যং বিবৃণোতি যত্ত্বিতি। অবিদ্যাবত্ত্বেঽপিজ্ঞাতুরসংসারিত্বাদুৎখাতদংষ্ট্রোরগবদবিদ্যা কিং করিষ্যতীত্যাশঙ্ক্যাহ তদেবেতি। মিথ্যাজ্ঞানাদিত্বমেবাত্মনঃ সংসারিত্বমিতি স্থিতে ফলিতমাহ তত্রেতি। ন করণে চক্ষুষীত্যাদিনোক্তমেব পরিহারং প্রপঞ্চয়তি তন্নেত্যাদিনা। তিমিরাদিদোষস্তৎকৃতো বিপরীতগ্রহাদিশ্চ ন গ্রহীতুরাত্মনোঽস্তীত্যত্র হেতুমাহ চক্ষুষইতি তদ্গাতেনাঞ্জনাদিসংস্কারেণ তিমিরাদৌ পরাকৃতে দেবদত্তস্য গ্রহীতুর্দ্দোষাদ্যনুপলম্ভান্ন তস্য তদ্ধর্ম্মত্বমতো বিমতং তত্ত্বতো নাত্মধর্ম্মো দোষত্বাত্তৎকার্য্যত্বাদ্বা সম্মতবদিত্যর্থঃ। কিঞ্চ বিপরীতগ্রহাদিস্তত্ত্বতো নাত্মধর্ম্মো বেদ্যত্বাৎ সম্প্রতিপন্নবদিত্যাহ সম্বেদ্যত্বাচ্চেতি। কিঞ্চ যদ্বেদ্যং তৎ স্বাতিরিক্তবেদ্যং যথা দীপাদি ইতি ব্যাপ্তের্ব্বিপরীতগ্রহাদীনামপি বেদ্যত্বাদতিরিক্তবেদ্যত্বে সম্বেদিতা ন সংবেদ্যধর্ম্মবান্বেদিতৃত্বাদ্যথা দেবদত্তোন স্বসংবেদ্যরূপাদিমানিত্যনুমানান্তরমাহ সংবেদ্যত্বাদেবেতি। কিঞ্চ বিপরীতগ্রহাদয়স্তত্ত্বতো নাত্মধর্ম্মাব্যভিচারিত্বাৎ কৃশত্বাদিবদিত্যাহ সর্ব্বেতি। উক্তমেব বিবৃণন্নাত্মনো বিপরীতগ্রহাদিস্বাভাবিকো বাগন্তুকো বেতি বিকল্প্যাদ্যং দূষয়তি আত্মন ইতি। অতো নির্ম্মোক্ষোঽবিদ্যাতজ্জধ্বস্তেরসম্ভাবাদিতি ভাবঃ। আগন্তুকোঽপি স্বতশ্চেদমুক্তিঃ পরতশ্চেত্তত্রাহ অবিক্রিয়স্যেতি। বিভুত্বাদবিক্রিয়ত্বাদমূর্ত্ত্যত্বাচ্চাত্মা ব্যোমবন্ন কেনচিৎ সংযোগবিভাগাবনুভবতি ন হি বিক্রিয়াভাবে ব্যোম্নি বস্তুতঃ সংযোগবিভাগাবসঙ্গত্বাচ্চাত্মনস্তদসংযোগান্ন পরতোঽপি এতস্মিন্বিপরীতগ্রহাদিত্যর্থঃ। তস্যাত্মধর্ম্মত্বাভাবে ফলিতমাহ সিদ্ধমিতি। আত্মনো নির্দ্ধর্ম্মকত্বে ভগবদনুমতিমাহ অনাদিত্বাদিতি। ঈশ্বরত্বে সত্যাত্মনোঽসংসারিত্বে বিধিশাস্ত্রস্যাধ্যক্ষাদেশ্চানর্থক্যাত্তাত্ত্বিকমেব তস্য সংসা-

## শাঙ্করভাষ্যম্।

রিহার্য্যএবেতি সমানত্বান্নাদ্বৈতবাদিনা পরিহর্ত্তব্যো দোষঃ ন চ শাস্ত্রানর্থক্যং যথাপ্রসিদ্ধা-বিদ্বৎপুরুষবিষয়ত্বাৎ শাস্ত্রস্য অবিদুষাং হি ফলহেত্বোরনাত্মনোরাত্মদর্শনং ন বিদুষাং বিদু-ষাং হি ফলহেতুভ্যামাত্মনোঽন্যত্বদর্শনে সতি তয়োরহমিত্যাত্মদর্শনানুপপত্তেঃ ন হ্যত্যন্তমূঢ় উন্মত্তাদিরপি জলাগ্ন্যোঃ ছায়াপ্রকাশয়োর্ব্বৈকাত্ম্যং পশ্যতি কিমুত বিবেকী তস্মান্ন বিধি-

## গিরিকৃত টীকা।

রিত্বমিতি শঙ্কতে নম্বিতি। বিদ্যাবস্থায়ামবিদ্যাবস্থায়াম্বা শাস্ত্রানর্থক্যমিতি বিকল্প্যাদ্যং প্রত্যাহ ন সর্ব্বৈরিতি। বিদুষো মুক্তস্য সংসারতদাধারত্বয়োরভাবস্য সর্ব্ববাদিসম্মতত্বাত্তত্র শাস্ত্রানর্থক্যাদিচোদ্যং ময়ৈব ন প্রতিবিধেয়মিত্যর্থঃ। সংগ্রহবাক্যং বিবৃণোতি সর্ব্বৈ-রিতি। অভিপ্রায়াজ্ঞানাৎ প্রশ্নে স্বাভিপ্রায়মাহ কথমিত্যাদিনা। তর্হি মুক্তান্ প্রতি বিধিশাস্ত্রস্যাধ্যক্ষাদেশ্চানর্থক্যমিত্যাশঙ্ক্যাহ ন চেতি। ন হি ব্যবহারাতীতেষু তেষু গুণ-দোষাশঙ্কেত্যর্থঃ। দ্বৈতিনাং মতে মুক্তাত্মস্বিবাস্মৎপক্ষেঽপি ক্ষেত্রজ্ঞস্যেশ্বরত্বে তং প্রতি চ শাস্ত্রাদ্যানর্থক্যং বিদ্যাবস্থায়ামাস্থিতমিতি ফলিতমাহ তথেতি। দ্বিতীয়ং দূষয়তি অবিদ্যেতি। তদেব দৃষ্টান্তেন বিবৃণোতি যথেতি। এবমদ্বৈতিনামপিবিদ্যোদয়াৎ প্রাগ-র্থবত্ত্বং শাস্ত্রাদেরিতিশেষঃ। দ্বৈতিভিরদ্বৈতিনান্ন সাম্যমিতি শঙ্কতে নম্বিতি। অবস্থয়ো-র্বস্তুত্বে তন্মতে শাস্ত্রাদ্যর্থবত্ত্বে ফলিতমাহ অত ইতি। সিদ্ধান্তে তু নাবস্থয়োর্বস্তুতেতি বৈষম্যমাহ অদ্বৈতিনামিতি। ব্যবহারিকং দ্বৈতং তত্তন্মতেঽপি স্বীকৃতমিত্যাশঙ্ক্যাহ অবি-দ্যেতি। কল্পিতদ্বৈতেন ব্যবহারান্ন তস্য বস্তুতেত্যর্থঃ। বন্ধাবস্থায়াঃ বস্তুত্বাভাবে দোষা-ন্তরমাহ বন্ধেতি। আত্মনস্তত্ত্বতোঽবস্থাভেদো দ্বৈতিনামপি নাস্তীতি পরিহরতি নেতি অনুপপত্তিং দর্শয়িতুং বিকল্পয়তি যদীতি। তত্রাদ্যং দূষয়তি যুগপদিতি। দ্বিতীয়েঽপি ক্রমভাবিন্যোরবস্থয়োর্নির্নিমিত্তত্বং সনিমিত্তত্বং বেতি বিকল্প্যাদ্যে সদাপ্রসঙ্গাদ্বন্ধমো-ক্ষয়োরব্যবস্থা স্যাদিত্যাহ ক্রমেতি। কল্পান্তরন্নিরস্যতি অন্যেতি। বন্ধমোক্ষাবস্থে ন পরমার্থে অস্বাভাবিকত্বাৎ স্ফটিকলৌহিত্যবদিতিস্থিতে ফলিতমাহ তথাচেতি। অব-স্থয়োর্ব্বস্তুত্বোপগমাদিত্যর্থঃ। ইতশ্চাবস্থয়োর্ন বস্তুত্বমিত্যাহ কিঞ্চেতি অবস্থয়োর্ব্বস্তুত্ব-মিচ্ছতা তয়োর্যৌগপদ্যাযোগাদ্বাচ্যে ক্রমে বন্ধস্য পূর্ব্বত্বং মুক্তেশ্চ পাশ্চাত্যমিতিস্থিতে বন্ধস্যাদিত্বকৃতং দোষমাহ বন্ধেতি। তস্যাশ্চাকৃতাভ্যাগমকৃতবিনাশনিবৃত্তয়েঽনাদিত্ব-মেষ্টব্যমন্তবত্ত্বঞ্চমুক্ত্যর্থমাস্থেয়ং তচ্চ যদনাদিভাবরূপং তন্নিত্যং যথাত্মেতি ব্যাপ্তিবিরুদ্ধ-মিত্যর্থঃ। মোক্ষস্য পাশ্চাত্যকৃতং দোষমাহ তথেতি। সা হি জ্ঞানাদিসাধ্যত্বাদাদিমতী পুনরাবৃত্ত্যনঙ্গীকারাদনন্তা চ তচ্চ যৎসাদিভাবরূপং তদন্তবদ্যথা পটাদীতি ব্যাপ্ত্যন্তর-বিরুদ্ধমিত্যর্থঃ। কিঞ্চ ক্রমভাবিনীভ্যামবস্থাভ্যামাত্মা সম্বধ্যতে ন বা প্রথমে পূর্ব্বাবস্থায়া-মপি পূর্ব্বাবস্থাবস্থানাদনির্মোক্ষঃ যদি পূর্ব্বাবস্থাং ত্যক্ত্বোত্তরাবস্থাং গচ্ছতি তদাপূর্ব্বত্যা-

## শাঙ্করভাষ্যম্।

প্রতিষেধশাস্ত্রস্তাবৎ ফলহেতুভ্যামাত্মনোঽন্যত্বদর্শিনো ভবতি ন হি দেবদত্ত ত্বমিদং কুর্ব্বিতি কস্মিংশ্চিৎ কর্ম্মণি নিযুক্তো বিষ্ণুমিত্রোঽহং নিযুক্তইতি তত্রস্থো নিয়োগং শৃণ্বন্নপি প্রতিপদ্যতে নিয়োগবিষয়বিবেকাগ্রহণাত্তূপপদ্যতে প্রতিপ্রত্তিস্তথা ফলহেত্বোরপি। নমু প্রাকৃতসম্বন্ধাপেক্ষয়া যুক্তৈবাপ্রতিপত্তিঃ শাস্ত্রার্থবিষয়াফলহেতুভ্যামন্যাত্মত্বদর্শনেঽপি সতি ইষ্ট-

## গিরিকৃত টীকা।

গোত্তরাপ্ত্যোরাত্মনঃ সাতিশয়ত্বান্নিত্যত্বানুপপত্তিরিত্যাহ ন চেতি। আত্মনোঽবস্থাদ্বয়সম্বন্ধো নাস্তীতি দ্বিতীয়মনূদ্য দূষয়তি অথেত্যাদিনা। তর্হি পক্ষদ্বয়েঽপি দোষাবশেষান্নাদ্বৈতমতানুরাগে হেতুরিত্যাশঙ্ক্যাবিদ্যাবিষয়ে চেত্যুক্তং বিবৃণোতি ন চেতি। তদেব স্ফুটয়তি অবিদুষাং হীতি। ফলং ভোক্তৃত্বে কর্ত্তৃত্বে হেতুঃ যদ্বা ফলং দেহবিশেষো হেতুরদৃষ্টং তয়োরনাত্মনো ভোক্তাহং কর্ত্তাহং মনুষ্যোঽহমিত্যাদাবাত্মদর্শনমধিকারকং তেনাবিদ্বদ্বিষয়ং বিধিনিষেধশাস্ত্রমিত্যর্থঃ। বিদুষামপি মনুষ্যোঽহমিত্যাদিব্যবহারাত্তদ্বিষয়ং শাস্ত্রং কিং ন স্যাদিত্যাশঙ্ক্যাহ নেতি। ভোক্তৃত্বকর্ত্তৃত্বাভ্যাং ব্রহ্মণ্যাদিমতো দেহধর্ম্মাধর্ম্মাভ্যাঞ্চাত্মনোঽন্যত্বং পশ্যতো ন বিধিনিষেধাধিকারিত্বমুক্তফলাদাবাত্মাত্মীয়াভিমানাসম্ভবাদিত্যর্থঃ। আত্মনো দেহাদেরন্যত্বদর্শিনো ন দেহাদাবাত্মধীরিত্যেতদুপপাদয়তি ন হীতি। বিদুষো ন বিধিনিষেধাধিকারিতেত্যুক্তমুপসংহরতি তস্মাদিতি। শাস্ত্রস্যাবিদ্বদ্বিষয়ত্বমিব বিদ্বদ্বিষয়ত্বমপি মন্তব্যমুভয়োরপি শাস্ত্রশ্রবণাবিশেষাদিত্যাশঙ্ক্যাহ ন হীতি। তত্রস্থো যস্মিন্ দেশে দেবদত্তঃ স্থিতস্তত্রৈব বর্ত্তমানঃ সন্নিত্যর্থঃ। নমু দেবদত্তে নিযুক্তে বিষ্ণুমিত্রোঽপি কদাচিন্নিযুক্তোঽস্মীতি প্রপিদ্যতে সত্যং নিয়োগবিষয়ানিয়োজ্যাদাত্মনো বিবেকাগ্রহণান্নিযোজ্যত্বভ্রান্তেরিত্যাহ নিয়োগেতি। অবিবেকিনো নিযোজ্যধীর্ভবতীতি দৃষ্টান্তমুক্ত্বা ফলে হেতৌ চাত্মদৃষ্টিবিশিষ্টস্যাবিদুষঃ সম্ভবত্যেব বিধিনিষেধাধিকারিত্বমেবং দার্ষ্টান্তিকমাহ তথেতি। বিধিনিষেধশাস্ত্রমবিদ্বদ্বিষয়মিতি বদতা শাস্ত্রানর্থক্যং সমাহিতং সম্প্রতি শাস্ত্রস্য বিদ্বদ্বিষয়ত্বেনৈবার্থবত্বং শক্যসমর্থনমিতি শঙ্কতে নম্বিতি। প্রকৃতিরবিদ্যা ততো জাতো যো দেহাদাবভিমানাত্মা সম্বন্ধো বিদ্যোদয়াৎ প্রাগনুভূতস্তদপেক্ষয়া বিধিনা প্রবর্ত্তিতো নিষেধেন নিবর্ত্তিতোঽস্মীতি বিধিনিষেধবিষয়া সত্যামপি বিদ্যায়াং ধীর্যুক্তৈবেত্যর্থঃ বিদুষোঽপি পূর্ব্বমাবিদ্যকং সম্বন্ধমপেক্ষ্য বিধিনিষেধবিষয়াদ্ধিয়মুক্তামেব ব্যক্তীকরোতি ইষ্টেতি। নম্বিদুষো মিথ্যাভিমানবন্ন বিদুষঃ সোঽনুবর্ত্ততে তথা চাবিদ্যাসম্বন্ধাপেক্ষয়া বিদুষো যথোক্তা ধীরিতি তত্রাহ যথেতি। পিতা পুত্রো ভ্রাতেত্যাদীনাং মিথোঽন্যত্বদৃষ্টাবপ্যন্যোন্যনিয়োগার্থস্য নিষেধার্থস্য চ ধীর্দৃষ্টা পিতরমধিকৃত্য বিধৌ নিষেধে বা তস্য তদনুষ্ঠানাশক্তৌ পুত্রস্য তদ্বিষয়া ধীরিষ্টা অথাতঃ সম্প্রতি যদা প্রৈষ্যন্মন্যতেঽথ পুত্রমাহ ত্বং ব্রহ্ম ত্বং যজ্ঞঃ ত্বং লোক ইত্যাদি সম্প্রত্তির্ণাম্ন্যা কৃত্যা-

## শাঙ্করভাষ্যম্।

ফলহেতোঃ প্রবর্ত্তিতোঽস্ম্যনিষ্টফলহেতোশ্চ নিবর্ত্তিতোঽস্মীতি যথা পিতৃপুত্রাদীনামিতরেত-রাত্মান্যত্বদর্শনে সত্যপ্যন্যোন্যনিয়োগপ্রতিষেধার্থপ্রতিপত্তির্ন ব্যতিরিক্তাত্মদর্শনপ্রতিপত্তেঃ প্রাগেব ফলহেত্বোরাত্মাভিমানস্য সিদ্ধত্বাৎ প্রতিপন্ননিয়োগপ্রতিষেধার্থো হি ফলহেতুভ্যা-মাত্মনোঽন্যত্বং প্রতিপদ্যতে ন পূর্ব্বং তস্মাদ্বিধিপ্রতিষেধশাস্ত্রমবিদ্বদ্বিষয়মিতি সিদ্ধং। নন্ু

## গিরিকৃত টীকা।

শেষানুষ্ঠানস্য পুত্রকার্য্যতাপ্রতিপাদনাৎ পুত্রস্যাধিকৃত্য বিধিনিষেধপ্রবৃত্তৌ তস্য তদশক্তৌ পিতুস্তথা ধীরূপগতা তথা ভ্রাত্রাদিষ্বপি দ্রষ্টব্যং এবং বিদুষো হেতুফলাভ্যামন্যত্বদর্শনেঽপি প্রাক্কালীনাবিদ্যকদেহাদিসম্বন্ধাদবিরুদ্ধা বিধিনিষেধার্থা ধীরিত্যর্থঃ। পুত্রাদীনাং মিথ্যা-ভিমানাশ্রিথো নিয়োগধীর্যু্ক্তা তত্ত্বদর্শিনস্তু তদভাবান্ন দেহাদিসম্বন্ধাধীনা নিয়োগধীরিতি পরিহরতি নেত্যাদিনা। কিঞ্চ সর্ব্বাপেক্ষা যজ্ঞাদিশ্রুতেরশ্ববদিতি সর্ব্বাপেক্ষাধিকরণে সম্যগ্জ্ঞানস্য দৃষ্টসাধ্যত্বোক্তের্ব্বিধিনিষেধার্থানুষ্ঠানং সম্যগ্জ্ঞানাৎ পূর্ব্বমিতি কুতো বিদু-ষস্তদনুষ্ঠানমিত্যাহ প্রতিপন্নেতি। সত্যদৃষ্টেঃ সম্যগ্ধীদৃষ্টেধসতি চাশুদ্ধবুদ্ধেস্তদভাবাদন্ব-য়ব্যতিরেকাভ্যাং বিবিদিষাবাক্যাচ্চ বিধিনিষেধানুষ্ঠানাৎ পূর্ব্বঃ ন সম্যগ্ধীরিত্যাহ ন পূর্ব্বমিতি বিধিনিষেধয়োর্ব্বিদ্বদ্বিষয়ত্বাযোগে ফলিতমাহ তস্মাদিতি। শাস্ত্রস্যাবিদ্বদ্বিষয়ত্বেনোক্ত-মর্থবত্ত্বমাক্ষেপসমাধিভ্যাং প্রপঞ্চয়িতুমাক্ষিপতি নন্বিতি। চকারাদুর্দ্ধমপ্রবৃত্তিরিতি সম্ব-ধ্যতে। আত্মনো দেহাদ্যতিরেকং পশ্যতাং দেহাদ্যভিমানরূপাধিকারহেত্বভাবাদ্বিধিতো যাগাদাবপ্রবৃত্তির্নিষেধাচ্চাভক্ষ্যভক্ষণাদের্ন নিবৃত্তিরতস্তেষাং প্রবৃত্তিনিবৃত্ত্যোরভাবে দেহা-দাবাত্মত্বমনুভবতামপি ন তে যুক্তে তেষাং পারলৌকিকভোক্তৃপ্রতিপত্ত্যভাবাদিত্যর্থঃ। বিদুষামবিদুষাঞ্চ প্রবৃত্তিনিবৃত্ত্যভাবে ফলিতমাহ অত ইতি। আত্মনো দেহাদ্যতিরিক্তং পরোক্ষমপরোক্ষঞ্চ দেহাদ্যাত্মত্বং পশ্যতঃ শাস্ত্রানুরোধাদেব প্রবৃত্তিনিবৃত্ত্যুপপত্তের্ন শাস্ত্রা-নর্থক্যমিত্যুত্তরমাহ নেত্যাদিনা। প্রসিদ্ধিরত্র শাস্ত্রাভিমতা। এতদেব বিবৃণ্বন্ ব্রহ্মবিদো বা নৈরাত্ম্যবাদিনো বা পরোক্ষজ্ঞানবতো বা প্রবৃত্তিনিবৃত্তাবিহ বক্ষ্যসীতি বিকল্প্যাদ্যং দূষয়তি ঈশ্বরেতি। ন নিবর্ত্ততে চেত্যপি দ্রষ্টব্যং। দ্বিতীয়ং নিরস্যতি তথেতি। পূর্ব্ব-বদত্রাপি সম্বন্ধঃ। তৃতীয়মঙ্গীকরোতি যথেতি। বিধিনিষেধাধীনাং প্রসিদ্ধিমনুরুদ্ধানঃ সন্নিতি যাবৎ, চকারান্নিবর্ত্ততে চেত্যনুকৃষ্যতে। ব্রহ্মমিদং নৈরাত্ম্যবাদিনঞ্চ ত্যক্ত্বা দেহা-দ্যতিরিক্তমাত্মানং পরোক্ষমপরোক্ষঞ্চ দেহাদ্যাত্মত্বং পশ্যতো বিধিনিষেধাধিকারিত্বে সিদ্ধে ফলমাহ অত ইতি। বিধান্তরেণ শাস্ত্রানর্থক্যশোদয়তি বিবেকিনামিতি। দৃষ্টা হি তেষাং বিধিনিষেধয়োরপ্রবৃত্তির্ন হি দেহাদিভ্যোনিষ্কৃষ্টমাত্মানং দৃষ্টবতাং তয়োরধিকার-স্তেন ত্বাম্প্রতি শাস্ত্রং নার্থবন্ন চ দেহাদ্যাত্মত্বদৃশস্তত্রাধিক্রিয়ন্তে তেষাং যদ্যদাচরতীতি ন্যায়েন বিবেকিনোঽনুগচ্ছতাং বিধ্যাদাবপ্রবৃত্তেরতোঽধিকার্য্যভাবাদ্বিধ্যাদিশাস্ত্রস্য তদনু-

## শাঙ্করভাষ্যম্।

স্বর্গকামো যজেত কলঞ্জং ন ভক্ষয়েদিত্যাদাবাত্মব্যতিরেকদর্শিনামপ্রবৃত্তৌ কেবলদেহাদ্যাত্মদৃষ্টীনাঞ্চাতঃ কর্ত্তৃরভাবাচ্ছাস্ত্রানর্থক্যমিতি চেন্ন যথাপ্রসিদ্ধিত এব প্রবৃত্তিনিবৃত্ত্যুপপত্তেঃ ঈশ্বরক্ষেত্রজ্ঞৈকত্বদর্শী ব্রহ্মবিত্তাবন্ন প্রবর্ত্ততে তথা নৈরাত্ম্যবাদ্যপি নাস্তি পরলোক ইতি ন প্রবর্ত্ততে যথাপ্রসিদ্ধস্তু বিধিপ্রতিষেধশাস্ত্রশ্রবণান্যথানুপপত্ত্যানুমিতাত্মাস্তিত্ব আত্মবিশেষানভিজ্ঞঃ কর্ম্মফলসঞ্জাততৃষ্ণঃ শ্রদ্ধধানতয়া চ প্রবর্ত্তত ইতি সর্ব্বেষাং নঃ প্রত্যক্ষমতো ন শাস্ত্রানর্থক্যং বিবেকিনামপ্রবৃত্তিদর্শনাত্তদনুগামিনামপ্রবৃত্তৌ শাস্ত্রানর্থক্যমিতি চেন্ন কস্যচিদেব বিবেকোপপত্তেরনেকেষু হি প্রাণিষু কশ্চিদেব বিবেকী স্যাদ্যথৈবেদানীন্ন চ বিবেকিনমনুবর্ত্তন্তে মূঢ়া রাগাদিদোষতন্ত্রত্বাৎ প্রবৃত্তেরভিচরণাদৌ চ প্রবৃত্তিদর্শনাৎ স্বাভাব্যাচ্চ

---

## গিরিকৃত টীকা।

সারিশিষ্টাচারস্য চানর্থক্যমিত্যর্থঃ। কিং সর্ব্বেষাং বিবেকিত্বাদধিকার্য্যভাবাদানর্থক্যং শাস্ত্রস্যোচ্যতে কিম্বা কস্যচিদেব বিবেকিত্বেঽপি তদনুবর্ত্তিত্বাদন্যেষামপ্রবৃত্তেরানর্থক্যং চোদ্যতে তত্র প্রথমং প্রত্যাহ ন কস্যচিদিতি। মনুষ্যাণাং সহস্রেষিতি ন্যায়েনোক্তমেব স্ফুটয়তি অনেকেম্বিতি। তত্রানুভবানুরোধেন দৃষ্টান্তমাহ যথেতি। দ্বিতীয়ং দূষয়তি ন চেতি। কিঞ্চ বিবেকিনামপ্রবৃত্তাবনন্যেষামপ্যপ্রবৃত্তিরিত্যাশঙ্কাং নিরসিতুং শ্যেনাদৌ তদপ্রবৃত্তাবপি ইতরপ্রবৃত্তেরিত্যাহ অভিচরণাদৌ চেতি। অবিবেকিনাং রাগাদিদ্বারা প্রবৃত্ত্যাস্পদং সর্ব্বং সংগ্রহীতুমাদিপদং। ইতশ্চ বিবেকিনাং প্রবৃত্ত্যভাবেঽপি নান্যস্যাপ্রবৃত্তিরিত্যাহ স্বাভাব্যাচ্চেতি। প্রবৃত্তেঃ স্বাভাবাথ্যাজ্ঞানকার্য্যত্বে ভগবদ্বাক্যমনুকূলয়তি স্বভাবস্থিতি। প্রবৃত্তেরজ্ঞানজন্যত্বে বিধিনিষেধাধীনপ্রবৃত্তিনিবৃত্ত্যাত্মকবন্ধস্যাবিদ্যামাত্রত্বাদবিদ্বদ্বিষয়ত্বং শাস্ত্রস্য সিদ্ধমিতি ফলিতমাহ তস্মাদিতি। দৃষ্টমেবানুসরন্নবিদ্বানথাদৃষ্টস্তদ্বিষয়স্তদাশ্রয়ঃ সংসারস্তথা চ প্রবৃত্তিনিবৃত্ত্যাত্মকসংসারস্যাবিদ্বদ্বিষয়ত্বা তদ্ধেতুবিধিশাস্ত্রস্যাপি তদ্বিষয়ত্বমিত্যর্থঃ। নম্ববিদ্যা ক্ষেত্রজ্ঞমাশ্রয়ন্তী স্বকার্য্যং সংসারমপি তস্মিন্নাধত্তে তেনাস্যৈব শাস্ত্রাধিকারিত্বং নেত্যাহ নেতি। অবিদ্যাদেঃ শুদ্ধে ক্ষেত্রজ্ঞে বস্তুতোঽসম্বন্ধেঽপি তত্তস্মিন্নারোপিতং তমেব দুঃখাকরোতীত্যত্রাহ ন চেতি তদেব দৃষ্টান্তেন দর্শয়তি ন হীতি। ক্ষেত্রজ্ঞস্য বস্তুতোঽবিদ্যাসম্বন্ধে ভগবদ্বচোঽপি দ্যোতকমিত্যাহ অতইতি। ক্ষেত্রজ্ঞেশ্বরয়োরৈক্যে কিমিত্যসাবাত্মানমহমিতি বুধ্যমানোঽপি স্বস্যেশ্বরত্বমীশ্বরোঽস্মীতি ন বুধ্যতেত ত্রাহ অজ্ঞানেনেতি। আত্মনো বস্তুতঃ সংসারাসংস্পর্শে বিদ্বদনুভববিরোধঃ স্যাদিতি চোদয়তি অর্থেতি। এবমিত্যভিজাত্যাদিবৈশিষ্ট্যমুক্তং ইদমা, ক্ষেত্রকলত্রাদি পণ্ডিতানামপি প্রতীতং সংসারিত্বমিতিশেষঃ। কিং পাণ্ডিতং দেহাদাবাত্মদর্শনংকিম্বা কূটস্থাত্মদৃষ্টিরাহো সংসারিত্বাদিধীরিতি বিকল্প্যাদ্যং নিরাকুর্ব্বান্নাহ শৃণ্বিতি। তচ্চ বস্তুতোঽসংসারিত্বাবিরোধি প্রাতিভাসিকন্ত সংসারিত্বমিষ্টমিতিশেষঃ। দ্বিতীয়ং দূষয়তি

## শাঙ্করভাষ্যম্।

প্রবৃত্তেঃ স্বভাবস্তু প্রবর্ত্তত ইতি উক্তং তস্মাদবিদ্যামাত্রং সংসারো যথাদৃষ্টবিষয়এব ন ক্ষেত্রজ্ঞস্য কেবলস্যাবিদ্যাতৎকার্য্যঞ্চ ন চ মিথ্যাজ্ঞানং পরমার্থবস্তু দূষয়িতুং সমর্থং নহ্যূষরদেশং স্নেহেন পঙ্কীকর্ত্তুং শক্নোতি মরীচ্যুদকন্তথাবিদ্যা ক্ষেত্রজ্ঞস্য ন কিঞ্চিৎ কর্ত্তুং শক্নোত্যতশ্চেদমুক্তং ক্ষেত্রজ্ঞঞ্চাপি মাং বিদ্ধি অজ্ঞানেনাবৃতং জ্ঞানমিতি চ অথ কিমিদং সংসারিণামিবাহমেবং মমৈবেদমিতি পণ্ডিতানামপি শৃণ্বিদং তৎ পাণ্ডিত্যং যৎক্ষেত্রএবাত্মদর্শনং যদি পুনঃ ক্ষেত্রজ্ঞমবিক্রিয়ং পশ্যেয়ুস্ততো ন ভোগং কর্ম্ম বাকাঙ্ক্ষেয়ুর্ম্ম স্যাদিতি বিক্রিয়ৈব ভোগকর্ম্মণী অথৈবং সতি ফলার্থিত্বাদবিদ্বান প্রবর্ত্ততে বিদুষঃ পুনরবিক্রয়াত্মদর্শিনঃ ফলার্থিত্বাভাবাৎ প্রবৃত্ত্যনুপপত্তৌ কার্য্যকারণসঙ্ঘাতব্যাপারোপরমে নিবৃত্তিরুপচ-

## গিরিকৃত টীকা।

যদীতি। ন হি কূটস্থাত্মবিষয়ং সংসারিত্বং প্রতীয়তে যেন বস্তুতোঽসংসারিত্বং বিরুধ্যতে কূটস্থাত্মধীবিরুদ্ধায়াঃ সাংসারিত্ববুদ্ধেরনবকাশিত্বাদিত্যর্থঃ। আত্মানমক্রিয়ং পশ্যতোঽপি কুতো ভোগকর্ম্মণী ন স্যাতামিত্যাশঙ্ক্যাহ বিক্রিয়েতি। অবিক্রয়াত্মবুদ্ধের্ভোগকর্ম্মাকাঙ্ক্ষয়োরভাবে কস্য শাস্ত্রে প্রবৃত্তিরিত্যাশঙ্ক্যাহ অথেতি। ফলার্থিত্বাভাবাদ্বিদুষো ন কর্ম্মণি প্রবৃত্তিরিত্যেবং স্থিতে সত্যনন্তরমবিদ্বান্ ফলার্থিত্বাত্তদুপায়ে কর্ম্মণি প্রবর্ত্ততে শাস্ত্রেঽধিকারীত্যর্থঃ। বিদুষো বৈধপ্রবৃত্ত্যভাবেপি নিষেধাধীননিবৃত্তেরপি দুর্ব্বচত্বাত্তস্য নিবৃত্তিনিষ্ঠত্বাসিদ্ধিরিত্যাশঙ্ক্যাহ বিদুষ ইতি। তৃতীয়মুত্থাপয়তি ইদঞ্চেতি। সিদ্ধান্তাদবিশেষমাশঙ্ক্য ক্ষেত্রস্য ক্ষেত্রজ্ঞাৎ বস্তুতোঽভিন্নত্বেন তদ্বিষয়ত্বাঙ্গীকারান্নৈবমিত্যাহ ক্ষেত্রঞ্চেতি। অহংধীবেদ্যস্যাত্মনো বস্তুতঃ সংসারিত্বস্বীকারাচ্চ সিদ্ধান্তাদ্ভেদোঽস্তীত্যাহ অহস্ত্বিতি। সংসারিত্বমেব স্ফোরয়তি সুখীতি। সংসারিত্বস্য বস্তুত্বে তদনিবৃত্ত্যা পুমর্থাসিদ্ধিরিতিাশঙ্ক্যাহ সংসারেতি। কথং তদুপরমস্য হেতুং বিনা কর্ত্তব্যত্বমিত্যাশঙ্ক্যাহ ক্ষেত্রেতি। ক্ষেত্রং জ্ঞাত্বা ততো নিকৃষ্টস্য ক্ষেত্রজ্ঞস্য জ্ঞানং কথং সংসারোপরতিমুৎপাদয়েদিত্যাশঙ্ক্যাহ ধ্যানেনেতি। সংসারিত্বমাত্মনো বুধ্যমানস্য তদ্রহিতাদীশ্বরাদন্যত্বং বক্তব্যমিতি বক্তুমিতিশব্দঃ। তদেবান্যত্বমুপপাদয়তি যশ্চেতি। মম সংসারিণোঽসংসারীশ্বরত্বং কর্ত্তব্যমিত্যেবং যো বুধ্যতে যো বা তথাবিধং জ্ঞানং তব কর্ত্তব্যমিত্যুপদিশতি স ক্ষেত্রজ্ঞাদীশ্বরাদন্যো জ্ঞেয়োঽন্যথোপদেশানর্থক্যাদিত্যর্থঃ। আত্মত্বসংসারী পরস্মাদাত্মনোঽন্যস্তস্য ধ্যানাধীনাজ্ঞানেনেশ্বরত্বং কর্ত্তব্যমিত্যেতৎ জ্ঞানং পাণ্ডিত্যমিতি মতং দূষয়তি এবমিতি। অয়মাত্মা ব্রহ্মেত্যাত্মনো ব্রহ্মত্বশ্রুতিবিরোধাদিত্যর্থঃ। ননু সংসারস্য বস্তুত্বাঙ্গীকারাত্তৎপ্রতীত্যবস্থায়াং কর্ম্মকাণ্ডস্যার্থবত্ত্বং সংসারিত্বনিরাসেনাত্মনো ব্রহ্মত্বে ধ্যানাদিনা সাধিতে মোক্ষাবস্থায়াং জ্ঞানকাণ্ডস্যার্থবত্ত্বং তৎকথং যথোক্তজ্ঞানবান্ পণ্ডিতাপসদত্বেনাক্ষিপ্যতে তত্রাসংসার-

## শাঙ্করভাষ্যম্ ।

র্থ্যতে ইদঞ্চান্যৎ পাণ্ডিত্যং কস্যচিদস্তু ক্ষেত্রজ্ঞ ঈশ্বর এব ক্ষেত্রঞ্চান্যৎ ক্ষেত্রজ্ঞস্য বিষয়ঃ অহন্তু সংসারী সুখী দুঃখী মূঢ়ো জাতো মৃতো বিযুক্তঃ ক্ষীণো বৃদ্ধোঽহং মমৈবেত্যেবমাদয়ঃ সর্ব্বে আত্মনি অধ্যারোপ্যন্তে সংসারোপবমশ্চ মম কর্ত্তব্যং ক্ষেত্রক্ষেত্রজ্ঞবিজ্ঞানেন ধ্যানেন চেশ্বরং ক্ষেত্রজ্ঞং সাক্ষাৎকৃত্বা তৎস্বরূপাবস্থানেনেতি যশ্চৈবং বুধ্যতে যশ্চ বোধয়তি নাসৌ ক্ষেত্রজ্ঞ ইত্যেবং মন্বানো যঃ স পণ্ডিতাপসদঃ সংসারমোক্ষয়োঃ শাস্ত্রস্য চার্থবত্বং করোমী-ত্যাত্মহা স্বয়ং মূঢ়োঽন্যাংশ্চ ব্যামোহয়তি শাস্ত্রার্থসম্প্রদায়রহিতত্বাৎ শ্রুতহানিমশ্রুতকল্প-নাঞ্চ কুর্ব্বংস্তস্মাদসম্প্রদায়বিৎ সর্ব্বশাস্ত্রবিদপি মূর্খবদেবোপেক্ষণীয়ঃ ত্বত্তু ক্তমস্মিবস্য ক্ষেত্র-জ্ঞৈকত্বে সংসারিত্বং প্রাপ্নোতি ক্ষেত্রজ্ঞানাঞ্চেশ্বরৈকত্বে সংসারিণোঽভাবাৎ সংসারাভাব

---

## গিরিকৃত টীকা ।

বেতি। করোমীতি মন্যমানো যঃ স পণ্ডিতাপসদ ইতি পূর্ব্বেণ সম্বন্ধঃ। কর্ম্মকাণ্ডং হি কল্পিতং সংসারিত্বমধিকৃত্য সাধ্যসাধনসম্বন্ধবোধপদার্থবদিষ্টং জ্ঞানকাণ্ডমপি তথাবিধং সংসারিত্বং পরাকৃত্যাখণ্ডৈকরসে প্রত্যগ্ ব্রহ্মণি পর্য্যবস্যদর্থবদ্ভবেদিত্যর্থঃ। কিঞ্চাত্মনঃ শাস্ত্রসিদ্ধং ব্রহ্মত্বং ত্যক্ত্বা ব্রহ্মত্বং কল্পয়ন্নাত্মহা ভূত্বা লোকদ্বয়বহির্ভূতঃ স্যাদিত্যাহ আত্মহেতি। নমু ক্ষেত্রজ্ঞঞ্চাপি মাং বিদ্ধীত্যনেন সর্ব্বক্ষেত্রান্তর্যামী পরো জীবাদন্যো নিরুচ্যতে ন জীবস্যেশ্বরত্বমত্র প্রতিপাদ্যতে তৎকথমিত্থমাক্ষিপ্যতে তত্রাহ স্বয়মিতি। কিঞ্চ তত্ত্বমসীতিবৎ প্রসিদ্ধক্ষেত্রজ্ঞানুবাদেনাপ্রসিদ্ধং তস্যেশ্বরত্বমিহোপদেশতঃ শ্রুতং তস্য হানিমশ্রুতস্য চ জীবেশ্বরয়োস্তাত্ত্বিকভেদস্য কল্পনাং কুর্ব্বন্ কথং ব্যামূঢ়ো ন স্যাদি-ত্যাহ শ্রুতে। নমু কেচন ব্যাখ্যাতারো যথোক্তং পাণ্ডিত্যং পুরস্কৃত্য ক্ষেত্রজ্ঞঞ্চাপী-ত্যাদিশ্লোকং ব্যাখ্যাতবন্তঃ তৎ কথমুক্তং পাণ্ডিত্যমাস্থাতুর্ব্যামূঢত্বং তত্রাহ তস্মাদিতি। ক্ষেত্রজ্ঞঞ্চাপীত্যত্র ক্ষেত্রজ্ঞেশ্বরয়োরৈক্যং স্বাভীষ্টং স্পষ্টয়িতুং প্রত্যুক্তমেব চোদ্যমনুদ্রবশি যত্তূক্তমিতি। তাত্ত্বিকমেকত্বমতাত্ত্বিকং সংসারিত্বমিত্যঙ্গীকৃত্যোক্তমেব সমাধিং স্মার-য়তি এতাবিতি। ঈশ্বরস্য সংসারিত্বং সংসার্য্যভাবেন সংসারাভাবশ্চেত্যুক্তৌ দোষৌ বিদ্যাবিদ্যয়োর্বৈলক্ষণ্যেঽপি কথং প্রত্যুক্তাবিতি পৃচ্ছতি কথমিতি। কল্পিতসংসারেণ কল্পনাধিষ্ঠানমদ্বয়ং বস্তু বস্তুতো ন সম্বদ্ধমিতি পরিহরতি অবিদ্যেতি। তদ্বিষয়ং কল্পনা-স্পদমধিষ্ঠানমিতি যাবৎ। কল্পিতেনাধিষ্ঠানস্য বস্তুতোঽসংস্পর্শে দৃষ্টান্তং স্মারয়তি তথাচেতি। ঈশ্বরস্য সংসারিত্বাপ্রসঙ্গং প্রকটীকৃত্য প্রসঙ্গান্তরনিরাসমনুসারয়তি সংসারিণ ইতি। নতাবদবিদ্যা সংসারং সংসারিণঞ্চ কল্পয়ন্তী স্বতন্ত্রা তত্ত্বব্যাঘাতাৎ পার-তন্ত্র্যে চাশ্রয়ান্তরাভাবাৎ ক্ষেত্রজ্ঞস্য তদ্বত্বে সংসারিত্বমিতি শঙ্কতে নন্বিতি। নচাবিদ্যা-বত্ত্বমবিদ্যাকৃতমনবস্থানাদিতি ভাবঃ। যত্তৎখাতদংষ্ট্রোরগবদবিদ্যা কিং করিষ্যতীতি তত্রাহ তৎকৃতঞ্চেতি। অবিদ্যাতজ্জয়োর্জ্জ্ঞেয়ধর্ম্মাত্মধর্ম্মত্বেত্যুত্তরমাহ নেত্যাদিনা।

## শাঙ্করভাষ্যম্।

প্রসঙ্গ ইত্যেতৌ দোষৌ প্রযুক্তৌ বিদ্যাবিদ্যয়োর্বৈলক্ষণ্যাভ্যুপগমাদিতি কথমবিদ্যাপরিকল্পিতদোষেণ তদ্বিষয়ং বস্তু পারমার্থিকং ন দূষ্যতীতি তথা চ দৃষ্টান্তো মরীচ্যম্ভসোষরদেশো ন পঙ্কীক্রিয়ত ইতি সংসারিণোঽভাবাৎ সংসারাভাবপ্রসঙ্গদোষোঽপি সংসারসংসারিণোরবিদ্যাকল্পিতত্বোপপত্ত্যা প্রত্যুক্তো নন্ববিদ্যাবত্ত্বমেব ক্ষেত্রজ্ঞস্য সংসারিত্বদোষমুক্তস্তৎকৃতঞ্চ দুঃখিত্বাদিপ্রত্যক্ষমুপলভ্যতে ন জ্ঞেয়স্য ক্ষেত্রধর্ম্মত্বাৎ জ্ঞাতুঃ ক্ষেত্রজ্ঞস্য তৎকৃতদোষানুপপত্তেঃ যাবৎ কিঞ্চিৎ ক্ষেত্রজ্ঞস্য দোষজাতমবিদ্যমানমাসঞ্জয়তি তস্য জ্ঞেয়ত্বোপপত্তেঃ ক্ষেত্রধর্ম্মত্বমেব ন ক্ষেত্রজ্ঞধর্ম্মত্বং ন চ তেন ক্ষেত্রজ্ঞো দূষ্যতি জ্ঞেয়েন তু জ্ঞাতুঃ সংসর্গানুপপত্তেঃ যদি হি সংসর্গঃ স্যাৎ জ্ঞেয়ত্বমেব নোপপদ্যেত যদাত্মনো ধর্ম্মোঽবিদ্যা

---

## গিরিকৃত টীকা।

তদেব প্রপঞ্চয়তি যাবদিতি। জ্ঞেয়স্য ক্ষেত্রধর্ম্মত্বেঽপি ক্ষেত্রদ্বারা ক্ষেত্রজ্ঞস্যাপি জ্ঞেয়ত্বান্ন তেন চিতো বস্তুতঃ স্পর্শোঽস্তীত্যুপপাদয়তি যদীতি। ধর্ম্মধর্ম্মিত্বেন সংসর্গেঽপি জ্ঞেয়ত্বে কা ক্ষতিরিত্যাশঙ্ক্যাহ যদীতি। আত্মধর্ম্মস্যাত্মনা জ্ঞেয়ত্বে স্বস্যাপিজ্ঞেয়ত্বাপত্ত্যা কর্তৃকর্ম্মবিরোধঃ স্যাদিত্যর্থঃ। কিঞ্চ বিমতং ন ক্ষেত্রজ্ঞাশ্রিতং তদ্বেদ্যত্বাদ্রূপাদিবদিত্যাহ কথম্বেতি। কিঞ্চ মহাভূতানীত্যাদিনা জ্ঞেয়মাত্রস্য ক্ষেত্রান্তর্ভাবান্নাবিদ্যাদের্জ্ঞাতৃধর্ম্মতেত্যাহ জ্ঞেয়ঞ্চেতি। কিঞ্চৈতদ্যো বেত্তীত্যুক্তত্বাৎ ক্ষেত্রজ্ঞস্য জ্ঞাতৃত্বনির্ণয়ান্ন তত্র জ্ঞেয়ং কিঞ্চিৎ প্রবিশতীত্যাহ জ্ঞাতৈবেতি। ক্ষেত্রক্ষেত্রজ্ঞয়োরেবং স্বাভাব্যে সিদ্ধে সিদ্ধং ক্ষেত্রধর্ম্মত্বমবিদ্যাদেরিতি ফলিতমাহ ইত্যবধারিত ইতি। বিরোধাচ্চ ন ক্ষেত্রজ্ঞধর্ম্মত্বং অবিদ্যাদেরিত্যাহ ক্ষেত্রজ্ঞেতি। বিরুদ্ধবাদিত্বে মূলং দর্শয়তি অবিদ্যেতি। মাত্রপদস্য ব্যাবর্ত্ত্যমানং যুক্ত্যাখ্যমবষ্টম্ভান্তরমিতি বক্তুং কেবলপদং। যয়া বিদ্যয়া বিরুদ্ধমপি নির্ব্বোঢ়ুং শক্যতে তস্যাঃ স্বাতন্ত্র্যাভাবাচ্চিতোঽন্যস্যাবিদ্যকত্বেন তদাশ্রয়ত্বাত্তস্যাবিদ্যাস্বভাবতয়া তদাশ্রয়ত্বব্যাঘাতাদাশ্রয়জিজ্ঞাসয়া পৃচ্ছতি অত্রাহেতি। আশ্রয়মাত্রং পৃচ্ছ্যতে তদ্বিশেষো বা, প্রথমে প্রশ্নস্যানবকাশিত্বং মত্বাহ যস্যেতি। অবিদ্যা দৃশ্যাদৃশ্যা বা দৃশ্যত্বে পারতন্ত্র্যং কিঞ্চিন্নিষ্ঠত্বেনৈব তদ্দৃষ্টৈনাশ্রয়মাত্রং প্রষ্টব্যমদৃশ্যত্বে বা অপ্রকাশত্বাদসিদ্ধিরেব স্যাদিত্যর্থঃ। দ্বিতীয়মালম্বতে কস্যেতি। অবিদ্যায়া দৃশ্যমানত্বাদাশ্রয়বিশেষস্যাত্মনোঽপি স্বানুভবসিদ্ধত্বাৎ প্রশ্নস্য নিরবকাশতেত্যুত্তরমাহ অত্রেতি। প্রশ্নানর্থক্যং প্রশ্নদ্বারা স্ফোরয়তি কথমিত্যাদিনা। তথাপি কথং প্রশ্নাসিদ্ধিস্তত্রাহ ন চেতি। তদেব দৃষ্টান্তেন স্পষ্টয়তি ন হীতি। দৃষ্টান্তদার্ষ্টান্তিকয়োর্বৈষম্যঞ্চোদয়তি নন্বিতি। অজ্ঞানাশ্রয়স্য পরোক্ষত্বেঽপি প্রশ্নৈনরর্থক্যমিত্যাহ অপ্রত্যক্ষেণেতি। অবিদ্যাবতোঽপ্রত্যক্ষত্বেঽপি তেনাবিদ্যাসম্বন্ধে সিদ্ধে প্রষ্টুস্তব প্রশ্নানর্থক্যসমাধির্ন কশ্চিদিত্যর্থঃ। অবুদ্ধপরাভিসন্ধিঃ শঙ্কতে অবিদ্যায়া ইতি। অবিদ্যাবতস্তৎপরিহারান্নান্তেন প্রযতিতব্যমিত্যাহ যস্তেতি। মমৈবাবিদ্যা-

## শাঙ্করভাষ্যম্ ।

বত্বং দুঃখিত্বাদি চ কথন্তোঃ প্রত্যক্ষমুপলভ্যতে কথম্বা ক্ষেত্রজ্ঞধর্ম্মঃ জ্ঞেয়ঞ্চ সর্ব্বং ক্ষেত্রং জ্ঞাতৈব ক্ষেত্রজ্ঞ ইত্যবধারিতেঽবিদ্যাদুঃখিত্বাদেঃ ক্ষেত্রজ্ঞবিশেষণত্বং ক্ষেত্রজ্ঞধর্ম্মত্বং তস্য চ প্রত্যক্ষোপলভ্যত্বমিতি বিরুদ্ধমুচ্যতেঽবিদ্যামাত্রাবষ্টম্ভাৎ কেবলং অত্রাহ সাবিদ্যা কস্যেতি-যস্য দৃশ্যতে তস্যৈব কস্য দৃশ্যতে ইত্যত্রোচ্যতে অবিদ্যা কস্য দৃশ্যতে ইতিপ্রশ্নো নিবর্থকঃ কথং দৃশ্যতে চেদবিদ্যা তদ্বন্তমপি পশ্যসি ন চ তদ্বত্যুপলভ্যমানে সা কস্যেতি প্রশ্নো যুক্তো ন হি গোমত্যুপলভ্যমানে গাবঃ কস্যেতি প্রশ্নো যুক্তোঽর্থবান্ ভবেৎ ননু বিষমো দৃষ্টান্তো গবাং তদ্বতশ্চ প্রত্যক্ষত্বাৎ সম্বন্ধোঽপি প্রত্যক্ষ ইতি প্রশ্নো নিবর্থকঃ ন তথাবিদ্যা তদ্বাংশ্চ প্রত্যক্ষৌ যতঃ প্রশ্নো নিরর্থকঃ স্যাদপ্রত্যক্ষেণাবিদ্যাবতাবিদ্যাসম্বন্ধে জ্ঞাতে কিন্তব স্যাদবিদ্যায়া অনর্থহেতুত্বাৎ পবিহর্ত্তব্যা স্যাদ্ যস্যাবিদ্যা সতাং পবিহর্ত্তব্যেতি ননু মমৈবাবিদ্যা জানাসি তর্হ্যবিদ্যাস্তদ্বন্তঞ্চাত্মানং জানাসি নতু প্রত্যক্ষেণানুমানেন চেজ্জানাসি কথং সম্বন্ধগ্রহণং ন হি তব জ্ঞাতুর্জ্ঞেয়ভূতয়াবিদ্যযা তৎকালে সম্বন্ধো গ্রহীতুং শক্যতে অবিদ্যাযা বিষয়ত্বেনৈব জ্ঞাতুরুপযুক্তত্বান্ন চ জ্ঞাতুরবিদ্যাযাশ্চ সম্বন্ধস্য যো গৃহীতা জ্ঞানঞ্চান্যৎ তদ্বিষয়ং সম্ভবত্যনবস্থাপ্রাপ্তের্যদি জ্ঞাতাপি জ্ঞেযসম্বন্ধো জ্ঞাযেতান্যো জ্ঞাতা

---

## গিরিকৃত টীকা।

বত্বাত্তৎপবিহারে মযা প্রযতিতব্যমিতি শঙ্কতে নন্বিতি। তর্হি প্রশ্নানর্থক্যমিতি সিদ্ধান্তী স্বাভিসন্ধিমাহ জানাসীতি। আত্মানমবিদ্যাবন্তং জানন্নপি তদ্বিষযাধ্যক্ষাভাবাৎ পৃচ্ছামীতি শঙ্কতে জানামীতি। অবিদ্যাবতোঽপ্রত্যক্ষত্বং বদতা তস্যাহমবিদ্যাবানবিদ্যাকার্য্যবত্ত্বাব্যতিরেকেণ মুক্তাত্মবদিত্যনুমেয়ত্বমিষ্টমিত্যুপেত্য দূষয়তি অনুমানেনেতি। আত্মনো বিদ্যাসম্বন্ধগ্রহে কানুপপত্তিরিত্যাশঙ্ক্য জ্ঞাতৈবাত্মা স্বস্যাবিদ্যাসম্বন্ধং বুধ্যতেঽন্যো বা জ্ঞাতেতি বিকল্প্যাদ্যং দূষয়তি ন হীতি। তৎকালে স্বস্যাবিদ্যাং প্রতি জ্ঞাতৃত্বাবস্থায়ামিতি যাবৎ। অবিদ্যাবিষয়ত্বেন গৃহীতত্বাত্তৎজ্ঞাতৃত্বেনৈবোপযুক্তস্যাত্মনস্তস্যাঃ স্বাত্মনি কুত্র সম্বন্ধজ্ঞাতৃত্বমেকস্য কর্ম্মকর্ত্তৃত্ববিরোধাদিত্যাহ অবিদ্যয়েতি। দ্বিতীয়ং নিরস্যতি ন চেতি যো গৃহীতা স ন সম্ভবতীতি সম্বন্ধঃ, তদ্বিষয়মিতি জ্ঞাতু রবিদ্যায়াশ্চ সম্বন্ধস্তচ্ছব্দার্থঃ। অনবস্থামেব প্রপঞ্চয়তি যদীতি। আত্মনঃ স্বপরজ্ঞেয়ত্বাযোগাত্তস্মিন্নবিদ্যাসম্বন্ধস্যাপ্রামাণিকত্বান্নিত্যানুভবগম্যত্বে স্থিতে ফলিতমাহ যদি পুনরিতি। যদা চৈবং তদৈতদধ্যাহার্য্যং জ্ঞাতুরাত্মনো ন কিঞ্চিৎ দুষ্যতীত্যেতদমৃষ্যমাণঃ শঙ্কতে নন্বিতি। কিং জ্ঞাতৃত্বং জ্ঞানক্রিয়াকর্ত্তৃত্বং জ্ঞানস্বরূপত্বং বা নাদ্যস্তদনভ্যুপগমাত্তৎপ্রযুক্তদোষাভাবাৎ দ্বিতীয়ে জ্ঞাতৃত্বস্যোপচারিকত্বান্ন তৎ কুতো দোষোঽস্তীত্যাহ নেত্যাদিনা। অসত্যামপি ক্রিয়ায়াং ক্রিয়োপচারং দৃষ্টান্তেন স্ফুটয়তি যথেতি। আত্মনি বস্তুতো বিক্রিয়াভাবে ভগবদনুমতিং দর্শয়তি যথাত্রেতি। গীতাশাস্ত্রং সপ্তম্যর্থঃ, স্বতএবাত্মনি ক্রিয়াদ্যাত্মত্বাভাবো ভগবতা শাস্ত্রে

## শাঙ্করভাষ্যম্।

কল্প্যঃ স্যাত্তস্যাপ্যন্যস্তস্যাপ্যন্য ইত্যনবস্থাপরিহার্য্যা যদি পুনরবিদ্যা জ্ঞেয়ান্তদ্বা জ্ঞেয়ং জ্ঞেয়মেব তথা জ্ঞাতাপি জ্ঞাতৈব ন জ্ঞেয়ন্তবতি সদা চৈবমবিদ্যা দুঃখিত্বাদ্যৈর্ন জ্ঞাতুঃ ক্ষেত্রজ্ঞস্য কিঞ্চিৎ দুষ্যতি নন্বয়মেব দোষো যৎ দোষবৎ ক্ষেত্রবিজ্ঞাতৃত্বং ন বিজ্ঞানস্বরূপস্যৈবাবিক্রিয়স্য বিজ্ঞাতৃত্বোপচারাৎ যথোষ্ণতামাত্রেণাগ্নেস্তপ্তিক্রিয়োপচারস্তদ্বদ্যথাত্র ভগবতা ক্রিয়াকারকফলাত্মত্বাভাব আত্মনি স্বতএব দর্শিতঃ অবিদ্যাধ্যারোপিতৈবেব ক্রিয়াকারকাদ্যাত্মন্যুপচর্য্যতে তথা তত্র তত্র য এনং বেত্তি হন্তারং প্রকৃতেঃ ক্রিয়মাণানি গুণৈঃ কর্ম্মাণি সর্ব্বশঃ নাদত্তে কস্যচিৎ পাপমিত্যাদিপ্রকরণেষু দর্শিতস্তথৈব চ ব্যাখ্যাতমস্মাভিরুত্তরেষু চ প্রকরণেষু দর্শয়িষ্যামো হন্ত তর্হ্যাত্মনি ক্রিয়াকারকফলাত্মতায়াঃ স্বতোঽভাবেঽবিদ্যয়া চাধ্যারোপিতত্বে কর্ম্মাণ্যবিদ্বৎকর্ত্তব্যান্যেব ন বিদুষামিতি প্রাপ্তং সত্যমেবং প্রাপ্তমেতদেব চ ন হি দেহভৃতা শক্যমিত্যত্র দর্শয়িষ্যামঃ সর্ব্বশাস্ত্রার্থোপসংহারপ্রকরণে চ সমাসেনৈব কৌন্তেয় নিষ্ঠা জ্ঞানস্য চাপরেত্যত্র বিশেষতো দর্শয়িষ্যামঃ অলমিহ বহুপ্রপঞ্চেনেত্যুপসংহ্রিয়তে ॥ ২ ॥

---

## গিরিকৃত টীকা।

যথোক্তস্তথৈব ব্যাখ্যাতমস্মাভিরিতি সম্বন্ধঃ। কথং তর্হি ক্রিয়াদিরাত্মনি ভাতি তত্রাহ অবিদ্যেতি। যথা বস্তুতো নাস্ত্যাত্মনি ক্রিয়াদিভিরুপচারাত্তু ভাতি তথা তত্র তত্রাতীতপ্রকরণেষু আহো ভগবতা কৃতো যত্ন ইত্যাহ তথেতি। ন কেবলমতীতেষ্বেব প্রকরণেষু বাস্তবক্রিয়াদ্যভাবাদাত্মন্যাধ্যাসিকী তদ্ধীকৃতা কিন্তু বক্ষ্যমাণ প্রকরণেষ্বপি তথৈব ভগবদভিপ্রায়দর্শনং ভবিষ্যতীত্যাহ উত্তরেষু চেতি। আত্মনি বাস্তবক্রিযাদ্যভাবেঽধ্যাসাচ্চ তৎসিদ্ধৌ কর্ম্মকাণ্ডস্যাবিদ্বদধিকারিত্বপ্রাপ্তৌ বিদ্বাংস্ত্যজেত জ্ঞাত্বা কর্ম্মাবভেতেত্যাদি শাস্ত্রবিরোধঃ স্যাদিতি শঙ্কতে হন্তেতি। শাস্ত্রস্য দেহব্যতিরেকবিজ্ঞানাভিপ্রায়ত্বাদর্শনায়াদ্যতীতাত্মধীবিধুরস্যৈব কর্ম্মকাণ্ডাধিকারিতেত্যঙ্গীকরোতি সত্যমিতি। কথমজ্ঞস্যেবকর্ম্মাধিকারিত্বমুপপন্নমিত্যাশঙ্ক্যাহ এতদেব চেতি। জ্ঞানিনো জ্ঞাননিষ্ঠায়ামেবাধিকারো নিষ্ঠান্তরে ত্বজ্ঞস্যৈবেত্যুপসংহারপ্রকরণে বিশেষতো ভবিষ্যতীত্যাহ সর্ব্বেতি। তদেবানুক্রামতি সমাসেনেতি। জীবব্রহ্মণোরৈক্যাভ্যুপগমে ন কিঞ্চিদবদ্যমিত্যুপসংহরতি অলমিতি ॥ ২ ॥

## স্বামিকৃত টীকা।

তত্র যদ্যপি চতুর্ব্বিংশতিভেদভিন্না প্রকৃতিঃ ক্ষেত্রমিত্যভিপ্রেতং তথাপি দেহরূপেণৈব পরিণতায়ামেব তস্যামহং ভাবেনাবিবেকঃ স্ফুট ইতি তদ্বিবেকার্থমিদং শরীরং ক্ষেত্রমিত্যুক্তং তদেব প্রপঞ্চয়িষ্যন্ প্রতিজানীতে তদিতি। যদুক্তং ময়া তৎ ক্ষেত্রং যৎ স্বরূপতো জড়দৃশ্যাদিস্বভাবং যাদৃক্ যাদৃশঞ্চ ইচ্ছাদিধর্ম্মকং যদ্বিকারি যৈরিন্দ্রিয়াদিবিকা-

তৎ ক্ষেত্রং যচ্চ যাদৃক্ চ যদ্বিকারি যতশ্চ যৎ।
স চ যো যৎপ্রভাবশ্চ তৎ সমাসেন মে শৃণু॥ ৩॥

## শাঙ্করভাষ্যম্।

ইদং শরীরমিত্যাদিশ্লোকোপদিষ্টস্য ক্ষেত্রাধ্যায়ার্থস্য সংগ্রহশ্লোকোঽয়মুপন্যস্যতে তৎ ক্ষেত্রং যচ্চেত্যাদি ব্যাচিখ্যাসিতস্য হ্যর্থস্য সংগ্রহোপন্যাসো ন্যায্য ইতি যন্নির্দ্দিষ্টমিদং শরীরং ইতি তৎ ক্ষেত্রমিতি তচ্ছব্দেন পরামৃশতি যচ্চেদং নির্দ্দিষ্টং ক্ষেত্রং তদযাদৃক্ যাদৃশং স্বকীয়ৈর্ধর্ম্মৈশ্চশব্দঃ সমুচ্চয়ার্থো যদ্বিকারি যো বিকারো যস্য তদ্যদ্বিকারি যতো যস্মাচ্চ যৎকার্য্যমুৎপদ্যতে ইতি বাক্যশেষঃ স চ যঃ ক্ষেত্রজ্ঞো নির্দ্দিষ্টঃ স যৎপ্রভাবঃ যে প্রভাবা উপাধিকৃতাঃ শক্তয়ো যস্য স যৎপ্রভাবশ্চ তৎ ক্ষেত্রক্ষেত্রজ্ঞয়োর্যাথাত্ম্যং যথাবিশেষিতং তৎ সমাসেন সংক্ষেপেণ মে মম বাক্যতঃ শৃণু শ্রুত্বাবধারয়েত্যর্থঃ॥ ৩॥

## গিরিকৃত টীকা।

এবং শ্লোকদ্বয়ং ব্যাখ্যায় শ্লোকান্তরমবতারয়তি ইদমিতি। কুত্র সংগ্রহোক্তিরুপযুজ্যতে তত্রাহ ব্যাচিখ্যাসিতস্যেতি। প্রতিপত্তিসৌকর্য্যার্থং সংগ্রহোক্তিরর্থবতীত্যর্থঃ বক্ষ্যমাণেঽর্থে শ্রোতুর্মনঃসমাধানার্থং সূচিতো। বাক্যার্থোপায়বিবরণপ্রতিজ্ঞামভিপ্রেত্যাহ যন্নির্দিষ্টমিতি। ইদং শরীরমিতি যন্নির্দিষ্টং তচ্ছরীরং তচ্ছব্দেন পরামৃশতি প্রকৃতত্বার্থত্বাত্তস্যেতি যোজনা, তৎ ক্ষেত্রং জ্ঞাতব্যমিত্যধ্যাহারঃ, যচ্চেতি যেন রূপেণ রূপবদিতি তদেব ক্ষেত্রং বিশিষ্যতে তস্য ক্ষেত্রস্য স্বকীয়ান্ধর্ম্মাঞ্জন্মাদয়স্তৈর্ব্বিশিষ্টস্য জ্ঞেয়ত্বং ফলতি। চ শব্দপঞ্চকস্যেতরেতরসমুচ্চযার্থত্বমাহ চ শব্দইতি। বিকারিত্বেনাপি হেয়ত্বং সূচয়তি যদ্বিকারীতি। যৎকার্য্যং তৎসর্ব্বং যস্মাদুৎপদ্যতে তৎকারণত্বাজ্জ্ঞাতব্যমিত্যাহ যত ইতি। ক্ষেত্রমিব ক্ষেত্রজ্ঞং জ্ঞাতব্যং দর্শয়তি স চেতি। জ্ঞাতব্যমিতি সম্বন্ধঃ চক্ষুরাদ্যুপাধিকৃত-দৃষ্ট্যাদিশক্তিবশাত্তস্যজ্ঞাতব্যত্বং সূচয়তি যৎপ্রভাব ইতি। তেনোক্তেন প্রভাবেন তস্য জ্ঞাতব্যতেতি শেষঃ কথং যথাবিশেষিতং ক্ষেত্রং ক্ষেত্রজ্ঞো বা শক্যো জ্ঞাতুমিত্যাশঙ্ক্য ভগবদ্বাক্যাদিত্যাহ তদিতি॥ ৩॥

## স্বামিকৃত টীকা।

যৈর্যুক্তং যতশ্চ প্রকৃতিপুরুষসংযোগাদ্ভবতি যদিতি যৈঃ প্রকারৈঃ স্থাবরজঙ্গমাদিভেদৈর্ভিন্নমিত্যর্থঃ। স চ ক্ষেত্রজ্ঞো যৎস্বরূপতো যৎপ্রভাবশ্চ অচিন্ত্যৈশ্বর্য্যযোগেন যৈঃ প্রভাবৈঃ সম্পন্নস্তৎসর্ব্বং সংক্ষেপতো মত্তঃ শৃণু॥৩॥

কৈঃ বিস্তরেণোক্তস্যায়ং সংক্ষেপ ইত্যপেক্ষায়ামাহ ঋষিভিরিতি। ঋষিভির্বশিষ্ঠাদিভির্যোগশাস্ত্রেষু ধ্যানধারণাদিবিষয়ত্বেন বৈরাজাদিরূপেণ বহুধা গীতং নিরূপিতং। বিবিধৈর্বিবিচিত্রৈর্নিত্যনৈমিত্তিককাম্যকর্ম্মাদিবিষয়ৈশ্ছন্দোভির্বেদৈর্নানাপূজনীয়দেবতারূপেণ

ঋষিভির্বহুধা গীতং ছন্দোভির্বিবিধৈঃ পৃথক্।
ব্রহ্মসূত্রপদৈশ্চৈব হেতুমদ্ভির্বিনিশ্চিতৈঃ ॥ ৪ ॥

## শাঙ্করভাষ্যম্।

তৎ ক্ষেত্রক্ষেত্রজ্ঞয়োর্যাথাত্ম্যং বিবক্ষিতং স্তৌতি শ্রোতৃবুদ্ধিপ্রবোচনার্থং ঋষিভিরিতি। ঋষিভির্বশিষ্ঠাদিভির্বহুধা বহুপ্রকারং গীতং কথিতং ছন্দোভিঃ ছন্দাংসি ঋগাদীনি তৈর্মন্ত্রচ্ছন্দোভির্ব্বিবিধৈর্নানাপ্রকারৈঃ পৃথক্ বিবেকতো গীতং কিঞ্চ ব্রহ্মসূত্রপদৈশ্চ এব ব্রহ্মণঃ সূচকানি বাক্যানি ব্রহ্মসূত্রাণি তৈঃ পদ্যতে গম্যতে জ্ঞায়তে ব্রহ্মেতি তানি ব্রহ্মসূত্রপদেন সূচ্যন্তে তৈরেব চ ক্ষেত্রজ্ঞযোর্যাথাত্ম্যং গীতমিতি অনুবর্ত্ততে আত্মেত্যেবোপাসীতেত্যাদিভির্হি ব্রহ্মসূত্রপদৈরাত্মা জ্ঞায়তে হেতুমদ্ভির্যুক্তিযুক্তৈর্ব্বিনিশ্চিতৈর্ন সংশয়রূপৈর্নিশ্চিতপ্রত্যয়োৎপাদকৈরিত্যর্থঃ ॥ ৪ ॥

## গিরিকৃত টীকা।

শ্লোকান্তরস্য তাৎপর্য্যমাহ তদিত্যাদিনা। বিবক্ষিতং জিজ্ঞাসিতমিত্যর্থঃ। স্তুতিফলমাহ শ্রোত্রেতি। ন কেবলমাপ্তোক্তেরেব ক্ষেত্রাদিযাথাত্ম্যং সম্ভাবিতং কিন্তু বেদবাক্যাদপীত্যাহ ছন্দোভিশ্চেতি। ঋগাদীনাং চতুর্ণামপি বেদানাং নানাপ্রকারত্বং শাখাভেদাদ্দৃষ্টং ন কেবলং শ্রুতিস্মৃতিসিদ্ধমুক্তং যাথাত্ম্যং কিন্তু যৌক্তিকঞ্চেত্যাহ কিঞ্চেতি। কানি তানি সূত্রাণীত্যাশঙ্ক্যাহ আত্মেত্যেবেতি। আদিপদেন ব্রহ্মবিদাপ্নোতি পরমথ যোঽন্যাং দেবতামিত্যাদীনি বিদ্যাবিদ্যাসূত্রাণ্যুক্তানি আত্মেতি ক্ষেত্রজ্ঞোপাদানং তচ্চ ক্ষেত্রোপলক্ষণং অথাতো ব্রহ্মজিজ্ঞাসেত্যাদীন্যপি সূত্রাণ্যত্র গৃহীতান্যন্যথা ছান্দোভিরিত্যাদিনা পৌনরুক্ত্যাদিতি মত্বা বিশিনষ্টি হেতুমদ্ভিরিতি ॥ ৪ ॥

## স্বামিকৃত টীকা।

গীতং ব্রহ্মণঃ সূত্রৈঃ পদৈশ্চ ব্রহ্ম সূত্র্যতে সূচ্যতে এভিরিতি ব্রহ্মসূত্রাণি যতো বা ইমানি ভূতানি জায়ন্ত ইত্যাদীনি তটস্থলক্ষণপরাণি উপনিষদ্বাক্যানি। তথা ব্রহ্ম পদ্যতে সাক্ষাৎ জ্ঞায়তে এভিরিতি পদানি স্বরূপলক্ষণপরাণি সত্যং জ্ঞানমনন্তং ব্রহ্মেত্যাদীনি তৈশ্চ বহুধা গীতং। কিঞ্চ হেতুমদ্ভিঃ সদেব সৌম্যেদমগ্র আসীৎ কথমসতঃ সজ্জায়েত ইতি। কোহ্যে-বান্যাৎ কঃ প্রাণ্যাৎ যদেষ আকাশ আনন্দো ন স্যাৎ এষ হ্যেবানন্দয়তীত্যাদিযুক্তিমদ্ভিঃ। অন্যাৎ অপানচেষ্টাং কঃ কুর্য্যাৎ প্রাণ্যাৎ প্রাণব্যাপারং বা কঃ কুর্য্যাদিতি শ্রুতিপদয়োরর্থঃ। বিনিশ্চিতৈরুপক্রমোপসংহারৈকবাক্যতয়া অসন্দিগ্ধার্থপ্রতিপাদকৈরিত্যর্থঃ। তদেবমেতৈর্বিস্তরেণোক্তং তৎসংগ্রহং সংক্ষেপতস্তভ্যং কথয়িষ্যামি তৎ শৃণ্বিত্যর্থঃ। যদ্বা অথাতো ব্রহ্মজিজ্ঞাসেত্যাদীনি ব্রহ্মসূত্রাণি গৃহ্যন্তে তান্যেব ব্রহ্ম পদ্যতে নিশ্চীয়তে এভিরিতি

মহাভূতান্যহঙ্কারো বুদ্ধিরব্যক্তমেব চ।
ইন্দ্রিয়াণি দশৈকঞ্চ পঞ্চ চেন্দ্রিয়গোচরাঃ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

স্তুত্যাভিমুখীভূতার্জ্জুনায়াহ ভগবান্ মহাভূতানীতি। মহাভূতানি মহান্তি চ তানি ভূতানি সর্ব্ববিকারব্যাপকত্বাদ্ভূতানি চ সূক্ষ্মাণি ন স্থূলানি স্থূলানি ত্বিন্দ্রিয়গোচরশব্দেনাভিধায়িষ্যন্তেঽহঙ্কারো মহাভূতকারণমহংপ্রত্যয়লক্ষণোঽহঙ্কারকারণং বুদ্ধিরধ্যবসায়লক্ষণা তৎকারণমব্যক্তমেব চ ন ব্যক্তমব্যক্তমব্যাকৃতমীশ্বরশক্তিঃ মম মায়া দুরত্যয়েত্যুক্তং এবশব্দঃ প্রকৃত্যবধারণার্থঃ এতাবত্যেবাষ্টধাভিন্না প্রকৃতিঃ, চশব্দো ভেদসমুচ্চয়ার্থঃ ইন্দ্রিয়াণি দেশ শ্রোত্রাদীনি পঞ্চ বুদ্ধ্যুৎপাদকত্বাৎ বুদ্ধীন্দ্রিয়াণি বাক্‌পাণ্যাদীনি পঞ্চ চেন্দ্রিয়গোচরাঃ শব্দাদয়ো বিষয়াস্তান্যেতানি সাঙ্খ্যাতশ্চতুর্ব্বিংশতিতত্ত্বানি আচক্ষতে ॥ ৫ ॥

---

## গিরিকৃত টীকা।

ক্ষেত্রাদি যাথাত্ম্যশ্রুত্যা প্রলোভিতায় কিন্তদিতি জিজ্ঞাসবে যথোদ্দেশং ক্ষেত্রং নির্দ্দিশতি স্তুত্যেতি। মহত্ত্বে হেতুমাহ সর্ব্বেতি। ভূতশব্দেন স্থূলানামপি বিশেষাভাবাদ্গ্রহে কা হানিরিত্যাশঙ্ক্যাহ স্থূলানীতি। অহঙ্কারোঽহংপ্রত্যয়লক্ষণ ইতি সম্বন্ধঃ। ভূতানাং প্রাতীতিকত্বেনাভিমানমাত্রাত্মত্বং মত্বাহঙ্কারং বিশিনষ্টি মহাভূতেতি মহতঃ পরমিত্যাদেঃ প্রসিদ্ধং মহচ্ছব্দার্থমহঙ্কারহেতুমাহ অহঙ্কারেতি। ঈশ্বরশক্তিরিত্যুক্তে চৈতন্যমপি শক্যতে তদর্থমাহ মমেতি। অবধারণরূপমর্থমেব স্ফুটয়তি এতাবত্যেবেতি। পঞ্চতন্মাত্রাণ্যহঙ্কারো মহদব্যাকৃতমিত্যষ্টধাভিন্নত্বং মূলপ্রকৃত্যা সহ তন্মাত্রাদিভেদানাং সমুচ্চয়শ্চকারার্থঃ দশেন্দ্রিয়াণ্যেব বিভজ্য ব্যুৎপাদয়তি শ্রোত্রেত্যাদিনা। তদেব প্রশ্নদ্বারা স্ফুটয়তি কিন্তদিতি। শব্দাদিবিষয়শব্দেন স্থূলানি ভূতানি গৃহ্যন্তে। উক্তেষু তন্মাত্রাদিষু তন্ত্রান্তরীয়সম্মতিমাহ তানীতি ॥ ৫ ॥

## স্বামিকৃত টীকা।

পদানি তৈর্হেতুমদ্ভিরীক্ষতের্নাশব্দং আনন্দময়োঽভ্যাসাদিত্যাদিযুক্তিমদ্ভির্বিনিশ্চিতার্থৈঃ শেষং সমানং ॥ ৪ ॥

তৎক্ষেত্রস্বরূপমাহ মহাভূতানীতি দ্বাভ্যাং। মহাভূতানি ভূম্যাদীনি পঞ্চ অহঙ্কারস্তৎকারণভূতঃ বুদ্ধির্জ্ঞানাত্মকং মহত্তত্ত্বং অব্যক্তং মূলপ্রকৃতিঃ ইন্দ্রিয়াণি দশ বাহ্যানি-জ্ঞানকর্ম্মেন্দ্রিয়াণি একঞ্চ মনঃ ইন্দ্রিয়গোচরাশ্চ পঞ্চ তন্মাত্ররূপাএব শব্দাদয় আকাশাদিবিশেষগুণতয়া ব্যক্তাঃ সন্ত ইন্দ্রিয়বিষয়াঃ পঞ্চ তদেবং চতুর্ব্বিংশতিতত্ত্বান্যুক্তানি ॥ ৫ ॥

ইচ্ছেতি। ইচ্ছাদয়ঃ প্রসিদ্ধাঃ সংঘাতঃ শরীরং চেতনা জ্ঞানাত্মিকা মনোবৃত্তিঃ ধৃতির্ধৈর্য্যং এতে চেচ্ছাদয়ো দৃশ্যত্বান্নাত্মধর্ম্মাঃ অপি তু মনোধর্ম্মাঃ অতঃ ক্ষেত্রান্তর্পাতিন-

ইচ্ছা দ্বেষঃ সুখং দুঃখং সংঘাতশ্চেতনা ধৃতিঃ।
এতৎ ক্ষেত্রং সমাসেন সবিকারমুদাহৃতম্ ॥ ৬ ॥

## শাঙ্করভাষ্যম্।

অথেদানীং আত্মগুণা ইতি যানাচক্ষতে বৈশেষিকাস্তেঽপি ক্ষেত্রধর্ম্মাএব ন তু ক্ষেত্রজ্ঞস্যেত্যাহ ভগবান্ ইচ্ছা দ্বেষ ইতি। ইচ্ছা যজ্জাতীয়ং সুখহেতুমর্থমুপলব্ধবান্ পূর্ব্বং পুনস্তজ্জাতীয়মুপলভ্যমানস্তমাদাতুমিচ্ছতি সুখহেতুরিতি সেয়মিচ্ছান্তঃকরণধর্ম্মো জ্ঞেয়ত্বাৎ ক্ষেত্রং তথা দ্বেষো যজ্জাতীয়মর্থং দুঃখহেতুত্বেনানুভূতবাৎ পূর্ব্বং পুনস্তজ্জাতীয়মুপলভ্যমানস্তং দ্বেষ্টি সোঽযং দ্বেষো জ্ঞেয়ত্বাৎ ক্ষেত্রমেব তথা সুখমনুকূলং প্রসন্নং সত্ত্বাত্মকং জ্ঞেয়ত্বাৎ ক্ষেত্রমেব দুঃখং প্রতিকূলাত্মকং জ্ঞেয়ত্বাত্তদপি ক্ষেত্রং সংঘাতো দেহেন্দ্রিয়াণাং সংহতিস্তস্যামভিব্যক্তান্তঃকবণবৃত্তিঃ তপ্তইব লোহপিণ্ডেঽগ্নিরাত্মচৈতন্যাভাসরসবিদ্ধা চেতনা সা চ ক্ষেত্রং জ্ঞেয়ত্বাৎ ধৃতির্যয়াবসাদং প্রাপ্তানি দেহেন্দ্রিয়াণি ধ্রিয়ন্তে সা চ জ্ঞেয়ত্বাৎ ক্ষেত্রং সর্ব্বান্তঃকরণধর্ম্মোপলক্ষণার্থমিচ্ছাদিগ্রহণং যত উক্তং তদুপসংহরতি এতৎ ক্ষেত্রং সমাসেন সবিকারং সহ বিকারেণ মহদাদিনোদাহৃতমুক্তং যস্য ক্ষেত্রভেদজাতস্য সংহতিবিদং শরীরং ক্ষেত্রং ইত্যুক্তং তৎ ক্ষেত্রং ব্যাখ্যাতং মহাভূতাদিভেদভিন্নং ধৃত্যন্তং ॥ ৬ ॥

## গিরিকৃত টীকা।

মূলপ্রকৃতিরবিকৃতির্মহদাদ্যাঃ প্রকৃতিবিকৃতয়ঃ সপ্ত ষোড়শকশ্চ বিকার ইতি পঠন্তি অব্যক্তাহঙ্কারাদীনাং ত্রৈগুণ্যাভিমানাদিধর্ম্মকত্বং প্রসিদ্ধমিতি। শব্দাদীনামেব গ্রহণে কর্ম্মেন্দ্রিয়াণাং বিষয়ানুক্তেবৈর্ব্বরূপ্যপ্রসঙ্গাৎ ক্ষেত্রৈক্যনিরূপণস্য চ প্রকৃতত্বাৎ স্বরূপনির্দ্দেশেনৈব তৎক্ষেত্রং যচ্চ যাদৃক্ চেতি ব্যাখ্যাতমিদানীমিচ্ছাদীনামাত্মবিকারত্বনিবৃত্তয়ে ক্ষেত্রবিকারত্বনিরূপণেন ষড়্বিকারীত্যেতন্নিরূপয়ন্মতান্তরনিবৃত্তিপরত্বেন শ্লোকমবতারয়তি অথেতি। সর্ব্বজ্ঞোক্তিবিরোধাদ্ধেয়ং বৈশেষিকমতমিতি মত্বোক্তং ভগবানিতি। উপলব্ধজাতীয়স্যোপলভ্যমানস্যাদানেচ্ছায়াং হেতুমাহ সুখেতি। ইতিশব্দো হেত্বর্থঃ সুখহেতুত্বাত্তস্মিন্নিচ্ছেত্যর্থঃ। ইচ্ছাং সুখতদ্ধেতুবিষয়ত্বেন ব্যাখ্যায়াত্মধর্ম্মত্বং তস্যা ব্যুদস্যতি সেয়মিতি। তথাপি কথং ক্ষেত্রান্তর্ভূতত্বং তত্রাহ জ্ঞেয়ত্বাদিতি। ইচ্ছাবৎ দ্বেষোঽপি ধর্ম্মো বুদ্ধেরিত্যাহ তথেতি। কোঽসৌ দ্বেষো যস্য বুদ্ধিধর্ম্মত্বং তত্রাহ যজ্জাতীয়মিতি। তস্যাপীচ্ছাবৎ ক্ষেত্রান্তর্ভাবমাহ

## স্বামিকৃত টীকা।

এষোপলক্ষণঞ্চৈতৎ. সঙ্কল্পাদীনাং তথা চ শ্রুতিঃ। কামঃ সংকল্পো বিচিকিৎসা শ্রদ্ধা অশ্রদ্ধা ধৃতিরধৃতির্হ্রীর্ধীর্ভীরিত্যেতৎসর্ব্বং মনএবেতি। অনেন যাদৃগিতি প্রতিজ্ঞাতাঃ ক্ষেত্রধর্ম্মা দর্শিতাঃ। এতৎ ক্ষেত্রং সবিকারমিন্দ্রিয়াদিবিকারসহিতং সংক্ষেপেণ তুভ্যং ময়োক্তমিতি ক্ষেত্রোপসংহারঃ ॥ ৬ ॥

অমানিত্বমদম্ভিত্বমহিংসা ক্ষান্তিরার্জবম্‌।
আচার্য্যোপাসনং শৌচং স্থৈর্য্যমাত্মবিনিগ্রহঃ

## শাঙ্করভাষ্যম্‌।

ক্ষেত্রজ্ঞো বক্ষ্যমাণবিশেষণো যস্য সপ্রভাবস্য ক্ষেত্রজ্ঞস্য পরিজ্ঞানাদমৃতত্বং ভবতি তৎ জ্ঞেয়ং তৎ প্রবক্ষ্যামীত্যাদিনা সবিশেষণং স্বয়মেব বক্ষ্যতি ভগবানধুনা তু তজ্‌জ্ঞানসাধন-গুণমমানিত্বাদিলক্ষণং যস্মিন্‌ সতি তৎ জ্ঞেয়বিজ্ঞানযোগ্যোঽধিকৃতো ভবতি যৎপরঃ সন্ন্যাসী জ্ঞাননিষ্ঠ উচ্যতে তমমানিত্বাদিগুণং জ্ঞানসাধনত্বাৎ জ্ঞানশব্দবাচ্যং বিদধাতি ভগবান্‌ অমানিত্বমিতি। অমানিত্বং মানিনো ভাবো মানিত্বমাত্মনঃ শ্লাঘনন্তদভাবোঽমানিত্বমদ-ম্ভিত্বং স্বধর্ম্মপ্রকটীকরণং দম্ভিত্বংতদভাবোঽদম্ভিত্বমহিংসা অহিংসা অহিংসনং প্রাণিনামপীড়নং

## গিরিকৃত টীকা।

সোঽয়মিতি। ইচ্ছাদ্বেষবদ্বুদ্ধিধর্ম্মঃ সুখমপীত্যাহ তথেতি। তস্যাপি স্বরূপোক্ত্যা ক্ষেত্রান্তঃ-পাতিত্বমাহ অনুকূলমিতি। দুঃখস্যাপি স্বরূপোক্ত্যা ক্ষেত্রমধ্যবর্ত্তিত্বমাহ দুঃখমিতি। দেহে-ন্দ্রিয়াত্মবাদৌ ব্যুদসিতুং ক্ষেত্রান্তর্ভূতমেব সঙ্ঘাতং বিভজতে দেহেতি। বিজ্ঞানবাদং প্র-ত্যাহ তস্যামিতি। তপ্তে লৌহপিণ্ডে বহ্নেরভিব্যক্তিবদুক্তসংহতৌ বুদ্ধিবৃত্তিরভিব্যজ্যতে তত্রচাগ্নিরভিব্যক্তো লোহপিণ্ডমেবাগ্নিবুদ্ধ্যা গ্রাহয়তি তথাত্মচৈতন্যং বুদ্ধিবৃত্তাবভিব্যক্ত-তামেবাত্মতয়া বোধয়ত্যতস্তদাভাসানুবিদ্ধা সৈব চেতনেত্যুচ্যতে সা চ মুখ্যচেতনং প্রতি জ্ঞেয়ত্বাদতদ্রূপত্বাৎ ক্ষেত্রমেবেত্যর্থঃ। ধৃতিস্বরূপোক্ত্যা ক্ষেত্রত্বং তস্যা দর্শয়তি ধৃতি-রিত্যাদিনা নন্বন্যেঽপি সঙ্কল্পাদয়ো যে মনোধর্ম্মাঃ সন্তি তে কিমিত্যত্র ক্ষেত্রত্বেন নোচ্যন্তে তত্রাহ সর্ব্বেতি। তস্যোপলক্ষণার্থত্বে হেতুমাহ যত ইতি। ইচ্ছাদিবদস্মিন্নবসরে সঙ্কল্পা-দীনামপি দর্শিতত্বং সিদ্ধবৎকৃত্য প্রকরণবিভাগার্থং যতো ভগবদুক্তং ক্ষেত্রমুপসংহরত্যতো যুক্তমিচ্ছাদিগ্রহস্য সর্ব্বানুক্তবুদ্ধিধর্ম্মোপলক্ষণার্থত্বমিত্যর্থঃ বিবক্তস্য জ্ঞানাধিকারায় বৈরা-গ্যার্থং ক্ষেত্রং ব্যাখ্যাতমিত্যনুবদতি যস্যেতি। ক্ষেত্রভেদজাতস্য ব্যষ্টিদেহবিভাগস্য সর্ব্বস্যেত্যর্থঃ সংহতিঃ সমষ্টিং শরীরং ॥ ৬ ॥

নন্বুক্তে ক্ষেত্রে ক্ষেত্রজ্ঞো বক্তব্যস্তং হিত্বা কিমিত্যন্যদুচ্যতে তত্রাহ ক্ষেত্রজ্ঞ ইতি। অনাদিমদিত্যাদিনা বক্ষ্যমাণবিশেষণং ক্ষেত্রজ্ঞং স্বয়মেব ভগবান্‌ বিক্ষিতবিশেষণসহিতং

## স্বামিকৃত টীকা।

ইদানীমমানিত্বমিত্যাদিপঞ্চভিরুক্তলক্ষণাৎ ক্ষেত্রাদতিরিক্ততয়া জ্ঞেয়ং শুদ্ধং ক্ষেত্রজ্ঞং বিস্তরেণ বর্ণয়িষ্যন্‌ তত্ত্বজ্ঞানসাধনান্যাহ অমানিত্বমিতি। অমানিত্বং স্বগুণশ্লাঘারা-হিত্যং অদম্ভিত্বং দম্ভরাহিত্যং অহিংসা পরপীড়াবর্জ্জনং ক্ষান্তিঃ সহিষ্ণুত্বং আর্জবমবক্রতা আচার্য্যোপাসনং সদ্গুরুসেবনং শৌচং বাহ্যমাভ্যন্তরঞ্চ তত্র বাহ্যং মৃজ্জলাদিনা আভ্যন্ত-

## শাঙ্করভাষ্যম্।

ক্ষান্তিঃ পরাপরাধপ্রাপ্তাববিক্রিয়ার্জ্জবমৃজুভাবোঽবক্রত্বমাচার্য্যোপাসনং মোক্ষসাধনোপদেষ্টুরাচার্য্যস্য শুশ্রূষাদিপ্রযোগেন সেবনং শৌচং কায়মলানাং মৃজ্জলাভ্যাং প্রক্ষালনমন্তশ্চ মনসঃ প্রতিপক্ষভাবনয়া রাগাদিমলানামপনয়নং শৌচং স্থৈর্য্যং স্থিরভাবো মোক্ষমার্গএব কৃতব্যবসায়িত্বমাত্মবিনিগ্রহ আত্মন উপকারকস্যাত্মশব্দবাচ্যস্য কার্য্যকারণসংঘাতস্য বিনিগ্রহঃ স্বভাবেন সর্ব্বতঃ প্রবৃত্তস্য সন্মার্গএব নিরোধ আত্মবিনিগ্রহঃ ॥ ৭ ॥

কিঞ্চ ইন্দ্রিয়েতি। ইন্দ্রিয়ার্থেষু শব্দাদিষু দৃষ্টাদৃষ্টেষু ভোগেষু বিরাগভাবোবৈরাগ্যম-

---

## গিরিকৃত টীকা।

জ্ঞেয়ং যত্তদিত্যাদিনা বক্ষ্যতীতি সম্বন্ধঃ। কিমিতি ক্ষেত্রজ্ঞো বক্ষ্যতে তত্রাহ যস্যেতি। জ্ঞেয়ং যত্তদিত্যতঃ প্রাক্তনগ্রন্থস্য তাৎপর্য্যমাহ অধুনেতি। অমানিত্বাদিলক্ষণং বিদধাতীত্যুক্তবত্র সম্বন্ধঃ। জ্ঞানসাধনসমুদাযবোধনং কুত্রোপযুজ্যতে তত্রাহ যস্মিন্নিতি। যোগ্যমধিকৃতমেব বিবৃণোতি যৎপর ইতি। এতৎ জ্ঞানমিতি বচনাৎ কথমিদং জ্ঞানসাধনমিত্যাশঙ্ক্যাহ তমিতি। তদ্বিধানস্য বক্তৃদ্বারা দার্ঢ্যং সূচয়তি ভগবানিতি। অমানিত্বাদিনিষ্ঠন্যান্তর্ধিয়ো জ্ঞানমিতি নিযমার্থমাহ অমানিত্বমিতি। মানস্তিবোহিতো বিলেপঃ স চাত্মন্যুৎকর্ষারোপহেতুঃ সোঽস্যেতি মানী ন মান্যমানী তস্য ভাবোঽমানিত্বমিতি ব্যাকরোতি অমানিত্বমিত্যাদিনা। প্রতিযোগমুখেনাদম্ভিত্বং বিবৃণোতি অদম্ভিত্বমিতি। বাঙ্মনোদেহৈরপীড়নং প্রাণিনামহিংসনং। তদেবাহিংসেত্যাহ অহিংসেতি। পরাপরাধস্য চিত্তবিকারকারণস্য প্রাপ্তাবেবাবিকৃতচিত্তত্বেনাপকারসহিষ্ণুত্বং ক্ষান্তিরিত্যাহ ক্ষান্তিরিতি। অবক্রত্বমকৌটিল্যং যথা হৃদযব্যবহারঃ সদৈকরূপপ্রবৃত্তিনিমিত্তত্বং চেত্যর্থঃ। উপনীয়তু যঃ শিষ্যমিত্যাদিনোক্তমাচার্য্যং ব্যবচ্ছিনত্তি মোক্ষেতি। শুশ্রূষাদি ইত্যাদিপদং নমস্কারাদিবিষয়ং। বাহ্যমাভ্যন্তরঞ্চ দ্বিঃপ্রকারং শৌচং ক্রমেণ বিভজতে, শৌচমিত্যাদিনা। মনসো রাগাদিমলানামিতি সম্বন্ধঃ। তদপনয়োপায়মুপদিশতি প্রতিপক্ষেতি। রাগাদিপ্রতিকূলস্য ভাবনা বিষযেষু দোষদৃষ্ট্যা প্রবৃত্তিস্তয়েতি যাবৎ। স্থিরভাবমেব বিশদয়তি মোক্ষেতি। আত্মনো নিত্যসিদ্ধস্যানাধেয়াতিশয়স্য কুতো বিনিগ্রহস্তত্রাহ আত্মন ইতি ॥৭

ন কেবলমমানিত্বাদীন্যেব জ্ঞানস্যান্তরঙ্গসাধনানি কিন্তু বৈরাগ্যাদীন্যপি তথাবিধানি সন্তীত্যাহ কিঞ্চেতি। দৃষ্টাদৃষ্টেষনেকার্থেষু রাগে তৎপ্রতিবন্ধং জ্ঞানং নোৎপদ্যতে ইতি ॥৭॥

## স্বামিকৃত টীকা।

রঞ্চ রাগাদিমলক্ষালনং। তথাচ স্মৃতিঃ। শৌচঞ্চ দ্বিবিধং প্রোক্তং বাহ্যমাভ্যন্তরং তথা। মৃজ্জলাভ্যাং স্মৃতং বাহ্যং ভাবশুদ্ধিস্তথান্তরমিতি। স্থৈর্য্যং সন্মার্গে প্রবৃত্তস্য তদেকনিষ্ঠতা আত্মবিনিগ্রহঃ শরীরসংযমঃ এতজ জ্ঞানমিতি প্রোক্তমিতি পঞ্চমেনান্বয়ঃ ॥ ৭ ॥

ইন্দ্রিয়ার্থেষু বৈরাগ্যমনহঙ্কারএব চ।
জন্মমৃত্যুজরাব্যাধিদুঃখদোষানুদর্শনম্ ॥ ৮ ॥

## শাঙ্করভাষ্যম্।

নহঙ্কারোঽহঙ্কারাভাব এব চ জন্মমৃত্যুজরাব্যাধিদুঃখদোষানুদর্শনং জন্ম চ মৃত্যুশ্চ জরা চ ব্যাধয়শ্চ দুঃখানি চ তেষু জন্মাদিদুঃখান্তেষু প্রত্যেকং দোষানুদর্শনং আলোচনং জন্মনি গর্ভবাসো যোনিদ্বারা নিঃসরণং দোষস্তস্যানুদর্শনং আলোচনং তথা মৃত্যৌ দোষানুদর্শনং তথা জরায়াং প্রজ্ঞাশক্তিতেজোনিরোধদোষানুদর্শনং আলোচনং পরিভূততা চেতি তথা ব্যাধিষু শিরোরোগাদিষু দোষানুদর্শনং তথা দুঃখেষধ্যাত্মাধিভূতাধিদৈবনিমিত্তেষথ বা দুঃখান্যেব দোষো দুঃখদোষস্তস্য জন্মাদিষু পূর্ব্ববদনুদর্শনং দুঃখং জন্মদুঃখং জরাদুঃখং মৃত্যুদুঃখং ব্যাধিদুঃখং দুঃখনিমিত্তত্বাজ্জন্মাদয়ো দুঃখং দুঃখানি ন পুনঃ স্বরূপেণৈব দুঃখমিত্যেবং জন্মাদিষু দুঃখদোষানুদর্শনাৎ দেহেন্দ্রিয়বিষয়োপভোগেষু বৈরাগ্যমুপজায়তে ততঃ প্রত্যগাত্মনি প্রবৃত্তিঃ করণানামাত্মদর্শনায় এবং জ্ঞানহেতুত্বাৎ জ্ঞানমুচ্যতে জন্মাদিদুঃখদোষানুদর্শনং ॥ ৮ ॥

## গিরিকৃত টীকা।

মত্বা ব্যাকরোতি ইন্দ্রিয়েতি। আবির্ভূতো গর্ব্বোঽহঙ্কারস্তদভাবেঽপি জ্ঞানেহেতুরিত্যাহ অনহঙ্কারইতি। ইন্দ্রিয়ার্থেষু বৈরাগ্যমুক্তমুপপাদয়তি জন্মেতি। প্রত্যেকং দোষানুদর্শনমিত্যুক্তং তত্র জন্মনি দোষানুদর্শনং বিশদয়তি জন্মনীতি। যথা জন্মনি দোষানুসন্ধান তথা মৃত্যৌ দোষস্য সর্ব্বমর্মনিকৃন্তনাদেরালোচনং কার্য্যমিত্যাহ তথেতি। জন্মনি মৃত্যৌ চ দোষানুসন্ধানবজ্জরাদিষ্বপি দোষানুসন্ধানং কর্ত্তব্যমিত্যাহ তথেতি। ব্যাধিষু দোষস্যাসহ্যতারূপস্যানুসন্ধানং দুঃখেষু ত্রিবিধেষ্বপি দোষানুসন্ধানং প্রসিদ্ধং। ব্যাখ্যানান্তর মাহ অথবেতি। যথা জন্মাদিষু দুঃখান্তেষু দোষদর্শনমুক্তং তথা তেষ্বেব দুঃখাখ্যদোষস্য দর্শনং স্ফুটয়তি দুঃখমিত্যাদিনা। কথং জন্মাদীনাং বাহ্যেন্দ্রিয়গ্রাহ্যাণাং দুঃখত্বং তত্রাহ দুঃখেতি। জন্মাদিষু দোষানুদর্শনকৃতং ফলমাহ এবমিতি। বৈরাগ্যে সত্যাত্মদৃষ্ট্যর্থং করণানাং তদাভিমুখ্যেন প্রবৃত্তিরিতি বৈরাগ্যফলমাহ তত ইতি। জন্মাদিদুঃখদোষানুদর্শনং জ্ঞানহেতুস্তু কিমিত্যুপসঙ্খ্যাতমিত্যাশঙ্ক্য বৈরাগ্যদ্বারা ধীহেতুত্বাদিত্যাহ এবমিতি ॥ ৮ ॥

## স্বামিকৃত টীকা।

কিঞ্চ ইন্দ্রিয়ার্থেষ্বিতি। জন্মাদিষু দুঃখদোষয়োরনুদর্শনং পুনঃ পুনরালোচনং দুঃখরূপস্য দোষস্যানুদর্শনমিতি বা। স্পষ্টমন্যৎ ॥ ৮ ॥

অসক্তিরনভিষ্বঙ্গঃ পুত্রদারগৃহাদিষু।
নিত্যঞ্চ সমচিত্তত্বমিষ্টানিষ্টোপপত্তিষু ॥ ৯ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ অসক্তিবিতি। অসক্তিঃ সক্তিঃ সঙ্গোনিমিত্তেষু বিষয়েষু প্রীতিমাত্রং তদভাবোঽসক্তিরনভিষ্বঙ্গোঽভিষ্বঙ্গাভাবোঽভিষ্বঙ্গো নাম সক্তিবিশেষ এবানন্যাত্মভাবনালক্ষণো যথা অন্যস্মিন্ সুখিনি দুঃখিনি চাহমেব সুখী দুঃখী চ জীবতি মৃতে চাহমেব জীবামি মরিষ্যামি চেতি ক্বেত্যাহ পুত্রদারগৃহাদিষু পুত্রেষু দারেষু আদিগ্রহণাদন্যেষ্বপ্যত্যন্তেষ্টেষু দাসবর্গাদিষু তচ্চোভয়ং জ্ঞানার্থত্বাৎ জ্ঞানমুচ্যতে নিত্যঞ্চ সমচিত্তত্বং তুল্যচিত্ততা ক্ব ইষ্টানিষ্টোপপত্তিষু ইষ্টানামনিষ্টানাং চোপপত্তয়ঃ সংপ্রাপ্তয়স্তাস্বিষ্টানিষ্টোপপত্তিষু নিত্যং সমচিত্তত্বং জ্ঞানং ॥ ৯ ॥

কিঞ্চ ময়ি চেতি। ময়ি চেশ্বরেঽনন্যযোগেনাপৃথক্সমাধিনা নান্যো ভগবতো বাসুদেবাৎ পরোঽস্ত্যতঃ স এব নো গতিরিত্যেবং নিশ্চিতাঽব্যভিচারিণী বুদ্ধিরনন্যযোগস্তেন ভজনং ভক্তির্ন ব্যভিচরণশীলা অব্যভিচারিণী সা চ জ্ঞানং বিবিক্তদেশসেবিত্বং বিবিক্তঃ স্বভাবতঃ সংস্কারেণ বাশুচ্যাদিভিঃ সর্পব্যাঘ্রাদিভিশ্চ রহিতঃ অরণ্যনদীপুলিনদেবগৃহাদির্বিবিক্তো

## গিরিকৃত টীকা।

জ্ঞানস্যান্তরঙ্গমেব হেত্বন্তরমাহ কিঞ্চেতি। নন্বসক্তিরেবাভিষ্বঙ্গাভাবস্তথা চ পুনরুক্তিরিত্যাশঙ্ক্যাভিষ্বঙ্গোক্তিদ্বারা নিরস্যতি অভিষ্বঙ্গো নামেতি। অন্যস্মিন্নেব পুত্রাদাবাত্মত্বধিয়া তদ্গতে সুখাদাবাত্মনি তদ্ভাবনাখ্যং সক্তিবিশেষমেবোদাহরতি যথেতি। উক্তবিশেষণয়োরাকাঙ্ক্ষাদ্বারা বিষয়মাহ ক্বেত্যাদিনা। উক্তবিশেষণয়োর্জ্ঞানশব্দস্যোপপত্তিমাহ তচ্চেতি। সদা হর্ষবিষাদশূন্যমনস্ত্বমপি জ্ঞানহেতুরিত্যাহ নিত্যঞ্চেতি। তদেব বিভজতে ইষ্টেতি। তস্য জ্ঞানহেতুত্বন্নিগময়তি তচ্চৈতদিতি ॥ ৯ ॥

সাধনান্তরমাহ কিঞ্চেতি। অনন্যযোগমেব সংক্ষিপ্তং ব্যনক্তি নেত্যাদিনা। উক্তধীদ্বারা জাতায়া ভক্তের্ভগবতি স্থৈর্য্যং দর্শয়তি নেতি। তত্রাপি জ্ঞানশব্দস্তদ্ধেতুত্বাদিত্যাহ সাচেতি। দেশস্য বিবিক্তত্বং দ্বিবিধমুদাহরতি বিবক্ত ইতি। তদেব স্পষ্টয়তি অরণ্যেতি। উক্তদেশসেবিত্বং কথং জ্ঞানে হেতুস্তত্রাহ বিবিক্তেম্বিতি। আত্মাদীত্যাদিশব্দেন পরমাত্মা

## স্বামিকৃত টীকা।

কিঞ্চ অসক্তিরিতি। পুত্রদারাদিষু অসক্তিঃ প্রীতিত্যাগঃ, অনভিষ্বঙ্গঃ, পুত্রাদীনাং সুখে দুঃখে বা অহমেব সুখী দুঃখী চেত্যধ্যাসাতিরেকাভাবঃ, ইষ্টানিষ্টয়োরুপপত্তিষু প্রাপ্তিষু নিত্যং সর্ব্বদা সমচিত্তত্বং ॥ ৯ ॥

ময়ি চানন্যযোগেন ভক্তিরব্যভিচারিণী।
বিবিক্তদেশসেবিত্বমরতির্জনসংসদি ॥ ১০ ॥
অধ্যাত্মজ্ঞাননিত্যত্বং তত্ত্বজ্ঞানার্থদর্শনম্।
এতজ্জ্ঞানমিতি প্রোক্তমজ্ঞানং যদতোঽন্যথা ॥ ১১ ॥

## শাঙ্করভাষ্যম্।

দেশস্তং সেবিতুং শীলমস্যেতি বিবিক্তদেশসেবী তদ্ভাবো বিবিক্তদেশসেবিত্বং বিবিক্তেষু হি দেশেষু চিত্তং প্রসীদতি যতস্ততআত্মাদিভাবনা বিবিক্তে উপজায়তেঽতোবিবিক্তদেশসেবিত্বং জ্ঞানমুচ্যতে অরতিররমণং ক্ব জনসংসদি তজ্জনানাং প্রাকৃতানাং সংস্কারশূন্যানামবিনীতানাং কলহোন্মুখিতচিত্তানাং সংসৎ সমবায়ো জনসংসন্ন সংস্কারবতাং বিনীতানাং সংসত্তস্যা জ্ঞানোপকারকত্বাৎ অতঃ প্রাকৃতজনসংসদ্যরতির্জ্ঞানার্থত্বাৎ জ্ঞানং ॥ ১০ ॥

কিঞ্চ অধ্যাত্মেতি। অধ্যাত্মজ্ঞাননিত্যত্বমাত্মাদিবিষয়ং জ্ঞানমধ্যাত্মজ্ঞানং তস্মিন্ নিত্যভাবো নিত্যত্বমমানিত্বাদীনাং জ্ঞানসাধনানাং ভাবানাং পরিপাকনিমিত্তং তত্ত্বজ্ঞানং' তস্যার্থো- মোক্ষঃ সংসারোপরমস্তস্যালোচনং তত্ত্বজ্ঞানার্থদর্শনং তত্ত্বজ্ঞানফলালোচনে হি তৎসাধনানুষ্ঠানে প্রবৃত্তিঃ স্যাদিতি এতদমানিত্বাদিতত্ত্বজ্ঞানার্থদর্শনান্তমুক্তং জ্ঞানমিতি প্রোক্তং জ্ঞানার্থত্বাৎ অজ্ঞানপদে তস্মাৎ যথোক্তাদন্যথাবিপর্য্যয়েণ মানিত্বং দম্ভিত্বং হিংসা ক্ষান্তিরনার্জ্জবমিত্যাদ্যজ্ঞানং বিজ্ঞেয়ং পরিহরণায সংসারপ্রবৃত্তিকারণত্বাদিতি ॥ ১১ ॥

## গিরিকৃত টীকা।

বাক্যার্থশ্চোচ্যতে। নম্বরতিবিষয়ত্বেনাবিশেষতো জনসংসম্মাত্রং কিমিতি ন গৃহ্যতে তত্রাহ তস্য ইতি। সন্তং সঙ্গস্ত ভেষজমিত্যুপলম্ভাদিত্যর্থঃ ॥ ১০ ॥

সাধনান্তরমাহ কিঞ্চেতি। আত্মাদীত্যাদিশব্দোঽনাত্মার্থস্তদ্বিষয়ং জ্ঞানং বিবেকস্তন্নিত্যত্বং তত্রৈব নিষ্ঠাবত্বং বিবেকনিষ্ঠো হি বাক্যার্থজ্ঞানসমর্থো ভবতি' তেষাং ভাবনাপরিপাকো নাম'যত্নেন সাধিতানাং প্রকর্ষপর্য্যন্তত্বং' তন্নিমিত্তং তত্ত্বজ্ঞানমৈক্যসাক্ষাৎকারস্তৎফলালোচনং কিমর্থমিত্যাশঙ্ক্যাহ তদ্ধেতি। প্রবৃত্তিঃ স্যাদিত্যতস্তত্ত্বজ্ঞানার্থদর্শনমর্থবদিতিশেষঃ। জ্ঞানস্যান্তরঙ্গহেতুমুক্তমুপসংহরতি এতদিতি। কিমিতি তস্য বিজ্ঞেয়ত্বমিত্যাশঙ্ক্যাহ পরিহরণায়েতি। তত্র হেতুঃ সংসারেতি। তস্য প্রবৃত্তিকৃৎপত্তিস্তদ্ধেতুত্বা-

## স্বামিকৃত টীকা।

কিঞ্চ ময়ীতি। ময়ি পরমেশ্বরেঽনন্যযোগেন সর্ব্বাত্মদৃষ্ট্যা অব্যভিচারিণী একান্তা ভক্তিঃ, বিবিক্তঃ শুদ্ধশ্চিত্তপ্রসাদকরস্তং দেশং সেবিতুং শীলং যস্য তস্য ভাবস্তত্ত্বং প্রাকৃতানাং জনানাং সংসদি সভায়ামরতীরত্যভাবঃ ॥ ১০ ॥

জ্ঞেয়ং যত্তৎ প্রবক্ষ্যামি যজ্জ্ঞাত্বামৃতমশ্নুতে।
অনাদিমৎ পরং ব্রহ্ম ন সত্তন্নাসদুচ্যতে ॥ ১২ ॥

## শাঙ্করভাষ্যম্।

যথোক্তেন জ্ঞানেন জ্ঞাতব্যং কিমিত্যাকাঙ্ক্ষায়ামাহ জ্ঞেয়ং যত্তদিত্যাদি। নন্থ যথা নিয়মাশ্চামানিত্বাদয়ো ন তৈজ্ঞে‘য়াঃ, তেন হ্যমানিত্বাদিকস্য চিদ্বস্তুনঃ পরিচ্ছেদকং দৃষ্টং, সর্ব্বত্রৈব যদ্বিষয়ং জ্ঞানং তদেব তস্য জ্ঞেয়স্য পরিচ্ছেদকং দৃশ্যতে, ন হ্যন্যবিষয়েণ জ্ঞানেনান্যদুপলভ্যতে যথা ঘটবিষযেণ জ্ঞানেনাগ্নিনৈ‘ষ দোষঃ জ্ঞাননিমিত্তত্বাৎ জ্ঞানমুচ্যতে ইতি হ্যবোচাম জ্ঞানসহকাবিকারণত্বাচ্চ জ্ঞেয়মিতি জ্ঞেয়ং জ্ঞাতব্যং যত্তৎ প্রবক্ষ্যামি প্রকর্ষেণ যথাবদ্বক্ষ্যামি কিং ফলং তদিতি প্রবোচনেন শ্রোতুবভিমুখীকবণায়াহ যৎ জ্ঞেয়ং জ্ঞাত্বা অমৃতত্বমশ্নুতে ন পুনর্ম্রি‘য়ত ইত্যর্থঃ, অনাদিমৎ আদিবস্যাস্তীত্যাদিমৎ ন আদিমদনাদিমৎ কিং তৎ পরং নিবতিশয়ং ব্রহ্ম জ্ঞেয়মিতি প্রকৃতমত্র কেচিৎ অনাদি মৎপরমিতিপদং ছিন্দন্তি বহুব্রীহিণোক্তেঽর্থে মতুপ্ আনর্থক্যমনিষ্টং স্যাদিত্যর্থবিশেষঞ্চ দর্শয়-

## গিরিকৃত টীকা।

ম্মানিত্বাদি ত্যজ্যং জ্ঞাতে চ ত্যজ্যত্বং তেন তস্য জ্ঞেয়তেত্যর্থঃ। ইতিশব্দঃ সাধনাধিকারসমাপ্ত্যর্থঃ ॥ ১১ ॥

উত্তরগ্রন্থমবতারয়তি যথোক্তেতি। অমানিত্বাদীনাং জ্ঞানত্বমাক্ষিপতি নম্বিতি। বস্তুপরিচ্ছেদকত্বাৎ জ্ঞানত্বমাশঙ্ক্যাহ ন হীতি। পবিচ্ছেদকত্বাৎ জ্ঞানত্বং জ্ঞানত্বাৎ পবিচ্ছেদকত্বমিত্যন্যোন্যাশ্রয়মিত্যভিপ্রেত্যাহ সর্ব্বত্রেতি। স্বার্থস্যৈব জ্ঞানং পরিচ্ছেদকমিত্যেতদ্ব্যতিরেকদ্বারা বিশদয়তি ন হীতি। ব্যতিরেকদৃষ্টান্তমাহ যথেতি। অমানিত্বাদীনাং জ্ঞানত্বমাক্ষিপ্তং প্রতিক্ষিপতি নৈষ দোষ ইতি। তত্র হেতুত্বেনোক্তং স্মারযতি জ্ঞানেতি। তেন জ্ঞানশব্দে হেত্বন্তরমাহ জ্ঞানেতি। অমানিত্বাদীনাং জ্ঞানত্বমুক্ত্বা জ্ঞাতব্যমবতারয়তি জ্ঞেয়মিতি। প্রশ্নদ্বারা জ্ঞেয়প্রবচনস্য ফলমুক্ত্বা প্ররোচনং কৃত্বা তেন শ্রোতুরাভিমুখ্যমাপাদয়িতুং প্ররোচনফলোক্তিপবমনন্তরবাক্যমিত্যাহ কিমিত্যাদিনা। তদেব বিশিনষ্টি অনাদিমদিতি। আদিমত্ত্বরাহিত্যমব্যাকৃতস্যাপি ততো বিশেষং দর্শয়তি কিন্তদিতি।

## স্বামিকৃত টীকা।

কিঞ্চ অধ্যাত্মেতি। আত্মানমধিকৃত্য বর্ত্তমানং জ্ঞানং তস্মিন্নিত্যত্বং নিত্যভাবঃ তত্ত্বপদার্থশুদ্ধিনিষ্ঠত্বমিত্যর্থঃ, তত্ত্বজ্ঞানস্যার্থঃ প্রয়োজনং মোক্ষস্তস্য দর্শনং মোক্ষস্য সর্ব্বোৎকৃষ্টত্বালোচনমিত্যর্থঃ এতদমানিত্বমদম্ভিত্বমিত্যাদিবিংশতিসংখ্যকং যদুক্তমেতজ্জ্ঞানমিতি প্রোক্তং বশিষ্ঠাদিভির্জ্ঞানসাধনত্বাৎ অতোঽন্যথা অস্মাদ্বিপরীতং মানিত্বাদি যত্তদজ্ঞানমিতি জ্ঞানবিরোধিত্বাৎ অতঃ সর্ব্বথা ত্যজ্যমিত্যর্থঃ ॥ ১১ ॥

## শাঙ্করভাষ্যম্।

স্ত্যহং বাসুদেবাখ্যা পরা শক্তির্যস্য তন্মৎপরমিতি সত্যমেবমপুনরুক্তং স্যাদর্থশ্চেৎসম্ভবতি নত্বর্থঃ সম্ভবতি ব্রহ্মণঃ সর্ব্ববিশেষপ্রতিষেধেনৈব বিজিজ্ঞাপয়িষিতত্বান্ন সত্তন্নাসদুচ্যত-ইতি বিশিষ্টশক্তিমত্ত্বপ্রদর্শনং বিশেষপ্রতিষেধশ্চেতি বিপ্রতিষিদ্ধং তস্মান্মতুপো বহু-ব্রীহিণা সমানার্থত্বেঽপি প্রয়োগঃ শ্লোকপূরণার্থঃ। অমৃতত্বফলং জ্ঞেয়ং ময়োচ্যত ইতি প্ররো-চনেনাভিমুখীকৃত্যাহ ন সত্তৎ জ্ঞেয়মুচ্যত ইতি নাপ্যসত্তদুচ্যতে নন্থু মহতা পরিকরবন্ধেন কণ্ঠরবেণোদ্ঘোষ্য জ্ঞেয় প্রবক্ষ্যামীত্যননুরূপমুক্তং ন সত্তন্নাসদুচ্যতে ইতি ন অনুরূপ-মেবোক্তং কথং সর্ব্বাসু উপনিষৎসু জ্ঞেয়ং ব্রহ্ম নেতি নেত্যস্থূলমনণ্বিত্যাদিবিশেষ প্রতিষে-ধেনৈব নির্দ্দিশ্যতে নেদং তদিতি বাচোঽগোচরত্বান্ননু তদস্তি যদস্তিশব্দেনোচ্যতে অথাস্তি শব্দেন নোচ্যতে যৎ নাস্তি তৎ জ্ঞেয়ং বিপ্রতিষিদ্ধঞ্চ জ্ঞেয়ং তদস্তিশব্দেন নোচ্যত ইতি চ ন তাবন্নাস্তি নাস্তিবুদ্ধ্যবিষয়ত্বান্ননু সর্ব্বা বুদ্ধয়োঽস্তিনাস্তিবুদ্ধ্যনুগতা এব তত্রৈবং সতি জ্ঞেয়-মপ্যস্তিবুদ্ধ্যনুগতপ্রত্যয়বিষয়ং বাস্যান্নাস্তিবুদ্ধ্যনুগতপ্রত্যয়বিষয়ং বাস্যান্নাতিপ্রিয়ত্বেনোভয়-বুদ্ধ্যনুগতপ্রত্যয়বিষয়ং বা ইদন্ত জ্ঞেয়মতীন্দ্রিয়ত্বেন শব্দৈকপ্রমাণগম্যত্বান্ন ঘটাদিবদুভয়-বুদ্ধ্যনুগতপ্রত্যয়বিষয়মিত্যতো ন সত্তন্নাসদিত্যুচ্যতে যত্তূক্তং বিরুদ্ধমুচ্যতে জ্ঞেয়ং যন্নসত্তন্না-সদুচ্যতে ইতি ন বিরুদ্ধমন্যদেব তদ্বিদিতাদথো অবিদিতাদধীতি শ্রুতেঃ শ্রুতিরপি বিরুদ্ধা-

## গিরিকৃত টীকা।

ভোক্তৃত্বপি ভোগ্যাৎপরত্বমিত্যতো বিশিনষ্টি ব্রহ্মেতি। অনাদীত্যেকং পদং মৎপরমিতি পদচ্ছেদান্ন পুনরুক্তিরিতিমতান্তরমধ্যাপয়তি অত্রেতি। একপদত্বসম্ভবে কিমিতি পদ-দ্বয়মিত্যাশঙ্ক্যাহ বহুব্রীহিণেতি। আদিবস্য নাস্তীতি মতুপোঽর্থবত্ত্বমিতি। মতু-পানর্থক্যমনিষ্টং স্যাদিতি মত্বা পদং ছিন্দন্তীতি পূর্ব্বেণ সম্বন্ধঃ। আদিবস্য নাস্তী-ত্যনাদীত্যুক্তং মৎপরমিত্যুচ্যমানে কোঽর্থঃ স্যাদিত্যাশঙ্ক্যাহ অর্থেতি। উক্ত-ব্যাখ্যানস্যাযুক্তত্বান্নায়ং পুনরুক্তিসমাধিরিত্যাহ সত্যমিতি। অর্থাসম্ভবং সমর্থয়তে ব্রহ্মণইতি। তথাপি বিশিষ্টশক্তিমত্ত্বং কিং ন স্যাদিত্যাশঙ্ক্যাহ বিশিষ্টেতি। তথাপি মতু-পো বহুব্রীহিণা তুল্যার্থস্য কথং নানর্থক্যং তত্রাহ তস্মাদিতি। অনাদিমৎপরং ব্রহ্মেত্যত্র পক্ষান্তরং প্রতিক্ষপ্য স্বপক্ষঃ সমর্থিতঃ সম্প্রতি ব্রহ্মণো ব্রহ্মত্বাদেব কার্য্যকারণাত্মকত্ব-প্রাপ্তাবুক্তানুবাদদ্বারা ন সদিত্যাদ্যবতারয়তি অমৃতত্বেতি। সৎকার্য্যমভিব্যক্তনামরূপত্বা-দসৎকারণং তদ্বিপর্য্যয়াদিতি ভাগঃ জ্ঞেয়প্রবচনমনির্ব্বাচ্যবিষয়ত্বাৎ প্রক্রমপ্রতিকূলমিত্যা-ক্ষিপতি নন্বিতি। নির্ব্বিশেষস্য বস্তুনো জ্ঞেয়ত্বাত্তদ্বিষয়ং প্রবচনং প্রক্রমানুকূলমিত্যুত্তর-মাহ নেত্যাদিনা। অনির্ব্বাচ্যত্বে ন সত্তন্নাসদিত্যুচ্যমানে কথমিদমনুরূপমিতি পৃচ্ছতি কথমিতি। ব্রহ্মাত্মপ্রকাশস্য সিদ্ধত্বাত্তদর্থং বিধিমুখেনোপদেশাযোগাদধ্যস্তাত্তদ্ধর্ম্মনিবৃ-ত্তয়ে নিষেধদ্বারোপদেশস্য বেদান্তেষু প্রসিদ্ধেরারোপিতবিশেষনিষেধরূপমিদং প্রবচন-

## শাঙ্করভাষ্যম্।

র্থেতি চেৎ যথা যজ্ঞায় শালামারভ্য কো হি তদ্বেদ যদ্যমুষ্মিন্ লোকেঽস্তি বা ন বেতীত্যে-বমিতি চেৎ ন বিদিতাভ্যামন্যত্বশ্রুতেরবশ্যবিজ্ঞেয়ার্থপ্রতিপাদনপরত্বাৎযদ্যমুষ্মিন্নিত্যাদি তু বিধিশেষোঽর্থবাদ উপপত্তেশ্চাসদাদিশব্দৈঃ ব্রহ্ম নোচ্যতইতি সর্ব্বো হি শব্দোঽর্থপ্রকাশনায় প্রযুক্তঃ শ্রূয়মাণশ্চ শ্রোতৃভির্জ্জাতিক্রিয়াগুণসম্বন্ধদ্বারেণ সঙ্কেতগ্রহণং সব্যপেক্ষার্থং প্রত্যা-য়য়তি নান্যথা দৃষ্টত্বাৎ তৎযথা গৌরশ্বইতি বা জাতিতঃ পচতীতি বা ক্রিয়াতঃ শুক্লং কৃষ্ণ ইতি বা গুণতো ধনী গোমানিতি চ সম্বন্ধতো ন তু ব্রহ্ম জাতিমদতো ন সদাদিশব্দবাচ্যং নাপি গুণবৎ যেন গুণশব্দেনোচ্যতে নির্গুণত্বান্নাপি ক্রিয়াশব্দবাচ্যং নিষ্ক্রিয়ত্বান্নিষ্কলং নিষ্ক্রিয়ং শান্তমিতি শ্রুতেঃ। ন চ সম্বন্ধ্যেকত্বাদদ্বয়ত্বাদবিষয়ত্বাদাত্মত্বাচ্চ ন কেনচিচ্ছব্দে-নোচ্যতে ইতি যুক্তং যতো বাচো নিবর্ত্তন্ত ইত্যাদিশ্রুতিভিশ্চ ॥ ১২ ॥

## গিরিকৃত টীকা।

মুচিতমিতি পবিহরতি সর্ব্বাস্বিতি। জ্ঞেয়ঞ্চ ব্রহ্মণো বিধিমুখোপদেশাযোগে হেতুমাহ বাচইতি। ব্রহ্মণোঽস্তিশব্দাবাচ্যত্বে নরবিষাণবন্নাস্তিত্বমিত্যনিষ্টমাশঙ্কতে নন্বিতি। এব-মুৎসর্গেঽপি ব্রহ্মণি কিমায়াতমিত্যাশঙ্ক্যাহ অথেতি। জ্ঞেয়স্যাস্তিশব্দাবাচ্যত্বে ব্যাঘাতশ্চে-ত্যাহ বিপ্রতিষিদ্ধঞ্চেতি। অস্তিশব্দাবাচ্যত্বাদবস্তু ব্রহ্মেত্যত্রাপ্রয়োজকত্বমাহ ন তাবদিতি। নাস্তিবুদ্ধিবিষয়ত্বমেবাবস্তুত্বে নিমিত্তমতস্তদভাবাদ্ব্রহ্মণো নাবস্তুতেত্যেতদেব ব্যক্তীকর্ত্তুং চোদয়তি নন্বিতি। সর্ব্বাসাক্ষিয়ামস্তিধীত্বেন নাস্তিধীত্বেন বাহুগতত্বেঽন্যতরধীগোচরত্বাভাবে ব্রহ্মণোঽনির্ব্বাচ্যত্বং দুর্ব্বারমিতি ফলিতমাহ তত্রেতি! ব্রহ্মণো ঘটাদিবৈলক্ষণ্যাদুভয়বুদ্ধ্যবি-ষয়ত্বেঽপি নানির্ব্বাচ্যতেত্যাহ নেত্যাদিনা। ঘটাদেরিন্দ্রিয়গ্রাহ্যস্যোভয়বুদ্ধিবিষয়ত্বেঽপি ব্রহ্মণস্তদগ্রাহ্যস্য নোভয়ধীবিষয়ত্বং তথাপি নানির্ব্বাচ্যত্বং সচ্চিদেকতানস্য শব্দপ্রমাণাদ-বিষয়ত্বেন দৃষ্টত্বাদিত্যুক্তমেব প্রপঞ্চয়তি যদ্ধীতি। পরোক্তং বিরোধমনুবদতি যত্বিতি। শ্রুত্যবষ্টম্ভেন নিরাচষ্টে ন বিরুদ্ধমিতি। নাপি বিরুদ্ধার্থত্বানুমানং বোধকত্বস্যাবিরোধা-পেক্ষত্বাদিতি শঙ্কতে শ্রুতিরিতি। তস্যাবিরুদ্ধার্থত্বানুমানমাহ যথেতি। প্রাচীনবংশং করো-

## স্বামিকৃত টীকা।

এভিঃ সাধনৈর্যজ্জ্ঞেয়ং তদাহ জ্ঞেয়মিতি ষড়্ভিঃ। যজ্জ্ঞেয়ং তৎ প্রবক্ষ্যামি। শ্রোতুরাদরসিদ্ধয়ে জ্ঞানফলং দর্শয়তি যদ্বক্ষ্যমাণং জ্ঞাত্বা অমৃতং মোক্ষং প্রাপ্নোতি। কিং তৎ, অনাদিমৎ আদিমন্ন ভবতীত্যনাদিমৎ পরং নিরতিশয়ং ব্রহ্ম, অনাদীত্যেতাবতৈব বহুব্রীহিণা অনাদিমত্ত্বে সিদ্ধেঽপি পুনর্মতুপ্ প্রত্যয়শ্ছান্দসঃ। যদ্বা অনাদীতি মৎপর-ঞ্চেতি পদদ্বয়ং মম বিষ্ণোঃ পরং নির্বিশেষরূপং ব্রহ্মেত্যর্থঃ। তদেবাহ ন সদিত্যাদি, বিধি-মুখেন প্রমাণস্য বিষয়ঃ সচ্ছব্দেনোচ্যতে নিষেধবিষয়স্ত্বসচ্ছব্দেনোচ্যতে ইদন্তু তদুভয়-বিলক্ষণমবিষয়ত্বাদিত্যর্থঃ ॥ ১২ ॥

সর্ব্বতঃ পাণিপাদন্তৎ সর্ব্বতোঽক্ষিশিরোমুখম্।
সর্ব্বতঃ শ্রুতিমল্লোকে সর্ব্বমাবৃত্য তিষ্ঠতি ॥ ১৩ ॥

শাঙ্করভাষ্যম্।

সচ্ছব্দপ্রত্যয়াবিষয়ত্বাদসত্ত্বাশঙ্কায়াং জ্ঞেয়স্য সর্ব্বপ্রাণিকরণোপাধিদ্বারেণ তদস্তিত্বং প্রতিপাদয়ংস্তদাশঙ্কানিবৃত্ত্যর্থমাহ সর্ব্বত ইতি। সর্ব্বতঃ পাণিপাদন্তৎ সর্ব্বত্র পাণয়ঃ পাদাশ্চাস্যেতি সর্ব্বতঃ পাণিপাদন্তৎ জ্ঞেয়ং সর্ব্বপ্রাণিকরণোপাধিভিঃ ক্ষেত্রজ্ঞাস্তিত্বং বিভাব্যতে তৎ ক্ষেত্রজ্ঞশ্চ ক্ষেত্রোপাধিত উচ্যতে ক্ষেত্রঞ্চ পাণিপাদাদিভিরনেকধা ভিন্নং ক্ষেত্রোপাধিভেদকৃতং বিশেষজাতং মিথ্যৈব ক্ষেত্রজ্ঞস্যেতি তদপনয়নেন জ্ঞেয়ত্বমুক্তং ন সৎতন্নাসদুচ্যতে ইতি উপাধিকৃতং মিথ্যারূপমপ্যস্তিত্বাধিগমায় জ্ঞেয়ধর্ম্মবৎ পরিকল্প্যো-চ্যতে সর্ব্বতঃ পাণিপাদমিত্যাদি তথাহি সম্প্রদায়বিদাং বচনমধ্যারোপাপবাদাভ্যাং নিষ্প্রপঞ্চং প্রপঞ্চ্যতে ইতি। সর্ব্বত্র সর্ব্বদেহাবয়বত্বেন গম্যমানাঃ পাণিপাদাদয়ো জ্ঞেয়-শক্তিসদ্ভাবনিমিত্তস্বকার্য্যা ইতি জ্ঞেয়সদ্ভাবে লিঙ্গানি জ্ঞেয়স্যেত্যুপচারত উচ্যন্তে তথা

গিরিকৃত টীকা।

তীতি পারলৌকিকফলযজ্ঞানুষ্ঠানার্থং শালানির্ম্মাণংপ্রস্তুত্য কো হি তদ্বেদেত্যাদ্যা পর-লোকসত্ত্বে সন্দিহানা যথা বিরুদ্ধার্থা শ্রুতিরপ্রমাণমেবং বিদিতাবিদিতান্যত্বশ্রুতিরপী-ত্যর্থঃ। সেয়ং শ্রুতির্বিরুদ্ধার্থত্বেনামানতয়া ন হাতব্যা ব্রহ্মণ্যদ্বিতীয়ে প্রত্যক্ত্বপ্রতিপাদ-নেন মানত্বাদিত্যুত্তরমাহ ন বিদিতেতি। যত্তু বিরুদ্ধার্থত্বে কো হীত্যুদাহৃতং তদসদর্থবাদস্য বিধিশেষস্য স্বার্থে তাৎপর্য্যাদিত্যাহ যদীতি। যত্র জাত্যাদিমত্বং তত্র বাচ্যত্বং যথা গবাদৌ ন ব্রহ্মণি জাত্যাদিমত্ত্বমতস্তস্যাবাচ্যত্বান্নিষেধেনৈব বোধ্যত্বমিত্যাহ উপপত্তেশ্চেতি নোচ্যত ইতি নিষেধেনৈব তস্যোপদেশ ইতিশেষঃ। জাত্যাদিমতোঽর্থস্যৈব বাচ্যত্বং তত্রৈব সঙ্গতিগ্রহাদি প্রপঞ্চয়তি সর্ব্বো হীতি। অশ্রুতস্য জাত্যাদিদ্বারেণাজ্ঞাতসঙ্গতের্ব্বা শব্দস্য ন বোধকত্বমদৃষ্টেরিত্যাহ নাস্যথেতি। জাত্যাদেঃ সচ্ছব্দবিষয়ত্বমুদাহরতি তৎ যথেত্যাদিনা। ব্রহ্মণস্ত্বগোত্রমবর্ণমিত্যাদিশ্রুতেঃ জাত্যাদিমত্ত্বাভাবান্ন শব্দবাচ্যতেত্যাহ ন ত্বিতি। কেবলো নির্গুণশ্চেতি শ্রুতে গুণদ্বারা ব্রহ্মণো ন বাচ্যতেত্যাহ ন স্থিতি। কেবলো নির্গুণমিতি নিষ্ক্রিয়ত্বে মানমাহ নিষ্কলমিতি। ব্রহ্মণোঽদ্বিতীয়ত্বস্যাশেষোপনিষৎস্য সিদ্ধ-ত্বাদ্বিশিষ্টস্য সম্বন্ধস্য তস্মিন্নসিদ্ধের্ন তদ্দ্বারাপি তস্য বাচ্যতেত্যাহ ন চেতি। ব্রহ্মণ্যভিধাবৃত্ত্যা শব্দাপ্রবৃত্তৌ হেত্বন্তরাণ্যাহ অদ্বয়ত্বাদিতি। ব্রহ্মণোঽবাচ্যত্বে শ্রুতিমপি সম্বাদয়তি যত ইতি ॥ ১২ ॥

সর্ব্ববিশেষরহিতস্যাবাঙ্মনসগোচরস্য অদৃষ্টৈঃ দৃষ্টৈশ্চ বিপরীতস্য প্রাপ্তে ব্রহ্মণঃ শূন্যত্বে প্রত্যক্ত্বেনেন্দ্রিয়প্রবৃত্ত্যাদিহেতুত্বেন কল্পিতদ্বৈতসত্তাস্ফূর্ত্তিপ্রদত্বেনেশ্বরত্বেন চ সত্বং দর্শয়ন্নাদৌ দেহাদীনাং প্রবৃত্তিমতাং রথাদিবদচেতনানাং প্রেক্ষাপূর্ব্বকপ্রবৃত্তিমত্ত্বাৎ

## শাঙ্করভাষ্যম্।

বাখ্যেয়মন্যৎ সর্ব্বতঃ পাণিপাদং তৎ জ্ঞেয়ং সর্ব্বতোঽক্ষিশিরোমুখং সর্ব্বতোঽক্ষীণি শিরাংসি মুখানি চ যস্য তৎ সর্ব্বতোঽক্ষিশিরোমুখং সর্ব্বতঃ শ্রুতিমদিতি সর্ব্বত্র শ্রুতিমচ্ছ্রুতিঃ শ্রবণেন্দ্রিয়ং তৎ বিদ্যতে যস্য তৎ শ্রুতিমল্লোকে প্রাণিনিকায়ে সর্ব্বাবৃত্য সংব্যাপ্য তিষ্ঠতি স্থিতিং লভতে॥ ১৩॥

## গিরিকৃত টীকা।

চেতনাধিষ্ঠিতত্বমনুমিমানস্তৎ প্রত্যক্‌চেতনং ব্রহ্মেত্যাহ সচ্ছব্দেতি। তদস্তিত্বমিতি তচ্ছব্দো জ্ঞেয়ব্রহ্মার্থঃ তদাশঙ্কেতি তচ্ছব্দেনাসত্ত্বমুচ্যতে। নন্বু সর্ব্বদেহেষু পাণিপাদমস্ত্যেতি কথংপাণীনাঞ্চ পাদানাঞ্চ দেহস্থত্বেনাত্মধর্ম্মত্বং তত্রাহ সর্ব্বেতি। করণপ্রবৃত্তী রথাদি-প্রবৃত্তিবৎ প্রেক্ষাপূর্ব্বকপ্রবৃত্তিমত্বাচ্চেতনাধিষ্ঠাতৃপূর্ব্বিকেত্যর্থঃ। উক্তপ্রবৃত্ত্যা চেতনাস্তি-ত্বসিদ্ধাবপি কথং ক্ষেত্রজ্ঞাস্তিত্বমিত্যাশঙ্ক্য চেতনস্যৈব ক্ষেত্রোপাধিনা ক্ষেত্রজ্ঞত্বা-চেতনাস্তিত্বং তদস্তিত্বমেবেত্যাহ ক্ষেত্রজ্ঞশ্চেতি। তস্য ক্ষেত্রোপাধিত্বেঽপি কথং পাণিপাদাক্ষিশিরোমুখাদিমত্বমিত্যাশঙ্ক্যাহ ক্ষেত্রঞ্চেতি। অতশ্চোপাধিতস্তস্মিন্ বিশে-ষোক্তিরিতিশেষঃ। কথংতর্হি নসত্তন্নাসদিতি নির্ব্বিশেষত্বোক্তিরিত্যাশঙ্ক্যাহ ক্ষেত্রেতি। পাণিপাদাদিমত্ত্বমৌপাধিকং মিথ্যা চেৎ জ্ঞেয়প্রবচনাধিকারে কথং তদুক্তিরিত্যা-শঙ্ক্যাহ উপাধীতি। মিথ্যারূপমপি জ্ঞেয়বস্তুজ্ঞানোপযোগীত্যত্র বৃদ্ধসম্মতিমাহ তথা হীতি। পাণিপাদাদীনামন্যগতানামাত্মধর্ম্মত্বেনারোপ্য ব্যপদেশে কো হেতুরিতি চেৎ তত্রাহ সর্ব্বত্রেতি। জ্ঞেয়স্য ব্রহ্মণঃ শক্তিসন্নিধিমাত্রেণ প্রবর্ত্তনসামর্থ্যাং তদসত্বং নিমিত্তী-কৃত্য স্বকার্য্যবন্তো ভবন্তি পাণ্যাদয়ইতি কৃত্বেতি যোজনা। সর্ব্বতোঽক্ষীত্যাদাবুক্তমতি-দিশতি তথেতি। তদজ্ঞেয়ং যথা সর্ব্বতঃ পাণিপাদমিতি ব্যাখ্যাতং তথৈবত্যুক্তমেব স্পষ্টয়তি সর্ব্বতইতি। সর্ব্বতোঽক্ষীত্যাদেরক্ষরার্থমাহ সর্ব্বতোঽক্ষীতি। অক্ষিশ্রবণত্বম-বশিষ্টজ্ঞানেন্দ্রিয়বত্বস্য পাণিপাদমুখবত্ত্বঞ্চাবশিষ্টকর্ম্মেন্দ্রিয়বত্বস্য মনোবুদ্ধ্যাদিমত্বস্য চোপ-লক্ষণং। একস্য সর্ব্বতঃ পাণ্যাদিমত্বং সাধয়তি সর্ব্বমিতি॥ ১৩॥

## স্বামিকৃত টীকা।

নম্বেবং ব্রহ্মণঃ সদসদ্বিলক্ষণত্বে সতি সর্ব্বং খল্বিদং ব্রহ্মৈবেদং সর্ব্বমিত্যাদিশ্রুতিবি-রুধ্যেতেত্যাশঙ্ক্য পরাস্য শক্তির্বিবিধৈব শ্রূয়তে স্বাভাবিকী জ্ঞানবলক্রিয়া চেত্যাদিশ্রুতি-প্রসিদ্ধয়া অচিন্ত্যশক্ত্যা সর্ব্বাত্মত্বং তস্য দর্শয়ন্নাহ সর্ব্বত ইতিপঞ্চভিঃ। সর্ব্বতঃ সর্ব্বত্র পাণয়ঃ পাদাশ্চ যস্য তৎ, সর্ব্বতোঽক্ষীণি শিরাংসি মুখানি চ যস্য তৎ, সর্ব্বতঃ শ্রুতিমৎ শ্রবণেন্দ্রিয়ৈর্যুক্তং সৎ লোকে সর্ব্বমাবৃত্য ব্যাপ্য তিষ্ঠতি সর্ব্বব্যবহারাস্পদত্বেন তিষ্ঠতীত্যর্থঃ॥ ১৩॥

সর্ব্বেন্দ্রিয়গুণাভাসং সর্ব্বেন্দ্রিয়বিবর্জিতম্।
অসক্তং সর্ব্বভৃচ্চৈব নির্গুণং গুণভোক্তৃ চ ॥ ১৪ ॥

## শাঙ্করভাষ্যম্।

উপাধিভূতপাণিপাদাদীন্দ্রিয়াধ্যারোপণাজ্জ্ঞেয়স্য তদ্বত্তাশংকা মাভূদিত্যেবমর্থঃ শ্লোকারম্ভঃ সর্ব্বেন্দ্রিয়েতি। সর্ব্বেন্দ্রিয়গুণাভাসং সর্ব্বাণিচ তানীন্দ্রিয়াণি শ্রোত্রাদীনি বুদ্ধীন্দ্রিয়কর্ম্মেন্দ্রিয়াখ্যান্যন্তঃকরণে চ বুদ্ধিমনসী জ্ঞেয়োপাধিত্বস্য তুল্যত্বাৎ সর্ব্বেন্দ্রিয়গ্রহণেন গৃহ্যেতে অপি চান্তঃকরণোপাধিদ্বাবেণৈব শ্রোত্রাদীনামপি উপাধিত্বমিত্যতোঽন্তঃকরণবহিঃকরণোপাধিভূতৈঃ সর্ব্বেন্দ্রিযগুণৈবধ্যবসায়সঙ্কল্পশ্রবণবচনাদিভিববভাসত ইতি সর্ব্বেন্দ্রিয়গুণাভাসং সর্ব্বেন্দ্রিয়ব্যাপারৈর্ব্ব্যাপৃতমিব তজ্জ্ঞেয়মিত্যর্থঃ ধ্যায়তীব লেলায়তীবেতি শ্রুতেঃকস্মাৎপুনঃ কাবণান্ন ব্যাপৃতমেবেতি গৃহ্যতইত্যতআহ সর্ব্বেন্দ্রিযবিবর্জিতং সর্ব্বকরণরহিতমিত্যর্থঃ অতো ন করণব্যাপাবৈর্ব্ব্যাপৃতং তজ্জ্ঞেয়ং যত্ত্বযং মন্ত্রোঽপাণিপাদো জবনো গ্রহীতা পশ্যত্যচক্ষুঃ স শৃণোত্যকর্ণ ইত্যাদি সর্ব্বেন্দ্রিয়োপাধিগুণানুগুণ্যভজনশক্তিমৎ

## গিরিকৃত টীকা।

আরোপাদৃতে সাক্ষাদেব জ্ঞেযস্য পাণ্যাদিমত্ত্বমাশঙ্ক্যাহ উপাধীতি। ইন্দ্রিয়বিশেষণীভূতসর্ব্বশব্দাৎ জ্ঞেয়োপাধিত্বন্যায়বিশেষাচ্চাত্র বুদ্ধ্যাদেরপি গ্রহণমিত্যাহ অন্তঃকরণে চেতি। শ্রোত্রাদীনাং জ্ঞেয়োপাধিত্বস্য মনোবুদ্ধিদ্বাবত্বাদপি তয়োরিহ গ্রহণমিত্যাহ অপি চেতি। তয়োবপীহোপাদানে ফলিতমাহ ইত্যতইতি। অক্ষরার্থমুক্ত্বা বাক্যার্থমাহ সর্ব্বেতি। উপাধিদ্বারা কল্পিতব্যাপাববত্ত্বে মানমাহ ধ্যায়তীতি। কল্পিতমেবাস্য ব্যাপারবত্ত্বং ন বাস্তবমিত্যত্র ভগবতোঽপি সম্মতিমাকাঙ্ক্ষাদ্বাবা দর্শয়তি কস্মাদিত্যাদিনা। সর্ব্বকরণরাহিত্যে ফলিতমাহ অত ইতি। সাক্ষাদেব জ্ঞেয়স্য বেগবদ্বিহবণাদিক্রিয়াবত্ত্বায়াঃ মান্ত্রবর্ণিকত্বাৎ কুতোঽস্য করণব্যাপারৈরব্যাপৃতত্বমিত্যাশঙ্ক্যানুবাদপূর্ব্বকং মন্ত্রস্য প্রকৃতানুগুণত্বমাহ যত্ত্বিতি। করণগুণানুগুণ্যভজনমন্তবেণ সাক্ষাদেব জবনাদিক্রিয়াবত্ত্বপ্রদর্শনপরত্বে মন্ত্রস্য মুখ্যার্থত্বং স্যাদিত্যাশঙ্ক্য তদসম্ভবান্নৈবমিত্যাহ অন্ধইতি। অর্থবাদস্য শ্রুতেঽর্থে তাৎপর্য্যাভাবান্ন প্রকৃতপ্রতি-

## স্বামিকৃত টীকা।

কিঞ্চ সর্ব্বেন্দ্রিয়েতি। সর্ব্বেষাং চক্ষুরাদীনামিন্দ্রিয়াণাং গুণেষু রূপাদ্যাকারিষু বৃত্তিষু তত্তদাকারেণাভাসত ইতি তথা, সর্ব্বেন্দ্রিয়াণি গুণাংশ্চ তত্তদ্বিষযানাভাসয়তীতি বা। সর্ব্বৈরিন্দ্রিয়ৈর্বিবর্জিতঞ্চ। তথা চ শ্রুতিঃ। অপাণিপাদো জবনোগ্রহীতা পশ্যত্যচক্ষুঃ স শৃণোত্যকর্ণ ইত্যাদি। অসক্তং সঙ্গশূন্যং তথাপি সর্ব্বং বিভর্ত্তীতি সর্ব্বভৃৎ সর্ব্বস্যাধারভূতং তদেব নির্গুণং সত্ত্বাদিগুণরহিতং গুণভোক্তৃ চ গুণানাংসত্ত্বাদীনাং ভোক্তৃ পালকং ॥ ১৪ ॥

বহিরন্তশ্চ ভূতানামচরং চরমেব চ।
সূক্ষ্মত্বাত্তদবিজ্ঞেয়ং দূরস্থং চান্তিকে চ তৎ॥ ১৫॥

## শাঙ্করভাষ্যম্।

তজ্জ্ঞেয়মিত্যেবং প্রদর্শনার্থঃ ন তু সাক্ষাদেব জবনাদিক্রিয়াবত্ত্বপ্রদর্শনার্থঃ অন্ধো মণিমবিন্দদিত্যাদিমন্ত্রার্থবত্তস্য মন্ত্রস্যার্থো যস্মাৎ সর্ব্বকরণবর্জ্জিতং জ্ঞেয়ং তস্মাদসক্তং সর্ব্বসংশ্লেষবর্জ্জিতং যদ্যপ্যেবং তথাপি সর্ব্বভৃচ্চএব সদাস্পদংহি সর্ব্বং সর্ব্বত্র সৎবুদ্ধ্যনুগমান্ন হি মৃগতৃষ্ণিকাদযোঽপি নিবাস্পদা ভবন্ত্যতঃ সর্ব্বভৃৎ সর্ব্বং বিভর্ত্তি ইতি স্যাদিদশ্চান্যৎ জ্ঞেযনা সত্ত্বাধিগমদ্বারং নির্গুণং সত্ত্বরজস্তমাংসি গুণাস্তৈর্বর্জ্জিতং তৎজ্ঞেযং তথাপি গুণভোক্তৃ চ গুণানাং সত্ত্বরজস্তমসাং শব্দাদিদ্বারেণ সুখদুঃখমোহাকারপরিণতানাং ভোক্তৃ চোপলব্ধৃ তজ্জ্ঞেয়মিত্যর্থঃ॥ ১৪॥

কিঞ্চ বহিরন্তরিতি। বহিস্ত্বক্পর্য্যন্তং দেহমাত্মত্বেনাবিদ্যাকল্পিতমপেক্ষ্য তমেবাবধিং

## গিরিকৃত টীকা।

কূলেনেত্যর্থঃ। সর্ব্বকরণবাহিত্যং তদ্ব্যাপাররাহিত্যস্যোপলক্ষণমিত্যঙ্গীকৃত্যোক্তমেব হেতুং কৃত্বা বস্তুতঃ সর্ব্বসঙ্গবর্জ্জিতত্বমাহ যস্মাদিতি। বস্তুতঃ সর্ব্বসঙ্গাভাবেঽপি সর্ব্বাধিষ্ঠানত্বমাহ যদ্যপীতি। স্বসত্তামাত্রেণাধিষ্ঠানতয়া সর্ব্বং পুষ্ণাতীত্যেতদুপপাদয়তি সদিতি। বিমতং সতি কল্পিতং প্রত্যেকং সদনুবিদ্ধধীবোধ্যত্বাৎ প্রত্যেকঞ্চপ্রভেদানুবিদ্ধধীবোধ্যচন্দ্রভেদবদিত্যর্থঃ। সর্ব্বং সদাস্পদমিত্যপ্যুক্তং মৃগতৃষ্ণিকাদীনাং তদভাবাদিত্যাশঙ্ক্যাহ ন হীতি। তেষামপি কল্পিতত্বেন নিরধিষ্ঠানত্বাযোগান্নিরূপ্যমাণে তদধিষ্ঠানং সদেবেতি সর্ব্বস্য ব্রহ্মণোঽস্তিত্বমুক্তমুপসংহরতি অতইতি। ইতশ্চ জ্ঞেয়ং ব্রহ্মাস্তীত্যাহ স্যাদিদশ্চেতি। ন হিতস্যোপলব্ধৃত্বমসত্ত্বমসত্ত্বে সিধ্যতীত্যর্থঃ॥ ১৪॥

ইতোঽপি জ্ঞেয়ং ব্রহ্মাস্তীত্যাহ কিঞ্চেতি। বহিরিতি ব্যাখ্যেয়মাদায় ব্যাচষ্টে ত্বগিতি।

## স্বামিকৃত টীকা।

কিঞ্চ বহিরিতি। ভূতানাং চরাচরাণাং স্বকার্য্যাণাং বহিশ্চান্তশ্চ তদেব সুবর্ণমিব কটককুণ্ডলাদীনাং জলতরঙ্গানামন্তর্ব্বহির্জ্জলমিব অচরং স্থাবরং চরঞ্চ জঙ্গমং ভূতজাতং তদেব কারণাত্মকত্বাৎ কার্য্যস্য। এবমপি সূক্ষ্মত্বাৎ রূপাদিহীনত্বাত্তদবিজ্ঞেয়ং ইদং তদিতি স্পষ্টজ্ঞানার্হং ন ভবতি। এতদবিদুষাং যোজনলক্ষান্তরিতমিব দূরস্থঞ্চ সবিকারায়াঃ প্রকৃতেঃ পরত্বাৎ। বিদুষাং পুনঃ প্রত্যগাত্মত্বাদন্তিকে চ তৎ নিত্যসন্নিহিতং। তথা চ মন্ত্রঃ। তদেজতি তন্নৈজতি তদ্দূরে তদ্বদন্তিকে। তদন্তরস্য সর্ব্বস্য তদুসর্ব্বস্যাস্য বাহ্যতইতি। এজতি চলতি নৈজতি ন চলতি তৎ উ অন্তিকে ইতি ছেদঃ॥ ১৫॥

অবিভক্তঞ্চ ভূতেষু বিভক্তমিব চ স্থিতম্।
ভূতভর্ত্তৃ চ তজ্জ্ঞেয়ং গ্রসিষ্ণু প্রভবিষ্ণু চ ।। ১৬ ।।

## শাঙ্করভাষ্যম্।

কৃত্বা বহিরুচ্যতে তথা প্রত্যগাত্মানমপেক্ষ্য দেহমেবাবধিং কৃত্বান্তরুচ্যতে বহিরন্তশ্চেত্যুক্তে মধ্যে অভাবে প্রাপ্তইদমুচ্যতে অচরমেব চ যচ্চরাচরং দেহাভাসমপি তদেব জ্ঞেয়ং যথা রজ্জুসর্পাভাসঃ যদ্যচরঞ্চরমেবেচ ব্যবহারবিষয়ং সর্ব্বং কিমর্থমিদমিতি সর্ব্বৈর্ন জ্ঞেয়মিত্যুচ্যতে সত্যং সর্ব্বাভাসং তথাপি ব্যোমবৎ সূক্ষ্মমতঃ সূক্ষ্মত্বাৎ স্বেন রূপেণ তৎ জ্ঞেয়মপ্যবিজ্ঞেয়মবিদুষাং আত্মৈবেদং সর্ব্বং ব্রহ্মৈবেদং সর্ব্বমিত্যাদি প্রমাণতো হি নিত্যবিজ্ঞাতং অবিজ্ঞাততয়া দূরস্থং বর্ষসহস্রকোট্যাপ্যবিদুষামপ্রাপ্যত্বাদন্তিকে চ তদাত্মত্বাৎ বিদুষাং ॥ ১৫ ॥

কিঞ্চ অবিভক্তমিতি। অবিভক্তঞ্চ প্রতিদেহং ব্যোমবৎ তদেকং ভূতেষু সর্ব্বপ্রাণিষু

## গিরিকৃত টীকা।

ভূতেভ্যোবহির্বাহ্যং বিষয়াদ্যাত্মকমিত্যর্থঃ। কথমনাত্মন এবাত্মত্বং কল্পনয়েত্যাহ আত্মত্বেনেতি। অন্তঃশব্দার্থমাহ তথেতি। ভূতানাঞ্চরাচরাণামন্তর্মধ্যে প্রত্যগ্ভূতমিত্যর্থঃ। দ্বিতীয়ং পাদমবতার্য্য ব্যাচষ্টে বহিরিত্যাদিনা। যন্মধ্যে ভূতাত্মকং নানাবিধদেহাত্মনা ভাসমানং তদপি জ্ঞেয়ান্তর্ভূতং ন ত্বসদিত্যর্থঃ। কথঞ্চরাচরাত্মনো ভূতজাতস্য জ্ঞেয়ত্বং তত্রাহ যথেতি। অধিষ্ঠানে রজ্জ্বাং কল্পিতসর্পাদেবন্তর্ভাববদ্দেহাভাসস্যাপি জ্ঞেয়ান্তর্ভাবান্নাসত্বং মধ্যে জ্ঞেয়স্য শঙ্কিতব্যমিত্যর্থঃ। সর্ব্বাত্মকঞ্চেৎ জ্ঞেয়ং সর্ব্বৈর্বিদমিতি কিমিতি ন গৃহ্যেতেতি শঙ্কতে যদীতি। ইদমিতি গ্রাহ্যত্বযোগ্যতাভাবান্নেহ উচ্যতইতি। সর্ব্ববস্ত্বাত্মনাভাসতস্তদযোগত্বং কথমিত্যাশঙ্ক্যাহ সত্যমিতি। সূক্ষ্মত্বেঽপি কিংস্যাদিত্যাশঙ্ক্যাহ অতইতি। সূক্ষ্মত্বমতীন্দ্রিয়ত্বং তস্যাবিজ্ঞেয়ত্বে কৃতস্তৎজ্ঞানান্মুক্তিস্তত্রাহ অবিদুষামিতি। বিশেষণফলমাহ বিদুষাস্তিতি। বিদুষাং হি তেষামাত্মত্বেন জাতঞ্চেত্তৎ কথং দূরস্থত্বমিত্যাশঙ্ক্যাহ অবিজ্ঞাততয়েতি। কথং তর্হি তস্য প্রত্যক্ত্বং তত্রাহ অন্তিকে চেতি। বিদ্বদবিদ্বদ্ভেদাপেক্ষয়া দূরাৎ সুদূরে তদিহান্তিকে চেতি শ্রুতিঃ তদর্থোঽত্র প্রসঙ্গাদনুদিতইত্যর্থঃ ॥ ১৫ ॥

জ্ঞেয়স্যাস্তিত্বে হেত্বন্তরমাহ কিঞ্চেতি। তদ্ধিপ্রতিদেহং নভোবদেকং তদ্ভেদে নানা-

## স্বামিকৃত টীকা।

কিঞ্চ অবিভক্তমিতি। ভূতেষু স্থাবরজঙ্গমাত্মকেম্ববিভক্তং কারণাত্মনাঽভিন্নং কার্য্যাত্মনা বিভক্তং ভিন্নমিব স্থিতং চ সমুদ্রাজ্জাতং ফেনাদি সমুদ্রাদন্যন্ন ভবতি তৎ স্বরূপ-

জ্যোতিষামপি তজ্জ্যোতিস্তমসঃ পরমুচ্যতে।
জ্ঞানং জ্ঞেয়ং জ্ঞানগম্যং হৃদি সর্ব্বস্য বিষ্ঠিতম্ ॥ ১৭ ॥

## শাঙ্করভাষ্যম্।

বিভক্তমিব চ স্থিতং দেহেষেব বিভাব্যমানত্বাৎ ভূতভর্তৃ চ ভূতানি বিভর্ত্তীতি তৎ জ্ঞেয়ং ভূতভর্তৃ চ স্থিতিকালে প্রলয়কালে গ্রসিষ্ণু গ্রসনশীলং উৎপত্তিকালে প্রভবিষ্ণু চ প্রভবনশীলং যথা রজ্জ্বাদিঃ সর্পাদের্মিথ্যাকল্পিতস্য ॥ ১৬ ॥

কিঞ্চ সর্ব্বং বিদ্যমানং সন্নোপলভ্যতে চেৎ জ্ঞেয়ন্তমস্তর্হি, ন, কিং তর্হি জ্যোতিষামপীতি। জ্যোতিষাং আদিত্যাদীনামপি তৎ জ্ঞেয়ং জ্যোতিরাত্মচৈতন্যজ্যোতিষেদ্ধানি হি আদিত্যাদীনি জ্যোতীষাং দীপ্যন্তে যেন সূর্য্যস্তপতি তেজসেদ্ধস্তস্য ভাসা সর্ব্বমিদং বিভাতীত্যাদি শ্রুতিভ্যঃ স্মৃতেশ্চ ইহৈব যদাদিত্যগতং তেজ ইত্যাদেস্তমসোঽজ্ঞানাৎ পরমস্পৃষ্টমুচ্যতে জ্ঞানমিতি। জ্ঞানাদেস্তুঃসম্পাদনবুদ্ধ্যা প্রাপ্তাবসাদস্যোত্তম্ভনার্থমাহ জ্ঞানমমা-

---

## গিরিকৃত টীকা।

ভাবাৎ ভিন্নত্বে চ ঘটবদনাত্মত্বাপাতাদতোঽদ্বিতীয়ং সর্ব্বত্র প্রত্যগ্ভূতং। জ্ঞেয়ং নাস্তীত্যতিসাহসমিত্যাহ অবিভক্তঞ্চেতি। কথং তর্হি দেহভেদে ভেদধীরিত্যাশঙ্ক্য কল্পনয়েত্যাহ ভূতেষিতি। তত্র হেতুঃ দেহেষিতি। কার্য্যাণাং স্থিতিহেতুত্বাচ্চ জ্ঞেয়মস্তীত্যাহ ভূতেতি। নিমিত্তোপাদানতয়া তেষাং প্রলয়ে প্রভবে চ কারণত্বাচ্চ জ্ঞেয়মস্তীত্যাহ প্রলয়েতি। তর্হি কার্য্যকারণত্বস্য বস্তুত্বান্নাদ্বৈতমিত্যাশঙ্ক্যাহ যথেতি ॥ ১৬ ॥

ইতোঽপি জ্ঞেয়স্যাস্তিত্বমিত্যাহ কিঞ্চেতি। হেত্বন্তরমেব স্ফোরয়িতুং শঙ্কয়তি সর্ব্বত্রেতি ন তত্তমো মন্তব্যমিত্যাহ নেতি। তর্হি কিন্তস্য রূপমিতি পৃচ্ছতি কিং তর্হীতি। তত্রোত্তরং জ্যোতিষামিতি। সূর্য্যাদীনাং বুদ্ধ্যাদীনাঞ্চ প্রকাশকত্বাৎ অস্তি জ্ঞেয়ং ব্রহ্মেত্যাহ জ্যোতিষামিতি। তদেবোপপাদয়তি আত্মেতি। তত্র শ্রুতিদ্বয়ং প্রমাণয়তি যেনেতি। উক্তেঽর্থে বাক্যশেষমপি দর্শয়তি স্মৃতিশ্চেতি। জ্ঞেয়স্যাত্মনঃ তমস্তেঽপি তমঃস্পৃষ্টত্বমাশঙ্ক্যোক্তং তমস-

## স্বামিকৃত টীকা।

যেবোক্তং জ্ঞেয়ং ভূতানাং ভর্তৃ চ পোষকং স্থিতিকালে প্রলয়কালে চ গ্রসিষ্ণু গ্রসনশীলং সৃষ্টিকালে চ প্রভবিষ্ণু নানাকার্য্যাত্মনা প্রভবনশীলং ॥ ১৬ ॥

কিঞ্চ জ্যোতিষামপীতি। জ্যোতিষাং সূর্য্যাদীনামপি তৎজ্যোতিঃ প্রকাশকং, যেন সূর্য্যস্তপতি তেজসেদ্ধঃ ন তত্র সূর্য্যো ভাতি ন চন্দ্রতারকং নেমা বিদ্যুতো ভান্তি কুতোঽয়মগ্নিস্তমেব ভান্তমনুভাতি সর্ব্বং তস্য ভাসা সর্ব্বমিদং বিভাতীত্যাদিশ্রুতেঃ। অতএব তমসোঽজ্ঞানাৎ পরং তেনাসংস্পৃষ্টমুচ্যতে, আদিত্যবর্ণং তমসঃ পরস্তাদিত্যাদিশ্রুতেঃ।

ইতি ক্ষেত্রং তথা জ্ঞানং জ্ঞেয়ঞ্চোক্তং সমাসতঃ।
মদ্ভক্ত এতদ্বিজ্ঞায় মদ্ভাবায়োপপদ্যতে ॥ ১৮ ॥

## শাঙ্করভাষ্যম্।

নিত্বাদি জ্ঞেয়ং জ্ঞেয়ং যৎ তৎ প্রবক্ষ্যামীত্যাদিনোক্তং জ্ঞানগম্যং জ্ঞেয়মেব জ্ঞাতং সৎ জ্ঞানফলমিতি জ্ঞানগম্যমুচ্যতে জ্ঞায়মানন্তু জ্ঞেয়ং তদেতদ্ত্রয়মপি হৃদি বুদ্ধৌ সর্ব্বস্য প্রাণিজাতস্য বিষ্ঠিতং বিশেষেণ স্থিতং ॥ ১৭ ॥

তত্রৈব হি এবং বিভাব্যতে যথোক্তার্থোপসংহারার্থোঽয়ং শ্লোক আরভ্যতে ইতি ক্ষেত্রমিতি। ইত্যেবং ক্ষেত্রং মহাভূতাদি ধৃত্যন্তং তথা জ্ঞানমমানিত্বাদি তত্ত্বজ্ঞানার্থদর্শনপর্য্যন্তং জ্ঞেয়ঞ্চ জ্ঞেয়ং যত্তদিত্যাদি তমসঃ পরমুচ্যত ইত্যেবমন্তমুক্তং সমাসতঃ সংক্ষেপত এতাবান্ সর্ব্বো হি বেদার্থো গীতার্থশ্চোপসংহৃত্যোক্তোঽস্মিন্ সম্যক্ দর্শনে কোঽধিক্রিয়ত ইত্যুচ্যতে মদ্ভক্তো ময়ীশ্বরে সর্ব্বজ্ঞে পরমগুরৌ বাসুদেবে সমর্পিতসর্ব্বাত্মভাবে যৎ পশ্যতি শৃণোতি স্পৃশতি বা সর্ব্বমেব ভগবান্ বাসুদেব ইত্যেবংগ্রহাবিষ্টবুদ্ধির্মদ্ভক্তঃ সন্ এতৎ যথোক্তং সম্যক্ দর্শনং বিজ্ঞায় মদ্ভাবায় মম ভাবো মদ্ভাবঃ পরমাত্মভাবস্তস্মৈ পরমাত্মভাবায়োপপদ্যতে যুজ্যতে ঘটতে মোক্ষং গচ্ছতি ॥ ১৮ ॥

## গিরিকৃত টীকা।

ইতি। উত্তরার্দ্ধস্য তাৎপর্য্যমাহ জ্ঞানাদেরিতি। উক্তস্তনমুদ্দীপনং প্রকটীকরণমতি যাবৎ, জ্ঞানমমানিত্বাদি করণব্যুৎপত্ত্যেতিশেষঃ। জ্ঞানগম্যং জ্ঞেয়মিতি পুনরুক্তিং শঙ্কিত্বোক্তং জ্ঞেয়মিতি। উক্তজ্ঞেয়স্য বুদ্ধিস্থতয়া প্রাকট্যং প্রকটয়তি তদেতদিতি ॥ ১৭ ॥

তত্রানুভবমনুকূলয়তি তত্রৈবেতি। তত্পদার্থশুদ্ধ্যর্থং সবিকারং ক্ষেত্রং পদবাক্যার্থবিবেকসাধনঞ্চামানিত্বাদি তৎপদার্থঞ্চ শুদ্ধং তদ্ভাবোক্ত্যর্থমুক্ত্বা তেষাং ফলমুপসংহরতি যথোক্তেতি। পূর্ব্বার্দ্ধং বিভজতে ইত্যেবমিতি। বক্তব্যান্তরে সতি কিমিতি ত্রিতয়মেব সংক্ষিপ্যোপসংহৃতং তত্রাহ এতাবানিতি। উত্তরার্দ্ধমাকাঙ্ক্ষাদ্বারাবতারয়তি অস্মিন্নিতি। ঈশ্বরে সমর্পিতসর্ব্বাত্মভাবমেবাভিনয়তি। যৎপশ্যতীতি বিজ্ঞায় লব্ধ্বেত্যর্থঃ ॥ ১৮ ॥

## স্বামিকৃত টীকা।

জ্ঞানঞ্চ তদেব বুদ্ধিবৃত্তাবভিব্যক্তং তদেব রূপাদ্যাকারেণ জ্ঞেয়ঞ্চ জ্ঞানগম্যঞ্চ তদেব অমানিত্বাদিলক্ষণেন পূর্ব্বোক্তজ্ঞানসাধনেন প্রাপ্যমিত্যর্থঃ জ্ঞানগম্যং বিষ্ঠিতং বিশেষেণাপ্রচ্যুতস্বরূপেণ নিয়ন্তৃতয়া স্থিতং। ধিষ্ঠিতমিতিপাঠে অধিষ্ঠায় স্থিতমিত্যর্থঃ ॥ ১৭ ॥

উক্তং ক্ষেত্রাদিকমধিকারিফলসহিতমুপসংহরতি ইতীতি। ইত্যেবং ক্ষেত্রং মহাভূতাদিধৃত্যন্তং তথা জ্ঞানঞ্চ অমানিত্বাদিতত্ত্বজ্ঞানার্থদর্শনান্তং জ্ঞেয়ঞ্চ অনাদিমৎ পরং ব্রহ্মে-

প্রকৃতিং পুরুষঞ্চৈব বিদ্ধ্যনাদী উভাবপি।
বিকারাংশ্চ গুণাংশ্চৈব বিদ্ধি প্রকৃতিসম্ভবান্॥ ১৯॥

## শাঙ্করভাষ্যম্।

তৎ সপ্তমে ঈশ্বরস্য দ্বে প্রকৃতী উপন্যস্তে পরাপরে ক্ষেত্রক্ষেত্রজ্ঞলক্ষণে এতদ্‌যোনীনি ভূতানীতি চোক্তং ক্ষেত্রক্ষেত্রজ্ঞপ্রকৃতিদ্বয়যোনিত্বং কথং ভূতানামিত্যয়মর্থোঽধুনোচ্যতে প্রকৃতিমিতি। প্রকৃতিং পুরুষঞ্চৈবেশ্বরস্য প্রকৃতী তৌ প্রকৃতিপুরুষাবুভাপ্যনাদী ন বিদ্যতে আদির্যয়োস্তাবনাদী নিত্যত্বাদীশ্বরস্য তৎপ্রকৃত্যোরপি যুক্তং নিত্যত্বেন ভবিতুং প্রকৃতিদ্বয়বত্ত্বমেব হি ঈশ্বরস্যেশ্বরত্বং যাভ্যাং প্রকৃতিভ্যাং ঈশ্বরো জগদুৎপত্তিস্থিতিপ্রলয়-হেতুস্তে দ্বে অনাদী সত্যৌ সংসারস্য কারণং ন আদী অনাদী ইতি তৎপুরুষসমাসং কেচি-দ্বর্ণয়ন্তি তেন হি কেবলেশ্বরস্য কারণত্বং সিধ্যতি যদি পুনঃ প্রকৃতিপুরুষাবেব নিত্যৌ স্যাতাং তৎকৃতমেব জগন্নেশ্বরস্য জগতঃ কর্তৃত্বং তদসৎ প্রাক্ প্রকৃতিপুরুষয়োরুৎপত্তেরী-শিতব্যাভাবাৎ ঈশ্বরস্যানীশ্বরত্বপ্রসঙ্গাৎ সংসারস্য নির্নিমিত্তত্বে নির্মোক্ষত্বপ্রসঙ্গাৎ শাস্ত্রা-নর্থক্যপ্রসঙ্গাৎ বন্ধমোক্ষাভাবপ্রসঙ্গাচ্চ নিত্যত্বে পুনরীশ্বরপ্রকৃত্যোঃ সর্ব্বমেতদুপপন্নং

## গিরিকৃত টীকা।

প্রকৃতিমিত্যাদি বক্ষ্যমাণমনন্তরপূর্ব্বগ্রন্থসম্বন্ধীত্যাশঙ্ক্য ব্যবহিতেন সম্বন্ধার্থং ব্যব-হিতমনুবদতি তত্রেতি। তয়োশ্চ প্রকৃত্যোরুক্তভূতকারণত্বমিত্যাহ এতদিতি। ভূতা-নামিব প্রকৃত্যোরপি প্রকৃত্যন্তরাপেক্ষয়ানবস্থানান্ন ভূতযোনিতেতি শঙ্কতে ক্ষেত্রেতি। তত্রাকৃতাভ্যাগমাদিবারণায় বন্ধস্য নিদানজ্ঞানার্থমাত্মনো বিক্রিয়াবত্ত্বাদিদোষনিরাসার্থঞ্চ প্রকৃতিপুরুষয়োরনাদিত্বং ক্ষেত্রত্বেনোক্তাং প্রকৃতিং প্রকৃতিবিকারভাবত্বঞ্চ দর্শয়তি অয়-মর্থইতি। স চ যো যৎস্বভাবশ্চেত্যুদ্দিষ্টং ব্যাচষ্টে প্রকৃতিমিতি। ঈশ্বরস্যাপরা প্রকৃ´তরত্র প্রকৃতিশব্দেনোক্তা পরাতু প্রকৃতির্জীব্যাখ্যা পুরুষশব্দেন বিবক্ষিতেতি ব্যাকরোতি ঈশ্বর-স্যেতি। তয়োরনাদিত্বং ব্যুৎপাদয়তি নেত্যাদিনা। তত্র যুক্তিমাহ নিত্যত্বাদীশ্বরস্যেতি। ঈশ্বরস্যোক্তপ্রকৃতিদ্বয়বত্ত্বং কথমিত্যাশঙ্ক্যাহ প্রকৃতীতি। তস্য জগজ্জন্মাদৌ স্বাতন্ত্র্যমেব

## স্বামিকৃত টীকা।

ত্যাদি বিষ্টিতমিত্যন্তং বশিষ্ঠাদিভির্বিস্তরেণোক্তং সর্ব্বমপি ময়া সংক্ষেপেণোক্তং, এতচ্চ পূর্ব্বাধ্যায়োক্তলক্ষণো মদ্ভক্তো বিজ্ঞায় মদ্ভাবায় ব্রহ্মত্বায়োপপদ্যতে যোগ্যো ভবতি॥১৮॥

তদেবং তৎ ক্ষেত্রং যচ্চ যাদৃক্ চেত্যেতাবৎ প্রপঞ্চিতমিদানীন্তু, যদ্বিকারি যতশ্চ যৎ সচ যো যৎপ্রভাবশ্চেত্যেতৎ পূর্ব্বপ্রতিজ্ঞাতমেব প্রকৃতিপুরুষয়োঃ সংসারহেতুত্বকথনেন প্রপঞ্চয়তি প্রকৃতিমিতি পঞ্চভিঃ। তত্র প্রকৃতিপুরুষয়োরাদিমত্ত্বে তয়োরপি প্রকৃত্যন্ত-রেণ ভাব্যমিত্যনবস্থাপত্তিঃ স্যাদতস্তাবুভাবনাদী বিদ্ধি অনাদেরীশ্বরস্য শক্তিত্বাৎ প্রকৃ-

কার্য্যকারণকর্ত্তৃত্বে হেতুঃ প্রকৃতিরুচ্যতে।
পুরুষঃ সুখদুঃখানাং ভোক্তৃত্বে হেতুরুচ্যতে ॥ ২০ ॥

শাঙ্করভাষ্যম্।

ভবেৎ কথং বিকারাংশ্চগুণাংশ্চৈব বক্ষ্যমাণান্ বুদ্ধ্যাদিদেহেন্দ্রিয়ান্তান্ গুণাংশ্চ সুখদুঃখ-মোহপ্রত্যয়াকারপরিণতান্ বিদ্ধি জানীহি প্রকৃতিসম্ভবান্ প্রকৃতিরীশ্বরস্য বিকারকারণং শক্তিঃ গুণাত্মিকা মায়া সা সম্ভবো যেষাং বিকারাণাং গুণানাঞ্চ তান্ বিকারান্ গুণাংশ্চ বিদ্ধি জানীহি প্রকৃতিসম্ভবান্ প্রকৃতিপরিণামান্ ॥ ১৯ ॥

কে পুনস্তে বিকারাগুণাশ্চ প্রকৃতিসম্ভবাঃ কার্য্যেতি। কার্য্যকারণকর্ত্তৃত্বে কার্য্যং শরীরং কারণানি তৎস্থানি ত্রয়োদশদেহস্যারম্ভকাণি ভূতানি বিষয়াশ্চ প্রকৃতিসম্ভবা বিকারাঃ

গিরিকৃত টীকা।

ঈশ্বরত্বং ন প্রকৃতিদ্বয়বত্ত্বমিত্যাশঙ্ক্যাহ যাভ্যামিতি। প্রকৃত্যোরনাদিত্বং কুত্রোপযুক্ত-মিত্যাশঙ্ক্যাহ তে ইতি। মতান্তরমাহ নেত্যাদিনা। তযোর্মূলকারণত্বাভাবে কস্য তদেষ্টব্যমিত্যাশঙ্ক্যাহ তেন হীতি। প্রকৃত্যোরেব মূলকারণত্বে শ্রুতিস্মৃতিসিদ্ধমীশ্বরস্য তথাত্বং ন স্যাদিত্যাহ যদীতি। প্রকৃতিদ্বয়স্য কার্য্যত্বপক্ষং প্রত্যাহ তদসদিতি। কিঞ্চ প্রকৃতিদ্বয়মনপেক্ষ্য ঈশ্বরস্য সংসারহেতুত্বে স্বাতন্ত্র্যান্মুক্তানামপি ততঃ সংসারাপ্তেরনিষে-ধান্মোক্ষশাস্ত্রপ্রামাণ্যান্ন তস্যৈব সংসারহেতুতেত্যাহ সংসারস্যেতি। নির্নিমিত্তত্বং প্রকৃ-তিদ্বয়াপেক্ষামৃতে পরস্যৈব নিমিত্তত্বমিতি যাবৎ। কিঞ্চ কার্য্যত্বে প্রকৃত্যোস্তদুদযাৎ পূর্ব্বং বন্ধাভাবে তদ্বিশ্লেষাত্মনো মোক্ষস্যাভাবাৎ কদাচিদুভয়াভাবে পুনস্তদপ্রসঙ্গান্ন প্রকৃতিদ্বযস্য কার্য্যতেত্যাহ বন্ধেতি। প্রকৃত্যোর্মূলকারণত্বেনানুপপত্তিরিত্যাহ নিত্যত্বইতি। স্বপক্ষে দোষাভাবং প্রশ্নপূর্ব্বকং প্রপঞ্চয়তি কথমিত্যাদিনা। সম্ভবঃ সত্তাপ্রাপকো হেতুঃ। প্রকৃ-তেরনাদিত্বে বিকারাণাং গুণানাঞ্চ তৎকার্য্যত্বাদাত্মনো নির্ব্বিকারত্বং নির্গুণত্বঞ্চ সিধ্যতী-তিভাবঃ ॥ ১৯ ॥

বিকারাণাং গুণানাং প্রকৃতেশ্চ স্বরূপকাঙ্ক্ষাদ্বারা নির্দ্দেষ্টুমুত্তরশ্লোকপূর্ব্বার্দ্ধং পাত-য়তি কে পুনরিতি। পুরুষস্যানাদিত্বকৃতবন্ধহেতুত্বমাহ পুরুষইতি। পূর্ব্বার্দ্ধং ব্যাচষ্টে কার্য্য-

স্বামিকৃত টীকা।

তেরনাদিত্বং পুরুষোঽপি তদংশত্বাদনাদিরেব অত্র চ পরমেশ্বরস্য তচ্ছক্তীনাঞ্চানাদিত্বং শ্রীমচ্ছঙ্করভগবদ্ভাষ্যকৃদ্ভিরতিপ্রবন্ধেনোপপাদিতমিতি গ্রন্থবাহুল্যান্নাস্মাভিঃ প্রপঞ্চ্যতে, বিকারাংশ্চ দেহেন্দ্রিয়াদীন্ গুণাংশ্চ গুণপরিণামান্ সুখদুঃখমোহাদীন্ প্রকৃতেঃ সম্ভূতান্ বিদ্ধি ॥ ১৯ ॥

বিকারাণাং প্রকৃতিসম্ভবত্বং দর্শয়ন্ পুরুষস্য সংসারহেতুত্বং দর্শয়তি কার্য্যেতি। কার্য্যং

## শাঙ্করভাষ্যম্।

পূর্ব্বোক্তা ইহ কার্য্যগ্রহণেন গৃহ্যন্তে গুণাশ্চ প্রকৃতিসম্ভবাঃ সুখদুঃখমোহাত্মকাঃ কারণাশ্রয়ত্বাৎ কারণগ্রহণেন গৃহ্যন্তে তেষাং কার্য্যকারণানাং কর্ত্তৃত্বমুৎপাদকত্বং যত্তৎ কার্য্যকারণকর্ত্তৃত্বং তস্মিন্ কার্য্যকারণকর্ত্তৃত্বে হেতুঃ কারণমারম্ভকত্বেন প্রকৃতিরুচ্যতে এবং কার্য্যকারণকর্ত্তৃত্বেন সংসারস্য কারণং প্রকৃতিঃ কার্য্যকারণয়োঃ কর্ত্তৃত্বইত্যস্মিন্নপি পাঠে কার্য্যং যদ্যস্য বিপরিণামস্তত্তস্য কার্য্যং বিকারঃ বিকারি কারণং তয়োর্ব্বিকারবিকারিণোঃ কার্য্যকারণয়োঃ কর্ত্তৃত্বইতি তান্যেব কার্য্যকারণান্যুচ্যন্তে অথবা ষোড়শ বিকারাঃ কার্য্যং সপ্ত প্রকৃতিবিকৃতয়ঃ কারণন্তান্যেব কার্য্যকারণানি উচ্যন্তে তেষাং কর্ত্তৃত্বে হেতুঃ প্রকৃতিরুচ্যতে আরম্ভকত্বেনৈব পুরুষশ্চ সংসারস্য কারণং যথা স্যাত্তদুচ্যতে পুরুষঃ জীবঃ ক্ষেত্রজ্ঞঃ ভোক্তা ইতি পর্য্যায়ঃ সুখদুঃখানাং ভোগ্যানাং ভোক্তৃত্বউপলব্ধৃত্বে হেতুরুচ্যতে কথং পুনরনেন কার্য্যকারণকর্ত্তৃত্বেন সুখদুঃখভোক্তৃত্বেন চ প্রকৃতিপুরুষয়োঃ সংসারকারণত্বমুচ্যতইতি অত্রোচ্যতে কার্য কারণসুখদুঃখরূপেণ হেতুফলাত্মনা প্রকৃতেঃ পরিণামাভাবো পুরুষস্য চৈতন্যস্য সতি তদুপলব্ধৃত্বে কুতঃ সংসারঃ স্যাৎ যদা পুনঃ কার্য্যকারণহেতুফলাত্মন পরিণতয়া তয়া প্রকৃত্যা ভোগ্যয়া পুরুষস্য তদ্বিপরীতস্য ভোক্তৃত্বেনাবিদ্যারূপঃ সংযোগস্যাত্তদা সংসারঃ স্যাদিত্যতো যৎ প্রকৃতিপুরুষয়োঃ কার্য্যকারণকর্ত্তৃত্বেন সুখদুঃখভোক্তৃত্বেন চ সংসারকারণত্বমুক্তং তৎ যুক্তমুক্তং কঃ পুনরয়ং সংসারো নাম সুখদুঃখসংভোগঃ সংসারঃ পুরুষস্য চ সুখদুঃখানাং সম্ভোক্তৃত্বং সংসারিত্বমিতি ॥ ২০ ॥

## গিরিকৃত টীকা।

মিত্যাদিনা। জ্ঞানেন্দ্রিয়পঞ্চকং কর্ম্মেন্দ্রিয়পঞ্চকং মনোবুদ্ধিরহঙ্কারশ্চেতি ত্রয়োদশকরণানি তথাপি ভূতানাং বিষয়াণাঞ্চাগ্রহণাৎ কথন্তেষাং প্রকৃতিকার্য্যতেত্যাশঙ্ক্যাহ দেহেতি তথাপি গুণানামিহাগ্রহণান্ন প্রকৃতিকার্য্যত্বং তত্রাহ গুণাশ্চেতি। উক্তরীত্যা নিষ্পন্নমর্থমাহ এবমিতি। পাঠান্তরমনূদ্য ব্যাখ্যাপূর্ব্বকমর্থাভেদমাহ কার্য্যেত্যাদিনা। ব্যাখ্যান্তমাহ অথবেতি। একাদশেন্দ্রিয়াণি পঞ্চ বিষয়াইতি ষোড়শসংখ্যকবিকারোঽত্র কার্য্যশব্দার্থঃ মহানহংকারো ভূততন্মাত্রাণীতি প্রকৃতিবিকৃতয়ঃ সপ্ত কারণং তেষাং আরম্ভকত্বেন কর্ত্তৃত্বেন হেতুরাশ্রয়োমূলপ্রকৃতিরিত্যর্থঃ। উত্তরার্দ্ধস্য তাৎপর্য্যমাহ পুরুষশ্চেতি। তস্য পরমাত্মত্বং ব্যবচ্ছিনত্তি জীবইতি। তস্য প্রাণধারণনিমিত্তস্য তদর্থঞ্চেতনমাহ ক্ষেত্রজ্ঞ ইতি। তস্যানৌপাধিকত্বং বারয়তি ভোক্তেতি। তয়োঃ সংসারকারণত্বমুপপাদয়িতুং শঙ্কয়তি কথমিতি। অন্বয়ব্যতিরেকাভ্যাং তয়োস্তথাত্বমিত্যাহ অত্রেতি। তত্র ব্যতিরেকং দর্শয়তি কার্য্যেতি। ন হি নিত্যমুক্তস্যাত্মনঃ স্বতঃ সংসারোঽস্তীত্যর্থঃ। ইদানী মন্বয়মাহ যদেতি। অন্বয়াদিফলমুপসংহরতি অতইতি। আত্মনোঽবিক্রিয়স্য সংসরণং নোচিতমিত্যাক্ষিপতি কঃ পুনরিতি। সুখদুঃখান্তরসাক্ষাৎকারো ভোগঃ সচাক্রিয়স্যৈব

পুরুষঃ প্রকৃতিস্থো হি ভুঙ্‌ক্তে প্রকৃতিজান্ গুণান্।
কারণং গুণসঙ্গোঽস্য সদসদ্‌যোনিজন্মসু ॥ ২১ ॥

## শাঙ্করভাষ্যম্।

যৎ পুরুষস্য সুখদুঃখানাং ভোক্তৃত্বং সংসারিত্বমিত্যুক্তং তস্য তৎ কিন্নিমিত্তমিত্যুচ্যতে পুরুষইতি। পুরুষো ভোক্তা প্রকৃতিস্থঃ প্রকৃতাববিদ্যালক্ষণায়াং কার্য্যকারণরূপেণ পরিণতায়াং স্থিতঃ প্রকৃতিঃ প্রকৃতিমাত্মত্বেন গতইত্যেবং হি যস্মাৎ তস্মাদ্ভুঙ্‌ক্ত উপলভ্যতইত্যর্থঃ প্রকৃতিজান্ প্রকৃতিতো জাতান্ সুখদুঃখমোহাকারাভিব্যক্তান্ গুণান্ সুখী দুঃখী মূঢ়ঃ পণ্ডিতোঽহমিত্যেবং সত্যামপ্যবিদ্যায়াং সুখদুঃখমোহেষু গুণেষু ভুজ্যমানেষু যঃ সঙ্গ আত্মভাবঃ সংসারস্য স প্রধানং কারণং জন্মনঃ সযথাকামো ভবতি তৎক্রতুর্ভবতীত্যাদিশ্রুতেঃ তদেতদাহ কারণং হেতুর্গুণসঙ্গঃ গুণেষু সঙ্গোঽস্য ভোক্তুঃ সদসদ্যোনিজন্মসু সত্যশ্চাসত্যশ্চ যোনয়ঃ সদসদ্যোনয়স্তাসু সদসদ্যোনিষু জন্মানি তানি সদসদ্যোনিজন্মানি তেষু সদসদ্যোনিজন্মসু বিষয়ভূতেষু কারণং গুণসঙ্গোঽথবা সদসদ্যোনিজন্মস্বস্য সংসা-

## গিরিকৃত টীকা।

দ্রষ্টুঃ সংসারঃ তথাবিধং ভোক্তৃত্বমস্য সংসারিত্বমিত্যুত্তরমাহ সুখেতি। শ্লোকব্যাখ্যাসমাপ্তাবিতিশব্দঃ ॥ ২০ ॥

শ্লোকান্তরং প্রশ্নোত্তরত্বেনাবতারয়তি যদিতি। নিমিত্তং বক্তুমাদৌ সংসারিত্বমস্যাবিদ্যৈক্যাধ্যাসাদিত্যাহ পুরুষইতি। যস্মাৎ প্রকৃতিমাত্মত্বেন গতস্তস্মাদ্ভুঙ্‌ক্তইতি

## স্বামিকৃত টীকা।

শরীরং করণানি সুখদুঃখসাধনানীন্দ্রিয়াণি তেষাং কর্ত্তৃত্বে তদাকারপরিণামে প্রকৃতির্হেতুরুচ্যতে কপিলাদিভিঃ, পুরুষো জীবস্তু তৎকৃতসুখদুঃখানাং ভোক্তৃত্বে হেতুরুচ্যতে। অয়ং ভাবঃ, যদ্যপ্যচেতনায়াঃ প্রকৃতেঃ স্বতঃ কর্তৃত্বং ন সংভবতি তথা পুরুষস্যাপ্যবিকারিণো ভোক্তৃত্বং ন সম্ভবতি তথাপি কর্ত্তৃত্বং নাম ক্রিয়ানির্ব্বর্ত্তকত্বং তচ্চাচেতনস্যাপি চেতনাদৃষ্টবশাৎ চৈতন্যাধিষ্ঠিতত্বাৎ সম্ভবতি যথা বহ্নেরূর্দ্ধজ্বলনং বায়োস্তির্যগ্‌গমনং বৎসাদৃষ্টবশাৎ স্তন্যপয়সঃ ক্ষরণমিত্যাদি, অতঃ পুরুষসন্নিধানাৎ প্রকৃতেঃ কর্ত্তৃত্বমুচ্যতে ভোক্তৃত্বঞ্চ সুখদুঃখসংবেদনং তচ্চ চেতনধর্ম্মএবেতি প্রকৃতিসন্নিধানাৎ পুরুষস্য ভোক্তৃত্বমুচ্যতইতি ॥২০॥

তথাপ্যধিকারিণো জন্মরহিতস্য চ ভোক্তৃত্বং কথমিত্যত্রাহ পুরুষইতি। হি যস্মাৎ প্রকৃতিস্থস্তৎকার্য্যে দেহে তাদাত্ম্যেন স্থিতঃ পুরুষঃ অতস্তজ্জনিতান্ সুখদুঃখাদীন্ ভুঙ্‌ক্তে অস্য চ পুরুষস্য সতীষু দেবাদিযোনিষু অসতীষু তির্য্যগাদিযোনিষু যানি জন্মানি তেষু গুণসঙ্গোগুণৈঃ শুভাশুভকর্ম্মকারিভিরিন্দ্রিয়ৈঃ সঙ্গঃ কারণমিত্যর্থঃ ॥ ২১ ॥

উপদ্রষ্টানুমন্তা চ ভর্ত্তা ভোক্তা মহেশ্বরঃ।
পরমাত্মেতি চাপ্যুক্তো দেহেঽস্মিন্ পুরুষঃ পরঃ ॥ ২২ ॥

## শাঙ্করভাষ্যম্।

রস্য কারণং গুণসঙ্গইতিসংসারপদমধ্যাহার্য্যং সদ্যোনয়ো দেবাদিযোনয়ঃ অসদ্যোনয়ঃপশ্বাদিযোনয়ঃ সামর্থ্যাৎ সদসদ্যোনযো মনুষ্যযোনযোঽপ্যবিরুদ্ধা দ্রষ্টব্যাঃ। এতদুক্তং ভবতি প্রকৃতিস্থত্বাখ্যাবিদ্যাগুণেষু চ সঙ্গঃ কামঃ সংসারস্য কারণমিতি তচ্চপরিবর্জনায়োচ্যতে অস্য চ নিবৃত্তিকারণং জ্ঞানবৈরাগ্যে সসন্ন্যাসে গীতাশাস্ত্রে প্রসিদ্ধং তচ্চ জ্ঞানং পুরস্তাদুপন্যস্তং ক্ষেত্রক্ষেত্রজ্ঞবিষয়ং যৎ জ্ঞাত্বামৃতমশ্নুত ইত্যুক্তঞ্চান্যাপোহেনাতদ্ধর্ম্ম্যাধ্যারোপেণ চ॥২১॥

তস্যৈব পুনঃ সাক্ষান্নির্দ্দেশঃ ক্রিয়তে উপদ্রষ্টেতি। উপদ্রষ্টা সমীপস্থঃ সন্ দ্রষ্টা স্বয়মব্যাপৃতো যথা ঋত্বিগ্‌যজমানেষু যজ্ঞকর্ম্মব্যাপৃতেষু তটস্থোঽন্যোঽব্যাপৃতো যজ্ঞবিদ্যাকুশলঃ

## গিরিকৃত টীকা।

যোজনা। গুণবিষয়ং ভোগমভিনয়তি সুখীতি। অবিদ্যায়াভোগহেতুত্বাৎ কিং কারণান্বেষণয়েত্যাশঙ্ক্যাহ সত্যামপীতি। সঙ্গস্য জন্মাদৌ সংসারে প্রধানহেতুত্বে মানমাহ স যথেতি। উক্তেঽর্থে দ্বিতীয়ার্দ্ধমবতার্য্য ব্যাচষ্টে তদেতদিত্যাদিনা। সাধ্যাহারং যোজনান্তরমাহ অথবেতি। সদসদ্যোনীর্ব্বিবিচ্য ব্যাচষ্টে সদ্যোনযইতি। যোনিদ্বয়নির্দ্দেশাৎ মধ্যবর্ত্তিন্যো মনুষ্যযোনযোঽপিধ্বনিতাইত্যাহ সামর্থ্যাদিতি। সঙ্গস্য সংসারকারণত্বেনাবিদ্যায়াস্তৎকারণত্বমেকস্মাদেব হেতোস্তদুপপত্তেরিত্যাশঙ্ক্যাহ এতদিতি। অবিদ্যোপাদানং সংগো নিমিত্তমিত্যুভযোরপি কারণত্বং সিধ্যতীত্যর্থঃ। দ্বিবিধহেতূক্তের্ব্বিবক্ষিতংফলমাহ তচ্চেতি। সংসর্গস্যাজ্ঞানস্য স্বতোঽনিবৃত্তেস্তন্নিবর্ত্তকং বাচ্যমিত্যাশঙ্ক্যাহ অস্যেতি। বৈরাগ্যে সতি সন্ন্যাসস্তৎপূর্ব্বকঞ্চ জ্ঞানং সঙ্গাজ্ঞাননিবর্ত্তকমিত্যর্থঃ। উক্তে জ্ঞানে মানমাহ গীতেতি। অধ্যায়াদৌ চোক্তং জ্ঞানমুদাহৃতমিত্যাহ তচ্চেতি। তদেব জ্ঞানং যজ্জ্ঞাত্বেত্যাদিনা। ন সত্তন্নাসদিত্যন্তেনান্যবিষেধেন সর্ব্বতঃ পাণিপাদমিত্যাদিনা চাতদ্ধর্ম্মাধ্যাসেনোক্তমিত্যাহ যজ্জ্ঞাত্বেতি ॥ ২১ ॥

প্রকৃতস্যৈব মোক্ষহেতোর্জ্ঞানস্য সাক্ষান্নির্দেশায়োত্তরশ্লোকমুত্থাপয়তি তস্যেতি। কার্য্যকারণানাং ব্যাপারবতাং সমীপে স্থিতঃ সন্নিধিমাত্রেণ তেষাং সাক্ষীত্যেবমর্থত্বেন

## স্বামিকৃত টীকা।

তদনেন প্রকারেণ প্রকৃত্যবিবেকাদেব পুরুষস্য সংসারো ন তু স্বরূপতইত্যাশয়েন তস্য স্বরূপমাহ উপদ্রষ্টেতি। অস্মিন্ প্রকৃতিকার্য্যে দেহে বর্ত্তমানোঽপি পুরুষঃ পরো ভিন্নএব ন তদ্গুণৈর্যুজ্যতইত্যর্থঃ, তত্র হেতবঃ যস্মাদুপদ্রষ্টা পৃথগ্‌ভূতএব সমীপে স্থিত্বা দ্রষ্টা সাক্ষীত্যর্থঃ, তথা অনুমন্তা অনুমোদিতৈব সন্নিধিমাত্রেণানুগ্রাহকঃ সাক্ষী চেতাঃ কেবলো

## শাঙ্করভাষ্যম্।

ঋত্বিগ্‌যজমানব্যাপারগুণদোষাণামীক্ষিতা তদ্বৎ কার্য্যকারণব্যাপারেষু অব্যাপৃতোঽন্যো বিলক্ষণস্তেষাং কার্য্যকারণানং সব্যাপারাণাং সামীপ্যেন দ্রষ্টৃত্বাদুপদ্রষ্টা অথবা দেহচক্ষুর্ম্মনোবুদ্ধ্যাত্মানো দ্রষ্টারস্তেষাং বাহ্যো দ্রষ্টা দেহস্তত আরভ্যান্তরতমশ্চ প্রত্যক্ সমীপে আত্মা দ্রষ্টা যতঃ পরোঽন্তরো নাস্তি দ্রষ্টা সোঽতিশয়সামীপ্যেন দ্রষ্টৃত্বাদুপদ্রষ্টা স্যাৎ যজ্ঞোপদ্রষ্টৃবদ্বা সর্ব্ববিষয়ীকরণাদুপদ্রষ্টা অনুমন্তা চ অনুমোদনমননং কুর্ব্বৎসু তৎক্রিয়াসু পরিতোষস্তৎকর্ত্তানুমন্তা চাথ বা অনুমন্তা কার্য্যকরণপ্রবৃত্তিষু স্বয়মপ্রবৃত্তোঽপি প্রবৃত্তইব তদনুকূলোবিভাব্যতে তেনানুমন্তাথবা প্রবৃত্তান্ স্বব্যাপারেষু তৎসাক্ষিভূতঃ কদাচিদপি ন নিবারয়তীত্যনুমন্তা ভর্ত্তা ভরণং নাম দেহেন্দ্রিয়মনোবুদ্ধীনাং সংহতানাং চৈতন্যাত্মপরার্থ্যেন নিমিত্তভূতেন চৈতন্যাভাসানাং যৎ স্বরূপাবধারণং তচ্চৈতন্যাত্মকৃতমেবেতি ভর্ত্তাত্মেত্যুচ্যতে ভোক্তাগ্ন্যুষ্ণবন্নিত্যচৈতন্যস্বরূপেণ বুদ্ধেঃ সুখদুঃখমোহাত্মকাঃ প্রত্যয়াঃ সর্ব্ববিষয়বিষয়াশ্চৈতন্যাত্মগ্রস্তাইব জায়মানা বিভক্তাবিভাব্যন্তইতি ভোক্তাত্মোচ্যতে। মহেশ্বরঃ সর্ব্বাত্মত্বাচ্চ মহান্ ঈশ্বরশ্চেতি মহেশ্বরঃ পরমাত্মা দেহাদীনাং বুদ্ধ্যন্তানাং প্রত্যগাত্মত্বেন কল্পিতানামবিদ্যয়া পরমউপদ্রষ্টৃত্বাদিলক্ষণ আত্মেতি পরমাত্মা সোঽতঃ পরমাত্মেত্যনেন শব্দেন চাপ্যুক্তঃ কথিতঃ শ্রুতৌ ক্বাসৌ অস্মিন্ দেহে পুরুষঃ পরো ব্যক্তাদুত্তমঃ পুরুষস্ত্বন্যঃ পরমাত্মেত্যুদাহৃতইতি যো বক্ষ্যমাণঃ ক্ষেত্রজ্ঞঞ্চাপি মাম্বিদ্ধি ইত্যুপন্যস্তো ব্যাখ্যায়োপসংহৃতশ্চ ॥ ২২ ॥

---

## গিরিকৃত টীকা।

উপদ্রষ্টেতি পদং ব্যাচষ্টে সমীপস্থইতি। লৌকিকস্যেব দ্রষ্টুরস্যাপি স্বব্যাপারাবিষ্টতয়া নিষ্ক্রিয়ত্ববিরোধমাশঙ্ক্যাহ স্বয়মিতি। স্বব্যাপারাদৃতে সন্নিধিরেব দ্রষ্টৃত্বং দৃষ্টান্তেন স্পষ্টয়তি যথেতি। উপদ্রষ্টেত্যস্যার্থান্তরমাহ অথবেতি। বহূনাং দ্রষ্টৃত্বেঽপি কস্যোপদ্রষ্টৃত্বং তত্রাহ তেষামিতি। উপোপসর্গস্য সামীপ্যার্থত্বেন প্রত্যগর্থত্বাত্তত্রৈব সামীপ্যাবসানাৎ প্রত্যগাত্মা চ দ্রষ্টা চেত্যুপদ্রষ্টা সর্ব্বসাক্ষী প্রত্যাগাত্মেত্যর্থঃ। উক্তমেব ব্যনক্তি যতইতি। যথা যজমানস্য ঋত্বিজাঞ্চ যজ্ঞকর্ম্মণি গুণম্বা দোষম্বা সর্ব্বযজ্ঞাভিজ্ঞঃ সন্নুপদ্রষ্টা বিষয়ীকরোতি তথায়মাত্মা চিন্মাত্রস্বভাবঃ সর্ব্বং গোচরয়তীত্যুপদ্রষ্টেতি পক্ষান্তরমাহ যজ্ঞেতি। অনুমন্তা চেত্যেতৎ ব্যাকরোতি অনুমন্তেতি। যে স্বয়ং কুর্ব্বন্তো ব্যাপারবন্তোভবন্তি তেষু কুর্ব্বৎসু সৎসু যাস্তেষাং ক্রিয়াস্তাসু পার্শ্বস্থস্য পরিতোষোঽনুমননন্তচ্চানুমোদনং তস্য সন্নিধিমাত্রেণ কর্ত্তা যঃ সোঽনুমন্তেত্যর্থঃ। ব্যাখ্যান্তরমাহ অথবেতি। অর্থান্তরমাহ অথবেত্যাদিনা। ভর্ত্তেতি পদমাদায় ভরণং কিংনামেতি পৃচ্ছতি ভর্ত্তেতি। তদ্রূপং নিরূপয়ন্নাত্মনোভোক্তৃত্বং সাধয়তি দেহেতি। ভোক্তেত্যুক্তে ক্রিয়াবেশে প্রাপ্তে ভোগশ্চিদবসানতেতিন্যায়েন বিভজ্যতে অগ্নীতি। বিশেষণান্তরমাদায় ব্যাচষ্টে মহেশ্বর

য এবং বেত্তি পুরুষং প্রকৃতিঞ্চ গুণৈঃ সহ।
সর্ব্বথা বর্ত্তমানোঽপি ন স ভূয়োঽভিজায়তে ॥২৩॥

## শাঙ্কর ভাষ্যম্।

তমেতং যথোক্তলক্ষণমাত্মানং যএবমিতি। য এবং যথোক্তপ্রকারেণ বেত্তি পুরুষং সাক্ষাদাত্মভাবেনায়মহমিতি প্রকৃতিঞ্চ যথোক্তামবিদ্যালক্ষণাং গুণৈঃ স্ববিকারৈঃ সহ নিবর্ত্তিতামভাবমাপাদিতাং বিদ্যয়া সর্ব্বথা সর্ব্বপ্রকারেণ বর্ত্তমানোঽপি স ভূয়ঃ পুনঃ পতিতেঽস্মিন্ বিদ্বচ্ছরীরে দেহান্তরায় নাভিজায়তে নোৎপদ্যতে দেহান্তরং ন গৃহ্নাতীত্যর্থঃ অপিশব্দাৎ কিমু বক্তব্যং স্ববৃত্তস্থো ন জায়তইত ভিপ্রায়ঃ। ননু যদ্যপি জ্ঞানোৎপত্ত্যনন্তরং পুনর্জ্জন্মাভাবউক্তস্তথাপিপ্রাক্ জ্ঞানোৎপত্তেঃ কৃতানাং কর্ম্মণামুত্তরকালভাবিনাঞ্চ যানি চাতিক্রান্তান্যনেক-

## গিরিকৃত টীকা।

ইতি। পরাত্মত্বমুপপাদয়তি দেহাদীনামিতি। অবিদ্যয়া কল্পিতানামিতি সম্বন্ধঃ পরমত্বং প্রকৃষ্টত্বং সঃ পূর্ব্বোক্তবিশেষণবানিতি যাবৎ। পরমাত্মশব্দস্য প্রকৃতাত্মবিষয়ত্বে শ্রুতিমনুকূলয়তি অতইতি। তস্য তাটস্থ্যং প্রশ্নদ্বারা প্রত্যাচষ্টে কেতি। কস্মাৎ পরত্বন্তদাহ অব্যক্তাদিতি। তত্রৈব বাক্যশেষানুকূল্যমাহ উত্তমইতি। সোঽস্মিন্ দেহে পরঃ পুরুষইতি সম্বন্ধঃ। শোধিতার্থয়োরৈক্যজ্ঞানং প্রাগুক্তং ফলোক্ত্যা স্তৌতি ক্ষেত্রজ্ঞঞ্চেতি ॥ ২২ ॥

যথোক্তেন প্রকারেণ জীবেশ্বরাদিসর্ব্বকল্পনাধিষ্ঠানত্বেনেত্যর্থঃ, সাক্ষাদপরোক্ষত্বেনেতিযাবৎ যথোক্তামনাদ্যনির্ব্বাচ্যাং সর্ব্বানর্থোপাধিভূতামিত্যর্থঃ, বিদ্যয়া প্রাগুক্তৈকত্বগোচরয়া প্রকৃতিমবিদ্যারূপাং সকার্য্যামভাবমাপাদিতাং যো বেত্তীতি সম্বন্ধঃ, সর্ব্বপ্রকারেণ বিহিতেন নিষেধেন চেত্যর্থঃ. পুনর্নকারবোঽন্বয়ার্থঃ। নিপাতসূচিতং ন্যায়মাহ অপীতি। ন সভূয়োঽভিজায়তেইত্যুক্তমাক্ষিপতি নম্বিতি। জ্ঞানোৎপত্ত্যনন্তরং জন্মাভাবস্যোক্তত্বাৎ পুনর্দেহারম্ভমুপেত্য নাক্ষেপঃ স্যাদিত্যাশঙ্ক্যাহ যদ্যপীতি। তথাপি স্যুস্ত্রীণি জন্মানীতি সম্বন্ধঃ, বর্ত্তমানে দেহে জ্ঞানাৎ পূর্ব্বোত্তরকালীনানাং কর্ম্মণাং ফলমদত্বা নাশাযোগাজ্জন্মদ্বয়মাবশ্যকমতীতানেকদেহেষ্বপি কৃতকর্ম্মণাং নাভুক্তং ক্ষীয়তে কর্ম্মেতি স্মৃতেঃ অদত্বা ফলমনাশাদস্তি তৃতীয়মপি জন্মেত্যাহ প্রাগিতি। ফলদানম্বিনাপি কর্ম্মনাশে দোষমাহ কৃতেতি। নযুক্তইতিকৃত্বা ফলমদত্বা কর্ম্মনাশো নেতিশেষঃ, বিমতানি

## স্বামিকৃত টীকা।

নির্গুণশ্চেত্যাদিশ্রুতেঃ, তথা ঐশ্বরেণ ভর্ত্তা বিধায়কঃ ভোক্তা পালকইতি চ, মহাংশ্চাসাবীশ্বরশ্চেতি ব্রহ্মাদীনামপি পতিরিতি চ পরমাত্মা অন্তর্যামী চেত্যুক্তঃ শ্রুত্যা, তথা চ শ্রুতিঃ, এষ সর্ব্বেশ্বর এষ ভূতাধিপতিরেষ লোকপালইত্যাদি ॥ ২২ ॥

## শাঙ্করভাষ্যম্ ।

জন্মকৃতানি তেষাং ফলমদত্ত্বা নাশোন যুক্তইতি স্থাত্রীণি জন্মানি কৃতবিপ্রনাশোহি ন যুক্ত-ইতি যথা ফলে প্রবৃত্তানামাবদ্ধজন্মনাং কর্ম্মণাং ন চ কর্ম্মণাং বিশেষোঽবগম্যতে তস্মাৎ ত্রিপ্রকারাণ্যপি কর্ম্মাণি ত্রীণি জন্মান্তারভেরন্ সংহতানি বা সর্ব্বাণ্যেকং জন্মারভেরন্ অন্যথা কৃতবিনাশে সতি সর্ব্বত্রানাশ্বাসপ্রসঙ্গঃ শাস্ত্রানর্থক্যঞ্চ স্যাদিত্যতইদমযুক্তমুক্তং ন সভূয়োঽভি জায়তইতি ন ক্ষীয়ন্তে চাস্য কর্ম্মাণি ব্রহ্মবেদ ব্রহ্মৈব ভবতি তস্য তাবদেব চিরমিষীকাতূণবৎ সর্ব্বকর্ম্মাণি প্রদূয়ন্তে ইত্যাদিশ্রুতিশতেভ্যউক্তোবিদুষঃ সর্ব্বকর্ম্মদাহঃ ইহাপি চোক্তোসর্থৈ-ধাংসীত্যাদিনা সর্ব্বকর্ম্মদাহোবক্ষ্যতি চোপপত্তেশ্চাবিদ্যাকামক্লেশবীজনিমিত্তানি হি কর্ম্মাণি ফলাবম্ভকানি জন্মান্তরাঙ্কুরমাবভন্তে ইহাপি চ সাহঙ্কাবাভিসন্ধীনি কর্ম্মাণি ফলারম্ভ-কানি নেতরাণীতি তত্র তত্র ভগবতোক্তং বীজান্যগ্ন্যুপদগ্ধানি ন রোহন্তি যথা পুনঃ জ্ঞান-দগ্ধৈস্তথা ক্লেশৈর্নাত্মা সম্পদ্যতে পুনরিতি অস্তু তাবৎ জ্ঞানোৎপত্তেরূর্দ্ধকালকৃতানাং কর্ম্মণাং জ্ঞানেন দাহো জ্ঞানসহভাবিত্বাৎ ন ত্বিহ জন্মনি জ্ঞানোৎপত্তেঃ প্রাক্ কৃতানাং জ্ঞানেন দাহো ন ত্বতীতানামনেকজন্মান্তরকৃতানাং দাহো যুক্তো ন সর্ব্বক র্ম্মাণীতিবিশেষণাৎ।

## গিরিকৃত টীকা।

কর্ম্মাণি ফলমদত্ত্বা ন ক্ষীয়ন্তে বৈদিককর্ম্মত্বাদাবদ্ধকর্ম্মবদিতি মত্বাহ যথেতি। নাশোন জ্ঞানাদিতিশেষঃ। নম্বনারব্ধকর্ম্মণাং জ্ঞানান্নাশোযুক্তোঽপ্রবৃত্তফলবত্ত্বাদাবব্ধকর্ম্মণাস্তু প্রবৃত্তফলবত্ত্বেন বলবত্ত্বান্নজ্ঞানাৎ তন্নিবৃত্তির্নেত্যাহ ন চেতি। অজ্ঞানোত্থত্বেন জ্ঞানবি-বোধিত্বাবিশেষাৎ প্রবৃত্তাপ্রবৃত্তফলত্বমনুপযুক্তমিতি ভাবঃ। কর্ম্মণাং ফলমদত্ত্বা নাশাভাবে ফলিতমাহ তস্মাদিতি। নমু কর্ম্মণাং বহুত্বাত্তৎফলেষু জন্মসু কৃতস্ত্রিত্বমাবম্ভককর্ম্মণাং ত্রিঃপ্রকাবত্বাদিতিচেন্নানারব্ধত্বেনৈকপ্রকারত্বসম্ভবাৎ তত্রাহ সংহতানীতি। নাস্তি জ্ঞানস্যৈকান্তিকফলত্বমিতিশেষঃ। উক্তকর্ম্মণাং জন্মানাবম্ভকত্বে প্রাগুক্তং দোষমনুভাষ্য তস্যাতিপ্রসঙ্গকত্বমাহ অন্যথেতি। সর্ব্বত্রেত্যারব্ধকর্ম্মস্বপীতি যাবৎ। ফলজনকত্বানি-শ্চয়োঽনাশ্বাসঃ কর্ম্মণাং জন্মানাবম্ভকত্বে কর্ম্মকাণ্ডানর্থক্যং দোষান্তরমাহ শাস্ত্রেতি। অনা-রব্ধকর্ম্মণাং সত্যপি জ্ঞানে জন্মান্তরারম্ভকত্বধ্রৌব্যে ফলিতমাহ ইতঃতইতি। শ্রুত্যব-ষ্টম্ভেন পরিহরতি নেত্যাদিনা। জ্ঞানাদনাবব্ধকর্ম্মদাহে ভগবতোঽপি সম্মতিমাহ ইহা-পীতি। জ্ঞানাধীনসর্ব্বকর্ম্মদাহে সর্ব্বধর্ম্মান্ পরিত্যজ্যেতি বাক্যাশযোঽপি প্রমাণীভবতী-ত্যাহ বক্ষ্যতি চেতি। জ্ঞানাদনারব্ধাশেষকর্ম্মক্ষযে যুক্তিরপি বক্তুং শক্যেত্যাহ, উপ-পত্তেশ্চেতি। তামেব বিবৃণোতি অবিদ্যেতি। অজ্ঞস্যাবিদ্যাস্মিতারাগদ্বেষাভিনিবেশা-খ্যক্লেশাত্মকানি সর্ব্বানর্থবীজানি তানি নিমিত্তীকৃত্য যানি ধর্ম্মাধর্ম্মকর্ম্মাণি তানি জন্মান্ত রারম্ভকানি যানি তু বিদুষো বিদ্যাদগ্ধক্লেশবীজস্য প্রতীতিমাত্রশরীরাণি কর্ম্মাণি ন তানি

## শাঙ্করভাষ্যম্।

জ্ঞানোত্তবকালভাবিনামেব সর্ব্বকর্ম্মণামিতি চেন্ন সংকোচত্বে কারণানুপপত্তেঃ যত্তূক্তং যথা বর্ত্তমানশরীরজন্মারম্ভকাণি কর্ম্মাণি ন ক্ষীয়ন্তে ফলদানায় প্রবৃত্তান্যেব সত্যপি জ্ঞানে তথা অনারব্ধফলানামপি কর্ম্মণাং ক্ষয়ো ন যুক্তইতি তদসৎ কথং তেষাং মুক্তেষুবৎ প্রবৃত্ত-ফলত্বাৎ যথা পূর্ব্বং লক্ষ্যবেধায় মুক্তইষুর্ধনুষোলক্ষ্যবেধোত্তরকালমপি আরব্ধবেগক্ষয়াৎ পতনেনৈব নিবর্ত্ততে এবং শরীরারম্ভকং কর্ম্ম শরীরস্থিতিপ্রয়োজনে নিবৃত্তেঽপ্যাসংস্কার-বেগক্ষয়াৎ পূর্ব্ববদ্বর্ত্তত এব যথা সএবেষুঃ প্রবৃত্তিনিমিত্তানারব্ধবেগস্তমুক্তোধনুষি প্রমুক্তো-প্যুপসংহ্রিয়তে তথানারব্ধফলানি কর্ম্মাণি স্বাশ্রয়স্থান্যেব জ্ঞানেন নির্বীজীক্রিয়ন্তইতি পতিতেঽস্মিন্ বিদ্বচ্ছরীরে ন স ভূয়োঽভিজায়তইতি যুক্তমেবোক্তমিতি সিদ্ধং ॥ ২৩ ॥

## গিরিকৃত টীকা।

শরীরারম্ভকানি দগ্ধপটবদর্থক্রিয়াসামর্থ্যাভাবাদিত্যর্থঃ। প্রতীতিমাত্রদেহানাং কর্ম্মা-ভাসানাং ন ফলারম্ভকত্বোতর্স্মিন্নর্থে ভগবতোঽপি সম্মতিমাহ ইহাপীতি তত্ত্বজ্ঞানা-দূর্দ্ধং প্রাতীতিকক্লেশানাং কর্ম্মদ্বারা দেহানারম্ভকত্বে বাক্যান্তরমপি প্রমাণয়তি বীজা-নীতি। জ্ঞানানন্তরভাবিকর্ম্মণাং জ্ঞানেন দাহমঙ্গীকরোতি অস্থিতি। বিরোধিপ্রস্তানা-মেবোৎপত্তেরিতি হেতুমাহ জ্ঞানেতি। অস্মিন্ জন্মনি জন্মান্তরে বা জ্ঞানাৎ পূর্ব্বভাবি-কর্ম্মণাং ন ততো দাহো বিবোধিনং বিনাপ্রবৃত্তেরিত্যাহ নস্থিতি। শ্রুতিস্মৃতিবিরোধান্নৈব-মিতি পরিহরতি নেত্যাদিনা। সর্ব্বশব্দশ্রুতেঃ সঙ্কোচং শঙ্কতে জ্ঞানেতি। প্রকরণা-দিসংকোচকাভাবান্নৈবমিত্যাহ নেতি। আক্ষেপদশায়ামুক্তমনুমানমনুবদতি যস্থিতি। আভাসত্বাদিদমসাধকমিতি দূষয়তি তদসদিতি। ব্যাপ্ত্যাদিমত্ত্বে কথমাভাসত্বমিতি পৃচ্ছতি কথমিতি। প্রবৃত্তফলত্বোপাধিনা হেতোর্ব্যাপ্তিভঙ্গাদাভাসত্বধীরিত্যাহ তেষা-মিতি। তদেব প্রপঞ্চয়তি যথেত্যাদিনা। ধনুষঃ সকাশাদিযুর্মুক্তোবলবৎ প্রতিবন্ধকা-ভাবে মধ্যে ন পততি তথা প্রবলপ্রতিবন্ধকং বিনা প্রবৃত্তফলানাং কর্ম্মণাং ভোগাদৃতে-ন ক্ষয়োন চ তত্ত্বজ্ঞানং তাদৃক্ প্রতিবন্ধকং উৎপত্তাবেব পূর্ব্বপ্রবৃত্তেন কর্ম্মণা প্রতিবদ্ধশক্তি-ত্বাদিত্যর্থঃ। যত্র জ্ঞানেনাদাহ্যত্বং তত্র প্রবৃত্তফলত্বমিত্যন্বয়েঽপি যত্রাপ্রবৃত্তফলত্বং তত্র জ্ঞানদাহ্যত্বমিতি ন ব্যতিরেকসিদ্ধিরিত্যাশঙ্ক্যাহ তএবেতি প্রবৃত্তৌ নিমিত্তভূতোঽনারব্ধো-বেগোঽনেনেতিবিগ্রহঃ, স্বাশ্রয়স্থানি সাভাসান্তঃকরণনিষ্ঠানীতি যাবৎ, বিমতানি তত্ত্ব-

## স্বামিকৃত টীকা।

এবং প্রকৃতিপুরুষবিবেকজ্ঞানিনং স্তৌতি যএবমিতি। এবমুপদ্রষ্টৃত্বাদিরূপেণ পুরুষং যো বেত্তি প্রকৃতিঞ্চ গুণৈঃ সুখদুঃখাদিপরিণামৈঃ সহিতাং যো বেত্তি স পুরুষঃ সর্ব্বথা বিধিমতিলঙ্ঘ্য বর্ত্তমানোঽপি পুনর্নাভিজায়তে মুচ্যতএবেত্যর্থঃ ॥ ২৩ ॥

ধ্যানেনাত্মনি পশ্যন্তি কেচিদাত্মানমাত্মনা।
অন্যে সাংখ্যেন যোগেন কর্ম্মযোগেন চাপরে ॥ ২৪ ॥

## শাঙ্করভাষ্যম্।

অত্রাত্মদর্শনে উপায়বিকল্পা ইমে ধ্যানাদয় উচ্যন্তে ধ্যানেনেতি। ধ্যানেন ধ্যানং নাম শব্দাদিভ্যো বিষয়েভ্য শ্রোত্রাদীনি করণানি মনস্যুপসংহৃত্য মনশ্চ প্রত্যক্‌চেতয়িতর্য্যে-কাগ্রতয়া যচ্চিন্তনং তদ্ধ্যানং তথা ধ্যায়তীব কঃ ধ্যায়তীব পৃথিবী ধ্যাযন্তীব পর্ব্বতাঃ ইত্যু-পমোপাদানাৎ তৈলধারাবৎ সন্ততোঽবিচ্ছিন্নপ্রত্যয়ো ধ্যানন্তেন ধ্যানেনাত্মনি বুদ্ধৌ পশ্যন্ত্যাত্মানং প্রত্যক্‌চেতনমাত্মনা ধ্যানসংস্কৃতেনান্তঃকরণেন কেচিৎ যোগিনঃ অন্যে সাংখ্যেন যোগেন সাংখ্যং নাম ইমে সত্ত্বরজস্তমাংসি গুণা ময়া দৃশ্যা অহমেভ্যোঽন্যস্তদ্ব্যা-পারস্য সাক্ষিভূতো নিত্যোগুণবিলক্ষণ আত্মেতি চিন্তনমেষ সাংখ্যো যোগস্তেন পশ্যন্ত্যা-ত্মানমা ত্মনেতি বর্ত্ততে কর্ম্মযোগেন কর্ম্মৈব যোগঈশ্বরার্পণবুদ্ধ্যানুষ্ঠীয়মানং ঘটনরূপত্বং যোগার্থাৎ যোগউচ্যতে গুণতস্তেন সত্ত্বশুদ্ধিজ্ঞানোৎপত্তিদ্বারেণ চাপরে ॥ ২৪ ॥

## গিরিকৃত টীকা।

ধীনিমিত্তনিবৃত্তানি　তৎকৃতকারণনিবৃত্তত্বাদ্রজ্জুসর্পাদিবদিতিব্যতিরেকসিদ্ধিরিতিভাবঃ। বিদুষো বর্ত্তমানদেহপাতে দেহান্তরে হেত্বভাবাত্তত্ত্বধীবৈকান্তিকফলেত্যুপসংহরতি পতিত ইতি ॥ ২৩ ॥

জ্ঞেয়ং যত্তদিত্যাদিনা তৎপদার্থস্তংপদার্থশ্চানন্তরমেব শোধিতৌ তয়োরৈক্যঞ্চ ক্ষেত্রজ্ঞ-শ্চাপি মাম্বিদ্ধীত্যুক্তমিদানীং তদ্দৃষ্টিহেতূন্ যথাধিকারং কথয়তি অত্রেতি। ধ্যানাখ্য-সাধনং কিং রূপমিতি পৃচ্ছতি ধ্যানং নামেতি। তদ্রূপং বদন্নুত্তরমাহ শব্দাদিভ্যইতি। একাগ্রতয়োপসংহৃত্যেতি সম্বন্ধঃ যচ্চিন্তনং প্রত্যক্‌চেতয়িতবি ইতি পূর্ব্বেণান্বয়ঃ। কিং তচ্চিন্তনমিত্যুক্তে দৃষ্টান্তদ্বারা শ্রুত্যবষ্টম্ভেন ধ্যানং প্রপঞ্চয়তি তথেতি। বিবক্ষিতধ্যা-নানুরোধেনেতি যাবৎ আত্মানং পশ্যন্তি পরমাত্মতয়েতিশেষঃ, কেচিদিত্যুত্তমাধিকারিণো গৃহ্যন্তে। মধ্যমাধিকারিণোনির্দ্দিশতি অন্যইতি। সাংখ্যশব্দিতং সাধনং কিন্নামে-

## স্বামিকৃত টীকা।

এবম্ভূতবিবিক্তাত্মজ্ঞানসাধনবিকল্পানাহ ধ্যানেনেতি দ্বাভ্যাং। ধ্যানেনাত্মাকারপ্র-ত্যয়াবৃত্ত্যা আত্মনি দেহ এব আত্মনা মনসা এবমাত্মানং কেচিৎ পশ্যন্তি অন্যে তু সাংখ্যেন প্রকৃতিপুরুষবৈলক্ষণ্যালোচনেন যোগেনাষ্টাঙ্গেনাপরে চ কর্ম্মযোগেন পশ্যন্তীতি সর্ব্বত্রানু-ষঙ্গঃ। এতেষাঞ্চ ধ্যানাদীনাং যথাযোগং ক্রমসমুচ্চয়ে সত্যপি তত্তন্নিষ্ঠাভেদাভি-প্রায়েণ বিকল্পোক্তিঃ ॥ ২৪ ॥

অন্যে ত্বেবমজানন্তঃ শ্রুত্বান্যেভ্য উপাসতে।
তেঽপি চাতিতরন্ত্যেব মৃত্যুং শ্রুতিপরায়ণাঃ॥ ২৫॥

## শাঙ্করভাষ্যম্।

অন্যেত্বিতি। অন্যে ত্বেতেষু বিকল্পেষু অন্যতরেণাপ্যেবং যথোক্তমাত্মানমজানন্তো-ঽন্যেভ্য আচার্য্যেভ্যঃ শ্রুত্বা ইদমেব চিন্তয়েতেত্যুক্তা উপাসতে শ্রদ্দধানাঃ সন্তশ্চিন্তয়ন্তি তেঽপি চাতিতরন্ত্যেবাতিক্রামন্ত্যেব মৃত্যুং মৃত্যুযুক্তং সংসারমিত্যেতৎ শ্রুতিপরায়ণাঃ শ্রুতিঃ শ্রবণং পরময়নং গমনং মোক্ষমার্গপ্রবৃত্তৌ পরং সাধনং যেষাং তে শ্রুতিপরায়ণাঃ কেবলপরোপদেশপ্রমাণাঃ স্বয়ং বিবেকরহিতাইত্যভিপ্রায়ঃ কিমু বক্তব্যং প্রমাণং প্রতি স্বতন্ত্রা বিবেকিনো মৃত্যুমতিতবন্তীত্যভিপ্রায়ঃ॥ ২৫॥

## গিরিকৃত টীকা।

ত্যুক্তে বিচাবজন্যং জ্ঞানন্তদেব জ্ঞানহেতুতপোযোগতুল্যত্বাদ্যোগশুদ্ধিহেতোবনেন গৌণ্যা বৃত্ত্যা যোগশব্দিতং কর্ম্মেত্যাহ সাংখ্যমিতি। অধমানধিকারিণঃ সংগিবতে কর্ম্মেতি। চিত্তৈকাগ্র্যং যোগঃ তাদর্থ্যং কর্ম্মণঃ শুদ্ধিহেতোরস্তি তেন গৌণ্যা বৃত্ত্যা যোগশব্দিতং কর্ম্মেত্যাহ শুণতইতি। অপবে পশ্যন্ত্যাত্মানমাত্মনেতি পূর্ব্ববদনুষঙ্গমঙ্গীকৃত্যাহ তেনেতি॥ ২৪॥

অধমতমানধিকাবিণো মোক্ষমার্গে প্রবৃত্তিং প্রতিলম্ভয়তি অন্যে ত্বিতি। আচার্য্যা-ধীনাং শ্রুতিমেবাভিনযতি ইদমিতি। উপাসনমেব বিবৃণোতি শ্রদ্ধধানা ইতি। পরো-পদেশাৎ প্রবৃত্তানামপি প্রবৃত্তেঃ সাফল্যমাহ তেঽপীতি। তেষাং মুখ্যাধিকারিত্বং ব্যাবর্ত্তয়তি শ্রুতীতি। তেঽপীত্যাদিনা সূচিতমর্থমাহ কিমিতি॥ ২৫॥

ঐক্যধীমুক্তিহেতুরিতি প্রাগুক্তমনূদ্য প্রশ্নপূর্ব্বকং জিজ্ঞাসিতহেতুপরত্বেন শ্লোকমব-তাবরতি ক্ষেত্রেতি। সর্ব্বস্য প্রাণিজাতস্য ক্ষেত্রক্ষেত্রজ্ঞসম্বন্ধাধীনা যস্মাদুৎপত্তিস্ত-স্মাৎ ক্ষেত্রজ্ঞাত্মকপরমাত্মাতিরেকেণ প্রাণিনিকায়স্যাভাবাদৈক্যজ্ঞানাদেব মুক্তিরিত্যাহ কস্মাদিতি। ক্ষেত্রক্ষেত্রজ্ঞসম্বন্ধমুক্তমাক্ষিপতি কং পুনরিতি। ক্ষেত্রজ্ঞস্য ক্ষেত্রেণ সম্বন্ধঃ সংযোগো বা সমবায়ো বেতি বিকল্প্যাদ্যং দূষয়তি ন তাবদিতি। দ্বিতীয়ং নিয়-

## স্বামিকৃত টীকা।

অতিমন্দাধিকারিণং নিস্তারোপায়মাহ অন্যে ত্বিতি। অন্যে তু সাংখ্যযোগাদিমার্গেণ এবমুপদ্রষ্টৃত্বাদিলক্ষণমাত্মানং সাক্ষাৎকর্ত্তুমজানন্তোঽন্যেভ্য আচার্য্যেভ্য উপদেশতঃ শ্রুত্বা উপাসতে ধ্যায়ন্তি তেঽপি চ শ্রদ্ধয়া উপদেশশ্রবণপরায়ণাঃ সন্তো মৃত্যুং সংসারং শনৈরতি-তরন্ত্যেব॥ ২৫॥

যাবৎ সংজায়তে কিঞ্চিৎ সত্ত্বং স্থাবরজঙ্গমম্।
ক্ষেত্রক্ষেত্রজ্ঞসংযোগাত্তদ্বিদ্ধি ভরতর্ষভ॥ ২৬॥

## শাঙ্করভাষ্যম্।

অত্র ক্ষেত্রজ্ঞেশ্বরৈকত্ববিষয়ং জ্ঞানং মোক্ষসাধনং যৎ জ্ঞাত্বামৃতমশ্নুত ইত্যুক্তং তৎ কস্মাদ্ধেতোরিতি তদ্ধেতুপ্রদর্শনার্থং শ্লোকআরভ্যতে যাবদিতি। যাবৎ যৎকিঞ্চিৎ সঞ্জায়তে সমুৎপদ্যতে সত্ত্বং বস্তু কিমবিশেষেণেত্যাহ স্থাবরং জঙ্গমং স্থাবরং জঙ্গমঞ্চ ক্ষেত্রক্ষেত্রজ্ঞসংযোগাৎ তজ্জায়তে ইত্যেবং বিদ্ধি জানীহি হে ভরতর্ষভ কঃ পুনরয়ং ক্ষেত্রক্ষেত্রজ্ঞয়োঃ সংযোগোঽভিপ্রেতো ন তাবৎ রজ্জ্বেব ঘটস্যাবয়বসংশ্লেষদ্বারকঃ সম্বন্ধবিশেষঃ সংযোগঃ ক্ষেত্রেণ ক্ষেত্রজ্ঞস্য সম্ভবতি আকাশবন্নিরবয়বত্বান্নাপি সমবায়লক্ষণঃ তন্তুপটয়োরিব ক্ষেত্রক্ষেত্রজ্ঞয়োরিতরেতরকার্য্যকারণভাবানভ্যুপগমাদিত্যুচ্যতে ক্ষেত্রক্ষেত্রজ্ঞয়োর্বিষয়বিষয়িণোর্ভিন্নস্বরূপয়োরিতরেতরতদ্ধর্ম্মাধ্যাসলক্ষণঃ সংযোগঃ ক্ষেত্রক্ষেত্রজ্ঞস্বরূপবিবেকাভাব-

## গিরিকৃত টীকা।

স্মৃতি নাপীতি। বাস্তবসম্বন্ধাভাবেঽপি তয়োরধ্যাসস্বরূপঃ সোঽস্তীতি পরিহরতি উচ্যত-ইতি। ভিন্নস্বভাবত্বে হেতুমাহ বিষয়েতি। ইতরেতরত্র ক্ষেত্রে ক্ষেত্রজ্ঞে বা তদ্ধর্ম্মস্য ক্ষেত্রানধিকরণস্য চ ক্ষেত্রনিষ্ঠস্য জাড্যাদেরারোপরূপো যোগস্তয়োরিত্যাহ ইতরেতি। তত্র নিমিত্তমাহ ক্ষেত্রেতি। অবিবেকাদারোপিতসংযোগদৃষ্টান্তমাহ রজ্জ্বিতি। উক্তং সম্বন্ধং নিগময়তি সোঽয়মিতি। তস্য নিবৃত্তিযোগ্যত্বং সূচয়তি মিথ্যেতি। কথং তর্হি মিথ্যাজ্ঞানস্য নিবৃত্তিরিত্যাশঙ্ক্যাহ যথেতি। যোঽয়ং বিজ্ঞানময়ঃ প্রাণেষ্বিত্যাদি ত্বংপদার্থবিষয়ঃ শাস্ত্রমনুসৃত্য বিবেকজ্ঞানমাপাদ্য মহাভূতাদিধৃত্যন্তাৎ ক্ষেত্রাদুপদ্রষ্টৃত্বাদিলক্ষণং প্রাগুক্তং ক্ষেত্রজ্ঞং মুঞ্জেষীকান্যায়েন বিবিচ্য সর্ব্বোপাধিবিনির্মুক্তব্রহ্মস্বরূপেণ জ্ঞেয়ং যোঽনুভবতি তস্য মিথ্যাজ্ঞানমপগচ্ছতীতি সম্বন্ধঃ। কথমস্য নির্ব্বিশেষত্বং ক্ষেত্রজ্ঞস্য সবিশেষত্বহেতোঃ সত্ত্বাদিত্যাশঙ্ক্যাহ ক্ষেত্রঞ্চেতি। বহুদৃষ্টান্তোক্তের্ব্বহুবিধত্বং ক্ষেত্রস্য দ্যোত্যতে। উক্তজ্ঞানান্মিথ্যাজ্ঞানাপগমে হেতুমাহ যথোক্তেতি। তথাপি কথং পুরুষার্থসিদ্ধিঃ কালান্তরে তুল্যজাতীয়মিথ্যাজ্ঞানোদয়সম্ভবাদিত্যাশঙ্ক্যাহ তস্যেতি। সম্যগ্জ্ঞানাদজ্ঞানতৎকার্য্যনিবৃত্ত্যা মুক্তিরিতি স্থিতে ফলিতমাহ যএবমিতি। উত্তরগ্রন্থমবতারয়িতুং ব্যবহিতং

## স্বামিকৃত টীকা।

তত্র কর্ম্মযোগস্য তৃতীয়চতুর্থপঞ্চমেষু প্রপঞ্চিতত্বাৎ ধ্যানযোগস্য চ ষষ্ঠাষ্টময়োঃ প্রপঞ্চিতত্বাৎ ধ্যানাদেশ্চ সাংখ্যবিবিক্তাত্মবিষয়ত্বাৎসাংখ্যমেব প্রপঞ্চয়ন্নাহ যাবদিতি যাবদধ্যায়সমাপ্তি। যাবৎ যৎকিঞ্চিৎ বস্তুমাত্রং সমুৎপদ্যতে তৎসর্ব্বং ক্ষেত্রক্ষেত্রজ্ঞয়োর্যোগাদবিবেককৃততাদাত্ম্যাধ্যাসাদ্ভবতীতি জানীহি॥ ২৬॥

সমং সর্ব্বেষু ভূতেষু তিষ্ঠন্তং পরমেশ্বরম্।
বিনশ্যৎস্ববিনশ্যন্তং যঃ পশ্যতি স পশ্যতি ॥ ২৭ ॥

## শাঙ্করভাষ্যম্।

নিবন্ধনো রজ্জুশুক্তিকাদীনাং তদ্বিবেকজ্ঞানাভাবাদধ্যারোপিতসর্পরজতাদিসংযোগবৎ সোঽয়মধ্যাসস্বরূপঃ ক্ষেত্রক্ষেত্রজ্ঞসংযোগো মিথ্যাজ্ঞানলক্ষণো যথাশাস্ত্রং ক্ষেত্রক্ষেত্রজ্ঞলক্ষণভেদপরিজ্ঞানপূর্ব্বকং প্রাক্ দর্শিতরূপাৎ ক্ষেত্রাৎ মুঞ্জাদিবেষীকাং যথোক্তলক্ষণং ক্ষেত্রজ্ঞং প্রবিভজ্য ন সর্ব্বন্নাসন্নচ্যতে ইত্যনেন নিরস্তসর্ব্বোপাধিবিশেষং জ্ঞেয়ং ব্রহ্মস্বরূপেণ যঃ পশ্যতি ক্ষেত্রঞ্চ মায়ানির্ম্মিতহস্তিস্বপ্নদৃষ্টবস্তুগন্ধর্ব্বনগরাদিবদসদেব সদিবাবভাসতে ইতি। এবং নিশ্চিতবিজ্ঞানো যস্তস্য যথোক্তসম্যকদর্শনবিরোধাদপগচ্ছতি মিথ্যাজ্ঞানং তস্য জন্মহেতোরপগমাৎ য এবং বেত্তি পুরুষং প্রকৃতিঞ্চ গুণৈঃ সহ ইত্যনেন বিদ্বান্ ভূয়ো নাভিজায়তইতি যদুক্তং তদুপপন্নমুক্তং ন সভূয়োঽভিজায়তইতি সম্যগ্দর্শনফলমবিদ্যায়ানিবর্ত্তকং সম্যগ্দর্শনং ফলমবিদ্যাদিসংসারবীজনিবৃত্তিদ্বারেণ জন্মাভাবউক্তঃ জন্মকারণঞ্চাবিদ্যানিমিত্তকঃ ক্ষেত্রক্ষেত্রজ্ঞসংযোগউক্তঃ ॥ ২৬ ॥

অতস্তস্যাঅবিদ্যায়ানিবর্ত্তকং সম্যগ্দর্শনমুক্তমপি পুনঃ শব্দান্তরেণোচ্যতে সমং সর্ব্বেষিত্যাদি। সমমিতি সমং নির্ব্বিশেষং তিষ্ঠন্তং স্থিতিং কুর্ব্বন্তং ক সর্ব্বেষু ভূতেষু ব্রহ্মা-

## গিরিকৃত টীকা।

বৃত্তং কীর্ত্তয়তি নেত্যাদিনা। অবিদ্যানাদ্যনির্ব্বাচ্যমজ্ঞানং মিথ্যাজ্ঞানং তৎসংস্কারশ্চাদিশব্দার্থঃ। ব্যবহিতমনুদ্যাব্যবহিতমনুবদতি জন্মেতি ॥ ২৬ ॥

ব্যবধানাব্যবধানাভ্যাং সর্ব্বানর্থমূলত্বাদজ্ঞানস্য তন্নিবর্ত্তকং সম্যগ্জ্ঞানং বক্তব্যমিত্যাহ অতইতি। তস্যাপকৃত্বুক্তত্বাৎ তদুক্তার্থপ্রবৃত্তির্ব্বৃথেত্যাশঙ্ক্যাতি সূক্ষ্মার্থস্য শব্দভেদেন পুনঃ পুনর্ব্বচনমধিকারিভেদানুগ্রহায়েতি মত্বাহ উক্তমিতি। সর্ব্বত্র পরস্যৈকত্বাৎ নোৎকর্ষাপকর্ষবত্ত্বমিত্যাহ সমমিতি। পরমত্বমীশ্বরত্বঞ্চোপপাদয়তি দেহেতি। আত্মা জীবস্তমিত্যাদিনান্বয়োক্তিঃ। আশ্রয়নাশাদাশ্রিতস্যাপি নাশমাশঙ্ক্যাহ তঞ্চেতি। অবিনশ্যন্তমিতি বিশিনষ্টি ইতি সম্বন্ধঃ উভয়ত্র বিশেষণদ্বয়স্য তাৎপর্য্যমাহ ভূতানামিতি। নাশানাশাভ্যাং বৈলক্ষণ্যেঽপি কথমত্যন্তবৈলক্ষণ্যং সবিশেষত্বভিন্নত্বয়োস্তুল্যত্বাদিতি শঙ্কতে

## স্বামিকৃত টীকা।

অবিবেককৃতং সংসারোদ্ভবমুক্ত্বা তন্নিবৃত্তয়ে বিবিক্তাত্মবিষয়ং সম্যগ্দর্শনমাহ সমমিতি স্থাবরজঙ্গমাত্মকেষু ভূতেষু নির্ব্বিশেষসদ্রূপেণ সমং যথা ভবত্যেবং তিষ্ঠন্তং পরমাত্মানং যঃ পশ্যতি অতএব তেষু বিনশ্যৎস্বপ্যবিনশ্যন্তং যঃ পশ্যতি সএব সম্যক্ পশ্যতি নান্যইত্যর্থঃ ॥২৭॥

সমং পশ্যন্ হি সর্ব্বত্র সমবস্থিতমীশ্বরম্।
ন হিনস্ত্যাত্মনাত্মানং ততো যাতি পরাং গতিম্ ॥ ২৮ ॥

## শাঙ্করভাষ্যম্।

দিস্থাবরান্তেষু প্রাণিষু কম্পরমেশ্বরং দেহেন্দ্রিয়মনোবুদ্ধ্যব্যক্তাত্মনোঽপেক্ষং পরং পরমস্চাসাবীশ্বরশ্চ ঈশনশীলশ্চেতি পরমেশ্বরস্তং সর্ব্বেষু ভূতেষু সমস্তিষ্ঠন্তং তানি বিশিনষ্টি বিনশ্যৎস্বিতি তঞ্চ পরমেশ্বরমবিনশ্যন্তং ইতি ভূতানাং পরমেশ্বরস্য চাত্যন্তবৈলক্ষণ্যপ্রদর্শনার্থঃ কথং সর্ব্বেষাং হি ভাববিকারাণাং জনিলক্ষণো ভাববিকারো মূলং জন্মোত্তরভাবিনোঽন্তে সর্ব্বে ভাববিকারা বিনাশান্তা বিনাশাৎ পরো ন কশ্চিদস্তি ভাববিকারঃ ভাবাভাবাৎ সতি হি ধর্ম্মিণি ধর্ম্মা ভবন্ত্যতোঽন্ত্যভাববিকারানুবাদেন পূর্ব্বভাবিনঃ সর্ব্বে ভাববিকারাঃ প্রতিষিদ্ধা ভবন্তি সহ কার্য্যৈঃ অস্মাৎ সর্ব্বভূতৈর্বৈলক্ষণ্যমত্যন্তমেব পরমেশ্বরস্য সিদ্ধং নির্ব্বিশেষত্বমেকত্বঞ্চ কথঞ্চ য এবং যথোক্তং পরমেশ্বরং পশ্যতি স পশ্যতি, নমু সর্ব্বোঽপি লোকঃ পশ্যতি কিং বিশেষেণেতি সত্যং পশ্যতি কিন্তু বিপরীতং পশ্যত্যতো বিশিনষ্টি সএব পশ্যতীতি যথা তিমিরদৃষ্টিরনেকং চন্দ্রং পশ্যতি তমপেক্ষ্যৈকচন্দ্রদর্শীবিশিষ্যতে সএব পশ্যতীতি তথৈবেহাপ্যেকমবিভক্তং যথোক্তমাত্মানং যঃ পশ্যতি স বিভক্তানেকাত্মবিপরীতদর্শিভ্যো বিশিষ্যতে সএব পশ্যতীতি ইতরে পশ্যন্তোঽপি ন পশ্যন্তি বিপরীতদর্শিত্বাদনেকচন্দ্রদর্শিবদিত্যর্থঃ ॥ ২৭ ॥

## গিরিকৃত টীকা।

কথমিতি। ভূতানাং সবিশেষত্বাদিভাবেঽপি পরস্য তদভাবাদত্যন্তবৈলক্ষণ্যমিতি বক্তুং জন্মনো ভাববিকারে সাদিত্বমাহ সর্ব্বেষামিতি। তত্র হেতুমাহ জন্মেতি। নহি জন্মান্তরেণোত্তরে বিকারা যুজ্যন্তে জন্মবতস্তদুপলম্ভাদিত্যর্থঃ। বিনাশানন্তরভাবিনোঽপি বিকারস্য কস্যচিদুপপত্তের্ন তস্যান্ত্যবিকারত্বমিত্যাশঙ্ক্যাহ বিনাশাদিতি। তস্যান্ত্যবিকারত্বে সিদ্ধে ফলিতমাহ অতইতি। তেষাং জন্মাদীনাং কার্য্যাণি কাদাচিৎকসত্বানি তদধিকরণানি তৈঃ সহেতি যাবৎ। পরমেশ্বরস্য ভূতেভ্যোঽত্যন্তবৈলক্ষণ্যমুক্তমুপসংহরতি তস্মাদিতি। নির্ব্বিশেষত্বং সর্ব্বভাববিকারবিরহিত্বং কূটস্থত্বমেকত্বমদ্বিতীয়ত্বং। যঃ পশ্যতীত্যাদি ব্যাচষ্টে যএবমিতি। উক্তবিশেষণমীশ্বরং পশ্যন্নেব পশ্যতীত্যুক্তমাক্ষিপতি নম্বিতি। ঈশ্বরপরাঙ্মুখস্যানাত্মনিষ্ঠস্য তদ্দর্শিত্বেঽপি বিপরীতদর্শিত্বাদীশ্বরপ্রবণস্যৈব সম্যগ্দর্শিত্বমিতি বিবক্ষিত্বা বিশেষণমিতি পরিহরতি সত্যমিতি। উক্তমেব দৃষ্টান্তেন বিবৃণোতি যথেত্যাদিনা। যঃ পশ্যতীত্যাদেরর্থমুপসংহরতি ইতর ইতি। পরবস্তুনিষ্ঠেভ্যো ব্যতিরিক্ত ইত্যর্থঃ ॥ ২৭ ॥

## শাঙ্করভাষ্যম্।

যথোক্তস্য সম্যগ্দর্শনস্য প্রবচনেন স্তুতিঃ কর্ত্তব্যেতি শ্লোক আরভ্যতে সমং পশ্যন্নিতি। সমং পশ্যন্নুপলভ্যমানো হি যস্মাৎ সর্ব্বত্র সর্ব্বভূতেষু সমবস্থিতং তুল্যতয়াবস্থিতমীশ্বরং অতীতানন্তরশ্লোকোক্তলক্ষণমিত্যর্থঃ সমং পশ্যন্ কিন্ন হিনস্তি হিংসাং ন করোতি আত্মনা স্বেনৈব স্বমাত্মানং ততস্তস্মাৎ অহিংসনাৎ যাতি পরাং প্রকৃষ্টাং গতিং মোক্ষাখ্যাং নন্বু নৈব কশ্চিৎ প্রাণী স্বয়ং স্বমাত্মানং হিনস্তি কথমুচ্যতেঽপ্রাপ্তং ন হিনস্তীতি যথা ন পৃথিব্যামগ্নিশ্চেতব্যো নান্তরিক্ষইত্যাদি নৈষ দোষ অজ্ঞানামাত্মতিরস্করণোপপত্তেঃ। সর্ব্বো হ্যজ্ঞোঽত্যন্তপ্রসিদ্ধং সাক্ষাদপরোক্ষাদাত্মানং তিরস্কৃত্যানাত্মানমাত্মত্বেন পবিগৃহ্য তমপি ধর্ম্মাধর্ম্মৈঃ কৃত্বোপাত্তমুপাত্তমাত্মনঃ হন্তীত্যাত্মহা সর্ব্বোঽজ্ঞো যস্তু পরমাত্মা অসাবপি সর্ব্বদাঽবিদ্যয়া হতইব বিদ্যমানফলাভাবাদিতি সর্ব্বে আত্মহনএবাবিদ্বাংসো যস্ত্বিতরো যথোক্তাত্মদর্শী স তু উভয়থাত্মনাত্মনং ন হিনস্তি ততো যাতি পরাঙ্গতিং যথোক্তং ফলং তস্য ভবতীত্যর্থঃ ॥২৮॥

## গিরিকৃত টীকা।

প্রকৃতসম্যগ্জ্ঞানেন কিমিত্যপেক্ষায়াং তৎফলোক্তি। তস্যৈব স্তুত্যা তদ্বেতৌ পুরুষং প্রবর্ত্তয়িতুং শ্লোকান্তরমিত্যাহ যথোক্তস্যেতি। যস্মাদিত্যস্য ততঃশব্দেন সম্বন্ধঃ। সর্ব্বভূতেষু তুল্যতয়া স্থিতং পূর্ব্বোক্তলক্ষণমীশ্বরং নির্ব্বিশেষং পশ্যন্নাত্মানমাত্মনা যস্মান্ন হিনস্তি ততস্তস্মান্মোক্ষাখ্যাং পরাং গতিং যাতি ইতি যোজনা, তত্র পাদত্রয়েণ জ্ঞানাদজ্ঞানধ্বস্ত্যাধ্বস্ত্যনর্থস্যোক্তাজ্ঞানমিথ্যাজ্ঞানয়োরাবরণয়োর্নাশে সর্ব্বোৎকৃষ্টাং গতিং পরমপুরুষার্থং পরমানন্দমনুভবতি বিদ্বানিতি চতুর্থপাদার্থঃ। ন হিনস্ত্যাত্মনাত্মানমিতি যথাশ্রুতমাদায় চোদয়তি নন্বিতি। নপৃথিব্যামিতি প্রাপ্তিদ্বারা নিষেধবন্নান্তরিক্ষে ন দিবীতি প্রাপ্ত্যভাবাচ্চ যন্নিষেধো মুখ্যো নেষ্যতে তথেহাপি প্রাপ্তিং বিনা নিষেধো ন যুক্তিমানিত্যাহ যথেতি। অজ্ঞানামাত্মনৈবাত্মহিংসাসম্ভবাদ্বিদুষাং তদ্ভাবোক্তির্যুক্তেতি সমাধত্তে নৈষ দোষইতি। সংগ্রহবাক্যং বিবৃণোতি সর্ব্বো হীতি। অনাত্মশব্দো দেহাদিবিষয়ঃ। অবিদুষামারোপিতাত্মহন্তৃত্বং নিগময়তি ইত্যাত্মহেতি। তথাপি পারমার্থিকস্যাত্মনো হননাভাবান্ন তেষাং সর্ব্বেষাং আত্মহন্তৃত্বমিত্যাশঙ্ক্যাহ যস্ত্বিতি। উক্তরীত্যা সর্ব্বেষামবিদুষামাত্মহ-

## স্বামিকৃত টীকা।

কৃত ইত্যত আহ সমং পশ্যন্নিতি। সর্ব্বত্র ভূতমাত্রে সমং সম্যগ্ প্রচ্যুতস্বরূপেণাবস্থিতং পরমাত্মানং পশ্যন্ হি যস্মাদাত্মনা স্বেনৈবাত্মানং ন হিনস্তি অবিদ্যয়া সচ্চিদানন্দস্বরূপমাত্মানং তিরস্কৃত্য ন বিনাশয়তি ততশ্চ পরাং গতিং মোক্ষং প্রাপ্নোতি, যস্ত্বেবং ন পশ্যতি স হি দেহাত্মদর্শী দেহেন সহাত্মানং হিনস্তি, তথা চ শ্রুতিঃ, অসুর্য্যানাম তে লোকাঅন্ধেন তমসাবৃতাঃ। তাংস্তে প্রেত্যাভিগচ্ছন্তি যে কে চাত্মহনোজনাইতি ॥ ২৮ ॥

প্রকৃত্যৈব চ কর্ম্মাণি ক্রিয়মাণানি সর্ব্বশঃ।
যঃ পশ্যতি তথাত্মানমকর্ত্তারং স পশ্যতি ॥ ২৯ ॥

## শাঙ্করভাষ্যম্।

সর্ব্বভূতস্থমীশং সমম্পশ্যন্ন হিনস্ত্যাত্মনাত্মানমিত্যুক্তং তদনুপপন্নং স্বগুণকর্ম্মবৈলক্ষণ্যভেদভিন্নেষাত্মসু ইত্যেতদাশঙ্ক্যাহ প্রকৃত্যৈবেতি। প্রকৃত্যা প্রকৃতির্ভগবতো মায়া ত্রিগুণাত্মিকা, মায়ান্ত প্রকৃতিং বিদ্যাদিতি মন্ত্রবর্ণাত্তয়া প্রকৃত্যৈব চ নান্যেন মহদাদিকার্য্যকারণাকারপরিণতয়া তান্যেব কর্ম্মাণি বাঙ্মনসকায়ারভ্যাণি ক্রিয়মাণানি নির্ব্বর্ত্ত্যমানানি সর্ব্বশঃ সর্ব্বপ্রকারৈর্যঃ পশ্যত্যুপলভতে তথাত্মানং ক্ষেত্রজ্ঞমকর্ত্তারং সর্ব্বোপাধিবিবর্জ্জিতং পশ্যতি স পরমার্থদর্শীত্যভিপ্রায়ঃ নির্গুণস্যাকর্ত্তনির্ব্বিশেষস্যাকাশস্যেব ভেদে প্রমাণানুপপত্তিরিত্যর্থঃ ॥ ২৯ ॥

## গিরিকৃত টীকা।

তত্ত্বং লিঙ্গং ইত্যুপসংহরতি সর্ব্বইতি। আত্মনৈবাত্মহননমবিদুষাং দৃষ্টং তদিহ বিদ্বদ্বিষয়ে শক্যং নিষেদ্ধুমিত্যাহ যস্তিতরইতি। উভয়থাপীত্যারোপানারোপাভ্যামিত্যর্থঃ। জ্ঞানাদনর্থভ্রমভ্রংশে পূর্ব্বোক্তপরমানন্দপ্রাপ্ত্যা পরিতৃপ্তত্বং যুক্তমিত্যাহ ততইতি ॥ ২৯ ॥

শ্লোকান্তরং শঙ্কোত্তরত্বেনাবতারয়িতুমনুবদতি সর্ব্বেতি। প্রতিদেহং ধর্ম্মাধর্ম্মাদিমত্ত্বেনাত্মনো ভেদভানান্ন সম্যগ্দর্শনমিতি শঙ্কতে তদিতি। স্বগুণৈঃ সুখদুঃখাদিভিঃ স্বকর্ম্মভিশ্চ ধর্ম্মাধর্ম্মাখ্যৈর্বৈলক্ষণ্যাৎ প্রতিদেহং ভেদে তদ্বিশিষ্টেষাত্মসু কথং সাম্যেন দর্শনমিত্যেতদাশঙ্ক্য পরিহরতীত্যাহ এতদিতি প্রকৃতশব্দস্য স্বভাববাচিত্বং ব্যাবর্ত্তয়তি প্রকৃতিরিতি। মায়াশব্দস্য সম্বিৎপর্য্যায়ত্বং প্রত্যাহ ত্রিগুণেতি। উক্তা পরস্য শক্তির্মায়েত্যত্র শ্রুতিসংমতিমাহ মায়ান্ত্বিতি। অন্যেন কেনচিৎ ক্রিয়মাণানি ন ভবন্তি কর্ম্মাণীত্যেবকারার্থমাহ নান্যেনেতি। কিন্তদন্যন্নিষেধ্যমিত্যুক্তে সাংখ্যাভিপ্রেতো প্রধানাখ্যা প্রকৃতিরিত্যাহ মহদাদীতি। সর্ব্বপ্রকারত্বং কাম্যত্বনিষিদ্ধত্বাদিনা প্রকারবাহুল্যমাত্মানমুক্তবিশেষণং যঃ পশ্যতীতি পূর্ব্বেণ সম্বন্ধঃ। স পশ্যতীত্যযুক্তং পুনরুক্তেরিত্যাশঙ্ক্যাহ স পরমার্থেতি। আত্মনাং প্রতিদেহং ভিন্নত্বে তেষু সমদর্শনমযুক্তমিত্যুক্তস্য কঃ সমাধিরিত্যাশঙ্ক্যাহ নির্গুণস্যেতি ॥ ২৯ ॥

## স্বামিকৃত টীকা।

নমু শুভাশুভকর্ম্মকর্তৃত্বেন বৈষম্যে দৃশ্যমানে কথমাত্মনঃ সমত্বমিত্যাশঙ্ক্যাহ প্রকৃত্যৈবেতি। প্রকৃত্যৈব দেহেন্দ্রিয়াকারেণ পরিণতয়া সর্ব্বশঃ সর্ব্বৈ প্রকারৈঃ ক্রিয়মাণানি কর্ম্মাণি যঃ পশ্যতি তথাত্মানঞ্চাকর্ত্তারং দেহাভিমানেনৈবাত্মনঃ কর্তৃত্বং ন স্বতইত্যেবং যঃ পশ্যতি সএব সম্যক্ পশ্যতি নান্য ইত্যর্থঃ ॥ ২৯ ॥

যদা ভূতপৃথগ্‌ভাবমেকস্থমনুপশ্যতি।
অতএব চ বিস্তারং ব্রহ্ম সম্পদ্যতে তদা ॥ ৩০ ॥

## শাঙ্করভাষ্যম্।

পুনরপি তদেব সম্যগ্‌দর্শনং শব্দান্তরেণ প্রপঞ্চ্যতে যদেতি। যদা যস্মিন্‌কালে ভূতপৃথগ্‌ভাবং ভূতানাং পৃথগ্‌ভাবং পৃথক্ত্বমেকস্থমেকস্মিন্নাত্মনি স্থিতমেকস্থমনুপশ্যতি শাস্ত্রাচার্য্যোপদেশতো মত্বাত্মানং প্রত্যক্ষত্বেন পশ্যত্যাত্মৈব ইদং সর্ব্বমিতি অতএব চ তস্মাদেব চ বিস্তারমুৎপত্তিমনুপশ্যতি আত্মনঃ প্রাণআত্মন আশা আত্মনঃ স্বর আত্মন আকাশ আত্মনস্তেজ আত্মনঃ আপ আত্মন আবির্ভাবতিরোভাবৌ আত্মনোভূরাত্মনোঽন্নমিত্যেবমাদিপ্রকারৈর্ব্বিস্তারং যদা পশ্যতি তদা ব্রহ্মসংপদ্যতে ব্রহ্মৈব ভবতি তদা তস্মিন্‌কালে ইত্যর্থঃ ॥৩০॥

## গিরিকৃত টীকা।

প্রকৃতের্ব্বিকারাণাঞ্চ সাংখ্যবৎ পুরুষাদন্যত্বপ্রসক্তৌ প্রত্যাহ পুনরপীতি। উপদেশজনিতং প্রত্যক্ষদর্শনমনুবদতি আত্মৈবেতি। ভূতানাং বিকারাণাং নানাত্বং প্রকৃত্যা সহাত্মমাত্রয়া প্রলীনং পশ্যতি নহি ভূতপৃথক্ত্বং সত্যাং প্রকৃতৌ কেবলে পরস্মিন্বিলাপয়িতুং শক্যতইত্যর্থঃ। পরিপূর্ণাদাত্মনএব প্রকৃত্যাদের্ব্বিশেষান্তস্য স্বরূপালাভাদুপলভ্য তন্মাত্রতাং পশ্যতীত্যাহ অতএবেতি। উক্তমেব বিস্তারং শ্রুত্যবষ্টম্ভেন স্পষ্টয়তি আত্মইতি। ব্রহ্মসংপত্তির্নাম পূর্ণত্বেনাভিব্যক্তিরপূর্ণত্বহেতোঃ সর্ব্বস্যাত্মসাৎকৃতত্বাদিত্যাহ ব্রহ্মৈবেতি জ্ঞানসমানকালে মুক্তিরিতি সূচয়তি তদেতি ॥ ৩০ ॥

পরিপূর্ণত্বেন সর্ব্বাত্মত্বে প্রাপ্তমাত্মনোদেহাদিগতেন কর্তৃত্বাদিনা তদ্বত্বং দৃষ্টং হি পবিত্রস্যাপি পঞ্চগব্যাদেরপবিত্রসংসর্গাৎ তদ্দোষেণ দুষ্টত্বমিত্যাশঙ্কামনূদ্যোত্তরত্বেন শ্লোকমবতারয়তি একস্যেতি। অনাদিত্বমেব সাধয়তি আদিরিতি। তথাপি কিং স্যাদিত্যাশঙ্ক্য কার্য্যত্বকৃতব্যয়াভাবঃ সিধ্যতীত্যাহ যদ্ধীতি। তথাপি গুণাপকর্ষদ্বারকো ব্যয়ো ভবিষ্যতি নেত্যাহ তথেতি। নিরবয়বত্বাদেব অবয়বদ্বারকস্য নির্গুণত্বাদ্‌গুণদ্বারকস্য ব্যয়স্যাভাবেঽপি স্বভাবতো ব্যয়ঃ স্যাদিত্যাশঙ্ক্যাহ পরমাত্মেতি। পরমাত্মনঃ স্বতঃ পরতোবা ব্যয়াভাবে ফলিতমাহ যতইতি। স্বমহিম্নি প্রতিষ্ঠস্য কথং শরীরস্থিতত্বং তত্রাহ শরীরেস্থিতি।

## স্বামিকৃত টীকা।

ইদানীং ভূতানামপি প্রকৃতিতাবন্মাত্রত্বেনাভেদাদ্ভূতভেদকৃতমপ্যাত্মনো ভেদমপশ্যন্ ব্রহ্মত্বমুপৈতীত্যাহ যদেতি। যদা ভূতানাং স্থাবরজঙ্গমানাং পৃথগ্‌ভাবং ভেদংএকস্থং একস্যামেবেশ্বরশক্তিরূপায়াং প্রকৃতৌ প্রলয়ে স্থিতমনুপশ্যতি আলোচয়তি অতএব তস্যাএব প্রকৃতেঃ সকাশাদ্ভূতানাং বিস্তরং সৃষ্টিসময়ে অনুপশ্যতি তদা প্রকৃতিতাবন্মাত্রত্বেন ভূতানামপ্যভেদং পশ্যন্ পরিপূর্ণং ব্রহ্ম সংপদ্যতে ব্রহ্মৈব ভবতীত্যর্থঃ ॥ ৩০ ॥

অনাদিত্বান্নির্গুণত্বাৎ পরমাত্মায়মব্যয়ঃ।
শরীরস্থোঽপি কৌন্তেয় ন করোতি ন লিপ্যতে ॥ ৩১ ॥

## শাঙ্করভাষ্যম্।

একস্যাত্মনঃ সর্ব্বদেহাত্মত্বে তদ্দোষসম্বন্ধে প্রাপ্তইদমুচ্যতে অনাদীতি। অনাদিত্বাদনাদের্ভাবোঽনাদিত্বমাদিঃ কারণং তদ্‌যস্য নাস্তি তদনাদি যদ্ধ্যাদিমৎ স্বেনাত্মনা ব্যেত্যয়স্ত্বনাদিত্বান্নিরবয়বইতি কৃত্বা ন ব্যেতি তথা নির্গুণত্বাৎ সগুণোহি গুণব্যয়াদ্বেত্যয়ন্তু নির্গুণত্বাচ্চ ন ব্যেতীতি পরমাত্মায়মব্যয়ো নাস্য ব্যয়োবিদ্যতইত্যব্যয়ো যতএবমতঃ শরীরস্থোঽপি শরীরেষ্বাত্মনউপলব্ধির্ভবতীতি শরীরস্থউচ্যতে তথাপি ন করোতি তদকরণাদেব তৎফলেন ন লিপ্যতে যোহি কর্ত্তা স কর্ম্মফলেন লিপ্যতে অয়ন্ত্বকর্ত্তা অতো ন ফলেন লিপ্যতইত্যর্থঃ কঃ পুনর্দ্দেহেষু করোতি লিপ্যতে চ যদি তাবদন্যঃ পরমাত্মনো দেহী করোতি লিপ্যতে চ ততইদমনুপপন্নমুক্তং ক্ষেত্রজ্ঞেশ্বরৈকত্বং ক্ষেত্রজ্ঞঞ্চাপি মাম্বিদ্ধীত্যাদ্যথ নাস্তীশ্বরাদন্যোদেহী কঃ করোতি লিপ্যতে চেতি বাচ্যং পরো বা নাস্তীতি সর্ব্বথা দুর্ব্বিজ্ঞেয়ং দুর্ব্বোধ্যঞ্চেতি ভগবৎপ্রোক্তমৌপনিষদং দর্শনং পরিত্যক্তং বৈশেষিকৈঃ সাংখ্যার্হতবৌদ্ধৈশ্চ তত্রায়ং পরিহারো ভগবতা স্বেনৈবোক্তঃ স্বভাবস্তু প্রবর্ত্ততইত্যবিদ্যামাত্রস্বভাবো হি করোতি লিপ্যতইতি ব্যবহারো ভবতি ন তু পরমার্থতএকস্মিন্ পরমাত্মনি তদস্ত্যতএকস্মিন্ পরমার্থসাংখ্যদর্শনে স্থিতানাং জ্ঞাননিষ্ঠানাং পরমহংসপরিব্রাজকানাং তিরস্কৃতাবিদ্যাব্যবহারাণাং কর্ম্মাধিকারো নাস্তীতি তত্র তত্র দর্শিতং ভগবতা ॥ ৩১ ॥

## গিরিকৃত টীকা।

সর্ব্বগতত্বেন সর্ব্বাত্মত্বেন চ দেহাদৌ স্থিতোঽপি স্বতো দেহাদ্যাত্মনা বা ন করোতি কূটস্থত্বাদ্দেহাদেশ্চ কল্পিতত্বাদিত্যর্থঃ। কর্ত্তৃত্বাভাবেঽপি ভোক্তৃত্বং স্যাদিত্যাশঙ্ক্যাহ তদকরণাদিতি তদেবোপপাদয়তি যো হীতি। পরস্য কর্ত্তৃত্বাদেরভাবে কস্য তদিষ্টমিতি পৃচ্ছতি কঃ পুনরিতি। পরস্মাদন্যস্য কস্যচিজ্জীবস্য কর্ত্তৃত্বাদীত্যাশঙ্কামনুবদতি যদীতি ততইতি। ঈশ্বরাতিরিক্তজীবানঙ্গীকারাদ্নোপক্রমবিরোধোঽস্তীতি শঙ্কতে অথেতি। তর্হি প্রতীতকর্ত্তৃত্বাদেরধিকরণং বক্তব্যমিতি পূর্ব্ববাদ্যাহ কইতি। পরস্যৈব কর্ত্তৃত্বাদ্যাধারত্বান্নাস্তি বক্তব্যমিত্যাশঙ্ক্যাহ পরো বেতি। নাস্তীতি বাচ্যমিতি পূর্ব্বেণ সম্বন্ধঃ নহি কর্ত্তৃত্বাদিভাক্তে

## স্বামিকৃত টীকা।

তথাপি সংসারাবস্থায়াং দেহসম্বন্ধনিমিত্তৈঃ কর্ম্মভিস্তৎফলৈশ্চ সুখদুঃখাদিভির্বৈষম্যং দুষ্পরিহরেতি কুতঃ সমদর্শনং তত্রাহ অনাদিত্বাদিতি। যদুৎপত্তিমৎ তদেব হি সাদি যচ্চ গুণবত্তস্ত তস্য গুণনাশে ব্যয়ো ভবতি অয়ং তু পরমাত্মা অনাদির্নির্গুণশ্চ অতোঽব্যয়ঃ অবিকারীত্যর্থঃ, তস্মাৎশরীরে স্থিতোঽপি ন কিঞ্চিৎ করোতি ন চ কর্ম্মফলৈর্লিপ্যতে ॥ ৩১ ॥

যথা সর্ব্বগতং সৌক্ষ্ম্যাদাকাশো নোপলিপ্যতে।
সর্ব্বত্রাবস্থিতো দেহে তথাত্মা নোপলিপ্যতে॥ ৩২॥
যথা প্রকাশয়ত্যেকঃ কৃৎস্নং লোকমিমং রবিঃ।
ক্ষেত্রং ক্ষেত্রী তথা কৃৎস্নং প্রকাশয়তি ভারত॥ ৩৩॥

## শাঙ্করভাষ্যম্।

কিমিব ন করোতি নলিপ্যতইত্যত্র দৃষ্টান্তমাহ যথা সর্ব্বগতমিতি। যথা সর্ব্বগতং সর্ব্বব্যাপ্যপি সৎ সৌক্ষ্ম্যাৎ সূক্ষ্মভাবাদাকাশং খং নোপলিপ্যতে ন সম্বধ্যতে, সর্ব্বত্র অবস্থিতো দেহে তথাত্মা নোপলিপ্যতে॥ ৩২॥

কিঞ্চ যথা প্রকাশয়তীতি। যথা প্রকাশয়ত্যবভাসয়ত্যেকঃ কৃৎস্নং লোকমিমং রবিঃ সবিতাদিত্যঃ তথাতদ্বন্মহাভূতাদিধৃত্যন্তং ক্ষেত্রমেকঃ সন্ প্রকাশয়তি কঃ ক্ষেত্রী পরমাত্মেত্যর্থঃ রবিদৃষ্টান্তোঽত্রাত্মন উভয়ার্থোঽপি ভবতি রবিবৎ সর্ব্বক্ষেত্রেষেকঃ আত্মা অলেপকশ্চেতি॥ ৩৩॥

## গিরিকৃত টীকা।

পরস্যাস্মদাদিবদীশ্বরত্বমিতিভাবঃ। পরস্যান্যস্য বা কর্ত্তৃত্বাদাববিশিষ্টে শরীরস্থোঽপীত্যাদিশ্রুতিমূলমপি জ্ঞাতুং বক্তুঞ্চাশক্যত্বাৎ ত্যাজ্যমেবেতি পরীক্ষকসংমত্যোপসংহরতি সর্ব্বথেতি। পরস্য বস্তুতোঽকর্ত্তুরভোক্তুশ্চাবিদ্যয়া উদারোপাদেয়মেব ভগবন্মতমিতি পরিহরতি তত্রেতি। তমেব পরিহারং প্রপঞ্চয়তি অবিদ্যেতি। ব্যবহারিকে কর্ত্তৃত্বাদাববিশিষ্টপারমার্থিকমেব কিন্নেষ্যতে তত্রাহ ন ত্বিতি। বাস্তবকর্ত্তৃত্বাদ্যভাবে লিঙ্গমুপন্যস্যতি অতইতি॥ ৩১॥

সূক্ষ্মভাবাদপ্রতিহতস্বভাবত্বাদিত্যর্থঃ, ন সম্বধ্যতে পঙ্কাদিভিরিতি শেষঃ॥ ৩২॥

ন করোতি নলিপ্যতে চেত্যত্র দ্রষ্টৃত্বেন দৃশ্যধর্ম্মশূন্যত্বং হেতুমাহ কিঞ্চেতি। দৃষ্টান্তেন বিবক্ষিতমর্থন্দর্শয়তি রবীতি। উভয়বিধধর্ম্মার্থমেব স্ফুটয়তি রবিবদিতি॥ ৩৩॥

## স্বামিকৃত টীকা।

তত্র হেতুং সদৃষ্টান্তমাহ যথেতি। যথা সর্ব্বগতং পঙ্কাদিষ্বপি স্থিতমাকাশং সৌক্ষ্ম্যাদসঙ্গত্বাৎ পঙ্কাদিভির্নোপলিপ্যতে তথা সর্ব্বত্র উত্তমে অধমে বা দেহে স্থিতোঽপ্যাত্মা নোপলিপ্যতে দৈহিকৈর্দোষগুণৈর্ন যুজ্যতইত্যর্থঃ॥ ৩২॥

অসঙ্গত্বাল্লেপো নাস্তীত্যাকাশদৃষ্টান্তেন দর্শিতং প্রকাশকত্বাচ্চ প্রকাশ্যধর্ম্মৈর্ন যুজ্যতইতি রবিদৃষ্টান্তেনাহ যথা প্রকাশয়তীতি। স্পষ্টোঽর্থঃ॥ ৩৩॥

ক্ষেত্রক্ষেত্রজ্ঞয়োরেবমন্তরং জ্ঞানচক্ষুষা।

ভূতপ্রকৃতিমোক্ষঞ্চ যে বিদুর্যান্তি তে পরম্ ॥ ৩৪ ॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং
যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসংবাদে
প্রকৃতিপুরুষবিবেকযোগো
নাম ত্রয়োদশোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

সমস্তাধ্যায়ার্থোপসংহারার্থোঽয়ং শ্লোকঃ ক্ষেত্রক্ষেত্রজ্ঞযোবিতি। ক্ষেত্রক্ষেত্রজ্ঞয়োর্যথা ব্যাখ্যাতয়োরেবং যথাপ্রদর্শিতপ্রকারেণ অন্তরমিতরেতরবৈলক্ষণ্যবিশেষং জ্ঞানচক্ষুষা শাস্ত্রাচার্য্যোপদেশজনিতমাত্মপ্রত্যায়কং জ্ঞানং চক্ষুস্তেন জ্ঞানচক্ষুষা ভূতপ্রকৃতিমোক্ষঞ্চ ভূতানাং প্রকৃতিরবিদ্যালক্ষণাব্যক্তাখ্যা তস্যা ভূতপ্রকৃতের্ম্মোক্ষণমভাবগমনঞ্চ যে বিদুর্ব্বিজানন্তি যান্তি গচ্ছন্তি তে পরং পরমার্থতত্ত্বং ব্রহ্ম ন পুনর্দ্দেহমাদদতি ইত্যর্থঃ ॥ ৩৪ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে ত্রয়োদশোঽধ্যাযঃ।

## গিরিকৃত টীকা।

অধ্যায়ার্থং সফলমুপসংহরতি সমস্তেতি। বিশেষকৌটস্থ্যপবিণামাদিলক্ষণস্তদেবমমানিত্বাদিনিষ্ঠতয়া ক্ষেত্রক্ষেত্রজ্ঞযথাত্ম্যবিজ্ঞানবতঃ সর্ব্বানর্থনিবৃত্ত্যা পরিপূর্ণপরমানন্দাবির্ভাবলক্ষণপুরুষার্থসিদ্ধিবিতিসিদ্ধং ॥ ৩৪ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং ত্রয়োদশোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

অধ্যায়ার্থমুপসংহরতি ক্ষেত্রক্ষেত্রজ্ঞয়োরিতি। এবমুক্তপ্রকারেণ ক্ষেত্রক্ষেত্রজ্ঞয়োরন্তরং ভেদং বিবেকজ্ঞানলক্ষণেন চক্ষুষা যে বিদুঃ তথা যেযমুক্তা ভূতানাং প্রকৃতিস্তস্যাঃ সকাশাৎ মোক্ষং মোক্ষোপায়ং ধ্যানাদিকঞ্চ যে বিদুস্তে পরং পদং যান্তি।

বিবিক্তৌ যেন তত্ত্বেন মিশ্রৌ প্রকৃতিপুরুষৌ।
তং বন্দে পরমানন্দং নন্দনন্দনমীশ্বরং ॥ ৩৪ ॥

ইতি শ্রীশ্রীধরস্বামীকৃতটীকায়াং ত্রয়োদশোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## চতুর্দ্দশোঽধ্যায়ঃ।

শ্রীভগবানুবাচ—পরং ভূয়ঃ প্রবক্ষ্যামি জ্ঞানানাং জ্ঞানমুত্তমম্।
যজ্জ্ঞাত্বা মুনয়ঃ সর্ব্বে পরাং সিদ্ধিমিতো গতাঃ ॥ ১ ॥

---

### শাঙ্করভাষ্যম্।

সর্ব্বমুৎপদ্যমানং ক্ষেত্রক্ষেত্রজ্ঞসংযোগাদুৎপদ্যতইতি উক্তং তৎ কথমিতি তৎপ্রদর্শনার্থং পরং ভূয়ইত্যাদিরধ্যায় আরভ্যতে অথবা ঈশ্বরপরতন্ত্রয়োঃ ক্ষেত্রক্ষেত্রজ্ঞয়োর্জ্জগৎকারণত্বং ন তু সাংখ্যানামিব স্বতন্ত্রয়োবিত্যেবমর্থং প্রকৃতিস্থত্বং গুণেষু চ সংগঃ সংসারকারণমিত্যুক্তং কস্মিন্ গুণে কথং সংগঃ কে বা গুণাঃ কথং বা বধ্নন্তীতি গুণেভ্যশ্চ মোক্ষণং কথং স্যাৎ মুক্তস্য চ লক্ষণং বক্তব্যমিত্যেবমর্থঞ্চ শ্রীভগবানুবাচ পবমিতি। পরং জ্ঞানমিতি ব্যবহিতেন সম্বন্ধঃ ভূয়ঃ পুনঃ পূর্ব্বেষু সর্ব্বেষু অধ্যায়েষু অসকৃদুক্তমপি প্রবক্ষ্যামি তচ্চ পরং

### গিরিকৃত টীকা।

ক্ষেত্রক্ষেত্রজ্ঞসংযোগস্য সর্ব্বোৎপত্তিনিমিত্তত্বমজ্ঞাতং জ্ঞাপয়িতুমধ্যায়ান্তরমবতারয়ন্নাধ্যায়য়োরুত্থাপ্যোত্থাপকত্বরূপাং সংগতিমাহ সর্ব্বমিতি। বিধান্তরেণাধ্যায়ারাম্ভং সূচয়তি অথবেতি। তদেব বক্তুমুক্তমনুবদতি ঈশ্বরেতি। প্রকৃতিস্থত্বং পুরুষস্য প্রকৃত্যাসহৈক্যাধ্যাসঃ তস্যৈব গুণেষু সঙ্গোঽভিনিবেশঃ। ষড্বিধামাকাংক্ষাংনিক্ষিপ্য তদুত্তরত্বেনাধ্যায়ারম্ভে পূর্ব্ববদেব পূর্ব্বাধ্যায়সম্বন্ধসিদ্ধিরিত্যাহ কস্মিন্নিতি। পূর্ব্বোক্তেনার্থেনাস্যাধ্যায়স্য সমুচ্চয়ার্থশ্চকারঃ। পরিমিত্যস্য ভাবিকালার্থত্বং ব্যাবর্ত্তয়িতুং সঙ্গতিমাহ পরমিতি। ভূয়শব্দস্যাধিকার্থত্বমিহ নাস্তীত্যাহ পুনরিতি। পুনঃশব্দার্থমেব বিবৃণোতি পূর্ব্বেষ্বিতি। পুনরুক্তিস্তর্হীত্যাশঙ্ক্য সূক্ষ্মত্বেন দুর্ব্বোধত্বাৎ পুনর্ব্বচনমর্থবদিত্যাহ তচ্চেতি। বিশেষ্যং প্রশ্নদ্বারা নির্দিশতি কিন্তদিতি। নির্দ্ধারণার্থং ষষ্ঠীমাদায় সত্যপ্রকর্ষং দর্শয়তি সর্ব্বেষা-

### স্বামিকৃত টীকা।

পুংপ্রকৃত্যোঃ স্বতন্ত্রত্বং বারয়ন্ গুণসঙ্গতঃ। প্রাহ সংসারবৈচিত্র্যং বিস্তরেণ চতুর্দ্দশে। যাবৎ সংজায়তে কিঞ্চিৎ সত্বং স্থাবরজঙ্গমং। ক্ষেত্রক্ষেত্রজ্ঞসংযোগাত্তদ্বিদ্ধীত্যুক্তং স চ ক্ষেত্রক্ষেত্রজ্ঞয়োঃ সংযোগোনিরীশ্বরসাংখ্যানামিব ন স্বাতন্ত্র্যেণ কিন্তীশ্বরেচ্ছয়ৈবেতিকথনপূর্ব্বকং কারণং গুণসংগোঽস্য সদসদ্যোনিজন্মস্বিত্যনেনোক্তং সত্বাদিগুণকৃতং সংসারবৈচিত্রং প্রপ-

ইদং জ্ঞানমুপাশ্রিত্য মম সাধর্ম্ম্যমাগতঃ।
সর্গেঽপি নোপজায়ন্তে প্রলয়ে ন ব্যথন্তি চ ॥ ২ ॥

---

## শাঙ্করভাষ্যম্।

পববস্তুবিষয়ত্বাৎ কিং তৎ জ্ঞানং সর্ব্বেষাং জ্ঞানানামুত্তমং উত্তমফলত্বাৎ জ্ঞানানামিতি নামানি ত্বাদীনাং কিং তর্হি যজ্ঞাদিজ্ঞেয়বস্তুদিষয়াণাং ইতি তানি ন মোক্ষায়েদন্তু মোক্ষায়েতি পরোত্তমশব্দাভ্যাং স্তৌতি শ্রোতৃবুদ্ধিরুচ্যুৎপাদনার্থং যৎ জ্ঞাত্বা যৎ জ্ঞানং জ্ঞাত্বা প্রাপ্য মুনয়ঃ সন্ন্যাসিনো মননশীলাঃ সর্ব্বে পরাং সিদ্ধিং মোক্ষাখ্যাং ইতোঽস্মাদ্দেহবন্ধনাদূর্দ্ধং গতাঃ প্রাপ্তাঃ ॥ ১ ॥

তস্যাশ্চ সিদ্ধেরৈকান্তিকত্বং দর্শয়তি ইদমিতি। ইদং জ্ঞানং যথোক্তমুপাশ্রিত্য জ্ঞানং সাধনমনুষ্ঠায়েত্যেতন্মম পবমেশ্বরস্য সাধর্ম্ম্যং মৎস্বরূপতামাগতাঃ প্রাপ্তাইত্যর্থো ন তু সমানধর্ম্মতাং সাধর্ম্ম্যং ক্ষেত্রজ্ঞেশ্বরযোর্ভেদানভ্যুপগমাৎ গীতাশাস্ত্রে ফলবাদশ্চায়ং স্তুত্যর্থমুচ্যতে

---

## গিরিকৃত টীকা।

মিতি। পুরমুত্তমমিতি পনরুক্তিমাশঙ্ক্য বিফলভেদাম্নৈবমিত্যাহ উত্তমেতি। জ্ঞানং জ্ঞেয়মিত্যাদৌ জ্ঞানশব্দেনামানিত্বাদীনামুক্তত্বাত্তন্মধ্যে চ জ্ঞানস্য জ্ঞানানামিতি সাধ্যত্বেন উত্তমত্বান্ন তস্য তস্য বক্তব্যতেত্যাশঙ্ক্যাহ জ্ঞানানামিতি। নামানিত্বাদীনাং গ্রহণমিতিশেষঃ, ইতিশব্দাদূর্দ্ধং পূর্ব্ববদেব শেষোদ্রষ্টব্যঃ। যথোক্তজ্ঞানাপেক্ষয়া কৃতস্তজ্জ্ঞানস্য প্রকর্ষস্তত্রাহ তানীতি। স্তুতিফলমাহ শ্রোতৃবুদ্ধীতি জ্ঞানং জ্ঞাত্বা জ্ঞানস্য জ্ঞেয়ত্বোপগমাদনবস্থেত্যাশঙ্ক্যাহ প্রাপ্যেতি। মুনিশব্দস্য চতুর্থাশ্রমবিষয়ত্বে তন্মাত্রাদেব জ্ঞানাযোগাৎ কুতস্তেষাং মুক্তিরিত্যাশঙ্ক্যাহ মননেতি। সিদ্ধে র্জ্ঞানত্বং পরামিতি বিশেষাদ্ব্যাবর্ত্ত্য মুক্তিত্বমাহ মোক্ষাখ্যামিতি। দেহাখ্যস্য বন্ধনস্যাধ্যক্ষ ত্বমাহ অস্মাদিতি ॥ ১ ॥

জ্ঞানফলস্য কর্ম্মফলবৈলক্ষণ্যমাহ তস্যাশ্চেতি। কথং জ্ঞানাশ্রয়ণং তদ্ধেতুশ্রবণাদিসম্পত্তিদ্বারেত্যাহ জ্ঞানেতি। সাধর্ম্ম্যে গোগবয়য়োরিব বিম্বদীশ্বরয়োরপি ভেদঃ

## স্বামিকৃত টীকা।

ঋয়িষ্যন্নেবংভূতং বক্ষ্যমাণমর্থং স্তৌতি পরং ভূয়ইতি দ্বাভ্যাং। পরং পরমাত্মনিষ্ঠং জ্ঞায়তেঽনেনেতি জ্ঞানমুপদেশং ভূয়োঽপি তুভ্যং প্রকর্ষেণ বক্ষ্যামি। কথংভূতং জ্ঞানানাং তপঃকর্ম্মাদিবিষয়াণাং মধ্যে উত্তমং মোক্ষহেতুত্বাৎ। তদেবাহ যজ্জ্ঞাত্বা মুনয়ো মননশীলাঃ সর্ব্বে ইতো দেহবন্ধনাৎ পরাং সিদ্ধিং মোক্ষং প্রাপ্তাঃ ॥ ১ ॥

কিঞ্চ ইদমিতি। ইদং বক্ষ্যমাণং জ্ঞানমুপাশ্রিত্য জ্ঞানসাধনমনুষ্ঠায় মম সাধর্ম্ম্যং মদ্রূপত্বং প্রাপ্তাঃ সন্তঃ সর্গেঽপি ব্রহ্মাদিষূৎপদ্যমানেষ্বপি নোৎপদ্যন্তে তথা প্রলয়েঽপি ন ব্যথন্তি প্রলয়দুঃখং নানুভবন্তি পুনর্ন বর্ত্তন্তইত্যর্থঃ ॥ ২ ॥

মম যোনির্মহদ্ব্রহ্ম তস্মিন্ গর্ভং দধাম্যহম্।
সম্ভবঃ সর্ব্বভূতানাং ততো ভবতি ভারত ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

সর্গেঽপি সৃষ্টিকালেঽপি নোপজায়ন্তে নোৎপদ্যন্তে প্রলয়ে ব্রহ্মণোঽপি বিনাশকালে ন ব্যথন্তি চ ব্যথাং নাপদ্যন্তে ন চ্যবন্তীত্যর্থঃ ॥ ২ ॥

ক্ষেত্রক্ষেত্রজ্ঞসংযোগ ঈদৃশো ভূতকারণমিত্যাহ মমেতি। মম স্বভূতা মদীয়া মায়া ত্রিগুণাত্মিকা প্রকৃতির্যোনিঃ সর্ব্বভূতানাং সর্ব্বকার্য্যেভ্যোমহত্বাৎ ভরণাচ্চ স্ববিকারাণাং মহদ্ব্রহ্মেতি যোনিরেব বিশিষ্যতে তস্মিন্ মহতি ব্রহ্মণি যোনৌ গর্ভং হিরণ্যগর্ভস্য জন্মনো বীজং সর্ব্বভূতজন্মকারণং বীজং দধামি নিক্ষিপামি ক্ষেত্রক্ষেত্রজ্ঞপ্রকৃতিদ্বয়শক্তিমানীশ্বরোঽহমবিদ্যাকামকর্ম্মোপাধিস্বরূপানুবিধায়িনং ক্ষেত্রজ্ঞং ক্ষেত্রেণ সংযোজয়ামীত্যর্থঃ সম্ভবউৎপত্তিঃ সর্ব্বভূতানাং হিরণ্যগর্ভোৎপত্তিদ্বারেণ ততস্তস্মাৎ যোনের্মূলকারণাদ্গর্ভাধানাৎ ভবতি ॥ ৩ ॥

## গিরিকৃত টীকা।

স্যাদিত্যাশঙ্ক্যাহ মৎস্বরূপতামিতি। সাধর্ম্মস্য মুখ্যত্বে ভেদধ্রৌব্যাদ্গীতাশাস্ত্রবিরোধঃ স্যাদিত্যাহ ন ত্বিতি। জ্ঞানস্তুতয়ে তৎফলস্য বিবক্ষিতত্বাচ্চ নাত্র সারূপ্যমিষ্টমিত্যাহ ফলেতি। সারূপ্যে ধীফলং হিত্বা ধ্যানফলমপ্রস্তুতং প্রসজ্যেতেত্যর্থঃ। ঈশ্বরাত্মতাং গতানামেব আবন্তরসর্গাদৌ তদ্ভবিষ্যতীত্যাশঙ্ক্যাহ সর্গেঽপীতি ॥ ২ ॥

জ্ঞানস্তুত্যা তদভিমুখায়াব্যবহিতচেতসে বিবক্ষিতমর্থমাহ ক্ষেত্রেতি। স্বরূপত্বেন স্বভূতত্বং বারয়তি মদীয়েতি। ঈশ্বরীং চিচ্ছক্তিং ব্যাবর্ত্তয়তি ত্রিগুণাত্মিকেতি। সাংখ্যীয়প্রকৃতিরপি মদীয়েতি ব্যাবর্ত্তিতা যোনিশব্দেন সর্ব্বাণি ভবনযোগ্যানি কার্য্যাণি প্রত্যুপাদানত্বমভিপ্রেতমিত্যাহ সর্ব্বভূতানামিতি। প্রকৃতের্ম্মহত্বং সাধয়তি সর্ব্বেতি। সর্ব্বকার্য্যব্যাপ্তিমাদায় যোনাবেব ব্রহ্মশব্দঃ ন লিঙ্গবৈষম্যান্মহদ্ব্রহ্মেত্যর্থান্তরং কিঞ্চিদিত্যা-

## স্বামিকৃত টীকা।

তদেবং প্রশংসয়া শ্রোতারমভিমুখীকৃত্য পরমেশ্বরাধীনয়োঃ প্রকৃতিপুরুষয়োঃ সর্ব্বভূতোৎপত্তিং প্রতি হেতুত্বং ন তু স্বতন্ত্রয়োরিতীমং বিবক্ষিতমর্থং কথয়তি মমেতি। দেশতঃ কালতশ্চাপরিচ্ছিন্নত্বান্মহৎ বৃংহিতত্বাৎ স্বকার্য্যাণাং বৃদ্ধিহেতুত্বাদ্বা প্রকৃতিরিত্যর্থঃ। তন্মহদ্ব্রহ্ম মম পরমেশ্বরস্য যোনির্গর্ভাধানস্থানং তস্মিন্নহং গর্ভং জগদ্বিস্তারহেতুং চিদাভাসং দধামি নিঃক্ষিপামি প্রলয়ে ময়ি লীনং সন্তমবিদ্যাকর্ম্মানুশয়বন্তং ক্ষেত্রজ্ঞং সৃষ্টিসময়ে ভোগ্যেন ক্ষেত্রেণ সংযোজয়ামীত্যর্থঃ, ততো গর্ভাধানাৎ সর্ব্বভূতানাং ব্রহ্মাদীনাং সম্ভব উৎপত্তির্ভবতীতি ॥ ৩ ॥

সর্ব্বযোনিষু কৌন্তেয় মূর্ত্তয়ঃ সম্ভবন্তি যাঃ।
তাসাং ব্রহ্ম মহদ্‌যোনিরহং বীজপ্রদঃ পিতা ॥ ৪ ॥

শাঙ্করভাষ্যম্।

সর্ব্বযোনিষ্বিতি। দেবপিতৃমনুষ্যপশুমৃগাদিসর্ব্বযোনিষু কৌন্তেয় মূর্ত্তয়ো দেহসংস্থানলক্ষণা মূর্চ্ছিতাঙ্গাবয়বা মূর্ত্তয়ঃ সম্ভবন্তি যাস্তাসাং মূর্ত্তীনাং ব্রহ্ম মহৎ সর্ব্বাবস্থং যোনিঃ করণমহমীশো বীজপ্রদো গর্ভাধানস্য কর্ত্তা পিতা ॥ ৪ ॥

গিরিকৃত টীকা।

শঙ্ক্যাহ যোনিরিতি। তস্মিন্নিত্যাদি ব্যাচষ্টে তস্মিন্নিতি। ঈদৃশস্য ক্ষেত্রক্ষেত্রজ্ঞসংযোগস্য ভূতকারণত্বমিতি বক্তুমুপক্রম্য কিমিদমস্মদাদর্শিতমিত্যাশঙ্ক্যাহ ক্ষেত্রেতি। গর্ভশব্দেনোক্তসংযোগস্য ফলং দর্শয়তি সম্ভবইতি। আদিকর্ত্তা স ভূতানাং ইতি স্মৃত্বা হিরণ্যগর্ভকার্য্যত্বাবগমাদ্ভূতানাং কথং যথোক্তগর্ভাধাননিমিত্তত্বমিত্যাশঙ্ক্যাহ হিরণ্যগর্ভেতি ॥ ৩ ॥

নন্বু কথমুক্তকারণানুবোধেন হিরণ্যগর্ভোদ্ভবমভ্যুপেত্য ভূতানামুৎপত্তিরুচ্যতে দেবাদিজাতিবিশেষেষু দেহবিশেষাণাং কারণান্তরসম্ভবাত্তত্রাহসর্ব্বযোনিষ্বিতি। তত্র তত্র হেত্বন্তরপ্রতিভাষে কুতোঽস্য হেতুত্বমিত্যাশঙ্ক্য ন তদ্রূপেণাস্যৈবাবস্থানাদিত্যাহ সর্ব্বাবস্থমিতি ॥ ৪ ॥

এবং ক্ষেত্রক্ষেত্রজ্ঞসংযোগাজ্জগদুৎপত্তিং দর্শয়তা ব্রহ্মৈবাবিদ্যয়া সংসরতীত্যুক্তং ইদানীমধ্যায়াদাবুক্তমাকাঙ্ক্ষাদ্বয়ং পূর্ব্বমনূদ্যানন্তরশ্লোকেনোত্তরমাহ কে গুণাইতি। সত্ত্বাদিষু কথং গুণশব্দপ্রবৃত্তিরিত্যাশঙ্ক্য পরতন্ত্রত্বাদিত্যাহ গুণাইতি। রূপাদিষ্বিব গুণশব্দঃ সত্ত্বাদিষুঃ দ্রব্যাশ্রিতত্বং নিমিত্তীকৃত্য কিং ন স্যাদিত্যাশঙ্ক্যাহ পারিভাষিক ইতি। প্রকৃত্যাত্মকানাং তেষাং সর্ব্বাশ্রয়ত্বান্নৈবমিত্যাহ ন রূপাদিবদিতি। গুণানাং প্রকৃতেশ্চ পৃথগুক্তেরন্যত্বে কুতস্তেষাং প্রকৃত্যাত্মত্বমিত্যাশঙ্ক্যাহ ন চ গুণেতি। অত্যন্তভেদে গবাশ্ববত্তদ্ভাবাসম্ভবাদিত্যর্থঃ। ভেদাভেদে চ তদ্ভাবাসম্ভবাদ্বিশেষাৎ কুতস্তেষু গুণপরিভাষেত্যাশঙ্ক্যাহ তস্মাদিতি। ক্ষেত্রজ্ঞম্প্রতি নিত্যপারতন্ত্র্যে হেতুমাহ অবিদ্যেতি। কে

স্বামিকৃত টীকা।

ন কেবলং সৃষ্ট্যুপক্রমএব মদধিষ্ঠানেনাভ্যাং প্রকৃতিপুরুষাভ্যাময়ং ভূতোৎপত্তিপ্রকারোঽপি তু সর্ব্বদৈবেত্যাহ সর্ব্বেতি। সর্ব্বাসু যোনিষু মনুষ্যাদ্যাসু যা মূর্ত্তয়ঃ স্থাবরজঙ্গমাত্মিকা উৎপদ্যন্তে তাসাং মূর্ত্তীনাং মহদ্ব্রহ্ম প্রকৃতির্যোনির্মাতৃস্থানীয়া অহঞ্চ বীজপ্রদঃ পিতা গর্ভাধানকর্ত্তা পিতা ॥ ৪ ॥

সত্ত্বং রজস্তমইতি গুণাঃ প্রকৃতিসম্ভবাঃ।
নিবধ্নন্তি মহাবাহো দেহে দেহিনমব্যয়ম্ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

কে গুণাঃ কথং বধ্নন্তীত্যুচ্যতে সত্ত্বমিতি। সত্ত্বং রজস্তমইত্যেবংনামানো গুণাইতি পারিভাষিকঃ শব্দো ন রূপাদিবৎ দ্রব্যাশ্রিতাঃ ন চ গুণগুণিনোরন্যত্বমত্র বিবক্ষিতং তস্মাদ্গুণাইব নিত্যপরতন্ত্রাঃ ক্ষেত্রজ্ঞং প্রত্যবিদ্যাত্মকত্বাৎ ক্ষেত্রজ্ঞং নিবধ্নন্তীব তমাস্পদীকৃত্যাত্মানং প্রতিলভন্তইতি নিবধ্নন্তীত্যুচ্যতে। তে চ প্রকৃতিসম্ভবা ভগবন্মায়াসম্ভবানিবধ্নন্তীব হে মহাবাহো মহান্তৌ সমর্থতরাবাজানুপ্রলম্বৌ বাহূ যস্য স মহাবাহুঃ হে মহাবাহো দেহে শরীরে দেহিনং দেহবন্তং অব্যয়মব্যয়ত্বঞ্চোক্তমনাদিত্বাদিশ্লোকে ॥ ৫ ॥

## গিরিকৃত টীকা।

গুণাইত্যস্যোত্তরমুক্তং কথং বধ্নন্তীত্যস্যোত্তরমাহ ক্ষেত্রজ্ঞমিতি। তদেবোপপাদয়তি তমাস্পদীকৃত্যেতি। সম্ভবত্যস্মাদিতি সম্ভবঃ প্রকৃতিঃ সম্ভবো যেষাং তে তথেতি। প্রাকৃতানাং গুণানাং প্রকৃত্যাত্মকত্বমাহ তে চেতি। সাংখীয়াম্প্রকৃতিং প্রধানাখ্যাং ব্যাবর্ত্তয়তি ভগবদিতি। ইবকারানুবন্ধেন নিতরাং বধ্নন্তি স্ববিকারবত্তয়োপদর্শয়ন্তীতি। ক্রিয়াপদং ব্যাখ্যায় মহাবাহুশব্দং ব্যাচষ্টে মহান্তাবিতি। দেহবন্তং দেহমাত্মানং মন্যমানং দেহাস্বামিনমিত্যর্থঃ। কূটস্থস্য কথং বধ্যমানত্বমিত্যাশঙ্ক্য কুর্য্যাম্মেরাবণুধিয়মিতিন্যায়েন মাহাত্ম্যমিদমিত্যাহ অব্যয়মিতি। স্বতো ধর্ম্মতো বা ব্যয়রাহিত্যাপেক্ষায়ামাহ অব্যয়ত্বঞ্চেতি ॥ ৫ ॥

লিপ্যতে ন সপাপেনেত্যনেন বিরুদ্ধমিদং নিবধ্নন্তীতি বচনমিতি শঙ্কতে নম্বিতি। ইবকারানুবন্ধেন ক্রিয়াপদং ব্যাচক্ষাণৈরস্মাভিরস্য চোদ্যস্য পরিহৃতমিতি। কিংলক্ষণোগুণঃ কেন বধ্নাতীত্যপেক্ষায়ামাহ তত্রেতি। নির্দ্ধারণার্থতয়া সপ্তমীং ব্যাচষ্টে তত্র সত্ত্বাদীনামিতি। পুনস্তত্রেত্যনুবাদমাত্রং নির্ম্মলত্বং স্বচ্ছত্বমাবরণবারণক্ষমত্বং তস্মাৎ প্রকাশকঞ্চৈতন্যাভিব্যঞ্জকং নিরুপদ্রবমিতি নির্ম্মলং সৎ সুখস্যাভিব্যঞ্জকমিত্যর্থঃ। কেন

## স্বামিকৃত টীকা।

তদেবং পরমেশ্বরাধীনাভ্যাং প্রকৃতিপুরুষাভ্যাং সর্ব্বভূতোৎপত্তিং নিরূপ্যেদানীং প্রকৃতিসঙ্গেন পুরুষস্য সংসারং প্রপঞ্চয়তি সত্ত্বমিত্যাদি চতুর্ভিঃ। সত্ত্বং রজস্তমইত্যেবংসংজ্ঞকাস্ত্রয়োগুণাঃ প্রকৃতিসম্ভবাঃ প্রকৃতেঃ সম্ভবউদ্ভবো যেষাং তে তথোক্তাঃ। গুণসাম্যং প্রকৃতিস্তস্যাঃ সকাশাৎ পৃথক্ত্বেনাভিব্যক্তাঃ সন্তঃ প্রকৃতিকার্য্যে দেহে তাদাত্ম্যেন স্থিতং দেহিনং চিদংশং বস্তুতোঽব্যয়ং নির্ব্বিকারমেব সন্তং নিবধ্নন্তি স্বকার্য্যৈঃ সুখদুঃখমোহাদিভিঃ সংযোজয়ন্তীত্যর্থঃ ॥ ৫ ॥

তত্র সত্ত্বং নির্ম্মলত্বাৎ প্রকাশকমনাময়ম্।
সুখসঙ্গেন বধ্নাতি জ্ঞানসঙ্গেন চানঘ ॥ ৬ ॥

## শাঙ্করভাষ্যম্।

ননু ন দেহী লিপ্যতে ইত্যুক্তং তৎ কথমিহ নিবধ্নন্তীত্যন্যথা উচ্যতে পরিহৃতং অস্মাভিরিবশব্দেন নিবধ্নন্তীবেতি। তত্র সত্ত্বমিতি তত্র সত্ত্বাদীনাং সত্ত্বস্যৈব তাবল্লক্ষণমুচ্যতে নির্ম্মলত্বাৎ স্ফটিকইব মণিঃ প্রকাশকমনাময়ং নিরুপদ্রবং সত্ত্বং তন্নিবধ্নাতি কথং সুখসঙ্গেন সুখ্যহমিতি বিষয়ভূতস্য সুখস্য বিষয়িণ্যাত্মনি সংশ্লেষাপাদনং মৃষৈব সুখেন সংজননমিতি সৈষা অবিদ্যা ন হি বিষযধর্ম্মোবিষযিণোভবতি ইচ্ছাদি চ ধৃত্যন্তং ক্ষেত্রস্যৈব বিষয়স্য ধর্ম্মইত্যুক্তং ভগবতা অতোঽবিদ্যযৈব স্বকীয়ধর্ম্মভূতযা বিষযবিষয্যবিবেকলক্ষণয়াঽস্বাত্মভূতে সুখে সংজয়তীবাসক্তমিব করোতাসুখিনং সুখিনমিব. তথা জ্ঞানসংগেন চ দেহিনং জ্ঞানমিতি সুখসাহচর্য্যাৎ ক্ষেত্রস্যৈবান্তঃকরণস্য ধর্ম্মোনাত্মনঃ আত্মধর্ম্মত্বে সঙ্গানুপপত্তের্ব্বন্ধানুপপত্তেশ্চ সুখইব জ্ঞানাদৌ সঙ্গো মন্তব্যঃ অনঘ অব্যসন ॥ ৬ ॥

## গিরিকৃত টীকা।

দ্বাবেণ তদাত্মানং নিবধ্নাতীতি পৃচ্ছতি কথমিতি। সুখসঙ্গেন বধ্নাতীত্যুত্তরমুত্তদেব বিবৃণোতি সুখ্যহমিত্যাদিনা। সুখংসুখস্যাভিব্যঞ্জকসত্ত্বপরিণামোঽত্র বিষয়ভূতং সুখমুচ্যতে। সংশ্লেষাপাদনমেব বিশদয়তি মৃষৈবেতি। কিমিতি মৃষৈবেতি বিশেষণং সঙ্গস্য বস্তুত্বসম্ভবাদিত্যাশঙ্ক্যাহ সৈষেতি। নন্বিচ্ছাসঙ্গোঽভিনিবেশশ্চেত্যেকোঽর্থস্তত্রেচ্ছাদেরাত্মধর্ম্মত্বাৎ কিমবিদ্যয়েত্যাশঙ্ক্য মনোধর্ম্মত্বাদিচ্ছাদের্নাত্মধর্ম্মতেত্যাহ নহীতি। ইচ্ছাদেরনাত্মধর্ম্মত্বে কিং প্রমাণমিত্যাশঙ্ক্যাহ ইচ্ছাদি চেতি। তস্যাত্মধর্ম্মত্বাসম্ভবে ফলিতমাহ অতইতি। সঞ্জয়তীব সত্ত্বমিতি শেষঃ। ইবকারপ্রয়োগে হেতুমাহ অবিদ্যয়েতি। তস্যাবস্তুতোঽনাত্মসম্বন্ধস্তথাপি সম্বন্ধ্যন্তরাভাবাদস্বাতন্ত্র্যাচ্চ আত্মধর্ম্মত্বমাপাদ্য ইষ্টমাচষ্টে স্বকীযেতি। কৃতিমদন্তঃকরণস্য বিষয়ত্বাদাত্মনঃ সাধকত্বেন তদ্বিষযত্বেঽপি তদবিবেকরূপাবিদ্যেতি যথোক্তাবিদ্যামাহাত্ম্যমিদং যদস্বরূপে তদ্ধর্ম্মে চ শক্তিসম্পাদনমিত্যাহ অস্যেতি। তদেব

## স্বামিকৃত টীকা।

তত্র সত্ত্বস্য লক্ষণং বন্ধকত্বপ্রকারঞ্চাহ তত্রেতি। তত্র তেষাং গুণানাং মধ্যে সত্ত্বং নির্ম্মলত্বাৎ স্বচ্ছত্বাৎ স্ফটিকমণিরিব প্রকাশকং ভাস্বরং অনাময়ঞ্চ নিরুপদ্রবং শান্তমিত্যর্থঃ। অতঃ শান্তত্বাৎ স্বকার্য্যেণ সুখেন যঃ সঙ্গস্তেন বধ্নাতি প্রকাশকত্বাচ্চ স্বকার্য্যেণ জ্ঞানেন যঃ সঙ্গস্তেন চ বধ্নাতি হে অনঘ অপাপ অহং সুখী জ্ঞানী চেতি মনোধর্ম্মাংস্তদভিমানিনি ক্ষেত্রজ্ঞে সংযোজযতীত্যর্থঃ ॥ ৬ ॥

রজো রাগাত্মকং বিদ্ধি তৃষ্ণাসঙ্গসমুদ্ভবম্।
তন্নিবধ্নাতি কৌন্তেয় কর্ম্মসঙ্গেন দেহিনম্॥ ৭॥

## শাঙ্করভাষ্যম্।

রজো রাগাত্মকং ইতি। রজো রাগাত্মকং রঞ্জনাদ্রাগো গৈরিকাদিবদ্রাগাত্মকং বিদ্ধি জানীহি তৃষ্ণাসঙ্গসমুদ্ভবং তৃষ্ণাপ্রাপ্তাভিলাষঃ আসঙ্গঃ প্রাপ্তে বিষয়ে মনসঃ প্রীতিলক্ষণঃ সংশ্লেষঃ তৃষ্ণাসংগসমুদ্ভবং তৃষ্ণাসংগয়োঃ সমুদ্ভবং তৃষ্ণাসঙ্গসমুদ্ভবং তন্নিবধ্নাতি তদ্রজঃ কৌন্তেয় কর্ম্মসঙ্গেন দৃষ্টাদৃষ্টার্থেষু কর্ম্মসু সংজননং তৎপরতা কর্ম্মসঙ্গস্তেন নিবধ্নাতি রজো দেহিনং॥ ৭॥

তমস্ত্বিতি। তমস্তৃতীয়োগুণোঽজ্ঞানজমজ্ঞানাজ্জায়তে তদজ্ঞানজং বিদ্ধি মোহন

## গিরিকৃত টীকা।

স্ফুটয়তি অসক্তমিবেতি। প্রকারান্তরেণ সত্বস্য নিবন্ধকত্বমাহ তথেতি। জ্ঞায়তেঽনেনেতি সত্বপরিণামো জ্ঞানং তেন জ্ঞান্যহমিতি বিপরীতাভিমানেন সত্বমাত্মানং নিবধ্নাতীত্যাহ জ্ঞানমিত্যাদিনা। বিপক্ষে দোষমাহ আত্মেতি। স্বাভাবিকত্বেন প্রাপ্তত্বাত্তত্র স্বতঃ সংযোগাত্তদ্ভাবা বন্ধে চ তন্নিবৃত্ত্যনুপপত্তের্নাত্মধর্ম্মত্বমিত্যর্থঃ। জ্ঞানৈশ্বর্য্যাদাবপি ক্ষেত্রধর্ম্মে সঙ্গস্য পূর্ব্ববদাবিদ্যকত্বং সূচয়তি সুখইবেতি। পাপাদিদোষহীনস্যৈবাত্র শাস্ত্রেঽধিকারইতি দ্যোতয়তি অনঘেতি॥ ৬॥

রজস্তর্হি কিংলক্ষণং কথং বা পুরুষং নিবধ্নাতীত্যাশঙ্ক্যাহ রজইতি। রজ্যতে সংসৃজ্যতেঽনেন পুরুষো দৃশ্যৈরিতি রাগোঽসাবাত্মাস্যেতি রাগাত্মকংরজো জানীহীত্যাহ রঞ্জনাদিতি। সমুদ্ভবত্যস্মাদিতি সমুদ্ভবঃ তৃষ্ণা চ সঙ্গশ্চ তৃষ্ণাসঙ্গৌ তয়োঃ সমুদ্ভবঃ তমিতি বিগ্রহং গৃহীত্বা কার্য্যদ্বারা রজোবিবক্ষুস্তৃষ্ণাসঙ্গয়োরর্থভেদমাহ তৃষ্ণেত্যাদিনা। রজসো লক্ষণমুক্ত্বা নিবন্ধনপ্রকারমাহ তদ্রজইতি। কর্ম্মসঙ্গং বিভজতে দৃষ্টেতি। অকর্ত্তারমেব পুরুষং করোমি ইত্যভিমানেন প্রবর্ত্তয়তীত্যর্থঃ॥ ৭॥

তমস্তর্হি কিংলক্ষণং কথং বা পুরুষং নিবধ্নাতি তত্রাহ তমস্ত্বিতি। গুনাণাং প্রকৃতিসত্তবত্বাবিশেষেঽপি তমসোঽজ্ঞানজত্ববিশেষণং তদ্বিপরীতস্বভাবানাপত্তেরিতি মত্বাহ অজ্ঞানা-

## স্বামিকৃত টীকা।

রজসোলক্ষণং বন্ধকত্বঞ্চাহ রজইতি। রজঃসংজ্ঞকং গুণং রাগাত্মকমনুরঞ্জনরূপং বিদ্ধি অতএব তৃষ্ণাসঙ্গসমুদ্ভবং তৃষ্ণা অপ্রাপ্তাভিলাষঃ সঙ্গঃ প্রাপ্তেঽর্থে প্রীতির্ব্বিশেষেণাসক্তিস্তয়োস্তৃষ্ণাসঙ্গয়োঃ সমুদ্ভবোঽস্মাৎ তদ্রজো দেহিনং দৃষ্টাদৃষ্টার্থেষু কর্ম্মসু সঙ্গেনাসক্ত্যা নিতরাং বধ্নাতি তৃষ্ণাসঙ্গাভ্যাং হি কর্ম্মস্বাসক্তির্ভবতি ইত্যর্থঃ॥ ৭॥

তমসো লক্ষণং বন্ধকত্বঞ্চাহ তমইতি। তমস্ত্বজ্ঞানাজ্জাতং আবরণশক্তিপ্রধানাৎ প্রকৃ-

তমস্ত্বজ্ঞানজং বিদ্ধি মোহনং সর্ব্বদেহিনাম্।
প্রমাদালস্যনিদ্রাভিস্তন্নিবধ্নাতি ভারত ॥ ৮ ॥
সত্ত্বং সুখে সঞ্জয়তি রজঃ কর্ম্মণি ভারত।
জ্ঞানমাবৃত্য তু তমঃ প্রমাদে সঞ্জয়ত্যুত ॥ ৯ ॥

## শাঙ্করভাষ্যম্।

মোহকরমবিবেককরং সর্ব্বদেহিনাং সর্ব্বেষাং দেহবতাং প্রমাদালস্যনিদ্রাভিঃ প্রমাদশ্চালস্যঞ্চ নিদ্রা চ প্রমাদালস্যনিদ্রাস্তাভিস্তমো নিবধ্নাতি ভারত ॥ ৮ ॥

পুনর্গুণানাং ব্যাপারঃ সংক্ষেপত উচ্যতে সত্ত্বমিতি। সত্ত্বং সুখে সংজয়তি সংশ্লেষয়তি রজঃ কর্ম্মণি হে ভারত সংজয়তীতি বর্ত্ততে জ্ঞানং সত্ত্বকৃতং বিবেকমাবৃত্যাচ্ছাদ্য তু তমঃ স্বেনাবরণাত্মনা প্রমাদে সংজয়ত্যুত প্রমাদো নাম প্রাপ্তকর্ত্তব্যাকরণং ॥ ৯ ॥

## গিরিকৃত টীকা।

দিতি। মুহ্যতি হিতাহিতে ন বিবিচ্যত্যনেনেন ইতি মোহনম্বিবেকপ্রতিবন্ধকমিতি। কার্য্যদ্বারা তমোনির্দ্দিশতি মোহনমিত্যাদিনা। লক্ষণমুক্ত্বা তমসো বন্ধনকরত্বং দর্শয়তি প্রমাদেতি। কার্য্যান্তরাসক্ততয়া চিকীর্ষিতস্য কর্ত্তব্যস্যাকরণং প্রমাদঃ নিরীহতয়োৎসাহপ্রতিবন্ধস্ত্বালস্যং স্বাপো নিদ্রা তাভিরাত্মানমবিকারমেব তমোঽপি বিকারয়তীত্যর্থঃ ॥ ৮ ॥

উক্তানাং মধ্যে কস্মিন্ কার্য্যে কস্য গুণস্যোৎকর্ষস্তত্রাহ পুনরিতি। সুখসাধ্যে বিষয়ে সমুৎকৃষ্যতে সত্ত্বমিত্যাহ সত্ত্বমিতি। সঞ্জয়তীত্যস্যার্থমাহ সংশ্লেষয়তীতি। কর্ম্মণি সাধ্যে রজঃ সমুৎকৃষ্যত ইত্যাহ রজইতি। প্রমাদে প্রাধান্যন্তমসো দর্শয়তি জ্ঞানমিতি ॥ ৯ ॥

ইতরেতরাবিরোধেন বা সত্ত্বাদয়োগুণা যুগপদুৎকৃষ্যন্তে বিরোধেন বা ক্রমেণ বেতি সন্দেহাৎ পৃচ্ছতি উক্তমিতি। সত্ত্বোৎকর্ষার্থিনামিতরাভিভবার্থং ক্রমপক্ষমাশ্রিত্যোত্তর-

## স্বামিকৃত টীকা।

ত্যংশাদুত্তং বিদ্ধীত্যর্থঃ অতঃ সর্ব্বেষাং দেহিনাং মোহনং ভ্রান্তিজনকং অতএব প্রমাদেনালস্যেন নিদ্রয়া চ তত্তমো দেহিনং নিবধ্নাতি। অত্র প্রমাদোঽনবধানং আলস্যমনুদ্যমঃ নিদ্রা চিত্তস্যাবসাদঃ লয়ঃ ॥ ৮ ॥

সত্ত্বাদীনামেব স্বস্বকার্য্যকরণে সামর্থ্যাতিশয়মাহ সত্ত্বমিতি। সত্ত্বং সুখে সঞ্জয়তি সংশ্লেষয়তি দুঃখশোকাদিকারণে সত্যপি সুখাভিমুখমেব দেহিনং করোতীত্যর্থঃ এবং সুখাদিকারণে সত্যপি রজঃকর্ম্মণ্যেব সঞ্জয়তি, তমস্তু মহৎসঙ্গেনোৎপদ্যমানমপি জ্ঞানমাবৃত্যাচ্ছাদ্য প্রমাদে সঞ্জয়তি মহদ্ভিরুপদিশ্যমানস্যার্থস্যানবধানে যোজয়তি উত অপি আলস্যাদাবপি সংযোজয়তীত্যর্থঃ ॥ ৯ ॥

রজস্তমশ্চাভিভূয় সত্ত্বং ভবতি ভারত।
রজঃ সত্ত্বং তমশ্চৈব তমঃ সত্ত্বং রজস্তথা ॥ ১০ ॥
সর্ব্বদ্বারেষু দেহেঽস্মিন্ প্রকাশ উপজায়তে।
জ্ঞানং যদা তদা বিদ্যাদ্বিবৃদ্ধং সত্ত্বমিত্যুত ॥ ১১ ॥

## শাঙ্করভাষ্যম্।

উক্তং কার্য্যং কদা কুর্ব্বন্তি গুণাইত্যুচ্যতে রজইতি। রজস্তমশ্চোভাবপ্যভিভূয সত্ত্বং ভবত্যুদ্ভবতি বর্দ্ধতে যদা তদা লব্ধাত্মকং সত্ত্বং স্বকার্য্যং জ্ঞানসুখাদ্যারভতে হে ভাবত তৎ তথা রজোগুণঃ সত্ত্বং তমশ্চৈবোভাবপ্যভিভূয় বর্দ্ধতে যদা তদা কর্ম্ম তৃষ্ণাদিস্বকার্য্যমারভতে তমআখ্যোগুণঃ সত্ত্বং রজশ্চোভাবপ্যভিভূয় তথৈব বর্দ্ধতে যদা তদা জ্ঞানাবরণাদি স্বকার্য্যমাবভতে ॥ ১০ ॥

যদা যোগুণঃ সমুদ্ভূতো ভবতি তদা তস্য কিং লিঙ্গং উচ্যতে সর্ব্বদ্বারেষু ইতি। সর্ব্বদ্বারেষাত্মনউপলবব্ধিদ্বারাণি শ্রোত্রাদীনি সর্ব্বাণি কবণানি তেষু দ্বাবেষু অন্তঃকরণস্য বুদ্ধেবৃত্তিঃ প্রকাশো দেহেঽস্মিন্ প্রকাশশব্দবাচ্যঃ সর্ব্বদ্বাবেষু উপজায়তে তদেব জ্ঞানং যদৈবং প্রকাশো জ্ঞানাখ্যউপজায়তে তদা জ্ঞানপ্রকাশেন লিঙ্গেন বিদ্যাদ্বিবৃদ্ধং উদ্ভূতং সত্ত্বমিত্যুতাপি ॥ ১১ ॥

## গিরিকৃত টীকা।

মাহ উচ্যতে। সত্ত্বাভিবৃদ্ধিমেব বিবৃণোতি তদেতি। বজস্তমসোস্তিবোধানদশায়ামিতি যাবৎ। রজসো বৃদ্ধি প্রকারস্তৎকার্য্যঞ্চ কথযতি তথেতি। তমসোঽপি বৃদ্ধিস্তৎকার্য্যনির্দ্দিশতি তমইতি ॥ ১০ ॥

উত্তরশ্লোকত্রয়স্যাকাঙ্ক্ষাং দর্শয়তি যদেতি। সত্ত্বোদ্ভবলিঙ্গদর্শনার্থমনন্তবং শ্লোকমুত্থাপ্য উচ্যতইতি। সর্ব্বদ্বাবেষিত্যাদি সপ্তমী নিমিত্তে নেতব্যা, উতশব্দোঽপিশব্দপর্য্যায়োঽপ্যতিশয়ার্থঃ ॥ ১১ ॥

## স্বামিকৃত টীকা।

তত্র হেতুমাহ রজইতি। রজস্তমশ্চেতি গুণদ্বয়মভিভূয় তিরস্কৃত্য সত্ত্বং ভবতি অদৃষ্টবশাদুদ্ভবতি অতঃ স্বকার্য্যে সুখাদৌ সঞ্জযতীত্যর্থঃ। এবং রজোঽপি সত্ত্বং তমশ্চেতি গুণদ্বয়মভিভূয়োদ্ভবতি অতঃ স্বকার্য্যে তৃষ্ণাসঙ্গাদৌ সঞ্জয়তি। এবং তমোঽপি সত্ত্বং রজশ্চোভাবপি গুণাবভিভূয়োদ্ভবতি অতঃ স্বকার্য্যে প্রমাদালস্যাদৌ সঞ্জয়তীত্যর্থঃ ॥ ১০ ॥

ইদানীং সত্ত্বাদীনাং বিবৃদ্ধানাং লিঙ্গান্যাহ সর্ব্বদ্বারেষিতি ত্রিভিঃ। অস্মিন্নাত্মনো ভোগায়তনে দেহে সর্ব্বেষপি দ্বাবেষু,শ্রোত্রাদিষু যদা শব্দাদিজ্ঞানাত্মকঃ প্রকাশ উপজায়তে

লোভঃ প্রবৃত্তিরারম্ভঃ কর্ম্মণামশমঃ স্পৃহা।
রজস্যেতানি জায়ন্তে বিবৃদ্ধে ভরতর্ষভ ॥ ১২ ॥
অপ্রকাশোঽপ্রবৃত্তিশ্চ প্রমাদো মোহএব চ।
তমস্যেতানি জায়ন্তে বিবৃদ্ধে কুরুনন্দন ॥ ১৩ ॥

## শাঙ্করভাষ্যম্।

রজসউদ্ভূতস্যেদং চিহ্নং লোভইতি। লোভঃ পবদ্রব্যাদিদিৎিচ্ছা প্রবৃত্তিঃ প্রবর্ত্তনং সামান্যচেষ্টা আবম্ভঃ উদ্দমঃ কস্য কর্ম্মণামশমঃ অনুপশমঃ হর্ষরাগাদিপ্রবৃত্তিঃ স্পৃহা সর্ব্বসামান্যবস্তুবিষয়া তৃষ্ণা বজসি গুণে বিবৃদ্ধে এতানি লিঙ্গানি জায়ন্তে হে ভবতর্ষভ ॥ ১২ ॥

অপ্রকাশ ইতি। অপ্রকাশোঽবিবেকোঽত্যন্তমপ্রবৃত্তিশ্চ প্রবৃত্ত্যভাবঃ তৎকার্য্যং প্রমাদো মোহএবচ অবিবেকো মূঢ়তেত্যর্থঃ তমসি গুণে বিবৃদ্ধে এতানি লিঙ্গানি জায়ন্তে হে কুরুনন্দন ॥ ১৩ ॥

## গিরিকৃত টীকা।

অতিশয়েনোদ্ভূতস্য বজসোলিঙ্গমাহ রজসইতি। উপক্রমপর্য্যায়স্যারম্ভস্য বিষয়ং পৃচ্ছতি কস্যেতি। কাম্যানি নিষিদ্ধানিচ লৌকিকানি কর্ম্মাণি বিষয়ত্বেন নির্দ্দিশতি কর্ম্মণামিতি। অনুপশমো বাহ্যান্তঃকরণানামিতিশেষঃ। লোভাদ্যুপলম্ভাদ্রজোবৃদ্ধির্বোদ্ধব্যেতি ভাবঃ ॥ ১২ ॥

উদ্ভূতস্য তমসোলিঙ্গমাহ অপ্রকাশইতি। সর্ব্বথৈব জ্ঞানকর্ম্মণোবভাবো বিশেষণাভ্যামুক্তস্তৎকার্য্যমিতি তচ্ছব্দো দর্শিতাবিবেকার্থঃ, প্রমাদো ব্যাখ্যাতঃ, মোহো বেদিতব্যস্যা-

## স্বামিকৃত টীকা।

উৎপদ্যতে তদানেন প্রকাশলিঙ্গেন সত্বং বিবৃদ্ধং বিদ্যাৎ জানীয়াৎ, উতশব্দাৎ সুখাদিলিঙ্গেনাপি জানীয়াদিত্যুক্তং ॥ ১১ ॥

কিঞ্চ লোভইতি। লোভোধনাদ্যাগমে বহুধা জায়মানেঽপি যঃ পুনঃ পুনর্ব্বর্দ্ধমানোঽভিলাষঃ, প্রবৃত্তির্নিত্যং কুর্ব্বদ্রূপা, কর্ম্মণামারম্ভো মহাগৃহাদিনির্ম্মাণোদ্যমঃ, অশমঃ ইদং কৃত্বেদং করিষ্যামীত্যাদিসঙ্কল্পবিকল্পানুপরমঃ, স্পৃহা উচ্চাবচেষু দৃষ্টমাত্রেষু বস্তুষু ইতস্ততো জিঘৃক্ষা, বজসি বিবৃদ্ধে সতি এতানি লিঙ্গানি জায়ন্তে এভির্লিঙ্গৈরজোগুণস্য বিবৃদ্ধিং জানীয়াদিত্যর্থঃ ॥ ১২ ॥

কিঞ্চ অপ্রকাশইতি। অপ্রকাশোবিবেকভ্রংশঃ, অপ্রবৃত্তিরনুদ্যমঃ, প্রমাদঃ কর্ত্তব্যার্থানুসন্ধানরাহিত্যং, মোহোমিথ্যাভিনিবেশঃ, তমসি প্রবৃদ্ধে সত্যেতানি লিঙ্গানি জায়ন্তে এতৈস্তমসোবৃদ্ধিং জানীয়াদিত্যর্থঃ ॥ ১৩ ॥

যদা সত্ত্বে প্রবৃদ্ধে তু প্রলয়ং যাতি দেহভৃৎ।
তদোত্তমবিদাং লোকানমলান্ প্রতিপদ্যতে॥ ১৪॥
রজসি প্রলয়ং গত্বা কর্ম্মসঙ্গিষু জায়তে।
তথা প্রলীনস্তমসি মূঢ়যোনিষু জায়তে॥ ১৫॥

## শাঙ্করভাষ্যম্।

মরণদ্বারেণাপি যৎ ফলং প্রাপ্যতে তদপি সঙ্গরাগহেতুকং সর্ব্বগৌণমেবেতি দর্শয়ন্নাহ যদেতি। যদা সত্ত্বে প্রবৃদ্ধে উদ্ভূতে তু প্রলয়ং মরণং যাতি প্রতিপ্রদ্যতে দেহভৃদাত্মা তদা উত্তমবিদাম্ মহদাদিতত্ত্ববিদামিত্যেতল্লোকানমলান্ মলরহিতান্ প্রতিপদ্যতে প্রাপ্নোতীত্যেতৎ॥ ১৪॥

রজসি গুণে বিবৃদ্ধে প্রলয়ং মরণং গত্বা প্রাপ্য কর্ম্মসঙ্গিষু স্বকর্ম্মাসক্তিযুক্তেষু মনুষ্যেষু জায়তে তথা তদ্বদেব প্রলীনোমৃতস্তমসি বিবৃদ্ধে মূঢ়যোনিষু পশ্বাদিযোনিষু জায়তে॥ ১৫॥

## গিরিকৃত টীকা।

স্তথাবেদনং। তস্যৈব মৌঢ্যান্তরত্বমাহ অবিবেকইতি। অবিবেকাতিশয়াদিনা প্রবৃদ্ধতমোজ্ঞেয়মিতিভাবঃ॥ ১৩॥

সাত্ত্বিকাদীনাং ভাবানাং পারলৌকিকং ফলবিভাগমুদাহরতি মরণেতি। সঙ্গঃ সঙ্গো রাগঃ তৃষ্ণা তদ্বলাদনুষ্ঠানদ্বারা লভ্যমানমিত্যর্থঃ। গৌণং সত্ত্বাদিগুণপ্রযুক্তমিতিযাবৎ। তত্র সত্ত্বগুণবৃদ্ধিকৃতফলবিশেষমাহ যদেতি। মলরহিতান্ রজস্তমসোরন্তরস্যোদ্ভবো মলং তেন রহিতানাগমসিদ্ধান্ ব্রহ্মলোকাদীনিত্যর্থঃ॥ ১৪॥

রজঃসমুদ্রেকে মৃতস্য ফলবিশেষং দর্শয়তি রজসীতি। জায়তে শরীরং গৃহ্লাতীত্যর্থঃ। যথা সত্ত্বে রজসিচ প্রবৃত্তে মৃতোব্রহ্মলোকাদিষু মনুষ্যলোকেচ জায়তে দেবাদিষু মনুষ্যেষুচ জায়তে তথৈবেত্যাহ তদ্বদিতি॥ ১৫॥

ভাবানাং ফলমুক্ত্বা সাত্ত্বিকাদীনাং কর্ম্মণাং ফলমাহ অতীতেতি। সুকৃতস্য শোভনস্য কৃতস্য পুণ্যস্যেত্যর্থঃ, সাত্ত্বিকস্যাশুদ্ধিরহিতস্যেতি যাবৎ, সাত্ত্বিকং সত্ত্বেন নিবৃত্তং নির্ম্মলং

## স্বামিকৃত টীকা।

মরণসময়ে বিবৃদ্ধানাং সত্ত্বাদীনাং ফলবিশেষমাহ যদেতি দ্বাভ্যাং। সত্ত্বে বিবৃদ্ধে সতি যদা জীবোমৃত্যুং প্রাপ্নোতি তদা উত্তমান্ হিরণ্যগর্ভাদীন্ বিদন্ত্যুপাসতইত্যুত্তমবিদস্তেষাং যে অমলাঃ প্রকাশময়া লোকাঃ সুখোপভোগস্থানবিশেষাস্তান্ প্রতিপদ্যতে প্রাপ্নোতি॥ ১৪॥

কিঞ্চ রজসীতি। রজসি বিবৃদ্ধে সতি মৃত্যুং প্রাপ্য কর্ম্মাসক্তেষু মনুষ্যেষু জায়তে, তথা তমসি বিবৃদ্ধে সতি প্রলীনো মৃতো মূঢ়যোনিষু পশ্বাদিষু জায়তে॥ ১৫॥

কর্ম্মণঃ সুকৃতস্যাহুঃ সাত্ত্বিকং নির্ম্মলং ফলম্।
রজসস্তু ফলং দুঃখমজ্ঞানং তমসঃ ফলম্ ॥ ১৬ ॥
সত্ত্বাৎ সংজায়তে জ্ঞানং রজসো লোভএব চ।
প্রমাদমোহৌ তমসো ভবতোঽজ্ঞানমেব চ ॥ ১৭ ॥

## শাঙ্করভাষ্যম্।

অতীতশ্লোকার্থ স্যৈব সংক্ষেপউচ্যতে কর্ম্মণঃ সুকৃতস্য সাত্ত্বিকস্যেত্যর্থঃ আহুঃ শিষ্টাঃ সাত্ত্বিকমেব নির্ম্মলং ফলমিতি রজসস্তু ফলং দুঃখং রাজসস্য কর্ম্মণইত্যর্থঃ কর্ম্মাধিকারাৎ ফলমপি দুঃখমেব করণানুরূপ্যাদ্রাজসমেব তথা জ্ঞানন্তামসস্য কর্ম্মণোঽধর্ম্মস্য পূর্ব্ববৎ ॥১৬॥

কিঞ্চ গুণেভ্যোভবতি সত্ত্বাদিতি। সত্ত্বাৎলব্ধাত্মকাৎ সঞ্জায়তে সমুৎপদ্যতে জ্ঞানং রজসোলোভএবচ প্রমাদমোহৌ চোভৌ তমসোভবতোঽজ্ঞানমেবচ ভবতি ॥ ১৭ ॥

---

## গিরিকৃত টীকা।

রজস্তমঃসমুদ্ভবান্মলান্নিষ্ক্রান্তং। রজঃশব্দস্য রাজসে কর্ম্মণি কুতোবৃত্তিস্তত্রাহ কর্ম্মেতি দুঃখমেব দুঃখবহুলং সুখমেবেত্যর্থঃ। কথমিত্থং ব্যাখ্যায়তে তত্রাহ কারণেতি। পাপমিশ্রস্য পুণ্যস্য রজোনিমিত্তস্য কারণত্বাৎ তদনুরোধাৎ ফলমপি রজোনিমিত্তং যথোক্তং যুক্তমিত্যর্থঃ। অজ্ঞানমবিবেকপ্রায়ং দুঃখং তামসাধর্ম্মফলমিত্যাহ তথেতি ॥ ১৬ ॥

বিহিতপ্রতিষিদ্ধজ্ঞানকর্ম্মাণি সত্ত্বাদীনাং লক্ষণানি সংক্ষিপ্য দর্শয়তি কিঞ্চেতি। জ্ঞানং সর্ব্বকরণদ্বারকং অজ্ঞানং বিবেকাভাবঃ ॥ ১৭ ॥

## স্বামিকৃত টীকা।

ইদানীং সত্ত্বাদীনাং স্বানুরূপকর্ম্মদ্বারেণ বিফলহেতুত্বমাহ কর্ম্মণইতি। সুকৃতস্য সাত্ত্বিকস্য কর্ম্মণঃ সাত্ত্বিকং সত্ত্বপ্রধানং নির্ম্মলং প্রকাশবহুলং সুখং ফলমাহুঃ কপিলাদয়ঃ, রজসস্তি রাজসস্য কর্ম্মণইত্যর্থঃ, কর্ম্মফলকথনস্য প্রকৃতত্বাৎ তস্য দুঃখং ফলমাহুঃ, তমসইতি তামসস্য কর্ম্মণইত্যর্থঃ, তস্যাজ্ঞানং মূঢ়ত্বং ফলমাহুঃ, সাত্ত্বিকাদিধর্ম্মলক্ষণাঞ্চ নিয়তঃ সঙ্গরহিতমিত্যাদিনাষ্টাদশেঽধ্যায়ে বক্ষ্যতি ॥ ১৬ ॥

তত্রৈব হেতুমাহ সত্ত্বাদিতি। সত্ত্বাজ্জ্ঞানং সংজায়তে অতঃ সাত্ত্বিকস্য কর্ম্মণঃ প্রকাশবহুলং সুখং ফলং ভবতি, রজসো লোভো জায়তে তস্য চ দুঃখহেতুত্বাত্তৎপূর্ব্বকস্য কর্ম্মণো দুঃখং ফলং ভবতি, তমসস্তু প্রসাদমোহাজ্ঞানানি ভবন্তি অতস্তামস্য কর্ম্মণোঽজ্ঞানমাত্রং প্রায়ঃ ফলং ভবতীতি যুক্তমেবেত্যর্থঃ ॥ ১৭ ॥

ইদানীং সত্ত্বাদিবৃত্তিশীলানাং ফলভেদমাহ ঊর্দ্ধমিতি। সত্ত্বস্থাঃ সত্ত্ববৃত্তিপ্রধানা ঊর্দ্ধং গচ্ছন্তি সত্ত্বোৎকর্ষতারতম্যাদুত্তরোত্তরশতগুণানন্দান্ মনুষ্য গন্ধর্ব্বপিতৃদেবাদিলোকান্ সত্য-

ঊর্দ্ধং গচ্ছন্তি সত্ত্বস্থা মধ্যে তিষ্ঠন্তি রাজসাঃ।
জঘন্যগুণবৃত্তিস্থা অধোগচ্ছন্তি তামসাঃ ॥ ১৮ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ ঊর্দ্ধমিতি। ঊর্দ্ধং গচ্ছন্তি দেবলোকাদিষু উৎপদ্যন্তে সত্ত্বস্থাঃ সত্ত্বগুণবৃত্তস্থা মধ্যে তিষ্ঠন্তি মনুষ্যেষু উৎপদ্যন্তে রাজসাঃ জঘন্যগুণবৃত্তস্থা জঘন্যশ্চাসৌ গুণশ্চ জঘন্যগুণস্তমস্তস্য বৃত্তং নিদ্রালস্যাদি তস্মিন্ স্থিতা জঘন্যগুণবৃত্তস্থা মূঢ়াঅধোগচ্ছন্তি পশ্বাদিষু উৎপদ্যন্তে তামসাঃ ॥ ১৭ ॥

পুরুষস্য প্রকৃতিস্থত্বস্বরূপেণ মিথ্যাজ্ঞানেন যুক্তস্য ভোগ্যেষু সুখদুঃখমোহাত্মকেষু সুখী দুঃখী মূঢ়োঽহমস্মীত্যেবং রূপো যঃ সঙ্গস্তৎকারণং পুরুষস্য সদসদ্যোনিজন্মপ্রাপ্তিলক্ষণস্য সংসারস্যেতি সমাসেন পূর্ব্বাধ্যায়ে যদুক্তং তদিহ সত্ত্বং রজস্তমইতিগুণাঃ প্রকৃতিসম্ভবা-ইত্যতআরভ্য গুণস্বরূপং গুণবৃত্তত্বং স্ববৃত্তেন চ গুণানাং বন্ধকত্বং গুণবৃত্তনিবদ্ধস্য চ পুরুষস্য যা গতিরিত্যেতৎ সর্ব্বং মিথ্যাজ্ঞানমজ্ঞানমূলং চ বন্ধকারণং বিস্তরেণোক্ত্বাধুনা সম্যক্ দর্শনাৎ মোক্ষো বক্তব্যইত্যাহ ভগবান্ নান্যমিতি। নান্যং কার্য্যকারণবিষয়াকারপরি-

## গিরিকৃত টীকা।

সাত্ত্বিকাদিজ্ঞানকর্ম্মফলানুক্তসংগ্রহার্থং সামান্যেনোপসংহরতি কিঞ্চেতি। বক্ষ্যমাণ-ফলদ্বারাপি সত্ত্বাদিষু জ্ঞানমিত্যর্থঃ, সত্ত্বগুণস্য বৃত্তং শোভনং জ্ঞানং কর্ম্ম বা তত্র তিষ্ঠন্তীতি, তথা রাজসা রজোগুণনিমিত্তে জ্ঞানে কর্ম্মণি বা নিরতাঃ ॥ ১৮ ॥

কস্মিন গুণে কথমিত্যাদি প্রশ্নান্ প্রত্যাখ্যায় গুণেভ্যো মোক্ষণং কথমিতি প্রত্যখ্যা-নার্থং বৃত্তানুবাদপূর্ব্বকং মিথ্যাজ্ঞাননিবর্ত্তকং সম্যগ্জ্ঞানং প্রস্তৌতি পুরুষস্যেত্যাদিনা। পুরুষস্য যা গতিঃ সা চেতি শেষঃ, মোক্ষো গুণেভ্যো বিশ্লেষপূর্ব্বকো ব্রহ্মভাবঃ। সম্যগ্-জ্ঞানোক্তিপরং শ্লোকং ব্যাখ্যাতুং প্রতীকমাদত্তে নান্যমিতি। সত্ত্বাদিকার্য্যবিষয়স্য গুণ-শব্দস্য বিবক্ষিতমর্থমাহ কার্য্যেতি। বিদ্যানন্তর্যামনুশব্দার্থঃ। অক্ষরার্থমুক্ত্বা। পূর্ব্বার্দ্ধ-স্যার্থিকমর্থমাহ গুণাএবেতি। সর্ব্বাবস্থাস্তৎকার্য্যকরণাকারপরিণতা ইতি যাবৎ, সর্ব্বকর্ম্মণাং কায়িকবাচিকমানসানাং বিহিতপ্রতিষিদ্ধানামিত্যর্থঃ. পরং ব্যতিরিক্তং। ব্যতিরেকমেব

## স্বামিকৃত টীকা।

লোকপর্য্যন্তান্ প্রাপ্নুবন্তি ইত্যর্থঃ, রাজসাস্তু তৃষ্ণাদ্যাকুলা মধ্যে তিষ্ঠন্তি মনুষ্যলোকএবোৎ-পদ্যন্তে, জঘন্যোনিকৃষ্টস্তমোগুণস্তস্য বৃত্তিঃ প্রমাদমোহাদিঃ তত্র স্থিতা অধোগচ্ছন্তি তমসো বৃত্তিতারতম্যাত্তামিস্রাদিষু নিরয়েষূৎপদ্যন্তে ॥ ১৮ ॥

-তদেবং প্রকৃতিগুণসঙ্গকৃতং সংসারপ্রপঞ্চমুক্ত্বা ইদানীং তদ্ব্যতিরেকেণ মোক্ষং দর্শ-য়তি নান্যমিতি। যদা তু দ্রষ্টা বিবেকী ভূত্বা বুদ্ধ্যাদ্যাকারপরিণতেভ্যোগুণেভ্যোঽন্যং

নান্যং গুণেভ্যঃ কর্ত্তারং যদা দ্রষ্টানুপশ্যতি।
গুণেভ্যশ্চ পরং বেত্তি মদ্ভাবং সোঽধিগচ্ছতি ॥ ১৯ ॥
গুণানেতানতীত্য ত্রীন্ দেহী দেহসমুদ্ভবান্।
জন্মমৃত্যুজরাদুঃখৈর্বিমুক্তোঽমৃতমশ্নুতে ॥ ২০ ॥

## শাঙ্করভাষ্যম্।

তেভ্যো গুণেভ্যঃ কর্ত্তারমন্যং যদা দ্রষ্টা বিদ্বান্ সমনুপশ্যতি গুণাএব সর্ব্বাবস্থাঃ সর্ব্বকর্ম্মণাং কর্ত্তার ইত্যেবং পশ্যতি গুণেভ্যশ্চ পরং গুণব্যাপারসাক্ষিভূতঞ্চেতি মদ্ভাবং মম ভাবং বাসুদেবত্বং বাসুদেবঃ সর্ব্বমিত্যেবং পশ্যন্ স দ্রষ্টাধিগচ্ছতি ॥ ১৯ ॥

কথমধিগচ্ছতীত্যুচ্যতে গুণেতি। গুণানেতান্ যথোক্তানতীত্য জীবন্নেবাতিক্রম্য মায়োপাধিভূতাংস্ত্রীন্ দেহী দেহসমুদ্ভবান্ দেহোৎপত্তিবীজভূতান্ জন্মমৃত্যুজরাদুঃখৈঃ জন্ম চ মৃত্যুশ্চ জরা চ দুঃখানি চ তৈর্জীবন্নেব মুক্তঃ সন্ বিদ্বানমৃতমশ্নুতে এবং মদ্ভাবমধিগচ্ছতীত্যর্থঃ ॥ ২০ ॥

## গিরিকৃত টীকা।

স্ফোরয়তি গুণেতি। নির্গুণং ব্রহ্মাত্মানমিত্যর্থঃ, মদ্ভাবং ব্রহ্মতামসৌ প্রাপ্নোতি ব্রহ্মভাবো ঽস্যাভিব্যজ্যতইত্যর্থঃ ॥ ১৯ ॥

অনর্থব্রাতরূপমপোহ্য বিদ্বান্ ব্রহ্মত্বং প্রাপ্নোত্যেতৎ প্রশ্নদ্বারা বিবৃণোতি কথমিত্যাদিনা। যথোক্তানিত্যেতদেব ব্যাচষ্টে মায়েতি। মায়ৈবোপাধিস্তদ্ভূতান্ তদাত্মনঃ সত্ত্বাদীননর্থরূপানিত্যর্থঃ। সমুদ্ভবন্তীতি সমুদ্ভবাঃ দেহস্য সমুদ্ভবা দেহসমুদ্ভবাঃ তানিতি ব্যুৎপত্তিং গৃহীত্বা ব্যাচষ্টে দেহোৎপত্তীতি। যো বিদ্বান্ অবিদ্যাময়ান্ গুণান্ জীবন্নেবাতিক্রম্য স্থিতস্তমেব বিশিনষ্টি জন্মেতি। পুরস্তাদ্বিস্তরেণোক্তস্য প্রসঙ্গাদত্র সংক্ষিপ্তস্য সম্যগ্জ্ঞানস্য ফলমুপসংহরতি এবমিতি ॥ ২০ ॥

## স্বামিকৃত টীকা।

কর্ত্তারং নানুপশ্যতি অপি তু গুণাএব কর্ম্মাণি কুর্ব্বন্তীতি পশ্যতি গুণেভ্যশ্চ পরং ব্যতিরিক্তং তৎসাক্ষিণমাত্মানং বেত্তি স তু মদ্ভাবং ব্রহ্মত্বমধিগচ্ছতি প্রাপ্নোতি ॥ ১৯ ॥

ততশ্চ গুণকৃতসর্ব্বানর্থনিবৃত্ত্যা কৃতার্থো ভবতীত্যাহ গুণানিতি। দেহাদ্যাকারঃ সমুদ্ভবঃ পরিণামো যেষাং তে দেহসমুদ্ভবাস্তানেতান্ ত্রীনপি গুণানতীত্যাতিক্রম্য তৎকৃতৈর্জন্মাদিভির্বিমুক্তঃ সন্নমৃতং পরমানন্দং প্রাপ্নোতি ॥ ২০ ॥

গুণানেতানতীত্যামৃতমশ্নুতইত্যেতচ্ছ্রুত্বা গুণাতীতস্য লক্ষণং তদাচারঞ্চ গুণাত্যয়োপায়ঞ্চ সম্যগ্বুভুৎসুরর্জুনউবাচ কৈরিতি। হে প্রভো কৈর্লিঙ্গৈঃ কীদৃশৈরাত্মচিহ্নৈর্গুণা-

অর্জ্জুনউবাচ—কৈর্লিঙ্গৈস্ত্রীন্ গুণানেতানতীতো ভবতি প্রভো।
কিমাচারঃ কথং চৈতাংস্ত্রীন্ গুণানতিবর্ত্ততে ॥ ২১ ॥
শ্রীভগবানুবাচ—প্রকাশঞ্চ প্রবৃত্তিঞ্চ মোহমেব চ পাণ্ডব।
ন দ্বেষ্টি সংপ্রবৃত্তানি ন নিবৃত্তানি কাঙ্ক্ষতি ॥ ২২ ॥

## শাঙ্করভাষ্যম্।

জীবন্নেব গুণানতীত্যামৃতমশ্নুতইতি প্রশ্নবীজং প্রতিলভ্য অর্জুনউবাচ কৈরিতি। কৈর্লিঙ্গৈশ্চিহ্নৈস্ত্রীনেতান্ ব্যাখ্যাতান্ গুণানতীতোঽতিক্রান্তো ভবতি প্রভো কিমাচারঃ কোঽস্যাচারইতি কিমাচারঃ কথং কেন চ প্রকারেণ এতাংস্ত্রীন্ অতিবর্ত্ততে ॥ ২১ ॥

গুণাতীতস্য লক্ষণং গুণাতীতত্বোপায়শ্চার্জ্জুনেন পৃষ্টোঽস্মিন্ শ্লোকে প্রশ্নদ্বয়ার্থং প্রতিবচনং ভগবান যত্তাবৎ কৈর্লিঙ্গৈর্যুক্তো গুণাতীতো ভবতি তচ্ছৃণু প্রকাশমিতি। প্রকাশঞ্চ সত্ত্বকার্য্যং প্রবৃত্তিঞ্চ রজঃকার্য্যং মোহমেব চ তমঃকার্য্যমিত্যেতানি ন দ্বেষ্টি সম্প্রবৃত্তানি সম্যগ্বিষয়ভাবেনোদ্ভূতানি মম তামসঃ প্রত্যয়ো জাতস্তেনাহং মূঢ়স্তথা রাজসী প্রবৃত্তির্মমোৎপন্না দুঃখাত্মিকা তেনাহং রজসা প্রবর্ত্তিতঃ প্রচলিতঃ স্বরূপাৎ কষ্টং মম বর্ত্ততে যোঽয়ং মৎস্বরূপাবস্থানাৎ ভ্রংশস্তথা সাত্ত্বিকো গুণঃ প্রকাশাত্মা মাং বিবেকিত্বমাপাদয়ন্ সুখেন চ সংজনয়ন্ মাং বধ্নাতীতি তানি দ্বেষ্টাঽসম্যগ্দর্শিত্বেন তদেবং গুণাতীতো ন দ্বেষ্টি

## গিরিকৃত টীকা।

সম্যগ্ধীফলং গুণাতিক্রমণপূর্ব্বকমমৃতত্বমুক্তং শ্রুত্বা মুক্তস্য লক্ষণং বক্তব্যমিতি প্রকৃতং বিবক্ষিতত্বাৎ প্রশ্নমুত্থাপয়তি জীবন্নেবেতি। যে ব্যাখ্যাতাঃ সত্ত্বাদয়োগুণাঃ তৎপরিণামভূতানধ্যাসানতিক্রান্তঃ সন্ কৈর্লিঙ্গৈর্জ্ঞাতোভবতি ইতি তানি বক্তব্যানি সিদ্ধ্যর্থং পূর্ব্বমনুষ্ঠেয়ানি পশ্চাদযত্নলভ্যানি লিঙ্গানি, কানি তানীতি পৃচ্ছতি কৈরিতি। যথেষ্টচেষ্টাব্যাবৃত্ত্যর্থং প্রশ্নান্তরং কিমাচারইতি। জ্ঞানস্য গুণাত্যয়োপায়ত্বোক্তত্বাদুপায়প্রকারজিজ্ঞাসয়া প্রশ্নান্তরং কথমিতি ॥ ২১ ॥

প্রশ্নস্বরূপমনূদ্য তদুত্তরং দর্শয়তি গুণাতীতস্যেতি। পৃষ্টোভগবানিতি সম্বন্ধঃ, কিংবৃত্তস্য ত্রিধাপ্রয়োগদর্শনাৎ প্রশ্নদ্বয়ার্থমিত্যুপলক্ষণং প্রশ্নত্রয়ার্থমিতি দ্রষ্টব্যং। উত্তরমব-

## স্বামিকৃত টীকা।

তীতো দেহী ভবতীতি লক্ষণপ্রশ্নঃ, ক আচারোঽস্যেতি কিমাচারঃ কথং বর্ত্ততইত্যর্থঃ, কথঞ্চ কেনোপায়েনৈতাংস্ত্রীনপি গুণানতীত্য বর্ত্ততে তৎ কথয়েত্যর্থঃ ॥ ২১ ॥

স্থিতপ্রজ্ঞস্য কা ভাষা ইত্যাদিনা দ্বিতীয়াধ্যায়ে পৃষ্টমেব দত্তোত্তরমপি পুনর্বিশেষবুভুৎসয়া পৃচ্ছতীতি জ্ঞাত্বা প্রকারান্তরেণ তস্য লক্ষণাদিকং শ্রীভগবানুবাচ প্রকাশঞ্চেত্যাদি

উদাসীনবদাসীনোগুণৈর্যো ন বিচাল্যতে।
গুণা বর্ত্তন্ত ইত্যেবং যোঽবতিষ্ঠতি নেঙ্গতে ॥ ২৩॥

## শাঙ্করভাষ্যম্।

সংপ্রবৃত্তানি যথা চ সাত্ত্বিকাদিপুরুষঃ সাত্ত্বিকাদিকার্য্যাণ্যাত্মানং প্রতি প্রকাশ্য নিবৃত্তানি কাঙ্ক্ষতি ন তথা গুণাতীতো নিবৃত্তানি কাঙ্ক্ষতীত্যর্থঃ ॥ ২২ ॥

এতন্ন পরপ্রত্যক্ষং লিঙ্গং কিং তর্হি স্বাত্মপ্রত্যক্ষত্বাদাত্মবিষয়মেব এতৎ লক্ষণং ন হি স্বাত্মবিষয়ং দ্বেষং আকাঙ্ক্ষা চাপরঃ পশ্যতি। অথেদানীং গুণাতীতঃ কিমাচারইতি প্রশ্নস্য প্রতিবচনমাহ উদাসীনেতি। উদাসীনবদ্যথোদাসীনো ন কস্যচিৎ পক্ষং ভজতে ন তথায়ং গুণাতীতত্বোপায়মার্গেঽবস্থিত আসীন আত্মবিদ্গুণৈঃ সমাসীনঃ বিচাল্যতে বিবেকদর্শনাবস্থাতঃ তদেতৎ স্ফুটীকরোতি গুণাঃ কার্য্যকারণবিষয়াকারপরিণতা অন্যোন্য-স্মিন্ বর্ত্তন্তইতি যোঽবতিষ্ঠতি ছন্দোভঙ্গভযাৎ পরস্মৈপদপ্রয়োগঃ যোঽনুতিষ্ঠতীতি পাঠা-ন্তরং নেঙ্গতে ন চলতি স্বরূপাবস্থএব ভবতীত্যর্থঃ ॥ ২৩ ॥

## গিরিকৃত টীকা।

তার্য্যানন্তরশ্লোকতাৎপর্য্যমাহ যত্তাবদিতি। তানি সম্যগ্দর্শী ন দ্বেষ্টি ইত্যুক্তমেব স্পষ্ট-য়িতুং নিষেধ্যমসম্যগ্দর্শিনো দ্বেষং তেষু প্রকটয়তি মমেত্যাদিনা। সম্যগ্দর্শিনঃ সম্প্রবৃ-ত্তেষু প্রকাশাদিষু দ্বেষাভাবমুপসংহরতি তদেবমিতি। ন নিবৃত্তানি ইত্যাদি ব্যাচষ্টে যথাচেতি। তেষামনাত্মীয়ত্বং সম্যক্ পশ্যন্নাত্মানুকূলপ্রতিকূলতারোপণেন নোদ্বিজতে তেভ্যশ্চ ন স্পৃহয়তীত্যর্থঃ ॥ ২২ ॥

স্বানুভবসিদ্ধং গুণাতীতস্য লক্ষণমুক্তমিত্যাহ এতন্নেতি। পরপ্রত্যক্ষত্বাভাবং প্রপঞ্চয়তি ন হীতি। আশ্রয়ো বিষয়ঃ। কৈর্লিঙ্গৈরিত্যাদি পরিহৃত্য দ্বিতীয়ং প্রশ্নং পরিহরতি অথেতি দৃষ্টান্তং ব্যাচষ্টে যথেতি। উপেক্ষকস্য পক্ষপাতত্বাযোগাদিত্যর্থঃ। আত্মবিদাত্মনঃ কৌট-

## স্বামিকৃত টীকা।

সপ্তভিস্তৈত্রকেন লক্ষণমাহ প্রকাশমিতি। প্রকাশঞ্চ সর্ব্বদ্বারেষু দেহেঽস্মিন্নিতি পূর্ব্বোক্তং সত্ত্বকার্য্যং প্রবৃত্তিঞ্চ রজঃকার্য্যং মোহঞ্চ তমঃকার্য্যং, উপলক্ষণার্থমেতৎ সত্ত্বাদীনাং সর্ব্বা-ণ্যপি কার্য্যাণি যথাযথং সংপ্রবৃত্তানি স্বতঃ প্রবৃত্তানি সন্তি দুঃখবুদ্ধ্যা যো ন দ্বেষ্টি নিবৃত্তানি চ সন্তি সুখবুদ্ধ্যা যো ন কাঙ্ক্ষতি গুণাতীতঃ স উচ্যত ইতি চতুর্থেনান্বয়ঃ ॥ ২২ ॥

তদেবং স্বসম্বেদ্যং গুণাতীতস্য লক্ষণমুক্ত্বা দ্বিতীয়প্রশ্নস্য কিমাচার ইত্যস্যোত্তরমাহ উদাসীনইতি ত্রিভিঃ। উদাসীনবৎ সাক্ষিতয়া আসীনঃ স্থিতঃ সন্ গুণৈগুণকার্য্যৈঃ সুখ-দুঃখাদিভির্ন যো বিচাল্যতে স্বরূপান্ন প্রচ্যাব্যতে অপিতু গুণাএব স্বকার্য্যেষু বর্ত্তন্তে এতৈ

সমদুঃখসুখঃ স্বস্থঃ সমলোষ্টাশ্মকাঞ্চনঃ।
তুল্যপ্রিয়াপ্রিয়ো ধীরস্তুল্যনিন্দাত্মসংস্তুতিঃ॥ ২৪॥

## শাঙ্করভাষ্যম্।

কিঞ্চ সমদুঃখেতি। সমদুঃখসুখঃ সমে দুঃখসুখে যস্য স সমদুঃখসুখঃ স্বস্থঃ স্বাত্মনি স্থিতঃ প্রসন্নঃ অবিক্রিয়ঃ সমলোষ্টাশ্মকাঞ্চনঃ লোষ্টঞ্চ অশ্ম চ কাঞ্চনঞ্চ সমানি যস্য স সমলোষ্টাশ্মকাঞ্চনঃ তুল্যপ্রিয়াপ্রিয়ঃ প্রিয়ঞ্চাপ্রিয়ঞ্চ প্রিযাপ্রিয়ে সমে যস্য সোঽয়ং তুল্যপ্রিয়াপ্রিয়ো ধীরো ধীমান্ তুল্যনিন্দাত্মসংস্তুতিঃ নিন্দা চ আত্মসংস্তুতিশ্চ তুল্যে নিন্দাত্মসংস্তুতী যস্য যতেঃ তুল্যনিন্দাত্মসংস্তুতিঃ॥ ২৪॥

কিঞ্চ মানাপমানয়োরিতি। মানাপমানয়োস্তুল্যঃ সমো নির্ব্বিকারঃ তুল্যো মিত্রারিপক্ষয়োঃ যদ্যপ্যুদাসীনা ভবন্তি কেচিৎ স্বাভিপ্রাযেণ তথাপি পরাভিপ্রায়েণ মিত্রারিপক্ষ-

## গিরিকৃত টীকা।

স্বাজ্ঞানেনাসীনোনিবৃত্তকর্ত্তৃত্বাভিমানোঽপ্রযতমানো ভবতীতি দার্ষ্টান্তিকমাহ তথেতি গুণাতীতত্বোপায়মার্গো জ্ঞানমেব শব্দাদিভির্বিষয়ৈরস্য কূটস্থত্বজ্ঞানাৎ প্রচ্যবনমাশঙ্ক্যাহ গুণৈরিতি। উপনতানাং বিষয়াণাং রাগদ্বেষদ্বারা প্রবর্ত্তিকত্বমিত্যেতৎ প্রপঞ্চয়তি তদেতদিতি। যোঽবতিষ্ঠতি সগুণাতীতইত্যুত্তরত্র সম্বন্ধঃ। অবপূর্ব্বস্য তিষ্ঠতেরাত্মনেপদে প্রয়োক্তব্যে কথং পরস্মৈপদমিত্যাশঙ্ক্যাহ ছন্দোভঙ্গেতি। পাঠান্তরে তু বাধিতানুবৃত্তিমাত্রমনুষ্ঠানং করণাকারপরিণতানাং গুণানাং বিষয়াকারপরিণতেষু তেষু প্রবৃত্তির্নমমেতি পশ্যন্ অচলত্বাং কূটস্থদৃষ্টিমাত্মনো ন জহাতীত্যাহ নেঙ্গতইতি॥ ২৩॥

গুণাতীতস্য লিঙ্গান্তরমাহ কিঞ্চেতি। তয়োঃ সমত্বং রাগদ্বেষানুৎপাদকতয়া স্বকীয়ত্বাভিমানানাস্পদত্বং প্রসন্নত্বংস্বাস্থ্যাদপ্রচ্যুতিরবিক্রিয়ত্বং বিদ্বদ্দৃষ্ট্যা প্রিয়াপ্রিয়য়োরসংভবেঽপি লোকদৃষ্টিমাশ্রিত্যাহ প্রিয়ঞ্চেতি। প্রিয়াপ্রিয়গ্রহণেন গৃহীতানাং কাঞ্চনাদীনাং ব্রাহ্মণপরিব্রাজকবৎ পৃথক্‌গ্রহণং নিন্দাদোষোক্তিরাত্মনোগুণকীর্ত্তনং॥ ২৪॥

ইতশ্চ গুণাতীতঃ শক্যোজ্ঞাতুমিত্যাহ কিঞ্চেতি। মানঃ সৎকারস্তিরস্কারোঽপমানঃ পরদৃষ্ট্যা যৌ সখিশত্রূ তয়োঃ পক্ষয়োর্নির্ব্বিশেষো ন কস্যচিৎ পক্ষে তিষ্ঠতীত্যাহ তুল্যইতি

## স্বামিকৃত টীকা।

র্মম সম্বন্ধএব নাস্তীতি বিবেকজ্ঞানেন যস্তূষ্ণীমবতিষ্ঠতি পরস্মৈপদমার্ষং নেঙ্গতে ন চলতি॥ ২৩॥

অপি চ সমেতি। সমে দুঃখসুখে যস্য, যতঃ স্বস্থঃ স্বরূপএব স্থিতঃ, অতএব সমানি লোষ্টাশ্মকাঞ্চনানি যস্য, তুল্যে প্রিয়াপ্রিয়ে সুখদুঃখহেতুভূতে যস্য, ধীরো ধীমান্, তুল্যা নিন্দা চ আত্মনঃ স্তুতিশ্চ যস্য॥ ২৪॥

মানাপমানয়োস্তুল্যস্তুল্যো মিত্রারিপক্ষয়োঃ।
সর্ব্বারম্ভপরিত্যাগী গুণাতীতঃ স উচ্যতে॥ ২৫॥
মাঞ্চ যোঽব্যভিচারেণ ভক্তিযোগেন সেবতে।
স গুণান্ সমতীত্যৈতান্ ব্রহ্মভূয়ায় কল্পতে॥ ২৬॥

## শাঙ্করভাষ্যম্।

যোবিব ভবন্তীতি অয়ন্তু তুল্যোমিত্রারিপক্ষয়োরিত্যাহ সর্ব্বারম্ভপরিত্যাগী দৃষ্টাদৃষ্টার্থানি কর্ম্মাণ্যারভ্যন্তে ইত্যারম্ভাঃ সর্ব্বানারম্ভান্ পরিত্যক্তুং শীলং অস্যেতি সর্ব্বারম্ভপরিত্যাগী দেহধারণমাত্রনিমিত্তব্যতিরেকেণ সর্ব্বকর্ম্মপরিত্যাগীত্যর্থঃ গুণাতীতঃ স উচ্যতে॥ ২৫॥

উদাসীনবদিত্যাদি গুণাতীতঃ স উচ্যতে ইত্যেতদন্তমুক্তং যাবদ্যত্নসাধ্যং তাবৎ সংন্যাসিনানুষ্ঠেয়ং গুণাতীতত্বসাধনং মুমুক্ষোঃ স্থিরীভূতন্তু স্বসংবেদ্যং সদ্গুণাতীতস্য যতের্লক্ষণং ভবতীতি অধুনা কথঞ্চ ত্রীন্ গুণান্ অতিবর্ত্তত ইতিপ্রশ্নস্য প্রতিবচনমাহ মাঞ্চেতি। মাঞ্চে-

## গিরিকৃত টীকা।

বিদুষো মিত্রাদিবুদ্ধ্যভাবাত্তুল্যোমিত্রারিপক্ষয়োরিত্যযুক্তমিত্যাশঙ্ক্যাহ যদ্যপীতি। সর্ব্বকর্ম্মত্যাগে দেহধারণমপি নিমিত্তাভাবান্ন স্যাদিত্যাশঙ্ক্যাহ দেহেতি। উক্তবিশেষণো গুণাতীতো জ্ঞাতব্য ইত্যাহ গুণেতি॥ ২৫॥

যত্নমুপেক্ষকত্বাদি তদ্বিদ্যোদয়াৎ পূর্ব্বং যত্নসাধ্যং বিদ্যাধিকারিণো জ্ঞানসাধনত্বেনানুষ্ঠেয়মুৎপন্নায়াস্তু বিদ্যায়াঃ জীবন্মুক্তস্যোক্তধর্ম্মজাতং স্থিরীভূতং স্বানুভবসিদ্ধং লক্ষণত্বেন তিষ্ঠতীত্যুক্তে ধর্ম্মজাতে বিভাগং দর্শয়তি উদাসীনবদিত্যাদিনা। প্রশ্নদ্বয়মেবং পরিহৃত্য তৃতীয়ং প্রশ্নং পরিহরতি অধুনেতি। মচ্ছব্দস্য সংসারিবিষয়ত্বং ব্যাবর্ত্তয়তি ঈশ্বরমিতি। তত্রৈব নারায়ণশব্দাম্মূর্ত্তিভেদো ব্যাবর্ত্ত্যতে। তস্য তাটস্থ্যং ব্যবচ্ছিনত্তি সর্ব্বেতি। মুখ্যামুখ্যাধিকারিভেদেন বিকল্পঃ। ভক্তিযোগস্য যাদৃচ্ছিকত্বং ব্যবচ্ছেত্তুমব্যভিচারেণেত্যুক্তং তদ্ব্যাচষ্টে নেতি। ভজনং পরমপ্রেম সএব যুজ্যতেঽনেনেতি যোগঃ তেন সেবতে পরাক্

## স্বামিকৃত টীকা।

অপি চ মানেতি। মানে অপমানে চ তুল্যঃ মিত্রপক্ষে অরিপক্ষে চ তুল্যঃ সর্ব্বান্ দৃষ্টাদৃষ্টার্থানারম্ভানুদ্যমান্ পরিত্যক্তুং শীলং যস্য সএবংভূতাচারযুক্তো গুণাতীতঃ উচ্যতে॥ ২৫॥

কথঞ্চৈতাংস্ত্রীন্ গুণানতিবর্ত্ততইত্যস্য প্রশ্নস্যোত্তরমাহ মাঞ্চেতি। চশব্দোঽবধারণার্থঃ মামেব পরমেশ্বরমব্যভিচারেণ একান্তেন ভক্তিযোগেন যঃ সেবতে সএতান্ গুণান্ সমতীত্য সম্যগতিক্রম্য ব্রহ্মভূয়ায় ব্রহ্মভাবায় মোক্ষায় কল্পতে সমর্থোভবতি॥ ২৬॥

ব্রহ্মণো হি প্রতিষ্ঠাহমমৃতস্যাব্যয়স্য চ।
শাশ্বতস্য চ ধর্ম্মস্য সুখস্যৈকান্তিকস্য চ ॥ ২৭ ॥

## শাঙ্করভাষ্যম্।

শ্বরং নারায়ণং সর্ব্বভূতহৃদয়াশ্রিতং যো যতিঃ কর্ম্মী বা অব্যভিচারেণ কদাচিৎ যো ব্যভিচরতি ন, ভক্তিযোগঃ ভজনং ভক্তিঃ সৈব যোগস্তেন বিবেকজ্ঞানাত্মকেন ভক্তিযোগেন জ্ঞানসমুদ্ভবেন সেবতে স গুণান্ সমতীত্য এতান্ যথোক্তান্ ব্রহ্মভূয়ায় ভবনং ভূয়ঃ ব্রহ্মভূয়ায় ব্রহ্মভবনায় মোক্ষায় কল্পতে সমর্থোভবতীত্যর্থঃ ॥ ২৬ ॥

কুতএতদিত্যুচ্যতে ব্রহ্মণঃ পরমাত্মনঃ হি যস্মাৎ প্রতিষ্ঠাহং প্রতিতিষ্ঠত্যস্মিন্নিতি প্রতিষ্ঠাহং প্রত্যগাত্মা কীদৃশস্য ব্রহ্মণঃ অমৃতস্যাবিনাশিন অব্যয়স্যাবিকারিণঃ শাশ্বতস্য চ নিত্যস্য ধর্ম্মস্য জ্ঞানযোগধর্ম্মপ্রাপ্যস্য সুখস্যানন্দরূপস্যৈকান্তিকস্যাব্যভিচারিণঃ অমৃতাদিস্বভাবস্য পরমানন্দরূপস্য পরমাত্মনঃ প্রত্যগাত্মা প্রতিষ্ঠা সম্যক্ জ্ঞানেন পরমাত্মতয়া নিশ্চীয়তে ইতি তদেতদ্ব্রহ্মভূয়ায় কল্পতে উক্তং যয়া চেশ্বরশক্ত্যা ভক্তানুগ্রহাদিপ্রয়োজনায় ব্রহ্ম প্রতিষ্ঠতে প্রবর্ত্ততে সা শক্তিঃ ব্রহ্মৈবাহং শক্তিশক্তিমতোরনন্যত্বাদিত্যভিপ্রায়োঽথবা

## গিরিকৃত টীকা।

চিত্ততাং বিনা সদানুসন্দধাতীত্যর্থঃ স ভগবদনুগ্রহকৃতসমাগধীসম্পন্নো বিদ্বান্ জীবন্নেবেত্যর্থঃ ॥ ২৬ ॥

বিদ্বান্ ব্রহ্মৈবেত্যত্র হেতুং পৃচ্ছতি কুতইতি। তত্রোত্তরমাহ উচ্যতইতি। ব্রহ্মশব্দস্যাসতি বাধকে মুখ্যার্থগ্রহণমভিপ্রেত্যাহ পরমাত্মনইতি। তৎপ্রতি প্রত্যগাত্মনো যৎ প্রতিষ্ঠাত্বং তদুপপাদয়তি প্রতিতিষ্ঠতীতি। যদ্ব্রহ্ম প্রত্যগাত্মনি প্রতিতিষ্ঠতীতি তৎ কিংবিশেষণমিত্যপেক্ষায়ামুক্তমমৃতস্যেত্যাদি। তত্রামৃতশব্দেনাব্যয়শব্দস্য পুনরুক্তিং পরিহরতি অবিকারিণইতি। নিত্যত্বমপক্ষয়রাহিত্যং তেন পূর্ব্বাভ্যামপৌনরুক্ত্যং। প্রতিবিম্বার্থস্য ধর্ম্মশব্দস্য ব্রহ্মণ্যনুপপত্তিমাশঙ্ক্যাহ জ্ঞানেতি। অর্থেন্দ্রিয়সম্বন্ধোত্থং সুখং ব্যাবর্ত্তয়িতুমৈকান্তিকস্যেত্যুক্তং। অক্ষরার্থমুক্ত্বা বাক্যার্থমাহ অমৃতাদীতি। প্রতিষ্ঠা যস্মাদিতি পূর্ব্বেণ সম্বন্ধঃ তস্মাৎ প্রত্যগাত্মা পরমাত্মতয়ানিশ্চীয়তে সম্যগ্জ্ঞানেনেতি যোজনা। অস্য শ্লোকস্য পূর্ব্বশ্লোকেনৈকবাক্যতামাহ তদেতদিতি। বিবক্ষিতং বাক্যার্থং প্রপঞ্চয়তি যয়েতি।

## স্বামিকৃত টীকা।

তত্র হেতুমাহ ব্রহ্মণো হীতি। হি যস্মাদ্ব্রহ্মণোঽহং প্রতিষ্ঠা প্রতিমা ঘনীভূতং ব্রহ্মৈবাহং যথা ঘনীভূতপ্রকাশএব সূর্য্যমণ্ডলং তদ্বদিত্যর্থঃ। তথা অব্যয়স্য নিত্যস্য অমৃতস্য চ মোক্ষস্য নিত্যমুক্তত্বাৎ, তথা তৎসাধনস্য শাশ্বতস্য ধর্ম্মস্য চ শুদ্ধসত্ত্বাত্মকত্বাৎ, তথা ঐকান্তি-

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং
যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসম্বাদে
গুণত্রয়বিভাগযোগোনাম
চতুর্দ্দশোঽধ্যায়ঃ ।

## শাঙ্করভাষ্যম্ ।

ব্রহ্মশব্দবাচ্যত্বাৎ সবিকল্পকং ব্রহ্ম তস্য ব্রহ্মণো নির্ব্বিকল্পকোঽহমেব নান্যঃ প্রতিষ্ঠাশ্রয়ঃ কিং বিশিষ্টস্যামরণধর্ম্মকস্যাব্যয়স্য ব্যয়রহিতস্য কিঞ্চ শাশ্বতস্য চ নিত্যস্য ধর্ম্মস্য জ্ঞাননিষ্ঠা-লক্ষণস্য সুখস্য তজ্জনিতস্যৈকান্তিকস্য চ প্রতিষ্ঠাহমিতি বর্ত্ততে ॥ ২৭ ॥

ইতি শ্রীভগবদ্গীতাভাষ্যে চতুর্দ্দশোঽধ্যায়ঃ ।

---

## গিরিকৃত টীকা ।

আসক্তিঃ ব্রহ্মেবেতি । কথং সামানাধিকরণ্যং তত্রাহ শক্তীতি । ব্যাখ্যানান্তরমাহ অথ-বেতি । বিশেষণানি পূর্ব্ববদপৌনরুক্ত্যানি নেতব্যানি । তদনেনাধ্যায়েন ক্ষেত্রক্ষেত্রজ্ঞসং-যোগস্য সংসারকারণত্বং পঞ্চপ্রশ্ননিরূপণদ্বারেণ চ সম্যগ্‌জ্ঞানস্য সকলসংসারনিবর্ত্তকত্ব-মিত্যেতৎ উপপাদয়তা মুমুক্ষোঃ যত্নসাধ্যং গুণৈরচাল্যত্বাদি মুক্তস্যাযত্নসিদ্ধং লক্ষণমিতি নির্দ্ধারিতঃ ॥ ২৭ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং চতুর্দ্দশোঽধ্যায়ঃ ।

## স্বামিকৃত টীকা ।

কস্য অখণ্ডিতস্য সুখস্য চ প্রতিষ্ঠাহং পরমানন্দরূপত্বাৎ, অতো মৎসেবিনো মদ্ভাবস্য-বশ্যম্ভাবিত্বাদ্যুক্তমেবোক্তং ব্রহ্মভূয়ায় কল্পতইতি ।

কৃষ্ণাধীনগুণাসঙ্গপ্রসঞ্জিতভবাম্বুধিং ।
সুখং তরতি মদ্ভক্ত ইত্যভাষি চতুর্দ্দশে ॥ ২৭ ॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং চতুর্দ্দশোঽধ্যায়ঃ ।

# শ্রীমদ্ভগবদ্গীতা।

## পঞ্চদশোঽধ্যায়ঃ।

শ্রীভগবানুবাচ—ঊর্দ্ধমূলমধঃশাখমশ্বত্থং প্রাহুরব্যয়ম্।
ছন্দাংসি যস্য পর্ণানি যস্তং বেদ স বেদবিৎ ॥ ১ ॥

### শাঙ্করভাষ্যম্।

যস্মান্মদধীনং কর্ম্মিণাং কর্ম্মফলং জ্ঞানিনাঞ্চ জ্ঞানযোগধর্ম্মপ্রাপ্যংসুখঞ্চ জ্ঞানফলমতো ভক্তিযোগেন মাং যে সেবন্তে মৎপ্রসাদাৎ জ্ঞানপ্রাপ্তিক্রমেণ গুণাতীতা মোক্ষং গচ্ছন্তি কিমু বক্তব্যমাত্মনস্তত্ত্বং সম্যক্ বিজানন্তইত্যতো ভগবানর্জুনেনাপৃষ্টমপ্যাত্মনস্তত্ত্বং বিবক্ষুরুবাচ ঊর্দ্ধমূলমিত্যাদি। তত্র তাবদ্বৃক্ষরূপককল্পনয়া বৈরাগ্যহেতোঃ সংসারস্বরূপং বর্ণয়তি বিরক্তস্য হি সংসারাৎ ভগবত্তত্ত্বজ্ঞানেঽধিকারো নান্যস্যেতি ঊর্দ্ধমূলমিতি। ঊর্দ্ধ-মূলং কালতঃ সূক্ষ্মত্বাৎ কারণত্বাৎ নিত্যত্বান্মহত্বাচ্চোর্দ্ধমুচ্যতে ব্রহ্মাব্যক্তমায়াশক্তিমত্তন্-

---

### গিরিকৃত টীকা।

জ্ঞানেন গুণাত্যযে দর্শিতে নাশিত্বে তেষাং বিজ্ঞানেনাত্যয়াদনাশিত্বে তেনাপি তদ্-যোগ্যত্বান্ন জ্ঞানং গুণাত্যয়হেতুরিত্যাশঙ্কাং নিরস্য সাক্ষাদেব শ্রবণাদিহেতুং সন্ন্যাসং বিধি-ৎসুঃ ব্রহ্মত্বস্য পরমপুরুষার্থতাঞ্চ বিবক্ষুরধ্যায়ান্তরমারভতে যস্মাদিতি। কর্ম্মিণো জ্ঞানি-নশ্চ শাস্ত্রেঽধিকৃতাঃ তত্র কর্ম্মিণাং কর্ম্মানুকূলং ফলমীশ্বরায়ত্তং ফলমত উপপত্তেরিতি ন্যায়াৎ জ্ঞানিনামপি তৎফলমীশ্বরায়ত্তমেব ততো হ্যস্য বন্ধবিপর্য্যয়াবিত্যুক্তত্বাৎ যস্মাদেবং তস্মাদ্যে ভক্ত্যাখ্যেন যোগেন মামেব সেবন্তে তে মৎপ্রসাদদ্বারা জ্ঞানংপ্রাপ্য তেন গুণাতীতা মুক্তা ভবন্তীতি স্থিতমিত্যর্থঃ, যেত্বাত্মনস্তত্ত্বমেব সন্দেহাদ্যপোহেন জানন্তি তেন জ্ঞানেন গুণাতীতাঃ সন্তো মুক্তিং গচ্ছন্তীতি কিমু বক্তব্যমিত্যর্থঃ। সিদ্ধমর্থমাহ কিমুবক্তব্যমিতি

### স্বামিকৃত টীকা।

বৈরাগ্যেণ বিনা জ্ঞানং ন চ ভক্তিরতঃ স্ফুটং। বৈরাগ্যোপস্করঃ জ্ঞানমীশঃ পঞ্চ-দশেঽদিশৎ। পূর্ব্বাধ্যায়ান্তে মাঞ্চ যোঽব্যভিচারেণ ভক্তিযোগেন সেবতইত্যাদিনা পরমেশ্বরমেকান্তভক্ত্যা ভজতস্তৎপ্রসাদলব্ধজ্ঞানেন ব্রহ্মভাবো ভবতি ইত্যুক্তং নচৈকান্ত-ভক্তির্জ্ঞানং বা অবিরক্তস্য সম্ভবতীতি বৈরাগ্যপূর্ব্বকং জ্ঞানমুপদেষ্টুকামঃ প্রথমং তাবৎ শার্দ্ধশ্লোকাভ্যাং সংসারস্বরূপং বৃক্ষং রূপকালঙ্কারেণ বর্ণয়ন্ শ্রীভগবানুবাচ। ঊর্দ্ধমুত্তমঃ

## শাঙ্করভাষ্যম্ ।

লমস্তেতি সোঽয়ং সংসারবৃক্ষ উর্দ্ধমূলঃ স্মৃতেশ্চ উর্দ্ধমূলোঽবাক্‌শাখইতি পুরাণে চাব্যক্তমূল-প্রভবস্তস্যৈবানুগ্রহোত্থিতঃ, বুদ্ধিস্কন্ধময়শ্চৈব ইন্দ্রিয়ান্তরকোটরঃ, মহাভূতপ্রশাখশ্চ বিষয়ৈঃ পত্রবাংস্তথা, ধর্ম্মাধর্ম্মসুপুষ্পশ্চ সুখদুঃখফলোদয়ঃ, আজীব্যঃ সর্ব্বভূতানাং ব্রহ্ম-বৃক্ষঃ সনাতনঃ, এতদ্ব্রহ্মবনঞ্চৈব ব্রহ্মাচরতি নিত্যশঃ, এতৎ ছিত্ত্বা চ ভিত্ত্বা চ জ্ঞানেন পরমাসিনা, ততশ্চাত্মরতিং প্রাপ্য যস্মান্ন বর্ত্ততে পুনঃ, ইত্যাদি তমূর্দ্ধমূলং সংসারং মায়া-ময়ং বৃক্ষমধঃশাখং মহদহঙ্কারতন্মাত্রাদয়ঃ শাখাঃ ইবাস্যাধো ভবন্তীতি সোঽয়মধঃশাখস্তমধঃ-শাখং ন শ্বোঽপি স্থাস্যতে ইত্যশ্বত্থস্তং ক্ষণপ্রধ্বংসিনমশ্বত্থং প্রাহুঃ কথয়ন্তি শ্রুতিবাদা ইত্য-ব্যয়ং সংসারং মায়াময়ং অনাদিকালং প্রবৃত্তিত্বাৎ সোঽয়ং সংসারবৃক্ষোঽব্যয়ঃ অনাদ্যন্ত-

## গিরিকৃত টীকা।

আত্মতত্ত্বাজ্ঞানং যতঃ সংসারহেতুঃ জ্ঞানং মোক্ষানুকূলমতোঽর্জ্জুনেন কিন্তদিত্যপৃষ্টমপি তত্ত্বং ভগবানুক্তবান্ প্রশ্নাভাবেঽপি তস্য তদ্ব্যুৎপাদনাভিমানাদিত্যাহ অতইতি। তত্ত্বেতি বক্ষ্যতে। কিমিতি সংসারোবর্ণ্যতে তত্রাহ তত্রেতি। অধ্যায়াদিঃ সপ্তম্যর্থঃ। বৈরা-গ্যমপি কিমিতি মৃগ্যতে তত্রাহ বিরক্তস্যেতি। ইতি বৈরাগ্যার্থ সংসারবর্ণনমিতিশেষঃ। নাশসম্ভাবনার্থৈ বৃক্ষরূপকং বন্ধহেতোর্দর্শয়তি উর্দ্ধমূলমিতি। কথং কালতঃ সূক্ষ্মত্বং তদাহ কারণত্বাদিতি। তদেব কথং কার্য্যাপেক্ষয়া নিয়তপূর্ব্বভাবিত্বাদনাদিত্বাদিত্যাহ নিত্যত্বাদিতি। সর্ব্বব্যাপিত্বাচ্চোৎকর্ষং সম্ভাবয়তি মহত্বাচ্চেতি। উর্দ্ধমুচ্ছ্রিতমুৎকৃষ্ট-মিতি যাবৎ। তস্য কূটস্থস্য কথং মূলত্বমিত্যাশঙ্ক্যাহ অব্যক্তেতি স্মৃতিমূলত্বেন শ্রুতিমুদা-হরতি শ্রুতেশ্চেতি। অর্ব্বাচীনোনিকৃষ্টাঃ শাখাইব মহদাদ্যা যস্য স তথা। প্রকৃতে সংসার-বৃক্ষে পুরাণসম্মতিমাহ পুরাণে চেতি। অব্যক্তমব্যাকৃতং তদেবমূলং তস্মাৎ প্রভবনং প্রভবোযস্য স তথা তস্যৈব মূলস্যাব্যক্তস্যানুগ্রহাদতিদৃঢ়ত্বাদুত্থিতঃ সম্বর্দ্ধিতঃ। তস্য লৌকিকবৃক্ষসাধর্ম্ম্যমাহ বুদ্ধীত্যাদিনা। বৃক্ষস্য হি শাখাঃ স্কন্ধাদুদ্ভবন্তি সংসারস্যচ বুদ্ধেঃ সকাশান্নানাপরিণামা জায়ন্তে তেন বুদ্ধিরেব স্কন্ধস্তন্ময়স্তৎপ্রচুরোঽয়ং সংসারতরুঃ ইন্দ্রিয়া-ণামন্তরাণি ছিদ্রাণি কোটরাণি যস্য স তথা মহান্তি ভূতানি পৃথিব্যাদীন্যাকাশান্তানি বিশা-খস্তম্বো যস্য তথা আজীব্যত্বমুপজীব্যত্বং ব্রহ্মণাধিষ্ঠিতোবৃক্ষো ব্রহ্মবৃক্ষস্তথাপি জ্ঞানং বিনা-চ্ছেত্তুমশক্যতয়া সনাতনঃ চিরন্তনঃ এতচ্চ ব্রহ্মণঃ পরস্যাত্মনো বনং বননীয়ং সম্ভজনীয়ম-

## স্বামিকৃত টীকা।

ক্ষরাক্ষরাভ্যামুৎকৃষ্টঃ পুরুষোত্তমো মূলং যস্য তং। অধইতি ততোঽর্ব্বাচীনাঃ কার্য্যোপা-ধয়ো হিরণ্যগর্ভাদয়োগৃহ্যন্তে তে তু শাখা ইব শাখা যস্য তং। বিনশ্বরত্বেন শ্বঃপ্রভাতপর্য্যন্ত-মপি ন স্থাস্যতীতি বিশ্বাসানর্হত্বাদশ্বত্থং প্রাহুঃ। প্রবাহরূপেণাবিচ্ছেদাদব্যয়ঞ্চ প্রাহুঃ,

অধশ্চোর্দ্ধঞ্চ প্রসৃতাস্তস্য শাখা গুণপ্রবৃদ্ধা বিষয়প্রবালাঃ।
অধশ্চ মূলান্যনুসন্ততানি কর্ম্মানুবন্ধীনি মনুষ্যলোকে ॥ ২ ॥

## শাঙ্করভাষ্যম্।

দেহাদিসন্তানাশ্রয়ো হি সুপ্রসিদ্ধস্তমব্যয়ং তস্যৈব সংসারবৃক্ষস্য ইদমন্যদ্বিশেষণান্তরং ছন্দাংসি যস্য পর্ণানি ছন্দাংসি ছাদনাদস্য ঋগ্‌যজুঃসামলক্ষণানি যস্য সংসারবৃক্ষস্যপর্ণানীব পর্ণানি যথা বৃক্ষস্য রক্ষণার্থানি পর্ণানি তথা বেদাঃ সংসারবৃক্ষপরিরক্ষণার্থধর্ম্মতদ্ধেতুফল-প্রকাশনার্থত্বাৎ যথা ব্যাখ্যাতং সংসারবৃক্ষং সমূলং যস্তং বেদ স বেদবিদ্বেদার্থবিদিত্যর্থঃ ॥১॥

নহি সংসারবৃক্ষাদস্মাৎ সমূলাৎ জ্ঞেয়োঽন্যোঽণুমাত্রোঽপ্যবশিষ্টোঽস্ত্যতঃ সর্ব্বজ্ঞঃ স যো

## গিরিকৃত টীকা।

ব্রহ্ম হি প্রতিষ্ঠিতং তস্য বৃক্ষস্য সংসারখ্যস্য তদেব ব্রহ্মসারভূতং অথবাস্য ব্রহ্মবৃক্ষস্যানব চ্ছিন্নস্য সংসারমণ্ডলস্য তদেতদ্ব্রহ্ম নবমিব বনং বননীয়ং সম্ভজনীয়ং ন হি ব্রহ্মাতিরিক্তং সংসারস্যাস্পদমস্তি ব্রহ্মৈবাবিদ্যয়া সংসরতীত্যভ্যুপগমাদিত্যর্থঃ। অহং ব্রহ্মেতি দৃঢ়জ্ঞা-নেনোক্তং সংসারবৃক্ষংছিত্বা প্রতিবন্ধকাভাবাদাত্মনিষ্ঠোভূত্বা পুনরাবৃত্তিরহিতং কৈবল্যং প্রাপ্নোতীত্যাহ এতদিতি। অধঃশাখমিত্যেতদ্ব্যাচষ্টে মহদিতি। আদিশব্দেনেন্দ্রিয়াদি-সংগ্রহঃ। সংসারবৃক্ষস্যাতিচঞ্চলত্বে প্রমাণমাহ প্রাহুরিতি। ক্ষণধ্বংসিনোঽব্যয়ত্বং বিরুদ্ধ-মিত্যাশঙ্ক্যাহ সংসারেতি। তদেবোপপাদয়তি অনাদীতি। ছাদনং রক্ষণং প্রাবরণং বা কর্ম্মকাণ্ডানি স্বর্গারোহাবরোহফলানি নানাবিধার্থবাদযুক্তানি সংসারবৃক্ষং রক্ষন্তি তন্নিষ্ঠং দোষাঞ্চাবৃণ্বন্তি তেন তানি ছন্দাংসি পর্ণানীব ভবন্তীত্যর্থঃ। তদেব প্রপঞ্চয়তি যথেতি। উক্তেঽর্থে হেতুমাহ ধর্ম্মেতি। কর্ম্মকাণ্ডানাং বেদানামিতিশেষঃ। কর্ম্মব্রহ্মাখ্যসর্ব্ববেদা-র্থস্য তত্রান্তর্ভাবমুপেত্য ব্যাচষ্টে বেদার্থেতি ॥ ১ ॥

সমূলসংসারবৃক্ষজ্ঞানে তু ফলং হিত্বা মূলমেব নিকৃষ্য জ্ঞাতুং শক্যমিতি তৎজ্ঞানার্থং

## স্বামিকৃত টীকা।

ঊর্দ্ধমূলোঽবাক্‌শাখএষোঽশ্বত্থঃ সনাতনইত্যাদ্যাঃ শ্রুতয়ঃ। ছন্দাংসি বেদা যস্য পর্ণানি ধর্ম্মাধর্ম্মপ্রতিপাদনদ্বারেণ ছায়াস্থানীয়ৈঃ কর্ম্মফলৈঃ সংসারবৃক্ষস্য সর্ব্বাজীবাশ্রয়ণীয়ত্বপ্রতি-পাদনাৎ পর্ণস্থানীয়া বেদাঃ। যস্তমেবম্ভূতমশ্বত্থং বেদ সএব বেদার্থবিৎ। সংসার-প্রপঞ্চবৃক্ষস্য মূলমীশ্বরো ব্রহ্মাদয়স্তদংশাঃ শাখাস্থানীয়াঃ স চ সংসারবৃক্ষো বিনশ্বরঃ প্রবাহরূপেণ নিত্যশ্চ বেদোক্তৈঃ কর্ম্মভিঃ সেব্যতামাপাদিতশ্চ ইত্যেতাবানেব হি বেদার্থঃ অতএবং বিদ্বান্ বেদবিদিতি স্তূয়তে ॥ ১ ॥

কিঞ্চ অধশ্চেতি। হিরণ্যগর্ভাদয়ঃ কার্য্যোপাধয়োজীবাঃ শাখাস্থানীয়ত্বেনোক্তাস্তেষু

## শাঙ্করভাষ্যম্।

বেদ স বেদার্থবিদিতি যস্মাৎ সংসারবৃক্ষে সমূলে সর্ব্বজ্ঞেয়ং অন্তর্ভবতীতি তস্মাৎসমূলবৃক্ষজ্ঞানং স্তৌতি তস্যৈব সংসারবৃক্ষস্যাপরাবয়বব্যাপারকল্পনোচ্যতে অধো মনুষ্যাদিভ্যো যাবৎ স্থাবরমূর্দ্ধঞ্চ যাবদ্ব্রহ্মা বিশ্বসৃজোধামইত্যেতদন্তং যথাকর্ম্ম যথাশ্রুতং জ্ঞানকর্ম্মফলানি তস্য বৃক্ষস্য শাখা ইব শাখাঃ প্রসৃতাঃ প্রগতাগুণপ্রবৃদ্ধাঃ গুণৈঃ সত্ত্বরজস্তমোভিঃ প্রবৃদ্ধাঃ স্থূলীকৃতা উপাদানভূতৈর্ব্বিষয়প্রবালাঃ বিষয়াঃ শব্দাদয়ঃ প্রবালা ইব দেহাদিকর্ম্মফলেভ্যঃ শাখাভ্যঃ অঙ্কুরীভবন্তীব তেন বিষয়প্রবালাঃ শাখাঃ সংসারবৃক্ষস্য পরমমূলমুপাদানং পূর্ব্বমুক্তমথেদানীং কর্ম্মফলজনিতরাগদ্বেষাদিবাসনামূলানীব ধর্ম্মাধর্ম্মপ্রবৃত্তিকারণান্যবান্তরভাবীনি তান্যধশ্চ দেহাদ্যপেক্ষয়া মূলান্যনুসন্ততানি অনুপ্রবিষ্টানি কর্ম্মানুবন্ধীনি কর্ম্ম ধর্ম্মাধর্ম্মলক্ষণমনুবন্ধঃ পশ্চাদ্ভাবী যেষামুদ্ভূতিমনুভবন্তীতি তানি কর্ম্মানুবন্ধীনি মনুষ্যলোকে বিশেষতোঽত্র হি মনুষ্যাণাং ধর্ম্মাধিকারঃ প্রসিদ্ধঃ ॥ ২ ॥

## গিরিকৃত টীকা।

প্রষভিতব্যমিতি মত্বা তজ্জ্ঞানস্তুতিবত্র বিবক্ষিতেত্যাহ ন হীতি। অবয়বসম্বন্ধিস্যপরা প্রাগুক্তাদতিরিক্তা কল্পনা ইতিযাবৎ। আমনুষ্যলোকাদাবিরিঞ্চেরিত্যধঃশব্দার্থমাহ মনুষ্যাদিভ্য ইতি তস্মাদেবাবভ্যাসত্যলোকাদিত্যূর্দ্ধশব্দার্থমাহ যাবদিতি। শাখাশব্দার্থং দর্শয়তি জ্ঞানেতি। তেষাং হেত্বনুগুণত্বেন বহুবিধত্বং সূচয়তি যথেতি। প্রত্যক্ষাণাং শব্দাদিবিষয়াণাং প্রবালত্বং শাখাসু পল্লবত্বং অঙ্কুরত্বং স্ফোরয়তি দেহাদীতি। ঊর্দ্ধমূলমিত্যত্র সংসারবৃক্ষস্য মূলমুক্তং কিমিদানীমধশ্চ মূলানীত্যুচ্যতে তত্রাহ সংসারেতি। অনুপ্রবিষ্টত্বং সর্ব্বেষু লিঙ্গেষনুগততয়া সন্ততত্বমবিচ্ছিন্নত্বং রাগাদীনাঞ্চ কর্ম্মফলজন্যত্বং প্রকটয়তি কর্ম্মেতি। কর্ম্মণাং রাগাদীনাং মিথো হেতুহেতুমত্ত্বং তেষাং তথাত্বেনানবচ্ছিন্নতয়া প্রবৃত্তিবিশেষতোমনুষ্যলোকে ভবতীত্যত্র হেতুমাহ অত্রহীতি। কর্ম্মব্যুৎপত্ত্যা প্রাণিনিকায়ো লোকঃ মনুষ্যশ্চাসৌ লোকশ্চেত্যধিকৃতোব্রাহ্মণ্যাদিবিশিষ্টো দেহোমনুষ্যলোকঃ ॥ ২ ॥

## স্বামিকৃত টীকা।

চ যে দুষ্কৃতিনস্তেঽধঃ পশ্বাদিযোনিষু প্রসৃতা বিস্তারং গতাঃ সুকৃতিনশ্চোর্দ্ধং দেবাদিযোনিষু প্রসৃতাস্তস্য সংসারবৃক্ষস্য শাখাঃ। কিঞ্চ গুণৈঃ সত্ত্বাদিবৃত্তিভির্জ্জলসেচনৈরিব যথাযথং প্রবৃদ্ধা বৃদ্ধিং প্রাপ্তাঃ। কিঞ্চ বিষয়া রূপাদয়ঃ প্রবালাঃ পল্লবস্থানীয়া যাসাং শাখাপ্রস্থানীয়াভিরিন্দ্রিয়বৃত্তিভিঃ সংযুক্তত্বাৎ। কিঞ্চ অধশ্চ চশব্দাদূর্দ্ধঞ্চ মূলানি অনুসন্ততানি বিরূঢ়ানি মুখ্যং মূলমীশ্বরএব ইমানি ত্বন্তরাজানি মূলানি তত্তদ্ভোগবাসনালক্ষণানি। তেষাং কার্য্যমাহ মনুষ্যলোকে কর্ম্মানুবন্ধীনি ইতি। কর্ম্ম এব অনুবন্ধি উত্তরভাবি যেষাং তানি ঊর্দ্ধাধোলোকেষুপভুক্ততত্তৎভোগবাসনাদিভির্হি কর্ম্মক্ষয়ে মনুষ্য-

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा।
अश्वत्थमेनं सुविरूढ़मूलमसङ्गशस्त्रेण दृढ़ेन छित्त्वा ॥ ३॥

## শাঙ্করভাষ্যম্।

যত্ত্বয়ং বর্ণিতঃ সংসারবৃক্ষঃ ন রূপেতি। ন রূপমস্য ইহ যথা বর্ণিতং তথা নৈবোপলভ্যতে স্বপ্নমরীচ্যুদকমায়াগন্ধর্বনগরসমত্বাৎ দৃষ্টনষ্টস্বরূপো হি স ইত্যতএবান্তো ন পর্য্যন্তো নিষ্ঠা সমাপ্তির্ব্বা বিদ্যতে তথা ন চাদিরিত আরভ্যায়ং প্রবৃত্তইতি ন কেনচিদ্গম্যতে ন চ সম্প্রতিষ্ঠা স্থিতির্ম্মধ্যমস্য ন কেনচিদুপলভ্যতে অশ্বত্থমেনং যথোক্তং সুবিরূঢ়মূলং সুষ্ঠু বিরূঢ়ানি বিরোহং গতানি মূলানি যস্য তমেনং সুবিরূঢ়মূলমসঙ্গশস্ত্রেণ অসঙ্গঃ অসঙ্গতা পুত্রবিত্তলোকৈষণাদিভ্যো ব্যুত্থানং তেনাসংগশস্ত্রেণ দৃঢ়েন পরমাত্মাভিমুখনিশ্চয়দৃঢ়ীকৃতেন পুনঃ পুনর্ব্বিবেকাভ্যাসাশ্মনিশিতেন ছিত্ত্বা সংসারবৃক্ষং সবীজমুদ্ধৃত্য ॥ ৩ ॥

## গিরিকৃত টীকা।

পুনঃ পুনঃ রাগাদিনা প্রবৃত্তত্বেনানাদিত্বান্নসংসারবৃক্ষঃ স্বয়মুচ্ছিদ্যতে ন চোচ্ছেত্তুংশক্যতে কেনাপীত্যাশঙ্ক্যাহ যত্ত্বিতি। যথাপূর্ব্বং বর্ণিতং যথাচ লোকে প্রসিদ্ধং তথাস্য রূপমিহ শাস্ত্রেঽনুনীয়তে তথা চাস্য জ্ঞানাপনোদ্যত্বং যুক্তমিত্যাহ যথেতি। তস্যাপ্রমিতত্বে হেতুমাহ স্বপ্নেতি। তস্য স্বপ্নাদিসমত্বে দৃষ্টনষ্টস্বরূপত্বং হেতুং করোতি দৃষ্টেতি। ইত্যমেয়তেতি শেষঃ। তদেবামেয়ত্বং হেতুং কৃত্বাবসানমপি তস্যান ভাতীত্যাহ অতএবেতি। জ্ঞানং বিনা ভ্রান্তিবাসনাকর্ম্মণামন্যোন্যনিমিত্তত্বান্নাবসানমস্তীত্যর্থঃ। ইদং প্রথমত্বমপি নাস্য পরিচ্ছেত্তুং শক্যমিত্যাহ তথেতি। আদ্যন্তবন্মধ্যমপি নাস্য প্রামাণিকমিত্যাহ মধ্যমিতি। সংসারবৃক্ষস্যাশ্বত্থশব্দিতস্য ক্ষণভঙ্গুরস্য স্বয়মেবোচ্ছেদসম্ভবাত্তদুচ্ছেদার্থং ন প্রযতিতব্যমিত্যাশঙ্ক্যাহ অশ্বত্থমিতি। ব্যুত্থানং বৈরাগ্যপূর্ব্বকং পারিব্রজ্যং। দৃঢ়ীকৃতত্বমেব বিবেকপূর্ব্বত্বেন স্ফুটয়তি পুনঃ পুনরিতি ॥ ৩ ॥

## স্বামিকৃত টীকা।

লোকপ্রাপ্তানাং তত্তদনুরূপেষু কর্ম্মসু প্রবৃত্তির্ভবতি তস্মিন্নেব হি কর্ম্মাধিকারো নান্যেষু অতো মনুষ্যলোক ইত্যুক্তং ॥ ২ ॥

কিঞ্চ ন রূপমিতি। ইহ সংসারে স্থিতৈঃ প্রাণিভিরস্য সংসারবৃক্ষস্য তথা ঊর্দ্ধমূলত্বাদিপ্রকারেণ রূপং নোপলভ্যতে, স চান্তোঽবসানমপর্য্যন্তত্বাৎ, নচাদিরনাদিত্বাৎ, নচ সংপ্রতিষ্ঠা স্থিতিঃ কথং তিষ্ঠতীতি নোপলভ্যতে যস্মাদেবম্ভূতোঽয়ং সংসারবৃক্ষো দুরবচ্ছেদোঽনর্থকরশ্চ তস্মাদেনং দৃঢ়েণ বৈরাগ্যেণ শস্ত্রেণ ছিত্ত্বা তত্ত্বজ্ঞানে যতেতেত্যাহ অশ্বত্থমেনমিতি সার্দ্ধেন। এনমশ্বত্থংসুবিরূঢ়মূলমত্যন্তবদ্ধমূলং সন্তং অসঙ্গোঽহংমমতাত্যাগস্তেন শস্ত্রেণ দৃঢ়েন সম্যগ্বিচারেণ ছিত্ত্বা পৃথক্ কৃত্য ॥ ৩ ॥

ততঃ পদং তৎ পরমার্গিতব্যং যস্মিন্ গতা ন নিবর্ত্তন্তি ভূয়ঃ।
তমেব চাদ্যং পুরুষং প্রপদ্যে যতঃ প্রবৃত্তিঃ প্রসৃতা পুরাণী ॥ ৪ ॥
নির্ম্মানমোহা জিতসঙ্গদোষা অধ্যাত্মনিত্যা বিনিবৃত্তকামাঃ।
দ্বন্দ্বৈর্বিমুক্তাঃ সুখদুঃখসংজ্ঞৈর্গচ্ছন্ত্যমূঢ়াঃ পদমব্যয়ং তৎ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

ততইতি। ততঃ পশ্চাৎ যৎ পদং বৈষ্ণবং তৎ পরিমার্গিতব্যং পরিমার্গণমন্বেষণং জ্ঞাতব্যমিত্যর্থঃ। যস্মিন্ পদে গতাঃ প্রবিষ্টা ন নিবর্ত্তন্তি নাবর্ত্তন্তে ভূয়ঃ পুনঃ সংসারায় কথং পরিমার্গিতব্যমিত্যাহ তমেব চ যঃ পদশব্দেনোক্ত আদ্যমাদৌ ভবং আদ্যং পুরুষং প্রপদ্যইত্যেবং পরিমার্গিতব্যং তচ্ছরণতয়েত্যর্থঃ কোঽসৌ পুরুষইত্যুচ্যতে যতোযস্মাৎ পুরুষাৎ সংসারমায়াবৃক্ষপ্রবৃত্তিঃ প্রসৃতা নিঃসৃতৈন্দ্রজালিকাদিবৎ মায়া পুরাণী চিরন্তনী ॥৪॥

কথংভূতাস্তৎ পদং গচ্ছন্তীত্যুচ্যতে নির্ম্মানেতি। নির্ম্মানমোহা মানশ্চ মোহশ্চ মানমোহৌ তৌ নির্গতৌ যেভ্যস্তে নির্ম্মানমোহাঃ মানমোহবর্জ্জিতাঃ জিতসঙ্গদোষাঃ সঙ্গএব দোষঃ সঙ্গদোষঃ জিতঃ সংঙ্গদোষো যৈস্তে জিতসঙ্গদোষা অধ্যাত্মনিত্যাঃ পরমাত্মস্বরূপালোচনে নিত্যাস্তৎপরা বিনিবৃত্তকামাঃ বিশেষতো নির্লেপেন নিবৃত্তাঃ কামা যেষাং তে বিনিবৃত্তকামা যতয়ঃ সন্ন্যাসিনো দ্বন্দ্বৈঃ প্রিয়াপ্রিয়াদিভির্ব্বিমুক্তাঃ সুখদুঃখসংজ্ঞৈঃ পরিত্যক্তা গচ্ছন্ত্যমূঢ়া মোহবর্জিতাঃ পদমব্যয়ং তদ্‌যথোক্তং ॥ ৫ ॥

## গিরিকৃত টীকা।

উদ্ধৃত্য কিং কর্ত্তব্যং তদাহ ততইতি। পশ্চাদশ্বত্থাদূর্দ্ধং ব্যবস্থিতমিত্যর্থঃ। কিন্তৎ পদং যদন্বিষ্য জ্ঞাতব্যং তদাহ যস্মিন্নিতি। যেন সর্ব্বং পূর্ণং পুরি বা শয়ানং পুরুষং প্রপদ্যে শরণং গতোঽস্মীত্যর্থঃ। বিবর্ত্তবাদানুবোধিনং দৃষ্টান্তমাহ ঐন্দ্রেতি ॥ ৪ ॥

পরিমার্গণপূর্ব্বকং বৈষ্ণবং পদং গচ্ছতাং সজ্ঞান্তবান্যাকাঙ্ক্ষাপূর্ব্বকং কথয়তি কথমিত্যাদিনা। মানোঽহঙ্কারঃ মোহস্ত্ববিবেকঃ জিতসঙ্গদোষাঃ শত্রুমিত্রসন্নিধাবপি দ্বেষপ্রীতি-

## স্বামিকৃত টীকা।

ততইতি। ততস্তস্য মূলভূতং তৎপদং বস্তু পরিমার্গিতব্যং অন্বেষ্টব্যং কীদৃশং যস্মিন্গতা যৎপদং প্রাপ্তাঃ সন্তো ভূয়ো ন নিবর্ত্তন্তি নাবর্ত্তন্তইত্যর্থঃ। অন্বেষণপ্রকারমেবাহ তমেবেতি। যতএষা পুরাণী চিরন্তনী সংসারপ্রবৃত্তিঃ প্রসৃতা বিসৃতা তমেব চাদ্যং পুরুষং প্রপদ্যে শরণং ব্রজামি ইত্যেবমেকান্তভক্ত্যা অন্বেষ্টব্যমিত্যর্থঃ ॥ ৪ ॥

তৎপ্রাপ্তৌ সাধনান্তরাণি দর্শয়ন্নাহ নির্ম্মানেতি। নির্গতৌ মানমোহৌ অহঙ্কারমিথ্যাভিনিবেশৌ যেভ্যস্তে আত্মজ্ঞানে নিত্যাঃ পরিনিষ্ঠিতাঃ, বিশেষেণ নিবৃত্তঃ কামো-

**ন তদ্ভাসয়তে সূর্য্যো ন শশাঙ্কো ন পাবকঃ।**
**যদ্গত্বা ন নিবর্ত্তন্তে তদ্ধাম পরমং মম ॥ ৬ ॥**

## শাঙ্করভাষ্যম্।

তদেব পদং পুনর্ব্বিশিষ্যতে নেতি। তদ্ধামেতি ব্যবহিতেন ধাম্না সম্বন্ধঃ ধাম তেজো-রূপং পদং ন ভাসয়তে সূর্য্য আদিত্যঃ সর্ব্বাবভাসনশক্তিমত্ত্বেঽপি সতি তথা ন শশাঙ্কশ্চন্দ্রো ন চ পাবকো নাগ্নিরপি, যদ্ধাম বৈষ্ণবং পদং গত্বা প্রাপ্য ন নিবর্ত্তন্তে যচ্চ সূর্য্যাদিভির্ন ভাসয়তে তদ্ধাম পদং পরমং বিষ্ণোর্মম পদং যৎ গত্বা ন নিবর্ত্তন্তইত্যুক্তং ॥ ৬ ॥

## গিরিকৃত টীকা।

বর্জ্জিতাইত্যর্থঃ। তৎপরত্বং শ্রবণাদিনিষ্ঠত্বং, সন্ন্যাসিনো বৈরাগ্যদ্বারা ত্যক্তসর্ব্বকর্ম্মাণ ইত্যর্থঃ, আদিশব্দেন তদ্ধেতুগ্রহঃ, মোহবর্জ্জিতত্বমুক্তহেতুতঃ সংজাতসম্যগ্ধীত্বং ॥ ৫ ॥

তচ্চেৎ পদং বেদ্যং কর্ত্তুরন্যৎ কর্ম্মেতি দ্বৈতাপাতোঽবেদ্যং চেদপ্রমত্বাৎ প্রেপ্সিতত্বাসিদ্ধিরিত্যাশঙ্ক্যাহ তদেবেতি। উক্তমনূদ্যাক্ষিপতি যদ্গত্বেতি ॥ ৬ ॥

তত্র প্রসিদ্ধং প্রমাণয়তি সংযোগাইতি। গমনস্যাগমনান্তত্বপ্রসিদ্ধেরপ্যুক্তং যদ্গত্বে-ত্যাদি ইত্যুপসংহরতি কথমিতি। আক্ষেপং পরিহরতি শৃণ্বিতি। ভগবৎপ্রাপ্তের্নিবৃত্ত-ত্বাভাবঃ সপ্তম্যর্থঃ। জীবস্য পরাংশত্বেঽপি কথমুক্তদোষসমাধিরিত্যাশঙ্ক্য প্রাতিবিম্বপক্ষ-মাদায় দৃষ্টান্তেন প্রত্যাচষ্টে যথেতি। অবচ্ছেদপক্ষমাশ্রিত্য দৃষ্টান্তান্তরেণোক্তদোষসমাধিং দর্শয়তি যথা বেতি। আক্ষেপসমাধিমুপসংহরতি অতইতি। পরস্য নিরবয়বত্বাত্তদংশত্বং জীবস্যাযুক্তমিতি শঙ্কতে নন্বিতি। তস্য নিরবয়বত্বং সাধয়তি সাবয়বত্বে চেতি। বস্তুতো-

## স্বামিকৃত টীকা।

যেভ্যস্তে, সুখদুঃখহেতুত্বাৎ সুখদুঃখসংজ্ঞানি শীতোষ্ণাদীনি দ্বন্দ্বানি তৈর্বিমুক্তাঅতএবামূঢ়া নিবৃত্তাবিদ্যাঃ সন্তস্তদব্যয়ং পদং গচ্ছন্তি ॥ ৫ ॥

তদেবং গন্তব্যং পদং বিশিনষ্টি ন তদিতি। তৎ পদং সূর্য্যাদয়ো ন প্রকাশয়ন্তি যৎ প্রাপ্য ন নিবর্ত্তন্তে যোগিনস্তদ্ধাম স্বরূপং পরমং মম, অনেন সূর্য্যাদিপ্রকাশবিষয়ত্বেন জড়ত্বশীতোষ্ণাদিদোষপ্রসঙ্গো নিরস্তঃ ॥ ৬ ॥

নন্বু চ ত্বদীয়ং ধাম প্রাপ্তাঃ সন্তো যদি ন নিবর্ত্তন্তে তর্হি সতি সংপদ্য ন বিদুঃ সতি সংপদ্যামহইত্যাদিশ্রুতেঃ সুষুপ্তিপ্রলয়সময়ে তৎপ্রাপ্তিঃ সর্ব্বেষামস্তীতি কো নাম সংসারী স্যাদিত্যাশঙ্ক্য সংসারিণং দর্শয়তি মমৈবেতি পঞ্চভিঃ। মমৈবাংশোঽয়মবিদ্যয়া জীবভূতঃ সনাতনঃ সর্ব্বদা সংসারিত্বেন প্রসিদ্ধঃ অসৌ সুষুপ্তিপ্রলয়য়োঃ প্রকৃতৌ লীনতয়া স্থিতানি মনঃ ষষ্ঠং যেষাং তানীন্দ্রিয়াণি পুনর্জীবলোকে সংসারোপভোগার্থমাকর্ষতি। এতচ্চ

মমৈবাংশো জীবলোকে জীবভূতঃ সনাতনঃ।
মনঃষষ্ঠানীন্দ্রিয়াণি প্রকৃতিস্থানি কর্ষতি ॥ ৭ ॥

## শাঙ্করভাষ্যম্।

ননু সর্ব্বাহি গতিরাগত্যন্তা সংযোগাবিপ্রযোগান্তাঃ ইতি প্রসিদ্ধং হি কথমুচ্যতে তদ্ধামগতানাং নাস্তি নিবৃত্তিরিতি শৃণু তত্র কারণং মমৈবেতি। মমৈব পরমাত্মনো নারায়ণস্যাংশো ভাগোঽবয়ব একদেশইত্যনর্থান্তরং জীবলোকে জীবানাং লোকে সংসারে জীবভূতঃ ভোক্তা কর্ত্তেতি প্রসিদ্ধঃ সনাতনঃ পুরাতনঃ' যথা জলসূর্য্যকঃ সূর্য্যাংশো জলনিমিত্তাপায়ে সূর্য্যমেব গত্বা ন নিবর্ত্ততে তথা অয়মপ্যংশঃ তেনৈবাত্মনা সংগচ্ছত্যেবমেব যথা বা ঘটাদ্যুপাধিপরিচ্ছিন্নো ঘটাদ্যাকাশঃ আকাশাংশঃ সন্ ঘটাদিং নিমিত্তাপায়ে আকাশং প্রাপ্য ন নিবর্ত্ততইত্যেবমতউপপন্নমুক্তং যদ্গত্বা ন নিবর্ত্তন্তইতি। ননু নিরবয়বস্য পরমাত্মনঃ কুতোঽবয়বএকদেশোঽংশইতি সাবয়বত্বে চ বিনাশ প্রসঙ্গোঽবয়ববিভাগান্নৈষদোষোঽবিদ্যাকৃতোপাধিপরিচ্ছিন্ন একদেশোঽংশইব কল্পিতো দর্শিতশ্চায়মর্থঃ ক্ষেত্রাধ্যায়ে বিস্তরশঃ স চ জীবো মদংশত্বেন কল্পিতঃ কথং সংসরতীত্যুৎক্রামিতি চেদুচ্যতে মনঃষষ্ঠানীন্দ্রিয়াণি শ্রোত্রাদীনি প্রকৃতিস্থানি স্বস্থানে কর্ণশস্কুল্যাদৌ প্রকৃতৌ স্থিতানি কর্ষত্যাকর্ষতি ॥ ৭ ॥

কস্মিন্ কালে শরীরমিতি। যচ্চাপি যদা চাপ্যুৎক্রামতীশ্বরো দেহাদিসংঘাতস্বামী জীবস্তদা কর্ষতীতি শ্লোকস্য দ্বিতীয়পাদোঽর্থবশাৎ প্রাথম্যেন সম্বধ্যতে যদা চ পূর্ব্বস্মাৎ

## গিরিকৃত টীকা।

নিরংশস্যাপি পরস্য কল্পনয়া জীবোংশোভবিষ্যতীতি পসিহবতি নৈষদোষইতি। বস্তুতস্তু জীবস্য নাংশত্বং পরমাত্মতাবন্মাত্রতয়া দর্শিতত্বাদিত্যাহ দর্শিতশ্চেতি। যদি পরস্যাংশত্বেন কল্পিতোজীবোবস্তুতস্তদাত্মৈব ন তর্হি তস্য সংসারিত্বং উৎক্রান্তির্ব্বেতি শঙ্কতে কথমিতি। জীবস্য সংসরণমুৎক্রমণঞ্চোপপাদয়িতুমুপক্রমতে উচ্যতইতি ॥ ৭ ॥

স্বস্থানে স্থিতানামিন্দ্রিয়াণাং জীবেনাকর্ষণস্য কালং পৃচ্ছতি কস্মিন্নিতি। জীবস্যোৎ

## স্বামিকৃত টীকা।

কর্ম্মেন্দ্রিয়াণাং প্রাণস্য চোপলক্ষণার্থং, অয়ম্ভাবঃ, সত্যং সুষুপ্তিপ্রলয়য়োরপি মদংশত্বাৎ সর্ব্বস্যাপি জীবমাত্রস্য ময়ি লয়াদস্ত্যেব মৎপ্রাপ্তিস্তথাপ্যবিদ্যাবৃতস্য সানুশয়স্য সপ্রকৃতিকে ময়ি লয়ো ন তু শুদ্ধে। তদুক্তং, অব্যক্তাদ্ব্যক্তয়ঃ সর্ব্বাঃ প্রভবন্তীত্যাদিনা। অতঃ পুনঃ সংসারায় নির্গচ্ছন্নবিদ্বান্ প্রকৃতৌ লীনতয়া স্থিতানি স্বোপাধিভূতানীন্দ্রিয়াণ্যাকর্ষতি, বিদুষাস্তু শুদ্ধস্বরূপপ্রাপ্তের্নাবৃত্তিরিতি ॥ ৭ ॥

তান্যাকৃষ্য কিং করোতীত্যাহ শরীরমিতি। যৎ যদা শরীরান্তরং কর্ম্মবশাদবাপ্নোতি

শরীরং যদবাপ্নোতি যচ্চাপ্যুৎক্রামতীশ্বরঃ।
গৃহীত্বৈতানি সংযাতি বায়ুর্গন্ধানিবাশয়াৎ ॥ ৮ ॥
শ্রোত্রঞ্চক্ষুঃ স্পর্শনঞ্চ রসনং ঘ্রাণমেব চ।
অধিষ্ঠায় মনশ্চায়ং বিষয়ানুপসেবতে ॥ ৯ ॥

## শাঙ্করভাষ্যম্।

শরীরাৎ শরীরান্তরমাপ্নোতি তদা গৃহীত্বৈতানি মনঃষষ্ঠানীন্দ্রিয়াণি সংযাতি সম্যক্ যাতি গচ্ছতি কিমিবেত্যাহ বায়ুঃ জবনো গন্ধানিবাশয়াৎ পুষ্পাদেঃ ॥ ৮ ॥

কানি পুনস্তানীতি শ্রোত্রমিতি। শ্রোত্রং চক্ষুঃ স্পর্শনঞ্চ ত্বগিন্দ্রিয়ং রসনং জিহ্বা ঘ্রাণমেবচ মনশ্চ ষষ্ঠং প্রত্যেকং ইন্দ্রিয়েণ সহাধিষ্ঠায় দেহস্থো বিষয়ান্ শব্দাদীনুপসেবতে ॥৯॥

এবং দেহগতং দেহাৎ উৎক্রামন্তমিতি। উৎক্রামন্তং পরিত্যজন্তং দেহং পূর্ব্বোপাত্তং স্থিতং বা দেহে তিষ্ঠন্তং ভুঞ্জানং বা শব্দাদীংশ্চোপলভমানং গুণান্বিতং সুখদুঃখমোহাদ্যৈঃ গুণৈরন্বিতমনুগতং সংযুক্তমিত্যর্থঃ এবম্ভূতমপ্যেনমত্যন্তং দর্শনগোচরপ্রাপ্তং বিমূঢ়া দৃষ্টাদৃষ্ট-

---

## গিরিকৃত টীকা।

ক্রান্তির্নৈশ্বরস্যেত্যাশঙ্ক্যেশ্বরশব্দার্থমাহ দেহাদীতি। উৎক্রান্ত্যনন্তরভাবিনী গতিরিত্যে তদর্থবশাদিত্যুক্তং। অবশিষ্টানি শ্লোকাক্ষরাণ্যাচষ্টে যদা চেতি ॥ ৮ ॥

মনঃষষ্ঠানীন্দ্রিয়াণ্যেব প্রশ্নদ্বারা বিশেষতো দর্শয়তি কানীতি ॥ ৯ ॥

শরীরমিত্যাদিশ্লোকে দেহাদাত্মনোঽতিরেকমুক্ত্বা শ্রোত্রং চক্ষুরিত্যাদৌ স্বাভিলষিতে বিষয়ে যথাযথং করণানং প্রবর্ত্তকত্বাৎ তেভ্যোঽতিরিক্তশ্চাত্মেত্যুক্তং তর্হি তমুৎক্রান্ত্যাদি কুর্ব্বন্তং স্বরূপত্বাৎ কিমিতি সর্ব্বে ন পশ্যন্তীত্যাশঙ্ক্যাহ এবমিতি। সন্নিহিততমত্বেন

## স্বামিকৃত টীকা।

যতশ্চ শরীরাদুৎক্রামতি ঈশ্বরো দেহাদীনাং স্বামী তদা পূর্ব্বস্মাৎ শরীরাদেতানি গৃহীত্বা তচ্ছরীরান্তরং সম্যগায়াতি, শরীরে সত্যপি ইন্দ্রিয়গ্রহণে দৃষ্টান্তঃ আশয়াৎ স্বস্থানাৎ কুসুমাদেঃ সকাশাৎ গন্ধান্ গন্ধবতঃ সূক্ষ্মানংশান্ গৃহীত্বা বায়ুর্যথা গচ্ছতি তদ্বৎ ॥ ৮ ॥

তান্যেবেন্দ্রিয়াণি দর্শয়ন্ যদর্থং গৃহীত্বা গচ্ছতি তদাহ শ্রোত্রমিতি। শ্রোত্রাদীনি বাহ্যেন্দ্রিয়াণি মনশ্চান্তঃকরণমধিষ্ঠায়াশ্রিত্য শব্দাদীন্ বিষয়ানয়ং জীবউপভুঙ্ক্তে ॥ ৯ ॥

নম্বু কার্য্যকারণসংঘাতব্যতিরেকেণৈবম্ভূতমাত্মানং সর্ব্বেঽপি কিং ন পশ্যন্তি তত্রাহ উৎক্রামন্তমিতি। উৎক্রামন্তং দেহাদ্দেহান্তরং গচ্ছন্তং তস্মিন্নেব দেহে স্থিতং বা বিষয়ান্

উৎক্রামন্তং স্থিতং বাপি ভুঞ্জানং বা গুণান্বিতম্।
বিমূঢ়া নানুপশ্যন্তি পশ্যন্তি জ্ঞানচক্ষুষঃ॥ ১০॥
যতন্তো যোগিনশ্চৈনং পশ্যন্ত্যাত্মন্যবস্থিতম্।
যতন্তোঽপ্যকৃতাত্মানো নৈনং পশ্যন্ত্যচেতসঃ॥ ১১॥

## শাঙ্করভাষ্যম্।

বিষয়ভোগবলাকৃষ্টচেতস্তয়ানেকধা মূঢ়া নানুপশ্যন্ত্যহো কষ্টং বর্ত্তত ইত্যনুক্রোশতি চ ভগবান্ যে তু পুনঃ প্রমাণজনিতজ্ঞানচক্ষুষস্তএনং পশ্যন্তি জ্ঞানচক্ষুষো বিবিক্তদৃষ্টয়ইত্যর্থঃ॥১০॥

কেচিত্তু যতন্তঃ প্রযত্নং কুর্ব্বন্তোযোগিনশ্চ সমাহিতচিত্তাএনং প্রকৃতমাত্মানং পশ্যন্ত্যয়মহমস্মীতি উপলভন্তে আত্মনি স্বস্যাং বুদ্ধাববস্থিতং। যতন্তোঽপি শাস্ত্রাদিপ্রমাণৈরকৃতাত্মানোঽসংস্কৃতাত্মানঃ তপসেন্দ্রিয়জয়েন চ দুশ্চরিতাদনুপরতা অশান্তদর্পাঃ প্রযত্নং কুর্ব্বন্তো নৈনং পশ্যন্ত্যচেতসোঽবিবেকিনঃ॥ ১১॥

যৎ পদং সর্ব্বস্যাবভাসকমপ্যগ্ন্যাদিত্যাদিকং জ্যোতির্নাবভাসয়তে যৎপ্রাপ্তাশ্চ মুমুক্ষবঃ পুনঃ সংসারাভিমুখা ন নিবর্ত্তন্তে যস্য চ পদস্যোপাধিভেদমনুবিধীয়মানা জীবা ঘটাকাশাদয় ইবাকাশস্যাংশাস্তস্য পদস্য সর্ব্বাত্মত্বং সর্ব্বব্যবহারাস্পদত্বঞ্চ বিবক্ষুশ্চতুর্ভিঃ শ্লোকৈঃ

## গিরিকৃত টীকা।

দর্শনযোগ্যমপি বিষয়পরবশাদাত্মানং সর্ব্বে ন পশ্যন্তীতি ভগবতোঽনুক্রোশং দর্শয়তি এবম্ভূতমিতি। তর্হি কেষামাত্মদর্শনং তদাহ যে তু পুনরিতি॥ ১০॥

জ্ঞানচক্ষুঃশব্দেন ন্যায়ানুগৃহীতং শাস্ত্রং জ্ঞানসাধনমুক্তং তৎকিমিদানীং শাস্ত্রমাত্রেণ ন্যায়ানুগৃহীতেনাত্মানং পশ্যন্তি নেত্যাহ কেচিত্ত্বিতি। প্রযত্নঃ শ্রবণমননাত্মকঃ শাস্ত্রাদিপ্রমাণৈর্যতন্তোঽপীতি সম্বন্ধঃ। অসংস্কৃতাত্মত্বং প্রকটয়তি তপসেতি। দুশ্চরিতাদবিরতিফলং কথয়তি অশান্তেতি। অশুদ্ধবুদ্ধীনামবিবেকিনাং সদপি শ্রবণাদি ন ফলবদিতি মত্বাহ প্রযত্নমিতি॥ ১১॥

## স্বামিকৃত টীকা।

ভুঞ্জানং বা গুণান্বিতমিন্দ্রিয়াদিযুক্তং জীবং বিমূঢ়া নালোকয়ন্তি, জ্ঞানমেব চক্ষুর্যেষাং তে বিবেকিনঃ পশ্যন্তি॥ ১০॥

দুর্জ্ঞেয়শ্চায়ং যতো বিবেকিষ্বপি কেচিৎ পশ্যন্তি কেচিন্ন পশ্যন্তীত্যাহ যতন্ত ইতি। যতন্তো ধ্যানাদিভিঃ প্রয়তমানা যোগিনঃ কেচিদেনমাত্মানমাত্মনি দেহেঽবস্থিতং বিবিক্তং পশ্যন্তি, শাস্ত্রাভ্যাসাদিভির্যত্নং কুর্ব্বাণা অপ্যকৃতাত্মানোঽবিশুদ্ধচিত্তা অতএবাচেতসো মন্দমতয় এনং ন পশ্যন্তি॥ ১১॥

যদাদিত্যগতং তেজো জগদ্ভাসয়তেঽখিলম্।
যচ্চন্দ্রমসি যচ্চাগ্নৌ তত্তেজো বিদ্ধি মামকম্॥ ১২॥

## শাঙ্করভাষ্যম্।

বিভূতিসংক্ষেপমাহ ভগবান্ যদেতি। যদাদিত্যগতমাদিত্যাশ্রয়ং কিন্তৎ তেজো দীপ্তিঃ প্রকাশো জগদ্ভাসয়তে প্রকাশয়ত্যখিলং সমস্তং যচ্চন্দ্রমসি যচ্চ শশভৃতি তত্তেজোঽবভাসকং বর্ত্ততে যচ্চাগ্নৌ হুতবহে তত্তেজো বিদ্ধি বিজানীহি মামকং মদীয়ং মম বিষ্ণোস্তৎ জ্যোতিঃ। অথবা যদাদিত্যগতং তেজশ্চৈতন্যাত্মকং জ্যোতিশ্চন্দ্রমসি যচ্চাগ্নৌ তত্তেজো বিদ্ধি মামকং মদীয়ং মম বিষ্ণোস্তৎ জ্যোতিরিত্যাদি। নন্থ স্থাবরেষু জঙ্গমেষু চ তৎসমানং চৈতন্যাত্মকং জ্যোতিস্তত্র কথমিদং বিশেষণং যদাদিত্যগতমিত্যাদি নৈব দোষঃ সত্ত্বাধিক্যাদাধিক্যোপপত্তেরাদিত্যাদিষু হি সত্ত্বমত্যন্তপ্রকাশমত্যন্তভাস্বরমতস্তত্রৈবাবিস্তরাং জ্যোতিরিতি তদ্বিশিষ্যতে নন্থ তত্রৈব তদধিকমিতি যথাহি লোকে তুল্যেঽপি মুখসংস্থানে ন কাষ্ঠকুড্যাদৌ মুখমাবির্ভবতি আদর্শাদৌ তু স্বচ্ছে স্বচ্ছতবে তারতম্যেনাবির্ভবতি তদ্বৎ॥ ১২॥

## গিরিকৃত টীকা।

অনন্তরশ্লোকচতুষ্টয়স্য বৃত্তানুবাদদ্বারা তাৎপর্য্যমাহ যৎপদমিতি। জীবাত্মত্বেন চিদ্রূপত্বমুক্ত্বা তদীয়চৈতন্যেনাদিত্যাদীনামবভাসকত্বাচ্চ ব্রাহ্মণশ্চিদ্রূপত্বমিত্যাহ যদাদিত্যেতি। চিদ্রূপস্যৈব ব্রহ্মণঃ সর্ব্বাত্মকত্বপ্রতিপাদকত্বেন শ্লোকং ব্যাচষ্টে যদিত্যাদিনা। আদিত্যাদৌ তত্র তত্র স্থিতং ব্রহ্মচৈতন্যজ্যোতিঃ সর্ব্বাবভাসকমিত্যর্থঃ। ব্রহ্মণঃ সর্ব্বজ্ঞত্বেন চিদ্রূপত্বমত্র বিবক্ষিতমিতি ব্যাখ্যান্তরমাহ অথবেতি। চৈতন্যজ্যোতিষঃ সর্ব্বত্রাবিশেষাদাদিত্যাদিগতবিশেষণমযুক্তমিতি শঙ্কতে নন্বিতি। সর্ব্বত্র সত্ত্বেঽপি কচিদেবাভিব্যক্তিবিশেষাদ্বিশেষণমিতি পরিহরতি নৈষ দোষ ইতি। তদেব প্রপঞ্চয়তি আদিত্যাদিষিতি। সর্ব্বত্র চৈতন্যজ্যোতিষস্তুল্যত্বেঽপি কচিদেবাভিব্যক্ত্যা বিশেষণোপপত্তিং দৃষ্টান্তেন স্পষ্টয়তি যথা ইতি॥ ১২॥

## স্বামিকৃত টীকা।

তদেবং ন তদ্ভাসয়তে সূর্য্যইত্যাদিনা পরমেশ্বরং পরং ধামোক্তং তৎপ্রাপ্তানাঞ্চাপুনরাবৃত্তিরুক্তা তত্র সংসারিণোঽভাবমাশঙ্ক্য সংসারিস্বরূপং দেহাদিব্যতিরিক্তং দর্শিতং ইদানীং তদেব পারমেশ্বরং রূপমনন্তশক্তিত্বেন নিরূপয়তি যদিত্যাদিচতুর্ভিঃ। আদিত্যাদিষু স্থিতং যদনেকপ্রকারং তেজো বিশ্বং প্রকাশয়তি তৎ সর্ব্বং তেজো মদীয়মেব জানীহি॥ ১২॥

গামাবিশ্য চ ভূতানি ধারয়াম্যহমোজসা।
পুষ্ণামি চৌষধীঃ সর্ব্বাঃ সোমো ভূত্বা রসাত্মকঃ॥ ১৩॥

## শাঙ্করভাষ্যম্।

কিঞ্চ গামিতি। গাং পৃথিবীমাবিশ্য ধারয়ামি ভূতানি জগদহমোজসা বলেন যদ্বলং কামরাগবিবর্জ্জিতমৈশ্বরং জগদ্বিধারণায় পৃথিব্যাং প্রবিষ্টং যেন গুর্ব্বী পৃথিবী নাধঃ পততি ন বিশীর্য্যতে তথা চ মন্ত্রবর্ণং যেন দ্যৌরুগ্রা পৃথিবী চ দৃঢ়েতি সদাধারপৃথিবীমিত্যাদিশ্চাতো গামাবিশ্য ভূতানি চরাচরাণি ধারয়ামীতি যুক্তমুক্তং। কিঞ্চ পৃথিব্যাং জাতা ওষধীঃ সর্ব্বা ব্রীহিযবাদ্যাঃ পুষ্ণামি পুষ্টিমতীরসাস্বাদমতীশ্চ করোমি সোমো ভূত্বা রসাত্মকঃ সোমঃ সর্ব্বরসাত্মকো রসস্বভাবঃ সর্ব্বরসানামাকরঃ সোমঃ স হি সর্ব্বাওষধীঃ স্বাত্মরসানুপ্রবেশেন পুষ্ণাতি॥ ১৩॥

## গিরিকৃত টীকা।

ইতশ্চ সর্ব্বাত্মত্বং প্রকৃতপদস্য যুক্তমিত্যাহ কিঞ্চেতি। ঈশ্বরো হি পৃথিবীদেবতারূপেণ পৃথিবীং প্রবিশ্য ভূতশব্দিতং জগদৈশ্বরেণৈব বলেন বিভর্ত্তি ততোগুর্ব্ব্যপি পৃথিবী বিদীর্য্য নাধঃপততীত্যত্র প্রমাণমাহ তথাচেতি। পরস্যৈব হিরণ্যগর্ভাত্মনাবস্থানান্ন মন্ত্রয়োরন্যপরতেতি ভাবঃ, দেবতাত্মনা দ্যাবাপৃথিব্যোরুগ্রত্বমুদ্ধরণত্বসামর্থ্যং তথাপীশ্বরাধত্বমেব স্বরূপধারণং তদপেক্ষয়া দুর্ব্বলত্বাদিতি দ্রষ্টব্যং। ঈশ্বরস্য সর্ব্বাত্মত্বে হেত্বন্তরমাহ কিঞ্চেতি। রসাত্মকসোমরূপতাপত্তাবপি কথমৌষধীরীশ্বরঃ সর্ব্বাঃ পুষ্ণাতীত্যাশঙ্ক্যাহ সর্ব্বেতি॥ ১৩॥

ভগবতঃ সর্ব্বাত্মত্বে হেত্বন্তরমাহ কিঞ্চেতি। অহমেবেত্যহংশব্দেন পরো লক্ষ্যতে। ভূত্বা পচামীতি সম্বন্ধং। পরস্যৈব জাঠরাত্মনা স্থিতৌ শ্রুতিং প্রমাণয়তি অয়মিতি। বাহ্যং ভৌমমগ্নিং ব্যাবর্ত্তয়তি যোঽয়মিতি। দেহান্তরারম্ভকতৃতীয়ং ভূতং ব্যবচ্ছিনত্তি যেনেতি। জাঠরাত্মনা পরঃ স্থিতশ্চেত্তস্য দেহাশ্রিতত্বং সিদ্ধমিতি ন পৃথগ্বক্তব্যমিত্যাশঙ্ক্য পুরুষবিধং পুরুষেঽন্তঃপ্রতিষ্ঠিতং বেদেতি শ্রুতিমাশ্রিত্যাহ প্রবিষ্টইতি। পরস্য জাঠরাত্মনোঽন্নপাকে সহকারিকারণমাহ প্রাণেতি। সংযুক্তত্বং সংধুক্ষিতত্বং। অন্নস্য চাতুর্ব্বিধ্যং প্রকটয়তি ভোজ্য মিতি। ভোক্তরি বৈশ্বানরমিতি দৃষ্টির্ভোজ্যে সোমদৃষ্টিরেবং ভোক্তৃভোজ্যরূপং সর্ব্বং

## স্বামিকৃত টীকা।

কিঞ্চ গামিতি। গাং পৃথ্বীমোজসা বলেনাধিষ্ঠায়াহমেব চরাচরাণি ভূতানি ধারয়ামি, অহমেব চ রসময়ঃ সোমো ভূত্বা ব্রীহ্যাদ্যৌষধীঃ সর্ব্বাঃ সংবর্দ্ধয়ামি॥ ১৩॥

কিঞ্চ অহমিতি। বৈশ্বানরো জাঠরাগ্নির্ভূত্বা প্রাণিনাং দেহমন্তঃ প্রবিশ্য প্রাণাপানাভ্যাঞ্চ তদুদ্দীপকাভ্যাং সহিতঃ প্রাণিভির্ভুক্তং ভক্ষ্যং ভোজ্যং লেহ্যং চোষ্যং চেতি

অহং বৈশ্বানরো ভূত্বা প্রাণিনাং দেহমাশ্রিতঃ।
প্রাণাপানসমাযুক্তঃ পচাম্যন্নং চতুর্ব্বিধম্ ॥ ১৪ ॥
সর্ব্বস্য চাহং হৃদি সন্নিবিষ্টো মত্তঃ স্মৃতির্জ্ঞানমপোহনঞ্চ।
বেদৈশ্চ সর্ব্বৈরহমেব বেদ্যো বেদান্তকৃদ্বেদবিদেব চাহম্ ॥ ১৫॥

## শাঙ্করভাষ্যম্।

কিঞ্চ অহমিতি। অহমেব বৈশ্বানর উদরস্থোঽভ্যন্তর্ভূত্বায়মগ্নির্বৈশ্বানরো যোঽয়মন্তঃ পুরুষে যেনেদমন্নং পচ্যতে ইত্যাদিশ্রুতের্বৈশ্বানরঃ সন্ প্রাণিনাং প্রাণবতাং দেহমাশ্রিতঃ প্রবিষ্টঃ প্রাণাপানসমাযুক্তঃ প্রাণাপানাভ্যাং সমাযুক্তঃ সংযুক্তঃ পচামি পক্তিং করোমি অন্ন চতুর্ব্বিধং চতুঃপ্রকারং অন্নমশনং ভোজ্যঞ্চ ভক্ষ্যঞ্চোষ্যং লেহ্যঞ্চ ভোক্তা বৈশ্বানরোঽগ্নি র্ভোজ্যমন্নং সোমস্তদেতদুভয়মগ্নীসোমৌ সর্ব্বমিতি পশ্যতোঽন্নদোষলেপো ন ভবতি ॥১৪॥

কিঞ্চ সর্ব্বেতি। সর্ব্বস্য প্রাণিজাতস্যাহমাত্মা সন্ হৃদি বুদ্ধৌ সন্নিবিষ্টোঽতো মত্তঃ আত্মনঃ সর্ব্বপ্রাণিনাং স্মৃতির্জ্ঞানঞ্চ তদপোহনঞ্চ যেষাং পুণ্যকর্ম্মিণাঞ্চ পুণ্যকর্ম্মানুবোধেন জ্ঞানস্মৃতী ভবতস্তথা পাপকর্ম্মিণাং পাপকর্ম্মানুরূপেণ স্মৃতিজ্ঞানয়োরপোহনঞ্চ অপায়নমপগমনঞ্চ বেদৈশ্চ সর্ব্বৈরহমেব চ পরমাত্মা বেদ্যো বেদিতব্যঃ বেদান্তার্থসম্প্রদায়কৃদিত্যর্থঃ বেদবিদ্বেদার্থবিদেব চাহং ॥ ১৫ ॥

## গিরিকৃত টীকা।

জগদগ্নিসোমাত্মনা ভুক্তিকালে ধ্যায়তো ভোক্তুরন্নকৃতো দোষো নেতি প্রাসংগিকং সফলং ধ্যানং দর্শয়তি ভোক্তেতি ॥ ১৪ ॥

ইতশ্চ সর্ব্বাত্মত্বেন সর্ব্বব্যবহারাস্পদত্বমীশ্বরস্যেত্যাহ কিঞ্চেতি। প্রাণিজাতং ব্রহ্মাদিপুত্তিকান্তমাত্মতয়া বুদ্ধৌ সন্নিবিষ্টত্বং তদ্‌গুণদোষাণামশেষেণ দ্রষ্টৃত্বমতো বুদ্ধিমধ্যস্থগুণদোষদ্রষ্টৃত্বাদিতি যাবৎ। মত্তঃ সর্ব্বকর্ম্মাধ্যক্ষাজ্জগদ্‌যন্ত্রসূত্রধারাদিত্যর্থঃ। প্রাণিনাং স্মৃতিজ্ঞানয়োস্তদপায়স্য চ ভগবদধীনত্বে ভগবতো বৈষম্যং স্যাদিত্যাশঙ্ক্যাহ যেষা-

## স্বামিকৃত টীকা।

চতুর্ব্বিধমন্নং পচামি, তত্র যদ্দন্তৈরবখণ্ড্যাবখণ্ড্য ভক্ষ্যতে অপূপাদি তদ্ভক্ষ্যং, যত্তু কেবলং জিহ্বয়া বিলোড্য নিগীর্য্যতে পায়সাদি তদ্ভোজ্যং, যজ্জিহ্বায়াং নিঃক্ষিপ্য রসাস্বাদেন ক্রমশো নিগীর্য্যতে দ্রবীভূতং গুড়াদি তল্লেহ্যং, যত্তু দংষ্ট্রাভির্নিষ্পীড্য রসাংশং নিগীর্য্যাবশিষ্টং ত্যজ্যতে ইক্ষুদণ্ডাদি তচ্চোষ্যমিতি চতুর্ব্বিধস্য ভেদঃ ॥ ১৪ ॥

কিঞ্চ সর্ব্বস্যেতি। সর্ব্বস্য প্রাণিজাতস্য হৃদি সম্যগন্তর্য্যামিরূপেণ প্রবিষ্টোঽহং অতশ্চ মত্তএব হেতোঃ প্রাণিমাত্রস্য পূর্ব্বানুভূতার্থবিষয়া স্মৃতির্ভবতি জ্ঞানঞ্চ বিষয়েন্দ্রিয়সংযোগজং

দ্বাবিমৌ পুরুষে লোকে ক্ষরশ্চাক্ষরএব চ।
ক্ষরঃ সর্ব্বাণি ভূতানি কূটস্থোঽক্ষর উচ্যতে ॥ ১৬ ॥

## শাঙ্করভাষ্যম্।

ভগবতঈশ্বরস্য নারায়ণাখ্যস্য বিভূতিসংক্ষেপ উক্তো বিশিষ্টোপাধিকৃতঃ যদাদিত্যগতং তেজ ইত্যাদিনা অথাধুনা তস্যৈব ক্ষরাক্ষরোপাধিপ্রবিভক্ততয়া নিরুপাধিকস্য কেবলস্য স্বরূপনির্দিধারয়িষয়োত্তরশ্লোকা আরভ্যন্তে তত্র সর্ব্বমেবাতীতানাগতানন্তবাধ্যায়ার্থজাতং ত্রিধা রাশীকৃত্যাহ দ্বাবিমাবিতি। দ্বৌ ইমৌ পৃথগ্রাশীকৃতৌ পুরুষৌ ইত্যুচ্যেতে লোকে সংসারে ক্ষরশ্চ ক্ষরতীতি ক্ষরঃ বিনাশ্যেকো রাশিরপরঃ পুরুষোঽক্ষরস্তদ্বিপরীতো ভগবতো মায়াশক্তিঃ ক্ষরাখ্যস্য পুরুষস্যোৎপত্তিবীজমনেকসংসারিজন্তুকামকর্ম্মাদিসংস্কারাশ্রয়োঽক্ষরং পুরুষ উচ্যতে, কৌ তৌ পুরুষাবিত্যাহ স্বয়মেব ভগবান্ ক্ষরঃ সর্ব্বাণি ভূনানি সমস্তং বিকারজাতমিত্যর্থঃ, কূটস্থঃ কূটো রাশিরিব স্থিতঃ অথবা কূটো মায়াবঞ্চনা জিহ্মং কুটিলতা বেতি পর্য্যায়াঃ অনেকমায়াবঞ্চনাদিপ্রকারেণ স্থিত কূটস্থঃ সংসারবীজানন্ত্যান্ন ক্ষরতীত্যক্ষর উচ্যতে॥ ১৬ ॥

## গিরিকৃত টীকা।

মিতি। স্মৃতির্জন্মান্তরাদাবনুভূতস্য পরামর্শঃ দেশকালস্বভাববিপ্রনষ্টস্যাপি জ্ঞানমনুভবঃ, ধর্ম্মাধর্ম্মাভ্যাং বিচিত্রং কার্য্যং কুর্ব্বতো নেশ্বরস্য বৈষম্যমিতি ভাবঃ। বেদবেদ্যং পরং ব্রহ্ম ভগবতোঽন্যদিতি শঙ্কাং বারয়তি বেদৈরিতি। বেদাত্মনাং পৌরুষেয়ত্বং পরিহরতি। বেদেতি। তদর্থসম্প্রদায়প্রবর্ত্তকত্বার্থং তদর্থযাথাতথ্যজ্ঞানবত্ত্বমাহ বেদার্থেতি ॥ ১৫ ॥

উত্তরশ্লোকানাং তাৎপর্য্যং বক্তুং বৃত্তং কীর্ত্তয়তি ভগবত ইতি। বিশিষ্টোপাধিবাদিত্যাদিঃ। সংপ্রত্যধ্যায়সমাপ্তেরুত্তরসন্দর্ভস্য তাৎপর্য্যমাহ অথেতি। ন কেবলং নিরুপাধিকাত্মস্বরূপং নির্দ্ধারণায়োত্তরগ্রন্থঃ কিন্তু সর্ব্বস্যৈব গীতাশাস্ত্রস্য অর্থনির্ণয়ার্থমিত্যাহ তত্রেতি। ক্ষরাক্ষরোপাধিভ্যাং পরমাত্মনাচ রাশিত্রয়যুক্তেন সর্ব্বাত্মত্বেনাশুদ্ধ্যাদিদোষপ্রযুক্তাবুক্তং দ্বাবিমৌ ইতি। পুরুষোপাধিত্বাৎ পুরুষত্বং ন সাক্ষাদিতি বিবক্ষিত্বাহ পুরুষা

## স্বামিকৃত টীকা।

ভবতি অপোহনঞ্চ তয়োঃ প্রমোষো ভবতি বেদৈশ্চ সর্ব্বৈরন্তস্তদ্দেবতারূপেণাহমেব বেদ্যঃ, বেদান্তকৃৎ তৎসম্প্রদায়প্রবর্ত্তকো জ্ঞানদোগুরুবহমিত্যর্থঃ, বেদবিদেব চ বেদার্থবিদপ্যহমেব ॥ ১৫ ॥

ইদানীং তদ্ধাম পরমং মমেতি যদুক্তং স্বকীয়ং সর্ব্বোত্তমত্বং তৎ দর্শয়তি দ্বাবিতি ত্রিভিঃ। ক্ষরশ্চাক্ষরশ্চেতি দ্বাবিমৌ পুরুষৌ লোকে প্রসিদ্ধৌ। তাবেবাহ তত্র ক্ষয়ঃ

উত্তমঃ পুরুষস্ত্বন্যঃ পরমাত্মেত্যুদাহৃতঃ।
যো লোকত্রয়মাবিশ্য বিভর্ত্ত্যব্যয় ঈশ্বরঃ॥ ১৭॥

## শাঙ্করভাষ্যম্।

অাভ্যাং ক্ষরাক্ষরাভ্যাং বিলক্ষণং ক্ষরাক্ষরোপাধিদ্বয়দোষেণাস্পৃষ্টো নিত্যশুদ্ধমুক্তস্বভাবঃ উত্তমইতি। উত্তমঃ উৎকৃষ্টতমঃ পুরুষস্ত্বন্যঃ অত্যন্তবিলক্ষণঃ আভ্যাং পরমাত্মেতি-পরমশ্চাসৌ দেহাদ্যবিদ্যাকৃতাত্মভ্যঃ অন্নময়াদিভ্যঃ পঞ্চকোষেভ্যঃ আত্মা চ সর্ব্বভূতানাং প্রত্যক্‌চেতনইত্যতঃ পরমাত্মেত্যুদাহৃতঃ উক্তো বেদান্তেষু সএব বিশিষ্যতে যো লোকত্রয়ং ভূর্ভুবঃস্বরাখ্যং স্বকীয়য়া চৈতন্যবলশক্ত্যাবিশ্য বিভর্ত্তি স্বরূপসদ্ভাবমাত্রেণ বিভর্ত্তি ধারয়ত্য-ব্যয়ো ন ব্যয়ো বিদ্যতইত্যব্যয়ঃ ঈশ্বরঃ সর্ব্বজ্ঞো নারায়ণাখ্য ঈশনশীলঃ যথাব্যাখ্যাতস্যেশ্ব-রস্য পুরুষোত্তমইত্যেতন্নাম প্রসিদ্ধং॥ ১৭॥

## গিরিকৃত টীকা।

বিতি। পরং পুরুষং ব্যাবর্ত্তয়তি ভগবতইতি। তত্র কার্য্যলিঙ্গকমনুমানং সূচয়তি ক্ষরা-খ্যস্যেতি মায়াশক্তিং বিনা ভোক্তৄণাং কর্ম্মাদিসংস্কারাদেবোক্তকার্য্যোৎপত্তিরিত্যাশঙ্ক্য তস্য নিমিত্তত্বেঽপি মায়াশক্তিরুপাদানমিতি মত্বাহ অনেকেতি। কামকর্ম্মাদীত্যাদিশব্দেন জ্ঞানং গৃহ্যতে। প্রকৃতিং পুরুষং চৈবেতি প্রকৃতয়োবিহ গ্রহণমিতি শঙ্কামাকাঙ্ক্ষাদ্বারা নিবারয়তি কৌ তাবিতি। কূটশব্দার্থমুক্ত্বা তেন স্থিতস্য কূটস্থতেতি সংপিণ্ডিতমর্থমাহ অনেকেতি। তস্য কথমক্ষরত্বং বিনা ব্রহ্মজ্ঞানমনাশাদিত্যাহ সংসারেতি॥ ১৬॥

কার্য্যকারণাখ্যৌ রাশী দর্শয়িত্বা রাশ্যন্তরং দর্শয়তি আভ্যামিতি। বৈলক্ষণ্যফলমাহা-ক্ষরেতি। উপাধিদ্বয়কৃতগুণদোষাস্পর্শে ফলিতমাহ নিত্যেতি। আভ্যাং ক্ষরাক্ষরাভ্যা মিতি যাবৎ, উত্তমোঽন্যইতি পদদ্বয়ং বস্তুতঃ সর্ব্বার্থেব ক্ষরাক্ষরাত্মতাভাবদৃষ্ট্যর্থং। জড়বর্গস্যা-ন্তত্বকৃতং স্বাতন্ত্র্যং নিরস্তেতি সএবেতি। লোকত্রয়মিত্যুপলক্ষণং সর্ব্বং জগদপি বিবক্ষিত-

## স্বামিকৃত টীকা।

পুরুষো নাম সর্ব্বাণি ভূতানি ব্রহ্মাদিস্থাবরান্তানি শরীরাণি, অবিবেকিলোকস্য শরীরেষ্বেব পুরুষত্বপ্রসিদ্ধেঃ। কূটোরাশিঃ শিলারাশিঃ পর্ব্বতইব দেহেষু নশ্যৎস্বপি নির্ব্বিকারতয়া তিষ্ঠতীতি কূটস্থশ্চেতনো ভোক্তা স অক্ষরঃ পুরুষ উচ্যতে বিবেকিভিঃ॥ ১৬॥

যদর্থমেতৌ লক্ষিতৌ তদাহ উত্তমইতি। এতাভ্যাং ক্ষরাক্ষরাভ্যামন্যো বিলক্ষণউত্তমঃ পুরুষঃ। বৈলক্ষণ্যমেবাহ পরমশ্চাসাবাত্মা চেতি উদাহৃতউক্তঃ শ্রুতিভিঃ আত্মত্বেন ক্ষরাদচেতনাদ্বিলক্ষণঃ পরমত্বেনাক্ষরাচ্চ ভোক্তৃর্বিলক্ষণ ইত্যর্থঃ। পরমাত্মত্বমেব দর্শয়তি যো লোকত্রয়মিতি। য ঈশ্বর ঈশনশীলঃ অব্যয়শ্চ নির্ব্বিকারএব সন্ লোকত্রয়মন্তর্য়মাবিশ্য বিভর্ত্তি পালয়তি॥ ১৭॥

যস্মাৎ ক্ষরমতীতোঽহমক্ষরাদপি চোত্তমঃ।
অতোঽস্মি লোকে বেদে চ প্রথিতঃ পুরুষোত্তমঃ ॥ ১৮ ॥
যো মামেবমসম্মূঢ়ো জানাতি পুরুষোত্তমম্।
স সর্ব্ববিদ্ভজতি মাং সর্ব্বভাবেন ভারত ॥ ১৯ ॥

## শাঙ্করভাষ্যম্।

তস্য নামনির্ব্বচনপ্রসিদ্ধার্থবত্বং নাম্নো দর্শয়ন্নিরতিশয়োঽহমীশ্বর ইত্যাত্মানং দর্শয়তি ভগবান্ যস্মাদিতি। যস্মাৎ ক্ষরমতীতোঽহং সংসারমায়াবৃক্ষমশ্বত্থাখ্যমতিক্রান্তোঽহমক্ষরাদপি সংসারবৃক্ষবীজভূতাদপি চোত্তম উৎকৃষ্টতম ঊর্দ্ধতমো বা অতঃ ক্ষরাক্ষরাভ্যামুত্তমত্বাদস্মি ভবামি লোকে বেদে চ প্রথিতঃ প্রখ্যাতঃ পুরুষোত্তমইত্যেবং মাং ভক্তজনা বিদুঃ কবয়ঃ কাব্যাদিষু চ পুরুষোত্তমইত্যনেনাভিধানেনাভিগৃণন্তি ॥ ১৮ ॥

অথেদানীং যথানিরুক্তমাত্মানং যো বেদ তস্যেদং ফলমুচ্যতে যো মামিতি। যো মামী-

## গিরিকৃত টীকা।

চৈতন্যমেব বলং তত্র শক্তির্মায়া তয়েতি যাবৎ। জগদ্ধারণে পরস্য ব্যাপারান্তরং বারয়তি স্বরূপেতি। ন চাস্যাস্তোধারয়িতা স্বতোঽচলত্বাদিত্যাহ অব্যয়ইতি। সংযুক্তমেতৎ ক্ষরমক্ষরঞ্চ ব্যক্তাব্যক্তং ক্ষরতে বিশ্বমীশইতি শ্রুত্যর্থং গৃহীত্বাহ ঈশ্বরইতি। কিঞ্চ লোকবেদয়োর্ভগবতো নামপ্রসিদ্ধ্যা সিদ্ধমপ্রপঞ্চত্বমিত্যাহ যথেতি ॥ ১৭ ॥

অশ্বকর্ণাদিবদস্য নাম্না রূঢ়ত্বাদর্থবিশেষাভাবাদ্ভগবতোঽপি লৌকিকেশ্বরবদীশ্বরত্বং সাতিশয়মিতি নেত্যাহ তস্যেতি। যস্মাদিত্যস্যাপেক্ষিতং নিক্ষিপতি অতইতি। উত্তমঃ পুরুষ ইতি বাক্যশেষঃ ॥ ১৮ ॥

আত্মনোঽপ্রপঞ্চত্বং জ্ঞানফলোক্ত্যা স্তৌতি অথেতি। যথোক্তবিশেষণং সর্ব্বাত্মত্বাদি-

## স্বামিকৃত টীকা।

এবংভূতং পুরুষোত্তমত্বমাত্মনো নামনির্ব্বচনেন দর্শয়তি যস্মাদিতি। যস্মাৎ ক্ষরং জড়বর্গমতিক্রান্তোঽহং নিত্যমুক্তত্বাৎ অক্ষরাচ্চেতনবর্গাদপ্যুত্তমশ্চ নিয়ন্তৃত্বাৎ অতো লোকে বেদে চ পুরুষোত্তমইতি প্রথিতঃ প্রখ্যাতোঽস্মি। তথা চ শ্রুতিঃ, সর্ব্বস্যায়মাত্মা সর্ব্বস্য বশী সর্ব্বস্যেশানঃ সর্ব্বমিদং প্রশাস্তীত্যাদি ॥ ১৮ ॥

এবংভূতেশ্বরজ্ঞাতুঃ ফলমাহ য ইতি। এবং নিরুক্তপ্রকারেণাসম্মূঢ়ো নিশ্চিতমতিঃ

ইতিগুহ্যতমং শাস্ত্রমিদমুক্তং ময়ানঘ।
এতদ্বুদ্ধা বুদ্ধিমান্ স্যাৎ কৃতকৃত্যশ্চ ভারত ॥ ২০ ॥

## শাঙ্করভাষ্যম্।

খরং যথোক্তবিশেষণমেবং যথোক্তেন প্রকারেণাসংমূঢ়ঃ সংমোহবর্জ্জিতঃ সন্ জানাত্যয়মহমস্মীতি পুরুষোত্তমং স সর্ব্ববিৎ সর্ব্বাত্মনা সর্ব্বং বেত্তীতি সর্ব্বজ্ঞঃ সর্ব্বভূতস্থং ভজতি মাং সর্ব্বভাবেন সর্ব্বাত্মচিন্তয়া হে ভারত ॥ ১৯ ॥

অস্মিন্নধ্যায়ে ভগবত্তত্ত্বজ্ঞানং মোক্ষফলমুক্ত্বাঽথেদানীং তৎ স্তৌতি ইতিগুহ্যতমমিতি। ইত্যেতৎ গুহ্যতমং গোপ্যতমং হত্যন্তং রহস্যমিত্যেতৎ কিন্তচ্ছাস্ত্রং যদ্যপি গীতাখ্যং সমস্তং শাস্ত্রমুচ্যতে তথাপ্যয়মেবাধ্যায়ঃ ইহ শাস্ত্রমিত্যুচ্যতে স্তুত্যর্থং প্রকরণাৎ সর্ব্বো হি গীতাশাস্ত্রার্থোঽস্মিন্নধ্যায়ে সমাসেনোক্তেন কেবলং সর্ব্বশ্চ বেদার্থইহ পরিসমাপ্তো যস্তং বেদ স বেদবিৎ বেদৈশ্চ সর্ব্বৈরহমেব বেদ্যইতি চোক্তমিদমুক্তং কথিতং ময়া হে অনঘ এতচ্ছাস্ত্রং যথাদর্শিতার্থং বুদ্ধা বুদ্ধিমান্ স্যাদ্ভবেৎ নান্যথা কৃতকৃত্যশ্চ ভারত কৃতং কৃত্যং কর্ত্তব্যং যেন স কৃতকৃত্যঃ বিশিষ্টজন্মপ্রসূতেন ব্রাহ্মণেন যৎকর্ত্তব্যং তৎ সর্ব্বং ভগবত্তত্ত্বে বিদিতে

## গিরিকৃত টীকা।

বিশেষণোপেতমিতি যাবৎ। ক্ষরাক্ষরাতীতত্বং যথোক্তপ্রকারঃ সংমোহবর্জিতঃ সংমোহেন দেহাদিষ্বাত্মাত্মীয়ত্ববুদ্ধ্যা রহিত ইত্যর্থঃ। ভগবত্তং জানতঃ সর্ব্ববিত্ত্বং তস্যৈব সর্ব্বাত্মনামেয়ত্বাদিত্যাহ স সর্ব্ববিদিতি। সর্ব্বাত্মনি ময্যেবাসক্তচিত্তত্বেনেত্যর্থঃ ॥ ১৯ ॥

অধ্যায়ার্থমনূদ্যোপসংহারশ্লোকমবতারয়তি অস্মিন্নিতি। সর্ব্বস্যাং গীতায়াং শাস্ত্রশব্দে বক্তব্যে কথমস্মিন্নধ্যায়ে তৎপ্রয়োগঃ স্যাদিত্যাশঙ্ক্যাহ যদ্যপীতি। সন্নিহিতমধ্যায়ং স্তোতুমপি কুতস্তত্র শাস্ত্রশব্দস্তদর্থাভাবাত্তত্রাহ সর্ব্বো হীতি। গীতাশাস্ত্রার্থস্য সর্ব্বস্যাত্র সংক্ষিপ্তত্বাদেব কেবলং শাস্ত্রশব্দো ন ভবতি কিন্তু বেদার্থস্যাপি সর্ব্বস্যাত্র সমাপ্তেরুক্তং শাস্ত্রপদমিত্যাহ নেতি। তত্র গমকমাহ যস্তমিতি। ভগবত্তত্ত্বজ্ঞানে কৃতকৃত্যত্বেতদুপপাদয়তি বিশিষ্টেতি। নান্যথেত্যুক্তং প্রপঞ্চয়তি ন চেতি। সত্যপি তত্ত্বজ্ঞানে কর্ম্মণাং কর্ত্তব্য-

## স্বামিকৃত টীকা।

সন্ যো মাং পুরুষোত্তমং জানাতি স সর্ব্বভাবেন সর্ব্বপ্রকারেণ মামেব ভজতি ততশ্চ সর্ব্ববিৎ সর্ব্বজ্ঞো ভবতি ॥ ১৯ ॥

অধ্যায়ার্থমুপসংহরতি ইতীতি। ইত্যনেন সংক্ষেপপ্রকারেণ গুহ্যতমমতিরহস্যং সংপূর্ণং শাস্ত্রমেব ময়োক্তং ন তু পুনর্বিংশতিশ্লোকমধ্যায়মাত্রং হে অনঘ ব্যসনশূন্য অত-

ইতি শ্রীভগবদগীতাসূপনিষৎসুব্রহ্মবিদ্যায়াং
যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসম্বাদে
পুরুষোত্তমযোগোনাম
পঞ্চদশোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

কৃতঃ স্তবেদিত্যর্থঃ ন চান্যথা কর্ত্তব্যং পরিসমাপ্যতে কস্যচিদিত্যভিপ্রায়ঃ সর্ব্বং কর্ম্মাখিলং পার্থ জ্ঞানে পরিসমাপ্যতে ইতি চোক্তং। এতদ্ধি জন্মসামগ্র্যং ব্রাহ্মণস্য বিশেষতঃ। প্রাপ্যৈ তৎ কৃতকৃত্যো হি দ্বিজো ভবতি নান্যথা ইতি চ মানবং বচনং যতএতৎ পরমার্থতত্ত্বমতঃ শ্রুতবানসি অতঃ কৃতার্থস্ত্বং ভাবতেতি॥ ২০॥

ইতি শ্রীমদ্ভগবদ্গীতাভাষ্যে পঞ্চদশোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

ন্যান্ন কর্ত্তব্যসমাপ্তিবিত্যাশঙ্ক্যাহ সর্ব্বমিতি। তত্ত্বজ্ঞানে কৃতার্থতেতি তত্র মনোরপি সম্মতি-মাহ এতদ্ধীতি। ভারতেতি সম্বোধনতাৎপর্য্যমাহ যতইতি। তদনেনাত্মনো দেহাদ্যতি-রিক্তত্বং চিদ্রূপত্বং সর্ব্বাত্মত্বং কার্য্যকারণবিনির্মুক্তত্বেনাপ্রপঞ্চত্বং তস্যাখণ্ডৈকরসব্রহ্মতত্ত্ব-জ্ঞানাদশেষপুরুষার্থপরিসমাপ্তিরিত্যুক্তং॥ ২০॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং পঞ্চদশোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

এবৈতন্ময়োক্তং বুদ্ধ্বা বুদ্ধিমান্ সম্যক্ জ্ঞানী স্যাৎ কৃতকৃত্যশ্চ স্যাৎ যোঽপি কোঽপি ভারত ত্বং কৃতকৃত্যোঽসীতি কিং বক্তব্যমিতিভাবঃ।

সংসারশাখিনং ভিত্ত্বা স্পষ্টং পঞ্চদশে বিভুঃ।
পুরুষোত্তমযোগাখ্যে পরং পদমুপাদিশৎ॥ ২০॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং পঞ্চদশোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## ষোড়শোঽধ্যায়ঃ।

শ্রীভগবানুবাচ—অভয়ং সত্ত্বসংশুদ্ধির্জ্ঞানযোগব্যবস্থিতিঃ।
দানং দমশ্চ যজ্ঞশ্চ স্বাধ্যায়স্তপআর্জবম্॥ ১॥

---

### শাঙ্করভাষ্যম্।

দৈব্যাস্নুরী রাক্ষসী চেতি প্রাণিনাং প্রকৃতয়ো নবমেঽধ্যায়ে সূচিতাস্তাসাং বিস্তারপ্রদর্শনায়াভয়ং সত্ত্বসংশুদ্ধিরিত্যাদিরধ্যায় আরভ্যতে, তত্র সংসারমোক্ষায় দৈবীপ্রকৃতির্বন্ধনায়াস্নুরী রাক্ষসী চেতি দৈব্যাদানায় প্রদর্শনং ক্রিয়তে ইতরয়োঃ পরিবর্জনায় শ্রীভগবানুবাচ অভয়মিতি। অভয়মভীরুতা সত্ত্বসংশুদ্ধিঃ সত্ত্বস্যান্তঃকরণস্য সংব্যবহারেষু পরবঞ্চনমায়ানৃতাদিপরিবর্জনং শুদ্ধভাবেন ব্যবহার ইত্যর্থঃ, জ্ঞানযোগব্যবস্থিতিঃ জ্ঞানং শাস্ত্রত আচার্য্যতশ্চাত্মাদিপদার্থানামবগমোঽবগতানামিন্দ্রিয়াদ্যুপসংহারেণৈকাগ্রতয়া স্বাত্মসম্বেদ্যতাপাদনং যোগস্তয়োর্জ্ঞানযোগযোর্ব্যবস্থিতিঃ ব্যবস্থানং তন্নিষ্ঠতা এষা প্রধানা

### গিরিকৃত টীকা।

ব্যবহিতেন সম্বন্ধং বদন্নধ্যায়ান্তরমবতারয়তি দৈবীতি। দৈবী সূচিতা রাক্ষসীমাস্নুরীঞ্চৈব প্রকৃতিং মোহিনীমিত্যাদাবিতি শেষঃ। প্রকৃতীনাং বিস্তরেণ দর্শনং কুত্রোপযোগীত্যাশঙ্ক্য বিভজ্যোপযোগমাহ সংসারেতি। অতীতে চাধ্যায়ে কর্ম্মানুবন্ধীন্যধশ্চ মূলান্যনুসন্তানীত্যত্র কর্ম্মব্যংগ্যা বাসনাঃ সংসারস্যাবান্তরমূলত্বেনোক্তাস্তা মনুষ্যদেহে প্রাগ্‌ভবীয়কর্ম্মানুসারেণ ব্যজ্যমানাঃ সাত্ত্বিকাদিভেদেন দৈব্যাদিপ্রকৃতিত্রয়ত্বেন বিভক্তা আবিস্তিতীর্ষুর্ভগবানুক্তবানিত্যাহ ভগবানিতি। অভীরুতা শাস্ত্রোপদিষ্টেঽর্থে সন্দেহং হিত্বানুষ্ঠাননিষ্ঠত্বং পরবঞ্চনা পরস্য ব্যাজেন বশীকরণং মায়া হৃদয়েঽন্যথা কৃত্বা বহিরন্যথা ব্যবহরণং অনৃতমযথাদৃষ্টং কথনমাদিপদেন বিপ্রলম্ভবিভ্রমাদিগ্রহঃ। উক্তমর্থং সংক্ষিপ্যাহ

### স্বামিকৃত টীকা।

আস্নুরীং সম্পদং ত্যক্ত্বা দৈবীমেবাশ্রিতা নরাঃ। মুচ্যন্তইতি নির্ণেতুং তদ্বিবেকোঽথ ষোড়শে। পূর্ব্বাধ্যায়ান্তে এতদ্বুদ্ধ্বা বুদ্ধিমান্ স্যাৎ কৃতকৃত্যশ্চ ভারতেত্যুক্তং তত্র ক এতত্তত্ত্বং বুধ্যতে কো বা ন বুধ্যত ইত্যপেক্ষায়াং তত্ত্বজ্ঞানেঽধিকারিণোঽনধিকারিণশ্চ বিবেকার্থং ষোড়শাধ্যায়স্যারম্ভঃ। নিরূপিতে হি কার্য্যার্থে চাধিকারিজিজ্ঞাসা ভবতি

অহিংসা সত্যমক্রোধস্ত্যাগঃ শান্তিরপৈশুনম্।
দয়া ভূতেষ্বলোলুপ্ত্বং মার্দবং হ্রীরচাপলম্ ॥ ২ ॥

## শাঙ্করভাষ্যম্।

দৈবী সাত্ত্বিকী সংপৎ যত্র চ যেষামধিকৃতানাং যা প্রকৃতিঃ সম্ভবতি সাত্ত্বিকী সোচ্যতে দানং যথাশক্তি সম্বিভাগোঽন্নাদীনাং, দমশ্চ বাহ্যকরণানাং উপশমোঽন্তঃকরণস্যোপশমঃ শান্তিং বক্ষ্যতি, যজ্ঞশ্চ শ্রৌতোঽগ্নিহোত্রাদি স্মার্ত্তশ্চ দেবযজ্ঞাদিঃ, স্বাধ্যায়ঋগ্বেদাদ্যধ্যয়নমদৃষ্টার্থং, তপোবক্ষ্যমাণং শারীরাদি, আর্জ্জবমৃজুত্বং সর্ব্বদা ॥ ১ ॥

কিঞ্চ অহিংসেতি। অহিংসা অহিংসনং প্রাণিনাং পীড়াবর্জ্জনং, সত্যমপ্রিয়ানৃতবর্জ্জনং যথাভূতার্থবচনং, অক্রোধঃ পরৈরাক্রুষ্টস্যাভিহতস্য বা প্রাপ্তস্য ক্রোধস্যোপশমনং, ত্যাগঃ সন্ন্যাসঃ পূর্ব্বং দানস্যোক্তত্বাৎ, শান্তিরন্তঃকরণস্যোপশমঃ, অপৈশুনমপিশুনতা পরস্মৈ পররন্ধ্রপ্রকটীকরণং পৈশুনন্তদভাবোঽপৈশুনং, দয়া ভূতেষু দুঃখিতেষু, অলোলুপ্ত্বমিন্দ্রিয়াণাং

## গিরিকৃত টীকা।

শুদ্ধেতি। এবেত্যভয়াদ্যা জ্ঞানাদিস্থিত্যন্তা ক্রিয়োক্তেতি যাবৎ। তামেব সাত্ত্বিকীং প্রকৃতিংপ্রকটয়তি যত্রেতি। জ্ঞানে কর্ম্মণি বাধিকৃতাণামঙ্গীকৃতাদ্যা যা প্রকৃতিঃ সা তেষান্তত্র সাত্ত্বিকী সম্পদিত্যর্থঃ মহাভাগ্যানামভ্যুত্তমা দৈবী সম্পদুক্তা সংপ্রতি সর্ব্বেষাং যথাসম্ভবং সম্পদং ব্যপদিশতি দানমিতি। বাহ্যকরণবিশেষণে কারণমাহ অন্তঃকরণস্যেতি। দেবযজ্ঞাদিরিত্যাদিশব্দেন পিতৃযজ্ঞো ভূতযজ্ঞো মনুষ্যযজ্ঞশ্চেতি এবমুক্তং ॥ ১ ॥

ব্রহ্মযজ্ঞস্য স্বাধ্যায়েন পৃথক্করণাদ্দৈবীং সম্পদমভিজাতস্য বিশেষণান্তরাণি দর্শয়তি কিঞ্চেতি। ত্যাগশব্দেন যোগদানং কস্মান্নোচ্যতে তত্রাহ পূর্ব্বমিতি। লজ্জাঽকার্য্যানিবৃত্তিহেতুগর্হানিমিত্তো মনোবৃত্তিঃ ॥ ২ ॥

## স্বামিকৃত টীকা।

তদুক্তং ভট্টৈঃ, ভাবো যো যেন বোঢব্যঃ সপ্রাগাদ্দোলিতো যদা। তদা কস্তস্য বোঢেতি শক্যং কর্ত্তুং নিরূপণমিতি। তত্রাধিকারিবিশেষণভূতাং দৈবীং সম্পদমাহ অভয়মিতি ত্রিভিঃ। অভয়ং ভয়াভাবঃ, সত্ত্বস্য চিত্তস্য সংশুদ্ধিঃ সুপ্রসন্নতা, জ্ঞানযোগে আত্মজ্ঞানোপায়ে ব্যবস্থিতিঃ পরিনিষ্ঠা, দানং স্বভোজ্যস্যান্নাদের্যথোচিতসম্বিভাগঃ, দমো বাহ্যেন্দ্রিয়সংযমঃ, যজ্ঞো যথাধিকারং দর্শপৌর্ণমাসাদিঃ, স্বাধ্যায়ো ব্রহ্মযজ্ঞাদিঃ, তপউত্তরাধ্যায়ে বক্ষ্যমাণং শারীরাদি, আর্জ্জবমবক্রতা ॥ ২ ॥

কিঞ্চ অহিংসেতি। অহিংসা পরপীড়াবর্জ্জনং, সত্যং যথাদৃষ্টার্থভাষণং, অক্রোধস্তাড়িতস্যাপি চিত্তে ক্রোধানুৎপত্তিঃ, ত্যাগঔদার্য্যং, শান্তিশ্চিত্তোপরতিঃ, পৈশুনং পরোক্ষে

তেজঃ ক্ষমা ধৃতিঃ শৌচমদ্রোহো নাতিমানিতা।
ভবন্তি সম্পদং দৈবীমভিজাতস্য ভারত ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

বিষয়সন্নিধাববিক্রিয়া, মার্দ্দবং মৃদুতা অক্রৌর্য্যং, হ্রীর্লজ্জা, অচাপলমসতি প্রয়োজনে বাক্‌পাণিপাদাদীনামব্যাপারয়িতৃত্বং ॥ ২ ॥

কিঞ্চ তেজইতি। তেজঃ প্রাগল্‌ভ্যং ন ত্বগ্‌গতা দীপ্তিঃ, ক্ষমা আকৃষ্টস্য তাড়িতস্য বান্তর্বিক্রিয়ানুৎপত্তিঃ উৎপন্নায়াঃ বিক্রিয়ায়াঃ প্রশমনং অক্রোধঃ ইত্যবোচাম ইত্থং ক্ষমায়া অক্রোধস্য চ বিশেষঃ, ধৃতির্দেহেন্দ্রিয়েষ্ববসাদং শাস্ত্রেষু তস্য প্রতিষেধকোঽন্তঃকরণবৃত্তিবিশেষো যেনোত্তম্ভিতানি করণানি দেহশ্চ নাবসীদন্তি, শৌচং দ্বিবিধং মৃজ্জলাভ্যাং কৃতং বাহ্যমাভ্যন্তরঞ্চ মনোবুদ্ধ্যোর্নৈর্ম্মল্যং মায়া রাগাদিকালুষ্যাভাবঃ এবং দ্বিবিধং শৌচং অদ্রোহঃ পরজিঘাংসাভাবোঽহিংসনং, নাতিমানিতাত্যর্থং মানোঽতিমানঃ স যস্য বিদ্যতে সোঽতিমানী তদ্ভাবোঽতিমানিতা আত্মনঃ পূজ্যতাতিশয় ভাবনাভাব ইত্যর্থঃ, ভবন্ত্যভয়াদীন্যেতদন্তানি সম্পদমভিজাতস্য কিং বিশিষ্টাং সংপদং দৈবীং দেবানাং সম্পদং তামভিলক্ষ্য জাতস্য দৈবীবিভূত্যর্হস্য ভাবিকল্যাণস্যেত্যর্থো হে ভারত ॥ ৩ ॥

---

## গিরিকৃত টীকা।

দৈবীং সম্পদং প্রাপ্তস্য বিশেষণান্তরাণ্যপি সন্তীত্যাহ কিঞ্চেতি। ব্যাবর্ত্ত্যং কীর্ত্তয়তি নেতি। অধ্যাত্মাধিকারাদিতিশেষঃ। ক্ষমাক্রোধয়োরেকার্থত্বেন পৌনরুক্ত্যমাশঙ্ক্য পরিহরতি উৎপন্নানামিতি। তয়োরেবং বিশেষান্ন পৌনরুক্ত্যং ফলতীত্যাহ ইত্থমিতি। শৌচস্য দ্বৈবিধ্যমেব প্রকটয়তি মৃজ্জলেত্যাদিনা। নৈর্ম্মল্যমেব স্ফোরয়তি মায়েতি। উক্তমুপসংহরতি এবমিতি। অভিমানত্বভাবমেব ব্যনক্তি আত্মনইতি। কস্যৈতানি বিশেষণা-

## স্বামিকৃত টীকা।

পরদোষপ্রকাশনং তদ্বর্জনমপৈশুনং, ভূতেষু দীনেষু দয়া, অলোলুপ্ত্বং লোভাভাবঃ অবর্ণলোপশ্চার্ষঃ, মার্দ্দবং মৃদুত্বং অক্রূরতা, হ্রীরকার্য্যপ্রবৃত্তৌ লোকলজ্জা, অচাপলং ব্যর্থক্রিয়ারাহিত্যং ॥ ২ ॥

কিঞ্চ তেজইতি। তেজঃ প্রাগল্‌ভ্যং, ক্ষমা পরিভবাদিষূপপদ্যমানেষু ক্রোধপ্রতিবন্ধঃ, ধৃতির্দুঃখাদিভিরবসাদে চিত্তস্য স্থিরীকরণং শৌচং বাহ্যাভ্যন্তরশুদ্ধিঃ, অদ্রোহো জিঘাংসারাহিত্যং অতিমানিতা আত্মন্যতিপূজ্যত্বাভিমানস্তদভাবো নাতিমানিতা এতান্যভয়াদীনি ষড়্‌বিংশতিপ্রকারাণি দৈবীং সম্পদমভিজাতস্য ভবন্তি দেবযোগ্যাং সাত্ত্বিকীং সম্পদমভিলক্ষ্য তদাভিমুখ্যেন জাতস্য ভাবিকল্যাণস্য পুংসো ভবন্তীত্যর্থঃ ॥ ৩ ॥

দম্ভো দর্পোঽভিমানশ্চ ক্রোধঃ পারুষ্যমেব চ।
অজ্ঞানং চাভিজাতস্য পার্থ সম্পদমাসুরীম্ ॥ ৪ ॥
দৈবী সম্পদ্বিমোক্ষায় নিবন্ধায়াসুরী মতা।
মা শুচঃ সম্পদং দৈবীমভিজাতোঽসি পাণ্ডব ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

অথেদানীমাসুরী সম্পদুচ্যতে দম্ভো ধর্ম্মধ্বজিত্বং, দর্পো ধনস্বজনাদিনিমিত্তউৎসেকোঽভিমানঃ, পূর্ব্বোক্তঃ ক্রোধশ্চ, পারুষ্যমেব পরুষবচনং যথাকাণঞ্চক্ষুষ্মানিতি বিরূপং রূপবান্ হীনাভিজনমুত্তমাভিজনইত্যাদি অজ্ঞানঞ্চাবিবেকজ্ঞানং মিথ্যাজ্ঞানং কর্ত্তব্যাকর্ত্তব্যাদিমিথ্যাপ্রত্যয়বিষযং অভিজাতস্য পার্থ কিমভিজাতস্যেত্যাহ অসুরাণাং সম্পদাসুরী তামভিজাতস্যেত্যর্থঃ ॥ ৪ ॥

অনয়োঃ সম্পদোঃ কার্য্যমুচ্যতে দৈবীতি। দৈবী সম্পৎ যা সা বিমোক্ষায় সংসার-

## গিরিকৃত টীকা।

ত্যপেক্ষায়ামাহ ভবন্তীতি। সাধকস্য মনুষ্যদেহস্থস্যৈব কথং দৈবীং সম্পদমভিলক্ষ্য জাতত্বমিত্যাশঙ্ক্যাহ দৈবীতি ॥ ৩ ॥

আদেয়ত্বেন দৈবীং সম্পদমুক্ত্বা হেয়ত্বেনাসুরীং সম্পদমাহ অথেতি। উৎসেকো মদো মহদবধীরণে হেতুঃ, আত্মন্যুৎকৃষ্টত্বাধ্যাবোপোঽভিমানঃ, ক্রোধস্তু কোপাপরপর্য্যায়ঃ স্বপরাপকারপ্রকৃতিহেতুনেত্রাদিবিকারলিঙ্গোঽন্তঃকরণবৃত্তিবিশেষঃ পরুষোনিষ্ঠুরঃ প্রত্যক্ষরুক্ষবাক্ তস্য ভাবঃ পারুষ্যন্তদুদাহরতি যথেতি। তামভিজাতস্য দম্ভাদীন্যজ্ঞানান্তানি ভবন্তি ইত্যনুষজ্যতে ॥ ৪ ॥

অনয়োরিতি। কার্য্যং ফলবিভাগঃ। আসুরীত্যুপলক্ষণং রাক্ষসী চেতি দ্রষ্টব্যমিত্যাহ তথেতি। ফলবিভাগে সম্পদোরেবমুক্তে প্রতীত্যার্জুনস্যাভিপ্রায়ং ভগবতোবচনমিত্যাহ তত্রেতি। তত্রাভিজাত্যং হেতুং করোতি পাণ্ডবেতি ॥ ৫ ॥

## স্বামিকৃত টীকা।

আসুরীং সম্পদমাহ দম্ভইতি। দম্ভো ধর্ম্মধ্বজিত্বং, দর্পো ধনবিদ্যাদিনিমিত্তং চিত্তস্যোৎসুক্যং, অভিমানো ব্যাখ্যাতএব, ক্রোধঃ প্রসিদ্ধঃ, পারুষ্যং নিষ্ঠুরত্বং, অজ্ঞানমবিবেকঃ, আসুরীমিত্যুপলক্ষণং আসুরাণাং রাক্ষসানাঞ্চ যা সম্পত্তিস্তামভিলক্ষ্য জাতস্যৈতানি দম্ভাদীনি ভবন্তি ॥ ৪ ॥

এতয়োঃ সম্পদোঃ কার্য্যং দর্শয়ন্নাহ দৈবীতি। দৈবী যা সম্পত্তয়া যুক্তো ময়োপদিষ্টে তত্ত্বজ্ঞানেঽধিকারী আসুর্য্যা সম্পদা যুক্তস্তু নিত্যং সংসারীত্যর্থঃ, এতচ্ছ্রুত্বা কিমহম-

দ্বৌ ভূতসর্গৌ লোকেঽস্মিন্ দৈব আসুরএব চ।
দৈবো বিস্তরশঃ প্রোক্ত আসুরং পার্থ মে শৃণু ॥ ৬ ॥

## শাঙ্করভাষ্যম্।

বন্ধনাৎ নিবন্ধায় নিয়তো বন্ধো নিবন্ধস্তদর্থমাসুরী সম্পন্মতাভিপ্রেতা তথা রাক্ষসী তত্রৈব-মুক্তে সত্যর্জ্জুনস্যান্তর্গতং ভাবং কিমহমাসুরীসম্পদ্‌যুক্তঃ কিম্বা দৈবীসংপদ্‌যুক্তইত্যেবমালোচনারূপমালক্ষ্যাহ ভগবান্ মাশুচঃ শোকং মাকার্ষীঃ সম্পদং দৈবীমভিজাতোঽসি হে পাণ্ডব অভিলক্ষ্য জাতোঽসি ভাবিকল্যাণস্ত্বমসীত্যর্থঃ ॥ ৫ ॥

দ্বৌ ভূতেতি। দ্বৌ দ্বিঃসঙ্খ্যাকৌ ভূতসর্গৌ ভূতানাং মনুষ্যাণাং সর্গৌ সৃষ্টী ভূতসর্গৌ সৃজ্যেতে ইতি সর্গৌ ভূতান্যেব সৃজ্যমানানি দৈবাসুরসম্পদ্‌যুক্তানি দ্বৌ ভূতসর্গাবিত্যুচ্যেতে,দ্বয়া হ প্রাজাপত্যা দেবাশ্চাসুরাশ্চেতি শ্রুতেঃ লোকেঽস্মিন্ সংসারে ইত্যর্থঃ সর্ব্বেষাং দ্বৈবিধ্যোপপত্তেঃ কৌ তৌ ভূতসর্গৌ ইত্যুচ্যতে প্রকৃতাবেব দৈবআসুরএব চ উক্তযোরেব পুনরনুবাদপ্রয়োজনমাহ দৈবো ভূতসর্গোঽভয়ং সত্ত্বসংশুদ্ধিরিত্যাদিনা বিস্তরশো বিস্তরপ্রকারৈঃ প্রোক্তঃ কথিতো ন ত্বাসুরো বিস্তরশোঽতস্তৎপরিবর্জনার্থমাসুরং পার্থ মে মম বচনাদুচ্যমানং বিস্তরশঃ শৃণু অবধারয় ॥ ৬ ॥

## গিরিকৃত টীকা।

নির্দ্দয়ানাং রক্ষসাং সম্পত্তৃতীয়াস্তি সা কস্মান্নোক্তেত্যাশঙ্ক্যাসুর্য্যামন্তর্ভাবাদিত্যাহ দ্বাবিতি। ভূতানাং দ্বৈবিধ্যে মানমেনোদ্‌গীথব্রাহ্মণমুদাহরতি দ্বয়া হেতি। সম্পৎদ্বয়যুক্তেভ্যোঽতিরিক্তানামপি প্রাণিভেদানাং সম্ভবাৎ কুতো ভূতানাং দ্বিত্বনিয়তিরিত্যাশঙ্ক্যাহ সর্ব্বেষামিতি ॥ ৬ ॥

নন্বধ্যায়শেষেণাসুরীসম্পদ্দর্শনমযুক্তং তস্যাস্ত্যজ্যত্বেন পঙ্কপ্রক্ষালনন্যায়াবতারাদিত্যাশঙ্ক্যাহ প্রত্যাখ্যাকরণেনেতি। বর্জনীয়ামাসুরীং সম্পদং বিবৃণোতি প্রবৃত্তিঞ্চেতি। তাং বিহিতাং প্রবৃত্তিং ন জানন্তীত্যর্থঃ, তাঞ্চ নিষিদ্ধাং ক্রিয়াং ন জানন্তীতিসম্বন্ধঃ। ন শৌচমি-

## স্বামিকৃত টীকা।

ত্রাধিকারী ন বেত্তি সন্দেহাদ্ব্যাকুলমর্জ্জুনমাশ্বাসয়তি হে ভারত মাশুচঃ শোকং মাকার্ষীঃ যতস্ত্বং দৈবীং সম্পদমভিজাতোঽসি ॥ ৫ ॥

আসুরী সম্পৎ সর্ব্বাত্মনা বর্জ্জয়িতব্যেত্যেতদর্থমাসুরীং সম্পদং প্রপঞ্চয়িতুমাহ দ্বাবিতি দ্বৌ দ্বিঃপ্রকারৌ ভূতানাং সর্গৌ মে বচনাচ্ছৃণু, আসুররাক্ষসপ্রকৃত্যোরেকীকরণেন দ্বাবিত্যুক্তং, অতো রাক্ষসীমাসুরীঞ্চৈব প্রকৃতিং মোহনীং শ্রিতা ইত্যাদিনা নবমাধ্যায়োক্তপ্রকৃতিত্রৈবিধ্যেনাবিরোধঃ, স্পষ্টমন্যৎ ॥ ৬ ॥

প্রবৃত্তিঞ্চ নিবৃত্তিঞ্চ জনা ন বিদুরাসুরাঃ।
ন শৌচং নাপি চাচারো ন সত্যং তেষু বিদ্যতে ॥ ৭ ॥
অসত্যমপ্রতিষ্ঠন্তে জগদাহুরনীশ্বরম্।
অপরস্পরসম্ভূতং কিমন্যৎ কামহেতুকম্ ॥ ৮ ॥

## শাঙ্করভাষ্যম্।

অধ্যায়পরিসমাপ্তেবাসুরী সম্পৎ প্রাণিবিশেষণত্বেন প্রদর্শ্যতে প্রত্যক্ষীকরণেন শক্যতে অস্যাঃ পবিবর্জ্জনং কর্ত্তুমিতি, প্রবৃত্তিমিতি প্রবৃত্তিঞ্চ প্রবর্ত্তনং যস্মিন্ পুরুষার্থসাধনে কর্ত্তব্যে প্রবৃদ্ধিস্তাং নিবৃত্তিঞ্চ তদ্বিপরীতাং যস্মাদনর্থহেতোর্নিবর্ত্তিতব্যা সা নিবৃত্তিস্তাঞ্চ জনা আসুরা ন বিদুঃ ন জানন্তি ন কেবলং প্রবৃত্তিনিবৃত্তী এব ন বিদুর্ন শৌচং নাপি চাচাবো ন সত্যন্তেষু বিদ্যতে অশৌচানাচারমায়াবিনোঽনৃতবাদিনো হ্যাসুরাঃ ॥ ৭ ॥

কিঞ্চ অসত্যেতি। অসত্যং যথা বয়মনৃতপ্রায়াস্তথেদং জগৎ সর্ব্বং অসত্যমপ্রতিষ্ঠঞ্চ নাস্য ধর্ম্মাধর্ম্মৌ প্রতিষ্ঠাতোঽপ্রতিষ্ঠঞ্চেতি তে আসুরা জনা জগদাহুরনীশ্বরং ন চ ধর্ম্মাধর্ম্মসব্যপেক্ষকোঽস্য শাসিতেশ্বরো বিদ্যতইতি অতোঽনীশ্বরং জগদাহুঃ কিঞ্চ অপরস্পরসম্ভূতং

## গিরিকৃত টীকা।

ত্যাদেস্তাৎপর্য্যমাহ অনাচারেতি। শৌচসত্যয়োরাচারান্তর্ভাবেঽপি ব্রাহ্মণপরিব্রাজকন্যায়েন পৃথগুপাদানং ॥ ৭ ॥

অসুরাণাং জনানাং বিশেষণান্তরাণ্যপি সন্তীত্যাহ কিঞ্চেতি। বিদ্যতইত্যাহুরিতি পূর্ব্বেণ সম্বন্ধঃ। শাস্ত্রৈকগম্যমদৃষ্টং নিমিত্তীকৃত্য প্রকৃত্যধিষ্ঠাত্রাত্মকেন ব্রহ্মণা বহিতং জগদিষ্যতে চেৎ কথন্তদুৎপত্তিরিত্যাশঙ্ক্যাহ কিঞ্চেতি। কিমন্যদিত্যাদেরাক্ষেপস্য তাৎপর্য্যমাহ ন কিঞ্চিদিতি ॥ ৮ ॥

## স্বামিকৃত টীকা।

আসুরীং বিস্তরেণ নিরূপয়তি প্রবৃত্তিঞ্চেত্যাদি দ্বাদশভিঃ। প্রবৃত্তিমধর্ম্মান্নিবৃত্তিঞ্চাসুরস্বভাবা জনা ন জানন্তি অতঃ শৌচমাচারঃ সত্যঞ্চ তেষু নাস্ত্যেব ॥ ৭ ॥

নন্থ বেদোক্তয়োর্দ্ধর্ম্মাধর্ম্ময়োঃ প্রবৃত্তিং নিবৃত্তিঞ্চ কথং ন বিদুঃ কুতো বা ধর্ম্মাধর্ম্ময়োরনঙ্গীকারে জগতঃ সুখদুঃখাদিব্যবস্থা স্যাৎ কথং বা শৌচাচারাদিবিষয়মীশ্বরাজ্ঞামতিবর্ত্তেরন্ ঈশ্বরানঙ্গীকারে চ কুতো জগদুৎপত্তিঃ স্যাদতআহ অসত্যমিতি। নাস্তি সত্যং বেদপুরাণাদি প্রমাণং যস্মিংস্তাদৃশং জগদাহুঃ বেদাদীনাং প্রামাণ্যং ন মন্যন্ত ইত্যর্থঃ তদুক্তং ত্রয়ো বেদস্য কর্ত্তারো মুনিভণ্ডনিশাচরাইত্যাদি। অতএব নাস্তি ধর্ম্মাধর্ম্মরূপ প্রতিষ্ঠা ব্যবস্থাহেতুর্যস্য তৎ স্বাভাবিকং জগদ্বৈচিত্র্যমাহুরিত্যর্থঃ। অতএব নাস্তীশ্বরঃ

এতাং দৃষ্টিমবষ্টভ্য নষ্টাত্মানোঽল্পবুদ্ধয়ঃ।
প্রভবন্ত্যুগ্রকর্ম্মাণঃ ক্ষয়ায় জগতোঽহিতাঃ ॥ ৯ ॥
কামমাশ্রিত্য দুষ্পূরং দম্ভমানমদান্বিতাঃ।
মোহাদ্গৃহীত্বাঽসদগ্রাহান্ প্রবর্ত্তন্তেঽশুচিব্রতাঃ ॥ ১০ ॥

## শাঙ্করভাষ্যম্।

কামপ্রযুক্তয়োঃ স্ত্রীপুরুষয়োরন্যোন্যসংযোগাৎ জগৎ সর্ব্বং সম্ভূতং কিমন্যৎ কামহেতুকং কামহেতুকমেব কামহেতুকমন্যজ্জগতঃ কারণং ন কিঞ্চিৎ অদৃষ্টং ধর্ম্মাধর্ম্মাদিকারণান্তরং বিদ্যতে জগতঃ কামএব প্রাণিনাং কারণমিতি লোকায়তিকদৃষ্টিরিয়ং ॥ ৮ ॥

এতামিতি। এতাং দৃষ্টিমবষ্টভ্যাশ্রিত্য নষ্টাত্মানো নষ্টস্বভাবা বিভ্রষ্টপরলোকসাধনা-অল্পবুদ্ধয়োবিষয়বিষয়া অল্পৈব বুদ্ধির্যেষাম্তে অল্পবুদ্ধয়ঃ প্রভবন্ত্যুদ্ভবন্তি উগ্রকর্ম্মাণঃ ক্রূর-কর্ম্মাণো হিংসাত্মকাঃ ক্ষয়ায় জগতঃ প্রভবন্তীতি সম্বন্ধঃ জগতোঽহিতাঃ শত্রবইত্যর্থঃ ॥ ৯ ॥

তে চ কামেতি। কামং ইচ্ছাবিশেষমাশ্রিত্যাবষ্টভ্য দুষ্পূরমশক্যপূরণং দম্ভমানমদা-ন্বিতাঃ দম্ভশ্চ মানশ্চ মদশ্চ দম্ভমানমদাস্তৈরন্বিতাঃ মোহাদবিবেকতঃ গৃহীত্বোপাদায়

## গিরিকৃত টীকা।

যথোক্তা দৃষ্টির্ন্দৃষ্টিবদিষ্টৈবেত্যাশঙ্ক্যাহ এতামিতি। প্রাগুপদিষ্টামেতাং লোকায়তি-কদৃষ্টিমবলম্ব্যেতি যাবৎ। নষ্টস্বভাবত্বমেব স্পষ্টয়তি বিভ্রষ্টেতি। বিষয়বুদ্ধেরল্পত্বং দৃষ্টমা-ত্রোদ্দেশেন প্রবৃত্তত্বং, জগতঃ প্রাণিজাতস্যেতি যাবৎ ॥ ৯ ॥

তানেব দুরাচারানসুরান্ প্রকারান্তরেণ বিশিনষ্টি তে চেতি ॥ ১০ ॥

## স্বামিকৃত টীকা।

কর্ত্তা ব্যবস্থাপকশ্চ যস্য তাদৃশং জগদাহুঃ। তর্হি কুতোঽস্য জগতউৎপত্তিংবদন্তীত্যত অপরস্পরসম্ভূতমিতি। অপরশ্চ পরশ্চেতি অপরস্পরং অপরস্পরতোঽন্যোন্যতঃ স্ত্রীপুং-সয়োর্ম্মিথুনাৎ সম্ভূতং জগৎ। কিমন্যৎ কারণমস্য নাস্ত্যন্যৎ কিঞ্চিৎ কিন্তু কামহেতুকমেব স্ত্রীপুংসয়োরুভয়োঃ কামএব প্রবাহরূপেণ হেতুরস্যেত্যর্থঃ ॥ ৮ ॥

কিঞ্চ এতামিতি। এতাং লোকায়তিকানাং দৃষ্টিং দর্শনমাশ্রিত্য নষ্টাত্মানো মলীম-সচিত্তাঃ সন্তোঽল্পবুদ্ধয়ো দৃষ্টার্থমাত্রমতয়ঃ, অতএবোগ্রং হিংস্রং কর্ম্ম যেষাং তে, অহিতা বৈরিণো ভূত্বা জগতঃ ক্ষয়ায় প্রভবন্তি উদ্ভবন্তীত্যর্থঃ ॥ ৯ ॥

অপি চ কামমাশ্রিত্য দম্ভাদিভির্যুক্তাঃ সন্তঃ ক্ষুদ্রদেবতারাধনাদৌ প্রবর্ত্তন্তে। কথং অসদ্ গ্রাহাদ্ গৃহীত্বা অনেন মন্ত্রেণৈতাং দেবতামারাধ্য মহানিধীন্ সাধয়াম ইত্যাদীন্

চিন্তামপরিমেয়াঞ্চ প্রলয়ান্তামুপাশ্রিতাঃ।
কামোপভোগপরমাএতাবদিতি নিশ্চিতাঃ ॥ ১১ ॥
আশাপাশশতৈর্ব্বদ্ধাঃ কামক্রোধপরায়ণাঃ।
ঈহন্তে কামভোগার্থমন্যায়েনার্থসঞ্চয়ান্ ॥ ১২ ॥

## শাঙ্করভাষ্যম্।

অসদ্গ্রাহানশুভনিশ্চয়ান্ প্রবর্ত্তন্তে লোকেঽশুচিব্রতাঃ অশুচীনি ব্রতানি যেষান্তে অশুচিব্রতাঃ ॥ ১০ ॥

কিঞ্চ চিন্তেতি। চিন্তামপরিমেয়াঞ্চ ন পরিমাতুং শক্যতে অস্যাশ্চিন্তাযা ইয়ত্তা সা অপরিমেয়া তামপরিমেয়াং প্রলয়ান্তাং মরণান্তামুপাশ্রিতাঃ সদা চিন্তাপরাইত্যর্থঃ কামোপভোগপরমাঃ কাম্যন্তইতি কামাঃ শব্দাদয়স্তদুপভোগপরমাঃ অয়মেব পরমঃ পুরুষার্থো যঃ কামোপভোগইত্যেবং নিশ্চিতাত্মানএতাবদিতি নিশ্চিতাঃ ॥ ১১ ॥

আশাপাশেতি। আশাপাশশতৈঃ আশাএব পাশাস্তচ্ছতৈরাশাপাশশতৈর্ব্বদ্ধা নিয়ন্ত্রিতাঃ সন্তঃ সর্ব্বতঃ আকৃষ্যমাণাঃ কামক্রোধপরায়ণাঃ কামক্রোধৌ পরময়নং পরআশ্রয়ো

## গিরিকৃত টীকা।

তানেব বিধান্তরেণ বিশিনষ্টি কিঞ্চেতি। চিন্তামাত্মীযযোগক্ষেমোপায়ালোচনাত্মিকামপরিমেযবিষয়ত্বাৎ পরিমাতুমশক্যামাশ্রিতাইতি সম্বন্ধঃ। এষ কামোঽত্রভোগঃ পরময়নং সুখস্যেত্যেতাবৎ পারত্রিকং তু নাস্তি সুখমিতি নিশ্চয়বন্তইত্যাহ এতাবদিতীতি ॥ ১১ ॥

আসুরানেব পুনঃ বিশিনষ্টি আশেতি। অশক্যোপায়ার্থবিষয়া অনবগতোপায়ার্থবিষয়া বা প্রার্থনা আশাস্তাঃ পাশাইব পাশাস্তেষাং শতৈর্ব্বদ্ধাইব শ্রেয়সঃ প্রচ্যাব্যেতস্ততো নীয়মানা ইত্যাহ আশাএবেতি ॥ ১২ ॥

## স্বামিকৃত টীকা।

দুরাগ্রহান্ মোহমাত্রেণ স্বীকৃত্য প্রবর্ত্তন্তে, অশুচিব্রতা অশুচীনি মদ্যমাংসাদিবিষয়াণি ব্রতানি যেষাং তে ॥ ১০ ॥

কিঞ্চ চিন্তামিতি। প্রলয়োমরণমেবান্তো যস্যা স্তামপরিমেয়াং পরিমাতুমশক্যাং চিন্তামাশ্রিতা নিত্যচিন্তাপরাইত্যর্থঃ। কামোপভোগএব পরমো যেষাং তে এতাবদিতি কামোপভোগএব পরমঃ পুরুষার্থো নান্যদস্তীতি কৃতনিশ্চয়াঅর্থসঞ্চয়ানীহন্ত ইত্যুত্তরেণান্বয়ঃ, তথা চ বার্হস্পত্যসূত্রং, কামএবৈকঃ পুরুষার্থ ইতি চৈতন্যবিশিষ্টঃ কামঃ পুরুষ ইতি চ ॥ ১১ ॥

অতএব আশেতি। আশাএব পাশাস্তেষাং শতৈর্ব্বদ্ধা ইতস্তত আকৃষ্যমাণাঃ, কাম

ইদমদ্য ময়া লব্ধমিদং প্রাপ্স্যে মনোরথম্।
ইদমস্তীদমপি মে ভবিষ্যতি পুনর্ধনম্ ॥ ১৩ ॥
অসৌ ময়া হতঃ শত্রুর্হনিষ্যে চাপরানপি।
ঈশ্বরোঽহমহং ভোগী সিদ্ধোঽহং বলবান্ সুখী ॥ ১৪ ॥

## শাঙ্করভাষ্যম্।

যেষাস্তে কামক্রোধপরায়ণাঃ ঈহন্তে চেষ্টন্তে কামভোগার্থং কামভোগপ্রয়োজনায় ন ধর্ম্মা-মন্যায়েনার্থসঞ্চয়ান্ অর্থপ্রচয়ান্ অন্যায়েন পরস্বাপহরণাদিনেত্যর্থঃ ॥ ১২ ॥

ঈদৃশশ্চ তেষামভিপ্রায়ঃ ইদমিতি। ইদং দ্রব্যং অদ্য ইদানীং ময়া লব্ধং ইদঞ্চ অন্যৎ প্রাপ্স্যে মনোরথং মনস্তুষ্টিকরং ইদমপি মে ভবিষ্যত্যাগামিনি সম্বৎসরে পুনর্ধনং তেনাহং ধনী বিখ্যাতো ভবিষ্যামি ॥ ১৩ ॥

অসৌ ময়েতি। অসৌ দেবদত্তনামা ময়া হতঃ দুর্জয়ঃ শত্রুঃ হনিষ্যে চান্যান্বরাকান্ পরানপি কিমেতে করিষ্যন্তি তপস্বিনঃ সর্ব্বথাপি নাস্তি মত্তুল্য ঈশ্বরোঽহমহং ভোগী সর্ব্ব-প্রকারেণ চ সিদ্ধোঽহং সম্পন্নঃ পুত্রৈঃ পৌত্রৈর্নপ্তৃভির্ন কেবলং মানুষোঽহং বলবান্ সুখী চাহমেব অন্যে তু ভূমিভারায়াবতীর্ণাঃ ॥ ১৪ ॥

## গিরিকৃত টীকা।

তেষামভিপ্রায়োঽপি বিবেকবিরোধীত্যাহ ঈদৃশশ্চেতি। দ্রব্যঙ্গোহিরণ্যাদি। ইদমন্ত-র্বুদ্ধৌ প্রার্থ্যমানত্বেন বিপরিবর্ত্তমানমিত্যেতৎ ॥ ১৩ ॥

যথোক্তে মদভিপ্রায়ে প্রতিবন্ধকঃ শত্রুরপি ন সম্ভবতীত্যাহ অসাবিতি। ত্বত্তো বিহী-নানাং ত্বয়া পরিভবেঽপি ত্বত্তুল্যানাং শত্রূণাং পরিভবোনিশ্চিতো ন ভবতীত্যাশঙ্ক্যাহ সর্ব্বথেতি। ঐশ্বর্য্যাতিরেকেঽপি কুতস্তেষাং ভোগসামর্থ্যমিত্যাশঙ্ক্যাহ অহমিতি। সিদ্ধ-ত্বমেব স্ফুটয়তি সম্পন্নইতি। বলবানোজস্বী সুখী রোগরহিতঃ ॥ ১৪ ॥

বিদ্যাবৃত্তধনাভিজনৈঃ মত্তুল্যো নাস্তীত্যাহ আঢ্যইতি। তথাপি যোগদানাভ্যাস্তৎ-

## স্বামিকৃত টীকা।

ক্রোধপরায়ণাঃ, কামক্রোধৌ পরময়নমাশ্রয়ো যেষাং তে, কামভোগার্থন্যায়েন চৌর্য্যা-দিনার্থানাং সঞ্চয়ান্ রাশীনীহন্ত ইচ্ছন্তি ॥ ১২ ॥

তেষাং মনোরথং কথয়ন্ নরকপ্রাপ্তিমাহ ইদমদ্যেতি চতুর্ভিঃ। প্রাপ্স্যে প্রাপ্স্যামি মনোরথং মনসঃ প্রিয়ং, স্পষ্টমন্যৎ, এতেষাঞ্চ ত্রয়াণাংশ্লোকানামিত্যজ্ঞানবিমোহিতাঃ সন্তো নরকে পতন্তীতি চতুর্থেনান্বয়ঃ ॥ ১৩ ॥

কিঞ্চ অসাবিতি। সিদ্ধঃ কৃতকৃত্যঃ, স্পষ্টমন্যৎ ॥ ১৪ ॥

আঢ্যোঽভিজনবানস্মি কোঽন্যোঽস্তি সদৃশো ময়া।
যক্ষ্যে দাস্যামি মোদিষ্য ইত্যজ্ঞানবিমোহিতাঃ॥ ১৫॥
অনেকচিত্তবিভ্রান্তা মোহজালসমাবৃতাঃ।
প্রসক্তাঃ কামভোগেষু পতন্তি নরকেঽশুচৌ॥ ১৬॥

## শাঙ্করভাষ্যম্।

আঢ্যইতি। আঢ্যো ধনেনাভিজনবান্ সপ্তপুরুষং শ্রোত্রিয়ত্বাদিসম্পন্নস্তেনাপি ন মম তুল্যোঽস্তি কশ্চিৎ কোঽন্যোঽস্তি সদৃশস্তুল্যো ময়া কিঞ্চ যক্ষ্যে যাগেনাপ্যন্যানভিভবিষ্যামি দাস্যামি নটাদিভ্যঃ মোদিষ্যে হর্ষাতিশয়ং প্রাপ্স্যামীত্যেবং অজ্ঞানেন বিমোহিতাঃ অজ্ঞানবিমোহিতাঃ অবিবেকভাবমাপন্নাঃ॥ ১৫॥

অনেকেতি। অনেকচিত্তবিভ্রান্তা উক্তপ্রকারৈরনেকৈশ্চিত্তৈর্বিবিধং ভ্রান্তা অনেকচিত্তবিভ্রান্তা মোহজালসমাবৃতাঃ মোহোঽবিবেকোঽজ্ঞানন্তদেব জালমিবাবরণাত্মকত্বাত্তেন সমাবৃতাঃ প্রসক্তাঃ কামভোগেষু কাম্যন্ত ইতি কামাঃ বিষয়াস্তেষামুপভোগেষু কামভোগেষু তত্রৈব নিষণ্ণাঃ সন্তস্তেনোপচিতকল্মষাঃ পতন্তি নরকেঽশুচৌ বৈতরণ্যাদৌ॥ ১৬॥

## গিরিকৃত টীকা।

ফলেন বা কশ্চিদধিকো ভবিষ্যতীত্যাশঙ্ক্যাহ কিঞ্চেতি। নচ তেষামেষোঽভিপ্রায়ঃ সাধীয়ানিত্যাহ ইত্যেবমিতি॥ ১৫॥

উক্তপ্রকারবিপর্যয়েণ কৃত্যাকৃত্যবিবেকবিকলানাং কিং স্যাদিত্যপেক্ষায়ামাহ অনেকেতি। কামাবিষয়াস্তেষাং ভোগেষু তৎপ্রযুক্তেষূপভোগেষ্বিতি যাবৎ॥ ১৬॥

## স্বামিকৃত টীকা।

কিঞ্চ আঢ্যইতি। আঢ্যো ধনাদিসম্পন্নঃ, অভিজনবান্ কুলীনঃ, যক্ষ্যে যাগাদ্যনুষ্ঠানেনাপি দীক্ষিতান্তরেভ্যঃ সকাশান্মহতীং প্রতিষ্ঠাং প্রাপ্স্যামি, দাস্যামি স্তাবকেভ্যশ্চ, মোদিষ্যে হর্ষং প্রাপ্স্যামি ইত্যেবমজ্ঞানেন বিমোহিতা মিথ্যাভিনিবেশং প্রাপিতাঃ॥ ১৫॥

এবম্ভূতা যৎ প্রাপ্নুবন্তি তচ্ছৃণু অনেকেতি। অনেকেষু মনোরথেষু প্রবৃত্তং চিত্তমনেকচিত্তং তেন বিভ্রান্তা বিক্ষিপ্তাঃ তেনৈব মোহময়েন জালেন সমাবৃতা মৎস্যাইব সূত্রময়েন জালেন যন্ত্রিতাঃ এবং কামভোগেষু প্রসক্তাঅভিনিবিষ্টাঃ সন্তোঽশুচৌ কশ্মলে নরকে পতন্তি॥ ১৬॥

যক্ষ্যইতি চ যস্তেষাং মনোরথউক্তঃ স কেবলং দম্ভাহঙ্কারাদিপ্রধানএব ন তু সাত্ত্বিকইত্যভিপ্রায়েণাহ আত্মেতি দ্বাভ্যাং। আত্মনৈব সম্ভাবিতাঃ পূজ্যতাং নীতাঃ নতু

আত্মসম্ভাবিতাস্তব্ধা ধনমানমদান্বিতাঃ।
যজন্তে নামযজ্ঞৈস্তে দম্ভেনাবিধিপূর্ব্বকম্ ॥ ১৭ ॥
অহঙ্কারং বলং দর্পং কামং ক্রোধঞ্চ সংশ্রিতাঃ।
মামাত্মপরদেহেষু প্রদ্বিষন্তোঽভ্যসূয়কাঃ ॥ ১৮ ॥

---

## শাঙ্করভাষ্যম্।

আত্মেতি। আত্মসম্ভাবিতাঃ সর্ব্বগুণাবিশিষ্টতয়াত্মনৈবাত্মনি সম্ভাবিতাঃ আত্মসম্ভাবিতাঃ ন সাধুভিঃ, স্তব্ধা অপ্রণতাত্মানো ধনমানমদান্বিতাধননিমিত্তো মানো মদশ্চ তাভ্যাং ধনমানমদাভ্যামন্বিতা যজন্তে নামযজ্ঞৈর্নামমাত্রৈর্যজ্ঞৈস্তের্দম্ভেন ধর্ম্মধ্বজিতয়া অবিধিপূর্ব্বকং বিহিতাঙ্গেতিকর্ত্তব্যতারহিতৈঃ ॥ ১৭ ॥

অহমিতি। অহঙ্কারমহঙ্করণমহঙ্কারঃ বিদ্যমানৈরবিদ্যমানৈশ্চ গুণৈরাত্মন্যধ্যারোপিতৈর্ব্বিশিষ্টমাত্মানমহমিতি মন্যতে সোঽহঙ্কারোঽবিদ্যাখ্যঃ কষ্টতমঃ সর্ব্বদোষাণাং মূলং সর্ব্বানর্থপ্রবৃত্তীনাঞ্চ মূলং তং পরিগৃহ্য তথা বলং পরাভিভবনিমিত্তং কামরাগান্বিতং দর্পং দর্পোনাম যস্যোদ্ভবে ধর্ম্মমতিক্রামতীতি সোঽয়মন্তঃকরণাশ্রয়ো দোষবিশেষঃ কামং স্ত্র্যাদি-

## গিরিকৃত টীকা।

নন্থ তেষামপি কেষাঞ্চিদ্বৈদিকে কর্ম্মণি যাগদানাদৌ প্রবৃত্তিপ্রতিপত্তেরযুক্তং বৈতরণ্যাদৌ পতনমিতি চেত্তত্রাহ আত্মেতি। আসুরীসম্পদমভিজাতৈরধর্ম্মজাতমেব সঞ্চীয়তে প্রবৃত্তেরপি বৈদিকে কর্ম্মণি নৈব পুণ্যমিত্যুক্তং ॥ ১৭ ॥

ব্রহ্মজ্ঞানাৎ পুনরাসুরা দূরাদেবোদ্বিজন্তইত্যাহ অহঙ্কারমিতি। অহঙ্কারমেব স্ফোরয়তি বিদ্যমানৈরিতি। অধ্যারোপিতবৈশিষ্ট্যবিষয়ত্বাদহঙ্কারস্যাবিদ্যামূলত্বেনাবিদ্যাত্মত্বমাহ অবিদ্যাখ্যইতি। বিবেকিভিস্তস্যাতিযত্নাদেব হেয়ত্বং সূচযতি কষ্টতমইতি। তদেব স্পষ্টয়তি সর্ব্বেতি। তৎসংশ্রিতাইতি সম্বন্ধঃ। কার্য্যকারণসামর্থ্যমুক্তবিশেষণং বলং অহঙ্কারএব মহ-

## স্বামিকৃত টীকা।

সাধুভিঃ কৈশ্চিৎ অতএব স্তব্ধা অনম্রাঃ ধনেন যো মানো মদশ্চ তাভ্যাং সমন্বিতাঃ সন্তঃ তে নামমাত্রেণ যে যজ্ঞাস্তে নামযজ্ঞাঃ যদ্বা দীক্ষিতঃ সোমযাজীত্যেবমাদি নামমাত্রপ্রসিদ্ধয়ে যে যজ্ঞাস্তৈর্যজন্তে, কথং দম্ভেন ন তু শ্রদ্ধয়া অবিধিপূর্ব্বকঞ্চ যথা ভবতি তথা ॥ ১৭ ॥

অবিধিপূর্ব্বকত্বমেব প্রপঞ্চয়তি অহঙ্কারমিতি। অহঙ্কারাদীন্ সংশ্রিতাঃ সন্ত আত্মপরদেহেষু আত্মদেহে পরদেহেষু চ চিদংশেন স্থিতং মাং প্রদ্বিষন্তো যজন্তে দম্ভযজ্ঞেষু শ্রদ্ধায়া অভাবাদাত্মনো বৃথৈব পীড়া ভবতি তথা পশ্বাদীনামপ্যবিধিনা হিংসায়াং চৈতন্যদ্রোহএবাবশিষ্যতইতি প্রদ্বিষন্ত ইত্যুক্তং, অভ্যসূয়কাঃ সন্মার্গবর্ত্তিনাং গুণেষু দোষারোপকাঃ ॥ ১৮ ॥

তানহং দ্বিষতঃ ক্রূরান্ সংসারেষু নরাধমান্।
ক্ষিপাম্যজস্রমশুভানাসুরীষ্বেব যোনিষু॥ ১৯॥
আসুরীং যোনিমাপন্না মূঢ়া জন্মনি জন্মনি।
মামপ্রাপ্যৈব কৌন্তেয় ততো যান্ত্যধমাং গতিম্॥ ২০॥

## শাঙ্করভাষ্যম্।

বিষয়ং ক্রোধমনিষ্টবিষয়ং এতানন্যাংশ্চ মহতো দোষান্ সংশ্রিতাঃ কিঞ্চ তে মামীশ্বরং আত্মপরদেহেষু স্বদেহে পরদেহেষু চ তদ্বুদ্ধিকর্ম্মসাক্ষীভূতং মাং প্রদ্বিষন্তো মচ্ছাসনাতিবর্ত্তিত্বং প্রদ্বেষস্তং কুর্ব্বন্তোঽভ্যসূয়কাঃ সন্মার্গস্থানাং গুণেষু অসহমানাঃ॥ ১৮॥

তানহমিতি। তানহং সর্ব্বান্ সন্মার্গপ্রতিপক্ষভূতান্ সাধুদ্বেষিণো দ্বিষতশ্চ মাং ক্রূরান্ সংসারেষ্বেব নরকসংসরণমার্গেষু নরাধমান্ অধর্ম্মদোষবত্ত্বাৎ ক্ষিপামি প্রক্ষিপামি অজস্রং সন্ততমশুভানশুভকর্ম্মকারিণ আসুরীষ্বেব ক্রূরকর্ম্মপ্রায়াসু ব্যাঘ্রসিংহাদিযোনিষু ক্ষিপামীত্যনেন সম্বন্ধঃ॥ ১৯॥

আসুরীমিতি। আসুরীং যোনিমাপন্নাঃ প্রতিপন্না মূঢ়া জন্মনি জন্মনি অবিবেকিনঃ

## গিরিকৃত টীকা।

দবধীরণাপর্য্যন্তত্বেন পরিণতো দর্পস্তং ব্যাকরোতি দর্পোনামেত্যাদিনা। অন্যাংশ্চ দোষান্মাৎসর্য্যাদীন্ন কেবলং উক্তমেব তেষাং বিশেষণং কিন্তু কষ্টতমমস্তি বিশেষণান্তরমিত্যাহ কিঞ্চেতি। যদ্যপীশ্বরম্প্রতি দ্বেষস্তেষাং সম্ভাব্যতে তথাপি কথং স্বদেহে পরদেহেষু চ তং প্রতি দ্বেষঃ নহি তত্র ভোক্তারমন্তরেণেশ্বরস্যাবস্থানমিত্যাশঙ্ক্যাহ তদ্বুদ্ধীতি। তেষামীশ্বরং প্রতি দ্বেষমেব প্রকটয়তি মচ্ছাসনেতি। ঈশ্বরস্য শাসনং শ্রুতিস্মৃতিরূপং তদতিবর্ত্তিত্বং তদুক্তার্থজ্ঞানানুষ্ঠানপরাঙ্মুখত্বং॥ ১৮॥

তেষামুক্তবিশেষণবতামাসুরাণাং কিং স্যাদিতি তদাহ তানিতি। ভগবতো নৈর্ঘৃণ্যপ্রসঙ্গং প্রত্যাদিশন্তি অধর্ম্মেতি॥ ১৯॥

নন্বু তেষামপি ক্রমেণ বহূনাং জন্মনামন্তে শ্রেয়ো ভবিষ্যতি নেত্যাহ আসুরীমিতি। তেষামীশ্বরপ্রাপ্তিশঙ্কাভাবে কথন্তন্নিষেধঃ স্যাদিত্যাশঙ্ক্যাহ মামিত্যাদিনা। যস্মাদাসুরী

## স্বামিকৃত টীকা।

তেষাঞ্চ কদাচিদপ্যাসুরস্বভাবপ্রচ্যুতির্ন ভবতীত্যাহ তানিতি দ্বাভ্যাং। তানহং মাং দ্বিষতঃ ক্রূরান্ সংসারেষু জন্মমৃত্যুমার্গেষু তত্রাপ্যাসুরীষ্বেবাতিক্রূরাসু ব্যাঘ্রসর্পাদিযোনিষ্বজস্রমনবরতং ক্ষিপামি তেষাং পাপকর্ম্মণাং তাদৃশং ফলং দদামীত্যর্থঃ॥ ১৯॥

কিঞ্চ আসুরীমিতি। তে চ মামপ্রাপ্যৈবেত্যেবকারেণ মৎপ্রাপ্তিশঙ্কাপি কুতস্তেষাং

ত্রিবিধং নরকস্যেদং দ্বারং নাশনমাত্মনঃ।
কামঃ ক্রোধস্তথা লোভস্তস্মাদেতত্ত্রয়ং ত্যজেৎ ॥ ২১ ॥

## শাঙ্করভাষ্যম্।

প্রতিজন্ম তমোবহুলাস্বেব যোনিষু জায়মানাঅধোগচ্ছন্তি তে মূঢ়া মামীশ্বরং অপ্রাপ্য অনাসাদ্যৈব হে কৌন্তেয় ততস্তস্মাদপি যান্তি অধমাং নিকৃষ্টতমাং গতিং মামপ্রাপ্যৈতি ন মৎপ্রাপ্তৌ কাচিদপ্যাশঙ্কাস্ত্যতো মচ্ছিষ্টসাধুমার্গপ্রাপ্তিমপ্রাপ্যেত্যর্থঃ ॥ ২০ ॥

সর্ব্বস্যাঃ আসুর্য্যাঃ সম্পদঃ সংক্ষেপোঽয়মুচ্যতে, যস্মিংস্ত্রিবিধে সর্ব্ব আসুরীসম্পদ্ভেদোঽনন্তোঽপ্যন্তর্ভবতি যৎপরিহারেণ পরিহৃতশ্চ ভবতি যন্মূলং সর্ব্বস্যানর্থস্য তদেতদুচ্যতে ত্রিবিধমিতি। ত্রিবিধং নরকদ্বারং ত্রিঃপ্রকারং নরকস্য প্রাপ্তিদ্বারং নাশনমাত্মনঃ যদ্দ্বারং প্রবিশন্নেব নশ্যতি আত্মা কস্মৈচিৎ পুরুষার্থায় যোগ্যো ন ভবতীত্যেতদুচ্যতে দ্বারং নাশনমাত্মনইতি কিং তৎ কামঃ ক্রোধস্তথালোভস্তস্মাদেতৎ ত্রয়ং ত্যজেৎ যতএতৎ দ্বারং নাশনমাত্মনস্তস্মাৎ কামাদিত্রয়মেতৎ ত্যজেৎ ত্যাগস্তুতিরিয়ং ॥ ২১ ॥

এতৈরিতি। এতৈর্ব্বিমুক্তঃ কৌন্তেয় তমোদ্বারৈস্তমসো নরকস্য দুঃখমোহাত্মকস্য দ্বারাণি কামাদয়স্তৈরেতৈস্ত্রিভির্ব্বিমুক্তো নরআচরত্যনুতিষ্ঠতি কিমাত্মনঃ শ্রেয়ো যৎপ্রতি-

---

## গিরিকৃত টীকা।

সম্পদনর্থপরম্পরয়া সর্ব্বপুরুষার্থপরিপন্থিনী তস্মাদ্যাবৎ পুরুষঃ স্বতন্ত্রো ন কাঞ্চিৎ পারবশ্যকরীং যোনিমাপন্নস্তাবদেব তেনাসৌ পরিহরণীয়েতি সমুদায়ার্থঃ ॥ ২০ ॥

কথমাসুরী সম্পদনন্তভেদবতী পুরুষায়ুষেণাপি পরিহর্ত্তুং শক্যেতেত্যাশঙ্ক্যাহ সর্ব্বস্যেতি। সংক্ষেপোক্তিফলমাহ যস্মিন্নিতি। কামাদৌ ত্রিবিধে সর্ব্বস্যাসুরসম্পদ্ভেদস্যান্তর্ভাবেপি কথমসৌ পরিহ্রিয়তে তত্রাহ যৎপরিহারেণেত্যাসুরীসম্পদ্ভেদপরিহারেঽপি কথং সর্ব্বানর্থপরিবর্জনমিত্যাশঙ্ক্যাহ যন্মূলমিতি। কথমাত্মনোনিত্যস্য নাশশঙ্কেতি তত্রাহ কস্মৈচিদিতি। ত্রিবিধমপি সামান্যতোদর্শিতমাকাঙ্ক্ষাদ্বারা বিশেষতোদর্শয়তি কিং তদিতি। তস্মাদিতি ব্যাচষ্টে যতইতি। কামাদিত্যাগে সতি অনর্থাচরণশ্রেয়ঃপ্রতিবন্ধনিবৃত্তী স্যাতামিতি ভাবঃ ॥ ২১ ॥

## স্বামিকৃত টীকা।

মৎপ্রাপ্ত্যুপায়ং সন্মার্গমপ্রাপ্য ততোঽপ্যধমাং কৃমিকীটাদিগতিং যান্তীত্যুক্তং, শেষং স্পষ্টং ॥ ২০ ॥

উক্তানামাসুরদোষাণাং মধ্যে সকলদোষমূলভূতং দোষত্রয়ং সর্ব্বথা বর্জনীয়মিত্যাহ ত্রিবিধমিতি। কামঃ ক্রোধো লোভশ্চ ইতীদং ত্রিবিধং নরকস্য দ্বারং অতএবাত্মনো নাশনং নীচযোনিপ্রাপকং তস্মাদেতত্ত্রয়ং সর্ব্বাত্মনা ত্যজেৎ ॥ ২১ ॥

এতৈর্বিমুক্তঃ কৌন্তেয় তমোদ্বারৈস্ত্রিভির্নরঃ।
আচরত্যাত্মনঃ শ্রেয়স্ততো যাতি পরাং গতিম্ ॥ ২২ ॥
যঃ শাস্ত্রবিধিমুৎসৃজ্য বর্ত্ততে কামচারতঃ।
ন স সিদ্ধিমবাপ্নোতি ন সুখং ন পরাং গতিম্ ॥ ২৩ ॥

## শাঙ্করভাষ্যম্।

বদ্ধঃ পূর্ব্বং নাচরতি তদপগমাদাচরতি ততস্তদাচরণতয়া যাতি পরাং গতিং মোক্ষমপি ইতি ॥ ২২ ॥

সর্ব্বস্যৈতস্যাসুরীসম্পৎপরিবর্জনস্য শ্রেয়আচরণস্য শাস্ত্রং কারণং শাস্ত্রপ্রমাণাদুভয়ং শক্যং কর্ত্তুং নান্যথা অতঃ যঃ শাস্ত্রেতি যঃ শাস্ত্রবিধিং শাস্ত্রং বেদঃ তস্য বিধিং কর্ত্তব্যাকর্ত্তব্যজ্ঞানকারণং বিধিপ্রতিষেধাখ্যমুৎসৃজ্য ত্যক্ত্বা বর্ত্ততে কামকারতঃ কামপ্রযুক্তঃ সন্ ন স সিদ্ধিং পুরুষার্থযোগ্যতামাপ্নোতি। নাপ্যস্মিন্ লোকে সুখং নাপি পরাং প্রকৃষ্টাং গতিং স্বর্গং মোক্ষং বা ॥ ২৩ ॥

## গিরিকৃত টীকা।

ন কেবলং শ্রেয়ঃ সমাচরন্নাসুরীং চ সম্পদং বর্জয়ন্মোক্ষমেব সম্যগ্ধীদ্বারা লভতে কিন্তু লৌকিকমপি সুখমিত্যপেরর্থঃ ॥ ২২ ॥

আসুর্য্যাঃ সম্পদোবর্জ্জনে শ্রেয়সশ্চ করণে কিং কারণং তদাহ সর্ব্বস্যেতি। তস্য কারণত্বং সাধয়তি শাস্ত্রেতি। উক্তমুপজীব্যানন্তরশ্লোকং প্রবর্ত্তয়তি অতইতি। শিষ্যতে বোধ্যতেঽনেনাপূর্ব্বোঽর্থইতি শাস্ত্রং তচ্চ বিধিনিষেধাত্মকমিত্যুপেত্য ব্যাচষ্টে কর্ত্তব্যেতি। কামস্য করণং কামকারঃ তস্মাদ্ধেতোরিত্যুপেত্য কামাধীনা শাস্ত্রবিমুখস্য প্রবৃত্তিরিত্যাহ কামেতি। কামাধীনপ্রবৃত্তেঃ সদা পুমর্থাযোগস্য সর্ব্বপুরুষার্থাসিদ্ধিরিত্যাহ নাপীতি। ২৩ ॥

শাস্ত্রাদৃতে কর্ম্মণোনিস্ফলত্বে ফলিতমাহ তস্মাদিতি। কর্ত্তব্যাকর্ত্তব্যৌ ধর্ম্মাধর্ম্মৌ তত্র শাস্ত্রস্য প্রমাণত্বেঽপি মম কিং কর্ত্তব্যমিত্যাশঙ্ক্যাহ অতইতি। স্বকর্ম্ম ক্ষত্রিয়স্য যুদ্ধাদি, ইতি শব্দোঽধ্যায়সমাপ্ত্যর্থঃ। তদনেনাধ্যায়েন প্রাগ্‌ভবীয়কর্ম্মবাসনানুসারেণাভিব্যজ্যমানসাত্ত্বি-

## স্বামিকৃত টীকা।

ত্যাগে বিশিষ্টং ফলমাহ এতৈরিতি। তমসোনরকস্য দ্বারভূতৈরেতৈস্ত্রিভিঃ কামাদিভির্বিমুক্তো নর আত্মনঃ শ্রেয়ঃসাধনং তপোযোগাদিকমাচরতি ততশ্চ মোক্ষং প্রাপ্নোতি ॥২২॥

কামাদিত্যাগশ্চ স্বধর্ম্মাচরণং বিনা ন সম্ভবতীত্যাহ যইতি। শাস্ত্রবিধিং বেদবিহিতং ধর্ম্মমুৎসৃজ্য যঃ কামচারতো যথেষ্টং বর্ত্ততে স সিদ্ধিং তত্ত্বজ্ঞানং ন প্রাপ্নোতি নচ সুখমুপশমং নচ পরাং গতিং মোক্ষং প্রাপ্নোতি॥ ২৩ ॥

তস্মাচ্ছাস্ত্রং প্রমাণন্তে কার্যাকার্য্যব্যবস্থিতৌ।
জ্ঞাত্বা শাস্ত্রবিধানোক্তং কর্ম্ম কর্ত্তুমিহার্হসি ॥ ২৪

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং
যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসম্বাদে
দৈবাসুরসম্পদ্বিভাগযোগো
নাম ষোড়শোঽধ্যায়ঃ।

## শাঙ্করভাষ্যম্।

তস্মাদিতি। তস্মাৎ শাস্ত্রং প্রমাণং জ্ঞানসাধনন্তে তব কার্য্যাকার্য্যব্যবস্থিতৌ কর্ত্তব্যাকর্ত্তব্যব্যবস্থায়ামতোজ্ঞাত্বা বুদ্ধা শাস্ত্রবিধানোক্তং বিধির্বিধানং শাস্ত্রমেব বিধানং শাস্ত্রবিধানং কুর্য্যান্ন কুর্য্যাদিত্যেবংলক্ষণং তেনোক্তং স্বকর্ম্ম যত্তৎ কর্ত্তুমিহার্হসি ইহ ইতি কর্ম্মাধিকারভূমিপ্রদর্শনার্থং ইতি ॥ ২৪ ॥

ইতি শ্রীমদ্ভগবদ্গীতাভাষ্যে ষোড়শোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

কাদিপ্রকৃতিত্রয়বিভাগেন দৈব্যাসুরীতি সম্পদ্দ্বয়মাদানহানভ্যামুপদিশ্য কামক্রোধলোভানপহায় পুরুষার্থিনা শাস্ত্রশ্রবণেন তদুক্তকারিণা ভবিতব্যমিতি নির্দ্ধারিতং ॥ ২৪ ॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং ষোড়শোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

ফলিতমাহ তস্মাদিতি। ইদং কার্য্যমিদমকার্য্যঞ্চেত্যস্যাং ব্যবস্থায়াং তে তব শাস্ত্রং শ্রুতিস্মৃতিপুরাণাদিকমেব প্রমাণং অতঃ শাস্ত্রবিধিনোক্তং কর্ম্ম জ্ঞাত্বা ইহ কর্ম্মাধিকারে বর্ত্তমানঃ যথাধিকারং কর্ম্ম কর্ত্তুমর্হসি তন্মূলত্বাৎ সত্ত্বশুদ্ধিসম্যগ্জ্ঞানমুক্তীনামিত্যর্থঃ।

দেবদৈতেয়সম্পত্তিসম্বিভাগেন ষোড়শে।
তত্ত্বজ্ঞানেঽধিকারস্তু সাত্ত্বিকস্যেতি দর্শিতং ॥ ২৪ ॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং ষোড়শোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## সপ্তদশোঽধ্যায়ঃ।

অর্জ্জুনউবাচ—যে শাস্ত্রবিধিমুৎসৃজ্য যজন্তে শ্রদ্ধয়ান্বিতাঃ।
তেষাং নিষ্ঠা তু কা কৃষ্ণ সত্ত্বমাহো রজস্তমঃ॥ ১॥

---

### শাঙ্করভাষ্যম্।

তস্মাচ্ছাস্ত্রং প্রমাণন্তইতি ভগবদ্বাক্যাৎ লব্ধপ্রশ্নবীজোঽর্জ্জুনউবাচ যে শাস্ত্রেতি। যে কেচিৎ অবিশেষিতাঃ শাস্ত্রবিধিং শাস্ত্রবিধানং শ্রুতিস্মৃতিশাস্ত্রচোদনামুৎসৃজ্য পরিত্যজ্য যজন্তে দেবাদীন্ পূজয়ন্তি শ্রদ্ধয়ান্বিতাঃ শ্রদ্ধয়াস্তিক্যবুদ্ধ্যান্বিতাঃ সংযুক্তাঃ সন্তঃ শ্রুতিলক্ষণং স্মৃতিলক্ষণং বা কঞ্চিৎ শাস্ত্রবিধিমপশ্যন্তো বৃদ্ধব্যবহারদর্শনাদেব শ্রদ্দধানতযা দেবাদীন্ পূজয়ন্তি তে ইহ শাস্ত্রবিধিমুৎসৃজ্য যজন্তে শ্রদ্ধযান্বিতা ইতেব্যং গৃহ্যন্তে যে পুনঃ কঞ্চিৎ শাস্ত্রবিধিমুপলভমানাএব তমুৎসৃজ্যাযথাবিধি দেবাদীন্ পূজয়ন্তি তে ইহ

### গিরিকৃত টীকা।

আস্তিকানাং নাস্তিকানাঞ্চ শাস্ত্রৈকচক্ষুষাং গতিরুক্তা সম্প্রত্যাস্তিকানামেব শাস্ত্রানভিজ্ঞানাং গতিং জিজ্ঞাসয়া পৃচ্ছতীত্যাহ তস্মাদিতি। যজন্তইতি যাগগ্রহণং দানাদেরুপলক্ষণং যদি বেদোক্তং বিধিমপশ্যন্তস্তমুৎসৃজন্তি কথং তর্হি শ্রদ্দধানা যাগাদি কুর্ব্বন্তি ন হি মানং বিনা শ্রদ্ধয়া যাগাদি কর্ত্তুং শক্যমিত্যাশঙ্ক্যাহ শ্রুতীতি। ননু শাস্ত্রীয়ং বিধিং পশ্যন্তোঽপি কেচিত্তমুপেক্ষ্য স্বোৎপ্রেক্ষয়া যাগাদি কুর্ব্বন্তোদৃশ্যন্তে তেষামিহ যে শাস্ত্রবিধিমুৎসৃজ্যেতি গ্রহো ভবিষ্যতি নেত্যাহ যে পুনরিতি। তেষামত্রাপরিগ্রহে প্রশ্নপূর্ব্বকং হেতুমাহ কস্মাদিতি। শাস্ত্রজ্ঞানান্তদুপেক্ষাবতাংগ্রহেঽপি বিশেষণমবিরুদ্ধমিত্যাশঙ্ক্য ব্যাঘাতা-

### স্বামিকৃত টীকা।

উক্তাধিকারহেতূনাং শ্রদ্ধা মুখ্যা চ সাত্ত্বিকী। ইতি সপ্তদশে গৌণশ্রদ্ধাভেদস্ত্রিধোচ্যতে। পূর্ব্বাধ্যায়ান্তে যঃ শাস্ত্রবিধিমুৎসৃজ্য বর্ত্ততে কামচারতঃ। ন স সিদ্ধিমবাপ্নোতীত্যনেন শাস্ত্রোক্তবিধিমুৎসৃজ্য কামচারেণ বর্ত্তমানস্য জ্ঞানেঽধিকারোনাস্তীত্যুক্তং তত্র শাস্ত্রবিধিমুৎসৃজ্য কামচারং বিনা শ্রদ্ধয়া বর্ত্তমানানাং কিমধিকারোঽস্তি নাস্তি বেতি বুভুৎসয়া অর্জ্জুনউবাচ য ইতি। অত্র চ শাস্ত্রবিধিমুৎসৃজ্য যজন্ত ইত্যনেন শাস্ত্রার্থং বুদ্ধা তমুল্লঙ্ঘ্য বর্ত্তমানা ন গৃহ্যন্তে তেষাং শ্রদ্ধয়া যজনানুপপত্তেঃ আস্তিক্যবুদ্ধির্হি শ্রদ্ধা ন চাসৌ শাস্ত্রবিরুদ্ধেঽর্থে শাস্ত্রজ্ঞানবতাং সম্ভবতি তানেবাধিকৃত্য ত্রিবিধা ভবতি শ্রদ্ধেতি যজন্তে সাত্ত্বিকা দেবানিত্যাদ্যুত্তরানুপপত্তেশ্চ অতোনাত্র শাস্ত্রোল্লঙ্ঘিনোগৃহ্যন্তে অপি তু ক্লেশবুদ্ধ্যা বা আলস্যাদ্বা

শ্রীভগবানুবাচ—ত্রিবিধা ভবতি শ্রদ্ধা দেহিনাং সা স্বভাবজা।
সাত্ত্বিকী রাজসী চৈব তামসী চেতি তাং শৃণু॥ ২॥

## শাঙ্করভাষ্যম্।

যে শাস্ত্রবিধিমুৎসৃজ্য যজন্তইতি ন পরিগৃহ্যন্তে কস্মাৎ শ্রদ্ধয়ান্বিতত্ববিশেষণাৎ দেবাদিপূজা-বিধিপরং কিঞ্চিৎ শাস্ত্রং পশ্যন্তএব তদুৎসৃজ্যাশ্রদ্দধানতয়া তদ্বিহিতায়াং দেবাদিপূজায়াং শ্রদ্ধয়ান্বিতাঃ প্রবর্ত্তন্তে ইতি ন শক্যং পরিকল্পয়িতুং যস্মাত্তস্মাৎ পূর্ব্বোক্তাএব যে শাস্ত্র-বিধিমুৎসৃজ্য যজন্তে শ্রদ্ধয়ান্বিতাঃ ইত্যত্র গৃহ্যন্তে তেষামেবন্তূতানাং নিষ্ঠা তু অবস্থানং কা কৃষ্ণ সত্ত্বমাহো রজস্তমঃ কিং সত্ত্বনিষ্ঠাবস্থানমাহোস্বিৎ রজোঽথ বা তমইতি॥ ১॥

এতদুক্তং ভবতি যা তেষাং দেবাদিবিষয়া পূজা সা কিং সাত্ত্বিক্যাহোস্বিদ্রাজস্যুত তামসীতি সামান্যবিষয়োঽয়ং প্রশ্নো নাপ্রবিভজ্য প্রতিবচনমর্হতীতি ত্রিবিধেতি শ্রীভগবা-

## গিরিকৃত টীকা।

নৈবমিত্যাহ দেবাদীতি। অশ্রদ্দধানতয়া তদুৎসৃজ্যেতি সম্বন্ধঃ। শাস্ত্রোক্তং বিধিমধি-গচ্ছতামপি তমবধীর্য্য স্বেচ্ছয়া দেবপূজাদৌ প্রবৃত্তানামাসুরেষেবান্তর্ভাবো যস্মাদনন্তরাধ্যায়ে সিদ্ধস্তস্মাদাস্তিকাধিকারে তেষাং প্রসঙ্গো নাস্তীত্যুপসংহরতি যস্মাদিতি। পূর্ব্বোক্তাঃশাস্ত্রা-নভিজ্ঞা বৃদ্ধব্যবহারানুসারিণ ইতিযাবৎ। তৈঃ শ্রদ্ধয়া ক্রিয়মাণং কর্ম্ম কুত্র পর্য্যবস্যতীতি পৃচ্ছতি তেষামিতি। কা নিষ্ঠেত্যেতদ্বিবৃণোতি সত্ত্বমিতি॥ ১॥

কার্য্যাণাং কারণৈর্ব্যপদেশমাশ্রিত্য তাৎপর্য্যমাহ এতদিতি। বিশেষনিষ্ঠমুত্তরং সামান্যেন বক্তুং ন শক্যমিত্যাশয়েন পরিহরতি সামান্যেতি। কিমিতি শ্রদ্ধাত্রৈবিধ্যং

## স্বামিকৃত টীকা।

শাস্ত্রার্থজ্ঞানে প্রযত্নমকৃত্বা কেবলমাচারপরম্পরাবশেন শ্রদ্ধয়া ক্বচিদ্দেবতারাধনাদৌ প্রবর্ত্ত-মানা গৃহ্যন্তে, অতোঽয়মর্থঃ যে শাস্ত্রবিধিমুৎসৃজ্য দুঃখবুদ্ধ্যা আলস্যাদ্বা অনাদৃত্য কেবলমা-চারপ্রামাণ্যেন শ্রদ্ধয়ান্বিতাঃ সন্তো যজন্তে তেষান্তু কা নিষ্ঠা কা স্থিতিঃ ক আশ্রয়ঃ। তামেব বিশেষেণ পৃচ্ছতি, কিং সত্ত্বং আহো কিং রজঃ অথবা তমইতি তেষাং তাদৃশী দেবপূজাদি-প্রবৃত্তিঃ কিং সত্ত্বসংশ্রিতা রজঃসংশ্রিতা তমঃসংশ্রিতা বেত্যর্থঃ শ্রদ্ধায়াঃ সাত্ত্বিকত্বাৎ ক্লেশ-বুদ্ধ্যা আলস্যেন চ শাস্ত্রানাদরস্য রাজসতামসত্বাত্ত্রিধাসন্দেহঃ। যদি সত্ত্বসংশ্রিতা তর্হি তেষামপি সাত্ত্বিকত্বাদ্যথোক্তাত্মজ্ঞানেঽধিকারঃ স্যাদন্যথা নেতিতাৎপর্য্যার্থঃ॥ ১॥

অত্রোত্তরং শ্রীভগবানুবাচ ত্রিবিধেতি। অয়মর্থঃ শাস্ত্রতত্ত্বজ্ঞানতঃ প্রবর্ত্তমানানাং পরমেশ্বরপূজাবিষয়া সাত্ত্বিকী একবিধৈব ভবতি শ্রদ্ধা লোকাচারমাত্রেণ তু প্রবর্ত্তমানানাং দেহিনাং যা শ্রদ্ধা সা তু সাত্ত্বিকী রাজসী তামসী চেতি ত্রিবিধা ভবতি। তত্র হেতুঃ স্বভাবজা স্বভাবঃ পূর্ব্বসংস্কারস্তস্মাজ্জাতা স্বভাবমন্যথা কর্ত্তুং সমর্থং হি শাস্ত্রোত্থং বিবেক-

সত্ত্বানুরূপা সর্ব্বস্য শ্রদ্ধা ভবতি ভারত।
শ্রদ্ধাময়োঽয়ং পুরুষো যো যচ্ছ্রদ্ধঃ স এব সঃ ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

নুবাচ। ত্রিবিধা ত্রিঃপ্রকারা ভবতি শ্রদ্ধা যস্যাং নিষ্ঠায়াং ত্বং পৃচ্ছসি দেহিনাং সা স্বভাবজা জন্মান্তরকৃতো ধর্ম্মাদিসংস্কারো মরণকালেঽভিব্যক্তঃ স্বভাব উচ্যতে ততো জাতা স্বভাবজা সাত্ত্বিকী সত্ত্বনির্ব্বৃতা দেবপূজাদিবিষয়া রাজসী রজোনির্ব্বৃতা যক্ষরক্ষঃপূজাদিবিষয়া তামসী তমোনির্ব্বৃতা প্রেতপিশাচাদিপূজাবিষয়ৈবং ত্রিবিধাস্তামুচ্যমানাং শ্রদ্ধাং শৃণু সৈবং ত্রিবিধা ভবতি ॥ ২ ॥

সত্ত্বেতি। সত্ত্বানুরূপা বিশিষ্টসংস্কারোপেতান্তঃকরণানুরূপা সর্ব্বস্য প্রাণিজাতস্য শ্রদ্ধা ভবতি ভারত যদ্যেবন্ততঃ কিং স্যাদিত্যুচ্যতে শ্রদ্ধাময়ঃ শ্রদ্ধাপ্রায়ঃ অয়ং পুরুষঃ সংসারী জীবঃ কথং যো যচ্ছ্রদ্ধো যা শ্রদ্ধা যস্য জীবস্য স যচ্ছ্রদ্ধঃ স এব তচ্ছ্রদ্ধানুরূপ এব স জীবঃ ॥ ৩ ॥

## গিরিকৃত টীকা।

প্রশ্নানুপযুক্তমুচ্যতে তত্রাহ যস্যামিতি। শ্রদ্ধাপূর্ব্বিকায়াং ক্রিয়ায়ামিতি যাবৎ। শ্রদ্ধা-ত্রৈবিধ্যে হেতুমাহ সা স্বভাবজেতি। স্বভাবশব্দার্থং প্রকৃতোপযোগিতয়া কথয়তি জন্মান্তরেতি। কথং ত্রিবিধেত্যপেক্ষায়ামাহ সাত্ত্বিকীত্যাদিনা। কথমুক্তা শ্রদ্ধা স্বভা-বজেতি তত্রাহ তামিতি ॥ ২ ॥

প্রাচীনকর্ম্মোদ্বোধিতা ত্রিবিধা বাসনা স্বভাবশব্দিতা ত্রিবিধায়াঃ শ্রদ্ধায়া নিমিত্ত-মিত্যুক্তমিদানীমুপাদানমস্যা দর্শয়তি সত্ত্বমিতি। বিশিষ্টচিত্তোপাদানা শ্রদ্ধা তত্ত্রৈবিধ্যে ত্রিবিধেতি পূর্ব্বার্দ্ধস্যার্থঃ। কথং নিষ্ঠায়াং সাত্ত্বিকাদিপ্রশ্নদ্বারা শ্রদ্ধায়াস্ত্রৈবিধ্যনিরূপণ-মুপযুক্তমিতি মন্বানঃ শঙ্কতে যদ্যেবমিতি। শ্রদ্ধেয়ং বিষয়মভিধ্যায়ংস্তয়া তত্রৈব বর্ত্তত ইতি মন্বানঃ পরিহরতি উচ্যত ইতি শ্রদ্ধাময়ত্বং প্রশ্নপূর্ব্বকং কথয়তি কথমিতি। শ্রদ্ধা খল্বধিকৃতে পুরুষে প্রাচুর্য্যেণ প্রবৃত্তেঽপি তস্য শ্রদ্ধাময়ত্বসিদ্ধিরিত্যর্থঃ ॥ ৩ ॥

## স্বামিকৃতটীকা।

জ্ঞানং তেষাং নাস্তি অতঃ কেবলং পূর্ব্বস্বভাবেন ভবন্তী শ্রদ্ধা ত্রিবিধা ভবতি। তামিমাং ত্রিবিধাং শ্রদ্ধাং শৃণ্বিতি তদুক্তং, ব্যবসায়াত্মিকা বুদ্ধিরেকেহ কুরুনন্দনেত্যাদিনা ॥ ২ ॥

ননু শ্রদ্ধা সাত্ত্বিক্যেব সত্ত্বকার্য্যত্বেন ত্বয়ৈব শ্রীভাগবতে উদ্ধবং প্রতি নির্দ্দিষ্টত্বাৎ যথোক্তং শমো দমস্তিতিক্ষেক্ষা তপঃ সত্যং দয়া স্মৃতিঃ। তুষ্টিস্ত্যাগোঽস্পৃহা শ্রদ্ধা হ্রীর্দ-য়াদিঃ স্বনির্বৃতিঃ। ইত্যেতাঃ সত্ত্ববৃত্তয়ইতি অতঃ কথং তস্যাস্ত্রৈবিধ্যমুচ্যতে সত্যং তথাপি রজস্তমোমিশ্রিতত্বেন সত্ত্বস্য ত্রৈবিধ্যাৎ শ্রদ্ধায়া অপি ত্রৈবিধ্যং ঘটত ইত্যাহ

যজন্তে সাত্ত্বিকা দেবান্ যক্ষরক্ষাংসি রাজসাঃ।
প্রেতান্ ভূতগণাংশ্চান্যে যজন্তে তামসা জনাঃ ॥ ৪ ॥
অশাস্ত্রবিহিতং ঘোরং তপ্যন্তে যে তপো জনাঃ।
দম্ভাহঙ্কারসংযুক্তাঃ কামরাগবলান্বিতাঃ ॥ ৫ ॥

## শাঙ্করভাষ্যম্।

ততশ্চ কার্য্যেণ লিঙ্গেন দেবাদিপূজয়া সত্ত্বাদিনিষ্ঠানুমেয়েত্যাহ যজন্তইতি। যজন্তে পূজয়ন্তি সাত্ত্বিকাঃ সত্ত্বনিষ্ঠা দেবান্ যক্ষরক্ষাংসি রাজসাঃ প্রেতান্ ভূতগণাংশ্চ সপ্তমাতৃকাদীংশ্চ অন্যে যজন্তে তামসা জনাঃ ॥ ৪ ॥

এবং কার্য্যতোনির্ণীতাঃ সত্ত্বাদিনিষ্ঠাঃ শাস্ত্রবিধ্যুৎসর্গে তত্র কশ্চিদেব সহস্রেষু পূজাদিতৎপরঃ সত্ত্বনিষ্ঠোভবতি বাহুল্যেন তু রজোনিষ্ঠাঃ তমোনিষ্ঠাশ্চৈব প্রাণিনোভবন্তি

---

## গিরিকৃত টীকা।

তথাপি কথং সত্ত্বাদিনিষ্ঠা যথোক্তস্য জ্ঞাতুং শক্যেত্যাশঙ্ক্যাহ ততশ্চেতি। অধিকৃতস্য পুরুষস্য শ্রদ্ধাপ্রধানত্বাদিতি যাবৎ, দেবা বস্বাদয়ো যক্ষাঃ কুবেরাদয়োরক্ষাংসি নির্ঋত্যাদয়ঃ স্বধর্ম্মাৎ প্রচ্যুতা বিপ্রাদয়ো দেহপাতাদূর্দ্ধং বায়ুদেহমাপন্নাঃ প্রেতাঃ এভ্যশ্চ যথাযথমারাধ্যদেবাদয়ঃ সাত্ত্বিকরাজসতামসান্ কামান্ প্রয়চ্ছন্তীতি সামর্থ্যাদবগন্তব্যং ॥ ৪ ॥

নন্বু সত্ত্বাদিনিষ্ঠাঃ শাস্ত্রেণ জ্ঞাতুং শক্যন্তে কুতঃ কার্য্যলিঙ্গকানুমানেনেতি তত্রাহ এবমিতি। সত্ত্বাদিনিষ্ঠানাং জন্তূনামবান্তরবিশেষং প্রচুরত্বাপ্রচুরত্বরূপং দর্শয়তি তত্রেত্যাদিনা। রাজসানাঞ্চ তামসানাঞ্চ প্রাচুর্য্যং প্রশ্নদ্বারা বিবৃণোতি কথমিত্যাদিনা। কামশ্চ কাম্যমানবিষয়ো রাগশ্চ তদ্বিষয়ভোগাভিলাষঃ, তৎকৃতং তন্নিমিত্তমিতি যাবৎ ॥ ৫ ॥

## স্বামিকৃত টীকা।

সত্ত্বেতি। সত্ত্বানুরূপা সত্ত্বতারতম্যানুসারিণী সর্ব্বস্য বিবেকিনোঽবিবেকিনো বা লোকস্য শ্রদ্ধা ভবতি তস্মাদয়ং পুরুষো লৌকিকঃ শ্রদ্ধাবিকারঃ ত্রিবিধয়া শ্রদ্ধয়া বিক্রিয়ত ইত্যর্থঃ। তদেবাহ যোযচ্ছ্রদ্ধঃ যাদৃশী শ্রদ্ধা যস্য স এব স তাদৃশশ্রদ্ধাযুক্তঃ। স এব স ইতি যঃ পূর্ব্বং সত্ত্বোৎকর্ষেণ সাত্ত্বিকশ্রদ্ধাযুক্তঃ পুরুষঃ স পুনস্তৎসংস্কারেণ সাত্ত্বিকশ্রদ্ধাযুক্তএব ভবতি যস্তু রজস উৎকর্ষেণ রাজসশ্রদ্ধাযুক্তঃ স পুনস্তাদৃশএব ভবতি যস্তু তমস উৎকর্ষেণ তামসশ্রদ্ধয়া যুক্তঃ স পুনস্তাদৃশএব ভবতীতি লোকাচারমাত্রেণ প্রবর্ত্তমানেষেবং সাত্ত্বিকরাজসতামসশ্রদ্ধা ব্যবস্থা শাস্ত্রজনিতবিবেকজ্ঞানযুক্তানান্তু স্বভাববিজয়েন সাত্ত্বিকী একৈব শ্রদ্ধেতি প্রকরণার্থঃ ॥ ৩ ॥

সাত্ত্বিকাদিভেদমেব কার্য্যভেদেন প্রপঞ্চয়তি যজন্তইতি। সাত্ত্বিকা জনাঃ সত্ত্বপ্রকৃতীন্

কর্শয়ন্তঃ শরীরস্থং ভূতগ্রামমচেতসঃ ।
মাঞ্চৈবান্তঃশরীরস্থং তান্ বিদ্ধ্যাসুরনিশ্চয়ান্ ॥ ৬ ॥

## শাঙ্করভাষ্যম্ ।

কথং অশাস্ত্রেতি। অশাস্ত্রবিহিতং ন শাস্ত্রবিহিতং অশাস্ত্রবিহিতং ঘোরং পীড়াকরং প্রাণিনামাত্মনশ্চ তপস্তপ্যন্তে নির্ব্বর্ত্তয়ন্তি যে তপো জনাস্তে চ দম্ভোহংকারসংযুক্তাদম্ভশ্চাহঙ্কারশ্চ দম্ভাহঙ্কারৌ তাভ্যাং সংযুক্তা দম্ভাহঙ্কারসংযুক্তাঃ কামরাগবলান্বিতাঃ কামশ্চ রাগশ্চ কামরাগৌ তৎকৃতং বলঙ্কামরাগবলন্তেনান্বিতাঃ কামরাগবলৈর্ব্বান্বিতাঃ ॥ ৫ ॥

কর্শযন্তইতি। কর্শয়ন্তঃ কৃশীকুর্ব্বন্তঃ শরীরস্থম্ভূতগ্রামঙ্করণসমুদায়মচেতসোঽবিবেকিনো মাঞ্চৈব তৎকর্ম্মবুদ্ধিসাক্ষিভূতমন্তঃশরীরস্থং কর্শয়ন্তঃ মদনুশাসনাকরণমেব মৎকর্শণং তান্বিদ্ধ্যাসুরনিশ্চয়ান্ আসুরো নিশ্চয়ো যেষান্তে আসুরনিশ্চয়াস্তান্ পরিহরণার্থং বিদ্ধি ইত্যুপদেশঃ ॥ ৬ ॥

## গিরিকৃত টীকা ।

রজোনিষ্ঠান্ প্রাধান্যেন প্রদর্শ্য তমোনিষ্ঠান্ প্রাধান্যেন দর্শযতি কর্শয়ন্তইতি। কথং শরীরাদিসাক্ষিণমীশ্বরং প্রতি কৃশীকরণং প্রাণিনাং প্রকল্পতে তত্রাহ মদনুশাসনেতি। তেষাং বিপর্য্যাসনিশ্চযবতাং পরিজ্ঞানং কুত্রোপযুজ্যতে তত্রাহ পরিহরণার্থমিতি ॥ ৬ ॥

## স্বামিকৃত টীকা ।

দেবানেব যজন্তে পূজয়ন্তি রাজসাস্তু রজঃপ্রকৃতীন্ যক্ষান্ রাক্ষসাংশ্চ যজন্তে, এতেভ্যোঽন্যে বিলক্ষণাস্তামসাজনাস্তামসানেব প্রেতান্ ভূতগণাংশ্চ যজন্তে, সত্ত্বাদিপ্রকৃতীনাং তত্তদ্দেবাদীনাং পূজারুচিভিস্তত্তৎপূজকানাং সাত্ত্বিকাদিত্বং জ্ঞাতব্যমিত্যর্থঃ ।। ৪ ।।

রাজসতামসেষ্বপি পুনর্বিশেষান্তরমাহ অশাস্ত্রবিহিতমিতি দ্বাভ্যাং। শাস্ত্রবিধিমজানন্তোঽপি কেচিৎ প্রাচীনপুণ্যসংস্কারেণোত্তমাঃ সাত্ত্বিকাএব ভবন্তি কেচিন্মধ্যমা রাজসা ভবন্তি অধমাস্তু তামসা ভবন্তি যে পুনরত্যন্তং মন্দভাগ্যাস্তে গতানুগত্যা পাষণ্ডসঙ্গেন চ তদাচারানুবর্ত্তিনঃ সন্তোঽশাস্ত্রবিহিতং ঘোরং ভূতভয়ঙ্করং তপস্তপ্যন্তে কুর্ব্বন্তি। তত্র হেতবঃ দম্ভাহঙ্কারাভ্যাং সংযুক্তাঃ, তথা কামোঽভিলাষঃ রাগ আসক্তিঃ বলমাগ্রহঃ এতৈরন্বিতাঃ সন্তঃ, তানাসুরনিশ্চয়ান্ বিদ্ধীত্যুত্তরেণান্বয়ঃ ।। ৫ ।।

কিঞ্চ কর্শয়ন্তইতি। শরীরস্থং আরম্ভকত্বেন দেহে স্থিতং ভূতানাং পৃথিব্যাদীনাং গ্রামং সমূহং কর্শয়ন্তো বৃথৈবোপবাসাদিভিঃ কৃশং কুর্ব্বতোঽচেতসোঽবিবেকিনঃ মাঞ্চান্তর্যামিতয়া অন্তঃশরীরস্থং দেহমধ্যে স্থিতং মদাজ্ঞালঙ্ঘনেনৈব কর্শয়ন্তো যে তপশ্চরন্তি তানাসুরনিশ্চয়ান্ আসুরোঽতিক্রূরোনিশ্চয়ো যেষাং তান্ বিদ্ধি ॥ ৬ ॥

আহারস্ত্বপি সর্ব্বস্য ত্রিবিধো ভবতি প্রিয়ঃ।
যজ্ঞস্তপস্তথা দানং তেষাং ভেদমিমং শৃণু ॥ ৭ ॥
আয়ুঃসত্ত্ববলারোগ্যসুখপ্রীতিবিবর্দ্ধনাঃ।
রস্যাঃ স্নিগ্ধাঃ স্থিরা হৃদ্যা আহারাঃ সাত্ত্বিকপ্রিয়াঃ ॥ ৮ ॥

## শাঙ্করভাষ্যম্।

আহারাণাঞ্চ রস্যস্নিগ্ধাদিবর্গত্রয়রূপেণ ভিন্নানাং যথাক্রমং সাত্ত্বিকরাজসতামসপুরুষপ্রিয়ত্বদর্শনমিহ ক্রিয়তে যতো রস্যস্নিগ্ধাদিষাহারবিশেষেষাত্মনঃ প্রীত্যতিরেকেন লিঙ্গেন সাত্ত্বিকত্বং রাজসত্বন্তামসত্বঞ্চ বুদ্ধা রজস্তমোলিঙ্গানামাহারাণাং পরিবর্জ্জনার্থং সত্ত্বলিঙ্গানাঞ্চোপাদানার্থং, তথা যজ্ঞাদীনামপি সত্ত্বাদিগুণভেদেন ত্রিবিধত্বপ্রতিপাদনমিহ রাজসতামসান্ বুদ্ধা কথং নু নাম পরিত্যজেৎ সাত্ত্বিকানেবানুতিষ্ঠেদিত্যেবমর্থমাহ আহারস্ত্বিতি আহারস্ত্বপি সর্ব্বস্য ভোক্তুস্ত্রিবিধোভবতি প্রিয়ইষ্টস্তথা যজ্ঞস্তপস্তথা দানং তেষামাহারাদীনাম্ভেদমিমং বক্ষ্যমাণং শৃণু ॥ ৭ ॥

আয়ুরিতি। আয়ুশ্চ সত্ত্বঞ্চ বলঞ্চ আরোগ্যঞ্চ সুখঞ্চ প্রীতিশ্চ তাসাং বিবর্দ্ধনাঃ আয়ুঃসত্ত্ববলারোগ্যসুখপ্রীতিবিবর্দ্ধনাঃ রস্যস্নিগ্ধাঃ তে চ রস্যারসোপেতাঃ স্নিগ্ধাঃ স্নেহবন্তঃ স্থিরাশ্চিরকালস্থায়িনো দেহে হৃদ্যাহৃদয়প্রিয়াআহারাঃ সাত্ত্বিকস্যেষ্টাঃ ॥ ৮ ॥

## গিরিকৃত টীকা।

উত্তরশ্লোকপূর্ব্বার্দ্ধতাৎপর্য্যমাহ আহারাণামিতি। রস্যাদিবর্গস্য সাত্ত্বিকপুরুষপ্রিয়ত্বং কট্বাদিবর্গস্য রাজসপ্রিয়ত্বং যাতযামাদিবর্গস্য তামসপ্রিয়ত্বমিতি দর্শনং কুত্রোপযুজ্যতে তত্রাহ রস্যেতি। শ্লোকোত্তরার্দ্ধতাৎপর্য্যমাহ তথেতি। আহারত্রৈবিধ্যবদিতি যাবৎ কথমেতেষাং প্রত্যেকং ত্রৈবিধ্যন্তত্রাহ তেষামিতি ॥ ৭ ॥

সাত্ত্বিকপ্রীতিবিষয়মাহারবিশেষমুদাহরতি আয়ুরিতি। আয়ুর্জ্জীবনং সত্ত্বঞ্চিত্তস্থৈর্য্যং বীর্য্যং বা বলং কার্য্যকরণসামর্থ্যং আরোগ্যন্নীরোগতা সুখং অন্তরাহ্লাদঃ

## স্বামিকৃত টীকা।

আহারাদিভেদাদপি সাত্ত্বিকাদিভেদং দর্শয়িতুমাহ আহারস্ত্বিত্যাদি ত্রয়োদশভিঃ। সর্ব্বস্যাপি জনস্য য আহারোঽন্নাদিঃ সতু যথাযথং ত্রিবিধঃ প্রিয়োভবতি, তথা যজ্ঞতপোদানানি ত্রিবিধানি ভবন্তি, তেষাং বক্ষ্যমাণং ভেদমিমং শৃণু. এতচ্চ রাজসতামসাহারযজ্ঞাদিপরিত্যাগেন সাত্ত্বিকাহারযজ্ঞাদিসেবয়া সত্ত্ববৃদ্ধৌ যত্নঃ কর্ত্তব্যইত্যেতদর্থং কথ্যতে ॥ ৭ ॥

তত্রাহারত্রৈবিধ্যমাহ আয়ুরিতি ত্রিভিঃ। আয়ুর্জ্জীবনং সত্ত্বমুৎসাহঃ বলং শক্তিঃ আরোগ্যং রোগরাহিত্যং সুখং চিত্তপ্রসাদঃ প্রীতিরভিরুচিঃ আয়ুরাদীনাং বিবর্দ্ধনাঃ

কট্বম্ললবণাত্যুষ্ণতীক্ষ্ণরূক্ষবিদাহিনঃ।
আহারা রাজসস্যেষ্টা দুঃখশোকাময়প্রদাঃ ॥ ৯ ॥
যাতযামং গতরসং পূতি পর্য্যুষিতঞ্চ যৎ।
উচ্ছিষ্টমপি চামেধ্যং ভোজনং তামসপ্রিয়ম্ ॥ ১০ ॥

---

## শাঙ্করভাষ্যম্।

কট্বিতি। কট্বম্ললবণাত্যুষ্ণঃ অতিশব্দঃ কট্বাদিষু সর্ব্বত্র যোজ্যোঽতিকটুরতিতীক্ষ্ণ-ইত্যেবং কট্বম্ললবণাত্যুষ্ণরূক্ষবিদাহিনঃ এবম্বিধা আহারা রাজসস্যেষ্টা দুঃখশোকাময়প্রদা দুঃখঞ্চ শোকঞ্চ আময়ঞ্চ প্রযচ্ছন্তীতি দুঃখশোকাময়প্রদাঃ ॥ ৯ ॥

যাতযামমিতি। যাতযামং মন্দপক্বং নির্ব্বীর্য্যস্য গতরসেনোক্তত্বাৎ গতরসং রসবিযুক্তং পূতি দুর্গন্ধি পর্য্যুষিতঞ্চ পক্বং সৎ রাত্র্যন্তরিতঞ্চ যৎ উচ্ছিষ্টমপি চ ভুক্তশিষ্টমপ্যমেধ্য-মযজ্ঞার্হন্তোজনমীদৃশন্তামসপ্রিয়ং ॥ ১০ ॥

---

## গিরিকৃত টীকা।

প্রীতিঃ পরেষামপি সম্পন্নানাং দর্শনাৎ পরমোহর্ষস্তাসাং বিবর্দ্ধনাঃ বিবর্দ্ধয়ন্তীতিব্যুৎপত্তেব-লোপেতো বসয়িতব্যাঃ সরসাঃ দেহে চিরকালস্থায়িত্বং চিরশরীরোপকারহেতুত্বং ॥ ৮ ॥

রাজসপ্রীতিবিষয়মাহারবিশেষং দর্শয়তি কট্বিতি। কটুকস্তিক্তঃ কটুকস্য তীক্ষ্ণশব্দেনো-ক্তত্বাৎ রুক্ষোবিস্নেহঃ বিদাহী সন্তাপকঃ। অতিশব্দস্য সর্ব্বত্রযোজনামেবাভিনয়তি অতি কটুরিতি। দুঃখং তাৎকালিকী পীড়া ইষ্টবিয়োগজং দুঃখং শোকঃ আময়ো রোগঃ ॥ ৯ ॥

তামসপ্রিয়াহারমুদাহরতি যাতযামমিতি। নমু নির্ব্বীর্য্যং যাতযামমুচ্যতে ন পুনঃ সামিপক্বমিতি নেত্যাহ নির্ব্বীর্য্যস্যেতি ॥ ১০ ॥

## স্বামিকৃত টীকা।

বিশেষেণ বৃদ্ধিকরাঃ তে চ রস্যা রসবন্তঃ স্নিগ্ধাঃ স্নেহযুক্তাঃ স্থিরা দেহে সারাংশেন চির-কালাবস্থায়িনঃ হৃদ্যাঃ দৃষ্টিমাত্রাদেব হৃদয়ঙ্গমাঃ এবম্ভূতাআহারাভক্ষ্যভোজ্যাদয়ঃ সাত্ত্বিক-প্রিয়াঃ ॥ ৮ ॥

তথা কট্বিতি। অতিশব্দঃ কট্বাদিষু সপ্তস্বপি সম্বধ্যতে, তেন অতিকটুর্নিম্বাদিঃ অত্যম্লো-ঽতিলবণোঽত্যুষ্ণশ্চ প্রসিদ্ধঃঅতিতীক্ষ্ণোমরীচ্যাদিঃ অতিরুক্ষঃ কঙ্গুকোদ্রবাদিঃ অতিবিদাহী সর্ষপাদিঃ, অতিকট্বাদয় আহারা রাজসস্যেষ্টাঃ প্রিয়াঃ, দুঃখং তাৎকালিকহৃদয়সন্তাপাদি, শোকঃ পশ্চাদ্ভাবিদৌর্ম্মনস্যং, আময়োরোগঃ এতান্ প্রদদতি প্রযচ্ছন্তীতি তথা ॥ ৯ ॥

যাতযামমিতি। যাতোযামঃ প্রহরোযস্য পক্বস্যৌদনাদেঃ যদ্যাতযামং শৈত্যাবস্থাং প্রাপ্তমিত্যর্থঃ, গতরসং নিষ্পীড়িতসারং, পূতি দুর্গন্ধং পর্য্যুষিতং দিনান্তরপক্বং উচ্ছিষ্টং

অফলাকাঙ্ক্ষিভির্যজ্ঞো বিধিদিষ্টো য ইজ্যতে।
যষ্টব্যমেবেতি মনঃ সমাধায় স সাত্ত্বিকঃ ॥ ১১ ॥
অভিসন্ধায় তু ফলং দম্ভার্থমপি চৈব যৎ।
ইজ্যতে ভরতশ্রেষ্ঠ তং যজ্ঞং বিদ্ধি রাজসম্ ॥ ১২ ॥

## শাঙ্করভাষ্যম্।

অথেদানীং যজ্ঞস্ত্রিবিধ উচ্যতে অফলেতি। অফলাকাঙ্ক্ষিভিরফলার্থিভির্যজ্ঞোবিধিদৃষ্টঃ শাস্ত্রচোদনাদৃষ্টো যোযজ্ঞ ইজ্যতে নির্ব্বর্ত্ত্যতে যষ্টব্যমেবেতি যজ্ঞস্বরূপনির্ব্বর্ত্তনমেব কার্য্যমিতি মনঃ সমাধায় নানেন পুরুষার্থো মম কর্ত্তব্যইত্যেবং নিশ্চিত্য স সাত্ত্বিকো যজ্ঞ উচ্যতে ॥ ১১ ॥

অভিসন্ধায়েতি। অভিসন্ধায়োদ্দিশ্য ফলং দম্ভার্থমপি চৈব যৎ ইজ্যতে ভরতশ্রেষ্ঠ তং যজ্ঞং বিদ্ধি রাজসং ॥ ১২ ॥

বিধিহীনমিতি। বিধিহীনং যথাচোদিতবিধিবিপরীতং, অসৃষ্টান্নং ব্রাহ্মণেভ্যো ন সৃষ্টমন্নং যস্মিন্ যজ্ঞে সোঽসৃষ্টান্নস্তমসৃষ্টান্নং মন্ত্রহীনং মন্ত্রতঃ স্বরতোবর্ণতশ্চ বিযুক্তং মন্ত্র-

## গিরিকৃত টীকা।

হানাদানার্থং আহারত্রৈবিধ্যমেবং বিভজ্য ক্রমপ্রাপ্তং যজ্ঞত্রৈবিধ্যং কথয়তি অথেতি তত্র সাত্ত্বিকং যজ্ঞং জ্ঞাপয়তি অফলেতি। ফলাভিসন্ধিং বিনা যজ্ঞস্বরূপমেব ভাব্যমিতি বুদ্ধা শাস্ত্রতোঽনুষ্ঠীয়মানো যজ্ঞঃ সাত্ত্বিকইত্যর্থঃ ॥ ১১ ॥

রাজসংযজ্ঞংহানার্থং দর্শয়তি অভিসন্ধায়েতি। স্বর্গাদ্যুদ্দিশ্য ধার্ম্মিকত্বখ্যাপনার্থঞ্চ যদ্যজনং ক্রিয়তে তদ্‌যজ্ঞং রসজ্ঞা নির্ব্বৃত্তংত্যজ্যমবগচ্ছেত্যর্থঃ ॥ ১২ ॥

## স্বামিকৃত টীকা।

অন্যভুক্তাবশিষ্টং অমেধ্যং অভক্ষ্যং কলঞ্জাদি এবম্ভূতং ভোজনং ভোজ্যং তামসস্য প্রিয়ং ॥ ১০ ॥

যজ্ঞোঽপি ত্রিবিধস্তত্র সাত্ত্বিকং যজ্ঞমাহ অফলাকাঙ্ক্ষিভিরিতি ত্রিভিঃ। ফলাকাঙ্ক্ষারহিতৈঃ পুরুষৈর্ব্বিধানাদিষ্ট আবশ্যকতয়া বিহিতো যোযজ্ঞইজ্যতে অনুষ্ঠীয়তে স সাত্ত্বিকো যজ্ঞঃ, কথমিজ্যতে যষ্টব্যমেবেতি যজ্ঞানুষ্ঠানমেব কার্য্যং নান্যৎ ফলং সাধনীয়মিত্যেবং মনঃ সমাধায়ৈকাগ্রং কৃত্বেত্যর্থঃ ॥ ১১ ॥

রাজসং যজ্ঞমাহ অভিসন্ধায়েতি। ফলমভিসন্ধায় উদ্দিশ্য যদিজ্যতে যজ্ঞং ক্রিয়তে দম্ভার্থঞ্চ স্বমহত্ত্বখ্যাপনায় তং যজ্ঞং রাজসং বিদ্ধি ॥ ১২ ॥

বিধিহীনমসৃষ্টান্নং মন্ত্রহীনমদক্ষিণম্।
শ্রদ্ধাবিরহিতং যজ্ঞং তামসং পরিচক্ষতে॥ ১৩॥
দেবদ্বিজগুরুপ্রাজ্ঞপূজনং শৌচমার্জবম্।
ব্রহ্মচর্য্যমহিংসা চ শারীরং তপ উচ্যতে॥ ১৪॥

## শাঙ্করভাষ্যম্।

হীনং অদক্ষিণমুক্তদক্ষিণাবহিতং শ্রদ্ধারহিতং যজ্ঞং তামসং পবিচক্ষতে তমোনির্ব্বৃত্তং কথয়ন্তি॥ ১৩॥

অথেদানীং তপস্ত্রিবিধমুচ্যতে দেবেতি। দেবাশ্চ দ্বিজাশ্চ গুরুবশ্চ প্রাজ্ঞাশ্চ দেবদ্বিজগুরুপ্রাজ্ঞাস্তেষাং পূজনং শৌচমার্জবং ঋজুত্বং ব্রহ্মচর্য্যমহিংসা চ শবীরনির্ব্বর্ত্ত্যং শারীরং শরীরপ্রধানৈঃ সর্ব্বৈরেব কার্য্যকারণৈঃ কর্ত্রাদিভিঃ সাধ্যং শারীবন্তপউচ্যতে॥ ১৪॥

## গিরিকৃত টীকা।

তামসং যজ্ঞং হানার্থমেবোদাহবতি বিধীতি॥ ১৩॥

সাত্ত্বিকাদিভাবং নিরূপয়িতুং সর্ব্বস্য তপসঃ স্বরূপং ত্রিবিধং নিরূপয়তি অথেতি। তত্র শাবীরন্তপোনির্দিশতি দেবেতি। দেবা ব্রহ্মবিষ্ণুশিবাদয়ঃ দ্বিজাঃ পূজ্যত্বাৎ দ্বিজোত্তমাঃগুববঃ পিত্রাদয়ঃ প্রাজ্ঞাঃ পণ্ডিতা বিদিতব্যাস্তেষাং পূজনং প্রণামশুশ্রূষাদি শৌচং মৃজ্জলাভ্যাং শরীরশোধনং আর্জ্জবমৃজুত্বং বিহিতপ্রতিষিদ্ধযোবেকরূপপ্রবৃত্তিনিবৃত্তিমত্ত্বং ব্রহ্মচর্য্যং মৈথুনাসমাচরণং অহিংসাপ্রাণিনামপীড়নং শবীবমাত্রস্য নির্ব্বর্ত্ত্যত্বমস্য তপসো ন সম্ভবতীতি মত্বা বিশিনষ্টি শবীরেতি॥ ১৪॥

কথং কর্ত্রাদিসাধ্যত্বে তপসঃ শারীরত্বং শারীবত্বে বা কথং কর্ত্রাদিসাধ্যত্বমিত্যাশঙ্ক্যাহ পঞ্চেতি। সম্প্রতি বাঙ্ময়ং তপো ব্যপদিশতি অনুদ্বেগকরমিতি। সত্যং যথাদৃষ্টার্থবচনং প্রিয়ং শ্রুতিসুখং হিতং পরিণামপথ্যং। প্রিয়হিতয়োর্ব্বিধান্তরেণ বিভাগমাহ প্রিয়েতি। কথমত্র বিশেষণবিশেষ্যত্বং তদাহ অনুদ্বেগেতি। বিশেষণানাং

## স্বামিকৃত টীকা।

তামসং যজ্ঞমাহ বিধীতি। বিধিহীনং শাস্ত্রোক্তবিধিশূন্যং অসৃষ্টান্নং ব্রাহ্মণাদিভ্যোঽসৃষ্টং ন নিষ্পাদিতমন্নং যস্মিংস্তং মন্ত্রৈর্হীনং যথোক্তদক্ষিণারহিতং শ্রদ্ধাশূন্যঞ্চ যজ্ঞং তামসং পরিচক্ষতে কথয়ন্তি শিষ্টাঃ॥ ১৩॥

তপসঃ সাত্ত্বিকাদিভেদং দর্শয়িতুং প্রথমং তাবচ্ছারীরাদিভেদেন তস্য ত্রৈবিধ্যমাহ দেবেত্যাদিত্রিভিঃ। তত্র শারীরমাহ দেবেতি। প্রাজ্ঞা গুরুব্যতিরিক্তা অন্যেঽপি তত্ত্ববিদঃ দেবব্রাহ্মণাদিপূজনং শৌচাদিকঞ্চ শারীরং শরীরনির্ব্বর্ত্ত্যং তপউচ্যতে॥ ১৪॥

অনুদ্বেগকরং বাক্যং সত্যং প্রিয়হিতঞ্চ যৎ।
স্বাধ্যায়াভ্যসনং চৈব বাঙ্ময়ং তপ উচ্যতে॥ ১৫॥

## শাঙ্করভাষ্যম্।

পঞ্চৈতে তস্য হেতবইতি হি বক্ষ্যতি অনুদ্বেগেতি। অনুদ্বেগকরং প্রাণিনাং অদুঃখকরং বাক্যং সত্যং প্রিয়ং হিতঞ্চ যৎ প্রিয়হিতে দৃষ্টাদৃষ্টার্থে অনুদ্বেগকরত্বাদিভির্ধর্ম্মৈর্ব্বাক্যং বিশিষ্যতে বিশেষণধর্ম্মসমুচ্চয়ার্থশ্চশব্দঃ পরপ্রত্যায়নার্থং প্রযুক্তস্য বাক্যস্য সত্যপ্রিয়হিতানুদ্বেগকরত্বাদীনামন্যতমেন দ্বাভ্যাং ত্রিভির্ব্বা হীনতা স্যাৎ যদি ন তদ্বাঙ্ময়ন্তপস্তথা সত্যবাক্যস্যেতরেষামন্যতমেন দ্বাভ্যাং ত্রিভির্ব্বা হীনতায়াং ন বাঙ্ময়তপস্ত্বং তথা প্রিয়বাক্যস্যাপীতরেষামন্যতমেন দ্বাভ্যাং ত্রিভির্হীনস্য ন বাঙ্ময়তপস্ত্বন্তথাহি ন বাক্যস্যাপীতরেষামন্যতমেন দ্বাভ্যাং ত্রিভির্ব্বা বিযুক্তস্য বাঙ্ময়তপস্ত্বং কিং পুনস্তত্তপোযৎ সত্যং বাক্যমনুদ্বেগকরং প্রিযং হিতঞ্চ যৎ তৎ পরমতপোবাঙ্ময়ং যথা শান্তোভব বৎস স্বাধ্যায়ং যোগং বানুতিষ্ঠ তথা তে শ্রেয়োভবিষ্যতি স্বাধ্যায়াভ্যসনঞ্চৈব যথাবিধি বাঙ্ময়ং তপউচ্যতে॥ ১৫॥

## গিরিকৃত টীকা।

ধর্ম্মাণামনুদ্বেগকরত্বাদীনাং বিশেষণবাক্যেন সমুদিতানাং পরস্পরমপিসমুচ্চয়দ্যোতী চকারইত্যাহ বিশেষণেতি, কিমিতি বাক্যমেতৈর্ব্বিশিষ্যতে কিমিতি বা তেষাং মিথঃ সমুচ্চয়স্তত্রাহ পরেতি। যদ্যপি বিধায়কবাক্যমাত্রস্য বাঙ্ময়তপস্ত্বানুপপত্তিস্তথাপি সত্যবাক্যস্য বাক্যবিশেষণান্তরাভাবেঽপি বাঙ্ময়তপস্ত্বমিত্যাশঙ্ক্যাহ তথেতি। তথাপি প্রিয়বাক্যমাত্রস্য তথাত্বং স্যাদিত্যাশঙ্ক্যাহ তথেতি। তথাপি পরিণামপথ্যং বাক্যমাত্রন্তথা ভবিষ্যতি নেত্যাহ তথাহিনেতি। কীদৃক্ তর্হি তয়োর্ব্বাঙ্ময়ত্বমিতি প্রশ্নপূর্ব্বকং বিশদয়তি কিং পুনরিতি। বিশিষ্টে বাঙ্ময়ে তপসি দৃষ্টান্তমাহ যথেতি। প্রাঙ্মুখত্বং পবিত্রপাণিত্বমিত্যাদি বিধানমনতিক্রম্য স্বাধ্যায়স্যাবর্ত্তনমপি বাঙ্ময়ে তপস্যন্তর্ভবতীত্যাহ স্বাধ্যায়েতি। বাক্প্রাচুর্য্যেণ প্রস্তুতাস্মিন্নিতি বাঙ্ময়ং বাক্প্রধানমিত্যর্থঃ॥ ১৫॥

মানসন্তপঃ সংক্ষিপতি মনইতি। প্রশান্তিফলমেব ব্যনক্তি স্বচ্ছতেতি। মনসঃ স্বাচ্ছ্যমনাকুলতা নৈশ্চিন্ত্যমিত্যর্থঃ। সৌমনস্যং সর্ব্বেভ্যোহিতৈষিত্বমহিতাচিন্তনঞ্চ তৎকথং গম্যতে তত্রাহ মুখাদীতি। তস্য স্বরূপমাহ অন্তঃকরণস্যেতি। নন্থ মৌনং

## স্বামিকৃত টীকা।

বাচিকং তপআহ অনুদ্বেগকরমিতি। উদ্বেগং ভয়ং ন করোতীত্যনুদ্বেগকরং সত্যং শ্রোতুঃ প্রিয়ং হিতঞ্চ পরিণামে সুখকরং স্বাধ্যায়াভ্যসনং বেদাভ্যাসশ্চ বাঙ্ময়ং বাচা নির্ব্বর্ত্ত্যং তপঃ॥ ১৫॥

মনঃপ্রসাদঃ সৌম্যত্বং মৌনমাত্মবিনিগ্রহঃ।
ভাবসংশুদ্ধিরিত্যেতত্তপো মানসমুচ্যতে ॥ ১৬ ॥
শ্রদ্ধয়া পরয়া তপ্তং তপস্তত্ত্রিবিধং নরৈঃ।
অফলাকাঙ্ক্ষিভির্যুক্তৈঃ সাত্ত্বিকং পরিচক্ষতে ॥ ১৭ ॥

## শাঙ্করভাষ্যম্।

মনইতি। মনঃপ্রসাদোমনসঃপ্রশান্তিঃ স্বচ্ছতাপাদনং মনসঃ প্রসাদঃ সৌম্যত্বং যৎ সৌমনস্যমাহুর্ম্মুখাদিসংপ্রসাদকার্য্যান্তঃকরণস্য বৃত্তিঃ মৌনং বাক্‌স যমোঽপি মনঃসংযমপূর্ব্বকো ভবতি ইতি কার্য্যেণ কারণমুচ্যতে মনঃসংযমোমৌনমিতি আত্মবিনিগ্রহো মনোনিরোধঃ সর্ব্বতঃ সামান্যরূপআত্মবিনিগ্রহো বাগ্বিষয়স্যৈব মনসঃ সংযমোমৌনমিতি বিশেষঃ ভাবসংশুদ্ধিঃ পরৈর্ব্ব্যবহারকালেঽমায়াবিত্বং ভাবসংশুদ্ধিরিত্যেতত্তপো মানসমুচ্যতে ॥ ১৬॥

যথোক্তং কায়িকং বাচিকং মানসঞ্চ তপস্তপ্তং নরৈঃ সত্ত্বাদিভেদেন কথং ত্রিবিধন্তবতীত্যুচ্যতে শ্রদ্ধয়াস্তিক্যবুদ্ধ্যা পরয়া প্রকৃষ্টয়া তপ্তমনুষ্ঠিতং তপস্তৎ প্রকৃতং ত্রিবিধং ত্রিঃপ্রকারং অধিষ্ঠানং নরৈরনুষ্ঠাতৃভিরফলাকাঙ্ক্ষিভিঃ ফলাকাঙ্ক্ষাবর্হিতৈর্যুক্তৈঃ সমাহিতৈর্যদীদৃশন্তপস্তৎ সাত্ত্বিকং সত্ত্বনির্ব্বৃত্তং পরিচক্ষতে কথয়ন্তি শিষ্টাঃ ॥ ১৭ ॥

## গিরিকৃত টীকা।

বাগ্‌যমনংবাঙ্ময়ে তপস্যন্তর্ভবতি তৎকথং মানসে তপসি ব্যপদিশ্যতে তত্র বচঃসংযমস্য কার্য্যত্বান্মনঃসংযমস্য কারণত্বাৎ কার্য্যেণ করণাগ্রহণাৎ মানসে তপসি মৌনমুক্তমিত্যাহ বাগিতি। যদ্বা মৌনং মুনিভাবো মননং আত্মনো মনসো বিনিগ্রহোনিরোধঃ নন্বেবং মৌনস্য মনোনিগ্রহস্য চ মনঃ সংযমত্বেনৈকত্বাৎ পৌনরুক্ত্যং নেত্যাহ সর্ব্বতইতি। ভাবস্য হৃদয়স্য সংশুদ্ধীরাগাদিমলবিকলতেতি ব্যাচষ্টে পরৈরিতি। মানসং মনসা প্রধানেন নির্ব্বর্ত্ত্যমিত্যর্থঃ ॥ ১৬ ॥

ত্রিবিধস্য তপসো যথাসম্ভবং সাত্ত্বিকাদিভাবেন তত্ত্রৈবিধ্যমাকাঙ্ক্ষাদ্বারা নিক্ষিপতি যথোক্তমিতি তত্রৈব তদধিষ্ঠানং দেহবাঙ্মনোনির্ব্বর্ত্ত্যমিত্যর্থঃ সমাহিতৈঃ সিদ্ধ্যসিদ্ধ্যোর্নির্ব্বিকারৈরিতি যাবৎ ॥ ১৭ ॥

## স্বামিকৃত টীকা।

মানসং তপআহ মনইতি। মনঃপ্রসাদঃ স্বচ্ছতা, সৌম্যত্বমক্রূরতা, মৌনং মুনের্ভাবো মননমিত্যর্থঃ, আত্মনো মনসো বিনিগ্রহো বিষয়েভ্যঃ প্রত্যাহারঃ ভাবসংশুদ্ধির্ব্যবহারে মায়ারাহিত্যমিত্যেতন্মানসংতপঃ ॥ ১৬ ॥

তদেবং শরীরবাঙ্মনোভির্নির্ব্বর্ত্ত্যং ত্রিবিধং তপোদর্শিতং তস্য ত্রিবিধস্যাপি তপ-

সৎকারমানপূজার্থং তপোদম্ভেন চৈব যৎ।
ক্রিয়তে'তদিহ প্রোক্তং রাজসং চলমধ্রুবম্ ॥ ১৮ ॥
মূঢ়গ্রাহেণাত্মনো যৎ পীড়য়া ক্রিয়তে তপঃ।
পরস্যোৎসাদনার্থং বা তত্তামসমুদাহৃতম্ ॥ ১৯ ॥

## শাঙ্করভাষ্যম্।

সৎকারেতি। সৎকারঃ সাধুকারঃ সাধুরযং তপস্বী ব্রাহ্মণঃ ইত্যেবমর্থং' মানোমাননং প্রত্যুত্থানাভিবাদনাদিস্তদর্থং' পূজা পাদপ্রক্ষালনার্চ্চনাশয়িতৃত্বাদি তদর্থঞ্চ' তপঃ সৎকা-মানপূজার্থং'দম্ভেনৈব চ ক্রিয়তে তপস্তদিহ প্রোক্তং কথিতং' রাজসঞ্চলঙ্কাদাচিৎকফলত্বে-নাধ্রুবং ॥ ১৮ ॥

মূঢ়েতি। মূঢ়গ্রাহেণাবিবেকনিশ্চয়েনাত্মনঃ পীড়য়া ক্রিয়তে যত্তপঃ পরস্য উৎসাদ-নার্থং বিনাশার্থং বা তত্তামসন্তপউদাহৃতং ॥ ১৯ ॥

## গিরিকৃত টীকা।

রাজসন্তপোনির্দ্দিশতি সৎকারেতি। সাধুকারমেব স্ফোরয়তি সাধুরিতি। দম্ভেন চৈব নাস্তিক্যেন কেবলধর্ম্মধ্বজিত্বেনেত্যর্থঃ তদিহপ্রোক্তমস্মিন্নেব লোকে ফলপ্রদমিত্যর্থঃ কাদাচিৎকফলত্বং ক্ষণিকফলত্বমধ্রুবমনিয়তমনৈকান্তিকফলমিতিযাবৎ ॥ ১৮ ॥

তামসন্তপঃ সঙ্গৃহ্নাতি মূঢ়েতি। মূঢ়োঽত্যন্তাবিবেকী তস্য গ্রহোনামাগ্রহাভিনিবেশ-স্তেনেত্যাহ অবিবেকেতি। আত্মনঃ স্বস্য দেহাদেরিত্যর্থঃ ॥ ১৯ ॥

## স্বামিকৃত টীকা।

সাত্ত্বিকাদিভেদেন ত্রৈবিধ্যমাহ শ্রদ্ধয়েত্যাদিত্রিভিঃ। তৎত্রিবিধমপি তপঃ শ্রেষ্ঠয়া শ্রদ্ধয়া ফলাকাঙ্ক্ষাশূন্যৈর্যুক্তৈরেকাগ্রচিত্তৈর্নরৈস্তপ্তং সাত্ত্বিকং কথয়ন্তি ॥ ১৭ ॥

রাজসমাহ সৎকারেতি। সৎকারঃ সাধুকারঃ সাধুরয়মিতি তাপসোঽয়মিত্যাদিবাক্-পূজা মানঃ অভ্যুত্থানাভিবাদনাদির্দৈহিকী পূজা অর্থোলাভাদিঃ এতদর্থং দম্ভেন চ তপঃ ক্রিয়তে অতএব চলমনিয়তং অধ্রুবঞ্চ ক্ষণিকং যদেবম্ভূতং তপস্তদিহ রাজসং প্রোক্তং ॥ ১৮ ॥

তামসং তপআহ মূঢ়েতি। মূঢ়গ্রাহেণাবিবেককৃতেন দুরাগ্রহেণাত্মনঃ পীড়য়া যত্তপঃ ক্রিয়তে পরস্যোৎসাদনার্থম্বা অন্যস্য বিনাশার্থমভিচাররূপং তত্তামসমুদাহৃতং কথিতং ॥১৯॥

পূর্ব্বপ্রতিজ্ঞাতমেব দানস্য ত্রৈবিধ্যমাহ দাতব্যমিতি। দাতব্যমেবেত্যেবং নিশ্চয়েন যদ্দানং দীয়তে অনুপকারিণে প্রত্যুপকারাসমর্থায় দেশে কুরুক্ষেত্রাদৌ কালে গ্রহণাদৌ পাত্রে চেতি দেশকালসাহর্য্যাৎ সপ্তমী প্রযুক্তা পাত্রে পাত্রভূতায় তপঃশ্রুতাদিসম্পন্নায়

দাতব্যমিতি যদ্দানং দীয়তেঽনুপকারিণে।
দেশে কালে চ পাত্রে চ তদ্দানং সাত্ত্বিকং স্মৃতম্ ॥ ২০ ॥
যত্তু প্রত্যুপকারার্থং ফলমুদ্দিশ্য বা পুনঃ।
দীয়তে চ পরিক্লিষ্টং তদ্দানং রাজসংস্মৃতম্ ॥ ২১ ॥
অদেশকালে যদ্দানমপাত্রেভ্যশ্চ দীয়তে।
অসৎকৃতমবজ্ঞাতং তত্তামসমুদাহৃতম্ ॥ ২২ ॥

## শাঙ্করভাষ্যম্।

ইদানীন্দানভেদমুচ্যতে দাতব্যমিতি। দাতব্যমিতি এবং মনঃ কৃত্বা যদ্দানং দীয়তেঽনুপকারিণে প্রত্যুপকারাসমর্থায় সমর্থায়াপি নিরপেক্ষন্দীয়তে দেশে পুণ্যে কুরুক্ষেত্রাদৌ কালে সংক্রান্ত্যাদৌ পাত্রে চ ষড়ঙ্গবিদ্বেদপারগইত্যাদৌ আচারনিষ্ঠায় ইত্যর্থঃ তদ্দানং সাত্ত্বিকং স্মৃতং ॥ ২০ ॥

যত্ত্বিতি। যত্তু দানং প্রত্যুপকারার্থং কালে ত্বয়ং মাং প্রত্যুপকরিষ্যতীত্যেবমর্থং ফলং বাস্য দানস্য মে ভবিষ্যত্যদৃষ্টমিতি তদুদ্দিশ্য পুনর্দীয়তে চ পরিক্লিষ্টং খেদসংযুক্তং তদ্রাজসং-স্মৃতং ॥ ২১ ॥

অদেশেতি। অদেশকালে অপুণ্যে দেশে ম্লেচ্ছাশুচ্যাদিসংকীর্ণে অকালে পুণ্যহেতু-ত্বেনাঽপ্রখ্যাতে সংক্রান্ত্যাদিবিশেষরহিতে অপাত্রেভ্যশ্চ মূর্খতস্করাদিভ্যো দেশাদিসম্পত্তৌ

## গিরিকৃত টীকা।

ক্রমপ্রাপ্তং দানস্য গুণনিমিত্তন্তেদমাহ ইদানীমিতি। দাতব্যমিত্যেবং মননং কৃত্বা দানমেব ময়া ভাব্যং ন ফলমিত্যভিসন্ধায়েত্যর্থঃ ॥ ২০ ॥

রাজসতামসদানবিভজনং স্পষ্টার্থং ॥ ২১ ॥ ২২ ॥

## স্বামিকৃত টীকা।

ব্রাহ্মণায়েত্যর্থঃ, যদ্বা. চতুর্থ্যৈবৈষা পাত্রে ইতি তৃজন্তং রক্ষকায় ইত্যর্থঃ। সহি সর্ব্বস্মা-দাপদ্গণাদ্দাতারং পাতীতি পাতা তস্মৈ যদেবং ভূতং দানং তৎ সাত্ত্বিকং ॥ ২০ ॥

রাজসং দানমাহ যত্ত্বিতি। কালান্তরেঽয়ং মাংপ্রত্যুপকরিষ্যতীত্যেবমর্থং ফলংবা স্বর্গাদিকমুদ্দিশ্য যৎ পুনর্দ্দানং দীয়তে পরিক্লিষ্টং চিত্তক্লেশযুক্তং যথা ভবত্যেবংভূতং তৎদানং রাজসমুদাহৃতং কথিতং ॥ ২১ ॥

তামসং দানমাহ অদেশেতি। অদেশে অশুচিস্থানে অকালে অশৌচাদিসময়ে অপাত্রেভ্যোবিটনটাদিভ্যোযদ্দানং দীয়তে তৎ দেশকালপাত্রসম্পত্তাবপি অসৎকৃতং পাদ-প্রক্ষালনাদিসৎকারশূন্যং অবজ্ঞাতং পাত্রতিরস্কারযুক্তং এবম্ভূতং দানং তামসমুদাহৃতং ॥২২॥

ওঁতৎসদিতি নির্দেশো ব্রহ্মণস্ত্রিবিধঃ স্মৃতঃ।
ব্রাহ্মণাস্তেন বেদাশ্চ যজ্ঞাশ্চ বিহিতাঃ পুরা ॥ ২৩ ॥

শাঙ্করভাষ্যম্।

বা অসৎকৃতং প্রিয়বচনপাদপ্রক্ষালনপূজাদিরহিতমবজ্ঞাতং পাত্রপরিভবযুক্তঞ্চ তদ্দানং তামসমুদাহৃতং ॥ ২২ ॥

যজ্ঞদানতপঃপ্রভৃতীনাং সাদ্গুণ্যকরণায়ায়মুপদেশউচ্যতে ওঁতৎসদিতি। এযনির্দ্দেশঃ নির্দ্দিশ্যতেঽনেনেতি নির্দ্দেশঃ ত্রিবিধো নামনির্দ্দেশো ব্রহ্মণঃ স্মৃতশ্চিন্তিতো বেদান্তেষু ব্রহ্মবিদ্ভির্ব্রাহ্মণাস্তেন নির্দ্দেশেন ত্রিবিধেন বেদাশ্চ যজ্ঞাশ্চ বিহিতা নির্ম্মিতাঃ পুরা পূর্ব্বমিতি ॥ ২৩ ॥

গিরিকৃত টীকা।

বিহিতানাং কর্ম্মণাং প্রমাদযুক্তে বৈগুণ্যে কথং পরিহারঃ স্যাদিত্যাশঙ্ক্যাহ যজ্ঞেতি ওমিতি ব্রহ্মেত্যাদিশ্রুতেঃ ওমিতি তাবদ্ব্রহ্মণোনামনির্দ্দেশঃ তত্ত্বমসীতিশ্রুতেঃ তদিত্যপি ব্রহ্মণোনামনির্দ্দেশঃ সদেব সৌম্যেদমিতি শ্রুতেঃ সদিত্যপি তস্য নামেতি মত্বাহ ওমিতি কথং নির্দ্দেশেন তেষাং বিধানমিত্যাশঙ্ক্যাহ নির্দ্দেশেতি। যজ্ঞাদীনাংবৈগুণ্যং সিধ্যতীতি কালে যথোক্তানামন্যতমোচ্চাবণাদবৈগুণ্যং সিদ্ধতীতি ভাবঃ কর্ম্মসাদ্গুণ্যকারনং ত্রিবিধনাম স্তৌতি ব্রাহ্মণাইতি ॥ ২৩ ॥

স্বামিকৃত টীকা।

নন্বেবং বিচার্য্যমাণে সর্ব্বমপি যজ্ঞতপোদানাদি রাজসতামসপ্রায়মেবেতি ব্যর্থে যজ্ঞাদিপ্রয়াসইত্যাশঙ্ক্য তথাবিধস্যাপি সাত্ত্বিকত্বোপপাদনপ্রকারং দর্শয়িতুমাহ ওমিতি ওঁ তৎসদিতি ত্রিবিধোব্রহ্মণঃ পরমাত্মনোনির্দ্দেশোনাম্না ব্যপদেশঃ স্মৃতঃ শিষ্টৈঃ, তত্র তাবদোমিতি ত্রিবৃদ্ব্রহ্মেত্যাদিশ্রুতিপ্রসিদ্ধত্বাৎ বিদুষাং অপরোক্ষত্বাচ্চ তচ্ছব্দোঽপি-ব্রহ্মণোনাম, পরমার্থসত্ত্বসাধুত্বপ্রশস্তত্বাদিভিঃ সচ্ছব্দোঽপি ব্রহ্মণোনাম। সদেব সৌম্যেদমগ্র আসীদিত্যাদিশ্রুতেঃ। অয়ং ত্রিবিধোঽপি নামনির্দ্দেশোবিগুণমপি সগুণং কর্ত্তুং সমর্থইত্যাশয়েন স্তৌতি তেন ত্রিবিধেন ব্রহ্মণোনির্দ্দেশেন ব্রাহ্মণাশ্চ বেদাশ্চ যজ্ঞাশ্চ পুরা সৃষ্ট্যাদৌ বিহিতা বিধাত্রা নির্ম্মিতাঃ সগুণীকৃতাইতি বা, যদ্বা, যস্যায়ং ত্রিবিধো নির্দ্দেশস্তেন পরমাত্মনা ব্রাহ্মণাদয়ঃ পবিত্রতমাঃ সৃষ্টাশ্চ তস্মাত্তস্যায়ং নির্দ্দেশোঽতিপ্রশস্তইত্যর্থঃ ॥ ২৩ ॥

ইদানীং প্রত্যেকমোঙ্কারাদীনাং প্রাশস্ত্যং দর্শয়িষ্যন্নোংকারস্য তদেবাহ তস্মাদিতি। যস্মাদেবং ব্রহ্মণোনির্দ্দেশঃ প্রশস্তস্তস্মাদোমিত্যুদাহৃত্য তদুচ্চার্য্য কৃতা বেদবাদিনাং

তস্মাদোমিত্যুদাহৃত্য যজ্ঞদানতপঃক্রিয়াঃ।
প্রবর্ত্তন্তে বিধানোক্তাঃ সততং ব্রহ্মবাদিনাম্॥ ২৪ ॥
তদিত্যনভিসন্ধায় ফলং যজ্ঞতপঃক্রিয়াঃ।
দানক্রিয়াশ্চ বিবিধাঃ ক্রিয়ন্তে মোক্ষকাঙ্ক্ষিভিঃ ॥ ২৫ ॥
সদ্ভাবে সাধুভাবে চ সদিত্যেতৎ প্রযুজ্যতে।
প্রশস্তে কর্ম্মণি তথা সচ্ছব্দঃ পার্থ যুজ্যতে ॥ ২৬ ॥

## শাঙ্করভাষ্যম্।

নির্দ্দেশস্তুতার্থমুচ্যতে তস্মাদোমিত্যুদাহৃত্যোচ্চার্য্য যজ্ঞদানতপঃক্রিয়াঃ যজ্ঞাদিস্বরূপাঃ ক্রিয়াঃ প্রবর্ত্তন্তে বিধানোক্তাঃ শাস্ত্রচোদিতাঃ সততং সর্ব্বদা ব্রহ্মবাদিনাং ব্রহ্মবদনশীলানাং ॥ ২৪ ॥

তদিতি। তদিত্যনভিসন্ধায় তদিতি ব্রহ্মাভিধানমুচ্চার্য্য অনভিসন্ধায় চ কর্ম্মণঃ ফলং যজ্ঞতপঃক্রিয়াঃ যজ্ঞক্রিয়াস্তপঃক্রিয়াশ্চ যজ্ঞতপঃক্রিয়াঃ দানক্রিয়াশ্চ বিবিধাঃ ক্ষেত্রহিরণ্যপ্রদানাদিলক্ষণাঃ ক্রিয়ন্তে নির্ব্বর্ত্ত্যন্তে মোক্ষকাঙ্ক্ষিভিঃ ॥ ২৫ ॥

ওঁতচ্ছব্দয়োর্ব্বিনিযোগউক্তোঽথেদানীং সচ্ছব্দস্য বিনিয়োগঃ কথ্যতে সদ্ভাবইতি

## গিরিকৃত টীকা।

পূর্ব্বং সর্গাদৌ নির্ম্মাণঞ্চ প্রজাপতিকর্ত্তৃকং যস্মাদ্ব্রাহ্মণাদীনাং কারণং যস্মাচ্চ ব্রহ্মণো নির্দ্দেশস্তস্মাদিত্যুপসংহরতি। ব্রহ্মবাদিনামিত্যত্র ব্রহ্ম বেদ ॥ ২৪ ॥

ওঁশব্দস্য বিনিয়োগমুক্ত্বা তচ্ছব্দস্য বিনিয়োগমাহ তদিত্যাদিনা ॥ ২৫ ॥

বৃত্তমনূদ্যানন্তরশ্লোকতাৎপর্য্যমাহ ওঁ তচ্ছব্দয়োরিতি ॥ ২৬॥

## স্বামিকৃত টীকা।

যজ্ঞাদ্যাঃ শাস্ত্রোক্তাশ্চ ক্রিয়াঃ সততং সর্ব্বদা অঙ্গবৈকল্যেঽপি প্রকর্ষেণ বর্ত্তন্তে সগুণা ভবন্তীত্যর্থঃ ॥ ২৪ ॥

দ্বিতীয়ং নাম স্তৌতি তদিতি। উদাহৃত্যেতি পূর্ব্বস্যানুষঙ্গঃ তদিত্যুদাহৃত্য উচ্চার্য্য শুদ্ধচিত্তৈর্ম্মোক্ষকাঙ্ক্ষিভিঃ পুরুষৈঃ ফলাভিসন্ধিমকৃত্বা যজ্ঞাদ্যাঃ ক্রিয়াঃ অতশ্চিত্তশোধনদ্বারা ফলসংকল্পত্যজনেন মুমুক্ষুত্বসম্পাদকত্বাত্তচ্ছব্দনির্দ্দেশঃ প্রশস্তইত্যর্থঃ ॥ ২৫ ॥

সচ্ছব্দস্য প্রাশস্ত্যমাহ সদ্ভাবইতি দ্বাভ্যাং। সদ্ভাবে অস্তিত্বে দেবদত্তস্য পুত্রাদিকমস্তীত্যস্মিন্নর্থে সাধুভাবে চ সাধুত্বে দেবদত্তস্য পুত্রাদি শ্রেষ্ঠমিত্যস্মিন্নর্থে সদিত্যেতৎ পদং প্রযুজ্যতে। প্রশস্তে মাঙ্গলিকে বিবাহাদিকর্ম্মণি চ সদিদং কর্ম্মেতি সচ্ছব্দোযুজ্যতে সদচ্ছত ইতি বা ॥ ২৬ ॥

যজ্ঞে তপসি দানে চ স্থিতিঃ সদিতি চোচ্যতে।
কর্ম্ম চৈব তদর্থীয়ং সদিত্যেবাভিধীয়তে ।। ২৭ ।।

## শাঙ্করভাষ্যম্।

সতঃ সদ্ভাবে যথা অবিদ্যমানস্য পুত্রস্য জন্মনি তথা সাধুভাবে অসদ্বৃত্তস্যাসাধোঃ সদ্বৃত্ততা সাধুভাবস্তস্মিন্ সাধুভাবে চ সদিত্যেতদভিধানং ব্রহ্মণঃ প্রযুজ্যতে তত্রোচ্যতেঽভিধীয়তে প্রশস্তে কর্ম্মণি বিবাহাদৌ চ তথা সচ্ছব্দঃ পার্থ যুজ্যতে প্রযুজ্যতইত্যেতৎ ॥ ২৬ ॥

যজ্ঞে যজ্ঞকর্ম্মণি যা স্থিতিস্তপসি চ যা স্থিতির্দ্দানে চ যা স্থিতিঃ সা চ সদিত্যুচ্যতে বিদ্বদ্ভিঃ কর্ম্ম চ এব তদর্থীয়ং যজ্ঞদানতপোঽর্থীয়মথ বা যস্যাভিধানত্রয়ং প্রকৃতং তদর্থীয়মীশ্বরার্থীয়মিত্যেতৎ সদিত্যেবাভিধীয়তে তদেতৎ যজ্ঞদানতপআদিকর্ম্ম অসাত্ত্বিকং বিগুণমপি শ্রদ্ধাপূর্ব্বকং ব্রহ্মণোঽভিধানত্রয়প্রয়োগেন সগুণং সাত্ত্বিকং সম্পাদিতম্ভবতি ॥ ২৭ ॥

## গিরিকৃত টীকা।

প্রকারান্তরেণ সচ্ছব্দস্য বিনিয়োগমাহ যজ্ঞইতি। নামত্রয়োচ্চারণেন সাদ্গুণ্যং সিধ্যতীতি প্রকরণার্থমুপসংহরতি তদেতদিতি ॥ ২৭ ॥

অশ্রদ্ধান্বিতস্যাপি কর্ম্মণোনামত্রয়োচ্চারণাদবৈগুণ্যে শ্রদ্ধাপ্রাধান্যংন স্যাদিত্যাশঙ্ক্যাহ তত্র চেতি। সপ্তমীভ্যাং প্রকৃতং যজ্ঞাদিগৃহ্যতে সর্ব্বযজ্ঞাদি সগুণমিতিশেষঃ। তস্যাসত্বং সাধয়তি যৎপ্রাপ্তীতি। ঐহিকামুষ্মিকস্বা ফলমশ্রদ্ধিতেনাপি কর্ম্মণা সংপৎস্যতে নচেতি। তস্যোভয়বিধফলাহেতুত্বে হেতুমাহ সাধুভিরিতি। নিন্দন্তি হি সাধবঃ শ্রদ্ধাবহিতংকর্ম্ম অতোনৈতদুভয়ফলোপয়িকমিত্যর্থং, তদনেন শাস্ত্রানভিজ্ঞানামপি শ্রদ্ধাবতাং

## স্বামিকৃত টীকা।

কিঞ্চ যজ্ঞইতি। যজ্ঞাদিষু যা স্থিতিস্তাৎপর্য্যেণাবস্থানং তদপি সদিত্যুচ্যতে। যস্য চেদং নামত্রয়ং সএব পরমাত্মা অর্থঃ ফলং যস্য তত্তদর্থং কর্ম্ম পূজোপহারগৃহাঙ্গনপরিমার্জনোপ লেপনরঙ্গমাঙ্গলিকাদিক্রিয়া তৎসিদ্ধয়ে যদন্যৎ কর্ম্ম ক্রিয়তে উদ্যানশালিক্ষেত্রধনার্জ্জনাদিবিষয়ং তৎকর্ম্ম তদর্থীয়ং তচ্চাতিব্যবহিতমপি সদিত্যেবাভিধীয়তে। যস্মাদেবমতিপ্রশস্তমেতন্নামত্রয়ং তস্মাদেতৎ সর্ব্বকর্ম্মসাদ্গুণ্যার্থং সংকীর্ত্তয়েদিতি তাৎপর্য্যার্থঃ। অত্র চার্থবাদানুপপত্ত্যা বিধিঃ কল্প্যতে বিধেয়ং স্তূয়তে বস্তিতিন্যায়াৎ। অপরে তু প্রবর্ত্তন্তে বিধানোক্তাঃ ক্রিয়ন্তে মোক্ষকাঙ্ক্ষিভিরিত্যাদি বর্ত্তমানোপদেশঃ সমিধো যজতীত্যাদিবদ্বিধিতয়া পরিণমনীয়ইত্যাহুস্তত্তু সদ্ভাবে সাধুভাবে চেত্যাদিষু প্রাপ্তার্থত্বান্ন সঙ্গচ্ছতইতি পূর্ব্বোক্তক্রমেণ বিধিকল্পনৈব জ্যায়সী ॥ ২৭ ॥

ইদানীং সর্ব্বকর্ম্মসু শ্রদ্ধয়ৈব প্রবৃত্ত্যর্থমশ্রদ্ধয়া কৃতং সর্ব্বং নিন্দতি অশ্রদ্ধয়েতি। অশ্রদ্ধয়া হুতং হবনং দত্তং দানং তপস্তপ্তং নিবর্ত্তিতং যচ্চান্যদপি কৃতং তৎ সর্ব্বমসদিত্যুচ্যতে,

অশ্রদ্ধয়া হুতং দত্তং তপস্তপ্তং কৃতঞ্চ যৎ।
অসদিত্যুচ্যতে পার্থ ন চ তৎ প্রেত্য নো ইহ॥ ২৮॥

ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং
যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসম্বাদে
শ্রদ্ধাত্রয়বিভাগযোগোনাম
সপ্তদশোঽধ্যায়ঃ॥

## শাঙ্করভাষ্যম্।

তত্র চ সর্ব্বত্র শ্রদ্ধাপ্রধানতয়া সর্ব্বং সম্পাদ্যতে যস্মাৎ অশ্রদ্ধয়েতি। তস্মাৎ অশ্রদ্ধয়া হুতং হবনং কৃতং দত্তঞ্চ ব্রাহ্মণেভ্যোঽশ্রদ্ধয়া তপস্তপ্তমনুষ্ঠিতমশ্রদ্ধয়া. তথাঽশ্রদ্ধয়ৈব কৃতং যৎ স্তুতিনমস্কারাদি তৎ সর্ব্বমসদিত্যুচ্যতে মৎ প্রাপ্তিসাধনমার্গবাহ্যত্বাৎ পার্থ ন চ তদ্বহ্বা-য়াসমপি প্রেত্য ফলায় নাপীহার্থং সাধুভির্নিন্দিতত্বাদিতি॥ ২৮॥

ইতি শ্রীমদ্ভগবদ্গীতাভাষ্যে সপ্তদশোঽধ্যায়ঃ।

## গিরিকৃত টীকা।

শ্রদ্ধয়া সাত্ত্বিকত্বাদিত্রৈবিধ্যভাজাং রাজসতামসাহারাদিত্যাগেন সাত্ত্বিকাহারাদিসেবয়া সত্ত্বৈকশরণানাং প্রাপ্তমপি যজ্ঞাদিবৈগুণ্যং ব্রহ্মনামনির্দ্দেশেন পরিহরতাং পরিশুদ্ধবুদ্ধীনাং শ্রবণাদিসামগ্রীসঞ্জাততত্ত্বসাক্ষাৎকারবতাং মোক্ষোপপত্তিরিতিস্থিতং॥ ২৮॥

ইতি শ্রীমদানন্দগিরিকৃতটীকায়াং সপ্তদশোঽধ্যায়ঃ।

## স্বামিকৃত টীকা।

যতস্তৎ প্রেত্য লোকান্তরে ন ফলতি বিগুণত্বাৎ নো ইহ ন চাস্মিন্ লোকে ফলতি অযশ-স্করত্বাৎ।

রজস্তমোময়ীং ত্যক্ত্বা শ্রদ্ধাং সত্ত্বময়ীং শ্রিতঃ।
তত্ত্বজ্ঞানেঽধিকারী স্যাদিতি সপ্তদশে স্থিতং॥ ২৮॥

ইতি শ্রীশ্রীধরস্বামিকৃতটীকায়াং সপ্তদশোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

## অষ্টাদশোঽধ্যায়ঃ।

অর্জ্জুন উবাচ—সন্ন্যাসস্য মহাবাহো তত্ত্বমিচ্ছামি বেদিতুম্।
ত্যাগস্য চ হৃষীকেশ পৃথক্ কেশিনিসূদন ॥ ১ ॥

### শাঙ্করভাষ্যম্।

সর্ব্বস্যৈব গীতাশাস্ত্রস্যার্থোঽস্মিন্নধ্যায়ে উপসংহৃত্য সর্ব্বশ্চ বেদার্থো বক্তব্য ইত্যেবমর্থোঽযমধ্যায় আরভ্যতে সর্ব্বেষু হ্যতীতেষ্বধ্যায়েষু উক্তোঽর্থোঽস্মিন্নধ্যায়েঽবগম্যতেঽর্জ্জুনস্তু সন্ন্যাসত্যাগশব্দার্থয়োরেব বিশেষং বুভুৎসুরুবাচ সন্ন্যাসস্যেতি। সন্ন্যাসস্য সন্ন্যাসশব্দার্থস্য ইত্যেতদ্ধে মহাবাহো তত্ত্বন্তস্য ভাবস্তত্ত্বং যাথাত্ম্যমিত্যেতৎ ইচ্ছামি বেদিতুং জ্ঞাতুং ত্যাগস্য চ ত্যাগশব্দার্থস্যেত্যেতৎ হৃষীকেশ পৃথক্ ইতরেতরবিভাগং কেশিনিসূদম কেশিনামা কশ্চিৎ অসুরস্তন্নিসূদিতবান্ ভগবান্ বাসুদেবস্তেন তন্নাম্না সম্বোধ্যতেঽর্জ্জুনেন ॥ ১ ॥

### গিরিকৃত টীকা।

পূর্ব্বৈরধ্যায়ৈর্ব্বিস্তরেণ যতস্ততোবিক্ষিপ্ততয়োক্তমর্থং সুখপ্রতিপত্ত্যর্থং সংক্ষেপেণোপসংহৃত্যাভিধাতুমধ্যায়ান্তরমবতারয়তি সর্ব্বস্যৈবেতি। উপসংহৃত্য বক্তব্যইতি সম্বন্ধঃ। কিঞ্চোপনিষৎসু যতস্ততোবিস্তৃতস্য বুদ্ধিসৌকর্য্যার্থমস্মিন্নধ্যায়ে সংক্ষিপ্তাভিধানং কর্ত্তব্যমুপনিষদাং গীতানাঞ্চৈকার্থত্বাদিত্যাহ সর্ব্বশ্চেতি। কথং সর্ব্বোঽপি শাস্ত্রার্থোঽস্মিন্নধ্যাযে সংক্ষিপ্যোপসংহ্রিয়তে তত্রাহ সর্ব্বেষু হীতি। নন্বু বেদার্থশ্চেদশেষতোঽত্র সঞ্জিহীর্ষিতস্তর্হি কিমিতি ত্যাগেনৈকে সন্ন্যাসযোগাদিতি চ বেদার্থৈকদেশবিষয়ং প্রশ্নপ্রতিবচনন্তত্রাহ অর্জুনস্ত্বিতি। পৃথগনয়োস্তত্ত্বং বেদিতুমিচ্ছামীতি বিশেষণাদপৃথগর্থস্তয়োরস্তীতি গম্যতে বুভুৎসিতস্য প্রষ্টব্যত্বাদেকদেশে তদভাবাদুক্তপ্রশ্নোপপত্তিরিতিভাবঃ ॥ ১ ॥

### স্বামিকৃত টীকা।

ন্যাসত্যাগবিভাগেন সর্ব্বগীতার্থসংগ্রহং। স্পষ্টমষ্টাদশে প্রাহ পরমার্থবিনির্ণয়ে। অত্র চ সর্ব্বকর্ম্মাণি মনসা সংন্যস্যাস্তে সুখংবশী। সংন্যাসযোগযুক্তাত্মেত্যাদিষু কর্ম্মসংন্যাস উপদিষ্টস্তথা ত্যক্ত্বা কর্ম্মফলাসঙ্গং নিত্যতৃপ্তোনিরাশ্রয়ঃ সর্ব্বকর্ম্মফলত্যাগং ততঃ কুরু যতাত্মবানিত্যাদিষু চ ফলমাত্রত্যাগেন কর্ম্মানুষ্ঠানমুপদিষ্টং, নচ পরস্পরবিরুদ্ধং সর্ব্বজ্ঞঃ পরমকারুণিকোভগবানুপদিশেৎ' অতঃ কর্ম্মসংন্যাসস্য তদনুষ্ঠানস্য চাবিরোধপ্রকারং

শ্রীভগবানুবাচ—কাম্যানাং কর্ম্মণাং ন্যাসং সন্ন্যাসং কবয়ো বিদুঃ।
সর্ব্বকর্ম্মফলত্যাগং প্রাহুস্ত্যাগং বিচক্ষণাঃ॥ ২॥

## শাঙ্করভাষ্যম্।

তত্র তত্র নির্দ্দিষ্টৌ সন্ন্যাসত্যাগশব্দৌ ন নির্লুণ্ঠিতার্থৌ পূর্ব্বেষধ্যায়েষতোঽর্জ্জুনায় পৃষ্টবতে তন্নির্ণয়ায় ভগবানুবাচ কাম্যেতি। কাম্যানাং অশ্বমেধাদীনাং কর্ম্মণান্ন্যাসম্পরিত্যাগং সন্ন্যাসং সন্ন্যাসশব্দার্থমনুষ্ঠেয়ত্বেন প্রাপ্তস্যানুষ্ঠানং কবয়ঃ পণ্ডিতাঃ কেচিদ্বিদুর্বিজানন্তি নিত্যনৈমিত্তিকানামনুষ্ঠীয়মানানাং সর্ব্বকর্ম্মণামাত্মসম্বন্ধিতয়া প্রাপ্তস্য ফলস্য ত্যাগঃ সর্ব্বকর্ম্মফলত্যাগঃ তমাহুঃ কথয়ন্তি ত্যাগং ত্যাগশব্দার্থং বিচক্ষণাঃ পণ্ডিতাঃ॥ ২॥

## গিরিকৃত টীকা।

ননু পূর্ব্বেষধ্যায়েষু তত্র সংন্যাসত্যাগয়োরুক্তত্বাৎ কিমিতি পুনস্তৌ পৃচ্ছ্যেতে জ্ঞানে তদযোগাৎ তত্রাহ তত্র তত্রেতি। ন নির্লুণ্ঠিতার্থৌ ন নিষ্কৃষ্টার্থৌ ন বিবিক্তার্থাবিত্যর্থঃ। বুভুৎসয়া প্রশ্নস্য প্রবৃত্তত্বাৎ প্রষ্টুরভিপ্রায়ং প্রশ্নেন প্রতিপদ্য ভগবানুত্তরমুক্তবানিত্যাহ অত-ইতি। পক্ষদ্বয়োপন্যাসেন সংন্যাসত্যাগশব্দয়োরর্থভেদং কথয়তি কাম্যানামিতি॥ ২॥

## স্বামিকৃত টীকা।

বুভুৎসুরর্জ্জুন উবাচ সংন্যাসস্যেতি। ভো হৃষীকেশ সর্ব্বেন্দ্রিয়নিয়ামক হে কেশিনিসূদন কেশিনাম্নো মহতো হয়াকৃতের্দৈত্যস্য যুদ্ধে মুখং ব্যাদায় ভক্ষিতুমিচ্ছতোঽত্যন্তং ব্যাত্তমুখে বামবাহুং প্রবেশ্য তৎক্ষণমেব বিবৃদ্ধেন তেনৈব বাহুনা কর্কটিকাফলবত্তং বিদার্য্য নিসূদিতবান, অতএব হে মহাবাহো ইতিসম্বোধনং, সংন্যাসস্য ত্যাগস্য চ তত্ত্বং পৃথক্ বিবেকেন বেদিতুমিচ্ছামি॥ ১॥

অত্রোত্তরং শ্রীভগবানুবাচ কাম্যানামিতি। কাম্যানাং পুত্রকামো যজেত স্বর্গকামো যজেতেত্যাদিকামোপবন্ধেন বিহিতানাং কর্ম্মণাং ন্যাসং পরিত্যাগং সংন্যাসং কবয়োবিদুঃ সম্যক্‌ফলৈঃ সহ কর্ম্মণামপি ন্যাসং সংন্যাসং পণ্ডিতা জানন্তীত্যর্থঃ। সর্ব্বেষাং কাম্যানাং নানাং চ কর্ম্মণাং ফলমাত্রত্যাগং প্রাহুস্ত্যাগং বিচক্ষণা নিপুণাঃ নতু স্বরূপতঃ কর্ম্মত্যাগং। ননু নিত্যনৈমিত্তিকানাং ফলাশ্রবণাদবিদ্যমানস্য ফলস্য কথং ত্যাগঃ স্যাৎ, নহি বন্ধ্যায়াঃ পুত্রত্যাগঃ সংভবতি, উচ্যতে, যদ্যপি স্বর্গকামঃ পশুকামইত্যাদিবৎ অহরহঃ সন্ধ্যামুপাসীত যাবজ্জীবমগ্নিহোত্রং জুহোতীত্যাদিষু ফলবিশেষো ন শ্রূয়তে, তথাপ্যপুরুষার্থে ব্যাপারে প্রেক্ষাবন্তং প্রবর্ত্তয়িতুমশক্নুবন্, বিধির্বিশ্বজিতা যজেতেত্যাদিম্বিব সামান্যতঃ কিমপি ফলমাক্ষিপত্যেব। নচাতীব গুরুমতশ্রদ্ধয়া স্বসিদ্ধিরেব বিধেঃ প্রয়োজনং মন্তব্যং পুরুষপ্রবৃত্ত্যনুপপত্তের্দুষ্পরিহরত্বাৎ। শ্রূয়তে চ নিত্যাদাবপি ফলং সর্ব্বএতে পুণ্যলোকা ভবন্তীতি, কর্ম্মণা পিতৃলোকইতি, ধর্ম্মেণ পাপমপনুদতীত্যাদিষু। তস্মাদযুক্তমুক্তং সর্ব্বকর্ম্ম-

ত্যাজ্যং দোষবদিত্যেকে কর্ম্ম প্রাহুর্ম্মনীষিণঃ।
যজ্ঞদানতপঃকর্ম্ম ন ত্যাজ্যমিতি চাপরে ॥ ৩ ॥

## শাঙ্করভাষ্যম্।

যদি কাম্যকর্ম্মপরিত্যাগঃ ফলপরিত্যাগো বার্থো বক্তব্যঃ সর্ব্বথা পবিত্যাগমাত্রং সন্ন্যাস-ত্যাগশব্দয়োরেকোঽর্থঃ স্যাৎ তদ্ঘটপটশব্দাবিব জাত্যন্তরভূতার্থৌ। ননু নিত্যনৈমিত্তি-কানাং কর্ম্মণাং ফলমেব নাস্তীত্যাহুঃ কথমুচ্যতে তেষাং ফলত্যাগঃ যথা বন্ধ্যায়াঃ পুত্র-ত্যাগো নৈষদোষঃ নিত্যানামপি কর্ম্মণাং ভগবতা ফলবত্ত্বস্যেষ্টত্বাৎ বক্ষ্যতি ভগবান্ অনিষ্ট-

## গিরিকৃত টীকা।

তৎ কিমিদানীং সন্ন্যাসত্যাগশব্দয়োবাত্যন্তিকং ভিন্নার্থত্বন্তথা চ প্রসিদ্ধিবিরোধঃ স্যাদিত্যাশঙ্ক্যাবান্তরভেদেঽপি নাত্যন্তিকভেদোঽস্তীত্যাহ যদীতি। পুত্রভাবাদ্বন্ধ্যায়াস্ত-ত্ত্যাগাযোগবন্নিত্যনৈমিত্তিককর্ম্মণামফলানাং ফলত্যাগানুপপত্তেরুক্তস্ত্যাগশব্দার্থো ন

## স্বামিকৃত টীকা।

ফলত্যাগং প্রাহুস্ত্যাগং বিচক্ষণাইতি। ননু ফলত্যাগে পুনবপি নিষ্ফলেষু কর্ম্মসু প্রবৃত্তি-রেব ন স্যাৎ, তন্ন সর্ব্বেষাং কর্ম্মণাং সংযোগপৃথক্ত্বেন বিবিদিষার্থতয়া বিনিয়োগাৎ। তথা চ শ্রুতিঃ। তমেতমাত্মানং বেদানুবচনেন ব্রাহ্মণাবিবিদিষন্তি যজ্ঞেন দানেন তপসা নাশকেনেতি। ততশ্চ শ্রুতিপদোক্তং সর্ব্বং ফলং বন্ধকত্বেন ত্যক্ত্বা বিবিদিষার্থং সর্ব্বকর্ম্মানুষ্ঠানং ঘটতএব। বিবিদিষা চ নিত্যানিত্যবস্তুবিবেকেন নিবৃত্তদেহাদ্যভিমা-নতয়া বুদ্ধেঃ প্রত্যক্প্রবণতা তাবৎপর্য্যন্তঞ্চ সত্ত্বশুদ্ধ্যর্থং জ্ঞানাবিরুদ্ধং যথোচিতমাবশ্যকং কর্ম্ম কুর্ব্বতস্তৎফলত্যাগএব কর্ম্মত্যাগোনাম ন স্বরূপেণ তথা চ শ্রুতিঃ৮ কুর্ব্বন্নেবেহ কর্ম্মাণি জিজীবিষেচ্ছতং সমাইতি। ততঃ পবস্তু সর্ব্বকর্ম্মনিবৃত্তিঃ স্বতএব ভবতি। তদুক্তং নৈষ্কর্ম্ম্যসিদ্ধৌ, প্রত্যক্প্রবণতাং বুদ্ধেঃ কর্ম্মাণ্যুৎপাদ্য শুদ্ধিতঃ। কৃতার্থা ন্যস্তমায়ান্তি প্রাবৃড়ন্তে ঘনাইব। উক্তঞ্চ ভগবতা 'যস্ত্বাত্মরতিরেব স্যাদিত্যাদি, বশিষ্ঠেন চোক্তং, ন কর্ম্মাণি ত্যজেদ্‌যোগী কর্ম্মভিস্ত্যজ্যতে হ্যসাবিতি। জ্ঞাননিষ্ঠাবিক্ষেপকত্বমালক্ষ্য ত্যজেদ্বা, তদুক্তং শ্রীভাগবতে, তাবৎকর্ম্মাণি কুর্ব্বীত ন নির্ব্বিদ্যেত যাবতা। মৎকথাশ্রবণাদৌ বা শ্রদ্ধা যাবন্ন জায়তে। জ্ঞাননিষ্ঠোবিরক্তোবা মদ্ভক্তোবাঽনপেক্ষকঃ। সলিঙ্গানাশ্র-মাংস্ত্যক্ত্বা চরেদবিধিগোচরইত্যাদি। অলমতিপ্রসঙ্গেন প্রকৃতমনুসরামঃ, অবিতুষঃ ফল-ত্যাগমাত্রমেব ত্যাগশব্দার্থোন কর্ম্মত্যাগইতি ॥ ২ ॥

এতদেব মতান্তরনিরাসেন দ্রঢীকর্ত্তুং মতভেদং দর্শয়তি ত্যাজ্যমিতি। দোষবদ্ধিং সাদিদোষবত্ত্বেন বন্ধকমিতি হেতোঃ সর্ব্বমপি কর্ম্ম ত্যাজ্যমিত্যেকে সাংখ্যাঃ প্রাহুর্ম্মনীষি-

## শাঙ্করভাষ্যম্ ।

মিতি ন তু সন্ন্যাসিনামিতি চ সন্ন্যাসিনামেব হি কেবলং কর্ম্মফলাসম্বন্ধং দর্শয়ন্নসন্ন্যাসিনাং নিত্যকর্ম্মফলপ্রাপ্তির্ভবত্যত্যাগিনাং প্রেত্যেতি দর্শয়তি ত্যাজ্যং দোষেতি । ত্যাজ্যস্ত্যক্তব্যং দোষবৎ দোষোঽস্যাস্তীতি দোষবৎ কিং তৎ কর্ম্ম বন্ধহেতুত্বাৎ সর্ব্বমেব অথবা দোষোযথা রাগাদিস্ত্যজ্যতে তথা ত্যাজ্যমিত্যেকে কর্ম্ম প্রাহুর্ম্মনীষিণঃ পণ্ডিতাঃ সাঙ্খ্যাদিদৃষ্টিমাশ্রিতা অধিকৃতানাম্ভ কর্ম্মিণামপীতি । তত্রৈব যজ্ঞদানতপঃকর্ম্ম ন ত্যাজ্যমিতি চাপরে কর্ম্মিণএবাধি কৃতাস্তানপেক্ষ্যেতে বিকল্পাঃ নতু জ্ঞাননিষ্ঠান্ ব্যুত্থাপিনঃ সন্ন্যাসিনোঽপেক্ষ্য জ্ঞানযোগেন

## গিরিকৃত টীকা ।

সিধ্যতীতি শঙ্কতে নস্বিতি । নিত্যনৈমিত্তিককর্ম্মফলস্য বন্ধ্যাপুত্রসাদৃশ্যাভাবাত্তত্ত্যাগসম্ভবাত্তুক্তস্ত্যাগশব্দার্থঃ সম্ভবতীতি সমাধত্তে নৈষ দোষইতি । ভগবতা তেষাং ফলবত্তমিষ্টমিত্যত্র বাক্যশেষমনুকূলয়তি বক্ষ্যতীতি । তর্হি সন্ন্যাসিনামসন্ন্যাসিনাঞ্চ নিত্যাদ্যনুষ্ঠায়িনামবিশেষেণ তৎফলং স্যাদিতি চেন্নৈবেত্যাহ ন ত্বিতি । বক্ষ্যতীত্যনুকর্ষণঞ্চকারার্থঃ । প্রসক্তস্য বচসোঽর্থং প্রকৃতোপযোগিত্বেন সংগৃহ্য স্মারয়তি সন্ন্যাসিনামিতি । কাম্যানি বর্জ্জয়িত্বা নিত্যনৈমিত্তিকানি ফলাভিলাষাদৃতে কর্ত্তব্যানীত্যুক্তং পক্ষং প্রতিপক্ষনিরাসেন দ্রঢ়য়িতুং বিপ্রতিপত্তিমাহ ত্যাজ্যমিতি । কর্ম্মণঃ সর্ব্বস্য দোষবত্বে হেতুমাহ বন্ধেতি । দোষবদিত্যেতদ্দৃষ্টান্তত্বেন ব্যাচষ্টে অথবেতি । কর্ম্মণ্যনধিকৃতানামকর্ম্মিণামেব কর্ম্ম ত্যাজ্যং কর্ম্মিণাস্তত্ত্যাগে প্রত্যবায়াদিত্যাশঙ্ক্যাহ অধিকৃতানামিতি । নহি তেষামপি কর্ম্মত্যজতাং প্রত্যবায়োহিংসাদিযুক্তস্য কর্ম্মণোঽনুষ্ঠানে পরংপ্রত্যবায়াদিতি ভাবঃ,সাঙ্খ্যাদিপক্ষসমাপ্তাবিতিশব্দঃ । মীমাংসকপক্ষমাহ তত্রৈবেতি । কর্ম্মাধিকৃতেষেবেতি যাবৎ, কর্ম্ম নিত্যং নৈমিত্তিকঞ্চ । কাম্যানাং কর্ম্মণামিত্যারভ্য শ্লোকাভ্যাং কর্ম্মিণোঽধিকৃতাননধিকৃতাংশ্চাপেক্ষ্য দর্শিতবিকল্পানাং প্রবৃত্তিরিত্যাশঙ্ক্যাহ কর্ম্মিণ ইতি । এবকারব্যবচ্ছেদ্যমাহ নস্বিতি । তদেব স্ফুটয়তি জ্ঞানেতি । কর্ম্মাধিকৃতানাং জ্ঞাননিষ্ঠাতোবিভক্তনিষ্ঠাবত্বেন পূর্ব্বোক্তানামপি শাস্ত্রার্থোপসংহারে পুনর্ব্বিচার্য্যত্ববজ্জাতনিষ্ঠানামপি বিচার্য্যত্বমত্যাবিরুদ্ধমিতি শঙ্কতে নস্বিতি । সাঙ্খ্যানাং পরমার্থজ্ঞাননিষ্ঠানাং নাত্র বিচার্য্যতেত্যুত্তরমাহ ন তেষামিতি । নম্বু তেষামপি স্বাত্মনি ক্লেশদুঃখাদিপশ্যতাস্তদনুরোধেন রাজসকর্ম্ম-

## স্বামিকৃত টীকা ।

ণইতি । অস্যায়ং ভাবঃ, মা হিংস্যাৎ সর্ব্বা ভূতানীতি নিষেধঃ 'পুরুষস্যানর্থহেতুর্হিংসেত্যাহ অগ্নীষোমীয়ং পশুমালভেতেত্যাদি প্রাকরণিকোবিধিস্ত হিংসায়াঃ ক্রতূপকারকত্বমাহ' অতোভিন্নবিষয়ত্বেন সামান্যবিশেষন্যায়াগোচরত্বাৎ দ্রব্যসাধ্যেষু সর্ব্বেষপি কর্ম্মসু হিংসাদেঃ সম্ভবাৎ সর্ব্বমপি কর্ম্ম ত্যাজ্যমেবেতি । তদুক্তং, দৃষ্টবদানুশ্রবিকঃ সহ্যবিশুদ্ধি-

## শাঙ্করভাষ্যম্।

সাঙ্খ্যানাং নিষ্ঠাময়া পুরা প্রোক্তাইতি কর্ম্মাধিকারাদপাবৃত্তা যে ন তান্ প্রতিবিহিতা চিন্তা, নন্থ কর্ম্মযোগেন যোগিনামিতি অধিকৃতাঃ পূর্ব্বং বিভক্তনিষ্ঠাঅপীহ সর্ব্বশাস্ত্রোপসংহারপ্রকরণে যথা বিচার্য্যন্তে তথা সাঙ্খ্যাঅপি জ্ঞাননিষ্ঠা বিচার্য্যন্তামিতি ন তেষাং মোহক্লেশদুঃখনিমিত্তত্যাগানুপপত্তেন কায়ক্লেশনিমিত্তানি দুঃখানি সাঙ্খ্যা আত্মনিপশ্যন্তি ইচ্ছাদীনাং ক্ষেত্রধর্ম্মত্বেনৈব দর্শিতত্বাৎ অতস্তেন কায়ক্লেশদুঃখভাবাৎ কর্ম্ম পরিত্যজন্তি নাপি তে কর্ম্মাণ্যাত্মনি পশ্যন্তি যেন নিয়তং কর্ম্ম মোহাৎ পরিত্যজেয়ুর্গুণানাং কর্ম্ম নৈব কিঞ্চিৎকরোমীতিহি তে সন্ন্যস্যন্তি সর্ব্বকর্ম্মাণি মনসা সন্ন্যস্যেত্যাদিভির্হি তত্ত্ববিদঃ সন্ন্যাসপ্রকার উক্তস্তস্মাদেষেহন্যেহধিকৃতাঃ কর্ম্মণ্যনাত্মবিদো যেষাঞ্চ মোহাৎ ত্যাগঃ সম্ভবতি কায়ক্লেশভয়াচ্চ ত এব তামসাস্ত্যাগিনোরাজসাশ্চেতি নিন্দ্যন্তে কর্ম্মিণামনাত্মজ্ঞানাংকর্ম্মফলত্যাগস্তুত্যর্থংসর্ব্বারম্ভপরিত্যাগী মৌনী সন্তুষ্টো যেন কেনচিদনিকেতঃ স্থিরমতিরিতি গুণাতীতলক্ষণে চ পরমার্থসন্ন্যাসিনোবিশেষিতত্বাৎ, বক্ষ্যতি চ জ্ঞানস্য যা পরা নিষ্ঠেতি তস্মাৎ জ্ঞাননিষ্ঠাঃ সন্ন্যাসি-

## গিরিকৃত টীকা।

ত্যাগসিদ্ধের্ব্বিচার্য্যত্বং নেত্যাহ ন কায়েতি। তত্র ক্ষেত্রাধ্যায়োক্তং হেতুং করোতি ইচ্ছাদীনামিতি। স্বাত্মনি সাঙ্খ্যাদীনাং ক্লেশাদ্যপ্রতিপত্তৌ ফলিতমাহ অত ইতি। নন্থ তেষামপি স্বাত্মনি ক্লেশদুঃখাদি পশ্যতাস্তদনুরোধেন র.জসকর্ম্মত্যাগসিদ্ধের্ব্বিচার্য্যত্বং নেত্যাহ ন কায়েতি। তত্র ক্ষেত্রাধ্যায়োক্তং হেতুং করোতি ইচ্ছাদীনামিতি। স্বাত্মনি সাঙ্খ্যাদীনাং ক্লেশাদ্যপ্রতিপত্তৌ ফলিতমাহ অত ইতি। নন্থ তেষাং ক্লেশাদ্যদর্শনেহপি স্বাত্মনি কর্ম্মাণি পশ্যতাস্তত্যাগোযুক্তস্তেষাং কায়ক্লেশাদিকরত্বান্নেত্যাহ নাপীতি। অজ্ঞানান্মোহমাহাত্ম্যাৎ নিয়তমপি কর্ম্ম ত্যক্তুংশক্যংন তত্ত্ববিদাং স্বাত্মনি কর্ম্মাদর্শনে ত্যাগে হেত্বভাবাদিতি মত্বাহ মোহাদিতি। কথং তর্হি তেষামাত্মনি কর্ম্মাণ্যপশ্যতাং প্রাপ্তভাবে তত্ত্যাগঃ সন্ন্যাসস্তত্রাহ গুণানামিতি। অবিবেকপ্রাপ্তানাং কর্ম্মণাং ত্যাগস্তত্ত্ববিদামিত্যুক্তং স্মারয়ন্নপ্রাপ্তপ্রতিষেধং প্রত্যাদিশতি সর্ব্বেতি। তত্ত্ববিদামত্রাবিচার্য্যত্বে ফলিতমাহ তস্মাদিতি। যেনাত্মবিদস্তত এবেত্যুত্তরত্র সম্বন্ধঃ। কর্ম্মণ্যধিকৃতানামনাত্মবিদাং কর্ম্মত্যাগসম্ভাবনাং দর্শয়তি যেষাঞ্চেতি। তন্নিন্দা কুত্রোপযুক্তেত্যাশঙ্ক্যাহ কর্ম্মিণামিতি। কিঞ্চ পরমার্থসন্ন্যাসিনাং প্রশস্তত্বোপলম্ভান্ন নিন্দাবিষয়ত্বমিত্যাহ সর্ব্বেতি। কিঞ্চাত্রাপি সিদ্ধিং প্রাপ্তো যথেত্যাদিনা জ্ঞাননিষ্ঠায়া বক্ষ্যমাণত্বাত্তদ্বতামেহ বিচার্য্যতেত্যাহ বক্ষ্যতীতি। কর্ম্মাধিকৃতানামেবাত্র বিবক্ষিতত্বাৎ ন জ্ঞাননিষ্ঠানামিত্যুপসংহরতি তস্মাদিতি। নন্থ সন্ন্যাসশব্দেন সর্ব্বকর্ম্মসন্ন্যাসস্য প্রাপ্তত্বাত্তথাবিধসন্ন্যাসিনামিহ বিবক্ষিতত্বং প্রতিভাতি তত্রাহ কর্ম্মেতি। সন্ন্যাসশব্দেন মুখ্যস্যৈব সন্ন্যাসস্য গ্রহণদ্গৌণমুখ্যয়োর্ম্মুখ্যে সংপ্রত্যয়াদন্যথা তদসম্ভবে

## শাঙ্করভাষ্যম্ ।

নোনেহ বিবক্ষিতাঃ কর্ম্মফলত্যাগএব সাত্ত্বিকত্বেন গুণেন তামসত্বাদ্যপেক্ষয়া সন্ন্যাসউচ্যতে ন মুখ্যঃ সর্ব্বকর্ম্মসন্ন্যাসঃ সর্ব্বকর্ম্মসন্ন্যাসাসম্ভবে চ ন হি দেহভৃতেতি হেতুবচনান্মুখ্যএবেতি চেন্ন হেতুবচনস্য স্তুত্যর্থত্বাৎ যথা ত্যাগাচ্ছান্তিরনন্তরমিতি কর্ম্মফলত্যাগস্তুতিরেব যথোক্তা-নেকপক্ষানুষ্ঠানাশক্তিমতঃ অর্জ্জুনং প্রতিবিধানাৎ তথেদমপি নহি দেহভৃতা শক্যমিতিকর্ম্ম-ফলত্যাগস্তুত্যর্থং ন সর্ব্বাণি মনসা সন্ন্যস্য নৈব কুর্ব্বন্ন কারয়ন্নাস্তে ইত্যস্য পক্ষস্যা-পবাদঃ কেনচিদ্দর্শয়িতুং শক্যস্তস্মাৎ কর্ম্মণ্যধিকৃতান্ প্রত্যেবৈষ সন্ন্যাসত্যাগবিকল্পঃ যে তু পরমার্থদর্শিনঃ সাঙ্খ্যাস্তেষাং জ্ঞাননিষ্ঠায়ামেব সর্ব্বকর্ম্মসন্ন্যাসলক্ষণায়ামধিকারোনান্য-ত্রেতি ন তে বিকল্পার্হাস্তথোপপাদিতমস্মাভির্ব্বেদাবিনাশিনমিত্যস্মিন্ প্রদেশে তৃতী-য়াদৌ চ ॥ ৩ ॥

## গিরিকৃত টীকা ।

হেতুক্তিবৈয়র্থ্যাদপ্রাপ্তপ্রতিষেধাদিতিশঙ্কতে সর্ব্বেতি। নেদং হেতুবচনং সর্ব্ব কর্ম্মসন্ন্যা-সাসম্ভবসাধকং কর্ম্মফলত্যাগস্তুতিপরত্বাদিতি পরিহরতি নেত্যাদিনা। এতদেব দৃষ্টান্তেন স্পষ্টয়তি যথেতি। দৃষ্টান্তেঽপি যথাশ্রুতার্থত্বং কিং ন স্যাদিত্যাশঙ্ক্যাহ যথোক্তেতি। নহি ফলত্যাগাদেব জ্ঞানং বিনা মুক্তির্যুক্তা মুক্তের্জ্ঞানৈকাধীনত্বসাধকশ্রুতিস্মৃতিবিরোধাদদ্বে ষ্টেত্যাদিনা চানন্তরমেব জ্ঞানশাধনবিধানানর্থক্যাদত্যাগস্তুতিরেবাত্র গ্রাহ্যেত্যর্থঃ। দৃষ্টান্ত-গতমর্থং দার্ষ্টান্তিকে যোজয়তি তথেতি। প্রাগুক্তপক্ষাপবাদবিবক্ষয়া হেতুক্তের্মুখ্যার্থত্ব-মেব কিং ন স্যাদিত্যাশঙ্ক্য তদপবাদে হেত্বভাবান্নৈবমিত্যাহ ন সর্ব্বেতি। নচেয়মেব হেতু-ক্তিস্তদপবাদিকাস্তথাসিদ্ধেরুক্তত্বাদিতিভাবঃ। মুখ্যসন্ন্যাসাপবাদাসম্ভবে সন্ন্যাসত্যাগবি-কল্পস্য কথং সাবকাশতেত্যাশঙ্ক্যাহ তস্মাদিতি। জ্ঞাননিষ্ঠাম্ প্রত্যুক্তবিকল্পানুপপত্তৌ কুত্র তেষামধিকারস্তত্রাহ যে ত্বিতি। সন্ন্যাসিনাং বিকল্পানর্হত্বেন জ্ঞাননিষ্ঠায়ামেবাধিকারস্য ভূয়ঃসু প্রদেশেষু সাধিতত্বান্ন সাধনীয়ত্বাপেক্ষেত্যাহ তথেতি ॥ ৩ ॥

## স্বামিকৃত টীকা ।

ক্ষয়াতিশয়যুক্তইতি। অপরে তু মীমাংসকা যজ্ঞাদিকং কর্ম্ম ন ত্যাজ্যমেবেতি প্রাহুঃ। অয়ং ভাবঃ, ক্রত্বর্থাপি সতীয়ং হিংসা পুরুষেণ কর্ত্তব্যা'সা চান্যোদ্দেশেনাপি কৃতা পুরুষস্য প্রত্যবায়হেতুরেব' তথাহি বিধির্ব্বিধেয়স্য তদুদ্দেশেনানুষ্ঠানং বিধত্তে তাদর্থ্যলক্ষণত্বাত্তচ্ছে-যস্য, নত্বেবং নিষেধোনিষেধ্যস্য তাদর্থ্যমপেক্ষতে প্রাপ্তিমাত্রাপেক্ষ্যত্বাৎ' অন্যথা অজ্ঞান-প্রমাদাদিকৃতে দোষাভাবপ্রসঙ্গাৎ, তদেবং সমানবিষয়ত্বেন সামান্যশাস্ত্রস্য বিশেষেণ বাধা নাস্তি দোষবত্বং'অতোনিত্যং যজ্ঞাদি কর্ম্ম ন ত্যাজ্যমিতি ॥ ৩ ॥

নিশ্চয়ং শৃণু মে তত্র ত্যাগে ভরতসত্তম।
ত্যাগো হি পুরুষব্যাঘ্র ত্রিবিধঃ সংপ্রকীর্ত্তিতঃ॥ ৪॥
যজ্ঞদানতপঃকর্ম্ম ন ত্যাজ্যং কার্য্যমেব তৎ।
যজ্ঞো দানং তপশ্চৈব পাবনানি মনীষিণাম্॥ ৫॥

## শাঙ্করভাষ্যম্।

তত্রৈতেষু বিকল্পভেদেষু নিশ্চয়মিতি নিশ্চয়ং শৃণু অবধারয় মে মম বচনাৎ তত্র ত্যাগে ত্যাগসন্ন্যাসবিকল্পে যথা দর্শিতে ভরতসত্তম ভরতানাং সাধুতম ত্যাগোহি ত্যাগসন্ন্যাসশব্দবাচ্যোহি যোহর্থঃ সএকএবেত্যভিপ্রেত্যাহ ত্যাগোহীতি। পুরুষব্যাঘ্র ত্রিবিধস্ত্রিপ্রকারস্তামসাদিপ্রকারৈঃ সংকীর্ত্তিতঃ শাস্ত্রেষু সম্যক্ কথিতঃ যস্মাত্তামসাদিভেদেন ত্যাগসন্ন্যাসশব্দবাচ্যোঽধিকৃতস্ত কর্ম্মিণোঽনাত্মজ্ঞস্য ত্রিবিধঃ সম্ভবতি ন পরমার্থদর্শিনইত্যয়মর্থোদুর্জ্ঞানস্তস্মাৎ অত্র তত্ত্বনান্যো বক্তুং সমর্থস্তস্মান্নিশ্চয়ং পরমার্থশাস্ত্রার্থবিষয়মধ্যবসায়মৈশ্বরং মে মমশৃণু॥ ৪॥

কঃ পুনরসৌ নিশ্চয়ইত্যাহ যজ্ঞইতি। যজ্ঞোদানস্তপইত্যেতত্ত্রিবিধং কর্ম্ম ন ত্যাজ্যং

## গিরিকৃত টীকা।

কর্ম্মাধিকৃতান্ প্রত্যেবোক্তবিকল্পপ্রবৃত্তাবপি কুতো নির্দ্ধারণসিদ্ধিস্তত্রাহ তথেতি। তমেব নিশ্চয়ং দর্শয়িতুমাদৌ ত্যাগগতমবান্তরবিভাগমাহ ত্যাগোহীতি। নন্থ ত্যাগসন্ন্যাসয়োরুভয়োরপি প্রকৃতত্বাবিশেষে ত্যাগস্যৈবাবান্তরবিভাগাভিধানে সন্ন্যাসস্যাপেক্ষিকত্বমাপদ্যেত নেত্যাহ ত্যাগোহীতি। সাত্ত্বিকোরাজসস্তামসশ্চেত্যুক্তেঽর্থে ত্রৈবিধ্যেঽপি স্বয়মেব নিশ্চয়সম্ভবোক্তিমত্র ভাগবতেন নিশ্চয়েনেত্যাশঙ্ক্যাহ যস্মাদিতি। ভগবতোঽন্যেনোক্তবিভাগে তত্ত্বানিশ্চয়াদ্ভাগবত নিশ্চয়স্য শ্রোতব্যতেতি নিগময়তি তস্মাদিতি॥ ৪॥

তমেব ভগবতোনিশ্চয়ং বিশেষতোনির্দ্ধারয়িতুং প্রশ্নপূর্ব্বকমনন্তরশ্লোকপ্রবৃত্তিং দর্শয়তি

## স্বামিকৃত টীকা।

এবং মতভেদমুপন্যস্য স্বমতং কথয়িতুমাহ নিশ্চয়ং শৃণ্বিতি। তত্রৈবং বিপ্রতিপন্নে ত্যাগে নিশ্চয়ং মে বচনাচ্ছৃণু, ত্যাগস্য লোকপ্রসিদ্ধত্বাৎ কিমত্র শ্রোতব্যমিতি মাবমংস্থাইত্যাহ হে পুরুষব্যাঘ্র পুরুষশ্রেষ্ঠ ত্যাগোহি দুর্ব্বোধঃ হি যস্মাদয়ং কর্ম্মত্যাগস্তত্ত্ববিস্তিস্তামসাদিভেদেন ত্রিবিধঃ সম্যগ্বিবেকেন প্রবর্ত্তিতঃ, ত্রৈবিধ্যঞ্চ নিয়তস্য তু সন্ন্যাসঃ কর্ম্মণ ইত্যাদিনা বক্ষ্যতি॥ ৪॥

প্রথমং তাবন্নিশ্চয়মাহ যজ্ঞেতি দ্বাভ্যাং। মনীষিণাং বিবেকিনাং পাবনানি চিত্তশুদ্ধিকরাণি॥ ৫॥

এতান্যপি তু কর্ম্মাণি সঙ্গং ত্যক্ত্বা ফলানি চ।
কর্ত্তব্যানীতি মে পার্থ নিশ্চিতং মতমুত্তমম্ ॥ ৬॥

## শাঙ্করভাষ্যম্।

ন ত্যক্তব্যং কার্য্যং করণীয়মেব তৎ কস্মাৎ যজ্ঞো দানং তপশ্চৈব পাবনানি বিশুদ্ধিকারণানি মনীষিণাং ফলানভিসন্ধীনামিত্যেতৎ ॥ ৫ ॥

এতান্যপীতি। এতান্যপি তু কর্ম্মাণি যজ্ঞদানতপাংসি পাবনান্যুক্তানি সঙ্গমাসক্তিস্তেষু ত্যক্ত্বা ফলানি চ তেষাং পরিত্যজ্য কর্ত্তব্যানীতি অনুষ্ঠেয়ানীতি মে মম নিশ্চিতং মতমুত্তমং নিশ্চয়ং শৃণু মে তত্রেতি প্রতিজ্ঞায় পাবনত্বং চ সহেতুমুক্ত্বা এতান্যপি কর্ম্মাণি কর্ত্তব্যানীত্যেতন্নিশ্চিতং মতং অনুত্তমমিতি প্রতিজ্ঞাতার্থোপসংহারএব নাপূর্ব্বার্থং বচনমেতান্যপীতি প্রকৃতসন্নিকৃষ্টার্থতোপপত্তেঃ সাসঙ্গস্য ফলার্থিনো বন্ধহেতূন্যেতান্যপি কর্ম্মাণি মুমুক্ষোঃ কর্ত্তব্যানীতি অপিশব্দস্যার্থঃ নত্বত্যাগি কর্ম্মাণ্যপেক্ষ্যৈতান্যপীত্যুচ্যন্তে। অন্যে বর্ণয়ন্তি নিত্যানাং কর্ম্মণাং ফলাভাবাৎ সঙ্গং ত্যক্ত্বা ফলানি চেতি নোপপদ্যতে। এতান্যপীতি যানি কাম্যানি কর্ম্মাণি নিত্যেভ্যোঽন্যানি এতানি অপি কর্ত্তব্যানি কিমুত যজ্ঞদানতপাংসি নিত্যানি ইতি তদসৎ নিত্যানামপি কর্ম্মণাং ফলবত্ত্বস্যোপপাদিতত্বাৎ যজ্ঞো দানং তপশ্চৈব পাবনানী-

## গিরিকৃত টীকা।

কঃ পুনরিতি। যজ্ঞাদীনাং কর্ত্তব্যত্বে হেতুমাহ যজ্ঞ ইতি। ন কেবলং ন ত্যাজ্যং কিন্তু কর্ত্তব্যমেবেত্যাহ কার্য্যমিতি। প্রতিজ্ঞামেবং বিভজ্য হেতুং বিভজতে কস্মাদিতি ॥ ৫ ॥

প্রতিজ্ঞাতমর্থমুপসংহরতি এতান্যপীতি। উপসংহারশ্লোকাক্ষরাণি ব্যাকরোতি এতানীত্যাদিনা। অক্ষরার্থমুক্ত্বা তাৎপর্য্যার্থমাহ নিশ্চয়মিতি। প্রকৃতার্থোপসংহারে গমকমাহ এতান্যপীতি। অপিশব্দস্য বিবক্ষিতমর্থং দর্শয়তি সাসঙ্গস্যেতি। ব্যাবর্ত্ত্যং কীর্ত্তয়তি ন ত্বিতি। এতান্যপীত্যাদিবাক্যং ন নিত্যকর্ম্মবিষয়মিতি মতমুপন্যস্যতি অন্যইতি ন চেদিদন্নিত্যকর্ম্মবিষয়ং কিংবিষয়ন্তর্হি ইত্যাশঙ্ক্য বাক্যমবতার্য্য ব্যাকরোতি এতানীত্যাদিনা। নিত্যানামফলত্বমুপেত্য যচ্চোদ্যন্তদযুক্তমিতি দূষয়তি তদসদিতি। যত্তু কাম্যান্যপি কর্ত্তব্যানীতি তন্নিরস্যতি নিত্যান্যপীতি। কিঞ্চ কাম্যানাং ভগবতা নিন্দিতত্বান্নতেষু মুমুক্ষোরনুষ্ঠানমিত্যাহ দূরেণেতি। কিঞ্চ মুমুক্ষোরপেক্ষিতমোক্ষাপেক্ষয়া বিরুদ্ধফল-

## স্বামিকৃত টীকা।

যেন প্রকারেণ কৃতান্যেতানি পাবনানি ভবন্তি তৎ প্রকারং দর্শয়ন্নাহ এতান্যপীতি যানি যজ্ঞাদীনি কর্ম্মাণি ময়া পাবনানীত্যুক্তান্যেতান্যপ্যেবং কর্ত্তব্যানি কথং, সঙ্গং কর্ত্তৃত্বাভিনিবেশং ত্যক্ত্বা কেবলমীশ্বরাধীনতয়া কর্ত্তব্যানি, ফলানি চ ত্যক্ত্বা কর্ত্তব্যানীতি মে মতং নিশ্চিতং অতএবোত্তমং ॥ ৬ ॥

নিয়তস্য তু সন্ন্যাসঃ কর্ম্মণো নোপপদ্যতে।
মোহাত্তস্য পরিত্যাগস্তামসঃ পরিকীর্ত্তিতঃ ॥ ৭ ॥

## শাঙ্করভাষ্যম্।

ত্যাদিবচনেন নিত্যান্যপি কর্ম্মাণি বন্ধহেতুত্বাশঙ্কয়া জিহাসোর্মুমুক্ষোঃ কুতঃকাম্যেষু প্রসঙ্গ দূরেণ হ্যবরঙ্কর্ম্মেতি চ নিন্দিতত্বাৎ যজ্ঞার্থাৎ কর্ম্মণোঽন্যত্রেতি চ কাম্যকর্ম্মণাং বন্ধহেতুত্বস্য নিশ্চিতত্বাৎ ত্রৈগুণ্যবিষয়া বেদাস্ত্রৈবিদ্যা মাং সোমপাঃ ক্ষীণে পুণ্যে মর্ত্তলোকং বিশন্তীতি চ দূরব্যবহিতত্বাচ্চ ন কাম্যেষেতান্যপীতি ব্যপদেশঃ ॥ ৬ ॥

তস্মাদজ্ঞস্যাধিকৃতস্য মুমুক্ষোঃ নিয়তস্যেতি নিয়তস্য তু নিত্যস্য সন্ন্যাসঃ পরিত্যাগঃ কর্ম্মণো নোপপদ্যতে অজ্ঞস্য পাবনত্বস্যেষ্টত্বাৎ মোহাদজ্ঞানাত্তস্য নিয়তস্য পরিত্যাগো নিয়তঞ্চাবশ্যং কর্ত্তব্যং ত্যজ্যতে চেতি বিপ্রতিষিদ্ধমতো মোহনিমিত্তঃ পরিত্যাগস্তামসঃ পরিকীর্ত্তিতো মোহশ্চ তমইতি ॥ ৭ ॥

---

## গিরিকৃত টীকা।

বত্বাৎ কাম্যকর্ম্মণাং ন তেষু তস্যানুষ্ঠানমিত্যাহ যজ্ঞার্থাদিতি। কাম্যানাং বন্ধহেতুত্বং নিশ্চিতমিত্যত্রৈব পূর্ব্বোত্তরবাক্যানুকূল্যং দর্শয়তি ত্রৈগুণ্যেতি। কিঞ্চ পূর্ব্বশ্লোকে যজ্ঞাদিনিত্যকর্ম্মণাং প্রকৃতত্বাদেতচ্ছব্দেন সন্নিহিতবাচিনা পরামর্শাৎ কাম্যকর্ম্মণাঞ্চ কাম্যানাং কর্ম্মণামিতি ব্যবহিতানাং সন্নিহিতপরামর্শকৈতচ্ছব্দাবিষয়ত্বান্ন কাম্যকর্ম্মাণ্যেতান্যপীতি ব্যপদেশমর্হন্তীত্যাহ দূরেতি ॥ ৬ ॥

নিত্যকর্ম্মণামবশ্যকর্ত্তব্যত্বমুক্তমুপজীব্যাপেক্ষিতং পূরয়ন্ননন্তরশ্লোকমবতারয়তি তস্মাদিতি। নমু কশ্চিন্নিয়তমপি কর্ম্ম ত্যজন্নুপলভ্যতে তত্রাহ মোহাদিতি। অজ্ঞানং পাবনত্বাপরিজ্ঞানং অজ্ঞস্য নিত্যকর্ম্মত্যাগো মোহাদিত্যেতদুপপাদয়তি নিয়তঞ্চেতি। নিত্যকর্ম্মত্যাগস্য মোহকৃতত্বে কুতস্তামসত্বমিত্যাশঙ্ক্যাহ মোহশ্চেতি ॥ ৭ ॥

ইতশ্চ নিত্যকর্ম্মত্যাগো নাজ্ঞস্য সম্ভবতীত্যাহ কিঞ্চেতি। নমু মোহং বিনৈব দুঃখাত্মকং কর্ম্ম কায়ক্লেশভয়াত্ত্যজতি করণানি হি কার্য্যং জনয়ন্তি শ্রাম্যন্তি তথাচ ন তত্ত্যাগস্তামসো যুক্তস্তত্রাহ দুঃখমিত্যেবেতি। যৎ কর্ম্ম দুঃখাত্মকমশক্যসাধ্যমিত্যেবালোচ্য তন্নি-

## স্বামিকৃত টীকা।

প্রতিজ্ঞাতং ত্যাগত্রৈবিধ্যমিদানীং দর্শয়তি নিয়তস্যেতি ত্রিভিঃ। কাম্যস্য কর্ম্মণো বন্ধকত্বাৎ সংন্যাসো যুক্তঃ নিয়তস্য তু নিত্যস্য পুনঃ কর্ম্মণঃ সংন্যাসস্ত্যাগো নোপপদ্যতে সত্ত্বশুদ্ধিদ্বারা মোক্ষহেতুত্বাৎ অতস্তস্য পরিত্যাগ উপাদেয়ত্বেঽপি ত্যাজ্যমিত্যেবংলক্ষণান্মোহাদেব ভবেৎ স চ মোহস্য তামসত্বাত্তামসঃ পরিকীর্ত্তিতঃ ॥ ৭ ॥

দুঃখমিত্যেব যৎ কর্ম্ম কায়ক্লেশভয়াত্ত্যজেৎ।
স কৃত্বা রাজসং ত্যাগং নৈব ত্যাগফলং লভেৎ ॥ ৮ ॥
কার্য্যমিত্যেব যৎ কর্ম্ম নিয়তং ক্রিয়তেঽর্জ্জুন।
ত্যক্ত্বা সঙ্গং ফলঞ্চৈব স ত্যাগঃ সাত্ত্বিকো মতঃ ॥ ৯ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ দুঃখমিতি দুঃখমিত্যেব যৎ কর্ম্ম কায়ক্লেশভয়াৎ শরীরদুঃখভয়াত্ত্যজেৎ স কৃত্বা রাজসং রজোনির্ব্বর্ত্ত্যং ত্যাগং নৈব ত্যাগফলং জ্ঞানপূর্ব্বকস্য সর্ব্বকর্ম্মত্যাগস্য ফলং মোক্ষাখ্যং ন লভেন্নৈব লভতে ॥ ৮ ॥

কঃ পুনঃ সাত্ত্বিকস্ত্যাগঃ কার্য্যমিতি কার্য্যং কর্ত্তব্যমিত্যেব যৎ কর্ম্ম নিয়তং নিত্যং ক্রিয়তে নির্ব্বর্ত্ত্যতে হে অর্জ্জুন সঙ্গং ফলঞ্চ এব নিত্যানাং কর্ম্মণাং ফলবত্ত্বে ভগবদ্বচনং প্রমাণমবোচামাথ বা যদ্যপি ফলং ন শ্রূয়তে নিত্যস্য কর্ম্মণস্তথাপি নিত্যং কর্ম্ম কৃতমাত্ম-সংস্কারং প্রত্যবায়পরিহারং বা ফলং করোত্যাত্মন ইতি কল্পয়ত্যেবাজ্ঞস্তত্র তামপি কল্পনাং নিবারয়তি ফলং ত্যক্ত্বেত্যনেনাতঃ সাধুক্তং সঙ্গং ত্যক্ত্বা ফলঞ্চেতি স ত্যাগো নিত্যকর্ম্মসু সঙ্গফলপরিত্যাগঃ সাত্ত্বিকঃ সত্ত্বনির্ব্বৃত্তো মতোঽভিমতঃ ॥ ৯ ॥

---

## গিরিকৃত টীকা।

র্ব্বর্ত্ত্যতে দেহস্যেন্দ্রিয়াণাঞ্চ ক্লেশাত্মনো ভয়াত্ত্যজতি স তত্ত্যক্ত্বা রজোনিমিত্তং ত্যাগং কৃত্বাপি ন তৎফলং মোক্ষং লভতে কিন্তু কৃতেনৈব রাজসেন ত্যাগেন তদনুরূপং নরকং প্রতিপদ্যে-তেত্যাহ দুঃখমিত্যেবেত্যাদিনা। কর্ম্মত্যাগস্তামসো রাজসশ্চেতি দ্বিবিধো দর্শিতঃ ॥ ৮ ॥

সম্প্রতি সাত্ত্বিকং ত্যাগং প্রশ্নপূর্ব্বকং বর্ণয়তি কঃপুনরিতি। কর্ত্তব্যমিত্যেবেত্যেবকা-রেণ নিত্যস্য ভাব্যান্তরং নিষিধ্যতে। নিত্যানাং বিধ্যুদ্দেশে ফলাশ্রবণাৎ তেষাং ফলং ত্যক্ত্বেত্যযুক্তমিত্যাশঙ্ক্যাহ নিত্যানামিতি। ফলং ত্যক্ত্বেত্যস্য বিধান্তরেণ তাৎপর্য্যমাহ অথবেতি। নহি বিধিনা কৃতং কর্ম্ম অনর্থকং বিদ্যানর্থক্যাত্তেন শ্রৌতফলাভাবেঽপি নিত্যং কর্ম্ম বিধিতোঽনুতিষ্ঠন্নাত্মানমজ্ঞানন্নরূপহতমনন্তোক্ত্যা তস্মিন্ কর্ম্মণ্যাত্মসংস্কারং ফলং কল্প-

## স্বামিকৃত টীকা।

রাজসং ত্যাগমাহ দুঃখমিত্যেবং মত্বা শরীরায়াসভয়ান্নিত্যং কর্ম্ম ত্যজেদিতি যস্তাদৃশ-স্ত্যাগো রাজসো দুঃখস্য রাজসত্বাৎ অতস্তং রাজসং ত্যাগং কৃত্বা স রাজসঃ পুরুষস্ত্যাগফলং জ্ঞাননিষ্ঠালক্ষণং নৈব লভতইত্যর্থঃ ॥ ৮ ॥

সাত্ত্বিকং ত্যাগমাহ কার্য্যমিতি। কার্য্যমিত্যেব বুদ্ধ্যা নিয়তমবশ্যং কর্ত্তব্যতয়া বিহিতং কর্ম্ম সঙ্গং ফলঞ্চ ত্যক্ত্বা ক্রিয়তইতি যস্তাদৃশস্ত্যাগঃ সাত্ত্বিকো মতঃ ॥ ৯ ॥

ন দ্বেষ্ট্যকুশলং কর্ম্ম কুশলে নানুষজ্জতে।
ত্যাগী সত্ত্বসমাবিষ্টো মেধাবী ছিন্নসংশয়ঃ ॥ ১০ ॥

## শাঙ্করভাষ্যম্।

নন্বু কর্ম্মপরিত্যাগস্ত্রিবিধঃ সন্ন্যাস ইতি চ প্রকৃতস্তত্র তামসো রাজসশ্চোক্তস্ত্যাগঃ কথমিহ সঙ্গফলত্যাগস্তৃতীয়ত্বেনোচ্যতে যথাত্র যে ব্রাহ্মণা আগতাস্তত্র ষড়ঙ্গবিদৌ দ্বৌ ক্ষত্রিয়স্তৃতীয়ইতি তদ্বৎ নৈষদোষস্ত্যাগসামান্যেন স্তুত্যর্থত্বাদস্তি হি কর্ম্মসন্ন্যাসস্য ফলাভিসন্ধিত্যাগস্য চ ত্যাগত্বসামান্যন্তত্র রাজসতামসত্বেন কর্ম্মত্যাগনিন্দয়া কর্ম্মফলাভিসন্ধিত্যাগঃ সাত্ত্বিকত্বেন স্তূয়তে স ত্যাগঃ সাত্ত্বিকো মতইতি যস্ত্বধিকৃতঃ সঙ্গং ত্যক্ত্বা ফলাভিসন্ধিঞ্চ নিত্যং কর্ম্ম করোতি তস্য ফলরাগাদিনা কলুষীক্রিয়মানমন্তঃকরণং নিত্যৈশ্চ কর্ম্মভিঃ সংস্ক্রিয়মাণং বিশুধ্যতি তৎ বিশুদ্ধং প্রসন্নমাত্মালোচনক্ষমম্ভবতি তস্যৈব নিত্যকর্ম্মানুষ্ঠানেন বিশুদ্ধান্তঃকরণস্যাত্মজ্ঞানাভিমুখস্য ক্রমেণ যথা তন্নিষ্ঠাস্যাত্তদ্বক্তব্যমিত্যাহ ন দ্বেষ্টি অকুশলং অশোভনং কাম্যং কর্ম্ম শরীরারম্ভদ্বারেণ সংস্কারকারণং কিমনেনেত্যেবং কুশলে

## গিরিকৃত টীকা।

য়তি তদকরণে প্রত্যবায়স্মৃত্যা তৎকরণং কর্ত্তৃবাঙ্মনস্তন্নিবৃত্তিং করোতীতি বা নিত্যকর্ম্মণ্যুক্তাং কল্পনামনুনিষ্পাদিতফলকল্পনাঞ্চ ফলং ত্যক্ত্বেত্যনেন ভগবান্নিবারয়তীত্যর্থঃ। নিত্যকর্ম্মস্থ ফলত্যাগোক্তেঃ সম্ভবে ফলিতমাহ অতইতি ॥ ৯ ॥

কর্ম্মতৎফলত্যাগস্য ত্যাগসন্ন্যাসশব্দাভ্যাং প্রকৃতস্য ত্যাগো হীতি ত্রৈবিধ্যং প্রতিজ্ঞায় প্রতিজ্ঞানুরোধেন দ্বিবিধে ব্যুৎপাদ্য তৃতীয়াং বিধাস্তদ্বিরোধেন ব্যুৎপাদয়তোভগবতোঽকৌশলমাপতিতমিতি শঙ্কতে নন্বিতি। প্রক্রমপ্রতিকূলমুপসংহারবচনমনুচিতমিত্যত্র দৃষ্টান্তমাহ যথেতি। পূর্ব্বোত্তরবিরোধেন প্রাপ্তমকৌশলং প্রত্যাদিশতি নৈষ দোষ ইতি। কর্ম্মত্যাগফলত্যাগয়োস্ত্যাগত্বেন সাদৃশ্যাৎ কম্মত্যাগনিন্দয়া তৎফলত্যাগস্তুত্যর্থমিদম্বচনমিত্যুপগমাৎ ন বিরোধোঽস্তীত্যুক্তমেব ব্যক্তীকুর্ব্বন্নাদৌ ত্যাগসামান্যং বিশদয়তি অস্তীতি। সতি সামান্যে নির্দ্দেশস্য স্তুত্যর্থত্বং সমর্থয়তে তত্রেতি।

## স্বামিকৃত টীকা।

এবংভূতসাত্ত্বিকত্যাগপরিনিষ্ঠিতস্য লক্ষণমাহ ন দ্বেষ্টীত্যাদি। সত্ত্বসমাবিষ্টঃ সত্ত্বেন ব্যাপ্তঃ সাত্ত্বিকত্যাগী অকুশলং দুঃখাবহং শিশিরে প্রাতঃস্নানাদিকং কর্ম্ম ন দ্বেষ্টি কুশলে চ সুখকরে কর্ম্মণি নিদাঘে মধ্যাহ্নস্নানাদৌ নানুষজ্জতে প্রীতিং ন করোতি। তত্র হেতুঃ মেধাবী স্থিরবুদ্ধিঃ যত্র পরপরিভবাদি মহদপি দুঃখং সহতে স্বর্গাদিসুখঞ্চ ত্যজতি তত্র কিয়দেতত্তাৎকালিকং সুখং দুঃখঞ্চেত্যেবমনুসন্ধানবানিত্যর্থঃ। অতএব ছিন্নঃ সংশয়ো মিথ্যাজ্ঞানং দৈহিকসুখদুঃখয়োরুপাদিৎসাপরিজিহীর্ষালক্ষণং যস্য সঃ ॥ ১০ ॥

নহি দেহভৃতা শক্যং ত্যক্তুং কর্ম্মাণ্যশেষতঃ।
যস্তু কর্ম্মফলত্যাগী স ত্যাগীত্যভিধীয়তে ॥ ১১ ॥

শাঙ্করভাষ্যম্।

শোভনে নিত্যে কর্ম্মণি সত্ত্বশুদ্ধিজ্ঞানোৎপত্তিতন্নিষ্ঠাহেতুত্বেন মোক্ষকারণমিদমিত্যেবং নানুষজ্যতে তত্রাপি প্রয়োজনমপশ্যন্ননুষঙ্গং প্রীতিং ন করোতীত্যেতৎ কঃ পুনরসৌ ত্যাগী পূর্ব্বোক্তেন সঙ্গফলপরিত্যাগেন তদ্বাংস্ত্যাগী যঃ কর্ম্মণি সঙ্গং ত্যক্ত্বা তৎফলে চ নিত্যকর্ম্মানুষ্ঠায়ী স ত্যাগী কদা পুনরসাবকুশলং কর্ম্ম ন দ্বেষ্টি কুশলে চ নানুষজ্জত ইত্যুচ্যতে সত্ত্বসমাবিষ্টো যদা সত্ত্বেনাত্মানাত্মবিবেকবিজ্ঞানহেতুনা সমাবিষ্টঃ সংব্যাপ্তঃ সংযুক্তইত্যেতৎ। অতএব চ মেধাবী মেধয়াত্মজ্ঞানলক্ষণয়া প্রজ্ঞয়া সংযুক্তস্তদ্বান্মেধাবী মেধাবিত্বাদেব ছিন্নসংশয়ঃ ছিন্নোঽবিদ্যাকৃতঃ সংশয়ো যস্য আত্মস্বরূপাবস্থানমেব পরং নিঃশ্রেয়সসাধনং নান্যৎ কিঞ্চিদিত্যেবং নিশ্চয়েন ছিন্নসংশয়ঃ ॥ ১০ ॥

যোঽধিকৃতঃ পুরুষঃ পূর্ব্বোক্তেন প্রকারেণ কর্ম্মযোগানুষ্ঠানেন ক্রমেণ সংস্কৃতাত্মা সন্ জন্মাদিবিক্রিয়ারহিতত্বেন নিষ্ক্রিয়মাত্মানমাত্মত্বেন সম্বুদ্ধঃ স সর্ব্বকর্ম্মাণি মনসা সন্ন্যস্য নৈব

গিরিকৃত টীকা।

এবং পূর্ব্বাপরবিরোধং পরাকৃত্য অনন্তরশ্লোকতাৎপর্য্যমাহ যস্ত্বিতি। ফলরাগাদিনেত্যাদিশব্দেন কর্ম্মস্বরূপাসঙ্গো গৃহ্যতে অন্তঃকরণমকলুষীক্রিয়মাণমিতিচ্ছেদঃ বিশুদ্ধেঽন্তঃকরণে কিংস্যাদিত্যাশঙ্ক্যাহ বিশুদ্ধমিতি। মলবিকলত্বং বিশুদ্ধত্বং সংস্কারবত্ত্বং প্রসন্নত্বমিতি ভেদঃ ক্রমেণ শ্রবণাদ্যাবৃত্তিদ্বারেণেত্যর্থঃ। তন্নিষ্ঠেত্যাত্মজ্ঞাননিষ্ঠোক্তা কাম্যকর্ম্মণি ত্যাজ্যত্বেন দ্বেষমভিনয়তি কিমিতি। উভয়ত্র দ্বেষং প্রীতিঞ্চ ন করোতীতি সামান্যেনোক্তং কর্ত্তারং প্রশ্নপূর্ব্বকং বিশেষতো নির্দ্দিশতি কঃপুনরিতি। ত্যাগীত্যুক্তং ত্যাগিনমভিব্যনক্তি পূর্ব্বোক্তেনেতি। কর্ম্মণি সঙ্গস্য তৎফলস্যচ ত্যাগেনেতি যাবৎ। উক্তমেব ত্যাগিনং নিবৃণোতি যঃ কর্ম্মণীতি। তৎফলং ত্যক্তেতিসম্বন্ধঃ। কাম্যে নিষিদ্ধে চ কর্ম্মণি বন্ধহেতুরিতি ন দ্বেষ্টি নিত্যে নৈমিত্তিকে চ মোক্ষহেতুরিতি ন প্রীয়তে। তত্র কালবিশেষং পৃচ্ছতি তদেতি। নিত্যাদিকর্ম্মণা ফলাভিসন্ধিবর্জিতেন ক্ষয়িতকল্মসম্পন্নত্বং যথার্থগ্রহণসমর্থমুদ্বুধ্যতে তেন সমাবেশদশায়ামুক্তপ্রীতিদ্বেষয়োরভাবো ভবতীত্যাহ উচ্যতইতি। চতুর্থপাদং ব্যাকরোতি অতএবেতি। সমুদ্বুদ্ধযথার্থগ্রহণসামর্থ্যে সমাবিষ্টত্বাদিত্যর্থঃ। ছিন্নসংশয়ত্বমেব বিশদয়তি আত্মেতি। পরং নিঃশ্রেয়সস্তস্য চ সাধনং সম্যগ্‌জ্ঞানমেবেতি যোজনা ॥ ১০ ॥

ন দ্বেষ্টীত্যাদিনা শ্লোকেনোক্তমর্থং সঙ্ক্ষিপ্যানুবদতি যোঽধিকৃতইতি। পূর্ব্বোক্তপ্রকারেণেতি কর্ম্মণি তৎফলে চ সঙ্গত্যাগেনেত্যর্থঃ, কর্ম্মাত্মযোগস্যানুষ্ঠানেন সংস্কৃতাত্মা সন্

## শাঙ্করভাষ্যম্।

কুর্ব্বন্ন কারয়ন্নাসীনোনৈষ্কর্ম্ম্যলক্ষণাং জ্ঞাননিষ্ঠামশ্নুতইত্যেতৎ পূর্ব্বোক্তস্য কর্ম্মযোগস্য প্রয়োজনমনেন শ্লোকেনোক্তং, যঃ পুনরধিকৃতঃ সন্ দেহাত্মাভিমানিত্বেন দেহভৃদজ্ঞো বাধিতাত্মকর্তৃত্ববিজ্ঞানতয়াহং কর্ত্তেতি নিশ্চিতবুদ্ধিস্তস্যাশেষকর্ম্মপরিত্যাগস্যাশক্যত্বাৎ কর্ম্মফলত্যাগেন চোদিতকর্ম্মানুষ্ঠান এবাধিকারো ন ত্যাগ ইত্যেতমর্থং দর্শয়িতুমাহ নহীতি ন হি যস্মাদ্দেহভৃতা দেহং বিভর্ত্তীতি দেহভৃদ্দেহাত্মাভিমানবান্ দেহভৃদুচ্যতে ন হি বিবেকী স হি বেদাবিনাশিনমিত্যাদিনা কর্তৃত্বাধিকারান্নিবর্ত্তিতোঽতস্তেন দেহভৃতাজ্ঞেন ন শক্যং ত্যক্তুং সন্ন্যাসিতুং কর্ম্মাণ্যশেষতো নিঃশেষেণ। তস্মাদ্যস্ত্বজ্ঞোঽধিকৃতোনিত্যানি কর্ম্মাণি কুর্ব্বন্ কর্ম্মফলত্যাগী কর্ম্মফলাভিসন্ধিমাত্রসন্ন্যাসী স ত্যাগীত্যভিধীয়তে কর্ম্মাণ্যপি সন্নিতিস্তুত্যভিপ্রায়েণ তস্মাৎ পরমার্থদর্শিত্বেনৈবাদেহভৃতা দেহাত্মভাবরহিতেনাশেষকর্ম্ম-সন্ন্যাসঃ শক্যতে কর্ত্তুং॥ ১১॥

---

## গিরিকৃত টীকা।

ক্রমেণ শ্রবণাদ্যনুষ্ঠানদ্বারেণ কূটস্থংব্রহ্মপ্রত্যক্ত্বেন সম্বুদ্ধইতি সম্বন্ধঃ। পরস্য নিষ্ক্রিয়ত্বে হেতুমাহ জন্মাদীতি। উক্তজ্ঞানবতঃ সর্ব্বকর্ম্মত্যাগদ্বারা মুক্তিভাক্ত্বং দর্শয়তি স সর্ব্বেতি। আত্মজ্ঞানবতঃ সর্ব্বকর্ম্মত্যাগসম্ভাবনামুক্ত্বা তদ্বীনস্য তদসম্ভবে হেতুবচনত্বেন অনন্তর-শ্লোকমবতারয়তি যঃ পুনরিতি। ন বাধিতমাত্মনি কর্তৃত্ববিজ্ঞানমস্যেত্যজ্ঞস্তথা তস্য ভাব-স্তথা তস্য ভাবস্তত্তা তয়েতি যাবৎ, এতমর্থং দর্শয়িতুমজ্ঞস্য সর্ব্বকর্ম্মসন্ন্যাসাসম্ভবে হেতুমা-হেতি যোজনা যস্মাদিত্যস্য তস্মাদিত্যুত্তরেণ সম্বন্ধঃ। বিবেকিনোঽপি দেহধারিতয়া দেহ-ভৃত্ত্বাবিশেষে কর্ম্মাধিকারঃ স্যাদিত্যাশঙ্ক্যাহ নহীতি। কর্তৃত্বাধিকারস্তৎপূর্ব্বকং কর্ম্মানুষ্ঠানং তস্মাদিতি যাবৎ। জ্ঞানবতে দেহধারণেঽপি তদভিমানিত্বাভাবোঽতঃশব্দার্থঃ। অজ্ঞস্য সর্ব্বকর্ম্মত্যাগাযোগমুক্তং হেতূকৃত্য ফলিতমাহ তস্মাদিতি। কর্ম্মানুষ্ঠায়িনস্ত্যাগিত্বোক্তির-যুক্তেত্যাশঙ্ক্যাহ কর্ম্মণীতি কর্ম্মিণোঽপি ফলত্যাগেন ত্যাগিত্ববচনং ফলত্যাগস্তুত্যর্থ-মিত্যর্থঃ। কস্তর্হি সর্ব্বকর্ম্মত্যাগঃ সম্ভবতীত্যাশঙ্ক্য বিবেকবৈরাগ্যাদিমতো দেহাভিমান-হীনস্যেত্যুক্তং নিগময়তি তস্মাদিতি॥ ১১॥

## স্বামিকৃত টীকা।

নম্বেবংভূতাৎ কর্ম্মফলত্যাগাদ্বরং সর্ব্বকর্ম্মত্যাগস্তথা সতি কর্ম্মবিক্ষেপাভাবেন জ্ঞান-নিষ্ঠাসুখং সংপদ্যতে তত্রাহ নহীতি। দেহভৃতা দেহাভিমানবতা নিঃশেষেণ সর্ব্বাণি কর্ম্মাণি ত্যক্তুং নহি শক্যানি। তদুক্তং, নহি কশ্চিৎ ক্ষণমপি জাতু তিষ্ঠত্যকর্ম্মকৃদি-ত্যাদিনা। তস্মাদ্যস্তু কর্ম্মাণি কুর্ব্বন্নপি কর্ম্মফলত্যাগী সএব মুখ্যঃ ত্যাগীত্যভিধী-য়তে॥ ১১॥

অনিষ্টমিষ্টং মিশ্রঞ্চ ত্রিবিধং কর্ম্মণঃ ফলম্।
ভবত্যত্যাগিনাং প্রেত্য ন তু সন্ন্যাসিনাং ক্বচিৎ ॥ ১২ ॥

## শাঙ্করভাষ্যম্।

কিং পুনস্তৎ প্রয়োজনং যৎ সর্ব্বকর্ম্মপরিত্যাগাৎ স্যাদিতুচ্যতে। অনিষ্টং নরকতির্য্যগাদিলক্ষণং ইষ্টং দেবাদিলক্ষণং মিশ্রঃ ইষ্টানিষ্টসংযুক্তং মনুষ্যলক্ষণঞ্চৈবং ত্রিবিধং ত্রিঃপ্রকারং কর্ম্মণো ধর্ম্মাধর্ম্মলক্ষণস্য ফলং বাহ্যানেককারকরূপং ব্যাপারনিষ্পন্নং সদবিদ্যাকৃতমিন্দ্রজালমায়োপমং মহামোহকরং প্রত্যগাত্মোপসর্পীবফল্গুতয়া লয়মদর্শনং গচ্ছতীতি ফলনির্ব্বচনং তদেতদেব লক্ষণং ফলং ভবত্যত্যাগিনামজ্ঞানাং কর্ম্মিণামপরমার্থসন্ন্যাসিনাং প্রেত্য শরীরপাতাদূর্দ্ধং। ন তু পরমার্থসন্ন্যাসিনাং পরমহংসপরিব্রাজকানাং কেবলজ্ঞাননিষ্ঠানাং ক্বচিন্ন হি কেবলসম্যগ্‌ দর্শননিষ্ঠাঽবিদ্যাদিসংসারবীজং নোন্মূলয়ন্তি কদাচিদিত্যর্থঃ॥ ১২॥

## গিরিকৃত টীকা।

উক্তাধিকারিণঃ সর্ব্বকর্ম্মসন্ন্যাসাসম্ভবেঽপি ফলাভাবে কৃতস্তস্য কর্ত্তব্যতেতিশঙ্কতে কিং পুনরিতি। গৌণস্য মুখস্য বা সন্ন্যাসস্য ফলং পিপৃচ্ছিষিতমিতি বিকল্পয়তি উচ্যতইতি। সর্ব্বকর্ম্মত্যাগো নাম তদনুষ্ঠানেঽপি তৎফলাভিসন্ধিত্যাগঃ স চামুখ্যসন্ন্যাসস্তস্য ফলমাহ অনিষ্টমিতি। মুখ্যে তু সন্ন্যাসে সর্ব্বকর্ম্মত্যাগে সম্যগ্‌ধীদ্বারা সর্ব্বসংসারোচ্ছিত্তিরেব ফলমিত্যাহ নত্বিতি। পাদত্রয়ং ব্যাকরোতি অনিষ্টমিত্যাদিনা। তির্য্যগাদীত্যাদিপদমবশিষ্টনিকৃষ্টযোনিসংগ্রহার্থং দেবাদীত্যাদিপদং বিশিষ্টোৎকৃষ্টযোনিগ্রহণায়েতি বিভাগঃ। ফলশব্দং ব্যুৎপাদয়তি বাহ্যেতি। কারণদ্বারকমনেকবিধত্বমুক্ত্বা মিথ্যাত্বমাহ অবিদ্যেতি। তৎকৃতত্বেন দৃষ্টিমাত্রদেহত্বে দৃষ্টান্তমাহ ইন্দ্রেতি। প্রতীতিতো রমণীয়ত্বং সূচয়তি মহামোহেতি। অবিদ্যোত্থাশ্চাবিদ্যাশ্রিতত্বাদাত্মাশ্রিতত্বং বস্তুতো নাস্তীত্যাহ প্রত্যগিতি। উক্তং ফলং কর্ম্মিণামিষ্যতে চেদমুখ্যসন্ন্যাসফলোক্তিপরত্বং পাদত্রয়স্য কথমিষ্টমিত্যাশঙ্ক্যাহ

## স্বামিকৃত টীকা।

এবংভূতস্য কর্ম্মফলত্যাগস্য ফলমাহ অনিষ্টমিতি। অনিষ্টং নারকিত্বং ইষ্টং দেবত্বং মিশ্রং মনুষ্যত্বং এবং ত্রিবিধং পাপস্য পুণ্যস্য চোভয়মিশ্রস্য চ কর্ম্মণো যৎ ফলং প্রসিদ্ধং তৎ সর্ব্বমত্যাগিনাং সকামানামেব প্রেত্য পরত্র ভবতি তেষাং ত্রিবিধকর্ম্মসম্ভবাৎ নতু সংন্যাসিনাং ক্বচিদপি ভবতি। সন্ন্যাসিশব্দেনাত্র ফলত্যাগসাম্যাৎ প্রকৃতাঃ কর্ম্মফলত্যাগিনো গৃহ্যন্তে, অনাশ্রিতঃ কর্ম্মফলং কার্য্যং কর্ম্ম করোতি যঃ। স সংন্যাসী চ যোগী চেত্যেবমাদৌ কর্ম্মফলত্যাগিষু সংন্যাসিশব্দপ্রয়োগদর্শনাৎ। তেষাং সাত্বিকানাং পাপাসম্ভবাদীশ্বরার্পণেন চ পুণ্যফলস্য ত্যক্তত্বাৎ ত্রিবিধমপি কর্ম্মফলং ন ভবতীত্যর্থঃ॥ ১২॥

পঞ্চেমানি মহাবাহো কারণানি নিবোধ মে।
সাংখ্যে কৃতান্তে প্রোক্তানি সিদ্ধয়ে সর্ব্বকর্ম্মণাম্ ॥ ১৩ ॥

## শাঙ্করভাষ্যম্।

অতঃ পরমার্থদর্শিন এবাশেষকর্ম্মসন্ন্যাসিত্বং সম্ভবত্যবিদ্যাধ্যারোপিতত্বাদাত্মনি ক্রিয়া-কারকফলানাং ন ত্বজ্ঞস্যাধিষ্ঠানাদীনি ক্রিয়াকর্ত্তৃণি কারকাণ্যাত্মত্বেন পশ্যতোঽশেষ-কর্ম্মসন্ন্যাসঃ সম্ভবতি। তদেতদুত্তরৈঃ শ্লোকৈর্দর্শয়তি পঞ্চেতি পঞ্চ ইমানি বক্ষ্যমাণানি হে মহাবাহো কারণানি নিবর্ত্তকানি নিবোধ মে মম ইত্যুত্তরত্র চেতঃসমাধানার্থং বস্তু-

## গিরিকৃত টীকা।

অপরমার্থেতি। ফলাভিসন্ধিবিকলানাং কর্ম্মিণাং দেহপাতাদূর্দ্ধং কর্ম্মানুরোধি ফলমাবশ্য-কমিত্যর্থঃ। কর্ম্মিণামেব সতামফলাভিসন্ধীনামমুখ্যসংন্ন্যাসিত্বাত্তদীয়ামুখ্যসন্ন্যাসস্য ফল মুক্‌ত্বা চতুর্থপাদং ব্যাচষ্টে নত্বিতি। অমুখ্যসন্ন্যাসমনন্তরপ্রকৃতং ব্যবচ্ছিনত্তি পরমার্থেতি তেষাং প্রধানং ধর্ম্মমুপদিশতি কেবলেতি। ক্বচিদ্দেশে কালে বা নাস্তি যথোক্তং ফলং তেষামিতি সম্বন্ধঃ। তর্হি পরমার্থসন্ন্যাসোঽফলত্বাৎ নানুষ্ঠীয়েতেত্যাশঙ্ক্য তস্য মোক্ষাব-সায়িত্বান্মৈবমিত্যাহ নহীতি ॥ ১২ ॥

নন্বপরমার্থসন্ন্যাসবদবিশেষাদজ্ঞানং পরমার্থসন্ন্যাসোঽপি কিং ন স্যাত্ত্যাগস্য স্থকর-ত্বাত্তত্রাহ অতঃপরমার্থেতি। তস্য সম্যগ্‌দর্শনাদবিদ্যানিবৃত্তৌ তদারোপিতক্রিয়াকার-কাদিনিবৃত্তেরিতি হেত্বর্থঃ। বিদ্যাবতঃ সর্ব্বকর্ম্মসন্ন্যাসিত্বসম্ভাবনামুক্‌ত্বা এবকারব্যাবর্ত্ত্যং দর্শয়তি ন ত্বিতি অবিদুষোঽশেষকর্ম্মণাং তদ্ধেতূনাঞ্চ রাগাদীনাং ত্যাগাযোগে কারকেষ্বধি-ষ্ঠানাদিষ্বাত্মদর্শনং হেতুমাহ ক্রিয়েতি কথমধিষ্ঠানাদীনাং ক্রিয়াকর্ত্তৃত্বং কথম্বা বিদুষস্তে-ষ্বাত্মত্বধীরিত্যাশঙ্ক্যানন্তরশ্লোকচতুষ্টয়স্য তাৎপর্য্যমাহ তদ্বদেতদিতি। কর্ম্মার্থানামধিষ্ঠানা-দীনামপ্রামাণিকত্বাশঙ্কামাদাবুদ্ধরতি পঞ্চেতি। উত্তরত্রেত্যধিষ্ঠানাদিষু বক্ষ্যমাণেষ্বিত্যর্থঃ। বস্তূনাং তেষামেব বৈষম্যং নির্দ্দিদর্শয়িষিতং নহি চেতঃসমাধানাদৃতে জ্ঞাতুং শক্যং তৎসাঙ্খ্যশব্দং ব্যুৎপাদয়তি জ্ঞাতব্যেতি। আত্মা ত্বংপদার্থস্তৎপদার্থো ব্রহ্ম তয়োরৈ-ক্যধীস্তদুপযোগিনশ্চ শ্রবণাদয়ঃ পদার্থাস্তে সংখ্যায়ন্তে ব্যুৎপাদ্যন্তে। কৃতান্তশব্দস্য

## স্বামিকৃত টীকা।

নন্বু কর্ম্ম কুর্ব্বতঃ কর্ম্মফলং কথং ন ভবেদিত্যাশঙ্ক্য সঙ্গত্যাগিনো নিরহঙ্কারস্য কর্ম্মলেপো নাস্তীত্যুপপাদয়িতুমাহ পঞ্চেতি পঞ্চভিঃ। সর্ব্বকর্ম্মণাং সিদ্ধয়ে নিষ্পত্তয়ে ইমানি বক্ষ্যমাণানি পঞ্চ কারণানি মে বচনান্নিবোধ জানীহি। আত্মনঃ কর্ত্তৃত্বাভিমাননিবৃত্ত্য-র্থমবশ্যমেতানি জ্ঞাতব্যানীত্যেবং তেষাং স্তুত্যর্থমেবাহ সাংখ্য ইতি। সম্যক্ খ্যায়তে

অধিষ্ঠানং তথা কর্ত্তা করণঞ্চ পৃথগ্বিধম্ ।
বিবিধাশ্চ পৃথক্ চেষ্টা দৈবঞ্চৈবাত্র পঞ্চমম্ ॥ ১৪ ॥

## শাঙ্করভাষ্যম্ ।

বৈষম্যপ্রদর্শনার্থং চ তানি চ কারণানি জ্ঞাতব্যতয়া স্তৌতি সাঙ্খ্যে জ্ঞাতব্যাঃ পদার্থাঃ সঙ্খ্যায়ন্তে যস্মিন্ শাস্ত্রে তৎ সাঙ্খ্যং বেদান্তং কৃতান্তইতি তস্যৈব বিশেষণং কৃতমিতি কর্ম্মোচ্যতে তস্যান্তঃ পরিসমাপ্তির্যত্র স কৃতান্তঃ কর্ম্মান্তঃ ইত্যেতৎ যাবনর্থ উদপানে সর্ব্বং কর্ম্মাখিলং পার্থ জ্ঞানে পরিসমাপ্যতইত্যাত্মজ্ঞানে সঞ্জাতে সর্ব্বকর্ম্মণাং নিবৃত্তিং দর্শয়তি অতস্তস্মিন্নাত্মজ্ঞানার্থে সাঙ্খ্যে কৃতান্তে বেদান্তে প্রোক্তানি কথিতানি সিদ্ধয়ে নিষ্পত্ত্যর্থং সর্ব্বকর্ম্মণাং ॥ ১৩ ॥

কানি তানীত্যুচ্যতে অধিষ্ঠানমিতি। অধিষ্ঠানমিচ্ছাদ্বেষসুখদুঃখজ্ঞানাদীনামভিব্যক্তেরাশ্রয়োঽধিষ্ঠানং শরীরন্তথা কর্ত্তা উপাধিলক্ষণো ভোক্তা করণঞ্চ শ্রোত্রাদিকং শব্দাদ্যুপলব্ধয়ে পৃথগ্বিধং নানাপ্রকারং দ্বাদশসঙ্খ্যং বিবিধাশ্চ পৃথক্‌চেষ্টা বায়বীয়াঃ প্রাণাপানাদ্যা দৈবঞ্চৈব দৈবমেবাতএতেষু চতুষ্পঞ্চমং পঞ্চানাং পূরণমাদিত্যাদি চক্ষুরাদ্যনুগ্রাহকং ॥ ১৪ ॥

## গিরিকৃত টীকা।

বেদান্তবিষয়ত্বং বিভজতে কৃতমিত্যাদিনা। বেদান্তস্য তত্ত্বধী দ্বারা কর্ম্মাবসানভূমিত্বে বাক্যোপক্রমানুকূল্যং দর্শয়তি যাবানিতি। উদপানে কূপাদৌ যাবানর্থঃ স্নানাদিঃ তাবানর্থঃ সমুদ্রে সম্পদ্যতে অতোযথা কূপাদিকৃতং কার্য্যং সর্ব্বং সমুদ্রেঽন্তর্ভবতি তথা সর্ব্বেষু বেদেষু কর্ম্মার্থেষু যাবৎ ফলং তাবৎ জ্ঞানবতোব্রাহ্মণস্য জ্ঞানেঽন্তর্ভবতি জ্ঞানং প্রাপ্তস্য কর্ত্তব্যানবশেষাদিত্যর্থঃ। তত্রৈব বাক্যান্তরমনুক্রামতি সর্ব্বমিতি। উদাহৃতবাক্যযোস্তাৎপর্য্যমাহ আত্মেতি। আত্মজ্ঞানে সতি সর্ব্বকর্ম্মনিবৃত্তাবপি কথং বেদান্তস্য কৃতান্তত্বমিত্যাশঙ্ক্যাহ অতইতি। তানি মদ্বচনতো নিবোধেতি পূর্ব্বেণ সম্বন্ধঃ ॥ ১৩ ॥

কর্ম্মার্থান্যধিষ্ঠানাদীনি মানমূলত্বাৎ জ্ঞেয়ানীত্যুক্তমিদানীং প্রশ্নপূর্ব্বকং বিশেষতস্তানি নির্দ্দিশতি কানীত্যাদিনা। প্রতীকমাদায় ব্যাকরোতি অধিষ্ঠানমিতি। উপাধিলক্ষণো

## স্বামিকৃত টীকা।

জ্ঞায়তে পরমাত্মা অনেনেতি সাংখ্যং তত্ত্বজ্ঞানং তস্মিন্ প্রকাশমান আত্মবোধঃ সাংখ্যঃ তস্মিন্ কৃতং কর্ম্ম কস্যান্তঃ সমাপ্তিরস্মিন্নিতি কৃতান্তস্তস্মিন্ বেদান্তসিদ্ধান্তইত্যর্থঃ। যদ্বা, সংখ্যায়ন্তে গণ্যন্তে তত্ত্বান্যস্মিন্নিতি সাংখ্যং কৃতোঽন্তোনির্ণয়োঽস্মিন্নিতি কৃতান্তং সাংখ্যশাস্ত্রমেব তস্মিন্ প্রোক্তানি অতঃ সম্যক্ত্ত্বি বোধেত্যর্থঃ ॥ ১৩ ॥

তান্যেবাহ অধিষ্ঠানমিতি। অধিষ্ঠানং শরীরং কর্ত্তা চিদচিদ্গ্রন্থিরহঙ্কারঃ পৃথগ্বিধমনেকপ্রকারং করণং চক্ষুঃশ্রোত্রাদি বিবিধাঃ কার্য্যতঃ স্বরূপতশ্চ পৃথগ্‌ভূতাশ্চেষ্টাঃ

শরীরবাঙ্মনোভির্যৎ কর্ম্ম প্রারভতে নরঃ।
ন্যায্যং বা বিপরীতং বা পঞ্চৈতে তস্য হেতবঃ ॥ ১৫ ॥

## শাঙ্করভাষ্যম্।

শবীরেতি শরীববাঙ্মনোভির্যৎ কর্ম্ম ত্রিভিরেতৈঃ প্রারভতে নির্ব্বর্ত্তয়তি নরঃ ন্যায্যম্বাৎ ধর্ম্ম্যং শাস্ত্রীয়ং বিপরীতং বা অশাস্ত্রীয়ং অধর্ম্মং যচ্চাপি নিমিষিতচেষ্টাদি জীবনহেতুস্তদপি পূর্ব্বকৃতধর্ম্মাধর্ম্ময়োরেব কার্য্যমিতি ন্যায্যবিপরীতয়োরেব গ্রহণেন গৃহীতং পঞ্চৈতে যথোক্তাস্তস্য সর্ব্বস্যৈব কর্ম্মণো হেতবঃ কারণানি। নন্ু অধিষ্ঠানাদীনি সর্ব্বকর্ম্মণাং কাবণানি কথমুচ্যতে শবীরবাঙ্মনোভিঃ প্রাবভতইতি নৈষ দোষঃ বিধিপ্রতিষেধলক্ষণং সর্ব্বং কর্ম্ম শবীরাদিত্রয়প্রধানং তদঙ্গতয়া দর্শনশ্রবণাদি চ জীবনলক্ষণং ত্রিধৈব রাশীকৃতমুচ্যতে শবীবাদিভিবারভ্যতইতি ফলকালেঽপি তৎপ্রধানৈর্ভুজ্যতে ইতি পঞ্চানামেব হেতুত্বং ন বিরুধ্যতে ॥ ১৫ ॥

## গিরিকৃত টীকা।

বুদ্ধ্যাদিরূপাধিস্তল্লক্ষণস্তৎস্বভাবোবুদ্ধ্যাদ্যনুবিধায়ী তদ্ধর্ম্মমাত্মনি পশ্যন্নুপহিতস্তৎপ্রধানইত্যর্থঃ। তত্র কার্য্যলিঙ্গকমনুমানং সূচয়তি শব্দাদীতি। জ্ঞানেন্দ্রিয়াণি পঞ্চ পঞ্চকর্ম্মেন্দ্রিয়াণি মনোবুদ্ধিশ্চেতি দ্বাদশসংখ্যত্বং চেষ্টাযাবিবিধত্বং নানাপ্রকারত্বং তদেব স্পষ্টয়তি বায়বীয়াইতি। পৃথক্ত্বমসঙ্কীর্ণত্বং ন হি প্রাণাপানাদিচেষ্টানাং মিথঃ সঙ্করোঽস্তি। দৈবং বিশদয়তি আদিত্যাদীতি ॥ ১৪ ॥

পঞ্চানামধিষ্ঠানাদীনামুক্তানাং সর্ব্বকর্ম্মসিদ্ধ্যর্থত্বং স্ফুটয়তি শবীরেতি। নন্ু জীবন কৃতং নিমিষোন্মেষাদিকর্ম্মাস্তবং সাধারণমস্তি তৎ কথং রাশিদ্বয়করণমিতি তত্রাহ যচ্চেতি। অধিষ্ঠানাদীনাং কর্ম্মমাত্রহেতুত্বং প্রতিজ্ঞায় শরীরাদিত্রিবিধকর্ম্মহেতুত্বোক্তিরযুক্তেতি শঙ্কতে নন্বিতি। পূর্ব্বাপরবিরোধং পরিহরতি নৈষ দোষইতি। নন্ু জীবনকৃতানি স্বাভাবিকানি কর্ম্মাণি দর্শনাদীনি বিধিনিষেধবাহ্যত্বান্ন দেহাদিনির্ব্বর্ত্ত্যানীত্যাশঙ্ক্যাহ তদঙ্গত য়েতি। তস্য দেহাদিত্রয়স্য প্রধানস্যাঙ্গঞ্চক্ষুরাদি তন্নিষ্পাদ্যত্বেন জীবনকৃতং দর্শনাদি প্রধান

## স্বামিকৃত টীকা।

প্রাণাপানাদীনাং ব্যাপারাঃ অত্র এতেষেব পঞ্চমং দৈবং চক্ষুরাদ্যনুগ্রাহকমাদিত্যাদিসর্ব্বপ্রেরকোঽন্তর্যামী বা ॥ ১৪ ॥

এতেষামেব সর্ব্বকর্ম্মহেতুত্বমাহ শরীরেতি। যথোক্তৈঃ পঞ্চভিঃ প্রারভ্যমাণং কর্ম্ম ত্রিধেবাত্তর্ভাব্যশরীরবাঙ্মনোভিরিত্যুক্তং শারীরং বাচিকং মানসঞ্চ ত্রিবিধং কর্ম্মেতি প্রসিদ্ধং শারীরাদিভির্যৎ কর্ম্ম ধর্ম্ম্যমধর্ম্ম্যং বা করোতি নরস্তস্য সর্ব্বস্য কর্ম্মণএতে পঞ্চ হেতবঃ ॥১৫॥

তত্ৰৈবং সতি কর্ত্তারমাত্মানং কেবলন্তু যঃ।
পশ্যত্যকৃতবুদ্ধিত্বান্ন স পশ্যতি দুর্ম্মতিঃ॥ ১৬॥

## শাঙ্করভাষ্যম্।

তত্রেতি। তত্রেতি প্রকৃতেন সম্বধ্যতে, এবং সতি এবং যথোক্তৈঃ পঞ্চভির্হেতুভির্নির্বর্ত্ত্যে সতি কর্ম্মণি তত্ৰৈবং সতীতি দুর্ম্মতিত্বস্য হেতুত্বেন সম্বধ্যতে তত্রৈতেষামাত্মনমন্যত্বেনাবিদ্যয়া পরিকল্পিতৈঃ ক্রিয়মাণস্য কর্ম্মণোঽহমেব কর্ত্তেতি কর্ত্তারমাত্মানং কেবলং শুদ্ধং তু যঃ পশ্যত্যবিদ্বান্ কস্মাদ্বেদান্তাচার্য্যোপদেশন্যায়ৈরকৃতবুদ্ধিত্বাদসংস্কৃতবুদ্ধিত্বাদ্যোঽপি দেহাদিব্যতিরিক্তাত্মবাদ্যন্যমাত্মানমেব কেবলং কর্ত্তারং পশ্যত্যসাবপ্যকৃতবুদ্ধিরেবাতোঽকৃতবুদ্ধিত্বান্ন স পশ্যত্যাত্মনস্তত্ত্বং কর্ম্মণো বেত্যর্থোঽতোদুর্ম্মতিঃ কুৎসিতা বিপরীতা দুষ্টাজস্রং জননমরণপ্রতিপত্তিহেতুভূতা মতিরস্যেতি দুর্ম্মতিঃ স পশ্যন্নপি ন পশ্যতি যথা তৈমিরিকোঽনেকঞ্চন্দ্রং যথা বাভ্রেষু ধাবৎসু চন্দ্রং ধাবন্তং যথা বা বাহন উপবিষ্টোঽন্যেষু ধাবৎস্বাত্মানং ধাবন্তং॥ ১৬॥

## গিরিকৃত টীকা।

কর্ম্মণ্যন্তর্ভূতমিতি ত্ৰৈবিধ্যমবিরুদ্ধমিত্যর্থঃ। দেহাদ্যারম্ভে ত্রিবিধে কর্ম্মণি সর্ব্বকস্যান্তর্ভাবেঽপি কথং পঞ্চানামেবাধিষ্ঠানাদীনাং তত্র হেতুত্বং ফলোপভোগকালে করণান্তরাপেক্ষাসম্ভবাদিত্যাশঙ্ক্য জন্মকালভাবিনো ভোগকালভাবিনশ্চ সর্ব্বস্য করণস্য তেষ্বেবান্তর্ভাবান্নৈবমিত্যাহ ফলেতি।

ক্রিয়াকর্ত্তৃত্বমধিষ্ঠানাদীনামাপাদ্য বিদ্বত্বস্তেষাত্মদৃষ্টিমনুবদতি তত্রেতি। তৎপদপরামর্শযোগ্যং প্রকৃতং সর্ব্বং কর্ম্ম। প্রতীকমাদায় পূর্ব্বেণ সহাক্ষরার্থং কথয়তি এবমিতি। অধিষ্ঠানাদীনামুক্তরীত্যা কর্তৃত্বে সত্যন্যগতং কর্তৃত্বমাত্মন্যধ্যারোপ্য পশ্যতোদুর্ম্মতিরিত্যাত্মনি কর্তৃত্বং পশ্যন্নিত্যাহ তত্ৰৈবমিতি। কর্ত্তারমিত্যাদি ব্যাচষ্টে তত্রেত্যাদিনা। তেষধিষ্ঠানাদিষু তৈরধিষ্ঠানাদিভিরারোপিতাত্মভাবৈরিত্যর্থঃ। অকর্ত্তাবমাত্মানং কর্ত্তারং পশ্যতীত্যত্র প্রশ্নদ্বারা হেতুমাহ কস্মাদিতি। নন্বু শাস্ত্রসংস্কৃতবুদ্ধিরেবাতিবিক্তাত্মবাদী কর্তৃত্বং তস্যানুমন্যতে নাসৌ কর্তৃত্বমাত্মনি পশ্যন্নপি ভবত্যকৃতবুদ্ধিস্তত্রাহ যোঽপীতি। তস্যাপি শাস্ত্রপূর্ব্বকমাচার্য্যোপদেশেন তদনুসারিন্যায়ৈশ্চানাহিতবুদ্ধিত্বাদকৃতবুদ্ধিত্বং সিদ্ধমিত্যর্থঃ

## স্বামিকৃত টীকা।

ততঃ কিমতআহ তত্রেতি। তত্র সর্ব্বস্মিন্ কর্ম্মণি এতে পঞ্চ হেতবইত্যেবং সতি কেবলনিরুপাধিমসঙ্গমাত্মানং যঃ কর্ত্তারং পশ্যতি শাস্ত্রাচার্য্যোপদেশাভ্যামসংস্কৃতবুদ্ধিত্বাদ্দুর্ম্মতিরসৌ সম্যঙ্ন পশ্যতি॥ ১৬॥

যস্য নাহংকৃতো ভাবো বুদ্ধির্যস্য ন লিপ্যতে।
হত্বাপি স ইমাল্লোঁকান্ন হন্তি ন নিবধ্যতে ॥ ১৭ ॥

## শাঙ্করভাষ্যম্ ।

কঃ পুনঃ সুমতির্যঃ সম্যক্ পশ্যতীত্যুচ্যতে যস্যেতি। যস্য শাস্ত্রাচার্য্যোপদেশন্যায়সংস্কৃতাত্মনো ন ভবত্যহংকৃতো অহং কর্ত্তেত্যেবং লক্ষণো ভাবনাপ্রত্যয়এতএব পঞ্চাধিষ্ঠানাদয়োঽবিদ্যয়াত্মনি কল্পিতাঃ সর্ব্বকর্ম্মণাং কর্ত্তারোনাহমহন্তু তদ্ব্যাপারাণাং সাক্ষিভূত-অপ্রাণোহ্যমনাঃ শুভ্রোঽক্ষরাৎ পরতঃ পরঃ কেবলোঽবিক্রিয়ইত্যেবং পশ্যতীতি এবং বুদ্ধিরন্তঃকরণং যস্যাত্মনউপাধিভূতা ন লিপ্যতে নানুশায়িনী ভবতীদমহমকার্ষন্তেনাহং নরকং গমিষ্যামীত্যেবং যস্য বুদ্ধির্ন লিপ্যতে স সুমতিঃ স পশ্যতি হত্বাপি স ইমাল্লোকান্ সর্ব্বান্

## গিরিকৃত টীকা।

কৌটস্থ্যমাত্মনস্তত্বং যাথাত্ম্যং কর্ম্মণোঽপি তত্বমবিদ্যাকৃতাধিষ্ঠানাদিকৃতত্বেনাত্মাস্পর্শিত্বমাত্ম কর্ম্মণোস্তত্বদর্শনাভাবোঽতঃ শব্দার্থঃ। দুষ্টত্বংস্পষ্টীকর্ত্তুং দুর্ম্মতিত্বং বিবৃণোতি জনেনেতি। অহং কর্ত্তেত্যাত্মদর্শনবতোঽপি নাবিদুষস্তদ্দর্শনমস্তীত্যত্র দৃষ্টান্তমাহ যথেতি। তিমিরোপহতচক্ষুরনেকশ্চন্দ্রং পশ্যন্নপি তত্বতো ন তং পশ্যত্যেবমবিদ্বানাত্মানং কর্ত্তারং পশ্যন্নপি তত্বতো ন তং পশ্যতীত্যর্থঃ। অধিষ্ঠানাদিষ্ববিদ্যয়া সম্বদ্ধাত্মনঃ স্বাত্মনি তদ্‌গতক্রিয়ারোপে দৃষ্টান্তমাহ যথাবেতি। অন্যেষু বাহকেষু পুরুষেষু ধাবনকর্ত্তৃষু বাহনে স্থিতঃ স্বাত্মানং প্রধাবনকর্ত্তারমবিবেকাদভিমন্যতে তথাধিষ্ঠানাদিষু ক্রিয়াকর্ত্তৃষু তদ্‌গতং স্বাত্মানং কর্ত্তারং মন্যমানো দুর্ম্মতিরিত্যর্থঃ॥ ১৬॥

বিপরীতদৃষ্টে দুর্ম্মতিত্বং শিষ্ট্বা সম্যগ্‌দৃষ্টেঃ সুমতিত্বং প্রশ্নপূর্ব্বকমাহ কঃ পুনরিত্যাদিনা অহং কর্ত্তেত্যাত্মনি কর্ত্তৃত্বপ্রত্যয়াভাবে কুত্র কর্ত্তৃত্বধীরিত্যাশঙ্ক্যাহ এতইতি। কথং তর্হি

## স্বামিকৃত টীকা।

কস্তর্হি সুমতির্যস্য কর্ম্মলেপো নাস্তীত্যুক্তমিত্যপেক্ষায়ামাহ যস্যেতি। অহমিতি কৃতোঽহঙ্কর্ত্তেত্যেবংভূতো ভাবোঽভিপ্রায়ো যস্য নাস্তি যদ্বা অহং কৃতোঽহংকারস্য ভাবঃ স্বভাবঃ কর্ত্তৃত্বাভিনিবেশো যস্য নাস্তি শরীরাদীনামেব কর্ম্মকর্ত্তৃত্বালোচনাদিত্যর্থঃ, অতএব যস্য বুদ্ধির্ন লিপ্যতে ইষ্টানিষ্টবুদ্ধ্যা কর্ম্মসু ন সজ্জতে স এবংভূতো দেহাদিব্যতিরিক্তাত্মদর্শী ইমান্ লোকান্ সর্ব্বানপি প্রাণিনো লোকদৃষ্ট্যা হত্বাপি বিবিক্ততয়া স্বদৃষ্ট্যা ন হন্তি ন চ তৎফলৈ র্নিবধ্যতে বন্ধনং প্রাপ্নোতি কিং পুনঃ সত্বশুদ্ধিদ্বারা পরোক্ষজ্ঞানোৎপত্তিহেতুভিঃ কর্ম্মভিস্তস্য বন্ধাশঙ্কেত্যর্থঃ। তদুক্তং, ব্রহ্মণ্যাধায় কর্ম্মাণি সঙ্গং ত্যক্ত্বা করোতি যঃ। লিপ্যতে ন স পাপেন পদ্মপত্রমিবাম্ভসেতি॥ ১৭॥

## শাঙ্করভাষ্যম্ ।

প্রাণিন ইত্যর্থঃ। ন হন্তি হননক্রিয়াং ন করোতি ন নিবধ্যতে নাপি তৎকার্য্যেণাধর্ম্ম-ফলেন সম্বধ্যতে, ননু হত্বাপি ন হন্তীতি বিপ্রতিষিদ্ধমুচ্যতে যদ্যপি স্তুতিঃ নৈষ দোষঃ লৌকিকপারমার্থিকদৃষ্ট্যপেক্ষয়া তদুপপত্তেঃ দেহাদ্যাত্মবুদ্ধ্যা হন্তাহমিতি লৌকিকীং দৃষ্টি-মাশ্রিত্য হত্বাপীত্যাহ যথাদর্শিতাং পারমার্থিকীং দৃষ্টিমাশ্রিত্য ন হন্তি ন নিবধ্যত ইতি তদুভয়মুপপদ্যতএব নম্বধিষ্ঠানাদিভিঃ সম্ভূয় করোত্যেবাত্মা কর্ত্তারমাত্মানং কেবলং ত্বিতি কেবলশব্দপ্রয়োগান্নৈষদোষঃ আত্মনোঽবিক্রিয়স্বভাবত্বেঽধিষ্ঠানাদিভিঃ সংহতত্বানুপ-পত্তেঃ বিক্রিয়াবতোহন্যৈঃ সংহননং সম্ভবতি সংহত্য বা কর্ত্তৃত্বং স্যান্নত্ববিক্রিয়স্যাত্মনঃ কেনচিৎ সংহননমস্তি ইতি ন সম্ভূয় কর্ত্তৃত্বমুপপদ্যতে অতঃ কেবলত্বং আত্মনঃ স্বাভাবিক-মিতি কেবলশব্দোঽনুবাদমাত্রং অবিক্রিয়ত্বঞ্চাত্মনঃ শ্রুতিস্মৃতিন্যায়প্রসিদ্ধং অবিকার্য্যোঽয়-মুচ্যতে গুণৈবেব কর্ম্মাণি ক্রিয়ন্তে শরীরস্থোঽপি ন করোতীত্যাদ্যসকৃদুপপাদিতং গীতা-স্বেব তাবৎশ্রুতিষু চ ধ্যায়তীব লেলায়তীবেত্যেবমাদ্যাসু যানি বাক্যানি দর্শিতং ন্যায়-তশ্চ নিরবয়বমপরতন্ত্রমবিক্রিযমাত্মতত্ত্বমিতি রাজমার্গঃ বিক্রিযাবত্ত্বাভ্যুপগমেঽপ্যাত্মনঃ স্বকীয়ৈব বিক্রিয়া স্বস্য ভবিতুমর্হতি নাধিষ্ঠানাদীনাং কর্ম্মাণ্যাত্মকর্ত্তৃকাণি স্যুর্নহি পরস্য কর্ম্ম পরেণাকৃতমাগন্তুমর্হতি যত্ত্ববিদ্যয়া গমিতং ন তত্তস্য যথা রজতত্বং ন শুক্তিকায়াং যথা বা তলমলবত্ত্বং বালৈর্গমিতমবিদ্যয়া নাকাশস্য তথাধিষ্ঠানাদিবিক্রিয়াপি তেষামে-বেতি নাত্মনঃ তস্মাৎ যুক্তমুক্তং অহংকৃতত্ববুদ্ধিলেপাভাবাৎ বিদ্বান্ন হন্তি ন নিবধ্যতইতি

## গিরিকৃত টীকা।

অকর্ত্তৃত্বধীরাত্মনীত্যাশঙ্ক্যাধিষ্ঠানাদীনাং তদ্ব্যাপারাণাঞ্চ সাক্ষিত্বাদিত্যাশঙ্ক্যাহ অহংত্বিতি। আত্মনোন স্বতোঽস্তি ক্রিয়াশক্তিমত্ত্বমিত্যত্র প্রমাণমাহ অপ্রাণোহীতি। নাপি তস্য স্বতো-জ্ঞানশক্তিমত্ত্বমিত্যাহ অমনাইতি। উপাধিদ্বয়াসম্বন্ধে শুদ্ধত্বং ফলিতমাহ শুভ্রইতি। করণ-সম্বন্ধাদশুদ্ধিমাশঙ্ক্যোক্তং অক্ষরাদিতি। কার্য্যকারণযোরাত্মাস্পর্শিতত্বেন পার্থক্যে সদ্বিতী-য়ত্বমাশঙ্ক্য তয়োরাবিদ্যকপারবশ্যত্বান্নৈবমিত্যাহ কেবলইতি। জন্মাদিসর্ব্ববিক্রিয়ারহিত-ত্বেন কৌটস্থ্যমাহ অবিক্রিয়ইতি। বুদ্ধির্যস্যেত্যাদি ব্যাচষ্টে বুদ্ধিরিতি। নানুশায়িনী নানু-শয়বতী ন ক্লেশশালিনীত্যর্থঃ। দ্বিতীয়পাদস্যাক্ষরার্থমুক্ত্বা বাক্যার্থমাহ ইদমিতি। পাপং কর্ম্ম ইদমাপরামৃশ্যতে। লোকানাং প্রাণসম্বন্ধাভাবে কুতোহিংসেত্যাশঙ্ক্যাহ প্রাণিনইতি। বিরুদ্ধার্থোক্ত্যা স্তুতিরপি ন যুক্তেতি শংকতে নম্বিতি। বিরোধং পরিহরতি নৈষদোষইতি। লৌকিকদৃষ্টিমবষ্টভ্যাহ হত্বাপীতি। নির্দ্দেশং বিশদয়তি দেহাদীতি। তাত্ত্বিকীং দৃষ্টিমা-স্থায় ন হন্তীতি নির্দ্দেশমুপপাদয়তি যথেতি। নাহং কর্ত্তা কিন্তু কর্ত্তৃতদ্ব্যাপারয়োঃ সাক্ষী ক্রিয়াজ্ঞানশক্তিমদুপাধিদ্বয়বিনির্ম্মুক্তঃ শুদ্ধঃ সন্ কার্য্যকারণাসম্বদ্ধোঽদ্বিতীয়োঽবিক্রিয়ই-ত্যেবং পারমার্থিকদৃষ্টের্যথাদর্শিতত্বং দ্রষ্টব্যং। হত্বাপীত্যেতন্ন হন্তীত্যাদি চোভয়ং দৃষ্টিদ্বয়াবষ্ট-

## শাঙ্করভাষ্যম্।

নায়ং হন্তি ন হন্যতইতি প্রতিজ্ঞায় ন জাতইত্যাদিহেতুবচনেনাবিক্রিয়ত্বমাত্মনউক্ত্বা বেদাবিনাশিনমিতি বিদুষঃ কর্ম্মাধিকারনিবৃত্তিশাস্ত্রাদৌ সংক্ষেপত উক্ত্বা মধ্যে প্রসারিতঞ্চ তত্র তত্র প্রসঙ্গং কৃত্বা ইহোপসংহরতি শাস্ত্রার্থপিণ্ডীকরণায় বিদ্বান্ন হন্তি ন নিবধ্যতইতি এবঞ্চসতি দেহভৃত্ত্বাভিমানানুপপত্তাববিদ্যাকৃতাশেষকর্ম্মসন্ন্যাসোপপত্তেঃ সন্ন্যাসিনামনিষ্টাদি ত্রিবিধং কর্ম্মণঃ ফলং ন ভবতীত্যুপপন্নং তদ্বিপর্য্যয়াচ্চেতরেষাং ভবতীত্যেতচ্চাপরিহার্য্যমিত্যেষগীতাশাস্ত্রস্যার্থ উপসংহৃতঃ স এষ সর্ব্ববেদার্থসারো নিপুণমতিভিঃ পণ্ডিতৈর্ব্বিচার্য্য প্রতিপত্তব্যইতি তত্র তত্র প্রকরণবিভাগেন দর্শিতোঽস্মাভিঃ শাস্ত্রন্যায়ানুসারেণ ॥ ১৭ ॥

---

## গিরিকৃত টীকা।

ত্তানুপপন্নমিত্যুপসংহরতি তত্রৈবমিতি। কেবলমেবাত্মানং কর্ত্তারং পশ্যন্ দুর্ম্মতিরিত্যত্রাত্মবিশেষণসমর্পককেবলশব্দসামর্থ্যাদাত্মনোবিশিষ্টস্য কর্ত্তৃত্বমিতি শংকতে নন্বিতি। আত্মনোবৈশিষ্ট্যাযোগান্ন বিশিষ্টস্যাপি কর্ত্তৃত্বমিতি দূষয়তি নৈষদোষইতি। অবিক্রিয়স্যাভাবেঽপি কথনাত্মনোঽসংহতত্বমিত্যাশঙ্ক্যাহ অবিক্রিয়েতি। অধিষ্ঠানাদিভিরাত্মনঃ সংহননেঽপি ন কর্ত্তৃত্বমবিক্রিয়স্য ক্রিয়াশ্রয়ত্বব্যাঘাতাদিত্যাহ সংহত্যেতি। সংহতত্বানুপপত্তিং ব্যক্তীকরোতি নহীতি। অসংহতত্বে ফলিতমাহ ইতি নেতি। কথং তর্হি কেবলত্বমাত্মনি কেবলশব্দাদুক্তং তদাহ ততইতি কর্ত্তৃত্বমাত্মনোঽভ্যুপগম্য নাস্যাবিক্রিয়ত্বমুপৈতীত্যাশঙ্ক্যাহ অবিক্রিয়ত্বঞ্চেতি। তত্র স্মৃতিবাক্যান্যুদাহরতি অবিকার্য্যোঽয়মিতি। নায়ং হন্তি ন হন্যতইত্যাদিবাক্যমাদিশব্দার্থঃ। উক্তবাক্যানামাত্মাবিক্রিয়ত্বে তাৎপর্য্যং সূচয়তি অসকৃদিতি। নিষ্কলং নিষ্ক্রিয়ং শান্তমিত্যাদি বাক্যং শ্রুতাবাদিশব্দার্থঃ, যানি বাক্যানি তৈরাত্মনোবিক্রিয়ত্বং দর্শিতমিতি যোজনা, ন্যায়তশ্চ তদ্দর্শিতমিতি পূর্ব্বেণ সম্বন্ধঃ ন্যায়মেব দর্শয়তি নিরবয়বমিতি। ন তাবদাত্মা স্বতোবিক্রিয়তে নিরবয়বত্বাদাকাশবন্নাপি পরতোঽসঙ্গস্যাকার্য্যস্য পরাধীনত্বাযোগাদিত্যর্থঃ। কিং বাত্মনঃ স্বনিষ্ঠা বা বিক্রিয়াধিষ্ঠানাদিনিষ্ঠা বা নাদ্যঃ স্বনিষ্ঠাবিক্রিয়ানুপপত্তেরাত্মনোদর্শিতত্বাদিত্যাশয়েনাহ বিক্রিয়াবত্ত্বেতি সা চাযুক্তেত্যুক্তমিতিশেষঃ। দ্বিতীয়ং দূষয়তি নেত্যাদিনা। অধিষ্ঠানাদিকৃতমপি কর্ম্ম তদ্যোগাদাত্মন্যাগচ্ছতীত্যাশঙ্ক্য তদাগমনং বাস্তবমাবিদ্যং বেতি বিকল্প্যাদ্যং দূষয়তি নহীতি। দ্বিতীয়ং নিরস্যতি যত্বিতি। আত্মন্যবিদ্যাপ্রাপিতং কর্ম্ম নাত্মীয়মিত্যেতদ্দৃষ্টান্তাভ্যামুপপাদয়তি যথেত্যাদিনা। আত্মনোঽবিক্রিয়ত্বেন কর্ত্তৃত্বাভাবে ফলিতমাহ তস্মাদিতি। নম্বু প্রাগেবাত্মনোঽবিক্রিয়ত্বং প্রতিপাদিতং তদিহ কস্মাদুচ্যতে তত্রাহ নায়মিতি। শাস্ত্রাদৌ প্রতিজ্ঞায় হেতুপূর্ব্বকং সংক্ষিপ্যোক্ত্বা মধ্যে তৎপ্রসঙ্গংকৃত্বা প্রসারিতাং কর্ম্মাধিকারনিবৃত্তিমিহোপসংহরতীতিসম্বন্ধঃ॥ প্রতিজ্ঞাতস্য হেতুনোপপাদিতস্যান্তে নিগমনং কিমর্থমি-

জ্ঞানং জ্ঞেয়ং পরিজ্ঞাতা ত্রিবিধা কর্ম্মচোদনা।
করণং কর্ম্ম কর্ত্তেতি ত্রিবিধঃ কর্ম্মসংগ্রহঃ॥ ১৮॥

## শাঙ্করভাষ্যম্।

অথেদানীং তেষাং কর্ম্মণাং প্রবর্ত্তকমুচ্যতে জ্ঞানমিতি। জ্ঞানং জ্ঞায়তেঽনেনেতি সর্ব্ববিষয়মবিশেষেণোচ্যতে তথা জ্ঞেয়ং জ্ঞাতব্যং তদপি সামান্যেনৈব সর্ব্বমুচ্যতে তথা-পরিজ্ঞাতোপাধিলক্ষণোঽবিদ্যাকল্পিতো ভোক্তা ইত্যেতত্রয়মেষামবিশেষেণ সর্ব্বকর্ম্মণাং প্রবর্ত্তিকা ত্রিবিধা ত্রিপ্রকারা কর্ম্মচোদনা জ্ঞানাদীনাং হি ত্রয়াণাং সন্নিপাতে হানোপা-দানাদিপ্রয়োজনঃ সর্ব্বকর্ম্মারম্ভঃ স্যাত্ততঃ পঞ্চভিরধিষ্ঠানাদিভিরারব্ধং বাঙ্মনঃকায়াশ্রয়-ভেদেন ত্রিধারাশীভূতং ত্রিষু করণাদিষু সংগৃহ্যতে ইত্যেতদুচ্যতে করণং ক্রিয়তেঽনেনেতি বাহ্যং শ্রোত্রাদ্যন্তস্থং বুদ্ধ্যাদি কর্ম্মেপ্সিততমং কর্ত্তুঃ ক্রিয়য়া ব্যাপ্যমানং কর্ত্তা কারণানাং ব্যাপারয়িতোপাধিলক্ষণইতি ত্রিবিধঃ ত্রিঃপ্রকারঃ কর্ম্মসংগ্রহঃ সংগৃহ্যতে অস্মিন্নিতি সংগ্রহঃ কর্ম্মণঃ সংগ্রহঃ কর্ম্মসংগ্রহঃ কর্ম্ম এষু হি ত্রিষু সমবৈতি তেনায়ং ত্রিবিধঃ কর্ম্ম-সংগ্রহঃ॥ ১৮॥

## গিরিকৃত টীকা।

ত্যাশঙ্ক্যাহ শাস্ত্রার্থেতি। কর্ম্মাধিকারোবিদুষোনেতি স্থিতে তস্য দেহাভিমানাভাবে সত্য-বিদ্যোত্থসর্ব্বকর্ম্মত্যাগসিদ্ধেরনিষ্টমিষ্টং মিশ্রঞ্চেতি ত্রিবিধং কর্ম্মফলসন্ন্যাসিনাং নেতি প্রাগুক্তং যুক্তমেবেতি পরমপ্রকৃতমুপসংহরতি এবঞ্চেতি। যে পুনরবিদ্বাংসো দেহাভিমানিন স্তেষাং ত্রিবিধং কর্ম্মফলম্ভবতে বেতি হেতুবচনমিদমর্থং নিগময়তি তদ্বিপর্য্যয়াচ্চেতি। অধিষ্ঠানাদিকৃতং কর্ম্ম তাত্মকৃতমবিদুষামেব কর্ম্মাধিকারোদেহাভিমানিত্বেন তত্ত্যাগাযো-গাদ্দেহাভিমানাভাবাত্তু বিদুষাং কর্ম্মাধিকারনিবৃত্তিরিত্যুপসংহৃতমর্থং সঙ্ক্ষিপ্যাহ ইত্যেষ-ইতি। উক্তঞ্চ গীতার্থোবেদার্থত্বাদুপাদেয়ইত্যাহ স এষইতি। কথময়মার্থোবেদার্থোঽপি প্রতিপত্তুং শক্যতে তত্রাহ নিপুণেতি। ভাষ্যকৃতা মানযুক্তিভ্যাং বিভজ্যানুক্তত্বান্নাস্যার্থ-স্যোপাদেয়ত্বমিত্যাশঙ্ক্যাহ তত্রেতি॥ ১৭॥

শাস্ত্রার্থোপসংহারানন্তর্য্যমথেত্যুক্তমিদানীমিতি। প্রবর্ত্তকাপদেশাপেক্ষাবস্থোক্তা কর্ম্মণাং যেষু বিদুষাং নাধিকারোঽবিদুষাঞ্চাধিকারস্তেষামিত্যর্থঃ। জ্ঞাতশব্দস্য করণব্যুৎপত্ত্যা জ্ঞান-

## স্বামিকৃত টীকা।

হত্বাপি ন হন্তি ন নিবধ্যতইত্যেতদেবোপপাদয়িতুং কর্ম্মচোদনায়াঃ কর্ম্মাশ্রয়স্য চ কর্ম্মফলাদীনাঞ্চ ত্রিগুণাত্মকত্বান্নির্গুণস্য আত্মনস্তৎ সম্বন্ধো নাস্তীত্যভিপ্রায়েণ কর্ম্মচোদনাং কর্ম্মাশ্রয়ঞ্চাহ জ্ঞানমিতি। জ্ঞানমিষ্টসাধনমেতদিতি বোধঃ জ্ঞেয়মিষ্টসাধনং কর্ম্ম পরি-জ্ঞাতা এতজ্জ্ঞানাশ্রয়ঃ এবং ত্রিবিধা কর্ম্মচোদনা চোদ্যতে প্রবর্ত্ততেঽনয়েতি চোদনা

জ্ঞানং কর্ম্ম চ কর্ত্তা চ ত্রিধৈব গুণভেদতঃ।
প্রোচ্যতে গুণসংখ্যানে যথাবচ্ছৃণু তান্যপি ॥ ১৯ ॥

## শাঙ্করভাষ্যম্।

অথেদানীং ক্রিয়াকারকফলানাং সর্ব্বেষাং গুণাত্মকত্বাৎ সত্ত্বরজস্তমোগুণভেদতঃ ত্রিবিধো ভেদোবক্তব্যইত্যারভ্যতে জ্ঞানং কর্ম্মচেতি। জ্ঞানং জ্ঞায়তেঽনেনেতি কর্ম্ম চ কর্ম্ম

## গিরিকৃত টীকা।

মাত্রার্থত্বমাহ জ্ঞানমিতি। জ্ঞেয়শব্দস্যাপি তদ্বদেব জ্ঞাতব্যমাত্রার্থত্বমাহ তথেতি। উপাধিলক্ষণত্বং তৎপ্রধানত্বমুপহিতত্বং তস্যাবস্তুত্বার্থমবিদ্যাকল্পিতবিশেষণমেতদেব ত্রয়ং সর্ব্বকর্ম্মপ্রবর্ত্তকমিত্যাহ ইত্যেতদিতি। সর্ব্বকর্ম্মণাং প্রবর্ত্তকমিত্যধ্যাহর্ত্তব্যং। চোদনেতি ক্রিয়ায়াঃ প্রবর্ত্তকং বচনমিতি ভাষ্যানুসারেণ চোদনাশব্দার্থমাহ প্রবর্ত্তিকেতি। সর্ব্বকর্ম্মণামিতি পূর্ব্বেণ সম্বন্ধঃ, ত্রৈবিধ্যং জ্ঞানাদীনাং প্রাগুক্তং কর্ম্মণাং চোদনেতি বিগ্রহঃ। তেষাং সর্ব্বকর্ম্মপ্রবর্ত্তকত্বমনুভবেন সাধয়তি জ্ঞানাদীনামিতি। হানোপাদানাদীত্যাদিপদেনোপেক্ষা বিবক্ষিতা। খরণমিত্যাদেস্তাৎপর্য্যামাহ ততইতি। জ্ঞানাদীনাং প্রবর্ত্তকত্বাদিত্যর্থঃ। উক্তেঽর্থে শ্লোকভাগমবতারয়তি ইত্যেতদিতি। বাহ্যমন্তস্থঞ্চ দ্বিবিধং করণব্যুৎপত্ত্যা কথয়তি করণমিতি। উক্তলক্ষণং কর্ম্মৈব স্ফুটয়তি কর্ত্তুরিতি। স্বতন্ত্রোহি কর্ত্তা স্বাতন্ত্র্যঞ্চ কারকাপ্রযোজ্যস্য তৎপ্রযোক্তৃত্বমিত্যাহ কর্ত্তেতি। কথমুক্তে ত্রিবিধে কর্ম্ম সংগৃহ্যতে তত্রাহ কর্ম্মেতি। কর্ম্মণোহি প্রসিদ্ধং কারকাশ্রয়ত্বমিতি ভাবঃ ॥ ১৮ ॥

অনন্তরশ্লোকনবকতাৎপর্য্যমাহ অথেতি। জ্ঞানাদিপ্রস্তাবানন্তর্য্যমথশব্দার্থঃ, ইদানীং প্রস্তুতজ্ঞানাদ্যবান্তরভেদাপেক্ষায়ামিত্যর্থঃ। তেষাং গুণভেদাৎ ত্রৈবিধ্যে হেতুমাহ গুণা-

## স্বামিকৃত টীকা।

জ্ঞানাদিত্রিতয়ং কর্ম্মপ্রবৃত্তিহেতুরিত্যর্থঃ। যদ্বা, চোদনেতি বিধিরুচ্যতে, তদুক্তং ভট্টৈঃ চোদনা চোপদেশশ্চ বিধিশ্চৈকার্থবাচিনইতি। ততশ্চায়মর্থঃ, উক্তলক্ষণং ত্রিগুণাত্মকং জ্ঞানাদিত্রয়মবলম্ব্য কর্ম্মবিধিঃ প্রবর্ত্ততইতি তদুক্তং ত্রৈগুণ্যবিষয়াবেদাইতি, তথা করণং সাধকতমং কর্ম্ম চ কর্ত্তুরীপ্সিততমং কর্ত্তা ক্রিয়ানির্ব্বর্ত্তকঃ কর্ম্ম সংগৃহ্যতেঽস্মিনিতি কর্ম্মসংগ্রহঃ করণাদিত্রিবিধং কারকং ক্রিয়াশ্রয়ইত্যর্থঃ সংপ্রদানাদিকারকত্রয়ন্তু পরস্পরয়া ক্রিয়াপ্রবর্ত্তকমেব কেবলং ন তু সাক্ষাৎ ক্রিয়ায়া আশ্রয়ঃ অতঃকরণাদিত্রয়মেব ক্রিয়াশ্রয়া ইত্যুক্তং ॥ ১৮ ॥

ততঃ কিমতআহ জ্ঞানং কর্ম্মচেতি। গুণাঃ সম্যক্ কার্য্যভেদেন খ্যায়ন্তে প্রতিপাদ্যন্তেঽস্মিন্নিতি গুণসংখ্যানং সাংখ্যশাস্ত্রং তস্মিন্ জ্ঞানঞ্চ কর্ম্ম চ কর্ত্তা চ প্রত্যেকং সত্ত্বাদি-

সর্ব্বভূতেষু যেনৈকং ভাবমব্যয়মীক্ষ্যতে ।
অবিভক্তং বিভক্তেষু তজ্জ্ঞানং বিদ্ধি সাত্ত্বিকম্ ॥ ২০ ॥

## শাঙ্করভাষ্যম্ ।

ক্রিয়া ন কারকং পরিভাষিকমীপ্সিততমং কর্ম্মকর্ত্তা চ নিবর্ত্তকঃ ক্রিয়াণাং ত্রিধৈবাবধারণং গুণব্যতিরিক্তজাত্যন্তরাভাবপ্রদর্শনার্থং গুণভেদতঃ তত্ত্বাদিভেদেনেত্যর্থঃ প্রোচ্যতে কথ্যতে গুণসংখ্যানে কাপিলে শাস্ত্রে কাপিলমপি গুণসংখ্যানং শাস্ত্রন্তদপি গুণভোক্তৃ-বিষয়ে প্রমাণমেব পরমার্থব্রহ্মৈকত্ববিষয়ে যদ্যপি বিরুধ্যতে তথাপি তে হি কাপিলা গুণগৌণব্যাপারনিরূপণেঽভিযুক্তাইতি তচ্ছাস্ত্রমপি বক্ষ্যমাণার্থস্তুত্যর্থত্বেনোপাদীয়তইতি ন বিরোধঃ। যথাবদ্যথান্যায়ং যথাশাস্ত্রং শৃণু তান্যপি জ্ঞানাদীনি তদ্ভেদজাতানি গুণভেদকৃতানি শৃণু বক্ষমাণেঽর্থে মনঃসমাধিং কুর্ব্বিত্যর্থঃ ॥ ১৯ ॥

জ্ঞানস্য তু তাবৎ ত্রিবিধত্বমুচ্যতে সর্ব্বেতি। সর্ব্বভূতেষু অব্যক্তাদিস্থাবরান্তেষু ভূতেষু

## গিরিকৃত টীকা ।

অকর্ত্বাদিতি। বক্তব্যো বক্ষ্যমাণশ্লোকনবকেনেতি শেষঃ। এবং স্থিতে প্রথমমবান্তরভেদ-প্রতিজ্ঞা ক্রিয়তইত্যাহ ইত্যারভ্যতইতি। কর্ত্তুরীপ্সিততমং কর্ম্মেতি যত্তৎপরিভাষ্যতে তন্মাত্র কর্ম্মশব্দবাচ্যমিত্যাহ নেতি। গুণাতিরেকেন বিধান্তরং জ্ঞানাদিষু নেতি নির্দ্ধারয়ি-তুমবধারণমিত্যাহ গুণেতি। জ্ঞানাদীনাং প্রত্যেকং গুণভেদপ্রযুক্তে ত্রৈবিধ্যে প্রমাণ-মাহ প্রোচ্যতইতি। ননু কাপিলং পাতঞ্জলমিত্যাদি শাস্ত্রং বিরুদ্ধার্থত্বাদপ্রমাণং কথমিহ প্রমাণীক্রিয়তে তত্রাহ তথাপীতি। বিষয়বিশেষবিরোধেঽপি প্রকৃতেঽর্থে প্রামাণ্যমবিরুদ্ধ-মিত্যর্থঃ। যদ্যপি কাপিলাদয়োগুণবৃত্তবিচারে গৌণব্যাপারস্য ভোগাদের্নিরূপণে চ নিপু-ণাস্তথাপি কথং তদীয়ং শাস্ত্রমত্র প্রমাণীকৃতমিত্যাশঙ্ক্যাহ তে হীতি। জ্ঞানাদিষু প্রত্যেক-মবান্তরভেদো বক্ষ্যমাণোঽর্থস্তস্য তত্রান্তরেঽপি প্রসিদ্ধিকথনং স্তুতিস্তাদর্থ্যেন কাপিলাদিম-তোপাদানমিহোপযোগীত্যর্থঃ। তৃতীয়পাদস্যাবিরুদ্ধার্থত্বং নিগময়তি নেতি। যথাবদি-ত্যাদিব্যাচষ্টে যথান্যায়মিতি ॥ ১৯ ॥

জ্ঞানাদীনাং প্রত্যেকং ত্রৈবিধ্যং জ্ঞাতব্যং প্রতিজ্ঞায় জ্ঞানত্রৈবিধ্যার্থং শ্লোকত্রয়মবতা-

## স্বামিকৃত টীকা ।

গুণভেদেন ত্রিধৈবোচ্যতে তান্যপি জ্ঞানাদীনি বক্ষ্যমাণানি যথাবৎ শৃণু ত্রিধৈবেত্যেবকা-রোগুণত্রয়োপাধিব্যতিরেকেণাত্মনঃ স্বতঃ কর্ম্মাদিপ্রতিষেধার্থঃ, চতুর্দ্দশাধ্যায়ে তত্র সত্ত্বং নির্ম্মলত্বাদিত্যাদিনা গুণানাং বন্ধকত্বপ্রকারোনিরূপিতঃ সপ্তদশাধ্যায়ে যজন্তে সাত্ত্বিকা দেবানিত্যাদিনা গুণকৃতত্রিবিধস্বভাবনিরূপণেন রজস্তমঃস্বভাবং পরিত্যজ্য সাত্ত্বিকাহা-

পৃথক্‌ত্বেন তু যজ্‌জ্ঞানং নানাভাবান্ পৃথগ্বিধান্।
বেত্তি সর্ব্বেষু ভূতেষু তজ্‌জ্ঞানং বিদ্ধি রাজসম্ ॥ ২১ ॥

## শাঙ্করভাষ্যম্।

যেন জ্ঞানেনৈকং ভাবং বস্তু ভাবশব্দো বস্তুবাচী একমাত্মবস্ত্বিত্যর্থঃ অব্যয়ং ন ব্যেতি স্বাত্মনা তদ্ধর্ম্মণা বা কূটস্থং নিত্যমিত্যর্থঃ ঈক্ষতে যেন জ্ঞানেন পশ্যতি তঞ্চ ভাবমবিভক্তং প্রতিদেহং বিভক্তেষু দেহভেদেষু ন বিভক্তং তদাত্মবস্তু ব্যোমবন্নিরন্তরমিত্যর্থঃ তৎ জ্ঞানং অদ্বৈতাত্মদর্শনং সাত্ত্বিকং সম্যক্ দর্শনং বিদ্ধীতি ॥ ২০ ॥

যানি দ্বৈতদর্শনান্যসম্যক্ তানি রাজসানি তামসানি চেতি ন সাক্ষাৎ সংসারোচ্ছিত্তয়ে ভবন্তি পৃথক্ত্বেনেতি। পৃথক্ত্বেন তু ভেদেন প্রতিশরীরমন্যত্বেন যৎ জ্ঞানং নানাভাবান্ ভিন্নানাত্মনঃ পৃথগ্‌বিধান্ পৃথক্ প্রকারান্ ভিন্নলক্ষণানিত্যর্থঃ। বেত্তি বিজানাতি যৎ জ্ঞানং সর্ব্বেষু ভূতেষু জ্ঞানস্য কর্তৃত্বাসম্ভবাদ্যেন জ্ঞানেন বেত্তীত্যর্থঃ ॥ ২১ ॥

## গিরিকৃত টীকা।

ত্রয়তি জ্ঞানস্যেতি। তত্র সাত্ত্বিকং জ্ঞানমুপন্যস্যতি সর্ব্বেতি। ভূতানি কার্য্যকারণাত্মকা-ন্যুপাধিজাতানি অদ্বিতীয়মর্থং চৈকরসং প্রত্যগাত্মভূতমবাধিতস্তত্ত্বং জ্ঞেয়ত্বেন বিবক্ষিতমি-ত্যাহ একমিতি। বিবক্ষিতমব্যয়ত্বং সঙ্ক্ষিপতি কূটস্থেতি। প্রতিদেহমবিভক্তমিত্যুক্তং ব্যনক্তি বিভক্তেষ্বিতি। তৎ জ্ঞানমিত্যাদি ব্যাকরোতি অদ্বৈতেতি ॥ ২০ ॥

দ্বৈতদর্শনান্যপি কানিচিদ্ভবন্তি সম্যঙ্নিবৃত্তানি সম্যঞ্চীত্যাশঙ্ক্যাহ যানীতি। তেষাম-সম্যক্ত্বে হেতুমাহ রাজসানীতি। প্রতিদেহমন্যত্বেন ভিন্নাত্মনো যেন জ্ঞানেন জানাতি তৎ জ্ঞানং রাজসমিতি ব্যাচষ্টে ভেদেনেতি। পৃথক্তং পৃথগ্বিধত্বঞ্চ পুনরুক্তমিত্যাশঙ্ক্য হেতু-হেতুমত্ত্বেন বিভাগং বিবক্ষিত্বাহ ভিন্নেতি। জ্ঞানস্য জ্ঞানকর্তৃত্বমযুক্তমিত্যাশঙ্ক্যাহ যেনেতি ॥ ২১ ॥

## স্বামিকৃত টীকা।

রাদিসেবয়া সাত্ত্বিকস্বভাবঃ সম্পাদনীয়ইত্যুক্তং ইহ তু ক্রিয়াকারকফলাদীনামাত্মসম্বন্ধো নাস্তীতি দর্শয়িতুং সর্ব্বেষাং ত্রিগুণাত্মকত্বমুচ্যতইতি বিশেষোজ্ঞাতব্যঃ ॥ ১৯ ॥

তত্র জ্ঞানস্য সাত্ত্বিকাদিত্রৈবিধ্যমাহ সর্ব্বেতি ত্রিভিঃ। সর্ব্বেষু ভূতেষু ব্রহ্মাদিস্থাব-রান্তেষু বিভক্তেষু পরস্পরং ব্যাবৃত্তেষু অবিভক্তমনুস্যূতং একমব্যয়ং নির্ব্বিকারং ভাবং পরমাত্মতত্ত্বং যেন জ্ঞানেনেক্ষতে আলোচয়তি তৎ জ্ঞানং সাত্ত্বিকং বিদ্ধি ॥ ২০ ॥

রাজসং জ্ঞানমাহ পৃথক্‌ত্বেনেতি। পৃথক্ত্বেন তু যৎ জ্ঞানমিত্যস্যৈব বিবরণং সর্ব্বেষু

যত্তু কৃৎস্নবদেকস্মিন্ কার্য্যে সক্তমহৈতুকম্।
অতত্ত্বার্থবদল্পঞ্চ তত্তামসমুদাহৃতম্॥ ২২॥
নিয়তং সঙ্গরহিতমরাগদ্বেষতঃ কৃতম্।
অফলপ্রেপ্সুনা কর্ম্ম যত্তৎ সাত্ত্বিকমুচ্যতে॥ ২৩॥

## শাঙ্করভাষ্যম্।

যত্বিতি। যত্তু জ্ঞানং কৃৎস্নবৎ সমস্তবৎ সর্ব্ববিষযমিব একস্মিন কার্য্যে দেহে বহির্ব্বা প্রতিমাদৌ সক্তং এতাবানেবাত্মেশ্বরোবা নাতঃ পরমস্তীতি যথা নগ্নক্ষপণকাদীনাং শরীরান্তর্ব্বর্ত্তী দেহপরিমাণো জীব ঈশ্বরোবা পাষাণদারর্চাদিমাত্রং ইত্যেবং একস্মিন্ কার্য্যে সক্তমহৈতুকং হেতুবর্জ্জিতং অযুক্তিকং নিঃপ্রমাণকমতত্ত্বার্থবৎ অযথাভূতার্থবদ্যথাভূতোঽর্থস্তত্ত্বার্থঃ সোঽস্য জ্ঞেয়ভূতোঽস্তীতি তত্ত্বার্থবদতত্ত্বার্থবদহৈতুকত্বাদেবাল্পঞ্চাল্পবিষয়ত্বাদল্পফলত্বাদ্বা তত্তামসমুদাহৃতং তামসানাং হি প্রাণিনামবিবেকিনামীদৃশং জ্ঞানং দৃশ্যতে॥ ২২॥

অথ কর্ম্মণাং ত্রৈবিধ্যমুচ্যতে নিয়তমিতি। নিয়তং নিত্যং সঙ্গরহিতমাসক্তিবর্জ্জিতমরাগদ্বেষতঃ কৃতং রাগপ্রযুক্তেন দ্বেষপ্রযুক্তেন চ কৃতং তদ্বিপরীতং কৃতমরাগদ্বেষতঃ কৃতমফলপ্রেপ্সুনা ফলং প্রেপ্সতীতি ফলপ্রেপ্সুঃ ফলতৃষ্ণস্তদ্বিপরীতেনাফলপ্রেপ্সুনা কর্ত্রা কৃতং কর্ম্ম যত্তৎ সাত্ত্বিকমুচ্যতে॥ ২৩॥

## গিরিকৃত টীকা।

যত্বিতি। সক্তত্বমেব ব্যনক্তি এতাবানিতি। একস্মিন্ কার্য্যে জ্ঞানস্য সক্তত্বমেব দৃষ্টান্তেন সাধয়তি যথেত্যাদিনা। যন্নির্যুক্তিকন্তদেব জ্ঞানস্যাভাসত্বে কারণমিত্যাহ অহৈতুকত্বাদিতি। স্বরূপতোবিষয়তশ্চাভাসত্বং ফলতোবেত্যাহ অল্পমিতি। তামসং জ্ঞানমুক্তলক্ষণমিত্যজ্ঞানানুভবং প্রমাণয়তি তামসানাং হীতি॥ ২২॥

ত্রিবিধং কর্ম্ম বক্তুমনন্তরশ্লোকত্রয়মিত্যাহ অথেতি। তত্র সাত্ত্বিকং কর্ম্ম নিরূপয়তি নিয়তমিতি॥ ২৩॥

## স্বামিকৃত টীকা।

ভূতেষু দেহে নানাভাবান্ বস্তুত এবানেকান্ ক্ষেত্রজ্ঞান্ পৃথগ্বিধান্ সুখিদুঃখিত্বাদিরূপেণ বিলক্ষণান্ যেন জ্ঞানেন বেত্তি তৎ জ্ঞানং রাজসং বিদ্ধি॥ ২১॥

তামসং জ্ঞানমাহ যত্বিতি। একস্মিন কার্য্যে দেহে প্রতিমাদৌ বা কৃৎস্নবৎ পরিপূর্ণবৎ সক্তং এতাবানেবাত্মা ঈশ্বরো বেত্যভিনিবেশযুক্তংঅহৈতুকংনিরুপপত্তিকং অতত্ত্বার্থবৎ পরমার্থালম্বনশূন্যং অতএবাল্পং তুচ্ছং অল্পবিষয়ত্বাৎ অল্পফলত্বাচ্চ যদেবং ভূতং জ্ঞানং তত্তামসমুদাহৃতং॥ ২২॥

যত্তু কামেপ্সুনা কর্ম্ম সাহঙ্কারেণ বা পুনঃ।
ক্রিয়তে বহুলায়াসং তদ্রাজসমুদাহৃতম্ ॥ ২৪ ॥

## শাঙ্করভাষ্যম্।

যত্বিতি। যত্তু কামেপ্সুনা কর্ম্মফলপ্রেপ্সুনেত্যর্থঃ কর্ম্ম সাহংকারেণেতি ন তত্ত্বজ্ঞানাপেক্ষয়া কিং তর্হি লৌকিকশ্রোত্রিয়নিরহংকারাপেক্ষয়া যোহি পরমার্থনিরহংকার আত্মবিন্ন তস্য কামেপ্সুত্ববহুলায়াসকর্ত্তৃত্বপ্রাপ্তিকস্যাপি কর্ম্মণোঽনাত্মবিৎ সাহংকারঃ কর্ত্তা কিমুত রাজসতামসয়োর্লোকেঽনাত্মবিদপি শ্রোত্রিয়ো নিরহংকারঃ উচ্যতে নিরহংকারো যোঽয়ং ব্রাহ্মণইতি তস্মাত্তদপেক্ষৈব সাহংকারেণ বেত্যুক্তং পুনঃশব্দঃ পাদপূরণার্থঃ ক্রিয়তে বহুলায়াসং কর্ম্ম মহতায়াসেন নির্ব্বর্ত্ত্যতে তৎ কর্ম্ম রাজসমুদাহৃতং ॥ ২৪ ॥

## গিরিকৃত টীকা।

রাজসং কর্ম্ম নির্দ্দিশতি যত্বিতি। ফলপ্রেপ্সুনা কর্ত্রা যৎ কর্ম্ম ক্রিয়তে তদ্রাজসমিত্যুত্তরত্র সম্বন্ধঃ। তত্ত্বজ্ঞানবতা নিরহংকারেণ সাহংকারেণাতত্ত্বজ্ঞেন ক্রিয়তে কর্ম্মেতি বিবক্ষাং বারয়তি সাহংকারেণেতি। তত্ত্বজ্ঞানবতা নিরহংকারেণ কৃতং কর্ম্মাপেক্ষ্য সাহংকারেণাজ্ঞেন কৃতমেতৎ কর্ম্মেতি ন বিবক্ষ্যতে চেত্তর্হি কিমত্র বিবক্ষিতমিতি পৃচ্ছতি কিং তর্হীতি। যোহি দুরিতরহিতঃ শ্রোত্রিয়োলোকাদনপেতস্তস্য যদহংকারবর্জ্জিতং কর্ম্ম তদপেক্ষয়েদং সাহংকারেণ কৃতং কর্ম্মেত্যুক্তমিত্যাহ লৌকিকেতি নন্থ তত্ত্বজ্ঞানবতোনিরহংকারস্য কর্ম্মকর্ত্তৃত্বমপেক্ষ্য সাহংকারেণেত্যাদি কিং নেষ্যতে তত্রাহ যোহীতি। বিশেষণান্তরবশাদেব তত্ত্ববিদোনিবারিতত্বান্ন তদপেক্ষমিদং বিশেষণমিত্যর্থঃ। সাহংকারস্যৈব রাজসে কর্ম্মণি কর্ত্তৃত্বমিত্যেতৎ কৈমুতিকন্যায়েন সাধয়তি সাত্বিকস্যেতি। নন্বাত্মবিদোঽন্যস্য নিরহংকারত্বাযোগাৎ কথং তদপেক্ষয়া সাহংকারেণেত্যুক্তং তত্রাহ লোকইতি ॥ ২৪ ॥

## স্বামিকৃতটীকা।

ইদানীং ত্রিবিধং কর্ম্মাহ নিয়তমিতি ত্রিভিঃ। নিয়তং নিত্যতয়া বিহিতং সঙ্গরহিতমভিনিবেশশূন্যং অরাগদ্বেষতঃ পুত্রাদিপ্রীত্যা বা শত্রুদ্বেষেণ বা যৎ কৃতং ন ভবতি ফলং প্রাপ্তুমিচ্ছতীতি ফলপ্রেপসুস্তদ্বিলক্ষণেন নিষ্কামেণ কর্ত্রা যৎ কৃতং কর্ম্ম তৎ সাত্বিকমুচ্যতে ॥ ২৩ ॥

রাজসং কর্ম্মাহ যত্বিতি। যত্তু কর্ম্ম কামেপ্সুনা ফলং প্রাপ্তুমিচ্ছতা সাহঙ্কারেণ বা মৎসমঃ কোঽন্যঃ শ্রোত্রিয়োঽস্তীত্যেবং নিরূঢ়াহঙ্কারযুক্তেন চ ক্রিয়তে তচ্চ পুনর্ব্বহুলায়াসমতিক্লেশযুক্তং তৎকর্ম্ম রাজসমুদাহৃতং ॥ ২৪ ॥

অনুবন্ধং ক্ষয়ং হিংসামনপেক্ষ্য চ পৌরুষম্।
মোহাদারভ্যতে কর্ম্ম যৎতত্তামসমুচ্যতে ॥ ২৫ ॥
মুক্তসঙ্গোঽনহংবাদী ধৃত্যুৎসাহসমন্বিতঃ।
সিদ্ধ্যসিদ্ধ্যোর্নির্ব্বিকারঃ কর্ত্তা সাত্ত্বিক উচ্যতে ॥ ২৬ ॥

## শাঙ্করভাষ্যম্।

অনুবন্ধমিতি। অনুবন্ধঃ পশ্চাদ্ভাবি যদ্বস্তু সোঽনুবন্ধ উচ্যতে তঞ্চানুবন্ধং ক্ষয়ং যস্মিন্ কর্ম্মণি ক্রিয়মাণে শক্তিক্ষয়োঽর্থক্ষয়ো বা স্যাত্তং ক্ষয়ং হিংসাং প্রাণিপীড়াঞ্চানপেক্ষ্য চ পৌরুষং পুরুষকারং শক্নোমীদং কর্ম্ম সমর্পয়িতুমিত্যেবমাত্মসামর্থ্যং ইত্যেতান্যনুবন্ধাদীন্য-নপেক্ষ্য পৌরুষান্তানি মোহাদবিবেক আরভ্যতে কর্ম্ম যৎ তৎ তামসন্তমোনির্বৃত্তমু-চ্যতে ॥ ২৫ ॥

মুক্তেতি। মুক্তসঙ্গো মুক্তঃ পরিত্যক্তঃ সঙ্গো যেন স মুক্তসঙ্গোঽনহম্বাদী নাহংবদন-শীলো ধৃত্যুৎসাহসমন্বিতোধৃতির্দ্ধারণমুৎসাহমুদ্যমস্তাভ্যাং সমন্বিতঃ সংযুক্তো ধৃত্যুৎসাহসম-ন্বিতঃ সিদ্ধ্যসিদ্ধ্যোঃ ক্রিয়ামাণস্য কর্ম্মণঃ ফলসিদ্ধাবসিদ্ধৌ চ সিদ্ধ্যসিদ্ধ্যোঃ নির্ব্বিকারঃ কেবলং শাস্ত্রপ্রমাণপ্রযুক্তফলরাগাদিনা যুক্তো যঃ স নির্ব্বিকারউচ্যতে এবম্ভূতঃ কর্ত্তা যঃ স সাত্ত্বিক উচ্যতে ॥ ২৬ ॥

## গিরিকৃত টীকা।

সম্প্রতি তামসং কর্ম্মোদাহবতি অনুবন্ধমিত্যাদিনা ॥ ২৫ ॥

ইদানীং কর্ত্তৃত্রৈবিধ্যং ব্রুবন্নাদৌ সাত্ত্বিকং কর্ত্তারং দর্শয়তি মুক্তেতি। সঙ্গোনাম ফলা-ভিসন্ধির্ব্বা কর্ত্তৃত্বাভিমানো বা নাহংবচনশীলঃ কর্ত্তাহমিতি বদনশীলো ন ভবতীত্যর্থঃ। ধারণং ধৈর্য্যং ক্রিয়মাণস্য কর্ম্মণো যদি ফলাসিদ্ধিস্তর্হি নানুষ্ঠানবিশ্রম্ভঃ সম্ভবেদিত্যাশঙ্ক্যাহ কেবলমিতি। ফলরাগাদিনেত্যাদিশব্দেন কর্ম্মরাগো গৃহ্যতে। অযুক্ত ইতি চ্ছেদঃ ॥ ২৬ ॥

## স্বামিকৃত টীকা।

তামসং কর্ম্মাহ অনুবন্ধমিতি। অনুবধ্যতইত্যনুবন্ধনং পশ্চাদ্ভাবি শুভাশুভং ক্ষয়ং বিত্ত-ক্ষয়ং হিংসাং পরপীড়াং পৌরুষঞ্চ স্বসামর্থ্যমনপেক্ষ্যাপর্য্যালোচ্য কেবলং মোহাদেব যৎ কর্ম্মারভ্যতে তত্তামসমুদাহৃতং ॥ ২৫ ॥

কর্ত্তারং ত্রিবিধমাহ মুক্তসঙ্গ ইতি ত্রিভিঃ। মুক্তসঙ্গস্ত্যক্তাভিনিবেশঃ অনহংবাদী গর্ব্বোক্তিরহিতঃ ধৃতির্ধৈর্য্যং উৎসাহউদ্যমস্তাভ্যাং সমন্বিতঃ সংযুক্তঃ আরব্ধস্য কর্ম্মণঃ সিদ্ধাবসিদ্ধৌ চ নির্ব্বিকারো হর্ষবিষাদশূন্যঃ সএবংভূতঃ কর্ত্তা সাত্ত্বিক উচ্যতে ॥ ২৬ ॥

রাগী কর্ম্মফলপ্রেপ্সুর্লুব্ধো হিংসাত্মকোঽশুচিঃ।
হর্ষশোকান্বিতঃ কর্ত্তা রাজসঃ পরিকীর্ত্তিতঃ ॥ ২৭
অযুক্তঃ প্রাকৃতঃ স্তব্ধঃ শঠো নৈষ্কৃতিকোঽলসঃ।
বিষাদী দীর্ঘসূত্রী চ কর্ত্তা তামস উচ্যতে ॥ ২৮ ॥

## শাঙ্করভাষ্যম্।

রাগীতি। রাগী রাগোঽস্যাস্তীতি রাগী কর্ম্মফলপ্রেপ্সুঃ কর্ম্মফলার্থী লুব্ধঃ পরদ্রব্যেষু সঞ্জাততৃষ্ণঃ তীর্থাদৌ চ স্বদ্রব্যাপরিত্যাগী হিংসাত্মকঃ পরপীড়কস্বভাবঃ অশুচির্ব্বাহ্যান্তঃশৌচবর্জ্জিতোহর্ষশোকান্বিতঃ ইষ্টপ্রাপ্তৌ হর্ষোঽনিষ্টপ্রাপ্তাবিষ্টবিযোগে চ শোকস্তাভ্যাং হর্ষশোকাভ্যাং সমন্বিতঃ সংযুক্তঃ তস্যৈব চ কর্ম্মণঃ সম্পত্তিবিপত্ত্যোর্হর্ষশোকৌ স্যাতাং তাভ্যাং সমন্বিতঃ সংযুক্তো যঃ কর্ত্তা স রাজসঃ পরিকীর্ত্তিতঃ ॥ ২৭ ॥

অযুক্তইতি। অযুক্তোঽসমাহিতঃ প্রাকৃতোঽত্যন্তাসংস্কৃতবুদ্ধিঃ প্রকৃতিপরবশো বালিশঃ স্তব্ধো দণ্ডবৎ ন নমতি কস্মৈচিচ্ছঠঃ মায়াবী শক্তিগূহনকারী মায়াবান্নৈষ্কৃতিকঃ পরবৃত্তিচ্ছেদনপরঃ অলসোঽপ্রবৃত্তিশীলঃ কর্ত্তব্যেষপি বিষাদী সর্ব্বদা অবসন্নস্বভাবঃ দীর্ঘসূত্রী চ কর্ত্তব্যানাং দীর্ঘপ্রসারণঃ সর্ব্বদানিন্দস্বভাবঃ যদদ্য শ্বোবা কর্ত্তব্যং তন্মাসেনাপি ন করোতি যশ্চৈবম্ভূতঃ স কর্ত্তা তামসউচ্যতে ॥ ২৮ ॥

## গিরিকৃত টীকা।

রাজসং কর্ত্তারং কথয়তি রাগীতি। কর্ম্মবিষয়োরাগঃ, কর্ম্মফলপ্রেপ্সুরিতি ফলরাগস্য পৃথক্কথনাৎ স্বাভিপ্রায়াপ্রকটীকরণপূর্ব্বকং পরপীড়নং পরবৃত্তিবিচ্ছেদনং তেন স্বার্থপর ইত্যর্থঃ ॥ ২৭ ॥

দীর্ঘং সূত্রয়িতুং শীলমস্যেতি ব্যুৎপত্তিং গৃহীত্বাবিবক্ষিতমর্থমাহ কর্ত্তব্যানামিতি। এবং ক্রিয়মাণে সতি অনিষ্টমিদং কথঞ্চিদাপদ্যেত যদা পুনরেবং ক্রিয়তে তদা ত্বনিষ্টমেব সম্ভাবনোপনীতমিতি চিন্তাপরংপরায়াং মন্থরবৃত্তিরিত্যর্থঃ। তদেব স্পষ্টয়তি যদদ্যেতি ॥ ২৮ ॥

## স্বামিকৃত টীকা।

রাজসং কর্ত্তারমাহ রাগীতি। রাগী পুত্রাদিপ্রীতিমান্ কর্ম্মফলপ্রেপ্সুঃ কর্ম্মফলকামী লুব্ধঃ পরস্বাভিলাষী হিংসাত্মকোমারকস্বভাবঃ অশুচিঃ বিহিতশৌচশূন্যঃ লাভালাভয়োর্হর্ষশোকাভ্যাং সমন্বিতঃ কর্ত্তা রাজসঃ ॥ ২৭ ॥

তামসং কর্ত্তারমাহ অযুক্ত ইতি। অযুক্তোঽনভিহিতঃ প্রাকৃতোবিবেকশূন্যঃ স্তব্ধোঽনম্রঃ শঠঃ শক্তিগূহনকারী নৈষ্কৃতিকঃ পরাপমানী অলসোঽনুদ্যমশীলঃ বিষাদী শোকশীলঃ যদদ্য শ্বোবা কর্ত্তব্যং তন্মাসেনাপি ন সম্পাদয়তি যঃ স দীর্ঘসূত্রী এবংভূতঃ কর্ত্তা তামসঃ।

বুদ্ধের্ভেদং ধৃতেশ্চৈব গুণতস্ত্রিবিধং শৃণু।
প্রোচ্যমানমশেষেন পৃথক্ত্বেন ধনঞ্জয় ॥ ২৯ ॥
প্রবৃত্তিঞ্চ নিবৃত্তিঞ্চ কার্য্যাকার্য্যে ভয়াভয়ে।
বন্ধং মোক্ষঞ্চ যা বেত্তি বুদ্ধিঃ সা পার্থ সাত্ত্বিকী ॥ ৩০ ॥

## শাঙ্করভাষ্যম্।

বুদ্ধের্ভেদমিতি। বুদ্ধের্ভেদং ধৃতেশ্চৈব ভেদং গুণতঃ সত্ত্বাদিগুণতঃ ত্রিবিধং শৃণ্বিতি সূত্রোপন্যাসঃ প্রোচ্যমানং কথ্যমানমশেষতোযথাবৎ পৃথক্ত্বেন বিবেকতো ধনঞ্জয় দিগ্বিজয়ে মানুষং দৈবঞ্চ প্রভূতং ধনং জয়তি তেনাসৌ ধনঞ্জয়োঽর্জ্জুনঃ ॥২৯॥

প্রবৃত্তিঞ্চেতি। প্রবৃত্তিঞ্চ প্রবৃত্তিঃ প্রবর্ত্তনং বন্ধহেতুঃ কর্ম্মমার্গঃ নিবৃত্তিঞ্চ নিবৃত্তির্মোক্ষহেতুঃ সন্ন্যাসমার্গঃ বন্ধমোক্ষসমানবাক্যত্বাৎ প্রবৃত্তিনিবৃত্তী কর্ম্মসন্ন্যাসমার্গাবিত্যবগম্যতে অথবা কার্য্যাকার্য্যে বিহিতপ্রতিষিদ্ধে লৌকিকে বা শাস্ত্রবুদ্ধের্বা কর্ত্তব্যাকর্ত্তব্যে করণাকরণে ইত্যেতৎ কস্য দেশকালাদ্যপেক্ষয়া বিজানাতি দৃষ্টাদৃষ্টার্থানাং কর্ম্মণাং ভয়াভয়ে বিভেত্যস্মাদিতি ভয়ন্তদ্বিপরীতমভয়ং ভয়ঞ্চাভয়ঞ্চ ভয়াভয়ে দৃষ্টাদৃষ্টয়োর্ভয়াভয়য়োঃ কারণে ইত্যর্থঃ বন্ধং সহেতুকং মোক্ষঞ্চ সহেতুকং যা বেত্তি বিজানাতি বুদ্ধিঃ সা পার্থ সাত্ত্বিকী তত্র জ্ঞানং বুদ্ধের্বৃত্তির্বুদ্ধিস্তু বৃত্তিমতী ধৃতিরপি বৃত্তিবিশেষ এব বুদ্ধেঃ ॥৩০॥

## গিরিকৃত টীকা।

জ্ঞানাদীনাং প্রত্যেকং ত্রৈবিধ্যমুক্ত্বা বৃত্তিমত্যা বুদ্ধেস্তদ্বৃত্তেশ্চ ধৃত্যাখ্যায়াস্ত্রৈবিধ্যং সূচয়তি বুদ্ধেরিতি। সূত্রবিবরণং প্রতিজানীতে প্রোচ্যমানমিতি। অর্জ্জুনস্য ধনঞ্জয়ত্বং ব্যুৎপাদয়তি দিগিতি ॥ ২৯ ॥

তত্রাদৌ সাত্ত্বিকীং বুদ্ধিং নির্দ্দিশতি প্রবৃত্তিঞ্চেতি। প্রবৃত্তিরাচরণমাত্রং অনাচরণমাত্রঞ্চ নিবৃত্তিরিতি কিং নেষ্যতে তত্রাহ বন্ধেতি। যস্মিন্ বাক্যে বন্ধমোক্ষাবুচ্যেতে তস্মিন্নেব প্রবৃত্ত্যোরুক্তত্বাৎ কর্ম্মমার্গস্য বন্ধহেতুত্বান্মোক্ষহেতুত্বাচ্চ সন্ন্যাসমার্গস্য তাবেবাত্র

## স্বামিকৃত টীকা।

কর্ত্তৃত্রৈবিধ্যেনৈব জ্ঞাতুরপি ত্রৈবিধ্যমুক্তং কর্ম্মত্রৈবিধ্যে নৈব জ্ঞাতুরপি ত্রৈবিধ্যমুক্তং কর্ম্মত্রৈবিধ্যেন চ জ্ঞেয়স্যাপি ত্রৈবিধ্যমুক্তং জ্ঞাতব্যং বুদ্ধেস্ত্রৈবিধ্যেন চ করণস্যাপ্যুক্তং ভবিষ্যতি ॥ ২৮ ॥

ইদানীং বুদ্ধের্ধৃতেশ্চ ত্রৈবিধ্যং প্রতিজানীতে বুদ্ধের্ভেদমিতি। স্পষ্টোঽর্থঃ ॥ ২৯ ॥

তত্র বুদ্ধেস্ত্রৈবিধ্যমাহ প্রবৃত্তিমিতি ত্রিভিঃ। প্রবৃত্তিং ধর্ম্মে নিবৃত্তিমধর্ম্মে যস্মিন্ দেশে কালে চ যৎ কার্য্যমকার্য্যঞ্চ ভয়াভয়ে কার্য্যাকার্য্যনিমিত্তৌ অর্থানর্থৌ কথং বন্ধঃ কথং

যয়া ধর্ম্মমধর্ম্মঞ্চ কার্য্যঞ্চাকার্য্যমেব চ।
অযথাবৎ প্রজানাতি বুদ্ধিঃ সা পার্থ রাজসী ॥ ৩১ ॥
অধর্ম্মং ধর্ম্মমিতি যা মন্যতে তমসাবৃতা।
সর্ব্বার্থান্ বিপরীতাংশ্চ বুদ্ধিঃ সা পার্থ তামসী ॥ ৩২ ॥

## শাঙ্করভাষ্যম্।

যয়েতি। যয়া ধর্ম্মং শাস্ত্রচোদিতং অধর্ম্মঞ্চ প্রতিষিদ্ধং কার্য্যঞ্চাকার্য্যমেব চ পূর্ব্বোক্তে এব কার্য্যাকার্য্যে অযথাবন্ন যথাবৎ সর্ব্বতো নির্ণয়েন ন প্রজানাতি যা বুদ্ধিঃ সা পার্থ রাজসী ॥ ৩১ ॥

অধর্ম্মমিতি। অধর্ম্মং প্রতিষিদ্ধং ধর্ম্মং বিহিতমিতি যা মন্যতে জানাতি তমসাবৃতা সতী সর্ব্বার্থান্ সর্ব্বানেব জ্ঞেয়পদার্থান্বিপরীতানেব জানাতি বুদ্ধিঃ সা পার্থ তামসী ॥৩২॥

---

## গিরিকৃত টীকা।

গ্রাহ্যাবিত্যর্থঃ। করণাকরণয়োর্নির্ব্বিষয়ত্বাযোগাদ্বিষয়াপেক্ষামবতার্য্য যোগ্যং বিষয়ং নির্দ্দিশতি কস্যেতি। অনিষ্টসাধনং ভয়মিষ্টসাধনমভয়মিতি বিভজতে ভয়েতি। বন্ধাদি-জ্ঞানমাত্রস্য বুদ্ধ্যন্তরেঽপি সম্ভবাদ্বিশেষণং ন বুদ্ধিশব্দিতস্য জ্ঞানস্য প্রাগেব ত্রৈবিধ্যপ্রতি-পাদনাৎ কিমিতি বুদ্ধেরিদানীং ত্রৈবিধ্যং প্রতিজ্ঞায় ব্যুৎপাদ্যতে তত্রাহ জ্ঞানমিতি। তর্হি জ্ঞানেন গতত্বান্ন পুনর্ব্বৃত্তির্ব্যুৎপাদনীয়েত্যাশঙ্ক্যাহ বৃত্তিরপীতি। বিশেষশব্দেন জ্ঞানা-দ্ব্যাবৃত্তিরিষ্টা ॥ ৩০ ॥

কার্য্যাকার্য্যয়োর্দ্ধর্ম্মাধর্ম্মাভ্যাং পৌনরুক্ত্যং পরিহরতি পূর্ব্বোক্ত ইতি। পূর্ব্বশ্লোকে কার্য্যাকার্য্যশব্দাভ্যাং দৃষ্টাদৃষ্টার্থানাং কর্ম্মণাং করণাকরণে নির্দ্দিষ্টে তয়োরেবাত্রাপি গ্রহান্ন ধর্ম্মাধর্ম্মাভ্যাং পূর্ব্বপর্য্যায়াভ্যাঙ্গতার্থতেত্যর্থঃ যা বুদ্ধির্যয়া বুদ্ধ্যা বোদ্ধা নির্ণয়েন ন জানা-তীত্যর্থঃ। ৩১ ॥

ধর্ম্মশব্দো নপুংসকলিঙ্গোঽপীত্যভিপ্রেত্য ধর্ম্মমিত্যুক্তং তমসাবৃতাঽবিবেকেন বেষ্টিতে-ত্যর্থঃ। কার্য্যাকার্য্যাদীনুক্তাংশ্চ সংগ্রহীতুং সর্ব্বার্থানিত্যুক্তং তদ্ব্যাচষ্টে সর্ব্বানেবেতি। বিপরীতাংশ্চেতি চকারমবধারণে গৃহীত্বা বিপরীতানেবেত্যুক্তং ॥ ৩২ ॥

## স্বামিকৃত টীকা।

বা মোক্ষ ইতি যা বুদ্ধিরন্তঃকরণং বেত্তি সা সাত্তিকী। যয়া পুমান্ বেত্তীতিবক্তব্যে করণে কর্তৃত্বোপচারঃ কাষ্ঠানি পচন্তীতিবৎ ॥ ৩০ ॥

রাজসীং বুদ্ধিমাহ যয়েতি। অযথাবৎ সন্দেহাস্পদত্বেনেত্যর্থঃ স্পষ্টমন্যৎ ॥ ৩১ ॥

তামসীং বুদ্ধিমাহ অধর্ম্মমিতি। বিপরীতগ্রাহিণী বুদ্ধিস্তামসীবুদ্ধীত্যর্থঃ। বুদ্ধিরন্তঃকরণং

ধৃত্যা যয়া ধারয়তে মনঃপ্রাণেন্দ্রিয়ক্রিয়াঃ।
যোগেনাব্যভিচারিণ্যা ধৃতিঃ সা পার্থ সাত্ত্বিকী ॥ ৩৩ ॥
যয়া তু ধর্ম্মকামার্থান্ ধৃত্যা ধারয়তেঽর্জ্জুন।
প্রসঙ্গেন ফলাকাঙ্ক্ষী ধৃতিঃ সা পার্থ রাজসী ॥ ৩৪ ॥

## শাঙ্করভাষ্যম্

ধৃত্যেতি। ধৃত্যা যয়াঽব্যভিচারিণ্যেতি ব্যবহিতেন সম্বন্ধঃ, ধারয়তে কিং মনঃপ্রাণেন্দ্রিয়ক্রিয়াঃ মনশ্চ প্রাণাশ্চেন্দ্রিয়াণি তেষাং ক্রিয়াশ্চেষ্টাস্তা উচ্ছাস্ত্রমার্গপ্রবৃত্তের্ধারয়তি ধৃত্যাহি ধার্য্যমাণা অনুচ্ছাস্ত্রমার্গবিষয়া ভবন্তি। যোগেনেতি যোগেন সমাধানেনাব্যভিচারিণ্যা নিত্যসমাধানানুগতয়েত্যর্থঃ এতদুক্তং ভবত্যব্যভিচারিণ্যা ধৃত্যা মনঃপ্রাণেন্দ্রিয়ক্রিয়াঃ ধার্য্যমাণা যোগেন ধারয়তীতি সৈবংলক্ষণা ধৃতিঃ সা পার্থ সাত্ত্বিকী ॥ ৩৩ ॥

যয়েতি। যয়া তু ধর্ম্মকামার্থান্ ধর্ম্মশ্চ কামশ্চার্থশ্চ তে ধর্ম্মকামার্থাঃ তান ধর্ম্মকামার্থান্ ধৃত্যা যয়া ধারয়তে মনসি নিত্যকর্ত্তব্যরূপানেব ধারয়তে হে অর্জ্জুন। প্রসঙ্গেন যস্য যস্য ধর্ম্মাদের্ধারণপ্রসঙ্গস্তেন তেন প্রসঙ্গেন ফলাকাঙ্ক্ষী চ ভবতি যঃ পুরুষঃ তস্য ধৃতির্যা সা পার্থ রাজসী ॥ ৩৪ ॥

## গিরিকৃত টীকা।

ইদানীং ধৃতিত্রৈবিধ্যং ব্যুৎপিপাদয়িষুরাদৌ সাত্ত্বিকীং ধৃতিং ব্যুৎপাদয়তি ধৃত্যেতি। নির্দ্দিষ্টানাঞ্চেষ্টানাং কথং ধৃত্যা ধারণং তত্রাহ তা ইতি। তদেবানুভবেন সাধয়তি ধৃত্যা হীতি। ধ্রিয়তেঽনয়েতি ধৃতির্যত্র বিশেষঃ তয়া ধৃত্যা ধার্য্যমাণা যথোপদিষ্টাশ্চেষ্টাঃ শাস্ত্রমতিক্রম্য নার্থান্তরাবগাহিন্যো ভবন্তীত্যর্থঃ। ধৃতিমেব সমাধ্যবিনাভূতত্বেন বিশিনষ্টি যোগেন ইতি। নমু ধৃতের্নিয়মেন সমাধ্যনুগতত্বং কথমুক্তক্রিয়াধারণোপযোগীত্যাশঙ্ক্যাহ এতদিতি। উক্তক্রিয়া ধার্য্যমাণা যোগেন ব্রহ্মণি সমাধানেনৈকাগ্র্যেণাব্যভিচারিণ্যাঽবিনাভূতয়া ধৃত্যা ধারয়তীত্যর্থঃ তদবিনাভাবাভাবে নিয়মেন তদ্ধারণাসিদ্ধেরিত্যর্থঃ ॥৩৩॥

রাজসীং ধৃতিং দর্শয়তি যয়া ত্বিতি। তেষাং ধারণপ্রকারমভিনয়তি মনসীতি। ফলাকাঙ্ক্ষীতি কস্য বিশেষণং তত্রাহ যঃ পুরুষইতি ॥ ৩৪ ॥

## স্বামিকৃত টীকা।

পূর্ব্বোক্তং জ্ঞানতত্ত্বদ্বৃত্তিঃ ধৃতিরপি তদ্বৃত্তিরেব। যদ্বা, অন্তঃকরণস্য ধর্ম্মিণো বুদ্ধিরপ্যধ্যবসায়লক্ষণা বৃত্তিরেব ইচ্ছাদ্বেষাদীনাং তদ্বৃত্তীনাং বহুত্বেঽপি ধর্ম্মাধর্ম্মভয়াভয়সাধনত্বেন প্রাধান্যাদেতাসাং ত্রৈবিধ্যমুক্তং উপলক্ষণঞ্চৈতদন্যাসাং ॥ ৩২ ॥

ইদানীং ধৃতেস্ত্রৈবিধ্যমাহ ধৃত্যেতি ত্রিভিঃ। যোগেন চিত্তৈকাগ্র্যেণ হেতুনাঽব্যভি-

যয়া স্বপ্নং ভয়ং শোকং বিষাদং মদমেব চ।
ন বিমুঞ্চতি দুর্ম্মেধা ধৃতিঃ সা তামসী মতা ॥ ৩৫ ॥
সুখং ত্বিদানীং ত্রিবিধং শৃণু মে ভরতর্ষভ।
অভ্যাসাদ্রমতে যত্র দুঃখান্তঞ্চ নিগচ্ছতি ॥ ৩৬ ॥

## শাঙ্করভাষ্যম্

যয়েতি। যয়া স্বপ্নং নিদ্রাং ভয়ম্লাশং শোকং সন্তাপং বিষাদমবসাদং বিষণ্ণবদনতাং মদং বিষয়সেবাং আত্মনো বহুমন্যমানো মত্তইব মদমেব চ মনসি নিত্যমেব কর্ত্তব্যতয়া কুর্ব্বন্ন বিমুঞ্চতি ধারয়ত্যেব দুর্ম্মেধাঃ কুৎসিতমেধাঃ পুরুষো যস্তস্য ধৃতির্যা সা তামসী মতা ॥৩৫॥

গুণভেদেন ক্রিয়াণাং কারকাণাঞ্চ ত্রিধা ভেদউক্তোঽথেদানীং ফলস্য সুখস্য ত্রিবিধো ভেদউচ্যতে সুখমিতি। সুখন্ত ইদানীং ত্রিবিধং শৃণু সমাধানং কুর্ব্বত্যেতম্মে মম ভরতর্ষভ অভ্যাসাৎ পরিচয়াদাবৃত্তেঃ রমতে রতিং প্রতিপদ্যতে যত্র যস্মিন্ সুখানুভবে দুঃখান্তঞ্চ দুঃখাবসানং দুঃখোপশমঞ্চ নিগচ্ছতি নিশ্চয়েন প্রাপ্নোতি ॥ ৩৬ ॥

## গিরিকৃত টীকা।

তামসীং ধৃতিং ব্যাচষ্টে যয়েতি। শোকং প্রিয়বিয়োগনিমিত্তং সন্তাপং বিষণ্ণতামিন্দ্রিয়াণাং গ্লানিং বিষয়সেবা কুমার্গপ্রবৃত্তেরুপলক্ষণমুক্তং স্বপ্নাদিমদান্তং সর্ব্বমেব কর্ত্তব্যতয়াত্মনো বহুমন্যমানো মনসি নিত্যমেব কুর্ব্বন্দুর্ম্মেধাঃ ন মুঞ্চতি কিন্তু ধারয়ত্যেবেতি যোজনা ॥ ৩৪ ॥

বৃত্তমনূদ্যান্তরশ্লোকতাৎপর্য্যমাহ গুণেত্যাদিনা। ক্রিয়মাণং কারকাণাং গুণতস্ত্রৈবিধ্যোক্ত্যনন্তরং ফলস্য সুখস্য ত্রৈবিধ্যোক্ত্যবসরে সতীত্যাহ ইদানীমিতি। হেয়োপাদেয়ভেদার্থং ত্রৈবিধ্যং সমাধানমৈকাগ্র্যং মম বচনাদিতি শেষঃ, যত্রেত্যুভয়ত্র সম্বধ্যতে, তত্ত্রিবিধং সুখমিতি পূর্ব্বেণ সম্বন্ধঃ ॥৩৬॥

## স্বামিকৃত টীকা।

চারিণ্যা বিষয়ান্তরমধারয়ন্ত্যা যয়া মনসঃ প্রাণস্য ইন্দ্রিয়াণাঞ্চ ক্রিয়া ধারয়তে নিয়চ্ছতি সা ধৃতিঃ সাত্ত্বিকী ॥ ৩৩ ॥

রাজসীং ধৃতিমাহ যয়া ত্বিতি। যয়া তু ধৃত্যা ধর্ম্মার্থকামান্ প্রাধান্যেন ধারয়তে ন বিমুঞ্চতি তৎপ্রসঙ্গেন তৎফলাকাঙ্ক্ষী চ ভবতি সা রাজসী ধৃতিঃ ॥৩৪॥

তামসীং ধৃতিমাহ যয়েতি। দুষ্টা অবিবেকবহুলা মেধা যস্য স দুর্মেধাঃ পুরুষো যয়া ধৃত্যা স্বপ্নাদীন্ন বিমুঞ্চতি পুনঃ পুনরাবর্ত্তয়তি স্বপ্নোঽত্র নিদ্রা সা ধৃতিস্তামসী ॥ ৩৫ ॥

ইদানীং সুখস্য ত্রৈবিধ্যং প্রতিজানীতে সুখন্ত্বিতি। স্পষ্টোঽর্থঃ ॥ ৩৬ ॥

যত্তদগ্রে বিষমিব পরিণামেঽমৃতোপমম্।
তৎসুখং সাত্ত্বিকং প্রোক্তমাত্মবুদ্ধিপ্রসাদজম্ ॥ ৩৭ ॥
বিষয়েন্দ্রিয়সংযোগাদ্যত্তদগ্রেঽমৃতোপমম্।
পরিণামে বিষমিব তৎসুখং রাজসং স্মৃতম্ ॥ ৩৮ ॥

---

## শাঙ্করভাষ্যম্।

যদিতি। যৎ সুখমগ্রে পূর্ব্বং প্রথমসন্নিপাতে জ্ঞানবৈরাগ্যধ্যানসমাধ্যারম্ভেঽত্যন্তায়াস-পূর্ব্বকত্বাদ্বিষমিব দুঃখাত্মকং ভবতি পরিণামে জ্ঞানবৈরাগ্যাদিপরিপাকজং সুখমমৃতোপমন্তৎ সুখং সাত্ত্বিকং প্রোক্তং বিদ্বদ্ভিরাত্মনো বুদ্ধিরাত্মবুদ্ধিরাত্মবুদ্ধেঃ প্রসাদো নৈর্ম্মল্যং সলিলবৎ স্বচ্ছতা ততো জাতমাত্মবুদ্ধিপ্রসাদজমাত্মবিষয়া বাত্মাবলম্বনা বুদ্ধিরাত্মবুদ্ধিস্তৎপ্রসাদে প্রকর্ষাদ্বা জাতমিত্যেতত্তস্মাৎ সাত্ত্বিকং তন্মতং ॥ ৩৭ ॥

বিষয়েতি। বিষয়েন্দ্রিয়সংযোগাদ্যৎ সুখং জায়তে প্রথমং প্রথমলক্ষণেঽমৃতোপমমমৃতসমং পরিণামে বিষমিব বলবীর্য্যরূপপ্রজ্ঞামেধাধনোৎসাহহানিহেতুত্বাদধর্ম্মতজ্জনিতনরকাদি-হেতুত্বাচ্চ পরিণামে তদুপভোগবিপরিণামান্তে বিষমিব তৎ সুখং রাজসং স্মৃতং ॥৩৮॥

## গিরিকৃত টীকা।

তত্র সাত্ত্বিকং সুখমাদেয়ত্বেন দর্শয়তি যত্তদিতি। প্রথমসন্নিপাতং বিভজতে জ্ঞানেতি। কুতস্তস্য দুঃখাত্মকত্বং তত্রাহ অত্যন্তেতি। দুঃখাত্মকত্বে দৃষ্টান্তমাহ বিষমিবেতি জ্ঞানাদিপরিপাকাবস্থা পরিণামস্তস্মিন্ সতি ততো জাতমিতি যোজনা। তত্রৈব হেত্বন্তরমাহ আত্মন ইতি। আত্মবুদ্ধিশব্দার্থান্তরমাহ আত্মবিষয়েতি। অন্তঃকরণনৈর্ম্মল্যাদ্বা সম্যগ্‌জ্ঞান-প্রকর্ষাদ্বা জাতত্বাদিতি তচ্ছব্দার্থঃ ॥ ৩৭ ॥

রাজসং সুখং হেয়ত্বায় কথয়তি বিষয়েতি। বলং সঙ্ঘাতসামর্থ্যং বীর্য্যং পরাক্রমকৃতং

## স্বামিকৃত টীকা।

তত্র সাত্ত্বিকং সুখমাহ অভ্যাসাদিতি সার্দ্ধেন যত্র যস্মিন্ সুখে অভ্যাসাদ্রমতে নতু বিষয়সুখইব সহসা রতিং প্রাপ্নোতি যস্মিন্ রমমাণশ্চ দুঃখস্যান্তমবসানং নিতরাং গচ্ছতি প্রাপ্নোতি। কীদৃশং যত্তৎ কিমপি অগ্রে প্রথমং বিষমিব মনঃসংযমাধীনত্বাদ্দুঃখাবহমিব ভবতি পরিণামে ত্বমৃতসদৃশং আত্মবিষয়া বুদ্ধিরাত্মবুদ্ধিস্তস্যাঃ প্রসাদো রজস্তমোময়তাত্যাগেন স্বচ্ছতয়াবস্থানং ততো জাতং যৎ সুখং তৎ সাত্ত্বিকং প্রোক্তং যোগিভিঃ ॥ ৩৭ ॥

রাজসং সুখমাহ বিষয়েতি। বিষয়াণামিন্দ্রিয়াণাঞ্চ সংযোগাৎ যত্তৎ প্রসিদ্ধং স্ত্রীসংসর্গাদিসুখং অমৃতমুপমা যস্য তাদৃশং ভবতি অগ্রে প্রথমং পরিণামে চ বিষতুল্যং ইহামুত্র চ দুঃখহেতুত্বাৎ তৎ সুখং রাজসং স্মৃতং ॥ ৩৮ ॥

যদগ্রে চানুবন্ধে চ সুখং মোহনমাত্মনঃ।
নিদ্রালস্যপ্রমাদোত্থং তত্তামসমুদাহৃতম্ ॥ ৩৯ ॥
ন তদস্তি পৃথিব্যাং বা দিবি দেবেষু বা পুনঃ।
সত্ত্বং প্রকৃতিজৈর্মুক্তং যদেভিঃ স্যাত্রিভির্গুণৈঃ ॥ ৪০ ॥

## শাঙ্করভাষ্যম্।

যদগ্রে চেতি। যদগ্রে চানুবন্ধে চাবসানোত্তরকালে চ সুখং মোহকরমাত্মনো নিদ্রালস্য-প্রমাদোত্থং নিদ্রা চালস্যঞ্চ প্রমাদশ্চ তেভ্যঃ সমুত্তিষ্ঠতীতি নিদ্রালস্য প্রমাদোত্থস্তত্তামসমুদাহৃতং ॥ ৩৯ ॥

অথেদানীং প্রকরণোপসংহারার্থঃ শ্লোক আরভ্যতে নেতি। ন তদস্তি তন্নাস্তি পৃথিব্যাং বা মনুষ্যাদি সত্ত্বং প্রাণিজাতমন্যদ্বাঽপ্রাণিজাতং দিবি দেবেষু বা পুনঃ সত্ত্বং প্রকৃতিজৈঃ প্রকৃতিতো জাতৈরেভিস্ত্রিভির্গুণৈঃ সত্ত্বাদিভির্ম্মুক্তং পরিত্যক্তং যৎ স্যাত্তবেন্ন তদস্তীতি পূর্ব্বেণ সম্বন্ধঃ। সর্ব্বঃ সংসারঃ ক্রিয়াকারকফললক্ষণঃ সত্ত্বরজস্তমোগুণাত্মকোঽ-

## গিরিকৃত টীকা।

যশো রূপং শরীরসৌন্দর্য্যং প্রজ্ঞা শ্রুতার্থগ্রহণসামর্থ্যং মেধা গৃহীতার্থস্যাবিস্মরণেন ধারণশক্তিঃ ধনং গোহিরণ্যাদি উৎসাহস্ত কার্য্যং প্রত্যুপক্রমাদিঃ, এতেষাং নাশকত্বাদৈষয়িকং সুখং বিষসমমিত্যর্থঃ। তত্রৈব হেত্বন্তরমাহ অধর্ম্মেতি ॥ ৩৮ ॥

তামসং সুখং ত্যাগার্থমেবোদাহরতি যদগ্রেচেতি। অনুবন্ধশব্দার্থমাহ অবসানেতি। মোহনং মোহকরস্তদুৎপত্তিহেতুমাহ নিদ্রেতি ॥ ৩৯ ॥

ক্রিয়াকারকফলাত্মনঃ সংসারস্য প্রত্যেকং সাত্ত্বিকাদিভেদেন ত্রৈবিধ্যমুক্ত্বা সংসারান্তর্ভূতমেব কিঞ্চিৎ গুণত্রয়াস্পৃষ্টমপি কচিত্তবিষ্যতীত্যাশঙ্ক্যাহ অথেতি। সংসারস্য সর্ব্বস্যৈব গুণত্রয়সংস্পৃষ্টত্বং প্রকরণং অন্যদাহাপ্রাণীত্যত্রাপ্রাণিশব্দেন প্রসিদ্ধ্যা স্থাবরাদি গৃহ্যতে। প্রকরণার্থমুপসংহৃতমনুবদতি সর্ব্বইতি। তস্যানেকাত্মকত্বেন হেয়ত্বং সূচয়তি ক্রিয়েতি। নির্গুণাদাত্মনোবৈলক্ষণ্যাচ্চ তস্য হেয়ত্বেত্যাহ সত্ত্বেতি। অনর্থত্বাচ্চ তস্য ত্যাজ্যত্বমনর্থত্বঞ্চাবিদ্যাকল্পিতত্বেনাবস্তুত্বাদিত্যাহ অবিদ্যেতি। ন কেবলমষ্টাদশে সংসারো দর্শিতঃ, কিন্তু

## স্বামিকৃত টীকা।

তামসং সুখমাহ যদিতি। অগ্রে চ প্রথমক্ষণে অনুবন্ধে চ পশ্চাদপি যৎ সুখমাত্মনো মোহকরং তদেবাহ নিদ্রা চ আলস্যঞ্চ প্রমাদশ্চ কর্ত্তব্যাবধানরাহিত্যেন মনোপ্রাহ্যমেতেভ্য উত্তিষ্ঠতি যৎ সুখং তত্তামসমুদাহৃতং ॥ ৩৯ ॥

অনুক্তমপি সংগৃহ্নন্ প্রকরণার্থমুপসংহরতি ন তদিতি ত্রিভিঃ। এভিঃ প্রকৃতিসংভবৈঃ

ব্রাহ্মণক্ষত্রিয়বিশাং শূদ্রাণাঞ্চ পরন্তপ।
কর্ম্মাণি প্রবিভক্তানি স্বভাবপ্রভবৈর্গুণৈঃ ॥ ৪১ ॥

## শাঙ্করভাষ্যম্।

বিদ্যাপরিকল্পিতঃ সমূলোঽনর্থ উক্তঃ বৃক্ষরূপকল্পবিকল্পনয়া চোর্দ্ধমূলমিত্যাদিনা তঞ্চাসঙ্গশস্ত্রেণ দৃঢ়েন ছিত্বা ততঃ পদন্তৎ পরিমার্গিতব্যমিতি চোক্তং তত্র চ সর্ব্বস্য ত্রিগুণাত্মকত্বাৎ সংসারকারণনিবৃত্ত্যনুপপত্তৌ প্রাপ্তায়াং যথা তন্নিবৃত্তিঃ স্যাত্তথা বক্তব্যং সর্ব্বশ্চ গীতাশাস্ত্রার্থ উপসংহর্ত্তব্য এতাবানেব চ সর্ব্বো বেদঃ স্মৃত্যর্থশ্চ ॥ ৪০ ॥

পুরুষার্থমিচ্ছদ্ভিরনুষ্ঠেয়ইত্যেবমর্থঃ ব্রাহ্মণক্ষত্রিয়বিশামিত্যাদিরাভ্যতে ব্রাহ্মণেতি। ব্রাহ্মণাশ্চ ক্ষত্রিয়াশ্চ বিশশ্চ ব্রাহ্মণক্ষত্রিযবিশস্তেষাং ব্রাহ্মণক্ষত্রিয়বিশাংশূদ্রাণাঞ্চ শূদ্রাণাঞ্চ

## গিরিকৃত টীকা।

পঞ্চদশেঽপীত্যাহ বৃক্ষেতি। চকারাৎ সর্ব্বঃ সংসারঃ ইত্যনুকৃষ্যতে। সংসারধ্বস্তিসাধনং সম্যগ্জ্ঞানঞ্চ তত্রৈবোক্তমিত্যাহ অসঙ্গেতি। বৃত্তমনুদ্যানন্তরসন্দর্ভতাৎপর্য্যমাহ তত্র চেতি। উক্তোবিনিবর্ত্তয়িষিতঃ সংসারঃ সতি সপ্তম্যা পরামৃশ্যতে, সর্ব্বোহি সংসারোগুণত্রয়াত্মকো ন চ গুণানাং প্রকৃত্যাত্মকানাং সংসারকারিণীভূতানাং নিবৃত্তির্যুক্তা প্রকৃতের্নিত্যত্বাদিত্যাশঙ্কায়াং স্বধর্ম্মানুষ্ঠানাত্তত্ত্বজ্ঞানোৎপত্ত্যা গুণানামজ্ঞানাত্মকানাং নিবৃত্তির্যথা ভবতি তথা স্বধর্ম্মজাতং বক্তব্যমিত্যুত্তরগ্রন্থপ্রবৃত্তিবিত্যর্থঃ। তত্তদ্বর্ণপ্রযুক্তধর্ম্মজাতমুপদেশে চোপসংহারপ্রকরণপ্রকোপঃ স্যাদিত্যাহ সর্ব্বশ্চেতি। উপসংহ্রতে গীতাশাস্ত্রার্থে যদ্যপি সর্ব্বো বেদার্থঃ স্মৃত্যর্থশ্চ সর্ব্ব উপসংহৃতস্তথাপি মুমুক্ষুভিরনুষ্ঠেয়মস্তি বক্তব্যমবশিষ্টমিত্যাশঙ্ক্যাহ এতাবানিতি। অনুষ্ঠেয়পরিমাণনির্দ্ধারণবদুক্তশঙ্কানিবর্ত্তনং শাস্ত্রার্থোপসংহারশ্চেত্যেতদুভয়ঞ্চকারার্থঃ ॥ ৪০ ॥

সম্প্রতি বর্ণচতুষ্টয়স্য অনুষ্ঠেয়ং ধর্ম্মজাতং সংকীর্ণমিতি সূত্রমুপন্যস্যতি ব্রাহ্মণেতি। উপনয়নসংস্কারবত্ত্বে সতি বেদাধিকারিত্বং সমানমিতি ত্রয়াণাং সমাসকরণমিতরেষামসমাসে

## স্বামিকৃত টীকা।

সত্বাদিভিগুণৈর্ম্মুক্তং হীনং সত্বং প্রাণিজাতং অন্যদ্বা যৎ স্যাত্তৎ পৃথিব্যাং মনুষ্যাদিষু দিবি দেবেষু চ ক্বাপি নাস্তীত্যর্থঃ ॥ ৪০ ॥

নমু যদ্যেবং সর্ব্বমপি ক্রিয়াকারকফলাদিকং প্রাণিজাতঞ্চ ত্রিগুণাত্মকমেব তর্হি কথমস্য মোক্ষ ইত্যপেক্ষায়াং স্বস্বাধিকারেণ বিহিতৈঃ কর্ম্মভিঃ পরমেশ্বরারাধনাত্তৎপ্রসাদলব্ধজ্ঞানেনেত্যেবং সর্ব্বগীতার্থসারং সংগৃহ্য দর্শয়িতুং প্রকারান্তরমারভতে ব্রাহ্মণেত্যাদি যাবদধ্যায়সমাপ্তি। হে পরন্তপ হে শত্রুতাপন ব্রাহ্মণানাং ক্ষত্রিয়াণাং বৈশ্যানাং শূদ্রাণাঞ্চ কর্ম্মণি প্রবিভক্তানি প্রকর্ষেণ বিভাগতোবিহিতানি, শূদ্রাণাং সমাসাৎ পৃথক্করণং দ্বিজ-

শমোদমস্তপঃ শৌচং ক্ষান্তিরার্জবমেব চ।
জ্ঞানং বিজ্ঞানমাস্তিক্যং ব্রহ্মকর্ম্ম স্বভাবজম্ ॥ ৪২ ॥

শাঙ্করভাষ্যম্।

শূদ্রাণামসমাসকরণমেকজাতিত্বে সতি বেদেঽনধিকারাৎ হে পরন্তপ কর্ম্মাণি প্রবিভক্তানীতরেতরবিভাগেন ব্যবস্থাপিতানি, কেন স্বভাবপ্রভবৈর্গুণৈঃ স্বভাব ঈশ্বরস্য প্রকৃতিঃ ত্রিগুণাত্মিকা মায়া সা প্রভবো যেষাং গুণানাং তে স্বভাবপ্রভবাস্তৈঃ শমাদীনি কর্ম্মাণি প্রবিভক্তানি ব্রাহ্মণাদীনামথ বা ব্রাহ্মণস্বভাবস্য সত্ত্বগুণঃ প্রভবঃ কারণং তথা ক্ষত্রিয়স্বভাবস্য সত্ত্বোপসর্জ্জনং রজঃপ্রভবঃ বৈশ্যস্বভাবস্য তমউপসর্জ্জনং রজঃপ্রভবঃ শূদ্রস্বভাবস্য রজউপসর্জ্জনং তমঃপ্রভবঃ প্রশান্ত্যৈশ্বর্য্যেহামূঢ়স্বভাবদর্শনাচ্চতুর্ণাং। অথবা জন্মান্তরকৃতসংস্কারঃ প্রাণিনাং বর্ত্তমানজন্মনি স্বকার্য্যাভিমুখত্বেনাভিব্যক্তঃ স্বভাবঃ সপ্রভবো যেষাং গুণানাস্তে স্বভাবপ্রভবাগুণাঃ গুণপ্রাদুর্ভাবস্য নিষ্কারণত্বানুপপত্তেঃ স্বভাবঃ কারণমিতি করণাবিশেষোপাদানং এবং স্বভাবপ্রভবৈঃ প্রকৃতিপ্রভবৈঃ সত্ত্বরজস্তমোভিগুণৈঃ স্বকার্য্যানুরূপেণ শমাদীনি কর্ম্মাণি প্রবিভক্তানি, ননু শাস্ত্রপ্রবিভক্তানি শাস্ত্রেণ বিহিতানি ব্রাহ্মণাদীনাং শমাদীনি কর্ম্মাণি কথমুচ্যতে সত্ত্বাদিগুণপ্রবিভক্তানীতি নৈষ দোষঃ শাস্ত্রেণাপি ব্রাহ্মণাদীনাং সত্ত্বাদিগুণবিশেষাপেক্ষয়ৈব শমাদীনি কর্ম্মাণি প্রবিভক্তানি ন গুণানপেক্ষয়েতি শাস্ত্রপ্রবিভক্তান্যপি কর্ম্মাণি গুণপ্রবিভক্তানীত্যুচ্যতে ॥ ৪১ ॥

গিরিকৃত টীকা।

হেতুমাহ শূদ্রাণামিতি। একজাতিত্বমুপনয়নবর্জ্জিতত্বং কর্ম্মণামসংকীর্ণত্বেন ব্যবস্থাপকং প্রশ্নপূর্ব্বকং প্রকটয়তি কেনেত্যাদিনা। স্বভাবপ্রভবৈগুণৈরিত্যস্যার্থান্তরমাহ অথবেতি। উক্তব্যবস্থায়াং কার্য্যদর্শনং প্রমাণয়তি প্রশান্তীতি। স্বভাবশব্দস্যার্থান্তরমাহ অথবেতি। কিমিতি গুণাভিব্যক্তেরুক্তব্যসনাধীনত্বমত্রাহ গুণেতি। ননু নাস্তি গুণপ্রাদুর্ভাবস্য নির্দ্ধারণত্বং প্রকৃতিজৈর্গুণৈরিতি প্রকৃতের্গুণকারণত্বাভিধানাদতআহ স্বভাবইতি। বাসনাকারণমিতি গুণব্যক্তেনিমিত্তকারণত্বং বিবক্ষিতং প্রকৃতিস্তু উপাদানমিতি ভাবঃ। উক্তমুপসংহরতি এবমিতি। স্বভাবপ্রভবৈঃ সত্ত্বাদিগুণৈঃব্রাহ্মণাদীনাং কর্ম্মাণি প্রবিভক্তানীত্যুক্তমাক্ষিপতি নন্বিতি। শাস্ত্রস্য ধর্ম্মবিভাগহেতোঃ সত্ত্বাদিবিশেষাপেক্ষয়ৈব বিভাগজ্ঞাপকত্বাদুভয়ত্র বিভাগহেতুত্বোক্তিরবিরুদ্ধেতি পরিহরতি নৈষদোষইতি ॥ ৪১ ॥

স্বামিকৃত টীকা।

স্বভাবেন বৈলক্ষণ্যাৎ, বিভাগোপলক্ষণমাহ স্বভাবঃ সাত্ত্বিকরাজসাদিঃ প্রভবতি প্রাদুর্ভবতি যেভ্যস্তৈর্গুণৈরুপলক্ষণভূতৈঃ। যদ্বা, স্বভাবপ্রভবৈঃ পূর্ব্বজন্মসংস্কারপ্রাদুর্ভূতৈরিত্যর্থঃ। তত্র সত্ত্বপ্রধানা ব্রাহ্মণাঃ সত্ত্বোপসর্জ্জনরজঃপ্রধানাঃ ক্ষত্রিয়াঃ তমউপসর্জ্জনরজঃপ্রধানা বৈশ্যাঃ রজউপসর্জ্জনতমঃপ্রধানাঃ শূদ্রাঃ ॥ ৪১ ॥

শৌর্য্যং তেজো ধৃতির্দাক্ষ্যং যুদ্ধে চাপ্যপলায়নম্।
দানমীশ্বরভাবশ্চ ক্ষাত্রকর্ম্ম স্বভাবজম্ ॥ ৪৩ ॥

---

## শাঙ্করভাষ্যম্।

কানি পুনস্তানি কর্ম্মাণীত্যুচ্যতে শমইতি। শমোদমশ্চ যথা ব্যাখ্যাতার্থৌ তপো যথোক্তং শরীরাদি শৌচং ব্যাখ্যাতং ক্ষান্তিঃ ক্ষমা আর্জ্জবং ঋজুতৈব চ জ্ঞানং বিজ্ঞানং আস্তিক্যং অস্তিভাবঃ শ্রদ্ধধানতা পরমার্থেষু আগমার্থেষু ব্রহ্মকর্ম্ম ব্রাহ্মণজাতেঃ কর্ম্ম ব্রহ্মকর্ম্ম স্বভাবজং যদুক্তং স্বভাবপ্রভবৈর্গুণৈঃ প্রবিভক্তানীতি তদেবোক্তং স্বভাবজমিতি ॥ ৪২ ॥

শৌর্য্যমিতি। শৌর্য্যং শূরস্য ভাবাস্তেজঃপ্রাগল্‌ভ্যং ধৃতির্দ্ধারণং সর্ব্বাবস্থাস্বনবসাদো ভবতি যয়া ধৃত্যোত্তম্ভিতস্য দাক্ষ্যং দক্ষস্য ভাবঃ সহসা প্রত্যুৎপন্নেষু কার্য্যেষ্বব্যামোহেন প্রবৃত্তির্যুদ্ধে চাপ্যপলায়নমপরাঙ্মুখীভাবঃ শত্রুভ্যঃ দানং দেয়েষু মুক্তহস্ততা ঈশ্বরভাবঃ ঈশ্বরস্য ভাবঃ প্রভুশক্তিপ্রকটীকরণমীশিতব্যান্ প্রতি ক্ষাত্রং কর্ম্ম ক্ষত্রিয়জাতের্ব্বিহিতং কর্ম্ম ক্ষাত্রং কর্ম্ম স্বভাবজং ॥ ৪৩ ॥

## গিরিকৃত টীকা।

মিত্যাহ তপইতি। শৌচমপি বাহ্যান্তরভেদেন প্রাগেবোক্তমিত্যাহ শৌচমিতি। ক্ষমা নামাক্রুষ্টস্য তাড়িতস্য বা মনসি বিকারবাহিত্যং জ্ঞানং শাস্ত্রীয়ং পদার্থজ্ঞানং বিজ্ঞানং শাস্ত্রার্থস্য স্বানুভবপর্য্যন্তত্বাপাদনং ত্রিধা ব্যাখ্যাতং স্বভাবশব্দার্থমুপেত্যাহ যদুক্তমিতি ॥৪২॥

শূরস্য ভাবো বিক্রমো বলবত্তরানপি প্রহর্ত্তুং প্রবৃত্তিঃ প্রাগল্‌ভ্যং পরৈরধর্ষণীয়ত্বং মহত্যামতিবিপদি দেহেন্দ্রিয়োত্তম্ভনী চিত্তবৃত্তির্ধৃতিরিতি ব্যাচষ্টে সর্ব্বাবস্থাস্বিতি। দক্ষস্যভাবমেব বিভজতে সহসেতি ॥ ৪৩ ॥

প্রবিভক্তানি কর্ম্মাণ্যেব প্রশ্নদ্বারা বিবিচ্য দর্শয়তি কানীত্যাদিনা। অন্তঃকরণোপশমঃ শমো দমো বাহ্যকরণোপরতিরিত্যুক্তং স্মারয়তি যথেতি। ত্রিবিধস্তপঃ সপ্তদশে দর্শিত

## স্বামিকৃত টীকা।

তত্র ব্রাহ্মণস্য স্বাভাবিকানি কর্ম্মাণ্যাহ শমইতি। শমশ্চিত্তোপরমঃ দমো বাহ্যেন্দ্রিয়োপরমঃ তপঃ পূর্ব্বোক্তং শারীরাদি শৌচং বাহ্যাভ্যন্তরং ক্ষান্তিঃ ক্ষমা আর্জবমবক্রতা জ্ঞানং শাস্ত্রীয়ং বিজ্ঞানমনুভবঃ আস্তিক্যমস্তি পরলোক ইতি নিশ্চয়ঃ এতচ্ছমাদি ব্রাহ্মণস্য স্বভাবাজ্জাতং কর্ম্ম ॥ ৪২ ॥

ক্ষত্রিয়স্য স্বাভাবিকং কর্ম্মাহ শৌর্য্যমিতি। শৌর্য্যং পরাক্রমঃ তেজঃ প্রাগল্‌ভ্যং ধৃতিধৈর্য্যং দাক্ষ্যং কৌশলং যুদ্ধে চাপ্যপলায়নং অপরাঙ্মুখতা দানমৌদার্য্যং ঈশ্বরভাবোনিয়মনশক্তিঃ এতৎ ক্ষত্রিয়স্য স্বাভাবিকং কর্ম্ম ॥ ৪৩ ॥

কৃষিগোরক্ষ্যবাণিজ্যং বৈশ্যকর্ম্ম স্বভাবজম্।
পরিচর্য্যাত্মকং কর্ম্ম শূদ্রস্যাপি স্বভাবজম্॥ ৪৪॥
স্বে স্বে কর্ম্মণ্যভিরতঃ সংসিদ্ধিং লভতে নরঃ।
স্বকর্ম্মনিরতঃ সিদ্ধিং যথা বিন্দতি তচ্ছৃণু॥ ৪৫॥

## শাঙ্করভাষ্যম্।

কৃষীতি। কৃষিগোরবাণিজ্যং কৃষিশ্চ গোরক্ষ্যঞ্চ বাণিজ্যঞ্চ, কৃষিগোরক্ষ্যবাণিজ্যং কৃষির্ভূমের্বিলেখনং গাং রক্ষতীতি গোরক্ষস্তদ্ভাবো গোরক্ষ্যং পাশুপাল্যং বণিক্কর্ম্ম ক্রয়-বিক্রয়াদিলক্ষণং বৈশ্যকর্ম্ম বৈশ্যজাতেঃ কর্ম্ম বৈশ্যকর্ম্ম স্বভাবজং পরিচর্য্যাত্মকং শুশ্রূষা-স্বভাবং কর্ম্ম শূদ্রস্যাপি স্বভাবজং॥ ৪৪॥

এতেষাং জাতিবিহিতানাং কর্ম্মণাং সম্যগনুষ্ঠিতানাং স্বর্গপ্রাপ্তিঃ ফলং স্বভাবতঃ বর্ণা আশ্রমাদয়শ্চ স্বকর্ম্মনিষ্ঠাঃ প্রেত্য কর্ম্মফলমনুভূয় ততঃ শেষেণ বিশিষ্টদেশজাতিকুলধর্ম্মায়ুঃ-শ্রুতবৃত্তবিত্তসুখমেধসো জন্ম প্রতিপদ্যন্তে ইত্যাদিস্মৃতিভ্যঃ পুরাণে চ বর্ণানামাশ্রমাণাঞ্চ লোকফলভেদবিশেষস্মরণাৎ কাবণান্তবাত্বিদং বক্ষ্যমাণং ফলং শৃণু স্বে স্বেইতি। স্বে স্বে যথোক্তলক্ষণভেদে কর্ম্মণ্যভিরতস্তৎপরঃ সংসিদ্ধিং স্বকর্ম্মানুষ্ঠানাদশুদ্ধিক্ষয়ে সতি কায়েন্দ্রি-য়াণাং জ্ঞানাধিষ্ঠানযোগ্যতালক্ষণাং সংসিদ্ধিং লভতে প্রাপ্নোতি নরোঽধিকৃতঃ পুরুষঃ কিং স্বকর্ম্মানুষ্ঠানাদেব সাক্ষাৎ সংসিদ্ধিং ন কথং তর্হি স্বকর্ম্মনিরতঃ সিদ্ধিং যথা যেন প্রকারেণ বিন্দতি তচ্ছৃণু॥ ৪৫॥

## গিরিকৃত টীকা।

বৈশ্যশূদ্রয়োঃ কর্ম্ম বিবক্ষয়ানুবদতি কৃষিগোবক্ষ্যবাণিজ্যমিতি স্পষ্টোঽর্থঃ।

স্বভাবস্ত পূর্ব্ববচ্ছমাদিপরিচর্য্যান্তংকর্ম্মাণি বিভজ্যোক্তানামভ্যুদয়ং ফলমাদাবুপন্যস্যতি এতেষামিতি। স্বভাবতোবিহিতত্বাদেব মোক্ষাপেক্ষামন্তরেণানুষ্ঠানাদিত্যর্থঃ। তত্র প্রমাণমাহ বর্ণাইতি। শেষশব্দেন ভুক্তকর্ম্মণোঽতিরিক্তং কর্ম্মানুশয়শব্দিতমুচ্যতে, প্রত্যে-কং দেশাদিভির্ব্বিশিষ্টশব্দঃ সম্বধ্যতে, আদিশব্দেন তদ্যথা অন্নফলার্থে নির্ম্মিতে চ্ছায়াগন্ধা-দ্যনুৎপদ্যতে এবং ধর্ম্মং চর্য্যমাণমর্থা অনুৎপদ্যন্তে ন ধর্ম্মহানির্ভবতীতি স্মৃতির্গৃহ্যতে।

## স্বামিকৃত টীকা।

বৈশ্যশূদ্রয়োঃ কর্ম্মাহ কৃষীতি। কৃষিঃ কর্ষণং গাংরক্ষতীতি গোরক্ষস্তস্য ভাবোগোরক্ষ্যং পাশুপাল্যমিত্যর্থঃ বাণিজ্যং ক্রয়বিক্রয়াদি এতদ্বৈশ্যস্য স্বাভাবিকং কর্ম্ম। ত্রৈবর্ণিকপরি-চর্য্যাত্মকং শূদ্রস্যাপি স্বভাবজং কর্ম্ম॥ ৪৪॥

এবংভূতস্যাপি ব্রাহ্মণাদিকর্ম্মণোজ্ঞানহেতুত্বমাহ স্বে স্বইতি। স্বস্বাধিকারবিহিতে কর্ম্মণ্য ভিরতঃ পরিনিষ্ঠিতো নরঃ সংসিদ্ধিং জ্ঞানযোগ্যতাং লভতে॥ ৪৫॥

যতঃ প্রবৃত্তির্ভূতানাং যেন সর্ব্বমিদং ততম্।
স্বকর্ম্মণা তমভ্যর্চ্চ্য সিদ্ধিং বিন্দতি মানবঃ ॥ ৪৬ ॥

## শাঙ্করভাষ্যম্

যতইতি। যতো যস্মাৎ প্রবৃত্তিরুৎপত্তিশ্চেষ্টা বা যস্মাদন্তর্যামিণ ঈশ্বরাৎ ভূতানাং প্রাণিনাং স্যাৎ যেনেশ্বরেণ সর্ব্বমিদং ততংজগদ্ব্যাপ্তং, স্বকর্ম্মণা পূর্ব্বোক্তেন প্রতিবর্ণন্তমীশ্বরমভ্যর্চ্চ্য পূজয়িত্বাবাধ্য কেবলং জ্ঞাননিষ্ঠাযোগ্যতালক্ষণাং সিদ্ধিং বিন্দতি মানবো মনুষ্যঃ ॥ ৪৬ ॥

## গিরিকৃত টীকা।

ইতশ্চোক্তানাং কর্ম্মণাং স্বর্গফলত্বং যুক্তমিত্যাহ পুবাণে চেতি। উক্তং হি যস্ত সম্যক্ করোত্যেবং গৃহস্থঃ পবমং বিধিন্তদ্বর্ণবন্ধমুক্তোঽসৌ লোকানাপ্নোত্যনুত্তমানিতি যন্ত্বেতাং নিয়তশ্চর্য্যাং বানপ্রস্থশ্চবেৎ মুনিঃ স দহত্যগ্নিবদ্দোষান্ জযেল্লোকাংশ্চ শাশ্বতান্ ইতি মোক্ষাশ্রয়শ্চবতে যো যথোক্তং শুচিঃ সুসংকল্পিতবুদ্ধিযুক্তঃ অনিন্ধনজ্যোতিরিব প্রশান্তং স ব্রহ্মলোকং শ্রয়তে দ্বিজাতিরিতি চ সর্ব্ব এতে পুণ্যলোকা ভবন্তীতি শ্রুতিশ্চকাবর্থঃ। যদি পুনর্ম্মোক্ষাপেক্ষয়োক্তানি কর্ম্মাণ্যনুষ্ঠীযেবংস্তদা মোক্ষফলত্বং তেষাং সেৎস্যতীত্যাহ কারণান্তরাদিতি। তদেব কাবণান্তরং যন্মোক্ষাপেক্ষযা তেষামনুষ্ঠানং। মোক্ষোপাযেষু সাত্বিকেষু ব্রাহ্মণধর্ম্মেষু ক্ষত্রিযাদীনামনধিকারাৎ ব্রাহ্মণানামেব মোক্ষো ন ক্ষত্রিয়াদীনামিত্যাশঙ্ক্যাহ স্বে স্বে ইতি। যথা স্বে কর্ম্মণ্যভিরতস্য বুদ্ধিশুদ্ধিদ্বাবা জ্ঞাননিষ্ঠাযোগ্যতাপ্রাপ্তাপ্রাপ্তজ্ঞানস্য মোক্ষোপপত্তেব্র্াহ্মণাতিরিক্তস্যাপি জ্ঞানবতোমুক্তিবিতি মত্বা পূর্ব্বার্দ্ধং ব্যাচষ্টে স্বে স্বে ইত্যাদিনা। সংসিদ্ধিশব্দস্য মোক্ষার্থত্বং গৃহীত্বা স্বধর্ম্মনিষ্ঠত্বমাত্রেণ তল্লাভে তাদর্থ্যেন সন্ন্যাসাদিবিধানানর্থক্যমিতি মন্বানঃ শঙ্কতে কিমিতি। ন তাবন্মাত্রেণ সাক্ষান্মোক্ষো জ্ঞাননিষ্ঠাযোগ্যতা চেতি পবিহরতি নেতি। তর্হি কথং স্বধর্ম্মনিষ্ঠস্য সংসিদ্ধিরিতি পৃচ্ছতি কথং তর্হীতি। উত্তরার্দ্ধেনোত্তবমাহ স্বকর্ম্মেতি। তচ্ছৃণু তং প্রকারমেকাগ্রচেতা ভূত্বা শ্রুত্বাবধারয় ইত্যর্থঃ ॥ ৪৫ ॥

তমেব প্রকারং স্ফুটয়তি যতইতি। যতঃশব্দার্থং যস্মাদিত্যুক্তং ব্যক্তীকরোতি যস্মাদিতি। প্রাণিনামুৎপত্তির্যস্মাদীশ্বরাত্তেষাং চেষ্টা চ যস্মাদন্তর্যামিণো যেন চ সর্ব্বং ব্যাপ্তং

## স্বামিকৃত টীকা।

কর্ম্মণা জ্ঞানপ্রাপ্তিপ্রকারমাহ স্বকর্ম্মেতি সার্দ্ধেন। স্বকর্ম্মপরিনিষ্ঠিতো যথা যেন প্রকারেণ তত্ত্বজ্ঞানং লভতে তং প্রকারং শৃণু, তমেবাহ যতইতি। যতোঽন্তর্যামিণঃ পরমেশ্বরাদ্ভূতানাং প্রাণিনাং প্রবৃত্তিশ্চেষ্টা ভবতি যেনাত্মনা সর্ব্বমিদং বিশ্বং ততং ব্যাপ্তং তমীশ্বরং স্বকর্ম্মণা অভ্যর্চ্চ্য পূজয়িত্বা সিদ্ধিং লভতে মনুষ্যঃ ॥ ৪৬ ॥

শ্রেয়ান্ স্বধর্ম্মো বিগুণঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ।
স্বভাবনিয়তং কর্ম্ম কুর্ব্বন্নাপ্নোতি কিল্বিষম্ ॥ ৪৭ ॥

## শাঙ্করভাষ্যম্।

যতএবমতঃ শ্রেয়ানিতি। শ্রেয়ান্ প্রশস্যতরঃ স্বোধর্ম্মঃ স্বধর্ম্মঃ বিগুণোঽপীত্যপি-শব্দো দ্রষ্টব্যঃ পরধর্ম্মাৎ স্বনুষ্ঠিতাৎ স্বভাবনিয়তং স্বভাবেন নিয়তং যদুক্তং স্বভাবজমিতি তদেবোক্তং স্বভাবনিয়তমিতি যথা বিষজাতস্য কৃমেঃ বিষং ন দোষকরং তথা স্বভাব-নিয়তং কর্ম্ম কুর্ব্বন্নাপ্নোতি কিল্বিষং পাপং স্বভাবনিয়তং কর্ম্ম কুর্ব্বাণো বিষজাতইব কৃমিঃ কিল্বিষং নাপ্নোতীত্যুক্তং ॥ ৪৭ ॥

## গিরিকৃত টীকা।

মৃদেব ঘটাদিকার্য্যস্য কারণাতিরিক্তস্বরূপাভাবাত্তং স্বকর্ম্মণাভ্যর্চ্চ্য মানবঃ সংসিদ্ধিং বিন্দ-তীতি সম্বন্ধঃ। নহি ব্রাহ্মণাদীনাং যথোক্তধর্ম্মনিষ্ঠয়া সাক্ষান্মোক্ষ উপলভ্যতে তস্য জ্ঞানৈ-কলভ্যত্বাৎ কিন্তু তন্নিষ্ঠানাং শুদ্ধবুদ্ধীনাং কর্ম্মসু ফলমপশ্যতামীশ্বরপ্রসাদাসাদিতবিবেক-বৈরাগ্যবতাং সন্ন্যাসিনাং জ্ঞাননিষ্ঠাযোগ্যতাবতাং জ্ঞানপ্রাপ্ত্যা মুক্তিরিত্যভিপ্রেত্যাহ কেবলমিতি ॥ ৪৬ ॥

স্বধর্ম্মানুষ্ঠানস্য বুদ্ধিশুদ্ধ্যাদিদ্বারা মোক্ষাবসায়িত্বাত্তদনুষ্ঠানমাবশ্যকমিত্যাহ যতইতি। নন্বু যুদ্ধাদিলক্ষণং স্বধর্ম্মং কুর্ব্বন্নপি হিংসাধীনং পাপং প্রাপ্নোতি তৎ কথং স্বধর্ম্মঃ শ্রেয়া-নিতি তত্রাহ স্বভাবেতি। স্বকীয়ং বর্ণাশ্রমং নিমিত্তীকৃত্য বিহিতং স্বভাবজমিত্যধস্তাদুক্ত-মিত্যাহ যদুক্তমিতি। নিগ্রহাত্মকমপি বিহিতং কর্ম্ম কুর্ব্বন্ পাপং নাপ্নোতীত্যত্র দৃষ্টান্ত-মাহ যথেতি। ইতশ্চ বিহিতং কর্ম্ম দোষবদপি কর্ত্তব্যং প্রকারান্তরাসম্ভবাদিত্যুক্তানু-বাদপূর্ব্বকং কথয়তি স্বভাবেত্যাদিনা। নহি কৃমির্ব্বিষজোবিষনিমিত্তং মরণং প্রতিপদ্যতে তথোপাধিকৃতঃ পুরুষোদোষবদপি বিহিতং কর্ম্ম কুর্ব্বন পাপং নাপ্নোতীত্যুক্তমিত্যর্থঃ ॥৪৭॥

তর্হি দোষরহিতমেব ভিক্ষাটনাদি সর্ব্বৈরনুষ্ঠীয়তামতো ন পাপপ্রাপ্তিরিত্যাশঙ্ক্যাহ পরেতিউক্তমিত্যনুবর্ত্ততে তর্হি পাপপ্রাপ্তিশংস্কাংপরিহর্ত্তুমকর্ম্মনিষ্ঠত্বমেব সর্ব্বেষাং স্যাদিত্যাশঙ্ক্য জ্ঞানাভাবান্নৈবমিত্যাহ অনাত্মজ্ঞইতি। পূর্ব্ববদত্রাপি সম্বন্ধঃ। প্রকারান্তরাসম্ভবকৃতং ফলমাহ অতইতি। সহ জায়তইতি সহজং স্বভাবনিয়তং নিত্যং কর্ম্ম তদ্বিহিতত্বান্নির্দোষমপি হিংসাত্মকতয়া সদোষমিত্যত্র হেতুমাহ ত্রিগু-

## স্বামিকৃত টীকা।

স্বকর্ম্মণেতি বিশেষণস্য ফলমাহ শ্রেয়ানিতি। বিগুণোঽপি স্বধর্ম্মঃ সম্যগনুষ্ঠিতাদপি পরধর্ম্মাদ্ভিক্ষাটনাদিঃপরধর্ম্মস্ততঃ শ্রেষ্ঠইতি মন্তব্যং যতঃ স্বভাবেন পূর্ব্বোক্তেন নিয়তং নিয়মেনোক্তং কর্ম্ম কুর্ব্বন্ কিল্বিষং নাপ্নোতি। ৪৭ ॥

সহজং কর্ম্ম কৌন্তেয় সদোষমপি ন ত্যজেৎ।
সর্ব্বারম্ভা হি দোষেণ ধূমেনাগ্নিরিবাবৃতাঃ॥ ৪৮॥

## শাঙ্করভাষ্যম্।

পরধর্ম্মশ্চ ভয়াবহ ইত্যনাত্মজ্ঞশ্চ ন হি কশ্চিৎ ক্ষণমপ্যকর্ম্মকৃত্তিষ্ঠতীত্যতঃ সহজমিতি। সহজং সহ জন্মনৈবোৎপন্নং সহজং কিং তৎ কর্ম্ম কৌন্তেয় সদোষমপি ত্রিগুণত্বান্ন ত্যজেৎ সর্ব্বারম্ভা আরভ্যন্ত ইত্যারম্ভাঃ সর্ব্বকর্ম্মাণীত্যেতৎ প্রকরণাৎ যঃ কশ্চিদারম্ভঃ স্বধর্ম্মঃ পরধর্ম্মশ্চ তে সর্ব্বে সদোষাঃ হি যস্মাত্রিগুণাত্মকত্বমত্র হেতুঃ ত্রিগুণাত্মকত্বাদ্দোষেণ ধূমেন সহজেনাগ্নিবিবাবৃতাঃ সহজস্য কর্ম্মণঃ স্বধর্ম্মাখ্যস্য পরিত্যাগেন পরধর্ম্মানুষ্ঠানেঽপি দোষাৎ নৈবমুচ্যতে ভয়াবহশ্চ পরধর্ম্মঃ ন শক্যতেঽশেষতস্ত্যক্তুমজ্ঞেন কর্ম্মবতা তস্মান্ন ত্যজেদিত্যর্থঃ কিমশেষতস্ত্যক্তুমশক্যং কর্ম্মেতি ন ত্যজেৎ কিং বা সহজস্য কর্ম্মণস্ত্যাগে দোষো ভবতীতি। কিঞ্চাতো যদি তাবদশেষতস্ত্যক্তুমশক্যমিতি ন ত্যাজ্যং সহজং কর্ম্মৈবন্তর্হ্যশেষতস্ত্যাগে গুণএব স্যাদিতি সিদ্ধং ভবতি সত্যমেবমশেষতস্ত্যাগএব নোপপদ্যতইতি চেৎ কিং নিত্যপ্রচলিতাত্মকঃ পুরুষো যথা সাঙ্খ্যানাং গুণাঃ কিম্বা ক্রিয়ৈব কারকং যথা বৌদ্ধানাং পঞ্চস্কন্ধাঃ ক্ষণপ্রধ্বংসিনঃ উভয়থাপি কর্ম্মণোঽশেষতস্ত্যাগো ন ভব-

## গিরিকৃত টীকা।

ণেতি। সত্ত্বাদিগুণত্রয়াবদ্ধতয়া হিংসাদি দোষবদপি কর্ম্ম বিহিতমত্যাজ্যমিত্যর্থঃ। কর্ম্মণাং দোষবত্ত্বং প্রপঞ্চয়তি সর্ব্বেতি। আরম্ভশব্দস্য কর্ম্মব্যুৎপত্ত্যা স্বপরসর্ব্বকর্ম্মার্থত্বে কর্ম্মণাং প্রকৃতত্বং হেতুমাহ প্রকরণাদিতি। দোষেণেত্যাদি ব্যাচষ্টে যঃ কশ্চিদিতি। তে সর্ব্বে দোষেণাবৃতাইতি সম্বন্ধঃ। সর্ব্বকর্ম্মণাং দোষাবৃতত্বে হিশব্দোপাত্তং যস্মাদিত্যুক্তং হেতুমেবাভিনয়তি ত্রিগুণাত্মকত্বমিতি। স্বভাবনিয়তস্য কর্ম্মণো দোষবত্ত্বাত্তত্ত্যাগদ্বারা পরধর্ম্মমাতিষ্ঠমানস্যাপি নৈব দোষাদ্বিমোক্ষঃ সম্ভবতি ন চ পরধর্ম্মোঽনুষ্ঠাতুং শক্যতে ভয়াবহত্বান্ন চ তর্হি কর্ম্মণোঽশেষতোঽনুষ্ঠানমেবাজ্ঞস্যাশেষকর্ম্মত্যাগাযোগাদতঃ সহজং কর্ম্ম সদোষমপি ন ত্যাজ্যমিতি বাক্যার্থমাহ সহজস্যেতি। সহজং কর্ম্ম সদোষ

## স্বামিকৃত টীকা।

যদি পুনঃ সাংখ্যদৃষ্ট্যা স্বধর্ম্মে হিংসালক্ষণং দোষং মত্বা পরধর্ম্মং শ্রেষ্ঠং মন্যসে তর্হি সদোষত্বং পরধর্ম্মেঽপি তুল্যমিত্যাশয়েনাহ সহজমিতি। সহজং স্বভাববিহিতং কর্ম্ম সদোষমপি ন ত্যজেৎ হি যস্মাৎ সর্ব্বেঽপ্যারম্ভা দৃষ্টাদৃষ্টানি সর্ব্বাণ্যপি কর্ম্মাণি দোষেণ কেনচিদাবৃতা ব্যাপ্তাএব, যথা সহজেন ধূমেনাগ্নিরাবৃতস্তদ্বৎ, অতোযথাগ্নের্ধূমরূপং দোষমপাকৃত্য প্রতাপএব তমঃশীতাদিনিবৃত্তয়ে সেব্যতে তথা কর্ম্মণোঽপি দোষাংশং বিহায় গুণাংশএব শুদ্ধয়ে সেব্য ইত্যর্থঃ॥ ৪৮॥

## শাঙ্করভাষ্যম্।

ত্যথ তৃতীয়োঽপি পক্ষো যদা করোতি তদা সক্রিয়ং বস্তু যদা ন করোতি তদা নিষ্ক্রিয়ং বস্তু তদেব তত্রৈবং সতি শক্যং কর্ম্মমশেষতস্ত্যক্তুং অয়ং ত্বস্মিন্ তৃতীয়ে পক্ষে বিশেষো ন নিত্যপ্রচলিতং বস্তু নাপি ক্রিয়ৈব কারকং কিং তর্হি ব্যবস্থিতে দ্রব্যেঽবিদ্যমানা ক্রিয়োৎপদ্যতে বিদ্যমানা চ বিনশ্যতি। শুদ্ধং দ্রব্যং শক্তিমদবতিষ্ঠতইতি এবমাহুঃ কাণাদাস্তদেব চ কারকমিত্যস্মিন্ পক্ষে কো দোষইত্যয়মেব তু দোষো যতস্তভাগবতং মতমিদং কথং জ্ঞায়তে যতআহ ভগবান্নাসতোবিদ্যতে ভাবইত্যাদি কাণাদাদীনাং হ্যসতোভাবঃ সতশ্চাভাবইতীদং মতমভাগবতত্বেঽপি ন্যায়বত্বে কো দোষইতি চেদুচ্যতে দোষবত্বিদং সর্ব্বপ্রমাণবিরোধাৎ কথং যদি তাবদ্দ্ব্যণুকাদি দ্রব্যং প্রাগুৎপত্তেরত্যন্তমেবাসদুৎপন্নঞ্চ স্থিতং কঞ্চিৎ কালং পুনরত্যন্তমেবাসত্ত্বমাপদ্যতে তথা চ সত্যসদেব সজ্জায়তে অভাবো ভাবো

## গিরিকৃত টীকা।

মপি ন ত্যজেদিত্যত্র বিচারমবতারযতি কিমিতি। নহি কশ্চিদিতি ন্যায়াদিতিশেষঃ। দোষোবিহিতনিত্যত্যাগে প্রত্যবায়ঃ। সন্দিগ্ধস্য সপ্রযোজনস্য বিচার্য্যত্বাদুক্তসন্দেহে প্রযোজনং পৃচ্ছতি কিঞ্চাতইতি। তত্রাদ্যমনূদ্য ফলং দর্শযতি যদীতি। অশক্যানুষ্ঠানস্য গুণত্বেন প্রসিদ্ধত্বাৎ প্রসিদ্ধং হি মহোদধিমগস্ত্যস্য চুলুকীকৃত্য পিবতোগুণবত্ত্বন্তদাহ এবন্তর্হীতি। অশেষকর্ম্মত্যাগস্যগুণবত্বেঽপি প্রাগুক্তন্যাযেন তদযোগাত্তস্যাশক্যানুষ্ঠানতেতি শঙ্কতে সত্যমিতি। চোদ্যমেব বিবৃণ্বন্নাদ্যং বিভজতে কিমিতি। সত্ত্বাদিগুণবদাত্মনোনিত্যপ্রচলিতত্বেনাশেষতস্তেন ন কর্ম্ম ত্যক্তুং শক্যং নাপি রূপবিজ্ঞানবেদনাসংস্কারসংজ্ঞানং ক্ষণধ্বংসিনাং স্কন্ধানামিব ক্রিয়াকারকভেদাভাবাৎ কারকস্যৈবাত্মনঃ ক্রিয়াত্বমিত্যুক্তে কর্ম্মাশেষতস্ত্যক্তুং শক্যমুভয়থাপিস্বভাবসঙ্গাদিত্যাহ উভয়থেতি। পক্ষদ্বযানুবোধেনাশেষকর্ম্মত্যাগাযোগে বৈশেষিকশ্চোদয়তি অথেতি কদাচিদাত্মা সক্রিয়োনিঃক্রিয়শ্চ কদাচিদিতি স্থিতে ফলিতমাহ তত্রেতি। উক্তমেব পক্ষং পূর্ব্বোক্তপক্ষদ্বয়াদ্বিশেষদর্শনেন বিশদয়তি অযংত্বিতি। আগমাপায়িত্বে ক্রিযাযাস্তদ্বতোদ্রব্যস্য কথং স্থায়িতেত্যাশঙ্ক্যাহ শুদ্ধমিতি। ক্রিযাশক্তিমত্ত্বেঽপি ক্রিয়াবত্ত্বাভাবে কথং কারকত্বং ক্রিয়াং কুর্ব্বন্ হি কারকমিত্যভ্যুপগমাদিত্যাশঙ্ক্যাহ তদেবেতি ক্রিয়াশক্তিমদেব কারকং ন ক্রিয়াধিকরণং পরম্পরাশ্রয়াদিত্যর্থঃ। বৈশেষিকপক্ষে দোষাভাবাদস্তি সর্ব্বৈঃ স্বীকার্য্যতেত্যুপসংহরতি ইত্যস্মিন্নিতি। ভগবন্মতানুসারিত্বাভাবাদস্য পক্ষস্য ত্যাজ্যতেতি দূষয়তি অয়মেবেতি। ভগবন্মতানুসারিত্বমস্যাপ্রমাণিকমিতি শঙ্কতে কথমিতি। ভগবদ্বচনমুদাহরন্ পরপক্ষস্য তদনুগুণত্বাভাবমাহ যতইতি পরেষামপি মতমেতদনুগুণমেব কিং নস্যাদিত্যাশঙ্ক্যাহ কারণবাদিনাংহীতি। ভগবন্মতানুগুণত্বাভাবেঽপি ন্যায়ানুগুণত্বেন দোষরহিতং কাণাদাদীনাং মতমুপাদেয়মেব ন হি কাণাদমতং বিরোধাদুপেক্ষণীযমিতি শঙ্কতে অভাগবতত্বেঽপীতি ন্যায়-

## শাঙ্করভাষ্যম্।

ভবতি ভাবশ্চাভাবইতি তত্রভাবোজায়মানঃ প্রাগুৎপত্তেঃ শশবিষাণকল্পঃ সমবায্য-সমবায়িনিমিত্তাখ্যং কারণমপেক্ষ্য জায়তইতি ন চৈবমভাব উৎপদ্যতে কারণঞ্চাপেক্ষত-ইতি শক্যং বক্তুমসতাং শশবিষাণাদীনামদর্শনাদ্ভাবাত্মকাশ্চেৎ ঘটাদয়উৎপদ্যমানাঃ কিঞ্চিদভিব্যক্তিমাত্রে কারণমপেক্ষ্যোৎপদ্যন্তইতি শক্যং প্রতিপত্তুং কিঞ্চ অসতশ্চ সদ্ভাবে সতশ্চাসদ্ভাবে ন ক্বচিৎ প্রমাণপ্রমেয়ব্যবহারেষু বিশ্বাসঃ কস্যচিৎ স্যাৎ সৎ সদেবাসদসদে-বেতিনিশ্চয়ানুপপত্তেঃ কিঞ্চিৎপদ্যতইতি দ্ব্যণুকাদের্দ্রব্যস্য স্বকারণসত্তাসম্বন্ধমাহু প্রাগুৎ-পত্তেশ্চাসৎ পশ্চাৎ স্বকারণব্যাপারমপেক্ষ্য স্বকারণৈঃ পরমাণুভিঃ সত্তয়া চ সমবায়লক্ষ-ণেন সম্বন্ধেন সম্বদ্ধং সৎকারণসমবেতং সৎ ভবতি তত্র বক্তব্যং কথমসতঃ সৎকারণং ভবেৎ সম্বন্ধো বা কেনচিৎ। নহি বন্ধ্যাপুত্রস্য সত্তাসম্বন্ধো বা কারণং বা কেনচিৎ প্রমাণতঃ কল্পয়িতুং শক্যং ননু নৈবং বৈশেষিকৈরভাবস্য সম্বন্ধঃ কল্প্যতে দ্ব্যণুকাদীনাং হি দ্রব্যাণাং স্বকারণেন সমবায়লক্ষণঃ সম্বন্ধঃ সতামেবোচ্যতে ইতি ন সম্বন্ধাৎ প্রাক্ সত্বানভ্যুপগমান্নহি বৈশেষিকৈঃ কুলালদণ্ডচক্রাদিব্যাপারাৎ প্রাক্ ঘটাদীনামস্তিত্বমিষ্যতে ন চ মৃদএব ঘটাদ্যাকারপ্রাপ্তিমিচ্ছন্তি ততশ্চাসতএব সম্বন্ধঃ পরিশেষ্যাদিষ্টোভবতি নন্বসতোঽপি সমবায়লক্ষণঃ সম্বন্ধো ন বিরুদ্ধঃ ন বন্ধ্যাপুত্রাদীনামদর্শনাৎ ঘটাদেরেব প্রাগভাবস্য স্বকারণসম্বন্ধোভবতি ন বন্ধ্যাপুত্রাদেরভাবস্য তুল্যত্বেঽপীতি বিশেষোঽভাবস্য বক্তব্যঃ একস্যাভাবো দ্বয়োরভাবঃ সর্ব্বস্যাভাবঃ প্রাগভাবঃ প্রধ্বংসাভাবইতরেতরাভা-বোঽত্যন্তাভাবইতি লক্ষণতো ন কেনচিদ্বিশেষো দর্শয়িতুং শক্যঃ অসতি চ বিশেষে ঘটস্য প্রাগভাবএব কুলালাদিভির্ঘটাভাবমাপদ্যতে সম্বধ্যতে চ ভাবেন কপালাখ্যেন কারণেন

## গিরিকৃত টীকা।

বত্ত্বমসিদ্ধমিতি দূষয়তি উচ্যতইতি। সর্ব্বপ্রমাণানুসারিণো মতস্য ন তদ্বিরোধিতেত্যাক্ষি-পতি কথমিতি। বৈশেষিকমতস্য সর্ব্বপ্রমাণবিরোধং প্রকটয়ন্নাদৌ তন্মতমনুবদতি যদীতি। অসতোজন্ম সতশ্চ নাশইতি স্থিতে ফলিতমাহ তথা চেতি। উক্তমেব বাক্যং ব্যাকরোতি অভাবইতি। সদেবাসত্ত্বমাপদ্যতইত্যুক্তং ব্যাচষ্টে ভাবশ্চেতি। ইতি মত-মিতি শেষঃ। তত্রৈবাভ্যুপগমান্তরমাহ তত্রেতি। প্রকৃতং মতং সপ্তম্যর্থঃ ইত্যভ্যুপগম্যত-ইতিশেষঃ। পরকীয়মভ্যুপগমং দূষয়তি নচেতি। এবমিতি পরপরিভাষানুসারেণেত্যর্থঃ। অদর্শনাদুৎপত্তেরপেক্ষায়াশ্চেতিশেষঃ। কথন্তর্হি তন্মতেঽপি ঘটাদীনাং কারণাপেক্ষাণামুৎ-পত্তির্নহি ভাবানাং কারণাপেক্ষোৎপত্তির্বা যুক্তেতি তত্রাহ ভাবেতি। ঘটাদীনামস্মৎ-পক্ষে প্রাগপি কারণাত্মনা সতামেবাব্যক্তনামরূপাণামভিব্যক্তিসামগ্রীমপেক্ষ্য পৃথগভি-ব্যক্তিসম্ভবান্নকিঞ্চিদনবদ্যমিত্যর্থঃ। অসৎকার্য্যবাদে দোষান্তরমাহ কিঞ্চেতি। পরমতে

## শাঙ্করভাষ্যম্।

সর্ব্বব্যবহাবযোগ্যশ্চ ভবতি নমু ঘটস্যৈব প্রধ্বংসাভাবোঽভাবত্বে সত্যপীতি প্রধ্বংসাদ্যভাবানাং ন ক্বচিদ্ব্যবহারযোগ্যত্বং প্রাগভাবস্যৈব দ্ব্যণুকাদিদ্রব্যাথ্যস্যোৎপাদিব্যবহারার্হত্বমিত্যেতদসমঞ্জসমভাবত্বাবিশেষাদত্যন্তপ্রধ্বংসাভাবয়োরিব। নমু নৈবাস্মাভিঃ প্রাগভাবস্য ভাবাপত্তিরুচ্যতে কিং তর্হি ভাবস্যৈব হি ভাবাপত্তির্যথা ঘটস্য ঘটাপত্তিঃ পটস্যপটাপত্তিঃ এতদপ্যভাবস্য ভাবাপত্তিবদেব প্রমাণবিরুদ্ধং সাঙ্খ্যস্যাপি যঃ পরিণামপক্ষঃ সোঽপ্যপূর্ব্বধর্ম্মোৎপত্তিবিনাশাঙ্গীকরণাদ্বৈশেষিকপক্ষান্ন বিশিষ্যতেঽভিব্যক্তিতিরোভাবাঙ্গীকরণেঽপ্যভিব্যক্তিতিরোভাবয়োর্ব্বিদ্যমানাবিদ্যমাননিরূপণে পূর্ব্ববদেব প্রমাণবিরোধঃ এতেন কারণস্যৈব সংস্থানমুৎপত্ত্যাদীত্যেতদপ্যযুক্তং। পারিশেষ্যাৎ সদেকমেব বস্তুবিদ্যয়োৎপত্তিবিনাশাদিধর্ম্মৈরনেকধা বিকল্প্যতইতীদং ভাগবতং মতমুক্তং নাসতোবিদ্যতে ভাবইত্যস্মিন্ শ্লোকে সৎপ্রত্যয়স্যাব্যভিচারাৎ ব্যভিচারাচ্চেতরেষামিতি। কথং তর্হি

## গিরিকৃত টীকা।

মানমেয়ব্যবহারে ক্বচিদপি বিশ্বাসো ন কস্যচিদিত্যত্র হেতুমাহ সৎসদেবেতি। নহি স তথৈবেতি নিশ্চিতং তস্যৈব পুনরসত্ত্বপ্রাপ্তেরিষ্টত্বান্ন বা স তথৈবেতি নিশ্চয়ঃ তথৈব সত্ত্ব প্রাপ্তেরুপগমাদতোযন্মানেন সদসদা নির্ণীতং তত্তথেতি বিশ্বাসাভাবাৎ মানবৈফল্যমিত্যর্থঃ। ইতশ্চাসৎকার্য্যবাদো ন যুক্তিমানিত্যাহ কিঞ্চেতি। তদেব হেত্বন্তরং স্ফোরয়িতুং পরমতমনুবদতি উৎপদ্যতইতীতি। পরকীয়ং বচনমেব ব্যাচষ্টে প্রাগিতি। সম্বন্ধং সদিত্যনেন কাবণাসম্বন্ধে সতি কার্য্যস্য সম্বন্ধো ভবতীত্যুক্তং তদেব স্ফুটয়তি কারণেতি। পরমতমেবমনুভাষ্য দূষয়তি তত্রেতি। কার্য্যস্যাসতোঽপি কারণং সম্ভবতি তস্য চ কার্য্যেণ সম্বন্ধঃ সিধ্যতীত্যাশঙ্ক্যাহ নহীতি। অসত্ত্বাদেবাসতঃ সম্বন্ধাভাবে কারণস্য সতোঽপি ন তেন সম্বন্ধোঽনুমাতুং শক্যতে সদসতোঃ সম্বন্ধাসম্ভবাদিত্যর্থঃ। কার্য্যস্যাত্যন্তাসত্ত্বানভ্যুপগমাৎ কারণসম্বন্ধঃ স্যাদিতি শংকতে নন্বিতি সতামেব দ্ব্যণুকাদীনাং কারণসম্বন্ধং শংকিত্বা দূষয়তি ন সম্বন্ধাদিতি। অনুত্ত্যুপগমমেব বিশদয়তি নহীতি। সদেব কারণং কার্য্যাকারমাপদ্য কার্য্যব্যবহারং নির্ব্বর্ত্তয়তীত্যভ্যুপগমান্নাস্তি সম্বন্ধানুপপত্তিরিত্যাশঙ্ক্যাপরাদ্ধান্তাস্যৈবমিত্যাহ নচেতি। কার্য্যস্য কারণসম্বন্ধাৎ পূর্ব্বং সত্ত্বাভাবে পরিশেষসিদ্ধমর্থং দর্শয়তি ততশ্চেতি। তত্র চানুপপত্তিরুক্তেতি শেষঃ সম্বন্ধিনোঃ সদসতোরসংযোগেঽপি সমবায়ঃ সদসতোঃ ভবেদিতি তস্য নিত্যত্বাদন্তরসম্বন্ধাভাবেঽপি স্থিতেরাবশ্যকত্বাদিতি শংকতে নন্বিতি। সদসতোর্ম্মিথঃ সম্বন্ধস্যাদৃষ্টত্বান্নেতি নিরাচষ্টে ন বন্ধ্যেতি। ঘটাদিপ্রাগভাবস্য অত্যন্তাভাবত্বাভাবাদ্বন্ধ্যাপুত্রাদিবিলক্ষণতয়া স্বকারণসম্বন্ধঃ সিধ্যতীত্যাশঙ্ক্যাহ ঘটাদেরিতি। উভয়ত্রাভাবত্বাবিশেষেঽপি কস্যচিৎ কারণসম্বন্ধো নেতরস্যেতি বিশেষে

## শাঙ্করভাষ্যম্।

আত্মনোঽবিক্রিয়ত্বেনাশেষতঃ কর্ম্মণস্ত্যাগো নোপপদ্যত ইতি যদি বস্তুভূতাগুণাঃ যদি বা অবিদ্যাকল্পিতাস্তদ্ধর্ম্মকর্ম্মতদাত্মন্যবিদ্যাধ্যারোপিতমেবেত্যবিদ্বান্ন হি কশ্চিৎ ক্ষণমপ্য-শেষতস্ত্যক্তুং শক্নোতীত্যুক্তঃ বিদ্বাংস্তু পুনর্ব্বিদ্যয়াঽবিদ্যায়াং নিবৃত্তায়াং শক্নোত্যে-বাশেষতঃ কর্ম্ম পবিত্যক্তুং অবিদ্যাঽধ্যারোপিতস্য শেষানুপপত্তেঃ নহি তৈমিরিকদৃষ্ট্যা-ধ্যারোপিতস্য দ্বিচন্দ্রাদেস্তিমিবাপগমে শেষোঽবতিষ্ঠতএবঞ্চ সতীদং বচনমুপপন্নং সর্ব্ব-কর্ম্মাণি মনসেত্যাদি স্বে স্বে কর্ম্মণ্যভিরতঃ সংসিদ্ধং লভতে নরঃ স্বকর্ম্মণা তমভ্যর্চ্চ্য সিদ্ধিং বিন্দতি মানবইতি চ ॥ ৪৮ ॥

---

## গিরিকৃত টীকা।

হেত্বভাবান্ন প্রাগভাবস্য কাবণসম্বন্ধঃ সম্ভবতীত্যর্থঃ। ঘটাদিপ্রাগভাবস্য সপ্রতিযোগিকত্বং বন্ধ্যাপুত্রাদের্নৈবমিতি বিশেষমাশঙ্ক্য দূষয়তি একস্যেতি। প্রাগভাবস্যেব প্রধ্বংসাভাবা-দেবপি সপ্রতিযোগিকত্বাবিশেষে স্বকাবণেন সম্বন্ধবিশেষঃ স্যাদিত্যর্থঃ। প্রাগভাবপ্র-ধ্বংসাভাবয়োর্ব্বিশেষাভাবে ফলিতমাহ অসতি চেতি। কপালশব্দোঘটকাবণীভূতমৃদবয়-ববিষয়ঃ, সর্ব্বো ব্যবহারো ঘটাশ্রিতোজন্মনাশাদিব্যবহারঃ, প্রধ্বংসাভাবস্তু ঘটস্যৈকভাবত্বে সত্যপি ন ঘটত্বমাপদ্যতে নাপি কাবণেন সম্বধ্যতে নচোৎপত্ত্যাদিব্যবহাবযোগ্যোভবতী-ত্যেতদযুক্তং প্রাগভাবেনাস্য বিশেষাভাবাদিত্যাহ নন্বিতি। অসমঞ্জসমিত্যনেনেতিশব্দঃ সম্বধ্যতে। অসমঞ্জসান্তরমাহ প্রধ্বংসাদীতি। অন্যোন্যাভাবাত্যন্তাভাবাদিপদার্থো ক্বচিদিতি দেশকালয়োর্গ্রহণং ব্যবহারোজন্মাদিরেব প্রাগভাবো নোৎপত্ত্যাদিব্যবহারযো-গ্যাভাবাৎ প্রধ্বংসাদিবদিত্যর্থঃ। প্রাগভাবস্য ঘটাভাবানভ্যুপগমাদনুমানং সিদ্ধসাধনং শঙ্কতে নন্বিতি। অভাবস্য ভাবাপত্ত্যনভ্যুপগমে ভাবস্যৈব ভাবাপত্তিরিত্যনিষ্টঃ স্যাদিতি দূষয়তি ভাবস্যেবেতি। তস্য তদাপত্তেরযোগ্যত্বে দৃষ্টান্তমাহ যথেতি। ভাবস্য ভাবাপত্তি রনিষ্টেতি দার্ষ্টান্তিকং স্পষ্টয়তি এতদপীতি। আরম্ভবাদোক্তদোষং পরিণামবাদেঽপি সঞ্চার-য়তি সাঙ্খ্যস্যেতি। ধর্ম্মঃ পরিণামঃ অসতোঽপূর্ব্বপবিণামস্যোৎপত্তেঃ সতশ্চ পূর্ব্বাপূর্ব্বপরি-ণামস্য নাশাদসদসদেব সচ্চ সদেবেতি ব্যবস্থাত্রাপি দুর্ঘটেত্যর্থঃ। নমু কার্য্যং কারণাত্মনা প্রাগপি সদেবাব্যক্তং কারকব্যাপারাদ্ব্যজ্যতে তেন ব্যক্তাব্যক্তয়োর্জন্মনাশব্যবহারাত্মত্বাৎ তদ্বিশেষসিদ্ধিস্তত্রাহ অভিব্যক্তীতি কারকব্যাপারাৎ প্রাগনভিব্যক্তিবদভিব্যক্তেঃ সত্ত্বম-সত্ত্বং বা সত্ত্বে কারকব্যাপারবৈয়র্থ্যাত্তদ্বিষয়প্রমাণবিরোধঃ দ্বিতীয়া পক্ষান্তরবদত্যন্তাসতঃ তন্নির্ব্বর্ত্ত্যত্বাযোগে সএব দোষঃ কারকব্যাপারাদূর্দ্ধংব্যক্তিবদব্যক্তেরপি সত্ত্বে সএব দোষঃ অসত্ত্বেঽপি সতোঽসত্ত্বাঙ্গীকারাৎ মানমেয়ব্যবহারে ন ক্বাপি বিশ্বাসঃ সৎসদেব অসদসদে-বেত্যনির্দ্ধারণাদিত্যর্থঃ। সাঙ্খ্যপক্ষপ্রতিক্ষেপন্যায়েন পক্ষান্তরমপি প্রতিক্ষিপ্তমিত্যাহ

অসক্তবুদ্ধিঃ সর্ব্বত্র জিতাত্মা বিগতস্পৃহঃ।
নৈষ্কর্ম্ম্যসিদ্ধিং পরমাং সন্ন্যাসেনাধিগচ্ছতি ॥ ৪৯ ॥

## শাঙ্করভাষ্যম্।

যা চ কর্ম্মজা সিদ্ধিরুক্তা জ্ঞাননিষ্ঠাযোগ্যতালক্ষণা তস্যাঃ ফলভূতা নৈষ্কর্ম্ম্যসিদ্ধির্জ্ঞাননিষ্ঠালক্ষণা বক্তব্যেতি শ্লোকআরভ্যতে। অসক্তবুদ্ধিরসক্তা সঙ্গরহিতা বুদ্ধিরন্তঃকরণং

## গিরিকৃত টীকা।

এতেনেতি। কারণস্যৈব কার্য্যরূপাপত্তিরুৎপত্তিস্তস্যৈব তদ্রূপত্যাগেন স্বরূপাপত্তির্নাশইত্যেতদপি ন পূর্ব্বরূপে স্থিতে নষ্টে চ পরস্য পররূপাপত্তেরনুপপত্তেনচ প্রাপ্তিরূপং স্থিতেন নষ্টেন বা ত্যক্তুং শক্যমিত্যর্থঃ। আরম্ভবাদে পরিণামবাদে চ উৎপত্ত্যাদিব্যবহারানুপপত্তৌ পরিশেষাযাতং দর্শয়তি পারিশেষ্যাদিতি। একস্যানেকবিধবিকল্পানুপপত্তিমাশংক্যাহ অবিদ্যয়েতি। অস্যাপি মতস্য ভগবন্মতানুবোধিত্বাভাবাদবিশিষ্টা ত্যাজ্যতেত্যাশঙ্ক্যাহ ইতীদমিতি। উক্তমেব ভগবন্মতং বিশদয়তি সৎপ্রত্যয়স্যেতি। সদেকমেব বস্তু স্যাদিতি শেষঃ। ইতরেষাং বিকারপ্রত্যয়ানাং রজতাদিধীবদর্থব্যভিচারাদবিদ্যয়া তদেব সদ্বস্ত্বনেকধা বিকল্প্যতইত্যাহ ব্যভিচারাচ্চেতি। ইতি মতং শ্লোকে দর্শিতমিতি সম্বন্ধঃ। আত্মনশ্চেদবিক্রিয়ত্বং ভগবতেষ্টং তর্হি সর্ব্বকর্ম্মপরিত্যাগোপপত্তেঃ সহজস্যাপি কর্ম্মণস্ত্যাগসিদ্ধিরিতি শঙ্কতে কথমিতি। কিং কার্য্যকারণাত্মনাং গুণানামকল্পিতানাং কল্পিতানাং বা কর্ম্ম ধর্ম্মত্বেনেষ্টং দ্বিধাপি নিঃশেষকর্ম্মত্যাগোবিদুষোঽবিদুষোবা নাদ্যইত্যাহ যদীত্যাদিনা। অবিদ্যারোপিতমেব গুণশব্দিতকার্য্যকারণারোপদ্বারা কর্ম্মেতি শেষঃ। দ্বিতীয়ং প্রত্যাহ বিদ্বাংস্ত্বিতি। আরোপশেষবশাদ্বিদুষোঽপি নাশেষকর্ম্মত্যাগসিদ্ধিরিত্যাশঙ্ক্যাহ অবিদ্যেতি। তামেবানুপপত্তিং দৃষ্টান্তেন স্পষ্টয়তি নহীতি। বিদুষোঽশেষকর্ম্মত্যাগেপাক্ষিকমপি বচোঽনুকূলমিত্যাহ এবঞ্চেতি। অবিদুষঃ সর্ব্বকর্ম্মত্যাগাযোগেচ প্রকৃতাধ্যায়স্থমেব বাক্যমনুগুণমিত্যাহ স্বেস্বে ইতি। বাক্যান্তরমপি তত্রৈবার্থে যুক্তার্থমিত্যাহ স্বকর্ম্মণেতি ॥ ৪৮ ॥

বিদুষঃ সর্ব্বকর্ম্মত্যাগো নাবিদুষস্তথেত্যুক্তং ইদানীমুক্তমনূদ্যানন্তরশ্লোকতাৎপর্য্যমাহ যাচ কর্ম্মজেতি। চোঽবধারণার্থো ভিন্নক্রমো বক্তব্য ইত্যত্র সম্বধ্যতে। সাধনাত্ত্যপদিশ-

## স্বামিকৃত টীকা।

নন্তু কর্ম্মণি ক্রিয়মাণে কথং দোষাংশপ্রহাণেন গুণাংশএব সম্পদ্যতইত্যপেক্ষায়ামাহ অসক্তবুদ্ধিরিতি। অসক্তা সঙ্গশূন্যা বুদ্ধির্যস্য জিতাত্মা নিরহঙ্কারঃ বিগতা স্পৃহা ফলবিষয়া যস্মাৎ স এবংভূতঃ, সঙ্গং ত্যক্ত্বা ফলং চৈব স ত্যাগঃ সাত্ত্বিকোমতইত্যেবং পূর্ব্বো-

সিদ্ধিং প্রাপ্তো যথা ব্রহ্ম তথাপ্নোতি নিবোধ মে।
সমাসেনৈব কৌন্তেয় নিষ্ঠা জ্ঞানস্য যা পরা॥ ৫০॥

## শাঙ্করভাষ্যম্।

যস্য সোঽসক্তবুদ্ধিঃ সর্ব্বত্র পুত্রদারাদিষু আসক্তিনিমিত্তেষু জিতাত্মা জিতো বশীকৃত আত্মা অন্তঃকরণং যস্য স জিতাত্মা বিগতা স্পৃহা তৃষ্ণা দেহজীবিতভোগেষু যস্মাৎ স বিগতস্পৃহো য এবম্ভূতআত্মজ্ঞঃ স নৈষ্কর্ম্ম্যসিদ্ধিং নির্গতানি কর্ম্মাণি যস্মান্নিষ্ক্রিয় ব্রহ্মাত্মসম্বোধাৎ স নিষ্কর্ম্মা তস্যভাবো নৈষ্কর্ম্ম্যং নৈষ্কর্ম্ম্যঞ্চ তৎ সিদ্ধিশ্চ সা নৈষ্কর্ম্ম্যসিদ্ধিঃ নৈষ্কর্ম্ম্যস্য বা সিদ্ধিঃ নিষ্ক্রিয়াত্মস্বরূপাবস্থানলক্ষণস্য সিদ্ধির্নিষ্পত্তিস্তাং নৈষ্কর্ম্ম্যসিদ্ধিং পরমাং প্রকৃষ্টাং কর্ম্মজ-সিদ্ধিবিলক্ষণাং সদ্যোমুক্ত্যবস্থানরূপাং সন্ন্যাসেন সম্যগ্‌দর্শনেন তৎপূর্ব্বকেন বা সর্ব্বকর্ম্ম সন্ন্যাসেনাধিগচ্ছতি প্রাপ্নোতি॥ ৪৯॥

তথাচোক্তং সর্ব্বকর্ম্মাণি মনসা সংন্যস্যাস্তে ইতি পূর্ব্বোক্তেন স্বকর্ম্মানুষ্ঠানেন ঈশ্বরাভ্যর্চনস্বরূপেণ জনিতাং প্রাগুক্তলক্ষণাং সিদ্ধিং প্রাপ্তস্যোৎপন্নাত্মবিবেকজ্ঞানস্য কেবলাত্ম-

## গিরিকৃত টীকা।

নৈষ্কর্ম্ম্যসিদ্ধিং ব্যপদিশতি প্রসক্তেতি। পুত্রাদিবিষয়ে চেতসঃ সঙ্গাভাবেঽপি তস্যাস্বাধীনত্বমাশঙ্ক্যাহ জিতাত্মেতি। অসক্তিমুক্ত্বা স্পৃহাভাবং বদন্নপুনরুক্তিরিষ্টেত্যাশঙ্ক্যাহ দেহেতি উক্তমনূদ্য তৎফলং লম্ভয়তি য এবমিতি। কর্ম্মণাং নির্গতৌ হেতুমাহ নিষ্ক্রিয়েতি। সম্যগ্‌জ্ঞানার্থত্বেন নৈষ্কর্ম্ম্যসিদ্ধিশব্দং ব্যাখ্যায়ার্থান্তরমাহ নৈষ্কর্ম্ম্যস্যেতি। প্রকর্ষমেব প্রকটয়তি কর্ম্মজেতি। সন্ন্যাসস্য শ্রুতিস্মৃত্যোঃ সম্যগ্‌দর্শনসাধনত্বপ্রসিদ্ধেরমুক্তত্বাদাত্ম্যমিত্যাশঙ্ক্য পক্ষান্তরমাহ তৎপূর্ব্বকেণেতি॥৪৯॥

সন্ন্যাসান্নৈষ্কর্ম্ম্যপ্রাপ্তিরিত্যত্র বাক্যোপক্রমানুকূল্যমাহ তথাচেতি। জ্ঞানস্য প্রাপ্তিযোগ্যতাবতো জাতসম্যগ্‌ধিয়স্তৎফলপ্রাপ্তৌ মুক্তাবুক্তায়াং বক্তব্যশেষো নাস্তীত্যাশঙ্ক্যাহ পূর্ব্বোক্তেনেতি। ক্রমাখ্যং বস্তু তদিত্যুচ্যতে। সিদ্ধিপ্রাপ্তইত্যুক্তমেব কস্মাদনূদ্যতে

## স্বামিকৃত টীকা।

ক্তেন কর্ম্মাসক্তিফলয়োস্ত্যাগলক্ষণেন সংন্যাসেন নৈষ্কর্ম্ম্যসিদ্ধিং সর্ব্বকর্ম্মনিবৃত্তিলক্ষণাং সত্ত্বশুদ্ধিমধিগচ্ছতি। যদ্যপি সঙ্গফলয়োস্ত্যাগেন কর্ম্মানুষ্ঠানমপি নৈষ্কর্ম্ম্যমেব কর্তৃত্বাভিনিবেশাভাবাৎ তদুক্তং নৈব কিঞ্চিৎ করোমীতি যুক্তো মন্যেত তত্ত্ববিদিত্যাদিশ্লোকচতুষ্টয়েন তথাপ্যনেনোক্তলক্ষণেন সন্ন্যাসেন পরমাং নৈষ্কর্ম্ম্যসিদ্ধিং সর্ব্বকর্ম্মাণি মনসা সংন্যস্যাস্তে সুখং বশীত্যেবংলক্ষণাং পারমহংস্যচর্য্যামাপ্নোতি॥ ৪৯॥

এবংভূতস্য পারমহংস্যজ্ঞাননিষ্ঠয়া ব্রহ্মভাবপ্রকারমাহ সিদ্ধিং প্রাপ্তইতি ষড্‌ভিঃ। নৈষ্কর্ম্ম্যসিদ্ধিং প্রাপ্তঃ সন্ যথা যেন প্রকারেণ ব্রহ্ম প্রাপ্নোতি তথা তং প্রকারং সংক্ষেপে-

## শাঙ্করভাষ্যম্।

জ্ঞাননিষ্ঠারূপা নৈষ্কর্ম্যলক্ষণা সিদ্ধির্যেন ক্রমেণ ভবতি তদ্বক্তব্যমিত্যাহ সিদ্ধিমিতি। সিদ্ধিং প্রাপ্তঃ স্বকর্ম্মণেশ্বরং সমভ্যর্চ্চ্য তৎপ্রসাদজাং কায়েন্দ্রিয়াণাং জ্ঞাননিষ্ঠাযোগ্যতা-লক্ষণাং সিদ্ধিং প্রাপ্তইতি তদনুবাদ উত্তরার্থঃ, কিন্তদুত্তরং যদর্থোঽনুবাদইত্যুচ্যতে যথা যেন প্রকারেণ জ্ঞাননিষ্ঠারূপেণ ব্রহ্ম পরমাত্মানমাপ্নোতি তথা তং প্রকারং জ্ঞাননিষ্ঠা-প্রাপ্তিক্রমং মে মম বচনান্নিবোধ ত্বং নিশ্চয়েনাবধারয়েত্যেতৎ কিং বিস্তরেণ নেত্যাহ সমাসেনৈব সংক্ষেপেণৈব হে কৌন্তেয় যথা ব্রহ্ম প্রাপ্নোতি তথা নিবোধেতি অনেন প্রকারেণ বা প্রতিজ্ঞাতা ব্রহ্মপ্রাপ্তিস্তামিদন্তয়া দর্শয়িতুমাহ নিষ্ঠা জ্ঞানস্য যা পরেতি নিষ্ঠা পর্য্যবসানং পরিসমাপ্তিরিত্যেতৎ কস্য ব্রহ্মজ্ঞানস্য যা পরা পরিসমাপ্তিঃ কীদৃশী সা যাদৃশমাত্মজ্ঞানং কীদৃক্ তৎ যাদৃশআত্মা কীদৃশোঽসৌ যাদৃশোভগবতোক্তউপনিষদ্বা-

---

## গিরিকৃত টীকা।

তত্রাহ তদনুবাদইতি। উত্তরমেব প্রশ্নপূর্ব্বকং স্ফোরয়তি কিং তদিত্যাদিনা। জ্ঞাননিষ্ঠা প্রাপ্তিক্রমস্য বিস্তরোণোক্তৌ দুর্ব্বোধত্বমাশঙ্ক্য পরিহরতি কিমিতি। চতুর্থপাদস্য পূর্ব্বে ণাসঙ্গতিমাশঙ্ক্যাহ যথেতি। নিষ্ঠায়াঃ সাপেক্ষত্বাৎ প্রতিসম্বন্ধি নির্দ্দেষ্টব্যমিত্যাহ কস্যেতি। যা ব্রহ্মজ্ঞানস্য পরা নিষ্ঠা সা প্রকৃতস্য জ্ঞানস্য নিষ্ঠেত্যাহ ব্রহ্মেতি। তস্য পরা নিষ্ঠেতি প্রসিদ্ধেতি কৃত্বা সাধনানুষ্ঠানাধীনতয়া সাধ্যেতি মত্বা পৃচ্ছতি কীদৃশীতি। প্রসিদ্ধমাত্ম-জ্ঞানমনুরুধ্য ব্রহ্মজ্ঞাননিষ্ঠা স্বজ্ঞাতেত্যাহ যাদৃশমিতি। তত্রাপি প্রসিদ্ধিবসিদ্ধেতি শঙ্কতে কীদৃগিতি। অর্থেনৈব বিশেষো হীতি ন্যায়েনোত্তরমাহ যাদৃশইতি। তস্মিন্নপি বিপ্রতি পত্তের্প্রসিদ্ধিমভিসন্ধায় পৃচ্ছতি কীদৃশইতি। ভগবদ্বাক্যান্যুপনিষদ্বাক্যানি বাশ্রিত্য পরিহরতি যাদৃশইতি। ন জায়তে ম্রিয়তে বেত্যাদীনি বাক্যানি কূটস্থত্বমসঙ্গমিত্যাদি-ন্যায়ঃ। জ্ঞানস্য বিষয়াকারত্বাদাত্মনশ্চাবিষয়ত্বাদনাকারত্বাচ্চ তদাকারকজ্ঞানাযোগাদাত্ম-প্রসিদ্ধাবপি নাত্মজ্ঞানপ্রসিদ্ধিরিতি শঙ্কতে নন্বিতি। আকারবত্ত্বমাত্মনঃ শ্রুতিসিদ্ধমিতি সিদ্ধান্তী শঙ্কতে নন্বাদিত্যেতি। উক্তবাক্যানামন্যার্থত্বদর্শনেন পূর্ব্ববাদী পরিহরতি নেত্যা-দিনা। সংগ্রহবাক্যং প্রপঞ্চয়তি দ্রব্যেতি। ইতশ্চাকারবত্ত্বমাত্মনোনাস্তীত্যাহ অরূপমিতি। যদাত্মনোবিষয়ত্বাভাবাত্তদ্বিষয়ং জ্ঞানং ন সম্ভবতীত্যুক্তং তদুপপাদয়তি অবিষয়ত্বাচ্চেতি। আত্মনোবিষয়ত্বে শ্রুতিমুদাহরতি নেত্যাদিনা সংদৃশে সম্যগ্‌দর্শনবিষয়ত্বায় যস্যাত্মনোরূপং ন তিষ্ঠতীত্যর্থঃ। তদেব করণাগোচরত্বেনোপপাদয়তি নেতি। শব্দাদিশূন্যত্বাচ্চাত্মা বিষয়ো ন ভবতীত্যাহ অশব্দইতি। আত্মনোবিষয়ত্বাকারবত্ত্বয়োরভাবে ফলিতমাহ তস্মাদিতি। জ্ঞানস্যাত্মাকারত্বাভাবে সত্যাত্মজ্ঞানমিতি ব্যপদেশাসিদ্ধিরিত্যেকদেশী শঙ্কতে কথং তর্হি ইতি। কাত্রানুপপত্তিরিত্যাশঙ্ক্যাহ সর্ব্বংহীতি। আত্মনোঽপি তর্হি বিষয়ত্বেন জ্ঞানস্য তদাকারত্বং স্যাদিত্যাশঙ্ক্যাহ নিরাকারশ্চেতি। আত্মনোবিষয়রাহিত্যং চকারার্থঃ।

## শাঙ্করভাষ্যম্ ।

কৈ্যশ্চ ন্যায়তশ্চ। নমু বিষয়াকারং জ্ঞানং ন বিষয়ো নাপ্যাকারবানাত্মেষ্যতে ক্বচিৎ। নন্বাদিত্যবর্ণো ভারূপঃ স্বয়ং জ্যোতিরিত্যাকারবত্বমাত্মনঃ শ্রূয়তে ন তমোরূপত্বপ্রতিষেধার্থত্বাত্তেষাং বাক্যানাং দ্রব্যগুণাদ্যাকার প্রতিষেধে আত্মনস্তমোরূপত্বে প্রাপ্তে তৎপ্রতিষেধার্থান্যাদিত্যবর্ণমিত্যাদিবাক্যানি অরূপমিতি চ বিশেষতোরূপপ্রতিষেধাদবিষয়ত্বাচ্চ ন সংদৃশে তিষ্ঠতি রূপমস্য ন চক্ষুষা পশ্যতি কশ্চ নৈনং অশব্দমস্পর্শমিত্যাদেস্তস্মাদাত্মাকারং জ্ঞানমিত্যনুপপন্নং কথং তর্হ্যাত্মনোজ্ঞানং সর্ব্বং হি যদ্বিষযং জ্ঞানং তত্তদাকারং ভবতি নিরাকারশ্চ আত্মেত্যুক্তং জ্ঞানাত্মনোশ্চোভয়োর্নিরাকারত্বে কথং তদ্ভাবনানিষ্ঠেতি নাত্যন্ত নির্ম্মলত্বস্বচ্ছত্বসূক্ষ্মত্বোপপত্তেবাত্মনো বুদ্ধেশ্চাসমনৈর্ম্মল্যাদ্যুপপত্তেরাত্মচৈতন্যাকারাভাসত্বোপপত্তিঃ বুদ্ধ্যাভাসং মনস্তদাভাসানীন্দ্রিয়াণি ইন্দ্রিয়াভাসশ্চ দেহোঽতোলৌকিকৈর্দে-

---

## গিরিকৃত টীকা ।

আত্মবত্তৎজ্ঞানস্যাপি তর্হি নিরাকাবত্বস্তবিষ্যতীত্যত্রাহ জ্ঞানেতি। তচ্ছব্দেনাত্মজ্ঞানং গৃহ্যতে, তস্য ভাবনাপৌনঃপুন্যেনানুসন্ধানং, তস্য নিষ্ঠা সমাপ্তিবাত্মনি সাক্ষাৎকাবদার্ঢ্যং ন চৈতৎ সর্ব্বমাত্মনো জ্ঞানস্য বা নিবাকাবত্বে সিধ্যতীত্যর্থঃ। জ্ঞানাত্মনোঃ সাম্যোপন্যাসেন সিদ্ধান্তী সমাধত্তে নেত্যাদিনা। যথোক্তসাম্যানুসারাত্মচৈতন্যাভাসব্যাপ্তাজ্ঞানপরিণামবতী বুদ্ধিঃ সাভাসবুদ্ধিঃ ব্যাপ্তঃ স্থূলোদেহস্তত্র লৌকিকভ্রান্তিং প্রমাণয়তি অতইতি। আত্মদৃষ্টে দেহমাত্রে দৃষ্টত্বাত্তত্র চৈতন্যাভাসব্যাপ্তিরিন্দ্রিয়দ্বারা কল্প্যতে ইন্দ্রিয়েষু চ তদ্দৃষ্টিদর্শনাচ্চৈতন্যাভাসবত্বং মনোদ্বাবা সিধ্যতি মনসি চাত্মদৃষ্টেশ্চৈতন্যাভাসবত্বং বুদ্ধিদ্বারা লভ্যতে বুদ্ধৌ চাত্মদৃষ্টেরজ্ঞানদ্বারা চৈতন্যাভাসসিদ্ধিরিত্যর্থঃ। দেহে লৌকিকমাত্মত্বদর্শনং ন্যায়াভাবাদুপেক্ষিতমিত্যাশঙ্ক্যাহ দেহেতি। তথাপি কথমিন্দ্রিয়াণাং ন্যায়হীনমাত্মত্বমিত্যাশঙ্ক্যাহ তথেতি। তথাপি মনসো যদাত্মত্বং তৎ ন্যায়শূন্যমিত্যাশঙ্ক্যাহ অন্যইতি। বুদ্ধেরাত্মত্বমিতি ন্যায়োপেতমিতি সূচয়তি অন্যে বুদ্ধীতি। দেহাদৌ বুদ্ধ্যন্তে পরমাত্মত্ববুদ্ধির্নান্যত্রেতি নিয়মম্বারয়তি ততোঽপীতি তত্র হি সাভাসেঽন্তর্যামিণি করণোপাসকানামাত্মধীরস্তীত্যর্থঃ। বুদ্ধ্যাদৌ দেহান্তে লৌকিকপরীক্ষকাণামাত্মত্বভ্রান্তৌ সাধারণকারণমাহ সর্ব্বত্রেতি। আত্মজ্ঞানস্য লৌকিকপরীক্ষকপ্রসিদ্ধত্বাদেব। বিধিবিষয়ত্বমপি পরেষ্টং পরাস্তমিত্যাহ ইত্যতইতি। জ্ঞানস্য বিধেয়ত্বাভাবে কিং কর্ত্তব্যং দ্রষ্টব্যাদিবাক্যৈরিত্যাশঙ্ক্যাহ কিং তর্হীতি। আত্মজ্ঞানস্যাবিধেয়ত্বে প্রাগুক্তমতঃশব্দিতং হেতুং বিবৃণোতি অবিদ্যেতি। দেহেন্দ্রিয়মনোবুদ্ধ্যব্যক্তৈরুপলভ্যমানৈঃ সহোপলভ্যমানে চৈতন্যং নান্যথা তেষামুপলম্ভো জড়ত্বাদিত্যত্র বিজ্ঞানবাদী ভ্রান্তিংপ্রমাণয়তি অতএবেতি। সর্ব্বং জ্ঞেয়ং জ্ঞানব্যাপ্তমেব জায়তে তেন জ্ঞানাতিরিক্তং নাস্ত্যেব বস্তু সংমতং হি স্বপ্নদৃষ্টং

## শাঙ্করভাষ্যম্।

হমাত্রএবাত্মদৃষ্টিঃ ক্রিয়তে দেহচৈতন্যবাদিমশ্চ লোকায়তিকাশ্চৈতন্যবিশিষ্টঃ কায়ঃ পুরুষঃ-ইত্যাহুঃ তথান্যে ইন্দ্রিয়চৈতন্যবাদিনোঽন্যে মনশ্চৈতন্যবাদিনোঽন্যে বুদ্ধিচৈতন্যবাদিনস্ত-তোঽপ্যন্তরমব্যক্তমব্যাকৃতাখ্যমবিদ্যাবস্থামাত্মত্বেন প্রতিপন্নাঃ কেচিৎ প্রকৃতিচৈতন্যবাদিনঃ, সর্ব্বত্র হি বুদ্ধ্যাদিদেহান্তে আত্মচৈতন্যাভাসতাত্মভ্রান্তিঃ করণমিত্যতশ্চাত্মবিষয়ং জ্ঞানং ন বিধাতব্যং কিং তর্হি নামরূপাদ্যনাত্মাধ্যারোপেণ নিবৃত্তিরেব কার্য্যা নাত্মচৈতন্যবিজ্ঞানং সর্ব্বৈরভ্যুপগম্যতে অবিদ্যাধ্যারোপিতসর্ব্বপদার্থাকারৈরেব বিশিষ্টতয়া গৃহ্যমাণত্বাৎ অত-এব বিজ্ঞানবাদিনো বৌদ্ধাঃ বিজ্ঞানব্যতিরেকেণ বস্ত্বেব নাস্তীতি প্রতিপন্নাঃ প্রমাণান্তর-নিরপেক্ষতাঞ্চ স্বসম্বিদিতত্বাভ্যুপগমেন তস্মাদবিদ্যাধ্যারোপণনিরাকরণমাত্রং ব্রহ্মণি কর্ত্তব্যং নতু ব্রহ্মবিজ্ঞানে যত্নোঽত্যন্তপ্রসিদ্ধত্বাদবিদ্যাকল্পিতনামরূপবিশেষাকারপ্রকৃত-

## গিরিকৃত টীকা।

বস্তু জ্ঞানাতিরিক্তং নাস্তীতি তে ভ্রাম্যন্তীত্যর্থঃ। জ্ঞানস্যাপি জ্ঞেয়ত্বাৎ জ্ঞাতৃবস্ত্বন্তরমেষ্টব্য-মিত্যাশঙ্ক্যাহ প্রমাণান্তরেতি। জ্ঞানস্য স্বেনৈব জ্ঞেয়ত্বোপগমনেনাতিরিক্তপ্রমাণনির-পেক্ষতাঞ্চ প্রতিপন্নাইতি সম্বন্ধঃ। ব্রহ্মাত্মবিজ্ঞানস্য সিদ্ধত্বেনাবিধেয়ত্বে ফলিতমাহ তস্মাদিতি। যত আত্মভাবং নাব্রহ্মণস্তৎ জ্ঞানস্য চাত্যন্তপ্রসিদ্ধত্বে কথং ব্রহ্মণ্যন্যথাপ্রথা লৌকিকানামিত্যত্রাহ অবিদ্যেতি। যথা প্রতিমাসু দুর্ব্বিজ্ঞেয়ত্বাদিরূপমেব ব্রহ্ম কিং ন স্যাত্তত্রাহ বাহেতি। গুরুপ্রসাদং শুশ্রূষয়া তোষিতবুদ্ধেরাচার্য্যস্য করুণাতিরেকাত্তত্ত্বং বুধ্যতামিতি নিরবগ্রহোঽনুগ্রহঃ আত্মপ্রসাদস্ত্বধিগতপদশক্তিতাৎপর্য্যবাক্যস্য শ্রৌতযুক্ত্য-নুসন্ধানাদাত্মনোমনসোবিষয়ব্যাপৃতস্য প্রত্যগেকাগ্রতয়া তৎপ্রাবণ্যমিতি বিবেকঃ। আত্মজ্ঞানস্যাত্মদ্বারা প্রসিদ্ধত্বে বাক্যোপক্রমং প্রমাণয়তি তথাচেতি। আত্মনোনিরাকার-ত্বাত্তস্মিন্ বুদ্ধেরপ্রবৃত্তেঃ সম্যগ্‌জ্ঞাননিষ্ঠা ন সম্পাদ্যেতি মতমুত্থাপয়তি কেচিত্বিতি। বহির্মুখানামান্তর্ম্মুখানাং বা ব্রহ্মণি সম্যগ্‌জ্ঞাননিষ্ঠা দুঃসাধ্যেতি বিকল্প্যাদ্যং অঙ্গীকরোতি সত্যমিতি। পূর্ব্ববিশেষণমুত্তরোত্তরবিশেষণে হেতুত্বেন যোজনীয়ং। দ্বিতীয়ং দূষয়তি তদ্বিপরীতানামিতি। অন্তর্নিষ্ঠানাং দ্বৈতবিষয়ে সম্যগ্‌বুদ্ধেরতিশয়েন দুঃসম্পা-দ্যত্বে হেতুমাহ আত্মেতি। তদ্ব্যতিরেকেণ বস্ত্বন্তরস্যাসত্বং কথমিত্যাশঙ্ক্যাহ যথাচেতি। অদ্বৈতমেব বস্তু দ্বৈতং ত্বাবিদ্যকং নান্যথা তাত্বিকমিত্যেতদেব যথা ব্যাত্তথোক্তবস্তো বয়ং তত্র তত্রাধ্যায়েষ্বিতি যোজনা। অন্তর্নিষ্ঠানামদ্বৈতদর্শিনাং দ্বৈতে নাস্তি সম্বুদ্ধিরি-ত্যত্র ভগবতোঽপি সম্মতিমাহ উক্তঞ্চেতি। পরমতং নিরাকৃত্য প্রকৃতমুপসংহরন্নাত্মনো-নিরাকারত্বে জ্ঞানস্য তদালম্বনত্বে কিং কারণমিত্যাশঙ্ক্যাহ তস্মাদিতি। নন্বাত্মা কথঞ্চিৎ জ্ঞানক্রিয়াসাধ্যশ্চেত্তস্য হেয়োপাদেয়ান্তরকোটিনিবেশাৎ প্রাপ্তঃ স্বর্গাদিবৎ ক্রিয়াসাধ্য-

## শাঙ্করভাষ্যম্।

বুদ্ধিত্বাদত্যন্তপ্রসিদ্ধং সুবিজ্ঞেয়মাসন্নতরমাত্মতত্ত্বমপ্যপ্রসিদ্ধং দুর্ব্বিজ্ঞেয়মতিদূরং অন্যদিব চ প্রতিভাতি অবিবেকিনাং বাহ্যাকারনিবৃত্তবুদ্ধীনান্তু লব্ধগুর্ব্বাত্মপ্রসাদানাং নাতঃ পরং সুখং সুপ্রসিদ্ধং সুবিজ্ঞেয়মাসন্নমস্তি তথাচোক্তং প্রত্যক্ষাবগমং ধর্ম্ম্যমিত্যাদি কেচিত্তু পণ্ডিতংমন্যা নিরাকারত্বাদাত্মবস্তু নোপৈতি বুদ্ধিবতোদুঃসাধ্যা সম্যগ্জ্ঞাননিষ্ঠেত্যাহুঃ সত্যমেবং গুরুসম্প্রদায়রহিতানামশ্রুতবেদান্তানামত্যন্তবহির্ব্বিষয়াসক্তবুদ্ধীনাং সম্যক্প্রমাণেষ্বকৃতশ্রমাণাং তদ্বিপরীতনান্তু লৌকিকগ্রাহ্যগ্রাহকদ্বৈতবহুনি সদ্বুদ্ধিনি তরান্দুংসম্পাদ্যা আত্মচৈতন্যব্যতিরেকেণ বস্তন্তরস্যানুপলব্ধেঃ যথা চৈতদেবমেব নান্যথেত্যবোচাম উক্তঞ্চ ভগবতা যস্যাং জাগ্রতি ভূতানি সা নিশা পশ্যতোমুনেরিতি তস্মাদ্বাহ্যাকারভেদবুদ্ধিনিবৃত্তিরেবাত্মস্বরূপালম্বনে কারণং ন হ্যাত্মা নাম কস্যচিৎ কদাচিদপ্রসিদ্ধঃ প্রাপ্যো হেয উপাদেয়ো বা অপ্রসিদ্ধে হি তস্মিন্নাত্মনি স্বার্থাঃ সর্ব্বাঃ প্রবৃত্তয়ঃ ব্যর্থাঃ প্রসজ্যেরন্। নচ দেহাদ্যচেতনার্থত্বং শক্যং কল্পয়িতুং নচ সুখার্থং সুখং দুঃখার্থং বা দুঃখমাত্মাবগত্যবসানার্থত্বাচ্চ সর্ব্বব্যবহারস্য তস্মাদ্যথা স্বদেহস্য পরিচ্ছেদায় ন প্রমাণান্তরাপেক্ষা ততো-

## গিরিকৃত টীকা।

ত্বেনাসিদ্ধত্বং নেত্যাহ নহীতি। আত্মত্বাদেব প্রসিদ্ধত্বেন প্রাপ্তত্বাদনাত্মবত্তস্য হেয়োপাদেয়ত্বয়োরযোগান্ন ক্রিয়াসাধ্যতেত্যর্থঃ আত্মনশ্চেদৃতে ক্রিয়া সিদ্ধতাতদা সর্ব্বপ্রবৃত্তীনামভ্যুদয়নিঃশ্রেয়সার্থানাং আত্মার্থত্বাযোগাদর্থিনোঽর্থত্বমপ্রামাণিকং স্যাদিত্যাহ অপ্রসিদ্ধে হীতি। ন প্রবৃত্তীনাং স্বার্থত্বং দেহাদীনাং অন্যতবস্যার্থিত্বেন তাদর্থ্যাদিত্যাশঙ্ক্য ঘটাদিবদচেতনাস্যার্থিত্বাযোগান্নৈবমিত্যাহ নচেতি ননুপ্রবৃত্তীনাং ফলাবসায়িতয়া সুখদুঃখয়োরন্যতরান্যতয়ার্থত্বান্ন স্বার্থত্বমত্রাহ নচেতি। প্রবৃত্তীনাং সুখদুঃখার্থত্বেঽপি তয়োঃ স্বার্থত্বাৎ সিদ্ধেরর্থিত্বেনাত্মা সিধ্যতীত্যর্থঃ। কিঞ্চ সর্ব্বাপেক্ষান্যায়াদাত্মাবগত্যবসানঃ সর্ব্বোব্যবহারঃ নচাত্মন্যপ্রসিদ্ধে যজ্ঞাদিব্যবহারস্য তৎ জ্ঞানার্থত্বেনাত্মপ্রসিদ্ধিরেষ্টব্যেত্যাহ আত্মেতি। নন্বাত্মাপ্রসিদ্ধোঽপি প্রমাণদ্বারা প্রসিধ্যতি তৎ প্রমাণাদেবেতি ন্যায়াত্তত্রাহ তস্মাদিতি। মানমেয়াদিসর্ব্বব্যবহারস্যাত্মাবগত্যন্তত্বোপগমাৎ প্রাগেব প্রমাণপ্রবৃত্তেরাত্মপ্রসিদ্ধেরেষ্টব্যত্বাদিত্যর্থঃ। আত্মাবগতেরেবং স্বাভাবিকত্বে বিবেকবতামারোপনিবৃত্ত্যা জ্ঞাননিষ্ঠা সুপ্রসিদ্ধেত্যুপসংহরতি ইত্যাত্মেতি। নম্বনাকারামেবানুমীমহে বুদ্ধিমিতি বদতাত্তমনাকারমপ্রত্যক্ষমিচ্ছতাং প্রাগর্থাবগতেরপ্রসিদ্ধমেব জ্ঞানং নেত্যাহ যেষামিতি। সুখাদিবন্নিত্যানুভবগমং জ্ঞানং নানুমেয়ং বিষয়াবগত্যা তদনুমিতাবিতরেতরাশ্রয়াদিতি ভাবঃ। ইতশ্চ জ্ঞানং প্রসিদ্ধমন্যথা তত্র জিজ্ঞাসাপ্রসঙ্গান্ন চ জ্ঞানে জিজ্ঞাসাপ্রসিদ্ধা প্রসিদ্ধে চ তদযোগাদিত্যাহ জিজ্ঞাসেতি। তদেব প্রপঞ্চয়তি অপ্রসিদ্ধঞ্চেদিতি। দৃষ্টান্তমেব ব্যাচষ্টে যথেতি। দার্ষ্টান্তিকং বিবৃণোতি তথেতি। ইষ্টাপত্তিং নিরাচষ্টে

বুদ্ধ্যা বিশুদ্ধয়া যুক্তো ধৃত্যাত্মানং নিয়ম্য চ।
শব্দাদীন্ বিষয়াংস্ত্যক্ত্বা রাগদ্বেষৌ ব্যুদস্য চ ॥৫১॥

## শাঙ্করভাষ্যম্।

হ্যপ্যাত্মনোঽন্তরতমত্বাত্তদবগতিং প্রতি ন প্রমাণান্তরাপেক্ষেত্যাত্মজ্ঞাননিষ্ঠা বিবেকিনাং স্বপ্রসিদ্ধেতি সিদ্ধং যেষামপি নিবাকারং জ্ঞানমপ্রত্যক্ষন্তেষামপি জ্ঞানবশেনৈব জ্ঞেয়াবগতিরিতি জ্ঞানমত্যন্তং প্রসিদ্ধং সুখাদিবদেবেত্যভ্যপগন্তব্যং জিজ্ঞাসানুপপত্তেশ্চাপ্রসিদ্ধঞ্চেৎ জ্ঞানং জ্ঞেয়বজ্জিজ্ঞাস্যেত যথা জ্ঞেয়ং ঘটাদিলক্ষণং জ্ঞানেন জ্ঞাতা ব্যাপ্তুমিচ্ছতি তথা জ্ঞানমপি জ্ঞানান্তরেণ জ্ঞাতা ব্যাপ্তুমিচ্ছেন্ন চৈতদস্তি অতোঽত্যন্তপ্রসিদ্ধং জ্ঞানং জ্ঞাতাপ্যতএব প্রসিদ্ধইতি তস্মাৎ জ্ঞানে যত্নোন কর্ত্তব্যঃ কিন্ত্বনাত্মবুদ্ধিনিবৃত্তাবেব তস্মাৎ জ্ঞাননিষ্ঠা সুসম্পাদ্যা ॥ ৫০ ॥

সেয়ং জ্ঞানস্য পরা নিষ্ঠোচ্যতে কথং কার্য্যেতি বুদ্ধ্যাধ্যবসায়াত্মিকয়া বিশুদ্ধয়া মায়ারহিতয়া যুক্তঃ সম্পন্নো ধৃত্যা ধৈর্য্যেণ আত্মানং কার্য্যকরণসঙ্ঘাতং নিয়ম্য চ নিয়মন-

## গিরিকৃত টীকা।

নচেতি। জ্ঞানস্য জ্ঞানান্তরেণ জ্ঞেয়ত্বমেতচ্ছব্দার্থঃ অনবস্থাপত্তেরিত্যর্থঃ। জ্ঞানে জিজ্ঞাসানুপপত্তৌ ফলিতমাহ অতইতি। প্রসিদ্ধেঽপি জ্ঞানে জ্ঞাতর্য্যাত্মনি কিমায়াতন্তদাহ জ্ঞাতাপীতি। জ্ঞানস্য বিনা জ্ঞাতারমপর্য্যবসানাদিত্যর্থঃ। জ্ঞানস্য প্রসিদ্ধত্বে তত্র ভাবনাপর্য্যায়োবিধির্নাস্তীত্যাহ তস্মাদিতি। কুত্র তর্হি প্রযত্নাখ্যা ভাবনেত্যাশঙ্ক্যাহ কিংত্বিতি। অবিষয়ে নিরাকারে চাত্মনি জ্ঞাননিষ্ঠয়োঃ দুঃসম্পাদ্যত্বভাবে ফলিতং নিগময়তি তস্মাদিতি ॥ ৫০ ॥

ব্রহ্মজ্ঞানস্য পবাং নিষ্ঠাং প্রতিষ্ঠাপিতামনূদ্য শ্লোকান্তরমবতারয়িতুং পৃচ্ছতি সেয়মিতি। সেয়ং ব্রহ্মজ্ঞানস্য পরা নিষ্ঠা সমারোপিতা তদ্ধর্ম্মনিবৃত্তিদ্বারা ব্রহ্মণি পরিসমাপ্তির্জ্ঞানসন্তানরূপোচ্যতে সা কার্য্যা সুসম্পাদ্যেতি যদুক্তং তৎকথং কেনোপায়েনেতি প্রশ্নার্থঃ। পৃষ্টমুপায়ভেদমুদাহরতি বুদ্ধ্যেতি অধ্যবসায়োব্রহ্মাত্মনিশ্চয়ং মায়ারহিতত্বং সংশয়বিপর্য্যয়শূন্যত্বং। শব্দাদিসমস্তবিষয়ত্যাগে দেহস্থিতিরপি দুঃস্থা স্যাদিত্যাশঙ্ক্যাহ সামর্থ্যা-

## স্বামিকৃত টীকা।

নৈব মে বচনান্নিবোধ, প্রতিষ্ঠিতা যা ব্রহ্ম প্রাপ্তিস্তামিমাং, তথা দর্শয়িতুমাহ নিষ্ঠা জ্ঞানস্য যা পরেতি। নিষ্ঠা পর্য্যবসানং পরিসমাপ্তিরিত্যর্থঃ ॥ ৫০ ॥

তদেবাহ বুদ্ধ্যেতি। উক্তেন প্রকারেণ বিশুদ্ধয়া পূর্ব্বোক্তয়া সাত্ত্বিকয়া বুদ্ধ্যা যুক্তো ধৃত্যা সাত্ত্বিক্যা আত্মানং তামেব বুদ্ধিং নিয়ম্য নিশ্চলাং কৃত্বা শব্দাদীন্ বিষয়াংস্ত্যক্ত্বা

বিবিক্তসেবী লঘ্বাশী য়তবাক্‌কায়মানসঃ।
ধ্যানযোগপরো নিত্যং বৈরাগ্যং সমুপাশ্রিতঃ॥ ৫২॥

## শাঙ্করভাষ্যম্।

কৃত্বা বশীকৃত্য শব্দাদীন্ শব্দ আদির্যেষাম্ভে শব্দাদয়স্তান্ বিষয়াংস্ত্যক্ত্বা সামর্থ্যাৎ শরীরস্থিতিমাত্রান্ কেবলান্ মুক্ত্বা ততোঽধিকান্ সুখার্থান্ ত্যক্ত্বেত্যর্থঃ শরীরস্থিত্যর্থত্বেন প্রাপ্তেষু চ রাগদ্বেষৌ ব্যুদস্য চ পরিত্যজ্য॥ ৫১॥

ততঃ বিবিক্তসেবী অরণ্যনদীপুলিনগিরিগুহাদীন্ দেশান্ সেবিতুং শীলমস্যেতি বিবিক্তসেবী লঘ্বাশী লঘ্বশনশীলোবিবিক্তসেবালঘ্বশনয়োর্নিদ্রাদিদোষনিবর্ত্তকত্বেন চিত্তপ্রসাদহেতুত্বাৎ গ্রহণং যতবাক্কায়মানসোবাক্ চ কায়শ্চ মানসঞ্চ যতানি নিয়তানি সংযতানি যস্য জ্ঞাননিষ্ঠস্য স জ্ঞাননিষ্ঠোযতির্যতবাক্কাযমানসঃ স্যাদেবমুপরতকরণঃ সন্ ধ্যানযোগপরোধ্যানমাত্মস্বরূপং চিন্তনং যোগআত্মস্বরূপবিষয়এবৈকাগ্রীকরণস্তৌ ধ্যানযোগৌ পরত্বেন কর্ত্তব্যৌ যস্য স ধ্যানযোগপরোনিত্যং নিত্যগ্রহণং মন্ত্রজপাদ্যন্যকর্ত্তব্যাভাবদর্শনার্থং বৈরাগ্যং বিরাগভাবোদৃষ্টাদৃষ্টেষু বিষয়েষু বৈতৃষ্ণ্যং সমুপাশ্রিতোনিত্যমেবেত্যর্থঃ॥ ৫২॥

## গিরিকৃত টীকা।

দিতি। বিষয়মাত্রত্যাগে দেহস্থিত্যনুপপত্তেৰ্জ্ঞাননিষ্ঠাসিদ্ধিপ্রসঙ্গাদিত্যর্থত্বেনানুজ্ঞাতেষর্থেষু প্রাপ্তরাগাদিজ্ঞাননিষ্ঠাপ্রতিবন্ধকং ব্যুদস্যেতি শরীরেতি। পরিত্যজ্য বিবিক্তসেবী স্যাদিতি সম্বন্ধঃ॥ ৫১॥

বুদ্ধের্বৈশারদ্যং যত্নেন কার্য্যং করণনিযমনন্দেহস্থিতিহেত্বতিরিক্তবিষয়ত্যাগঃ দেহস্থিত্যর্থেম্বপি তেষু রাগদ্বেষবর্জনমিত্যুপায়ভেদে সিদ্ধে সত্যুপায়ান্তরাণ্যপি যত্নসাধ্যানীত্যাহ ততইতি। চিত্তৈকাগ্র্যপ্রসাদার্থং বিবিক্তসেবিত্বং ব্যাকরোতি অরণ্যেতি। নিদ্রাদিদোষনিবৃত্ত্যর্থং লঘ্বাশিত্বং বিশদয়তি লঘ্বিতি। লঘু পরিমিতং হিতং মেধ্যং বাশিতুং শীলমস্যেতি তথোচ্যতে। বিশেষণয়োস্তাৎপর্য্যং বিবৃণোতি বিবক্তেতি। নিদ্রাদীত্যাদিশব্দাদালস্যপ্রমাদাদয়োবুদ্ধিবিক্ষেপকা বিবক্ষিতাঃ। বক্ষ্যমাণধ্যানযোগ

## স্বামিকৃত টীকা।

তদ্বিষয়ৌ রাগদ্বেষৌ বুদ্ধস্য। বুদ্ধ্যা বিশুদ্ধয়া মুক্তইত্যাদীনাং ব্রহ্মভূয়ায় কল্পতইতি তৃতীয়েনান্বয়ঃ॥ ৫১॥

কিঞ্চ বিবেক্তেতি। বিবক্তসেবী শুচিদেশাবস্থায়ী লঘ্বাশী মিতভোজী এতৈরুপায়ৈর্যতবাক্‌কায়মানসঃ সংযতবাগ্দেহচিত্তোভূত্বা নিত্যং সর্ব্বদা ধ্যানেন যো যোগোব্রহ্মসংস্পর্শস্তৎপরঃ সন্ ধ্যানাবিচ্ছেদার্থং পুনঃপুনর্দৃঢ়ং বৈরাগ্যং সম্যগাশ্রিতোভূত্বা॥ ৫২॥

অহঙ্কারং বলং দর্পং কামং ক্রোধং পরিগ্রহম্।
বিমুচ্য নির্ম্মমঃ শান্তো ব্রহ্মভূয়ায় কল্পতে ॥ ৫৩ ॥

## শাঙ্করভাষ্যম্।

কিঞ্চ অহংকরণমহঙ্কারোদেহেন্দ্রিয়াদিষু তং বলং সামর্থ্যং কামরাগাদিযুক্তং নেতরচ্ছরীরাদিসামর্থ্যং স্বাভাবিকত্বেন ত্যাগস্যাশক্যত্বাৎ দর্পোনাম হর্ষানন্তরভাবী ধর্ম্মাতিক্রমহেতুঃ হৃষ্টঃ তৃপ্যতি তৃপ্তোধর্ম্মমতিক্রামতীতি স্মরণাৎ তঞ্চ কামমিচ্ছাং ক্রোধং দ্বেষঞ্চ পরিগ্রহমিন্দ্রিয়মনোগতদোষপরিত্যাগে শরীরধারণপ্রসঙ্গেন ধর্ম্মানুষ্ঠাননিমিত্তেন বা বাহ্যঃপরিগ্রহঃ প্রাপ্তস্তং চ বিমুচ্য পরিত্যজ্য পরমহংসপরিব্রাজকোভূত্বা দেহজীবনমাত্রেঽপি নির্গতমমভাবোনির্ম্মমোঽতএব শান্ত উপরতঃ যঃ সংহৃতায়াসোযতির্জ্ঞাননিষ্ঠোব্রহ্মভূয়ায় ব্রহ্মভবনায় কল্পতে সমর্থোভবতি ॥ ৫৩ ॥

## গিরিকৃত টীকা।

য়োক্তপায়ত্বেন বিশেষণান্তরং বিভজতে বাক্ চেতি। রাগাদিসংযমস্যাবশ্যকত্বদ্যোতনার্থং স্যাদিত্যুক্তং। সংযতবাগাদিকরণগ্রামস্যানায়াসেন কর্ত্তব্যমুপদিশতি এবমিতি। মন্ত্রজপাদীত্যাদিপদেন প্রদক্ষিণপ্রণামাদয়োধ্যানযোগপ্রতিবন্ধকা গৃহীতাঃ। উক্তয়োরেব ধ্যানযোগয়োরুপায়ত্বেনোক্তং বিরাগভাবং বিভজতে দৃষ্টেতি। সম্যক্ত্বমেব ব্যনক্তি নিত্যমিতি ॥ ৫২ ॥

জ্ঞাননিষ্ঠস্য যতের্ব্বিশেষণান্তরং সমুচ্চিনোতি কিঞ্চেতি। নিত্যং ধ্যানযোগপরত্বে সমুচ্চিতং কারণান্তরং বিবৃণোতি অহঙ্করণমিতি। সামর্থ্যমাত্রে বলশব্দাত্নপলভ্যমানে কিমিতি বিশেষবচনমিত্যাশঙ্ক্যাহ স্বাভাবিকত্বেনেতি। উক্তে দর্পে মানমাহ হৃষ্টইতি। বৈরাগ্যশব্দেন লব্ধস্যাপি কামত্যাগস্য পুনর্ব্বচনং প্রকৃষ্টত্বখ্যাপনার্থমহঙ্কারাদিত্যাগে পরিগ্রহপ্রাপ্ত্যভাবাত্তত্যাগোক্তিরযুক্তেত্যাশঙ্ক্যাহ ইন্দ্রিয়েতি। পবিগ্রহাভাবে মমত্ববিষয়াভাবান্নির্ম্মমত্বং কথমিত্যাশঙ্ক্যাহ দেহেতি। অহংকারমমকারয়োরভাবেন প্রাপ্তামন্তঃকরণোপরতিমনুবদতি অতএবেতি। উক্তমনূদ্য জীবন্নেবাসৌ ব্রহ্মীভবতীতি ফলিতমাহ যঃ সংহৃতেতি। জ্ঞাননিষ্ঠপদাদূর্দ্ধং সশব্দোদ্রষ্টব্যঃ, ব্রহ্মণোভবনমনুসন্ধানপরিপাকপর্য্যন্তং সাক্ষাৎকরণং তদর্থমিতি যাবৎ ॥ ৫৩ ॥

## স্বামিকৃত টীকা।

ততশ্চ অহঙ্কারমিতি। বিরক্তোঽহমিত্যাদ্যহঙ্কারং বলং দুরাগ্রহং দর্পং যোগবলাদুন্মার্গপ্রবৃত্তিলক্ষণং প্রারব্ধবশাৎ অপ্রাপ্যমানেষ্বপি বিষয়েষু কামং ক্রোধং পরিগ্রহঞ্চ বিমুচ্য বিশেষেণ ত্যক্ত্বা বলাদাপন্নেষু নির্ম্মমঃ সন্ শান্তঃ পরমামুপশান্তিং প্রাপ্তোব্রহ্মভূয়ায় ব্রহ্মাহমিতি নৈশ্চল্যেনাবস্থানায় কল্পতে যোগ্যো ভবতি ॥ ৫৩ ॥

ব্রহ্মভূতঃ প্রসন্নাত্মা ন শোচতি ন কাঙ্ক্ষতি।
সমঃ সর্ব্বেষু ভূতেষু মদ্ভক্তিং লভতে পরাম্ ॥ ৫৪ ॥

## শাঙ্করভাষ্যম্

অনেন ক্রমেণ ব্রহ্মভূতো ব্রহ্মপ্রাপ্তঃ প্রসন্নাত্মা লব্ধাধ্যাত্মপ্রসাদস্বভাবো ন শোচতি কিঞ্চিদর্থবৈকল্যং আত্মনো বা বৈগুণ্যঞ্চোদ্দিশ্য ন সন্তপ্যতে ন কাঙ্ক্ষতি ন হ্যপ্রাপ্তবিষয়াকাঙ্ক্ষা ব্রহ্মবিদ উপপদ্যতে অতো ব্রহ্মভূতস্যায়ং স্বভাবোঽনূদ্যতে ন শোচতি ন কাঙ্ক্ষতীতি ন হৃষ্যতীতি বা পাঠঃ সমঃ সর্ব্বেষু আত্মৌপম্যেন সর্ব্বেষু ভূতেষু সুখং দুঃখং বা সমমেব পশ্যতীত্যর্থো। নাত্মসমদর্শনমিহ তস্য বক্ষ্যমাণত্বাৎ ভক্ত্যা মামভিজানাতীতি চ এবংভূতো জ্ঞাননিষ্ঠোমদ্ভক্তিং ময়ি পরমেশ্বরে ভক্তিং ভজনং পরমামুত্তমাং জ্ঞানলক্ষণাং চতুর্থীং লভতে চতুর্ব্বিধা ভজন্তে মামিত্যুক্তং ॥ ৫৪ ॥

## গিরিকৃত টীকা।

অপেক্ষিতং পূরয়ন্নুত্তরশ্লোকমবতারয়তি অনেনেতি। বুদ্ধ্যা বিশুদ্ধয়েত্যাদিরত্রঃ ক্রমঃ ব্রহ্মপ্রাপ্তো জীবন্নেব নিবৃত্তাশেষানর্থোনিরতিশয়ানন্দব্রহ্মাত্মত্বেন ভবন্নিত্যর্থঃ। অধ্যাত্মং প্রত্যাগাত্মা তস্মিন্ প্রসাদঃ সর্ব্বানর্থনিবৃত্ত্যা পরমানন্দাবির্ভাবঃ। স লব্ধো যেন জীবন্মুক্তেন স তথা। ন শোচতীত্যাদৌ তাৎপর্য্যমাহ নহীতি। প্রাপ্তব্যপরিহার্য্যাভাবনিশ্চয়াদিত্যর্থঃ। স্বভাবানুবাদমুপপাদয়তি ব্রহ্মভূতস্যেতি। তস্যাপ্রাপ্তবিষয়াভাবান্নাপি পরিহার্য্যাপরিহারপ্রযুক্তঃ শ্লোকঃ পরিহার্য্যস্যৈবাভাবাদিত্যর্থঃ। পাঠান্তরে তু রমণীয়ং প্রাপ্য প্রমোদতে তদভাবাদিত্যর্থঃ। বিবক্ষিতং সমদর্শনং বিশদয়তি আত্মেতি। ননু সর্ব্বেষু ভূতেষাত্মনঃ সমস্য নির্ব্বিশেষস্য দর্শনমত্রাভিপ্রেতং কিং নেষ্যতে তত্রাহ নাত্মেতি। উক্তবিশেষণবতো জীবন্মুক্তস্য জ্ঞাননিষ্ঠা প্রাগুক্তক্রমেণ প্রাপ্তা সুপ্রতিষ্ঠিতা ভবতীত্যাহ এবম্ভূত ইতি। শ্রবণমননিদিধ্যাসনাভ্যাসবতঃ শমাদিযুক্তস্যাভ্যন্তে শ্রবণাদিভিঃ ব্রহ্মাত্মন্যপরোক্ষং মোক্ষফলং জ্ঞানং সিধ্যতীত্যর্থঃ। আর্ত্তাদিভক্তিত্রয়াপেক্ষয়া জ্ঞানলক্ষণাং ভক্তিং চতুর্থীমিত্যুক্তাং। তত্র সপ্তমস্থবাক্যমনুকূলয়তি চতুর্ব্বিধাইতি ॥ ৫৪ ॥

## স্বামিকৃত টীকা।

ব্রহ্মাহমিতিনৈশ্চল্যেনাবস্থানস্য ফলমাহ ব্রহ্মেতি! ব্রহ্মভূতো ব্রহ্মণ্যবস্থিতঃ প্রসন্নচিত্তঃ নষ্টং ন শোচতি নচাপ্রাপ্তং কাঙ্ক্ষতি দেহাদ্যভিমানাভাবাৎ। অতএব সর্ব্বেষপি ভূতেষু সমঃ সন্ রাগদ্বেষাদিকৃতবিক্ষেপাভাবাৎ সর্ব্বভূতেষু মদ্ভাবনালক্ষণাং পরাং মদ্ভক্তিং লভতে ॥ ৫৪ ॥

ভক্ত্যা মামভিজানাতি যাবান্ যশ্চাস্মি তত্ত্বতঃ।
ততো মাং তত্ত্বতো জ্ঞাত্বা বিশতে তদনন্তরম্ ॥ ৫৫ ॥

## শাঙ্করভাষ্যম্।

ততো জ্ঞানলক্ষণয়া ভক্ত্যা মামভিজানাতি যাবানহমুপাধিকৃতবিস্তরভেদঃ যশ্চাঽহং বিধ্বস্তসর্ব্বোপাধিভেদোঽভিমত উত্তমপুরুষ আকাশকল্পস্তং মামদ্বৈতং চৈতন্যমাত্রৈকরসমজমজরমমরমভয়মনিধনন্তত্ত্বতোঽভিজানাতি' ততো মামেবন্তত্ত্বতোজ্ঞাত্বা বিশতে তদনন্তরং মামেব নাত্র জ্ঞানানন্তরপ্রবেশক্রিয়ে ভিন্নে বিবক্ষিতে জ্ঞাত্বা বিশতে তদনন্তরমিতি' কিং তর্হি ফলান্তরাভাবাৎ জ্ঞানমাত্রমেব ক্ষেত্রজ্ঞঞ্চাপি মাং বিদ্ধীত্যুক্তত্বাৎ নন্বু বিরুদ্ধমিদমুক্তং জ্ঞানস্য যা পরা নিষ্ঠা তয়া মামভিজানাতীতি কথং বিরুদ্ধমিতি চেদুচ্যতে যদৈব

## গিরিকৃত টীকা।

নন্বু সমাধিসাধ্যেন পরমভক্ত্যাত্মকেন জ্ঞানেন কিং অপূর্ব্বমবাপ্যতে তত্রাহ ততইতি। ভক্ত্যা সমাধিজন্যযা মাং ব্রহ্মাভিমুখ্যেন প্রত্যক্তয়া জানাতি ব্যাপ্নোতীত্যর্থঃ। তদেব জ্ঞানং ভক্তিপরাধীনং বিবৃণোতি যাবানিতি। আকাশকল্পত্বমনবচ্ছিন্নত্বমসঙ্গত্বঞ্চ। চৈতন্যস্য বিষয়সাপেক্ষত্বং প্রতিক্ষিপতি অদ্বৈতমিতি। যেতু দ্রব্যবোধাত্মত্বমাত্মনো মন্যন্তে তান্ প্রত্যুক্তং চৈতন্যমাত্রেতি। আত্মনি তন্মাত্রেঽপি ধর্ম্মান্তরমুপেত্য ধর্ম্মধর্ম্মিত্বং প্রত্যাহ একরসমিতি। সর্ব্ববিক্রিয়ারাহিত্যোক্ত্যা কৌটস্থ্যমাত্মনো ব্যবস্থাপয়তি অজরমিতি। উক্তবিক্রিয়াভাবে তদ্বৈতজ্ঞানাসম্বন্ধং হেতুমাহ অভয়মিতি। তত্ত্বজ্ঞানমনূদ্য তৎফলবিদেহকৈবল্যং লম্ভয়তি ততইতি। তত্ত্বজ্ঞানস্য তস্মাদনন্তরপ্রবেশক্রিয়ায়াশ্চ ভিন্নত্বং প্রাপ্তং প্রত্যাহ নাত্রেতি। ভিন্নত্বাভাবে কা গতির্ভেদোক্তেরিত্যাশঙ্কৌপচারিকত্বমাহ কিং তর্হীতি। প্রবেশইতিশেষঃ। ব্রহ্মপ্রাপ্তিরেব ফলান্তরমিত্যাশঙ্ক্য ব্রহ্মাত্মনোর্ভেদাভাবান্ন জ্ঞানাতিরিক্তা তৎপ্রাপ্তিরিত্যাহ ক্ষেত্রজ্ঞঞ্চেতি। জ্ঞাননিষ্ঠয়া পরয়া ভক্ত্যা মামভিজানাতীত্যুক্তমাক্ষিপতি নন্বিতি। বিরুদ্ধত্বং স্ফোরয়িতুং পৃচ্ছতি কথমিতি। বিরোধস্ফুটীকরণং প্রতিজানীতে উচ্যতইতি। তত্র জ্ঞানস্যোৎপত্তিরেব বিষয়াভিব্যক্তিরিত্যাহ যদেতি। এবকারনিরস্যং দর্শয়তি ন জ্ঞানেতি। ইত্যাবয়োঃ সিদ্ধমিতিশেষঃ।

## স্বামিকৃত টীকা।

ততশ্চ ভক্ত্যেতি। তয়া চ পরয়া ভক্ত্যা তত্ত্বতো মামভিজানাতি, কথংভূতং, যাবান্ সর্ব্বব্যাপী' যশ্চাস্মি সচ্চিদানন্দঘনস্তথাভূতং, ততশ্চ মামেবন্তত্ত্বতো জ্ঞাত্বা তদনন্তরং তস্য জ্ঞানস্যোপরমে সতি মাং বিশতে পরমানন্দরূপো ভবতীত্যর্থঃ ॥ ৫৫ ॥

## শাঙ্করভাষ্যম্।

যস্মিন্ বিষয়ে জ্ঞানমুৎপদ্যতে জ্ঞাতুস্তদৈব তং বিষয়মভিজানাতি জ্ঞাতেতি ন জ্ঞানানিষ্ঠাং জ্ঞানাবৃত্তিলক্ষণামপেক্ষতইতি ততশ্চ জ্ঞানেন নাভিজানাতি জ্ঞানাবৃত্ত্যা তু জ্ঞাননিষ্ঠয়াভিজানাতীতি নৈষ দোষো জ্ঞানস্য স্বাত্মোৎপত্তিপরিপাকহেতুযুক্তস্য প্রতিপক্ষবিহীনস্য যদাত্মানুভবনিশ্চয়াবসানত্বস্তস্য নিষ্ঠাশব্দাভিলাপাৎ শাস্ত্রাচার্য্যোপদেশেন জ্ঞানোৎপত্তিপরিপাকহেতুসহকারিকারণং বুদ্ধিবিশুদ্ধ্যাদ্যমানিত্বাদিগুণং চাপেক্ষ্য জনিতস্য ক্ষেত্রজ্ঞপরমাত্মৈকত্বজ্ঞানস্য কর্ত্রাদিকারকভেদবুদ্ধিনিবন্ধনসর্ব্বকর্ম্মসন্ন্যাসসহিতস্য স্বাত্মানুভবনিশ্চয়রূপেণ যদবস্থানং সা পরা জ্ঞাননিষ্ঠেত্যুচ্যতে সেয়ং জ্ঞাননিষ্ঠা আর্ত্তাদিভক্তিত্রয়াপেক্ষয়া পরা চতুর্থী ভক্তিরিত্যুক্তা তয়া পরয়া ভক্ত্যা ভগবন্তং তত্ত্বতোঽভিজানাতি যদনন্তরমেবেশ্বরক্ষেত্রজ্ঞভেদবুদ্ধিরশেষতো নিবর্ত্ততে অতোজ্ঞাননিষ্ঠালক্ষণয়া ভক্ত্যা মামভিজানাতীতি বচনং ন বিরুধ্যতে অত্র চ সর্ব্বং নিবৃত্তিবিধায়ি শাস্ত্রং বেদান্তেতিহাসপুরাণস্মৃতিলক্ষণং প্রসিদ্ধমর্থবন্তবতি বিদিত্বা ব্যুত্থায়াথ ভিক্ষাচর্য্যং চরন্তি তস্মাৎ ন্যাসমেষান্তপ-

## গিরিকৃত টীকা।

জ্ঞানস্যোৎপত্তেরেব বিষয়াভিব্যক্তেরেঽপি কথং প্রকৃতে বিরোধীত্যাশঙ্ক্যাহ ততশ্চেতি। বিরুদ্ধমিতি শেষঃ। শঙ্কিতং বিরোধং নিরস্যতি নৈষদোষইতি। উক্তমেব হেতুং প্রপঞ্চয়তি শাস্ত্রেতি। যোহি শাস্ত্রানুসার্য্যাচার্য্যোপদেশস্তেন জ্ঞানোৎপত্তিঃ আচার্য্যবান্ পুরুষো বেদেতি শ্রুতেঃ তস্যাশ্চ পরিপাকঃ সংশয়াদিপ্রতিবন্ধধ্বংসস্তত্র হেতুভূতমুপদেশস্যৈব সহকারিকারণং যদ্বুদ্ধিশুদ্ধ্যাদি তদপেক্ষ্য তস্মাদেবোপদেশাজ্জনিতং যদৈক্যজ্ঞানং তস্য কারকভেদবুদ্ধিনিবন্ধনানি যানি সর্ব্বাণি কর্ম্মাণি তেষাং সন্ন্যাসেন সহিতস্য ফলরূপেণ স্বাত্মন্যেব সর্ব্বপ্রকল্পনারহিতে যদবস্থানং সা জ্ঞানস্য পরা নিষ্ঠেতি ব্যবহ্রিয়তে প্রামাণিকৈরিত্যর্থঃ। যদি যথোক্তা পরা জ্ঞাননিষ্ঠা কথং তর্হি সা চতুর্থী ভক্তিরিত্যুক্তেতি তত্রাহ সেয়মিতি। যথোক্তয়া ভক্ত্যা ভগবত্তত্ত্বজ্ঞানং সিধ্যতীত্যাহ তয়েতি। তত্ত্বজ্ঞানস্য ফলমাহ যদনন্তরমিতি। জ্ঞাননিষ্ঠারূপায়াভগবদ্ভক্তেস্তত্ত্বজ্ঞানানভিব্যক্তেস্তৎফলস্য চ জ্ঞাননিবৃত্তেস্তন্মাত্রত্বাৎ বেদোক্তেশ্চোপচারিকত্বাৎ প্রকৃতং বাক্যমবিরুদ্ধমুপসংহরতি অতইতি। ঔপদেশিকৈক্যজ্ঞানস্য সর্ব্বকর্ম্মসন্ন্যাসসহিতস্য স্বরূপাবস্থানাত্মকস্য পরমপুরুষার্থোপয়িকত্বমিত্যস্মিন্নর্থে মানমাহ অত্রচেতি। তদেব শাস্ত্রমুদাহরতি বিদিত্বেত্যাদিনা। দর্শিতানি বাক্যানি সর্ব্বকর্ম্মাণি মনসেত্যাদীনি। নন্বেষাং বাক্যানামবিবক্ষিতার্থত্বান্নাস্তি স্বার্থে প্রামাণ্যমিত্যাশঙ্ক্যাধ্যয়নবিধ্যুপাত্ততাং বেদবাক্যানামন্যদস্যরোধিত্বাচ্চেতরেষাং নৈবমিত্যাহ নচেতি। তথাপি সোঽরোদীদিত্যাদিবন্ন স্বার্থে মানতেত্যাশঙ্ক্যাহ ন চার্থবাদত্বমিতি। ইতশ্চ মুমুক্ষোরপেক্ষিতমোক্ষৌপয়িকজ্ঞাননিষ্ঠস্য

সর্ব্বকর্ম্মাণ্যপি সদা কুর্ব্বাণো মদ্ব্যপাশ্রয়ঃ।
মৎ প্রসাদাদবাপ্নোতি শাশ্বতং পদমব্যয়ম্॥ ৫৬॥

## শাঙ্করভাষ্যম্।

সামতিরিক্তমাহুর্ন্যাসএবাত্যবেচয়দিতি সন্ন্যাসঃ কর্ম্মণাং ন্যাসো বেদানিশঞ্চ লোকমমুঞ্চ পবিত্যজ্য ত্যজ ধর্ম্মমধর্ম্মং চেত্যাদি ইহ চ দর্শিতানি বাক্যানি নচ তেষাং বাক্যানাং আনর্থক্যং যুক্তং ন চার্থবাদত্বং স্বপ্রকরণস্থত্বাৎ প্রত্যগাত্মাবিক্রিয়স্বরূপনিষ্ঠত্বাচ্চ মোক্ষস্য নহি পূর্ব্বসমুদ্রং জিগমিষোঃ প্রাতিলোম্যেন প্রত্যকসমুদ্রজিগমিষুণা সমানমার্গত্বং সম্ভবতি প্রত্যগাত্মবিষয়প্রত্যয়সন্তানকরণাভিনিবেশশ্চ জ্ঞাননিষ্ঠা সা চ প্রত্যকসমুদ্রগমনবৎ কর্ম্মণা সর্ব্বকর্ম্মসন্ন্যাসেনৈব জ্ঞাননিষ্ঠা কার্য্যেতি সিদ্ধং॥ ৫৫॥

স্বকর্ম্মণা ভগবতোঽর্চ্চনভক্তিযোগস্য সিদ্ধিপ্রাপ্তিঃ ফলং জ্ঞাননিষ্ঠাযোগ্যতা যন্নিমিত্তা জ্ঞাননিষ্ঠা মোক্ষফলাবসানা স ভগবদ্ভক্তিযোগোঽধুনা স্তূয়তে শাস্ত্রার্থোপসংহারপ্রকরণে

## গিরিকৃত টীকা।

সন্ন্যাসেঽধিকারো ন কর্ম্মনিষ্ঠায়ামিত্যাহ প্রত্যগিতি। জ্ঞাননিষ্ঠস্য কর্ম্মনিষ্ঠাবিরুদ্ধেত্যত্র দৃষ্টান্তমাহ ন হীতি। জ্ঞাননিষ্ঠাস্বরূপানুবাদপূর্ব্বকং কর্ম্মনিষ্ঠয়া তস্যাঃ সহভাবিত্বং বিরুদ্ধমিতিদার্ষ্টান্তিকমাহ প্রত্যগাত্মেতি। কথং জ্ঞানকর্ম্মণোর্ব্বিরোধধীরিত্যাশঙ্ক্য কর্ম্মণাং জ্ঞাননিবর্ত্ত্যত্বস্য শ্রুতিস্মৃতিসিদ্ধত্বাদিত্যাহ পর্ব্বতেতি। অন্তরবান্নুভয়োরেকধর্ম্মিনিষ্ঠত্বেন সাংকর্য্যাভাবসম্পাদকভেদবানিত্যর্থঃ জ্ঞানকর্ম্মণোরসমুচ্চয়ে ফলিতমুপসংহরতি তস্মাদিতি॥ ৫৫॥

তর্হি জ্ঞাননিষ্ঠয়ৈব মোক্ষসম্ভবান্ন কর্ম্মানুষ্ঠানসিদ্ধিরিত্যাশঙ্ক্যাহ স্বকর্ম্মণেতি। তামেব সিদ্ধিপ্রাপ্তিং বিশিনষ্টি জ্ঞানেতি। জ্ঞাননিষ্ঠায়োগ্যতায়ৈ স্বকর্ম্মানুষ্ঠানং ভগবদর্চ্চনরূপে কর্ত্তব্যমিত্যর্থঃ। জ্ঞাননিষ্ঠাযোগ্যতাপি কিমর্থেত্যাশঙ্ক্য জ্ঞাননিষ্ঠাসিদ্ধ্যর্থেত্যাহ যন্নিমিত্তেতি। জ্ঞাননিষ্ঠাপি কুত্রোপযুক্তেত্যত্রাহ মোক্ষেতি। স্বকর্ম্মণা ভগবদর্চ্চনাত্মনো ভক্তিযোগস্য পরংপরয়া মোক্ষ ফলস্য কার্য্যত্বেন বিধেয়ত্বে বিধ্যপেক্ষিতাং স্তুতিমবতারয়তি স ভগবদিতি। জ্ঞাননিষ্ঠা কর্ম্মনিষ্ঠেত্যুভয়ং প্রতিজ্ঞায় তত্র তত্র বিভাগেন প্রতি-

## স্বামিকৃত টীকা।

স্বকর্ম্মভিঃ পরমেশ্বরারাধনাদুক্তং মোক্ষপ্রকারমুপসংহরতি সর্ব্বকর্ম্মাণীতি। নিত্যানি নৈমিত্তিকানি চ কর্ম্মাণি পূর্ব্বোক্তক্রমেণ সর্ব্বদা কুর্ব্বাণঃ মদ্ব্যপাশ্রয়ঃ অহমেব ব্যপাশ্রয়আশ্রয়ণীয়ো নতু স্বর্গাদিফলং যস্য স মৎপ্রসাদাৎ শাশ্বতমনাদি অব্যয়ং নিত্যংসর্ব্বোৎকৃষ্টংপদং প্রাপ্নোতি॥ ৫৬॥

চেতসা সর্ব্বকর্ম্মাণি ময়ি সংন্যস্য মৎপরঃ।
বুদ্ধিযোগমুপাশ্রিত্য মচ্চিত্তঃ সততং ভব ॥ ৫৭ ॥

## শাঙ্করভাষ্যম্।

শাস্ত্রার্থনিশ্চয়দার্ঢ্যায সর্ব্বকর্ম্মাণি প্রতিষিদ্ধান্যপি সদা কুর্ব্বাণোঽনুতিষ্ঠন্ মদ্ব্যপাশ্রয়োঽহং বাসুদেবঈশ্বরো ব্যপাশ্রয়ো যস্য সমদ্ব্যপাশ্রযোময্যর্পিতসর্ব্বাত্মস্বভাবইত্যর্থঃ সোঽপি মৎ-প্রসাদান্মমেশ্বরস্য প্রসাদাদবাপ্নোতি শাশ্বতং নিত্যং বৈষ্ণবং পদমব্যযং ॥ ৫৬ ॥

যস্মাদেবন্তস্মাৎ চেতসা বিবেকবুদ্ধ্যা সর্ব্বকর্ম্মাণি দৃষ্টাদৃষ্টার্থানি ময়ীশ্বরে সন্ন্যস্য যৎ করোষি যদশ্নাসীত্যুক্তন্যায়েন মৎপরোঽহং বাসুদেবঃ পরো যস্য তব স ত্বং মৎপরঃ সন্ ময্য-র্পিতসর্ব্বাত্মভাবঃ বুদ্ধিযোগমপি সমাহিতবুদ্ধিত্বং বুদ্ধিযোগস্তং বুদ্ধিযোগমুপাশ্রিত্য আশ্রয়ো-ঽনন্যশরণত্বং মচ্চিত্তঃ ময্যেব চিত্তং যস্য সমচ্চিত্তঃ সততং সর্ব্বদা ভব ॥ ৫৭ ॥

## গিরিকৃত টীকা।

পাদিতং কিমিতীদানীং কর্ম্মনিষ্ঠা পুনঃস্তত্যা কর্ত্তব্যতযোচ্যতে তত্রাহ শাস্ত্রার্থেতি। তত্র তত্রোক্তস্যৈব কর্ম্মানুষ্ঠানস্য প্রকরণবশাদিহোপসংহারঃ সর্ব্বশাস্ত্রার্থনিশ্চযস্য দৃঢ়তাং দ্যোত-য়তীত্যর্থঃ যদ্যপি কস্যচিৎ কর্ম্মানুষ্ঠায়িনো বুদ্ধিশুদ্ধিদ্বারা কৈবল্যং সিধ্যতি তথাপি পাপ-বাহুল্যাদকর্ম্মানুষ্ঠায়িনোঽপি কস্যচিদ্বুদ্ধিশুদ্ধ্যভাবে কৈবল্যাসিদ্ধিরিত্যত্রাহ সর্ব্বকর্ম্মাণীতি। সর্ব্বশব্দানুরোধাদীশ্বরারাধনস্তুতিপরত্বেন শ্লোকং ব্যাচষ্টে প্রতিষিদ্ধান্যপীতি নিত্যনৈমিত্তিক-বদিত্যপেরর্থঃ। নিষিদ্ধাচরণস্য প্রামাণিকত্বং ব্যাবর্ত্তয়তি সদেতি। অনুতিষ্ঠন্বৈষ্ণবং পদ-মাপ্নোতীতি সম্বন্ধঃ। পাপকর্ম্মকারিণোযথোক্তপদপ্রাপ্তৌ পাপস্যাপি মোক্ষফলত্বমুপগতং স্যাদিত্যত্রাহ মদ্ব্যপাশ্রযইতি। তস্যৈব তাৎপর্য্যমাহ ময়ীতি তর্হি জ্ঞানস্য মোক্ষহেতুত্ব-মুপেক্ষিতং স্যাদিত্যত্রাহ সোঽপীতি ॥ ৫৬ ॥

প্রসাদোঽনুগ্রহঃ সম্যগ্‌জ্ঞানোদয়ঃ পদং পদনীযং উপনিষত্তাৎপর্য্যগম্যমব্যয়মপক্ষয়র-হিতং পরমেশ্বরপ্রসাদস্যৈবং মাহাত্ম্যং যতঃ সিদ্ধন্তস্মাত্তৎপ্রসাদার্থং ভবতা প্রযতিতব্যমিত্যাহ যস্মাদিতি। ভগবৎপ্রসাদাসাদিতসম্যগ্‌জ্ঞানাদেব মুক্তির্ন কর্ম্মমাত্রাদিতি জ্ঞানং বিবেক-বুদ্ধিঃ। আশ্রয়শব্দার্থমাহ অনন্যেতি। কিমতোভবতি তদাহ মচ্চিত্তইতি ॥ ৫৭ ॥

## স্বামিকৃত টীকা।

যস্মাদেবং তস্মাৎ চেতসেতি। সর্ব্বাণি কর্ম্মাণি চেতসা ময়ি সংন্যস্য সমর্প্য মৎপরঃ অহমেব পরঃ প্রাপ্যঃ পুরুষার্থো যস্য স ব্যবসায়াত্মিকয়া বুদ্ধ্যা যোগমুপাশ্রিত্য সততং কর্ম্মা-নুষ্ঠানকালেঽপি ব্রহ্মার্পণং ব্রহ্মহবিরিতি ন্যায়েন ময্যেব চিত্তং যস্য তথাভূতো ভব ॥ ৫৭॥

ততোযদ্ভবিষ্যতি তচ্ছৃণু মচ্চিত্ত ইতি। মচ্চিত্তঃসন্ মৎপ্রসাদাৎ সর্ব্বাণ্যপি দুর্গাণি

মচ্চিত্তঃ সর্ব্বদুর্গাণি মৎপ্রসাদাত্তরিষ্যসি।
অথচেত্ত্বমহঙ্কারন্ন শ্রোষ্যসি বিনঙ্ক্ষ্যসি ॥ ৫৮ ॥
যদহঙ্কারমাশ্রিত্য ন যোৎস্যইতি মন্যসে।
মিথ্যৈষ ব্যবসায়স্তে প্রকৃতিস্ত্বাং নিয়োক্ষ্যতি ॥ ৫৯ ॥
স্বভাবজেন কৌন্তেয় নিবদ্ধঃ স্বেন কর্ম্মণা।
কর্ত্তুং নেচ্ছসি যন্মোহাৎ করিষ্যস্যবশোঽপি তৎ ॥ ৬০ ॥

## শাঙ্করভাষ্যম্।

মচ্চিত্তঃ সর্ব্বদুর্গাণি সর্ব্বাণি দুস্তরাণি সংসারহেতুজাতানি মৎ প্রসাদাত্তরিষ্যসি অতিক্রমিষ্যসি অথ চেৎ যদি ত্বং মদুক্তমহঙ্কারাৎ পণ্ডিতোঽহমিতি ন শ্রোষ্যসি ন গ্রহীষ্যসি ততস্ত্বং বিনংক্ষ্যসি বিনাশঙ্গমিষ্যসি ॥ ৫৮ ॥

ইদঞ্চ ত্বয়া ন মন্তব্যং স্বতন্ত্রোঽহংকিমর্থং পরোক্তং করিষ্যামীতি যদি চৈতত্ত্বমহঙ্কারমাশ্রিত্য ন যোৎস্যইতি ন যুদ্ধং করিষ্যামীতি মন্যসে চিন্তয়সি নিশ্চয়ং করোষি মিথ্যৈষ ব্যবসায়ো নিশ্চয়স্তে তব তস্মাৎ প্রকৃতিঃ ক্ষত্রস্বভাবস্ত্বাং নিয়োক্ষ্যতি ॥ ৫৯ ॥

যস্মাচ্চ স্বভাবজেন শৌর্য্যাদিনা কৌন্তেয় যথোক্তেন নিবদ্ধোনিশ্চয়েন বদ্ধঃ স্বেনা-

## গিরিকৃত টীকা।

ভীত্যাপি প্রবর্ত্তেতইতি মন্বানোবিপর্য্যযে দোষমাহ অথ চেদিতি ॥ ৫৮ ॥

স্বাতন্ত্র্যে সতি ভীতেরবকাশো নাস্তীত্যাশঙ্ক্যাহ ইদঞ্চেতি। ইতশ্চ ত্বয়া যুদ্ধান্ন বৈমুখ্যং কর্ত্তুমুচিতমিত্যাহ মিথ্যেতি ॥ ৫৯ ॥

যস্মাচ্চেতি। স্বভাবজেন কর্ম্মণা নিবদ্ধস্ত্বমিতি সম্বন্ধঃ। ইতোঽপি ত্বয়া যুদ্ধং কর্ত্তব্যমেবেত্যাহ যস্মাদিতি ॥ ৬০ ॥

## স্বামিকৃত টীকা।

দুস্তরাণি সাংসারিকদুঃখানি তরিষ্যসি,বিপক্ষে দোষমাহ অথ চেৎ যদি পুনস্ত্বমহঙ্কারাৎ জ্ঞাতৃত্বাভিমানাৎমদুক্তমেবং ন শ্রোষ্যসি তর্হি বিনঙ্ক্ষ্যসি পুরুষার্থাদ্ভ্রষ্টোভবিষ্যসি ॥ ৫৮ ॥

কামং বিনঙ্ক্ষ্যামি নতু বন্ধুভির্যুদ্ধং করিষ্যামীতি চেত্তত্রাহ যদহঙ্কারমিতি। মদুক্তমনাদৃত্য কেবলমহঙ্কারমবলম্ব্য যুদ্ধং ন করিষ্যামীতি যন্মন্যসে ত্বমধ্যবস্যসি এষ তব ব্যবসায়োমিথ্যৈবাস্বতন্ত্রত্বাত্তব, তদেবাহ প্রকৃতিস্ত্বাং রজোগুণরূপেণ পরিণতা সতী নিয়োক্ষ্যতি যুদ্ধে প্রবর্ত্তয়িষ্যত্যেব ॥ ৫৯ ॥

কিঞ্চ স্বভাবজেনেতি। স্বভাবঃ ক্ষত্রিয়ত্বহেতুঃ পূর্ব্বকর্ম্মসংস্কারস্তস্মাজ্জাতেন স্বীয়েন

ঈশ্বরঃ সর্ব্বভূতানাং হৃদ্দেশেঽর্জ্জুন তিষ্ঠতি।
ভ্রাময়ন্ সর্ব্বভূতানি যন্ত্রারূঢ়ানি মায়য়া॥ ৬১॥

## শাঙ্করভাষ্যম্।

স্বাধীনকর্ম্মণা কর্ত্তুং নেচ্ছসি যৎ কর্ম্ম মোহাদবিবেকতঃ করিষ্যস্যবশোঽপি পরবশ এব তৎ কর্ম্ম যস্মাৎ॥ ৬০॥

ঈশ্বরঃ ঈশনশীলো নারায়ণঃ সর্ব্বভূতানাং সর্ব্বপ্রাণিনাং হৃদ্দেশে হৃদয়দেশেঽর্জ্জুন শুক্লান্তরাত্মস্বভাবোবিশুদ্ধান্তঃকরণইতি অহশ্চ কৃষ্ণমহরর্জ্জুনঞ্চেতি দর্শনাৎ তিষ্ঠতি স্থিতিং লভতে, স কথন্তিষ্ঠতীত্যাহ ভ্রাময়ন্ ভ্রমণং কারয়ন্ সর্ব্বভূতানি যন্ত্রারূঢ়ানীব যন্ত্রণ্যারূঢ়াণ্যধিষ্ঠিতানীবেতি ইবশব্দোঽত্র দ্রষ্টব্যো যথা দারুকৃতপুরুষাদীনি যন্ত্রারূঢ়ানি মায়যা ছদ্মনা ভ্রাময়ন্ তিষ্ঠতীতি সম্বন্ধঃ॥ ৬১॥

## গিরিকৃত টীকা।

অর্জ্জুনশব্দস্যোক্তার্থত্বে শ্রুতিমুদাহরতি অহশ্চেতি। অহশ্চ কৃষ্ণমহরর্জ্জুনঞ্চ বিবর্ত্তেতে রজনী বেদ্যাভিঃ ইত্যত্র কিঞ্চিদহস্তাবৎ কৃষ্ণমস্বচ্ছঙ্কলুষিতমিব লক্ষ্যতে কিঞ্চিৎ পুনরহর্জ্জুনমতিস্বচ্ছং শুদ্ধভাবমুপলভ্যতে এবমর্জ্জুনশব্দস্য শুক্লশব্দপর্য্যায়তয়া প্রয়োগদর্শনাদুক্তার্থত্বমুচিতমিত্যর্থঃ। যন্ত্রারূঢ়ানীবেতি কথমুচ্যতে তত্রাহ ইবশব্দইতি। তদেব প্রপঞ্চয়তি যথেতি। দারুময়ানি যন্ত্রাণি যথা লৌকিকো মায়াবী মায়য়া ভ্রাময়ন্বর্ত্ততে তথেশ্বরোঽপি সর্ব্বাণি ভূতানি ভ্রাময়ন্নেব হৃদয়ে তিষ্ঠতীত্যর্থঃ॥ ৬১॥

ঈশ্বরঃ সর্ব্বাণি ভূতানি প্রেরয়তি চেৎ প্রাপ্তং কৈবল্যার্থস্যাপি পুরুষকারস্যানর্থক্য-

## স্বামিকৃত টীকা।

কর্ম্মণা শৌর্য্যাদিনা পূর্ব্বোক্তেন নিবদ্ধো যন্ত্রিতস্ত্বং মোহাৎ যৎ কর্ম্ম যুদ্ধলক্ষণং কর্ত্তুং নেচ্ছসি অবশঃ সংস্তৎ কর্ম্ম করিষ্যস্যেব॥ ৬০॥

তদেবং শ্লোকদ্বয়েন সাংখ্যাদিমতেন প্রকৃতিপারতন্ত্র্যং স্বভাবপারতন্ত্র্যং চোক্তং ইদানীং স্বমতমাহ ঈশ্বরইতি দ্বাভ্যাং। সর্ব্বভূতানাং হৃন্মধ্যে ঈশ্বরোঽন্তর্যামী তিষ্ঠতি, কিং কুর্ব্বন্, সর্ব্বাণি ভূতানি মায়য়া নিজশক্ত্যা ভ্রাময়ংস্তত্তৎকর্ম্মসু প্রবর্ত্তয়ন্ যথা দারুযন্ত্রমারূঢ়ানি কৃত্রিমাণি ভূতানি সূত্রধারো লোকে ভ্রাময়তি তদ্বদিত্যর্থঃ, যদ্বা, যন্ত্রাণি শরীরাণি আরূঢ়ানি ভূতানি দেহাভিমানিনোজীবান্ ভ্রাময়ন্নিত্যর্থঃ, তথা চ শ্বেতাশ্বতরাণাং মন্ত্রঃ, একো দেবঃ সর্ব্বভূতেষু গূঢ়ঃ সর্ব্বব্যাপী সর্ব্বভূতান্তরাত্মা। কর্ম্মাধ্যক্ষঃ সর্ব্বভূতাধিবাসঃ সাক্ষী চেতাঃ কেবলোনির্গুণশ্চেতি। অন্তর্যামিব্রাহ্মণশ্চ, যআত্মনি তিষ্ঠন্নাত্মানমন্তরো যমত্তি যং আত্মা ন বেদ যস্যাত্মা শরীরং এষতে অন্তর্যাম্যমৃতইত্যাদি॥ ৬১॥

তমেব শরণং গচ্ছ সর্ব্বভাবেন ভারত।
তৎপ্রসাদাৎ পরাং শান্তিং স্থানং প্রাপ্স্যসি শাশ্বতম্ ॥৬২॥
ইতি তে জ্ঞানমাখ্যাতং গুহ্যাদ্গুহ্যতরং ময়া।
বিমৃশ্যৈতদশেষেণ যথেচ্ছসি তথা কুরু ॥ ৬৩ ॥
সর্ব্বগুহ্যতমং ভূয়ঃ শৃণু মে পরমং বচঃ।
ইষ্টোঽসি মে দৃঢ়মিতি ততো বক্ষ্যামি তে হিতম্ ॥৬৪॥

## শাঙ্করভাষ্যম্।

তমেবেশ্বরং শরণমাশ্রয়ং সংসারার্ত্তিহরণার্থং গচ্ছ আশ্রয় সর্ব্বভাবেন সর্ব্বাত্মনা হে ভারত ততস্তৎপ্রসাদাদীশ্বরানুগ্রহাৎ পরাং প্রকৃষ্টাং শান্তিং পরামুপরতিং স্থানঞ্চ মম বিষ্ণোঃ পরমং পদমবাপ্স্যসি শাশ্বতং নিত্যং ॥ ৬২ ॥

ইত্যেতত্তে তুভ্যং জ্ঞানমাখ্যাতং কথিতং গুহ্যাৎ গোপ্যাৎ গুহ্যতরং অতিশয়েন গুহ্যং রহস্যমিত্যর্থঃ ময়া সর্ব্বজ্ঞেনেশ্বরেণ বিমৃশ্য বিমর্শনমালোচনং কৃত্বৈতদ্যথোক্তং শাস্ত্রমশেষেণ সমস্তং যথোক্তং চার্থজাতং যথেচ্ছসি তথা কুরু ॥ ৬৩ ॥

তথাভূয়োঽপি ময়োচ্যমানং শৃণু সর্ব্বগুহ্যতমং সর্ব্বগুহ্যেভ্যোঽত্যন্তগুহ্যতমং রহস্য-

## গিরিকৃত টীকা।

মিত্যাশঙ্ক্যাহ তমেবেতি। সর্ব্বাত্মনা মনোবৃত্ত্যা বাচা কর্ম্মণা চেত্যর্থঃ, ঈশ্বরস্যানুগ্রহাত্তত্ত্বজ্ঞানোৎপত্তিপর্য্যন্তাদিতিশেষঃ, মুক্তাস্তিষ্ঠন্ত্যস্মিন্নিতি স্থানং ॥ ৬২ ॥

শাস্ত্রমুপসংহর্ত্তুমিচ্ছন্নাহ ইতি তে জ্ঞানমিতি। জ্ঞানং করণব্যুৎপত্ত্যা গীতাশাস্ত্রং, যথেচ্ছসি তথা কুরু, জ্ঞানং কর্ম্মাপ্যুপদিষ্টং তদনুতিষ্ঠেত্যর্থঃ ॥ ৬৩ ॥

গীতাশাস্ত্রস্য পৌর্ব্বাপর্য্যেণ বিমর্শনদ্বারা তাৎপর্য্যার্থং প্রতিপত্তুমসমর্থং প্রত্যাহ ভূয়োঽপীতি। কিমর্থমিচ্ছন্ পুনঃ পুনরভিদধাসীত্যাশঙ্ক্যাহ ন ভয়াদিতি ॥ ৬৪ ॥

## স্বামিকৃত টীকা।

তমিতি। যস্মাদেবং সর্ব্বে জীবাঃ পরমেশ্বরপরতন্ত্রাস্তস্মাদহংকারং পরিত্যজ্য সর্ব্বভাবেন সর্ব্বাত্মনা তমীশ্বরমেব শরণং গচ্ছ, ততশ্চ তস্যৈব প্রসাদাৎ পরামুত্তমাং শান্তিং স্থানঞ্চ পারমেশ্বরং শাশ্বতং নিত্যং প্রাপ্স্যসি ॥ ৬২ ॥

সর্ব্বগীতার্থমুপসংহরন্নাহ ইতীতি। ইত্যনেন প্রকারেণ তে তুভ্যং সর্ব্বজ্ঞেন পরমকারুণিকেন ময়া জ্ঞানমাখ্যাতমুপদিষ্টং, কথংভূতং, গুহ্যাৎ গোপ্যাৎ রহস্যমন্ত্রযোগাদিজ্ঞানাদপি গুহ্যতরং এতন্ময়োপদিষ্টং গীতাশাস্ত্রমশেষতোবিমৃশ্য পর্য্যালোচ্য পশ্চাদ্ যথেচ্ছসি তথা কুরু, এতস্মিন্ পর্য্যালোচিতে সতি তব মোহোনিবর্ত্তিষ্যতইতিভাবঃ ॥ ৬৩ ॥

মন্মনা ভব মদ্ভক্তো মদ্‌যাজী মাং নমস্কুরু।
মামেবৈষ্যসি সত্যং তে প্রতিজানে প্রিয়োঽসি মে ॥ ৬৫ ॥

## শাঙ্করভাষ্যম্।

উক্তমপ্যসকৃত্ত্বঃ পুনঃ শৃণু মে মম পরমং প্রকৃষ্টং বচো বাক্যং ন ভয়াৎ নাপ্যর্থকারণাদ্বা বক্ষ্যামি তহি ইষ্টঃ প্রিয়োঽসি মে মম দৃঢ়মব্যভিচারেণেতি কৃত্বা ততস্তেন কারণেন বক্ষ্যামি কথয়িষ্যামি তে তব হিতং পরং জ্ঞানপ্রাপ্তিসাধনং ॥ ৬৪ ॥

তদ্ধি সর্ব্বহিতানাং হিততমঙ্কিস্তদিত্যাহ মন্মনা ভব মচ্চিত্তোভব মদ্ভক্তোভব মদ্ভজনোভব মদ্যাজী ময়ি যজনশীলোভব মাং নমস্কুরু নমস্কারং ময়ি মমৈব কুরু তত্রৈবং বর্ত্তমানো বাসুদেবে এব সর্ব্বসমর্পিতসাধ্যসাধনপ্রয়োজনোমামেবৈষ্যসি আগমিষ্যসি সত্যন্তে তব প্রতিজানে, সত্যাং প্রতিজ্ঞাং করোম্যেতস্মিন্বস্তুনীত্যর্থোযতঃ প্রিয়োঽসি মে এবং ভগবতঃ সত্যপ্রতিজ্ঞত্বং বুদ্ধা ভগবদ্ভক্তেরবশ্যম্ভাবিমোক্ষফলমবধার্য্য ভগবচ্ছরণৈকপরায়ণো-ভবেদিতি বাক্যার্থঃ ॥ ৬৫ ॥

কর্ম্মযোগনিষ্ঠায়াঃ পরমরহস্যমীশ্বরশরণতামুপসংহৃত্যাথেদানীং কর্ম্মযোগত্যাগনি-

## গিরিকৃত টীকা।

স্থিতমিতি সাধারণনির্দ্দেশে কথং পরমিত্যাদিবিশেষণমিত্যাশঙ্ক্যাহ তদ্ধীতি। তদেব প্রশ্নদ্বারা বিবৃণোতি কিং তদিত্যাদিনা। উত্তরার্দ্ধং ব্যাচষ্টে তত্রেতি। এবমুক্তয়া রীত্যা বর্ত্তমানস্তং তস্মিন্নেব বাসুদেবে ভগবতি অর্পিতসর্ব্বভাবোমামেবাগমিষ্যসীতি সম্বন্ধঃ। সত্যপ্রতিজ্ঞাকরণে হেতুমাহ যতইতি। ইদানীং বাক্যার্থং শ্রেয়োঽর্থিনাং প্রবৃত্ত্যুপযোগিত্বেন সংগৃহ্লাতি এবমিতি ॥ ৬৫ ॥

## স্বামিকৃত টীকা।

অতিগম্ভীরং গীতাশাস্ত্রমশেষতঃ পর্য্যালোচিতুমশক্নুবতঃ কৃপয়া স্বয়মেব তস্য সারং সংগৃহ্য কথয়তি সর্ব্বগুহ্যতমমিতি ত্রিভিঃ সর্ব্বেভ্যোঽপি গুহ্যেভ্যোগুহ্যতমং মে বচস্তত্র তত্রোক্তমপি ভূয়ঃ পুনরপি বক্ষ্যমাণং শৃণু, পুনঃ পুনঃ কথনে হেতুমাহ দৃঢ়মত্যন্তমিষ্টঃ প্রিয়োঽসীতি মত্বা ততএব হেতোস্তে হিতং বক্ষ্যমাণং দৃঢ়ং সর্ব্বপ্রমাণোপেতমিতি নিশ্চিত্য ততস্তে বক্ষ্যামীত্যর্থঃ, দৃঢ়মতিরিতি কচিৎ পাঠঃ ॥ ৬৪ ॥

তদেবাহ মন্মনাইতি। মন্মনা মচ্চিত্তোভব মদ্ভক্তোমদ্ভজনশীলোভব মদ্‌যাজী মদ্‌যজনশীলোভব মামেব নমস্কুরু এবং বর্ত্তমানস্তং মৎপ্রসাদলব্ধজ্ঞানেন মামেবৈষ্যসি প্রাপ্স্যসি অত্র চ সংশয়ং মাকার্ষীঃ ত্বং হি মে প্রিয়োঽসি অতঃ সত্যং যথা ভবত্যেবং তুভ্যমহং প্রতিজানে প্রতিজ্ঞাং করোমি ॥ ৬৫ ॥

সর্ব্বধর্ম্মান্ পরিত্যজ্য মামেকং শরণং ব্রজ।
অহংত্বাং সর্ব্বপাপেভ্যো মোক্ষয়িষ্যামি মা শুচঃ॥ ৬৬॥
ইদন্তে নাতপস্কায় নাভক্তায় কদাচন।
নচাশুশ্রূষবে বাচ্যং ন চ মাং যোঽভ্যসূয়তি॥ ৬৭॥

## শাঙ্করভাষ্যম্।

ষ্টাফলং সম্যগ্‌দর্শনং সর্ব্ববেদান্তবিহিতং বক্তব্যমিত্যাহ সর্ব্বধর্ম্মান্ সর্ব্বে চ তে ধর্ম্মাশ্চ সর্ব্বধর্ম্মাঃ তান্ ধর্ম্মশব্দেনাত্রাধর্ম্মোঽপি গৃহ্যতে নৈষ্কর্ম্মস্য বিবক্ষিতত্বাৎ নাবিরতোদুশ্চ-রিতাদ্বিমুচ্যতইতি ত্যজ ধর্ম্মমধর্ম্মঞ্চেত্যাদিশ্রুতিস্মৃতিভ্যঃ সর্ব্বধর্ম্মান্ পরিত্যজ্য সন্ন্যস্য সর্ব্বকর্ম্মাণীত্যেতন্মামেকং সর্ব্বাত্মানং সর্ব্বভূতস্থমীশ্বরং অচ্যুতং গুরুং জন্মমরণবিবর্জিতমহ-মেবেত্যেবমেকং শরণং ব্রজ ন মত্তোঽন্যদস্তীত্যবধারযেত্যর্থঃ অহং তু ত্বামেবং নিশ্চিত-বুদ্ধিং সর্ব্বপাপেভ্যঃ সর্ব্বধর্ম্মাধর্ম্মবন্ধনরূপেভ্যোমোক্ষয়িষ্যামি স্বাত্মভাবপ্রকাশীকরণেন উক্তঞ্চ নাশয়াম্যাত্মভাবস্থোজ্ঞানদীপেন ভাস্বতা ইত্যতো মা শুচঃ শোকং মাকার্ষীরি-ত্যর্থঃ॥ ৬৬॥

অস্মিন্ হি গীতাশাস্ত্রে পরং নিঃশ্রেয়সসমাধানং নিশ্চিতং' কিং জ্ঞানং কিংকর্ম্ম বা আহোস্বিদুভয়মিতি কুতঃ সন্দেহঃ' যৎ জ্ঞাত্বামৃতমশ্নুতে" ততো মাং তত্ত্বতোজ্ঞাত্বা বিশতে তদনন্তরমিত্যাদীনি বাক্যানি কেবলাৎ জ্ঞানাৎ নিশ্রেয়সপ্রাপ্তিং দর্শয়ন্তি "কর্ম্মণ্যেবাধি-কারস্তে" কুরু কর্ম্মৈবেত্যেবমাদীনি কর্ম্মণাং অবশ্যকর্ত্তব্যতাং দর্শয়ন্তি এবং জ্ঞানকর্ম্মণো

## গিরিকৃত টীকা।

বৃত্তমনূদ্যানন্তরশ্লোকতাৎপর্য্যমাহ কর্ম্মযোগেতি। ধর্ম্মবিশেষণাদধর্ম্মানুজ্ঞানং বারয়তি ধর্ম্মেতি। জ্ঞাননিষ্ঠেন মুমুক্ষুণা ধর্ম্মাধর্ম্মযোস্ত্যাজ্যত্বে শ্রুতিস্মৃতী উদাহরতি নাবিরতইতি। মামেকমিত্যাদেস্তাৎপর্য্যমাহ ন মত্তোঽন্যদিতি। অর্জুনস্য ক্ষত্রিয়ত্বাদুক্তসন্ন্যাসদ্বারা জ্ঞান-নিষ্ঠায়াং মুখ্যানধিকারেঽপি তং পুরস্কৃত্যাধিকারিভ্যস্তস্যোপদিদিক্ষুত্বাদবিরোধমভিপ্রেত্যাহ অহংত্বিতি। উক্তেঽর্থে দাশমিকং বাক্যমনুকূলয়তি উক্তঞ্চেতি ঈশ্বরস্য ত্বদীয়বন্ধননিয়মন-দ্বারা তৎপালয়িতৃত্বান্ন তে শোকাবকাশোঽস্তীত্যাহ অতইতি॥ ৬৬॥

পূর্ব্বাপরালোচনাতোগীতাশাস্ত্রং ব্যাখ্যায়োপসংহৃত্য তত্তাৎপর্য্যার্থং নির্দ্ধারিতমপি বিচারদ্বারা নির্দ্ধারয়িতুং বিচারমবতারয়তি অস্মিন্নিতি। কিংশব্দার্থমেব ত্রেধা বিভজতে

## স্বামিকৃত টীকা।

ততোঽপি গুহ্যতমমাহ সর্ব্বেতি। মদ্ভক্ত্যৈব সর্ব্বং ভবিষ্যতীতি দৃঢ়বিশ্বাসেন বিধি-কৈঙ্কর্য্যং ত্যক্ত্বা মদেকশরণোভব এবং বর্ত্তমানঃ কর্ম্মত্যাগনিমিত্তং পাপং স্যাদিতি মাশুচঃ শোকং মাকার্ষীঃ যতস্ত্বাং মদেকশরণং সর্ব্বপাপেভ্যোঽহং মোক্ষয়িষ্যামি॥ ৬৬॥

## শাঙ্করভাষ্যম্।

কর্ত্তব্যতোপদেশাৎ সমুচ্চিতয়োরপি নিঃশ্রেয়সহেতুত্বং স্যাদিতি ভবেৎ সংশয়ঃ কিং পুনরত্র মীমাংসাফলং'নন্বেতদেব এষামন্যতমস্য পরমনিঃশ্রেয়সসাধনত্বাবধারণং, অতোবিস্তীর্ণতবং মীমাংস্যমেতৎ আত্মজ্ঞানস্য তু কেবলস্য নিঃশ্রেষসহেতুত্বং ভেদপ্রত্যয়নিবর্ত্তকত্বেন কৈবল্যফলাবসানত্বাৎ ক্রিয়াকারকফলভেদবুদ্ধিরবিদ্যযাত্মনি নিত্যপ্রবৃত্তা' মম কর্ম্মাহং কর্ত্তাহমস্মৈ ফলায়েদং কর্ম্ম করিষ্যামীতীয়মবিদ্যা অনাদিকালপ্রবৃত্তা, অস্যাঅবিদ্যায়া-নিবর্ত্তকময়মহমস্মি কেবলোঽকর্ত্তাক্রিয়োঽফলোন মত্তোঽন্যোঽস্তি কশ্চিদিত্যেবং রূপমাত্মবিষয়ং জ্ঞানমুৎপদ্যমানং'কর্ম্মপ্রবৃত্তিহেতুভূতায়া ভেদবুদ্ধের্নিবর্ত্তকত্বাৎ' তুশব্দঃ পক্ষদ্বয়ব্যাবৃত্ত্যর্থঃ'ন কেবলেভ্যঃ কর্ম্মভ্যঃ ন চ জ্ঞানকর্ম্মভ্যাং সমুচ্চিতাভ্যাং নিঃশ্রেয়সপ্রাপ্তিরিতি পক্ষদ্বয়ং নিবর্ত্তয়তি' অকার্য্যত্বাচ্চ নিঃশ্রেয়সস্য কর্ম্মসাধনত্বানুপপত্তিঃ'ন হি নিত্যং বস্তু কর্ম্মণা জ্ঞানেন বা ক্রিয়তে কেবলজ্ঞানমপি অনর্থকং'তর্হি ন, অবিদ্যানিবর্ত্তকত্বে সতি দৃষ্টকৈবল্যফলাবসানত্বাদবিদ্যাতমোনিবর্ত্তকস্য জ্ঞানস্য দৃষ্টং কৈবল্যফলাবসানত্বং রজ্জ্বাদিবিষয়ে সর্পাদ্যজ্ঞানতমসোনিবর্ত্তকপ্রদীপপ্রকাশফলবৎ বিনিবৃত্তসর্পাদিবিকল্পরজ্জুকৈবল্যাবসানং হি প্রকাশফলং জ্ঞানং তথা দৃষ্টার্থায়াশ্চ ছিদিক্রিয়াগ্নিমন্থনাদীনাং ব্যাপৃত-

---

## গিরিকৃত টীকা।

জ্ঞানমিতি। নিমিত্তাভাবে সংশয়স্যাভাবত্বান্ন নিবস্যতামিতি মত্বা পৃচ্ছতি কুতইতি। তত্তদর্থাবদ্যোতকানেকবাক্যদর্শনং তন্নিমিত্তমিত্যাহ যৎজ্ঞাত্বেতি। কর্ম্মণামবশ্যকর্ত্তব্যত্বোপলম্ভাত্তেভ্যোঽপি নিঃশ্রেযসপ্রাপ্তির্ভাতীত্যাহ কর্ম্মণ্যেবেতি। তথাপি সমুচ্চয়প্রাপকং নাস্তীত্যাশঙ্ক্যাহ এবমিতি। সত্যাং সামগ্র্যাং কার্য্যমবশ্যম্ভাবীত্যুপসংহরতি ইতি ভবেদিতি। সন্দিগ্ধং সফলঞ্চ বিচার্য্যমিতি স্থিতে সতি ফলং সন্দিগ্ধমপি ন বিচার্য্যমিতি বুদ্ধ্যা পৃচ্ছতি কিং পুনরিতি। প্রত্যেকং জ্ঞানকর্ম্মণোঃসমুচ্চিতযোর্ব্বা মুক্তিং প্রতি পরমসাধনতেত্যবধারণমেব বিচারফলমিতি পরিহরতি নন্বিতি। সন্দেহপ্রযোজনযোর্বিচারপ্রয়োজকয়োর্ভাবাৎ বিচারদ্বারা পরমমুক্তিসাধনং নির্দ্ধারণীয়মিতি নিগমযতি অতইতি। এবং বিচারমবতার্য্য সিদ্ধান্তং সংগৃহ্নাতি আত্মেতি। সংগ্রহবাক্যং বিবৃণ্বন্ আদাবাত্মজ্ঞানাপোহ্যামবিদ্যাং দর্শয়তি ক্রিয়েতি। আশ্রয়োক্ত্যা তদনাদিত্বমাহ আত্মনীতি। তামেবাবিদ্যামনাদ্যবিদ্যোত্থামনর্থাত্মিকাং প্রপঞ্চয়তি মমেতি। অনাদ্যবিদ্যাকার্য্যত্বাৎ প্রবাহরূপেণানাদিত্বমস্যাবিবক্ষিত্বা বিশিনষ্টি অনাদীতি। তত্র কারণাবিদ্যানিবর্ত্তকত্বমাত্মজ্ঞানস্যোপন্যস্যতি অস্যাইতি। নন্থু নেদমুৎপন্নং জ্ঞানং নিবর্ত্তয়ত্যবিরোধেনোৎপন্নত্বান্ন চানুৎপন্নমলব্ধাত্মকস্যার্থক্রিয়াকারিত্বাভাবাত্তত্রাহ উৎপদ্যমানমিতি। কথং তস্য কারণাবিদ্যানিবর্ত্তকত্বমিত্যাশঙ্ক্য কার্য্যাবিদ্যানিবর্ত্তকত্বদৃষ্টেরিত্যাহ কর্ম্মেতি। আত্মজ্ঞানস্যেত্যাদিসংগ্রহবাক্যে তুশব্দযোগ্যবিশেষাভাবাদানর্থক্যমাশঙ্ক্যাহ তু শব্দইতি। পক্ষদ্বয়ব্যাবর্ত্তকত্বমেবাস্য স্ফু-

## শাঙ্করভাষ্যম্।

কর্ত্রাদিকারকাণাং দ্বৈধীভাবাগ্নিদর্শনাদিফলাদন্যফলে কর্ম্মান্তরে বা ব্যাপারানুপপত্তির্যথা তথা জ্ঞাননিষ্ঠাক্রিয়ায়াং স্বদৃষ্টার্থায়াং ব্যাপৃতস্য জ্ঞাত্রাদিকারকস্যাত্মকৈবল্যফলাদন্যফলে কর্ম্মান্তরে বা প্রবৃত্তিরনুপপন্নেতি ন জ্ঞাননিষ্ঠা কর্ম্মসহিতোপপদ্যতে জ্ঞাননিষ্ঠা ভুজিক্রিয়াগ্নিহোত্রাদিক্রিয়াবৎ স্যাদিতি চেৎ ন কৈবল্যফলে জ্ঞানে ক্রিয়াফলার্থিত্বানুপপত্তেঃ কৈবল্যফলে হি জ্ঞানে প্রাপ্তে সর্ব্বতঃ সংপ্লুতোদকে ফলে কূপতড়াগাদিক্রিয়াফলার্থিত্বাভাববৎ ফলান্তরে তৎসাধনভূতায়াং বা ক্রিয়ায়ামর্থিত্বানুপপত্তেঃ নহি রাজ্যপ্রাপ্তিফলে কর্ম্মণি ব্যাপৃতস্য ক্ষেত্রমাত্রপ্রাপ্তিফলে ব্যাপারোপপত্তিস্তদ্বিষয়কার্থিত্বং তস্মান্ন কর্ম্মণোঽস্তি নিঃশ্রেয়সসাধনত্বং নচ জ্ঞানকর্ম্মণোঃ সমুচ্চিতয়োর্নাপি জ্ঞানস্য কৈবল্যফলস্য কর্ম্মসাহায্যাপেক্ষা অবিদ্যানিবর্ত্তকত্বেন চ বিবোধাৎ, নহি তমস্তমসোনিবর্ত্তকমতঃ কেবলমেব জ্ঞানং নিঃশ্রেয়সাধনমিতি ন নিত্যাকরণে প্রত্যবায়াপ্রাপ্তেঃ কৈবল্যস্য চ নিত্যত্বাৎ যত্তাবৎ কেবলজ্ঞানাৎ কৈবল্যপ্রাপ্তিরিত্যেতত্তদসৎ যতোনিত্যানাং কর্ম্মণাং শ্রুত্যুক্তানামকরণে প্রত্যবায়োনরকাদিপ্রাপ্তিলক্ষণঃ স্যাৎ, নন্বেবং তর্হি কর্ম্মেভ্যো মোক্ষোনাস্তি ইত্যনির্ম্মোক্ষপ্রসঙ্গ এব নৈষদোষোনিত্যত্বান্মোক্ষস্য নিত্যানাং কর্ম্মণামনু-

## গিরিকৃত টীকা।

য়তি নেত্যাদিনা। ইতশ্চ কর্ম্মাসাধ্যতা মুক্তেরিত্যাহ অকার্য্যত্বাচ্চেতি। এষনিত্যোমহিমেতি শ্রুতেঃ নিত্যত্বেন মোক্ষস্যাকার্য্যত্বান্ন তত্র হেত্বপেক্ষেত্যুপপাদয়তি নহীতি। জ্ঞানেনাপি মোক্ষোন ক্রিয়তে চেত্তর্হি কেবলমপি জ্ঞানং মুক্ত্যনুপযুক্তমিতি কুতস্তস্য তত্র হেতুত্বধীরিত্যাশঙ্কতে কেবলেতি। জ্ঞানানর্থক্যং, দূষয়তি নেতি। তদেব প্রপঞ্চয়তি অবিদ্যেতি। যদুক্তমবিদ্যানিবর্ত্তকজ্ঞানস্য কৈবল্যফলাবসায়িত্বং দৃষ্টমিতি তত্র দৃষ্টান্তমাহ রজ্জ্বাদীতি। উক্তে বিষয়ে তমোনিবর্ত্তকপ্রকাশস্য কস্মিন্ ফলে পর্য্যবসানং তত্রাহ বিনিবৃত্তেতি। প্রদীপপ্রকাশস্য সর্পভ্রমনিবৃত্তিদ্বারা রজ্জুমাত্রে পর্য্যবসানবদাত্মজ্ঞানস্যাপি তদবিদ্যাদিবৃত্ত্যাত্মকৈবল্যাবসানমিতি দার্ষ্টান্তিকমাহ তথেতি। জ্ঞাত্রাদীনাং জ্ঞাননিষ্ঠাহেতূনাং কর্ম্মান্তরে প্রবৃত্তিসম্ভবাৎ কর্ম্মসহিতৈব সা কৈবল্যাবসায়িনীতি চেত্তত্রাহ দৃষ্টার্থাযামিতি। কর্ম্মসাহিত্যং জ্ঞাননিষ্ঠাযাদৃষ্টান্তেন সাধয়ন্নাশঙ্কতে ভুজীতি। ভুজিক্রিয়ায়া লৌকিক্যাবৈদিক্যাশ্চাগ্নিহোত্রাদিক্রিয়ায়াঃ সহানুষ্ঠানবদগ্নিহোত্রাদিক্রিয়ায়াজ্ঞাননিষ্ঠায়াশ্চ সাহিত্যমিত্যর্থঃ। ভুজিফলে তৃপ্ত্যাখ্যে প্রাপ্তেঽপি স্বর্গাদৌ তদ্ধেতৌ চাগ্নিহোত্রাদাবর্থিত্বদৃষ্টের্যুক্তং তত্র সাহিত্যং ন তথা মুক্তিফলজ্ঞাননিষ্ঠালাভে স্বর্গাদৌ তদ্ধেতৌ বা কর্ম্মণ্যর্থিত্বমেন জ্ঞাননিষ্ঠাকর্ম্মণোন সাহিত্যমিতি পরিহরতি নেত্যাদিনা। সংগ্রহবাক্যং বিবৃণোতি কৈবল্যেতি। জ্ঞানে ফলবতি লব্ধে ফলান্তরে তদ্ধেতৌ চ নার্থিতেত্যত্র দৃষ্টান্তমাহ সর্ব্বত ইতি। সর্ব্বত্র সংপ্লুতং ব্যাপ্তমুদকমিতি সমুদ্রোক্তিস্তৎফলং স্নানাদি তস্মিন্ প্রাপ্তে তড়া-

## শাঙ্করভাষ্যম্।

ষ্ঠানাৎ প্রত্যবায়স্যাপ্রাপ্তিঃ বর্ত্তমানশরীরারম্ভকস্য চ কর্ম্মণঃ ফলোপভোগক্ষয়ে পতিতে-ঽস্মিন্ শরীরে দেহান্তরোৎপত্তৌ চ কারণাভাবাদাত্মনঃ রাগাদীনাং চাকরণাৎ স্বরূপাবস্থানমেব কৈবল্যমিত্যযত্নসিদ্ধং কৈবল্যমিতি অতিক্রান্তানেকজন্মান্তরকৃতস্য স্বর্গনরকাদিপ্রাপ্তিফলস্যানারব্ধকার্য্যস্যোপভোগানুপপত্তেঃ ক্ষয়াভাবইতিচেন্ন নিত্যকর্ম্মানুষ্ঠানায়াসদুঃখোপভোগস্য তৎফলোপভোগত্বোপপত্তেঃ প্রায়শ্চিত্তবদ্বা পূর্ব্বোপাত্তদুরিতক্ষয়ার্থত্বং নিত্যকর্ম্মণাং আবদ্ধানাঞ্চ উপভোগেনৈব কর্ম্মণাং ক্ষীণত্বাদপূর্ব্বাণাঞ্চ কর্ম্মণামনারম্ভেঽযত্নসিদ্ধং কৈবল্যমিতি ন তমেব বিদিত্বাতিমৃত্যুমেতি নান্যঃ পন্থা বিদ্যতেঽয়নায়েতি বিদ্যায়াঅন্যঃ পন্থা মোক্ষায় ন বিদ্যতইতি শ্রুতেশ্চর্ম্মবদাকাশবেষ্টনাসম্ভববদবিদুষো মোক্ষাসম্ভবশ্রুতেঃ জ্ঞানাৎ কৈবল্যমাপ্নোতি ইতি চ পুরাণস্মৃতেরনারব্ধফলানাং পুণ্যানাং কর্ম্মণাং ক্ষয়ানুপপত্তেশ্চ যথা পূর্ব্বোপাত্তানাং দুরিতানামনারব্ধফলানাং সম্ভবস্তথা পুণ্যানামপ্যনারব্ধফলানাং সবম্ভবস্তথা পুরাণস্মৃতেরনারব্ধফলানাং স্যাৎ সম্ভবস্তেষাং চ দেহান্তরমকৃত্বা ক্ষয়ানুপপত্তিঃ ধর্ম্মাধর্ম্মহেতূনাঞ্চ রাগদ্বেষমোহানামপ্যুৎপন্নাত্মজ্ঞানাদুচ্ছেদানুপপত্তেঃ ধর্ম্মা-

---

## গিরিকৃত টীকা।

গাদিনির্ম্মাণক্রিয়াযাং তদধীনে চ স্নানাদৌ ন কস্যচিদর্থিত্বং তথা প্রকৃতেঽপীত্যর্থঃ। নিরতিশয়ফলে জ্ঞানে লব্ধে সাতিশয়ফলে কর্ম্মণি নার্থিত্বমিত্যেতদ্দৃষ্টান্তেন স্ফুটয়তি নহীতি। কর্ম্মণঃ সাতিশয়ফলত্বমুক্তমুপজীব্যফলিতমাহ তস্মান্নেতি। জ্ঞানকর্ম্মণোঃ সাহিত্যাসম্ভবমপি পূর্ব্বোক্তং নিগময়তি নচেতি নহি প্রকাশতমসোরিব মিথোবিরুদ্ধয়োস্তয়োঃ সাক্ষাদেকস্মিন্ ফলে সাহিত্যমিত্যর্থঃ। নন্বু জ্ঞানমেব মোক্ষং সাধয়দাত্মসহায়ত্বেন কর্ম্মাপেক্ষতে করণস্যোপকরণাপেক্ষত্বাত্তত্রাহ নাপীতি। জ্ঞানমুৎপত্তৌ যজ্ঞাদ্যপেক্ষমপি নোৎপন্নং ফলে তদপেক্ষং সোৎপত্তিনান্তরীয়কত্বেন জ্ঞানং কর্ম্মাপেক্ষমিতি তত্রাহ অবিদ্যেতি। জ্ঞানস্যাজ্ঞাননিবর্ত্তকত্বাত্তত্র কর্ম্মণোবিরুদ্ধতয়া সহকারিত্বাযোগান্ন ফলে তদপেক্ষেত্যর্থঃ। কর্ম্মণোঽপি জ্ঞানবদজ্ঞাননিবর্ত্তকত্বে কথং বিরুদ্ধতেত্যাশঙ্ক্যাহ নহীতি। কেবলস্য সমুচ্চিতস্য বা কর্ম্মণোমোক্ষে সাক্ষাদনন্বয়ে ফলিতমাহ অতইতি। কেবলজ্ঞানং মুক্তিসাধনমিত্যুক্তং তন্নিষেধয়ন্নাশঙ্কতে নেত্যাদিনা। নিষেধ্যমনূদ্য নঞর্থমাহ যত্তাবদিতি। নিত্যাকরণে প্রত্যবাযপ্রাপ্তেরিতি হেতুং প্রপঞ্চয়তি যতইতি। জ্ঞানবতোঽপি নিত্যানুষ্ঠানস্যাবশ্যকত্বান্ন কেবলজ্ঞানস্য কৈবল্যহেতুতেত্যর্থঃ। কৈবলস্য চ নিত্যত্বাদিত্যস্য ব্যাবর্ত্তং দর্শয়তি নন্বিতি। যদি নিত্যনৈমিত্তিককর্ম্মাণি শ্রৌতান্যকরণে প্রত্যবায়কারীণ্যবশ্যানুষ্ঠেয়ান্যেবং তর্হি তেভ্যঃ সমুচ্চিতেভ্যোঽসমুচ্চিতেভ্যশ্চ মোক্ষো নেত্যুক্তত্বাৎ কেবলজ্ঞানস্য বা তদ্ধেতুত্বাদনিবন্ধনা মুক্তির্ন সিধ্যেদিত্যর্থঃ। কৈবল্যস্য চেত্যাদি ব্যাকুর্ব্বন্ন নির্ম্মোক্ষপ্রসঙ্গং প্রত্যাদিশতি দৈবদোষইতি। মুক্তির্নিত্যত্বেনাযত্নসিদ্ধের্ন তদভাবশঙ্কেত্যুক্তং প্রপঞ্চয়তি

## শাঙ্করভাষ্যম্।

ধর্ম্মোচ্ছেদানুপপত্তিঃ নিত্যানাঞ্চ কর্ম্মণাং পুণ্যলোকফলশ্রুতের্ব্বর্ণা আশ্রমাশ্চ স্বকর্ম্মনিষ্ঠাঃ পুণ্যল্লোকাভবন্তি ইত্যাদিস্মৃতেশ্চ কর্ম্মক্ষরানুপপত্তির্যেত্বাহুর্নিত্যানি কর্ম্মাণি দুঃখরূপত্বাৎ পূর্ব্বকৃতদুরিতকর্ম্মণাং ফলমেব নতু তেষাং স্বরূপব্যতিরেকেণান্যৎ ফলমস্ত্যশ্রুতত্বাৎ জীবনাদিনিমিত্তে চ বিধানাদিতি নাপ্রবৃত্তানাঞ্চ ফলদানাসম্ভবাৎ দুঃখফলবিশেষানুপপত্তিঃ কর্ম্মণাং স্যাৎ যদুক্তং পূর্ব্বজন্মকৃতদুরিতানাং কর্ম্মণাং ফলং নিত্যকর্ম্মানুষ্ঠানায়াসদুঃখং ভুজ্যতইতি তদসন্ন হি মরণকালে ফলদানায়ানঙ্কুরীভূতস্য কর্ম্মণঃ ফলমন্যদারব্ধে জন্মন্যুপভুজ্যতইত্যুপপত্তিঃ অন্যথা স্বর্গফলোপভোগায়াগ্নিহোত্রাদিকর্ম্মারব্ধে জন্মনি নরকফলোপভোগানুপপত্তির্ন স্যাত্তস্য দুরিতদুঃখবিশেষফলত্বানুপপত্তেশ্চ অনেকেষু হি দুরিতেষু সম্ভবৎস্বভিন্নদুঃখসাধনফলেষু নিত্যকর্ম্মানুষ্ঠানায়াসদুঃখমাত্রফলেষু কল্প্যমানেষু দ্বন্দ্বরাগাদিবাধানিমিত্তং দুঃখং নহি শক্যতে কল্পয়িতুং নিত্যকর্ম্মানুষ্ঠানায়াসদুঃখমেব

---

## গিরিকৃত টীকা।

নিত্যানামিতি। কাম্যকর্ম্মবশাদিষ্টশরীরাপত্তিং শঙ্কিত্বোক্তং কাম্যানাঞ্চেতি। আবব্ধকর্ম্মবশাত্তর্হি দেহান্তরং নেত্যাহ বর্ত্তমানেতি। তর্হি দেহান্তরং শেষকর্ম্মণা স্যাদিত্যাশঙ্ক্য কর্ম্মাশয়স্যৈকভবিকত্বন্নেত্যাহ পতিতেঽস্মিন্নিতি। রাগাদিনা কর্ম্মান্তরং ততোদেহান্তরঞ্চ ভবিষ্যতীত্যাশঙ্ক্যাহ রাগাদীনাঞ্চেতি। আত্মনঃ স্বরূপাবস্থানমিতি সম্বন্ধঃ। অতীতাসঙ্খ্যজন্মভেদেষর্জিতস্য কর্ম্মণোনানাফলস্যানারব্ধস্য ভোগেনাক্ষয়াৎ ততোদেহান্তরারম্ভাদেকভবিকত্বস্যাপ্রামাণিকত্বান্ন মুক্তেরযত্নসিদ্ধতেতি চোদয়তি অতিক্রান্তেতি। নোক্তকর্ম্মনিমিত্তং দেহান্তরং শঙ্কিতব্যমিত্যাহ নেতি। নিত্যনৈমিত্তিককর্ম্মাণি শ্রৌতান্যবশ্যমনুষ্ঠেয়ানি তদনুষ্ঠানেচ মহানায়াসস্ততো দুঃখোপভোগস্তস্যোক্তানারব্ধকর্ম্মফলভোগত্বোপগমান্ন ততো দেহান্তরমিত্যাহ নিত্যেতি। নিত্যাদিনা দুরিতনিবৃত্তাবপ্যবিরোধান্ন সুকৃতনিবৃত্তিস্ততোদেহান্তরমিত্যাশঙ্ক্য সুকৃতস্য নিত্যাদেরন্যত্বেনারব্ধত্বেচ ন্যায়বিরুদ্ধস্য তস্যাসিদ্ধত্বাত্ততোদেহান্তরাযোগান্নিত্যাদেরন্যত্বে চ ন তস্য ফলান্তরমিতি মত্বা যথা প্রায়শ্চিত্তমুপাত্তদুরিতনিবর্হণার্থং ন ফলান্তরাপেক্ষস্তথেদং সর্ব্বমপি নিত্যাদিকর্ম্মোপাত্তপাপনিরাকরণার্থং তস্মিন্নেব পর্য্যবস্যন্ন দেহান্তরারম্ভকমিতি পক্ষান্তরমাহ প্রায়শ্চিত্তবদিতি। তথাপি প্রারব্ধবশাদেব দেহান্তরং শংকতে নানাজন্মারম্ভকাণামপি তেষাং যাবদধিকারন্যায়েন সম্ভবাদিত্যাশঙ্ক্যাহ আরব্ধানাঞ্চেতি। পূর্ব্বার্জ্জিতকর্ম্মণামেবক্ষীণত্বেঽপি কানিচিদপূর্ব্বকর্ম্মাণি দেহান্তরমারভেরন্নিত্যাশঙ্ক্যাহ অপূর্ব্বাণাঞ্চেতি। বিনা জ্ঞানং কর্ম্মণৈব মুক্তিরিতি পক্ষং শ্রুত্যবষ্টম্ভেন নিরাচষ্টে নেত্যাদিনা। বিদ্যতেঽয়নায়েতি শ্রুতেরিতি সম্বন্ধঃ। এবকারার্থং বিবৃণ্বন্নেত্যাদিভাগং ব্যাকরোতি অন্যইতি। যদা চর্ম্মবদাকাশং বেষ্টয়িষ্যন্তি মানবাঃ তদা দেবমবিজ্ঞায় দুঃখস্যান্তোভবিষ্যতীতি শ্রুতিমর্থতোঽনুবদতি

## শাঙ্করভাষ্যম্।

পূর্ব্বোপাত্তদুরিতফলং ন শিরসা পাষাণবহনাদিদুঃখমিতি অপ্রকৃতঞ্চেদমুচ্যতে নিত্যকর্ম্মানুষ্ঠানায়াসদুঃখং পূর্ব্বকৃতদুরিতকর্ম্মফলমিতি কথমপ্রসূতফলস্য হি পূর্ব্বকৃতদুরিতস্য ক্ষয়োনোপপদ্যতইতি প্রকৃতং তত্রাপ্রসূতফলস্য কর্ম্মণঃ ফলং নিত্যকর্ম্মানুষ্ঠানায়াসদুঃখমাহ ভবান্ন প্রসূতফলস্যেত্যর্থঃ সর্ব্বমেব পূর্ব্বকৃতং দুরিতং তৎপ্রসূতফলমেবেতি মন্যতে ভবাংস্ততোনিত্যকর্ম্মানুষ্ঠানায়াসদুঃখমেব ফলমিতি বিশেষণমযুক্তং নিত্যকর্ম্মবিধ্যানর্থক্যপ্রসঙ্গশ্চোপভোগেনৈব প্রসূতফলস্য দুরিতকর্ম্মণঃ ক্ষয়োপপত্তেঃ। কিঞ্চ শ্রুতস্য নিত্যস্য দুঃখঞ্চেৎ ফলং নিত্যকর্ম্মানুষ্ঠানায়াসাদেব তৎ দৃশ্যতে ব্যায়ামাদিবত্তদন্যস্যেতি কল্পানুপপত্তিঃ জীবনাদিনিমিত্তে চ বিধানান্নিত্যানাং কর্ম্মণাং প্রায়শ্চিত্তবৎ

## গিরিকৃত টীকা।

চর্ম্মবদিতি। শ্রৌতার্থে স্মৃতিং সম্বাদয়তি জ্ঞানাদিতি। কিঞ্চ তদীয়ন্যায়স্যানুগ্রাহ্যমানহীনত্বেনাভাসতয়া পুণ্যকর্ম্মণামনারব্ধফলানাং ক্ষয়াভাবে দেহান্তরাবশ্যসম্ভবান্ন জ্ঞানং বিনা মুক্তিরিত্যাহ অনারব্ধেতি। তথাবিধানাং কর্ম্মণাং নাস্তি সম্ভাবনেত্যাশংক্যাহ যথেতি। অনারব্ধফলপুণ্যকর্ম্মাভাবেঽপি কথং মোক্ষানুপপত্তিরিতি তত্রাহ তেষাঞ্চেতি। ইতশ্চ কর্ম্মক্ষয়ানুপপত্ত্যা মোক্ষানুপপত্তিরিতি তত্রাহ ধর্ম্মেতি। কর্ম্মণা পিতৃলোকইতি শ্রুতিমাশ্রিত্য কর্ম্মক্ষয়ে হেত্বন্তরমাহ নিত্যানামিতি। স্মৃত্যাপি যথোক্তমর্থং সমর্থয়তে বর্ণাইতি। প্রেত্য কর্ম্মফলমনুভূয় ততঃ শেষেণ বিশিষ্টজাত্যাদিভাজোজন্মপ্রতিপদ্যন্তঃ ইত্যেতদাদিপদার্থঃ। যত্তু নিত্যানুষ্ঠানায়াসদুঃখভোগস্য তৎফলভোগত্বমিতি তদিদানীমনুবদতি যেত্বিতি। নিত্যান্যনুষ্ঠীয়মানান্যায়াসপর্য্যন্তানীতিশেষঃ। তথাপি নিত্যানাং কাম্যানামিব স্বরূপাতিরিক্তং ফলমাশংক্য বিধ্যুদ্দেশে তদশ্রবণান্নৈবমিত্যাহ নত্বিতি। বিধ্যুদ্দেশে ফলাশ্রুতৌ তৎকামনায়ানিমিত্তস্যাভাবান্ন নিত্যানি বিধীয়েরন্নিত্যাশঙ্ক্যাহ জীবনেতি। ন নিত্যানাং বিধ্যসিদ্ধিরিতিশেষঃ। অনুভাষিতং দূষয়তি নেত্যাদিনা। তদেব বিবৃণ্বন্নিষেধ্যমনূদ্য নঞর্থমাহ যদুক্তমিতি। অপ্রবৃত্তানামিত্যাদিহেতুং প্রপঞ্চয়তি নহীতি। কর্ম্মান্তরারব্ধেঽপি দেহে দুরিতফলং নিত্যানুষ্ঠানায়াসদুঃখং ভুজ্যতাঙ্কানুপপত্তিরিত্যাশঙ্ক্যাহ অন্যথেতি। যদুক্তং দুঃখফলবিশেষানুপপত্তিশ্চ স্যাদিতি তদুপপাদয়তি তস্যেতি। সম্ভাবিতানি তাবদনন্তানি সঞ্চিতানি দুরিতানি চ নানাদুঃখফলানি যদি তানি নিত্যানুষ্ঠানায়াসরূপদুঃখং তন্মাত্রফলানি কল্পেরন্ তদা তেষ্বেবং কল্প্যমানেষু সৎস্বনিত্যস্যানুষ্ঠিতস্যায়াসমাসাদয়তো যো দুরিতকৃতোদুঃখবিশেষো ন তৎফলং দুরিতফলানাং দুঃখানাং বহুত্বাদতোনিত্যং কর্ম্ম যথাবিশেষং তং দুরিতকৃতদুঃখবিশেষফলকমিত্যযুক্তমিত্যর্থঃ। কিঞ্চ নিত্যানুষ্ঠানায়াসদুঃখমাত্রফলানি চেদ্দুরিতানি কল্প্যন্তে তদা ব্রহ্ম শব্দিতরাগাদিবাধস্য রাগাদিবাধায়াশ্চ দুরিতনিমিত্তত্বানুপপত্তেঃ সুকৃতফলত্বস্য চাসম্ভবাদ-

## শাঙ্করভাষ্যম্।

পূর্ব্বকৃতদুরিতফলত্বানুপপত্তিঃ যস্মিন্ পাপকর্ম্মনিমিত্তে যদ্বিহিতং প্রায়শ্চিত্তং ন তু তস্য-পাপস্য তৎফলমথ তস্যৈব পাপস্য নিমিত্তস্য প্রায়শ্চিত্তদুঃখং ফলং জীবনাদিনিমিত্তমপি নিত্যকর্ম্মানুষ্ঠানায়াসদুঃখং জীবনাদিনিমিত্তস্যৈব তৎফলং প্রসজ্যেত নিত্যপ্রায়শ্চিত্তয়োর্-নৈমিত্তিকত্বাবিশেষাৎ কিঞ্চান্যন্নিত্যস্য কাম্যস্য চাগ্নিহোত্রাদেরনুষ্ঠানায়াসদুঃখস্য তুল্যত্বান্নিত্যানুষ্ঠানায়াসদুঃখমেব পূর্ব্বকৃতদুরিতস্য ফলং ন তু কাম্যানুষ্ঠানায়াসদুঃখমিতি বিশেষোনাস্তীতি তদপি পূর্ব্বকৃতদুরিতফলং প্রসজ্যেত তথা চ সতি নিত্যানাং ফলা-শ্রবণাত্তদ্বিধানান্যথানুপপত্তেশ্চ নিত্যানুষ্ঠানায়াসদুঃখং পূর্ব্বকৃতদুরিতফলমিত্যর্থাপত্তি-কল্পনা চানুপপন্না এবং বিধানান্যথানুপপত্তেরনুষ্ঠানায়াসদুঃখব্যতিরিক্তফলত্বানুমানাচ্চ

## গিরিকৃত টীকা।

নুপপত্তিরেবোদীরিতবাধায়াঃ স্যাদিত্যাহ দ্বন্দ্বেতি। ইতশ্চ নিত্যানুষ্ঠানায়াসদুঃখমেব দুরিতফলমিত্যযুক্তমিত্যাহ নিত্যেতি। দুঃখমিতি ন শক্যতে কল্পয়িতুমিতি পূর্ব্বেণ সম্বন্ধঃ। যদি তদেব তৎফলং ন তর্হি শিরসা পাষাণবহনাদিদুঃখং দুরিতকৃতং ন চ তৎ-কারণং সুকৃতং দুঃখস্যাতৎকার্য্যত্বাদতস্তদাকস্মিকং স্যাদিত্যর্থঃ। নিত্যানুষ্ঠানায়াসদুঃখ-মুপাত্তদুরিতফলমিত্যেতদপ্রকৃতত্বাচ্চাযুক্তং বক্তুমিত্যাহ অপ্রকৃতঞ্চেতি তদেব প্রপঞ্চয়িতুং পৃচ্ছতি কথমিতি। তত্রাদৌ প্রকৃতমাহ অপ্রসূতেতি। তথাপি কথমস্মাকমপ্রকৃতবাদিত্বং তত্রাহ তত্রেতি। প্রসূতফলত্বমপ্রসূতফলত্বমিতি প্রাচীনদুরিতগতবিশেষানুপগমাদ-বিশেষেণ সর্ব্বস্যৈব তস্য প্রসূতফলত্বান্নিত্যানুষ্ঠানায়াসদুঃখফলত্বসম্ভবান্নাপ্রকৃতবাদিতেতি শঙ্কতে অথেতি। পূর্ব্বোপাত্তদুরিতস্যাপি শেষেণারব্ধফলত্বে বিশেষণানর্থক্যমিতি পরি-হরতি ততইতি। দুরিতমাত্রস্যারব্ধফলত্বেনানারব্ধফলস্য তস্যোক্তফলবিশেষবত্ত্বানুপ-পত্তেরিত্যর্থঃ। পূর্ব্বোপাত্তদুরিতমারব্ধফলঞ্চেদ্ভোগেনৈব তৎক্ষয়সম্ভবাত্তন্নিবৃত্ত্যর্থং নিত্যং কর্ম্ম ন বিধাতব্যমিতিদোষান্তরমাহ নিত্যেতি। ইতশ্চ নিত্যানুষ্ঠানায়াসদুঃখং নোপাত্ত-দুরিতফলমিত্যাহ কিঞ্চেতি। তদেব স্ফোরয়তি শ্রুতস্যেতি। যথা ব্যায়ামগমনাদিকৃতং দুঃখং নান্যস্য দুরিতস্যেষ্যতে তৎফলত্বসম্ভবাত্তথা নিত্যস্যাপি শ্রুত্যুক্তস্যানুষ্ঠিতস্যায়াস-পর্য্যন্তস্য ফলান্তরানুপগমাদনুষ্ঠানায়াসদুঃখমেব চেৎ ফলং তর্হি তস্মাদেব তদ্দর্শনাত্তস্য ন দুরিতফলত্বং কল্প্যং নিত্যফলত্বসম্ভবাদিত্যর্থঃ। দুঃখফলত্বে নিত্যানামননুষ্ঠানমেব শ্রেয়ঃ স্যাদিত্যাশঙ্ক্যাহ জীবনাদিতি। নিত্যানাং দুরিতফলত্বানুপপত্তৌ হেত্বন্তরমাহ প্রায়-শ্চিত্তবদিতি। দৃষ্টান্তং প্রপঞ্চয়তি যস্মিন্নিতি। তথা জীবনাদিনিমিত্তে বিহিতানাং দুরিতফলত্বাসিদ্ধিরিতি শেষঃ। সত্যং প্রায়শ্চিত্তং ন নিমিত্তস্য পাপস্য ফলং কিন্তু তদনু-ষ্ঠানায়াসদুঃখং তস্য পাপস্য ফলমিতি শঙ্কতে অথেতি। প্রায়শ্চিত্তানুষ্ঠানায়াসদুঃখস্য

## শাঙ্করভাষ্যম্।

নিত্যানাং বিরোধাচ্চ বিরুদ্ধঞ্চেদমুচ্যতে নিত্যকর্ম্মণানুষ্ঠীয়মানেনান্যান্যস্য কর্ম্মণঃ ফলং ভুজ্যতইত্যভ্যুপগম্যমানে স এবোপভোগোনিত্যস্য কর্ম্মণঃ ফলমিতি নিত্যস্য কর্ম্মণঃ ফলাভাবইতি বিরুদ্ধমুচ্যতে কিঞ্চ কাম্যাগ্নিহোত্রাদাবনুষ্ঠীয়মানে নিত্যমপ্যগ্নিহোত্রাদি তন্ত্রেণৈবানুষ্ঠিতম্ভবতীতি তদায়াসদুঃখনৈব কাম্যাগ্নিহোত্রাদিফলমুপক্ষীণং স্যাত্তন্ত্রত্বাদথ কাম্যাগ্নিহোত্রাদিফলমন্যদেব স্বর্গাদি তদনুষ্ঠানায়াসদুঃখমপিভিন্নং প্রসজ্যেত নচ তদস্তি দৃষ্টবিরোধাৎ নহি কাম্যানুষ্ঠানায়াসদুঃখাৎ কেবলনিত্যানুষ্ঠানায়াসদুঃখং ভিদ্যতে কিঞ্চা-ন্যদবিহিতমপ্রতিষিদ্ধঞ্চ কর্ম্ম তৎকালফলং নতু শাস্ত্রচোদিতং প্রতিষিদ্ধং বা তৎকাল-ফলং ভবেদ্যদি তদা স্বর্গাদিষ্বপ্যদৃষ্টফলশাসনে চোদ্যমো ন স্যাৎ অগ্নিহোত্রাদীনামেব কর্ম্মস্বরূপাবিশেষেঽনুষ্ঠানায়াসদুঃখমাত্রেণোপক্ষয়ঃ কাম্যানাঞ্চ স্বর্গাদিমহাফলত্বমঙ্গেতিকর্ত্তব্য-তাদ্যাধিক্যে ত্বসতি তৎফলকামিত্বমাত্রেণেতি ন শক্যং কল্পয়িতুং তস্মান্ন নিত্যানাং কর্ম্মণা-দৃমষ্টফলাভাবঃ কদাচিদপ্যুপপদ্যতে।

---

## গিরিকৃত টীকা।

নিমিত্তভূতপাপফলত্বে জীবনাদিনিমিত্তনিত্যাদ্যনুষ্ঠানায়াসদুঃখমপি জীবনাদেরেব ফলং স্যান্নোপাত্তদুরিতস্যেতি পরিহরতি জীবনাদিতি। প্রায়শ্চিত্তদুঃখস্য তন্নিমিত্তপাপফলত্ব-বজ্জীবনাদিনিমিত্তমিত্যাদি কর্ম্মকৃতমপি দুঃখং জীবনাদিফলমিত্যত্র হেতুমাহ নিত্যেতি ইতশ্চ নিত্যানুষ্ঠানায়াসদুঃখমেবোপাত্তদুরিতফলমিত্যাশঙ্ক্য বক্তুমিত্যাহ কিঞ্চেতি। কাম্যানুষ্ঠানায়াসদুঃখমপি দুরিতফলমিত্যুপগমাৎ প্রসঙ্গস্যেষ্টত্বমাশঙ্ক্যাহ তথাচেতি। বিহিতানি তাবন্নিত্যানি নচ তেষু ফলং শ্রুতং ন চ বিনা ফলং বিধিঃ তেন দুরিতনিব-র্হণার্থানি নিত্যানীত্যর্থাপত্ত্যা তেষু চ সা যুক্তা কাম্যানুষ্ঠানাদপি দুরিতনিবৃত্তিসম্ভবাদি-ত্যর্থঃ কিঞ্চনিত্যান্যনুষ্ঠানায়াসদুঃখাতিরিক্তফলানি বিহিতত্বাৎ কাম্যবদিত্যনুমানাত্তেষাং দুরিতনিবৃত্ত্যর্থতেত্যাহ এবমিতি। কাম্যাদিকর্ম্ম দৃষ্টান্তয়িতুমেবমিত্যুক্তং। স্বোক্তি-ব্যাঘাতাচ্চ নিত্যানুষ্ঠানাৎ দুরিতফলভোগোক্তিরযুক্তেত্যাহ বিরোধাচ্চেতি। তদেব প্রপ-ঞ্চয়তি বিরুদ্ধঞ্চেতি। ইদংশব্দার্থমেব বিশদয়তি নিত্যেতি। অন্যস্য কর্ম্মণোদুরিতস্যেতি যাবৎ। সএবেতি। যদনন্তরং যদ্ভবতি তত্তস্য কার্য্যমিতি নিয়মাদিত্যর্থঃ। ইতশ্চ নিত্যানুষ্ঠানে দুরিতফলভোগোন সিধ্যতীত্যাহ কিঞ্চেতি কাম্যানুষ্ঠানস্য নিত্যানুষ্ঠানস্য চ যৌগপদ্যান্নিত্যানুষ্ঠানায়াসদুঃখেন দুরিতফলভোগবৎ কাম্যফলস্যাপি ভুক্তত্বসম্ভবাদিতি হেতুমাহ তন্ত্রত্বাদিতি। নিত্যকাম্যানুষ্ঠানয়োর্যৌগপদ্যেঽপি নিত্যানুষ্ঠানায়াসদুঃখাদন্যদেব কাম্যানুষ্ঠানফলং শ্রুতত্বাদিতি শংকতে অথেতি। কাম্যানুষ্ঠানফলং নিত্যানুষ্ঠানায়াসদুঃখা-দ্ভিন্নঞ্চেত্তর্হি কাম্যানুষ্ঠানায়াসদুঃখঞ্চ নিত্যানুষ্ঠানায়াসদুঃখঞ্চ মিথোভিন্নং স্যাদিত্যাহ

## শাঙ্করভাষ্যম্।

অতশ্চাবিদ্যাপূর্ব্বকস্য কর্ম্মণোবিদ্যৈব শুভস্যাশুভস্য বা ক্ষয়কারণং অশেষতোন নিত্য-কর্ম্মানুষ্ঠানমবিদ্যাকামবীজং হি সর্ব্বমেব কর্ম্ম তথাচোপপাদিতং অবিদ্বদ্বিষয়া সর্ব্বকর্ম্ম-সন্ন্যাসপূর্ব্বিকা জ্ঞাননিষ্ঠা উভৌ তৌ ন বিজানীতো বেদাবিনাশিনং নিত্যং জ্ঞানযোগেন সাঙ্খ্যানাং কর্ম্মযোগেন যোগিনামজ্ঞানাং কর্ম্মসঙ্গিনাং তত্ত্ববিত্তু গুণাগুণেষু বর্ত্তন্তইতি মত্বা ন সজ্জতে সর্ব্বকর্ম্মাণি মনসা সন্ন্যস্যাস্তে নৈব কিঞ্চিৎ করোমীতি যুক্তোমন্যেত তত্ত্ববিদর্থাদজ্ঞঃ করোমীত্যারুরুক্ষোঃ কর্ম্মকারণমারূঢ়স্য যোগস্থস্য শমএব কারণমুদারা-স্ত্রয়োঽপ্যজ্ঞা জ্ঞানী ত্বাত্মৈব মে মতমজ্ঞাঃ কর্ম্মিণোগতাগতং কামকামালভন্তে অনন্যাশ্চিন্ত-য়ন্তো মাং নিত্যযুক্তা যথোক্তমাত্মানমাকাশকল্পমকল্মষমুপাসতে দদামি বুদ্ধিযোগন্তং যেন মামুপয়ান্তি তে অর্থান্ন কর্ম্মিণোঽজ্ঞা উপযান্তি ইতি ভগবৎকর্ম্মকারিণো যে যুক্ততমা অপি

---

## গিরিকৃত টীকা।

তদনুষ্ঠানেষ্বিতি। প্রসঙ্গস্যেষ্টত্বমাশঙ্ক্য নিরাচষ্টে নচেতি। দৃষ্টবিরোধমেব স্পষ্টয়তি নহীতি আত্মজ্ঞানবদগ্নিহোত্রাদীনাং মোক্ষে সাক্ষাদন্বয়ো নেত্যত্রান্যদপি কারণমস্তীত্যাহ কিঞ্চান্য-দিতি। তদেব কারণং বিবৃণোতি অবিহিতমিতি। যৎকর্ম্ম মর্দনভোজনাদি তত্র শাস্ত্রে বিহিতং নিষিদ্ধং বা তদনন্তরফলং তথানুভবাদিত্যর্থঃ। শাস্ত্রীয়ং কর্ম্ম তু নানন্তরফলমান-ন্তর্য্যস্যাচোদিতত্বাদতোজ্ঞানে দৃষ্টফলেনাদৃষ্টফলকর্ম্মসহকারি ভবতি, নাপি স্বয়মেব দৃষ্টফলে মোক্ষে কর্ম্মপ্রবৃত্তিঃ ক্ষমেতি বিবক্ষিত্বাহ নত্বিতি। শাস্ত্রীয়স্যাগ্নিহোত্রাদেরপি ফলানন্তর্য্যে স্বর্গাদীনামনন্তরমনুপলব্ধির্ব্বিরুধ্যেত ততস্তেষ্বপি তথাবিধফলাপেক্ষয়া প্রবৃত্তিরগ্নিহোত্রা-দিষু ন স্যাদিত্যাহ তদেতি। কিঞ্চ নিত্যানামগ্নিহোত্রাদীনাং নাদৃষ্টফলং তেষামেব কাম্যানাং তাদৃক্ফলং ন চ হেতুং বিনায়ং বিভাগোভাবীত্যাহ অগ্নিহোত্রাদীনামিতি। ফলকামিত্বমাত্রেণেতি ন স্যাদিতি পূর্ব্বেণ সম্বন্ধঃ। যানি নিত্যান্যগ্নিহোত্রাদীনি যানি চ কাম্যানি তেষামুভয়েষামেব কর্ম্মস্বরূপবিশেষাভাবেঽপি নিত্যানাং তেষাং অনুষ্ঠানায়াস-দুঃখমাত্রেণ ক্ষয়ো ন ফলান্তরমস্তি তেষামেব কাম্যানামঙ্গাদ্যাধিক্যাভাবেঽপি ফলকামিত্ব-মধিকারিণ্যস্তীত্যেতাবন্মাত্রেণ স্বর্গাদিমহাফলত্বমিত্যয়ং বিভাবো ন প্রমাণবানিত্যর্থঃ। উক্তবিভাগাযোগে ফলিতমাহ তস্মাদ্রেতি।

কাম্যবন্নিত্যানামপি পিতৃলোকাদ্যদৃষ্টফলবত্ত্বে দুরিতনিবৃত্ত্যর্থত্বাযোগাদর্থেনাত্মবিদ্যৈ-বাভ্যুপগন্তব্যেত্যাহ অতশ্চেতি। শুভাশুভাত্মকং কর্ম্ম সর্ব্বমবিদ্যাপূর্ব্বকঞ্চেদশেষতস্তর্হি তস্য ক্ষয়কারণং বিদ্যেত্যুপপদ্যতে নতৎ সর্ব্বং কর্ম্মাবিদ্যাপূর্ব্বকমিতি সিদ্ধমিত্যাশঙ্ক্যাহ অবিদ্যেতি তত্র হিশব্দদ্যোতিতাং যুক্তিং দর্শয়তি তথেতি। ইতশ্চাবিদ্বদ্বিষয়ং কর্ম্মে-ত্যাহ অবিদ্বদিতি। অধিকারিভেদেন নিষ্ঠাদ্বয়মিত্যত্র বাক্যোপক্রমমনুকূলয়তা আত্মনি কর্ত্তৃত্বং কর্ম্মত্বমারোপয়ন্ ন জানাত্যাত্মানমিতি বদতা কর্ম্মাজ্ঞানমূলমিতি দর্শিতমিত্যাহ

## শাঙ্করভাষ্যম্।

কর্ম্মিণোঽজ্ঞাস্তে উত্তরোত্তরহীনফলত্যাগাবসানসাধনা অনির্দ্দেশ্যাক্ষরোপাসকাস্ত্বদ্বেষ্টা সর্ব্বভূতানামিত্যধ্যায়পরিসমাপ্ত্যুক্তসাধনাঃ ক্ষেত্রাধ্যায়াদ্যধ্যায়ত্রয়োক্তজ্ঞানসাধনানাঞ্চাধিষ্ঠানাদিপঞ্চহেতুকসর্ব্বকর্ম্মসন্ন্যাসিনামাত্মৈকত্বাকর্ত্তৃত্বজ্ঞানবতাং পরস্যাং জ্ঞাননিষ্ঠায়াং বর্ত্তমানানাং ভগবত্তত্ত্ববিদামনিষ্টাদিকর্ম্মফলত্রয়ং পরমহংসপরিব্রাজকানামেব লব্ধভগবৎস্বরূপাত্মৈকত্বশরণানাং ন ভবতি ভবত্যেবমন্যেষামজ্ঞানাং কর্ম্মিণামসন্ন্যাসিনামিত্যেষ গীতাশাস্ত্রোক্তস্য কর্ত্তব্যাকর্ত্তব্যার্থস্য বিভাগঃ। অবিদ্যাপূর্ব্বকত্বং সর্ব্বস্য কর্ম্মণোঽসিদ্ধমিতি চেন্ন ব্রহ্মহত্যাদিলক্ষণবৎ যদ্যপি শাস্ত্রাগতং নিত্যং কর্ম্ম তথাপ্যবিদ্যাবতএব ভবতি যথা প্রতিষেধশাস্ত্রাবগতমপি ব্রহ্মহত্যাদিলক্ষণং কর্ম্মানর্থকারণং অবিদ্যাকামাদিদোষবতোভবতি অন্যথা প্রবৃত্ত্যনুপপত্তেস্তথা নিত্যনৈমিত্তিককাম্যাদ্যপীতি ব্যতিরিক্তাত্মজ্ঞানে প্রবৃত্তির্নিত্যাদিকর্ম্মস্বনুপপন্নেতি চেন্ন চলনাত্মকস্য কর্ম্মণোঽনাত্মকর্ত্তৃকস্যাহঙ্করোমীতি প্রবৃত্তিদর্শনাৎ। দেহাদিসঙ্ঘাতে অহং প্রত্যযোগৌণোন মিথ্যা ইতি চেৎ ন তৎকার্য্যেষ্বপি গৌণত্বোপপত্তেবাত্মীযে দেহাদিসঙ্ঘাতে অহং প্রত্যযোগৌণোযথাত্মীয পুত্রে আত্মা বৈ পুত্রনামাসীতি লোকে চাপি মম প্রাণএবায়ঙ্গৌবিতি তদ্বন্নৈবং মিথ্যাপ্রত্যযোমিথ্যাপ্রত্যয়স্তু স্থাণুপুরুষযোরগৃহ্যমাণবিশেষয়োর্ন গৌণপ্রত্যয়স্য মুখ্যকার্য্যার্হত্বং অধিকরণস্তুত্যর্থত্বালুপ্তোপমাশব্দেন যথা সিংহো দেবদত্তোঽগ্নির্ম্মাণবকইতি সিংহইবাগ্নিরিব

## গিরিকৃত টীকা।

উভাবিতি। আত্মানং যাথাতথ্যেন জানন্ কর্ত্তৃত্বাদিরহিতোভবতীতি ব্রুবতা কর্ম্মসন্ন্যাসে জ্ঞানবতোঽধিকারিত্বং সূচিতমিত্যাহ বেদেতি। নিষ্ঠাদ্বয়মধিকারিভেদেন বোদ্ধব্যমিত্যত্রৈব বাক্যান্তরমাহ জ্ঞানেতি। ন বুদ্ধিভেদং জনয়েদিত্যত্র চাবিদ্যামূলত্বং কর্ম্মণঃ সূচয়তা কর্ম্মনিষ্ঠাবিদ্বদ্বিষয়ানুমোদিতেত্যাহ অজ্ঞানামিতি। যদুক্তং বিদ্বদ্বিষয়া সন্ন্যাসপূর্ব্বিকা জ্ঞাননিষ্ঠেতি তত্র তত্ত্ববিত্তু মহাবাহো গুণকর্ম্মবিভাগয়োরিত্যাদি বাক্যমুদাহরতি তত্ত্ববিত্বিতি। তত্রৈব বাক্যান্তরং পঠতি সর্ব্বেতি। বিদুষোজ্ঞাননিষ্ঠেত্যত্রৈব পাঞ্চমিকং বাক্যান্তরমাহ নৈবেতি। তত্রৈবার্থসিদ্ধমর্থং কথযতি অজ্ঞইতি। মন্যতইতি সম্বন্ধঃ। অজ্ঞস্য চিত্তশুদ্ধ্যর্থং কর্ম্ম শুদ্ধচিত্তস্য কর্ম্মসন্ন্যাসোজ্ঞানপ্রাপ্তৌ হেতুরিত্যত্র বাক্যান্তবমাহ আরুরুক্ষোরিতি। যথোক্তে বিভাগে সাপ্তমিকং বাক্যমনুগুণমিত্যাহ উদারইতি। এবং ত্রয়ীধর্ম্মমিত্যাদি নাবমিকবাক্যমবিদ্বদ্বিষয়ং কর্ম্মেত্যত্র প্রমাণয়তি অজ্ঞাইতি। বিদুষঃ সন্ন্যাসপূর্ব্বিকা জ্ঞাননিষ্ঠেত্যত্রৈব নাবমিকং বাক্যান্তরমাহ অনন্যাইতি। মামিত্যেতদ্ব্যাচষ্টে যথোক্তমিতি। তেষাং সততযুক্তানামিত্যাদি দাশমিকং বাক্যং তত্রৈব প্রমাণয়তি দদামীতি। বিদ্যাবতামেব ভগবৎপ্রাপ্তিদের্শাদিতরেষাত্তদপ্রাপ্তিঃ সূচিতেত্যর্থসিদ্ধ-

## শাঙ্করভাষ্যম্।

ক্রৌর্য্যপৈঙ্গল্যাদিসামান্যবত্ত্বাৎ দেবদত্তমাণবকাধিকরণকস্তত্যর্থমেব নতু সিংহকার্য্যমগ্নিকার্য্যং বা গৌণশব্দপ্রত্যয়নিমিত্তং কিঞ্চিৎ সাধ্যতে মিথ্যা প্রত্যয়কার্য্যত্বং ত্বনর্থমনুভবতি গৌণপ্রত্যয়স্য বিষয়ঞ্চ জানাতি নৈবং সিংহোদেবদত্তঃ স্যান্নাযমগ্নির্মাণবকইতি তথা গৌণেন দেহাদিসঙ্ঘাতেনাত্মনা কৃতং কর্ম ন মুখ্যেনাহং প্রত্যয়বিষযেণাত্মনা কৃতং স্যান্ন হি গৌণসিংহাগ্নিভ্যাং কৃতং কর্ম্ম মুখ্যসিংহাগ্নিভ্যাং কৃতং স্যান্ন চ ক্রৌর্য্যেণ পৈঙ্গল্যেন বা মুখ্যসিংহাগ্ন্যোঃ কার্য্যং কিঞ্চিৎ ক্রিয়তে স্তুত্যর্থেনোপক্ষীণত্বাৎ স্তূয়মানৌ চ জানীতোনাহং সিংহোনাহমগ্নিরিতি ন সিংহস্য কর্ম্ম মমাগ্নেশ্চেতি তথা ন সঙ্ঘাতস্যং কর্ম্ম মম মুখ্যস্যাত্মনইতি প্রত্যয়োযুক্ততরঃ স্যান্ন পুনরহং কর্ত্তা মম কর্ম্মেতি যচ্চাহুরাত্মীয়ৈঃ স্মৃতীচ্ছাপ্রযত্নৈঃ কর্ম্মহেতুভিরাত্মা করোতীতি ন তেষাং মিথ্যাপ্রত্যয়পূর্ব্বকত্বাৎ মিথ্যা প্রত্যয়নিমিত্তেষ্টানিষ্টানুভূতক্রিযাফলজনিতসংস্কারপূর্ব্বকাহি স্মৃতীচ্ছাপ্রযত্নাদয়োযথাস্মিন্ জন্মনি দেহাদিসঙ্ঘাতাভিমানরাগদ্বেষাদিকৃতৌ ধর্ম্মাধর্ম্মৌ তৎফলানুভবশ্চ ততোঽতীতেঽতীততরেঽপি জন্মনীত্যনাদিরবিদ্যাকৃতঃ সংসারোঽতীতোঽনাগতশ্চানুমেয়ঃ ততশ্চ সর্ব্বকর্ম্মসন্ন্যাসাৎ

---

## গিরিকৃত টীকা।

মর্ম্মাহ অর্থাদিতি। ননুভগবৎকর্ম্মকারিণাং যুক্ততমত্বাৎ কর্ম্মিণোঽপি ভগবন্তং যান্তীত্যশঙ্ক্যাহ ভগবদিতি। যে মৎকর্ম্মকৃদিত্যাদিন্যায়েন ভগবৎকর্ম্মকারিণস্তে যদ্যপি যুক্ততমাঃ তথাপি কর্ম্মিণোঽজ্ঞাঃ সন্তোন ভগবন্তং সহসা গন্তুমর্হন্তীত্যর্থঃ। তেষামজ্ঞত্বে গমকং দর্শযতি উত্তরোত্তরেতি। চিত্তসমাধানমারভ্য ফলত্যাগপর্য্যন্তং পাঠক্রমেণোত্তরেত্তরং হীনসাধনোপাদানাদভ্যাসাসমর্থস্য ভগবৎকর্ম্মকারিত্বাভিধানাদ্ভগবৎকর্ম্মকারিণামজ্ঞত্বং বিজ্ঞাতমিত্যর্থঃ। যে ত্বক্ষরমনির্দ্দেশ্যমিত্যাদিবাক্যাবষ্টম্ভেন বিদ্বদ্বিষয়ত্বং সন্ন্যাসপূর্ব্বকজ্ঞাননিষ্ঠায়ানির্দ্ধারয়তি অনির্দ্দেশ্যেতি। উক্তসাধনাস্তে সন্ন্যাসপূর্ব্বকজ্ঞাননিষ্ঠায়ামধিক্রিয়েরন্নিতি শেষঃ। কিঞ্চ ত্রয়োদশে যান্যমানিত্বাদীনি চতুর্দ্দশে চ প্রকাশঞ্চ প্রবৃত্তিঞ্চ ইত্যাদীনি পঞ্চদশে চ যান্যসঙ্গত্বাদীনি উক্তানি তৈঃ সর্ব্বৈঃ সাধনৈঃ সহিতা ভবন্ত্যনির্দ্দেশ্যাক্ষরোপাসকাস্ততোঽপি তে জ্ঞাননিষ্ঠায়ামেবাধিক্রিয়েরন্নিত্যাহ ক্ষেত্রেতি। নিষ্ঠাদ্বয় মধিকারিভেদেন প্রতিষ্ঠাপ্য জ্ঞাননিষ্ঠানামনিষ্টানিষ্টং মিশ্রিতমিতি ত্রিবিধং কর্ম্মফলং ন ভবতি কিন্তু মুক্তিরেব কর্ম্মনিষ্ঠানান্তু ত্রিবিধং কর্ম্মফলং ন মুক্তিরিতি শাস্ত্রার্থবিভাগমভিপ্রেতমুপসংহরতি অধিষ্ঠানাদীতি। যদুক্তমবিদ্যাকামবীজং সর্ব্বং কর্ম্মেতি তত্র শাস্ত্রাবগতস্য কর্ম্মণোঽবিদ্যাপূর্ব্বকত্বানুপপত্তেরিত্যাক্ষিপতি অবিদ্যেতি। দৃষ্টান্তেন সমাধত্তে নেতি। তত্রাভিমতাং প্রতিজ্ঞাং বিভজতে যদ্যপীতি। উক্তং দৃষ্টান্তং ব্যাচষ্টে যথেতি। অবিদ্যাদিমতোব্রহ্মহত্যাদি কর্ম্মেত্যত্র হেতুমাহ অন্যথেতি। দার্ষ্টান্তিকং গৃহ্নাতি তথেতি।

## শাঙ্করভাষ্যম্।

জ্ঞাননিষ্ঠায়াং আত্যন্তিকঃ সংসারোপরমইতি সিদ্ধং, অবিদ্যাত্মকত্বাচ্চ দেহাভিমানস্য তন্নিবৃত্তৌ দেহাদ্যনুপপত্তেঃ সংসারানুপপত্তিঃ দেহাদিসঙ্ঘাত আত্মাভিমানোঽবিদ্যাত্মকঃ ন হি লোকে গবাদিভ্যোঽন্যোঽহং মত্তশ্চান্যে গবাদয়ইতি জানন্ তেম্বহমিতি প্রত্যয়ং মন্যতে কশ্চিদজ্ঞানংস্তু মন্যতে স্থাণৌ পুরুষবিজ্ঞানবৎ অবিবেকতো দেহাদিসঙ্ঘাতে কুর্য্যাদহমিতি প্রত্যয়ং নহি বিবেকতোজানন্ যত্বাত্মা বৈ পুত্রনামাসীতি পুত্রেঽহং প্রত্যয়ঃ সতু জন্যজনকসম্বন্ধনিমিত্তোগৌণো গৌণেন চাত্মনা ভোজনাদিবৎ পরমার্থকার্য্যং ন শক্যতে কর্ত্তুং গৌণসিংহাগ্নিভ্যাং মুখ্যসিংহাগ্নিকার্য্যবৎ অদৃষ্টবিষয়চোদনা প্রামাণ্যাদাত্মকর্ত্তব্যং গৌণৈর্দেহেন্দ্রিয়াত্মভিঃ ক্রিয়তইতি চেন্ন অবিদ্যাকৃতাত্মকত্বাৎ তেষাং গৌণাআত্মানোদেহেন্দ্রিয়াদয়ঃ কিং তর্হি মিথ্যাপ্রত্যয়েনৈবাসঙ্গস্যাত্মনঃ সঙ্গাত্মত্বমাপদ্যন্তে তদ্ভাবে ভাবাত্তদভাবে চাভাবাদবিবেকিনাং হ্যজ্ঞানকালে বালানাং দৃশ্যতে দীর্ঘোঽহঙ্গৌরোঽহমিতি দেহাদিসঙ্ঘাতেঽহংপ্রত্যয়োভবতি ন তু বিবেকিনাং অন্যোঽহং দেহাদিসঙ্ঘাতাদিতি জ্ঞানবতাং তৎকালে দেহাদিসঙ্ঘাতেঽহং প্রত্যযোভবতি তস্মাৎ মিথ্যা প্রত্যয়াভাবেঽভাবাৎ তৎকৃতএব ন গৌণঃ পৃথক্ গৃহ্যমাণবিশেষসামান্যযোর্হি সিংহদেবদত্তয়োরগ্নিমাণবকযোর্ব্বা গৌণঃ প্রত্যয়ঃ শব্দপ্রয়োগোবা স্যান্নাগৃহ্যমাণসামান্যবিশেষয়োঃ যথা শুক্তিরজতয়োর্যত্ত্বুক্তং শ্রুতিপ্রামাণ্যাদিতি-

---

## গিরিকৃত টীকা।

তান্যপ্যবিদ্যাদিমত্তোভবন্তীত্যবিদ্যাদিপূর্ব্বকত্বং তেষামেষিতব্যমিত্যর্থঃ। পারলৌকিকমসন্দেহাদ্যতিবিক্তাত্মজ্ঞানং বিনা প্রবৃত্ত্যযোগান্ন তেষামবিদ্যাপূর্ব্বকতেতি শঙ্কতে ব্যতিরিক্তইতি। সত্যপি ব্যতিবিক্তাত্মজ্ঞানে পবমার্থিকাত্মজ্ঞানাভাবান্মিথ্যাজ্ঞানাদেব নিত্যাদিকর্ম্মসু প্রবৃত্তেরবিদ্যাপূর্ব্বকত্বং তেষামপ্রতিহতমিতি পবিহবতি নেত্যাদিনা। কর্ম্মণশ্চলনাত্মকত্বান্নাত্মকর্ত্তৃকত্বং তস্য নিষ্ক্রিয়ত্বাৎ দেহাদিসঙ্ঘাতস্য তু সক্রিয়ত্বাত্তৎকর্ত্তৃকং কর্ম্ম যুক্তং তথাপি সঙ্ঘাতেঽহংমমাভিমানদ্বাবাহং করোমীত্যাত্মনোমিথ্যাধীপূর্ব্বিকা কর্ম্মণি প্রবৃত্তির্দৃষ্টা তেনাবিদ্যাপূর্ব্বকত্বং তস্য যুক্তমিত্যর্থঃ। যত্নুক্তং দেহাদিসংঘাতেঽহমভিমানস্য মিথ্যাজ্ঞানত্বং তদাক্ষিপতি দেহাতীতি। অহংধিয়োগৌণত্বে তৎপূর্ব্বককর্ম্মস্বপি গৌণত্বাপত্তেরাত্মনোঽনর্থাভাবাত্তন্নিবৃত্ত্যর্থং হেত্বন্বেষণং ন স্যাদিতি দূষয়তি নেতি। এদেব প্রপঞ্চয়ন্নাদৌ চোদ্যং প্রপঞ্চয়তি আত্মীয়েতি। তত্র শ্রুত্যবষ্টম্ভেন দৃষ্টান্তমাহ যথেতি। দর্শিতশ্রুতেরাত্মীয়ে পুত্রেঽহং প্রত্যয়োগৌণস্তথা সঙ্ঘাতেঽপ্যাত্মীয়েঽহং প্রত্যয়স্তথা যুক্তইত্যর্থঃ। ভেদধীপূর্ব্বকত্বং গৌণধিয়োলোকে প্রসিদ্ধমিত্যাহ লোকেচেতি। লোকবেদানুরোধেনাত্মীয়ে সংঙ্ঘাতেঽহংধীরপি গৌণী স্যাদিতি দার্ষ্টান্তিকমাহ তদ্বদিতি। মিথ্যাধিয়োঽপি ভেদধীপূর্ব্বকত্বসম্ভবাদাত্মীয়সংঘাতেঽহংধিয়োমিথ্যাত্বমেব কিং

## শাঙ্করভাষ্যম্।

ন তৎপ্রমাণ দৃষ্টবিষয়ত্বাৎ প্রত্যক্ষাদিপ্রমাণানুপলব্ধে হি বিষয়েঽগ্নিহোত্রাদিসাধ্যসাধনসম্বন্ধ শ্রুতেঃ প্রামাণ্যং ন প্রত্যক্ষাদিবিষয়ে অদৃষ্টদর্শনার্থবিষয়ত্বাৎ প্রামাণ্যস্য তস্মান্ন দৃষ্টমিথ্যাজ্ঞাননিমিত্তস্যাহংপ্রত্যয়স্য দেহাদিসঙ্ঘাতে গৌণত্বং কল্পয়িতুং শক্যং ন হি শ্রুতিশতমপি শীতোঽগ্নিরপ্রকাশোবেতি ব্রুবন্ন প্রামাণ্যমুপৈতি যদি ব্রূয়াৎ শীতোঽগ্নিরপ্রকাশোবেতি তথাপ্যর্থান্তরং শ্রুতের্বিবক্ষিতং কল্প্যং প্রামাণ্যান্যথানুপপত্তেঃ ন তু প্রমাণান্তরবিরুদ্ধং স্ববচনবিরুদ্ধং বা কর্ম্মণোমিথ্যাপ্রত্যয়বৎসকর্ত্তৃকত্বাৎ কর্ত্তুরভাবে শ্রুতেরপ্রামাণ্যমিতি চেৎ ন ব্রহ্মবিদ্যায়ামর্থবত্ত্বোপপত্তেঃ কর্ম্মবিধিশ্রুতিবৎ ব্রহ্মবিদ্যাবিধিশ্রুতেবপ্রামাণ্যপ্রসঙ্গইতি চেন্ন বাধকপ্রত্যয়ানুপপত্তের্যথা ব্রহ্মবিদ্যাবিধিশ্রুত্যাত্মন্যবগতে দেহাদিসঙ্ঘাতেঽহং প্রত্যযোবাধ্যতে তথাত্মন্যেবাত্মাবগতির্ন কদাচিৎ কেনচিৎ কথঞ্চিদপি বাধিতুং শক্যা ফলাব্যতিরেকাবগতের্যথাগ্নিরুষ্ণঃ প্রকাশশ্চেতি ন চ কর্ম্মবিধিশ্রুতেরপ্রামাণ্যং পূর্ব্বপূর্ব্বপ্রবৃত্তিনিবোধেনোত্তরোত্তরাপূর্ব্বাপূর্ব্বপ্রবৃত্তিজননস্য প্রত্যগাত্মাভিমুখ্যপ্রবৃত্ত্যুৎপাদনার্থত্বাৎ মিথ্যাত্বেঽপ্যুপায়স্যোপেয়সত্যতয়া সত্যত্বমেব স্যাদ্যথানুবাদানাবিধিশেষাণাং লোকেঽপি বালোন্মত্তাদীনাং পয়আদিপায়য়িতব্যে চূড়াবর্দ্ধনাদিবচনং প্রকারান্তরস্থানঞ্চ সাক্ষাদেব প্রামাণ্যসিদ্ধিঃ প্রাগাত্মজ্ঞানাৎ দেহাভিমানপ্রত্যক্ষাদিপ্রামাণ্য-

## গিরিকৃত টীকা।

ন স্যাদিত্যাশঙ্ক্যাহ নৈবমিতি। ভেদধীরুদেতীত্যাশঙ্ক্যাহ মিথ্যেতি। অধিষ্ঠানারোপ্যয়োর্ব্বিবেকাগ্রহাত্তদুৎপত্তিবিত্যর্থঃ। দেহাদাবহংধিয়োগৌণতেতি চোদ্যে বিবৃতে তৎকার্য্যেষ্বপীত্যাদি পরিহারং বিবৃণোতি নেত্যাদি। হেতুভাগং বিভজতে যথেতি। সিংহোদেবদত্তইতি বাক্যং দেবদত্তঃ সিংহইবেত্যুপময়া দেবদত্তং ক্রৌর্য্যাদ্যধিকবণং স্তোতুং প্রবৃত্তং অগ্নির্ম্মাণবকইত্যপি বাক্যং মাণবকোঽগ্নিরিবেত্যুপময়া মাণবকস্য পৈঙ্গল্যাধিকরণস্য স্তুত্যর্থমেব ন তথা মনুষ্যোঽহমিতি বাক্যস্য অধিকরণস্তুত্যর্থতা ভাতীত্যর্থঃ। দেবদত্তমাণবকয়োরধিকরণত্বং কথমিত্যাশঙ্ক্যাহ ক্রৌর্য্যেতি। কিঞ্চ গৌণশব্দং তৎপ্রত্যয়ঞ্চ নিমিত্তং কৃত্বা সিংহকার্য্যং ন কিঞ্চিদ্দেবদত্তে সাধ্যতে নাপি মাণবকে কিঞ্চিদগ্নিকার্য্যং মিথ্যাধীকার্য্যংত্বনর্থমাত্মানুভবত্যতোন দেহাদাবহংধীগৌণীত্যাহ নত্বিতি। ইতোঽপি দেহাদৌ নাহং ধীর্গৌণীত্যাহ গৌণেতি। যোদেবদত্তোমাণবকোবা গৌণ্যাধিয়োবিষয়স্তং স্বং পরোনৈষসিংহোনায়মগ্নিরিতি জানাতি নৈবমবিদ্বানাত্মনঃ সঙ্ঘাতস্য চ সত্যপি ভেদে সঙ্ঘাতস্যানাত্মত্বং প্রত্যেত্যতোন সঙ্ঘাতেঽহংশব্দপ্রত্যয়ৌ গৌণাবিত্যর্থঃ। সঙ্ঘাতে তিয়োগৌণত্বে দোষান্তরং সমুচ্চিনোতি তথেতি। তথা সত্যাত্মনি কর্ত্তৃত্বাদিপ্রতিভাসাসিদ্ধিরিতি শেষঃ। গৌণেন কৃতং ন মুখ্যেন কৃতমিত্যুদাহরণেন স্ফুটয়তি নহীতি।

## শাঙ্করভাষ্যম্।

বৎ। যত্তু মন্যতে স্বয়মব্যাপ্রিয়মাণোঽপ্যাত্মা সংনিধিমাত্রেণ করোতি তদেব চ মুখ্যং কর্ত্তৃত্বমাত্মনোযথা রাজা যুধ্যমানেষু যোধেষু যুধ্যতেইতি প্রসিদ্ধং স্বয়মযুধ্যমানোঽপি সন্নিধানাদেব জিতঃ পরাজিতশ্চেতি তথা সেনাপতির্ব্বা নৈব করোতি ক্রিয়াফলসম্বন্ধশ্চ রাজসেনাপতেশ্চ দৃষ্টঃ যথা চ ঋত্বিকৃকর্ম্ম যজমানস্য তথা দেহাদীনাং কর্ম্ম আত্মকৃতং স্যাৎ তৎফলস্যাত্মগামিত্বাৎ যথা বা ভ্রামকস্য লোহভ্রাময়িতৃত্বাদব্যাপৃতস্যৈব মুখ্যমেব কর্ত্তৃত্বং তথা চাত্মনইতি তদসদকুর্ব্বতঃ কারকত্বপ্রসঙ্গাৎকারকমনেকপ্রকারমিতি চেন্ন রাজপ্রভৃতীনাং মুখ্যস্যাপি কর্ত্তৃত্বস্য দর্শনাৎ রাজা তাবৎ স্বব্যাপারেণাপি যুধ্যতে যোধানাং যোধয়িতৃত্বেন ধনদানেন চ মুখ্যমেব কর্ত্তৃত্বস্য তথা জয়পরাজয়ফলোপভোগেন তথা যজমানস্যাপি ধনত্যাগেন দক্ষিণাদানেন চ মুখ্যমেব কর্ত্তৃত্বং তস্মাদব্যাপৃতস্য কর্ত্তৃত্বোপচারঃ যঃ স গৌণইত্যবগম্যতে যদিমুখ্যমস্তৎ কর্ত্তৃত্বং স্বব্যাপারলক্ষণং নোপলভ্যতে রাজযজমানপ্রভৃতীনাং তদা সন্নিধিমাত্রেণাপি কর্ত্তৃত্বং মুখ্যং পরিকল্প্যেত যথা ভ্রামণেন ন তথা রাজযজমানাদীনাং স্বাধ্যাপরো নোপলভ্যতে তস্মাৎ সন্নিধিমাত্রেণাপি কর্ত্তৃত্বং গৌণমেব তথা চ সতি তৎফলসম্বন্ধোঽপি গৌণমেব স্যান্ন গৌণেন মুখ্যং কার্য্যং নির্ব্বর্ত্ত্যতে তস্মাদসদেবৈতদ্দীয়তে দেহাদীনাং ব্যাপ্যরেণাব্যাপৃতআত্মা কর্ত্তা ভোক্তা চ স্যাদিতি ভ্রান্তিনিমিত্তন্তু সর্ব্বমুপপদ্যতে যথা স্বপ্নে মায়ায়াঞ্চৈবং ন চ দেহাদ্যাত্মপ্রত্যয়ভ্রান্তিসন্তানবিচ্ছেদেষু সুষুপ্তিসমাধ্যাদিষু কর্ত্তৃত্বভোক্তৃত্বাদ্যনর্থং উপলভ্যতে তস্মাৎ ভ্রান্তিপ্রত্যয়নিমিত্ত এবায়ং সংসারভ্রমঃ ন তু পরমার্থ ইতি সম্যগদর্শনাদত্যন্তমেবোপরমইতিসিদ্ধং।

---

## গিরিকৃত টীকা।

যদ্যপি দেবদত্তমাণবকাভ্যাং কৃতং কার্য্যং মুখ্যাভ্যাং সিংহাগ্নিভ্যাং ন ক্রিয়তে তথাপি দেবদত্তগতক্রৌর্য্যেণ মুখ্যসিংহস্য মাণবকনিষ্ঠপৈঙ্গল্যেন মুখ্যাগ্নেরিব চ সঙ্ঘাতগতেনাপি জড়ত্বেনাত্মনোমুখ্যস্য কিঞ্চিৎ কার্য্যং কৃতং ভবিষ্যতাত্যাশঙ্ক্যাহ নচেতি। মানাবিতি। দেবদত্তমাণবকয়োঃ সিংহাগ্নিভ্যাম্ভেদধীপূর্ব্বকং তদ্ব্যাপারবত্ত্বাভাবধীবদাত্মনোঽপি মুখ্যস্য সঙ্ঘাতাদ্ভেদধীদ্বারা তদীয়ব্যাপাররাহিত্যমাত্মনি দৃষ্টং স্যাদিত্যর্থঃ। ব্যাবর্ত্ত্যং দর্শয়তি ন পুনরিতি। সংঙ্ঘাতেঽহংধিয়োমিথ্যাধীত্বমপি ন তৎকৃতমাত্মনি কর্ত্তৃত্বং কিন্ত্বাত্মা যজ্ঞজ্ঞানেচ্ছাপ্রযত্নৈরশুকর্ত্তৃত্বং বাস্তবমিতি মতমনুবদতি যচ্চেতি। জ্ঞানাদিকৃতমপি কর্ত্তৃত্বং মিত্যাধীকৃতমেব জ্ঞানং মিথ্যাধীকার্য্যত্বাদিতি দূষয়তি ন তেষামিতি। তদেব প্রপঞ্চয়তি মিথ্যেতি। মিথ্যাজ্ঞানং নিমিত্তং কৃত্বা কিঞ্চিদিষ্টং কিঞ্চিদনিষ্টমিত্যারোপ্য তৎদ্বারাত্মভূতে তস্মিন্ প্রেপ্সাজিহাসাভ্যাং ক্রিয়াং নিবর্ত্ত্যতয়েষ্টমনিষ্টঞ্চ ফলং ভুক্ত্বা তেন সংস্কারেণ তৎপূর্ব্বিকাঃ স্মৃত্যাদয়ঃ স্বাত্মনি ক্রিয়াং কুর্ব্বন্তীতি যুক্তং কর্ত্তৃত্বস্য চ মিথ্যাত্বমিত্যর্থঃ।

## শাঙ্করভাষ্যম্।

সর্ব্বং গীতাশাস্ত্রার্থমুপসংহৃত্যাস্মিন্নধ্যায়ে বিশেষতশ্চান্তইহ শাস্ত্রার্থদার্ঢ্যায় সংক্ষেপ-তউপসংহারং কৃত্বাথেদানীং শাস্ত্রসংপ্রদায়বিধিমাহ ইদং শাস্ত্রং তে তব হিতায় ময়োক্তং সংসারবিচ্ছিত্তয়ে অতপস্কায় তপোরহিতায় ন বাচ্যমিতি ব্যবহিতেন সম্বধ্যতে তপস্বিনেঽ-প্যভক্তায় গুরুদেবভক্তিবহিতায় কদাচন কস্যাঞ্চিদপ্যবস্থায়াং ন বাচ্যং ভক্তস্তপস্বী অপি সন্নশুশ্রূষুর্যো ন ভবতি তস্মাঅপি ন বাচ্যং নচ যোমাং বাসুদেবং প্রাকৃতং মনুষ্যং মত্বা অভ্যসূয়তি আত্মপ্রশংসাদিদোষাধ্যারোপণেন মমেশ্বরত্বমজানন্ন সহতেঽসাবপ্যযোগ্যস্ত-স্মাঅপি ন বাচ্যং ভগবত্যনসূয়াযুক্তায় তপস্বিনে ভক্তায় শুশ্রূষবে গুরুশুশ্রূষবে চ বাচ্যং

## গিরিকৃত টীকা।

অতীতানাগতজন্মনোরিব বর্ত্তমানেঽপি জন্মনি কর্ত্তৃত্বাদিসংসারস্য বস্তুত্বমাশঙ্ক্যাহ যথেতি বিমতৌকালাববিদ্যাকৃতসংসারবন্তৌ কালত্বাদ্বর্ত্তমানকালবদিত্যর্থঃ। সংসারস্যাবিদ্যাকৃতত্বে ফলিতমাহ ততশ্চেতি। তস্যাবিদ্যকত্বেন বিদ্যাপোহ্যত্বে হেত্বন্তরমাহ অবিদ্যেতি। কুতোঽ-স্যাবিদ্যাকৃতত্বং ধর্ম্মাধর্ম্মকৃতত্বসম্ভবাদিত্যাশঙ্ক্যাহ দেহাদীতি। আত্মনোধর্ম্মাদিকর্ত্তৃত্বস্যাবিদ্য-কত্বান্নাবিদাং কর্ম্মিণাং দেহাভিমানঃ সম্ভবত্যতশ্চ আত্মনঃ সঙ্ঘাতেঽহমভিমানস্যা-বিদ্যয়া বিদ্যমানতেত্যর্থঃ। আত্মনোদেহাদ্যভিমানস্যাবিদ্যকত্বমন্বয়ব্যতিরেকাভ্যাং সাধ য়ন্ ব্যতিরেকংদর্শয়তি নহীতি অন্বয়ং দর্শয়ন্ব্যতিরেকমনুবদতি অজানন্নিতি। পুত্রে পিতুর হংধীবদাত্মীয়ে দেহাদাবহংধীর্গৌণীত্যুক্তমনুবদতি। তত্র দৃষ্টান্তশ্রুতেগৌণাত্মবিষয়ত্বমুক্ত-মঙ্গীকরোতি স ত্বিতি। তর্হি দেহাদাবপি তথৈব স্বকীয়ে স্যাদহংধীর্গৌণীত্যাশঙ্ক্যাহ গৌণে-নেতি। ন হি স্বকীয়েন পুত্রাদীনা গৌণাত্মনা পিতুর্ভোজনাদিকার্য্যং ক্রিয়তে তথা দেহাদেরপি গৌণাত্মত্বে তেন কর্ত্তৃত্বাদিকার্য্যমাত্মনো ন বাস্তবং সিদ্ধমিত্যর্থঃ। গৌণাত্মনা 'মুখ্যাত্মনো নাস্তি বাস্তবং কার্য্যমিত্যত্র দৃষ্টান্তমাহ গৌণেতি। ন হি গৌণেন সিংহেন দেবদত্তেন মুখ্যসিংহকার্য্যং ক্রিয়তে নাপি গৌণাগ্নিনা মাণবকেন মুখ্যাগ্নিকার্য্যং দাহ-পাকাদি তথা দেহাদিনা গৌণাত্মনা মুখ্যাত্মনোন বাস্তবং কার্য্যং কর্ত্তৃত্বাদি কর্ত্তুং শক্য-মিত্যর্থঃ। স্বর্গকামাদিবাক্যপ্রামাণ্যাৎ আত্মনোদেহাদ্যতিরেকজ্ঞানস্য চ কেবলস্যাকর্ত্তৃ-ত্বাত্তৎকর্ত্তব্যং কর্ম্ম গৌণৈরেব দেহাত্মভিঃ সম্পাদ্যতে ন হি সত্যেব শ্রৌতাতিরেকজ্ঞানে দেহাদাবাত্মত্বমাত্মনোমুখ্যং যুক্তমিতি চোদয়তি অদৃষ্টেতি। ন দেহাদীনামাত্মত্বং গৌণং তদীয়াত্মত্বস্যাবিদ্যত্বেন সিদ্ধত্বাদতোন গৌণাত্মভিরাত্মকর্ত্তব্যং কর্ম্ম ক্রিয়তে কিন্তু মিথ্যা-ত্মভিরিতি পরিহরতি নাবিদ্যেতি। তদেব বিবৃণ্বন্নর্থং স্ফুটয়তি গৌণাইতি। কথং তর্হি দেহাদিবিষয়াত্মত্বপ্রথেত্যাশঙ্ক্যাবিদ্যাকৃতত্বেত্যাদি হেতুং বিভজতে কিং তর্হীতি।

## গিরিকৃত টীকা।

দেহাদীনামনাত্মনামেব সতামাত্মত্বং মিথ্যাপ্রত্যয়কৃতমিত্যত্রান্বয়ব্যতিরেকাবুদাহরতি তদ্ভাবইতি। উক্তে ন্যায়ে শাস্ত্রীয়সংস্কারশূন্যানামনুভবং প্রমাণয়তি অবিবেকিনামিতি। ব্যতিরেকেঽপি দর্শিতে শাস্ত্রাভিজ্ঞানামনুভবমনুকূলয়তি নহীতি॥ অন্বয়ব্যতিরেকাভ্যামনুভবানুসারিভ্যাং সিদ্ধমর্থমুপসংহরতি তস্মাদিতি। তৎকৃতএব দেহাদাবহংপ্রত্যয়ইতি শেষঃ। কিঞ্চ ব্যবহারভূমৌ ভেদগ্রহস্য গৌণত্বব্যাপকত্বাত্তস্য প্রকৃতেঽভাবান্ন দেহাদাবহংশব্দপ্রত্যয়ৌ গৌণাবিত্যাহ পৃথগিতি। অদৃষ্টবিষয়চোদনাপ্রামাণ্যাৎ কর্ত্তুরাত্মনো-ব্যতিরেকাবধারণাত্তস্য দেহাদাবহংমমাভিমানস্য গৌণতেত্যুক্তমনুবদতি যত্ত্বিতি। শ্রুতিপ্রামাণ্যস্যাজ্ঞাতার্থবিষয়ত্বাৎ মানান্তরসিদ্ধে ব্যতিরিক্তাত্মনি চোদনাপ্রামাণ্যাভাবান্ন-তদবষ্টম্ভেন দেহাদাবাত্মাভিমানস্য গৌণতেত্যুত্তরমাহ ন তদিতি। শ্রুতিপ্রামাণ্যস্যাদৃষ্ট বিষয়ত্বং স্পষ্টয়তি প্রত্যক্ষাদীতি। অজ্ঞাতার্থজ্ঞাপকং প্রমানমিতি স্থিতে জ্ঞাতে শ্রুতি-প্রামাণ্যমিত্যাহ অদৃষ্টেতি। অজ্ঞাতসাধ্যসাধনসম্বন্ধবোধিনঃ শাস্ত্রস্যাতিবিক্তাত্মন্যৌদা-সীন্যে ফলিতমাহ তস্মাদিতি। অন্বযব্যতিরেকাভ্যাং দৃষ্টোমিথ্যাজ্ঞাননিমিত্তো দেহাদি-সঙ্ঘাতেঽহংপ্রত্যয়স্তস্যেতি যাবৎ। অন্যবিষয়ত্বাচ্চোদনায়নাতিবিক্তাত্মবিষয়তেত্যুক্ত মিদানীন্তদ্বিষয়ত্বাঙ্গীকারেঽপি ন তন্নির্ব্বোঢ়ুং শক্যমধ্যক্ষবিরোধাদিত্যাহ নহীতি। অপৌ-রুষেয্যাঃ শ্রুতেরসম্ভাবিতদোষায়াঃ মানান্তরবিরোধেঽপি প্রামাণ্যমপ্রত্যাখ্যেয়মিত্যভি-প্রেত্যাহ যদীতি। স্বার্থং বোধয়ন্ত্যাঃ শ্রুতেরবিরোধাপেক্ষত্বাদ্বিরুদ্ধার্থবাদিত্বে তৎপরি-হারায় বিবক্ষিতমর্থান্তরমবিরুদ্ধং তস্যাঃ স্বীকর্ত্তব্যং বিরোধে তৎপ্রামাণ্যানুপপত্তেরিত্যাহ তথাপীতি। অবিরোধমবধার্য্য শ্রুত্যর্থকল্পনা ন যুক্তেতি ব্যাবর্ত্ত্যমাহ নত্বিতি। অবিদ্যা-বৎকর্ত্তৃত্বং কর্ম্মেতি ত্বয়োপগমাদুৎপন্নায়াং বিদ্যায়ামবিদ্যাভাবে তদধীনকর্ত্তুরভাবাদন্তরেণ কর্ত্তারমনুষ্ঠানাসিদ্ধৌ কর্ম্মকাণ্ডাপ্রামাণ্যমিত্যধ্যয়নবিধিবিরোধঃ স্যাদিতি শঙ্কতে কর্ম্মণ-ইতি। কর্ম্মকাণ্ডশ্রুতের্ব্বিদ্যোদয়াৎ পূর্ব্বং ব্যবহারিকপ্রামাণ্যস্য তাত্ত্বিকপ্রামাণ্যাভাবেঽপি সম্ভবাদ্ব্রহ্মকাণ্ডশ্রুতেশ্চ তাত্ত্বিকপ্রামাণ্যস্য ব্রহ্মবিদ্যাজনকত্বেনোপপন্নত্বান্নাধ্যয়নবিধিবিরো-ধইতি পরিহরতি ন ব্রহ্মেতি। কর্ম্মকাণ্ডশ্রুতেস্তাত্ত্বিকপ্রামাণ্যাভাবে ব্রহ্মকাণ্ডশ্রুতেরঽপি তদসিদ্ধিরবিশেষাদিতি শঙ্কতে কর্ম্মেতি। উৎপন্নায়াব্রহ্মবিদ্যায়াবাধকাভাবেন প্রমাণ-ত্বাত্তদ্ধেতুশ্রুতেস্তাত্ত্বিকং প্রামাণ্যমিতি দূষয়তি ন বাধ্যতেতি। ব্রহ্মবিদ্যায়াবাধকানুপ-পত্তিং দৃষ্টান্তেন সাধয়তি যথেতি। দেহাদিসঙ্ঘাতবদিত্যপেরর্থঃ। লৌকিকাবগতেরি-বাত্মাবগতেরপি ফলাব্যতিরেকমুদাহরণেন স্ফোরয়তি যথেতি। ফলমজ্ঞাননিবৃত্তিঃ কর্ম্মবিধিশ্রুতিবদিত্যুক্তং দৃষ্টান্তং বিঘটয়তি নচেতি। অনাদিকাল প্রবৃত্তস্বাভাবিক-প্রবৃত্তব্যক্তীনাং প্রতিবন্ধেন যোগাদ্যলৌকিকপ্রবৃত্তিব্যক্তির্জ্জিনয়তি কর্ম্মকাণ্ডশ্রুতিস্তজ্জ-নঞ্চ চিত্তশুদ্ধিদ্বারা প্রত্যগাত্মাভিমুখ্যপ্রবৃত্তিমুৎপাদয়তি, তথা চ কর্ম্মবিধিশ্রুতীনাং

## শাঙ্করভাষ্যম্ ।

শাস্ত্রমিতি সামর্থ্যাদ্গম্যতে তত্র মেধাবিনে তপস্বিনে বেত্যনয়োর্বিকল্পদর্শনাৎ শুশ্রূষাভক্তিযুক্তায় তপস্বিনে ভক্তায় মেধাবিনে বা বাচ্যং শুশ্রূষাভক্তিবিযুক্তায় ন তপস্বিনে নাপি

## গিরিকৃত টীকা ।

পারংপর্য্যেণ প্রত্যগাত্মজ্ঞানার্থত্বাত্তাত্ত্বিকপ্রামাণ্যসিদ্ধিরিত্যর্থঃ। নন্বেবমপি শ্রুতেমিথ্যাত্বাদভাসবদপ্রামাণ্যমিতি চেন্নেত্যাহ মিথ্যাত্বেঽপীতি। স্বরূপেণাসত্যত্বেঽপি সত্যোপায়দ্বারা প্রামাণ্যমিত্যত্র দৃষ্টান্তমাহ যথেতি। মন্ত্রার্থবাদেতিহাসপুরাণানাং শ্রুতেঽর্থে প্রামাণ্যাভাবেঽপি শেষিবিধ্যনুবোধেন প্রামাণ্যবৎ প্রকৃতেঽপি শ্রুতেঃ স্বরূপেণাসত্যয়া বিষয়সত্যতয়া সত্যত্বঙ্গতায়াঃ প্রামাণ্যমবিরুদ্ধমিত্যর্থঃ। বাক্যস্য শেষিবিধ্যনুবোধেন প্রামাণ্যং নালৌকিকমিত্যাহ লোকেঽপীতি। কর্ম্মকাণ্ডশ্রুতীনামুক্তরীত্যা পরম্পরয়া প্রামাণ্যেঽপি সাক্ষাৎ প্রামাণ্যমুপেক্ষিতমিত্যাশঙ্ক্যাহ প্রকারান্তরং, তত্র স্থিতানাং কর্ম্মকাণ্ডশ্রুতীনামজ্ঞাতসম্বন্ধবোধকত্বেন সাক্ষাদেব প্রামাণ্যমিষ্টমিত্যর্থঃ। জ্ঞানাৎ পূর্ব্বং কর্ম্মশ্রুতীনাং ব্যাবহারিকপ্রামাণ্যে দৃষ্টান্তমাহ প্রাগিতি। প্রতীচি কর্ত্তৃত্বস্যাবিদ্যাকত্বেঽপি শ্রুতিপ্রামাণ্যমপ্রত্যূহমিত্যুক্তং সংপ্রতি কর্ত্তৃত্বস্য প্রকারান্তরেণ পারমার্থিকত্বমুত্থাপয়তি যদ্বিতি। স্বব্যাপারাভাবে সন্নিধিমাত্রেণ কুতো মুখ্যকর্ত্তৃত্বমিত্যাশঙ্ক্য দৃষ্টান্তমাহ যথেতি। স্বয়মযুধ্যমানত্বে কথং তৎফলবত্ত্বমিত্যাশঙ্ক্য প্রসিদ্ধিবশাদিত্যাহ জিতইতি। কায়িকব্যাপারাভাবেঽপি কর্ত্তৃত্বস্য মুখ্যত্বে দৃষ্টান্তমাহ সেনাপতিরিতি। তস্যাপি ফলবত্ত্বং রাজবদবিশিষ্টমিত্যাহ ক্রিযেতি। অন্যকর্ম্মণা অন্যস্য সন্নিহিতস্য মুখ্যে কর্ত্তৃত্বে বৈদিকমুদাহরণমাহ যথা চেতি। কথমৃত্বিজাং কর্ম্ম যজমানস্যেত্যাশঙ্ক্যাহ তৎফলস্যেতি। স্বব্যাপারাদৃতে সন্নিধেরেবান্যব্যাপারহেতোর্ম্মুখ্যকর্ত্তৃত্বে দৃষ্টান্তমাহ যথা বেতি। ক্রিয়াং কুর্ব্বৎ কারণং কারকমিত্যঙ্গীকারবিরোধান্নৈতদিতি দূষয়তি তদসদিতি। কারকবিশেষবিষয়ত্বেনাঙ্গীকারোপপত্তিরিতি শঙ্কতে কারকমিতি পরিহরতি ন রাজেতি। দর্শনমেব বিশদয়তি রাজেতি। যথা রাজ্ঞো যুদ্ধে যোধয়িতৃত্বেন ধনদানেন চ মুখ্যং কর্ত্তৃত্বং তথা ফলভোগেঽপি মুখ্যমেব তস্য কর্ত্তৃত্বমিত্যাহ তথেতি। যদুক্তমৃত্বিককর্ম্ম যজমানস্যেতি তত্রাহ যজমানস্যাপীতি। স্বব্যাপারাদেব মুখ্যং কর্ত্তৃত্বমিতি স্থিতে ফলিতমাহ যস্মাদিতি তদেব প্রপঞ্চয়তি যদীতি। তর্হি সন্নিধানাদেব মুখ্যং কর্ত্তৃত্বং রাজাদীনামুপগতমিতি নেত্যাহ ন তথেতি। রাজাদীনাং স্বব্যাপারবত্ত্বে পূর্ব্বোক্তং সিদ্ধমিত্যাহ তস্মাদিতি। রাজপ্রভৃতীনাং সন্নিধেরেব কর্ত্তৃত্বস্য গৌণত্বে জয়াদিফলবত্ত্বস্যাপি সিদ্ধং গৌণত্বমিত্যাহ তথা

## স্বামিকৃত টীকা ।

এবং গীতার্থতত্ত্বমুপদিশ্য তৎসংপ্রদায়প্রবর্ত্তনে নিয়মমাহ ইদমিতি। ইদং গীতার্থতত্ত্বং তে ত্বয়া অতপস্কায় ধর্ম্মানুষ্ঠানহীনায় ন বাচ্যং ন চাভক্তায় গুরাবীশ্বরে চ ভক্তিশূন্যায়

## শাঙ্করভাষ্যম্।

মেধাবিনে বাচ্যং ভগবত্যসূয়াযুক্তায সমস্তগুণবতেঽপি ন বাচ্যং গুরুশুশ্রূষাভক্তিমতে চ বাচ্যমিত্যেষ শাস্ত্রসংপ্রদায়বিধিঃ॥ ৬৭॥

## গিরিকৃত টীকা।

চেতি। তত্র পূর্ব্বোক্তং হেতুত্বেন স্মারযতি নেতি। অন্বয়ব্যাপারেণাত্মনো মুখ্যকর্তৃত্বাভাবে ফলিতমুপসংহরতি তস্মাদিতি। কথং তর্হি ত্বয়াত্মনি কর্তৃত্বাদি স্বীকৃতং নহি বুদ্ধেস্তদিষ্টং কর্ত্তা শাস্ত্রার্থবত্ত্বাদিতি ন্যায়াত্তত্রাহ ভ্রান্তীতি। কর্তৃত্বাদ্যাত্মনি ভ্রান্তমিত্যেতদুদাহরণেন স্ফোরয়তি। যথেতি মিথ্যাজ্ঞানকৃতমাত্মনি কর্তৃত্বাদীত্যত্র ব্যতিরেকং দর্শযতি নচেতি। উক্তব্যতিরেকে ফলং কথয়তি তস্মাদিতি। সংসারভ্রমস্যাবিদ্যাকৃতত্বে সিদ্ধে পরমপ্রকৃতমুপসংহরতি ইতি সম্যগিতি।

শাস্ত্রতাৎপর্য্যার্থং বিচারদ্বারা নির্দ্ধার্য্যানন্তরশ্লোকমবতারযতি সর্ব্বমিতি। প্রকৃতে অষ্টাদশাধ্যায়ে গীতাশাস্ত্রার্থং সর্ব্বং প্রতিপত্তিসৌকর্য্যার্থমুপসংহৃত্যান্তে চ সর্ব্বধর্ম্মান্ পরিত্যজ্যেত্যাদৌ বিষযতস্তস্য সংক্ষেপেণোপসংহারং কৃত্বা সংপ্রদায়বিধিবচনস্যাবসরে সতীদানীমিতি যোজনা। কিমিতি বিস্তরেণোপসংহৃতঃ শাস্ত্রার্থঃ সংক্ষিপ্যোপসংহ্রিয়তে তত্রাহ শাস্ত্রার্থেতি। সংক্ষেপবিস্তারাভ্যামুক্তেঽর্থে সর্ব্বেষাং দৃঢ়তযা বুদ্ধিমধিরোহতীত্যর্থঃ। হিতায়েত্যেতদেব ব্যাচষ্টে সংসারেতি। কদাচনেতি সর্ব্বৈঃ সম্বধ্যতে। প্রতিষেধসামর্থ্যসিদ্ধমর্থং কথযতি ভগবতীতি। অর্থসিদ্ধেঽর্থে স্বত্যন্তরমনুসৃত্য মেধাবিত্বমন্তর্ভাবয়তি তত্রেতি। বিকল্পপক্ষে কথমধিকারিপ্রতিপত্তিরিতি তত্রাহ শুশ্রূষেতি। তাভ্যাং যুক্তায ভগবত্যসূযারহিতায় তপস্বিনে বাচ্যমিতি সম্বন্ধঃ। তদ্যুক্তায শুশ্রূষাভক্তিযুক্তায ভগবতি অনসূয়াসহিতায়েত্যর্থঃ। তপস্বিত্বমেধাবিত্বং বা নিরপেক্ষমধিকারিবিশেষণমিতি শঙ্কাং শান্তয়তি শুশ্রূষেতি। ভগবদ্বিষয়াসূয়ারাহিত্যে তাৎপর্য্যং সূচযতি ভগবতীতি। কস্মৈ তর্হি বাচ্যমেতদিত্যাশঙ্ক্য পূর্ব্বোক্তসর্ব্বগুণসম্পান্নায়েত্যাহ গুরুশুশ্রূষেতি। অনুক্তেতরবিশেষণোপলক্ষণার্থমুভযগ্রহণং, মেধাবিনস্তপস্বিত্বং নাতীবাপেক্ষতে সর্ব্বমন্যদ্বাধকাভাবাদপেক্ষিতমেবেতি ভাবঃ। ৬৭॥

শাস্ত্রসম্প্রদায়প্রবৃত্ত্যর্থমুত্তরশ্লোকপ্রবৃত্তিং দর্শয়তি সম্প্রদায়েতি। য ইতি ধ্যাযকোনির্দ্দিশ্যতে। পরমত্বং গ্রন্থস্য নিরতিশয়পুরুষার্থসাধনত্বমিত্যাহ পরমমিতি। গোপ্যত্বমস্য রহস্যার্থবিষয়ত্বাদ্যথোক্তসম্বাদস্য গ্রন্থতোঽর্থতশ্চ ভক্তেষু স্থাপনে দৃষ্টান্তমাহ যথেতি। ময়ি বাসু-

## স্বামিকৃত টীকা।

কদাচিদপি বাচ্যং, ন চাশুশ্রূষবে পরিচর্য্যামকুর্ব্বতে বাচ্যং, মাং পরমেশ্বরং যোঽভ্যসূয়তি মনুষ্যদৃষ্ট্যা দোষারোপেণ নিন্দতি তস্মৈ চ ন বাচ্যং॥ ৬৭॥

য ইমং পরমং গুহ্যং মদ্ভক্তেম্বভিধাস্যতি।
ভক্তিং ময়ি পরাং কৃত্বা মামেবৈষ্যত্যসংশয়ঃ॥ ৬৮॥
ন চ তস্মান্মনুষ্যেষু কশ্চিন্মে প্রিয়কৃত্তমঃ।
ভবিতা ন চ মে তস্মাদন্যঃ প্রিয়তরো ভুবি॥ ৬৯॥

## শাঙ্করভাষ্যম্

সম্প্রদায়স্য কর্ত্তুঃ ফলমিদানীমাহ য ইমং যথোক্তং পরমং নিঃশ্রেয়সার্থং কেশবার্জ্জুনয়োঃ সম্বাদরূপং গ্রন্থঃ গুহ্যং গুপ্তঙ্গোপ্যতমং মদ্ভক্তেষু ময়ি ভক্তিমৎস্বভিধাস্যতি বক্ষ্যতি গ্রন্থতোঽর্থতশ্চ স্থাপয়িষ্যতীত্যর্থঃ যথা ত্বয়ি ময়া ভক্তেঃ পুনর্গ্রহণাত্তদ্ভক্তিমাত্রেণ কেবলেন শাস্ত্রসম্প্রদানে পাত্রম্ভবতীতি গম্যতে কথমভিধাস্যতীত্যুচ্যতে ভক্তিং ময়ি পরাং কৃত্বা ভগবতঃ পরমগুরোঃ অচ্যুতস্য শুশ্রূষা ময়া ক্রিয়তইত্যেবং কৃত্বেত্যর্থঃ তস্যেদং ফলং মামেবৈষ্যতি মুচ্যতে এবাত্র সংশয়ো ন কর্ত্তব্যঃ॥ ৬৮॥

কিঞ্চ ন চ তস্মাচ্ছাস্ত্রসম্প্রদায়কৃতো মনুষ্যেষু মনুষ্যাণাং মধ্যে কশ্চিন্মে মম প্রিয়কৃত্ত-

## গিরিকৃত টীকা।

দেবে ভগবতি অনন্তভক্তে ত্বয়ি যথা ময়া গ্রন্থোঽর্থতঃ স্থাপিতস্তথা মদ্ভক্তেষ্বপি যোগ্রন্থমিমং স্থাপয়িষ্যতি তস্যেদং ফলমিত্যুত্তরত্র সম্বন্ধঃ। নাভক্তায়েতি ভক্তেরধিকারিবিশেষণত্বোক্তের্মদ্ভক্তেম্বিতি পুনর্ভক্তিগ্রহণমনর্থকমিত্যাশঙ্ক্যাহ ভক্তেরিতি। শুশ্রূষাদিসহকারিরাহিত্যং কেবলশব্দার্থো যদ্যপি মাত্রশব্দেন সূচিতমেতত্তথাপীতরেণ স্ফুটীকৃতমিতি ন বিরোধঃ প্রশ্নপূর্ব্বকমভিধানপ্রকারমভিনয়তি কথমিত্যাদিনা। ভগবতি ভক্তিকরণপ্রকারং প্রকটয়তি ভগবতইতি। যচ্ছব্দাপেক্ষিতং পূরয়তি তস্যেতি। মামেবৈষ্যত্যেবেত্যন্বয়ং গৃহীত্বা ব্যাচষ্টে মুচ্যতএবেতি॥ ৬৮॥

ননু সর্ব্বেষাং মুক্তিসাধনানাং ধ্যানস্য শ্রেষ্ঠত্বাত্তন্নিষ্ঠস্য মুমুক্ষোর্নাস্তি বিদ্যাসম্প্রদানে প্রবৃত্তিরিতি তত্রাহ কিঞ্চেতি। ইতশ্চ বিদ্যাসম্প্রদানং মুমুক্ষুণা যথোক্তবিশেষণবতা কর্ত্তব্যমিত্যর্থঃ। বর্ত্তমানেষু তাদৃক্ কশ্চিদাসীদিতিশেষঃ। তস্মাদ্বিদ্যাসম্প্রদায়কর্ত্তুঃ সকাশাদিত্যর্থঃ। ধ্যাননিষ্ঠস্য শ্রেষ্ঠত্বেঽপি স্বসম্প্রদায়প্রবক্তুঃ শ্রেষ্ঠতমত্বাদুচিতা বিদ্যাসম্প্রদানে প্রবৃত্তিরিতিভাবঃ॥ ৬৯॥

## স্বামিকৃত টীকা

এবৈদে ।বৈরহিতেভ্যোগীতাশাস্ত্রোপদেষ্টুঃ ফলমাহ যইমমিতি। যদ্ভক্তেম্বভিধাস্যতি মদ্ভক্তেভ্যো যো বক্ষ্যতি স ময়ি পরাং ভক্তিং করোতি ততোনিঃসংশয়ঃ সন্ মামেব প্রাপ্নোতীত্যর্থঃ॥ ৬৮॥

কিঞ্চ নচেতি। তস্মান্মদ্ভক্তেভ্যো গীতাশাস্ত্রব্যাখ্যাতুঃ সকাশাদন্যো মনুষ্যেষু মধ্যে কশ্চি-

অধ্যেষ্যতে চ য ইমং ধর্ম্ম্যং সম্বাদমাবয়োঃ।
জ্ঞানযজ্ঞেন তেনাহমিষ্টঃ স্যামিতি মে মতিঃ ॥ ৭০ ॥

## শাঙ্করভাষ্যম্।

মোঽতিশয়েন প্রিয়কৃত্তমোঽন্যঃ প্রিয়কৃত্তমো নাস্ত্যেবেত্যর্থঃ বর্ত্তমানেষু ন চ ভবিতা ভবিষ্যত্যপি কালে তস্মাৎ দ্বিতীযোঽন্যঃ প্রিয়কৃত্তরোভুবি লোকেঽস্মিন্ ভবিতা ॥ ৬৯ ॥

যোঽপি অধ্যেষ্যতে চ পঠিষ্যতি য ইমং ধর্ম্ম্যং ধর্ম্মাদনপেতং সম্বাদরূপং গ্রন্থমাবয়োঃ তেনেদং কৃতং স্যাৎ জ্ঞানযজ্ঞেন বিধিজপোপাংশুমানসানাং যজ্ঞানাং জ্ঞানযজ্ঞোমানসযজ্ঞাদ্বিশিষ্টতমইত্যতস্তেন জ্ঞানযজ্ঞেন গীতাশাস্ত্রস্যাধ্যযনং স্তূয়তে ফলবিধিরেব বা দেবতাদিবিষয়জ্ঞানযজ্ঞফলতুল্যমস্য ফলম্ভবতীতি তেনাধ্যয়নেনাহমিষ্টঃ পূজিতঃ স্যান্তবেয়মিতি মে মম মতিনিশ্চয়ঃ ॥ ৭০ ॥

## গিরিকৃত টীকা।

সম্প্রদায়প্রবক্তুঃ সর্ব্বাধিকং ফলং স বক্তা বিষ্ণুবিত্যুক্তো ন সবিশ্বাধিদৈবতমিতি স্যায়েনোক্ত্বা সম্প্রত্যধ্যেতুর্ব্বিবক্ষিতং ফলমাহ যোঽপীতি। যথোক্তস্য যোঽপ্যধ্যেতা তেনেদংকৃতংস্যাদিতি সম্বন্ধঃ। তদেবাহ অধ্যেষ্যতইতি। তেনেদং কৃতমিত্যত্রেদংশব্দার্থং বিশদয়তি জ্ঞানেতি। তেনাহমিষ্টঃ স্যামিতি সম্বন্ধঃ। চতুর্ব্বিধানাং যজ্ঞানাং মধ্যে জ্ঞানযজ্ঞস্য শ্রেয়ান্ দ্রব্যময়াৎ যজ্ঞাৎ জ্ঞানযজ্ঞইতি বিশিষ্টত্বাভিধানাত্তেনাহমিষ্টঃ স্যামিত্যধ্যয়নস্য স্তুতিরভিমতেত্যাহ বিধীতি। পক্ষান্তরমাহ ফলেতি। ফলবিধিমেবং প্রকটয়তি দেবতাদীতি। যদ্বিজ্ঞানযজ্ঞস্য ফলং কৈবল্যন্তেন তুল্যমস্যাধ্যেতুঃ সম্পদ্যতে তচ্চ দেবতাদ্যাত্মমিত্যর্থঃ। কথমধ্যযনাদেব সর্ব্বাত্মকং ফলং লভ্যতে তস্মাত্তৎসর্ব্বমভবদিতি শ্রুতিস্তত্রতেনেতি। তেনাধ্যেত্রা জ্ঞানযজ্ঞতুল্যেনাধ্যয়নেন ভগবানিষ্টস্তথা চ তজ্জ্ঞানাদুক্তং ফলমবিরুদ্ধমিত্যর্থঃ ॥ ৭০ ॥

## স্বামিকৃত টীকা।

দপি মম প্রিযকৃত্তমোঽত্যন্তং পরিতোষকর্ত্তা নাস্তি নচ কালান্তরে ভবিষ্যতি সমোঽপি তস্মাদন্যঃ প্রিয়তরোঽধুনা ভূবি তাবন্নাস্তি ন চ কালান্তরেঽপি ভবিষ্যতীত্যর্থঃ ॥ ৬৯ ॥

পঠতঃ ফলমাহ অধ্যেষ্যতইতি। আবয়োঃ শ্রীকৃষ্ণার্জ্জুনয়োরিমং ধর্ম্ম্যং ধর্ম্মাদনপেতং সংবাদং যোঽধ্যেষ্যতে জপরূপেণ পঠিষ্যতি তেন পুংসা সর্ব্বযজ্ঞেভ্যঃ শ্রেষ্ঠেন জ্ঞানযজ্ঞেনাহমিষ্টঃ স্যাং ভবেয়ামিতি মে মতিঃ, যদ্যপ্যসৌগীতার্থমবুধ্যমান এব কেবলং জপতি তথাপি মম তচ্ছৃণ্বতো মামেবাসৌ প্রাকাশযতীতি বুদ্ধির্ভবতি যথা লোকে যদৃচ্ছয়াপি যদা কশ্চিৎ কস্যচিন্নাম গৃহ্লাতি তদাসৌ মামাহ্বয়তীতি মত্বা তৎপার্শ্বমাগচ্ছতি তথাহমপি তস্য সন্নি-

শ্রদ্ধাবাননসূয়শ্চ শৃণুয়াদপি যো নরঃ।
সোঽপি মুক্তঃ শুভান্ লোকান্ প্রাপ্নুয়াৎ পুণ্যকর্ম্মণাম্ ॥৭১॥
কচ্চিদেতৎশ্রুতং পার্থ ত্বয়ৈকাগ্রেণ চেতসা।
কচ্চিদজ্ঞানসম্মোহঃ প্রনষ্টস্তে ধনঞ্জয় ॥ ৭২ ॥

## শাঙ্করভাষ্যম্।

অথ শ্রোতুরিদং ফলং শ্রদ্ধাবান্ শ্রদ্ধধানোঽনসূয়শ্চাসূয়াবর্জ্জিতঃ সন্ ইমং গ্রন্থং শৃণুয়াদপি যো নরোঽপিশব্দাৎ কিমুতার্থজ্ঞানবান্ যোঽপি পাপান্মুক্তঃ শুভান্ লোকান্ প্রাপ্নুয়াৎ পুণ্যকর্ম্মিণামগ্নিহোত্রাদিকর্ম্মবতাং ॥ ৭১ ॥

শিষ্যস্য শাস্ত্রার্থগ্রহণবিবেকবুভুৎসয়া পৃচ্ছতি তদগ্রহণে জ্ঞাতে পুনর্গ্রাহয়িষ্যাম্যুপায়ান্তরেণাপি ইতি প্রষ্টুরভিপ্রায়ো যত্নান্তরমাস্থায় শিষ্যঃ কৃতার্থঃ কর্ত্তব্যইত্যাচার্য্যধর্ম্মঃ প্রদ-

---

## গিরিকৃত টীকা।

প্রবক্তুর্বোধ্যেতুশ্চ ফলমুক্ত্বা শ্রোতুরিদানীং ফলং কথয়তি অথেতি ॥ ৭১ ॥

আচার্য্যেণ শিষ্যায় যাবদজ্ঞানসংশয়বিপর্য্যাসম্ভাবদনেকধোপদেষ্টব্যমিতি দর্শয়িতুং ভগবানর্জ্জুনং প্রতি পৃষ্টবানিত্যাহ শিষ্যস্যেতি। প্রষ্টুরভিপ্রায়ং প্রকটয়তি তদগ্রহণইতি। শিষ্যশ্চেদুক্তং গ্রহীতুং নেষ্টে তর্হি তং প্রত্যৌদাসীন্যমাচার্য্যস্যোচিতং তস্য মন্দবুদ্ধিত্বাদিত্যাশঙ্ক্যাহ যত্নান্তরমিতি। কচ্চিদিতি কোমলপ্রশ্নে। তমেব ব্যাচষ্টে কিমেতদিতি। দ্বিতীয়ং কিংপদং পূর্ব্বস্য ব্যাখ্যানত্বয়া সম্বধ্যতে কচ্চিদিতি। দ্বিতীয়ং প্রশ্নং বিভজতে কিং প্রনষ্টইতি। মোহপ্রণাশস্য প্রসঙ্গং দর্শয়তি যদর্থ ইতি ॥ ৭২ ॥

প্রেমোপদিষ্টাত্মজ্ঞানস্য অজ্ঞানসন্দেহবিপর্য্যাসরহিতস্যেষ্টস্য ভগবদনুগ্রহপ্রাপ্তিকথনেন ভগবন্তং পরিতোষয়িষ্যন্নর্জ্জুনোবিজ্ঞাপিতবানিত্যাহ অর্জ্জুনইতি। অজ্ঞানোত্থস্যাবিবেকস্য

## স্বামিকৃত টীকা।

হিতো ভবেয়ং, অতোযথা অজামীলক্ষত্রবন্ধুপ্রমুখাণাং কথঞ্চিন্নামোচ্চারণমাত্রেণ প্রসন্নোঽস্মি তথৈব তস্যাপি প্রসন্নো ভবেয়মিতিভাবঃ ॥ ৭০ ॥

অন্যস্য জপতো যোঽন্যঃ কশ্চিচ্ছৃণোতি তস্যাপি ফলমাহ শ্রদ্ধাবানিতি। যোনরঃ শ্রদ্ধাযুক্তঃ কেবলং শৃণুয়াদপি, শ্রদ্ধাবানপি যঃ কশ্চিৎ কিমর্থময়মুচ্চৈর্জপতি অবদ্ধং বা জপতীতি দোষদৃষ্টিং করোতি তদ্ব্যাবৃত্ত্যর্থমাহ অনসূয়শ্চাসূয়ারহিতো যঃ শৃণুয়াৎ সোঽপি সর্ব্বৈঃ পাপৈর্মুক্তঃ সন্নশ্বমেধাদিপুণ্যকৃতাং লোকান্ প্রাপ্নুয়াৎ ॥ ৭১ ॥

সম্যগ্বোধানুপপত্তৌ পুনরুপদেক্ষ্যামীত্যাশয়েনাহ কচ্চিদিতি। কচ্চিদিতিপ্রশ্নার্থে অজ্ঞানসম্মোহস্তত্ত্বাজ্ঞান কৃতোবিপর্য্যয়ঃ, স্পষ্টমন্যৎ ॥ ৭২ ॥

অর্জ্জুনউবাচ—নষ্টো মোহঃ স্মৃতির্লব্ধা ত্বৎপ্রসাদাম্ময়াচ্যুত।
স্থিতোঽস্মি গতসন্দেহঃ করিষ্যে বচনং তব ॥ ৭৩ ॥

## শাঙ্করভাষ্যম্।

র্শিতো ভবতি কচ্চিৎ কিমেতৎ ময়োক্তং শ্রুতং শ্রবণেনাবধারিতং পার্থ কিং ত্বয়া একাগ্রেণ চেতসা একচিত্তেন কিম্বা প্রমাদিতঃ কচ্চিদজ্ঞানসম্মোহোঽজ্ঞাননিমিত্তঃ সম্মোহো বৈচিত্তভাবোঽবিবেকতা স্বাভাবিকঃ কিং প্রনষ্টোযদর্থোঽয়ং শাস্ত্রশ্রবণায়াসস্তব মম চোপদেষ্টৃত্বায়াসঃ প্রবৃত্তস্তে তুভ্যং ধনঞ্জয়ঃ ॥ ৭২ ॥

অর্জ্জুনউবাচ নষ্টোমোহোঽজ্ঞানজং তমঃ সমস্তসংসারানর্থহেতুঃ সাগরইব দুস্তরঃ স্মৃতিরাত্মতত্ত্ববিষয়া লব্ধা যস্যালাভাৎ সর্ব্বগ্রন্থীনাং বিপ্রমোক্ষঃ ত্বৎপ্রসাদাত্তব প্রসাদান্ময়া ত্বৎপ্রসাদমাশ্রিতেনাচ্যুত অনেন মোহনাশপ্রশ্নপ্রতিবচনেন সর্ব্বশাস্ত্রার্থজ্ঞানফলমেতাবদেবেতি নিশ্চিতং দর্শিতং ভবতীতি যতুক্তাজ্ঞানসম্মোহনাশআত্মস্মৃতিঃ লাভশ্চেতি তথা চ শ্রুতাবনাত্মবিৎ শোচামীতি উপন্যস্যাত্মজ্ঞানে সর্ব্বগ্রন্থিবিপ্রমোক্ষোভিদ্যতে হৃদয়গ্রন্থিস্তত্র কোমোহঃ কঃ শোক একত্বমনুপশ্যতইতি চ মন্ত্রবর্ণঃ অথেদানীং ত্বচ্ছাসনে স্থিতোঽস্মি গতসন্দেহোমুক্তসংশয়ঃ করিষ্যে বচনন্তবাহং ত্বৎপ্রসাদাৎ কৃতার্থো ন মে কর্ত্তব্যমস্তীত্যভিপ্রায়ঃ ॥ ৭৩ ॥

## গিরিকৃত টীকা।

নষ্টত্বমেব স্পষ্টয়তি সমস্তইতি। স্বয়ংজ্যোতিষি প্রতীচি ব্রহ্মণ্যবিদ্যাভ্রমং বিঘাতয়তি নাবিদিতং প্রকাশযতীতি মত্বাহ স্মৃতিশ্চেতি। স্মৃতিলাভে কিং স্যাদিতিচেত্তদাহ যস্যইতি। মোহনাশে স্মৃতিপ্রতিলম্ভে বাঽসাধারণকারণমাহ ত্বৎপ্রসাদাদিতি। প্রকৃতেন প্রশ্ন প্রতিবচনেন লব্ধমর্থং কথয়তি অনেনেতি। যতুক্তং স্মৃতিপ্রতিলম্ভাদশেষতোহৃদয়গ্রন্থীনাং বিপ্রমোক্ষঃ স্যাদিতি তত্র প্রমাণমাহ তথাচেতি। জ্ঞানাদজ্ঞানতৎকার্য্যনিবৃত্তৌ শ্রুত্যন্তরমপি সম্বাদয়তি ভিদ্যতইতি। ভগবদনুগ্রহাদজ্ঞানকৃতমোহহানন্তদনন্তরমাত্মজ্ঞানে প্রতিলব্ধে ত্বদাজ্ঞাপ্রতীক্ষোঽহমিত্যুত্তরার্দ্ধং ব্যাকরোতি অথেতি। তব বচনং করিষ্যেঽহমিত্যত্র তাৎপর্য্যমাহ অহমিতি ॥ ৭৩ ॥

## স্বামিকৃত টীকা।

কৃতার্থঃ সন্নর্জ্জুনউবাচ নষ্টো মোহইতি। আত্মবিষয়ো মোহোনষ্টঃ যতোঽহমস্মীতি স্বরূপানুসন্ধানরূপা স্মৃতিস্ত্বৎপ্রসাদাম্ময়া লব্ধা অতঃ স্থিতোঽস্মি গতোঽধর্ম্মবিষয়ঃ সন্দেহো যস্য সোঽহং তবাজ্ঞাং করিষ্যামীতি ॥ ৭৩ ॥

সঞ্জয়উবাচ—ইত্যহং বাসুদেবস্য পার্থস্য চ মহাত্মনঃ।
সম্বাদমিমমশ্রৌষমদ্ভুতং লোমহর্ষণম্ ॥ ৭৪ ॥
ব্যাসপ্রসাদাচ্ছ্রুতবানিমং গুহ্যমহং পরম্।
যোগং যোগেশ্বরাৎ কৃষ্ণাৎ সাক্ষাৎ কথয়তঃ স্বয়ম্ ॥ ৭৫ ॥

## শাঙ্করভাষ্যম্।

পরিসমাপ্তঃ সকলাম্নায়শাস্ত্রার্থোঽথেদানীং কথাসম্বন্ধপ্রদর্শনার্থং সঞ্জয়উবাচ ইত্যেবমহং বাসুদেবস্য পার্থস্য চ মহাত্মনঃ সম্বাদমিমং যথোক্তমশ্রৌষং শ্রুতবানস্মি অদ্ভুতমত্যন্তবিস্ময়করং রোমহর্ষণং রোমাঞ্চকরং ॥ ৭৪ ॥

তঞ্চেমং শ্রীকৃষ্ণার্জ্জুনসম্বাদং ব্যাসপ্রসাদাত্ততোদিব্যচক্ষুর্লাভাৎ শ্রুতবান্ জ্ঞাতবানেতং সম্বাদং গুহ্যমহং পরং যোগং যোগার্থত্বাৎ গ্রন্থোঽপি যোগস্তং সম্বাদমিমং যোগেশ্বরাৎ কৃষ্ণাৎ সাক্ষাৎ কথয়তঃ স্বয়ং ন পরম্পরাতঃ ॥ ৭৫ ॥

## গিরিকৃত টীকা।

শাস্ত্রার্থে সমাপ্তে সত্যস্যামবস্থায়াং সঞ্জয়বচনং কুত্রোপযুক্তমিতি তদাহ পরিসমাপ্তইতি। বাসুদেবস্য সর্ব্বযজ্ঞস্য সর্ব্বেশ্বরস্য কৃতার্থস্য পার্থস্য পৃথাসুতস্যার্জ্জুনস্য মহাত্মনোঽক্ষুদ্রবুদ্ধেঃ সর্ব্বাধিকারিগুণসম্পন্নসম্যগ্‌বাদং সম্বাদং গুরুশিষ্যভাবেন প্রশ্নপ্রতিবচনাভিধানমিমমনুক্রান্তমদ্ভুতং বিস্ময়করং রোমাণি হর্ষন্তি পুলকাভবন্ত্যনেনেতি লোমহর্ষণমাহ্লাদকরং যথোক্তং শ্রুতবানস্মীত্যাহ ইত্যেবমিতি ॥ ৭৪ ॥

প্রকৃষ্টং সম্বাদং কথমশ্রৌষীরিতি চেত্তত্রাহ তঞ্চেতি। এতৎপদং সম্বাদপরত্বাত্তল্লিঙ্গত্বেন নেতব্যমিত্যাহ এতমিতি। পরমপুরুষার্থে পয়িকত্বাৎ পরত্বং পরং গুহ্যমতিশয়েন গুহ্যং রহস্যমিতি বা যোগোজ্ঞানং কর্ম্ম চ তদর্থত্বাদয়ং সম্বাদোযোগ উক্তঃ অথবা চিত্তবৃত্তিনিরোধস্য যোগস্যাঙ্গত্বাদয়ং সম্বাদযোগইত্যাহ সম্বাদমিতি। যোগানামীশ্বরোযোগেশ্বরস্তদনুগ্রহহেতুত্বাদ্যোগতৎফলয়োঃ ততঃ সাক্ষাদব্যবধানেন শ্রুতবান্ ন পরম্পরয়েত্যাহ যোগেশ্বরাদিতি। স্বয়ং স্বেন পরমেশ্বরেণাতিরস্কৃতজ্ঞানৈশ্বর্য্যরূপেণ কথয়তোব্যাচক্ষাণাদিত্যর্থঃ ॥৭৫

## স্বামিকৃতটীকা।

তদেবং ধৃতরাষ্ট্রং প্রতি শ্রীকৃষ্ণার্জ্জুনসংবাদং কথয়িত্বা প্রস্তুতাং কথামনুসন্দধানা সঞ্জয় উবাচ ইত্যহমিতি। লোমহর্ষণং লোমাঞ্চকরং সংবাদমশ্রৌষং শ্রুতবানহং স্পষ্টমন্যৎ ॥৭৪॥

আত্মনস্তস্য শ্রবণে সম্ভাবনামাহ ব্যাসপ্রসাদাদিতি। ভগবতা ব্যাসেন দিব্যং চক্ষুঃশ্রোত্রাদি মহ্যং দত্তং ততোব্যাসস্য প্রসাদাদেতৎ শ্রুতবানস্মি কিং তদিত্যপেক্ষায়ামাহ পরং যোগং, পরব্রহ্মাবিষ্করোতি যোগেশ্বরাৎ শ্রীকৃষ্ণাৎ স্বয়মেব সাক্ষাৎ কথয়তঃ শ্রুতবানিতি ॥৭৫॥

রাজন্ সংস্মৃত্য সংস্মৃত্য সম্বাদমিমমদ্ভুতম্।
কেশবার্জ্জুনয়োঃ পুণ্যং হৃষ্যামি চ মুহুর্মুহুঃ ॥ ৭৬ ॥
তচ্চ সংস্মৃত্য সংস্মৃত্য রূপমত্যদ্ভুতং হরেঃ।
বিস্ময়ো মে মহান্ রাজন্ হৃষ্যামি চ পুনঃ পুনঃ ॥ ৭৭ ॥

## শাঙ্করভাষ্যম্।

হে রাজন্! ধৃতরাষ্ট্র সংস্মৃত্য সংস্মৃত্য সম্বাদমিমমদ্ভুতং কেশবার্জ্জুনয়োঃ পুণ্যং শ্রবণাদপি পাপহরং শ্রুত্বা হৃষ্যামি চ মুহুর্মুহুঃ প্রতিক্ষণং ॥ ৭৬ ॥

তচ্চ সংস্মৃত্য রূপমত্যদ্ভুতং হরের্বিশ্বরূপং বিস্ময়ো মে মহান্ হে রাজন্ হৃষ্যামি চ পুনঃ পুনঃ ॥ ৭৭ ॥

কিং বহুনা যত্র যস্মিন্ পক্ষে যোগেশ্বরঃ সর্ব্বযোগানামীশ্বরস্তৎপ্রভবত্বাৎ সর্ব্বযোগবীজশ্চ

## গিরিকৃত টীকা।

যথোক্তং সম্বাদং ভগবতঃ শ্রুত্বা কিমুপেক্ষ্যসে নেত্যাহ রাজন্নিতি। পুণ্যত্বং সাধয়তি শ্রবণাদপীতি ॥ ৭৬ ॥

যত্তু বিশ্বরূপাখ্যং রূপংসগুণমর্জ্জুনায় ভগবান্ দর্শিতবান্ ধ্যানার্থং তদিদানীং স্তৌতি তচ্চেতি ॥ ৭৭ ॥

দ্বয়োরপি কৃষ্ণার্জ্জুনয়োঃ নরনারায়ণয়োঃ সম্বাদস্য প্রামাণ্যার্থং পরমুৎকর্ষং দর্শয়তি কিং বহুনেতি। কথং সর্ব্বেষাং যোগানামীশ্বরোভগবানিতি তত্রাহ তৎপ্রভবত্বাদিতি সর্ব্বযোগোজ্ঞানং কর্ম্ম চ তস্য বীজং শাস্ত্রীয়ং জ্ঞানবৈরাগ্যাদি তদ্ধি ভগবদধীনং তদনুগ্রহবিহীনস্য তদযোগাদতো যোগতৎফলয়োর্ভগবদনুগ্রহায়ত্তত্বাদ্ভগবতো যোগেশ্বরত্বমিত্যর্থঃ। শ্রীলক্ষ্মীর্বিজয়ঃ পরমউৎকর্ষঃ। রাজ্ঞোধৃতরাষ্ট্রস্য স্বপুত্রেষু বিজয়াশাং শিথিলীকৃত্য পাণ্ডবেষু জয়প্রাপ্তিমৈকান্তিকীমুপসংহরতি ইত্যেবইতি। উপায়োপেয়ভাবেন নিষ্ঠাদ্বয়স্য প্রতিষ্ঠাপিতত্বাৎ কর্ম্মনিষ্ঠাপরংপরয়া জ্ঞাননিষ্ঠাহেতু জ্ঞাননিষ্ঠা তু সাক্ষাদেব মোক্ষহেতুরিতি শাস্ত্রার্থমুপসংহর্ত্তুমিতীত্যুক্তং। কাণ্ডত্রয়াত্মকং শাস্ত্রং পদবাক্যার্থগোচরং। আদিমধ্যান্তষট্কেষু ব্যাখ্যয়া গোচরীকৃতং। সংক্ষেপবিস্তরাভ্যাং যো লক্ষণৈরুপপাদিতঃ। সোঽর্থোঽস্তিমেন সংক্ষিপ্য লক্ষণেন বিবক্ষিতঃ। গীতাশাস্ত্রমহার্ণবোত্থমমৃতং বৈকুণ্ঠকণ্ঠোদ্ভবং শ্রীকণ্ঠাপরনামবন্মুনিকৃতং নিষ্ঠাদ্বয়দ্যোতিতং। নিষ্ঠা যত্র মতিপ্রসাদজননী সাক্ষাৎকৃতং

## স্বামিকৃত টীকা।

কিঞ্চ রাজন্নিতি। হৃষ্যামি রোমাঞ্চিতো ভবামি হর্ষং প্রাপ্নোমীতি বা। স্পষ্টমন্যৎ ॥ ৭৬ ॥

কিঞ্চ তচ্চেতি। বিশ্বরূপং নির্দ্দিশতি। স্পষ্টমন্যৎ ॥ ৭৭ ॥

যত্র যোগেশ্বরঃ কৃষ্ণো যত্র পার্থোধনুর্দ্ধরঃ।
তত্র শ্রীর্বিজয়ো ভূতির্ধ্রুবা নীতির্মতির্মম ॥ ৭৮ ॥

## শাঙ্করভাষ্যম্।

কৃষ্ণোযত্র পার্থো যস্মিন্ পক্ষে ধনুর্দ্ধরোগাণ্ডীবধন্বা শ্রীস্তস্মিন্ পাণ্ডবানাং পক্ষে বিজয়স্তত্রৈব ভূতিঃ শ্রিয়োবিশেষবিস্তারোভূতির্ধ্রুবাঽব্যভিচারিণী নীতির্নযইত্যেবং মতির্মমেতি ॥৭৮॥

## গিরিকৃত টীকা।

কুর্ব্বতী মোক্ষে পর্য্যবসাস্যতি প্রতিদিনং সেবধ্বমেতদ্বুধাঃ। প্রাচামাচার্য্যপাদানাং পদবীমনুগচ্ছতা। গীতাভাষ্যে কৃতা টীকা টীকাং তাং পুরুষোত্তমং ॥ ৭৮ ॥

## স্বামিকৃত টীকা।

অতস্ত্বংপুত্রাণাং রাজ্যাদিশঙ্কাং পরিত্যজেত্যাশয়েনাহ যত্রেতি। যত্র যেষাং পক্ষে যোগানামীশ্বরঃ শ্রীকৃষ্ণো বর্ত্ততে যত্র চ পার্থোগাণ্ডীবধনুর্দ্ধরস্তত্রৈব শ্রীরাজ্যলক্ষ্মীস্তত্রৈব চ বিজয়স্তত্রৈব চ ভূতিরুত্তরোত্তরাভিবৃদ্ধিঃ নীতির্ন্যায়োঽপি তত্রৈব ধ্রুবা নীতিঃ মম মতির্নিশ্চয়ঃ অতইদানীমপি তাবৎ সপুত্রস্ত্বং শ্রীকৃষ্ণং শরণমুপেত্য পাণ্ডবান্ প্রসাদ্য সর্ব্বস্বং তেভ্যোনিবেদ্য পুত্রপ্রাণরক্ষাং কুর্ব্বিতি ভাবঃ। ভগবদ্ভক্তিযুক্তস্য তৎপ্রসাদাত্মবোধতঃ। সুখং বন্ধবিমুক্তিঃ স্যাদিতি গীতার্থসংগ্রহঃ। তথাহি, পুরুষঃ স পরঃ পার্থ ভক্ত্যা লভ্যস্ত্বনন্যযা। ভক্ত্যা ত্বনন্যযা শক্যস্ত্বহমেবংবিধোঽর্জ্জুনইত্যাদৌ ভগবদ্ভক্তের্মোক্ষং প্রতি সাধকত্বশ্রবণাত্তদেকান্তভক্তিরেব মৎপ্রসাদোত্থজ্ঞানাবান্তরব্যাপারযুক্তা মোক্ষহেতুরিতি স্ফুটং প্রতীয়তে জ্ঞানস্য চ ভক্ত্যবান্তরব্যাপারত্বমেব, তেষাং সততযুক্তানাং ভজত প্রীতিপূর্ব্বকং। দদামি বুদ্ধিযোগং তং যেন মামুপযান্তি তে। মদ্ভক্তএতদ্বিজ্ঞায় মদ্ভাবায়োপপদ্যতে, ইত্যাদিবচনাৎ। নচ জ্ঞানমেব ভক্তিরিতিযুক্তং সমঃ সর্ব্বেষু ভূতেষু মদ্ভক্তিং লভতে পরাং। ভক্ত্যা মামভিজানাতি যাবান্ যশ্চাস্মি তত্ত্বতঃ ইত্যাদৌ ভেদদর্শনাৎ নচৈবং সতি তমেব বিদিত্বাঽতিমৃত্যুমেতি নান্যঃ পন্থা বিদ্যতেঽনায়েতি শ্রুতিবিরোধঃ শঙ্কনীয়ঃ ভক্ত্যবান্তরব্যাপারত্বাৎ জ্ঞানস্য নহি কাষ্ঠৈঃ পচতীত্যুক্তে জ্বলনানামসাধনত্বমুক্তং ভবতি। কিঞ্চ, যস্য দেবে পরা ভক্তির্যথা দেবে তথা গুরৌ। তস্যৈতে কথিতা হ্যর্থাঃ প্রকাশন্তে মহাত্মনঃ। দেহান্তে দেবঃ ব্রহ্ম তারকং ব্যাচষ্টে যমেবৈষ বৃণুতে তেন লভ্যইত্যাদিশ্রুতিস্মৃতিপুরাণবচনান্যেবং সতি সমঞ্জসানি ভবন্তি,তস্মাদ্ভগবদ্ভক্তিরেব মোক্ষহেতুরিতি সিদ্ধং। তেনৈব দত্তয়া মত্যা তদ্গীতাবিবৃতিঃ কৃতা। সএব পরমানন্দস্তয়া প্রীণাতু মাধবঃ। পরমানন্দশ্রীপাদরজঃশ্রীধারিণাধুনা। শ্রীধরস্বামিযতিনা কৃতা গীতাসুবোধিনী। স্বপ্রাগল্ভ্যবলাদ্বিলোড্য ভগবদ্গীতাং তদন্তর্গতং তত্ত্বং প্রেপ্সুরুপৈতি কিং গুরুকৃপাপীযূষদৃষ্টিং বিনা। অম্বু স্বাঞ্জলিনা নিরস্য জলধেরাদিৎসুরন্তর্মণীনাবর্ত্তেষু ন কিং নিমজ্জতি জনঃ সৎকর্ণধারং বিনা ॥ ৭৮ ॥

## ইতি শ্রীভগবদ্গীতাসূপনিষৎসু ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জ্জুনসম্বাদে মোক্ষযোগোনাম অষ্টাদশোঽধ্যায়ঃ।

### শাঙ্করভাষ্যম্।

ইতি শ্রীগোবিন্দভগবৎপূজ্যপাদশিষ্যস্য পরমহংসপরিব্রাজকাচার্য্যস্য শ্রীমচ্ছঙ্করভগবতঃ কৃতৌ গীতাভাষ্যেঽষ্টাদশোঽধ্যায়ঃ।

### গিরিকৃত টীকা।

ইতি শ্রীমৎপবমহংসপবিব্রাজকাচার্য্যশুদ্ধানন্দপূজ্যপাদশিষ্যভগবদানন্দগিবিবিবচিতে শ্রীগীতাভাষ্যবিবেচনেঽষ্টাদশোঽধ্যায়ঃ।

### স্বামিকৃত টীকা।

ইতি শ্রীধবস্বামিষতিকৃতায়াং শ্রীমদ্ভগবদ্গীতাটীকায়াং সুবোধিন্যাং পবমার্থনির্ণয়ো নামাষ্টাদশোঽধ্যায়ঃ।

# শ্রীমদ্ভগবদ্গীতা।

শ্রীকৈলাসচন্দ্র সিংহ কর্ত্তৃক

বঙ্গভাষায় অনুবাদিত।

"দুঃখ সঙ্কুল সংসার হইতে নিবৃত্তিরূপ নির্ব্বাণ মুক্তিই
এই গীতা শাস্ত্রের উদ্দেশ্য।"

শঙ্করাচার্য্য।

কলিকাতা,
২ নং গোয়াবাগান ষ্ট্রীট্, ভিক্টোরিয়া প্রেসে
শ্রীতারিণীচরণ আস দ্বারা মুদ্রিত।

১২৯৮

# সূচনা।

চন্দ্রবংশে সম্বরণ নামে এক নরপতি ছিলেন। হস্তিনাপুর * তাঁহার রাজধানী ছিল। তিনি সূর্য্যকন্যা তপতীর পাণিগ্রহণ করেন। তাঁহাদের একমাত্র পুত্র কুরু আখ্যাপ্রাপ্ত হন। এই কুরু হইতে কৌরবকুলের উৎপত্তি। এই কুরুবংশে শান্তনু নামে নরপতি জন্মগ্রহণ করেন। তাঁহার তিন পুত্র ভীষ্ম, চিত্রাঙ্গদ ও বিচিত্রবীর্য্য। বিচিত্রবীর্য্যের দুই পুত্র ধৃতরাষ্ট্র ও পাণ্ডু। ধৃতরাষ্ট্র জন্মান্ধ। বিচিত্রবীর্য্যের আরও এক পুত্র ছিল। তাহার নাম বিদুর, ইনি দাসীর গর্ভজাত। গান্ধারীর গর্ভে ধৃতরাষ্ট্রের দুর্য্যোধন, দুঃশাসন প্রভৃতি একশত পুত্র জন্মগ্রহণ করেন। অন্য পত্নীর গর্ভে ধৃতরাষ্ট্রের আর একটী পুত্র জন্মে তাহার নাম যুযুৎসু। পাণ্ডুরাজার দুই পত্নী, কুন্তী ও মাদ্রী। কুন্তীর গর্ভে যুধিষ্ঠির, ভীম ও অর্জ্জুনের জন্ম। মাদ্রীর দুই পুত্রের নাম নকুল ও সহদেব। ধৃতরাষ্ট্র ও পাণ্ডুর পুত্রগণ মধ্যে যুধিষ্ঠির সর্ব্বজ্যেষ্ঠ; এই জন্য পাণ্ডুর মৃত্যুর পর অন্ধরাজা ধৃতরাষ্ট্র তাহাকে যৌবরাজ্যে অভিষিক্ত করেন। মন্দবুদ্ধি দুর্য্যোধন হিংসার বশবর্ত্তী হইয়া পুরোচন নামক জনৈক যবন (গ্রীক) দ্বারা এক জতুগৃহ নির্ম্মাণ পূর্ব্বক পাণ্ডু পুত্রগণকে তন্মধ্যে দগ্ধ করিবার জন্য ষড়যন্ত্র করিয়াছিল। ধর্ম্মপরায়ণ পাণ্ডবগণ বিদুর দ্বারা এই সংবাদ অবগত হইয়া সেই গৃহে অগ্নি প্রদান পূর্ব্বক অরণ্যমধ্যে আশ্রয় গ্রহণ করেন। এদিকে পামর ধার্ত্তরাষ্ট্রগণ পাণ্ডবেরা গৃহদাহে ভস্মীভূত হইয়াছে বলিয়া কৃত্রিম শোক করিতে লাগিল। পাণ্ডুপুত্রগণ কিছুকাল ছদ্মবেশে নানা স্থান ভ্রমণ করিয়া দ্রুপদ রাজপুত্রীর স্বয়ম্বর সভায় উপস্থিত হইলেন। ব্রাহ্মণবেশধারী অর্জ্জুন লক্ষ্য ভেদ করিয়া দ্রুপদকন্যা কৃষ্ণাকে লাভ করেন। সেই সভায় সমুপস্থিত দুর্য্যোধন প্রভৃতি অন্যান্য দুষ্ট নরপতিগণ ছদ্মবেশধারী অর্জ্জুনকে বধ করিয়া বলক্রমে দ্রৌপদীকে গ্রহণ করিবার জন্য অস্ত্র ধারণ করিয়াছিলেন। কিন্তু ভীমার্জ্জুনের বাহুবলে তাঁহারা পরাজিত হন। তদনন্তর পাণ্ডবগণ মাতৃ-আজ্ঞা অনুসারে পঞ্চ ভ্রাতায় দ্রৌপদীকে বিবাহ করেন। ধৃতরাষ্ট্র পাণ্ডবগণের অভ্যুদয় শ্রবণে ভয়—'ও বিদুর ভীষ্ম প্রভৃতি মহাত্মাদিগের পরামর্শে—বাধ্য হইয়া পাণ্ডুপুত্রদিগকে

---

* কালিন্দীর স্রোতপ্রবাহে হস্তিনাপুর অদৃশ্য হইয়াছে।

হস্তিনায় আনয়ন পূর্ব্বক রাজ্যের কিয়দংশ প্রদান করিয়া তাঁহাদিগকে খাণ্ডব প্রস্থে স্থাপন করেন। পাণ্ডবেরা খাণ্ডবপ্রস্থকে ইন্দ্রপ্রস্থ আখ্যা প্রদান পূর্ব্বক তথায় রাজপাঠ স্থাপন করেন।* পাণ্ডবগণ বাহুবলে ভারতের চতুর্দ্দিক জয় করিয়া রাজসূয় যজ্ঞ সম্পন্ন করেন। স্বীয় নির্ব্বুদ্ধিতায় রাজা দুর্য্যোধন সেই সভায় অপমানিত হইয়াছিলেন, এজন্য তিনি তাহার প্রতিশোধ লইবার আশায় হস্তিনা-পুরে প্রত্যাবর্ত্তন করিয়াই ধর্ম্মরাজ যুধিষ্ঠিরকে দ্যূতক্রীড়ায় আহ্বান করিলেন। দুর্য্যোধন দ্যূতক্রীড়ায় বিশেষ পটু ছিলেন না; এজন্য স্বীয় মাতুল কপটক্রীড়ায় সুপণ্ডিত শকুনিকে যুধিষ্ঠিরের সহিত দ্যূতক্রীড়ায় নিযুক্ত করিলেন। কপট দ্যূত-ক্রীড়ায় পাণ্ডবেরা পরাজিত ও সর্ব্বস্বান্ত হইয়া দ্রৌপদীর সহিত দ্বাদশ বৎসর বনবাস ও এক বৎসর অজ্ঞাতবাসের জন্য বনে গমন করিলেন। এই রূপ নির্দ্ধা-রিত হইয়াছিল যে, অজ্ঞাত ও বনবাস প্রতিজ্ঞা প্রতিপালন করিয়া পাণ্ডবেরা প্রত্যাবর্ত্তন করিলে স্বীয় রাজ্য প্রাপ্ত হইবেন। পাণ্ডবদিগের বনবাস কালে তাঁহাদিগকে নষ্ট করিবার জন্য দুর্য্যোধন নানা প্রকার চক্রান্ত করিয়াছিলেন। কিন্তু তাঁহার কোন চেষ্টাই ফলবতী হয় নাই। পাণ্ডবেরা দ্বাদশ বৎসর কাল নানা স্থানে ভ্রমণ করিয়া অবশিষ্ট এক বৎসর অজ্ঞাতবাসের জন্য ছদ্মবেশে মৎস্য রাজ্যের অধিপতি বিরাটের ভবনে আশ্রয় গ্রহণ করেন। সেই এক বৎসর তাঁহারা নিতান্ত কষ্টে কালযাপন করিয়াছিলেন। নির্দ্ধারিত সময় গত হইলে তাঁহারা আত্ম প্রকাশ করিলেন। রাজা বিরাট পাণ্ডবদিগের পরিচয় প্রাপ্ত হইয়া স্বীয় কন্যা উত্তরার পাণিগ্রহণের জন্য অর্জ্জুনকে অনুরোধ করেন। ইন্দ্রপ্রস্থে নিবাস কালে অর্জ্জুন স্বীয় মাতুলকন্যা সুভদ্রার পাণিগ্রহণ করিয়াছিলেন। তদ্-গর্ভে তাঁহার এক পুত্র জন্মে, তাঁহার নাম অভিমন্যু। অর্জ্জুন বিরাটকে বলি-লেন; আমি এক বৎসর কাল আপনার কন্যাকে নৃত্য ও গীত বাদ্য শিক্ষা দিয়াছি; সুতরাং তাঁহার পাণিগ্রহণ করা আমার পক্ষে সঙ্গত নহে; কিন্তু উত্তরাকে পুত্র-বধূরূপে গ্রহণ করিতে আমি প্রস্তুত আছি। তদনুসারে অভিমন্যুর সহিত উত্তরার উদ্বাহ কার্য্য সম্পন্ন হইল। সেই বিবাহ উপলক্ষে পঞ্চাল রাজপরিবার ও যাদবগণ বিরাটপুরে সম্মিলিত হইয়াছিলেন। পাণ্ডবদিগের আত্মীয়বর্গের

* যমুনা নদীর তীরবর্ত্তী যে স্থান অধুনা দিল্লীনামে পরিচিত, তাহাতে ১৬টি স্বতন্ত্র নগরের চিহ্ন প্রাপ্ত হওয়া যায়। মোগল সম্রাট হুমায়ুন নির্ম্মিত "পুরান কেল্লা", "সেরসাহের দিল্লী" এবং "নূতন দিল্লীর" মধ্যস্থলে প্রাচীন ইন্দ্রপ্রস্থ অবস্থিত ছিল।

পরামর্শানুসারে তাঁহাদের মাতুলপুত্র শ্রীকৃষ্ণ ধৃতরাষ্ট্রের সভায় গমন পূর্ব্বক অন্ধ-রাজকে বলিলেন, পূর্ব্ব প্রস্তাবানুসারে পাণ্ডবদিগের রাজ্য তাঁহাদিগকে প্রদান করুন। তদুত্তরে ধৃতরাষ্ট্র পুত্র দুর্য্যোধন, কর্ণ, * দুঃশাসন ও শকুনী প্রভৃতির কুমন্ত্রণায় বলিলেন,"বিনাযুদ্ধে সূচ্যগ্র ভূমিও পাণ্ডবদিগকে প্রদান করা হইবে না।" সুতরাং শ্রীকৃষ্ণ বিফল-মনোরথ হইয়া বিরাটপুরে প্রত্যাবর্ত্তন করিলেন। উভয় পক্ষ হইতেই যুদ্ধের আয়োজন হইতে লাগিল। ভারতের প্রধান প্রধান রাজন্য-বর্গ সকলেই অন্যতর পক্ষ অবলম্বন করিলেন। এইরূপে পাণ্ডব পক্ষে সপ্ত অক্ষৌহিণী ও দুর্য্যোধন পক্ষে একাদশ অক্ষৌহিণী সৈন্য সংগৃহীত হইল। †

সরস্বতী ও দৃষদ্বতীর মধ্যবর্ত্তী একটী বিস্তৃত "চক্র" কুরুরাজার নামানুসারে কুরুক্ষেত্র আখ্যাপ্রাপ্ত হয়। শতপথ ব্রাহ্মণে লিখিত আছে "অগ্নি, ইন্দ্র, সোম, বিষ্ণু প্রভৃতি দেবগণ এইস্থানে যজ্ঞ করিয়াছিলেন, এজন্য কুরুক্ষেত্র দেবতাদিগের যজ্ঞস্থল বলিয়া কথিত হইয়া থাকে।" ‡ তৈত্তরেয় আরণ্যকেও উল্লেখিত বর্ণনা প্রাপ্ত হওয়া যায়। ¶ পৌরাণিক মতে পিতামহ ব্রহ্মা এইস্থানে যজ্ঞ করিয়াছিলেন। কুরুরাজ এইস্থানে তপস্যা করিয়া সিদ্ধকাম হইয়াছিলেন। এবম্প্রকার বিবিধ কারণে কুরুক্ষেত্র "ধর্ম্মক্ষেত্র" আখ্যা প্রাপ্ত হইয়া একটী প্রধান তীর্থ মধ্যে পরিগণিত হইয়াছিল, ইহার অপর নাম সমন্তপঞ্চক। উভয় পক্ষের

* পাণ্ডুর সহিত কুন্তীর বিবাহের পূর্ব্বে কুন্তীর গর্ভে কর্ণ জন্মগ্রহণ করেন। তিনি সূর্য্যপুত্র বলিয়া প্রসিদ্ধ। কুন্তী স্বীয় কলঙ্ক অপনোদন মানসে সদ্যজাত শিশুকে পরিত্যাগ করিলে সূতকুলজ অধিরথের পত্নী রাধা তাহাকে প্রতিপালন করিয়াছিলেন: তদনন্তর তিনি পরশুরামের নিকট অস্ত্রশিক্ষা করিয়া একজন অসাধারণ বীর বলিয়া আত্ম-প্রকাশ করেন। সংগ্রামক্ষেত্রে অর্জ্জুনকে নিধন করিয়া স্বীয় খ্যাতি বৃদ্ধি করাই তাঁহার প্রধান উদ্দেশ্য ছিল। কিন্তু তিনি অর্জ্জুনের সমতুল্য যোদ্ধা ছিলেন না। কুরুকুল পিতামহ ভীষ্ম কর্ণকে অর্দ্ধরথী এবং অর্জ্জুনকে তদনীন্তন যোদ্ধৃবর্গ মধ্যে সর্ব্বপ্রধান বলিয়া বর্ণনা করিয়াছিলেন।

† মহাভারতের যাঁহারা প্রধান নায়ক, তাঁহারাই গীতার নায়ক। কোন কোন ইতিহাস-লেখক ইহাদিগকে কবিকল্পনা-প্রসূত বলিয়াছেন। গীতার একজন অনুবাদকও তাঁহাদিগকে রূপক বলিয়া ব্যাখ্যা করিতে চেষ্টা করিয়াছেন।

‡ Muir's Sanskrit Texts, Part. IV. p. 109.

¶ Ibd. page 111.

সম্মতিক্রমে সেই ধর্ম্মক্ষেত্র—কুরুক্ষেত্র সমরক্ষেত্র নির্ণীত হইল। * যথাকালে উভয় পক্ষীয় বীরগণ সমরাভরণে বিভূষিত হইয়া যুদ্ধক্ষেত্রে উপনীত হইলেন। ভগবান শ্রীকৃষ্ণ সেই ভীষণ সমরে অর্জ্জুনের সারথী হইয়াছিলেন। ধৃতরাষ্ট্রের পুত্র যুযুৎসু যুদ্ধের আরম্ভেই অধর্ম্মপরায়ণ দুর্য্যোধনকে পরিত্যাগ করিয়া পাণ্ডব পক্ষ অবলম্বন করিলেন। যুদ্ধের প্রারম্ভে অর্জ্জুন শ্রীকৃষ্ণকে বলিলেন, কাহার সহিত আমাকে সংগ্রাম করিতে হইবে তাহা আমি নিরীক্ষণ করিতে ইচ্ছা করি। অতএব তুমি উভয় সৈন্যের মধ্যে আমার রথ স্থাপন কর। ভগবান শ্রীকৃষ্ণ তাহাই করিলেন। তখন অর্জ্জুন দেখিলেন যে, পিতামহ ভীষ্ম তাঁহাকে পুত্রবৎ প্রতিপালন করিয়াছিলেন, তিনিই তাঁহার বিরুদ্ধে ধনুর্ব্বাণ হস্তে দণ্ডায়মান,—যে গুরু দ্রোণাচার্য্য তাঁহাকে পুত্রাধিক স্নেহ করিয়া অস্ত্রশিক্ষা দিয়াছেন, সেই গুরু তাঁহার বিরুদ্ধে অস্ত্র ধারণ করিয়াছেন। তাঁহাদের স্নেহপরায়ণ মাতুল মদ্ররাজ শল্য কৌরবপক্ষ অবলম্বন করিয়া তাঁহাদের বিরুদ্ধে দণ্ডায়মান রহিয়াছেন। ইঁহাদিগকে বিনাশ না করিয়া জয়লাভ করিতে পারিবেন না। নিজপক্ষে দৃষ্টি

* জেনারেল কনিংহাম সাহেব বলেন All the country immediately around Thanesar, between the *Saraswati* and *Dreshadwati* Rivers, is known by the name of *Kuru-Kshetra*, That is the field or land of Kuru. * * * The *Chakra* or district of Kuru-Kshetra is also called *Dharma-Kshetra*, or the "Holy land," which is evidently the original of Hwen Thsang's *"le Champ du bonheur."* পরিব্রাজক হিয়েন সাঙ্ এই ক্ষেত্র বা চক্রের পরিধি ৪০লি (৬—৮ মাইল) লিখিয়াছেন। মোগল সম্রাট আকবরের বিখ্যাত সচিব আবুল ফজল ইহার পরিধি ৪০ ক্রোশ বলিয়া উল্লেখ করিয়াছেন। কনিংহাম সাহেব এই চক্রের ৪৮ ক্রোশ পরিধি নির্দ্দেশ করেন। কুরুক্ষেত্রের বিস্তারিত বর্ণনা কনিংহাম সাহেবের Archæological Survey Report নামক গ্রন্থের দ্বিতীয় খণ্ডের ২১২ হইতে ২২৩ পৃষ্ঠায় দৃষ্ট হইবে।

এই ক্ষেত্র ও তাহার নিকটবর্ত্তী স্থানে অনেক লোকক্ষয়কর ভীষণ সমর হইয়া গিয়াছে। মুসলমানদিগের হস্ত হইতে ভারতভূমি রক্ষা করিবার জন্য প্রাতঃস্মরণীয় বীর পৃথ্বীরাজ এই ক্ষেত্রে স্বীয় প্রাণ আহুতী দিয়াছিলেন। ইহার নিকটবর্ত্তী স্থানে পাঠানদিগের অন্ত্যেষ্টিক্রিয়া সম্পাদন করিয়া বাবর মোগল বৈজয়ন্তী ভারতে উড্ডিন্ করিয়াছিলেন। ইহারই নিকটবর্ত্তী স্থানে ত্রয়োদশ বর্ষীয় বালক আকবর, পাঠানরাজের সেনাপতি হিন্দুবীর হিমুকে জয় করিয়াছিলেন। ইহারই নিকটবর্ত্তী স্থানে (১৬৯৩ শকাব্দে) ভারতে পুনঃ হিন্দু সাম্রাজ্য সংস্থাপনের শেষ আশা নির্ব্বাপিত হইয়াছে।

নিক্ষেপ করিয়া দেখিলেন ভ্রাতা, পুত্র, পৌত্র, শ্বশুর ও অন্যান্য সুহৃদবর্গ সকলই সেই ভীষণ সমরে প্রাণদান করিতে সমুদ্যত হইয়াছেন। তদ্দর্শনে তিনি নিতান্ত কৃপাবিষ্ট ও বিষণ্ণ হইয়া ধনুর্ব্বাণ পরিত্যাগ পূর্ব্বক শ্রীকৃষ্ণকে কহিলেন এই সকল আত্মীয়বর্গকে নষ্ট করিয়া আমি জয় ও রাজ্য লাভ করিতে ইচ্ছা করি না। সুতরাং যুদ্ধ করিব না। ভগবান শ্রীকৃষ্ণ সেই ভীষণ সমরের প্রারম্ভে অর্জ্জুনের মোহ অপনোদন ও ধর্ম্মযুদ্ধে তাঁহাকে প্রবর্ত্তিত করিবার জন্য * যোগশাস্ত্রের চরম উপদেশ প্রদান করেন, ইহাই ভগবদ্গীতা এবং "দুঃখসঙ্কুল সংসার হইতে নিবৃত্তিরূপ নির্ব্বাণ মুক্তিই এই গীতাশাস্ত্রের উদ্দেশ্য।"

---

* সকল দেশে এবং সকল শাস্ত্রেই ধর্ম্মযুদ্ধ নিষ্পাপ বলিয়া উক্ত হইয়াছে। ধৃতরাষ্ট্র জন্মান্ধ বলিয়া রাজ্যাধিকারে বঞ্চিত, তাঁহার জীবিত কালেই তদীয় কনিষ্ঠ ভ্রাতা পাণ্ডু রাজসিংহাসন প্রাপ্ত হইয়াছিলেন। পাণ্ডুর মৃত্যুর পর যুধিষ্ঠিরই এই রাজ্যের প্রকৃত অধিকারী ছিলেন। তথাপি পাণ্ডুপুত্র রাজ্যের কিয়দংশমাত্র প্রাপ্ত হইয়া সন্তুষ্ট ছিলেন। বনবাস হইতে প্রত্যাবর্ত্তন করিয়া পাণ্ডুপুত্র সেই রাজ্যাংশ কিম্বা পঞ্চখানা গ্রামমাত্র ধৃতরাষ্ট্রের নিকট যাচ্ঞা করিয়াছিলেন। যখন সেই প্রার্থনা অগ্রাহ্য হইল তখনই তাঁহারা স্বীয় সম্পত্তি উদ্ধারের জন্য ধর্ম্মযুদ্ধে প্রবৃত্ত হইলেন।

মহাভারতে লিখিত আছে:—"দুর্য্যোধন ক্রোধ, দ্বেষ, ঈর্ষা, অসূয়া প্রভৃতি নিকৃষ্ট বৃত্তিময় একটি মহাবৃক্ষ, কর্ণ সেই বৃক্ষের স্কন্ধ, শকুনি শাখা, দুঃশাসন সমৃদ্ধিযুক্ত পুষ্প ও ফল এবং মনোনিগ্রহে অসমর্থ ধৃতরাষ্ট্র সেই বৃক্ষের মূল। যুধিষ্ঠির একটি ধর্ম্মময় মহাবৃক্ষ, অর্জ্জুন তাহার স্কন্ধ, ভীমসেন শাখা, নকুল ও সহদেব সমৃদ্ধ ফল ও পুষ্প এবং ভগবান শ্রীকৃষ্ণ, বেদ ও ব্রহ্মতত্ত্বজ্ঞ ব্রাহ্মণগণ সেই বৃক্ষের মূল।"

# শ্রীমদ্ভগবদ্গীতা।

## অনুবাদ।

শঙ্করাচার্য্য কৃত ভাষ্যের

### উপক্রমণিকা।

---

ভগবান নারায়ণ এই জগৎ সৃষ্টি করিয়া তাহার রক্ষা বিধানার্থে অগ্রে মরীচি প্রভৃতি ঋষিগণকে উৎপাদন পূর্ব্বক বেদোক্ত প্রবৃত্তিলক্ষণ ধর্ম্মে দীক্ষিত করিয়াছিলেন। পরে সনক সনন্দন প্রভৃতি অন্যান্য ঋষিগণকে উৎপাদন করিয়া জ্ঞান-বৈরাগ্য-মূলক নিবৃত্তিলক্ষণ ধর্ম্মে দীক্ষিত করেন।

বেদোক্ত ধর্ম্ম দুই প্রকার—প্রবৃত্তিলক্ষণ ও নিবৃত্তিলক্ষণ। এই ধর্ম্ম জগতের স্থিতির কারণ ও জীবনের মুক্তির হেতু। ব্রাহ্মণাদি বর্ণচতুষ্টয় শ্রেয়ঃসাধন মানসে অতি ব্যাপক কাল ধরিয়া ইহার অনুষ্ঠান করিয়া থাকেন। অনুষ্ঠাতাদিগের রাগ দ্বেষাদির উদ্ভবে বিবেক ও বিজ্ঞান বিনষ্ট ও তন্নিবন্ধন ধর্ম্ম অধর্ম্ম দ্বারা অভিভূত হইলে আদিকর্ত্তা নারায়ণ বিষ্ণু জগতের স্থিতিসাধনের জন্য এবং ব্রাহ্মণ্য ও বৈদিক ধর্ম্ম রক্ষার জন্য বসুদেবের ঔরসে দেবকীর গর্ভে জন্মগ্রহণ করেন ইহাই প্রসিদ্ধি। ইনিই ঈশ্বরের অংশাবতার কৃষ্ণ। ব্রাহ্মণত্ব রক্ষা হইলেই বৈদিক ধর্ম্ম রক্ষিত হয়, কারণ বর্ণাশ্রমভেদ কেবল ব্রাহ্মণমূলক।

ঈশ্বর শরীরবিশিষ্ট হইলে আমাদের সহিত তাঁহার আর ইতর বিশেষ কি এরূপ আশঙ্কা অমূলক। সেই ভগবান্ সততই জ্ঞান ঐশ্বর্য্য শক্তি বল বীর্য্য ও তেজ সম্পন্ন। তিনি অজ অব্যয় ভূতগণের ঈশ্বর নিত্য শুদ্ধ বুদ্ধ ও মুক্ত স্বভাব হইলেও ত্রিগুণাত্মিকা স্বীয় বৈষ্ণবী মায়াকে বশীভূত করিয়া স্বয়ংই লোকানুগ্রহার্থ যেন দেহবদ্ধবৎ দৃষ্ট হইয়াছিলেন। এবং নিজের ইষ্ট-

সাধন বুদ্ধি না থাকিলেও কেবল মনুষ্যদিগের প্রতি অনুকম্পা প্রদর্শনার্থ শোক-মোহে অভিভূত অর্জ্জুনকে বৈদিক ধর্ম্মের উপদেশ দিয়াছিলেন। কারণ ধর্ম্ম অধিক গুণবান কর্ত্তৃক গৃহীত ও অনুষ্ঠিত হইলে পরিবর্দ্ধিত হইয়া থাকে। নারায়ণ যে ধর্ম্মের উপদেশ করিয়াছিলেন সর্ব্বজ্ঞ ভগবান ব্যাস এই সপ্তশত শ্লোকাত্মক গীতা নামক গ্রন্থে তাহাই বিবৃত করিয়াছেন।

এই গীতা শাস্ত্র সমস্ত বেদার্থের সার সংগ্রহ স্বরূপ ও দুর্ব্বোধ্য। অনেকে ইহাকে অত্যন্ত বিরুদ্ধার্থে বুঝিয়া থাকে, তজ্জন্য আমি বিবেকত ইহার অর্থ নির্দ্ধারণার্থ একটী সংক্ষেপ ব্যাখ্যা করিতেছি।

দুঃখসঙ্কুল সংসার হইতে নিবৃত্তিরূপ নির্ব্বাণ মুক্তিই এই গীতাশাস্ত্রের উদ্দেশ্য। সেই মুক্তি সর্ব্বকর্ম্মত্যাগ ও আত্মজ্ঞানরূপ ধর্ম্ম হইতে উদ্ভূত হয়। ভগবানও এই গীতার্থ ধর্ম্ম উদ্দেশ করিয়া অনুগীতাতে কহিয়াছেন ব্রহ্মপদ যে নির্ব্বাণমুক্তি তল্লাভই সুপর্য্যাপ্ত ধর্ম্ম এবং সর্ব্বকর্ম্মত্যাগ-রূপই জ্ঞান। আর বর্ণাশ্রম উদ্দেশে অভ্যুদয়-সাধন প্রবৃত্তি-লক্ষণ ধর্ম্ম যে কথিত হইয়াছে তাহা দেবাদি স্থান প্রাপ্তির নিদান হইলেও ফলাভিসন্ধি-বর্জ্জিত ও ঈশ্বরার্পণ-বুদ্ধিতে অনুষ্ঠিত হয় বলিয়া সত্বশুদ্ধির হেতু হইয়া থাকে। শুদ্ধসত্ব ব্যক্তির জ্ঞাননিষ্ঠা-যোগ্যতা ও জ্ঞানোৎপত্তি হেতু দ্বারা নির্ব্বাণ মুক্তি লাভ হয়। এই বিষয়টী এক স্থলে স্পষ্টরূপ কথিত হইয়াছে, যোগিরা আত্মশুদ্ধির নিমিত্ত সংযতচিত্ত ও জিতেন্দ্রিয় হইয়া ব্রহ্মে কর্ম্মার্পণ পূর্ব্বক কর্ম্মের অনুষ্ঠান করিয়া থাকেন।

যেহেতু এই মুক্তিসাধন দুই প্রকার ধর্ম্ম ও পরমার্থতত্ব বিশেষরূপে অভিব্যক্ত করত বিশিষ্ট প্রয়োজন সম্বন্ধ ও অভিধেয়যুক্ত এই গীতাশাস্ত্রের অর্থজ্ঞানে পুরুষার্থ সিদ্ধি হয় এই জন্য আমি ইহার ব্যাখ্যা করিতে প্রবৃত্ত হইলাম।

# প্রথম অধ্যায়।

ধৃতরাষ্ট্র কহিলেন, হে সঞ্জয়! * ধর্ম্মক্ষেত্ররূপ কুরুক্ষেত্রে যুদ্ধাভিলাষে সমবেত অস্মৎপক্ষীয়যোধগণ ও পাণ্ডবগণ কি করিয়াছিলেন। (১)

সঞ্জয় কহিলেন, পাণ্ডব সৈন্য ব্যূহিত অবলোকন পূর্ব্বক রাজা দুর্য্যোধন আচার্য্য দ্রোণের নিকট উপস্থিত হইয়া কহিলেন। (২)

আচার্য্য! দেখুন আপনার শিষ্য ধীমান দ্রুপদপুত্র (ধৃষ্টদ্যুম্ন) পাণ্ডবদিগের মহতী সেনা দ্বারা ব্যূহ রচনা করিয়াছেন। (৩) ইহাদের মধ্যে মহাধনুর্দ্ধর বীর ভীমার্জ্জুন ও তৎসমকক্ষ যুযুধান (সাত্যকি), বিরাট এবং মহারথ দ্রুপদ। (৪) ধৃষ্টকেতু (চেদীরাজ), চেকিতান, বীর্য্যবান কাশীরাজ, পুরুজিৎ, কুন্তিভোজ ও নরশ্রেষ্ঠ সৈব্য। (৫) বিক্রমশালী যুধামন্যু, বীর্য্যবান উত্তমৌজা, মহারথ অভিমন্যু ও দ্রৌপদীর পঞ্চপুত্র প্রভৃতি সেই ব্যূহমধ্যে অবস্থিতি করিয়াছে। (৬)

হে দ্বিজোত্তম! আমাদিগের পক্ষে যে সকল প্রধান সেনানায়ক আছেন, আপনার অবগতি জন্য তাঁহাদিগের নাম কীর্ত্তন করিতেছি। (৭) আপনি, ভীষ্ম, কর্ণ, কৃপাচার্য্য, অশ্বত্থামা, বিকর্ণ, সোমদত্তপুত্র (ভূরিশ্রবা) ও জয়দ্রথ। (৮) এবং অন্যান্য নানাবিধ অস্ত্র শস্ত্র সম্পন্ন সমরবিশারদ বীরগণ আমার জন্য জীবন দান করিতে প্রস্তুত আছেন (৯) আমাদিগের, ভীষ্ম কর্ত্তৃক রক্ষিত সৈন্য অপর্য্যাপ্ত কিন্তু ভীম দ্বারা রক্ষিত পাণ্ডব সেনা পর্য্যাপ্ত। † (১০) এক্ষণে আপনারা সকলে স্ব স্ব বিভাগানুসারে সমুদায় ব্যূহ দ্বারে অবস্থান পূর্ব্বক ভীষ্মকে রক্ষা করুন। (১১)

---

* যৎকালে ভীষণ কুরুক্ষেত্র যুদ্ধের উদ্যোগ হইতেছিল, সেই সময় মহর্ষি কৃষ্ণদ্বৈপায়ন অন্ধরাজা ধৃতরাষ্ট্রকে বলিয়াছিলেন, যদি এই সমর দর্শনে তোমার অভিলাষ হয়, তাহা হইলে আমি তোমাকে দিব্য চক্ষু প্রদান করিতে পারি। ধৃতরাষ্ট্র বলিলেন, "আত্মীয় ও জ্ঞাতিবধ আমি দর্শন করিতে ইচ্ছা করি না। কিন্তু যুদ্ধ বিবরণ শ্রবণ করিতে অভিলাষ হয়।" তদনুসারে ব্যাসদেব সঞ্জয় নামক রাজামাত্যকে দিব্যচক্ষু প্রদান করেন তদ্দ্বারা সঞ্জয় কুরু-ক্ষেত্রের কার্য্যকলাপ দর্শন করিয়া অন্ধরাজাকে বলিতেন।

† অপর্য্যাপ্ত ও পর্য্যাপ্ত শব্দের অর্থ ৺ কালিপ্রসন্ন সিংহ তাঁহার মহাভারতে "অপরি-মিত" ও "পরিমিত" করিয়াছেন। কিন্তু টীকাকারদিগের মতানুসরণ করিলে এরূপও লেখা যাইতে পারে যে, অপর্য্যাপ্ত অর্থ যুদ্ধ করিতে অসমর্থ আর পর্য্যাপ্ত অর্থ সমর্থ।

তৎশ্রবণে কুরুবৃদ্ধ পিতামহ ভীষ্ম রাজা দুর্য্যোধনের হর্ষ বিধান জন্য সিংহ-নাদ সহকারে উচ্চৈঃস্বরে শঙ্খধ্বনি করিলেন। (১২) তৎপরে শঙ্খ, ভেরী, পণব, আনক ও গোমুখ সকল আহত ও তাহা হইতে তুমুল শব্দ প্রাদুর্ভূত হইল। (১৩) তৎপর শ্বেতাশ্বসংযুক্ত রথে সমারূঢ় মাধব ও পাণ্ডব (অর্জ্জুন) দিব্য শঙ্খধ্বনি করিলেন। (১৪) হৃষীকেশ পাঞ্চজন্য, ধনঞ্জয় দেবদত্ত ও ভীম-কর্ম্মা বৃকোদর পৌণ্ড্র নামক মহাশঙ্খ বাজাইলেন। (১৫) কুন্তীপুত্র রাজা যুধিষ্ঠির অনন্তবিজয় শঙ্খ, নকুল সুঘোষ শঙ্খ, সহদেব মণিপুষ্পক শঙ্খ। (১৬) এবং কাশীরাজ, মহারথ শিখণ্ডী, ধৃষ্টদ্যুম্ন, বিরাট, অপরাজিত সাত্যকি। (১৭) দ্রুপদ, দ্রৌপদেয়গণ, মহাবাহু সুভদ্রাপুত্র ইহাঁরা সকলেই পৃথক্ পৃথক্ শঙ্খ বাজাইতে লাগিলেন। (১৮) এই তুমল শব্দ ভূমণ্ডল ও নভোমণ্ডল প্রতি-ধ্বনিত করিয়া ধার্ত্তরাষ্ট্রদিগের হৃদয় বিদীর্ণ করিতে লাগিল। (১৯) হে মহী-পতে! সমারব্ধ সমরে ধার্ত্তরাষ্ট্রগণকে যথাযোগ্যরূপে অবস্থিত দর্শনে কপিধ্বজ রথারূঢ় তৃতীয় পাণ্ডব (অর্জ্জুন) শরাসন উত্তোলন পূর্ব্বক হৃষীকেশকে কহি-লেন। (২০) হে অচ্যুত! উভয় সেনার মধ্যস্থলে আমার রথ স্থাপন কর। (২১) সমরাভিলাষে উপস্থিত সৈন্যগণের মধ্যে আমাকে কাহার সহিত সংগ্রাম করিতে হইবে, দুর্ব্বুদ্ধি দুর্য্যোধনের প্রিয়াচরণ বাসনায় যাঁহারা এস্থানে সমাগত হইয়াছেন যাবৎ আমি তাঁহাদিগকে নিরীক্ষণ করি (তাবৎ উভয় সৈন্যমধ্যে রথ স্থাপন কর)। (২২। ২৩)

সঞ্জয় বলিতেছেন, গুড়াকেশ * অর্জ্জুন এইরূপ বলিলে, হৃষীকেশ উভয় সৈন্যের মধ্যস্থলে উত্তম রথ † স্থাপন করিলেন। (২৪) এবং কহিলেন ভীষ্ম দ্রোণ প্রমুখ রণসজ্জায় সমবেত কৌরবগণকে অবলোকন কর। (২৫)

উভয়সৈন্য মধ্যে পার্থ পিতৃব্য, পিতামহ, আচার্য্য মাতুল, ভ্রাতা, পুত্র, পৌত্র, শ্বশুর, ও সুহৃদ্বর্গকে অবলোকন করিলেন। (২৬) কৌন্তেয় (অর্জ্জুন) স্বসমক্ষে সকল বন্ধুবর্গকে অবস্থিত দর্শনে কৃপাবিষ্ট ও বিষণ্ণ হইয়া বলিতে লাগিলেন। (২৭)

---

* যিনি নিদ্রাকে জয় করিয়াছেন, তিনিই গুড়াকেশ।

† খাণ্ডব দাহনকালে ভগবান হুতাশন এই অজেয়—শ্বেতাশ্বযুক্ত রথ ও ত্রিলোক বিজয়ী গাণ্ডীব ধনু এবং দুইটি অক্ষয় তূণীর অর্জ্জুনকে দান করিয়াছিলেন।

(অর্জ্জুন বলিতেছেন) হে কৃষ্ণ! যুদ্ধার্থ উপস্থিত আমার আত্মীয়বর্গকে দর্শন করিয়া, আমার গাত্র অবসন্ন এবং মুখ বিশুষ্ক হইতেছে। (২৮) আমার শরীর কম্পিত ও রোমাঞ্চিত হইতেছে, গাণ্ডীব হস্তচ্যুত হইতেছে, সমুদয় ত্বক দগ্ধ হইতেছে। (২৯) হে কেশব! আমার আর অবস্থান করিবার শক্তি নাই, আমি কেবল দুর্নিমিত্তই দর্শন করিতেছি। (৩০) হে কৃষ্ণ, স্বজনবর্গকে নিধন করা শ্রেয় বোধ করি না, আর আমি জয় ও রাজ্যসুখ আকাঙ্ক্ষা করি না। (৩১) হে গোবিন্দ! রাজ্যে আবশ্যক কি, ভোগসুখেরই বা প্রয়োজন কি, জীবন ধারণেরই বা আবশ্যক কি? যাঁহাদিগের নিমিত্ত রাজ্যভোগ ও সুখের কামনা করিতে হয়, এই সংগ্রামক্ষেত্রে উপস্থিত আচার্য্য, পিতা, পুত্র, পিতামহ মাতুল, শ্বশুব, পৌত্র, শ্যালক ও সম্বন্ধি, জীবন ও ধন দানে কৃতসঙ্কল্প হইয়া অবস্থান করিতেছেন, ফলে ইঁহারা আমাকে বধ করিলেও আমি ইঁহাদিগকে বিনাশ করিতে ইচ্ছা করি না। (৩২, ৩৩, ৩৪) হে জনার্দ্দন! পৃথিবীর কথা দূরে থাকুক ত্রৈলোক্য লাভ হইলেও ইঁহাদিগকে বধ করিতে ইচ্ছা করি না, ফলতঃ ধার্ত্তরাষ্ট্রদিগকে বধ করিলে আমাদের কি প্রীতি লাভ হইবে? (৩৫) এই সকল আততায়ীগণকে * বধ কবিলেও আমাদিগকেই পাপস্পৃষ্ট হইতে হইবে, অতএব সবান্ধব ধার্ত্তরাষ্ট্রদিগকে বধ করা কোন রূপেই উচিত নহে, (বিশেষতঃ) হে মাধব! স্বজনদিগকে বধ করিয়া আমরা কিরূপে সুখী হইব? (৩৬)

যদিও ইঁহাদিগের চিত্ত লোভে অভিভূত হইয়াছে বলিয়াই, ইঁহারা মিত্র-দ্রোহ ও কুলক্ষয়জনিত পাতক দেখিতে পাইতেছেন না, তথাপি হে জনার্দ্দন! আমরা সেই কুলক্ষয়-জনিত পাপ দর্শন করিয়াও কিরূপে (অজ্ঞের ন্যায়) ইহা হইতে নিবৃত্ত থাকিব না। (৩৭, ৩৮) কুলক্ষয় হইলে সনাতন কুলধর্ম্ম নষ্ট হয়,

* অগ্নি দ্বারা গৃহদাহকাবী, বিষ প্রযোগকর্ত্তা, শস্ত্রপাণি, ধনাপহারী, ক্ষেত্র ও দারা অপহারক এই ছয় জন আততায়ী। শাস্ত্রানুসারে আততায়ী বধার্হ, কিন্তু এস্থলে আত্মীয় বলিয়াই এইরূপ উক্ত হইয়াছে। বিবাট রাজসভায় যখন পাণ্ডব ও তাঁহাদিগের আত্মীয়বর্গ সম্মিলিত হইয়া পাণ্ডবদিগের রাজ্যোদ্ধারের মন্ত্রণা করিতেছিলেন, তৎকালে মহাবীর সাত্যকি বলিয়াছিলেন, "এই সকল আততায়ীকে বধ করিলে আমাদিগের কিছু মাত্র পাপ হইবে না।"

